THE BOOK WAS DRENCHED

UNIVERSAL
LIBRARY
OU_184587
UNIVERSAL
LIBRARY

OSMANIA UNIVERSITY LIBRARY

Call No. S 181.41 B 51K Accession No. 57451

Author भट्टाचार्य

Title कारिकावली- मुक्तावली 1951

This book should be returned on or before the date last marked below.

॥ श्रीः ॥

❋ काशी-संस्कृत-ग्रन्थमाला ❋

६

(न्यायविभागे (१) प्रथमं पुष्पम्)

श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचिता

कारिकावली-मुक्तावली

श्रीमहादेवभट्टारब्धेन श्रीदिनकरभट्टप्रपूरितेन

(दिनकरी) प्रकाशाख्यव्याख्यानेन श्रीरामरुद्रभट्टाचार्यारब्धेन

पण्डितराजश्रीराजेश्वरशास्त्रिप्रपूरितेन

(रामरुद्री) तरङ्गिण्याख्यव्याख्यानेन च विभूषिता ।

श्रीपूज्यपादगुरुवरपण्डितराज श्रीराजेश्वरशास्त्रिद्राविडमहोदयानामन्तेवासिना

काशीस्थसाङ्गवेदमहाविद्यालयोपाध्यक्षेण

श्रीहरिरामशुक्लन्यायाचार्येण सम्पादिता ।

(सुपरिष्कृतं द्वितीयं संस्करणम्)

प्रकाशकः

जयकृष्णदास हरिदास गुप्तः,

चौखम्बा संस्कृत सीरिज आफिस,

विद्याविलास प्रेस, बनारस

वि. सं. २००८] [ई० सन् १९५१

प्रकाशकः

जयकृष्णदास हरिदास गुप्तः-

चौखम्बा संस्कृत सीरिज आफिस

बनारस-१

Checked 1963

सर्वेऽधिकाराः प्रकाशकाधीनाः

Checked 196

मुद्रकः—

विद्याविलास प्रेस,

बनारस-१

श्रीगुरुःशरणम् ।

किञ्चित्प्रास्ताविकम्

अथेदं पूज्यवरैः श्रीमद्भिर्गुरुवरैः प्रपूरितरामरुद्रीटीकासनाथदिनकरीव्याख्यासहिताया न्यायसिद्धान्तमुक्तावल्या द्वितीयं संस्करणं विपश्चिदपश्चिमानां पुरत उपह्रियते। मुक्तावलीरचयितुर्विश्वनाथन्यायपञ्चाननस्याधमर्णं सर्वमेव नैयायिककुलं किम्बहुना पण्डितकुलमिति ग्रन्थस्यास्य विषये किं विशेषतो वक्तव्यम् । यद्यपि चान्या बह्व्यः सन्ति व्याख्याः सिद्धान्तमुक्तावल्यास्तथापि मुक्तावलीप्रकाशापरनाम्नी दिनकरीव्याख्या सर्वा अपि ता अतिशेते इत्यपि न तिरोहितं सूक्ष्मेक्षिकया तामवलोकयताम्। गोलोकीत्यादिषु क्रोडपत्रग्रन्थेषु तस्या उद्धरणमपि एतदेवोपोद्बलयति । यद्यपि कैश्चिद्व्याख्यातृभिर्बहुशः कृतमस्ति दिनकर्याः खण्डनं, परं वस्तुस्थितिमालोचयतां मर्मज्ञानां पुरतः स प्रयत्नो विफल एवेति स्पष्टमनुभवपथमारोहत्येव ।

दिनकरीव्याख्याया यथावत्तात्पर्यस्फोरिणी मुक्तावल्याश्चानेकत्र भावं प्रकटयन्ती रामरुद्रीव्याख्या अपि अनितरसाधारण्येव यद्यपि, तथापि तस्याः शब्दखण्डान्ते भाग एव विश्रान्तेः, गुणनिरूपणे तादृश्या एव दिनकरीव्याख्याया आवश्यकतामनुभवन्तोपि विद्वांसो विद्यार्थिनश्च तस्या अभावेन बहोर्दिनादिमां त्रुटिमनुभवन्ति स्म। सेयं त्रुटिः साक्षाद्विश्वनाथमूर्तिभिः प्रातःस्मरणीयैरस्मद्गुरुवरैः सर्वथा दूरीकृतेति तु विजानन्त्येव विद्वांसः । स्वकीयेऽल्पीयस्येव वयसि विरचितोऽयं ग्रन्थः रामरुद्र्याः सर्वथैव सादृश्यमावहन् क्वचित्तु गुणत्वजातिसाधनपाकजप्रक्रियादिविचारावसरे पूर्वग्रन्थापेक्षयापि च विचारगाम्भीर्यमुद्वहन् आन्तं रामरुद्रीत्यन्वर्थनामधारणे सर्वथा योग्य एवेत्यत्र न विप्रतिपत्तिलेशोपि । नात्यन्तमाकर्षकेपि प्रथमसंस्करणे एतावत्येव कालेऽस्य द्वितीयं संस्करणं विदुषामेतद्ग्रन्थे स्नेहातिशयं व्यञ्जयत्येव। गुणनिरूपणविषये यावान्विचारोऽत्र ग्रन्थे उपलभ्यते तावतामेकत्र क्वचिदपि ग्रन्थे लब्धिरशक्यैवेत्यपि न विदुषां तिरोहितम् । ग्रन्थस्यास्यान्तिमसंशोधनपत्र(प्रूफ)मात्रसंशोधनकार्यमङ्गीकुर्वन्तं मामप्रदर्श्यैव केषाञ्चित्तेषां प्रकाशनेन संशोधकान्तरकृताः, इतरत्राच मदीयानवधानतया, सीसकाक्षरसंयोजकदोषेण वा जाता अशुद्धीः संशोध्य गुणैकपक्षपातिनो विद्वांसोऽनुगृह्णीयुरिति साञ्जलिबन्धमभ्यर्थयते ।

विदुषामनुचरः—
हरिराम शुक्लः

सिद्धान्तमुक्तावलीस्थविषयानुक्रमणिका

विषयः	पृष्ठतः	पृष्ठपर्यन्तम्
१ समाप्तपुनरात्तस्यविचारः	१	३
२ अनुबन्धादिनिरूपणम्	४	९
३ मङ्गलवादः	६	१७
४ ईश्वरानुमानम्	१८	२९
५ पदार्थनिरूपणम्	३०	४७
६ द्रव्यत्वजातिसाधनम्	४८	४९
७ तमसोऽतिरिक्तद्रव्यत्वसाधनम्	५०	५१
८ तत्खण्डनम्	५२	२
९ गुणविभागः	५३	५३
१० कर्मविभागः	५४	५४
११ सामान्यनिरूपणम्	५५	५६
१२ जातिबाधकनिरूपणम्	५७	५९
१३ सत्ताजातिसाधनम्	६१	६२
१४ विशेषनिरूपणम्	६२	६४
१५ समवायनिरूपणम्	६५	६८
१६ अभावनिरूपणम्	६९	७५
१७ सप्तपदार्थसाधर्म्यनिरूपणम्	७५	७५
१८ पञ्चपदार्थसाधर्म्यनिरूपणम्	७६	७६
१९ आद्यपदार्थत्रयसाधर्म्यनिरूपणम्	७७	७७
२० गुणादिषट्पदार्थसाधर्म्यनिरूपणम्	७७	७८
२१ सामान्यादिचतुष्टयसाधर्म्यनिरूपणम्	७८	७८
२२ पारिमाण्यत्वभिन्नपदार्थसाधर्म्यनिरूपणम्	७८	८०
२३ प्रासङ्गिकं कारणत्वनिरूपणम्	८०	८५
२४ अन्यथासिद्धनिरूपणम्	८६	९१
२५ समवाय्यसमवायिकारणत्वरूपसाधर्म्यनिरूपणम्	९२	९३
२६ नित्यद्रव्यभिन्नसाधर्म्यनिरूपणम्	९३	९३
२७ द्रव्यमात्रसाधर्म्यनिरूपणम्	९४	९४
२८ पञ्चद्रव्यसाधर्म्यनिरूपणम्	९४	९५
२९ कालाकाशात्मदिशां साधर्म्यनिरूपणम्	९५	९६
३० पृथिव्यादिपञ्चानां साधर्म्यनिरूपणम्	९६	९६
३१ पृथिव्यादिचतुष्टयसाधर्म्यनिरूपणम्	९७	९७
३२ आकाशशरीरिणां साधर्म्यनिरूपणम्	९७	१००
३३ पृथिव्यादित्रयसाधर्म्यनिरूपणम्	१०१	१०१

विषयः	पृष्ठतः	पृष्ठपर्यन्तम्
३४ पृथिवीजलयोः साधर्म्यनिरूपणम्	१०१	१०१
३५ पृथिवीतेजसोः साधर्म्यनिरूपणम्	१०१	१०२
३६ भूतात्मनोः साधर्म्यनिरूपणम्	१०२	१०२
३७ वैधर्म्यनिरूपणम्	१०२	१०२
३८ सामान्यतो द्रव्याणां गुणनिरूपणम्	१०३	१०३
३९ पृथिवीलक्षणनिरूपणम्	१०४	१०५
० पृथिवीत्वे जातित्वसाधनम्	१०५	१०७
१ पाषाणे गन्धवत्त्वसाधनम्	१०७	१०९
४२ पृथिवीविभागः	१११	११२
४३ अवयविसिद्धिः	११२	११४
४४ परमाणुसाधनम्	११५	११६
४५ अनित्यपृथिवीविभागः	११७	११७
४६ शरीरनिरूपणम्	११८	१२०
४७ पार्थिवेन्द्रियविषयनिरूपणम्	१२०	१२२
४८ जलत्वजातिसाधनम्	१२३	१२३
४९ जलविशेषगुणनिरूपणम्	१२४	१२७
५० [illegible]लीयेन्द्रियविषयनिरूपणम्	१२६	१२९
५१ तेजोलक्षणनिरूपणम्	१३०	१३१
५२ तैजसशरीरेन्द्रियनिरूपणम्	१३१	१३२
५३ सुवर्णस्य तैजसत्वसाधनम्	१३३	१३६
५४ वायुलक्षणनिरूपणम्	१३७	१३८
५५ वायुविभागः	१३९	१४०
५६ आकाशसाधनम्	१४१	१४४
५७ आकाशेन्द्रियनिरूपणम्	१४४	१४५
५८ काललक्षणनिरूपणम्	१४५	१४५
५९ कालप्रमाणनिरूपणम्	१४६	१४८
६० कालोपाधिनिरूपणम्	१४९	१५०
६१ दिङ्निरूपणम्	१५०	१५०
६२ दिशि प्रमाणकथनम्	१५०	१५१
६३ आत्मत्वजातिनिरूपणम्	१५२	१५३
६४ आत्मनि प्रमाणकथनम्	१५४	१५५
६५ शरीरात्मवादखण्डनम्	१५५	१५६
६६ इन्द्रियात्मवादखण्डनम्	१५६	१५७
६७ मन आत्मवादखण्डनम्	१५८	१५९
६८ विज्ञानात्मवादखण्डनम्	१५९	१६१
६९ क्षणिकशरीरात्मवादखण्डनम्	१६२	१६३
७० नित्यविज्ञानात्मवादखण्डनम्	१६४	१६७
७१ साङ्ख्यमतखण्डनम्	१६७	१७१

विषयः	पृष्ठतः	पृष्ठपर्यन्तम्
७३ आत्मप्रमाणनिरूपणम्	१७१	१७२
७४ प्रत्यक्षलक्षणम्	१७३	१७६
७४ अनुमित्यादिलक्षणम्	१७७	१७८
७५ प्रत्यक्षविभागनिरूपणम्	१७९	१७९
७६ प्रत्यक्षविषयकथनम्	१७९	१८१
७७ स्वद्मनोयोगस्य ज्ञानहेतुत्वसाधनम्	१८१	१८४
७८ मनोग्राह्यविषयकथनम्	१८२	१८५
७९ निर्विकल्पकनिरूपणम्	१८६	१८७
८० इन्द्रियनिरूपणम्	१८८	१८९
८१ षड्विधसन्निकर्षनिरूपणम्	१८९	१९२
८२ विशेषणतासन्निकर्षनिरूपणम्	१९३	१९४
८३ योग्यानुपलब्धिविचारः	१९५	२०२
८४ सामान्यलक्षणानिरूपणम्	२०२	२०६
८५ ज्ञानलक्षणायोगजनिरूपणम्	२०७	२०९
८६ अनुमितिनिरूपणम्	२०९	२१०
८७ अनुमितिकारणविचारः	२११	२१५
८८ पूर्वपक्षव्याप्तिनिरूपणम्	२१६	२१९
८९ सिद्धान्तव्याप्तिनिरूपणम्	२२०	२३०
९० पक्षतानिरूपणम्	२३१	२३७
९१ हेत्वाभाससामान्यनिरूपणम्	२३८	२४५
९२ हेत्वाभासविशेषनिरूपणम्	२४६	२६०
९३ उपमाननिरूपणम्	२६०	२६२
९४ शाब्दबोधनिरूपणम्	२६३	२६४
९५ शक्तिनिरूपणम्	२६५	२६६
९६ शक्तिग्रहोपायनिरूपणम्	२६६	२७६
९७ जातिशक्तिवादविचारः	२७६	२८०
९८ तदादिपदार्थनिरूपणम् (दिनकरी)	२८१	२८२
९९ पदविभागः	२८२	२८५
१०० लक्षणानिरूपणम्	२८५	३०२
१०१ आसत्तिनिरूपणम्	३०२	३०८
१०२ योग्यतानिरूपणम्	३०९	३११
१०३ आकाङ्क्षानिरूपणम्	३१२	३१४
१०४ तात्पर्यनिरूपणम्	३१५	३१७
१०५ स्मरणनिरूपणम्	३१९	३२७
१०६ मनसि प्रमाणकथनम्	३२७	३२८
१०७ मनसोऽणुत्वसाधनम्	३२८	३३२
१०८ गुणत्वजातिसाधनम्	३३३	३३७
१०९ गुणलक्षणनिरूपणम्	३३८	३४४

विषयः	पृष्ठतः	पृष्ठपर्यन्तम्
११० मूर्तगुणनिरूपणम्	३४५	३४७
१११ अमूर्तगुणनिरूपणम्	३४६	३४६
११२ उभयगुणनिरूपणम्	३४९	३५०
११३ अनेकाश्रितगुणनिरूपणम्	३५१	३५१
११४ विशेषगुणनिरूपणम्	३५२	३५५
११५ सामान्यगुणनिरूपणम्	३५६	३५९
११६ द्वीन्द्रियग्राह्यनिरूपणम्	३६०	३६०
११७ एकैकेन्द्रियग्राह्यगुणनिरूपणम्	३६०	३६०
११८ अकारणोत्पन्नगुणनिरूपणम्	३६१	३६१
११९ कारणगुणोत्पन्नगुणनिरूपणम्	३६२	३६४
१२० कर्मजगुणनिरूपणम्	३६५	३६६
१२१ असमवायिगुणनिरूपणम्	३६६	३६८
१२२ निमित्तकारणगुणनिरूपणम्	३७९*	३१०
१२३ द्विविधकारणगुणनिरूपणम्	३११	३१२
१२४ रूपनिरूपणम्	३१३	३८६
१२५ चित्ररूपनिरूपणम्	३८६	३९२
१२६ रसनिरूपणम्	३९४	३९४
१२७ गन्धनिरूपणम्	३९४	३९५
१२८ स्पर्शनिरूपणम्	३९५	३९५
१२९ पीलुपाकवादनिरूपणम्	३९५	४२१
१३० पिठरपाकवादनिरूपणम्	४२२	४२४
१३१ संख्यानिरूपणम्	४२५	४२६
१३२ परिमाणनिरूपणम्	४५७	४६३
१३३ पृथक्त्वनिरूपणम्	४६३	४६४
१३४ संयोगनिरूपणम्	४६५	४६८
१३५ प्रसङ्गतः कर्मनिरूपणम् (रामरुद्री)	४६८	४७०
१३६ विभागनिरूपणम्	४७१	४७३
१३७ परत्वापरत्वनिरूपणम्	४७३	४७४
१३८ बुद्धिनिरूपणम्	४७४	४७५
१३९ भ्रमनिरूपणम्	४७६	४७९
१४० संशयनिरूपणम्	४८०	४८१
१४१ अप्रमाजनकदोषनिरूपणम्	४८२	४८३
१४२ प्रमाजनकगुणनिरूपणम्	४८३	४८४
१४३ प्रामाण्यपरस्त्वनिरूपणम्	४८५	४८६
१४४ अन्यथाख्यातिनिरूपणम्	४८७	४८९
१४५ व्याप्तिग्रहोपायनिरूपणम्	४९०	४९१

* प्रमादवशादितः ३२४ पर्यन्तं क्रमाङ्का विपरीता अभवन्, अतः सशोध्यानुगृह्णन्तु पाठकाः।

विषयः	पृष्ठतः	पृष्ठपर्यन्तम्
१४६ उपाधिनिरूपणम्	४९२	४९४
१४७ उपाधिप्रयोजननिरूपणम्	४९५	४१६
१४८ शब्दोपमानप्रामाण्यव्यवस्थापनम्	४९६	५००
१४९ व्यतिरेकव्याप्तिनिरूपणम्	५०१	५०३
१५० अर्थापत्तेःप्रमाणान्तरत्वनिरासः	५०३	५०४
१५१ सुखनिरूपणम्	५०४	५०४
१५२ दुःख निरूपणम्	५०४	५०४
१५३ इच्छानिरूपणम्	५०५	५०६
१५४ द्वेषनिरूपणम्	५०९	५१०
१५५ प्रयत्ननिरूपणम्	५१०	५१२
१५६ विध्यर्थनिरूपणम्	५१३	५१९
१५७ विधिनिरूपणम्	५२१	५२८
१५८ यत्ननिरूपणम्	५२९	५३६
१५९ गुरुत्वनिरूपणम्	५३७	५३७
१६० स्थितिस्थापकनिरूपणम्	५३८	५४०
१६१ अदृष्टनिरूपणम्	५४१	५४५
१६२ शब्दनिरूपणम्	५४५	५४७

प्राप्तिस्थानम्—

जयकृष्णदास-हरिदासगुप्तः

चौखम्बा संस्कृत सीरिज आफिस

बनारस-१

श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचित—

न्यायसिद्धान्तमुक्तावली

श्रीमहादेवभट्टारब्धेन श्रीदिनकरभट्टप्रपूरितेन प्रकाश(दिनकरी)व्याख्यानेन तदुपरि श्रीरामरुद्रभट्टाचार्यारब्धया पण्डितराजश्रीराजेश्वरशास्त्रिप्रपूरितया तरङ्गिणी(रामरुद्री)टीकया सहिता ।

मुक्तावली ।

चूडामणीकृतविधुर्वलयीकृतवासुकिः ।
भवो भवतु भव्याय लीलाताण्डवपण्डितः ॥ १ ॥

दिनकरी (प्रकाशः) ।

लक्ष्मीपादयुगं प्रणम्य पितरं श्रीबालकृष्णाऽभिधं
भारद्वाजकुलाम्बुधौ विधुमिव श्रीगौरवाऽऽस्याऽम्बुजात् ।
ज्ञात्वाऽशेषमतं मितेन वचसा सिद्धान्तमुक्तावली–
गूढार्थांस्तनुते यथामति महादेवः परेषां मुदे(१) ॥ १ ॥

तत्र तावद्भाषापरिच्छेदव्याख्यानं चिकीर्षुर्विश्वनाथपञ्चाननो निर्विघ्नपरिसमाप्तये कृतस्येश्वरनिर्देशरूपमङ्गलस्य शिष्या अप्येवं कुर्युरिति शिष्यशिक्षायै निबन्धनं कुर्वन्नीश्वरं प्रार्थयते–**चूडामणीकृतेति । लीलेति ।** इदं च विशेष्यं, नातः समाप्तपुनरात्तत्वं दोषः ।

रामरुद्री (तरङ्गिणी) ।

तातस्य तर्कसरसीरुहकाननेषु रामेश्वरस्य तरणेश्चरणौ प्रणम्य ।
श्रीरामरुद्रसुकृती कृतिनां हिताय लीलावशाल्किमपि कौतुकाप्तनोति ॥ १ ॥
जाने कदाचिदपि नैव शिवस्वरूपात्तातात्पुनः परमदैवतमन्यदत्र ।
तस्मादिमां कृतिमिहाद्य तरङ्गिणीत्वात्पाद्याय तच्चरणयोः परिकल्पयामि ॥ २ ॥
तरङ्गिणीयं सफलोक्तिवाचो मुदे बुधानां तरसा विदे च ।
भूयात्सदाऽल निखिलाऽण्डभाण्डकीर्तिप्रभाजातविभूषितानाम् ॥ ३ ॥

सिद्धान्तमुक्तावलीव्याख्याऽभिकीर्षुर्महादेवः प्रारिप्सितग्रन्थविघ्नविघाताय कृतं तातनमस्काररूपं मङ्गलं शिष्यशिक्षार्थमादौ निबध्नाति—**लक्ष्मीति । गूढार्थांस्तनुते**—विस्तारयतीत्यर्थः । अन्यत्र(२) विस्तारो नाम नानाजनसम्बन्धः, प्रकृते तु स्वविषयकज्ञानवत्त्वमेवेति भावः । **तत्र तावदिति ।** निपातो वाक्याऽलङ्कारे । **शिष्या अप्येवं कुर्युरितीति ।** अत्र "इति" शब्दस्य उक्ताऽऽकारकाऽभिप्रायोऽर्थः । इतिशब्दस्याऽव्ययतया तृतीयाऽन्तत्वेन शिष्या अप्येवं कुर्युरित्याकारकाऽभिप्रायेणेत्यर्थः पर्यवसितः । एतेन शिष्या अप्येवं कुर्युरित्याकारकज्ञानेच्छाशब्दानां शिष्यशिक्षाऽनात्मकतया "कुर्युरिति शिष्यशिक्षायै" इति ग्रन्थाऽसङ्गतिः, स्वकर्तव्यत्वेन ज्ञानस्यैव शिक्षाशब्दार्थत्वादिति निरस्तम् । **समाप्तपुनरा-**

(१) **'कृते' इत्यपि पाठः ।** (२) **"अर्थस्य" इति पाठोऽपि ।**

दिनकरी ।

वस्तुतस्तु—विधोः किमिति चूडामणीकरणं ? किमर्थं वा वासुकेर्वलयीकरणम् ? इत्याकाङ्क्षायां(१) निराकाङ्क्षप्रतिपत्तिर्न सम्भवतीति लीलेत्यादिविशेषणाऽनुक्तौ विवक्षिताऽन्वयबोधाभावान्नाऽयमत्र दोषः। उत्थाप्याऽऽकाङ्क्षया विशेषणाऽन्वय एव तत्प्रसरादिति। लीलया ताण्डवं नृत्यं, तत्र पण्डितोऽभिज्ञ इत्यर्थः। अनेन च नृत्यविशिष्टतया स्मृतिविषयत्वात् प्रार्थिता अर्थाः सम्भवन्त्येवेति सूचितम्। ननु भूषणरहितस्य कथं नृत्यं ? तत्राऽऽह—

रामरुद्री ।

त्तत्वमिति । क्रियाऽन्वयेन शान्ताऽऽकाङ्क्षस्य विशेष्यवाचकपदस्य विशेषणान्तराऽन्वयार्थं पुनरनुसन्धानं समाप्तपुनरात्तत्व काव्यदोषः। प्रकृते हि "चूडामणीकृतविधुर्वलयीकृतवासुकिः। भवो भवतु भव्याय लीलाताण्डवपण्डित" इत्यत्र भवो भव्याय भवत्वित्येतावताऽन्वयबोधेनैव भवपदस्य शान्ताऽऽकाङ्क्षतयोत्तरत्र विद्यमानस्य "लीलाताण्डवपण्डित" इति विशेषणस्याऽन्वयार्थं स भवः पुनः कीदृश ? इत्याकाङ्क्षासम्पादनाय भवपदेन भवस्मरणस्यावश्यकतया भवति समाप्तपुनरात्तत्वं दोष इति भावः।

ननु जातितद्भिन्नप्रवृत्तिनिमित्तकशब्दानां मध्ये जातिप्रवृत्तिनिमित्तकमेव विशेष्यवाचकमिति नियमः। अन्यथा नीलोत्पलमित्यादिवदुत्पलनीलमित्यादेरपि प्रयोगस्य प्रसङ्गात्, तथाहि—समासविधायकसूत्रे यत्प्रथमान्तपदनिर्दिष्टं तत्समासे पूर्वं निपततीति नियमः, "विशेषण विशेष्येण" इति कर्मधारयविधायकसूत्रे विशेषणवाचकपदस्य प्रथमान्तपदनिर्दिष्टत्वात्पूर्वनिपातनियमः, नीलोत्पलयोर्विशेषणविशेष्यभावे नियामकाभावे उत्पलस्य विशेषणत्वविवक्षयोत्पलनीलमिति प्रयोगः स्यादेव, तस्माज्जातिप्रवृत्तिनिमित्तकत्वादुत्पलपदस्य विशेष्यवाचकत्वमेवेत्यवश्यमङ्गीकरणीयम्, तथा च शिवशरीरवृत्तिजातिविशेषप्रवृत्तिनिमित्तकस्य भवशब्दस्य विशेषणपरत्वाऽनुपपत्तिः। न चैकव्यक्तिकत्वाद्भवत्व न जातिरिति वाच्यम्। कल्पभेदेन शिवशरीरस्यापि भिन्नत्वात्। न च भवः सर्वं जानातीति प्रतीत्यनुपपत्तिः, अवच्छेदकतासम्बन्धेन ज्ञानवत्त्वबोधकत्वस्यैश्वरज्ञानस्य किञ्चिदनवच्छिन्नत्वेन स्वीकर्तुमशक्यत्वादिति वाच्यम्। स्वाश्रयावच्छिन्नत्वसम्बन्धेन तादृशवैजात्यविशिष्टचैतन्य(चेतन)स्यैव भवपदार्थत्वोपगमात्। स्वाश्रयावच्छिन्नत्व स्वनिष्ठकर्माऽसाधारणकारणयत्नवत्त्वसम्बन्धेन स्वाश्रयविशिष्टत्वमिति बोध्यम्। न च भवत्यस्माज्जगदिति व्युत्पत्त्या जगत्कारणत्वमेव भवपदप्रवृत्तिनिमित्त, न तु जातिविशेष इति वाच्यम्। "योगाद्रूढेर्बलीयस्त्वात्" इत्यभियुक्तोक्त्या शीघ्रोपस्थितिकरूढ्यर्थमादाय शान्ताऽऽकाङ्क्षाऽन्वयबोधोपपत्तौ विलम्बोपस्थितिकयोगार्थमादायाऽन्वयबोधाऽनुपपादने समाप्तपुनरात्तत्वदोषस्याऽऽवश्यकत्वादित्यत आह—**वस्तुतस्त्विति । इत्याऽऽकाङ्क्षायामिति** । सत्यामिति शेषः। **निराकाङ्क्षप्रतिपत्तिर्न सम्भवतीति** । स्त्रोत्तराऽनुत्पन्नाऽऽकाङ्क्षाकशाब्दबोधो न भवतीत्यर्थः। **विवक्षिताऽन्वयबोधेति** । विशेष्यवाचकपदेन निरुक्तनिराकाङ्क्षाऽन्वयबोधजननोत्तरं विशेषणाऽन्तराऽन्वयार्थं विशेष्यवाचकपदस्य पुनरनुसन्धानं समाप्तपुनरात्तत्वमिति समाप्तपुनरात्तत्वलक्षणघटकत्वेन विवक्षितो यो निराकाङ्क्षाऽन्वयबोधस्तदभावादित्यर्थः। "लीलेत्यादिविशेषणाऽनुक्ता"वित्यनेन तादृशविशेषणोक्तौ तादृशविशेषणसहितेतरवाक्यजन्याऽन्वयबोध एव विवक्षिताऽन्वयबोधो भवतीति सूचितम्। नन्वेव समाप्तपुनरात्तत्वं काऽपि दोषो न स्यात्, शाब्दबोधमात्रे आकाङ्क्षायाः प्रयोजकत्वेन विशेषणाऽन्तराऽन्वयार्थं स कीदृश ? इत्यादियत्किञ्चिदाकाङ्क्षायाः कल्पनीयतया काऽपि निराकाङ्क्षप्रतिपत्तेरसम्भवादित्यत आह—**उत्थाप्याऽऽकाङ्क्षयेति** । अनियताऽऽकाङ्क्षयेत्यर्थः। क्रियाकारकपदानां परस्पराकाङ्क्षा नियता, पुत्रादिपदानामपि पित्राद्याकांक्षा(२) नियता, एवं प्रयोजनाकाङ्क्षाऽपि नियतैव, प्रयोजनाऽभावे वाक्यार्थस्यैवाऽसिद्धिप्रसङ्गात्। भवः कीदृश ? इत्याद्याऽऽकाङ्क्षा तु न नियता, तथा च नियताकाङ्क्षारहिताऽन्वयबोधोत्तरं विशेष्यवाचकपदस्य पुनरनुसन्धानमेव समाप्तपुनरात्तत्वमिति

(१) 'काङ्क्षया' इत्यपि पाठः। (२) "प्रतियोग्याकाङ्क्षा" इत्यन्यत्र पाठः।

मुक्तावली ।

निजनिर्मितकारिकावलीमतिसङ्क्षिप्तचिरन्तनोक्तिभिः ।
विशदीकरवाणि कौतुकान्ननु राजीवदयावशंवदः ॥ २ ॥

दिनकरी ।

चूणामणीकृतेति । अचूडामणिश्चूडामणिवत् सम्पद्यत इति चूडामणीकृतः, चूडामणीकृतो विधुर्येन स तथोक्तः । **वलयीकृतेति ।** अवलयं वलयवत् सम्पद्यत इति वलयीकृतः, वलयीकृतो वासुकिर्येन स तथेत्यर्थः ॥ १ ॥

शिष्याऽवधानाय प्रतिजानीते—**निजनिर्मितेति ।** निजेन स्वेन निर्मिता रचिता या कारिकावली ताम् । अति, अत्यन्तं, सङ्क्षेपः शब्दसङ्क्षेपो यासु ता अतिसङ्क्षिप्तास्तादृश्यश्च ताश्चिरन्तनानां कणादप्रभृतीनां या उक्तयो वचांसि—वचःप्रतिपाद्या युक्तयस्ताभिरहं विशदीकरवाणि प्रकटीकरोमीत्यर्थः । ननु लीलावत्यादिप्राचीननिबन्धाऽध्ययनेनैव कारिकावलीप्रतिपादितोऽर्थो बोद्धव्य इति किमनेन भवत्कृतविशदनिबन्धेनेत्यत आह—**अतिसङ्क्षिप्तेति ।** तथा च लीलावत्यादिप्राचीननिबन्धेषु ग्रन्थबाहुल्येन बहुतरदुःखहेतुप्रतिपत्तिकतया न बालानां प्रवृत्तिरिति भावः । स्वोत्प्रेक्षामूलकताप्रयुक्ताऽनादरणीयतां निरसितुं चिरन्तनेत्युक्तम् । नन्वित्यवधारणे । तथा च कौतुकादेवेत्यर्थः । एतेन स्वस्य ग्रन्थकरणे क्लेशाऽभावः सूचितः । स्वस्य ग्रन्थकरणे प्रवृत्तौ निमित्तमाह—**राजीवेति ।** राजीवे शिष्ये या दया कृपा, तया वशंवदस्तदधीन इत्यर्थः ॥ २ ॥

ननु ग्रन्थादौ श्रोतृप्रवृत्तये प्रयोजनादि वक्तव्यं भवति, तस्य चेहाऽनुक्तत्वादुपेक्षणीयतैतद्ग्रन्थस्य स्यादित्याशङ्क्य विषयप्रयोजनसम्बन्धाऽधिकारिणः सूचयन्नतिसङ्क्षिप्तत्वादेतद्ग्रन्थस्य सकलपदार्थाऽप्रतिपादकतया कथं बालव्युत्पत्तिरित्याऽऽशङ्कां चैतद्ग्रन्थस्य सकलपदार्थप्रतिपादकत्वप्रदर्शनेन परिहरन्—

"यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्*"

इति भगवद्गुक्तेर्मुक्तावलीसमं स्वकीयग्रन्थं श्रीमति भगवति चाऽर्पयन् स्वकीर्त्यनुवृत्तये

रामरुद्री ।

विवक्षितत्वात् स कीदृश ? इत्याद्युत्थाप्याकाङ्क्षया विशेषणान्तराऽन्वयस्थल एव समाप्तपुनरात्तत्वदोष इति भावः । **अचूडामणिरिति ।** "च्विः स्यादभूततद्भावे" इत्यनेन विहितच्विप्रत्ययान्तचूडामणिशब्दघटितत्वात् उक्तवाक्यादयमर्थो लभ्यत इति भावः ॥ १ ॥

शिष्याऽवधानायेति । शिष्याणामवधान शुश्रूषा, तस्यै इत्यर्थः । वक्तव्याऽर्थस्य विशिष्याऽज्ञाने तत्प्रतिपत्तेरिष्टसाधनत्वाऽग्रहेण शिष्याणां वाक्यश्रवणेच्छा न सम्भवति, प्रतिज्ञया स्वकारिकावलीव्याख्यानस्य कर्त्तव्यत्वज्ञाने कारिकावल्यर्थज्ञानरूपेष्टसाधनत्वस्य ग्रन्थकृद्वाक्येषु सुग्रहत्वेन भवत्येव तच्छ्रवणेच्छेति भावः । **शब्दसङ्क्षेप इति ।** सङ्क्षेपो द्विविधः—शब्दसङ्क्षेपोऽर्थसङ्क्षेपश्च । तत्राऽर्थसङ्क्षेपेण ग्रन्थस्य सकलाऽर्थाऽप्रतिपादकत्वे बालव्युत्पत्तिजनकता न स्यादित्याशङ्क्य सङ्क्षेपपदस्य प्रकृते शब्दसङ्क्षेपमात्रपरत्वमुपदर्शितम् । पद्यस्थाऽतिसङ्क्षिप्तपदस्य प्रयोजनं प्रकटयन्नाह—**नन्वित्यादि ।** **स्वोत्प्रेक्षेति ।** स्वकीयकल्पनामूलकत्वेत्यर्थः । **एतेनेति ।** अनेनाऽवधारणेन ॥ २ ॥

---

* भगवद्गीता ।

मुक्तावली ।

सद्द्रव्या गुणगुम्फिता सुकृतिनां सत्कर्मणां ज्ञापिका
सत्सामान्यविशेषनित्यमिलिताऽभावप्रकर्षोज्ज्वला ।
विष्णोर्वक्षसि विश्वनाथकृतिना सिद्धान्तमुक्तावली
विन्यस्ता मनसो मुदं वितनुतां सद्युक्तिरेषा चिरम् ॥ ३ ॥

दिनकरी ।

ग्रन्थस्य स्वस्य च नाम निबध्नाति—**सद्द्रव्येति** । द्रव्यैः सहिता युक्ता, प्रतिपादकतया । गुणैरपि गुम्फिता युक्ता । सतामुत्क्षेपणादीनां पञ्चानां कर्मणां ज्ञापिका बोधिका । सत् जातिरूपं सामान्यं, विशेषाः, नित्यः समवायः, तैर्मिलिता । यद्वा सन्ति सामान्यविशेषनित्यमिलितानि यस्यां सा । नित्यमिलितं नित्यसम्बन्धः । अभावस्य प्रकर्षः प्रागभावाऽऽदिभेदेन वैलक्षण्यं, तस्य **उज्ज्वला**—प्रकाशिका । **एषा**—बुद्धिस्था । सिद्धान्ता एव मुक्तास्तासा**मावली**—पङ्क्तिः । विष्णोर्नारायणस्य । **वक्षसि**—वक्षःस्थले । **विन्यस्ता**—विशेषतोऽर्पिता । **सुकृतिनां**—पण्डितानाम् । मनसः । **मुदं**—सन्तोषम् । **चिरं**—बहुकालम् । **वितनुतां**—विस्तारयत्वित्यर्थः । ननु युक्तीनामत्राऽसत्त्वात्कथं विदुषां सन्तोषस्तत्राऽऽह—**सद्युक्तिरिति** । सत्यो युक्तयो यस्यां सा तथा । मुक्तावलीसादृश्यं ग्रन्थे द्रव्याऽऽदिपदार्थवत्तया । तथा हि—मुक्तावली **सद्द्रव्या**—साध्यतया द्रव्यवती, द्रव्यसाध्येति यावत्, नानाविधद्रव्यघटिता वा । **गुणेन**—सूत्रेण **गुम्फिता**—निर्मिता । **सुकृतिनां**—पुण्यवतां यानि सन्ति—समीचीनानि भगवद्भजनादिरूपाणि कर्माणि तेषां बोधिका । **सत्सामान्यं**—समीचीना जातिः, विशेषो महत्त्वनिर्मलत्वादिस्ताभ्यां नित्यमनवरतं मिलिता सम्बद्धा । **अभावे**—तेजोऽभावेऽन्धकारे सति **प्रकर्षेणोज्ज्वला**—अर्थप्रकाशिकेति यावत् । यथा मुक्तावली द्रव्यादिसकलपदार्थवती, तथाऽयं ग्रन्थोपीति । अत्र च ग्रन्थे मुक्तावलीसाम्योक्त्या(१) निर्दोषत्वं सूचितम् । अत्र द्रव्यादिपदार्थप्रतिपादकत्वप्रदर्शनेन द्रव्यादयो विषया उक्ताः । पदार्थतत्त्वाऽवधारणं च प्रयोजनं सूचितम् । सम्बन्धश्च प्रतिपाद्यप्रतिपादकभावः । पदार्थतत्त्वाऽवधारणकामोऽधिकारीति ॥ ३ ॥

रामरुद्री ।

सज्जातिरूपमिति । सामान्यमनुगतधर्ममात्रम् । तच्च क्वचिदुपाधि(२)रूपं, क्वचिज्जातिरूपम् । प्रकृतग्रन्थे जातिरूपसामान्यस्यैव निरूपणीयत्वेन जातिरूपसामान्यलाभाय सत्सामान्येत्युक्तमिति भावः । ननु सदित्यस्य सत्ताविशिष्टार्थकत्वेन सत्पदस्य जातिरूपाऽर्थकत्वं लक्षणयैव वाच्यं, सामान्यपदमपि शास्त्रकृत्परिभाषया जातिरूपसामान्य एव सुप्रसिद्धम्, अन्यथा "सामान्यं सविशेषक"मिति मूलेऽपि जात्यतिरिक्तसामान्यव्यावर्तकविशेषणाऽनुक्त्या मूलकारस्य न्यूनता(३)ऽऽपत्तेः सदित्यनर्थकं चेत्यत आह—**यद्वेति** ॥ ३ ॥

---

(१) **'वलीत्वोक्त्या' इत्यपि पाठः ।** (२) **'दखण्डोपाधि' इत्यन्यत्र पाठः ।**

(३) **अनभिधानानुमिताऽबोधकतावत्पुरुषत्वं ग्रन्थकृन्निष्ठं न्यूनत्वम् । तादृशपुरुषोच्चरितत्वं च मूलस्य न्यूनत्वम् ।**

कारिकावली।

नूतनजलधररुचये गोपवधूटीदुकूलचौराय।

मुक्तावली।

विघ्नविघाताय कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति–नूतनेति। **ननु मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणं, विनापि मङ्गलं**

दिनकरी।

ग्रन्थाऽऽरम्भसमये कृतस्य मङ्गलस्य तन्निबन्धनस्य च वैयर्थ्यमाशङ्क्य फलं दर्शयति—**विघ्नविघातायेति**। प्रारब्धुमिष्टस्य ग्रन्थस्येति शेषः। यद्यप्यत्र घातपदस्योत्पत्तिमदभावपरतया विपदमनर्थकमिति प्रतिभाति, तथापि विशिष्टवाचकानां पदानां सति पृथक् विशेषणवाचकपदसमवधाने विशेष्यमात्रपरतायाः "स कीचकैर्मारुतपूर्णरन्ध्रै"रित्यत्र—

"कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धता"

इति कोशपर्यालोचनया(१) मारुतपूर्णरन्ध्रत्वविशिष्टवेणुबोधककीचकपदे दृष्टत्वाद् घातपदमभावमात्रपरं द्रष्टव्यम्।

ननु निष्फलत्वान्मङ्गलाऽऽचरणमयुक्तं, नच निष्फलत्वमेव तस्याऽसिद्धं, फलविशेषशून्यत्वेन हेतुना तस्य साधनादित्यभिप्रायेणाऽऽशङ्कते–**नन्विति**। मङ्गलस्य कारणत्वाऽभावे

रामरुद्री

विपदमनर्थकमिति। इद चोपसर्गाणा वाचकत्वमताऽभिप्रायेण। अन्यथा तेषां द्योतकत्वपक्षे किञ्चिदर्थाऽवाचकतयोपसर्गाणा शक्तत्वरूपपदत्वाऽसम्भवेन विपदमित्यसङ्गतमेव स्यात्। अत एव समाधानेऽपि "विशिष्टवाचकाना पदाना सति पृथक् विशेषणवाचकपदसमवधाने विशेष्यमात्रपरत्वम्" इति न्यायेन विपदसन्निहितघातपदस्याभावमात्रपरताप्रदर्शनमपि सङ्गच्छते, अन्यथा विपदस्य किञ्चिदर्थाऽवाचकत्वेन विशेषणवाचकत्वाऽसम्भवात् विघातपदस्योक्तन्यायविषयता न स्यादिति ध्येयम्। विशिष्टवाचकपदस्याऽपि विशेषणबोधकत्वरूपविशेषणवाचकत्वस्याऽक्षततया तेषा क्वाऽपि विशिष्टवाचकता न स्यादित्यतः पृथगित्युक्तम्। विशिष्टवाचकपदाऽतिरिक्तमित्यर्थः।

ननु "विघ्नविघाताय कृत मङ्गलम्" इति मूलेन मङ्गले विघ्नध्वसजनकत्वस्यैव सूचितत्वेन तदुपरि "ननु" इत्यादिमूलेन विघ्नध्वस प्रति मङ्गल न कारणमित्याशङ्का यद्यपि युज्यते, तथापि "न वा समाप्तिं प्रति कारणम्" इत्युक्तिरसङ्गतेत्यतस्तदभिप्रायान्तरेणाऽवतारयति—**ननु निष्फलत्वादिति। फलविशेषशून्यत्वहेतुनेति**। यद्यपि ज्योतिष्टोमादावपि पुत्रादिरूपफलविशेषशून्यत्वेन फलविशेषशून्यत्वं न निष्फलत्वव्याप्य, तथाऽपि तत्पदेन यावत्फलविशेषशून्यत्वस्य विवक्षितत्वात् यावद्विशेषाऽभावस्य च सामान्याभावव्याप्यत्वान्नोक्ताऽसङ्गतिरिति भावः। नचैवं निष्फलत्वसिद्धये यावत्फलविशेषशून्यत्वमेव साधनीयम्, मूले तु "मङ्गलं न विघ्नध्वंसं प्रति न वा समाप्तिं प्रति कारणम्" इत्यनेन फलद्वयशून्यत्वमेव साध्यते, तेन च न यावत्फलविशेषशून्यत्वरूपहेतुसिद्धिरिति कथं प्रकृतोपयोग इति वाच्यम्। पशुपुत्रादिफलशून्यत्वस्य मङ्गले सर्वसम्मतत्वेन तस्य साधनाऽनर्हतया प्राचीननवीनाभ्यां समाप्तिविघ्नध्वंसयोरेव फलत्वाऽङ्गीकारेण तदुभयफलशून्यत्वसाधने यावत्फलविशेषशून्यत्वरूपहेतुसिद्धेरावश्यकत्वादिति भावः। न चैवमपि प्राचीनैर्मङ्गलस्य समाप्तिं प्रति विघ्नध्वंसद्वारैव कारणत्वाऽङ्गीकाराद्विघ्नध्वंसं प्रत्यकारणत्वे समाप्तिं प्रत्यपि विघ्नध्वंसद्वारा कारणत्वमसम्भवदुक्तिकमेवेति पृथक् समाप्तिकारणत्वनिषेधो

(१) 'कोशात्' इति पाठः।

मुक्तावली ।

नास्तिकादीनां ग्रन्थेषु निर्विघ्नपरिसमाप्तिदर्शनादिति चेन्न । अविगीत-

दिनकरी ।

व्यतिरेकव्यभिचार(१)रूपहेतुमाह—**विनाऽपीति । निर्विघ्नपरिसमाप्तीति ।** विघ्नध्वंसपूर्वकसमाप्तीत्यर्थः । न च तत्र जन्मान्तरीयमङ्गलकल्पनान्न व्यभिचार इति वाच्यम् । भोगाऽऽदिनाऽपि नास्तिकाऽऽत्मनि विघ्ननाशसम्भवेन जन्मान्तरीयमङ्गलसन्देहेन व्यभिचारसंशयसम्भवात् । अत्र कादम्बर्यादिग्रन्थे मङ्गलसत्त्वेऽपि समाप्तेरदर्शनेनाऽन्वयव्यभिचारोऽपि दोषो बोध्यः ।

व्यभिचारसन्देहस्य ग्राह्यसंशयरूपतया कारणताप्रत्यक्ष एव प्रतिबन्धकत्वं, न त्वनु-

रामरुद्री ।

व्यर्थ एवेति वाच्यम् । यतो हि विघ्नध्वसद्वारैव समाप्तिं प्रति मङ्गलस्य प्राचीनै. सर्वत्र कारणत्वोपगमे "विघ्नध्वंसो मङ्गलफलम्" इति वादिनो नवीनस्य मते "न चैव स्वतःसिद्धविघ्नविरहवता कृतस्य" इत्याऽऽदिना विघ्नाऽत्यन्ताभाववता कृतस्य मङ्गलस्य निष्फलत्वाऽऽपत्तिः प्राचीनैः कर्तुमशक्या, स्वमतेऽपि तत्र विघ्नध्वसरूपद्वाराऽभावेन मङ्गले निष्फलत्वस्यैवाङ्गीकरणीयत्वात् । तथा च प्राचीनानामपूर्वद्वारैव मङ्गलस्य समाप्तिहेतुता सम्मतेति न कश्चिद्दोष इति भावः । न चैव "विघ्नध्वंसस्तु मङ्गलस्य द्वारम्" इति प्राचीनोक्तिविरोध इति वाच्यम् । द्वारत्व हि तज्जन्यत्वे सति तज्जन्यजनकत्वं, तच्चाऽपूर्वद्वारा मङ्गलस्य समाप्तिहेतुत्वेऽपि मङ्गलजन्यसमाप्तिं प्रति विघ्नध्वंसस्य प्रतिबन्धकससर्गाभावविधया कारणत्वेन विघ्नध्वसस्य मङ्गलजन्यत्वेन च सम्भवत्येवेति मङ्गलस्याऽपूर्वद्वारा समाप्तिकारणत्वेऽपि विघ्नध्वंसस्य द्वारतासभम्वात् । न चैवमप्यपूर्वस्य द्वारतामते स्वजन्याऽपूर्वसम्बन्धेनैव मङ्गलस्य हेतुताया वक्तव्यतया स्वजन्यविघ्नध्वंसवत्त्वसम्बन्धेन मङ्गलस्य कारणताप्रतिपादन मुक्तावलीव्याख्यानकृतामसङ्गतमेवेति वाच्यम् । यत्र मङ्गलजन्यविघ्नध्वसो वर्तते तत्राऽनन्तस्थलेषु नानाऽपूर्वव्यक्तीनां कल्पने गौरवात् तादृशस्थले(२) स्वजन्यविघ्नध्वससम्बन्धेनैव मङ्गलस्य समाप्तिहेतुता युक्तेत्यभिप्रायकतया तदुक्तिसङ्गतेः । नचैवमपि समाप्तिं प्रति मङ्गलस्य क्वचित्स्वजन्यविघ्नध्वससम्बन्धेन हेतुता, क्वचित्स्वजन्यापूर्वसम्बन्धेनेत्यायातं, तथा च पृथक् समाप्तिकारणत्वनिवेशस्याऽऽवश्यकत्वेऽपि यत्र स्वजन्याऽपूर्वसम्बन्धेन मङ्गल न तत्र स्वजन्यविघ्नध्वससम्बन्धेन, यत्र च स्वजन्यविघ्नध्वंससम्बन्धेन मङ्गल न तत्र स्वजन्याऽपूर्वसम्बन्धेनेति, समाप्तौ मङ्गलस्य सम्बन्धद्वयेनाऽपि व्यतिरेकव्यभिचारात्कारणत्वमेवाऽसम्भवदुक्तिकमिति वाच्यम् । अतस्तत्तत्सम्बन्धेन मङ्गलाऽव्यवहितोत्तरत्वस्याऽपि कार्यतावच्छेदककोटिप्रविष्टतया व्यभिचाराऽभावादिति हृदयम् ।

ननु व्यतिरेकव्यभिचाररूपहेतुना समाप्तिकारणत्वाऽभावस्य मङ्गले पूर्वपक्षिणा साधनात् समाप्त्यन्याफलकत्वे सति सफलत्वहेतुना मङ्गले समाप्तिकारणत्वाऽनुमान सिद्धान्तिनासङ्गतं, समाप्तिकारणत्वाऽभावसाधकहेतौ हेत्वाभासमनुद्भाव्य समाप्तिकारणत्वाऽनुमानस्य सत्प्रतिपक्षत्वाऽऽपत्तेरित्यतः सिद्धान्तग्रन्थस्य भावमाह—**व्यभिचारसन्देहस्येति ।** मङ्गलत्वधर्मिकसमाप्तिमन्निष्ठाभावप्रतियोगितावच्छेदकत्वसन्देहस्येत्यर्थः । **ग्राह्यसंशयरूपतयेति ।** अनुमित्या ग्राह्यं हि मङ्गले समाप्तिकारणत्वं, तच्च समाप्तिमन्निष्ठाभावप्रतियोगितानवच्छेदकमङ्गलत्ववत्त्वं, तथा च साध्यसन्देहपर्यवसन्नस्य व्यभिचारसन्देहस्य नाऽनुमितौ प्रतिबन्धकत्वमिति भावः । **कारणताप्रत्यक्ष एव प्रतिबन्धकत्वमिति ।** इदं च

---

(१) **कार्यसमानाधिकरणाऽत्यन्ताभावप्रतियोगित्वं व्यतिरेकव्यभिचारः ।**

(२) **'मङ्गले' इति पुस्तकान्तरे पाठः ।**

मुक्तावली।

शिष्टाचारविषयत्वेन मङ्गलस्य सफलत्वे सिद्धे तत्र च फलजिज्ञासायां

दिनकरी।

मितौ, तत्र तस्याऽनुकूलत्वादित्यभिप्रायवान्–मङ्गलं समाप्तिफलकं, समाप्त्यन्याऽफलकत्वे (१)सति सफलत्वात् इति परिशेषाऽनुमानेन मङ्गलस्य समाप्तिफलकतां व्यवस्थापयिष्यन् प्रथमतो विशेष्याऽसिद्धिनिरासाय फलवत्तां साधयति—**अविगीतेति**। विषयत्वं च ज्ञानविषयसुखेऽतिप्रसक्तमत–**आचारेति**। आचारश्चाऽत्र यद्यपि क्रियैव, तथाऽपि विषयत्वश्रुतेः कृति(२)रेव विवक्षिता। तद्विषयत्वं चाऽत्र विधेयतया बोध्यम्। तेन फले न व्यभिचारः, तस्योद्देश्यतया कृतिविषयत्वात्। विधेयतया कृतिविषयत्वं चैत्यवन्दनादावप्यस्त्यतः–**शिष्टेति**। शिष्टत्वं च फलसाधनतांशे भ्रान्तिरहितत्वं, न तु वेदप्रामाण्याऽभ्युपगन्तृत्वम्। तेन व्युत्क्रमेण कृते दर्शाऽऽदौ निष्फलत्वेऽपि न व्यभिचारः। शिष्टाचारविषयत्वं श्येनयागाऽऽदावप्यस्त्यतः–**अविगीतेति**। अविगीतत्वं च बलवदनिष्टाऽननुबन्धित्वम्। तेन श्येनाऽऽदौ प्रवृत्त्युपयुक्तबलवदनिष्टाऽननुबन्धीष्टसाधनत्वरूपसाध्याऽभावेऽपि न व्यभिचारः। **सिद्धे**–अनुमिते। **तत्र**–मङ्गले। **फलजिज्ञासायां**–विशेषतः फलजिज्ञासायां। ननु कथं

रामरुद्री।

विशेषदर्शनाऽभावविशिष्टतत्संशयः(३) प्रात्यक्षिकनिश्चयप्रतिबन्धक इति मताऽभिप्रायेणोक्तम्। वस्तुतस्तु संशयसामग्र्या एव निश्चयप्रतिबन्धकत्वं, अत एव विशेषदर्शनदशायामेककोटिभानप्रतिबन्धेन संशयसामग्र्यभावान्निश्चय इति मन्तव्यम्। **तत्र तस्येति**। अनुमितौ साध्यसंशयस्येत्यर्थः। **अनुकूलत्वादिति**। सिद्ध्यभावरूपपक्षतासम्पादकत्वादिति भावः। **परिशेषानुमानेनेति**। तदितरविशेषाऽभाववत्त्वे सति सामान्यवत्त्वरूपो हेतुः परिशेषानुमानम्। **आचारश्चाऽत्रेति**। अत्रेतिशब्दश्चोत्तरान्वयी, तथा चाऽऽचारो यद्यपि क्रियैव, तथाऽप्यत्र विषयत्वश्रुतेः कृतिरेव विवक्षितेत्यर्थः। ननु श्येनयागस्याऽपि शत्रुवधरूपेष्टसाधनत्वात्सफलत्वमक्षतमेवाऽतस्तत्र हेतुसत्त्वेऽपि न व्यभिचार इति हेतावविगीतत्वविशेषण व्यर्थमित्याशङ्कां निराकर्तुमविगीतपदाऽभावे व्यभिचारमुपपादयन्नाह—**तेनेत्यादि**। **प्रवृत्त्युपयुक्तेति**। मङ्गलाचरणे प्रवृत्तिनिर्वाहाय बलवदनिष्टाननुबन्धीष्टसाधनत्वरूपसफलत्वमेवाऽनुमेयम्। तच्च श्येने नाऽस्त्येवेति हेतावविगीतपदाऽभावे भवत्येव व्यभिचार इति भावः। अनिष्टे बलवत्त्वं चेष्टोत्पत्तिनान्तरीयकभिन्नत्वम्। अनिष्टे बलवत्त्वविशेषणाद् बहुवित्तव्ययाऽयासासाध्ययागादौ न प्रवृत्त्यनुपपत्तिः। यद्यपि जलताडनाऽऽदेरपि "न कुर्यान्निष्फलं कर्म" इत्यादिना निषिद्धतया तदनुकूलकृतेरपि नरकरूपबलवदनिष्टजनकतया ऽविगीताचारविषयत्व सफलकर्मण्येवेति शिष्टपदमनर्थकं, तथापि पश्चादिकृत-

---

(१) अत्र फलत्वं स्वकर्तव्यताप्रयोजकेच्छाविषयत्वम्, न तु जन्यत्वमात्रम्। अन्यथा मङ्गलध्वंस–मङ्गलज्ञान–विघ्नध्वंसाऽऽदीनामपि मङ्गलजन्यतया विशेषणाऽसिद्धेरिति विभावनीयम्।

(२) कृतिरप्यत्र प्रवृत्तिरूपैव विवक्षिता। तेनेश्वरीयकृतिविषयत्वेऽपि जलताडनाऽऽदेर्न व्यभिचारः। प्रवृत्तेरिच्छाजन्यकृतित्वेनेश्वरीयकृतेस्तथात्वाऽसम्भवादिति ध्येयम्।

(३) यत्र संशयोत्तरं विशेषदर्शनं, तत्र तस्मिन् क्षणे संशयस्य द्विक्षणाऽवस्थायित्वेन सत्त्वादुत्तरत्र च निश्चयोत्पादात्तत्र व्यभिचारवारणाय विशेषदर्शनाभावविशिष्टेत्युपात्तम्। कार्यव्यापकत्वे सति कार्यसमानकालवृत्तित्वरूपाया एव कारणताया अभ्युपगमान्नैष दोष इत्यत आह—वस्तुतस्त्विति। तादृशकारणताऽनभ्युपगमादिति भावः।

मुक्तावली ।

सम्भवति दृष्टफलकत्वेऽदृष्टफलकल्पनाया अन्याय्यत्वात् उपस्थितत्वाच्च समाप्तिरेव तत्फलं कल्प्यते । इत्थं च यत्र मङ्गलं न दृश्यते, तत्रापि जन्मान्तरीयं तत् कल्प्यते । यत्र च सत्यपि मङ्गले समाप्तिर्न दृश्यते, तत्र बलवद्

दिनकरी ।

तर्हि गङ्गास्नानाऽऽदीनामदृष्टार्थकतेत्यत आह–**सम्भवतीति** । तथा च तत्र दृष्टाऽसम्भवेनाऽदृष्टकल्पनेति भावः । ननु तर्हि विश्वजिन्न्यायात्स्वर्ग एवेष्टं कल्प्यतामत आह–**उपस्थितत्वादिति** । आरब्धं कर्म मे निर्विघ्नं परिसमाप्यतामिति ग्रन्थाऽऽदौ प्रवृत्तपुरुषकामनाविषयत्वेन परिशेषानुमाने प्रवर्तमानस्योपस्थितत्वादित्यर्थः । **कल्प्यते**—अनुमीयते । अनेन च मङ्गलस्य समाप्तिहेतुत्वेऽनुमानमेव प्रमाणं, न तु शिष्टाचाराऽनुमिता श्रुतिः, इदानीमानुपूर्वीविशेषनिर्णयाऽभावेन तस्या अबोधकत्वादिति सूचितम् । व्यापकत्वघटितकारणताग्रहप्रतिबन्धकज्ञानविषय(१)व्यतिरेकव्यभिचारमुद्धरति—**इत्थञ्चेति** मङ्गलस्य समाप्तिफलकत्वे सिद्धे चेत्यर्थः । **तत्राऽपि**–नास्तिकादिग्रन्थेऽपि । **तत्**–मङ्गलम् । **कल्प्यते**–अनुमी-

रामरुद्री ।

वृथाचेष्टायां व्यभिचारवारकतया शिष्टपदसार्थक्यमेव, विधिनिषेधयोर्नेराऽधिकारिकत्वेन तदीयवृथाचेष्टाया निषेधाऽविषयत्वेन बलवदनिष्टाऽजनकत्वादिति भावः । **ननु तर्हीति** । अदृष्टफलकल्पनाया अन्याय्यत्वे हीत्यर्थः । **विश्वजिन्न्यायादिति** । काम्यप्रकरणे "विश्वजिता यजेत" इति विधिः श्रूयते । काम्यप्रकरणपठितत्वेन तस्य नित्यत्वाऽभावात् प्रत्यवायपरिहाररूपफलस्याऽप्यभावात् प्रवृत्यर्थं किञ्चित्फल कल्पनीयं, श्रुतौ फलाश्रवणादिति "स स्वर्गः सर्वान् प्रत्यविशिष्टत्वा" दिति जैमिनिना सूत्र प्रणीतम् । सः–विश्वजिता साध्यः स्वर्गो भवितुमर्हति, स्वर्गस्य सर्वान् प्रत्यविशिष्टत्वात्सर्वेषामिच्छाविषयत्वादिति यावत् । तथा च विश्वजिद्यागस्य पुत्रादिफलकत्वे पुत्रवदादीना(२) तत्र प्रवृत्तिर्न स्यात्, स्वर्गफलकत्वे तु तस्य सर्वेषामिच्छाविषयतया सर्वेषां तत्र प्रवृत्तिः सम्भवतीति स्वर्ग एव फलत्वेन कल्पयितुमुचित इति न्यायपर्यवसितोऽर्थः । तन्न्यायादत्राऽपि स्वर्ग एवेष्टं कल्प्यतामित्यर्थः । 'उपस्थितत्वादित्यनेन कस्योपस्थितत्वमुक्तमित्याकाङ्क्षायामाह—**परिशेषानुमाने प्रवर्तमानस्येति** । समाप्त्यन्याऽफलकत्वे सति सफलत्वहेतुकानुमान इति तदर्थः । ननु समाप्तित्वेन समाप्तेरुपस्थितिरकिञ्चित्करी, व्याप्तिघटकाभावादीनामप्युपस्थितत्वाऽविशेषादित्यत आह–**ग्रन्थादौ प्रवृत्तपुरुषकामनाविषयत्वेनेति** । तथा च तादृशकामनाविषयत्वप्रकारकोपस्थितिविषयत्वं नाऽन्येषामिति भावः । ग्रन्थाऽऽदौ प्रवृत्तिसमये ग्रन्थसमाप्तावेवेच्छाया औत्सर्गिकत्वात्तथात्वं बोध्यम् । **व्यतिरेकव्यभिचारमुद्धरतीति** । यद्यपि व्यतिरेकव्यभिचारनिश्चये सति कारणताया बाधितत्वेन समाप्तेर्मङ्गलकार्यत्वाऽसिद्ध्या समाप्तिरूपकार्येण मङ्गलाऽनुमितिरेव न सम्भवति, यदि तु जन्मन्तरीयमङ्गलसन्देहान्न व्यतिरेकव्यभिचारनिश्चयोऽपि तु सन्देह एव, स च न कारणत्वाऽनुमितौ प्रतिबन्धक इति समाप्त्या मङ्गलानुमान सम्भवत्येवेत्युच्यते, तदा ग्राह्यसन्देहपर्यवसन्नतादृशव्यभिचारसन्देहस्याऽकिञ्चित्करत्वेन तादृशव्यभिचारोद्धारो विफल एव । तथाऽपि कारणत्वाऽनुमितावपि नास्तिकस्य जन्माऽन्तरीयमङ्गलसन्देहेन बाधितविषयकत्वसन्देहाद्बलवत्प्रामाण्यसन्देहः, अप्रामाण्यसन्देहाऽऽस्कन्दितकारणतानिश्चयो न स्वकार्याय क्षम इति तदुद्धार आवश्यक इति भावः । व्यतिरेकव्यभिचारेण समाप्तेः कार्यत्वाऽसिद्ध्या कथं समाप्तिकार्येण मङ्गलाऽनुमानमित्याऽऽशङ्कां निर-

---

(१) **कार्यसमानाधिकरणाऽत्यन्ताभावाऽप्रतियोगित्वज्ञानप्रतिबन्धकज्ञानविषयेत्यर्थः ।**

(२) **'अपुत्राऽद्यर्थिनां' इति पाठोऽन्यत्र ।**

मुक्तावली ।

तरो विघ्नो विघ्नप्राचुर्य्यं वा बोध्यम् । प्रचुरस्यैवाऽस्य बलवत्तरविघ्ननिवारणे कारणत्वं बोध्यम् । विघ्नध्वंसस्तु मङ्गलस्य द्वारमित्याहुः प्राञ्चः ।

दिनकरी ।

यते । कार्यरूपसमाप्त्येति शेषः । ग्राह्यसन्देहपर्यवसन्नस्य पूर्वोक्तव्यभिचारसंशयस्य कारणताऽनुमितावप्रतिबन्धकत्वात् व्यभिचारनिर्णयस्य चाऽभावादिति भावः । नन्वेवमप्यन्वयव्यभिचारज्ञानं कारणताग्रहविरोधि भविष्यत्येवेत्याऽऽशङ्क्याऽन्वयव्यभिचारं निरस्यति— **यत्र चेति । तत्र**—कादम्बर्यादौ । **बलवत्तरत्वं**—वैजात्यम् । नन्वेवमापि कादम्बर्यादौ कुतो न विघ्नध्वंस ? इत्यत आह—**प्रचुरस्येति** । प्रचुरस्यैव मङ्गलस्येत्यर्थः । **बलवत्तरविघ्ननिवारणे**—बलवत्तराऽऽदिविघ्ननिवारणे । तेन प्रचुरविघ्नस्याऽपि सङ्ग्रहः । तथा च मङ्गलस्य विघ्नसमसङ्ख्याकमङ्गलत्वेन नाशकतया न तत्र विघ्ननाश इति भावः । अत्र च विघ्नसमसङ्ख्याकमङ्गलत्वेन हेतुत्वेऽधिकसङ्ख्याकमङ्गलान्न्यूनसङ्ख्याकविघ्ननाशो न स्यादतः प्राचुर्यं वेत्यत्र वाकारोऽनास्थायां बोध्यः । ननु तथाऽपि कादम्बर्यादौ विघ्नध्वंसो मा जायतां, समाप्तिः परं जायतां, मङ्गलरूपहेतोः सत्त्वादित्याशङ्क्याऽऽह—**विघ्नध्वंसस्त्विति** । तथा च स्वजन्यविघ्नध्वंससम्बन्धेन मङ्गलाऽभावान्न समाप्तिरिति भावः ।

आहुरिति—अस्वरसोद्भावनम् । तद्बीजं तु विघ्नध्वंसद्वारा मङ्गलस्य हेतुत्वं न सम्भवति, नास्तिकग्रन्थसमाप्तौ व्यभिचारात् । न च स्वजनकविघ्नध्वंसोत्पत्त्यवच्छेदकतासम्बन्धेन समाप्तिं प्रति स्वजन्यविघ्नध्वंसाऽवच्छेदकतासम्बन्धेन मङ्गलस्य हेतुत्वात्,

रामरुद्री ।

स्यति—**ग्राह्यसन्देहेत्यादिना** । ननु प्रचुरविघ्नस्थले यत्किञ्चिन्मङ्गलेन यत्किञ्चिद्विघ्नध्वंसस्याऽऽवश्यकतया स्वजन्यविघ्नध्वंससम्बन्धेन मङ्गलस्य सत्त्वात्कथमेतत्पक्षे समाप्त्यभाव इत्याऽऽशङ्क्य निरस्यति— **तथा चेत्यादिना । विघ्नसमसङ्ख्याकेति** । तत्स्थलीयविघ्नेतराऽवृत्तित्वे सति सकलविघ्नवृत्तिर्या सङ्ख्या तत्सजातीया तत्स्थलीयमङ्गलेतराऽवृत्तितादृशसकलमङ्गलवृत्तिर्या सङ्ख्या, तादृशसङ्ख्यावन्मङ्गलत्वेनेत्यर्थः । अन्यथा विघ्नप्राचुर्येऽपि यत्किञ्चिद्विघ्नवृत्तिसङ्ख्यामादाय(१) मङ्गलस्य न्यूनतायामपि मङ्गलाऽन्यवृत्तिसङ्ख्यामादाय वा समसङ्ख्यत्वोपपादनसम्भवात् । **अधिकसङ्ख्याकमङ्गलादिति** । एतच्चाऽऽपाततः । निरुक्तविघ्ननिष्ठसङ्ख्यासजातीयतत्स्थलीयमङ्गलेतराऽवृत्तिसङ्ख्यावन्मङ्गलत्वेन कारणत्वेऽधिकसङ्ख्याकमङ्गलादपि स्वल्पविघ्ननाशसम्भवात् । वस्तुतस्तु प्रतिबन्धकससर्गाऽभावविधया सकलविघ्नाऽभावस्याऽपि समाप्तिहेतुत्वेन स्वजन्यविघ्नध्वससम्बन्धेन मङ्गलसत्त्वेऽपि मङ्गलेतरयावत्कारणान्तर्गतयावत्प्रतिबन्धकाभावस्याऽसत्त्वादेव नाऽन्वयव्यभिचार इत्यत्रैव मूलतात्पर्यात् समसङ्ख्याकमङ्गलत्वेन कारणतावर्णनमयुक्तमेव । मूले तु(२) बलवत्त्वरूपवैजात्यकल्पनं गौरवग्रस्तमित्यभिप्रायेणैव(३) द्वितीयपक्षाऽवलम्बनमिति ध्येयम् ।

न च स्वजनकविघ्नध्वंसेति । अत्र च स्वजनकविघ्नध्वंसोत्पत्त्यवच्छेदकतासम्बन्धेन समाप्तिं प्रति मङ्गलस्य हेतुत्वात्, समाप्तिं प्रति स्वजन्यविघ्नध्वंसावच्छेदकतासम्बन्धेन मङ्गलस्य हेतुत्वात्, स्वप्रतियोगिचरमवर्णाऽनुकूलकृतिमत्त्वसम्बन्धेन समाप्तिं प्रत्याऽऽश्रयतासम्बन्धेन मङ्गलस्य हेतुत्वाद्वेत्य-

(१) 'अन्यस्थलीयमङ्गलस्य तामादाय वा' इत्यधिकः पाठः ।
(२) 'परन्त्विति' पाठोऽन्यत्र । (३) 'नैव अत्र 'मूले' इत्यपि पाठः ।

दिनकरी।

स्वप्रतियोगिचरमवर्णाऽनुकूलकृतिमत्त्वसम्बन्धेन समाप्तिं प्रत्याश्रयतासम्बन्धेन मङ्गलस्य हेतुत्वाद्वा जन्मान्तरीयमङ्गलकल्पनया न व्यभिचार इति वाच्यम्। तथा सति जन्मान्तरीयसमाप्तिमुद्दिश्य जन्मान्तरीयमङ्गलकरणाऽऽपत्तेः। अतः **स्वप्रतियोगिचरमवर्णाऽवच्छेदकतासम्बन्धेन समाप्तिं प्रति स्वोत्पत्त्यवच्छेदकजातीयतासम्बन्धेन मङ्गलहेतुत्वस्य** वाच्यतया नास्तिकशरीरे व्यभिचारस्य दुर्वारत्वात्। न च पुत्रकामाऽधिकरणविरोधः, सहकार्य्यन्तराऽसमवधानेनैहिकपुत्राऽभावेऽप्यामुष्मिकपुत्ररूपफलस्य तत्र सिद्धान्ततत्वादिति वाच्यम्। तत्र पुत्रमात्रकामनाश्रवणात्। इह तु विशिष्टशिष्टाचाराऽनुमितश्रुत्या ऐहिकसमाप्तेरेव मङ्गलफलत्वात्। नच **स्वाऽवच्छेदकाऽवच्छिन्नप्रतियोगिकत्व-स्वाऽव्यवहितोत्तर-**

रामरुद्री।

न्वयेन कार्यकारणभावत्रयलाभः। तत्राऽऽद्यद्वयं शरीरनिष्ठप्रत्यासत्त्या, तृतीयस्त्वात्मनिष्ठप्रत्यासत्त्या। **प्रथमकल्पे** कारणतावच्छेदकसम्बन्धो द्वितीयकल्पे कार्यतावच्छेदकसम्बन्धश्च केवलाऽवच्छेदकतैव। स च सुगमत्वाद् ग्रन्थकृता नोक्त इति बोध्यम्। एतेन कार्यतावच्छेदकसम्बन्धस्य कारणतावच्छेदकसम्बन्धस्य चाऽतिगुरुभूतस्याऽऽचरणं प्रयोजनाऽभावाद् ग्रन्थकृतामनुचितमिति केषां चिदाऽऽक्षेपो निरवकाशः। अत एवोत्पत्तिपदमपि सार्थकम्। अन्यथा स्वजनकविघ्नध्वंसाऽवच्छेदकतासम्बन्धेन नास्तिकशरीरेऽपि समाप्त्युत्पत्त्या तत्राऽवच्छेदकतासम्बन्धेन मङ्गलविरहेऽपि स्वजन्यविघ्नध्वंसावच्छेदकतासम्बन्धेन मङ्गलसत्त्वेन व्यभिचाराऽप्रसक्त्या तदुपादानवैयर्थ्याऽऽपत्तेरिति ध्येयम्। **जन्मान्तरीयसमाप्तिमिति।** न चेष्टापत्तिः, तथा शिष्टानामाचाराऽननुभवादिति भावः। अत्रेदमवधेयम्—मङ्गलाचरणस्य बहुवित्तव्ययाऽऽयाससाध्यत्वविरहेण ग्रन्थारम्भसमयेऽपि कर्तुं शक्यतया जन्मान्तरे ग्रन्थकर्तृत्वसामर्थ्यविरहदशायामेतदुपेक्षणसम्भवेन नैयमापत्तिः सम्भवति, न हि कश्चिद्धाविराज्यसम्भावनया स्वल्पवित्तसाध्यं श्वेतच्छत्रमावश्यकमर्जयति। ग्रन्थकरणसामर्थ्यसत्त्वे ग्रन्थसमाप्तिमुद्दिश्य मङ्गलमाचरतो ग्रन्थ(करण)प्रवृत्तिरावश्यकी, आवश्यकी च तत्समाप्तिरिति। यदि च कदा चिद्विघ्नभूयस्त्वादिना न समाप्तिस्तथाऽपि न तत्र जन्मान्तरीयसमाप्तेरुद्देश्यता, भ्रान्त्या ऐहिकसमाप्तेरेवोद्देश्यतासम्भवादिति। **अतः स्वप्रतियोगीति।** न चाऽवच्छेदकतासम्बन्धेन समाप्तिं प्रतीत्येव वक्तव्यं, किं स्वप्रतियोगिचरमवर्णाऽवच्छेदकतापर्यन्तानुधावनेनेति वाच्यम्। यत्र वर्णोत्पत्तिद्वितीयक्षणे शरीरक्रियया शरीरस्यैतद्देशाद्विभागः, तेन च पूर्वसंयोगनाशः, तत्र तच्छरीरावच्छेदेन न वर्णनाशः, किन्तु शरीराऽधिकरणवृत्तिप्रभाऽऽश्रयावच्छेदेनैवेति नाऽवच्छेदकतायाः कार्यतावच्छेदकसम्बन्धत्वमङ्गीकृतम्। **स्वोत्पत्त्यवच्छेदकजातीयतेति।** मङ्गलावच्छेदकशरीर एव समाप्तिरिति न नियमः, अवयवोपचयादिना समाप्तिसमये मङ्गलाऽवच्छेदकशरीरनाशात्, अतो जातीयतापर्यन्ताऽनुधावनम्। जातिश्चैकक्षणवृत्तिपदार्थद्वयाऽवृत्तित्वेन विशेषणीया। तेन जन्मान्तरीयशरीरस्याऽपि पृथिवीत्वादिना मङ्गलाऽवच्छेदकशरीरसजातीयत्वेऽपि न क्षतिः। तादृशी च जातिस्तत्तत्पुरुषीयतत्तज्जन्मीययावच्छरीरवृत्तिचैत्रत्वादिरेवेति नोक्तक्षतिः। यद्यपि स्वावच्छेदकजातीयतेत्युक्तावपि न दोष इत्युत्पत्तिप्रवेशवैयर्थ्यम्। तथापि विघ्नध्वंसस्याऽप्यनेनैव सम्बन्धेन हेतुत्वमिति लाभायैवाऽत्रोत्पत्तिपदप्रवेशः। मङ्गलस्याऽनेन सम्बन्धेन हेतुत्वे विघ्नध्वंसस्याऽप्यनेन सम्बन्धेन हेतुत्वमिति लाभसम्भवात्। विघ्नध्वंसस्य तु कारणतावच्छेदकसम्बन्धे उत्पत्तिप्रवेश आवश्यकः, अन्यथा जन्मान्तरीयसमाप्तेरपि विघ्नध्वंसफलत्वाऽऽपत्तेरिति मन्तव्यम्। यद्वा स्तुतिरूपमङ्गलस्य मीमांसकमते नित्यतया तदवच्छेदकत्वं शरीरस्य न सम्भवति, किं तु प्राकट्यरूपतदुत्पत्तेरेवेति मीमांसकमतसङ्ग्रहायैवोत्पत्तिपदं प्रविशेत्। **पुत्रकामाऽधिकरणेति।** "पुत्रकामः पुत्रेष्ट्या यजेत" इति विधौ पुत्रकामपदमधिकृत्य यो विचारस्तद्विरोध इत्यर्थः। **स्वावच्छेदकाऽवच्छिन्नेति।** आस्तिकनास्तिकाभ्यां युगपद्यत्र ग्रन्थसमाप्तिः कृता, तत्र नास्तिकीयसमाप्तेरप्यास्तिकीयमङ्ग-

दिनकरी।

क्षणोत्पत्तिकत्वोभयसम्बन्धेन मङ्गलजन्यविघ्नध्वंसविशिष्टसमाप्तित्वस्य मङ्गलकार्यतावच्छेद-रामरुद्री

मङ्गलजन्यविघ्नध्वंसाऽव्यवहितोत्तरक्षणोत्पत्तिकत्वेन तत्पूर्वमुक्तसम्बन्धेन कार्याऽधिकरणे मङ्गलविरहाद्व्यभिचार इत्यतः स्वावच्छेदकावच्छिन्नप्रतियोगिकत्वनिवेशः। नास्तिकसमाप्तौ व्यभिचारवारणाय द्वितीयसम्बन्धप्रवेशः। स्वोत्तरत्व च स्वाऽधिकरणक्षणध्वंसाऽधिकरणत्वमेव। तादृशक्षणोत्पत्तिकत्वं च नास्तिकसमाप्तिसाधारणमेवेत्यव्यवधाननिवेशेनैव नास्तिकसमाप्तिर्व्यावर्त्तनीया। तच्चाऽव्यवधान यदि स्वाऽधिकरणक्षणध्वसाऽधिकरणक्षणध्वसानधिकरणत्व, तदा आस्तिकीयसमाप्तेरप्यसङ्ग्रहः, स्वाऽधिकरणीभूतविघ्नध्वंसोत्पत्त्यधिकरणक्षणध्वसाधिकरण—तद्द्वितीयक्षणध्वंसाऽनधिकरणत्वस्य समाप्त्युत्पत्तिक्षणे काऽप्य(१)सम्भवात्। यदि च स्व(२)ध्वसाधिकरणक्षणध्वसाऽनधिकरणत्वं तदित्युच्यते, तदाऽपि ध्वंसस्य ध्वसाऽप्रसिद्धया तादृशोभयसम्बन्धेन ध्वंसविशिष्टाऽप्रसिद्धिरेव।

यत्तु स्वाऽधिकरण—तत्क्षणध्वसाऽधिकरणक्षणध्वसाऽनधिकरणत्वमेवाऽव्यवहितत्वं, तच्च सर्वत्र तत्क्षणपदेन समाप्तयव्यवहितपूर्वक्षणव्यक्तिमादाय समाप्तिक्षणे सूपपादमेव। नास्तिकशरीरे व्यभिचारवारण तु स्वावच्छेदकावच्छिन्नप्रतियोगिकत्वदलेनैवेति कैश्चित् प्रलपित—तदत्यन्तमसत्। आत्मन्युत्पन्नस्य विघ्नध्वंसस्य ध्वसाऽभावेन तदीयभोगायतनजन्मान्तरशरीरावच्छेदेनाऽपि तदात्मनि सत्त्वस्याऽऽवश्यकत्वात् प्रथमदलेन नास्तिकसमाप्तिवारणाऽसम्भवात्। अन्यथा जन्मान्तरार्जितपुण्यपापादेरपि जन्मान्तरीयशरीराऽवच्छेदेनाऽसत्त्वाऽऽपत्त्या तदवच्छेदेन भोगजनकता न स्यात्। न च 'स्वावच्छेदके'त्यस्य स्वोत्पत्त्य(३)वच्छेदकार्थकत्वात् नोक्तदोष इति वाच्यम्। तथा सति आस्तिकीयसमाप्तेरपि स्वो(४)त्पत्त्यवच्छेदकावच्छिन्नप्रतियोगिकत्वाभावेनाऽसङ्ग्रहप्रसङ्गात्। न च स्वोत्पत्त्यवच्छेदकजातीयाऽवच्छिन्नप्रतियोगिकत्व एव तात्पर्यमिति न कोऽपि दोष इति वाच्यम्। एवमपि निरुक्ताऽव्यवधाननिवेशे प्रयोजन(५)विरहेण तद्वैयर्थ्यस्य दुरुद्धरत्वादिति चेत्सत्यम्। स्वोत्तरजन्माऽनुत्तरत्वमेव प्रकृते अव्यवहितत्वम्। जन्म च आद्यशरीरप्राणसयोगः। शरीरे आद्यत्व च स्वसजातीयशरीरध्वसाऽनधिकरणत्वम्। जातिश्च पूर्वोक्तैव ग्राह्या, अतो नाऽप्रसिद्धिः। एव च नास्तिकीयसमाप्तेर्विघ्नध्वसोत्तरजन्मोत्तरक्षणोत्पत्तिकत्वेनाऽव्यवधाननिवेशात्तद्वारणमव्याहतमेव। न च आस्तिकीयसमाप्तेरपि स्वोत्तरपुरुषान्तरीयजन्मोत्तरक्षणोत्पत्तिकतयाऽसङ्ग्रहो दुर्वार एवेति वाच्यम्। स्वाश्रयशरीराऽवच्छिन्नभोगाश्रयत्व—दैशिकविशेषणत्वोभयघटित(६)सामानाधिकरण्यसम्बन्धेन विघ्नध्वसविशिष्टत्वेन जन्म-

---

(१) अयं भावः। मङ्गलकरणाऽनन्तरमेव समाप्तेरुत्पत्तिर्जायत इत्यवश्यमङ्गीकरणीयम्। समाप्तिश्च चरमवर्णध्वंसः। मङ्गलस्य विघ्नध्वंसहेतुत्वेन मङ्गलाऽव्यहितोत्तरक्षण एव विघ्नध्वंसः। तदनन्तरमेव हि समाप्तिप्रतियोगिचरमवर्णस्योत्पत्तिः। अनन्तरं च तस्य विनाश इति सर्वत्र विघ्नध्वंसानन्तरं बहुकाले व्यतीते एव समाप्तिरभ्युपेया। तथा च स्वाऽधिकरणक्षणध्वंसाऽधिकरणक्षणध्वंसाऽधिकरणे एव क्षणे समाप्त्युत्पत्तिरिति।

(२) इदं चाऽव्यवधानं द्विक्षणावस्थायिगुणेषु प्रसिद्धम्। तथा हि—शब्दः शब्दान्तरस्याऽव्यवहितोत्तरवर्ती। न चैवं पूर्वशब्दप्राक्क्षणानामपि तथात्वापत्तिः। स्वाधिकरणक्षणध्वंसाधिकरणत्वरूपस्योत्तरत्वस्याऽपि तत्र निवेशितत्वादिति ध्येयम्।

(३) स्वाऽधिकरणक्षणध्वंसाऽनधिकरणसमयसम्बन्ध उत्पत्तिपदार्थः।

(४) मङ्गलकर्तृशरीरस्याऽवयवोपचयापचयादिना समाप्त्यवस्थायां विनष्टत्वेन स्वोत्पत्त्यवच्छेदकावच्छिन्नप्रतियोगिकत्वविरहात्।

(५) एतेनैव नास्तिकसमाप्तिवारणसम्भवादिति भावः।

(६) सामानाधिकरण्यं नाम तदधिकरणवृत्तित्वम्। दैशिकविशेषणतया विघ्नध्वंसाऽऽ

दिनकरी।

कत्वान व्यभिचार इति वाच्यम्। कारणस्य कार्य्यतावच्छेदकत्वाऽनुपगमात्। अत एव "काशीमरणान्मुक्तिः" इति श्रुत्यन्तर्गतपञ्चम्याः प्रयोजकत्वपरत्वोपवर्णनं ग्रन्थकृतां सङ्गच्छते। अन्यथा तत्राऽपि काशीमरणविशिष्टमुक्तिं प्रति काशीमरणे हेतुत्वस्य(१) निर्दुष्टतया तथोपवर्णनमसङ्गतं स्यात्।

अथ "तमेव विदित्वाऽऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" इति श्रुत्या तत्त्वज्ञानस्य मुक्तिसामान्यं प्रति हेतुत्वं प्रतिपादितम्, तच्च काशीमरणस्य मुक्तिहेतुत्वे न सम्भवति, काशीमरणजन्यमुक्तौ तत्त्वज्ञानस्य व्यभिचारप्रसङ्गादतः काशीमरणस्य न मुक्तिजनकत्वम्, अपि तु तत्त्वज्ञानद्वारा मुक्तिप्रयोजकत्वमेवेति ग्रन्थकृतां तत्रत्यपञ्चम्याः प्रयोजकत्वपरत्वोपवर्णनं, न तु कारणस्य कार्य्यतानवच्छेदकत्वात्तथोपवर्णनमिति चेत्—

अस्तु कारणस्य कार्य्यतावच्छेदकत्वम्, अस्तु च पूर्वोक्तरीत्या मङ्गलजन्यविघ्नध्वंसविशिष्टसमाप्तित्वस्य मङ्गलकार्य्यतावच्छेदकत्वेन नास्तिकशरीरे व्यभिचारवारणम्, एवमपि भोगादिनाश्यविघ्नध्वंसपूर्वकसमाप्तौ क्लृप्तनियतपूर्ववृत्तिताकेन ध्वंसेनैन मङ्गलस्थलीयसमाप्त्युपपत्तेर्मङ्गलस्याऽन्यथासिद्धत्वं दुर्वारमेव। न च व्यापारेण व्यापारिणो नाऽन्यथासिद्धिरिति वाच्यम्। यत्र व्यापारिणः प्रमाणबोधितकारणतानिर्वाहाय व्यापारस्य कारणत्वं कल्प्यते, यथा—यागस्य स्वर्गहेतुतानिर्वाहार्थमपूर्वम्, तत्रैव व्यापारेण व्यापारिणो नाऽन्यथासिद्धिः। अत एव काशीमरणस्य तत्त्वज्ञानेन मुक्तावन्यथासिद्धत्वात् प्रयोजकत्वपरतया श्रुतिसमर्थनं सङ्गच्छते। प्रकृते च प्रतिबन्धकाभावस्य कार्यमात्रे हेतुताया मङ्गलकारणतां विनाऽपि क्लृप्ततया मङ्गलस्याऽन्यथासिद्धत्वं दुष्परिहरमेवेति।

रामरुद्री।

नो विशेषणीयत्वात्। न चैवमपि यादृशग्रन्थसमाप्त्यनन्तरं ग्रन्थकर्तुर्मुक्तिस्तादृशसमाप्तेरसङ्ग्रह एव, स्वोत्तरस्वसमानाधिकरण—जन्माऽप्रसिद्धेरिति वाच्यम्। स्वोत्तरचरमशरीराऽनुत्तरत्वस्यैवाऽव्यवधानपदार्थत्वेनाऽङ्गीकरणीयत्वात्। चरमत्वं च स्वसजातीयशरीरप्रागभावाऽनधिकरणत्वम्। इत्थ च समाप्त्युत्तरं मुक्तिस्थलेऽपि स्वोत्तरचरमशरीरप्रसिद्ध्या नाऽसङ्ग्रहः। उत्तरक्षणविशेषन च यत्र नास्तिकेन मङ्गलाचरणं विनैव ग्रन्थसमाप्तिः कृता, तदनन्तरं तच्छरीरेणैवाऽऽस्तिकीभूय तदनन्तरजातविघ्न मङ्गलाचरणेन नाशयित्वा ग्रन्थान्तरसमाप्तिः कृता, तत्रत्यपूर्वसमाप्तौ व्यभिचारवारणायैवेति दिक्॥

कारणस्य कार्यतानवच्छेदकत्वे प्राचां सम्मतिमाह—**अत एवेति।**

कारणस्य कार्यतावच्छेदककोटिप्रवेशाऽङ्गीकारेऽपि "काशीमरणान्मुक्ति"रित्यत्र पञ्चम्याः प्रयोजकत्वार्थकत्वोपवर्णनमावश्यकं, तथा च कारणस्य कार्यतानवच्छेदकत्वे न प्राचां सम्मतिरित्याशयेन शङ्कते—**अथेति।**

कारणस्य कार्यतावच्छेदककोटिप्रवेशसम्भवेऽपि समाप्तिं प्रति मङ्गलस्य न हेतुतासम्भवः, अन्यथासिद्धत्वादित्याशयेन समाधत्ते—**एवमपीति।**

अये स्वाश्रयशरीराऽवच्छिन्नभोगाश्रयत्वसम्बन्धेन वृत्तित्वमिति भावः। अन्यथा तादृशोभयसम्बन्धेन आद्यशरीरप्राणसंयोगरूपस्य जन्मन आत्मनि वृत्तित्वाऽप्रसिद्धेः। कालोपाधित्ववद्विगुपाधित्वस्याऽपि नित्येष्वनङ्गीकारादित्यवधेयम्।

(१) 'काशीमरणहेतुत्वस्य' इति पाठः।

मुक्तावली।

नव्यास्तु मङ्गलस्य विघ्नध्वंस एव फलम्, समाप्तिस्तु बुद्धिप्रतिभादिकारणकलापात्। न चैवं स्वतःसिद्धविघ्नविरहवता कृतस्य मङ्गलस्य निष्फलत्वापत्तिरिति वाच्यम्। इष्टापत्तेः, विघ्नशङ्कया तदाचरणात्, तथैव शिष्टा-

दिनकरी।

इदानीं विघ्नध्वंसस्य द्वारत्वमिच्छतां प्राचां मतेऽपि विघ्नध्वंसस्य कार्यत्वाऽऽवश्यकतया विघ्नो मे निवर्ततामिति कामनया मङ्गलाचरणेन च मङ्गलस्य विघ्नध्वंस एव फलमिति वदतां चिन्तामणिकृतां मतमाह—**नव्यास्त्विति**। 'विघ्नध्वंस एव'इत्येवकारेण समाप्तिव्यवच्छेदः। फलं—प्रवृत्त्युद्देश्यम्। ननु समाप्तिस्तर्ह्यकस्मिकी स्यादत आह—**समाप्तिस्त्विति**। बुद्धिर्ज्ञानम्। प्रतिभा–तद्विशेषः स्फूर्त्याख्यः। 'प्रतिभादि' इत्यादिना विघ्नसंसर्गाभावपरिग्रहः। अनयैव रीत्या कारीरीष्टिस्थलेऽप्यवग्रहनिवृत्तिरेव फलम्, वृष्टिस्तु स्वकारणादेवेति बोध्यम्।

एवं—मङ्गलस्य विघ्नध्वंसं प्रति जनकत्वे। **स्वतः सिद्धविघ्नविरहवतेति**। विघ्नात्यन्ताभाववतेत्यर्थः। ननु निष्फले प्रवृत्तिरेव कथमत आह—**विघ्नशङ्केति**। संशयनिश्चयसाधारणविघ्नज्ञानमेव प्रवर्त्तकमिति भावः। तदाचरणात्–मङ्गलाचरणात्। ननु विघ्नसंशये मङ्गलाचरणमेवाऽसि(१)द्धमित्यत्राऽऽह—**तथैवेति। शिष्टाचारादिति**। विषयतासम्बन्धेन मङ्गल इति शेषः।

ननु निर्विघ्नपुरुषानुष्ठितमङ्गलस्थलेऽन्वयव्यभिचारेण विघ्नध्वंसं प्रति मङ्गलस्य कारणता बाधिता, तथा च बाधिताऽर्थबोधकत्वाद्वेदस्याऽप्रामाण्यमिति श्रुतेः कारणताबोधकत्वमङ्गी-

रामरुद्री।

विघ्नध्वंसस्य कार्यत्वाऽवश्यकतयेति। तथा च प्राचीनमते समाप्तौ विघ्नध्वसे च मङ्गलकार्यत्वमावश्यकं कल्पनीयमिति गौरवमिति भावः।

विघ्नो मे निवर्ततामिति कामनयेति। साऽवधारणोऽय निर्देशः। अन्यथा विघ्नध्वंसद्वारैव समाप्तेर्मङ्गलफलतया समाप्तिकामनाऽधीनविघ्नध्वसकामनाया अपि मङ्गलाचरणप्रयोजकतया विघ्नध्वंसकामनया मङ्गलाचरणस्य प्रकृताऽनुपयोगप्रसङ्गात्। अथ वा, ननु उभयोर्मङ्गलकार्यत्वे गौरवेऽपि विघ्नध्वसस्यैव मङ्गलफलत्वं विघ्नध्वंसकामनया मङ्गलाननुष्ठानान्न सम्भवति, यस्य यत्फलकत्वं, तत्कामनया तदनुष्ठाननियमादित्याशङ्का निराकुरुते—**विघ्नो मे निवर्ततामित्यादिना**। ननु "विघ्नध्वस एव मङ्गलफलं" इति मूलोक्तिरयुक्ता, फलपदस्य जन्याऽर्थकतया मङ्गलध्वसस्याऽपि मङ्गलजन्यतया एवकाराऽसङ्गतेरित्याशङ्का निराकुर्वन् फलपद व्याचष्टे—**फलमिति। आकस्मिकीति**। यत्किञ्चित्कारणाऽनियम्येत्यर्थः। नन्वेव कारीरियागस्याऽपि वृष्टिः फलं न स्यात्, यागेनाऽवग्रहनिवृत्तौ स्वकारणादेव वृष्टिसम्भवादित्याशङ्कामिष्टापत्त्या परिहरति—**अनयैवेति**। अवग्रहः वृष्टिप्रतिबन्धको दुरितविशेषः।

श्रुतेः कारणताबोधकत्वमिति। विध्यर्थः केषाञ्चिन्मते शाब्दी भावना, केषाञ्चिदपूर्वं, न्यायमते त्विष्टसाधनत्वम्। तथा च मङ्गले विघ्नध्वंसकारणताया बाधितत्वेन शिष्टाचाराऽनुमितायाः "विघ्नध्वसकामो मङ्गलमाचरेत्" इति श्रुतेरप्रामाण्याऽऽपत्तिः। न्यायमते तत्र विधिना मङ्गले विघ्नध्वसकारणताया

---

(१) **अयं भावः। विघ्नसन्देहस्य मङ्गलाचरणे प्रवर्त्तकत्वे विघ्नानामतीन्द्रियत्वेन तत्सङ्ख्याज्ञानाऽसम्भवेन तत्समसङ्ख्याकमङ्गलाचरणानुपपत्तिरिति। वस्तुतस्तु भक्तिश्रद्धातिशयपूर्वकमेव मङ्गलानुष्ठानाद्विघ्नोपशमः। तादृशातिशयाभावाच्च कादम्बर्यादौ विघ्नानुपशम इति ज्ञेयम्।**

मुक्तावली।

चारात्। न च तस्य निष्फलत्वे तद्बोधकवेदाप्रामाण्यापत्तिरिति वाच्यम्। सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात्। अत एव पापभ्रमेण कृतस्य प्रायश्चित्तस्य निष्फलत्वेऽपि न तद्बोधकवेदाप्रामाण्यम्। मङ्गलं च विघ्नध्वंसविशेषे कारणम्, विघ्नध्वंसविशेषे च विनायकस्तवपाठादि। इ

दिनकरी।

कर्तुर्मते शङ्कां निरस्यति—**न चेति**। तस्य—निर्विघ्नपुरुषानुष्ठितमङ्गलस्य। **तद्बोधकेति**। मङ्गलविघ्नध्वंसयोः कार्यकारणभावबोधकेत्यर्थः। **सति विघ्न इति**। तथा चोपदर्शितस्थले प्रतियोगिरूपकारणाऽभावेन विघ्नध्वंसरूपकार्याऽनुदयोपपत्तौ कारणताया अबाधितत्वेन न कारणताबोधकवेदाऽप्रामाण्यमिति भावः। अत एव—नाशं प्रति प्रतियोगिन कारणत्वादेव। **तद्बोधकवेदाप्रामाण्यमिति**। प्रायश्चित्तस्य पापनाशकत्वबोधकवेदाप्रामाण्यमित्यर्थः।

ननु मङ्गलं न विघ्नध्वंसे कारणम्, विनायकस्तवपाठादिजन्यविघ्नध्वंसे व्यभिचारात्, विनायकस्तवस्य मङ्गलत्वेऽपि तदनुकूलकण्ठाऽभिघातरूपस्य तत्पाठस्य मङ्गलत्वाभावात्। न च पाठकतासम्बन्धेन विनायकस्तव एव विघ्ननाशकः, स च मङ्गलमेवेति न व्यभिचार इति वाच्यम्। "सर्वे विघ्नाः शमं यान्ति" इत्यादिना तत्पाठस्याऽपि विघ्ननाशकत्वबोधनात्, प्रायश्चित्तजन्यविघ्नध्वंसे व्यभिचाराच्चेत्यत आह—**मङ्गलं चेति। स्तवपाठादीति**। आदिना प्रायश्चित्तपरिग्रहः। तथा च मङ्गलस्य स्वाऽव्यवहितोत्तरक्षणोत्पत्तिकत्वसम्बन्धेन मङ्गलविशिष्टविघ्नध्वंसत्वं विजातीय-विघ्नध्वंसत्वं वा कार्यतावच्छेदकम्। एवं विनायकस्तवपाठादेरुपदर्शितसम्बन्धेन विनायकस्तवपाठादिविशिष्ट-विघ्नध्वंसत्वं विजातीय-विघ्नध्वंसत्वं वा कार्यतावच्छेदकमिति न व्यभिचार इति भावः।

ननु विघ्नध्वंस एव यदि मङ्गलस्य फलं तदा समाप्तिकामस्य मङ्गले प्रवृत्तिर्न स्यादतः समाप्तिसाधनविघ्नध्वंससाधनत्वान्मङ्गले प्रवृत्तिर्वाच्या, तच्च न सम्भवति, स्वतःसिद्धविघ्नविरहस्थले व्यभिचारेण विघ्नध्वंसस्य समाप्तिसाधनत्वाभावादिति शङ्कां निरस्यति—**क**

रामरुद्री।

एव प्रत्येतव्यत्वादिति भावः। ननु "सति विघ्ने तन्नाशस्यैव वेदबोधितत्वात्" इति मूलमसङ्गतम्, स्वर्गकामो यजेत" इत्यादिवत् "विघ्नध्वंसे"त्यादावपि विघ्नध्वसकारणत्वमेव विध्यर्थो वाच्यः, न तु "सति विघ्ने" इत्यपि, तद्बोधकपदाभावात्, अतस्तन्मूलतात्पर्यमाह—**तथा चेति**। "सति विघ्ने" इति मूले मङ्गलादिति शेषः। तथा च केवलदण्डात् घटाऽनुत्पत्तावपि "दण्डो घटकारण" इति वाक्यस्य नाऽप्रामाण्यम्, सर्वदा दण्डे घटाऽव्यहितपूर्वत्वस्य तात्पर्याऽविषयत्वात्, किन्तु दण्डेतरयावद्घटकारणसत्त्वे दण्डे घटाऽव्यवहितपूर्वत्वमेव तात्पर्यविषयस्तद्वत्प्रकृतेऽपीति मूलाशयः।

शमं यान्तीत्यादिनेति। आदिना "गणेशस्तवपाठत" इत्यस्य सङ्ग्रहः। ननु स्तवपाठस्य विघ्नध्वंसकारणतायास्तादृशवाक्यबोधितत्वेऽपि पाठजन्यविघ्नध्वंसे मङ्गलस्य व्यभिचारो दुर्घट एव, स्तुतिरूपमङ्गलस्य पाठकतासम्बन्धेन कार्याऽधिकरणे वृत्तेरित्यतः स्थलान्तरे व्यभिचारं दर्शयति—**प्रायश्चित्तजन्येति**। विशेषपदार्थमेव प्रकटयन्नाह—**तथा चेति**। लाघवादाह—**विजातीयेति**।

प्रवृत्तिर्न स्यादिति। यद्धि यस्य फलं भवति तत्कामस्यैव तत्र प्रवृत्तिनियमादिति भावः। **प्रवृत्तिर्वाच्येति**। तृप्तिकामस्य तृप्तिसाधनौदनसाधने पाके प्रवृत्तिरिवेति शेषः। **व्यभिचारेणेति**।

मुक्तावली ।

चिच्च विघ्नात्यन्ताभाव एव समाप्तिसाधनम् । प्रतिबन्धकसंसर्गाभावस्यैव कार्यजनकत्वात् । इत्थं च नास्तिकादीनां ग्रन्थेषु जन्मान्तरीयमङ्गलजन्यदुरितध्वंसः स्वतः सिद्धविघ्नात्यन्ताभावो वाऽस्तीति न व्यभिचार इति प्राहुः ॥

॥ इति मङ्गलवादः ॥

दिनकरी ।

चिदिति । नन्वेवमननुगमः, अतोऽनुगतेन रूपेण कारणत्वे बीजमाह—**प्रतिबन्धकेति ।** संसर्गाभावस्य—संसर्गाभावत्वेन संसर्गाभावस्य । तथा च विघ्नसंसर्गाभावत्वेन हेतुत्वान्न पूर्वोक्तव्यभिचार इति भावः ।

अत्र च तत्तद्विघ्नाभावत्वेन हेतुता, न तु विघ्नाभावकूटत्वेन । अन्यथा विघ्नप्रागभावादीनामेकत्राऽसम्भवेन समाप्तिर्न स्यादिति बोध्यम् ।

यत्र च मङ्गलं विनाऽपि समाप्तिस्तत्र विघ्नध्वंसाभाववति समाप्तेर्दर्शनाद् व्यतिरेकव्यभिचारमाशङ्क्य निषेधति—**इत्थं चेति ।** दुरितध्वंसकल्पने तज्जनकीभूतमङ्गलकल्पने च गौरवादाह—**स्वतःसिद्धेति ।**

रामरुद्री ।

व्यतिरेकव्यभिचारेणेत्यर्थः । **संसर्गाभावत्वेन संसर्गाभावस्येति ।** संसर्गाभावत्वावच्छिन्नस्येति पर्यवसितोऽर्थः । इदं च विवरणं ससर्गाभावस्य ध्वसत्वादिना कारणत्वेऽपि न व्यभिचारनिरास इति यथाश्रुतमूलवाक्यस्योक्तशङ्काया अनिरासकत्वादिति बोध्यम् ।

ननु तत्तद्विघ्नाभावानां यदि विघ्नसंसर्गाभावत्वेन हेतुता, तदा यत्किञ्चिद्विघ्नसत्त्वेऽपि विघ्नप्रतियोगिकसंसर्गाभावस्य सत्त्वेन समाप्त्यापत्तिः । यदि विघ्नत्वावच्छिन्नप्रतियोगिताकससर्गाभावत्वेन हेतुता, तदा ध्वंसप्रागभावयोर्न हेतुता, तयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वाऽनङ्गीकारात् । यदि च विघ्नप्रतियोगिकसंसर्गाभावकूटत्वेन(१) हेतुता, तदा क्वाऽपि समाप्तिर्न स्यात्, ध्वंसप्रागभावादीनामेकदा एकत्राऽसत्त्वेन कूटाऽधिकरणत्वस्य कदाऽप्यसम्भवादित्याशङ्का परिहर्तुमाह—**अत्र चेति । तत्तद्विघ्नाभावत्वेनेति ।** तत्तद्विघ्नप्रतियोगिकसंसर्गाभावत्वेनेत्यर्थः । तेन भेदमादाय न विघ्नसत्त्वेऽपि समाप्त्यापत्तिः । न चैवमपि विघ्नसत्त्वे समाप्त्यापत्तिर्दुर्वारा, तत्तद्विघ्नव्यक्तेरपि द्वित्वादिनाऽत्यन्ताभावरूपसंसर्गाभावसत्त्वादिति वाच्यम् । तत्तद्विघ्नत्वेतरधर्मानवच्छिन्न—तत्तद्विघ्ननिष्ठ—प्रतियोगिताकसंसर्गाभावत्वेनेत्यर्थविवक्षयोक्तदोषप्रतीकारसम्भवात् । ध्वंसप्रागभावयोरपि विशेषधर्मावच्छिन्नप्रतियोगिताकत्वाङ्गीकारे तु तत्तद्विघ्नत्वावच्छिन्नप्रतियोगिताकसंसर्गाभावत्वेनेत्यर्थकरणेऽपि न क्षतिरिति मन्तव्यम् ।

विघ्नध्वंसाऽभाववतीति । विघ्नसंसर्गाभावसामान्याभाववतीत्यर्थः । अन्यथा यथाश्रुते विघ्नध्वंसाभाववत्यऽपि विघ्नात्यन्ताभावसम्भवेन विघ्नसंसर्गाभावत्वेन हेतुत्वे व्यतिरेकव्यभिचाराऽसम्भवेनाऽसंलग्नतापत्तेः । तथा च यत्र मङ्गलं विनैव समाप्तिस्तत्र विघ्ननाशकमङ्गलाऽसत्त्वेन विघ्नस्यैव सत्त्वात् निरुक्ततद्विघ्नप्रतियोगिकस्य कस्याऽपि संसर्गाभावस्याऽसत्त्वेन तद्विघ्नसंसर्गाभावस्य व्यतिरेकव्यभिचारो दुर्वार एवेति भावः ।

---

(१) **विघ्नप्रतियोगिकसंसर्गाभावत्वव्यापककूटत्वेनेति तदर्थः ।**

दिनकरी ।

यत्र च मङ्गले सत्यपि न समाप्तिस्तत्र मङ्गलाद्विघ्नध्वंसो भवत्येव, समाप्त्यभावस्तु विघ्नभूयस्त्वात् तन्मङ्गलानन्तरोत्पन्नाद्विघ्नाद्वेत्यवधेयम् ।

अथ समाप्तिविघ्नध्वंसयोराकाशात्मनिष्ठयोः कथं कार्यकारणभावः ? इति चेत्-

उच्यते । स्वप्रतियोगिप्रयोजकत्वसम्बन्धेन चरमवर्णध्वंसरूपसमाप्तिं प्रति विशेषणता-सम्बन्धेन विघ्नसंसर्गाभावत्वेन हेतुत्वमिति ।

वस्तुतस्तु "आहु" रित्येन सूचितामन्यथासिद्धिं प्रकटयति—**क चिच्चेति ।** "विघ्नात्यन्ताभाव एव" इत्येवकारेण विघ्नध्वंसस्य तद्द्वारकमङ्गलस्य च व्यवच्छेदः । **समाप्तिसाधनम्**—समाप्त्यव्यवहितपूर्ववृत्तितया निश्चितः । तथा च तेनैव मङ्गलस्थली-यसमाप्तिनिर्वाहे मङ्गलस्य तज्जन्यविघ्नध्वंसस्य चाऽन्यथासिद्धिः । ध्वंसप्रागभावयोरत्यन्ता-भावेन विरोधे मानाभावात् ध्वंसस्थलेऽप्यत्यन्ताभावसत्त्वादिति भावः । नन्वन्योन्याभाव-भिन्नाभावत्वेनैव लाघवाद्धेतुताऽस्त्वत आह-**प्रतिबन्धकसंसर्गेति ।** प्रतिबन्धकसत्त्वेऽपि सम्बन्धान्तरावच्छिन्नाभावस्य सत्त्वात् कार्योत्पादवारणाय तत्तत्संसर्गावच्छिन्नप्रतियोगिता-काभावत्वेनैव हेतुत्वस्य वाच्यत्वेन न ध्वंसस्य हेतुता, तस्य संसर्गावच्छिन्नत्वे मानाभावा-

रामरुद्री ।

ननु यत्र सत्यपि मङ्गले न समाप्तिर्दृश्यते तत्र मङ्गलाद्विघ्नध्वस एव न जात इत्यवश्यमङ्गीकरणीय, अन्यथा तत्तद्विघ्नससर्गाभावानां सत्त्वेन समाप्तिविरहस्योपपादयितुमशक्यत्वात्, तथा चाऽन्वयव्यभि-चारेण मङ्गलस्य विघ्नध्वंसफलकत्व न शक्यते वक्तुमित्याशङ्क्य निराकुरुते- **यत्र चेति । विघ्नभूय-स्त्वादिति ।** ननु मङ्गलानन्तरोत्पन्नविघ्नादपि तत्र समाप्त्यभावसम्भवेन नानाविघ्नव्यक्तीना तत्कारणी-भूतप्रागभावादीना च कल्पने गौरवमतस्तथैऽऽह—**मङ्गलानन्तरेति ।**

स्वप्रतियोगिप्रयोजकत्वेति । स्वप्रतियोगिचरमवर्णाऽनुकूलकृतिमत्त्वसम्बन्धेनेत्यर्थः । न च स्वप्रयोजकत्वसम्बन्धेनेत्येव कुतो नोक्तम्, जीवात्मनि स्वानुकूलकृतिमत्त्वासम्भवेऽपि स्वजनकचरमवर्णज-नककृतिजनकत्वरूपस्य स्वप्रयोजकत्वस्य सम्भवादिति वाच्यम् । निरुक्तप्रयोजकत्वस्य नानाजनकता-घटितत्वेन गौरवादिति भावः ।

"क चिच्च" इत्यादि प्रकारान्तरेण व्याचष्टे—**वस्तुतस्त्विवत्यादिना ।** "समाप्तिसाधन" इत्यस्य समाप्तिकारणमित्यर्थकत्वे "क चित्" इत्यस्याऽसङ्गतिः, तत्तद्विघ्नसंसर्गाभावत्वेन हेतुताया व्यवस्थापि-ततया सर्वत्रैवाऽभावत्रयस्याऽपि कारणत्वात्, नियतपूर्ववर्तितावच्छेदकधर्मवत्त्वस्यैव कारणतात्पत्वाद-तस्तत्पदं व्याचष्टे—**समाप्त्यव्यवहितेति ।** ननु मङ्गलाद्विघ्नध्वसस्थले ध्वसप्रागभावाभ्यामत्यन्ता-भावस्य विरोधात् विघ्नात्यन्ताभावस्यैवाऽसत्त्वेन कथ तेन विघ्नध्वसस्याऽन्यथासिद्धिरित्यत आह—**ध्वंस-प्रागभावेत्यादि । अन्योन्याभावभिन्नाभावत्वेनेति ।** सर्वत्र विघ्नात्यन्ताभावसत्त्वेऽपि न विघ्ना-त्यन्ताभावत्वेन हेतुता सम्भवति, विघ्नससर्गाभावत्वापेक्षया नित्यत्वघटितस्य तस्य गुरुत्वात्, सति च लघुधर्मे गुरुधर्मस्य कारणतावच्छेदकत्वाऽनङ्गीकारात्, तथा चाऽऽयातमेव त्रयाणामपि कारणत्वेनेति भावः । **तत्तत्संसर्गेति ।** प्रतिबन्धकतावच्छेदकसंसर्गेत्यर्थः । **वाच्यत्वेनेति ।** तथा च "प्रतिबन्धक-संसर्गाभावस्य" इति मूलस्य प्रतिबन्धकतावच्छेदकससर्गावच्छिन्नप्रतियोगिताकाभावस्येत्यर्थ इति भावः । **मानाऽभावादिति ।** समवायेन घटाऽधिकरणे सयोगेन घटो नास्ति, संयोगेन घटाऽधिकरणे समवायेन घटो नास्तीति प्रतीत्या सयोग-समवाय-सम्बन्धावच्छिन्नघटाभावयोर्भेदोपपत्तये ह्यत्यन्ताभावप्रतियोगि-तायां सम्बन्धावच्छिन्नत्वमङ्गीक्रियते । ध्वंसे च तादृशयुक्त्यसम्भवेन संसर्गावच्छिन्नप्रतियोगिताकत्वम-प्रामाणिकमेवेति भावः । नन्वेवं विघ्नध्वंसस्याऽकारणत्वे "दुरितध्वंसः स्वतःसिद्धविघ्नाभ्यन्ताभावो वा"

तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय ॥ १ ॥

संसारेति। **संसार एव महीरुहो वृक्षस्तस्य बीजाय—निमित्तकारणायेत्यर्थः।**

दिनकरी।

दिति भावः। दुरितध्वंसः-दुरितध्वंससामग्रीप्रयुक्तः। स्वतःसिद्धः-दुरितकारणाभावप्रयुक्तः। एतेन विघ्नध्वंसस्य तदत्यन्ताभावस्य वा समाप्तिहेतुताविचारस्याऽप्रकृततया तद्व्यवस्थापने प्रकृताऽनुपयोगः, एवं प्रतिबन्धकाभावकूटस्य हेतुत्वेऽतीतानागतप्रागभावध्वंसयोर्युगपदेवैकदाऽवस्थानासम्भवेन कूटाऽप्रसिद्धिः, पूर्वोक्तरीत्या तत्तत्संसर्गावच्छिन्नप्रतियोगिताकत्वस्य प्रतिबन्धकाभावविशेषणत्वेन ध्वंसप्रागभावयोरसङ्ग्रहश्चेति दूषणानि निरस्तानि। उक्तरीत्या प्रतिबन्धकात्यन्ताभावस्यैव कार्यमात्रहेतुत्वादिति। **इति मङ्गलवादः ॥**

अत्र मूले—**नूतनेत्यादि**। नूतनो यो जलधरो मेघस्तस्य रुचिरिव रुचिर्यस्य तस्मै। एतेन यथा नूतनजलधरः शीघ्रं वृष्टिप्रदस्तथाऽयमपि स्वाभिलषितप्रद इति सूचितम्। गोपानां वधूर्स्त्रो युवत्यः स्त्रियस्तासां दुकूलानि वस्त्राणि तेषां चोरायेत्यर्थः। नमस्कार्यस्य भगवतः सन्तुष्टतां सूचयितुमाह—**मूले-गोपेति। तस्मै इति।** तच्छब्दः सामान्यतः सकलजनप्रसिद्धत्वसूचनाय। एतेन भगवतो नमस्कारप्रकारीभूताऽपकर्षावधि-

रामरुद्री।

इत्याद्यग्रिमग्रन्थाऽसङ्गतिरित्यतो दुरितध्वंसपदं व्याचष्टे—**दुरितध्वंससामग्रीति**। अत्यन्ताभावस्य नित्यत्वेऽपि प्रतियोगिसत्त्वदशायामत्यन्ताभावसम्बन्धाऽसत्त्वेन अधिकरणसम्बद्धत्वमत्यन्ताभावे दुरितध्वंससामग्रीप्रयुक्तमिति भावः। द्वितीयव्याख्यानाऽऽदरणे स्वयमेव बीजं प्रकटयति—**एतेनेति**। ननु मङ्गलस्य विघ्नध्वंसफलकत्वे समाप्तिकामनया तत्र प्रवृत्तिः समाप्तिजनकविघ्नध्वंसजनकत्वेनै(१)वोपपादनीया। विघ्नध्वंसस्य समाप्तिहेतुत्वं च व्यभिचारेणाऽसम्भवदुक्तिकमित्याशङ्क्या "क्व चिच्च"इत्यादिग्रन्थस्याऽवतारितत्वेन न प्रकृताऽनुपयोग इत्यतो दूषणान्तरमाह—**एवमिति**। ननु प्रतिबन्धकससर्गाभावकूटत्वेन न हेतुतामङ्गीकुर्मो येनाऽप्रसिद्धिः स्यात्, अपि तु तत्तद्विघ्नससर्गाभावत्वेनेत्युक्तमेवेत्याशङ्क्य दूषणान्तरमाह—**पूर्वोक्तेति**। द्वितीयव्याख्याने तद्दोषनिवारणे हेतुमाह—**उक्तरीत्येति। प्रतिबन्धकाभावस्येति**। प्रतिबन्धकतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताक-तत्तत्प्रतिबन्धकाभावत्वेनेत्यर्थः॥

इति मङ्गलवादः ॥

यत्तदोर्नित्यसम्बन्धात् प्रकृतश्लोके च यत्पदाभावात्कथ सङ्गतिरिति हृद्याशङ्क्य प्रकृते तच्छब्दस्य प्रसिद्धाऽर्थकतया न यत्पदाऽपेक्षेति समाधत्ते—**तच्छब्द इति। नमस्कारप्रकारीभूतेति**। स्वाऽपकर्षबोधाऽनुकूलव्यापारो नमःशब्दार्थः। अपकर्षान्वय्यवधित्व कृष्णपदोत्तरचतुर्थ्यर्थ इति भावः। यद्यप्यवधित्वस्याऽपादानतारूपतया तदर्थिका पञ्चम्येव, न तु चतुर्थी, तथाऽपि क्रियान्वय्यवधित्वस्यैवाऽपादानत्वरूपतया नाऽत्र पञ्चमीप्रसक्तिः, परन्तु निरुक्ताऽपकर्षाऽवधित्वविवक्षायां "नमःस्वस्ति-"इत्यादिसूत्रेण चतुर्थ्येव विहितेति भावः। एवं च श्रीकृष्णाऽवधिकस्वाऽपकर्षबोधाऽनुकूलो मदीयो व्यापार इत्युक्तवाक्याच्छाब्दबोध., उच्चारयितृव्यापारस्यैव नमःशब्दार्थत्वात्। यद्यप्येवं सति "नारायणं नमस्कृत्य"इत्यादावपि नारायणपदोत्तरं चतुर्थ्येवाऽपेक्षिता न द्वितीया, करोतिकर्मत्वस्य नारायणेऽसम्भवेन नमःपदार्थस्यैव तत्कर्मतया नमःपदार्थघटकाऽपकर्षाऽवधित्वस्यैव द्वितीयया बोधनीयत्वात्। तथाऽपि तत्र लक्षणया नमस्कारानुकूलकृतिपर्यन्तं करोत्यर्थः, नमःपदं तात्पर्यग्राहकम्, अतो नमःपदयोगाऽभावान्न चतुर्थी। अपकर्षबोधनिरूपितापकर्षनिष्ठप्रकारतानिरूपिताऽवधित्वनिष्ठप्रकारतानिरूपितप्रकारतारूपा

(१) **यस्य यत्फलेच्छा तस्य तत्साधने प्रवृत्तिनियमेनेति शेषः।**

एतेन ईश्वरे प्रमाणमपि दर्शितं भवति। तथा हि—यथा घटादिकार्यं कर्तृजन्यं, तथा क्षित्यङ्कुरादिकमपीति। न च तत्कर्तृत्वमस्मदादीनां

दिनकरी।

त्वमुक्तं, तदयुक्तं, भगवति मानाभावादित्याशङ्क्य नैयायिकमतानुसारेणेश्वरसाधकानुमानसूचनायाऽऽह—**संसारेति**। संसारस्य महीरुह इति षष्ठीतत्पुरुषभ्रान्तिं व्यावर्तयितुं कर्मधारयमाह—**मुक्तावल्यां—संसार एवेति**। बीजत्वं समवायिकारणत्वम्, तच्चेश्वरे बाधितमत आह—**निमित्तेति**।

नन्वीश्वरनमस्काररूपं मङ्गलाचरणमयुक्तम्, ईश्वरे मानाभावात्(१)। नहि तत्र प्रत्यक्षं प्रमाणम्, अरूपिद्रव्यत्वेन बाह्यप्रत्यक्षाविषयत्वात्। नाऽपि मानसम्, परात्मनः परेण मनसा प्रत्यक्षवारणायाऽऽत्मप्रत्यक्षं प्रति परात्मव्यावृत्तविजातीयमनःसंयोगत्वेन हेतुत्वस्याऽऽवश्यकतया ईश्वरे तस्याऽभावात्। नाऽप्यनुमानम्, लिङ्गाभावात्। न च "द्यावाभूमी जनयन्" इत्यादिश्रुतिरेव प्रमाणम्। श्रुतीनामीश्वरोच्चरितत्वेन प्रामाण्यादीश्वरसन्देहे श्रुतिप्रामाण्यस्याऽपि सन्दिग्धत्वादत आह—**एतेनेति। प्रमाणम्**—अनुमानरूपं प्रमाणम्।

तथा क्षित्यङ्कुरादिकमपीति। नन्वत्र किं पक्षतावच्छेदकं? न तावत् क्षितित्वम्, अङ्कुरादेरपि क्षितित्वेन पृथक् तदुपादानवैयर्थ्यात्। किञ्च क्षितित्वसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे दृष्टान्ते घटादावंशतः सिद्धसाधनम्। अवच्छेदकावच्छेदेन तथात्वे परमाणौ बाधः। जन्यक्षितित्वस्य पक्षतावच्छेदकत्वे परमते जन्यपदव्यावृत्त्यसिद्धिः, तन्मतेऽजन्य-

रामरुद्री।

विषयतैव द्वितीयार्थः। अत एव नमःपदस्य सार्थकत्वविवक्षया "स्वयम्भुवे नमस्कृत्य ब्रह्मणेऽमिततेजसे" इत्यादौ चतुर्थ्येव, न द्वितीयेति मन्तव्यम्।

षष्ठीतत्पुरुषभ्रान्तिमिति। सकलप्रपञ्चहेतोरीश्वरस्य महीरुहबीजत्वमात्रकथनस्याऽनुचितत्वेन षष्ठीतत्पुरुषस्य भ्रममूलकत्वमिति भावः। **समवायिकारणत्वमिति**। वृक्षादिसमवायिकारण एव वृक्षादेर्बीजत्वव्यवहारादिति भावः। यद्यपि बीज वृक्षादेर्न समवायिकारणम्, बीजनाशाऽनन्तरमेव तदवयवैरङ्कुरारम्भात्, तथाऽपि समवायिकारणत्वमत्र समवायिकारणाऽवयवकत्वमेव विवक्षितमतो नाऽसङ्गतिः।

ईश्वरे (२)प्रमाणाऽभावमेव व्युत्पादयन्नाह—**नहीति। लिङ्गाऽभावादिति**। ईश्वरसाधकलिङ्गाऽभावादित्यर्थः। उपमानस्य शक्तिमात्रसाधकत्वेन तन्निराकरणं न कृतमित्यवधेयम्।

"तथा क्षित्यङ्कुरादिकमपि" इति मूले क्षित्यङ्कुरादीना पक्षत्वं सूचितम्। क्षित्यङ्कुरादावनुगतं पक्षतावच्छेदकं किमित्याशङ्क्ते—**नन्वत्रेति। अङ्कुरादेरपीति**। तथा च क्षितित्वस्यैव पक्षतावच्छेदकत्वे अङ्कुरस्याऽपि क्षितित्वेनाऽङ्कुरादेः पृथगुपादानमनर्थकमिति भावः। नन्वत्र क्षितिपदं न पृथिवीत्वजात्यवच्छिन्नपरम्, येनाऽङ्कुरादेरुपादान व्यर्थं स्यात्, अपि तु भूमण्डलपरमेव, तथा च भूमण्डलाऽङ्कुरादीना सर्वेषा पक्षत्वलाभे सर्वानुगतं पक्षतावच्छेदक किमित्याशङ्कायां पृथिवीत्वमेव तथेत्युक्तौ नाऽङ्कुरादेः पृथगुपादानवैयर्थ्यमत आह—**किञ्चेति। अवच्छेदकावच्छेदेनेति। तथात्वे**—साध्यसिद्धेरुद्देश्यत्वे इत्यर्थः। तथा चाऽवच्छेदकावच्छेदेनाऽनुमितौ सामानाधिकरण्येन साध्यसिद्धेरप्रतिबन्धकतया न सिद्धसाधनमिति भावः। **परमते**—चार्वाकमत इत्यर्थः। **जन्यपदेति**। तैरप्रत्यक्षत्वेन

---

(१) **प्रमीयविषयतासम्बन्धेनेश्वरज्ञानाभावादित्यर्थः। तेन नाऽप्रसिद्ध्यादिदोषः। तत्र ज्ञानत्वं नित्यपदार्थवृत्ति न वा, द्व्यणुकं कर्तृजन्यं न वेत्यादयो विप्रतिपत्तयोऽनुसन्धेयाः।**

(२) **'पूर्वोक्त' इत्यपि पाठः।**

सम्भवतीत्यतस्तत्कर्तृत्वेनेश्वरसिद्धिः। न च शरीराजन्यत्वेन कर्त्रजन्य-

दिनकरी।

क्षितेरभावात्, जन्यत्वस्यैव तथात्वसम्भवेन पक्षतावच्छेदककोटौ क्षितित्वस्य व्यर्थत्वाच्च। न च तदपि सम्भवति, पक्षतावच्छेदकहेत्वोरैक्यप्रसङ्गादिति चेत् न। **स्वरूपसम्ब-न्धविशेषरूपकार्यत्वस्यैव** पक्षतावच्छेदकत्वात् प्रागभावप्रतियोगित्वरूपकार्यत्वस्य च हेतु-त्वेन तयोरैक्याभावात्।

रामरुद्री।

नित्यपृथिव्यनङ्गीकारादिति भावः। ननु पक्षतावच्छेदककोटिप्रविष्टविशेषणानां सर्वमते प्रयोजनमपेक्षि-तमिति न नियमः, तथा च स्वमते नित्यपृथिव्यां बाधवारकतयैव जन्यपद सार्थकमित्यत आह—**जन्य-त्वस्यैवेति**। नन्वस्तु जन्यत्वमेव पक्षतावच्छेदकं, किं नश्छिन्नमत आह—**न च तदपीति**। ऐक्य-प्रसङ्गादिति।

ननु पक्षतावच्छेदकहेत्वोरैक्ये को दोषः? न च व्याप्तिग्रहदशायामेव पक्षतावच्छेदकीभूतहेतौ साध्यसामानाधिकरण्यसिद्धया सिद्धसाधनमेव दोष इति वाच्यम्। हेतुः साध्यसमानाधिकरण इति व्याप्तिग्रहस्य हेतुमान् साध्यवानित्यनुमितितो भिन्नाकारत्वात् समानाकारकसिद्धेरेवाऽनुमितिप्रतिबन्धक-त्वात्, अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे सामानाधिकरण्यमात्राऽवगाहिसिद्धेरप्रतिबन्धकत्वाच्च। यद्यप्यवच्छेदकावच्छेदेन अनुमितौ सामानाधिकरण्याद(१)धिकं पक्षतावच्छेदकव्यापकत्वमेव साध्ये भासते, व्याप्तिज्ञानेऽपि साध्ये हेतुव्यापकत्वं भासत एवेति तुल्यम्, तथाऽपि व्याप्तिग्रहे व्यापकत्वं प्रकारतयैव, अनुमितौ तु साध्यीयसंसर्गघटकतया भासन(२) इति चेन्न। उद्देश्यतावच्छेदकविधेययो-रैक्येनोपनयवाक्याच्छाब्दबोधाऽनुपपत्तेरेव दोषत्वात्। न च नवीनमते विधेयांशेऽधिकावगाहिनः शाब्द-बोधस्योपगमेन पक्षतावच्छेदकहेत्वोरैक्येऽपि साध्यव्याप्यहेतुमान् पक्ष इत्याकारकस्योपनयवाक्यजन्य-शाब्दबोधस्य नाऽनुपपत्तिरिति वाच्यम्। प्राचीनैरुदाहरणवाक्यादेव व्याप्तिलाभादुपनयेनाऽपि तत्प्रति-पादने पौनरुक्त्यमिति पक्षे हेतुमत्तामात्रमेवोपनयेन बोधनीयम्, 'तथा चाऽयम्' इत्युपनयवाक्यस्य हेतुमान्पक्ष इत्येवाऽर्थ इत्यङ्गीकारात्तन्मताऽनुसारेणैव "पक्षतावच्छेदकहेत्वोरैक्यात्" इति दूषणाभिधा-नादिति ध्येयम्।

स्वरूपसम्बन्ध(विशेष)रूपेति। यद्यपि स्वरूपसम्बन्धरूपकार्यताव्यक्तीनां तत्तद्व्यक्तिमात्रपर्यवसि-तत्वेन नाऽनुगतपक्षतावच्छेदकलाभस्तथाऽप्यन्यतमत्वेनाऽनुगतीकृताना पक्षतावच्छेदकत्वमिति भावः। **प्रागभावप्रतियोगित्वेति**। न च (प्रागभाव)प्रतियोगित्वस्याऽपि स्वरूपसम्बन्धस्वरूपतया तत्तद्धर्मिव्य-क्तीनामैक्येन पक्षतावच्छेदकहेत्वोरैक्याऽपरिहार इति वाच्यम्। "अभावविरहात्मत्वं वस्तुनः प्रतियोगिता" इत्याचार्यमताऽभिप्रायाऽनुसारेण—सयोगेन घटाभावात्समवायेन घटाभावस्य भेदः प्रतियोगिताभेदादेव समर्थनीयः, प्रतियोगिप्रतियोगितावच्छेदकयोरैक्यात् (३), किञ्च स्वरूपसम्बन्धरूपप्रतियोगितायाः प्रति-योगिघटव्यक्तीनाञ्चैक्येन भेदो दुरुपपाद एवेति तयोर्भेदो न स्यादतो विषयत्वस्यैव प्रतियोगित्वस्याऽपि पदार्थान्तरत्वमेवाऽङ्गीकरणीयम्(४), सप्तपदार्थविभागस्तु तत्त्वज्ञानोपयोगिज्ञानविषयाणामेवेति न तद्विरो-

---

(१) 'वधिक'मिति पाठः।

(२) तत्र पक्षतावच्छेदकव्यापकसाध्यप्रतियोगिकसाध्यतावच्छेदकसम्बन्धेनैव साध्य-भानादित्यर्थः। यथा—पर्वतः पर्वतत्वव्यापकरूपीयसमवायसम्बन्धेन रूपवान् पृथिवीत्वा-दित्यादिकम्।

(३) प्रतियोगिनो घटस्य प्रतियोगितावच्छेदकस्य घटत्वस्य च संयोगेन घटाभावे सम-वायेन घटाभावे चैकत्वादित्यर्थः। यद्वा प्रतियोगितावच्छेदकयोरैक्यादित्यपि पाठः। तन्मते प्रतियोगिताया अवच्छेदकस्य चैक्यादित्यर्थः।

(४) इदमत्राभिमतम्। संयोगेन घटाभावात्समवायेन घटाभावस्य को भेदः? यदि

रामरुद्री ।

धोऽपीति नवीनमताभिप्रायेणैव वा एतदभिधानात् । वस्तुतस्तु "प्रागभावप्रतियोगित्वरूपकार्यत्वस्य हेतुत्वात्" इति ग्रन्थस्य प्रतियोगितासम्बन्धेन प्रागभावस्य हेतुत्वादित्यर्थे तात्पर्यान्न कोऽपि दोष इति ध्येयम् । वस्तुतस्तु "क्षित्यङ्कुरादिकम्" इति मूलस्य क्षितित्वस्याऽङ्कुरत्वस्य तद्घटत्वस्य च पक्षतावच्छेदकत्वे तात्पर्यम् । तत्र क्षितिः सकर्तृकेति प्रथमप्रयोगे क्षितित्वसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे घटादावशतः सिद्धसाधनम् । पक्षतावच्छेदकावच्छेदेन तथात्वे तु परमाणौ बाध इत्यतोऽङ्कुरत्वस्य पक्षतावच्छेदकत्वाऽनुधावनम् । तत्र च सामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे काऽप्यङ्कुरे जीवीयकृतिसाध्यत्वाभावेन नांशतः सिद्धसाधनं, न वा बाधः, नित्याऽङ्कुरस्याऽभावादिति भावः । ननु क्षितित्वावच्छेदेनाऽङ्कुरत्वावच्छेदेन वा कार्यत्वहेतुना सकर्तृकत्वाऽनुमितिने सम्भवति, कार्यत्वरूपहेतोरप्रयोजकत्वात् । न च कार्यत्व यदि कृतिजन्यत्वव्यभिचारि स्यात्तदा कृतिजन्यतावच्छेदक न स्यादित्यनुकूलतर्कसत्त्वान्नाऽप्रयोजकत्वमिति वाच्यम् । कृतित्वेन कार्यत्वेन कार्यकारणभावे मानाभावेनोक्ततर्कानवतारात् । न चाऽन्वयव्यतिरेकावेव मानमिति वाच्यम् । कुलालकृतिसत्त्वे घटस्तदभावे घटाभाव इति विशिष्यैवाऽन्वयव्यतिरेकग्रहात् , तन्तुवायकृतिकाले घटोत्पत्तिवारणाय कुलालकृतित्वेन घटत्वेन विशिष्य कार्यकारणभावस्याऽऽवश्यकत्वेन सामान्यतः कृतित्वेन कार्यत्वेन कार्यकारणभावे मानाभावात् । न च "यद्विशेषयो"रिति नियम(१) एव मानमिति वाच्यम् । तस्याऽप्यप्रयोजकत्वात् । न च कार्यसामान्याभावे कुलालादिकृत्यभावकूटस्य प्रयोजकत्वे गौरवम् , कृतित्वाऽवच्छिन्नाभावस्यैकस्य तथात्वे लाघवम् , तच्च कृतित्वस्य कारणतावच्छेदकत्वमन्तरा न सम्भवति, कारणतावच्छेदकधर्मावच्छिन्नाभावस्यैव कार्यतावच्छेदकधर्मावच्छिन्नाभावप्रयोजकत्वात् , तथा च लाघवमूलक एव "यद्विशेषयो'रित्यादिन्याय इति वाच्यम् । कारणतावच्छेदकधर्मावच्छिन्नाभाव एव कार्याभावे प्रयोजक इति च नियमः, किं तु स्वरूपसम्बन्धरूपप्रयोजकत्वं प्रतीत्यनुरोधेन लघ्वनतिप्रसक्तधर्मावच्छेदेन कल्प्यते इति नियमः । तथा च लाघवादेव कारणतानवच्छेदककृतित्वावच्छिन्नप्रतियोगिताकैकाभावस्य कार्याभावप्रयोजकत्व कृतित्वेन कार्यत्वेन कार्यकारणभावमन्तराऽपि सूपपादमेवेति तत्र प्रमाणाभाव एवेत्यभिप्रेत्याऽऽदिपदमुपात्तम् । तेन सर्गाऽऽद्यकालीनघटनिष्ठतद्ध्वंसाप्रतियोगित्वस्योपसङ्ग्रहात्तद्व्यक्तौ कुलालकृतिजन्यत्वस्य साधनीयत्वात् । कुलालकृतित्वेन घटत्वेन कार्यकारणभावसत्त्वेन तत्राऽप्रयोजकत्वशङ्का(२)विरहादिति भावः । न चैवमीश्वरस्य कुलालत्वापत्तिरिति वाच्यम् । घटकरणसमर्थस्यैव कुलालत्वेनेश्वरे तस्येष्टत्वात् । अत एव "नमः कुलालेभ्यः कर्मारेभ्यः" इत्यादिश्रुतिरपि सङ्गच्छते । यदि च सर्गाऽऽद्यघटस्य विवादग्रस्तत्वेन सर्गाद्यकालीनस्य घटस्य पक्षत्वे पक्षाऽप्रसिद्धिरिति मन्यते, तदाऽस्तु खण्डघट एवाऽऽदिपदार्थः, तत्पूर्वे-

---

प्रतियोगिता प्रतियोगिस्वरूपा स्यात्तर्हि तयोर्भेदोऽसम्भवी, समवायसम्बन्धावच्छिन्नप्रतियोगिताया घटस्वरूपत्वेन संयोगेनाऽप्यवच्छिन्नत्वात् । अथ प्रतियोगितावच्छेदकधर्मभेदादेव तयोर्भेद इत्युच्यते चेत्सोऽप्यसम्भवी, उभयत्राऽपि प्रतियोगितावच्छेदकस्यैक्यात् । अतोऽभावाभावत्वरूपा प्रतियोगिताऽऽचार्यमतानुसारेणाऽभ्युपेया । अभावाभावस्याऽतिरिक्तामे तु न तत्त्वरूपा प्रतियोगिता प्रतियोगिनि स्थातुं शक्नोतीत्यतः प्रतियोगित्वं नाम पदार्थान्तरमेवाऽभ्युपेयम् । न चैवं सप्तत्वव्याघात इत्यत आह—सप्तेति ।

(१) यद्विशेषयोः कार्यकारणभावस्तत्सामान्ययोरपीति नियमः ।

(२) वस्तुतस्तु यस्य कार्यानुत्पत्तौ प्रयोजकत्वं कल्प्यते, तदभावस्य कारणत्वमप्यवश्यमभ्युपेयमेव । कारणत्वं च तदभावप्रयोजकाभावप्रतियोगित्वमिति सामान्यतः कृत्यभावस्य कार्यानुत्पत्तौ प्रयोजकत्वेन तदभावस्य कृतिसामान्यस्य कार्यमात्रं प्रति कारणत्वमावश्यकमेव । अन्यथा घटत्वावच्छिन्नं प्रत्यपि कुलालकृतित्वेन कारणता न स्यात् । तत्तद्घटत्वावच्छिन्नं प्रति तत्तत्कुलालकृतित्वेन कारणत्वस्याऽऽवश्यकतया सामान्यकार्यकारणभावमात्रोच्छेदप्रसङ्गात् । अतो यद्विशेषयोरितिन्यायस्य नाऽप्रयोजकत्वमिति सुधीभिर्विभावनीयम् ।

दिनकरी।

साध्यं च न स्वोपादानगोचराऽपरोक्षज्ञान–चिकीर्षा–कृतिजन्यत्वम्, कार्यमात्रं प्रति कृतेरेवाऽन्वयव्यतिरेकाभ्यां हेतुत्वेन तज्जनकज्ञानचिकीर्षयोस्तत्राऽन्यथासिद्धत्वेनैतत्त्रितय-जन्यत्वरूपसाध्यस्य तत्र बाधात्, दृष्टान्तपक्षसाधारणस्य स्व(१)त्वस्यैकस्याऽभावेन तद्घ-टित—स्वोपादानगोचरेत्यादिसाध्यस्याऽसम्भवात्, कृतित्वाऽपेक्षयोपादानगोचरकृतित्वस्य गौरवेण जनकतानवच्छेदकत्वाच्च। किं तु विशेष्यता(२)सम्बन्धावच्छिन्नकृतित्वावच्छिन्न-कारणतानिरूपित—समवायसम्बन्धावच्छिन्नकार्यत्वम्। तेनाऽदृष्टद्वाराऽस्मदीयकृतिजन्य-त्वस्य पक्षे सत्त्वेऽपि न सिद्धसाधनम्। यदि च कार्यमात्रे कृतित्वेनैवाऽन्वयव्यतिरेकाभ्यां

रामरुद्री।

मपि कुलालकृत्यसत्त्वेन तत्पक्षकानुमानेनेश्वरकृतिसिद्धेरावश्यकत्वादिति युक्तमुत्पश्यामः। व्यक्तीभवि-ष्यति चेदमुपरिष्टात्॥

ननु सकर्तृकत्व कर्तृजन्यत्वमेव वाच्यम्, तच्च न सम्भवति, कर्तुर्जनकत्वेऽनन्तकृतिव्यक्तीनां कारणतावच्छेदकत्वापत्त्या गौरवाल्लाघवेन स्वरूपतः कृतित्वजातेरेव कारणतावच्छेदकत्वादित्याशङ्का निराकुर्वन् प्राचीनमतनिराकरणपूर्वक स्वमतेन सकर्तृकत्व निर्वक्तुमारभते—**साध्यं चेति**। नित्यज्ञाने-च्छाकृतिमानेवेश्वरः सकर्तृकत्वानुमानेन साधनीयः। अन्यथा ईश्वरे नित्यज्ञानेच्छयोरसिद्धिप्रसङ्गादतः सकर्तृकत्वमुपादानगोचरापरोक्षज्ञान—चिकीर्षा—कृतिजन्यत्वरूपमेव साधनीयम्। तथा चैतदनुमा-नेन नित्यज्ञानेच्छाकृतीनां सिद्धौ तत्पक्षकगुणत्वहेतुकानुमानेन लाघवादेकद्रव्याश्रितत्वसिद्धौ तदेव द्रव्य-मीश्वर इति नित्यज्ञानेच्छाकृतिमानेक ईश्वरः सिद्ध्यतीति प्राचामभिप्रायः। **तत्र बाधादिति**। कार्य-रूपपक्षे बाधादित्यर्थः। नन्वन्वयव्यतिरेकाभ्या ज्ञानचिकीर्षयोर्हेतुतासिद्धौ व्यापारत्वेनैव कृतेः कार्यमात्र प्रति कारणत्वमिति व्यापारेण व्यापारिणो नाऽन्यथासिद्धिरिति न्यायविरोधेन कृत्या तयोर्नाऽन्यथासिद्धि-रित्यत आह—**दृष्टान्तेति**। **असम्भवादिति**। दृष्टान्तपक्षवृत्तिसाध्यद्वयगतानुगतसाध्यतावच्छेदकाभा-वादिति भावः। ननु तर्हि स्वेति परित्याज्यमेव, यदि चाऽन्वयव्यतिरेकाभ्या कृतेरेव प्रथमतः कार्यमात्रे हेतुत्वमवधार्यते, तज्जनकत्वेनैव ज्ञानचिकीर्षयोरनुमानमित्याग्रहस्तदाऽस्तु तयोरप्यन्यथासिद्धत्वम्, तथा-ऽप्युपादानगोचरकृतिजन्यत्वस्यैव सकर्तृकत्वस्य साध्यत्वान्नाऽस्माक काऽपि क्षतिरित्याशङ्कायामाह—**कृतित्वाऽपेक्षयेति**।

स्वमतेन सकर्तृकत्वं निर्वक्ति—**किं त्विति**। विशेष्यतासम्बन्धावच्छिन्नेत्यस्य प्रयोजन "तेन" इत्यादिना स्वयमेव वक्ष्यति। कृतित्वावच्छिन्नत्वोपादान तु सविषयकत्वेन कृतेः कारणत्वे ज्ञानेच्छयोर्ना-ऽन्यथासिद्धिः सम्भवति, तयोरपि सविषयकत्वेन कारणत्वात्, स्वेन तु तयोरन्यथासिद्धत्वस्यैवाऽङ्गी-करणीयत्वादित्यभिप्रायेण। कार्यत्वे समवायसम्बन्धावच्छिन्नत्वप्रवेशस्तु यदुपादानिका प्रवृत्तिस्तत्रैव समवायेन कार्यमिति नियमस्य तन्त्वादौ घटोत्पत्तिवारकस्य निर्वाहायैवेति बोध्यम्। **न सिद्धसाधन-मिति**। तादृशजनकतायाः स्वजन्याऽदृष्टसम्बन्धावच्छिन्नतया विशेष्यतासम्बन्धानवच्छिन्नत्वादिति भावः।

नन्वेवमुक्ताऽनुमानेन नित्यकृतिसिद्धौ तत्र द्रव्याश्रितत्वाऽनुमानेन नित्यकृतिमदीश्वरसिद्धावपि तस्मिन् नित्यज्ञानं नित्येच्छा च न सिद्ध्येत्। न च कृतिं प्रति ज्ञानचिकीर्षयोर्हेतुत्वेन ,कृत्या तयोरी-श्वरेऽनुमानमिति वाच्यम्। कार्येणैव कारणानुमानसम्भवेन नित्यकृतेः कार्यत्वाभावादनुमानेन तत्सि-द्ध्यसम्भवादित्याशयेन ज्ञानेच्छयोः सिद्ध्यर्थं प्रकारान्तरमनुसरति—**यदि चेति**। स्वमतेऽन्वयव्यतिरे-काभ्यां कृतेरेव कार्यमात्रे हेतुता, यः करोति, स जानाति, स इच्छतीति व्याप्तया जन्यकृत्या तत्कारणत्वेन

---

(१) **स्वत्वस्य प्रत्येकव्यक्तिविश्रान्तत्वादिति भावः।**

(२) **समवायसम्बन्धेन कार्यं घटादिकं कपाले वर्तते तत्र विशेष्यतासम्बन्धेन कुलाल-कृतिर्वर्तते इति सामानाधिकरण्यम्।**

दिनकरी ।

ज्ञानत्वेनेच्छात्वेन च हेतुत्वं स्वीक्रियते, तदा तादृशज्ञानजन्यत्वमिच्छाजन्यत्वं कृतिजन्यत्वं वा साध्यमस्तु । यत्तु-कर्तृजन्यत्वमेव साध्यमिति ? तन्न । कार्यमात्रे कर्तृत्वेन जनकत्वे मानाभावाल्लाघवात्(१) कृतित्वेनैव तत्र हेतुत्वात् ।

ननु कार्य-विशेष्यतासम्बन्धावच्छिन्नकृतिनिष्ठजनकतानिरूपित—समवायसम्बन्धावच्छिन्नजन्यताशालि, प्रागभावप्रतियोगित्वादित्यनुमानं फलितम्, तत्र च ध्वंसे पक्षतावच्छेदकजन्यत्वाऽऽक्रान्ते विशेष्यतासम्बन्धावच्छिन्नकृतिनिष्ठजनकतानिरूपित—समवायसम्बन्धावच्छिन्नजन्यत्वरूपसाध्यस्याऽभावाद्बाध इति चेन्न । सत्त्वविशिष्टजन्यत्वस्यैव ध्वंसव्यावृत्तस्य पक्षतावच्छेदकत्वोपगमात् । न च हेत्वधिकरणे ध्वंसे उक्तसाध्याभावेन व्यभिचार इति वाच्यम् । सत्त्ववैशिष्ट्यस्य हेतौ विशेषणात् । अथैवं रीत्या व्यभिचारवारणेऽपि ध्वंसस्य कृतिजन्यत्वे मानाभावेन कार्यमात्रस्य कृतिजन्यत्वप्रवादो व्याहन्येतेति चेन्न । तादृशप्रवादस्य निर्युक्तिकत्वेनाऽश्रद्धेयत्वात् ।

यद्वा(२) जन्यत्वमात्रं ध्वंससाधारणमेव पक्षतावच्छेदकम्, कृतिजन्यत्वमात्रं साध्यम् । एवं च हेतावपि सत्त्ववैशिष्ट्यं नोपादेयम्, प्रयोजनाभावात्। एवं च ध्वंसेऽपि ईश्वरीयकृतिजन्यत्वस्य निराबाधतया कार्यमात्रे कृतिजन्यत्वप्रवादोऽप्युपपद्यत इति । न च कृतिजन्यत्वमात्रस्य साध्यत्वेऽदृष्टद्वारा हविरादिगोचराऽस्मदीयकृतिजन्यत्वमादाय सिद्धसाधनमिति वाच्यम् । अदृष्टाद्वारकत्वेन कृतिजन्यताया विशेषणीयत्वादिति दिक् ।

एतादृशानुमितौ लाघवज्ञानसहकारेण ज्ञानेच्छाकृतिषु नित्यत्वमेकत्वं च भासत इति नित्यैकत्वसिद्धिः ।

रामरुद्री ।

ज्ञानचिकीर्षयोः कल्पनम् । नित्यकृतेरजन्यतया ज्ञानचिकीर्षयोरनुमानं न सम्भवत्येव । परं तु "यः सर्वज्ञः-" इत्यादिश्रुत्यैव ज्ञानेच्छयोः सिद्धिर्वाच्येति स्वमतमभिप्रेत्य 'यदि च' इत्युक्तम् । **कृतिजन्यत्वं वेति ।** विनिगमनाविरहादिति भावः । तथा च सकर्तृकत्वानुमानेनैव ज्ञानेच्छाकृतीना त्रयाणामपीश्वरे सिद्धिरिति भावः । **यत्त्विति । मानाभावादिति ।** ननु स्वनिष्ठकृतिविशेष्यतासम्बन्धेन यत्र कर्ता, तत्र समवायेन कार्यमित्यन्वयव्यतिरेकावेव मानमित्यत आह—**लाघवादिति ।**

ननु जन्यत्वावच्छेदेन समवायसम्बन्धावच्छिन्नकृतिजन्यत्वसाधने ध्वसादौ साध्यविरहेण बाधो व्यभिचारश्चेत्याशङ्क्य तुं पर्यवसितपक्षसाध्यहेतूननुवदति—**नन्वित्यादिना ।** सर्वसिद्धप्रवादस्याऽश्रद्धेयत्वमसहमानः कल्पान्तरमाह—**यद्वेति ।** अथाऽत्र कृतिनिष्ठजनकतानिरूपिताऽदृष्टाऽद्वारक(कृति)जन्यत्वस्य साधने कारणतावच्छेदकसम्बन्धः कार्यतावच्छेदकसम्बन्धश्च पूर्वोक्त एव, तथा च ध्वंसे न कृतिजन्यत्वरूपसाध्यसिद्धिः सम्भवति । न च विशेष्यतासमवायाभ्यां कश्चित्कार्यकारणभावः, अन्यस्तु विशेष्यताविशेषणताभ्यामिति ध्वंसेऽपि कृतिजन्यत्वसिद्धिः सम्भवत्येवेति वाच्यम् । उपादानत्वाख्यविशेष्यतासम्बन्धेनैव कृतेः कारणत्वस्याऽङ्गीकरणीयतया ध्वंसस्योपादानविरहेण तं प्रत्युक्तविशेष्यतासम्बन्धेन कारणत्वासम्भवादिति चेन्न । कालनिष्ठप्रत्यासत्त्यैव कार्यमात्रं प्रति कृतेः कारणत्वस्योपगन्तव्यत्वादिति तात्पर्यात् ॥

लाघवज्ञानेति । वह्निव्याप्यधूमवानिति परामर्शाद्वह्नेर्महानसीयत्वे लाघवमिति लाघवज्ञानसहकृता-

---

(१) कृतेः कारणतावच्छेदकत्वापेक्षया कृतित्वस्य जातिरूपत्वेन तथात्वे लाघवादिति भावः।

(२) ननु ध्वंसो यदि कृतिजन्यो न स्यात्तदा शत्रुचरमप्राणशरीरसंयोगध्वंसरूपवधोद्देश्यकश्येनादियागीयप्रवृत्तिर्न स्यादत आह—यद्वेति ।

दिनकरी।

अथेश्वरज्ञानादौ कीदृशमेकत्वमनुमित्या विषयीक्रियते ? न तावत्सङ्ख्यारूपम्, गुणे गुणाऽनङ्गीकारात्। न च नित्यज्ञानवन्निष्ठभेदप्रतियोगितानवच्छेदकत्वरूपमेकत्वं तद्विषय इति वाच्यम्। ईदृशैकत्वस्य नित्यज्ञानाऽनुमितेः प्रागनुपस्थितत्वेन तादृशाऽनुमितौ भानाऽसम्भवादिति चेत्—

अत्र केचित्,—सामानाधिकरण्यसम्बन्धेनैव ज्ञानादावाश्रयगतमेकत्वमनुमितौ भासते। यद्वा द्वित्वाऽसमानाधिकरणत्वरूपमेकत्वं तद्विषयः। न च जीवेश्वरगत-द्वित्व-सामानाधिकरण्यस्येश्वरज्ञानादौ सत्त्वाद्बाध इति वाच्यम्। दुःखवदवृत्तित्वेन द्वित्वस्य विशेषणीयत्वात्। न चैवमपि घटेश्वरगत-द्वित्व-सामानाधिकरण्यस्य तत्र सत्त्वाद्बाध इति वाच्यम्। आत्माऽनात्मवृत्तिभिन्नत्वेनाऽपि द्वित्वस्य विशेषणीयत्वादित्याहुः। तन्न। ईश्वरे ज्ञानद्वयाऽङ्गीकारेऽप्येतादृशैकत्वभाननिर्वाहेणोद्देश्याऽसिद्धेः(१)।

वस्तुतस्तु स्वाधिकरणावृत्ति—स्वभिन्नज्ञानकत्वमेवैकत्वम्। एवमीश्वरेच्छाकृत्योरपि

रामरुद्री।

यथा हि महानसीयवह्निमानित्यनुमितिस्तथा कृतेरेकत्वे नित्यत्वे च लाघवमिति लाघवज्ञानसहकृत-कृति-जन्यत्वव्याप्यकार्यत्ववानिति परामर्शात्तथैव नित्यैककृतिजन्यमित्याद्यनुमितिरिति भावः॥

ज्ञानेच्छाकृतिषु कीदृशमेकत्वमनुमित्या विषयीक्रियते ? इत्याशङ्क्य—**अथेत्यादिना। न च नित्यज्ञानवन्निष्ठेति।** एतादृशैकत्वज्ञानस्य फलं नित्यज्ञानवदीश्वरस्यैकत्वसिद्धिरिति भावः।

अत्र केचिदिति। नन्वाश्रयगतैकत्वस्य सामानाधिकरण्यसम्बन्धेन ज्ञानेच्छादिषु भानोपगमेऽपि नेश्वरैकत्वसिद्धिः, ईश्वरनानात्वेऽपि तत्तदीश्वरगतज्ञानादिषु तत्तदीश्वरगतैकत्वस्य सामानाधिकरण्यसम्बन्धेन भाने बाधकाभावादित्यस्वरसात्कल्पान्तरमाह—**यद्वेति। बाध इतीति।** ईश्वरीयज्ञाने एकत्वबाध इत्यर्थः। **आत्माऽनात्मेति।** अनात्मवृत्तिभिन्नत्वमात्रोपादाने दुःखवदवृत्त्यनात्मवृत्तिभिन्नद्वित्वाऽप्रसिद्धिः, ईश्वरगतद्वित्वस्यैव तथात्वसम्भवेन तस्याऽनङ्गीकारात्, अतः आत्मवृत्तित्वे सत्यनात्मवृत्ति यत् तद्भिन्नत्वमेव विशेषणमुपात्तम्। तथा च तादृशं द्वित्वं घटपटादिगतद्वित्वमेवेति नाऽप्रसिद्धिरिति भावः।

उद्देश्याऽसिद्धेरिति। ईश्वरे सर्वविषयमेकमेव ज्ञानमिति सिद्ध्यर्थं हि ज्ञानादावेकत्वभान स्वीक्रियते, ईश्वरस्यैकत्वसिद्धावपि तदीयज्ञानादीनामेकत्वाऽसिद्धेरिति भावः।

स्वाधिकरणेति। यत्रैकत्वं भासते तदेव स्वपदार्थः। अत्र च स्वभिन्नज्ञानत्वावच्छेदेन स्वाधिकरणावृत्तित्वं विवक्षणीयम्। अन्यथा ईश्वरीयज्ञाननानात्वेऽपि स्वभिन्नजीवज्ञानादौ स्वाधिकरणावृत्तित्वसत्त्वेनेश्वरज्ञानादेरेकत्वाऽसिद्धिप्रसङ्गात्। स्वभिन्नज्ञानत्वव्यापक—स्वाधिकरणावृत्तित्वकत्वमेव ज्ञानगतमेकत्वमिति भावः। तच्च नित्यज्ञानैकत्व एव सम्भवति, न तु तद्भेदेऽपीति द्रष्टव्यम्। अथाऽत्र नित्यज्ञानव्यक्तिरेव स्वपदार्थः, तद्घटितं च निरुक्तैकत्वं नित्यज्ञानानुमितेः प्राक् दुर्ग्रहमिति कथं नित्यज्ञानानुमितौ तादृशैकत्वभानसम्भवः ? विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वात्। न च नित्यज्ञानानुमितेः पूर्वमपि ज्ञानत्वसामान्यलक्षणया प्रत्यासत्त्या निखिलज्ञानव्यक्तीनां ज्ञान सम्भवत्येव, कथमन्यथाऽनुपस्थितज्ञानव्यक्तेस्तादृशानुमितौ विधेयतया भानसम्भवः ? उक्तकार्यकारणभावस्य जागरूकत्वादिति वाच्यम्। एवमपि स्वभिन्नेत्यत्र स्वत्वं न ज्ञानत्वस्वरूपम्, ज्ञाने ज्ञानत्वावच्छिन्नभेदाऽसत्त्वेन स्वभिन्नज्ञानाऽप्रसिद्धिप्रसङ्गात्, अपि तु नित्यज्ञाननिष्ठतद्व्यक्तित्वमेव तदिति वाच्यम्, तथा च तस्य प्रमेयत्वादिसामान्यलक्षणया सुग्रहत्वेऽपि स्वरूपतस्तद्व्यक्तित्वेन वा तस्य प्रकारत्वं न सम्भवति, स्वरूपतस्तत्प्रकारकज्ञाने स्वरूपतस्तद्विषयकज्ञानस्य—तद्व्यक्तित्वविशिष्टप्रकारकज्ञाने च तद्व्यक्तित्वविशिष्टज्ञानस्य हेतुतया सामान्यलक्षणाजन्यज्ञानस्य च प्रमेयत्वादिसामान्यप्रकारकत्वनियमेन नित्यज्ञानानुमितेः पूर्वं तथाविधतद्व्यक्ति-

(१) **ईश्वरस्यैकत्वादिति भावः।**

त्वसाधकेन सत्प्रतिपक्ष इति वाच्यम्। अप्रयोजकत्वात्। मम तु कर्तृत्वेन

दिनकरी।

द्रष्टव्यम्। एवं च तादृशज्ञानादिसिद्धौ तत्र गुणत्वेन हेतुना द्रव्याश्रितत्वे साधनीये द्रव्यान्तरस्य बाधादीश्वरसिद्धिरिति द्रष्टव्यम्।

अप्रयोजकत्वादिति। अनुकूलतर्काभावादिति भावः। इदमुपलक्षणम्। शरीराजन्यत्वहेतौ शरीररूपविशेषणस्याऽसिद्धिवारकस्याऽपि व्यभिचारावारकत्वेन व्यर्थतया तद्विशेषणावच्छेदेन व्याप्तिग्रहाऽसम्भवेन व्याप्यत्वासिद्धिश्चेत्यपि द्रष्टव्यम्। न च व्यर्थ-

रामरुद्री।

(त्व)ज्ञानाऽसम्भवेन नित्यज्ञानानुमितौ भेदप्रतियोगितावच्छेदकतया तद्व्यक्तित्वज्ञानाऽसम्भवस्य दुष्परिहरत्वादिति। मैवम्। एकव्यक्तिमात्रवृत्तिधर्म एव प्रकृते स्वत्वम्। एकमात्रवृत्तित्वं च स्वप्रतियोगिवृत्तित्व-स्वसामानाधिकरण्योभयसम्बन्धेन भेदविशिष्टान्यत्वम्। अनेन च रूपेण नित्यज्ञानानुमितेः पूर्वमपि तन्निष्ठतद्व्यक्तित्वस्य सामान्यलक्षणया सुग्रहत्वात्। न चैवमपि तद्व्यक्तिभेदस्य प्रतियोगितावच्छेदकं लाघवाच्छुद्धतद्व्यक्तित्वमेव, तस्य स्वरूपतो भानाऽनङ्गीकारे तु तद्व्यक्तीतरावृत्तित्वविशिष्टमेव तथा, न तूक्तोभयसम्बन्धेन भेदविशिष्टभेदः, गौरवात्, तथा च तादृशभेदाऽप्रसिद्धिरिति वाच्यम्। तादृशभेदस्योपलक्षणतया प्रतियोगितावच्छेदकव्यावर्तकत्वोपगमात्। न चाऽभावप्रतियोगितावच्छेदककोटावुपलक्षणतया भानाऽनङ्गीकारान्न तथोपगमसम्भव इति वाच्यम्। प्रतियोगितासंसर्गकबुद्धावेव तथाभानानङ्गीकारात्, प्रकृते च तथाविधभेदविशिष्टभेदावच्छिन्नप्रतियोगिताकत्वेनैव नित्यज्ञानभेदस्य निवेशनीयत्वादिति सर्वमनाकुलम्(१)। केचित्तूक्तवाक्यस्य स्वसमानाधिकरण-स्वभिन्नज्ञानकं यद्यत्तदन्यत्वमेवाऽर्थ इति नोक्ताऽनुपपत्तिः। न च समासान्तगतनञामुत्तरपदार्थमात्रान्वयित्वम्, न तु पूर्वपदार्थविशिष्टोत्तरपदार्थाऽन्वयित्वम्, तथा सति नीलाप्रमेय इति वाक्यान्नीलप्रमेयभेदबोधापत्तिः, तथा च 'स्वाधिकरणावृत्ति-'इत्यादिवाक्यादुक्ताऽर्थलाभोऽसम्भवी इति वाच्यम्। घटाऽनधिकरणमित्यादौ घटाधिकरणभिन्नप्रतीत्यर्थं समासान्तर्गतनञोऽपि यत्रोत्तरपदं ससम्बन्धिकपदघटित तत्र पूर्वपदार्थान्वितोत्तरपदार्थाऽन्वित-स्वार्थबोधकत्वस्याऽप्यङ्गीकरणीयत्वात्। अन्यथाऽधिकरणसामान्यभिन्नस्याऽप्रसिद्ध्या घटाऽनधिकरणमित्यतः शाब्दबोधस्यैवाऽनुपपत्तेरित्यपि वदन्ति(२)। **एवमिति।** स्वाधिकरणावृत्ति-स्वभिन्नेच्छाकर्त्वं, स्वाधिकरणावृत्ति-स्वभिन्नकृतिकर्त्वमिच्छाकृत्योरेकत्वमिति भावः।

नन्वेवमनुमानेन नित्यैकज्ञानेच्छाकृतिव्यक्तीना सिद्धावपि नैश्वरसिद्धिरित्याशङ्कायामाह—**एवं चेति। द्रव्यान्तरस्य बाधादिति।** ज्ञानादिकं न पृथिव्यादिवृत्ति, चेतनगुणत्वात्, नाऽपि जीवात्मवृत्ति, नित्यज्ञानादित्वात्, जीवात्मनि तु नित्यज्ञानाद्यभावादित्येवंरीत्या द्रव्यान्तरस्य बाधादिति भावः।

अनुकूलतर्केति। शरीराजन्यत्व—कृत्यजन्यत्वयोरत्यन्ताभावरूपत्वेन नित्ययोर्व्याप्तिग्राहककार्यकारणभावरूपाऽनुकूलतर्काभावादित्यर्थः। **तद्विशेषणावच्छेदेनेति।** व्यभिचारवारकविशेषणावच्छेदेनैव हेतौ व्याप्तिरङ्गीक्रियते, न तु तदवारकविशेषणावच्छेदेनेति भावः। ननु साध्यवदन्यावृत्तित्वादिकमेव व्याप्तिः, तासा च धूमे धूमत्वावच्छेदेनैव नीलधूमत्वावच्छेदेनाऽपि सत्त्वे न किं चिद्बाधकम्। वस्तुतस्तु भेदस्य सामानाधिकरण्यस्य वा किञ्चिदवच्छेदेन सत्त्वं किञ्चिदवच्छेदेन तदभाव इत्यत्र न किञ्चिदपि साधकम्, अग्रे वृक्षः कपिसंयोगी न मूले इत्यादिवत्तत्साधकप्रतीतेरभावात्। न च धूमो धूमत्वेन वह्ने-

---

(१) **अभावप्रतियोगितावच्छेदककुक्षौ उपलक्षणस्य स्वातन्त्र्येण भानस्यैवाऽनभ्युपगमादिति भावः।**

(२) **स्वभिन्नज्ञानत्वव्यापक-सामानाधिकरण्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावप्रतियोगित्वमेकत्वम्। यद्वा ज्ञानविशिष्टान्यत्वमेवैकत्वम्। वैशिष्ट्यं च स्वभिन्नत्व-स्वसामानाधिकरण्योभयसम्बन्धेनेत्यनुगमः।**

कार्यत्वेन कार्यकारणभाव एवाऽनुकूलस्तर्कः।

दिनकरी।

विशेषणत्वस्याऽधिकोक्त्या निग्रहस्थानत्वेऽपि तज्ज्ञानस्य व्याप्तिज्ञानप्रतिबन्धकत्वे मानाभाव इति वाच्यम्। तथाऽपि गुरुधर्मस्याऽनवच्छेदकतया साध्यसम्बन्धितावच्छेदकधर्मवत्त्वरूपव्याप्तेस्तत्राऽभावेन व्याप्यत्वासिद्धेर्दुर्वारत्वादिति। तदुक्तमाचार्यैः—"एकामसिद्धिं परिहरतो द्वितीयापत्तिः" इति।

रामरुद्री।

व्याप्यो न नीलधूमत्वेनेति प्रतीतिरेव तत्साधिकेति वाच्यम्। तत्रैव विवादात्। न च व्यर्थविशेषणत्वज्ञानमेव तदवच्छेदेन व्याप्तिज्ञानप्रतिबन्धकमिति व्यर्थविशेषणत्वज्ञानदशायां व्याप्तेरज्ञानरूपाऽसिद्धिर्निष्प्रत्यूहैवेति वाच्यम्। तादृशप्रतिबध्यप्रतिबन्धकभावे मानाभावात्। न चैवं नीलधूमादिति(हेतु)प्रयोक्तुर्निग्रहो न स्यादिति वाच्यम्। अधिकस्याऽपि निग्रहस्थानत्वेन तत्सम्भवादित्याशङ्क्याह—**न चेति। मानाभाव इतीति।** ग्राह्याभावाद्यनवगाहित्वादिति भावः। **व्याप्तेस्तत्राऽभावेनेति।** जन्यत्वाभावत्वापेक्षया शरीरजन्यत्वाभावत्वस्य गुरुत्वेन साध्यसामानाधिकरण्याऽनवच्छेदकत्वात्, स्वरूपसम्बन्धरूपावच्छेदकत्वस्य गुरुधर्मे प्राचीनैरनङ्गीकारादिति भावः। **तदुक्तमिति।** कुसुमाञ्जलाविति शेषः। **एकामसिद्धिमिति।** स्वरूपासिद्धिमित्यर्थः। **द्वितीयापत्तिरिति।** व्याप्यत्वासिद्ध्यापत्तिरित्यर्थः। स्वरूपासिद्धिपरिहाराय हेतौ शरीरपदप्रवेशे तस्य व्यभिचारावारकत्वेन शरीराजन्यत्वस्य साध्यसम्बन्धितानवच्छेदकत्वेन व्याप्यत्वासिद्धिप्रसङ्गादिति भावः। इदं पुनरिहाऽनुसन्धेयम्। सम्भवदवच्छेदकताकालघुधर्मसत्त्व एव गुरुधर्मे स्वरूपसम्बन्धरूपमवच्छेदकत्वं न स्वीक्रियते "सम्भवति लघौ गुरौ तदभावात्" इति दीधित्युक्तेः। प्रकृते च जन्यत्वसामान्याभावादतिरिक्त एव शरीरजन्यत्वाभावः। तान्निष्ठसाध्यसामानाधिकरण्ये च लघोरपि जन्यत्वाभावत्वस्य नाऽवच्छेदकत्वसम्भवः, तत्र तस्याऽसत्त्वात्। अन्यथा विशिष्टसत्तात्वस्याऽपि द्रव्यत्वत्वाद्यपेक्षया गुरुत्वेनाऽनवच्छेदकत्वापातात्। न च जन्यत्वसामान्याभावत्वं जन्यत्वत्वावच्छिन्नप्रतियोगिताकत्वे सत्यभावत्वम्, जन्यत्वत्वावच्छिन्नप्रतियोगिताकत्वं च न तत्पर्याप्तप्रतियोगितावच्छेदकताकत्व, किं तु तन्निष्ठप्रतियोगितावच्छेदकताकत्वम्, तथा च शरीरजन्यत्वाभावेऽपि तदक्षतमेवेति वाच्यम्। तथा सति घटवृत्तिजन्यत्वाभावस्य पटादौ सत्त्वेन व्यभिचारितया तादृशजन्यत्वाभावस्य कर्त्रजन्यत्वसाधकत्वानुपपत्तेः। अत एव न व्यर्थविशेषणताऽपि। स्वसमानाधिकरण—प्रकृतसाध्यव्याप्यतावच्छेदकधर्मान्तरघटित एव व्याप्यतावच्छेदके तत्प्रसरात्, जन्यत्वाभावत्व—शरीरजन्यत्वाभावत्वयोर्व्यधिकरणत्वात् शरीरजन्यत्वाभावत्वस्य जन्यत्वाभावत्वेनाऽघटितत्वात्सर्वमिदमसङ्गतमिति प्रतिभाति—तथाऽपि परमते शरीरजन्यत्वं नाऽस्तीति यत्र प्रतीतिस्तत्र सर्वत्रैव कृतिजन्यत्वं नाऽस्तीति प्रतीतिरभ्युपगम्यते, शरीराजन्यस्य कृतिजन्यपदार्थस्य तैरनङ्गीकारात्। समनियताभावयोश्च भेदे मानाभावेन भवति शरीरजन्यत्वाभावनिष्ठं कृतिजन्यत्वाभावत्वम्, किं च कृतिजन्यत्वत्वापेक्षया शरीरजन्यत्वत्वस्य गुरुत्वेन तदवच्छिन्नप्रतियोगिताकाभावस्य तन्मतेऽप्रसिद्ध्या न तस्य हेतुतासम्भव इति यावन्ति शरीरजन्यत्वानि तावत्प्रतियोगिकाभावत्वेनैव हेतुता वाच्या(१)। तथा च तदपेक्षया लघुभूतेन कृतिजन्यत्वत्वाच्छिन्नप्रतियोगिताकाभावत्वेनैव तस्य हेतुता युक्ता। तन्मते शरीराजन्यकृतिजन्यपदार्थस्याऽनभ्युपगमेन तादृशाभावे कृतिजन्यत्वत्वावच्छिन्नप्रतियोगिताकत्वस्यैव तैरभ्युपगमसम्भवादिति दूषणसारः।

---

(१) **जन्यत्वस्य प्रागभावप्रतियोगित्वस्वरूपस्य स्वरूपसम्बन्धरूपस्य वा प्रतिव्यक्ति भेदाद्घटाद्यवच्छेदेनाऽपि यावच्छरीरजन्यत्वाभावस्य सत्त्वेन व्यभिचारवारणाय शरीरजन्यत्वप्रतियोगिकाभावत्वव्यापककूटत्वेनैव हेतुता वाच्या। एवं चैतदपेक्षया कृतिजन्यत्वत्वावच्छिन्नाभावस्यैव तथात्वे लाघवमित्यवधेयम्।**

इत्थञ्च "द्यावाभूमी जनयन् देव एका विश्वस्य कर्ता भुवनस्य गोप्ता"

दिनकरी।

कर्तृत्वेन कार्यत्वेन कार्यकारणभाव एवेति। न चाऽन्वयव्यतिरेकाभ्यां घटत्वाद्यवच्छिन्नं प्रति कुलालादिकृतित्वेनैव हेतुत्वादेतादृशकार्यकारणभावे मानाभाव इति वाच्यम्। घटत्वपटत्वादिभेदेनाऽनन्तकार्यकारणभावकल्पनापेक्षया कार्यत्वावच्छिन्नं प्रति कृतित्वेनैकहेतुताकल्पनस्यैवोचित्वात्। "यद्विशेषयोः–" इति न्यायेन कार्यत्वकृतित्वाभ्यां सामान्यकार्यकारणभावस्याऽऽवश्यकत्वाच्च। न चैतादृशन्यायो निष्प्रमाणक इति वाच्यम्। कार्यत्वावच्छिन्नाभावे तत्तत्कृत्यभावकूटस्य प्रयोजकत्वकल्पने गौरवात् कृतित्वावच्छिन्नाभावस्यैकस्य प्रयोजकत्वे लाघवादिति।

रामरुद्री।

अन्वयव्यतिरेकाभ्यामिति। कुलालकृतिसत्त्वे घटसत्त्व, तदभावे तदभाव इत्यन्वयव्यतिरेकाभ्यामित्यर्थः। **कुलालादिकृतित्वेनैवेति।** यद्रूपावच्छिन्नयोरन्वयव्यतिरेकग्रहस्तद्रूपावच्छिन्नयोरेव कार्यकारणभावनियमादिति भावः। **एतादृशकार्यकारणभावे**—कृतित्वावच्छिन्नकारणत्व–कार्यत्वावच्छिन्नजन्यत्वस्वरूपे। **मानाभाव इति।** अन्यथा घटत्वदण्डत्वादीनामन्वयव्यतिरेकग्रहादेव द्रव्यत्वसमवेतद्रव्यत्वाभ्यामेककार्यकारणभावकल्पनस्यैव युक्ततया घटादिक प्रति दण्डत्वादिना कारणतावैलक्षण्यप्रसङ्गात्। न चोक्तान्वयव्यतिरेकाभ्यां विशिष्य हेतुतासिद्धावपि कृतिसत्त्वे कार्यसत्त्वं, कृत्यभावे कार्याभाव इत्यन्वयव्यतिरेकाभ्यां कार्यत्वकृतित्वाभ्यामपि कार्यकारणभावोऽवर्ज्य इति वाच्यम्। कृतिसामान्याभावस्य कार्यसामान्याभावस्य च सृष्टिकाले काऽप्यनिश्चयेन प्रलये चाऽस्मदादीनामभावेन तादृशान्वयव्यतिरेकग्रहस्यैवाऽसिद्धेरिति भावः। यद्धर्म्मावच्छिन्नयोरन्वयव्यतिरेकसहचारग्रहस्तद्धर्मावच्छिन्नयोरेव कार्यकारणभावग्रह इत्यौत्सर्गिको नियम इत्यभिप्रेत्याह—**एकहेतुताकल्पनस्यैवेति।** प्रकृते घटत्व—पटत्व–कुलालकृतित्व–तन्तुवायकृतित्वाद्यवच्छिन्नानन्तकार्यकारणभावे गौरवनिश्चयरूपबाधकसत्त्वात् कार्यत्वकृतित्वाभ्यामेक एव कार्यकारणभावः कल्प्यत इति भावः। ननु तन्तुवायकृतिसत्त्वे घटोत्पत्तिवारणाय विशेषतोऽन्वयव्यतिरेकाभ्यां घटत्व–कुलालकृतित्वादिना विशेषकार्य्यकारणभावानामावश्यकत्वेन तादृशान्वयव्यतिरेकग्रहैः कार्यत्व–कृतित्वाभ्या सामान्यकार्यकारणभावान्तरकल्पन निर्युक्तिकं, सामान्यकार्यकारणभावकल्पनेऽपि तादृशगौरवस्याऽङ्गीकरणीयत्वादित्यतस्तत्साधक हेत्वन्तरमाह—**यद्विशेषयोरिति।** (१)यद्विशेषयोः कार्यकारणभावोऽसति बाधके तत्सामान्ययोरपीति न्यायः। मीमांसकमते चाक्षुषं प्रति रूपं, स्पार्शनं प्रति स्पर्शः कारणम्। बहिरिन्द्रियजन्यप्रत्यक्षसामान्ये न रूप न वा स्पर्शः कारणम्। प्रभावाह्वोः प्रत्यक्षे व्यभिचारात्। नाऽपि गुणः कारणमतिप्रसङ्गात्। नाऽपि रूपस्पर्शान्यतरत् कारणं, अन्यतरत्वस्याऽपि गुरुत्वात्। विनिगमनाविरहेण गुरुतरकारणताद्वयप्रसङ्गाच्चेत्यतो न्याये 'असति बाधके'इत्युक्तम्। **आवश्यकत्वाच्चेति।** प्रयोजनाभावेऽपि नियमबलेन तत्सिद्धिरिति भावः(२)। **लाघवादिति।** तथा चोक्तन्यायो लाघवमूलकत्वान्न निष्प्रमाणक इति भावः। न च कृतित्वस्य कार्यत्वावच्छिन्न प्रति कारणतानवच्छेदकत्वेऽपि लाघवादेव कृतित्वावच्छिन्नाभावस्यैकस्य कार्यसामान्याभावप्रयोजकत्वं कल्पनीयमिति वाच्यम्। कारणतावच्छेदकधर्म्मावच्छिन्नाभावस्यैव कार्यतावच्छेदकावच्छिन्नाभावप्रयोजकतानियमादिति भावः।

---

(१) **"एकहेतुत्वकल्पनस्यैवेति। ननु कुलालकृत्यभावेऽपि घटापत्तिवारणाय विशिष्य कार्यकारणभावानामावश्यकतया सामान्यतः कार्यकारणभावकल्पने न लाघवावकाशः, प्रत्युत गौरवमेवेत्यत आह। यद्विशेषयोरिति।" इति पाठः।**

(२) **अत्र 'व्याप्येन व्यापकनिश्चयादिति भावः।' इति पाठोऽन्यत्र दृश्यते।**

दिनकरी।

केचित्तु—माऽस्तु कार्यत्वं कृतेः कार्यतावच्छेदकं, तथाऽपि घटत्वाद्यवच्छिन्नं प्रति कृतेः कारणतया सर्गाद्यकालीनघटादिकं पक्षीकृत्य घटत्वादिहेतुना सकर्तृकत्वसाधने जीवानां बाधादीश्वरसिद्धिरित्याहुः।

दीधितिकृतस्तु—कार्यत्वावच्छिन्नं प्रति कृतेर्हेतुत्वाभावेऽपि घटत्वाद्यवच्छिन्नं प्रति कृतेर्हेतुतया खण्डघटोत्पत्तेः पूर्वं कृतेरावश्यकतया तदाश्रयत्वेनेश्वरसिद्धिमाहुः। नन्वेवंरीत्या घटादिकुलालादिचेष्टयोरन्वयव्यतिरेकाभ्यां कार्यत्वावच्छिन्नं प्रति चेष्टात्वादिना हेतुत्वादङ्कुराद्युत्पत्तेः पूर्वं चेष्टानुरोधेनेश्वरस्य नित्यशरीरमपि सिद्ध्येदिति चेन्न। तादृशान्वयव्यतिरेकाभ्यां कार्यत्वावच्छिन्नं प्रति क्रियात्वेनैव हेतुत्वात्तत्र चेष्टात्वेन हेतुत्वे (१)मानाभावात्।

आचार्यमतानुयायिनस्तु—अस्तु चेष्टात्वेन तत्र हेतुत्वं, अस्तु च तदनुरोधेनेश्वरस्य नित्यं शरीरं, तथाऽपि नेश्वरस्याऽतिरिक्तशरीरसिद्धिः, परमाणूनामेव तच्छरीरत्वोपगमात्। एवं चेश्वरकृतिजन्यचेष्टावद्भिः परमाणुरूपशरीरैरेव तत्तत्कार्याणामुत्पत्तिः। परमाणुक्रियायां चेष्टात्वरूपवैजात्याङ्गीकारात्, शरीरलक्षणेऽन्त्यावयवित्वस्याऽनिवेशाच्च न

रामरुद्री।

अत एव तादृशनियमे मानाभाव इति वादिनां केषां चिन्मतमुत्थापयति—**केचित्त्विति। माऽस्त्विति।** उक्तनियमे मानाभावेन तादृशकार्यकारणभावाऽनङ्गीकारेऽपि लाघवादेव कृत्यभावस्य कार्याभावप्रयोजकत्वसम्भवादिति भावः। "आहुः" इत्यस्वरसोद्भावनम्। तद्बीजं तु परैः सर्गादेरेवाऽनङ्गीकारेण तत्कालीनघटस्य पक्षत्वे पक्षाप्रसिद्धिरेवेति मन्तव्यम्। वस्तुतस्तु खण्डघटं पक्षीकृत्य कुलालकृतिजन्यत्वसाधने जीवरूपकुलालकृतेर्बाधादीश्वरसिद्धिः, घटकरणसमर्थस्यैव कुलालत्वेन तादृशकुलालत्वस्येश्वरेऽपि स्वीकारसम्भवात्। अत एव "नमः कुलालेभ्यः" इति श्रुतिरपि सङ्गच्छते इति तु युक्तमुत्पश्यामः। वर्णयन्ति चैवमेव दीधितिकृतोऽपि।

तदेवाऽऽह—**दीधितिकृतस्त्विति। नित्यशरीरमपीति।** चेष्टावदन्त्यावयवित्वरूपशरीरत्वस्य नित्येष्वसम्भवात्, अवयविमात्रस्य स्वमते विनाशित्वात् नाऽत्रेष्टापत्तिः सम्भवतीति भावः।

चेष्टात्वेन हेतुत्वे मानाभावादिति। नन्वगृहीतव्यभिचारकलघुभूतव्याप्यधर्मान्तरसत्त्वे व्यापकरूपेण न कारणत्वमन्यथासिद्धेः(२), अन्यथा घटत्वावच्छिन्नं प्रति दण्डत्वेनैव द्रव्यत्वादिनाऽपि कारणत्वापत्तेरित्यवश्यं चेष्टात्वेनैव कारणताऽङ्गीकरणीयेत्यस्वरसादाचार्यानुयायिनां मतमुत्थापयति—**आचार्येति। वैजात्याऽङ्गीकारादिति।** तथा च परमाणुक्रियारूपचेष्टाबलादेव द्व्यणुकादिरूपतत्तत्कार्योत्पत्तिसम्भवेन तदनुरोधेन नेश्वरस्य परमाण्वतिरिक्तशरीरसिद्धिरिति भावः। ननु शरीरक्रियाया एव चेष्टात्वेन परमाणौ च चेष्टावदन्त्यावयवित्वरूपशरीरत्वविरहेण कथं परमाणुक्रियायां चेष्टात्वाङ्गीकारसम्भवः? द्रव्यान्तरानारम्भकत्वे सत्यवयवित्वमेव हि अन्त्यावयवित्वं, तच्च परमाणौ न सम्भवति, परमाणोर्द्व्यणुकारम्भकत्वादवयवित्वाभावाच्च। चेष्टावत्त्वमात्रस्य शरीरलक्षणत्वे तु हस्तादावपि शरीर-

---

(१) **अयं भावः। चेष्टात्वं हि हिताहितप्राप्तिपरिहारानुकूलक्रियात्वम्। तत्र कार्यत्वावच्छिन्नं प्रति क्रियात्वेनैव हेतुत्वं न तथाविधचेष्टात्वेन हेतुत्वमिति।**

(२) **"कार्यत्वावच्छिन्नं प्रति प्रवृत्तित्वादिरूपव्याप्यधर्मान्तरसत्त्वेन कृतित्वेनाऽपि कारणत्वं न स्यादत उक्तमगृहीतेति। कार्यत्वावच्छिन्नं प्रति जन्यज्ञानत्वरूपव्याप्यधर्मान्तरसत्त्वे कृतित्वेनाऽपि कारणत्वं न स्यादत उक्तं लघ्विति," इत्यधिकः पाठः।**

दिनकरी।

परमाणूनां शरीरत्वाऽनुपपत्तिः। न च नानापरमाणूनां शरीरत्वकल्पने गौरवाल्लाघवेन तस्याऽतिरिक्तत्वसिद्धिरिति वाच्यम्। तच्छरीरस्य महत्त्वेऽभग्नस्य तस्य पाषाणादौ प्रवेशासम्भवेन पाषाणाऽन्तर्वर्तिभेकशरीरोत्पादकतानुपपत्तेः। अणुत्वे च दूरस्थकार्योत्पादकत्वानुपपत्तेरित्याहुरित्यलं पल्लवैरिति।

यत्तु–पूर्वोक्तस्थापनानुमाने शरीरजन्यत्वमुपाधिः। तस्य घटादौ साध्यव्यापकत्वात्, अङ्कुरादौ साधनाव्यापकत्वाच्च। न चाऽङ्कुरादौ सकर्तृकत्वरूपसाध्यसन्देहेनोपाधेः साध्यव्यापकत्वसंशयान्नोपाधित्वनिश्चय इति वाच्यम्। तथाऽपि सन्दिग्धोपाधित्वस्य दुर्वार-

रामरुद्री।

मितिव्यवहारापत्तिरित्याशङ्कायामाह—**शरीरलक्षण इति(१)। शरीरत्वानुपपत्तिरिति**। तथा च हस्तादौ शरीरत्वव्यवहारे इष्टापत्तिरेवेति भावः(२)। यद्वा शरीरलक्षणेऽन्त्यावयवित्वस्थाने द्रव्यारम्भकावयविभिन्नत्वमेवोपादेयम्। तथा च हस्तादौ न शरीरत्वव्यवहारापत्तिः, तस्य शरीररूपद्रव्यारम्भकत्वात्, न वा परमाणूना शरीरत्वानुपपत्तिरतेषामवयवित्वाभावादिति तु परमार्थः। **अतिरिक्तत्वसिद्धिरितीति**। नानाधिकरणेष्वभावत्वकल्पने गौरवाद्यथाऽधिकरणातिरिक्ताभावसिद्धिर्लाघवात्, तद्वत्प्रकृतेऽपीति भावः। **दूरस्थकार्येति**। ईश्वरस्याऽणुरूपैकशरीराङ्गीकारे तच्चेष्टया युगपन्नानादूरदेशस्थकार्योत्पत्तेरसम्भवात्, देशान्तरस्थचेष्टया देशान्तरस्थावयवेषु क्रियोत्पत्तेरसम्भवादिति भावः।

स्थापनानुमान इति। जन्यं कृतिजन्यं, कार्यत्वादित्यनुमाने इत्यर्थः। अङ्कुरादिक कर्त्रजन्यं, शरीराजन्यत्वादित्यनुमानस्याऽपि पूर्वमुक्तत्वेन तद्व्यावृत्त्यर्थं स्थापनापदम्। स्वव्यवस्थापनीयसाध्यसाधकमिति तदर्थः। **साधनाव्यापकत्वाच्चेति**। इदं च स्वमतानुसारेण। आचार्यानुयायिना मते त्वङ्कुरादेरपि परमाणुरूपेश्वरशरीरजन्यत्वादिति मन्तव्यम्। **सन्दिग्धोपाधित्वस्येति**। उपाधिनिश्चये हि हेतौ सोपाधिकत्वहेतुना व्यभिचारनिश्चय एव सम्भवति, उपाधिसन्देहे च व्यभिचारसन्देह आवश्यकः, व्याप्यसन्देहेन व्यापकसन्देहस्याऽनुभवसिद्धत्वात्। व्यभिचारस्य हि ज्ञानसामान्यं व्याप्तिज्ञानप्रतिबन्धकमिति सन्दिग्धोपाधित्वस्याऽपि दूषकत्वादिति भावः। **ननूपाधिसन्देहाहितो व्यभिचारसन्देहः** पक्षान्तर्भावेनैवाऽङ्गीकरणीयः, घटादौ साध्योपाध्योर्व्याप्तिनिश्चयेन साध्यसन्देहासम्भवादतः क्षित्यङ्कुरान्तर्भावेनैव व्यभिचारसन्देहो वाच्यः। स च न व्याप्तिज्ञानप्रतिबन्धकः, पक्षान्तर्भावेन व्यभिचारसन्देहस्य तदप्रतिबन्धकत्वात्, अन्यथाऽनुमितेः पूर्वं सर्वत्रैव पक्षे साध्यसन्देहसम्भवेन तत्र च हेतोर्निश्चयादनुमानमात्रोच्छेदप्रसङ्गात्। तस्मात् साध्याभावांशे निश्चयात्मकं वृत्तित्वांशे सशयनिश्चयसाधारणं व्यभिचारज्ञानमेव प्रतिबन्धकमित्यास्थेयम्। प्रकृते च तादृशव्यभिचारसन्देहासम्भवात्कथ सन्दिग्धोपा-

---

(१) **वैजात्याङ्गीकारादित्यनेन चेष्टात्वं न शरीरक्रियात्वं, अपि तु जातिविशेषः, तस्य च परमाणुक्रियायामङ्गीकारे बाधकाभाव इति सूचितम्। ननु परमाणुक्रियायां चेष्टात्वाङ्गीकारेऽपि न परमाणूनां शरीरत्वसम्भवः। शरीरलक्षणे हस्तादौ शरीरव्यवहारवारणायाऽन्त्यावयवित्वविशेषणस्याऽऽवश्यकत्वात् परमाणाववयवित्वासत्त्वाच्च। अवयविन्यन्त्यत्वं च समवायेनावयव्यन्तरानाधारत्वम्। यद्यप्येवं सति अवयवित्वप्रवेशो व्यर्थः, हस्तादेरवयव्यन्तराधारत्वेनैव निरासात्तथाऽपि अस्तु तथैव, एवमपि अवयव्यन्तरानाधारत्वरूपमन्त्यत्वमेव परमाणौ न सम्भवतीति परमाणूनां शरीरत्वासिद्धिर्निष्प्रत्यूहैवेत्यत आह। शरीरलक्षणे इति।**

(२) **तथा च हस्तादौ शरीरव्यवहारे इष्टापत्तिरेवेति भावः। "अन्यथा हस्तादौ तादृशव्यवहारवारणाय शरीरलक्षणेऽवयवभिन्नत्वस्याऽवश्यमुपादेयतया परमाणूनां शरीरत्वासम्भवात्।" इत्यपि पाठः।**

इत्यादय आगमा अप्यनुसन्धेयाः ॥ १ ॥ इतीश्वरानुमानम् ॥

दिनकरी।

त्वात्। न चोपाधिसन्देहाहितो व्यभिचारसन्देहः पक्षीयव्यभिचारसन्देह एव, स च न प्रतिबन्धक इति वाच्यम्। पक्ष–तत्समयोर्व्यभिचारसंशयस्याऽपि प्रतिबन्धकत्वात्। अत एव "अनुकूलतर्कविरहदशायां पक्षेतरत्वं सन्दिग्धोपाधिः" इत्यभिधानं ग्रन्थकृतां सङ्गच्छते इति,—

तन्न। कार्यत्वेन कृतित्वेन कार्यकारणभावरूपस्याऽनुकूलतर्कस्य सत्त्वेन कार्यत्वरूपहेतोः साध्यव्याप्यत्वनिश्चयेन साध्यव्याप्याऽव्यापकत्वेनोपाधौ साध्याऽव्यापकत्वनिश्चयादिति। एवं चोक्तानुमानेनेश्वरसिद्धौ तदुच्चरितत्वेन वेदस्य प्रामाण्यनिश्चयाद्वेदोऽपि प्रमाणमित्याह। **द्यावाभूमी जनयन्निति।** इत्यादय इति। आदिना "ईश्वरमुपासीत" "यः सर्वज्ञः स सर्वविद्यस्य ज्ञानमयं तप." "सोऽकामयत" इत्यादीनां परिग्रहः। कार्यानुमानं चोपलक्षणम्। सर्गाद्यकालीनद्व्यणुकप्रयोजकं कर्म प्रयत्नजन्यं, कर्मत्वात्, गुरुत्ववतां पतनाभावः पतनप्रतिबन्धकप्रयत्नप्रयुक्तः, धृतित्वात्, पक्षिपतनाभाववत्, ब्रह्माण्डनाशः, प्रयत्नजन्यः, नाशत्वात्, घटनाशवत्, घटादिव्यवहारः स्वतन्त्रपुरुषप्रयोज्यः, व्यवहारत्वात्, आधुनिककल्पितलिप्यादिव्यवहारवत्, वेदजन्यप्रमा वक्तृयथार्थवाक्यार्थज्ञानजन्या, शाब्दप्रमात्वात्, चैत्रवाक्यजन्यप्रमावत्, वेदः असंसारिपुरुषप्रणीतः, वेदत्वात्, यन्नैवं तन्नैवं यथा काव्यमिति व्यतिरेकदृष्टान्तः, वेदः पौरुषेयः, वाक्यत्वात्, भारतादिवत्, द्व्यणुकपरिमाणजनिका सङ्ख्या अपेक्षाबुद्धिजन्या, एकत्वान्यसङ्ख्यात्वादित्यनुमानान्तराण्यपि साक्षात्परम्परया वा ईश्वरसाधकानि बोध्यानीति। तदुक्तम्—

"कार्याऽऽयोजनधृत्यादेः पदात्प्रत्ययतः श्रुतेः।
वाक्यात्सङ्ख्याविशेषाच्च साध्यो विश्वविदव्ययः"* ॥ इति।

आयोजनं—कर्म। पद्यते गम्यते अनेनेति पदं–व्यवहार इति सङ्क्षेपः ॥ १ ॥

इतीश्वरानुमानम्।

रामरुद्री।

धेर्दूषकतेत्याशङ्कते। **न चेति। पक्षतत्समयोरिति।** पक्षः उद्देश्यतावच्छेदकावच्छिन्नः, तत्समस्तु तद्भिन्नत्वे सति साध्यसन्देहाक्रान्तः। **प्रतिबन्धकत्वादिति।** न चैवमुक्तरीत्याऽनुमानमात्रोच्छेदापत्तिरिति वाच्यम्। धूमो यदि वह्निव्यभिचारी स्यात्, तर्हि वह्निजन्यो न स्यादित्यनुकूलतर्केण व्यभिचारसन्देहस्याऽप्यसम्भवादिति भावः। प्रकृतार्थे ग्रन्थकृता सम्मतिमाह—**अत एवेति।**

अनुकूलतर्कस्य सत्त्वेनेति। अनुकूलतर्काभावविशिष्टव्यभिचारसन्देहस्यैव व्याप्तिनिश्चयप्रतिबन्धकत्वादिति भावः। **निश्चयादिति।** उपाधित्वसन्देहासम्भवादिति शेषः।

नन्वनुमानेनैवेश्वरसाधने तत्प्रतिपादकोपनिषद्भागस्याऽध्ययनवैफल्यमित्याशङ्कामपनेतुं वेदस्याऽपि प्रमाणतासाधकं मूले 'द्यावाभूमी–' इत्यादिश्रुतिप्रदर्शनमवतारयति—**एवमिति। यः सर्वज्ञ इति।** सामान्यरूपेण सर्वविषयकज्ञानवत्त्व जीवानामपीत्यतः—**सर्वविदिति।** विशेषरूपेणापि सर्वविषयकज्ञानवानित्यर्थः। **कार्यानुमानमिति।** कार्यपक्षकानुमानमित्यर्थः। "कार्यायोजन—"इत्यादिकारिकायामपि कार्यादिपदं तत्पक्षकानुमानपरम्। अत्र च ब्रह्माण्डनाशः प्रयत्नजन्य इत्याद्यनुमानानां कृत्यनुमानद्वारा **ईश्वरसाधकत्वं,** घटादिव्यवहारः स्वतन्त्रपुरुषप्रयोज्य इत्याद्यनुमानं तु साक्षादीश्वरसाधकमिति बोध्यम्॥१॥

इतीश्वरानुमानम्॥

---

* कुसुमाञ्जलिः।

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् ।
समवायस्तथाऽभावः पदार्थाः सप्त कीर्तिताः ॥ २ ॥

पदार्थान्विभजते—द्रव्यमिति । **अत्र सप्तमस्याऽभावत्वकथनादेव षण्णां**

दिनकरी ।

मूले शिष्यावधानाय प्रतिजानीते—**द्रव्यं गुण इति** । निरूप्यन्ते इति शेषः । संयोगापेक्षया कर्मणोऽतिरिक्तत्वं नास्ति इति भूषणकारमतं निराकर्तुं 'तथा' इत्युक्तम् । अभावोऽधिकरणात्मक एवेति प्राभाकरमतं दूषयितुं पुनः 'तथा' इत्युक्तम् । युक्तिश्चाऽग्रे वक्ष्यते । यद्यपि विभागवाक्यादेव न्यूनाधिकसङ्ख्याव्यवच्छेदो लब्धः । तथाऽपि सप्तग्रहणं स्पष्टार्थम् । नन्वन्ये पदार्थाः कुतो नोक्ता इत्यत आह । **कीर्तिता इति** । तथा चैतेभ्योऽन्ये पदार्था न सन्त्येव(१), कणादप्रभृतिभिरनुक्तत्वादिति भावः । नन्वितरेषु ग्रन्थेषु षड् भावपदार्थाः, सप्तमस्त्वभाव इति निरूपितं, तथैवाऽत्र कुतो न निरूपितमित्याशङ्क्याऽऽह—**मुक्तावल्यां सप्तमस्येति** । अत्र समवायैकार्थसमवायाऽन्यतरसम्बन्धेन सत्तावत्त्वं भावत्वं, तदभावोऽभावत्वमिति । **प्राप्तं**—अर्थात् प्राप्तम् । **तेन**—प्राप्तत्वेन । **पृथगुपन्यास इति** । भावत्वेनोपन्यास इत्यर्थः । तेषामिति शेषः । नन्वन्ये पदार्थाः कथं न सन्ति ? न्यायग्रन्थे षोडशपदार्थनिरूपणा(२)दित्याशङ्क्य नैयायिकानामपि मते सप्त पदा-

रामरुद्री ।

प्रतिजानीत इति । स्वकर्तव्यत्वेन निर्देशः प्रतिज्ञा । "द्रव्यं गुण–" इत्यादिकारिकायां द्रव्यादिनिरूपणे स्वकर्तव्यत्वाप्रतिपादनात् प्रतिजानीत इत्यसङ्गतमतः शेष पूरयति । **निरूप्यन्त इतीति** । **न्यूनाधिकसङ्ख्येति** । तद्व्यवच्छेदार्थमेव विभागकरणादिति भावः । **कुतो न निरूपितमिति** । पदार्थो द्विविधः–भावोऽभावश्च । तत्र द्रव्यादयः षड् भावाः, सप्तमस्त्वभाव इति रीत्या कुतो न निरूपितमित्यर्थः । **मूले-सप्तमस्येति** । यद्यपि सप्तमस्याऽभावत्वकथनेऽपि तदितरेषां भावत्व दुर्लभमेव, न ह्येकस्य ब्राह्मणत्वे प्रतिपादिते तदितरेषा सर्वेषामब्राह्मणत्व प्रतिपादितं भवति, तथाऽप्येतस्य विभागवाक्यतया परस्परासङ्कीर्णव्याप्यधर्मकथनस्यैव विभागरूपतया द्रव्यादीनामभावत्वेऽभावत्वं विभाजकमेव न स्यादिति द्रव्यादीनामभावत्वाभावात् परिशेषात् भावत्वं प्राप्तमिति भावः । **समवायेति** । यद्यपि समवाये समवायघटितसामानाधिकरण्येन न सत्तावत्त्वं, स्वरूपसम्बन्धेनैव तस्य वृत्तेः, तथाऽपि समवायत्वस्य संसर्गतानवच्छेदकत्वेऽपि स्वरूपत्वेन समवायस्यैव स्वरूपसम्बन्धत्वेन न तस्य समवायेन वृत्तित्वच्चतिरिति मन्तव्यम् । **अर्थात् प्राप्तमिति** । अनुमानप्राप्तमित्यर्थः । अनुमानं च–द्रव्यादयो भावाः, अभावत्वव्यधिकरणधर्मवत्त्वादित्येवंरूपम् । न च द्रव्यत्वादौ विभाजकधर्मेऽभावत्ववैयधिकरण्यमेवाऽप्रसिद्धमिति वाच्यम् । परस्परासमानाधिकरणव्याप्यधर्मरूपेण यावता सामान्यवतां प्रतिपादनस्यैव विभागरूपतया द्रव्यत्वादीनामभावत्वसामानाधिकरण्ये तेषां विभाजकत्वस्यैवाऽनुपपत्तेरिति भावः ।

---

(१) **ननु "द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्यतत्त्वज्ञानं निःश्रेयसहेतुः" इति प्रशस्तदेवभाष्येऽभावस्य पृथगनिरूपणात् "वैशेषिकाणामप्यविरुद्धाः" इति कथनमसङ्गतं ग्रन्थकृतामिति चेन्न । न्यायमते मनस इन्द्रियत्ववत् तन्मतेऽपि अभावेऽतिरिक्तपदार्थत्वस्याऽभ्युपगमसिद्धान्तसिद्धत्वादिति ।**

(२) **"प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः"** (न्यायसूत्रम् । अ० १ आ० १ सू० १) **इति सूत्रेणेति शेषः ।**

भावत्वं प्राप्तं, तेन (भावत्वेन) पृथगुपन्यासो न कृतः । एते च पदार्था वैशेषिकनये प्रसिद्धाः, नैयायिकानामप्यविरुद्धाः, प्रतिपादितं चैवमेव भाष्ये,

दिनकरी ।

र्था इत्यविरुद्धं, षोडशपदार्थानां सप्तपदार्थेषु अन्तर्भूतत्वादित्याह—**एते चेति** । उक्तार्थं भाष्यसम्मतिमाह—**प्रतिपादितं चेति । एवमेवेति** । "द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्तैव पदार्थाः, षोडशानामत्रैवाऽन्तर्भावात्" इति प्रतिपादितमित्यर्थः ।

कथमन्तर्भाव इति चेदित्थम्—प्रमाणस्य(१)–इन्द्रियादेर्द्रव्ये, व्याप्तिज्ञानादेर्गुणे, प्रमेय(२)स्याऽऽत्मशरीरेन्द्रियस्य द्रव्ये, अर्थस्य गन्ध–रस–रूप–स्पर्श–शब्दस्य गुणे, बुद्धेर्गुणे, मनसो द्रव्ये, प्रवृत्तेर्गुणे, दोषाणामिच्छा–द्वेष–मिथ्याज्ञानस्वरूपाणां रागद्वेषमोहपदप्रतिपाद्यानां गुणे, प्रेत्य मृत्वा भावो जनन(३)मिति व्युत्पत्त्या मरणोत्तरजन्मत्वं प्रेत्यभावपदप्रवृत्तिनिमित्तं, चरमप्राणशरीरसंयोगध्वंसो मरणं, आद्यशरीरप्राणसंयोगो जन्म, तथा च मरणानन्तरं तादृशसंयोगरूपस्य तस्य गुणे, सुखदुःखसंवेदनस्वरूपस्य मुख्यफलस्य गुणे, गौण–मुख्य–साधारण–जन्यमात्रस्वरूपफलस्याऽपि द्रव्यादिषु, पीडालक्षणस्य दुःखस्य गुणेऽन्तर्भावः । अपवर्गस्तु आत्यन्तिकी दुःखनिवृत्तिः, दुःखानि–शरीरं, षडिन्द्रियाणि(४), षड् विषयाः(५), षड् बुद्धयः, सुखं दुःखं चेत्येकविंशतिः, तत्र दुःखत्वजातिशून्ये शरीरादौ दुःखसम्बन्धितया गौणं दुःखत्वं, स्वर्गादिसुखस्याऽपि तन्नाशज्ञानेन

रामरुद्री ।

चरमेति । प्राणशरीरसंयोगे चरमत्वञ्च स्वसजातीयशरीरवृत्तिप्राणसंयोग–प्रागभावानधिकरणत्वम् । एवमाद्यत्वमपि तथाविधप्राणसंयोगध्वंसानधिकरणत्वमिति बोध्यम् । **गौणमिति** । लाक्षणिकमित्यर्थः । **दुःखत्वं**—दुःखपदप्रतिपाद्यत्वं, दुःखसम्बन्धस्तु ज्ञनकत्वादिरूप इति भावः । ननु दुःखसम्बन्धित्वात् दुःखत्वं सुखे न सम्भवति, तस्य दुःखासम्बन्धित्वात् । न च सुखस्याऽपि दुःखसमानाधिकरणत्वात् तत्त्वमक्षतमिति वाच्यम् । तथा सत्यात्यन्तिकदुःखनिवृत्तेरपि पूर्वतनदुःखसमानाधिकरणत्वेन दुःखत्वापत्तेः । न च स्वसमानाधिकरण–दुःख–समानकालीनत्वादिरूपो दुःखसम्बन्धो नोक्तनिवृत्तौ, अस्मदादिसुखे च तादृशदुःखसमानकालीनत्वात् तदक्षतमेवेति वाच्यम् । तथाऽपि स्वर्गीयसुखे "यन्न दुःखेन सम्भिन्नं—" (६)इत्यादिश्रुतिविरोधेन तथात्वस्य स्वीकर्तुमशक्यतया तस्य दुःखत्वं न सम्भवत्येवेत्याशङ्कामपनेतुमाह—**स्वर्गादिसुखस्येति** । (तथा च "यन्न दुःखेन–"इत्यादिश्रुतौ दुःखपद स्वर्गनाशज्ञानजन्यदुःखातिरिक्त दुःख-

---

(१) **"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"** । (न्यायसूत्रम् । अ० १ आ० १ सू० ३) **इति सूत्रम् ।**

(२) **"आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्"** (न्यायसूत्रम् । अ० १ आ० १ सू० ९) **इति सूत्रम् ।**

(३) **एतेन जन्मानन्तरं मरणं, तदनन्तरं जन्मेति जन्मसन्ततेरनादित्वग्रहो वैराग्यजननद्वारा मोक्षे उपयुज्यत इति सूचितम् ।**

(४) **घ्राणरसनचक्षुस्त्वक्श्रोत्रमनासीत्यर्थः ।**

(५) **इन्द्रियप्रभेदानादायैव विषयबुद्धयोः षड्विधत्वमवधेयम् ।**

(६) **"यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं च तत् सुखं स्वः पदास्पदम् ।" अस्यार्थः–यत् दुःखेन न सम्भिन्नं–मिश्रितम् । अनन्तरं च कदा चिदपि न ग्रस्तं, दुःखेनेति शेषः । अभिलाषोपनीतं–इच्छामात्रेण समीपं प्राप्तम् । यथा लौकिकतृप्त्यादिसुखावाप्तये पाकादितत्साधनसम्पादनाय प्रयतितव्यं भवति, तथा नाऽत्रेति भावः ।**

दिनकरी ।

दुःखसम्बन्धित्वमव्याहतमेव । न चैकविंशतिदुःखान्तर्गतयोर्मनःश्रवणयोर्नित्यत्वात् कथं तन्नाश इति वाच्यम् । यद्रूपविशिष्टस्य श्रवणस्य ज्ञानद्वारा दुःखहेतुतया दुःखत्वं, तद्रूपस्य कर्णशष्कुल्या नाशे तद्विशिष्टश्रवणेन्द्रियरूपदुःखनाशात् , एवमात्मसंयोगरूपव्यापारविशिष्टस्यैव मनसो ज्ञानद्वारा दुःखरूपतया व्यापारनाशेन तद्विशिष्टमनोरूपदुःखनाशसम्भवादिति । दुःखनिवृत्तावात्यन्तिकत्वं च स्वसमानाधिकरण-दुःखासमानकालीनत्वम्(१) । नन्वेतादृशदुःखध्वंसस्य मुक्तित्वे कथं तत्त्वज्ञानसाध्यता तस्येति चेत्-इत्थम् , तत्त्वज्ञानेन मिथ्याज्ञानवासनानाशः, वासनानाशे च दोषस्य वासनाविशिष्टरागादेरभावः, विशेषणाभावे विशिष्टाभावात् , तादृशरागरूपहेत्वभावे च प्रवृत्तेधर्माधर्मरूपाया अभावोऽनुत्पत्तिः, तदनुत्पादे प्रारब्धकर्माधीन देहान्य-देहसम्बन्धरूपजन्माभावः, भोगतत्त्वज्ञानाभ्यां प्रारब्धतद्भिन्नकर्मनिवृत्तिरिति जन्माभावे दुःखानुत्पादः, तथा च स्वसमानाधिकरण-दुःखासमानकालीनत्वरूपविशेषणांशे तत्त्वज्ञानस्य प्रयोजकत्वात् मुक्तेस्तत्त्वज्ञानसाध्यत्वं, तथा च सूत्रं-"दुःख-जन्म-प्रवृत्ति-दोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" *इति । अस्यार्थः—पठितेषु जन्मादिषु मध्ये उत्तरोत्तराणामपाये, तदनन्तरापायात्-अव्यवहितपूर्वाभावात् । तथा च तत्त्वज्ञानेन मिथ्याज्ञानस्य नाशः, तेन दोषाणां नाशः, तेन प्रवृत्तेरनुत्पादः, तेन जन्मानुत्पादः, तेन दुःखानुत्पाद इति पूर्वोक्त एवाऽर्थः पर्यवसितः । एकविंशतिदुःखनाशस्तु स्वकारणसाध्यो न तत्र तत्त्वज्ञानस्य प्रयोजकतेति वदन्ति ।

नव्यास्तु—योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरवर्त्तिगुणानां कारणत्वात् स्वोत्तरोत्पन्नगुणेनैव दुःखध्वंसरूपमुक्तिसम्भवेन न तत्र तत्त्वज्ञानापेक्षेति दुःखपदं दुःखसाधनदु-

रामरुद्री ।

परमिति न विरोध इति भावः ।) **व्यापारनाशेनेति** । मनःक्रियया मनःसंयोगरूपव्यापारनाशेनेत्यर्थः । यद्यपि (भाव्य) मुक्तिदशायामपि मनःसयोगान्तरं वर्तत एव, तथाऽपि तस्य न व्यापारत्वं, पुरीतद्भिन्नदेशावच्छिन्नमनःसयोगस्यैव ज्ञानसाधनत्वेन तथात्वात् , मुक्तौ च शरीराभावादिति भावः । **स्वसमानाधिकरणेति** । शुकादिमुक्तावव्याप्तिवारणाय दुःखे स्वसामानाधिकरण्यनिवेशः । इदानीन्तनास्मदादिदुःखध्वंसेऽतिव्याप्तिवारणायाऽसमानकालीनत्वान्तनिवेशः । नन्वेतावता चरमदुःखध्वंसो मुक्तिरित्यायातं, चरमदुःखस्याऽपि योग्यविभुविशेषगुणत्वेन स्वोत्तरोत्पन्नविशेषगुणमात्रेणैव नाशसम्भवात् मुक्त्यर्थं तत्त्वज्ञानापेक्षा न स्यादित्याशङ्कते—**नन्वित्यादिना** । सूत्रार्थमाह—**अस्याऽर्थ इति** । नन्वनन्तरपदस्योत्तरार्थकतया दुःखाभावे जन्माभावस्य प्रयोजकत्वं स्यात् , "दुखजन्म—" इत्यादिसूत्रपठिते जन्माभावे प्रवृत्त्यभावस्याऽप्रयोजकतया सूत्रार्थानुपपत्तिश्चेत्याशङ्कानिरासायाऽनन्तरपदस्याऽव्यवहितपूर्वार्थकतामाह—**अव्यहितपूर्वाभावादिति** । 'वदन्ति' इत्यस्वरसोद्भावनं, तद्बीजं तु विशेष्याप्रयोजकस्याऽपि विशेषणांशे प्रयोजकतामादाय विशिष्टप्रयोजकत्वोपगमे धूमो वह्निप्रयोजक इतिवत् वह्निमत्पर्वतप्रयोजक इति व्यवहारापत्तिरेव ।

स्वोत्तरवर्त्तिगुणानामिति । उत्पत्तिसम्बन्धेन स्वोत्तरवर्त्तिविशेषगुणानामित्यर्थः । तेन स्वस्याऽपि स्वोत्तरवर्त्तित्वेऽपि न ज्ञानादीना क्षणिकत्वापत्तिः । न वा द्वितीयक्षणोत्पन्नघटादिसंयोगेनैवाऽपेक्षाबुद्धेर्ना-

---

(१) **दुःखवदन्यदुःखध्वंस इति पर्यवसितोऽर्थः । दुःखवत्त्वं च स्वसामानाधिकरण्य-स्वसमानकालीनत्वैतदुभयसम्बन्धेनेति ।**

* **न्यायसूत्रम्** । अ० १ आ० १ सू० २ ।

दिनकरी।

रितपरतया व्याख्येयं, दुरितस्य च योग्यगुणत्वाभावान्न स्वोत्तरवर्त्तिगुणनाश्यतेति तन्नाशरूपमुक्तेस्तत्त्वज्ञानसाध्यत्वमेवेत्याहुः।

तथा चैतादृशापवर्गस्याऽभावे, संशयस्य गुणे, साध्यतया(१) इच्छाविषयरूपप्रयोजनस्य यथायथं द्रव्यादिषु, साध्यसाधनोभयवतानिश्चयविषयस्य दृष्टान्तस्य यथायथं द्रव्यादिषु, तत्तच्छास्त्रसिद्धार्थरूपस्य सिद्धान्तस्य द्रव्यादिषु, शब्दस्वरूपप्रतिज्ञाद्यन्यतमरूपाणामवयवानां गुणे, व्याप्यारोपेण व्यापकारोपस्य तर्कस्य गुणे, निर्णयस्य गुणे, तत्त्वबुभुत्सोः कथारूपवादस्य गुणे, विजिगीषुकथारूपजल्पस्य गुणे, स्वपक्षस्थापनाहीनकथारूपवितण्डाया गुणे, अनुमिति-तत्कारणाऽन्यतरप्रतिबन्धकज्ञानविषयरूपाणां हेत्वाभासानां यथायथं द्रव्यादिषु, अभिप्रायान्तरेण प्रयुक्तशब्दस्याऽर्थान्तरं परिकल्प्य(२) दूषणाभिधानरूपस्य छलस्य

रामरुद्री।

शापत्तौ द्वित्वादीनां क्षणत्रयावस्थायित्वासम्भवेन स्वोत्पत्तिद्वितीयक्षणोत्पन्ननिर्विकल्पकेन स्वतृतीयक्षण एव द्वित्वप्रत्यक्षस्य वक्तव्यतया तदानी च द्वित्वाभावात् तत्प्रत्यक्षानुपपत्तिः। न च प्रत्यक्षे विषयस्य कारणत्वेऽपि द्वितीयक्षणे द्वित्वसत्त्वात् तृतीयक्षणे तत्प्रत्यक्षोत्पत्तौ किं बाधकमिति वाच्यम्। प्रत्यक्षे विषयस्य कार्यकालवृत्तितया कारणत्वात्, नाशोत्पत्तिक्षणे घटप्रत्यक्षस्याऽनुभवविरुद्धत्वात्। द्वित्वादीनां क्षणत्रयावस्थायित्वे तु तृतीयक्षणे द्वित्वप्रत्यक्षे न काऽप्यनुपपत्तिः(३)। न च विशेषगुणत्वेन कारणत्वेऽपि द्वित्वोत्पत्तिक्षणोत्पन्नज्ञानादिनाऽपेक्षाबुद्धिनाशे तृतीयक्षणे द्वित्वनाशापत्त्या द्वित्वप्रत्यक्षानुपपत्तितादवस्थ्यमिति वाच्यम्। द्वित्वाद्युत्पत्तिक्षणे विशेषगुणोत्पत्त्यनङ्गीकारात्। विशेषगुणं प्रत्युत्पत्तिक्षणावच्छिन्नद्वित्वकारणापेक्षाबुद्धिव्यक्तेः प्रतिबन्धकतामङ्गीकृत्यैव द्वितीयक्षणे तदनङ्गीकारसम्भवादिति ध्येयम्। न चैवमपि सुषुप्तिप्राक्कालोत्पन्नविशेषगुणानां नाशानुपपत्तिरिति वाच्यम्। तत्राऽगत्या स्वोत्तरवर्त्तित्वविशिष्टस्य स्वस्यैव नाशकत्वाभ्युपगमात्। सर्वत्र स्वोत्तरवृत्तित्वेन नाशकत्वे अपेक्षाबुद्धेस्तृतीयक्षणे स्थायित्वानुपपत्तिरिति बोध्यम्। (वस्तुतस्तु प्रकृते स्वोत्तरवर्त्तित्वं स्वध्वंसाधिकरणक्षणवृत्तित्वमेव, तथा च समवायेन नाशकत्वाभ्युपगमेऽपि प्रतिबन्धकत्वाकल्पने क्षणभावेन लाघवात्।) **दुरितपरतयेति।** तथा च पापध्वंस एव मुक्तिः, न दुःखध्वंस इति नोक्तानुपपत्तिः। ननु पापस्याऽप्यात्मविशेषगुणत्वेन स्वोत्तरोत्पन्नगुणेनैव तन्नाशसम्भवात् कथ पापध्वसस्याऽपि तत्त्वज्ञानसाध्यतेत्याशङ्कामपनेतु नाश्यतावच्छेदककोटौ योग्यतां निवेश्य स्वोत्तरवर्त्तिगुणनाश्यतां वारयति—**दुरितस्य चेति।** न च पापस्य स्वोत्तरव-

---

(१) तक्षकचूडामणिस्पर्शवारकमेतत्।

(२) नेपालादागतोऽयं, नवकम्बलवत्त्वादित्युक्ते कुतोऽस्य नवसङ्ख्याकाः कम्बलाः इत्यादिकं छलमिति व्यवह्रियते।

(३) ननु सर्वत्रैव प्रत्यक्षे विषयस्य कार्यसमानकालीनत्वेन हेतुत्वे अहं सुखीत्यादिज्ञानानुत्पत्तिप्रसक्त्या सुखादीनामपि त्रिक्षणावस्थायित्वप्रसङ्गः। सुखोत्पत्तिसमकालं सुखत्वसामान्यज्ञानात् अनन्तरं सुखज्ञाने तृतीयक्षणे सुखनाशात् अहं सुखीतिज्ञानासम्भवात्। किञ्च योग्यविभुगुणत्वस्याऽनुगतस्यैकस्याऽभावेन तत्तद्व्यक्तित्वावाच्छिन्नं प्रति तत्तद्व्यक्तित्वेनैव नाशकता वक्तव्या, स च नाश्यनाशकभावोऽपेक्षाबुद्धिस्थले तन्नाशं प्रति द्वित्वत्वसामान्यज्ञानस्य नाशकत्वं कल्पयित्वा वक्तव्य इति नैष दोष इति चेन्न। एवमपि द्वे द्रव्ये इत्यस्य ज्ञानस्याऽनुत्पत्त्यापत्तेरेव दोषस्य ग्रन्थकृदभिप्रेतत्वात्। तज्ज्ञानकाले तत्पूर्वक्षणे वा द्वित्वस्याऽभावात्। अस्माकं तु तादृशज्ञानाव्यवहितपूर्वक्षणे एव द्वित्वसत्त्वेन नाऽनुपपत्तिः। कार्यपूर्वकालवृत्तित्वरूपाया एव कारणताया ग्रन्थकृदभिमतत्वादिति ध्येयम्। नव्यास्तु सुखाद्युत्पत्तेः पूर्वमपि सुखत्वसामान्यलक्षणया सुखज्ञानसम्भवेन अहं सुखीति ज्ञानस्य नाऽनुपपत्तिरिति सर्वत्रैव कार्यसमसमयवृत्तित्वरूपमेव कारणत्वं कल्प्यमिति वदन्ति।

दिनकरी ।

गुणे, असदुत्तररूपजातेर्गुणे, पराजयहेतुस्वरूपनिग्रहस्थानानां यथायथं द्रव्यादिष्वन्तर्भावः ।

निग्रहस्थानानि–प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च । (अत्र चकारोऽनुक्तसमुच्चयार्थः, तेन दृष्टान्ते साधनवैकल्यादीनां परिग्रहः ।) तत्र विशिष्य प्रतिज्ञातस्य पक्षादेः परित्यागरूपप्रतिज्ञाहानेरभावे, परोक्तदोषोद्दिधीर्षया पूर्वानुक्तविशेषणविशिष्टतया प्रतिज्ञातार्थकथनरूपस्य प्रतिज्ञान्तरस्य गुणे, स्वोक्तसाध्यादिविरुद्धहेत्वादिकथनरूपप्रतिज्ञाविरोधस्य गुणे, स्वोक्तसाध्यादेः परेण दूषणे कृते तत्साध्यापलापरूपस्य प्रतिज्ञासंन्यासस्याऽभावे, परोक्तदूषणोद्दिधीर्षया पूर्वोक्तहेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्टहेतुकथनरूपस्य हेत्वन्तरस्य गुणे, प्रकृतानाकाङ्क्षितताभिधानरूपार्थान्तरस्य गुणे, अवाचकपदप्रयोगरूपनिरर्थकस्य गुणे, अवाचकवाक्यप्रयोगरूपाऽविज्ञातार्थस्य गुणे, अभिमत-

रामरुद्री ।

स्तिगुणनाश्यत्वे इष्टापत्तिसम्भवेन नाश्यतावच्छेदककोटौ योग्यतानिवेशो व्यर्थ इति वाच्यम् । तथा सति पापस्य प्रायश्चित्तनाश्यताबोधकश्रुतिविरोधापत्तेरिति भावः । न चैवं पापस्य प्रायश्चित्तेनाऽपि नाश्यतया कथं मुक्ति प्रति तत्त्वज्ञानत्वेन कारणता ? प्रायश्चित्तजन्यपापध्वसे व्यभिचारादिति वाच्यम् । तादृशव्यभिचारवारणायैव स्वसमानाधिकरण—दुरितासमानकालीनत्वरूपाऽऽत्यन्तिकत्वस्य कार्यतावच्छेदककोटौ प्रवेशितत्वात् । न चैवं पापध्वसे न तत्त्वज्ञानस्य प्रयोजकता, किन्तु तद्विशेषणीभूत–स्वसमानाधिकरण–दुरितासमानकालीनत्वे एवेति प्राचीनमतादविशेष इति वाच्यम् । ध्वंसव्यक्तीना परस्परभिन्नत्वेन प्रायश्चित्तजन्यपापध्वंसव्यक्तौ तत्त्वज्ञानजन्यत्वासम्भवेऽपि तत्त्वज्ञानाव्यहितोत्तरतद्व्यक्तौ तत्त्वज्ञानजन्यत्वे बाधकाभावादिति भावः । यद्यप्येवं सति तत्त्वज्ञानानुत्तरदुःखव्यक्तिनाशे तत्त्वज्ञानजन्यत्वासम्भवेऽपि तत्त्वज्ञानोत्तरतद्व्यक्तौ तज्जन्यत्वसम्भवेन प्राचीनमतेऽपि न दोषः, तथाऽप्येतदस्वरसेनैव 'आहुः' इत्युक्तम् । तथा च दुःखध्वंसस्य मुक्तिर्वेऽप्युक्तरीत्याऽनुपपत्त्यभावात् दुःखपदस्य दुरितलक्षणाकल्पनं नव्यानां कुकल्पनमेवेत्यस्वरसः 'आहुः' इत्यनेन सूचितो ग्रन्थकृतेति नाऽनुपपत्तिरिति ध्येयम् । अथ–

"ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन ।" *

इति स्मृत्या दुरितस्य ज्ञाननाश्यत्वबोधनात् पापनाशरूपमुक्तौ तत्त्वज्ञानसाध्यत्वाङ्गीकारः सम्भवत्येव, दुःखध्वंसस्य तत्त्वज्ञानजन्यताबोधकमानाभावेन न तथात्वसम्भव इति चेदिहाऽपि "तमेव विदित्वाऽतिमृत्युमेति नाऽन्यः पन्था विद्यतेऽयनाय" इति श्रुतेरेव प्रमाणत्वसम्भवादात्यन्तिकदुःखनिवृत्तेरेवाऽतिमृत्युशब्दार्थत्वात्, तत्त्वज्ञानोत्तरं दुःखव्यक्तेः स्वसाक्षात्कारेण नाश्यत्वस्यैव तत्त्वज्ञानोत्तरं प्रारब्धदुरितव्यक्तीनां भोगनाश्यताया एव स्वीकरणीयत्वेन विशेषाभावात्, श्रुतिबलादेव विशिष्टदुःखध्वसे तत्त्वज्ञानसाध्यताया व्यवस्थापनसम्भवात् । किं च कर्ममात्रनाशस्यैव तत्त्वज्ञानजन्यत्वेन स्मृतिबोधिततया स्वसमानाधिकरणपुण्यासमानकालीन–पुण्य–ध्वंसस्याऽपि मुक्तित्वापत्तिः । न चेष्टापत्तिः, सुख–दुःखाभाव–तज्जनकानात्मकत्वेनाऽपुरुषार्थत्वादित्यलं पल्लवितेन ।

परित्यागरूपेति । पक्षादेः परित्यागः–पक्षस्य पक्षत्वेन प्रतिपादनाभाव एवेति तस्याऽभावरूपतेति भावः । **प्रतिज्ञातार्थेति** । साध्येत्यर्थः । **साध्यापलापेति** । साध्यस्याऽपलापः—साध्यत्वेनाऽनुक्तिरेवेति भावः । **अवाचकेति** । हुम्फडादीत्यर्थः । **अवाचकवाक्येति** । अत्र वाचकत्वं शक्त्या

---

* भगवद्गीता । अ० ४ श्लो० ३७ ।

अत एवोपमानचिन्तामणौ सप्तपदार्थभिन्नतया शक्तिसादृश्यादीनामतिरिक्तपदार्थत्वमाशङ्कितम्।

दिनकरी।

वाक्यार्थबोधानुकूलाकाङ्क्षाशून्यपदप्रयोगरूपस्याऽपार्थकस्य गुणे, समयनिबन्धनविषयीभूतकथाक्रमविपरीतक्रमेणाऽभिधानरूपस्याऽप्राप्तकालस्य गुणे, यत्किञ्चिदवयवशून्यावयवाभिधानरूपस्य न्यूनस्य गुणे, अधिकहेत्वाद्यभिधानरूपस्याऽधिकस्य गुणे, पुनरभिधानरूपस्य पुनरुक्तस्य गुणे, परिषदा त्रिरभिहितस्याऽप्यप्रत्युच्चारणरूपस्याऽननुभाषणस्याऽभावे, परिषदा विज्ञातार्थस्य वादिना त्रिरभिहितस्याऽप्यविज्ञानरूपस्याऽज्ञानस्याऽभावे, उत्तरार्हं परोक्तं बुद्ध्वाऽप्युत्तरस्याऽप्रतिपत्तिरूपाया अप्रतिभाया अभावे, असम्भवत्कालान्तरकार्यव्यासङ्गमुद्भाव्य कथाविच्छेदरूपस्य विक्षेपस्याऽभावे, स्वपक्षे दोषमनुद्धृत्य परपक्षे दोषाभिधानरूपमतानुज्ञाया गुणे, निग्रहस्थानं प्राप्नवतो निग्रहस्थानानुद्भावनरूपस्य पर्यनुयोज्योपेक्षणस्याऽभावे, निग्रहस्थानानवसरे तन्निग्रहस्थानाभिधानरूपस्य निरनुयोज्यानुयोगस्य गुणे, कथायां स्वीकृतसिद्धान्तप्रच्यवनरूपस्याऽपसिद्धान्तस्याऽभावे, हेत्वाभासानां पूर्वोक्तलक्षणानां द्रव्यादिष्वन्तर्भाव इति।

भाष्यस्याऽऽर्षत्वमाशङ्क्य मणिकृतां सम्मतिमाह—**अत एवेति।** मण्यादिसमवधाने सति वह्निना दाहोत्पत्तिवारणाय मण्यादेः कारणविघटकत्वरूपा प्रतिबन्धकता वाच्या, सा च वह्निनिष्ठदाहानुकूलशक्तिरूपकारणविघटकतयैव निर्वहति, मण्यादिप्रतिबन्धकत्वानुपपत्त्या सिद्धायाः शक्तेः षड्भावेष्वनन्तर्भूतत्वादतिरिक्तत्वमिति **"पदार्थाः सप्त कीर्तिरामरुद्री।**

बोधजनकत्वमेव, न तु शक्तिः, वाक्ये तदभावात्। तादृशं वाक्यं—भूस्तनं हिमभेषजवदि (१)त्यादिकमप्रसिद्धार्थकपदघटितम्। **अपार्थकस्येति।** पर्वतो वन्हिरधिकरणमित्यादेरपार्थकस्येत्यर्थः। **असम्भवत्कालान्तरेति।** सुतदारादिपरिरक्षणरूपेत्यर्थः। **कथाविच्छेदः**—शब्दोच्चारणाभावः। **सिद्धान्तस्य**—तार्किकादिमतसिद्धार्थस्य, **स्वीकृतस्य**—स्वेन साधनीयतयाऽङ्गीकृतस्य, **प्रच्यवः**—अनुपपादनम्। एवं च तस्याऽभावरूपतेति भावः।

आर्षत्वमाशङ्क्यति। तथा च भाष्यकारस्य महर्षित्वेन—"तेजस्विनां न दोषाय वन्हेः सर्वभुजो यथा—" इति वचनात् अनुपपन्नार्थप्रतिपादनं न दोषायेत्यभिप्रायेण मणिकारस्यैदानीन्तननरस्याऽपि तादृशार्थप्रतिपादकता मुक्तावलीकारेणाऽभिहितेति भावः।

षड्भावेष्विति। शक्तेर्द्रव्ये नाऽन्तर्भावः, स्पर्शशून्यत्वात् पृथिव्यादिचतुष्टये, उत्पादविनाशशालित्वादाकाशादिपञ्चकेऽप्यनन्तर्भावात्। नाऽपि गुणकर्मणोः, कपालादिरूपे घटरूपाद्युत्पादकशक्तिसत्त्वात्। नाऽपि सामान्यविशेषसमवायेषु, उत्पादविनाशशालित्वादित्यर्थः। **अतिरिक्तत्वमिति।** सप्तपदार्थातिरिक्तत्वमित्यर्थः। न च तस्या अभावेऽन्तर्भावसम्भवात् कथं सप्तपदार्थातिरिक्तत्वमिति वाच्यम्। नञुल्लिखितप्रत्ययाविषयत्वेन सप्रतियोगिकत्वानानुभवेन च तस्या अभावेऽप्यनन्तर्भावादिति भावः। वस्तुतस्तु **"षड्भावेषु"**इति पाठः प्रामादिकः, तावन्मात्रेण सप्तपदार्थातिरिक्तत्वासिद्धेः, हेत्वन्तरपूरणे च गौरवापत्त्या क्लृप्तपदार्थेष्वित्येव वक्तुमुचितत्वात्। यथोत्पत्तिविनाशशालित्वेन नित्यद्रव्यादिषु शक्तेर्नाऽन्तर्भावः, तथैव नित्यात्यन्तान्योन्याभावयोः, विनाशित्वेन ध्वसे, उत्पन्नत्वेन प्रागभावेऽप्यनन्तर्भावसम्भवा-

---

(१) भ्वाः—पृथिव्याः, स्तनं-पर्वतः, हिमस्य भेषजमौषधं वन्हिस्तद्वदित्यर्थः। तथा च पर्वतो वन्हिमानिति पर्यवसितम्।

ननु कथमेत एव पदार्थाः? शक्तिसादृश्यादीनामप्यतिरिक्तपदार्थत्वात्। तथा हि—मण्यादिसमवहितेन वन्हिना दाहो न जन्यते, तच्छून्येन तु जन्यते, तत्र मण्यादिना वन्हौ दाहानुकूला शक्तिर्नाश्यते, उत्तेजकेन मण्या-

दिनकरी।

ताः" इति मूलमयुक्तमित्यभिप्रायेण प्राभाकरः शङ्कते—**नन्विति। अतिरिक्तेति।** सप्तपदार्थातिरिक्तेत्यर्थः। अतिरिक्तपदार्थतामेव व्यवस्थापयति—**तथा हीत्यादिना। मण्यादीति।** आदिना मन्त्रौषध्यादिपरिग्रहः। **समवहितेन**–समीपवर्त्तिना। ननु वह्नि-रूपकारणाभावादेव न दाह इति न मण्यादेः प्रतिबन्धकत्वमतः-**समवहितेन वह्निनेति। दाहः**–रूपान्तरोत्पत्तिः, पूर्वरूपपरावृत्तिर्वा। मण्याद्यतिरिक्तस्य प्रतिबन्धकत्वं खण्डयति। **तच्छून्येनेति।** मणिसमवधानशून्येनेत्यर्थः। ननु वह्नौ यदि दाहानुकूला शक्तिः, तदा मण्यादिसत्त्वे कुतो न दाह इति चेत्तत्राऽऽह। **तत्रेति।** पूर्वोक्तयुक्त्या शक्तिसिद्धावित्यर्थः। **दाहानुकूलेति।** अत्र चाऽनुकूलत्वं कारण-तदवच्छेदकसाधारणं, तेन शक्तेः कारणता-वच्छेदकत्वेऽपि न क्षतिः। 'नाश्यते' इत्यस्य 'कल्प्यते' इत्यनेनाऽन्वयः। तथा च वह्नि-निष्ठशक्तित्वावच्छिन्नं प्रति मणित्वेन नाशकत्वस्वीकारेण मण्यादिसत्त्वदशायां शक्तेरभा-वादेव न दाह इति भावः। ननु मण्यादेर्यदि शक्तिनाशकत्वं, तदा सत्युत्तेजकविशिष्टमण्या-दावपसारिते वा दाहानापत्तिरित्यत आह—**उत्तेजकेनेति।** 'मण्याद्यपसारणेन च' इत्यत्र चकारो वाकारार्थे। न च दाहं प्रति मण्यभावत्वेन हेतुत्वकल्पनान्न मणिसमवधानकाले दाहापत्तिरिति वाच्यम्। मण्यभावत्वेन रूपेण स्वतन्त्रहेतुताकल्पने गौरवात् विलक्षणश-क्तिमत्त्वेन वह्नेः कारणत्वकल्पनस्यैवोचितत्वादित्यभिमानात्।

रामरुद्री।

*वेति ध्येयम्। **रूपपरावृत्तिर्वेति।** रूपनाशो वेत्यर्थः। लाघव(१)मेवोत्तरकल्पानुसरणे बीजम्। ननु मूले "तच्छून्येन तु जन्यते" इत्युक्तिर्व्यर्था, तस्याः प्रतिबन्धकत्वासाधकत्वात्, अतस्तस्या मण्यतिरिक्त-प्रतिबन्धकताखण्डकत्वेन सार्थकतां व्यवस्थापयति। **मण्याद्यतिरिक्तेति।** गगनादीनां प्रतिबन्धकत्व-मित्यर्थः। तथा च गगनादीनां प्रतिबन्धकत्वे मणिशून्यदशायामपि वह्निना दाहो न स्यात्, प्रतिबन्ध-कसत्त्वात्, अतो मण्यादेरेव प्रतिबन्धकता वाच्येति मूलाभिप्राय इति भावः। **पूर्वोक्तयुक्त्येति।** मण्यादिसमवधाने सतीत्यादिना स्वेन पूर्वमुक्तयुक्त्येत्यर्थः। **कारणतावच्छेदकत्वेऽपीति।** वह्नित्वेन वह्नेः शक्तित्वेन वह्निनिष्ठशक्तित्वेन वा शक्तेश्च दाह प्रति कारणत्वे गौरवात् शक्तिविशिष्टवह्नित्वेनैव कारण-त्वौचित्यात्, शक्तेः कारणत्वाभावादिति भावः। वस्तुतो मीमांसकैर्घटादिकं प्रति तत्तत्कारणेषु घटाद्यनु-कूलां शक्तिं कल्पयित्वा तादृशविलक्षणशक्तिमत्त्वेनैव कारणत्वस्याऽङ्गीकारात् दण्डचक्रादिभेदेनाऽपि न कारणताबाहुल्यमित्यपि लाघवमेतन्मत इति मन्तव्यम्। **वाकारार्थ इति।** उत्तेजक–मण्यपसारणयो-रेकसत्त्वेऽपि दाहापत्त्या समुच्चितयोस्तयोर्दाहकारणत्वासम्भवादिति भावः। **न मणिसमवधानकाल इति।** मण्यभावस्य हेतुतयैव मणिसमवधानकाले दाहवारणसम्भवान्नाऽनन्तशक्त्यादिपदार्थकल्पनं युक्त-मिति भावः। **अभिमानादिति।** वस्तुतस्त्वनन्त–शक्ति–तत्प्रागभाव–ध्वंसानां कल्पनामपेक्ष्य मण्य-भावत्वेन कारणत्वान्तरकल्पनमेवोचितं, कल्प्यस्यैकत्वेन लाघवादिति सूचयितुमुक्तमभिमानादिति।

---

(१) **स्वप्रतियोगिकभेदवत्त्व—स्वसजातीयत्वैतदुभयसम्बन्धेन रूपविशिष्टस्यैव रूपा-न्तरपदार्थतया तदपेक्षया रूपप्रतियोगिकध्वंस्य तथात्वे लाघवमिति भावः। स्वसजातीयत्वं च स्ववृत्तिरूपत्ववत्त्वप्रकारेण।**

द्यपसारणेन च जन्यते इति कल्प्यते। एवं सादृश्यमप्यतिरिक्तः पदार्थः, तद्धि न षट्सु भावेष्वन्तर्भवति, सामान्येऽपि सत्त्वात्, यथा गोत्वं नित्यं,

दिनकरी।

नन्वेवं शक्तिसिद्धावपि तस्या अतिरिक्तत्वासिद्धिरिति चेन्न? उक्तपदार्थेष्वनन्तर्भूतत्वात्। तथाहि–न तावत् द्रव्यात्मिका शक्तिः, गुणादिवृत्तित्वात्। अत एव न गुणात्मिका कर्मात्मिका वा। न च सामान्याद्यन्यतमरूपा, उत्पत्तिमत्त्वे सति विनाशित्वादिति। एवमतिरिक्तां शक्तिं प्रसाध्य सादृश्यस्याऽप्यतिरिक्तपदार्थतामवस्थापयति-**एवमित्यादिना। अतिरिक्त इति।** क्लृप्तसप्तपदार्थातिरिक्त इत्यर्थः। षड्भावानन्तर्भूतत्वे सत्यभावानन्तर्भूतत्वादिति हेतुः पूरणीयः। तत्र सत्यन्तासिद्धिं निरस्यति—**तद्धीति। तत्**–सादृश्यम्। हि–हेतौ। **सामान्येऽपीति।** सामान्येतरवृत्तित्वे सति सामान्यवृत्तित्वादित्यर्थः। तेन सामान्यत्वे न व्यभिचारः। व्यतिरेकित्वे सतीति विशेषणान्न प्रमेयत्वादौ व्यभिचारः।

रामरुद्री।

क्लृप्तपदार्थानन्तर्भूतत्वे मूलोक्तस्य षड्भावानन्तर्भूतत्वस्य न हेतुता सम्भवति, अभावे व्यभिचारात्, नाऽपि 'नाऽप्यभावे'इत्यनेनोक्तस्याऽभावानन्तर्भूतत्वस्य, भावपदार्थे व्यभिचारात्, अतो हेत्वन्तरं पूरयति—**षड्भावेति। तत्रेति।** उक्तहेतावित्यर्थः। षटकत्वं सप्तम्यर्थः। तस्य च सत्यन्तेऽन्वयः। **हि–हेताविति।** हिशब्दो हेतुवाचक इत्यर्थः। सप्तम्या वाचकत्वार्थकत्वात्। तथा च हेतोरभेदेन षड्भावानन्तर्भावविशेषणत्वमिति भावः। न चैव 'हेतुः' इत्युक्तेः कुत्रेत्याकाङ्क्षोदयाद्धेतुत्वनिरूपकान्वय्यनुक्त्या न्यूनत्वमिति वाच्यम्। हेत्वन्वयिन उक्तहेतावित्यस्याऽध्याहारेणोक्तहेत्वभिन्नषड्भावानन्तर्भूतत्वविशिष्टाभावान्तर्भूतत्वाभावाश्रयः सादृश्यमिति बोधे तात्पर्यात्। अत्र च भावान्तर्भूतत्वाऽभावान्तर्भूतत्वयोरभावद्वयस्य मिलितस्यैव हेतुत्वं, प्रत्येकस्य भावाभावयोर्व्यभिचारित्वादिति मन्तव्यम्। इदं चाऽऽपाततः। मूलोक्तस्य मिलिताभावद्वयस्यैवाऽतिरिक्तपदार्थत्वे हेतुत्वसम्भवेन हेत्वन्तरं पूरयित्वा तत्र विशेषण–विशेष्य–भागाप्रसिद्धिनिरासपरत्वेन 'तद्धि–'इत्यादिग्रन्थव्याख्यानस्याऽनुचितत्वादिति ध्येयम्। **सामान्येतरवृत्तित्वे सतीति।** 'सामान्येऽपि' इत्यपिना सामान्येतरस्य समुचितत्वादयमर्थो लभ्यत इति भावः। **तेनेति।** सामान्येतरवृत्तित्वोपादानेनेत्यर्थः।

अथ सामान्यत्वमनेकसमवेतत्वे सति नित्यत्वं, तच्च ध्वंसप्रागभावाप्रतियोगित्वरूपतया अभावस्वरूपमेवेति कथं व्यभिचारः? न च विनिगमनाविरहेण नित्यत्वे सत्यनेकसमवेतत्वस्याऽपि सामान्यत्वरूपतासम्भवेन तस्य चाऽनेकानुयोगिकसमवायप्रतियोगित्वस्य स्वरूपसम्बन्धविशेषरूपस्य सामान्यात्मकतया भवति व्यभिचार इति वाच्यम्। एवमप्यभेदे अधाराधेयभावानुपगमेन सामान्यवृत्तित्वासत्त्वेन व्यभिचाराप्रसक्तेः। न च सामान्यत्वं सामान्यत्वप्रकारकज्ञानरूपमेव विवक्षितमिति वाच्यम्। तथा सति सामान्यविषयकज्ञानस्य विषयतया सामान्यसम्बन्धित्वात् सामान्येतरात्मवृत्तित्वाच्च सत्यन्तोपादानेऽपि व्यभिचारतादवस्थ्यात्, व्यभिचारवारणरूपप्रयोजनाभावेन सत्यन्तसार्थक्यमात्राय वृत्तित्वस्थाने सम्बन्धित्वविवक्षाया अनुचितत्वाच्च। तस्मात् सामान्यनिरूपितायाः सम्बन्धान्तरावच्छिन्नवृत्तिताया अप्रसिद्धया स्वरूपसम्बन्धावच्छिन्न–सामान्य–वृत्तित्वमेव हेतुर्वाच्यः। सामान्यत्वे च न तादृशं सामान्यवृत्तित्वमिति व्यभिचारो दुर्घट एव। युक्तं चैतत्, सादृश्यस्याऽतिरिक्तत्ववादिनाऽपि स्वरूपसम्बन्धेनैव तस्य प्रकारत्वोपगमेन तस्य भूयोधर्मवत्त्वरूपतावादिनाऽपि स्वरूपेणैव तस्य प्रकारताऽङ्गीकरणीया, अनुभवे विवादासम्भवात्, एकाकारप्रतीतेर्नानासम्बन्धेन तत्प्रकारकत्वानौचित्याच्च। अत एव ग्रन्थकृताऽपि तद्भिन्नत्वे सति तद्वतभूयोधर्म इत्युक्त्वा तद्वतभूयोधर्मवत्त्वपर्यन्तमनुसृतम्। तथा च सादृश्ये स्वरू-

तथाऽश्वत्वमपीति सादृश्यप्रतीतेः । नाप्यभावे, सत्त्वेन प्रतीयमानत्वादिति

दिनकरी

भावत्वे च द्रव्यादिषट्कान्यतमत्वरूपे हेतुमति साध्यस्य सत्त्वान्न व्यभिचार इति । **यथेति** । यदि सादृश्यं द्रव्यादावन्तर्भूतं, तदा द्रव्यादेः सामान्यावृत्तित्वेन यथा गोत्वं नित्यं तथा अश्वत्वमित्यबाधितप्रतीतिर्न स्यादित्यर्थः ।

अभावेऽन्तर्भावमाशङ्क्य निराचष्टे—**नाऽपीति** । यद्यप्यतिरिक्ताभावमनङ्गीकुर्वतः प्राभाकरस्य मतेऽभावेऽन्तर्भावचिन्ता न सम्भवति, तथाऽपि परमतमभ्युपेत्येदं निराकृत-

रामरुद्री ।

पासिद्धिवारणायोभयमतसिद्धं सामान्यनिरूपितस्वरूपसम्बन्धावच्छिन्नवृत्तित्व(१)मेव हेतुरित्यवश्यमङ्गीकरणीयमिति न व्यभिचार इति चेन्न । सामान्यं सामान्यत्ववदिति प्रतीत्या सामान्ये सामान्यत्वाधारत्वावगाहनेन सामान्यत्वस्य सामान्यातिरिक्तस्य दुर्वचत्वेन च स्वस्याऽपि स्वरूपसम्बन्धेन स्ववृत्तित्वमवश्यमङ्गीकरणीयम् । अभावाधिकरणकाभावस्थले सर्वैरपि तथा स्वीकारात् । अनयैव रीत्या प्रमेयत्वादावपि वक्ष्यमाणव्यभिचारो बोध्यः । सर्वं प्रमेयत्ववदिति प्रतीत्या प्रमेयत्वस्य प्रमास्वरूपस्य स्वरूपसम्बन्धेन वृत्तेरावश्यकत्वात् विषयताया विषयस्वरूपत्वेन सर्वत्र प्रमेयत्वमेकमिति प्रतीतिविरोधात् ज्ञानस्वरूपे च प्रमेयत्वे स्वरूपसम्बन्धेन सामान्य–तदितरवृत्तित्वसत्त्वाद्व्यभिचारस्याऽऽवश्यकत्वादिति भावः ।

नन्वन्यतरसम्बन्धेन सत्तावत्त्वरूपभावत्वे हेतुसत्त्वात् व्यभिचार इत्याशङ्कां निराकुरुते—**भावत्वे चेति** । न चैवमपि घटघटत्व–गतद्वित्वे व्यभिचारो दुर्वारः, तस्य संख्यारूपत्वसम्भवेऽपि द्वित्ववत्तावुद्ध्युपपत्तयेऽपेक्षाबुद्धिरूपस्य स्वरूपसम्बन्धेन वृत्तेरावश्यकत्वादिति वाच्यम् । व्यासज्ज्यवृत्त्यन्यत्वस्याऽपि हेतौ विशेषणत्वोपगमात् । व्यासज्ज्यवृत्तित्वं च एकमात्रवृत्तिधर्मानवच्छिन्नपर्याप्तिमत्त्वमिति न किञ्चिदनुपपन्नम् ।

वस्तुतस्तु स्वरूपसम्बन्धावच्छिन्नसामान्यवृत्तित्वमेव हेतुरिति मूलकृतां तात्पर्यम् । अपिकारस्तु सादृश्यस्य सामान्यमात्रवृत्तित्वे मुखादौ चन्द्रसादृश्यप्रतीतिर्न स्यादित्याशङ्कानिरासाय स्वरूपसतः सामान्येतरवृत्तित्वस्याऽनुवादक एव, न तु हेतुतावच्छेदकत्वेऽपि मूलकृतां तात्पर्यम् । न चैवं सामान्यस्वरूपे सामान्यत्वे व्यभिचार इति वाच्यम् । आधाराधेयभावप्रतीत्यनुरोधेनाऽनेकसमवेतत्वे सति नित्यत्वस्वरूपतया एव सामान्यत्वे स्वीकरणीयत्वात् । एवं प्रमेयत्वमपि न प्रमैव, विषयार्थकप्रत्ययादिविरोधात्, अपि तु प्रमाविषयत्वम् । तथा च प्रमेयत्वस्य विषयतारूपस्य प्रतिविषयं भिन्नत्वेन कस्याऽपि विषयताया सामान्य–तदितरोभयवृत्तित्वासम्भवेन प्रमेयत्वेऽपि व्यभिचारासम्भवात् हेतौ व्यतिरेकित्वविशेषणमप्यनर्थकमेव । परन्तु विषयस्वरूपाया विषयतायाः स्वरूपसम्बन्धेन सामान्यवृत्तित्वसत्त्वात् तत्र व्यभिचारवारणाय सामान्यवृत्तित्वे विषयतात्वाद्यनवच्छिन्नत्वं विशेषणं देयम् । एवं च द्वित्वादिकमपि अपेक्षाबुद्धिविषयत्वमेव, न त्वपेक्षाबुद्धिरूपम् । ज्ञाने विषयवृत्तित्वस्य काऽप्यक्लृप्तत्वादिति तत्राऽपि न व्यभिचार इति । सामान्यभिन्नत्वं वा हेतोर्विशेषणम् । सादृश्ये सामान्यभेदस्य अभाववृत्तित्वेन साधनसम्भवादिति । एतल्लाभार्थैव अपिपदमपि सार्थकमिति युक्तमुत्पश्यामः ।

ननु भावत्वेन प्रतीयमानत्वं भ्रान्तपुरुषस्याऽभावेऽप्यक्षत, तत्र भावानन्तर्भूतत्वाभावादयं हेतुर्व्य-

---

(१) ननु वृत्तितायां स्वरूपसम्बन्धावच्छिन्नत्वविशेषणस्य स्वरूपासिद्धिवारकतया व्यभिचारावारकत्वेन वैयर्थ्यमतो यत्किञ्चित्सम्बन्धावच्छिन्नैव वृत्तिता वक्तव्येति चेन्न । यत्किञ्चित्सम्बन्धत्वस्य सम्बन्धत्वसमानाधिकरणोभयावृत्तिधर्मस्वरूपतया गुरुत्वेन तत्राऽवच्छेदकत्वविरहेण तत्तत्सम्बन्धेष्वेव तदवच्छेदकत्वस्य कल्प्यत्वेनाऽस्मदीयहेतौ स्वरूपसम्बन्धावच्छिन्नत्वस्यैव प्रवेशेन स्वसमानाधिकरणधर्मान्तरघटितत्वलक्षणस्य वैयर्थ्यस्याऽनवकाशादिति विभावनीयम् ।

चेत्—न । मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं प्रति स्वातन्त्र्येण दिनकरी ।

मिति भावः । **सत्त्वेन**–भावत्वेन । **प्रतीयमानत्वात्**—प्रमीयमाणत्वात् ।

मणिसमवधानकालीनवह्निना दाहोत्पत्तिवारणाय प्राभाकरेण साधितां शक्तिं दूषयति—**मण्याद्यभावेति** । अतिरिक्तशक्तिकल्पनां पूर्वोक्तनाश्यनाशकभावकल्पनां चाऽपेक्ष्य लाघवात् दाहत्वावच्छिन्नं प्रति मण्यभावविशिष्टवह्नित्वादिनैव हेतुताकल्पनमुचितमिति भावः । **दाहादिकमिति** । आदिपदेन वह्नेः संग्रहः । मणिसत्त्वे वह्नेरप्यनुत्पत्तेः । तथा च मणिरूपप्रतिबन्धकसद्भावान्न दाहवह्नी इति भावः ।

ननु यदा कदाचिन्मण्यभावविशिष्टात् वह्नेर्दाहापत्तिः, कारणतावच्छेदकावलीढकारणसत्त्वस्यैव कार्योत्पत्तिनियामकत्वात्, मण्याद्यभावविशिष्टवह्नित्वं वह्निविशिष्टमण्यभावत्वं वा कारणतावच्छेदकमित्यत्र विशेषणविशेष्यभावे विनिगमनाविरहेण गुरुभूतकार्यकारणभावद्वयापत्तिश्चेत्यत आह—**मण्यभावादेरिति** ।

तथा च प्रतिबन्धकत्वं न कार्यानुकूलधर्मविघटकत्वं, बाधज्ञानस्याऽनुमितिप्रतिबन्धकत्वाभावापत्तेः । किं तु कारणीभूताभावप्रतियोगित्वम्, तच्च मण्यभावस्य हेतुत्वे एवोपपद्यते, न त्वतिरिक्तशक्तिसत्त्व इति भावः ।

ननु प्रतिबन्धकत्वस्येदृशत्वे कारणीभूतवह्निरूपाभावप्रतियोगिनि वन्ह्यभावेऽतिव्याप्तिः, स्वप्रागभावप्रतियोगिनि घटादौ चेति चेन्न । तादात्म्यातिरिक्तसम्बन्धावच्छिन्ना या कार-

रामरुद्री ।

भिचारीत्याशङ्कानिरासाय तदर्थमाह । **प्रमीयमाणत्वादिति** ।

यदा कदा चिदिति । मणिसत्त्वदशायामपि पूर्वकालावच्छेदेन मण्यभावसामानाधिकरण्यरूपवैशिष्ट्यवतो वह्नेर्दाहापत्तिरिति भावः । ननु कारणतावच्छेदकविशिष्टकारणसत्त्वमेव कार्योत्पत्तिप्रयोजकं, तदधिकरणे मण्यभावासत्त्वदशायां सामानाधिकरण्यसम्बन्धेन मण्यभावविशिष्टवह्न्यधिकरणत्वाभावान्न दाहापत्तिरित्यत आह । **कारणतावच्छेदकावलीढेति** । कारणतावच्छेदकोपलक्षितेत्यर्थः । अन्यथा विशेषणज्ञानस्य विषयितासम्बन्धेन विशेषणविशिष्टज्ञानरूपस्य विशिष्टबुद्धिहेतुत्वे गतानागतविशेषणज्ञानजन्यविशिष्टज्ञाने व्यभिचारापत्तेरिति भावः । ननु विषयितासम्बन्धेन विशेषणस्य न कारणतावच्छेदकत्वम्, अपि तु विशेषणनिरूपितविषयताया एव, विषयता च ज्ञानसमानकालीनैवेति कारणतावच्छेदकविशिष्टस्य कार्योत्पत्तिप्रयोजकत्वेऽपि न क्षतिरित्यस्वरसादाह—**मण्याद्यभावेति** । **गुरुभूतेति** । वन्हित्वेन मण्यभावत्वेन कारणत्वाऽङ्गीकारेऽपि कारणताद्वयमेव, किं तु लघुधर्मावच्छिन्नं, मण्यभावविशिष्टवन्हित्वादिना कारणत्वे तु गुरुधर्मावच्छिन्नकारणताद्वयमापद्येतेति भावः । नन्वेवं मणेः प्रतिबन्धकत्वानुपपत्तिः, कारणविघटकस्यैव प्रतिबन्धकत्वात् मणेर्मण्यभावानाशादित्यत आह—**तथा चेति । बाधज्ञानस्येति** । यत्र परामर्शानाशानन्तरं लौकिकप्रत्यक्षरूपो बाधनिश्चयः, तत्र बाधनिश्चयोत्पत्तिद्वितीयक्षणे परामर्शनिष्ठशक्तिनाशो वक्तव्यः, तथा च बाधोत्पत्तितृतीयक्षणे बाधेनाऽनुमितिप्रतिबन्धो वाच्यः, स च न सम्भवति, तत्पूर्वं परामर्शाभावादेवाऽनुमित्यनुत्पादसम्भवात्, बाधद्वितीयक्षणेऽनुमित्यापत्तेश्च, तत्पूर्वं शक्तिविशिष्टपरामर्शसत्त्वादिति भावः । **न त्वतिरिक्तेति** । अतिरिक्तशक्त्यङ्गीकारे मण्यभावस्य कारणत्वे युक्तिविरहात् कारणीभूताभावप्रतियोगित्वरूपप्रतिबन्धकत्वस्य मणावसम्भवादिति भावः ।

वन्ह्यभावे इति । कारणाभावे प्रतिबन्धकताव्यवहाराभावात् कारणसत्त्वे कार्यानुत्पत्तिप्रयोजकस्यैव प्रतिबन्धकत्वेन व्यवह्रियमाणत्वात् **नेष्टापत्तिसम्भव इति भावः । घटादौ चेति** । तथा च स्वस्य स्वोत्पत्तौ प्रतिबन्धकत्वापत्तिरिति भावः । प्रतिबन्धकाभावस्य कार्यकालवृत्तित्वेन कारणतया नाऽत्राऽ-

मण्यभावादेरेव वा हेतुत्वं कल्प्यते, अनेनैव सामञ्जस्येऽनन्तशक्ति-तत्प्रागभाव-ध्वंस कल्पनानौचित्यात्। न चोत्तेजके सति प्रतिबन्धकसद्भावेऽपि कथं दाह इति वाच्यम्। उत्तेजकाभावविशिष्टमण्यभावस्य हेतुत्वात्।

दिनकरी।

णता, तदाश्रयीभूतो यो भावभिन्नोऽत्यन्ताभावः, तत्प्रतियोगित्वस्य विवक्षितत्वात्। कारणताविशेषोपादानाच्च स्वात्यन्ताभावप्रत्यक्षे स्वस्य प्रतिबन्धकत्वापत्तिः परास्ता। विषयस्य तादात्म्यसम्बन्धेनैव प्रत्यक्षे हेतुत्वात्।

ननु वह्नि-मण्यभावयोर्द्वयोर्हेतुत्वापेक्षयाऽतिरिक्तशक्तेरकस्या एव हेतुता युक्ता, लाघवादित्यत आह—**अनेनैवेति।** दाहादिकं प्रति मण्यभावादेर्हेतुत्वकल्पनेनैवेत्यर्थः। **सामञ्जस्ये**-मणिसमवधानदशायां दाहवारणे। प्रागभावे मानाभावादाह—**ध्वंसेति।** इदमुपलक्षणम्। प्रतियोगि-ध्वंसयोः शक्ति-मण्यपसारणयोश्च कार्यकारणभावकल्पनाऽपि स्यादित्यपि बोध्यम्। **उत्तेजकाभावेति।** तथा च केवलं मणिर्न प्रतिबन्धकः, किन्तु उत्तेजकाभावविशिष्टः, तदभावश्च उत्तेजकसमवधानकालेऽपि तिष्ठतीति न व्यभिचार इति भावः। अथ मण्यादिस्थलीयदाहं प्रत्युत्तेजकस्यैव हेतुताऽस्त्विति चेन्न। तस्याऽननुगतत्वात्, तदभावकूटविशिष्टमण्यभावस्य चाऽनुगतत्वात्।

अत्रेदं बोध्यम्। अभावीयविशेषणतासम्बन्धेन दाहत्वावच्छिन्नं प्रति उद्देश्यता-दैशिकविशेषणताऽन्यतरसम्बन्धावच्छिन्नप्रतियोगिताकानां तत्तदुत्तेजकाभावानां सामाना-

रामरुद्री।

पीष्टापत्तिः। **भावभिन्नोऽत्यन्ताभाव इति।** वह्न्यभावाभावं वह्निस्वरूपमादाय वन्ह्यभावे प्रतिबन्धकत्वापत्तिवारणाय—**भावभिन्न** इति। प्रागभावमादाय स्वस्मिन् स्वप्रतिबन्धकत्वापत्तिवारणाय—**अत्यन्ताभाव** इति। यद्यप्यत्यन्ताभावत्वं नित्यत्वे सति संसर्गाभावत्व, तच्च न वन्ह्यादौ, भावभिन्नत्वरूपाभावत्वस्यैव तत्राऽसत्त्वात्, तथाऽपि प्रकृते अत्यन्ताभावत्वं नाऽभावत्वघटितं, किं तु अन्योन्याभावभिन्नत्वे सति ध्वसप्रागभावभिन्नत्वे सति सप्रतियोगिकत्वमतो न **भावभिन्न** इत्यस्य वैयर्थ्यम्। अत एव यत्र अनुयोगिवाचकपदोत्तरं सप्तमी, तत्र नञा अत्यन्ताभावो बोध्यत इति नियमोऽप्युपपद्यते, अन्यथा भूतले घटाभावो (१)नास्तीत्यादौ न स्यादेव नञा अत्यन्ताभावस्य बोध्यत्वमिति ध्येयम्। **परास्तेति।** न चोक्तापत्तिवारणाय दैशिकविशेषणतासम्बन्धाऽवच्छिन्नत्वमेव कारणताविशेषणमस्तु, तथा च भावानां दैशिकविशेषणतासम्बन्धेन अकारणत्वात् **भावभिन्न** इत्यपि नोपादेयमिति वाच्यम्। चक्षुःसंयुक्तविशेषणतादीनां भावानामपि दैशिकविशेषणतया कारणत्वेन तदावश्यकत्वात्। इदमिहेतिप्रतीतिनियामकविशेषणतारूपायास्तस्या अलघुत्वाच्चेति ध्येयम्।

तस्याऽननुगतत्वादिति। मणि-मन्त्र-महौषध्यादिषु उत्तेजकत्वस्यैकस्य दुर्वचत्वात्, पृथिवीत्वादिना साङ्कर्येण तस्य जातित्वासम्भवादिति भावः। नन्वेवमुत्तेजकाभावविशिष्टमण्यभावत्वेनाऽपि हेतुता न सम्भवति, उत्तेजकस्याऽनुगतस्याऽभावादित्यत आह—**तदभावकूटेति।**

उत्तेजकाभावकूटविशिष्टमण्यभावस्य हेतुत्वे मन्त्ररूपोत्तेजकदशायामपि मन्त्रस्य गगननिष्ठत्वेन वन्ह्यधिकरणे देशेऽभावसत्त्वात् सामानाधिकरण्यसम्बन्धेन तदुत्तेजकाभावविशिष्टमणिसत्त्वात् दाहानुत्पादप्रसङ्गः। किं च संयोगेन द्रव्यस्याऽव्याप्यवृत्तितामते मणिसत्त्वेऽपि किञ्चिदवच्छेदेन संयोगेन मण्यभावसत्त्वात् दाहापत्तिश्चेत्याशङ्कां निराकुरुते—**अत्रेदं बोध्यमिति। अभावीयविशेषणतेति।** दाहस्य रूपध्वंसरूपतया विशेषणतयैव तदुत्पत्तेरिति भावः। **उद्देश्यता-दैशिकविशेषणतान्यतरेति।** मन्त्र-

(१) 'घटो नास्ति' इत्येव पाठः। स च प्रकृतासम्बद्धत्वान्नाऽत्रोपात्तः।

दिनकरी

धिकरण्यरूपं यद्वैशिष्ट्यं, तदवच्छिन्नस्य मण्यादेर्दैशिकविशेषणतोद्देश्यताऽन्यतरसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्याऽभावीयविशेषणतासम्बन्धेन हेतुत्वमिति। एतेन संयोगसम्बन्धावच्छिन्नप्रतियोगिताकमण्यभावस्य तत्संयुक्तेऽपि सत्त्वात् दाहापत्तिरिति परास्तम्।

नन्वनुमानमेव शक्तौ प्रमाणम्, तथाहि—वह्निर्दाहानुकूलाद्विष्ठातीन्द्रियधर्मसमवायी, दाहजनकत्वात्, अदृष्टवदात्मवदिति। वह्निद्वयणु(कै)कत्वमादाय भर्जनकपालस्थवह्निनिष्ठानुद्भूतरूपमादाय वा सिद्धसाधनवारणाय साध्ये दाहानुकूलेति, वह्निद्वयणुकेन्धनसंयोगमादायाऽदृष्टवदात्मसंयोगमादाय वा तद्वारणायाऽद्विष्ठेति, वह्निनिष्ठोष्णस्पर्शमादाय तद्वारणायाऽतीन्द्रियेतीति चेन्न। विपक्षे बाधकतर्कविरहेणाऽस्याऽनुमानस्याऽप्रयोजकत्वात्(१)।

रामरुद्री।

स्य उद्देश्यतासम्बन्धेनैव वह्न्यधिकरणदेशे सत्त्वात् उद्देश्यतानिवेशः। मण्यादिरूपोत्तेजकस्य सत्त्वेऽपि किञ्चिदवच्छेदेन संयोगेन तदभावसत्त्वात् दाहानुपपत्तिरिति दैशिकविशेषणतानिवेशः। दैशिकविशेषणतया तु न द्रव्यस्याऽव्याप्यवृत्तित्वमिति न दाहानुपपत्तिरिति भावः। इदं च भावाभावसाधारणदैशिकविशेषणतामभ्युपेत्योक्तम्। **मण्यादेरिति**। आदिना मन्त्रादेः परिग्रहः। अत एव सम्बन्धकोटौ उद्देश्यताप्रवेशः। सयोगस्थाने दैशिकविशेषणताप्रवेशे तूक्तैव युक्तिः।

वह्निद्वयणुकत्वमिति। वह्निद्वयणुकवृत्तिपरिमाणव्यक्तिमित्यर्थः। तेन वह्निद्वयणुकत्वस्य नानाद्वयणुकेषु सत्त्वेऽपि क्षतिः। ननु महत्त्वविशिष्टवह्नेः(२)रेव पक्षत्वात् न सिद्धसाधनमित्यत आह—**भर्जनकपालस्थेति**। वह्निद्वयणुकेन्धनसंयोगमादायाऽपि महद्वह्नेः पक्षत्वे न सिद्धसाधनमत उक्तम्—**अदृष्टवदात्मसंयोगमिति**।

---

(१) यत्तूक्तानुमाने आत्मत्वमुपाधिः, तस्याऽऽत्मनि साध्यव्यापकत्वाद्वह्न्यादौ साधनाव्यापकत्वाच्चेति केचिदाहुः। तन्न सम्यक्। दाहार्थिनो वन्ह्यादिषु प्रवृत्त्युपपत्तये दाहानुकूलशक्तिमत्त्वेन वन्ह्यादीनां दाहे कारणत्वस्याऽऽवश्यकतया तत्रैव कारणत्वकल्पना लघीयसीति न शक्तौ कारणत्वं कल्प्यम्। न चैवं दण्डचक्रादीनां दण्डत्वादिरूपेण कारणत्वकल्पनामपक्ष्यैकशक्तिमत्त्वेनैव कारणत्वे लाघवमिति शक्तौ कारणत्वसिद्धिर्निष्प्रत्यूहैवेति वाच्यम्। तथाऽपि कारणतावच्छेदकत्वस्यैव शक्तौ कल्पनेन सामञ्जस्ये तत्र कारणत्वकल्पनं न सुशकम्। इष्टापत्तौ च शक्तौ दाहकारणत्वरूपस्य दाहानुकूलत्वस्य विरहेण साध्याप्रसिद्धिः स्यात्। न चैवमपि तादृशदाहकारणत्वस्य अदृष्टादौ प्रसिद्ध्या नाऽप्रसिद्धिरिति-वाच्यम्। तथा सति तादृशधर्मस्य वन्ह्यभावाद्बाधापत्तेः। अतोऽनुकूलत्वं कारण—तदवच्छेदकसाधारणं प्रयोजकत्वरूपमभ्युपेयम्। एवं चाऽदृष्टत्वस्य दाहकारणतावच्छेदकस्याऽपि दाहानुकूलत्वेन तादृशधर्मसमवायिन्यदृष्टे आत्मत्वस्य साध्याव्यापकत्वात् तस्योपाधित्वासम्भव इति। न चाऽदृष्टत्वस्य दाहजनकतावच्छेदकत्वे न मानमिति वाच्यम्। एवमपि धर्मत्वमधर्मत्वं वाऽऽदायाऽऽत्मत्वे साध्याव्यापकत्वस्य वक्तव्यत्वादिति। ननु तथाऽपि सर्वकार्यव्यक्तिं प्रति तदनुकूलैकशक्तिमत्त्वेनैव हेतुत्वाद्दाहः स्वानुकूलशक्तिमज्जन्यः, कार्यत्वादित्यनुमानेन तत्राऽतिरिक्तशक्तिसिद्धिः स्यादिति चेन्न। तथा सति दाहानुकूला शक्तिः स्वानुकूलशक्तिमज्जन्या, कार्यत्वादित्यनुमानेनाऽपि दाहानुकूलशक्त्यन्तरसिद्धिप्रसङ्गः। इष्टापत्तौ चैवंक्रमेणाऽनवस्थापत्तिः। न च शक्तौ वन्ह्यादेरव कारणत्वान्न तत्राऽतिरिक्तशक्तिसिद्धिरिति वाच्यम्। एवं सति भवदनुमानस्य शक्तावेव व्यभिचारितया तेन शक्तेरसिद्धिरेवेत्युभयतःपाशा रज्जुः। अपि च तुल्ययुक्त्या दाहे वन्ह्यादीनामेव कारणत्वं कल्प्यमितीतोऽपि न शक्तिसिद्धिरित्यादिकं बहुतरमूहनीयम्।

(२) एतच्चाऽऽपाततः। वन्हित्वावच्छेदेनैव साध्यसिद्धेरुद्देश्यत्वेन द्वयणुकात्मकवह्नौ च

दिनकरी

केचित्तु—वह्निं प्रति तृण-फूत्कारसंयोगादीनां तृण-फूत्कारसंयोगत्वादिरूपेण कारणताया व्यभिचारेणऽसम्भवादतिरिक्तशक्तिसिद्धिः। न च तृण-फूत्कारयोररणि-निर्मन्थनयोर्मणि-किरणयोश्च सम्बन्धस्य जन्यतावच्छेदकं वह्निवृत्तिवैजात्यत्रयं कल्प्यमिति न व्यभिचार इति वाच्यम्। तज्जन्यतावच्छेदकवैजात्यत्रयकल्पनामपेक्ष्य तत्सम्बन्धानामेकशक्तिमत्त्वेन कारणत्वकल्पनाया एव लघुत्वेन न्याय्यत्वादित्याहुः।

तन्न। तत्सम्बन्धसाधारण्येनैकजातेरेवाऽभ्युपगमात्। न च योग्यवृत्तिजातेर्योग्यत्वापत्तिरिति वाच्यम्। दोषविशेषेण शक्तेरिवाऽयोग्यत्वकल्पनात्। न च नोदनत्वादिना सङ्करः, तस्याऽदोषत्वात्, अन्यतमत्वेन कारणतासम्भवाच्च। न चाऽन्यतमत्वघटकभेदानां मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण कारणतावच्छेदकभेदात् कारणताबाहुल्यमिति वाच्यम्। कारणतावच्छेदकानां समनियतानामैक्येन कारणतैक्यसम्भवात्। न च भेदानां स्वरूपतोऽवच्छेदकत्वासम्भवेन तृणफूत्कारसंयोगभेदविशिष्टारणिनिर्मन्थनसम्बन्धभेदविशिष्टमणिकिरणसम्बन्धभेदावच्छिन्नप्रतियोगिताकभेदत्वादिनाऽवच्छेदकत्वं वक्तव्यम्। तथा चाऽवच्छेदकतावच्छेदकभेदादवच्छेदकताभेदः, तद्भेदेन च कारणताभेद इति वाच्यम्। स्वरूपसम्बन्धरूपाया अतिरिक्ताया वा कारणताया अवच्छेदकभेदेऽप्यभेदादित्य-

रामरुद्री।

स्वाश्रयसंयोगसम्बन्धेन कार्यमात्रे अदृष्टस्य हेतुतया तत्तत्सम्बन्धेन संयोगस्याऽपि हेतुत्वादिति भावः। यद्यप्यत्राऽऽत्मनो दृष्टान्तत्वमसङ्गतं, तस्य दाहजनकत्वे मानाभावात्, तथाऽपि कार्यमात्रे कर्तुरेव कारणत्वमताभिप्रायेणैवमुक्तम्। यद्वा दाहजनकत्वमत्र न दाहकारणत्वं, अपि तु दाहप्रयोजकत्वम्। तच्च कारण—तत्कारणसाधारणं स्वरूपसम्बन्धस्वरूपमिति कार्यमात्रकारण—कृति—कारणे आत्मन्यप्यक्षतमेवेति ध्येयम्।

न्याय्यत्वादिति। एतच्चाऽऽपाततः। शक्तेः प्रतिबन्धकनाश्यतया तदपसारणजन्यतया चोत्पादविनाशशालित्वेन अनन्तशक्तिकल्पनापत्त्या विपरीतगौरवापत्तेरिति ध्येयम्। **दोषविशेषेणेति।** अदृष्टादिरूपेणेत्यर्थः। अन्यथा त्वन्मतेऽपि वह्निगतशक्तिप्रत्यक्षापत्तेरिति भावः। **तस्याऽदोषत्वादिति।** स्वसामानाधिकरण्य—स्वाभावसामानाधिकरण्योभयसम्बन्धेन जातिविशिष्टत्वस्य स्वसमानाधिकरणात्यन्ताभावप्रतियोगिजातित्वाभावव्याप्यत्वे मानाभावेन साङ्कर्यस्य जातिबाधकत्वाभावादिति भावः। **स्वरूपतोऽवच्छेदकत्वासम्भवेनेति।** जातीतरस्य स्वरूपतो भानानङ्गीकारात्। यस्य स्वरूपतो भानं, तस्यैव स्वरूपतोऽवच्छेदकत्वनियमादिति भावः। **स्वरूपसम्बन्धरूपाया इति।** तत्कारणव्यक्तिरूपायाः कारणतावच्छेदकभेदेन भेदासम्भवादिति भावः। **अतिरिक्ताया इति।** सप्तपदार्थातिरिक्ताया इत्यर्थः। तादृशकारणताया अवच्छेदकताभेदात् भेदे नानाकारणताव्यक्तिकल्पनागौरवापत्त्या नानावच्छेदकतानिरूपितैककारणताया एव कल्पयितुमुचितत्वादिति भावः। व्यापकतारूपकारणताया एव प्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणधर्मघटितत्वेन अवच्छेदकत्वादिभेदेन भिन्नत्वादिति ध्येयम्। इदमुपलक्षणम्। भेदस्य तद्व्यक्तित्वेन कारणतावच्छेदकत्वेऽपि न क्षतिरिति द्रष्टव्यम्। यद्यपि घटादिकार्यं प्रति तत्तत्कार्यानुकूलैकशक्तिमत्त्वेन कारणत्वे लाघव, दण्डत्वादिना नानाकारणत्वकल्पने गौरवं, प्रतिबन्धकसमवधानकालीनकारणेषु शक्त्यभावादेव कार्यानुत्पादसम्भवे प्रतिबन्धकाभावस्य कारणत्वाकल्पनेन च महालाघवादिति शक्तिकल्पनमेव ज्यायः। न च दण्डचक्रादिषु सर्वत्रैकशक्तिमङ्गीकृत्य तद्वत्त्वेन कारणत्वे केवलदण्डादपि घटोत्पत्तिः स्यात्, अशेषकारणतावच्छेदकावच्छिन्नस्य सत्त्वादिति वाच्यम्।

सामानाधिकरण्येन तत्सिद्धेर्नाऽवच्छेदकावच्छेदेनाऽनुमितौ प्रतिबन्धकत्वसम्भव इत्यवधेयम्।

सादृश्यमपि न पदार्थान्तरं, किन्तु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम्।

दिनकरी।

न्यत्र विस्तरः।

परे तु—तृणादिसम्बन्धकालीनवायुसंयोगादीनामेकशक्तिमत्त्वेन हेतुतामादाय विनिगमनाविरहान्न शक्तिसिद्धिरित्याहुः।

यदाशङ्कितं सादृश्यमप्यतिरिक्तः पदार्थ इति, तदपि निराकरोति—**सादृश्यमपीति। तद्भिन्नत्वे सतीति।** इदं च सादृश्यनिरूपकेऽतिव्याप्तिवारणाय। अनुयोगितासम्बन्धविवक्षणे तु न देयमेव। **तद्गतभूयोधर्मवत्त्वमिति।** तत्राऽसाधारण्येन विद्यमाना ये भूयांसो धर्मास्तद्वत्त्वमित्यर्थः।

रामरुद्री।

शक्तेः कारणसमुदायपर्याप्तत्वोपगमेन पर्याप्तिसम्बन्धेन शक्तिमत्त्वेनैव कारणत्वाभ्युपगमेन च केवलदण्डसत्त्वदशाया कारणतावच्छेदकावच्छिन्नस्याऽभावात्। एतन्मते सामग्रीत्वमपि यद्धर्मावच्छिन्नसमुदाये कारणतावच्छेदकपर्याप्तिः, तद्धर्मावच्छिन्नसमुदायत्वमेव। तथाऽपि दण्डत्वादिना घटकारणत्वाभावे दण्डत्वाद्यवच्छिन्नधर्मिकेष्टसाधनताज्ञानसम्भवेन घटार्थी नियमतो दण्डत्वाद्यवच्छिन्नोपादाने न प्रवृत्तः स्यादिति दण्डत्वादिना घटकारणत्वमावश्यकमिति भावः। सर्वमिदं मनसि निधायैवाऽन्यत्र **विस्तर** इत्युक्तमिति(१)।

यद्यप्येवमपि तत्तद्धर्मावच्छिन्नसमुदायधर्मिककारणताऽवच्छेदकशक्तिपर्याप्तिज्ञान तत्तद्धर्मावच्छिन्नोपादानगोचरप्रवृत्तिकारणमित्युक्तौ घटार्थिनो नियमतो दण्डत्वाद्यवच्छिन्नोपादाने प्रवृत्तिः सम्भवत्येव, तथाऽप्येतदस्वरसेनैव **परे त्वित्यादिना** शक्तिखण्डने युक्त्यन्तराभिधायिनो मतस्य अभिधास्यमानत्वान्नाऽसङ्गतिरिति ध्येयम्।

अनुयोगितासम्बन्धविवक्षणे इति। तद्गतभूयोधर्मवत्त्वं तत्सादृश्यमित्यत्र तद्गतधर्मवत्ताया अनुयोगितासम्बन्धेन विवक्षणे इत्यर्थः। **न देयमेवेति।** तद्गतधर्मरूपसम्बन्धे तदनुयोगिकत्वानभ्युपगमेनैव सादृश्यप्रतियोगिन्यतिव्याप्तिवारणसम्भवादिति भावः। ननु पदार्थमात्रस्यैव पदार्थमात्रेण सादृश्य स्यात्, तद्गतप्रमेयत्ववाच्यत्वादिधर्मवत्त्वसत्त्वादित्याशङ्का निराकुरुते। **तत्राऽसाधारण्येनेति।** सकलपदार्थावृत्तित्वेनेत्यर्थः। वैशिष्ट्यं तृतीयार्थः। घटभिन्नत्वेन सिद्धकाकयोरपि सादृश्यापत्तिवारणाय **भूयांस इति।** न च चन्द्रगतभूयोधर्मस्य चन्द्रसम्बन्धत्वे किं मानमिति वाच्यम्। नीलो घट इत्यादौ स्ववृत्तिनीलत्वसम्बन्धेन घटे नीलस्यैव मुखं चन्द्र इति रूपकस्थले स्ववृत्तिभूयोधर्मसम्बन्धेन मुखे चन्द्रस्य प्रकारतावादिमते तत्र तत्सम्बन्धत्वस्य क्लृप्तत्वादिति ध्येयम्। यद्यपि घटभेदपटभेदादयो भूया-

---

(१) **केचित्तु मण्यादिसमवहितेन वह्निना दाहानुत्पत्तिरदृष्टवैगुण्यात्। न चैवमपरेणाऽपि वन्हिना दाहो न स्यादिति वाच्यम्। तत्पुरुषीयभोगजनकतद्वन्हिजन्यदाहं प्रत्येव तत्पुरुषीयादृष्टस्य प्रतिबन्धकत्वकल्पनान्नाऽतिरिक्तशक्तिसिद्धिरित्याहुः। तन्न मनोरमम्। सम्भवति दृष्टेऽदृष्टकल्पनानवकाशात्। उत्तेजकाभावविशिष्टमण्यादेरेव प्रतिबन्धकत्वकल्पनात्। मण्याद्यपसारणेऽपि कार्यानुत्पादप्रसङ्गाच्च। अपरे त्वदृष्टविलम्बादेव न तत्र कार्योत्पत्तिः। अदृष्टस्य च कार्यसामान्यं प्रति कारणत्वस्याऽऽवश्यकत्वादिति वदन्ति। तदसत्। अदृष्टविलम्बो हि नाऽदृष्टनाशोऽदृष्टानुत्पत्तिर्वा, आद्ये, मण्यपसारणेऽपि दाहानुत्पत्तिप्रसङ्गात्। मण्यादेरपसारणेऽदृष्टमुत्पद्यत इति चेत्—न, तज्जनकस्यवाऽभावात्। मण्यपसारणस्य तज्जनकत्वकल्पने गौरवात्, तस्यैव दाहजनकत्वकल्पने लाघवात्। अन्यथा कदाचिन्मण्याद्यभावेऽपि दाहविलम्बः स्यादिति।**

दिनकरी।

नन्विदं—

"गगनं गगनाकारं सागरः सागरोपमः।
रामरावणयोर्युद्धं रामरावणयोरिव॥"

इत्यादावव्याप्तमिति चेन्न। तद्वृत्तिधर्ममात्रस्य तत्र विवक्षितत्वात्, युगभेदविवक्षया भेदसत्त्वाद्वा।

अत एव युगभेदविवक्षायामिहोपमालङ्कारोऽन्यथाऽनन्वयालङ्कार इत्युक्तमालङ्कारिकैः।

सादृश्यघटकधर्मश्च क्वचिज्जातिरूपो यथा—घटसदृशः पट इत्यादौ। क्वचिदुपाधिरूपो यथा—गोत्वं नित्यं तथाऽश्वत्वमपीत्यादौ। यथा वा चन्द्रसदृशं मुखमित्यादावाह्लादकत्वादि। अतिरिक्तत्वकल्पने गौरवादिति।

नव्यास्तु—सादृश्यमतिरिक्तमेव, न चाऽतिरिक्तत्वे पदार्थविभागव्याघात इति वा-

रामरुद्री।

सो धर्मास्तत्राऽपि सम्भवन्त्येव, गोत्वाश्वत्वयोर्नित्यत्वरूपैकधर्ममादाय सादृश्यं ग्रन्थकृतैवोक्तमिति भूयस्त्वोपादानमसङ्गतमेव, तथाऽपि प्रायेण भूयोधर्मैरेव सादृश्यप्रतीतेः तात्पर्यविषयत्वार्थकमेव प्रकृते भूयःपदमिति ध्येयम्। नरोऽयं सिंहसदृश इत्यादौ तु घटभिन्नत्वादिर्न तात्पर्यविषयः, किं तु पराक्रमः, तस्याऽपि तथात्वे त्विष्टापत्तेः, तस्मादसाधारण्येनैत्यपि न देयम। यथा घटो वाच्यस्तथा पटोऽपीति व्यवहाराच्च।

नन्विदमिति। तद्भिन्नत्वघटितसादृश्यमित्यर्थः। **विवक्षितत्वादि**त्यस्य श्लोके इवाद्यर्थत्वेनेति शेषः। **युगभेदविवक्षयेति**। युगभेदप्रयुक्त—तत्तद्युगविशिष्टगगनभेदविवक्षयेत्यर्थः। **भेदसत्त्वाद्वेति**। गगने गगनभेदसत्त्वाद्वेत्यर्थः।

उक्तार्थे आलङ्कारिकाणा सम्मतिमाह। **अत एवेति**। **युगभेदविवक्षाया**मित्यस्य पूर्वोक्त एवाऽर्थः। **इहेति**। गगनं गगनाकारमितिश्लोके इत्यर्थः। **उपमालङ्कार इति**। सादृश्यस्याऽबाधितत्वादिति भावः। **अन्यथा**—विशिष्टयोर्भेदानङ्गीकारे। **अनन्वयालङ्कार इति**। प्रतिपाद्यमानार्थस्याऽन्वयाभावादिति भावः।

ननु उक्तसादृश्यलक्षणे धर्मपदं यदि जातिपर, तदा गोत्वाश्वत्वयोः सादृश्यानुपपत्तिः, यदि च जातिभिन्नोपाधिपरं, तदा घटपटयोः कम्बुग्रीवादिमत्त्वादिरूपैकोपाधिविरहेण तयोः सादृश्यं न स्यादित्याशङ्कां निराकरोति। **सादृश्यघटकधर्म इति**। चन्द्रसदृशं मुखमित्यादौ लक्षणसत्त्वं सूचयितुमाह—**यथेति**। **आह्लादकत्वादीति**। **आह्लादः**—सुखविशेषः। यद्यपि चन्द्र-मुख-दर्शनजन्ययोः सुखयोर्भिन्नत्वेन चन्द्रमुखयोर्नैकमाह्लादकत्व, कारणतावच्छेदकभेदेन कारणताभेदस्याऽवश्यकत्वात्, तथाऽपि स्वाश्रयोपधायकत्वसम्बन्धेन एकवैजात्यविशिष्टत्वमेव प्रकृते साधारणो धर्मः, मुख-चन्द्र-दर्शनजन्यं च एकजातीयमेव सुखमिति भावः। **आदिना** वतुलत्व-तेजस्वित्वादिपरिग्रहः। सादृश्यमिति शेषः। **अत एवाऽतिरिक्तपदेनोत्तरत्र** तस्योपस्थितिः। सप्तपदार्थातिरिक्तेति तदर्थः।

सप्तपदार्थातिरिक्तविषयतादिपदार्थमङ्गीकुर्वता नव्यानां मतमुपदर्शयति। **नव्यास्त्विति**। **अतिरिक्तमेवेति**। अन्यथा सदृश इत्याकारकप्रतीतेः सर्वत्र समानाकारतानुभवापलापापत्तेरिति शेषः। प्रतीतेः समानत्वं—एकप्रकारकत्वम्। तथा च चन्द्रसदृशं मुखमित्यादौ आह्लादकत्वादेः प्रकारता, घटसदृशः पट इत्यादौ तु द्रव्यत्वपृथिवीत्वादेरिति तादृशप्रतीत्योः सादृश्यांशे अनुभवसिद्धायाः समानाकारताया अपलाप उक्तधर्मस्य सादृश्यतावादिमते दुरुद्धरः। सादृश्यमतिरिक्तः पदार्थ इति मते तु न तदनुपपत्तिरिति। यद्यपि मुखे चन्द्रे च नैकं सादृश्यं, अन्यथा पटे चन्द्रसादृश्यप्रतीत्यापत्तिरिति सादृश्यांशे तादृशप्रतीत्योर्न समानाकारतोपपत्तिः, तथाऽपि उभयसादृश्यसाधारणस्य सादृश्यत्वरूपाखण्डोपाधेरनुगततया घटो रूपवान् पटो रूपवानिति प्रतीत्यो रूपांश इव सादृश्यांशे समानाकारतोपपत्तिरिति ध्येयम्। **विभाग-**

यथा चन्द्रभिन्नत्वे सति चन्द्रगताह्लादकत्वादिमत्त्वं मुखे चन्द्रसादृश्यमिति ॥ २ ॥

॥ इति पदार्थोद्देशग्रन्थः ॥

दिनकरी।

च्यम्। तस्य साक्षात् परम्परया वा तत्त्वज्ञानोपयोगिपदार्थमात्रनिरूपणपरत्वात्। एवमधिकरणत्वमपि, तस्य संयोगादिरूपत्वे बदरकुण्डसंयोगस्य द्विष्ठत्वेन कुण्डे बदरमितिवद्बदरे कुण्डमित्यपि प्रयोगः स्यात्, एवं प्रतियोगित्वमपीत्याहुः।

सादृश्यलक्षणं लक्ष्ये योजयति—**यथेति**। इतिशब्दः श्लोकव्याख्यासमाप्तिद्योतकः।

॥ इति पदार्थोद्देशग्रन्थः ॥

रामरुद्री।

व्याघात इति। पदार्थानां सप्ताधिकत्वादिति भावः। **तत्त्वज्ञानोपयोगीति**। आत्मधर्मिकात्मेतरद्रव्यादिभेदप्रकारकज्ञानं तत्त्वज्ञान, तज्जनकज्ञानविषयत्वं तदुपयोगित्वं, तादृशज्ञाने च पक्षविधया आत्मज्ञानस्य प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानविधया द्रव्यादिपदार्थज्ञानस्य जनकत्वात् आत्मादीनां तत्त्वज्ञानोपयोगिता। तत्र च तादृशानुमितिजनकपरामर्शात्मकज्ञानस्य पक्षरूपात्मविषयकत्वात् साक्षादात्मन उपयोगित्वम्। परामर्शजनकप्रतियोगिज्ञानविषयद्रव्यादिपदार्थाना तु परम्परयोपयोगित्वमिति विशेषो बोध्यः। यद्यपि द्रव्यादिभेदव्याप्यहेतुमानिति परामर्शस्य द्रव्यादिविषयकतया द्रव्यादीनामपि साक्षादुपयोगित्वसम्भवः, तथाऽपि भेदाना तत्तद्व्यक्तित्वेनाऽपि परामर्शे भानसम्भवेन तत्तद्भेदव्याप्यहेतुमानात्मेति परामर्शस्य द्रव्याद्यविषयकत्वात् परम्परोपादानम्। अत्र मात्रपदेन सप्तपदार्थातिरिक्तसादृश्यादिपदार्थव्यवच्छेदः। तथा च सादृश्यादीनामात्मभिन्नपदार्थानां सत्त्वेऽपि आत्मनि तद्भेदो नाऽनुमितिविषय इति तद्भेदज्ञानं न तत्त्वज्ञानं, अतस्तद्भेदज्ञानजनकज्ञानविषयस्याऽपि सादृश्यादेर्न तत्त्वज्ञानोपयोगितेति भावः। एवं च तत्त्वज्ञानोपयोगिपदार्थानामेव महर्षिणा विभजनान्न विभागव्याघात इति भावः। अधिकरणत्वादीना अतिरिक्तता साधयति—**एवमिति**। **कुण्डे बदरमिति**। इत्थं च आधारत्वं सप्तम्यर्थः, तत्र प्रकृत्यर्थस्याऽऽधेयतासम्बन्धेनाऽन्वयः, आधारत्वस्य च निरूपकतासम्बन्धेन सप्तमीसमभिव्याहृतबदरादिपदार्थेऽन्वयः, तथा च कुण्डवृत्त्याधारतानिरूपकं बदरमिति बोधः। इदं प्राचीनमताभिप्रायेण। आधेयत्वं सप्तम्यर्थ इति नवीनमते तु कुण्ड बदरवदितिवत् बदरं कुण्डवदित्यापत्तिर्दुष्टव्या। **एवं प्रतियोगित्वमपीति। एवं**-अतिरिक्तपदार्थ इत्यर्थः। प्रतियोगितायाः प्रतियोगिस्वरूपत्वे भूतलादेरपि घटादिप्रतियोगित्वापत्तिः, घटः प्रतियोगितावानित्याधारतापतीत्यनुपपत्तिश्च, प्रतियोगितावच्छेदकस्वरूपत्वे अभेदेनाऽवच्छेद्यावच्छेदकभावविरहेण घटत्वादेः प्रतियोगितावच्छेदकत्वानुपपत्तिश्च अतिरिक्तत्वसाधिकेति भावः(१)। **अपिना** विषयत्वादिसमुच्चयः॥ २ ॥

इति पदार्थोद्देशग्रन्थः।

---

(१) इदमुपलक्षणम्। संयोगसम्बन्धावच्छिन्नाया एव प्रतियोगितायाः समवायावच्छिन्नतयाऽतिप्रसङ्गापत्तिः। घटत्वस्यैक्येन तत्स्वरूपायाः प्रतियोगितायाः ऐक्यात्। वस्तुतस्त्वभावाभाव-वरूपायाः प्रतियोगितायाः अतिरिक्तत्वे मानाभावः। न चाऽभावत्वप्रतीतेः प्रमात्वरक्षार्थमतिरिक्त एव घटाभावाभावः स्वीकरणीयः, तत्त्वस्य च घटे विरहेण न तस्य प्रतियोगित्वरूपतेति वाच्यम्। विशेषणताविशेषसम्बन्धावच्छिन्नवृत्तितावत्वरूपस्याऽभावत्वस्य घटेऽपि स्वीकारात्। न चैवं स्वरूपेण घटवद् भूतलमि-यादिप्रतीत्यापत्तिरिति वाच्यम्। घटाभावाभावत्वावच्छिन्नवृत्तिताया एव स्वरूपसम्बन्धावच्छिन्नत्वोपगमेन घटत्वावच्छिन्नवृत्तिताया अतथात्वेऽपि क्षत्यभावात्। अन्यथा वक्ष्यमाणरीत्या तमसोऽपि तेजोऽभावरूपतानुपपत्तिः, तत्राऽपि स्वरूपेण तमोवान् घट इति प्रतीत्यनुपादस्य तुल्यत्वादित्यादिकमूह्यम्।

क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः ।
द्रव्याणि,

द्रव्याणि विभजते—क्षित्यबिति । क्षितिः-**पृथिवी,** आपः-**जलानि,** तेजः—**वह्निः,** मरुत्-**वायुः,** व्योम-**आकाशः,** कालः-**समयः,** दिक्-**आशा,** देही-**आत्मा, मनः, एतानि नव द्रव्याणीत्यर्थः ।**

दिनकरी ।

'स्त्रियां क्तिन्'इतिसूत्रविहित—'क्तिन्' प्रत्ययान्तक्षितिशब्दस्य क्षयवाचकत्वात् क्षितिपदस्य प्रकृतोपयोगिनमर्थमाह—**क्षितिः-पृथिवीति ।** अप्शब्दस्य "अप्तृन्तृच्-"इत्यादिपाणिनीयसूत्रे शब्दपरत्वादाह—**आपः-जलानीति ।** प्रतापस्याऽपि तेजःशब्दवाच्यत्वात् प्रकृते तेज.पदार्थं दर्शयति—**तेजः-वन्हिरिति ।** वन्ह्यादिरित्यर्थः । देवविशेषस्याऽपि मरुच्छब्दवाच्यत्वात् प्रकृतोपयोगिनमर्थमाह— **मरुत्-वायुरिति ।** व्योमशब्दस्य वेदे ब्रह्मणि प्रयोगादाह-**व्योम-आकाश इति ।** कालशब्दस्याऽन्तकादिबोधकत्वादाह-**कालः-समय इति ।** दिक्शब्दस्य 'दिश अतिसर्जने' इतिधातुना निष्पन्नस्य दानार्थकत्वात् प्रकृतोपयोगिनमर्थमाह—**दिक्-आशेति ।** देहविशिष्टार्थवाचकात् देहिशब्दात् देहावयवानामुपस्थितेराह—**देही-आत्मेति ।** अथेश्वरस्यं देहिनां मध्येऽनन्तर्भावात् कथं द्रव्यत्वमिति चेन्न । ब्रह्मा भूतावेशन्यायेनेश्वरस्य शरीरमिच्छन्ति । संसार्यदृष्टवशाच्छरीरमित्यन्ये । अत एव वाऽस्वरसादाह—**आत्मेति ।** पृथिव्यप्तेजोवाय्वात्मान इति पञ्चैव द्रव्याणि, व्योमादेरीश्वरात्मन्येवाऽन्तर्भूतत्वात् , मनसश्चाऽसमवेतभूतेऽन्तर्भावादित्याहुर्नवीना., तन्मतं निराकर्तुं सङ्ख्याबोधकपदपूरणेनाऽर्थमाह-**एतानि नव द्रव्याणीति(१) ।** व्योम्नस्तावच्छब्दाश्रयतया सिद्धिः, न च भगवत एव

रामरुद्री

ननु "क्षितिः—पृथिवी"इत्यादि व्याख्यानं ग्रन्थकृतामसङ्गत, क्षित्यादिशब्दानां प्रसिद्धार्थकत्वात्, अप्रतिपत्तेरन्यथाप्रतिपत्तेर्वा निरासायैव हि विवरणं कुर्वन्ति सन्तः, न चाऽत्र तयोरेकाऽपि सम्भवतीत्यतोऽन्यथाप्रतिपत्तिमुपपादयन् तत्सार्थक्यमाह—**स्त्रियामित्यादिना । आत्मेतीति** । स्वावच्छिन्नभोगवत्त्वसम्बन्धेन देहविशिष्ट एव देहिशब्दार्थः, न तु समवायेन तद्विशिष्ट इति न देहावयवोपस्थितिरिति भावः । **अनन्तर्भावादिति** । ईश्वरवृत्तिधर्मान्तरानुपदेशात् तस्य द्रव्यत्वाभावनिश्चयादिति भावः । **भूतावेशन्यायेनेति** । यथा भूताभिभवस्थले मनुष्यादिशरीरावच्छेदेन भूतस्य न सुखदुःखसाक्षात्काररूपभोगाश्रयता, किं तु तदीयशरीरावच्छेदेनैव, एवमपि भूतप्रयत्नजन्यव्यापारवन्मनुष्यादिशरीरम् , तथाऽत्राऽपि रामादिशरीरं नेश्वरस्य भोगावच्छेदकं, अपि तु तदन्तर्गतजीवस्यैव, एवमपि ईश्वरप्रयत्नजन्यरावणवधादिरूपविलक्षणव्यापारवदिति समुदायार्थः । यद्यपि एवमपि उक्तसम्बन्धेनेश्वरस्य देहविशिष्टत्वाभावात् देहशब्दात् नेश्वरलाभः सम्भवति, तथाऽपि स्ववृत्तिचेष्टानुकूलकृतिमत्त्वसम्बन्धेन देहविशिष्ट एव प्रकृते देहिशब्दार्थ इति नाऽनुपपत्तिरिति भावः । नन्वेव ईश्वरस्य श्रुतावपाणिपादत्वाधुक्तिर्विरुद्धयेतेत्यतः कल्पान्तरमाह-**अत एवेति** । अयं भावः, देहिशब्दस्य उक्तसम्बन्धेन देहविशिष्टार्थकत्वे ईश्वरस्य

---

(१) **ननु पञ्चद्रव्यवादिमतेऽपि नवत्वविशिष्टद्रव्याणां प्रसिद्धत्वेन 'नवद्रव्याणि' इत्युक्तावपि न तन्निरास इति चेन्न । पृथिवीत्वाद्यवच्छिन्नप्रतियोगिताकभेदनवकवदवृत्ति द्रव्यत्वमित्यस्यैव तदर्थत्वात् ।**

ननु द्रव्यत्वजातौ(१) किं मानं ? न हि तत्र प्रत्यक्षं प्रमाणं, घृतजतुप्रभृतिषु

दिनकरी ।

शब्दाश्रयत्वं, प्रत्येकं जीवमादाय विनिगमनाविरहात्, न च जीवानामाश्रयत्वे शब्दवानहमिति प्रत्यक्षापत्तिः, अदृष्टवदयोग्यत्वस्यैव कल्पनात्, कालदिशोस्तु एतस्मिन् काले घटः, पूर्वस्यां दिशि पटः इत्याद्यनुगताकारप्रत्ययात्, मनसश्चाऽसमवेतभूतत्वे पार्थिवादित्रसरेणूनादाय विनिगमनाविरह इत्याशयः । अधिकमग्रे व्यक्तीभविष्यति ।

मूले—**द्रव्याणीति ।** द्रव्यपदं द्रव्यत्वरूपजातिविशिष्टार्थकं, न तु गुणाश्रयत्वविशिष्टार्थकं, गौरवात् ।

मुक्तावल्यां-किं मानमिति । किंशब्दः प्रश्ने । ननु द्रव्यं द्रव्यमित्यनुगतप्रतीतिरेव जातिसाधिका भविष्यतीत्यत आह—**न हीति । तत्र**— द्रव्यत्वजातौ । **घृतेति ।** तथा च घृतादिषु पामराणां द्रव्यत्वज्ञानाभावेन सकलद्रव्यसाधारणद्रव्यत्वजातिसिद्धिर्न भविष्यतीति भावः ।

रामरुद्री ।

शरीरानङ्गीकारे ईश्वरस्य द्रव्यमध्ये अविभजनात् द्रव्यत्वं न स्यादित्यस्वरसात् देहिशब्दार्थो न देहविशिष्टः, अपि तु आत्मत्वजात्यवच्छिन्न इतीश्वरस्य द्रव्यत्वसिद्धिरिति विवरणतात्पर्यम् । नचेश्वरस्याऽशरीरत्वे ब्रह्म-विष्णुमहेश्वर-शरीराणामपि ईश्वरीयत्व न स्यात्, जीवादृष्टवशेन सृष्ट्यादिकार्यार्थमीश्वरस्य ब्रह्मादिशरीरोत्पत्त्यङ्गीकारेण इष्टापत्तेरयोगादिति वाच्यम् । इष्टत्वात् । ब्रह्मादिशरीराणां ईश्वरीयत्वं हि तदीयभोगावच्छेदकत्वं, तददृष्टजन्यत्व, तत्कृतिजन्यचेष्टावत्त्व वा ? नाऽऽद्यद्वितीयौ, तस्य भोगादृष्टयोरभावात् नाऽपि तृतीयः, समवायेन चेष्टा प्रति अवच्छेदकतासम्बन्धेनैव कृतेः कारणतया व्याप्यवृत्तित्वे नेश्वरकृतेरवच्छेदकतया क्वाऽप्यसत्त्वात्, कार्यत्वावच्छिन्नकारणताया एव तत्राऽङ्गीकारात्, ब्रह्मादीना जीवन्मुक्तयोगित्वस्याऽभ्युपेयत्वादिति ध्येयम् । **अयोग्यत्वस्यैवेति ।** मानसप्रत्यक्षायोग्यत्वस्यैवेत्यर्थः । तेन शब्दस्य श्रावणत्वेऽपि न क्षतिरिति भावः । **त्रसरेणूनिति ।** नवीनमते अवयवधारायास्त्र्यणुकेष्वेव विश्रान्तिः, तेषामेवाऽसमवेतत्वादिति भाव. । **विनिगमनाविरह इति ।** तथा चानेकद्रव्यव्यक्तिषु मनस्त्वस्वीकारापेक्षया एकैकातिरिक्तव्यक्तिषु तत्तन्मनस्त्व स्वीकर्तुमुचितमिति भावः ।

ननु 'द्रव्याणि' इति मूलवाक्यरयाऽतिरिक्तद्रव्यत्वजात्यभावेऽपि नाऽनुपपत्तिः, गुणवदाद्यर्थकत्वेनाऽपि तद्विवरणसम्भवात्, अतो मुक्तावल्यां द्रव्यत्वसाधनायासो विफल इत्याशङ्कामपनेतु मूले द्रव्यपदस्य द्रव्यत्वविशिष्टार्थकतां व्यवस्थापयति—**द्रव्यपदमिति ।**

प्रश्ने इति । जिज्ञासाबोधकशब्दः प्रश्नः । घटकत्वं सप्तम्यर्थः । तथा च मूलस्थकिंशब्दो जिज्ञासार्थक इति पर्यवसितोऽर्थः । उत्तरवाक्येन प्रमाणसामान्यस्याऽनिरासेन किंशब्दस्य आक्षेपार्थकत्वासम्भवादिति भावः । **घृतादिष्विति ।** न च घटादावित्येव कुतो नोक्तमिति वाच्यम् । अनुगतप्रतीत्यभावे बीजाभावसूचनाय घृताद्युपादानात् । तथा हि—अनुगताकृतिव्यङ्गया हि मनुष्यत्वादिजातिः, न हि नवद्रव्येष्वनुगताऽऽकृतिः काचित् सम्भवति, घृतादिष्वेकैकपदार्थेष्वपि सर्वदा नैकाऽऽकृतिः, कठिनत्वद्रवत्वयोरनियतत्वादिति भावः । **पामराणामिति ।** पण्डितानां शास्त्रकारीयवाक्यजन्यद्रव्यत्वभानस-

---

(१) **'द्रव्यं गुणः'—इत्यादिकारिकायां 'पदार्थाः सप्त कीर्तिताः' इति कथनमयुक्तम् । पदार्थानामानन्त्यात्, अतो द्रव्यत्वादिविभाजकधर्मानादायव सप्तत्वं वक्तव्यम् । तत्र द्रव्यत्वरूपो विभाजकधर्मः किंजातिस्वरूपः ? उतोपाधिस्वरूपः ? नाऽऽद्यः, तस्य तस्य जातित्वासिद्धेः । द्वितीयेऽपि कोऽयमुपाधिः ? गुणवत्त्वमिति चेत्—न । उत्पत्तिक्षणावच्छेदेन घटादौ गुणासत्त्वात् द्रव्यत्वाभावप्रतीत्यापत्तेः । नाऽपि गुणात्यन्ताभावानधिकरणत्वम्, ध्वंसप्राग-**

द्रव्यत्वाग्रहादिति चेत्-न। कार्यसमवायिकारणतावच्छेदकतया, संयोगस्य,

दिनकरी।

कार्येति। कार्यत्वं प्रागभावप्रतियोगित्वम्। न च ध्वंससाधारण्यम्, सत्त्वेन विशेषणीयत्वात्। अत्र च कार्यस्य समवायः प्रत्यासत्तिः, कारणस्य तादात्म्यम्। यत्र समवायेन कार्यं, तत्र तादात्म्येन द्रव्यमिति नियमात्।

ननु जन्यसत्त्वरूपकार्यत्वावच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेन कारणत्वे मानाभावः। न च नीले नीलोत्पत्तिवारणाय तथा हेतुत्वमावश्यकमिति वाच्यम्। समवायेन नीलं प्रति स्वाश्रयसमवेतद्रव्यत्वसम्बन्धेन नीलस्य हेतुतयैव तद्वारणात्, कार्यत्वस्य कार्यतावच्छेदकत्वे गौरवात्, कालिकसम्बन्धेन घटत्वादिकमादाय विनिगमनाविरहाच्चेत्यत आह-**संयोगस्येति।** अत्र च रूपादिगुणानां सकलद्रव्यसाधारण्याभावेन द्रव्यकार्यतया परित्यागः, **सकलद्रव्यवृत्तिसङ्ख्यादित्रयस्य** च गगनादिवृत्तेर्नित्यत्वात्। न च संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन समवायिकारणत्वे मानाभावः, तत्तद्व्यक्तिसमवेतसत्सामान्यं प्रति तत्तद्व्यक्तित्वेन समवायिकारणत्वस्याऽऽवश्यकतया गुणादौ तदुत्पादासम्भवादिति वाच्यम्।

रामरुद्री

म्भवेऽपि पामराणां शास्त्रजन्यज्ञानाभावेन पामराणामित्युक्तम्। द्रव्यत्वस्य प्रत्यक्षवेद्यत्वे घटादिवत् तस्याऽपि पामराणां प्रत्यक्षं स्यात्, तदभावेन द्रव्यत्वे प्रत्यक्षं न प्रमाणमिति भावः।

ननु किमिदं द्रव्यत्वावच्छिन्नस्य कार्यतावच्छेदकं कार्यत्वं ? न जातिरूपं, ध्वंससाधारण्यात्, नाऽप्युपाधिरूपं, अनुगतानतिप्रसक्तस्य तस्य दुर्वचत्वादित्याशङ्कायां तन्निर्वक्ति। **कार्यत्वमिति। न चेति।** द्रव्यकार्यत्वाभाववति ध्वंसेऽपि प्रागभावप्रतियोगित्वस्य सत्त्वेनाऽतिप्रसक्ततया द्रव्यकार्यतावच्छेदकत्वानुपपत्तिरिति भावः।

नन्विति। जन्यत्वस्य कार्यतावच्छेदकत्वेऽनन्तस्वरूपाणां कार्यतावच्छेदकताघटकसंसर्गता स्वीकरणीया, सत्त्वस्य तथात्वे तु एकस्य समवायस्यैव तथाविधसंसर्गता कल्पनीयेति लाघवमभिप्रेत्याऽऽह—**जन्यसत्त्वरूपेति। स्वाश्रयसमवेतद्रव्यत्वेति।** स्वाश्रयसमवेतत्वसम्बन्धेन स्वस्मिन्नपि नीलस्य सत्त्वेन तत्र नीलोत्पत्तिवारणाय सम्बन्धकोटौ द्रव्यत्वप्रवेशः। नन्वेवमुक्तकार्यकारणभावविरहेऽप्युक्तकारणतावच्छेदकसंसर्गघटकतयैव द्रव्यत्वजातिसिद्धिर्निष्प्रत्यूहैवेति सिद्धं नः समीहितमित्यत आह—**कार्यत्वस्येति।** ननु तर्हि लाघवात् कालिकसम्बन्धेन घटत्वमेव कार्यतावच्छेदकमस्त्वत आह—**कालिकसम्बन्धेनेति। द्रव्यकार्यतया परित्यागः**—द्रव्यकार्यत्वेनाऽनुक्तिः। इदञ्च **'संख्यादित्रयस्य च'** इत्यत्राऽप्यनुषज्यते। **सत्सामान्यमिति।** सत्त्व समयसम्बन्धः, समयश्चाऽत्र स्वाधिकरणसमयध्वसानधिकरणीभूतो ग्राह्यः, तेन तादृशसमयसम्बन्धस्योत्पत्तिरूपत्वेन उत्पत्तिमत्त्वलाभात् नित्यगुणादिव्यावृत्तिः। यद्यप्यभावः सन्निति प्रतीत्या समयसम्बन्धमात्रमेव सत्पदार्थः, तथाऽपि सामान्यशब्दस्याऽत्र विशेषपरताऽभ्युपगमादुक्तार्थलाभः। सत्पदस्य सत्तावदर्थकत्वे नित्यगुणव्यावर्त्तनाय जन्यत्वप्रवेशस्याऽऽवश्यकतया तत एव जातिवारणे तद्वारकसत्पदवैयर्थ्यापत्तेः। प्रागभावस्य सर्वमतासिद्धतया प्रागभावप्रतियोगित्वं नोपात्तमिति ध्येयम्। **आवश्यकतयेति।** अन्यथा एकत्र समवेतस्याऽपरत्र समवायेनोत्पादप्रसङ्गादिति भावः। वस्तुतस्तु उक्तकार्यकारणभावस्य प्रतिव्यक्ति भिन्नतया घटादौ नित्यगुणाभावेन तदभिप्रायेण जातिमात्रव्यावर्त्तनाय लाघवेन सत्पदं यथाश्रुतमेवेति सम्यक् प्रतिभाति, गगनादिस्थल एवाऽगत्या जन्यत्व प्रवेश्य कार्यकारणभाव इति भावः। न च यत्र सुरभ्यसुरभिकपालिकारब्धं कपाल-

---

भावयारत्यन्ताभावेन सह विरोधे मानाभावादित्याशङ्कां हृदि निधाय द्रव्यत्वस्य जातिरूपतामेव व्यवस्थापयितुं शङ्कते—नन्वित्यादिना।

विभागस्य वा समवायिकारणतावच्छेदकतया द्रव्यत्वजातिसिद्धेरिति(१)। ननु (२) दशमं द्रव्यं तमः कुतो नोक्तं ? तद्धि प्रत्यक्षेण गृह्यते, तस्य च

दिनकरी

कार्यमात्रवृत्तिजातेः कार्यतावच्छेदकत्वनियमेन तादृशकारणत्वस्याऽऽवश्यकत्वात्।

नित्यसंयोगाऽङ्गीकर्तुर्मतसाधारण्येनाऽऽह—**विभागस्येति। द्रव्यत्वसिद्धेः**—जातिरूपद्रव्यत्वसिद्धेः। क्व चित् तथैव पाठः।

अत्र यद्यपि गुणत्वेनाऽन्यथासिद्धिः सम्भवति, तथाऽपि साक्षात्सम्बद्धधर्मबाधे सत्येवाऽनुमितेः परम्परासम्बद्धधर्मविषयत्वमिति भावः।

इदमुपलक्षणम्। द्रव्ये द्रव्यान्तरानुत्पत्त्या समवायेन द्रव्यस्य प्रतिबन्धकत्वं कल्पनीयमिति प्रतिबन्धकतावच्छेदकतया द्रव्यत्वसिद्धिः, प्रतिबद्धयतावच्छेदकं तु पृथिव्यादिचतुष्टयमात्रवृत्तिभूतत्वमेव, नित्यव्यावृत्तत्वात्, भूतत्वस्य प्रतिबन्धकतावच्छेदकत्वे तु मूर्तत्वस्य तथात्वमादाय विनिगमनाविरहापत्तेः, द्रव्यत्वस्य प्रतिबन्धकतावच्छेदकत्वं तु धर्मिग्राहकमानसिद्धम्। न च तस्य गगनादिवृत्तित्वे मानाभाव इति वाच्यम्। भूतत्वेन तुल्यव्यक्तिवृत्तिकत्वापत्त्या विनिगमनाविरहेण गगनादिपञ्चवृत्तित्वाभ्युपगमात्। न च भूतत्वेन तुल्यव्यक्तिवृत्तित्ववारणाय मनोवृत्तित्वमेव द्रव्यत्वे कल्प्यतां, गगनादिवृत्तित्वकल्पने गौरवात्, गगनादिवृत्तित्वकल्पनेऽपि मूर्तत्वेन साङ्कर्य्यवारणाय मनोवृत्तित्वस्याऽऽवश्यकत्वादि-

रामरुद्री

दयं(३), **कार्यमात्रवृत्तिजातेरिति**। अन्यथा तदवच्छिन्नस्याऽऽकस्मिकत्वापत्तेरिति भावः।

गुणत्वेनाऽन्यथासिद्धिरिति। स्वाश्रयाश्रयत्वरूपपरम्परासम्बन्धेन गुणत्वस्याऽपि द्रव्यनिष्ठकारणतावच्छेदकत्वसम्भवादिति भावः।

नित्यव्यावृत्तत्वादिति। यद्यपि भूतत्व पृथिव्यादिपरमाणुवृत्तित्वेन न नित्यव्यावृत्तम्। न चेदं प्रतिबद्धयतावच्छेदक भूतत्वं परमाणुव्यावृत्तमेव स्वीकार्यमिति वाच्यम्। तथा सति पृथिवीत्वादिना साङ्कर्यापत्त्या तस्य जातित्वानुपपत्तेः। तथाऽपि साङ्कर्यस्य दोषत्वानुपगमेनैतदभिहितम्। ननु द्रव्यत्वस्याऽपि प्रतिबन्धकतावच्छेदकत्वे भूतत्वमूर्तत्वाभ्यां विनिगमनाविरहतादवस्थ्यमत आह—**द्रव्यत्वस्येति। धर्मिग्राहकमानेति**। द्रव्यत्वसाधकानुमानेत्यर्थः। तथा च तस्य प्रतिबन्धकतानवच्छेदकत्वे द्रव्यत्वमेव न सिद्ध्येदिति क्लृप्तयोरेव परस्परं विनिगमनाविरहः, न तु क्लृप्तस्याऽक्लृप्तेनेति भावः। **साङ्कर्यवारणायेति**। यद्यपि स्वमते साङ्कर्यं न दोषः, तथाऽपि 'तुष्यतु दुर्जनः' इति न्यायेन तस्य दोष-

---

(१) **इत्थं चाऽऽकाशसमवेतासमवेतत्वे सत्याकाशसमवेतजातिर्द्रव्यत्वम्। सत्तावारणाय सत्यन्तम्। अभावादिवारणाय विशेष्यदलम् पृथिवीत्वादिवारणायाऽऽकाशेति। परमाण्वाकाशसंयोगवारणाय जातिपदमिति ध्येयम्। गुणवत्त्वव्यापकसत्ताभिन्नजातिर्वा द्रव्यत्वम्। पृथिवीत्वादिवारणाय व्यापकत्वनिवेश इति।**

(२) **नवबाह्यस्य सतो द्रव्यत्वं भवतेष्टं ? उत सतो द्रव्यस्य नवबाह्यत्वं ? तत्र प्रथमस्य द्रव्यत्वमेव निराकरिष्यते, यथा-तमसः। द्वितीयस्य तु क्लप्तेष्वेवाऽन्तर्भावः करिष्यते, यथा-सुवर्णस्येत्याशयेन प्रथमतस्तमसो द्रव्यत्वमाशङ्कते—नन्वित्यादिना। द्वितीये च 'सुवर्णस्य यथा तेजस्यन्तर्भावः'—इत्यादिना तस्याऽपि क्लृप्तद्रव्येऽन्तर्भावः करिष्यत इति।**

(३) **नच यत्र सुरभीत्यारभ्य-द्वयमित्यन्ता पङ्क्तिः प्रामादिका।**

रूपवत्त्वात् कर्मवत्त्वाच्च द्रव्यत्वं, तद्धि गन्धशून्यत्वात् न पृथिवी, नीलरूप-
दिनकरी ।

ति वाच्यम् । तथा सति मूर्तत्वजात्या द्रव्यत्वस्य तुल्यवृत्तित्वापत्तेरिति ।

ननु दशमद्रव्यस्य तमसः सत्त्वात् "नव द्रव्याणि"इत्ययुक्तमित्यभिप्रायेण मीमांसकः शङ्कते—**नन्विति** । ननु तमसि मानाभावेन नोक्तमित्याशङ्क्य तमःसाधकप्रत्यक्षप्रमाण-माह—**तद्धीति** । तमो हीत्यर्थः । **प्रत्यक्षेण**–चक्षुरिन्द्रियेण । ननु तमसः सिद्धावपि तस्य द्रव्यत्वे कि मानमित्याशङ्क्याऽनुमानप्रमाणमाह—**तस्येति** । तमस इत्यर्थः । **'च'कारो 'द्रव्यत्वं'** इत्यनेनाऽन्वेति । तथा च तमो द्रव्यं, रूपवत्त्वादित्यनुमानं तमसो द्रव्यत्वे प्रमाणं सूचितम् । इदमुपलक्षणम्। परत्वाद्याश्रयत्वादित्यपि बोध्यम् । इदं तमः परमिदमपरमिति प्रतीतेः ।

ननु तमसि रूपे मानाभावः । न च नीलं तम इति प्रतीत्या तत्सिद्धिरिति वाच्यम् । प्रतीतेर्भ्रान्तित्वादतो हेत्वन्तरमाह—**कर्मवत्त्वादिति** । कर्मवत्त्वं च समवायसम्बन्धेन विवक्षितं, तेन जन्यमात्रस्य कालिकसम्बन्धेन कर्मवत्त्वेऽपि न व्यभिचारः । न च स्व-रूपासिद्धिः, चलति च्छायेति प्रतीत्या कर्मवत्त्वसिद्धेः ।

तमसः क्लृप्तद्रव्येष्वन्तर्भावं निराकुरुते–**तद्धीत्यादिना । गन्धेति** । गन्धाभावस्य हेतुत्वोक्तौ पटगतगन्धप्रतियोगिकाभावमादाय घटे व्यभिचारोऽतः शून्यत्वमुक्तम् । हेतु-श्च प्रतियोगिव्यधिकरणः समवायसम्बन्धावच्छिन्नप्रतियोगिताकोऽपि बोध्यः । तेन नोत्पत्ति-कालीने संयोगसम्बन्धावच्छिन्नगन्धाभाववति च घटे व्यभिचारः ।

नीलरूपेति । अनुगतेनैकेनैव नीलरूपेण हेतुना जलाद्यष्टकभेदसिद्धेः स्नेहाभावादी-
रामरुद्री ।

त्वमभ्युपेत्याऽपि दोषान्तरमाह—**तथा सतीति ।**

चलति च्छायेति प्रतीत्येति । यद्यपि नीलं तम इति प्रतीतेरिव एतस्या अपि प्रतीतेर्भ्रमत्वकल्प-नसम्भवात् पूर्वोक्तावतारणासङ्गतिः, तथाऽपि वन्ह्यादितेजस्यौपाधिकरक्तादिरूपभ्रमस्य सर्वसिद्धतया रूप-वत्ताप्रतीतौ भ्रमत्वकल्पनसम्भवः, क्रियावत्ताप्रतीतौ तु न तथा सम्भवः, क्वाऽपि क्रियावत्ताप्रतीतौ तथात्वादर्शनादिति भावः । यद्यपि वेगवतः पुंसः स्थिरे वृक्षादौ भ्रमरूपा क्रियावत्ताप्रतीतिरनुभूयते, तथाऽपि तत्र भ्रान्तपुरुषनिष्ठदोषस्यैव क्रियावत्ताभ्रमजनकत्वेन क्लृप्ततया भ्रमविशेष्यसमीपवृत्त्युदा-सीनपदार्थनिष्ठक्रियारूपदोषस्य क्रियाभ्रमजनकत्वेन कुत्राऽप्यकल्पनात् नाऽत्र प्रतीतेर्भ्रमत्वकल्पनसम्भव इति भावः ।

ननु गन्धाभावादित्यनुक्त्वा **'गन्धशून्यत्वान्न पृथिवी'**इति किमर्थमुक्तमित्याशङ्क्य गन्धाभावा-दित्युक्ते गन्धप्रतियोगिकाभावहेतुता लभ्यते, तथा च तत्तद्गन्धाभावस्याऽपि तथात्वेन तस्य च पृथिवीत्वा-भावव्यभिचारित्वात् गन्धसामान्याभावस्य हेतुतालाभाय गन्धशून्यत्वादित्युक्तमित्यभिप्रायेणाऽऽह—**गन्धाभावस्येति । संयोगसम्बन्धावच्छिन्नगन्धाभाववति चेति** । न च संयोगेन गन्धाभावे प्रतियोगिव्यधिकरणत्वस्यैव दुर्घटतया तादृशाभावमादाय व्यभिचारप्रदर्शनमसङ्गतं, संयोगेन प्रतियोग्य-धिकरणाप्रसिद्धेरिति वाच्यम् । यादृशसम्बन्धसामान्ये यदभावप्रतियोगिकत्व–यदभावाधिकरणीभूतय-त्किञ्चिद्व्यक्त्यनुयोगिकत्वोभयाभावः, तदधिकरणे तदभावस्य तादृशसम्बन्धेन प्रतियोगिव्यधिकरणत्व-मित्युक्तौ तादृशाभावस्याऽपि प्रतियोगिव्यधिकरणत्वसम्भवादिति भावः । वस्तुतस्तु सुरभ्यसुरभ्यवयवा-रब्धघटे व्यभिचारो दुर्वारः, तत्र परस्परविरोधेन कस्याऽपि गन्धस्याऽनुत्पत्त्या प्रतियोगिव्यधिकरणसम-वायसम्बन्धावच्छिन्नगन्धसामान्याभावसत्त्वादिति, प्रतियोगिव्यधिकरणत्वं स्वसमवायिसमवेतत्वसम्बन्धेन

वत्त्वाच्च न जलादिकम् । तत्प्रत्यक्षे चाऽऽलोकनिरपेक्षं चक्षुः कारणमिति चेत् ।

दिनकरी ।

नामननुगतानां न हेतुतयोपन्यासः, **'जलादिकं'**इत्यादिना तेजःप्रभृतिद्रव्यसङ्ग्रहः । तथा च नवसु द्रव्येष्वन्तर्भावासम्भवेन परिशेषेण तमसोऽधिकद्रव्यत्वसिद्धिरिति भावः ।

तदुक्तम्—

"तमः खलु चलं नीलं परापरविभागवत् ।

प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हति"(लीलावती) इति ।

ननु तमसो द्रव्यत्वे आलोकनिरपेक्षेण चक्षुरिन्द्रियेण ग्रहो न स्यात्, द्रव्यग्रहे ह्यालोकसापेक्षचक्षुरिन्द्रियस्य हेतुत्वादित्यत आह—**तत्प्रत्यक्षे चेति** । तमःप्रत्यक्षे चेत्यर्थः । तमोऽभिन्नद्रव्यचाक्षुषत्वावच्छिन्नं प्रत्येव संयोगसम्बन्धेनाऽऽलोकत्वेन कारणत्वावधारणादिति भावः ।

रामरुद्री ।

गन्धानधिकरणे निरवच्छिन्नदैशिकविशेषणतया वृत्तित्वं, तद्विशिष्टगन्धाभावस्य हेतुत्वे तात्पर्यमुपगन्तव्यम् । उक्तघटे च उक्तसम्बन्धेन कपालनिष्ठगन्धसत्त्वेन तत्र गन्धाभावस्य प्रतियोगिव्यधिकरणत्वासम्भवान्न व्यभिचारः । नच यत्र सुरभ्यसुरभिकपालिकारब्ध कपालद्वय तत्र समवेतस्य घटस्य स्वाश्रयसमवेतत्वसम्बन्धेनाऽपि गन्धाधिकरणत्वविरहाद्व्यभिचारतादवस्थ्यमिति वाच्यम् । कपालद्वयसंयोगादुत्पत्स्यमानस्य घटस्य कपालावयवादिष्वपि समवायेनोत्पादस्वीकारात् । अन्यथा घटसत्त्वदशायामेव कपालिकादौ समवायेन घटाभावस्य प्रत्यक्षापत्तेः । न च कपालस्य घटप्रतिबन्धकत्वात् कथ कपालिकादौ तदुत्पाद इति वाच्यम् । द्रव्यविभाजकोपाधिव्याप्या या घटत्वादिजातयः, तत्तज्जात्यवच्छिन्न प्रति तत्तज्जात्यवच्छिन्नप्रतिबन्धकत्वोपगमेन घट प्रति कपालस्याऽप्रतिबन्धकत्वात्, तद्द्रव्य प्रति तद्द्रव्यानारम्भकद्रव्यत्वेन वा प्रतिबन्धकतायाः स्वीकरणीयत्वादिति । पार्थिवपरमाणौ गन्धनाशदशाया गन्धाभावसत्त्वात्तत्र व्यभिचारवारणाय विशेषणताया निरवच्छिन्नत्वप्रवेशः । इत्थं च सयोगेन गन्धाभावस्याऽपि प्रतियोगिव्यधिकरणत्वात् तद्वारणाय समवायावच्छिन्नप्रतियोगिताकत्वनिवेशसार्थक्यम् । एतेन प्रतियोगिव्यधिकरणत्व यदि प्रतियोग्यधिकरणावृत्तित्व, तदा तादृशगन्धाभावाप्रसिद्धिः, अधिकरणभेदेनाऽभावाभेदात्, यदि प्रतियोग्यनधिकरणवृत्तित्व, तदा गन्धाभावप्रतियोगित्वेन गन्धोपादाने शिरोवेष्टनेन नासिकास्पर्शतुल्यता, यदि गन्धानधिकरणवृत्तित्व, तदाऽपि गन्धानधिकरण—जलादिवृत्ति—गन्धाभावस्य पृथिव्यामपि सत्त्वाद्व्यभिचारतादवस्थ्यम्, यदि च गन्धानधिकरणवृत्तित्वविशिष्टगन्धाभावस्य हेतुत्वान्न व्यभिचार इति विभाव्यते, तदाऽपि तद्घटकगन्धानधिकरणत्वमात्रस्य हेतुतासम्भवेन शेषवैयर्थ्यमिति दूषणानि प्रयुक्तानि । स्वाश्रयसमवेतत्वसम्बन्धेन गन्धानधिकरणत्वस्य पार्थिवपरमाणौ व्यभिचारित्वेन शेषसार्थक्यादिति विभावनीयम् ।

हेतुतयेति । एतेन प्राचीनग्रन्थेषु जलादिभेदसाधने नानाहेतूपन्यासो व्यर्थप्रयास इति सूचितम् । **परिशेषेणेति** । पृथिव्यादिभिन्नत्वे सति द्रव्यत्वरूपहेतुनेत्यर्थः । न च विशेष्यासिद्धिः, रूपादिना तत्साधनादिति भावः ।

उक्तार्थे मीमांसकानां सम्मतिमाह—**तदुक्तमिति** । परापरयोर्यौ विभागौ—विशेषधर्मौ परत्वापरत्वस्वरूपौ, तद्वदिति परापरविभागवदित्यस्यार्थः । **प्रसिद्धद्रव्यवैधर्म्यादिति** । प्रसिद्धानि यानि पृथिव्यादिद्रव्याणि, तेषा **वैधर्म्यात्**—तद्वृत्तिगन्धशून्यत्वादेरित्यर्थः । ननु **'तत्प्रत्यक्षे च–'**इत्यादिमूलं प्रकृतानुपयुक्तमित्याशङ्कां निराकुर्वंस्तद्ग्रन्थमवतारयति—**नन्विति** ।

ननु तेजोऽभावस्तम इतिवादी प्रष्टव्यः, किं तेजःसामान्याभावस्तमःशब्दार्थः ? उत तद्विशेषाभावः ? नाऽऽद्यः, गाढतरतमस्यपि तमःप्रतीत्यनुपपत्तेः, सर्वदैव सर्वत्र तेजःपरमाणूनां सत्त्वात्, न द्वि-

न । आवश्यकतेजोऽभावेनैवोपपत्तौ द्रव्यान्तरकल्पनाया अन्याय्यत्वात् । रूपवत्ताप्रतीतिस्तु भ्रमरूपा । कर्म्मवत्ताप्रतीतिरप्यालोकापसरणौपाधिकी भ्रान्तिरेव । तमसोऽतिरिक्तद्रव्यत्वे अनन्तावयवादिकल्पनागौ-

दिनकरी ।

आवश्यकतेजोऽभावेनेति । प्रकृष्टमहत्वोद्भूतानभिभूतरूपवत्तेजस्त्वावच्छिन्नाभावेनेत्यर्थः । अन्धकाराभाव एव तेजः किं न स्यादिति तु न सम्यक्, उष्णस्पर्शभास्वररूपबुद्धेरनुपपत्तेरिति सूचनायाऽऽवश्यकपदम् । **उपपत्तौ**–तमोव्यवहारोपपत्तौ । ननु तमस्तेजोभावत्वे रूपवत्ताप्रतीतिः कथं ? अभावे रूपाभावादित्यत आह–**रूपवत्तेति ।** ननु रूपवत्ताप्रतीतेर्भ्रान्तित्वेऽपि चलतीति प्रत्ययसिद्धकर्मवत्त्वहेतुना द्रव्यत्वं सेत्स्यतीत्यत आह—**कर्मवत्ताप्रतीतिरपीति ।** न हि द्रव्येऽन्यौपाधिकी कर्मवत्ताप्रतातिरिति भावः । ननु प्रतीतेर्भ्रान्तित्वं तत्रैव स्वीक्रियते, यत्रोत्तरकाले बाधज्ञानं, प्रकृते च तमो न चलतीति उत्तरकाले बाधज्ञानाभावात् कथं प्रतीतेर्भ्रान्तित्वमित्यतो दूषणान्तरमाह—**तमस इति ।** **'अवयवादि'**इत्यादिना उत्पत्तिध्वंसपरिग्रहः(१) ।

रामरुद्री ।

तीयः, सौरालोकसत्त्वेऽपि यत्किञ्चित्तेजोऽभावसत्त्वेन तमःप्रतीत्यापत्तेरित्यतो यादृशतेजोभावस्य तमःशब्दार्थता तादृशं तेजोभावं दर्शयति—**प्रकृष्टेति ।** तेजस्त्र्यणुकसत्त्वेऽपि तमःप्रतीतेरनुभवसिद्धत्वात् महत्त्वे प्रकृष्टत्वविशेषण, चक्षुरादितेजःसत्त्वेऽपि तमःप्रतीतेरुद्भूतत्वनिवेशः, हिरण्यादितेजःसत्त्वेऽपि तमःप्रतीतेरनभिभूतत्वस्याऽपि निवेशः, तथा चैतादृशविशेषणविशिष्टतेजःसामान्याभावस्य तमःशब्दार्थतया नोक्तापत्तिरिति भावः । ननु तेजोभावे आवश्यकत्व अवश्यक्लृप्तत्व, तच्च घटो नाऽस्तीत्यादिप्रतीत्या यथा घटाभावादिरवश्य कल्प्तः, तथा तेजो नाऽस्तीति प्रतीत्या तेजोऽभावोऽपीत्युपपादनीयं, तच्च न सम्भवति, तेजोरूपद्रव्ये मानाभावात्, तमोरूपद्रव्याभाव एव तेजस्त्वप्रतीतेरुपगमसम्भवादित्याशङ्कामपनेतुं तेजोरूपद्रव्यस्याऽऽवश्यकता प्रदर्शयति—**अन्धकाराभाव एवेति । आवश्यकपदमिति ।** तथा च तमोभाव एव तेजः किं न स्यादित्याशङ्कानिरासाय मूले तेजस एवाऽऽवश्यकत्वं प्रदर्शितमिति भावः । **यत्रोत्तरकाल इति ।** इदं रजतमिति बाधनिश्चयादेव पूर्वतनप्रतीतेर्भ्रमत्वं कल्प्यते, न तूत्तरकाले बाधनिश्चयाभावे, अन्यथा घटादिविषयकप्रतीतीनामपि भ्रमत्वकल्पनापत्त्या शून्यवादापत्तेरिति भावः । **दूषणान्तरमाहेति ।** तथा च धूमो यदि वह्निव्यभिचारी स्यात्, तर्हि वह्निजन्यो न स्यादिति तर्केण व्यभिचारज्ञानप्रतिबन्धवत् तमो यदि द्रव्य स्यात् तर्ह्यकल्पानन्तावयवसमवेत स्यादिति तर्केण द्रव्यत्वज्ञानप्रतिबन्धसम्भवात् क्रियादिहेतुनाऽपि तमसो न द्रव्यत्वसिद्धिरिति भावः । न चैवं धूमेन वन्ह्यनुमितिरपि न स्यात्, वह्निर्यदि पर्वतवृत्तिः स्यात्, तर्ह्यकल्पानन्तावयवसमवेतः स्यादिति तर्केण

---

(१) अपि च तमःपरमाणवः स्पर्शवन्तस्तद्रहिता वा ? नाऽऽद्यः, अनुपलब्धिबाधितत्वात्, नाऽन्त्यः, अस्पर्शवतो द्रव्यारम्भकत्वानुपपत्तेः । न च तमःपरमाणवः स्पर्शवन्त एव, तमस्तु निःस्पर्शमेवाऽऽरभ्यत इति वाच्यम् । स्पर्शवदारब्धस्य स्पर्शवत्त्वनियमात् । न चाऽदृष्टवैलक्षण्येन न तत्र स्पर्श उत्पद्यत इति वाच्यम् । दृष्टे सम्भवत्यदृष्टकल्पनानवकाशात् । एकजातीयादेव वा परमाणोः क्षित्यादिभेदेन चतुर्धा कार्याण्यदृष्टभेदात् सञ्जायन्त इति वा किं न कल्प्यते ? तस्मात्तमःपरमाणवो न स्पर्शवन्त इति । यत्तु तमो यदि सावयवं द्रव्यं स्यात् तदा रूपवत्त्वस्य स्पर्शाव्यभिचारात् महतश्च स्पर्शवतः प्रतिघातधर्मत्वात् तमसि सञ्चरतः प्रतिघातः स्यादतो न द्रव्यमेतदिति के चिदाहुः । तन्न । प्रभामण्डलादावुक्तर्कस्य व्यभिचारपराहतत्वादिति ।

अथ गुणा रूपं रसो गन्धस्ततः परम् ॥ ३ ॥

रवं च स्यात् । सुवर्णस्य यथा तेजस्यन्तर्भावस्तथाऽग्रे वक्ष्यते ॥ २ ॥

॥ इति द्रव्यविभागग्रन्थः ॥

गुणान् विभजते—अथ गुणा इति । **एते गुणाश्चतुर्विंशतिसङ्ख्याकाः कणादेन कण्ठतः, 'च'शब्देन च दर्शिताः । तत्र गुणत्व १) जातिसिद्धिरग्रे दिनकरी ।**

यत्त्वारोपितं नीलरूपं तम इति कन्दलीकारमतम् । तन्न । इह अन्धकार इति प्रतीतेरपि भ्रमत्वापत्तेः, तमो नीलं न नीलिमेति प्रत्ययाच्च(२) ।

ननु तमसोऽनतिरिक्तत्वेऽपि सुवर्णस्याऽतिरिक्तस्य द्रव्यस्य सत्त्वान्नवत्वव्याघातस्तदवस्थ एवेत्यत आह—**सुवर्णस्येति । वक्ष्यत इति** । तेजोनिरूपणावसर इति शेषः ॥

॥ इति द्रव्यविभागग्रन्थः ॥

कण्ठत इति । "रूपरसगन्धस्पर्शाः सङ्ख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः" इति विभागसूत्रे सप्तदश कण्ठेनोक्ताः, **'च'शब्देन**—सूत्रस्थ 'च'शब्देन गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाः स-

रामरुद्री ।

वन्ह्यनुमितिप्रतिबन्धसम्भवादिति वाच्यम् । प्रत्यक्षसिद्धमहानसीयवन्ह्यारम्भकपरमाणूना क्लप्तत्वात् । न च (महानसीय) वह्न्यारम्भकपरमाणूना क्लप्तत्वेऽपि पर्वतीयवन्ह्यारम्भकाणां तेषामक्लप्तत्वादुक्तनकर्षावतारः सम्भवतीति वाच्यम् । महानसीयवह्न्यारम्भकपरमाणुभिरेवपर्वतीयवह्न्यारम्भसम्भवात्, तमःपरमाणूनां काऽप्यक्लप्तत्वात् । न च तमोऽसमवेतमेव स्वीकार्यमिति वाच्यम् । तथा सति निरवयवत्वेन तमसो नाशासम्भवादिति भावः ।

इहेति । जलादावित्यर्थः । **भ्रमत्वापत्तेरिति** । जलादौ प्रकारीभूतनीलरूपविरहादिति भावः ॥२॥

॥ इति द्रव्यविभागग्रन्थः ॥

---

(१) असमवेतासमवेतनित्यसमवेतसत्तासाक्षाद्व्याप्यजातिर्गुणत्वमिति बोध्यम् ॥

(२) अत्रेदं कन्दलीकारस्याऽभिमतम् । तमो यदि तेजोभावरूपं स्यात् प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिग्रहसापेक्षग्रहकं स्यात्, सर्वत्राऽभावप्रत्यक्षे प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिग्रहस्याऽपेक्षितत्वात्, न चैवं, तथा हि कश्चनाऽदृष्टसौरालोको गिरिगुहान्तरवासी पुरुषोऽपि तमस्तमस्त्वेनाऽनुभवति । न चवं घटाभावादीनां प्रत्यक्षमदृष्टघटस्य कदा चिदपि भवति, तस्मात्तम आरोपितं नीलरूपमेवेति वक्तव्यम् । किञ्च मध्यान्हे दूरगगनाभोगव्यापी नीलिमा प्रतीयते, तत्र च न स तेजोभावः, तस्याऽभावात्, नाऽपि तत्र किञ्चिन्नीलरूपवद् द्रव्यं वर्त्तते, बाधितत्वात्, तस्मात्तादृशनीलरूपाश्रय आकाश एवाऽभ्युपेयः, तच्च न सम्भवति, प्रमाणविरुद्धत्वात्, किन्तु तत्र तदारोपितं नीलरूपमेवेति वक्तव्यम् । एवञ्च यदा चक्षूरश्मयो दूरमुन्मुखायाताः अधोमुखैः प्रबलैः सूर्यरश्मिभिः परिवर्त्यन्ते, तदा स्वकीयगोलकमेव पश्यन्तस्तद्गतमेव नीलरूपं बाह्यत्वेन जानन्ति, ततश्च गगनं नीलमिति प्रतीतिर्जायते । न च तमसो नीलरूपवत्त्वे आलोकासहकृतचक्षुर्ग्राह्यत्वं न स्यादिति वाच्यम् । आरोपितनीलरूपचाक्षुषं प्रति आलोकरहितस्यैव चक्षुषः सामर्थ्यकल्पनात् । कार्यानुगुणमेव हि कारणं कल्प्यते, न तु कारणवैगुण्येन कार्यवैगुण्यं सम्भवति । निदर्शनं चाऽत्राऽऽलोकाभाव एव । दुरुपपादश्च क्वचिच्छायायां कृष्णसर्पभ्रमः, अभावे भावधर्माध्यारोपासम्भवादिति तु न सङ्गतम्, दुःखाभावादिषु सुखत्वाद्यारोपस्य दृष्टत्वादिति ।

स्पर्शः सङ्ख्या परिमितिः पृथक्त्वं च ततः परम् ।
संयोगश्च विभागश्च परत्वं चाऽपरत्वकम् ॥ ४ ॥
बुद्धिः सुखं दुःखमिच्छा द्वेषो यत्नो गुरुत्वकम् ।
द्रवत्वं स्नेह-संस्कारावदृष्टं शब्द एव च ॥ ५ ॥
उत्क्षेपणं ततोऽपक्षेपणमाकुञ्चनं तथा ।
प्रसारणं च गमनं कर्माण्येतानि पञ्च च ॥ ६ ॥

वक्ष्यते ॥ ३-४-५ ॥

॥ इति गुणविभागग्रन्थः ॥

कर्माणि विभजते—उत्क्षेपणमिति । **कर्मत्व(१)जातिस्तु प्रत्यक्षसिद्धा । एवमुत्क्षेपणत्वादिकमपि ॥ ६ ॥**

ननु भ्रमणादिकमपि पृथक्कर्म अधिकतया कुतो नोक्तमत आह— भ्रमणमिति ॥ ७ ॥ **इति कर्मपदार्थविभागग्रन्थः ॥**

दिनकरी ।

मुच्चिताः, ते च सर्वे एकतया चतुर्विंशतिगुणा इह व्यवहृताः ।

ननु चतुर्विंशतौ कि नाम गुणत्वं ? न च जातिविशेषः, तत्र प्रमाणाभावादित्यत आद—**तत्रेति** । गुणेष्वित्यर्थः । **अग्रे**-गुणनिरूपणावसरे । **वक्ष्यत इति** । द्रव्यकर्ममिन्ने सामान्यवति या कारणता, सा किञ्चिद्धर्मावच्छेद्या, कारणतात्वादित्यनुमानं गुणत्वजातौ प्रमाणमिति भावः । एतत्तत्त्वं तत्रैव स्फुटीभविष्यति ॥ ३-४-५ ॥

॥ इति गुणविभागग्रन्थः ॥

प्रत्यक्षसिद्धेति । चलनाकारानुगतप्रत्ययवेद्येत्यर्थः ॥ ६ ॥

अधिकतयेति । कर्मविभाजकोपाधिभिर्भ्रमणत्वादिभिः । **मूले-गमनादेवेति ।**

रामरुद्री ।

एकतयेति । नवसङ्ख्यावत्त्वेत्यर्थः । तेन गन्धरूपादीनामैक्यासम्भवेऽपि न क्षतिः । सङ्ख्या चाऽत्र विषयतया अपेक्षाबुद्धिरूपैव, गुणे गुणानङ्गीकारादिति ।

इत्यनुमानमिति । नन्ववच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वे बाधः, गन्धादिनिष्ठसमवायसम्बन्धावच्छिन्नकार्यतानिरूपित-स्वसमवायिसमवेतद्रव्यत्वसम्बन्धावच्छिन्नगन्धादिनिष्ठकारणताया अतिप्रसक्तत्वेन गुणत्वानवच्छिन्नत्वात्, सामानाधिकरण्येन तथात्वे चतुर्विंशतिगुणनिष्ठकारणतैव पक्षीकर्तव्या, तस्या एवाऽनतिप्रसक्तगुणत्वावच्छिन्नत्वसम्भवात्, सा चाऽप्रसिद्धैव, गुणत्वेन यत्किञ्चित्कार्ये प्रत्यपि सकलगुणानामकारणत्वात्, तथा च पक्षाप्रसिद्धिः । न च गुणत्वावच्छिन्नं प्रत्येव गुणत्वेन कारणत्वात् नाऽप्रसिद्धिरिति वाच्यम् । कार्यत्वकारणत्वयोरतिप्रसक्तत्वेन गुणत्वस्य तदवच्छेदकत्वासम्भवात् । न च गुणप्रत्यक्षत्वावच्छिन्ना प्रत्येव गुणत्वेन कारणत्वात् नाऽप्रसिद्धिरिति वाच्यम् । प्रत्यक्षत्वावच्छिन्नं प्रति विषयत्वेन सामान्यतस्तत्तद्द्रव्यक्तित्वेन विशेषतश्च कार्यकारणभावैरेवोपपत्त्या घटप्रत्यक्षत्व-स्वर्णघटप्रत्यक्षत्व—चैत्रावलोकितमैत्रनिर्मितघटप्रत्यक्षत्वाद्यनन्तमध्यवर्तिधर्मावच्छिन्नकारणताकल्पने प्रयोजनविरहादिति चेन्न । ज्ञायमानलिङ्गकरणतावादिमताभिप्रायेणैव तदभिधानात्, इदं द्रव्यं गुणादित्यनु-

(१) **नित्यावृत्तिसत्तासाक्षाद्व्याप्यजातिः कर्मत्वम् ।**

भ्रमणं रेचनं स्यन्दनोर्ध्वज्वलनमेव च।
तिर्य्यग्गमनमप्यत्र गमनादेव लभ्यते ॥ ७ ॥
सामान्यं द्विविधं प्रोक्तं परं चाऽपरमेव च।
द्रव्यादित्रिकवृत्तिस्तु सत्ता परतयोच्यते ॥ ८ ॥

सामान्यं निरूपयति—सामान्यमिति। **तल्लक्षणं तु नित्यत्वे सत्यनेकसमवेतत्वम्। अनेकसमवेतत्वं संयोगादीनामप्यस्तीत्यत उक्तं–नित्यत्वे सतीति। नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्तीत्यत उक्तमनेकेति। नित्यत्वे सत्यनेकवृत्तित्वमत्यन्ताभावस्याऽप्यस्ति, अतो वृत्तित्वसामान्यं विहाय समवेतेत्युक्तम्।**

दिनकरी।

अथैवमुत्क्षेपणादीनामपि गमनेऽन्तर्भावात् गमनादेव लाभे उत्क्षेपणत्वादीनामपि विभागोऽनुचितः, न हि उत्क्षेपणादौ गमनत्वं नाऽनुभविकं, ऊर्द्धमधश्च प्रक्षिप्तलोष्टादावूर्द्धं गच्छत्यधो गच्छतीति प्रत्ययादिति चेन्न। स्वतन्त्रेच्छस्य मुनेर्नियोगपर्यनुयोगानर्हत्वादिति ॥६॥७॥

॥ इति कर्मपदार्थविभागग्रन्थः ॥

तल्लक्षणं त्विति। लक्षणप्रयोजनं त्वितरभेदस्य व्यवहारस्य वा सिद्धिः। सामान्यमितरेभ्यो द्रव्यादिभ्यो भिद्यते, सामान्यमितिव्यवहारविषयो वा, नित्यत्वे सत्यनेकसम-

रामरुद्री।

मितौ वन्ह्यनुमितौ धूमत्वेनैव गुणत्वेन सकलगुणाना कारणताया आवश्यकत्वात्, कथमन्यथा गुणत्वं हेतुतावच्छेदकमिति भावः। लिङ्गज्ञानस्य कारणतावादिमते तु गुणत्वस्य जातित्वसिद्धयसम्भवेऽपि न क्षतिः। तेन द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वरूपोपाधेरेव गुणपदप्रवृत्तिनिमित्तत्वोपगमादिति ध्येयम्(१)॥ ३ ॥ ४ ॥ ५ ॥ इति गुणविभागग्रन्थः।

गमनादेवेति। गमनपदादेवेति कारिकार्थः। **लोष्टादाविति**। प्रामादिकोऽयं ग्रन्थः। उत्क्षिपतीति व्यवहारो हि चेतनेष्वेवाऽनुभूयते, न त्वचेतने लौष्टादौ, तस्माल्लोष्टादिनिष्ठगत्यनुकूलचेतनव्यापार एव उत्पूर्वक'क्षिप'धातोरर्थः, आश्रयत्वं चाऽऽख्यातार्थ इत्यवश्यमङ्गीकरणीयं, तथा चाऽचेतने घटः प्रक्षिपतीति व्यवहाराभावेन लोष्टाद्यचेतनक्रियायां गतित्वोपपादनस्य प्रकृतानुपयोगात्, परं तु लोष्टादिकं प्रक्षिपति, चैत्रो गच्छतीति प्रत्ययात् उत्तरदेशसंयोगानुकूलक्रियामात्रस्यैव गतित्वादित्येव लेखनीयमिति मन्तव्यम्। **नियोगपर्यनुयोगेति**। अयमाशयः, गतित्वं प्रकृते उत्क्षेपणादिभिन्नत्वे सत्युत्तरदेशसंयोगानुकूलक्रियात्वमेव विभाजकतावच्छेदकत्वेनाऽभिमतं, तेन द्रव्यत्वपृथिवीत्वाभ्यामिव गतित्वोत्क्षेपणत्वाभ्यामपि विभागस्याऽनर्हत्वेऽपि न क्षतिः। नन्वेवं पृथिव्यन्यद्रव्यस्य द्रव्यत्वादिना विभागापत्तिरिति चेत्—एतदभिप्रायेणैव **"नियोगपर्य्यनुयोगानर्हत्वात्"** इत्यस्योक्तत्वात्। नियोगपर्यनुयोगौ–प्रश्ननिन्दे ॥ ६–७ ॥ इति कर्मपदार्थविभागग्रन्थः।

---

(१) **गुणत्वं जातिः। न च प्रमाणाभावः, दृष्टयापातमात्रेण रूपं रूपं रसो रस इत्यादिवद् गुणो गुण इति प्रत्ययानुवृत्त्यभावादिति वाच्यम्। दृष्टयापातमात्रेण गुणे गुणत्वाग्रहणेऽपि शास्त्राकारीयवाक्येन तत्र गुणत्वग्रहणसम्भवात्। यथा हि सुविदितरत्नपरीक्षाशास्त्रोऽपि रत्नतत्त्वं न प्रत्यक्षेण ज्ञातुं शक्नोति, किन्तु तल्लक्षणेनैव, यथा वा दृष्टयापातमात्रेण ब्राह्मणत्वं क्षत्रियत्वं वैश्यत्वं वा न ज्ञातुं शक्नुयात्, उपवीतादिधारणस्य सर्वत्र समानत्वात्, किन्तु येषां कुलपरम्परया विशुद्धं ब्राह्मणत्वमवसितं तत्रैव ब्राह्मणत्वं ज्ञायते, तथैव गुणेष्वपि उपदेशसहकारेण प्रत्यक्षेणैव गुणत्वं गृह्यत इति वदन्ति।**

दिनकरी।

वेतत्वात्, यन्नैवं तन्नैवं, यथा द्रव्यमिति। एवं लक्षणान्तरेऽप्यूह्यम्। अनेकत्वं-एकभिन्नत्वम्। जलपरमाणुरूपादावतिव्याप्तिवारणोयोक्तो विशेष्यभाग। समवेतत्वघटकसमवायफलमाह—**नित्यत्वे सत्यनेकवृत्तित्वमिति।**

न चैवं नित्यसंयोगेऽतिव्याप्तिरिति वाच्यम्। तस्य निरस्तत्वात्। कुतो निरास इति चेन्न। द्रव्यनिष्ठकारणतानिरूपितसंयोगनिष्ठकार्य्यतावच्छेदककोटौ जन्यत्वनिवेशे गौरवात्, नित्यसंयोगाङ्गीकर्तृनये संयोगत्वस्य नित्यवृत्तित्वेन कार्य्यतानवच्छेदकत्वात्, तुल्ययुक्त्या नित्यविभागसिद्ध्यापत्तेश्च।

रामरुद्री

अन्वयदृष्टान्ताभावादाह—**यन्नैवमिति। एकभिन्नत्वमिति।** न च यत्किञ्चिदेकत्वावच्छिन्नभेदवति समवेते रूपादौ जातिलक्षणातिव्याप्तिरिति वाच्यम्। एकभिन्नत्वपदेन एकत्वावच्छिन्नप्रतियोगिताकभेदस्यैवोक्तत्वात्। न चैवमप्रसिद्धिः, ग्रन्थकारेण उभय नैकमिति प्रतीत्यङ्गीकारेण उभयत्वावच्छिन्न एव तत्प्रसिद्धेः। न चैवमपि जलपरमाणावपि उभयत्वावच्छेदेन तादृशभेदसत्त्वात् तत्समवेतरूपे अतिव्याप्तितादवस्थ्यमिति वाच्यम्। भेदो यदवच्छेदेन वर्तते तदवच्छेदेन वृत्तित्वस्यैव समवेतत्वपदेन विवक्षणीयत्वान्नाऽतिव्याप्तिः। वस्तुतस्तु स्वप्रतियोगिसमवेतत्व-स्वाधिकरणसमवेतत्वोभयसम्बन्धेन भेदविशिष्टत्वस्यैव अनेकसमवेतत्वरूपत्वान्न काऽप्यनुपपत्तिः। एतेन तादृशभेदानुयोगितावच्छेदकद्वित्वान्नवच्छिन्ने जातिवृत्तित्वमप्रामाणिक, जातेर्निरवच्छिन्नवृत्तित्वादिति दूषणमप्यपास्तम्।

नित्यविभागेति। कदाऽपि परस्परासंयुक्तपरमाण्वोर्नित्यविभागसम्भवात्। न च संयोगानन्तरमेव विभागप्रतीतेः. तादृशपरमाण्वोः कदाऽपि विभागाप्रतीतेः कथ नित्यविभागाभ्युपगमसम्भव इति वाच्यम्। तथा सति क्रियानन्तरमेव संयोगप्रतीतेः. नित्येषु संयोगप्रतीत्यसम्भवात् नित्यसंयोगाभ्युपगमोऽपि न सम्भवतीति तुल्यमिति भावः। न च नित्यविभागाङ्गीकारे संयोगनाशको गुण इति विभागलक्षणस्य तत्राऽव्याप्तिरिति वाच्यम्। नित्यविभागानङ्गीकारेणैव तल्लक्षणप्रणयनात्। इदानीं तु विभागत्वजातेरेव तल्लक्षणत्वसम्भवादिति ध्येयम्(१))

---

(१) एतच्चऽऽपाततः। स्वमतेऽपि विभागस्योत्तरदेशसंयोगनाश्यत्वाभ्युपगमेन सर्वस्यैव विभागस्य त्रिक्षणावस्थायित्वावश्यकतया नित्यविभागाङ्गीकारासम्भवात्। अन्यथा विभिन्नदेशावस्थितयोर्विनष्टसंयोगयोर्घटयोर्विभागप्रत्ययापत्तेः। न च तत्रोत्पद्यमानस्य विभागस्याऽदर्शनान्न विभक्तप्रत्यय इति वाच्यम्। तथा चेत्तुल्ययुक्त्योत्पद्यमानस्य संयोगस्याऽदर्शनेऽपि परस्परोपश्लिष्टयोः संयुक्तप्रत्ययानुपपत्तेः। न चाऽन्यत्र तथाऽकल्पनेऽप्यत्रोत्पद्यमानस्य विभागस्य सर्वदैव विभागज्ञाने कारणत्वमावश्यकमिति वाच्यम्। विनिगमकाभावेन विभागस्य क्षणत्रयावस्थायित्वकल्पने बाधकाभावात्। तादृशविभागोत्पत्तिज्ञानस्य विभागज्ञानकारणत्वकल्पनस्याऽप्रामाणिकत्वाद्गौरवाच्च। अत एव विभागो न संयोगनाश इति तार्किककथनमपि सङ्गच्छते। संयोगनाशस्य नाशासम्भवेन सर्वदैव विभक्तप्रत्ययप्रसङ्गात्। न चैवं जातिलक्षणस्य नित्यसंयोगेऽतिव्याप्तिरिति वाच्यम्। तद्वारणायाऽनेकसमवेतत्वस्थाने बहुसमवेतत्वस्यैव विवक्षितत्वात्। बहुसमवेतत्वमपि त्रित्वाभाववद्वृत्तिसंख्यावच्छिन्नानुयोगिताकपर्याप्तिकत्वम्। न चैवं गुणे गुणानङ्गीकारात्तत्र सङ्ख्यायास्तन्निष्ठानुयोगितावच्छेदकत्वमनुपपन्नम्, घटत्वपटत्वादेः पर्याप्त्यनभ्युपगमे चाऽसम्भव एव सर्वत्रेति वाच्यम्। तथाऽपि भेदवैशिष्ट्यस्यैव बहुसमवेतत्वपदार्थतासम्भवात्। वैशिष्ट्यं च स्वप्रतियोगिसमवेतत्व-स्वानुयोगिसमवेतत्व-स्वप्रतियोगिप्रतियोगिकभेदवत्स्वप्रतियोगिसमवेतत्वैतन्त्रितयसम्बन्धेन। प्रतियोगिता चोभयावृत्तित्वेन विशेषणीया। तेन न आकाशघटो-

एकव्यक्तिमात्रवृत्तिस्तु न जातिः । तथा चोक्तम्—

दिनकरी ।

नन्वाकाशत्वरूपजातावव्याप्तिः, तस्या अनेकसमवेतत्वाभावादित्याशङ्क्याऽलक्ष्यत्वेनोत्तरमाह—**एकव्यक्तिमात्रेति ।** व्यक्तेरभेदरूपस्य बाधकस्य सत्त्वादिति शेषः । अनुगतधियो जातिकल्पिकाया अभावादिति भावः । ननु व्यक्त्यभेदस्य जातिबाधकत्वमेवाऽसिद्धं, निःसामान्यत्वे सति विशेषान्यत्वे सति समवेतत्वस्य जातिलक्षणत्वादित्यतः सम्मतिमाह—**तथा चोक्तमिति ।** द्रव्यकिरणावल्यामुदयनाचार्यैरिति शेषः । बहुवृत्त्येकधर्मस्य सामान्यतया सर्वसिद्धत्वादेकव्यक्तौ जातिरनभ्युपेयेति भावः ।

व्यक्तेरभेदः—एकव्यक्तिकत्वम् , आकाशत्वादेर्जातित्वे बाधकम् । **तुल्यत्वं**—तुल्यव्यक्तिवृत्तित्वं, घटत्वकलशत्वादीनां जातीनां भेदे । वस्तुतस्तु तुल्यत्वं स्वभिन्नजातिः

रामरुद्री ।

व्यक्तेरभेदेति । व्यक्तेः—आश्रयस्य । निष्ठत्व षष्ठ्यर्थः । आश्रयनिष्ठ–भेदप्रतियोगिकाभाव इति समुदायार्थः । न चैवं घटत्वादेरपि जातित्व न स्यात् , तस्याऽऽश्रये यत्किञ्चिद्भेदप्रतियोगिकाभावसत्त्वादिति वाच्यम् । भेदपदेन स्वाश्रयप्रतियोगिकभेदस्य विवक्षितत्वात् । स्वाश्रयनिष्ठ–स्वाश्रयप्रतियोगिक–भेदसामान्याभावः स्वनिष्ठजातित्वे बाधक इत्यस्य समुदायार्थत्वात् । न च गगनत्वाश्रयेऽपि स्वस्यैव द्वित्वादिना भेदसत्त्वाद्गगनत्वादावपि जातित्वनाधो न स्यादिति वाच्यम् । स्वाश्रयनिष्ठप्रतियोगितायाः व्यासज्यवृत्तिधर्मानवच्छिन्नत्वेन विशेषणीयत्वादिति भावः । ननु स्वाश्रयनिष्ठस्य स्वाश्रयनिष्ठव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकभेदसामान्याभावस्य स्वस्मिन् जातित्वबाधकत्वे किं मानमित्याशङ्क्याह—**भनुगतधिय इति ।** नानाधर्मिषु एकप्रकारकधिय इत्यर्थः । नानाघटादिव्यक्तिषु एकधर्मप्रकारकबुद्ध्युपपत्तये हि घटत्वादिजातिः कल्प्यते, एकव्यक्तौ तु तथाप्रत्ययस्तद्व्यक्तित्वमादायाऽप्युपपद्यत इति तदतिरिक्तजातिकल्पने प्रमाणाभाव इति भावः । **असिद्धमिति ।** घटत्व जातिरितिप्रतीतिवत् गगनत्व जातिरिति प्रतीतिरेव तस्य जातित्वसाधिका भविष्यतीति भावः । ननु गगनत्वादेर्जातित्वे तत्राऽव्याप्त्यापत्त्या पूर्वोक्तलक्षणस्य जातिलक्षणत्वासम्भव इत्यतो लक्षणान्तरमाह । **निःसामान्येति ।** रूपादावतिव्याप्तिवारणाय प्रथमसत्यन्तम् । विशेषेऽतिव्याप्तिवारणाय द्वितीयसत्यन्तम् । रूपध्वसादावतिव्याप्तिवारणाय विशेष्यदलमिति बोध्यम् । **सम्मतिमाहेति ।** व्यक्तेरभेदस्य जातिबाधकत्वे प्राचामित्यादिः । तथा च गगनत्वं न जातिरिति प्रतीतिरेव प्राचा सम्मतेति भावः ।

एकव्यक्तिकत्वमिति । एकाश्रयकत्वमित्यर्थः । आश्रये एकत्व च स्वजातीयद्वितीयराहित्यम् । साजात्यं च तत्तदाश्रयत्वेन । न चैवं सिद्धयसिद्धिभ्या व्याघातः, स्वाश्रयनिष्ठभेदाप्रतियोग्याश्रयकत्वं, भेदश्च पूर्ववदेव व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वेन विशेषणीय इति ध्येयम् । **तुल्यव्यक्तिवृत्तित्वमिति ।** अन्यूनानतिरिक्ताश्रयकत्वमित्यर्थ. । तथा च स्वनिष्ठजातितुल्याश्रयकत्व स्वस्मिन् जातित्वे बाधकमित्यायातं, तच्च न सम्भवति, कलशत्वजातौ स्वात्मकघटत्वतुल्याश्रयकत्वसत्त्वादित्यतो जातिबाधकशब्दस्य यज्जातौ यज्जातितुल्याश्रयकत्वं तत् तज्जातौ तज्जातिभेदे बाधकमित्यर्थपरता सूचयति । **जातीनां भेद इति ।** बाधकमिति पूर्वेणान्वयः । नन्वेवं एकस्यैव जातिबाधकपदस्य क्व चित् जातित्वबाधकार्थकत्वस्य क्व चिज्जातिभेदबाधकत्वार्थकत्वस्य च न सम्भवः, "सकृदुच्चरितः शब्दः" इति(१)न्या

भयभेदवैशिष्ट्यस्य स्वप्रतियोग्याकाशसमवेतत्व-स्वानुयोग्याकाशसमवेतत्व-स्वप्रतियोगिघटभिन्नस्वप्रतियोग्याकाशसमवेतत्वैतत्त्रितयसम्बन्धेन नित्यसंयोगे सत्त्वेऽपि क्षतिः । यद्वा भेदत्रयवैशिष्ट्यमेव बहुसमवेतत्वम् । वैशिष्ट्यं च स्वप्रतियोगिसमवेतत्व–स्वानुयोगिसमवेतत्वोभयसम्बन्धेनेत्यपि वदन्ति ।

(१) सकृदुच्चरितः शब्दः सकृदेवाऽर्थं गमयतीति न्यायादित्यर्थः ।

"व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथाऽनवस्थितिः ।

दिनकरी ।

समनियतत्वमिति यावत् , तच्च जातिबाधकमेवेति ध्येयम्(१) । **सङ्करश्च** परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः, भूतत्वादेर्जातित्वे बाधकः । भूतत्वं विहाय मनसि वर्तमानस्य मूर्तत्वस्य मूर्तत्वं विहाय गगने वर्तमानस्य भूतत्वस्य च पृथिव्यादिचतुष्टये सत्त्वात् ।

ननु साङ्कर्य्यस्य जातिबाधकत्वे किं मानमिति चेत् , स्वसामानाधिकरण्य—स्वाभावसामानाधिकरण्योभयसम्बन्धेन जातिविशिष्टजातित्वावच्छेदेन स्वसमानाधिकरणाभावप्रतियोगित्वाभाव इति नियमस्य भङ्गप्रसङ्ग एवेति । तादृशनियमे मानाभावान्न साङ्कर्य्यं जातिबाधकमिति नव्याः ।

अनवस्था(२) तु जातेर्जातिमत्त्वे । यद्यपि निखिलजातिष्वेकवैजात्याङ्गीकारेऽपि तद्वैजात्ये न वैजात्यान्तरं, एकव्यक्तिवृत्तित्वात् , तथाऽपि निखिलजातिष्वेकवैजात्यं, तद्वैजात्य–तदाश्रयजातिषु पुनर्वैजात्यं, एवमग्रेऽपीत्यनवस्था बोध्या । **रूपहानिः–निःसामान्यत्वगर्भलक्षणव्याघातरूपा** विशेषस्य जातिमत्त्वे । यद्वा रूपस्य स्वतोव्यावर्तकत्वस्य हानिः,

रामरुद्री ।

यादित्यस्वरसादाह । **वस्तुतस्त्विति । परस्परेति ।** स्वसमानाधिकरणस्वसमानाधिकरणाभावप्रतियोगिजातिमन्निष्ठाभावप्रतियोगित्वं स्वस्य जातित्वे बाधकमित्यर्थः ।

उभयसम्बन्धेनेति । सामानाधिकरण्यसम्बन्धेन द्रव्यत्वविशिष्टे पृथिवीत्वादौ द्रव्यत्वसमानाधिकरणाभावप्रतियोगित्वस्यैव सत्त्वाद्व्यभिचारवारणाय स्वाभावसामानाधिकरण्यप्रवेशः । जलत्वाद्यभावसमानाधिकरणे तत्रैव जलत्वसमानाधिकरणाभावप्रतियोगित्वस्यैव सत्त्वात्तद्दोषतादवस्थ्यमतः स्वसमानाधिकरणत्वप्रवेशः । **नियमस्य भङ्गप्रसङ्ग एवेति ।** उक्तोभयसम्बन्धेन यज्जातिविशिष्टजातित्व यत्र तत्र तज्जातिव्यापकत्वमिति नियमः, दृष्टश्चाऽसौ पृथिवीत्वव्यापके द्रव्यत्वादौ, एतादृशनियमभङ्गापत्तिरेव साङ्कर्यस्य जातित्वबाधकत्वे मान, साङ्कर्यस्थले एकमात्रस्य जातित्वेऽपि नैतादृशनियमस्य भङ्ग इति मूर्तत्वं क्रियासमवायिकारणतावच्छेदकतया सिद्धा जातिरिति केचन वदन्ति । **तादृशनियमे मानाभावादिति ।** व्याप्तिग्राहकानुकूलतर्काभावादित्यर्थः ।

एकव्यक्तिवृत्तित्वादिति । तथा च जातौ जात्यङ्गीकारेऽपि नाऽनवस्थेति भावः । **निःसामान्यत्वघटितेति ।** निःसामान्यत्वे सति सामान्यभिन्नत्वे सति समवेतत्वं विशेषलक्षणं, विशेषे जात्यङ्गीकारे तस्य **व्याघातः**—विशेषावृत्तित्वम् । एतस्य च विशेषत्वे जातित्वबाधकत्वाङ्गीकारे विशेषे जात्यन्तरनिरासो न स्यादित्यभिप्रायेण जातिबाधकशब्दस्य विशेषे जातिमत्त्वबाधकतां सूचयति । **विशेषस्य जातिमत्त्व इति ।** बाधकमिति पूर्वेणाऽन्वयः । एतच्चाऽऽपाततः, एकशब्दस्य एकदा नानार्थकत्वासम्भवेन विशेषवृत्तीना इत्यस्यैव वक्तुमुचितत्वात् । ननूक्तं विशेषलक्षण ग्रन्थकृता नोक्तमिति तद्व्याघातस्य विशेषे जातिमत्त्वबाधकत्वं न ग्रन्थकृदभिप्रेतं, अन्यथा तादृशलक्षणाभिधानस्य ग्रन्थकर्तुरावश्यकत्वापत्तिः, किं तु परमाणूनां परस्परभेदसिद्ध्यर्थमेव विशेषाङ्गीकार इति वदतो मूलकारस्य भेदसाधकत्वमेव तल्लक्षणमित्यभिप्रायो लभ्यते, स च न सम्भवति, घटभेदसाधकपटत्वादावतिव्याप्तेः, अतः स्वतोभेदसाधकत्वं तल्लक्षणमित्यर्थे मूलतात्पर्यमङ्गीकरणीयं, तथा च रूपहानिशब्दस्य तादृशलक्षणव्याघातपरतैव

(१) **स्वसमनियतजातित्वं यत्र यत्र व्रत तत्र स्वभिन्नत्वाभाव इति तात्पर्यात्। तेन न स्वभिन्नत्वसमनियतजात्यप्रसिद्धावपि क्षतिः ।**

(२) **अप्रामाणिकासङ्ख्यपदार्थकल्पनाप्रयुक्तानिष्टप्रसङ्गोऽनवस्था ।**

रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रहः ॥" इति।

दिनकरी।

तत्र जातिस्वीकारे तथैव व्यावर्तकत्वं वाच्यं, सामान्याश्रयस्य सामान्यरूपेणैव व्यावर्तकत्वनियमात्। न च सामान्यरूपेण विशेषाणां भेदसाधकत्वं सम्भवति, व्यभिचारात्, तादृशनियमानङ्गीकारे परमाणुगतैकत्वानां तत्तद्व्यक्तित्वेनैव परमाण्वन्तरभेदसाधकत्वसम्भवेन विशेषस्य वैयर्थ्यप्रसङ्गादिति तु ज्यायः। **असम्बन्धः**–प्रतियोगिताऽनुयोगिताऽन्यतरसम्बन्धेन समवायाभावः, समवायाभावयोर्जातिमत्त्व इति।

रामरुद्री।

युक्तेत्यभिप्रायेणाऽऽह। **यद्वेति। स्वतः**—स्वेन रूपेण। **व्यावर्त्तकत्वं**—भेदानुमापकत्वम्। विशेषस्य परमाणौ परमाण्वन्तरभेदसाधने तद्व्यक्तित्वेनैव हेतुता वाच्या, विशेषत्वेन हेतुत्वे परमाण्वन्तरेऽपि विशेषान्तरसत्त्वेन व्यभिचारित्वापत्तेः, विशेषनिष्ठ तद्व्यक्तित्व च तादात्म्यसम्बन्धेन सैव व्यक्तिः, अन्यस्य दुर्वचत्वात्, तन्मात्रविषयकज्ञानव्यक्तेस्तत्त्वे तादृशजन्यज्ञानव्यक्त्यभावदशायां तद्व्यक्तौ तद्व्यक्तित्व नाऽस्तीति प्रत्ययापत्तेः, तस्याश्चाऽनवस्थाभयेन तन्मात्रविशेषकज्ञाने स्वरूपत एव प्रकारत्वमभ्युपगम्यते, तथा च विशेषस्य स्वेन रूपेणैव भेदानुमापकता निराबाधैव, इदञ्च विशेषत्वस्य जातित्वे न सम्भवतीति विशेषस्य जातिमत्त्वे भवति तादृशव्याघात इत्याह—**तत्र जातिस्वीकार** इत्यादिना। **सामान्यरूपेणेवेति।** सामान्यावच्छिन्नत्वेनेत्यर्थः। **व्यावर्त्तकत्वं**—भेदसाधने हेतुत्वम्। न चैवं नियमे सति घटत्वानितरेभ्यो भिद्यते, कम्बुग्रीवादिमतइत्यनुमितिर्न स्यादिति वाच्यम्, तादृशनियमवादिमते इष्टत्वात्। न चैवमपि महानसीयवह्निमत्त्वावच्छेदेन तदितरभेदसाधने महानसीयवह्निरेव हेतुर्वाच्यः, महानसीयत्वं च न सामान्यमिति कथमुक्तनियम इति वाच्यम्। तस्य सामान्यत्वाभावेऽपि वह्नित्वस्य तथात्वेन व्यावर्त्तकतायाः सामान्यावच्छिन्नत्वनियमाक्षतेः। अथैवरीत्या तत्तद्विशिष्टविशेषत्वेन विशेषस्य हेतुत्वे विशेषत्वस्य जातित्वेऽपि नोक्तनियमक्षतिरिति तथैव स्वीक्रियत इति चेन्न। तस्य तत्तद्रूपसमानाधिकरणव्याप्यतावच्छेदकधर्मान्तरघटितत्वेन व्याप्यतावच्छेदकत्वासम्भवादिति हृदयम्(१)। ननूक्तनियमे मानाभावः, तथा च विशेषस्य जातिमत्त्वे स्वतोव्यावर्त्तकत्व न बाधकमित्याशङ्कां निराकरोति। **तादृशनियमेति। ज्याय इति।** ज्यायस्त्वञ्च मूलकृदभिप्रायानुसारित्वमेव बोध्यम्। **प्रतियोगितेति।** न चाऽभावत्वादेर्जातित्वाङ्गीकारे समवायेनैव तत्सत्त्वभङ्गीकार्यम्, उक्तलक्षणानुसारात्, तथा चोक्तान्यतरसम्बन्धेन समवायाभावः अभावादौ नोभयवादिसम्मतः, कथं तेन हेतुनाऽभावादौ जातिमत्त्वाभावः सिद्ध्यतीति वाच्यम्। समवायपदेन जात्यतिरिक्तप्रतियोगिकत्वविशिष्टसमवायस्य विवक्षितत्वात्। इत्थ च अनुयोगितासम्बन्धेन तादृशसमवायाभाववति रूपादौ व्यभिचारवारणाय प्रतियोगित्वनिवेशः, गगनादौ व्यभिचारवारणायाऽनुयोगितानिवेशः।

के चित्तु समवायपदं जातिप्रतियोगिकसमवायातिरिक्तसमवायपरमित्याहुः। तदसत्। ग्रन्थकृता समवायैकत्वस्य व्यवस्थापनीयतया जातिप्रतियोगिकसमवायेतरसमवायाप्रसिद्धेः, जातिप्रतियोगिकत्व-

---

(१) **एतच्चाऽऽपाततः। तथा हि तत्ताविशिष्टविशेषत्वेन हेतुत्वमुच्यते चेत्तत्र किं तावत्तद्व्यक्तित्व? न तावत् स्वप्रतियोगिवृत्तित्व-स्वानुयोगिवृत्तित्वोभयसम्बन्धेन भेदविशिष्टान्यत्वं, अप्रसिद्धेः। नाऽपि स्ववृत्तित्व-स्वेतरवृत्तित्वोभयसम्बन्धेन वस्तुविशिष्टान्यत्वं, तस्याऽपि पूर्ववदेव व्युदासात्, किन्तु विशेषगतो विशेष एवेति वक्तव्यम्। तदपि न सम्भवति, तस्याऽपि इतरविशेषवृत्तिविशेषतो भेदस्याऽशक्यज्ञानत्वात्। स स्वत एव व्यावृत्त इति चेत्तर्हि तदाश्रयस्यैव स्वतोव्यावृत्तिः स्वीक्रियतां, किं विशेषान्तरकल्पनया? तथा चोक्तानुमाने न वैयर्थ्यम्, अपि तु साधनाप्रसिद्धिरेवेति चिन्त्यम्। नन्वेवं परमाणुगतं तद्व्यक्तित्वं किमिति चेत्तदेव विशेष इति ज्ञेयम्।**

परभिन्ना तु या जातिः सैवाऽपरतयोच्यते ।
द्रव्यत्वादिकजातिस्तु परापरतयोच्यते ॥ ९ ॥

परत्वं—अधिकदेशवृत्तित्वं, अपरत्वं—अल्पदेशवृत्तित्वम् । सकलजात्यपेक्षया सत्ताया अधिकदेशवृत्तित्वात् परत्वं, तदपेक्षया चाऽन्यासां जाती-

दिनकरी ।

तदपेक्षया चेति । सत्तापेक्षया चेत्यर्थः । सत्ताजातिश्च द्रव्यं सत्, गुणः सन्नित्याद्यनुगतप्रतीत्यैव सिद्धयति ।

अत्र नव्याः,—सन्नितिप्रतीतिविषयो भावत्वमेव, अत एव सामान्यादिष्वपि सदितिव्यवहारः, न त्वतिरिक्ता द्रव्यादित्रिकवर्त्तिनी सत्ताख्या जातिरिति, तेन परमपरं द्विविधं सामान्यं, परं सत्तेति वैशेषिकविभागो निर्युक्तिकत्वादनादेय इत्याहुः ।

तत्र सत्, ध्वंसकारणतावच्छेदकतया सत्ताजातिसिद्धेः । यत्र प्रतियोगितासम्बन्धेन ध्वंसोत्पत्तिस्तत्रैव तादात्म्यसम्बन्धेन सदिति सामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभावात् । न च प्रागभावे व्यभिचारः, प्रागभावे सत्ताविरहादिति वाच्यम् । प्रागभाववृत्तिप्रतियोगिताभिन्नप्रतियोगितायाः कार्यतावच्छेदकसम्बन्धत्वादिति ।

रामरुद्री ।

विशिष्टसमवायस्तु प्रतियोगितया जातावेव तिष्ठति, नाऽन्यत्र, भूतलवृत्तित्वविशिष्टघटस्य भूतलमात्रे सत्त्ववदिति नाऽस्मन्मते समवायैक्यविरोध इति मन्तव्यम् ।

अथैवमपि जात्यतिरिक्तप्रतियोगिकत्वविशिष्टसमवायस्य प्रतियोगितया अनुयोगितया चाऽसत्त्वेन जातेर्जानिमत्त्वेऽपि निरुक्तासम्बन्धस्यैव बाधकत्वसम्भवादनवस्थाया जातिबाधकत्वेनोक्तिर्व्यर्थेति चेत्- ?

सत्यम् । जात्यतिरिक्तेत्यत्र जातिपदस्याऽसमवेतवृत्तिजातिपरत्वेन सत्तादौ तस्य जातिमत्त्ववाधकत्वसम्भवेऽपि रूपत्वादौ तद्बाधकताया अनवस्थायामेवाऽभ्युपेयत्वात् । न चाऽसमवेतवृत्तीति व्यर्थं, अखण्डाभावघटकतया तत्सार्थक्यात् ।

वस्तुतस्तु अनुयोगितापदं सत्तावन्निष्ठमुभयवादिसिद्धं यत् समवायानुयोगित्वं, तत्परमतः समवायपदस्य यथाश्रुतार्थकत्वेऽपि न क्षतिरिति ध्येयम् ।

भावत्वमेवेति । न चैवमिह भूतले घटाभावः सन्नितिप्रतीत्यनुपपत्तिः, घटाभावे भावत्वविरहादिति वाच्यम् । तदनुरोधेनाऽपि कालसम्बन्धस्यैव सत्त्वरूपत्वौचित्यात्, तावताऽपि सत्ताजातेरसिद्धेरिति भावः(१) ।

सत्ताजातिसिद्धेरिति । ननु प्रतियोगितया ध्वंसं प्रति समवायेन सतः कारणत्वे गगनादीनां तदापत्तिरित्याशङ्कामपनेतुं तादात्म्येन सतः कारणतां ग्राहयति । **यत्रेति** । न चैतादृशकार्यकारणभावानङ्गीकारे सामान्यादौ ध्वंसापत्तिरेव दुर्वार, एतादृशकार्यकारणभावस्वीकारेऽपि गगनादौ तदापत्तिरशक्यपरिहारैवेति वाच्यम् । कालिकसमवायोभयसम्बन्धस्यैव कारणतावच्छेदकताघटकत्वादिति भावः । न चैवमपि महाकाले प्रतियोगितया ध्वंसापत्तिः, समवायकालिकविशेषणताभ्यां तस्याऽपि सत्तावत्त्वादिति वाच्यम् । महाकालान्यत्वेन कालिकविशेषणताया विशेषणीयत्वात् । एवमुत्तरत्राऽप्यनुसन्धेयम् । **व्यभिचार इति** । प्रतियोगितया प्रागभावे ध्वंसोत्पत्त्येति शेषः । **कार्यतावच्छेदकसम्बन्धत्वादिति** । प्रागभाववृत्तिप्रतियोगितासम्बन्धेन ध्वंसं प्रति प्रागभावत्वेन हेतुत्वान्तरमेवेति भावः ।

---

(१) भावत्वस्याऽपि समवाय-सामानाधिकरण्यान्यतरसम्बन्धेन सत्तावत्त्वरूपत्वान्न सत्तासिद्धौ किमपि बाधकमित्यप्यवधेयम् ।

नामपरत्वम्। पृथिवीत्वाद्यपेक्षया द्रव्यत्वस्याऽधिकदेशवृत्तित्वाद्व्याप-कत्वात् परत्वं, सत्तापेक्षयाऽल्पदेशवृत्तित्वाद्व्याप्यत्वादपरत्वम् ॥७-८-९॥

इति सामान्यनिरूपणम् ॥

दिनकरी।

वस्तुतस्तु समवायेन सत्तावच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेन कारणतया जन्यता-वच्छेदकतया सत्ताजातिसिद्धिः। तादृशकार्यकारणभावे मानाभाव इति तु न, स्वाश्रय-समवेतत्वसम्बन्धेन नीलादेर्नीलादाववि सत्त्वात् तत्र नीलोत्पत्तिवारणाय तादृशकार्यकारण-भावस्याऽऽवश्यकत्वात्। न च स्वाश्रयसमवेतत्वविशिष्टद्रव्यत्वसम्बन्धेन नीलादेर्हेतुतयैव न तदापत्तिरिति वाच्यम्। तादृशसमवेतत्व-द्रव्यत्वयोर्विशेषणविशेष्यभावे विनिगमना-विरहेण कारणतावाहुल्यापत्तेः। कालिकसमवायोभयसम्बन्धस्य कार्यतावच्छेदकताघटक-सम्बन्धत्वात् सत्ताया नित्यसाधारण्येऽपि न क्षतिरित्यन्यत्र विस्तरः(१)॥ ७-८-९॥

॥ इति सामान्यनिरूपणम्॥

रामरुद्री।

नन्वेतत्कार्यकारणभावस्य प्रयोजन प्रागभाववृत्तिप्रतियोगितासम्बन्धेन प्रागभावभिन्ने ध्वंसापत्ति-वारणमेव, तथा च तुल्ययुक्त्या घटादिवृत्तिप्रतियोगितासम्बन्धेन ध्वसं प्रति घटत्वादिनाऽपि कारणत्व-मावश्यकं, एवं च क्लृप्ततत्कारणविरहादेव सामान्यादौ ध्वसापत्तिवारणात् उक्तकार्यकारणभावो निष्प्र-माणक एवेत्यस्वरसात् कार्यतावच्छेदकतया सत्ता साधयति—**वस्तुतस्त्विति।** **विनिगमना-विरहेणेति।** न च स्वाश्रयसमवेतत्व-द्रव्यत्वोभयसम्बन्धेनैव नीलादेः कारणताऽङ्गीकरणीया, नाऽतो विनिगमनाविरहापत्तिरिति वाच्यम्। द्रव्यत्वस्य नीलादिप्रतियोगिकत्वे मानाभावेन तत्संसर्गत्वासम्भ-वात्। विशिष्टस्य संसर्गत्वे तु विशेषणविधया प्रविष्टस्याऽऽश्रयत्वस्य नीलादिप्रतियोगिकतया तत्संसर्ग-त्वसम्भवादिति भावः। ननु सत्ताया नित्यसाधारणत्वेन कथ कार्यतावच्छेदकत्वसम्भव इत्याशङ्कां निराकुरुते—**कालिकेति।** ननु कालिकसमवाययोरुभयोः कार्यतावच्छेदकताघटकसम्बन्धत्वे गौरवादुक्त-कारणस्य कार्यतावच्छेदकतया जन्यमात्रसमवेतैव सत्ता सिद्धयेत्, न तु जन्यनित्यसाधारणी भवदभि-मतसत्तेत्याशङ्कायामाह। **अन्यत्र विस्तर इति।** अथ भावः, गगनादौ सत्तानङ्गीकारे द्रव्यत्वादिना साङ्कर्यापत्त्या सत्ताया जातित्वमेव न स्यात्, साङ्कर्यस्याऽपि जातिबाधकतायाः प्राचीनैरङ्गीकारा-दिति॥ ७-८-९॥ इति सामान्यनिरूपणम्॥

---

(१) अत्राऽऽहुः सौगताः। प्रतीयमानेषु पिण्डेषु मध्य सूत्रवदेकस्याऽऽकारस्याऽनुपल-म्भात् सामान्यं नाऽस्त्येवेति। तदयुक्तम्। गृह्यमाणासु गोव्यक्तिष्वश्वादिविलक्षणतयैकस्य सामान्याकारस्य प्रतिभासात्। यथा हि कपिलनीलयोर्गवोरेका सरूपता दृश्यते, तथैवाऽसौ वाजिव्यक्तिष्वपि दृश्येत, न चैवं, तस्मात् सकलगोव्यक्त्यनुगतमश्वादिविलक्षणमेकं सामा-न्यमवश्यमङ्गीकरणीयम्। एकार्थक्रियाकारित्वादेकहेतुत्वाच्च तेषां सारूप्यमिति चेदाद्ये गो महिष्यादावपि सारूप्यापत्तिः, यतो वाहदोहादिक्रिया गोष्विव महिष्यादावपि समानै-वेति। द्वितीयेऽपि एकजातीयस्यैव भिन्नकारणकत्वदर्शनादनैकान्तिकत्वम्। तथा हि सरू-पस्येव वन्हेर्विद्युतोऽरणिनिर्मन्थनादादित्यरश्म्युपप्लुताद्दिनमणिमणेर्वन्हेरप्युत्पत्तिर्दृष्टा, न चैतदेकजातीयस्य भवन्मते सम्भवति, सामान्याभावे एककारणकत्वस्यैकार्थक्रियाकारित्व-स्याऽप्यसिद्धेश्चेति। अन्यापोहालम्बन एवैष गौर्गौरिति प्रत्यय इति चेद्धन्त कोऽयमन्या-पोहः? अगोव्यावृत्तिरिति चेत्,? का अगावः? या न गाव इति चेत्, काः पुनस्ता गाव इति पृष्टे न किञ्चिद्वक्तुं शक्यते भवता। मन्मते तु ता एव गावो या गोत्वसामान्याश्रया

व्यापकत्वात् पराऽपि स्याद् व्याप्यत्वादपराऽपि च ।
अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः परिकीर्तितः ॥ १० ॥

विशेषं निरूपयति—अन्त्य इति । **अन्तेऽवसाने वर्तत इत्यन्त्यः, यदपेक्षया विशेषो नाऽस्तीत्यर्थः । घटादीनां द्व्यणुकपर्यन्तानां तत्तद्वयवभेदात् परस्परं भेदः, परमाणूनां परस्परं भेदसाधको विशेष एव, स तु स्वत**

दिनकरी ।

स्वत एवेति । स्वतोव्यावृत्तत्वं च स्वभिन्नलिङ्गक-स्वविशेष्यक-स्वसजातीयेतरभेदानुमित्यविषयत्वम् । साजात्यं च पदार्थविभाजकोपाधिरूपेण, तेन घटादेस्तादात्म्येन

रामरुद्री ।

स्वतोव्यावृत्तत्वं चेति । विशेषस्याऽपि स्वलिङ्गक-स्वसजातीयविशेषान्तरभेदानुमितिविषयत्वादसम्भववारणाय-**स्वभिन्नलिङ्गकेति ।** घटो विशेषाद्भिद्यते, कपालसमवेतत्वादित्यनुमितेरपि विशेषभिन्नलिङ्गकत्वाद्विशेषप्रतियोगिभेदविधेयकत्वाच्च तादृशानुमितिविषयत्वमादाय पुनस्तद्दोषतादवस्थ्यमतः—**स्वविशेष्यकेति ।** भेदे स्वसजातीयप्रतियोगिकत्वप्रवेशप्रयोजन ग्रन्थकृतैव वक्ष्यते । ननु नञ्द्वयप्रवेशे गौरवात् स्वलिङ्गक-स्वविशेष्यक—स्वसजातीयभेदानुमितिविषयत्वमेव स्वतोव्यावृत्तत्वं वक्तुमुचित, न तु यथोक्तमित्याशङ्का निराकुरुते—**तेनेति । 'तादात्म्येन व्यावृत्तत्वेऽपि'** इत्यस्य घटादिना'इत्यादिः, **न क्षति**रितिपरेणाऽन्वयः । तथा च स्वतोव्यावृत्तत्वरयोक्तरूपत्वे घटादावपि तादा-

---

इति नाऽनुपपत्तिः । गोत्वं किमिति तु न प्रष्टुं शक्यते, तस्य लोमलाङ्गूलसास्नादिभिर्दर्शयितुं शक्यत्वात् । तत्राऽपि लोमादीनि कानीति पृष्टे तदनुगतसामान्याश्रयाणीत्येव वक्ष्यते । तदपि किमिति तु न प्रष्टव्यम् । किञ्चिदप्यजानन्तं उपदेष्टुं शास्त्रस्याऽप्रवृत्तेः । यो हि लोकसिद्धानर्थान् जानाति, स एवाऽत्राधिकारीति सन्तोष्टव्यं भिक्षुभिः, यत्तु सामान्यातिरेके गोत्वी गोत्ववानित्येवं प्रत्ययापत्तिः, न तु गौरित्यभेदेन, तस्मात् सकलव्यक्त्यनुगतं सामान्यं व्यक्त्यभिन्नमेव, अनेन भेदाभेदवादोऽप्युपोद्बलितो भवति, तथा हि व्यक्तयः सामान्यतोऽभिन्नाः, विशेषतश्च भिन्ना इति । भेदाभेदौ विरुद्धाविति चेन्नैतद्युक्तिज्ञस्य पर्यनुयोज्यम् । प्रमाणेन तथैव तस्य सिद्धेरिति । तदयुक्तम् । विकल्पासहत्वात् । किं गौरितिप्रतीतिर्जातिव्यक्त्योरविलक्षणमाकारं गृह्णाति ? उताऽभेदं ? आहो स्वित् परस्परविलक्षणाकारौ ? आद्येऽभेद एव स्यात्, अविलक्षणाकारबुद्धिवेद्यत्वस्याऽभेदहेतुत्वात् । द्वितीये व्याहतिरेव । तृतीये त्विष्टापत्तिः । भेदस्यैव सिद्धेः । अभेदोऽपि सेत्स्यतीति चेन्न । मानाभावात् । गौरिति प्रतीतिरेव मानमिति चेत्, ? किमत्रैक आकारोऽनुभूयते, द्वौ वा ? आद्ये, समवायेन तत्प्रतीत्युपपत्तिः । द्वितीयेऽपीष्टापत्तिः । यच्चाऽविभागेन गोत्वस्य गोश्च ग्रहणं, तत्समवायमहिम्ना । तस्य ह्येष एव महिमा यदसावयःपिण्डवन्ही इवाऽविभागेनैव पदार्थान् दर्शयति । न चैवं सति गोत्वस्य गोभेदे कदा चित् तयोः पृथगप्युपलब्धिः स्यादिति वाच्यम् । तयोरयुतसिद्धत्वेन पृथग्ग्रहणस्याऽशक्यत्वात् । अत एव तादात्म्यं सेत्स्यतीति चेन्निन्नयोस्तदसम्भवस्योक्तत्वात्, दूरे सामान्याग्रहणेऽपि पिण्डोपलम्भस्य प्रत्यक्षसिद्धत्वाच्च । एतेन सामान्यं सर्वगतं न वा ? आद्येऽतिप्रसङ्गः । द्वितीयेऽपि अन्यत्र विद्यमाने गवि सम्बद्धं सामान्यमन्यत्रोत्पद्यमानेन गवा कथं सम्बद्ध्यते ? गच्छतीति चेद् द्रव्यत्वापत्तिः, नो चेदसम्बन्ध इत्यपि सौगतदूषणं प्रत्युक्तम् । संयोगस्थल एवाऽन्यत्र विद्यमानेनाऽन्यत्र विद्यमानस्य सम्बन्धः क्रियापूर्वक इति नियम उपपद्यते, यत्र तु समवाये नैष नियमः, केवलं स्वमहिम्नैव यो योजयति सामान्येन पिण्डं, तत्र नैवैषा शङ्का सावकाशेत्यन्यत्र विस्तरः ।

दिनकरी।

व्यावृत्तत्वेऽपि, विशेषस्य गुणादिशून्यत्वेनेतरभेदानुमितिविषयत्वेऽपि, द्रव्यादेरपि प्रमेयत्वादिना विशेषसजातीयत्वेऽपि न क्षतिः।

रामरुद्री।

त्म्येन घटहेतुकस्वसजातीयघटान्तरप्रतियोगिकभेदानुमितिविषयत्वेन तत्राऽतिव्याप्तिरेव स्यादिति भावः। भेदे स्वसजातीयप्रतियोगिकत्वनिवेशस्य प्रयोजनमाह। **विशेषस्येति। इतरभेदेति।** विशेषेतरद्रव्यादिभेद इत्यर्थः। पदार्थविभाजकोपाधिरूपेण साजात्यप्रवेशस्य प्रयोजनमाह। **द्रव्यादेरपीति।** अथाऽत्र **स्वविशेष्यकत्वं** परित्यज्याऽनुमित्यविषयत्वमित्यत्राऽनुमित्यविशेष्यत्वमित्युक्त्यैव सामञ्जस्ये गुरुतरारम्भो विफल एव, तावतैव घटो विशेषाद्भिद्यते, कपालसमवेतत्वादित्यनुमितिमादायाऽसम्भववारणसम्भवात्, उक्तानुमितौ विशेषस्य मुख्यविशेष्यत्वाभावादिति चेन्न। स्वत्व हि नाऽनुगतं, किं तु तत्तद्व्यक्तित्वपर्यवसन्नमेव, तत्र च स्वपदेन विशेषोपादानं न सम्भवति, विशेषे विशेषान्तरभेदसाधने विशेषेतरलिङ्गाभावादप्रसिद्ध्यापत्तेः, किं तु घटादिकमेव तद्व्यक्तित्वेनोपादाय लक्षणं सङ्गमनीयम्। तथा च **स्वविशेष्यकत्वेनानुक्तौ** विशेषो घटाद्भिद्यते, गुणवद्भिन्नत्वादित्यनुमितेरपि घटभिन्नलिङ्गकत्वेन घटसजातीयप्रतियोगिकभेदविधेयकत्वेन च तादृशानुमितौ विशेषस्य मुख्यविशेष्यत्वादसम्भव एव स्यात्, तदुपादाने तूक्तानुमितेर्घटभिन्नलिङ्गकत्वेऽपि घटमुख्यविशेष्यकत्वाभावेन तामुपादाय नाऽसम्भव इति ध्येयम्(१)। न चैवमपि विशेषकालीनो घटो घटान्तराद्भिद्यते, एतत्कपालसमवेतत्वादित्यनुमितेरपि घटविशेष्यकत्वात् घटभिन्नलिङ्गकत्वात् स्वसजातीयघटान्तरभेदविधेयकत्वाच्च तद्विषयत्वस्य विशेषे सत्त्वादसम्भवतादवस्थ्यमिति वाच्यम्। **अविषयत्व**मित्यस्य मुख्यविशेष्यताशून्यार्थकत्वात्। इत्थं च **स्वविशेष्यकत्वानुपादाने** घटो विशेषाद्भिद्यते, कपालसमवेतत्वादित्यनुमितिमादायाऽसम्भवासम्भवेऽप्युक्तरीत्या घटादिकमादायाऽसम्भववारणायैव(२) स्वविशेष्यकत्वोपादानमिति मन्तव्यम्। अनुमितिश्च मुख्यविशेष्यताद्वयशून्यत्वेनाऽपि विशेषणीया। अन्यथा विशेषः पटाद्भिद्यते, घटश्च, गुणशून्यत्वात्, घटत्वाच्चेति समूहालम्बनाऽनुमितिमादाय स्वपदेन घटव्यक्तिमादायाऽसम्भवप्रसङ्गात्। यद्यपि समवायस्य पदार्थविभाजकोपाधिरूपेण स्वसजातीयान्तराभावेन स्वसजातीयभेदानुमितौ मुख्यविशेष्यत्वाभावेन समवाये विशेषलक्षणातिव्याप्तिः प्रसज्यते। न च समवायेऽपि द्वित्वादिना समवायभेदसत्त्वान्नाऽतिव्याप्तिरिति वाच्यम्। तथा सति विशेषेऽपि विशेषघटोभयभेदसत्त्वेन तादृशभेदानुमितिविशेष्यत्वमादायाऽसम्भवापत्त्या भेदे व्याप्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वविशेषणस्याऽऽवश्यकत्वात्, तथाऽपि तादृशानुमितिविषयो यस्तद्भिन्नत्वे सति स्वभिन्न–स्वसजातीयत्वस्य समवेतत्वस्य(१) समवायभिन्नत्वस्य वा विशेष्यदले प्रवेशस्यत्वान्नाऽतिव्याप्तिरिति ध्येयम्। अनुमितौ सिषाधयिषानुत्तरत्वमपि विशेषणं देयम्। तेन विशेषेण परमाणुना भेदसिद्धौ एतत्परमाणुसमवेतत्वादेर्व्यावृत्तत्वेन सिषाधयिषया तेन लिङ्गेन विशेषे विशेषान्तरभेदानुमितावपि नाऽसम्भवः।

ननु **"अन्त्यो नित्यद्रव्यवृत्तिः"** इति कारिकया अन्त्यत्वे सति नित्यद्रव्यवृत्तित्वं विशेषलक्षणमुक्तं, तत्राऽन्त्यत्वं स्वतोव्यावृत्तत्वमेव, अन्ते व्यावर्तकानामवसाने वर्त्तत इत्यन्त्य इति व्युत्पत्त्या यस्य

---

(१) स्वपदेन घटग्रहणे स्वविशेष्यक-स्वभिन्नलिङ्गजन्य-स्वसजातीयभेदानुमित्यविषयत्वस्य पटादावपि सत्त्वादतिव्याप्तिरिति चेन्न। वस्तुविशिष्टानुमित्यविषयत्वस्यैव विवक्षितत्वात्। वैशिष्ट्यं च स्वभिन्नलिङ्गजन्यत्व-स्वविशेष्यकत्व-स्वसजातीयेतरभेदविधेयकत्वैतत्त्रितयसम्बन्धेनेति।

(२) विशेषो घटाद्भिद्यते, गुणशून्यत्वादित्यनुमितिमादायेति भावः।

(१) स्वत्वस्याऽननुगमादाह। समवेतत्वस्येति। समवायसम्बन्धावच्छिन्नवृत्तितावच्छेदकं स्वरूपं समवेतत्वं समवायेऽप्यस्त्येव, समवायस्य स्वनिष्ठवृत्तितायां समवायत्वेनाऽनवच्छेदकत्वेऽपि स्वरूपत्वेनाऽवच्छेदकत्वादत आह–समवायभिन्नत्वस्य वेतीत्यवधेयम्।

एव व्यावृत्तः, तेन तत्र विशेषान्तरापेक्षा नाऽस्तीत्यर्थः ॥ १० ॥
इति विशेषनिरूपणम् ॥

दिनकरी

'नित्यद्रव्यवृत्तिः, इति विशेषाणां स्थानकथनम्, न तल्लक्षणे प्रविष्टं, प्रयोजनाभावात्। **तत्र**–विशेषव्यावृत्तौ। नन्वेतत्परमाणुत्वादयो व्यावर्त्तका भविष्यन्ति, किं विशेषेणेति चेन्न। अव्यावृत्तधर्मस्य व्यावर्त्तकत्वासम्भवात्, तत्र व्यावर्त्तकान्तरापेक्षायामनवस्थानात्। ननु विशेषेष्वेष प्रसङ्ग इति चेन्न। तस्य धर्मिग्राहकमानेन स्वतोव्यावृत्ततयैव सिद्धेः। एवं च नित्यद्रव्येषु विशेषाः, तद्गुणास्तु न विशेषवन्तः, आश्रयरूपेण विशेषेणैव तेषां व्यावृत्तत्वात्, आश्रयस्य च विशेषवत्तया व्यावृत्तत्वेन विशेषत्वसम्भवादिति भावः। ईश्वराकाशयोर्नित्यज्ञानशब्दाभ्यां व्यावृत्तेः सम्भवान्न तत्र विशेष इत्यप्याहुः।

नवीनास्तु विशेषेऽतिरिक्ते मानाभावः, यथैव विशेषाणां स्ववृत्तिधर्मं विना व्यावृत्तत्वं, तथैव नित्यद्रव्याणामपीत्याहुः ॥ १० ॥ इति विशेषनिरूपणम् ॥

रामरुद्री।

व्यावर्तकान्तरं नाऽस्ति तत्त्वमित्यर्थलाभात्, स्वतोव्यावृत्तत्वस्यैव लक्षणत्वसम्भवे नित्यद्रव्यवृत्तित्वमनर्थकं, समवायस्याऽपि नित्यद्रव्यवृत्तितया समवायातिव्याप्तिवारकत्वस्याऽप्यसम्भवात्। न च वृत्तित्वं समवेतत्वमेव विवक्षितं, तथा च समवायातिव्याप्तिवारकमेव तदिति वाच्यम्। तथाऽपि समवेतत्वमात्रेणैव तत्राऽतिव्याप्तिवारणसम्भवे नित्यद्रव्यांशवैयर्थ्यस्य दुर्वारत्वादित्यभिप्रायेणाऽऽह—**विशेषाणां स्थानकथनमिति। अव्यावृत्तधर्मस्येति।** यस्माद्भेदसाधकत्वमभिमतं, तदवृत्तित्वेन अज्ञातधर्मस्येत्यर्थः। **व्यावर्तकत्वासम्भवात्**–तदितरभेदसाधकत्वाभावादित्यर्थः। **तत्र**–एतत्परमाणुत्वादौ। **व्यावर्तकान्तरापेक्षायां**–एतत्परमाणुत्वे परमाण्वन्तरावृत्तित्वसाधकहेत्वन्तरापेक्षायाम्। **अनवस्थानात्**–अनवस्थानप्रसङ्गात्। **एष प्रसङ्ग इति।** अनवस्थाप्रसङ्गात्मकप्रसङ्ग इत्यर्थः। **तस्य**–विशेषस्य। **धर्मिग्राहकमानेन**–परमाणुभेदः किञ्चिल्लिङ्गज्ञाप्यः, भेदत्वात्, कपालभेदवदिति विशेषसाधकानुमानेन। **स्वतः**–प्रमाणान्तरानिरपेक्षतयैव, **व्यावृत्ततयैव**–परमाण्वन्तरावृत्तित्वरूपेणैव। **सिद्धेरिति।** अनुमितेरित्यर्थः। परमाण्वन्तरवृत्तित्वे विशेषस्य परमाण्वन्तरभेदसाधकत्वाभावादिति भावः। उपसहरति। **एवं चेति। आश्रयरूपेण**–रूपाद्याश्रयपरमाणुस्वरूपेण। **विशेषेण**–व्यावर्तकेन। ननु अव्यावृत्तस्य कथं व्यावर्तकत्वमित्याशङ्कां परिहरति। **आश्रयस्येति। न तत्रेति।** नेश्वरगगनयोरित्यर्थः। **विशेष इति।** नित्यज्ञानशब्दाभ्यामेव तयोरितरनित्यद्रव्यभेदसिद्ध्या विशेषे प्रयोजनाभावादिति भावः। **'ईश्वर–'**इत्यादि **'आहुः'**इत्यन्तमेकदेशिनां मतं, तत्र च दिक्कालाकाशादीनां परस्परभेदसिद्धेः प्राक नित्यज्ञानशब्दयोः कालादिव्यावृत्तत्वासिद्ध्या न तेन कालादिभेदसाधन सम्भवति, विशेषस्य तु धर्मिग्राहकमानेन तत्सिद्ध्या विशेषेणैव तत्साधनं सम्भवतीत्यस्वरससूचनाय **'आहुः'**इत्युक्तम्।

यत्तु पार्थिवपरमाणुविशेषे जलपरमाणुविशेषभेदस्य पृथिवीसमवेतत्वेनाऽनुमानसम्भवात् स्वतोव्यावृत्तत्वस्य तत्राऽव्याप्तिरिति स्वसजातीयभेदानुमितिरित्यस्य स्वेतरस्वसजातीययावतां भेदानुमितिरित्यर्थो वर्णनीय इत्याह। **तन्मन्दम्।** पृथिवीजलपरमाण्वोरभेदे जलत्वपृथिवीत्वयोः साङ्कर्यापत्त्या तयोर्भेदः सिद्ध एवेति शक्यते वक्तुं, तथाऽप्यसम्भववारणायाऽनुमितौ सिषाधयिषानुत्तरत्वविशेषणस्याऽऽवश्यकतया पार्थिव–जल—परमाणुविशेषयोर्भेदमन्तरा पार्थिवपरमाणुविशेषस्य जलपरमाणुव्यावृत्तत्वासिद्ध्या तत्सिद्ध्यधीनविशेषभेदानुमितेः सिषाधयिषयैवाऽङ्गीकरणीयतया अव्याप्तेरसम्भवादिति ध्येयम्।

नवीनमतं दर्शयति—**नवीनास्त्विति।** 'आहुः'इत्यस्वरसोद्भावनं, तद्बीजं तु द्व्यणुकावयवः सावयवः, महदारम्भकत्वादित्यनुमानेन परमाणोरव्यावृत्तस्याऽपि सिद्धिसम्भवेन नित्यद्रव्याणां व्यावृ-

घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः॥ ११॥

समवायं दर्शयति—घटादीनामिति। **अवयवावयविनोः, जातिव्यक्त्योः, गुणगुणिनोः, क्रियाक्रियावतोः, नित्यद्रव्यविशेषयोश्च यः सम्बन्धः, स समवायः।**

दिनकरी।

"घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः। तेषु जातेश्च सम्बन्धः-" इति मूलम्। तत्र घटपदकपालपदे अवयव्यवयवपरे इत्याह-**अवयवावयविनोरिति।** 'जातेश्च' इति 'च' कारेण नित्यद्रव्येषु विशेषसम्बन्धः समुच्चीयत इत्याह-**नित्यद्रव्यविशेषयोरिति।**

रामरुद्री।

तत्त्वस्य धर्मिग्राहकमानसिद्धत्वमेवेति ध्येयम्। अत्रेदमवधेयम्, पूर्वोक्तयुक्त्या भेदानुमितौ सिषाधयिषानुत्तरत्वनिवेशस्याऽऽवश्यकतया स्वभिन्नलिङ्गकत्वनिवेशनमफलं, स्वेन स्वेतरभेदसाधनस्य सिषाधयिषां विना असम्भवात्, विशेषान्तरभिन्नेन स्वेन विशेषान्तरभेदसाधनासम्भवेन सिद्धेरावश्यकत्वात्, सिद्धिसत्त्वे सिषाधयिषयैवाऽनुमितिसम्भवादिति। किञ्च परमाणूनां परस्परभेदसिद्ध्यर्थमेव विशेषाङ्गीकार इति मूलाभिप्रायवर्णनमप्यसङ्गतं, परमाणुभेदः किञ्चिल्लिङ्गज्ञाप्य इत्याद्युक्तानुमानेन विशेषसिद्धौ सत्यां हि विशेषेण परमाण्वोर्भेदः साधनीयः, परमाण्वे र्भेदसिद्धौ हि तं पक्षीकृत्य विशेषानुमानं सम्भवति, अन्यथा पक्षासिद्धिप्रसङ्गादित्यन्योन्याश्रयप्रसङ्गात्। किञ्च मूलकृता **"घटादीनां द्व्यणुकपर्यन्तानां-"** इत्यादिना घटादीनां परस्परभेदस्य कपालभेदानुमेयत्वोक्तिरप्यसङ्गता, घटादीना परस्परभेदस्य प्रत्यक्षसिद्धत्वादिति(१)।

वस्तुतस्तु **"घटादीनां द्व्यणुकपर्यन्तानां"**—इत्यादौ **तत्तदवयवभेदात्'**इत्यत्र पञ्चम्यर्थः प्रयुक्तत्वमेव, न तु ज्ञाप्यत्वं, प्रयुक्तत्वं च स्वरूपसम्बन्धरूपं अवयवभेदादवयविभेद इति प्रतीतिसाक्षिकं, तथा च द्व्यणुकोत्पादान्यथानुपपत्त्या परमाणुद्वयसिद्धौ तयोर्भेदः किञ्चित्प्रयोज्यः, भेदत्वात्, कपालभेदप्रयुक्तघटभेदवदित्याद्यनुमाने इतरबाधबलात् परमाणुगतविशेषभेदसिद्ध्या विशेषसिद्धिरिति मूलतात्पर्यम्। ननु विशेषभेदेऽपि प्रयोजकान्तरानुमानसम्भवेनाऽनवस्थाप्रसङ्ग इत्याशङ्कायामुक्तं—**'स तु स्वत एव व्यावृत्तः'**इति, विशेषस्तु स्वप्रयोज्यभेदवानेव, न तु तद्गतविशेषान्तरभेदप्रयुक्तभेदवानिति तदर्थः। तथा च स्वतोव्यावृत्तत्वं स्वप्रयोज्य-स्वनिष्ठ-स्वसजातीयप्रतियोगिकभेदकत्वमेवेति पूर्वस्माल्लाघवमपीति सर्वं चतुरस्रम्॥ १०॥ इति विशेषनिरूपणम्॥

घटकपालादिपद इति। घटादिकपालादिपद इत्यर्थः। नित्यद्रव्यविशेषयोः सम्बन्धस्य मूले समवायत्वानुक्त्या मूलस्य न्यूनत्वमित्याशङ्कां परिहरति—**जातेश्चेतीति।**

---

(१) **एतच्चाऽऽपाततः। घटोऽयं तस्माद्विलक्षण इति वैलक्षण्यावगाहि-प्रतीतेरेव निर्वाहायैतत्कपालसमवेतत्वादेस्तत्र विशेषत्वकीर्तनात्। परमाणौ तु विशेषाभावे योगिनामयं परमाणुस्तस्माद्विलक्षण इति प्रतीतेरसद्विषयकत्वापत्तिरतो विशेषकल्पनेति मूलाभिप्रायात्। नन्वेवं विशेषोऽयं तस्माद्विलक्षण इति प्रतीतिः कथमुपपत्स्यते? इत्याशङ्क्योक्तं मूले-'स तु स्वत एव व्यावृत्तः' इति। ननु तत्तद्भेदा एव तादृशप्रतीतिविषया इति विशेषकल्पनं निर्युक्तिकमिति चेन्न। तथा सति स्थाण्वादौ संशयानुपपत्तेः। अग्रे भविष्यतो विशेषदर्शनस्य तदानीमेव सम्भवात्, विशेषस्य पुरुषभेदस्वरूपत्वात्, अज्ञाने वा तस्याऽग्रेऽपि ज्ञानं न सम्भवतीति यथा वक्रकोटरादिकमेव तत्र विशेषः, न तु पुरुषभेदः, तथैव तत्तद्घटादिषु इतरघटत्वसंशये तत्तत्कपालसमवेतत्वादयो विशेषा अभिहिताः, यदा तु तत्तत्परमाणुषु इतरपरमाणुत्वसंशयस्तदा स कथं निवर्तिष्यते,इति तत्राऽपि विशेषकल्पनमावश्यकमेवेति चिन्त्यम्।**

समवायत्वं नित्यसम्बन्धत्वम्। तत्र प्रमाणं तु, गुणक्रियादिविशिष्टबुद्धिर्विशेषणविशेष्यसम्बन्धविषया, विशिष्टबुद्धित्वात्, दण्डी पुरुष इति विशिष्टबुद्धिवदित्यनुमानेन संयोगादिबाधात् समवायसिद्धिः। न च स्व-

दिनकरी।

समवायलक्षणमाह—**नित्यसम्बन्धत्वमिति**। सम्बन्धश्चाऽत्र सम्बन्धिभिन्नो ग्राह्यः, तेन नित्याभावादिस्वरूपसम्बन्धे नाऽतिव्याप्तिः। ननु समवायस्य सम्बन्धत्वे किं मानमित्याशङ्क्याऽऽह—**तत्र प्रमाणं त्विति**। 'गुणक्रियादि' इत्यादिना जातिपरिग्रहः। **संयोगादीति**। द्रव्ययोरेव संयोग इति नियमादिति भावः।

अत्र समवायसम्बन्धेन पटत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेन तन्तुत्वेन हेतुत्वात् कार्यतावच्छेदकसम्बन्धविधया समवायसिद्धिः। न च समवायस्थाने स्वरूपसम्बन्धं निवेश्य कार्यकारणभावः कल्पनीय इति वाच्यम्। तथा सति यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणमिति समवायिकारणव्यवस्था न स्यात्। न च यत्सम्बद्धं कार्यमुत्पद्यते तत् समवायिकारणमित्येवाऽस्त्विति वाच्यम्। कपालसम्बद्धघटध्वंसं प्रति कपालस्य समवायिकारणत्वप्रसङ्गादित्यपि द्रष्टव्यम्।

रामरुद्री।

ननु नित्यसम्बन्धत्वस्य समवायलक्षणत्वे द्रव्यत्वाभावादीनां स्वात्मकस्वरूपसम्बन्धेऽतिव्याप्तिरित्याशङ्कां परिहरति—**सम्बन्धश्चेति। सम्बन्धिभिन्न इति**। तथा च सम्बन्धप्रतियोग्यनुयोगिभिन्नत्वे सति नित्यत्वे सति सम्बन्धत्वं समवायलक्षणं, अतः प्रतियोग्यनुयोग्यात्मकस्वरूपसम्बन्धे नाऽतिव्याप्तिः। अत्र च द्रव्यत्वाभावादीनां लाघवात् द्रव्यत्वाभावादिरेक एव सम्बन्धः, घटादीनां महाकाले कालिकसम्बन्धो लाघवादेक एव महाकाल इति स्वरूपसम्बन्धस्य क्व चित् प्रतियोगिरूपता, क्व चिदनुयोगिरूपतेति विभागो बोध्यः। सम्बन्धत्वं च सांसर्गिकविषयतावत्त्वमेव। **द्रव्ययोरेवेति**। संयोगसामान्यं प्रति द्रव्यस्य समवायिकारणत्वादिति भावः।

ननु समवायनानात्ववादिनां नव्यानां मते उक्तानुमानेन न समवायसिद्धिः सम्भवति, अतिरिक्तानन्तसमवायानां सम्बन्धत्वकल्पनामपेक्ष्य क्लृप्तानन्तस्वरूपाणामेव सम्बन्धत्वौचित्यात् इति तन्मतेऽपि समवायसिद्ध्यर्थं स्वयं प्रमाणान्तरमाह(१)। **अत्रेति। यत्समवेतमिति**। समवायेन यद्वृत्ति कार्यमित्यर्थः। समवायाभावे एतादृशसमवायिकारणलक्षणानुपपत्तिरिति भावः। **यत्सम्बद्धमिति**। यदनुयोगिकसम्बन्धप्रतियोगीत्यर्थः। तथा च सम्बन्धत्वेनैव सम्बन्धप्रवेशात् समवायाभावेऽपि न समवायिकारण-

---

(१) **वस्तुतो नवीनैः समवायस्य विशिष्टप्रतीत्यनुरोधेनैव नानात्वाङ्गीकारे तत्प्रतीत्यैव समवायसिद्धिसम्भवेन न प्रमाणान्तरकथने किञ्चिदपि प्रयोजनम्। स्वमते तु तादृशप्रतीतेर्गन्धादिनिष्ठवृत्तिताभिरेवोपपत्तेस्तत्र समवायसिद्धिर्न भवतीत्याशयेनैव समवाये प्रमाणाभिधानम्। वृत्तितायाः किञ्चित्सम्बन्धावच्छिन्नत्वमावश्यकमिति गन्धादिनिष्ठवृत्तितावच्छेदकतया संयोगादिबाधात् समवायसिद्धिः। एवं च वायौ रूपवत्तावुद्धिप्रसङ्गोऽप्यास्तः। तस्य समवायसम्बन्धावच्छिन्नवृत्तितानिरूपिताधिकरणतावत्त्वेऽपि समवायसम्बन्धावच्छिन्नरूपत्वावच्छिन्नाधिकरणतायां वायावनङ्गीकारात्। एतेन सम्बन्धसत्त्वस्य सम्बन्धिसत्ताव्याप्यत्वेन समवायसत्त्वे तत्र रूपमप्यावश्यकं इति दूषणमपि प्रत्युक्तम्। तादृशनियमस्य बदरकुण्डसंयोगस्य बदरेऽपि सत्त्वात् सम्बन्धिनः कुण्डस्य तत्राऽभावेन व्यभिचारपराहतत्वात्। सम्बन्धित्वं सम्बन्धप्रतियोगित्वरूपमेवेति नेयमापत्तिरिति चेद्यत्रैकसंयोगव्यक्त्या परस्परं विशिष्टधीः प्रमा, तत्र प्रतियोगित्वस्याऽनुयोगित्वस्य चोभयत्रैव स्वीकरणीयतया तत्र सर्वदैवोभयवन्तावुभाविति प्रत्ययापत्तेरित्यादिकमवधेयम्।**

रूपसम्बन्धेन सिद्धसाधनं, अर्थान्तरं वा। अनन्तस्वरूपाणां सम्बन्धत्वकल्पने गौरवात्, लाघवादेकसमवायसिद्धिः।

न च समवायस्यैकत्वे वायौ रूपवत्तावुद्धिप्रसङ्गः, तत्र रूपसमवायसत्त्वेऽपि रूपाभावात्।

न चैवमभावस्याऽपि वैशिष्ट्यं सम्बन्धान्तरं सिद्धयेदिति वाच्यम्। तस्य नित्यत्वे भूतले घटानयनानन्तरमपि घटाभावबुद्धिप्रसङ्गात्, घटाभा-

दिनकरी।

सिद्धसाधनमिति—अयुतसिद्धयोः स्वरूपसम्बन्ध इति वदतः परस्येति शेषः। **अर्थान्तरं वेति**। समवायसाधने प्रवृत्तानां नैयायिकानामिति शेषः। ननु तथाऽपि समवायस्यैकत्वे किं मानमत आह—**लाघवादिति**। तथा च यथा क्षित्यादिजनकतयेश्वरो लाघवादेक एव सिद्ध्यति, तथा समवायोऽपीत्यर्थः।

रूपवत्तावुद्धीति—रूपवत्तावुद्धेः प्रमात्वप्रसङ्ग इत्यर्थः। स्पर्शसमवाय-रूपसमवाययोरैक्यादिति भावः। **तत्र**—वायौ। **रूपाभावादिति**। न च रूपसमवायसत्त्वे तेन सम्बन्धेन तत्र कथं रूपाभावः? सम्बन्धसत्त्वस्य तेन सम्बन्धेन सम्बन्धिसत्त्वव्याप्यत्वादिति वाच्यम्। रूपनिरूपितत्वविशिष्टसमवायस्यैव रूपसम्बन्धतया वायौ तदभावात्। न च विशिष्टस्याऽनतिरिक्तत्वेन विशिष्टसमवायोऽपि वायावस्तीति वाच्यम्। रूपनिरूपितत्वविशिष्टसमवायनिरूपिताधिकरणताया एव रूपसम्बन्धत्वात्, तस्या वायावभावात्। पृथिव्यां गन्धस्य समवायः, न जले इत्यादिप्रतीतेः समवायस्य नानात्वमिति तु नव्याः।

सम्बन्धान्तरं, अतिरिक्तपदार्थतयेति शेषः। **'सिद्धयेत्'**इत्यस्य भूतलादावित्यादिः। यदि वैशिष्ट्यमतिरिक्तमुररीक्रियते, तदा तन्नित्यमनित्यं वेति विकल्प्याऽऽद्ये दूषणमाह—**तस्येति**। ननु वैशिष्ट्यस्य तत्र सत्त्वेऽपि घटानयनदशायां तत्र घटाभावाभा-

रामरुद्री।

लक्षणानुपपत्तिरिति भावः। **'सिद्धसाधनं'**इत्यत्र कस्य सिद्धिरित्याकाङ्क्षोदयादाह—**अयुतेति**। ययोरेकमपराश्रितमेवाऽवतिष्ठते तावयुतसिद्धौ। **अर्थान्तर**शब्दस्य स्वानभिमतार्थसिद्धिरर्थः। तत्राऽपि कस्येत्याकाङ्क्षोदयादाह—**समवायेति। लाघवादिति**। लाघवज्ञानसहकारादित्यर्थः। कृतिजन्यत्वव्याप्यकार्यत्ववानितिपरामर्शादपि कृतेरेकत्वे लाघवमितिलाघवज्ञानसहकृतात् क्षित्यङ्कुरादिकमेककृतिजन्यमित्यनुमितिवत् सम्बन्धस्यैक्ये लाघवमितिज्ञानसहकृतात् विशेषणविशेष्यसम्बन्धविषयकत्वव्याप्यविशिष्टबुद्धित्ववती गुणक्रियादिविशिष्टबुद्धिरितिपरामर्शादपि विशेषणविशेष्ययोरेकसम्बन्धविषयिण्यनुमितिरिति समुदायार्थः।

समवायस्यैकत्वे वायौ रूपवत्तावुद्धिरापादिता मूलकारेण, सा च न सङ्गच्छते, वायावपि भ्रान्तानां रूपवत्ताप्रतीतेरतो रूपवत्तावुद्धेः प्रमात्वापत्तिपरतया तद्ग्रन्थं व्याचष्टे—**रूपवत्तेति**। तत्र हेतुमाह—**स्पर्शेति। सम्बन्धसत्त्वस्येति**। तत्प्रतियोगिकतत्सम्बन्धसत्त्वस्य तेन सम्बन्धेन तद्वत्त्वव्याप्यत्वात् प्रतियोगिमति चाऽभावासत्त्वादिति भावः।

इति तु नव्या इति। तथा च तन्मते समवायस्य रूपसम्बन्धत्वेऽपि न क्षतिः, वायौ रूपसमवायानङ्गीकारादिति भावः।

'अभावस्याऽपि वैशिष्ट्यं सम्बन्धान्तरं सिद्धयेत्'इति मूले सम्बन्धान्तरपदस्य संयोगसमवायातिरिक्तार्थकत्वे खिष्टापत्तिरेव, स्वरूपस्यैव तत्सम्बन्धत्वोपगमादतः पूरयति—**अतिरिक्तेति। उररीक्रियते**-अङ्गीक्रियत इत्यर्थः। नन्वेकघटाभावस्य नाशेऽपि घटाभावान्तरमादाय घटशून्यदेशेऽपि घट-

घस्य तत्र सत्त्वात्, तस्य च नित्यत्वात्, अन्यथा देशान्तरेऽपि घटाभाव-प्रतीतिर्न स्यात्, वैशिष्ट्यस्य च तत्र सत्त्वात्, मम तु घटे पाकरक्तताद-शायां श्यामरूपस्य नष्टत्वान्न तद्वत्ताबुद्धिः। वैशिष्ट्यस्याऽनित्यत्वे त्वन-न्तवैशिष्ट्यकल्पने तवैव गौरवम्। एवं च तत्तत्कालीनं तत्तद्भूतलादिक-मेव तत्तद्भावानां सम्बन्धः ॥ ११ ॥

॥ इति समवायनिरूपणम् ॥

दिनकरी।

वादेव न घटाभावबुद्धिरत आह—**घटाभावस्येति**। **तत्र**–घटवति भूतले। **तस्येति**। घटाभावस्येत्यर्थः। **अन्यथा**–घटाभावस्याऽनित्यत्वे। **देशान्तरेऽपि**–घटशून्यदेशेऽ-पीत्यर्थः। घटत्वावच्छिन्नाभावस्यैकविधत्वादिति भावः। **वैशिष्ट्यस्येति**। वैशिष्ट्यस्य नित्यत्वाभ्युपगमपक्ष इत्यादिः। **तत्र**–घटानयनेन घटवति। नच घटवति न घटाभावबुद्धिः, घटवत्ताज्ञानस्य प्रतिबन्धकस्य सत्त्वादिति वाच्यम्। घटवत्ताज्ञानविरहदशायां जाय-मानाया घटाभावबुद्धेः प्रमात्वप्रसङ्गादित्यत्र तात्पर्यात्। ननु सिद्धान्तिनोऽपि मते पाकेन रक्ते घटे श्यामरूपसमवायस्य सत्त्वात् श्यामरूपवत्ताधीप्रसङ्ग इत्यत आह–**मम त्विति**। द्वितीये दूषणमाह—**वैशिष्ट्यस्येति**।

ननु वैशिष्ट्यानङ्गीकारे घटाभावभूतलयोः कः सन्बन्धः? स्वरूपमिति चेत्, तथा सति घटशून्यतादशायामिव घटवत्तादशायामपि भूतले घटाभावबुद्धिस्तव मतेऽपि स्यात्, घटाभावभूतलयोस्तत्स्वरूपसम्बन्धस्य च तत्र सत्त्वादत आह–**एवं चेति। तत्तत्काली-नमिति**। घटाभाववद्भूतलमितिज्ञानकालीनमित्यर्थः। **तत्तद्भूतलादिकमिति**। यत्र यत्र भूतले घटाभावबुद्धिस्तत्तद्भूतलादिकमित्यर्थः। **तत्तद्भावानामिति**। यस्य यस्याऽभावस्य बुद्धिस्तस्य तस्येत्यर्थः। तथा च न स्वरूपमात्रं सम्बन्धः, किन्त्वीदृशः स्वरूपविशेष इति न पूर्वोक्तातिप्रसङ्ग इति भावः।

रामरुद्री।

भाववत्ताबुद्धिरुपपद्यत एवेत्याशङ्क्याऽऽह—**घटत्वावच्छिन्नेति**। **एकविधत्वादिति**। एकत्वादि-त्यर्थः। **जायमानाया घटाभावबुद्धेरिति**। घटवत्ताज्ञानदशायां घटवत्यपि भूतले भ्रमरूपा घटाभाव-वत्ताबुद्धिर्जायत एवेति न तदापत्तिः सम्भवतीत्यतस्तस्याः प्रमात्वमापादयति। **प्रमात्वेति**। नन्वेष प्रसङ्गः समवायैकत्ववादिनां मतेऽपि समान इत्याशङ्क्य **'मम तु–'** इत्यादिग्रन्थमवतारयति–**नन्विति**। **द्वितीये–वैशिष्ट्यस्याऽनित्यत्वपक्षे**।

वैशिष्ट्यानङ्गीकारे—अभावाधिकरणयोरतिरिक्तसम्बन्धानङ्गीकार इत्यर्थः। स्वरूपस्य सम्बन्धत्वे बाधकमाह—**तथा सतीति**। **'तत्तत्कालीनं तत्तद्भूतलादिकं'** इत्यत्र यदा यदा भूतले घटाभावो वर्त्तते, तत्तत्कालीनमित्यर्थो न सम्भवति, घटवत्तादशायामपि घटाभावे भूतलावृत्तित्वप्रयोजकस्य दुर्वच-त्वात्, अतस्तत्तत्कालीनमित्यस्याऽर्थमाह—**घटाभाववदिति**। **'ज्ञानकालीनं'**इत्यत्र ज्ञानपदं प्रमा-त्वेनाऽभिमतज्ञानपरं, तेन घटवत्तादशायामपि भ्रमात्मकघटाभाववत्त्वबुद्धिसम्भवेन तामादाय नोक्तदोषता-दवस्थ्यमिति ध्येयम्। नन्वेवमभावाधिकरणयोः स्वरूपमेव सम्बन्ध इति सिद्धान्तो व्याहन्येतेत्याशङ्कां निराकुरुते—**तथा चेति। स्वरूपविशेष इति**। तथा च स्वरूपसम्बन्ध इत्यस्याऽपि स्वरूपविशेषः सम्बन्ध इत्यनेव तात्पर्यात् न सिद्धान्तव्याघात इति भावः।

अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः ।

अभावं विभजते—अभावस्त्विति । **अभावत्वं**—**द्रव्यादिषट्कान्योन्याभावेति** । दिनकरी ।

नव्यास्तु वैशिष्ट्यं पदार्थान्तरमेव, भूतलं घटाभाववदिति प्रत्ययात् , स्वरूपसम्बन्धाभ्युपगमे चाऽभावाधिकरणवृत्त्यखण्डभेद–तावन्मात्रविषयकज्ञानादिकमादाय विनिगमनाविरह इत्याहुः ॥ ११ ॥ इति समवायनिरूपणम् ॥

द्रव्यादिषट्कान्योन्याभावेति । इह च द्रव्यत्वादि न प्रतियोगितावच्छेदकं, अननुगमात् , किं तु तद्गतषट्त्वसङ्ख्यैव, द्वित्रप्रतियोगिकभेदस्य द्वित्वमिवेति ध्येयम् । वस्तुतो भावत्वमेव तथा बोध्यम् ।

अत्र केचित् , भावभिन्नत्वस्याऽभावत्वे भावत्वरूपविशेषणज्ञानशून्यकाले घटो नाऽस्तीति प्रतीत्यनापत्तिः, एवमन्योन्याभावत्वस्याऽभावत्वगर्भस्याऽग्रे वक्तव्यतयाऽभाव- रामरुद्री ।

नव्यास्त्विति । ननु भूतल घटाभाववदिति प्रतीतेः स्वरूपसम्बन्धेनैवोपपत्त्या वैशिष्ट्यस्य पदार्थान्तरत्वे मानाभाव इत्यत आह–**स्वरूपसम्बन्धेति**. **अभावाधिकरणं**–तत्तद्भूतलादि, **तद्वृत्त्यखण्डभेदः**–तद्भिन्नत्वप्रकारकप्रमाविशेष्यत्वावच्छिन्नभेदः । ननु तत्तदधिकरणमात्रवृत्त्युक्तभेदस्याऽधिकरणातिरिक्तत्वे तदधिकरणव्यक्तावनन्तभेदाङ्गीकारप्रसङ्गेन तस्याऽधिकरणस्वरूपत्वमेवोचितमतस्तमादाय न विनिगमनाविरहप्रसङ्ग इत्यत आह—**तावन्मात्रेति** । वस्तुतस्तु अखण्डैकभेदेन साकमधिकरणानां न विनिगमनाविरहः सम्भवति । अधिकरणाना नानात्वेन लाघवादेकभेदस्यैव सम्बन्धत्वौचित्यादतस्तद्विषयकज्ञानादिकमादाय विनिगमनाविरहं प्रसजयति—**तावन्मात्रेत्यादि** । एतेन अनवस्थाभयेन तन्मात्रवृत्तिभेदस्यैव अधिकरणस्वरूपताऽङ्गीकरणीया, न तु भेदमात्रस्य, तथा सत्यन्योन्याभावस्यैव विलयप्रसङ्गादिति दूषण परास्तम् । द्रव्यगुणादिविषयकज्ञानव्यक्तेर्द्रव्यत्वाभावसम्बन्धत्वे गुण इव द्रव्येऽपि द्रव्यत्वाभावबुद्धिप्रसङ्गः, सम्बन्धात्मकज्ञानस्य द्रव्येऽपि विशेष्यतया सत्त्वादतो मात्रपदं, आदिना इच्छादिपरिग्रहः । युक्त चैतत् समवायनानात्ववादिना नव्याना मते, अन्यथाऽतिरिक्तनानासमवायकल्पनामपेक्ष्य कल्पितस्वरूपाणामेव सम्बन्धत्वौचित्येन तन्मतेऽतिरिक्तसमवायस्यैवाऽसिद्धिप्रसङ्गादिति मन्तव्यम् । अत्र च **'आहुः'**इत्यनेनाऽस्वरसोद्भावनं, तद्बीजं तु तदधिकरणविषयकनानाज्ञानव्यक्तीनां सम्बन्धत्वकल्पनामपेक्ष्यैकस्यास्तद्व्यक्तेस्तथात्वे लाघवात् न विनिगमनाविरहः, यत्किञ्चिदेकज्ञानव्यक्तेरेव तथात्वे तज्ज्ञानव्यक्तयभावदशायां सम्बन्धाभावेनाऽभावविशिष्टबुद्ध्यनुदयापत्तेः, नित्यज्ञानव्यक्तेस्तथात्वे च तस्याः सर्वविषयकत्वेन प्रतियोगिमत्यप्यभावबुद्धिप्रसङ्ग इति बोध्यम् ॥ ११ ॥ इति समवायनिरूपणम् ॥

षट्त्वसङ्ख्यैवेति । यद्यपि घटपटोभयभेदस्य प्रत्येकं घटपटयोरिव षट्त्वावच्छिन्नभेदस्याऽभावत्वे तस्य प्रत्येकं द्रव्यादावपि सत्त्वेन तेषामप्यभावत्वापत्तिः, तथाऽपि पर्याप्तिसम्बन्धेन षट्त्वावच्छिन्नभेदस्य द्रव्यादौ सत्त्वेऽप्यपेक्षाबुद्धिरूपषट्त्वस्य विषयतयाऽवच्छेदकत्वान्न भावेष्वतिप्रसङ्ग इति मन्तव्यम् । ननु व्यासज्यवृत्तिधर्माणां पर्याप्तिसम्बन्धेनैव प्रकारत्वमावश्यकमिति नियमः, अन्यथा द्वित्वस्य समवायेन प्रत्येकमपि सत्त्वेनैको द्वाविति प्रतीत्यापत्तेः । न चैको द्वाविति प्रतीतिविरहेऽपि एको द्वित्ववानिति प्रतीतेरिष्टतया समवायादिनाऽपि व्यासज्यवृत्तिधर्माणां प्रकारत्वमावश्यकमिति वाच्यम् । द्वित्ववानिति प्रतीतौ मतुबर्थसमवायस्यैव प्रकारत्वात् , तथा च षड्भिन्नमिति प्रतीतौ पर्याप्तिसम्बन्धेनैव षट्त्वस्य प्रकारत्वानुभवात् षट्त्वावच्छिन्नभेदो निष्प्रमाणक एवेत्यभिप्रायेणाऽह—**वस्तुत इति**. **तथा बोध्यमिति**. अभावत्वं बोध्यमित्यर्थः । यद्यपि द्रव्यादिभेदषट्कस्याऽभावत्वे न कोऽपि दोषः, तथाऽपि गौरवात् द्रव्यादीनां षण्णां पदार्थानामज्ञानेऽपि अभावत्वप्रतीतेश्च तदुपेक्षितमिति ध्येयम् ।

अभावत्वस्याऽखण्डोपाधित्वं वदतां मतमुपन्यस्यति–**अत्र केचिदिति**. **अभावत्वगर्भस्येति**.

भाववत्त्वम् । संसर्गेति। **संसर्गाभावान्योन्याभावभेदादित्यर्थः। अन्योन्याभा-**

दिनकरी ।

त्वस्याऽन्योन्याभावत्वगर्भत्वे अन्योन्याश्रयापत्तिः, एवमभावत्वस्य भावभिन्नत्वरूपत्वेऽभावो न भाव इति वाक्याच्छाब्दबोधानुपपत्तिश्च, उद्देश्यतावच्छेदकविधेययोरैक्यादिति, तस्मादखण्डोपाधिरनुयोगिताविशेषो वाऽभावत्वमिति वदन्ति ।

अत्र नव्याः, अभावत्वस्याऽखण्डोपाधित्वे प्रमाणाभावः, किं तु भावभिन्नत्वं समवाय-सामानाधिकरण्यान्यतरसम्बन्धावच्छिन्नप्रतियोगिताकसत्ताभावरूपं, तच्च पूर्वानुपस्थितमपि प्रकारः, एवं च घटाभावपटाभावप्रतीतीनामभावांशेऽनुगतत्वमुपपद्यते । न च विषयतानवस्था, सत्तात्यन्ताभावव्यक्तेः स्वरूपत एव प्रकारत्वोपगमात् , अत एव सत्तारूपप्रतियोगिज्ञानं विनाऽपि घटो नाऽस्तीति बुद्धौ स प्रकारः, अभावत्वप्रकारकप्रत्यक्ष एव प्रतियोगिधियो हेतुत्वात् , अन्यथा इदं तम इति प्रतीत्यनापत्तेः । न च सत्ताभावरूपस्याऽभावत्वस्वाऽनुपस्थितस्य प्रकारत्वे विशेषणधियो हेतुत्वे व्यभिचार इति वाच्यम् । विशेष-

रामरुद्री ।

तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकत्वमात्रस्याभावलक्षणत्वे घटत्वादौ घटत्वाभाववद्भेदरूपेऽतिव्याप्तिवारणायाऽभावत्वनिवेशस्याऽऽवश्यकत्वादिति भावः। **अन्योन्याश्रयापत्तिरिति** । अभावत्वज्ञानेऽन्योन्याभावत्वज्ञानस्य अन्योन्याभावत्वज्ञाने चाभावत्वज्ञानस्याऽपेक्षितत्वादिति भावः । **उद्देश्यतावच्छेदकेत्यादि** । अभेदसंसर्गकशाब्दबोधे उद्देश्यतावच्छेदकविधेययोरैक्यस्येव भेदसंसर्गकशाब्दबोधे उद्देश्यतावच्छेदकविधेयतावच्छेदकयोरैक्यस्याऽपि निराकाङ्क्षताप्रयोजकत्वादिति भावः । अभावत्वस्याऽखण्डोपाधित्वं न विचारसहं, तत्साधकमानाभावादित्यभिप्रेत्याह—**अनुयोगितात्रिशेषो वेति** । ससर्गानुयोगिताव्यावर्त्तनाय **विशेष**पदम् ।

प्रमाणाभाव इति । ननु घटाभावादौ अभाव इत्यनुगतप्रतीतिरेव तत्साधिका भविष्यतीत्याशङ्कायां अनुगतप्रतीतिं प्रकारान्तरेणोपपादयति—**किं त्विति** । नन्वेवमभावत्वस्याऽन्योन्याभावगर्भतयोक्तान्योन्याश्रयापत्तिरित्यत आह—**समवायेति** । **'सत्ताभावरूपं'** इत्यस्य अभावत्वमिति शेषः । **नन्वेवमपि** सत्तानुपस्थितिदशायां घटो नाऽस्तीत्यादिप्रतीत्यनुपपत्तिरत आह—**तच्चेति** । ननु अनुयोगिताविशेषस्याऽभावत्वोपगमे लाघवात्तदेव कुतो नाऽङ्गीकृतमित्यत आह—**एवं चेति** । **अभावांशेऽनुगतत्वमिति** । एकधर्मप्रकारकत्वमित्यर्थः । तथा चाऽभावत्वस्याऽनुयोगितारूपत्वे तस्या घटाभावादौ भिन्नतया अभावप्रतीतिरनुगतत्वं न स्यादिति भावः । ननु जातीतरस्य सत्ताभावस्य स्वरूपतोभानासम्भवेन अभावत्वेनैव तस्य प्रकारता वाच्या, तच्च सत्ताभावरूपं, तदपि पुनः सत्ताभावरूपाभावत्वेन प्रकार इत्यङ्गीकरणीयं, तथा चाऽभावप्रतीतौ विषयतानन्त्यमिति शङ्कां निराकुरुते—**न चेति** । विशेषणस्य सत्ताभावस्य एकस्यैव तत्र तत्र प्रकारत्वात् विषयानवस्था नोक्ता, अपि तु विषयतानवस्थेति बोध्यम् । ननु सत्ताभावस्य स्वरूपतः प्रकारत्वोपगमेऽपि सत्तोपस्थितिशून्यकाले घटो नाऽस्तीत्यादिप्रतीतिरनुपपन्नैव, अभावज्ञाने प्रतियोगिज्ञानस्य हेतुतया सत्ताभावभानासम्भवादित्यत आह—**अत एवेति । प्रत्यक्ष एवेति** । अभावविषयकशाब्दबोधादौ प्रतियोगिज्ञानानपेक्षणात् **प्रत्यक्ष** इत्युक्तम् । इदमितिप्रत्यक्षविषयतमस्त्वं तु न तेजोऽभावत्वरूपं, अपि तु तेजोऽभावनिष्ठतद्वयक्तित्वमेव, नाऽतस्तेजोज्ञानं विना तादृशप्रतीत्यनुपपत्तिः । **ननु** सत्ताभावस्य पूर्वानुपस्थितस्य प्रकारत्वोपगमे विशिष्टबुद्धित्वावच्छिन्नं प्रति **विशेषणज्ञानत्वेन** हेतुतायां व्यभिचार इत्याशङ्कायामाह—**विशेषणभेदेनेति** । अयं भावः, विशिष्टबुद्धित्वं हि सप्रकारकबुद्धित्वादन्यदुर्वचम् , विशेषणत्वमपि प्रकारत्वादतिरिक्तं, तथा चोक्तकार्यकारणभावे सति घटज्ञानात् पट**विशिष्टबुद्धेरापत्तिर्घटस्याऽपि** क चित् प्रकारत्वात् , अतो घटविशिष्टबुद्धिं प्रति घटज्ञानत्वेन, पटविशिष्ट-

प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च ॥१२॥

वस्यैकविधत्वात् तद्विभागाभावात् संसर्गाभावं विभजते—प्रागभाव इति। **संसर्गाभावत्वमन्योन्याभावभिन्नाभावत्वम्। अन्योन्याभावत्वं तादात्म्यस-**

दिनकरी।

णभेदेन हेतुताया भिन्नत्वेन तत्र तद्धेतुत्वानुपगमात्, फलानुरोधित्वात् कल्पनाया इति प्राहुः।

'संसर्गान्योन्याभावभेदतः' इति मूलादेकः संसर्गाख्योऽपरोऽन्योन्याभाव इति प्रतीयते, तच्चाऽयुक्तं, संसर्गस्याऽभावत्वानङ्गीकारादित्यत आह—**संसर्गाभावेति**। तथा च द्वन्द्वान्ते श्रूयमाणस्याऽभावपदस्य प्रत्येकं सम्बन्धात् संसर्गाभावोऽन्योन्याभावश्चेति मूलार्थ इति भावः। क्रमेण द्वयोरभावयोर्लक्षणमाह—**संसर्गाभावत्वमिति**। अन्योन्याभावेऽतिव्याप्तिवारणायाऽन्योन्याभावभिन्नेति। घटादावतिव्याप्तिवारणायाऽभावपदम्। एवमग्रेऽपि। **तादात्म्येति**। तादात्म्यत्वेन तादात्म्यावच्छिन्नत्वं प्रतियोगितायां विवक्षितम्। तेन

रामरुद्री।

बुद्धिं प्रति पटज्ञानत्वेन विशिष्यैव कार्यकारणभावः स्वीकरणीय इति। **तत्रेति**। अभावत्वविशिष्टबुद्धावित्यर्थः। **तद्धेतुत्वेति**। अभावत्वज्ञानस्य हेतुत्वानुपगमादित्यर्थः। ननु सर्वत्र विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वे अभावत्वविशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वाकल्पने बीजाभाव इत्यत आह—**फलेति**। विशेषणज्ञानं विना विशिष्टबुद्ध्यनुत्पादः फलम्, तदनुरोधित्वात् कार्यकारणभावकल्पनाया इति भावः। घटादिज्ञानमन्तरा घटादिविशिष्टबुद्ध्यनुदयात् तत्र कार्यकारणभावः कल्प्यते, अनुपस्थिताभावत्वविशिष्टबुद्ध्युदयादत्र न कल्प्यते इति भावः।

द्वन्द्वान्त इति। अथाऽत्र संसर्गान्योन्यौ च तौ अभावौ चेति विग्रहो न सम्भवति, संसर्गस्याऽभावत्वानभ्युपगमात्। न चाऽत्र संसर्गपदं तादात्म्यभिन्नसम्बन्धपरं, अन्योन्यपदं च तादात्म्यसम्बन्धपरं, तथा च संसर्गान्योन्याभ्यामभावाविति व्युत्पत्त्या तादात्म्यभिन्नसम्बन्धावच्छिन्नप्रतियोगिताक—तादात्म्यावच्छिन्नप्रतियोगिताकाभावयोर्लाभान्नोक्तदोषः, तृतीयाया अवच्छिन्नप्रतियोगिताकत्वार्थकत्वादिति वाच्यम्। एवमपि ध्वंसप्रागभावयोः प्रतियोगित्वस्य सम्बन्धानवच्छिन्नत्वमते तयोरसङ्ग्रहापातादिति चेन्न। संसर्गपदस्य तादात्म्यानवच्छिन्नप्रतियोगितारूपससर्गपरत्वेन अन्योन्यपदस्य च तादात्म्यावच्छिन्नप्रतियोगितापरत्वेन तयोरभावाविति व्युत्पत्त्या तादृशप्रतियोगिताद्वयनिरूपकावभावावित्यर्थलाभान्नाऽसङ्गतिः, निरूपकत्वस्यैव षष्ठ्यर्थत्वादिति। यद्वा संसर्गपदं संसर्गपदपूर्वकपरं, अन्योन्यपदमपि तत्पदपूर्वकपरं, अभावपदञ्च अभावपदवाच्यपरं, तथा च संसर्गान्योन्यौ च तौ अभावाविति व्युत्पत्त्या संसर्गान्योन्यपदपूर्वकाभावपदवाच्याविति पर्यवसितार्थलाभः। एतेनोक्तवाक्यादेवाऽभावद्वययोर्लक्षणलाभादाकाङ्क्षाविरहेणोत्तरत्राऽभावद्वयलक्षणप्रतिपादनासङ्गतिरित्यपि परास्तम्। **एवमग्रेऽपीति**। अन्योन्याभावलक्षणेऽपि भावेऽतिव्याप्तिवारणायैवाऽभावपदमित्यर्थः। **तादात्म्यत्वेनेति। तादात्म्यं**—तद्गतोऽसाधारणधर्मः। तादात्म्यत्वेन तादात्म्यावच्छिन्नत्वविवक्षायाः फलमाह—**तेनेति। संयोग्यत्यन्ताभाव इति।** संयोगितादात्म्यस्य संयोगरूपतया सयोगसम्बन्धावच्छिन्नप्रतियोगिताकात्यन्ताभावे यथाश्रुतेऽतिव्याप्तिः, इदानी तु तादात्म्यत्वावच्छिन्ना तादात्म्यनिष्ठा या संसर्गविधयाऽवच्छेदकता, तन्निरूपकप्रतियोगिताकत्वलाभेन अत्यन्ताभावीयसंयोगनिष्ठप्रतियोगितावच्छेदकतायाः संयोगत्वेनैवाऽवच्छिन्नत्वात् नाऽतिव्याप्तिरिति भावः। यद्यपि संयोगितादात्म्यस्य संयोगरूपत्वेन तत्तादात्म्यत्वमपि सयोगत्वमेवेत्यतिव्याप्तिर्निरासो दुर्घट एव, तथापि संसर्गतावच्छेदकं तादात्म्यत्वं न संयोगत्वादिरूप, किं तु संयोग्यादिवृत्त्यसाधारणधर्मत्वमेव, अतोऽत्यन्ताभावीयप्रतियोगितायां संयोगस्य संयोगत्वेनैवाऽवच्छेदकत्वात् असाधा-

म्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम्। विनाश्यभावत्वं प्रागभावत्वम्।

दिनकरी

संयोगावच्छिन्नप्रतियोगिताके संयोग्यत्यन्ताभावे नाऽतिव्याप्तिः। प्रागभावस्य लक्षणमाह— **विनाश्यभावत्वमिति**। अत्र ध्वंसेऽतिव्याप्तिवारणाय विनाशीति।

ननु प्रागभावसत्त्वे किं मानमिति चेदत्रोत्पन्नस्य पुनरुत्पादभिया तत्सिद्धिरिति **प्राञ्चः**।

के चित्तु जातो घटध्वंस इति प्रत्यक्षबलेन नाशोऽतिरिच्यते न तु प्रागभावः, इहेदानीं घटप्रागभाव इति लोकानां प्रत्ययाभावात्। न च तद्घटोपधायकतत्कपालतत्संयोगादीनां तद्घटोत्पत्तिकालेऽपि सत्त्वात् पुनरपि तद्घटोत्पत्त्यापत्तिः, प्रागभावाङ्गीकारे च तदभावादेव न पुनस्तदुत्पत्तिरिति वाच्यम्। जन्यद्रव्यत्वावच्छिन्नं प्रति जनकतया क्लृप्तस्य समवायसम्बन्धावच्छिन्नप्रतियोगिताकद्रव्याभावस्य विरहेणैव तदापत्त्यसम्भवात्। नच जन्यद्रव्याभावस्य(१) जन्यद्रव्योत्पत्तिकालीनोत्पत्तिकध्वंसाभावस्य वा हेतुत्वमित्यत्र विनिगमनाविरहेण तादृशध्वंसाभावानां च कारणतामपेक्ष्य लाघवादेक एव प्रागभावो हेतुः कल्प्यत इति

रामरुद्री।

रणधर्मत्वेनाऽवच्छेदकत्वविरहान्न तत्राऽतिव्याप्तिः, भेदप्रतियोगितावच्छेदकसंसर्गस्यैव असाधारणधर्मत्वेन भानाभ्युपगमात्, अन्यथाऽत्यन्ताभावान्योन्याभावयोर्भेदासम्भवादिति भावः।

तत्सिद्धिरिति। प्रागभावानुमितिरित्यर्थः। तदनुमानप्रकारश्च—अयं घटः स्वोत्पत्तिक्षणावृत्तिकारणजन्यः, स्वोत्पत्तिद्वितीयक्षणानुत्पन्नत्वादित्येवंरूप इत्यनुमानबलाच्चेतरेषां बाधात् प्रागभावसिद्धिः। तस्य सामग्रीनाश्यत्वेन प्रतियोग्युत्पत्तिक्षणावृत्तित्वादिति भावः।

दीधितिकृतां मतमुपन्यस्यति। **केचिदिति। लोकानामिति**। पण्डित—पामर—साधारणानामित्यर्थः। प्रागभावस्य प्रत्यक्षत्वे पामराणामपि तत्प्रत्यक्षापत्तिरिति भावः। न चाऽत्र घटो भविष्यतीत्यादि प्रतीतिरेव प्रागभावे मानं, वर्त्तमानकालवृत्तिप्रागभावप्रतियोगित्वस्यैव भविष्यत्त्वरूपत्वादिति वाच्यम्। वर्त्तमानकालध्वंसाधिकरणकालोत्पत्तिकत्वस्यैव भविष्यत्त्वरूपत्वाभ्युपगमात्, उत्पत्तिश्च आद्यक्षणसम्बन्धः, क्षणे आद्यत्वं च तदधिकरणक्षणध्वंसानधिकरणत्वमिति भावः। **जनकतया क्लृप्तस्येति**। प्रागभावकारणत्ववादिना जन्यद्रव्यं प्रति द्रव्याभावस्य किमिति कारणत्वं कल्पनीयमिति तु नाऽऽशङ्कनीयं, यत्र एतद्घटनाशानन्तरं तदारम्भककपालाभ्यां घटान्तरमुत्पद्यते, तत्र पूर्वघटोत्पत्तिद्वितीयक्षणे पुनर्घटोत्पत्तेरन्यथा वारयितुमशक्यत्वात्, घटकारणीभूततत्तत्प्रागभाव—कपालसंयोगादीनां सत्त्वात्। न च द्वितीयघटारम्भककपालद्वयसंयोगव्यक्तेस्तदानीमसत्त्वान्न तदापत्तिरिति वाच्यम्। यतो हि न द्वितीयघटव्यक्त्युत्पत्तिरापाद्यते, येन तत्कपालसंयोगव्यक्तेरभावात् न तदापत्तिरिति शक्यते वक्तुं, न वा पूर्वघटव्यक्तेरुत्पत्तिरापाद्यते, येन तत्प्रागभावाभावात् न तदापत्तिरिति शक्यते वक्तुं, अपि तु घटत्वावच्छिन्नोत्पत्तिरेवाऽऽपाद्यते, तत्कारणीभूतानां घटप्रागभावादीनां सर्वेषां सत्त्वादिति भावः। यत्तु यत्र खण्डघटोत्पत्तिर्भविष्यति, तत्र महाघटसत्त्वेदशायामेव तत्प्रागभावादिबलात्तदुत्पत्त्यापत्तिवारणाय द्रव्याभावस्य कारणत्वमावश्यकमिति। तत्तुच्छम्। खण्डघटं प्रति महाघटनाशस्य कारणत्वेन तदापत्त्यसम्भवादिति ध्येयम्। **तादृशद्रव्याभावस्येति**। समवायावच्छिन्नप्रतियोगिताकद्रव्याभावस्येत्यर्थः। **तादृशध्वंसाभावानामिति**। जन्यद्रव्योत्पत्तिकालोत्पत्तिकध्वंसाभावानामित्यर्थः। अत्रच बहुवचनेन द्रव्याभावत्वापेक्षया तादृशध्वंसाभावस्य गुरुतया न तेन रूपेण कारणतामादाय विनिगमनाविरहः प्रसज्यते, अपि तु तत्तद्द्रव्यं प्रति तदुत्पत्तिकालोत्पत्तिकध्वंसव्यक्तीनां तत्तद्व्यक्तित्वेनैवाऽभावानां कारणता वाच्या, तथा चाऽनन्तकार्यकारणभावापत्त्या न विनिगमनाविरह इति सूचितम्। न च तर्हि

(१) **तादृशद्रव्याभावस्य-इति रामरुद्रीसम्मतः पाठः।**

एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते।

जन्याभावत्वं ध्वंसत्वम्। नित्यसंसर्गाभावत्वमत्यन्ताभावत्वम्। यत्र तु

दिनकरी।

वाच्यम्। प्रागभावकल्पनेऽपि तत्कालोत्पत्तिकानन्तपदार्थप्रतियोगिकानामनन्तानां प्रागभावानां विनिगमनाविरहेण हेतुताया दुर्वारत्वात्, तथा च प्रागभावरूपधर्मिकल्पनागौरवं परमतिरिच्यते इत्याहुः। **अत्र वदन्ति**। स्वानधिकरणेषु तन्तुषु पटोत्पत्तिवारणाय सहस्रतन्तुकपटस्थले बहूनां तन्तूनां तत्संयोगानां च तत्तद्व्यक्तित्वेन हेतुत्वकल्पनापेक्षयैका प्रागभावस्य हेतुता लघीयसी। अथैवमपि द्वित्रिचतुर्षु तन्तुषु सहस्रतन्तुकपटोत्पत्त्यापत्तिः। न च चरमसंयोगव्यक्तेस्तद्व्यक्तित्वेन हेतुत्वान्नाऽऽपत्तिरिति वाच्यम्। तथा सति स्वानधिकरणेषु तन्तुष्वपि चरमसंयोगाभावादेव पटोत्पत्तिवारणसम्भवे प्रागभावकल्पनानौचित्यादिति चेन्न। चरमसंयोगस्य समवायघटितसामानाधिकरण्यप्रत्यासत्त्या हेतुत्वे तन्त्वन्तरेऽपि समवायेन पटोत्पत्त्या तत्र समवायेन चरमसंयोगाभावेन व्यभिचारापत्त्या समवायसम्बन्धेन तत्पटत्वावच्छिन्नं प्रति चरमसंयोगव्यक्तेः कालिकसम्बन्धेन हेतुता वाच्या, तथा च स्वानधिकरणतन्तुष्वपि कालिकविशेषणतया चरमसंयोगस्य सत्त्वात् पटोत्पत्तिवारणाय प्रागभावहेतुत्वस्याऽऽवश्यकत्वादिति। एवमप्यस्तु कश्चिदतिरिक्तः पदार्थः, तथाऽपि तस्य सप्रतियोगिकत्वे प्रमाणाभाव इति तु तत्त्वम्। ध्वंसस्य लक्षणमाह—**जन्याभावत्वमिति**। प्रागभावेऽतिव्याप्तिवारणाय जन्येति। अत्यन्ताभावस्य लक्षणमाह—**नित्येति**। ध्वंसादिवारणाय नित्यपदम्। नन्वत्यन्ताभावस्य नित्यत्वे घटानयनानन्तरमपि भूतले घटो नाऽस्तीति प्रतीत्यापत्तिरित्यत आह—**यत्र त्विति**। तथा च सम्बन्धाभावादेव

रामरुद्री।

ध्वंसाभावानां कारणतैव निर्युक्तिकेति वाच्यम्। ध्वंसप्रागभावाधिकरणे अत्यन्ताभावानभ्युपगन्तृमते जन्यद्रव्यानुत्पादप्रसङ्गेन अगत्या द्रव्याभावमुपेत्य ध्वंसाभावानां कारणतायाः स्वीकरणीयत्वात्, तथा चोत्पन्नस्य पुनरुत्पादवारणाय प्रागभावानङ्गीकारे नवीनैर्द्रव्याभावस्य, प्राचीनैः ध्वंसाभावानां हेतुता कल्पनीया, प्रागभाववादिना तु तत् सर्वमुपेत्य प्रागभाव एव हेतुत्वेन कल्प्यत इति तद्ग्रन्थाभिप्रायः। वस्तुतस्तु समवायेन द्रव्याभावस्य क्लृप्तस्योभयवादिसिद्धस्य जन्यद्रव्यत्वावच्छिन्नं प्रति जनकतया जनकत्वेनाङ्गीकरणीयतया अभावादित्यत्रापि षष्ठ्यन्तस्य पुनरन्वयेन क्लृप्तस्य द्रव्यस्याभावादित्यर्थो लभ्यते। तथाच प्रागभाववादिना द्रव्यस्य प्रतिबन्धकत्वानुपगमेऽपि क्लृप्तत्वेन द्रव्याभावस्यैव कारणत्वं वक्तुमुचितम् नत्वक्लृप्तस्य प्रागभावस्येति पूर्वग्रन्थभावः। एवञ्च कपालद्वयसंयोगाद्घटोत्पत्तिदशायां कापालिकादिष्वपि घटोत्पत्तिः स्वीकरणीया। अन्यथा कपालिकायां समवायेन घटाभावप्रत्यक्षप्रसङ्गादिति तद्द्रव्यानारम्भकद्रव्याभावस्यैव कारणता वाच्या। तथाच तत्तद्ध्वंसाभावानामपि विनिगमनाविरहेण कारणतापत्तिशङ्कापि सङ्गतैवेति युक्तमुत्पश्यामः। एवं जन्यद्रव्यं प्रति द्रव्योत्पत्तिकालिकोत्पत्तिकध्वंसाभावस्य हेतुत्वेन तदटनाशानन्तरं तदारम्भककपालाभ्यां घटान्तरोत्पत्तिरपि न स्यात्, तादृशध्वंसाभावरूपकारणाभावादित्यादिदूषणानां सत्त्वेऽपि तेषां स्पष्टत्वेन तान्युपेत्य दूषणान्तरमाह—**प्रागभावेति। अत्रवदन्तीति**। प्राचीनानुयायिन इति शेषः। **तत्संयोगानां**—तन्तुसंयोगानामित्यर्थः। **अथैवमपीति**। प्रागभावस्य हेतुत्वेऽपीत्यर्थः। **उत्पत्त्यापत्तिरिति**। तत्तत्संयोगव्यक्तीनां त्वया हेतुतानभ्युपगमात् प्रागभावस्य तदानीमपि सत्त्वादिति। तत्संयोगव्यक्तीनां हेतुत्वोपगमे च व्यर्थं प्रागभावकल्पनमिति भावः। **स्वानधिकरणेष्विति**। सहस्रतन्तुकपटानधिकरणेष्वित्यर्थः। **तन्त्वन्तरेऽपीति**। चरमसंयोगाधिकरणतन्तुभिन्नसहस्रतन्तुकपटाधिकरणतन्तावपीत्यर्थः। दीधितिकृतामभिप्रेतमाह—**एवमप्यस्त्विति। सप्रतियोगिकत्व इति**।

भूतलादौ घटादिकमपसारितं पुनरानीतं च, तत्र घटकालस्य सम्बन्धाघटकत्वादत्यन्ताभावस्य नित्यत्वेऽपि घटकाले न घटात्यन्ताभावबुद्धिः। तत्रोत्पादविनाशशाली चतुर्थोऽयमभाव इति के चित्।

अत्र ध्वंसप्रागभावयोरधिकरणे नाऽत्यन्ताभाव इति प्राचां मतम्, श्यामघटे रक्तो नास्ति, रक्तघटे श्यामो नाऽस्तीति धीश्च प्रागभावं ध्वंसं चाऽवगाहते न तु तदत्यन्ताभावं, तयोर्विरोधात्। नव्यास्तु—तत्र विरोधे मानाभावात् ध्वंसादिकालावच्छेदेनाऽप्यत्यन्ताभावो वर्तत इत्याहुः।

दिनकरी।

घटानयनानन्तरं घटात्यन्ताभावबुद्धिर्नेति भावः।

कालविशेषविशिष्टस्वरूपस्य संसर्गत्वोपगमादेव घटवति घटो नाऽस्तीति प्रतीत्यभावोपपत्तौ चतुर्थसंसर्गाभावे मानाभाव इत्यस्वरसः **'के चित्'** इत्यनेन सूचितः।

ननु माऽस्तु घटकाले घटात्यन्ताभावबुद्धिः, घटोत्पत्तेः प्राक्काले तु स्यादित्याशङ्क्याऽऽह—**अत्रेत्यादिना**। ननु तर्हि रक्तरूपप्रागभावाधिकरणे श्यामघटे, श्यामरूपध्वंसाधिकरणे च रक्तघटे कथं रक्तो नास्ति श्यामो नाऽस्तीति च प्रतीतिः? ध्वंसप्रागभावयोरधिकरणेऽत्यन्ताभावस्याऽसत्त्वादित्यत आह—**श्यामघट इति। तत्रेति।** ध्वंसप्रागभावयोरित्यर्थः। अत्यन्ताभावेन सहेति शेषः। तथा च नव्यमते पूर्वपक्षिकथितशङ्कायामिष्टापत्तिरेवेति भावः।

युक्तं चैतत्, कथमन्यथा पूर्वमग्रेऽपि रक्ते मध्ये श्यामे च घटे रक्तं रूपं नाऽस्तीत्याकारकप्रत्ययः? तस्य सामान्याभावावगाहित्वात्। न चेदृशप्रत्ययो रक्तिमध्वंसाश्रयावगाही, पूर्वापररक्तिमध्वंसप्रागभाववति रक्तेऽपि तथा प्रत्ययप्रसङ्गात्। न च रक्तत्वावच्छिन्नप्रतियोगिताकत्वं ध्वंसप्रागभावयोरव्याप्यवृत्ति, तेनाऽन्तरा श्यामे रक्तं रूपं नाऽस्तीति प्रत्ययः, तदा ध्वंसप्रागभावयोः सामान्यावच्छिन्नप्रतियोगिताकत्वस्वीकारात्, न तु पूर्वापररक्तिमध्वंसप्रागभाववति रक्ते, तत्र तदनभ्युपगमादिति वाच्यम्। विनिगमनाविरहेण पदार्थान्तरध्वंसप्रागभावयोरपि तत्स्वीकारप्रसङ्गेन गौरवात्, तदपेक्षयाऽत्यन्ताभावस्याऽन्तरा

रामरुद्री।

तथा च तस्याऽभावत्वे मानाभावेन न प्रागभावसिद्धिरिति भावः।

कथं रक्तो नाऽस्तीति। नाऽस्तीत्यादिप्रतीतेरत्यन्ताभावविषयकत्वादित्याशङ्क्याऽऽह—**तत्रेति।** नाऽस्तीति प्रत्ययस्येत्यर्थः। **सामान्याभावावगाहित्वात्**—सामान्यधर्माऽवच्छिन्नप्रतियोगिताकाभावविषयकत्वादित्यर्थः। ध्वंसप्रागभावयोश्च सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वानङ्गीकारादिति शेषः—ननु नाऽस्तीति प्रत्ययस्य सामान्यधर्मावच्छिन्नप्रतियोगिताकाभावमात्रविषयकत्वे मानाभाव इत्याशङ्क्य निराचष्टे **न चेति। पूर्वापरेति।** पूर्वं रक्तः, ततः श्यामः, ततो रक्तः, ततः श्यामः, ततो रक्तो यो घटः, तस्मिन् मध्यरक्तादशायामित्यर्थः। क्रमिकरक्तरूपत्रयस्थले तु नैयमापत्तिः सम्भवति, तादृशरक्तध्वंसप्रागभावयोर्नाऽस्तीत्याकारकप्रतीतिनियामकत्वानङ्गीकारसम्भवात्, उक्तस्थले तु श्यामतादशायां तादृशप्रतीत्या तयोरपि तादृशप्रतीतिनियामकत्वस्याऽऽवश्यकत्वादिति ध्येयम्। **अव्याप्यवृत्तीति।** कालिकाव्याप्यवृत्तीत्यर्थः। **पदार्थान्तरध्वंसेति।** रक्तरूपध्वंसोत्पत्तिकालोत्पत्तिकतत्समानाधिकरणवायुसंयोगादिध्वंसेनेत्यर्थः। **गौरवादिति।**

सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ॥ १३ ॥

नन्वस्त्वभावानामधिकरणात्मकत्वं, लाघवादिति चेन्न। अनन्ताधिकरणात्मकत्वकल्पनापेक्षयाऽतिरिक्तत्वकल्पनाया एव लघीयस्त्वात् । एवं चाऽऽधाराधेयभावोऽप्युपपद्यते, एवं च तत्तच्छब्दरसगन्धाद्यभावानां प्रत्यक्षत्वमप्युपपद्यते । अन्यथा तत्तद्धिकरणानां तत्तदिन्द्रियाग्राह्यत्वात् प्रत्यक्षत्वं न स्यात् । एतेन ज्ञानविशेष-कालविशेषाद्यात्मकत्वमत्यन्ताभावस्येति प्रत्युक्तम्, अप्रत्यक्षत्वापत्तेः ॥ इत्यभावपदार्थविभागग्रन्थः ॥

इदानीं पदार्थानां साधर्म्यं वैधर्म्यं च वक्तुं प्रक्रमते—सप्तानामिति । **समानो धर्मो येषां ते सधर्माणः, तेषां भावः साधर्म्यं, समानो धर्म इति फलितोऽर्थः । एवं विरुद्धो धर्मो येषां ते विधर्माणः, तेषां भावो वैधर्म्यं, विरुद्धो धर्म इति फलितोऽर्थः । ज्ञेयत्वं ज्ञानविषयता, सा च सर्वत्रैवाऽस्ति ईश्वरज्ञानविषयतायाः केवलान्वयित्वात् ।**

दिनकरी ।

श्यामादौ सम्बन्धत्वकल्पनेनैव लाघवादित्यन्यत्र विस्तरः ।

ननु 'अभावस्तु द्विधा–' इत्यादिविभागोऽनुपपन्नः, अभाव एव मानाभावादित्यभिप्रायेण प्राभाकरः शङ्कते–**नन्विति** ।

अभावस्याऽधिकरणात्मकत्वे गौरवं प्रदर्शयितुं अनन्तेत्युक्तम् । **अतिरिक्तेति** । भावातिरिक्तेत्यर्थः । अभावस्याऽधिकरणात्मकत्वेऽभेदे आधाराधेयभावानुपपत्तिरूपदोषः, सोऽप्यस्मिन् मते नेत्याह–**एवं चेति** । अधिकरणापेक्षयाऽतिरिक्तत्वे चेत्यर्थः । नन्वभावाधिकरणकाभावस्याऽधिकरणात्मकत्वे यथाऽऽधाराधेयभावोपपत्तिः, तथा सर्वत्राऽप्यस्तित्वत्यतो दूषणान्तरमाह–**एवं चेति । अन्यथा**—अभावस्याऽधिकरणात्मकत्वे । **एतेन**–वक्ष्यमाणदूषणेन ॥ इत्यभावपदार्थविभागग्रन्थः ॥

परस्परधर्मतापन्नानां सप्तपदार्थानामेव परस्परभेदकत्वं ज्ञापयितुमाह–**इदानीमिति ।** पदार्थनिरूपणानन्तरमित्यर्थः । तदनिरूपणे तत्तत्पदार्थघटितस्य तत्तत्पदार्थस्य साधर्म्यतया निरूपणासम्भवादिति भावः । समानो धर्मः सधर्मः, तस्य भावः साधर्म्यम्, एवं वैधर्म्यमित्यत्राऽपि भ्रमवारणाय बहुव्रीहिमाह—**समानो धर्मो येषामिति । केवलान्वयित्वादिति ।** विषयभेदेन विषयताया भेदेऽपि ज्ञानविषयतात्वेन केवलान्वयित्वमस्त्येवेति भावः । एवमग्रेऽपि ।

रामरुद्री ।

विनिगमनाविरहेणाऽनन्तध्वंसादौ रक्तत्वावच्छिन्नप्रतियोगिताकत्वकल्पनापत्त्या गौरवादित्यर्थः ।

अभावस्य अधिकरणरूपता मूले शङ्किता, तत्र पूर्वग्रन्थसङ्गतिमाह—**नन्वभाव इति ।**

'अतिरिक्ते'त्यस्य क्लृप्तपदार्थातिरिक्तार्थकत्वं न सम्भवति, अभावस्याऽपि नैयायिकैः क्लृप्तत्वात्, **अतस्तदर्थमाह—भावातिरिक्तेति । अभावस्याऽधिकरणात्मकत्व इति** । गन्धाभावस्य। जलादिरूपत्वे जलत्वादिनेव तेषां न घ्राणेन्द्रियग्राह्यता, गन्धाभावत्वेन तु तेषामपि तथात्वमिष्टमेवेति प्राभाकराणामभिप्राय इति मन्तव्यम् ॥ १२ ॥ इत्यभावपदार्थविभागग्रन्थः ॥

मूले साधर्म्यवैधर्म्यनिरूपणयोः प्रयोजनस्याऽनुक्तत्वात् तत्प्रदर्शयितुमाह—परस्परेति । ज्ञानवि-

द्रव्यादयः पञ्च भावा अनेके समवायिनः ।
एवमभिधेयत्व-प्रमेयत्वादिकं बोध्यम् ॥ १३ ॥
इति सप्तपदार्थसाधर्म्यकथनम् ॥

द्रव्यादय इति । **द्रव्यगुणकर्मसामान्यविशेषाणां साधर्म्यमनेकत्वं समवायित्वं च । यद्यप्यनेकत्वमभावेऽप्यस्ति, तथाऽप्यनेकत्वे सति भावत्वं पञ्चानां साधर्म्यम्, तथा चाऽनेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वमिति फलितोऽर्थः, तेन प्रत्येकं घटादावाकाशादौ च नाऽव्याप्तिः ।**

समवायित्वं च समवायसम्बन्धेन सम्बन्धित्वं, न तु समवायवत्त्वं, सामान्यादावभावात् ॥ इति पञ्चपदार्थसाधर्म्यकथनम् ॥

दिनकरी ।

'ज्ञेयत्वादिकम्' इत्यत्राऽऽदिपदार्थं दर्शयति—**एवमभिधेयत्वेति** । अभिधेयत्वं—अभिधाविषयत्वम् । अभिधा च सङ्केतग्राह्योऽधिकः पदार्थ इति **मीमांसकाः** । सङ्केतभिन्नायामभिधायां मानाभावात् सङ्केत एवाऽभिधेति **नैयायिकाः** । 'प्रमेयत्वादिकम्' इत्यादिनाऽस्तित्वपरिग्रहः । तच्च कालसम्बन्धित्वम् ॥१३॥ इति सप्तपदार्थसाधर्म्यकथनम् ॥

द्रव्यादीनां षण्णां साधर्म्यं भावत्वं स्पष्टमतस्तदुपेक्ष्य द्रव्यादीनां पञ्चानां साधर्म्यं मूले प्रपञ्चितं—**द्रव्यादय इत्यादिना** । **अनेकत्वे सति भावत्वमिति** । एवं च मूले 'द्रव्यादयः पञ्च' इत्युद्देश्यपदं, 'भावा अनेके' इति च विधेयपदमिति बोध्यम् । अत एव भाष्ये 'पञ्चानाम्' इत्युक्तं, न तु पञ्चभावानामिति । **अनेकभाववृत्तीत्यादि** । अत्र चाऽनेकभाववृत्तित्वं स्वप्रतियोगिवृत्तित्व-स्वसामानाधिकरण्योभयसम्बन्धेन भेदविशिष्टत्वे सति भाववृत्तित्वम् । तेन गुणादौ सङ्ख्यारूपस्याऽनेकत्वस्याऽभावेऽपि नाऽव्याप्तिः । भावत्वरूपतादृशधर्मादाय समवायेऽतिव्याप्तिवारणाय—**पदार्थविभाजकोपाधीति** । उपाधिमत्ता

रामरुद्री ।

षयातात्वेनेति । (निरवच्छिन्न)वृत्तिमदभावाप्रतियोगित्वं न केवलान्वयित्वं, केवलान्वयिनोऽपि द्वित्वादिनाऽभावसत्त्वात्, किन्तु (निरवच्छिन्न)वृत्तिमदभावप्रतियोगितानवच्छेदकधर्मवत्त्वमेव तथा, एवं च घटादिनिष्ठविषयताव्यक्तेरपि ज्ञानविषयतात्वमादाय केवलान्वयित्वमक्षतमेवेति भावः ।

कालसम्बन्धित्वमिति । इदं च गगनादीनामपि कालवृत्तित्वमभ्युपेत्य, अवृत्तिगगनादीनां कालावृत्तित्वे अस्तित्वस्य केवलान्वयित्वानुपपत्तिः । युक्तं चैतत्, कथमन्यथा गगनादीनां नियतपूर्ववृत्तित्वघटितशब्दादिकारणत्वमिति मन्तव्यम् ॥ १३ ॥ इति सप्तपदार्थसाधर्म्यकथनम् ॥

षड्भावपदार्थानां मूले साधर्म्यानुक्त्या तत्र न्यूनतां परिजिहीर्षुराह—**द्रव्यादीनामिति** । ननु **'द्रव्यादयः पञ्च भावाः'**—इति कारिकायामनेकत्वमपि साधर्म्यमुक्तं, तत् कथमनेकत्वे सति भावत्वं मुक्तावलीकृतोक्तं, मूलतस्तदलाभादित्याशङ्क्य परिहरति—**एवं चेति** । उक्तार्थे भाष्यकृतां सम्मतिमाह—**अत एवेति** । **पञ्चभावानामिति** । तथा च भावत्वस्याऽपि उद्देश्यतावच्छेदककोटिप्रवेशस्य भाष्यकृदनुमतत्वे **'पञ्चानां'** इत्यपहाय पञ्चभावानामनेकत्वमित्येव ब्रूयादिति भावः । **नन्वनेकभाववृत्तीत्यत्र अनेकत्वं** यदि बहुत्वसङ्ख्या, तदा गुणादौ सङ्ख्याविरहात्तेष्वव्याप्तिः, यदि च यत्किञ्चिदेकभिन्नत्वं, तदा समवायेऽतिव्याप्तिः, यदि तु एकत्वावच्छिन्नसामान्यभेदः, तत्र चैकत्वं यदि सङ्ख्यारूपं तदोक्तातिव्याप्तितादवस्थ्यं, यदि तन्मात्रविषयकबुद्धिविषयत्वं तदाऽप्रसिद्धिः, स्वमात्रविषयकबुद्धिविषयत्वरूपैकत्वस्य केवलान्वयितया तदवच्छिन्नसामान्यभेदाप्रसिद्धिरित्याशङ्कानिरासाय **अनेकभाववृत्तित्वं** निर्वक्ति—**अत्र चेति** ।

सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणक्रियः ॥ १४ ॥

सत्तावन्त इति। द्रव्यगुणकर्मणां सत्तावत्त्वमित्यर्थः ॥

॥ इत्याद्यपदार्थत्रयसाधर्म्यकथनम् ॥

गुणादिरिति। यद्यपि गुणक्रियाशून्यत्वमाद्यक्षणे घटादावतिव्याप्तं, क्रियाशून्यत्वञ्च गगनादावतिव्याप्तम्, तथाऽपि गुणवद्वृत्तिधर्मवत्त्वं कर्मवद्वृत्तिदिनकरी।

च समवाय-स्वरूपान्यतरसम्बन्धेन, तेन कालिकसम्बन्धेन ध्वंसस्य तादृशोपाधिमत्त्वेऽपि न क्षतिः। समवायेनोपाधिमत्त्वविवक्षणे तु सामान्यादावव्याप्तिः स्यादतस्तन्नोक्तम्। अन्यतरत्वघटकस्वरूपं तु कालिकसम्बन्धभिन्नं ग्राह्यं, तेन ध्वंसे नाऽतिव्याप्तिः।

अत्र च समवेतसमवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वं द्रव्यादिचतुर्णां साधर्म्यं बोध्यम्।

इति पञ्चपदार्थसाधर्म्यकथनम् ॥

उद्देश्यवाचकपदस्य चरममुपादानमयुक्तमतो योजनया तदर्थं प्रदर्शयति-**द्रव्यगुणकर्मणामिति ॥** इत्याद्यपदार्थत्रयसाधर्म्यकथनम् ॥

"निर्गुणक्रियः" इति मूलम्। तदर्थश्च गुणक्रियात्यन्ताभाववत्त्वम्। तेन गुणक्रिययोरन्योन्याभावमादाय द्रव्ये नाऽतिव्याप्तिः। **यद्यपि गुणेति।** न च गुणगुणिनोर्वामदक्षिणगोविषाणवत् समानकालिकत्वात् कथं गुणशून्यत्वमिति वाच्यम्। निर्गुणे गुणोत्पत्तिस्वीकारेण तत्सम्भवात्। न चैवं घटादेराद्यक्षणावच्छिन्नस्य चाक्षुषत्वं न स्यादिति वाच्यम्। इष्टापत्तेः। **तथाऽपीति।** गुणवत्ता च समवायेन, तेन कालिकसम्बन्धेन गुणवद्गुणादिवृत्तेर्गुणत्वादेरामरुद्री।

अभावत्ववारणाय **भाववृत्तित्व**निवेशः। समवायत्ववारणाय सत्यन्तम्, उभयसम्बन्धनिवेशोऽपि तद्वारणायैवेति बोध्यम्। उपाधिमत्तायां सम्बन्धविवक्षायाः फलमाह—**तेनेति। अतस्तन्नोक्तमिति।** स्वरूपेणोपाधिमत्त्वोक्तौ द्रव्यत्वादीनां दैशिकरूपसम्बन्धे मानाभावेन द्रव्यादिष्वव्याप्तिरित्यपि द्रष्टव्यम्।

पदार्थचतुष्टयस्य साधर्म्यानुक्त्या मूलस्य न्यूनतां परिहरन्नाह—**अत्र चेति ॥**

इति पञ्चपदार्थसाधर्म्यकथनम् ॥

'सत्तावन्तस्त्रयस्त्वाद्याः-'इत्यत्र आद्यत्रयमुद्दिश्य सत्तावत्त्वं साधर्म्यं विधीयते, तच्चाऽयुक्तं, उद्देश्यवाचकपदस्य पूर्वमभिधेयत्वात्, अत एव पर्वतो वह्निमानित्येव प्रतिज्ञावाक्यं, न तु वन्हिमान् पर्वत इति, इत्याशङ्कानिरासाय योजनया लभ्यमर्थं **मुक्तावल्यां** प्रकटयतीत्याह—**उद्देश्यवाचकेति।** अन्यथा तादृशवाक्यस्याऽतिस्पष्टार्थकतया **'द्रव्यगुण**–इत्यादिवाक्यमनर्थकमेव स्यादिति भावः। अत्र च नित्यसमवेतपदार्थविभाजकोपाधिमत्त्वं द्रव्यगुणयोः साधर्म्यं बोध्यम्। द्रव्यमात्रस्य तु साधर्म्यं मूलकृतैव वक्ष्यते ॥

इत्याद्यपदार्थत्रयसाधर्म्यकथनम् ॥

ननु निर्गुणत्वादिकं यदि गुणक्रियाभाववत्त्वं, तदा द्रव्येऽतिव्याप्तिः, तत्राऽपि तयोर्भेदसत्त्वादित्यत आह—**तदर्थश्चेति। चाक्षुषत्वं न स्यादिति।** चाक्षुषं प्रति रूपस्य कारणत्वादुत्पत्तिक्षणे च घटादौ तदभावादिति भावः। नन्वाद्यक्षणे घटादौ रूपाङ्गीकारेऽपि तत्पूर्वक्षणे घटाद्यभावेन कारणीभूतस्य तद्वति चक्षुःसंयोगस्याऽभावादाद्यक्षणे घटादिचाक्षुषमेव न सम्भवतीति कथमियमापत्तिः। चक्षुःसयुक्तसमवायस्याऽपि घटादौ तदानीमसम्भवात्, उत्पत्तिप्राक्क्षणे घटादेरेवाऽभावात्। वस्तुतस्तु परमाणौ द्रव्यत्वादिप्रत्यक्षवारणाय चक्षुःसंयुक्ते योग्यत्वविशेषणस्याऽऽवश्यकतया व्यणुकचाक्षुषे व्यभिचारापत्त्या द्रव्यान्यद्रव्यसमवेतचाक्षुषत्वस्यैव संयुक्तसमवायकार्यतावच्छेदकत्वेनोपगन्तव्यतया चक्षुःसंयुक्तसमवायेन घटादेः प्रत्यक्षमेव न सम्भवतीत्यभिप्रायेण समाधत्ते—**इष्टापत्तेरिति।** तथा च तृतीयक्षण एव

सामान्यपरिहीनास्तु सर्वे जात्यादयो मताः ।
पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् ॥ १५ ॥

पदार्थविभाजकोपाधिमत्त्वञ्च च तदर्थः । नहि घटत्वादिकं द्रव्यत्वादिकं वा गुणवदवृत्ति, कर्मवदवृत्ति वा, किन्तु गुणत्वादिकं तथा, आकाशत्वादिकन्तु न पदार्थविभाजकोपाधिः ॥१४॥ इति गुणादिषट्पदार्थसाधर्म्यकथनम् ॥

सामान्येति । **सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः ॥**

॥ इति सामान्यादिपदार्थचतुष्टयसाधर्म्यकथनम् ॥

पारिमाण्डल्येति । **परिमाण्डल्यमणुपरिमाणम्, कारणत्वं तद्भिन्नानामित्यर्थः । अणुपरिमाणं तु न कस्याऽपि कारणम् । तद्धि स्वाश्रयारब्धद्रव्यपरि-**

दिनकरी ।

सङ्ग्रहेऽपि न क्षतिः । गुणवदवृत्तित्वं तादृशधर्मवत्त्वं च समवायस्वरूपान्यतरसम्बन्धेन । तेन समवायेन गुणवदवृत्तित्वाभिधाने तादृशस्य द्रव्यत्वप्रकारकप्रमाविशेष्यत्वस्य द्रव्ये सत्त्वादतिव्याप्तिः, अतस्तेनैव तद्वत्त्वं वाच्यं, तदा सामान्यादावव्याप्तिरिति परास्तम् । पदार्थविभाजकपदस्य कृत्यमाह-**आकाशत्वादिकं त्विति** । कर्मवदवृत्त्याकाशत्वरूपोपाधिमत्याकाशेऽतिव्याप्तिवारणाय तत्पदमिति भावः ॥ १४ ॥

इति गुणादिषट्पदार्थसाधर्म्यकथनम् ॥

जात्यादीनामप्येकार्थसमवायसम्बन्धेन सामान्यवत्त्वात् "सामान्यपरिहीनाः" इति मूलमयुक्तमतो व्याचष्टे-**सामान्यानधिकरणत्वमिति** । तथा च सामान्यनिरूपिताधिकरणता न सामान्यादौ, एकार्थसमवायस्याऽधिकरणतानियामकत्वाभावादिति भावः ॥

इति सामान्यादिपदार्थचतुष्टयसाधर्म्यकथनम् ॥

अप्रसिद्धत्वात् पारिमाण्डल्यपदार्थं निर्वक्ति-**पारिमाण्डल्यमिति । तद्भिन्नानामिति** । पारिमाण्डल्यभिन्नानाम् । ननु द्व्यणुकपरिमाणस्य कारणत्वाभावात्तत्राव्याप्तिरतः पारिमाण्डल्यपदं द्व्यणुकपरिमाणस्याऽप्युपलक्षणम् , तेन तस्याऽपि लक्ष्यत्वमित्यभिप्रेत्याऽऽह-**अणुपरिमाणं त्विति** । परमाणुद्व्यणुकसाधारणमणुपरिमाणं त्वित्यर्थः । पारिमाण्डल्यस्य कारणत्वे बाधकमाह—**तद्धीति** । अणुपरिमाणं हीत्यर्थः ।

रामरुद्री ।

घटादिचाक्षुषमिति भावः । **अन्यतरसम्बन्धेनेति** । एतच्चापाततः । लाघवेन गुणवदवृत्तित्वस्य गुणवदवृत्तिधर्मवत्त्वस्य च दैशिकस्वरूपसम्बन्धेनैव वक्तुमुचितत्वात्, गुणादौ गुणत्वप्रकारकप्रमाविशेष्यत्वादिकमादायैव साधर्म्योपपादनसम्भवात् । परन्तु कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वमिति द्वितीयसाधर्म्यनिरुक्तावेवोक्तरीत्याऽन्यतरसम्बन्धनिवेशनमावश्यकं गुणादौ गुणत्वादिरूपपदार्थविभाजकोपाधेः स्वरूपसम्बन्धेनासत्त्वादिति मन्तव्यम् ॥१४॥ इति गुणादिषट्पदार्थसाधर्म्यकथनम् ॥

अधिकरणतानियामकत्वाभावादिति । यद्यप्येवं सति सामान्यादौ भावत्ववत्त्वमपि न स्यात्, सामानाधिकरण्यसम्बन्धेन सत्ताधिकरणत्वमादायैव तत्र भावत्वाधिकरणताया उपपादनीयत्वात्, तथाऽपि सत्तासमवाय-सामानाधिकरण्यान्यतरस्यैव भावत्वस्वरूपत्वमिति भावः । वस्तुतस्तु समवायसम्बन्धावच्छिन्नप्रतियोगिताकसामान्याभावस्य साधर्म्यत्वे न कोऽपि दोष इति ध्येयम् ॥

इति सामान्यादिपदार्थचतुष्टयसाधर्म्यकथनम् ॥

माणारम्भकं भवेत्। तच्च न सम्भवति। परिमाणस्य स्वसमानजातीयस्वोत्कृष्ट-परिमाणजनकत्वनियमात् महदारब्धस्य महत्तरत्वबदणुजन्यस्याऽणुतरत्वप्रसङ्गात्। एवं परममहत्परिमाणमतीन्द्रियसामान्यं विशेषाश्च बोध्याः।

इदमपि योगिप्रत्यक्षे विषयस्य न कारणत्वं, ज्ञायमानं सामान्यं न प्रत्यासत्तिः ज्ञायमानं लिङ्गं नाऽनुमितिकरणमित्यभिप्रायेणोक्तम्। आत्ममानसप्रत्यक्षे आत्मपरममहत्त्वस्य कारणत्वात् परममहत्परिमाणमाकाशादेः

दिनकरी।

तच्चेति। चस्त्वर्थे। तत्र हेतुमाह-**परिमाणस्येति**। **स्वसमानजातीयेति**। साजात्यमत्र परिमाणविभाजकरूपेण बोध्यम्। **अणुजन्यस्येति**। उत्कृष्टं चाऽणोरणुतरमेवेति भावः। न चाऽणुजन्यस्याऽणुतरत्वमस्तु, किं बाधकमिति वाच्यम्। तथा सति त्रुटेरचाक्षुषत्वप्रसङ्गात्। ननु तर्हि द्व्यणुकादिपरिमाणस्य किं जनकमिति चेत्, सङ्ख्यैवेत्यवेहि। व्यक्तीभविष्यति चेदमुपरिष्टात्। मूलस्य न्यूनतां परिहरति **एवमिति**। 'बोध्याः' इत्यनेनाऽन्वयः। न कारणानीति बोध्या इत्यर्थः। ऐन्द्रियकयोर्महत्त्वसामान्ययोः स्वविषयकलौकिकप्रत्यक्षे हेतुत्वात् **परमत्वातीन्द्रियत्वे** इह विशेषणे।

ननु योगिप्रत्यक्षे पारिमाण्डल्यस्याऽपि विषयविधया कारणत्वात् 'पारिमाण्डल्यभिन्नानाम्' इत्ययुक्तमत आह-**इदमपीति**। यथा योगजधर्मेणाऽतीतानागतविषयकं प्रत्यक्षं, तथा विद्यमानविषयकमपीत्यर्थः। ननु ज्ञायमानसामान्यस्य प्रत्यासत्तित्वेन ज्ञायमानहेतोश्चाऽनुमितिकरणत्वेन पारिमाण्डल्यस्य सामान्यलक्षणाजन्यज्ञानेऽनुमितौ च कारणत्वात् 'पारिमाण्डल्यभिन्नानाम्-'इति मूलमसङ्गतमत आह—**ज्ञायमानमिति। आत्ममानसेति।** विषयतया द्रव्यलौकिकप्रत्यक्षे समवायेन महत्त्वस्य हेतुत्वादिति भावः। यद्यपि स्वप्रत्यक्ष इत्येव वक्तुमुचितं, तथाऽपि टीकाकृन्मते आत्मैकत्वमहत्त्वयोरयोग्यत्वात् प्रत्यक्षं न सम्भवतीत्यात्ममानसेत्युक्तम्। के चित्तु "कारणत्वं चाऽन्यत्र पारिमाण्डल्यादिभ्यः" इत्यत्र भाष्ये 'आदिग्रहणात् परममहत्त्वं गृह्यते' इति वदतामाचार्याणां परममहत्परिमाणमपि न कस्य चित् कारणमित्याशयो लभ्यते। न च तत्र परममहत्पदमात्मपरिमाणातिरिक्तपरममहत्परिमाणपरमिति वाच्यम्, मानाभावादिति वदन्ति। तन्मतं दूषयितुमुपन्यस्यति—

रामरुद्री।

"तच्च न सम्भवति" इत्यत्र 'च'कारो न समुच्चयार्थकः, परमाणु परिमाणस्य नित्यतया कालिकविधया, अतीन्द्रियतया प्रत्यक्षे विषयविधया च कारणत्वासम्भवेन कार्यान्तरं प्रति कारणत्वान्तरस्य समुच्चयासम्भवादतस्तस्य तुकारार्थकत्वमाह—**चस्त्वर्थ इति**। ननु द्व्यणुकपरिमाणमपि परिमाणत्वेन अणुपरिमाणसजातीयम्, अणुपरिमाणादुत्कृष्टं चेति द्व्यणुकपरिमाणस्याऽपि कारणत्वेन उक्तनियमक्षतिरित्याशङ्कायामाह—**साजात्यमत्रेति। परिमाणविभाजकोपाधयः**-अणुत्वत्व-महत्त्वत्वादयः। **अचाक्षुषत्वप्रसङ्गादिति**। महत्त्वाभावादिति भावः। **इदमिति**। द्व्यणुकादिपरिमाणे सङ्ख्यादिकारणत्वमित्यर्थः। **उपरिष्टात्**—गुणनिरूपण इत्यर्थः। **इहेति**। महत्त्व-सामान्ययोरित्यर्थः।

ननु योगिप्रत्यक्षे विषयस्य कारणत्वाभावे का युक्तिरित्यत आह—**यथेति**। तथा च योगिप्रत्यक्षेऽपि विषयस्य कारणत्वे तेषामतीतानागतविषयकप्रत्यक्षं न स्यादिति लौकिकप्रत्यक्ष एव विषयस्य कारणत्वमङ्गीकार्यं, योगजधर्मस्त्वलौकिकसन्निकर्ष एवेति भावः। **स्वप्रत्यक्ष इति**। आत्ममनसमहत्त्वप्रत्यक्षे स्वस्य विषयविधया कारणत्वादिति भावः। **अयोग्यत्वादिति**। अन्यथाऽऽत्मनोऽणुत्वे इन्द्रियादिस्वरूपत्वे च

अन्यथासिद्धिशून्यस्य नियता पूर्ववर्तिता ।
कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम् ॥ १६ ॥
समवायिकारणत्वं ज्ञेयमथाऽप्यसमवायिहेतुत्वम् ।
एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम् ॥ १७ ॥

बोध्यम् । तस्याऽपि न कारणत्वमित्याचार्याणामाशय इत्यन्ये । तन्न । ज्ञा-नातिरिक्तं प्रत्येवाऽकारणताया आचार्यैरुक्तत्वात् ॥ १५ ॥

॥ इति पारिमाण्डल्यभिन्नपदार्थसाधर्म्यकथनम् ॥

ननु कारणत्वं किमत आह अन्यथासिद्धीति । तस्य कारणत्वस्य ॥१६-१७॥

इति प्रासङ्गिककारणत्वनिरूपणम् ॥

दिनकरी ।

तस्यापीऽति । आत्ममहत्परिमाणस्याऽपीत्यर्थः । **ज्ञानातिरिक्तं प्रत्येवेति** । 'कारणत्वं च ज्ञातृधर्मेतरभावकार्यापेक्षया''-इत्याचार्यग्रन्थः । ज्ञातृधर्माः-ज्ञानादयः, तदतिरिक्तभावकार्यं प्रति कारणत्वं पारिमाण्डल्यभिन्नानां साधर्म्यमिति तदर्थः । एवञ्च पारिमाण्डल्यादीत्यादिपदेन परममहत्त्वं गृह्णतामाचार्याणामयमाशयो यत् पारिमाण्डल्यस्य परममहत्त्वादीनां च ज्ञानातिरिक्तं प्रति न कारणत्वं, न तु कारणत्वसामान्याभावस्तदनुमत इति भावः । अत्राऽऽचार्यैः पारिमाण्डल्यादीत्यादिपदार्थेषु सुखदुःखादेरजनितावयविरूपादेः पाकनष्टपरमाणुरूपादेश्चाऽगणनात्तेषां लक्ष्यत्वमनुमतम् । एवं च तेषु ज्ञानाद्यतिरिक्तभावकार्यफलोपधायकत्वरूपस्याऽऽचार्यलक्षणस्याऽव्याप्तिं परिचिन्त्य स पक्षस्त्यक्तो ग्रन्थकृतेति ध्येयम् ॥१५ । इति पारिमाण्डल्यभिन्नपदार्थसाधर्म्यकथनम् ।।

मूलेऽन्यथासिद्धीति । दण्डत्वादौ नियतपूर्ववृत्तितायाः सत्त्वादतिव्याप्तिरत उक्तम् **अन्यथासिद्धिशून्यस्येति** । तद्घटत्वावच्छिन्नेऽन्यत्र कलशनियतपूर्वेत्याद्यन्यथासिद्धिमत्यपि घटत्वावच्छिन्नेऽनन्यथासिद्धे तद्रासभेऽतिव्याप्तिवारणाय-**नियतेति** । नियतपूर्ववृत्तिजातीयतेत्यर्थः । तेनाऽरण्यस्थदण्डादावपि स्वरूपयोग्यतासम्पत्तिः । तज्जातीयत्वं च नियतपूर्ववृत्तितावच्छेदकदण्डत्वादिमत्त्वमेवेति ॥१६॥१७॥ इति प्रासङ्गिककारणत्वनिरूपणम् ।।

रामरुद्री ।

विवादासम्भवादिति भावः । **तदतिरिक्तभावकार्यमिति** । ज्ञानाद्यतिरिक्तभावकार्यमित्यर्थः । यद्यपि **'ज्ञातृधर्म-'**इत्याचार्यग्रन्थे भावत्वं नोपात्तं, तथाऽपि द्व्यणुकपरिमाणस्य स्वध्वंसं प्रति कारणत्वेन पारिमाण्डल्यपदस्याऽणुपरिमाणसामान्यपरत्वेन द्व्यणुकपरिमाणे भवत्यतिव्याप्तिरिति भावत्वमुपात्तं, भावत्वं तु स्वमतेऽपि देयमेव । अन्यथा तत्रैवाऽतिव्याप्तिः । **अजनितावयविरूपादेरिति** । पाकनष्टपरमाणुरूपादेर्विशेषणं, तेन पाकनष्टपरमाणुरूपस्याऽपि नाशात् पूर्वं द्व्यणुकरूपाद्युपधायकत्वेऽपि न क्षतिः । **फलोपधायकत्वरूपस्येति** । समवायेन परिमाणं प्रति स्वाश्रयसमवेतत्वसम्बन्धेन परिमाणत्वेन सामान्यतः कारणत्वेन पारिमाण्डल्यस्यापि स्वरूपयोग्यतारूपकारणतावत्त्वात् फलोपधायकत्वविवक्षा । तच्च न अव्यवहितपूर्वत्वसम्बन्धेन कार्यविशिष्टत्वे सति स्वरूपयोग्यत्वं, तस्य पारिमाण्डल्येऽपि सत्त्वात् , किन्तु कार्योत्पादप्रयोजकत्वमेव । प्रयोजकत्वं च स्वरूपसम्बन्धरूपं दण्डात् घटोत्पाद इति प्रतीतिसाक्षिकमिति ध्येयम् । यद्यपि स्वमतेऽपि स्वप्रत्यक्षं प्रति सुखदुःखयोः कारणत्वेऽपि परमाणुरूपस्याऽतीन्द्रियतया भावकार्यं प्रत्यकारणत्वेन तत्राऽव्याप्तिस्तदवस्थैव । न च जन्यमात्रस्य कालोपाधितया कालत्वेन तस्याऽपि भाव-

यत्समवेतं कार्यं भवति ज्ञेयं तु समवायिजनकं तत् ।
तत्राऽऽसन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् ॥ १८ ॥

तत्रेति । **समवायिकारणे प्रत्यासन्नं कारणं द्वितीयं असमवायिकारण-**

दिनकरी ।

यत्समवेतमिति । यद्रूपावच्छिन्नं स्वकारणतावच्छेदकयद्धर्मावच्छिन्ने समवायसम्बन्धेनोत्पद्यते, तद्धर्मावच्छिन्नं प्रति तद्धर्मावच्छिन्नमसमवायिकारणमित्यर्थः । घटत्वाद्यवच्छिन्नं हि स्वकारणतावच्छेदककपालत्वाद्यवच्छिन्ने समवायसम्बन्धेनोत्पद्यत इति भवति घटत्वाद्यवच्छिन्नं प्रति कपालत्वाद्यवच्छिन्नं समवायिकारणम् । स्वकारणतावच्छेदकेत्युक्त्या च न द्रव्यत्वादेर्घटादिसमवायिकारणतावच्छेदकत्वमिति । इति समवायिकारणत्वनिरूपणम् ॥

तत्राऽऽसन्नमिति । इदं च समवायिकारणादावतिव्याप्तिवारणाय । पटसमवायिकारणतन्तुसमवेततन्तुत्वादावतिव्याप्तिवारणाय–**जनकमिति**।तन्तुत्वस्याऽन्यथासिद्धत्वेनाऽन-

रामरुद्री ।

कार्यं प्रति कारणत्वमक्षतमेवेति वाच्यम् । तथा सति द्व्यणुकपरिमाणस्याऽपि कालविधया भावकार्यकारणत्वेन **'अणुपरिमाणं तु न कस्याऽपि कारणम्'** इति मूलविरोधापत्त्या कारणत्वपदस्य कार्यत्वानवच्छिन्नकार्यतानिरूपितकारणत्वपरतायाः, क्रियैव काल इति मतावलम्बनस्य वा आवश्यकत्वेनाऽव्याप्तेर्दुर्वारत्वादिदमसङ्गतम् । तथाऽपि स्वमते **'विशेषाश्च'** इति चकारेण तादृशरूपस्याऽपि समुच्चितत्वादिति भावः ॥ १५ ॥ इति पारिमाण्डल्यभिन्नपदार्थसाधर्म्यकथनम् ॥

दण्डत्वादाविति । घटाधिकरणदेशावच्छेदेन नियतपूर्ववर्तिताया इत्यर्थः । स्वाश्रयाश्रयत्वसम्बन्धेन दण्डत्वादेरपि घटाधिकरणसम्बद्धत्वादिति भावः । **घटत्वावच्छिन्न इति** । यद्यप्यग्रे लघुनियतपूर्ववर्त्तितावच्छेदकावच्छिन्नैरेव कार्योत्पादसम्भवे तत्सहभूतमन्यथासिद्धमित्येव पञ्चमान्यथासिद्धिनिरुक्तिर्ग्रन्थकृता वक्ष्यते, तथा च तद्रासभत्वस्य घटत्वावच्छिन्नं प्रत्यपि नियतपूर्ववर्तितानवच्छेदकत्वात् घटत्वावच्छिन्नेऽपि तद्रासभस्याऽन्यथासिद्धत्वं सम्भवति, तथाऽपि लाघवस्य शरीरकृतसम्बन्धकृतादिभेदेन नानारूपतया अनन्यथासिद्धत्वमेकमनुगतं न शक्यते वक्तुं, तद्विरोधिगौरवस्य तत्तत्पदार्थघटितरूपस्याऽपि तत्तद्व्यक्तिभेदेन भिन्नतया अन्यदित्यस्य गुरुभूतार्थकतया गौरवस्यैव अन्यथासिद्धत्वपर्यवसानात्, अतस्तद्भिन्नत्वमेव अन्यथासिद्धत्वं वाच्यम्, तत्र च नियतपूर्ववर्तिभिन्नानां नियतपूर्ववर्तित्वदलेनैव वारणसम्भवे तादृशानन्तपदार्थभेदानामन्यथासिद्धिशून्यत्वशरीरे भेदप्रवेशे गौरवमिति तत्कार्यनियतपूर्ववर्त्तित्वे सति तत्कार्यकारणत्वेन व्यवह्रियमाणा ये तद्भिन्नानामन्यथासिद्धत्वं, तथा च तद्रासभत्वस्य घटत्वावच्छिन्ननियतपूर्ववर्त्तितावच्छेदकत्वविरहात् तद्रासभो न घटत्वावच्छिन्नेऽन्यथासिद्ध इति भावः । न च दण्डत्वाद्यवच्छिन्नभेदकूटस्याऽनुगतस्यैव अन्यथासिद्धत्वमस्त्विति वाच्यम् । तथा सति तदभावस्य दण्डत्वादेरेव कारणत्वसम्भवे शेषवैयर्थ्यात्, न्यूनवृत्तिदण्डत्वादेः कारणतानवच्छेदकत्वापत्तेश्च, तद्भेदकूटाभावो नाऽतिरिक्त इति ध्येयम् । अरण्यस्थदण्डादौ कारणतासम्पत्तये नियतपूर्ववर्तिजातीयत्वं कारणत्वमित्युक्तं, तत्र च द्रव्यत्वादिना घटपटादीनामपि घटकारणतापत्तिरत आह—**तज्जातीयत्वं चेति । दण्डत्वादीति** । न च दण्डत्ववद्द्रव्यत्वादिकमपि नियतपूर्ववर्तितावच्छेदकमेवेति तद्दोषतादवस्थ्यमिति वाच्यम् । नियतपूर्ववर्तितावच्छेदकपदेन लघुनियतपूर्ववर्त्तितावच्छेदकस्योक्तत्वात् । द्रव्यत्वस्य घटनियतपूर्ववर्त्तितावच्छेदकत्वेन तस्यैव घटकारणतारूपत्वे अनन्तद्रव्येषु घटकारणत्वापत्त्या कल्पनागौरवात् दण्डत्वादिकमेव लघ्विति भावः । तथा च दण्डत्वादिभिन्नत्वे सति घटनियतपूर्ववर्तितावच्छेदकधर्मवत्त्वं घटकारणत्वमिति पर्यवसितम् ॥१६–॥१७॥ इति प्रासङ्गिककारणत्वनिरूपणम् ॥

यत्र समवायसम्बन्धेन यत्कार्यमुत्पद्यते तत्तत्प्रति समवायिकारणमित्युक्तौ कपालादेर्द्रव्यत्वादिनाऽपि

मित्यर्थः। अत्र यद्यपि तुरीतन्तुसंयोगे पटासमवायिकारणत्वं स्यात्, वेगादीनामभिघाताद्यसमवायिकारणत्वं स्यात्, एवं ज्ञानादीनामपीच्छाद्यसमदिनकरी।

न्यथासिद्धनियतपूर्ववृत्तिताया अभावेन नाऽतिप्रसङ्गः। **मुक्तावल्याम्-अत्र यद्यपीति।** तुरीतन्तुसंयोगस्य पटं प्रति कुतो नाऽसमवायिकारणत्वमिति तु नाऽऽशङ्कनीयम्, तुरीतन्तुसंयोगनाशे पटनाशापत्तेः, असमवायिकारणनाशस्य द्रव्यनाशजनकत्वात्। न चाऽसमवायिकारणनाशस्य द्रव्यनाशकत्वे प्रमाणाभाव इति वाच्यम्। द्व्यणुकनाशान्यथानुपपत्तेरेव मानत्वादिति। न च तन्तुषु विनष्टेषु विनैव समवायिकारणं द्रव्यस्य क्षणद्वयं स्थितिः स्यादिति वाच्यम्। इष्टापत्तेः, कारणान्तरकल्पने गौरवात्।

अथ द्रव्यनाशासमवायिकारणनाशयोरसमानाधिकरणयोः कथं हेतुहेतुमद्भाव इति चेत्, अत्राहुः—

प्रतियोगितया द्रव्यनाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसमवायिसमवेतत्व-कालिकविशेषणतोभयसम्बन्धेन नाशत्वेन हेतुतेति। इह कालिकसम्बन्धस्य कारणतावच्छेदकसम्बन्धत्वे घटादेः क्षणिकत्वापत्तिरतः स्वप्रतियोगिसमवायिसमवेतत्वनिवेशः। स्वप्रतियोगिजन्यत्वसम्बन्धश्च दण्डनाशाद्घटनाशापत्तेरुपेक्षितः। भाविनाशमादायाऽतिप्रसङ्गवारणाय कालिकसम्बन्धनिवेशः। यदि तु कपालपवनसंयोगनाशाद्घटनाशापत्तिरेवमपि दुर्वारैवेति विभाव्यते, तदा स्वप्रतियोगिजन्यत्व-स्वप्रतियोगिसमवायिसमवेतत्व-कालिकविशेषणतैतत्त्रितयसम्बन्धेन नाशत्वेन हेतुता बोध्या। न चैवमपि तुरीतन्तुसंयोगनाशात् पटनाशापत्तिरिति वाच्यम्। तुरीतन्तुसंयोगस्य पटं प्रति कारणतैव न सम्भवति, किन्तु तुर्यैव रामरुद्री।

घटसमवायिकारणतापत्तिः। कपालत्वावच्छिन्नस्य तद्घटत्वाद्यवच्छिन्नं प्रत्यपि तथात्वापत्तिरित्यतो व्याचष्टे **यदवच्छिन्नमिति**॥ इति समवायिकारणत्वनिरूपणम्॥

प्रमाणाभाव इतीति। सर्वत्र समवायिकारणनाशादेव द्रव्यनाशसम्भवादिति भावः। **द्व्यणुकेति।** अत्र द्व्यणुकपदं यादृशघटादेरारम्भककपालनाशमन्तरा तत्संयोगनाशादेव नाशः तादृशघटादेरप्युपलक्षकं, नाऽतो न्यूनताप्रसङ्गः। **क्षणद्वयमिति।** समवायिकारणनाशस्य कार्यनाशकत्वेऽपि कपालादिनाशक्षणे कपालादिकं विनैव घटादेरवस्थित्यावश्यकत्वेन द्वयपदम्। **इष्टापत्तेरिति।** ननु द्रव्यनाशे समवायिकारणनाशस्याऽपि पृथक् कारणत्वकल्पनैवोपपत्तौ समवायिकारणमन्तरा क्षणद्वयं द्रव्यस्थित्यभ्युपगमो नोचितः। न च परस्परान्यद्रव्यनाशे परस्परव्यभिचार इति वाच्यम्। अव्यवहितोत्तरत्वं कार्यतावच्छेदककोटौ निवेश्य तद्वारणसम्भवादित्यत आह—**कारणान्तरेति।**

ननु दैशिकविशेषणतासम्बन्धेन द्रव्यप्रतियोगिकनाशं प्रति दैशिकविशेषणतया द्रव्यासमवायिकारणप्रतियोगिकनाशत्वेन कारणत्वे यत्र यत्किञ्चित्तन्तुसंयोगनाशात् सहस्रतन्तुकपटनाशः, तत्र तन्तुसंयोगनाशानधिकरणतन्तुष्वपि पटनाशोत्पत्त्या व्यभिचारापत्तिः, ध्वंसप्रागभावयोः प्रतियोगिसमवायिदेशमात्रवृत्तित्वादित्यभिप्रायेण शङ्कते—**अथेति।**

हेतुतेति। तथा च कारणताच्छेदकलाघवमपीति भावः। **क्षणिकत्वापत्तिरिति।** उत्पत्तिक्षणमारभ्यैव घटादौ यत्किञ्चिन्नाशसत्त्वादिति भावः। ननु क्षणिकत्ववारणाय **स्वप्रतियोगिसमवायिसमवेतत्व**स्थाने स्वप्रतियोगिजन्यत्वमेव कुतो न निवेश्यत इत्याशङ्कायामाह—**स्वप्रतियोगीति। अतिप्रसङ्गवारणायेति।** द्वितीयक्षण एव घटादौ नाशातिप्रसङ्गवारणायेत्यर्थः। **इति विभाव्यते इति।** स्वप्रतियोगिसमवायियावत्समवेतत्वोक्तौ नेयमापत्तिः सम्भवतीति सूचनाय **'यदि तु'** इत्युक्तं, तथोक्ता-

वायिकारणत्वं स्यात्, तथाऽपि पटासमवायिकारणलक्षणे तुरीतन्तुसंयोगभिन्नत्वं देयम्। तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव। एवं वेगादिकमपि वेगस्पन्दाद्यसमवायिकारणं भवत्येवेति तत्तत्कार्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं देयम्। आत्मविशेषगुणानां तु कुत्राऽप्यसमवायिकारणत्वं नाऽस्ति, तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव। अत्र समवायिकारणे प्रत्यासन्नं द्विविधं, कार्यैकार्थप्रत्यासत्त्या, कारणैकार्थप्रत्यासत्त्या च। आद्यं यथा—घटादिकं प्रति कपालसंयोगादिकमसमवायिकारणम्। तत्र कार्येण घटेन सह कारणस्य कपालसंयोगस्य एकस्मिन् कपाले प्रत्यासत्तिरस्ति। द्वितीयं यथा—घटरूपं प्रति कपालरूपमसमवायिकारणम्। स्वगतरूपादिकं प्रति समवायिकारणं घटः,

दिनकरी।

संयोगसम्बन्धेन तन्तुनिष्ठा सती पटजनिकेति तत्राऽतिप्रसङ्गाभावात्। एवं च विशेषलक्षणेषु तुरीतन्तुसंयोगादिभेदानामनिवेशेन लाघवमपीति केचित्।

वस्तुतस्तु स्वप्रतियोगिनिष्ठासमवायिकारणतानिरूपितफलोपधानात्मकजन्यत्वसम्बन्धेन नाशत्वेन हेतुता, तुरीतन्तुसंयोगस्तु निमित्तं, न त्वसमवायीति न तन्नाशेन पटनाश इत्यन्यत्र विस्तरः।

'वेगादीनां' इत्यादिनाम् स्पर्शसंग्रहः। 'अभिघातादि'इत्यादिना नोदनपरिग्रहः। 'ज्ञानादि'इत्यादिना इच्छापरिग्रहः। 'इत्यादि'इत्यत्र प्रवृत्तेः परिग्रहः। तन्तुसमवेतत्वे सति तुरीतन्तुसंयोगाद्यन्यत्वे सति पटकारणत्वं पटासमवायिकारणत्वमिति विशिष्यैव लक्षणं कर्तव्यमित्याह—**तथाऽपीति**। वस्तुतस्तु तुरीतन्तुसंयोगत्वावच्छिन्नप्रतियोगिताकभेदः पटासमवायिकारणलक्षणघटतकतया ग्रन्थकर्तुर्नाऽभिप्रेतः, अपि तु तन्तुभिन्नसमवेतत्वावच्छिन्न-

रामरुद्री।

वपि कपालरूपनाशादपि घटनाशापत्तितादवस्थ्यमतस्तथा न विवक्षितमेवेति ध्येयम्। **अतिप्रसङ्गाभावादिति**। तुरीतन्तुसंयोगस्य पटजनकत्वाभावादिति भावः। नन्वेव तुरीतन्तुसंयोगस्य पट प्रत्यकारणत्वे तत्र पटासमवायिकारणलक्षणातिव्याप्तिविरहेण तल्लक्षणे तुरीतन्तुसयौगभिन्नत्वविशेषणस्य ग्रन्थकृदुपात्तस्य वैयर्थ्यप्रसङ्ग इत्याशङ्कायामेवमप्यस्माकं लाघवमेवेति नोपादेयमेव तदित्याह—**एवं चेति**। अत्र **'आहुः'** इत्यादि **'के चित्'** इत्यन्तं ग्रन्थकाराननुयायिनां मतमिति बोध्यम्।

स्वयमाह—**वस्तुतस्त्विति**। **जन्यत्वसम्बन्धेनेति**। अत्राऽपि भाविनाशमादाय घटादेः क्षणिकत्वापत्तिवारणाय कालिकसम्बन्धोऽपि प्रवेशनीयः। एतल्लाभायैव **'अन्यत्र विस्तरः'** इत्युक्तमिति ध्येयम्।

नोदनेति। शब्दजनकसंयोगोऽभिघातः' तद्भिन्नसंयोगो नोदनम्, अभिघाते विलक्षणसंयोगस्य, तद्भिन्नसंयोगे च क्रियाया असमवायिकारणत्वापत्तिरिति भावः। अत्र यद्यपि तयोरसमवायिकारणत्वेऽपि न तन्नाशादभिघातादिनाशापत्तिः, द्रव्यनाशं प्रत्येव असमवायिकारणनाशस्य हेतुत्वादितीष्टापत्तिः सम्भवति, तथाऽप्यसमवायिकारणनन्तरा क्षणत्रयं कार्यस्थितेरनिष्टतया तदापत्तिरेवाऽत्रेष्टापत्तिबाधिकेति मन्तव्यम्। ज्ञानादेरिच्छाद्यसमवायिकारणत्वे तु आत्मविशेषगुणानां काऽप्यसमवायिकारणत्वं नाऽस्तीति सिद्धान्तभङ्गप्रसङ्ग एव दूषणं बोध्यम्। **ग्रन्थकर्तुर्नाऽभिप्रेत इति**। **'तुरीतन्तुसंयोगभिन्नत्वे सति'** इत्यस्य तत्संयोगप्रतियोगिकभेदार्थकत्वादिति भावः। नन्वेवं तादृशभेदप्रतियोगितावच्छेदकं किमित्याशङ्कायां तन्तुभिन्नसमवेतत्वमेव तत्प्रतियोगितावच्छेदकमित्याह—**अपि त्विति**। तुरीतन्तुसंयोगत्वस्य

तेन सह कपालरूपस्यैकस्मिन् कपाले प्रत्यासत्तिरस्ति। तथा च क्व चित् समवायसम्बन्धेन, क्व चित् स्वसमवायिसमवेतत्वसम्बन्धेनेति फलितोऽर्थः, इत्थं च कार्यैकार्थ-कारणैकार्थान्यतरप्रत्यासत्त्या समवायिकारणे प्रत्यासन्नं कारणं ज्ञानादिभिन्नमसमवायिकारणमिति सामान्यलक्षणं पर्यवसितम्। इत्यसमवायिकारणत्वनिरूपणम्।

दिनकरी।

प्रतियोगिताकभेद एव। अन्यथा हस्ततन्तुसंयोगादिभेदानां पृथङ्निवेशापत्त्या भेदकूटनिवेशने गौरवादिति ध्येयम्। एतेन तन्तुमात्रसमवेतत्वनिवेशेनैवोपपत्तौ तुरीतन्तुसंयोगान्यत्वनिवेशनमनुचितमित्यपास्तम्। मात्रपदस्याऽस्मदुक्तार्थकत्वात्। एवमिच्छाद्यसमवायिकारणलक्षणे आत्ममात्रसमवेतत्वावच्छिन्नप्रतियोगिताकभेद एव निवेश्यः, न तु ज्ञानत्वाद्यवच्छिन्नभेद इति बोध्यम्। **तथा चेति।** द्विविधप्रत्यासत्तिविवक्षणे चेत्यर्थः। **फलितोऽर्थ इति।** द्विविधप्रत्यासत्त्योरिति शेषः। पर्यवसितमसमवायिकारणलक्षणमाह-**इत्थं चेति।** कार्यैकार्थप्रत्यासत्तिः-समवायसम्बन्धः, कारणैकार्थप्रत्यासत्तिः-स्वसमवायिसमवेतत्वसम्बन्धः। तथा च समवाय-स्वसमवायिसमवेतत्वान्यतरसम्बन्धेन कारणत्वे सत्यात्मविशेषगुणान्यत्वं सामान्यतोऽसमवायिकारणत्वमित्यर्थः। अत्र पटासमवायिकारणस्य तन्तुसंयोगस्य पटरूपासमवायिकारणस्य तन्तुरूपस्य च संग्रहाय समवाय-स्वसमवायिसमवे-

रामरुद्री।

तत्प्रतियोगितावच्छेदकत्वोपगमे बाधकमाह—**अन्यथेति। मात्रपदस्येति।** तन्तुभिन्नासमवेतत्वे सति तन्तुसमवेतत्वमेव हि तन्तुमात्रसमवेतत्वमिति भावः। **इच्छाद्यसमवायीति।** अत्र **इच्छादिपदं** कार्यमात्रपरम्, तथा चाऽसमवायिकारणसामान्यलक्षणे ज्ञानभेदनिवेशे इच्छाभेदस्याऽपि निवेशनीयतया गौरवमित्येकभेदनिवेश एवोचित इति भावः। विशेषलक्षणपरत्वे तत्र ज्ञानातिरिक्तेऽतिव्याप्त्यप्रसक्त्या ज्ञानभेदमात्रनिवेशेनैव सामञ्जस्यादिति के चिदाहुः। तन्न मनोरमम्। उपायेच्छां प्रति फलेच्छायाः कारणत्वेन विशेषलक्षणेऽपि इच्छाभेदनिवेशस्याऽऽवश्यकत्वादिति विभावनीयम्। **इत्थं चेतीति।** ननु **'तथा च'**—इत्यादिना घटादिकं प्रति कपालादिसंयोगस्य समवायेन, घटरूपादिकं प्रति कपालरूपादेः स्वसमवायिसमवेतत्वसम्बन्धेन कारणत्वमभिधाय **'इत्थं च'**—इत्यादिना असमवायिकारणलक्षणघटककारणतायां कार्यैकार्थप्रत्यासत्ति—कारणैकार्थप्रत्यासत्त्यन्यतरावच्छिन्नत्वकथनं सन्दर्भविरुद्धं, कार्यैकार्थप्रत्यासत्तेः प्रकृतकार्यसमवाय्यनुयोगिकसमवायरूपत्वात् लाघवेन केवलसमवायस्यैव कारणतावच्छेदकत्वात्, कारणैकार्थप्रत्यासत्तेः प्रकृतकार्यकारणसमवाय्यनुयोगिकसमवायरूपायास्तु कारणतावच्छेदकत्वस्यैवाऽसम्भवात्, तेन सम्बन्धेन कपालरूपादेः घटादिरूपाधिकरणे असत्त्वादित्याशङ्कां निरसितुं तदर्थमाह—**कार्यैकार्थेति।** तथा च समवाये प्रकृतकार्यसमवाय्यनुयोगिकत्वं कार्यकारणयोरैकाधिकरण्यलाभायैव प्रदर्शितं, न तु समवायस्य तेन रूपेण कारणतावच्छेदकसम्बन्धत्वलाभायेति भावः। एवं द्वितीयेऽपि कारणपदस्य प्रकृतकार्यकारणघटितार्थकतया प्रकृतकार्यकारणेन सहैकस्मिन्नर्थे कारणघटिता स्वसमवायिसमवेतत्वरूपा प्रत्यासत्तिरित्येवाऽर्थः। तत्राऽपि कारणघटितप्रत्यासत्तौ प्रकृतकार्यकारणसमवाय्यनुयोगिकत्वं कार्यकारणयोरैकाधिकरण्यलाभायैव प्रदर्शितमिति भावः। न च स्वसमवायिसमवेतत्वं स्वसमवाय्यनुयोगिकसमवायप्रतियोगित्वमेव, तच्च न कारणेन घटितमिति वाच्यम्। स्वरूपसम्बन्धात्मिकायाः प्रतियोगितायाः घटाद्यतिरिक्तत्वादिति ध्येयम्। **आत्मविशेषेति।** आत्ममात्रसमवेतान्यत्वमित्यर्थः, पूर्वं तथैवाभिधानात्। ननु तत्रासन्नं जनकमिति मूलेन स्वरसादन्यतरसम्बन्धेन समवायिकारणप्रत्यासन्नत्वे सति कारणत्वस्यैव असमवायिकारणलक्षणघटकता युक्ता, न तु निरुक्तान्यतरप्रत्या-

आभ्यां—**समवायिकारणासमवायिकारणाभ्यां, परं—भिन्नं कारणं, तृतीयं—निमित्तकारणमित्यर्थः ॥ १८ ॥ इति निमित्तकारणत्वनिरूपणम्।**

दिनकरी।

तत्वयोः प्रवेशः। घटरूपं प्रति घटस्याऽसमवायिकारणतावारणाय समवायिकारणे प्रत्यासन्नत्वे सति कारणत्वं परित्यज्य तादृशान्यतरप्रत्यासत्त्या कारणत्वपर्यन्तानुधावनम्। आत्मविशेषगुणान् वारयितुं विशेष्यभागः।

यत्तु कार्यनाशजनकनाशप्रतियोगित्वं तत्त्वमिति, तन्न, द्वित्वनाशप्रयोजकनाशप्रतियोगिन्यामपेक्षाबुद्धावतिव्याप्तेरिति। अवयवमात्रसंयोगत्वं द्रव्यासमवायिकारणत्वमित्यादि विशिष्यैव लक्षणं निर्वाच्यम्, अखण्डोपाधिरेव वा तदित्यन्ये। इत्यसमवायिकारणत्वनिरूपणम्॥

भिन्नं कारणमिति। अत्रेदं बोध्यम्। समवायिकारणत्वासमवायिकारणत्वभिन्नकारणत्वमेव निमित्तकारणत्वम्। तेन तुरीपटसंयोगं प्रति तुरीतन्तुसंयोगस्याऽसमवायिकारणत्वेऽपि न तस्य पटं प्रति निमित्तकारणत्वक्षतिरिति ॥ १८ ॥ इति निमित्तकारणत्वनिरूपणम्॥

रामरुद्री।

सत्यवच्छिन्नकारणतायाः, मूलतस्तदलाभादित्याशङ्कामपनेतुं यथाश्रुतार्थपरित्यागे बीजमाह—**घटरूपमिति। घटस्येति।** रूपसमवायिकारणे घटे स्वसमवायिसमवेतत्वसम्बन्धेन घटस्य प्रत्यासन्नत्वात् रूपं प्रति समवायिकारणत्वाच्चेति भावः।

अपेक्षाबुद्धावतिव्याप्तेरिति। अथाऽत्र कार्यनाशनिष्ठजन्यतायां नाशनिष्ठजन्यतायां वा दैशिकविशेषणतासम्बन्धावच्छिन्नत्वनिवेशे नैष दोषः, अपेक्षाबुद्धिनाशस्य दैशिकविशेषणतया तेन सम्बन्धेन द्वित्वनाशाधिकरणे घटादावसत्त्वेन दैशिकविशेषणतया तयोः कार्यकारणभावासम्भवात् कालिकविशेषणतयैव तयोः कायकारणभावस्याऽङ्गीकरणीयत्वात्, दैशिकविशेषणतासम्बन्धावच्छिन्नत्वनिवेशश्चाऽऽवश्यक एव, अन्यथा घटादिनाशं प्रति कालत्वेन जनकस्य घटादिनाशस्य प्रतियोगिनि घटादावेव अतिव्याप्तिरिति चेन्न। दैशिकविशेषणतया घटादिनाशं प्रति तन्तुसंयोगादिनाशस्य तेन सम्बन्धेन कारणत्वेन सहस्रतन्तुकपटस्थले पूर्वं व्यभिचारस्य प्रदर्शितत्वेन प्रतियोगितया द्रव्यनाशं प्रति पूर्वोक्तायास्तादृशसम्बन्धेन नाशत्वेनैव कारणताया वाच्यतया कार्यत्व—कारणत्वयोर्दैशिकविशेषणतानवच्छिन्नत्वात्। इदमुपलक्षणम्। रूपनाशजनकनाशप्रतियोगिनि घटादावप्यतिव्याप्तिरवयविरूपासमवायिकारणावयवरूपादावव्याप्तिश्च द्रष्टव्येति विभावनीयम्। **'इत्यादि विशिष्यैव'—**इत्यादिना रूपनिष्ठसमवायसम्बन्धावच्छिन्नकार्यतानिरूपितकारणताशालिरूपत्वं रूपासमवायिकारणलक्षणमित्यादीनां परिग्रहः। पाकजरूपे चाऽग्निसंयोगो निमित्तं, न त्वसमवायिकारणं, नाऽनस्तत्राऽव्याप्तिरिति भावः। घटानारम्भकतन्तुद्वयसंयोगे अतिव्याप्तिं परिचिन्त्य कारणत्वं पदार्थान्तरमिति मताभिप्रायेणाऽऽह—**अखण्डोपाधिरिति।** इत्यसमवायिकारणत्वनिरूपणम्॥

भिन्नं, कारणमितीति। ननु समवायिकारणासमवायिकारणभिन्नत्वे सति कारणत्वस्य निमित्तकारणलक्षणत्वे पटनिमित्तकारणे तुरीतन्तुसंयोगेऽव्याप्तिः, तस्य तुरीपटसंयोगासमवायिकारणत्वेन तद्भिन्नत्वविरहात्। न च तत्कार्यसमवायिकारणासमवायिकारणभिन्नत्वे सति तत्कार्यकारणत्वं तत्कार्यं प्रति निमित्तकारणत्वमिति विशिष्यैव लक्षणं वक्तव्यम्, तथा च तुरीतन्तुसंयोगस्य पटसमवायिकारणासमवायिकारणयोर्भिन्नत्वेन न तत्र पटनिमित्तकारणत्वानुपपत्तिरिति वाच्यम्। तथा सति ध्वंसं प्रति निमित्तकारणे प्रतियोग्यादावव्याप्तेः, तस्य समवायिकारणासमवायिकारणयोरप्रसिद्धेरित्याशङ्कां निराकुरुते—**अत्रेदमित्यादिना। समवायिकारणत्वं**—समवायसम्बन्धावच्छिन्नकार्यतानिरूपितातादात्म्यसम्बन्धावच्छिन्नकारणत्वम्, **असमवायिकारणत्वन्तु**—तादृशकार्यतानिरूपितनिरुक्तान्यतरसमवन्धावच्छिन्नकारणत्वमिति बोध्यम्॥ १८ ॥ इति निमित्तकारणत्वनिरूपणम्॥

येन सह पूर्वभावः, कारणमादाय वा यस्य ।

इदानीमन्यथासिद्धत्वमेव कियतामत आह—येनेति । **यत्कार्यं प्रति कारणस्य पूर्ववृत्तिता येन रूपेण गृह्यते, तत्कार्यं प्रति तद्रूपमन्यथासिद्धमित्यर्थः । यथा-घटं प्रति दण्डत्वमिति । इति प्रथमान्यथासिद्धनिरूपणम् ॥**

द्वितीयमन्यथासिद्धमाह—कारणमिति । **यस्य स्वातन्त्र्येणाऽन्वयव्यतिरेकौ न स्तः, किन्तु कारणमादायैवाऽन्वयव्यतिरेकौ गृह्येते, तदन्यथासिद्धम् । यथा-दण्डरूपम् । इति द्वितीयान्यथासिद्धनिरूपणम् ॥**

दिनकरी ।

यत्कार्यं प्रतीति । यद्धर्मावच्छिन्नं प्रतीत्यर्थः । **येन रूपेणेति** । यद्रूपावच्छेदेनेत्यर्थः । इत्थं च तद्धर्मावच्छिन्ननिरूपितनियतपूर्ववृत्तित्वग्रहविशेष्यतावच्छेदकत्वे सति तद्धर्मावच्छिन्नं प्रति स्वतन्त्रान्वयव्यतिरेकशून्यत्वं तद्धर्मावच्छिन्नं प्रति अन्यथासिद्धत्वं प्रथममित्यर्थः । द्वितीयान्यथासिद्धदण्डरूपादिवारणाय सत्यन्तम् । कपालसंयोगो घटपूर्ववर्त्तीत्यादिग्रहे कपालस्याऽपि तादृशविशेष्यतावच्छेदकत्वात् तत्राऽतिव्याप्तिवारणाय विशेष्यम् ।

इति प्रथमान्यथासिद्धनिरूपणम् ॥

किन्तु कारणमिति । कारणत्वं चाऽत्र पृथगन्वयव्यतिरेकशालित्वं, तेन नाऽऽत्माश्रयः । यत् स्वातन्त्र्येण तत्कायनिरूपितान्वयव्यतिरेकशून्यत्वे सति तत्कार्यकारणावच्छिन्नस्वनिष्ठतत्कार्यनिरूपितनियतवृत्तित्वग्रहविशेष्यताकं, तत् तत्कार्यं प्रत्यन्यथासिद्धमित्यर्थः । कपालसंयोगो घटपूर्ववर्त्तीत्यादिपूर्ववृत्तित्वग्रहविशेष्यतायाः कपालसंयोगनिष्ठायाः कपालावच्छिन्नत्वात् कपालसयोगेऽतिव्याप्तिवारणाय सत्यन्तम् । दण्डत्वादिवारणाय विशे-

रामरुद्री ।

'यत्कार्यं प्रति'—इत्यादेर्यथाश्रुतार्थकत्वे तद्व्यक्तित्वेन घटादिविषयकप्रत्यक्षव्यक्तिं प्रति पूर्ववृत्तित्वग्रहविशेष्यतावच्छेदकस्याऽपि तद्व्यक्तित्वस्य स्वविषयकप्रत्यक्षत्वावच्छिन्नतद्व्यक्तिनिष्ठकार्यतानिरूपिता विषयविधया या कारणता, तद्रूपेण स्वविषयकप्रत्यक्षत्वावच्छिन्नं प्रत्यपि तद्व्यक्तित्वमन्यथासिद्धं स्यादित्याशङ्कानिरासाय तदर्थमाह—**यद्धर्मावच्छिन्नमिति** । तथा च तद्व्यक्तित्वस्य तद्व्यक्तिविषयकप्रत्यक्षत्वावच्छिन्नपूर्ववृत्तित्वग्रहविशेष्यतावच्छेदकत्वेऽपि न तद्व्यक्तित्वविषयकप्रत्यक्षत्वावच्छिन्नपूर्ववृत्तित्वग्रहविशेष्यतानवच्छेदकतद्व्यक्तित्वस्य स्वविषयकप्रत्यक्षे नाऽन्यथासिद्धत्वप्रसङ्ग इति भावः । **स्वतन्त्रेति** । **अन्वयः**—स्वाधिकरणे कार्यसत्त्वम् , **व्यतिरेकः**—स्वाभावाधिकरणे कार्यासत्त्वम् । **अन्वयव्यतिरेकयोः स्वातन्त्र्यं**—स्वभिन्नप्रकृतकार्यकारणान्वयव्यतिरेकाप्रयुक्तत्वं, दण्डत्व-दण्डरूपयोरन्वयव्यतिरेकौ स्वभिन्नदण्डरूपकारणान्वयव्यतिरेकप्रयुक्तौ, स्वाश्रयाश्रयत्वसम्बन्धेन दण्डत्वादिसत्त्वस्य दण्डसत्त्वाधीनत्वात् तयोरन्यथासिद्धत्वमिति भावः । **तत्राऽतिव्याप्तिवारणायेति** । कपाले प्रथमान्यथासिद्धत्वस्याऽतिव्याप्तिवारणायेत्यर्थः । इति प्रथमान्यथासिद्धिनिरूपणम् ।

मूले-**कारणमादायेति** । स्वभिन्नकारणं गृहीत्वैवेत्यर्थः । ननु अन्यथासिद्धत्वशरीरे स्वभिन्नकारणस्य कारणत्वेन प्रवेशे कारणत्वस्याऽन्यथासिद्धघटितत्वेन भवत्यात्माश्रय इत्यत आह—**कारणत्वं चाऽत्रेति** । **पृथगिति** । स्वाघटितसम्बन्धेनेत्यर्थः । दण्डादेरन्यथासिद्धत्ववारणाय **'कारणमादाय'** इत्यस्य तत्कार्यकारणावच्छिन्नपूर्ववृत्तित्वग्रहविशेष्यत्वार्थकताया अग्रे वक्ष्यमाणतया तत्र च कारणपदस्य नियतान्वयव्यतिरेकशाल्यर्थकतया दण्डत्वस्याऽपि स्वाश्रयाश्रयत्वसम्बन्धेन तथाविधतया दण्डस्य दण्डत्वावच्छिन्नघटपूर्ववर्तित्वग्रहविशेष्यत्वादिति **पृथगित्युक्तम्** । **पृथगित्युक्तौ** च दण्डत्वस्य दण्डघटितपरम्परासम्बन्धेनैवाऽन्वयव्यतिरेकशालित्वान्न दण्डादेरन्यथासिद्धत्वमिति ध्येयम् । **तत्कार्यकारणेति-यथा-**

अन्यं प्रति पूर्वत्वे ज्ञाते यत्पूर्वभावविज्ञानम् ॥ १९ ॥

तृतीयमाह—अन्यं प्रतीति । **अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते, तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम् । यथा-घटादिकं प्रत्याकाशस्य, तस्य हि घटादिकं प्रति कारणत्वमाकाशत्वेनैव स्यात्, तद्धि शब्दसमवायिकारणत्वम्, एवं च तस्य शब्दं प्रति कारणत्वं गृहीत्वैव घटादिकं प्रति जनकत्वं ग्राह्यमतस्तदन्यथासिद्धम् ।**

ननु शब्दाश्रयत्वेन तस्य कारणत्वे काऽन्यथासिद्धिरिति चेत्, पञ्च-

दिनकरी ।

ष्यमिति । अत्रेतरान्वयव्यतिरेकप्रयुक्तान्वयव्यतिरेकशालित्वमित्युक्तौ प्रथमद्वितीयान्यथासिद्धयोः संग्रहेऽपि भेदेनाऽन्यथासिद्धिद्वयप्रदर्शनं शिष्यबुद्धिवैशद्यार्थमिति बोध्यम् ।

इति द्वितीयान्यथासिद्धनिरूपणम् ।

अन्यं प्रतीति । फलाननुगुणमन्यं प्रतीत्यर्थः, तेन न कुलालजनके चतुर्थान्यथासिद्धयाश्रयेऽतिव्याप्तिः ।

शङ्कते—**शब्दाश्रयत्वेनेति** । अन्यं प्रतीत्यादितृतीयान्यथासिद्धयभावादिति भावः । **पञ्चमीति** । अवश्यकल्पनियतपूर्ववर्तिन इत्यादिकेत्यर्थः । यद्यपि शब्दो द्रव्यजन्यः जन्यगुणत्वादित्यनुमित्यात्मककार्यकारणभावग्रहरूपानुकूलतर्कसहकृतेनैव शब्दो द्रव्याश्रितः गुणत्वादित्यनुमानेन शब्दाश्रयत्वं गगने गृहीत्वा तेन रूपेण घटपूर्ववृत्तित्वं ग्राह्यम्, तथा च शब्दपूर्ववृत्तित्वं गृहीत्वैव गगनस्य घटपूर्ववृत्तित्वग्रहात्तृतीयैवाऽन्यथासिद्धिः सम्भवति, तथाऽपि 'अन्यं प्रति' इत्यस्य यथाश्रुतार्थकत्वेऽपूर्वं प्रति यागस्याऽन्यथासिद्धिः स्यात्, स्वर्गं प्रति पूर्ववृत्तित्वं गृहीत्वैव गृहीतकारणत्वान्यथानुपपत्त्या यागव्यापारत्वेनाऽपूर्वकल्पनादतोऽन्यं प्रति पूर्ववृत्तित्वघटितरूपेण यस्य यज्जनकत्वं तस्य तेन रूपेण तं प्रत्यन्यथासिद्धत्वमित्येतावत्पर्यन्तं विवक्षणमावश्यकम् । यागस्य स्वर्गपूर्ववृत्तित्वघटितस्वर्गजनकत्वेनाऽपूर्वं प्रत्यन्यथासिद्धत्वेऽपि यागत्वेन हेतुत्वेऽन्यथासिद्धयभावात् । एवं च शब्दपूर्ववृत्तित्वघटितशब्दजनकत्वेन गगनस्याऽन्यथासिद्धत्वेऽपि तदघटितशब्दजनकत्वेन हेतुत्वे तृतीयान्यथासिद्धयसम्भव इत्यभिप्रायः । शब्दाश्रयत्वाष्टद्रव्यातिरिक्तद्रव्यत्वादिना गगनस्य

रामरुद्री ।

श्रुतमूलानुरोधात्तदवच्छिन्नान्वयव्यतिरेकशालिग्रहाधीनपूर्ववर्तित्वग्रहविशेष्यत्वस्य विशेष्यदलत्वे दण्डत्वस्याऽपि द्वितीयान्यथासिद्धत्वापत्तिः, दण्डत्वे पूर्ववर्तित्वग्रहस्याऽपि दण्डग्रहाधीनत्वादिति तत्परित्यागः । ननु प्रथमान्यथासिद्धिलक्षणे विशेषणं द्वितीयान्यथासिद्धिलक्षणे च विशेष्यदलं परित्यज्य उभयसाधारणमेकमेवाऽन्यथासिद्धिलक्षणं कुतो न कृतमित्याशङ्क्य समाधत्ते—**अत्रेतरेति** । इति द्वितीयान्यथासिद्धनिरूपणम् ॥

इत्यनुमित्यात्मकेति । इत्यादिन्यायप्रयोगप्रयोज्यानुमित्यात्मकेत्यर्थः । **कार्यकारणभावग्रहरूपेति** । कार्यकारणभावग्रहेण रूपं स्वरूपं यस्येत्यर्थः । तेन शब्दो यदि द्रव्याश्रितो न स्यात् तर्हि द्रव्यजन्यो न स्यादित्यनुकूलतर्कस्य कार्यकारणभावग्रहानात्मकत्वेऽपि न क्षतिः । **सहकृतेनैवेति** । अन्यथा 'गुणत्वमस्तु द्रव्याश्रितत्वं मास्तु' इत्यप्रयोजकत्वशङ्कया गुणत्वेन द्रव्याश्रितत्वसिद्धयसम्भवादिति भावः । **स्वर्गं प्रतीति** । 'स्वर्गकामो यजेत' इति वाक्येनेत्यादिः । ग्रन्थकारानुरोधिनां केषां चिन्मतमुत्थापयति—**शब्दाश्रयत्वेति** । **अष्टद्रव्येति** । पृथिव्यादिचतुष्टयं कालादिचतुष्टयं चेत्यष्टौ द्रव्याणि ।

जनकं प्रति पूर्ववृत्तितामपरिज्ञाय न यस्य गृह्यते ।
अतिरिक्तमथाऽपि यद्भवेन्नियतावश्यकपूर्वभाविनः ॥ २० ॥

मीति गृहाण । नन्वाकाशस्य शब्दं प्रति जनकत्वे किमवच्छेदकमिति चेत्, कवरत्वादिकं, विशेषपदार्थो वेति ॥ १९ ॥ इति तृतीयान्यथासिद्धनिरूपणम् ।

चतुर्थमन्यथासिद्धमाह—जनकं प्रतीति । **यत्कार्यजनकं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववर्तित्वं गृह्यते, तस्य तत्कार्यं प्रत्यन्यथासिद्धत्वम् । यथा कुलालपितुर्घटं प्रति तस्य हि कुलालपितृत्वेन घटं प्रति जनकत्वेऽन्यथासिद्धिः, कुलालत्वेन रूपेण जनकत्वे त्विष्टापत्तिः, कुलालमात्रस्य घटं प्रति जनकत्वात् । इति चतुर्थान्यथासिद्धनिरूपणम् ।।**

पञ्चमान्यथासिद्धमाह—अतिरिक्तमिति । **अवश्यकलक्षनियतपूर्ववर्तिन एव**

दिनकरी ।

घटं प्रति हेतुत्वेऽपि तृतीयैवाऽन्यथासिद्धिः, अन्यं प्रति पूर्ववृत्तित्वानुपपादकं यं प्रति यस्य पूर्ववृत्तित्वं गृह्यत इत्यर्थान्नाऽपूर्वं प्रति यागस्याऽन्यथासिद्धिरित्यपि के चित् । **कवरत्वादिकमिति** । विनिगमनाभावेन बहूनां वर्णानां कारणतावच्छेदकत्वे गौरवाद्वर्णानामसार्वकालिकत्वाच्चाऽऽह-**विशेषपदार्थो वेति ॥१९॥**

इति तृतीयान्यथासिद्धनिरूपणम् ॥

यत्कार्यजनकं प्रतीति । अत्राऽपि 'अन्यं प्रति–' इत्याद्यभिधाने तृतीयचतुर्थान्यथासिद्धयोः संग्रहेऽपि फलाननुगुणत्व–तदनुगुणत्वयोर्विशेषणयोरुपादानेन तयोर्भेदेनाऽभिधाने प्रयोजनाभावः, तथाऽपि शिष्यबुद्धिवैशद्याय तथोक्तमिति ।

इति चतुर्थान्यथासिद्धनिरूपणम् ।।

रामरुद्री ।

अन्यं प्रतीत्यादेः– अन्यं प्रति पूर्ववर्तित्वं गृहीत्वैवेत्यादेः । **'गृह्यते'** इत्यनन्तरं तं प्रति तदन्यथासिद्धमिति पूरणीयम् । **पूर्ववृत्तित्वानुपपादक**मित्यत्र पूर्ववृत्तित्वं स्वनिष्ठत्वेन विशेषणीयम्, अन्यथा शब्दजनककण्ठादिव्यापारं प्रति शब्दकारणत्वेन गगनस्य अन्यथासिद्धत्वं न स्यात्, तस्य कृतिनिष्ठशब्दपूर्ववर्तित्वघटकत्वात् स्वनिष्ठत्वोक्तौ च उक्तव्यापारस्य कृतिनिष्ठशब्दपूर्ववर्तित्वोपपादकत्वेऽपि आकाशनिष्ठशब्दपूर्ववर्तित्वानुपपादकत्वात् तं प्रत्यपि भवति गगनमन्यथासिद्धमिति ध्येयम् । **बहूनां वर्णानामिति** । ननु विशेषस्य कारणतावच्छेकत्वेऽपि प्रत्येकं कवरत्वादिकमादाय विनिगमनाविरहो दुर्वार एवेत्यस्वरसादाह—**वर्णानामिति** । कारणतावच्छेदकविशिष्टकारणसत्त्वस्यैव कार्योत्पत्तिप्रयोजकत्वेन गगने ककारासत्त्वदशायां शब्दान्तरस्याऽप्युत्पत्तिर्न स्यादिति भावः । कारणतावच्छेदकोपलक्षितकारणसत्तायाः कार्योत्पादप्रयोजकत्वे तु नैतद्दूषणमपीति मन्तव्यम् । यद्यपि शब्दत्वावच्छिन्नं प्रति शब्दकारणत्वेन गगनस्य कारणत्वेऽपि नाऽन्यथासिद्धिः, शब्दस्य शब्दभिन्नत्वाभावात्, तथाऽपि स्वस्य स्वावच्छेदकत्वे आत्माश्रयापत्तिः, कारणतावच्छेदकज्ञानस्य कारणताग्रहहेतुत्वादिति कवरत्वादेः कारणतावच्छेदकत्वानुधावनम् । अथ गगनत्वस्य अव्यवहितप्राक्क्षणावच्छेदेन घटाधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकत्वरूपनियतपूर्ववर्तितावच्छेदकत्वमेव न सम्भवति, गगनस्यावृत्तित्वेन घटाधिकरणे संयोगादिना तदभावसत्त्वादिति गगनस्य कारणतावारणायाऽन्यथासिद्ध्युपपादनमनर्थकमिति चेन्न । अवृत्तेरपि कालिकसम्बन्धेन वृत्तितामते कालिकसम्बन्धेनैव गगनस्य नियतपूर्ववृत्तित्वसम्भवादिति ध्येयम् १९

इति तृतीयान्यथासिद्धनिरूपणम् ॥

एते पञ्चाऽन्यथासिद्धा दण्डत्वादिकमादिमम्।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम्॥ २१॥
तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः।

कार्यसम्भवे तद्भिन्नमन्यथासिद्धमित्यर्थः। अत एव प्रत्यक्षे महत्त्वं कारणम्,

दिनकरी।

अवश्यक्लृप्तेति। गन्धत्वावच्छिन्नं प्रत्यवश्यक्लृप्तगन्धप्रागभावेनैव गन्धोत्पत्तिसम्भवे तत्सहभूतरूपप्रागभावादि पाकजगन्धं प्रत्यन्यथासिद्धम्। एवं घटजातीयं प्रत्यवश्यक्लृप्तनियतपूर्ववर्तिभिर्दण्डादिभिरेव घटोत्पत्तिसम्भवे रासभोऽन्यथासिद्ध इत्यर्थः। नन्ववश्यक्लृप्तनियतपूर्ववर्तिना पाकजरूपप्रागभावेण गन्धोत्पत्तिसम्भवे रूपप्रागभावेण गन्धप्रागभावस्याऽन्यथासिद्धिः स्यात्, यत्कारणत्वमवश्यक्लृप्तमित्युक्तौ चाऽऽत्माश्रयः स्यादिति चेत्। अत्राऽऽहुः—लघुनियतपूर्ववर्तित्वरूपमवश्यक्लृप्तत्वमिह बोध्यम्। लघुत्वं च शरीरकृतमुपस्थितिकृतं सम्बन्धकृतं च। तत्र प्रथममनेकद्रव्यसमवेतत्वापेक्षया महत्त्वे। द्वितीयं गन्धं प्रति रूपप्रागभावापेक्षया गन्धप्रागभावे, गन्धात्मकप्रतियोगिज्ञानसत्त्वेन शीघ्रं तदुपस्थितेः। तृतीयं दण्डत्व-दण्डरूपाद्यपेक्षया दण्डे। स्वाश्रयदण्डसंयोगादिघटितपरम्पराया गुरुत्वादिति। ननु निबन्धान्तरेष्वन्यत्र क्लृप्तेति दृश्यते, तत् कथमत्राऽवश्यक्लृप्तेति कृतमतस्तस्य फलमाह-**अत एवेति**। अन्यथा महत्त्वस्याऽनेकद्रव्यवत्त्वादन्यत्र क्लृप्तनियतपूर्ववर्तित्वाभावेन तस्याऽन्यथासिद्धिर्महत्त्वेन न स्यादिति भावः। अत्राऽनेकद्रव्यवत्त्वं नाऽनेकद्रव्यसमवेतत्वम्, तस्य द्व्यणुकेऽपि सत्त्वेन द्व्यणुकप्रत्यक्षापत्तेः। समवेतसमवेतत्वं तदित्यपि न, आत्मनि तस्याऽभावेनाऽऽत्मप्रत्यक्षानुपपत्तेः, किं त्वणुभिन्नद्रव्यत्वमिति बोध्यम्॥ २०॥

रामरुद्री।

अवश्यक्लृप्तेति। यद्यपि गन्धरूपयोः समानकालोत्पत्तिकत्वेन गन्धरूपप्रागभावयोः तुल्यमवश्यक्लृप्तत्वं, तथाऽपि अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वेन गन्धरूपकार्योपस्थित्यनन्तरं गन्धप्रागभावस्यैव शीघ्रमुपस्थितिः सम्भवति, न तु रूपप्रागभावस्य, तदुपस्थिते रूपज्ञानसापेक्षत्वादित्युपस्थितिलाघवेन गन्धं प्रति गन्धप्रागभाव एव नियतपूर्ववर्तित्वेन अवश्यक्लृप्तः। पाकजगन्धरूपकार्योपस्थित्यनन्तरन्तु गन्ध-रूप-प्रागभावयोर्युगपदेवोपस्थितिः सम्भवति, रूपपरावर्तकतेजःसंयोगस्यैव पाकपदार्थतया रूपोपस्थितेरप्यावश्यकत्वात्, तथा चाऽपाकजस्थले गन्धं प्रति अवश्यक्लृप्तनियतपूर्ववर्त्तिना गन्धप्रागभावेणैव पाकजगन्धोत्पत्तिसम्भवे तं प्रति रूपप्रागभावोऽन्यथासिद्ध इति पर्यवसितोऽर्थः। **घटजातीयमिति**। घटत्वेन तद्घटसजातीयं प्रतीत्यर्थः। **घटोत्पत्तिसम्भवे**—तद्घटोत्पत्तिसम्भवे इत्यर्थः। **नन्वित्यादि**। गन्ध-रूपयोः युगपदुत्पन्नत्वेन गन्धप्रागभाववद्रूपप्रागभावोऽपि गन्धनियतपूर्ववर्तित्वेन अवश्यक्लृप्त इति रूपप्रागभावेणैव गन्धप्रागभावः कुतो नाऽन्यथासिद्ध इति भावः। **यत्कारणत्वमिति**। अपाकजगन्धस्थले गन्धं प्रति गन्धप्रागभावस्यैव हेतुता क्लप्ता, न तु रूपप्रागभावस्य, अतो रूपप्रागभावेण न पाकजगन्धे गन्धप्रागभावोऽन्यथासिद्ध इति भावः। **गुरुत्वादितीति**। इदमुपलक्षणम्। घटत्वावच्छिन्नं प्रति नियतपूर्ववर्तितावच्छेदकं, दण्डत्वादिकमेव कारणत्वं, कल्पनालाघवात्, न तु तथाविधद्रव्यत्वादिकं कल्पनागौरवात्। तथा हि—नियतपूर्ववर्तितावच्छेदकद्रव्यत्वस्य घटकारणतारूपत्वे घटनिरूपितत्वविशिष्टकारणतासम्बन्धोऽनन्तघटादिद्रव्येषु कल्पनीयः, दण्डत्वस्य तथात्वे दण्डमात्र एवेति द्रव्य-

पञ्चमो रासभादिः स्यादेतेष्वावश्यकस्त्वसौ ॥ २२ ॥

अनेकद्रव्यवत्त्वमन्यथासिद्धम्, तत्र हि महत्त्वमवश्यक्लृप्तं, तेनाऽनेकद्रव्यवत्त्वमन्यथासिद्धम्। नच वैपरीत्ये किं विनिगमकमिति वाच्यम्। महत्त्वत्वजातेः कारणतावच्छेदकत्वे लाघवात् ॥ २०-२१ ॥

रासभादिरिति। **यद्यपि यत्किञ्चिद्घटव्यक्तं प्रति रासभस्य नियतपूर्ववृत्तित्वमस्ति; तथाऽपि घटजातीयं प्रति सिद्धकारणभावैर्दण्डादिभिरेव तद्व्यक्तेरपि सम्भवे रासभोऽन्यथासिद्ध इति भावः।** एतेषु-**पञ्चस्वन्यथासिद्धेषु मध्ये, पञ्चमोऽन्यथासिद्ध आवश्यकः, तेनैव परेषां चरितार्थत्वात्। तथा हि-दण्डादिभिरवश्यक्लृप्तनियतपूर्ववर्तिभिरेव कार्यसम्भवे दण्डत्वादिकमन्यथासिद्धम्। न च वैपरीत्ये किं विनिगमकमिति वाच्यम्। दण्डत्वस्य**

दिनकरी।

तेन-पञ्चमान्यथासिद्धेन। **परेषां**-दण्डत्वदण्डरूपाकाशकुलालपितृणाम्। **चरितार्थत्वं**-सङ्ग्रहः। अनियतरासभादेर्वारणाय-**नियतेत्यादि**। न चाऽनियतरासभादेः पञ्चमान्यथासिद्धत्वात् तेनैव वारणे नियतपदं व्यर्थमिति वाच्यम्। अवश्यक्लृप्तत्वस्यैकस्याऽभावेन यत्र यत्र प्रामाणिकानां न कारणत्वव्यवहारस्तत्तद्भेदस्य निवेशनीयतया नियतपदेनैव रासभादेर्वारणे तद्भेदस्याऽप्रवेशादित्यभिप्रायात्। पूर्ववर्त्तित्वं चाव्यवहितपूर्ववर्त्तित्वं, तेन व्यवहितपूर्ववर्त्तित्वव्युदासः। अत एव च यागादेः स्वर्गकारणत्वानुपपत्त्याऽपूर्वसम्बन्धेनाऽव्यवहितपूर्ववर्त्तित्वोपपादनं ग्रन्थकृतां सङ्गच्छते, अन्यथा यागस्याऽपि नियतपूर्ववृत्तित्वाबाधेनाऽपूर्वकल्पनं न स्यादिति। न चैतादृशस्य कारणत्वे व्यतिरेकव्यभिचारज्ञानस्य नियमांशग्रहे प्राग्याभावावगाहितया विरोधित्वेऽपि अन्वयव्यभिचारग्रहस्य कथं कारणताग्रहविरोधित्वमिति वाच्यम्। अवश्यक्लृप्तेत्याद्यन्यथासिद्धिज्ञानप्रयोजकत्वात्।

रामरुद्री।

त्वापेक्षया दण्डत्वे कल्पनालाघवमित्यपि द्रष्टव्यम्। **अनियतरासभादेरिति।** यद्यपीदं पुनरुक्तं, घटत्वावच्छिन्नं प्रत्यनन्यथासिद्धे रासभेऽतिव्याप्तिवारणाय '**नियते**त्यस्य पूर्वमुक्तत्वात्, तथाऽपि पूर्वमन्यत्र **क्लृप्तनियतपूर्ववर्तिभिरेव कार्यसम्भवे तत्सहभूतमन्यथासिद्ध**मिति प्राचीनैर्निरुक्ता पञ्चमान्यथासिद्धिर्घटत्वावच्छिन्नं प्रति रासभस्य न सम्भवति, घटत्वावच्छिन्नादन्यत्र क्लृप्तनियतपूर्ववर्तिभिर्घटोत्पादासम्भवादित्येवं रूपेण रासभस्य घटं प्रति अनन्यथासिद्धत्वमुपपाद्य **नियते**तिपदस्य सार्थक्यमुक्तम्, इदानीं तु ग्रन्थकारैः '**अतिरिक्तमथाऽपि यद्भवेन्नियतावश्यकपूर्वभाविनः**' इत्येवं पञ्चमान्यथासिद्धेर्निर्वचनात् तदनुसारेण रासभोऽपि घटत्वावच्छिन्नं प्रत्यन्यथासिद्ध एवेति तद्वैयर्थ्यमित्याशङ्कां समाधातुं पूर्वमुक्तस्याऽपि पुनरनुवाद इति मन्तव्यम्। **रासभादे**रित्यादिना घटादेः परिग्रहः। **नियतेत्यादी**त्यादिना पूर्ववर्त्तित्वपरिग्रहः। तथा च घटं प्रति घटत्वावच्छिन्नस्याऽपि व्यापकतया तत्राऽतिव्याप्तिवारणाय **पूर्ववृत्तित्व**प्रवेश इति भावः। मिलितदलद्वयस्य तु घटाव्यवहितप्राक्क्षणावच्छेदेन घटाधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वमर्थ इति बोध्यम्। **एकस्याऽभावेनेति।** निरूपिततत्त्वमेतत्। **प्राग्याभावेति।** कारणतावच्छेदकत्वेनाऽभिमतधर्मे कार्यसमानाधिकरणाभावप्रतियोगितावच्छेदैकत्वस्यैव व्यतिरेकव्यभिचारूपत्वादिति भावः। **अन्वयव्यभिचारेति।** व्यापकस्याऽधिकदेशवृत्तित्वे व्यापकत्वानपायादिति भावः। **अन्यथासिद्धत्वज्ञानप्रयोजकत्वादिति।** तथा च कारणता-

कारणत्वे दण्डघटितायाः परम्परायाः सम्बन्धत्वकल्पने गौरवात् । एवमन्येषामप्यनेनैव चरितार्थत्वं सम्भवति ॥ २२ ॥

॥ इति पञ्चविधान्यथासिद्धनिरूपणम् ॥

दिनकरी

तदितरनिखिलतत्कार्यकारणसत्त्वे तत्कार्यव्यतिरेको यद्व्यतिरेकात्, तेनाऽवश्यकल्प्तेन नियतपूर्ववर्त्तिनाऽन्यथासिद्धत्वज्ञानात् ।

नव्यास्तु–कारणत्वस्याऽनन्यथासिद्ध–नियतपूर्ववर्तितावच्छेदकधर्म(त्वरूप)त्वे प्रतिबन्धकाभावस्य तत्तद्व्यक्तित्वेन हेतुत्वापत्तिः, यत्र न कारणत्वव्यवहारस्तत्तद्व्यक्तिभेदकूटवत्त्वं तु सर्वज्ञेनैव ज्ञेयम् । तत्तद्व्यक्तिभेदकूटवत्त्वसम्बन्धेन कार्यविशिष्टो यो धर्मस्तद्वत्त्वं तदित्यपि न युक्तम् । तस्य सम्बन्धत्वसन्देहात्, तस्मात् कारणत्वं पदार्थान्तरमेवेत्याहुः ।

रामरुद्री

घटकानन्यथासिद्धत्वांशज्ञान एव अन्वयव्यभिचारज्ञानस्य प्रतिबन्धकत्वमिति भावः । **तत्तद्व्यक्तित्वेनेति** । दैशिकविशेषणतासम्बन्धावच्छिन्न–मण्डित्वावच्छिन्न—प्रतियोगिताकाभावत्वस्य मण्यभावनिष्ठतद्व्यक्तित्वापेक्षया गुरुत्वेनाऽन्यथासिद्धिनिरूपकत्वात् लाघवस्यैवाऽन्यथासिद्ध्यनिरूपकत्व(रूपत्व)पर्यवसानेनाऽभावनिष्ठतद्व्यक्तित्वस्यैवाऽन्यथासिद्ध्यनिरूपकत्वे सति नियतपूर्ववर्तितावच्छेदकत्वादिति भावः । न चाऽस्तु तद्व्यक्तित्वेन प्रतिबन्धकाभावस्य कारणत्वं, किं नश्छिन्नमिति वाच्यम् । दाहादिकं प्रति मण्यभावत्वादिना कारणतायाः सर्ववादिसम्मतायाः विलोपप्रसङ्गादिति भावः । ग्रन्थकारमते त्वत्रेष्टापत्तिरेव शरणमिति द्रष्टव्यम् ।

ननु कारणत्वं नोक्तरूपमङ्गीकरणीयं, किन्तु यद्यद्धर्मावच्छिन्नेन कारणत्वव्यवहारः, तत्तद्धर्मभिन्नधर्मस्यैव तथात्वमङ्गीकरणीयमतो नोक्तदोष इत्यत आह—**यत्रेति** । यद्धर्मावच्छिन्न इत्यर्थः । **भेदकूटवत्त्व**मित्यस्याऽपि भेदकूटवद्धर्मवत्त्वमेवाऽर्थः । तेन **तद्व्यक्तित्वावच्छिन्नभेदस्य** प्रतिबन्धकाभावत्वावच्छिन्नेऽसत्त्वेपि न क्षतिः(१) ।

सर्वज्ञेनेवेति । कारणतावच्छेदकभिन्नसकलधर्माणां तत्तद्व्यक्तित्वेन अस्मदादीनां ज्ञानासम्भवादिति भावः । ननु यद्यद्धर्मावच्छिन्ने न कारणत्वव्यवहारः, तत्तद्व्यक्तिभेदकूटवत्त्वसम्बन्धेन प्रकृतकार्यविशिष्टो यो धर्मस्तद्वत्त्वमेव कारणत्वमित्युक्तौ नैष दोषः, विशिष्टबुद्धौ संसर्गज्ञानस्याहेतुत्वेन पूर्वमनुपस्थितानामपि तत्तद्व्यक्तिभेदानां संसर्गघटकतया भाने बाधकाभावादित्याशङ्क्य निराचष्टे–**तत्तद्व्यक्तीति** । **तस्येति** । तादृशभेदकूटस्येत्यर्थः ।

---

(१) कार्याव्यवहितप्राक्क्षणावच्छिन्ना या कार्याधिकरणनिरूपितवृत्तिता तद्वदभावप्रतियोगितानवच्छेदकधर्मवत्त्वमर्थः । स्वप्रागभावाधिकरणसमयप्रागभावानधिकरणत्व-स्वप्रागभावाधिकरणत्वैतदुभयसम्बन्धेन कार्यविशिष्टक्षणत्वं कार्याव्यवहितप्राक्क्षणत्वम् । तेन कार्यस्य कार्याधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वेऽपि नाऽतिव्याप्तिः । न वा कार्यसमानाधिकरणाभावप्रतियोगितावच्छेदकदण्डत्वादिमति दण्डादावव्याप्तिः । दण्डस्याऽपि तद्दण्डत्वेन कारणतापत्तिवारणाय नियतेति । एवं च प्रमेयत्वेनाऽपि दण्डस्य कारणत्वापत्तिवारणाय यद्यद्धर्मावच्छिन्ने प्रामाणिकानामकारणत्वव्यवहारस्तद्धर्मभेदकूटवत्त्वं नियतपूर्ववर्तितावच्छेदकधर्मे निवेशनीयम् । कारणस्याऽप्यन्यसम्बन्धेनाऽभावमादायाऽव्याप्तिवारणाय प्रतियोगितायां कारणतावच्छेदकसम्बन्धावच्छिन्नत्वमपि प्रवेशनीयमित्यादिकं बहुतरमूहनीयमिति ।

समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम् ।
गुणकर्ममात्रवृत्ति ज्ञेयमथाऽप्यसमवायिहेतुत्वम् ॥ २३ ॥

समवायीति । **स्पष्टम् ।**

गुणेति । **असमवायिकारणत्वं गुण-कर्म-भिन्नानां वैधर्म्यं, न तु गुण-कर्मणोः साधर्म्यमित्यत्र तात्पर्यम् ।**

दिनकरी

तदसत्-कारणत्वस्याऽतिरिक्तत्वे दण्डादौ सर्वदा तत्प्रत्यक्षापत्तेः । न चाऽनन्यथासिद्धत्वे सतीत्यादिधर्मस्तद्व्यञ्जक इति वाच्यम् । तादृशधर्मज्ञानस्याऽऽवश्यकत्वेन तस्यैव कारणताग्रहरूपत्वौचित्यात्, अस्तु वा दण्डत्वादिकमेव कारणत्वं, घटादिकार्यसम्बन्धितया तद्ग्रहः, उक्तधर्मस्य व्यञ्जकत्वादिति ।

परे तु कार्यान्वय-व्यतिरेक-कालपूर्वकालान्वय-व्यतिरेकशालित्वमित्यूचुः । तदयुक्तम् । आत्मादौ सुखादिकारणे प्रागभावरूपव्यतिरेकासम्भवेनाऽव्याप्तेः ॥२०॥२१॥२२॥

॥ इति पञ्चमान्यथासिद्धनिरूपणम् ॥

मूले गुणकर्ममात्रवृत्त्यसमवायिकारणत्वमित्युक्तं, तच्चाऽयुक्तम्, आत्मविशेषगुणेष्वव्याप्तेरतो वैधर्म्यपरतया मूलं व्याचष्टे-**असमवायिकारणत्वमिति । साधर्म्यप्रकरणे वैधर्म्ये-**

रामरुद्री

सर्वदेति । कदाचिद्दण्डादौ घटकारणताप्रत्यक्षानुरोधेन कारणतायां योग्यत्वस्याऽङ्गीकरणीयतया यदा यदा दण्डप्रत्यक्षं, तदा तदा तद्गतघटकारणताया अपि प्रत्यक्षापत्तिरित्यर्थः । स्वमते तु कारणताया व्यापकताघटितत्वेन व्यापकताज्ञाने च सहचारज्ञान व्यभिचारज्ञानाभावयोः कारणत्वेन तद्विलम्बान्नैतदापत्तिरिति भावः । **तद्व्यञ्जक इति ।** कारणताप्रत्यक्षजनकप्रत्यक्षविषय इत्यर्थः । **तादृशधर्मज्ञानस्येत्यस्य** कारणताग्रहात् पूर्वमित्यादिः । ननु तादृशधर्मज्ञानस्य कार्यकारणताज्ञानार्थमपेक्षितत्वेऽपि न तस्य कारणतारूपत्वसम्भवः, उक्तदोषस्य तादवस्थ्यादित्यस्वरसादाह-**अस्तु वेति ।** पदार्थान्तरकल्पने गौरवादिति भावः । ननु दण्डत्वस्य कारणतारूपत्वे यदा यदा दण्डप्रत्यक्षं, तदा तदैव घटकारणताप्रत्यक्षापत्तिः, दण्डसन्निकर्षे दण्डत्वेऽपि तस्याऽऽवश्यकत्वादित्याशङ्कां निराकुरुते—**घटादिकार्यसम्बन्धितयेति ।** घटादिनिरूपितत्वेनेत्यर्थः ।

कार्येति । कार्यान्वयव्यतिरेकौ-कार्यप्रतियोगिकसंसर्ग-कार्यप्रागभावौ, **तदधिकरणकालपूर्ववर्त्तित्वं**-तन्निष्ठध्वंसप्रतियोगित्वम् । **तादृशपूर्वकालवृत्त्यन्वयव्यतिरेकशालित्वं**-तद्व्यक्तिसंसर्गप्रतियोगित्वे सति तद्व्यक्तिप्रागभावप्रतियोगित्वम् । घटसंसर्गकालपूर्वकालवृत्तिसंसर्गप्रतियोगित्वे सति घटप्रागभावकालपूर्वकालवृत्तिप्रागभावप्रतियोगित्वात् दण्डादेर्घटकारणत्वम् । **अत्र च कार्यान्वयकालपूर्वत्वं** तादृशकालत्वव्यापकध्वंसप्रतियोगित्वम् । तेन न स्वस्य स्वकारणतापत्तिः । **कार्यव्यतिरेककालपूर्वत्वं** तु न तथाविधम्, घटप्रागभावकालत्वव्यापकध्वंसप्रतियोगिकालाप्रसिद्धेः, किन्तु तादृशकालवृत्तिध्वंसप्रतियोगित्वम्, व्यतिरेकघटितदलप्रवेशस्तु दण्डत्वगगनादीनां कारणतावारणायेति द्रष्टव्यम् । **आत्मादाविति ।** व्यतिरेकपदस्य दण्डत्वादिवारणानुरोधेन प्रागभावपरताश्रौव्यादिति भावः । इदमुपलक्षणं, कार्यान्वयपूर्वकाले कार्यप्रागभावाधिकरणकालप्रागभावानधिकरणत्वं विशेषणमुपादाय व्यवहितपूर्ववर्त्तिनां वारणसंभवेऽपि दण्डरूपरासभादीनां कारणत्वापत्तिरशक्यपरिहारैव, एवं प्रागभावे कार्यप्रागभावपूर्वकालीनत्वस्य कस्याऽपि प्रागभावस्याऽव्यावर्त्तकतया तद्वैयर्थ्यं चेत्यपि । द्रष्टव्यम् ॥२०॥२१॥२२॥

॥ इति पञ्चमान्यथासिद्धनिरूपणम् ॥

अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते ।

अथ वाऽसमवायिकारणवृत्ति-सत्ताभिन्न-जातिमत्त्वं तदर्थः । तेन ज्ञानादीनामसमवायिकारणत्वविरहेऽपि नाऽव्याप्तिः ॥ २३ ॥

॥ इति समवाय्यसमवायिकारणत्वरूपसाधर्म्यद्वयकथनम् ॥

अन्यत्रेति । नित्यद्रव्याणि—**परमाण्वाकाशादीनि विहायाऽऽश्रितत्वं साधर्म्यमित्यर्थः** । आश्रितत्वं तु **समवायादिसम्बन्धेन वृत्तिमत्त्वं, विशेषणतया नित्यानामपि कालादौ वृत्तेः ॥ इति नित्यद्रव्यातिरिक्तसाधर्म्यकथनम् ॥**

दिनकरी ।

कथनमयुक्तमित्याशयादाह–**अथ वेति** । सत्ताभिन्नद्रव्यत्वरूपजातिमति द्रव्येऽतिव्याप्तिवारणाय–**वृत्त्यन्तम्** । तत्रैव सत्ताजातिमादायाऽतिव्याप्तिवारणाय **सत्ताभिन्नेति** । तत्रैव द्रव्यगुणान्यतरत्वरूपधर्ममादायाऽतिव्याप्तिवारणाय–**जातीति** । वृत्तित्वं जातिमत्त्वं च समवायेन विवक्षितं, तेन गुणादौ द्रव्यत्वस्य कालिकेन वृत्तित्वात् , द्रव्यस्य च कालिकेन गुणत्वादिमत्त्वाद्द्रव्ये नाऽतिव्याप्तिः ॥ २३ ॥

॥ इति समवाय्यसमवायिकारणत्वरूपसाधर्म्यद्वयकथनम् ॥

ननु गगनादिकं सवदैवाऽस्तीत्यादिव्यवहारात् नित्यद्रव्येष्वपि कालिकसम्बन्धेनाऽऽश्रितत्वसत्त्वात् 'अन्यत्र नित्यद्रव्येभ्यः' इति मूलमयुक्तमत आह–**आश्रितत्वमिति** । समवायादिसम्बन्धेन–सर्वाधारतानियामककालिकसम्बन्धातिरिक्तसम्बन्धेन । **विशेषणतयेति** । कालिकविशेषणतयेत्यर्थः । अत्र नित्यद्रव्यातिरिक्तत्वं लक्ष्यतावच्छेदकम् । न च संयोगेन परमाणोरपि वृत्तेः परमाणावतिव्याप्तिः, तत्संयोगस्य वृत्त्यनियामकत्वादिति ।

॥ इति नित्यद्रव्यातिरिक्तसाधर्म्यकथनम् ॥

रामरुद्री

द्रव्ये नाऽतिव्याप्तिरिति । तथा च **जाति**पदं वृत्तित्ववृत्तिमत्त्वयोः समवायेन लाभायैव, अतोऽन्यतरत्वस्याऽतथात्वेऽपि न तद्वैयर्थ्यमिति भावः ॥ २३ ॥

॥ इति समवाय्यसमवायिकारणत्वरूपसाधर्म्यद्वयकथनम् ॥

समवायादिसम्बन्धेनेत्यस्य विवरणं सर्वाधारतेत्यादिकम् , आदिपदेन कालिकस्याऽपि ग्रहणसम्भवात् **कालिकसम्बन्धातिरिक्तेति** । अत्र **कालिक**पदं दिग्विशेषणताया अप्युपलक्षणं, तस्याऽपि सर्वाधारताप्रयोजकत्वादिति बोध्यम् । दैशिकविशेषणताव्यावर्तनायाऽऽह—**कालिकेति** । ननु मूले **'आश्रितत्वमिहोच्यते'** इत्यत्र **'इह'** इत्यस्य पूर्वपरामृष्टद्रव्यार्थकत्वेऽपि नित्यद्रव्यव्यातिरिक्तद्रव्यत्वं लक्ष्यतावच्छेदकमिति लभ्यते, तथा च गुणादावप्याश्रितत्वसत्त्वात् भवत्यतिव्याप्तिरित्याशङ्कां निराकुरुते–**अत्रेति** । तथा च **'इह'** इत्यस्य न्यायसिद्धान्त इत्येवाऽर्थः, वेदान्तिना मते तु नित्यज्ञानस्याऽप्यनाश्रितत्वाङ्गीकारात्तत्राऽतिव्याप्तिशङ्कानिरासाय तदुपात्तमिति ध्येयम् । **परमाणोरपीति** । पतनप्रतिबन्धकसंयोगस्यैव वृत्तिनियामकत्वेन गगनादौ गुरुत्वाभावेनैव पतनानुपपत्त्या तत्संयोगस्य पतनप्रतिबन्धकत्वाकल्पनेऽपि पार्थिवजलपरमाण्वोर्गुरुत्ववत्तया तस्य भूतलादिदेशसंयोगे पतनप्रतिबन्धकत्वमावश्यकमिति क्षित्यादिपरमाणोरपि संयोगो वृत्तिनियामक एवेति भावः । **वृत्त्यनियामकत्वादितीति** । जन्यगुरुत्वस्य प्रकृष्टगुरुत्वस्य वा पतनकारणतया तदभावादेव परमाणोः पतनासम्भवेन तत्संयोगस्य पतनप्रतिबन्धकत्वे मानाभावात् , अन्यथा वाय्वादिप्रतिबन्धकाभावदशायां सर्वेषामेव परमाणूनामधःपतनापत्तेरिति भावः । ॥ इति नित्यद्रव्यातिरिक्तसाधर्म्यकथनम् ॥

क्षित्यादीनां नवानां तु द्रव्यत्वं गुणयोगिता ॥ २४ ॥
क्षितिर्जलं तथा तेजः पवनो मन एव च ।

इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुमारभते-क्षित्यादीनामिति । **स्पष्टम् ॥ २४ ॥** **इति द्रव्यमात्रसाधर्म्यकथनम् ॥**

क्षितिरिति । **पृथिव्यप्तेजोवायुमनसां परत्वापरत्ववत्त्वं, मूर्तत्वं, वेगवत्त्वं, कर्मवत्त्वं च साधर्म्यम् । न च यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं, तत्राऽव्याप्तिरिति वाच्यम् । परत्वादिसमानाधिकरण-द्रव्यत्वव्याप्य-जातिमत्त्वं** विवक्षितम् । तेन न क्षित्यादिषु द्रव्यत्वस्य गुणयोगितेति भावः ॥ २४ ॥ **इति द्रव्यमात्रसाधर्म्यकथनम् ॥**

दिनकरी ।

'क्षित्यादीनां नवनां तु-'इति मूलस्थ 'तु'शब्देन सूचितमर्थं प्रकटयति-**इदानीमिति ॥ २४ ॥** **इति द्रव्यमात्रसाधर्म्यकथनम् ॥**

ननु धात्वथः क्रिया, तत्राऽतिप्रसङ्ग इत्यत आह-**कर्मवत्त्वमिति । वेगवत्त्वं**-वेगसम्बन्धित्वम् । दिक्कृतयोः परत्वापरत्वयोर्हेतुरिदमस्मात्सन्निकृष्टमित्यपेक्षाबुद्धिः, कालिकपरत्वापरत्वयोर्हेतुरयमस्मादल्पतरकालसम्बद्ध इत्यपेक्षाबुद्धिश्च यत्र नोत्पन्ना, तत्र परत्वापरत्वयोरनुत्पादाद्व्याप्तिमाशङ्क्य निरस्यति—**न चेत्यादिना** । आत्मन्यतिव्याप्तिवारणाय-**समानाधिकरणान्तम्** । तत्रैव सत्तामादायाऽतिव्याप्तिवारणाय-**द्रव्यत्वव्याप्येति** । द्रव्यत्वान्यत्वेनाऽपि जातिर्विशेषणीया, तेन न द्रव्यत्वव्याप्यद्रव्यत्वमादाया-

रामरुद्री ।

इदानीमितीति । तथा च द्रव्यातिरिक्तसाधारणसाधर्म्यप्रकरणव्यवच्छेदसूचनाय 'तु, ।शब्द इति भावः ॥ २४ ॥ इति द्रव्यमात्रसाधर्म्यकथनम् ॥

धात्वर्थः क्रियेति ।

"धात्वर्थो हि क्रिया ज्ञेयो भाव इत्यभिधीयते—"

इति हरिकारिकोक्तेरिति शेषः । **कर्मवत्त्वमितीति** । तथा च प्रकृते क्रियापदार्थो न धात्वर्थः, अपि तु कर्मेति भावः । वेग इव वेगवत्, तस्य भावस्तत्त्वमिति व्युत्पत्त्या वेगसदृशत्वं वेगवत्त्वमिति भ्रमं निरसितुमाह—**वेगसम्बन्धित्वमिति** । ननु **'न च-'** इत्यादिना मूले यत्र परत्वापरत्वयोर्नोत्पादः, तत्राऽव्याप्त्याशङ्कनमनुचित, गुणान्तरस्येव तयोरपि उत्पत्तिद्वितीयक्षण एव सर्वत्रोत्पत्तिसम्भवात्, क्षणिकपदार्थस्य च ग्रन्थकारैरनङ्गीकारादित्याशङ्का निराकुरुते—**दिक्कृतयोरिति । इत्यपेक्षाबुद्धिरित्यत्र 'इति'** पदस्याऽप्यर्थकतया इदमस्माद्विप्रकृष्टमिति बुद्धिसङ्ग्रहः, तेन परत्वं प्रति सन्निकृष्टत्वज्ञानस्याऽहेतुत्वेऽपि न क्षतिः । एवमुत्तरत्राऽपि बोध्यम् । यद्यपि—

"वाक्यात्सङ्ख्याविशेषाच्च साध्यो विश्वविदव्ययः—"

इत्याचार्यकारिकानुरोधेन परमाणुषु द्वित्वं ईश्वरापेक्षाबुद्धिजन्यमित्यवश्यमङ्गीकरणीयं, तथा च नित्यापेक्षाबुद्ध्या सर्वत्र परत्वापरत्वयोरुत्पत्तिः सम्भवत्येव, तथाऽपि द्व्यणुकपरिमाणान्यथानुपपत्त्या परमाणुद्वित्वस्याऽऽवश्यकत्वेऽपि यादृशघटादौ परत्वापरत्वबुद्धिर्नाऽनुभवसिद्धा, तादृशघटादौ परत्वापरत्वयोः प्रमाणाभावात् जन्यापेक्षाबुद्धिरेव परत्वापरत्वयोः कारणमित्याशयः । अथ वा दिक्त्रिपिण्डसयोगस्याऽपि परत्वापरत्वयोः कारणतया यादृशघटादेस्तृतीयक्षणे नाशस्तादृशघटेऽव्याप्तौ तात्पर्यम् । तत्र परत्वापरत्वोत्पादक्षण एव आश्रयनाशेन तदुत्पादासम्भवादिति भावः । **द्रव्यत्वान्यत्वेनाऽपीति** वस्तुतस्तु-द्रव्यत्वव्याप्यत्वं प्रकृते द्रव्यत्वन्यूनवृत्तित्वमेव, लाघवात्, तच्च द्रव्यत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वरूपं न द्रव्यत्व इति तदादाय नाऽतिव्याप्तिसम्भवः । न च गुणत्वादेरपि तथात्वात् तदादायैवाऽति-

परापरत्वमूर्तत्व क्रियावेगाश्रया अमी ॥ २५ ॥
कालखात्मदिशां सर्वगतत्वं परमं महत्।

स्वस्य विवक्षितत्वात्। मूर्तत्वम्-अपकृष्टपरिमाणवत्त्वम्, तच्चैषामेव, गगनादिपरिमाणस्य कुतोऽप्यपकृष्टत्वाभावात्।

पूर्ववत् कर्मवत्त्वं कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं, वेगवत्त्वं वेगवद्वृत्ति-द्रव्यत्वव्याप्य-जातिमत्त्वं च बोध्यम्॥ २५ ॥ ॥ इति क्षित्यप्तेजोवायुमनसां साधर्म्यकथनम्॥

कालेति। **कालाकाशात्मदिशां सर्वगतत्वम्।** सर्वगतत्वं—**सर्वमूर्तसंयोगित्वम्, परममहत्त्वं च। परममहत्त्वत्वं जातिविशेषः, अपकर्षानाश्रयपरिमाणवत्त्वं वा। ॥ इति कालाकाशात्मदिशां साधर्म्यकथनम्॥**

दिनकरी।

ऽतिव्याप्तिः। **अपकृष्टेति।** अविभुवृत्तिपरिमाणवत्त्वमित्यर्थः। तेन परमाणौ नाऽव्याप्तिः। क्रियाजनकतावच्छेदकं मूर्तत्वं जातिरित्यपि के चित्। **तच्चेति।** निरुक्तमूर्त्तत्वं चेत्यर्थः। चस्त्वर्थे। **पूर्ववदिति।** परत्वापरत्वसमानाधिकरणेत्यादिकथितविवक्षितार्थवदित्यर्थः॥ २५॥

॥ इति क्षित्यप्तेजोवायुमनसां साधर्म्यकथनम्॥

कालादौ स्पन्दाभावेनाऽसम्भवमाशङ्क्याऽऽह-**सर्वमूर्तेति।** अहं महानितिप्रतीतिविषयपरममहत्त्वत्वस्य गगनपरिमाणादिसाधारणस्य जातित्वसम्भवेऽप्यात्मपरिमाणमयोग्यमिति टीकाकृन्मतमनुसृत्याऽऽह-**अपकर्षेति।** यद्यप्यणुपरिमाणेषु द्व्यणुकपरिमाणमेवाऽप-

रामरुद्री।

व्याप्तिरिति **शङ्कनीयम्**, तेषां परत्वापरत्वसामानाधिकरण्यविरहादिति युक्तमुत्पश्यामः। **अपकृष्टेतीति।** परमाणुपरिमाणस्य कुतोऽप्यपकृष्टत्वाभावात्तत्राऽव्याप्तिमाशङ्क्याऽऽह **अविभुवृत्तीति।** अविभुवृत्तिसंयोगे तु। वैजात्यमङ्गीकृत्य तादृशविजातीयसंयोगस्य वेगाद्यजन्यक्रियायां कारणत्वमङ्गीकृत्याऽपि विभौ क्रियावारणसम्भवेन क्रियासमवायिकारणतावच्छेदकतया मूर्त्तत्वजातिसिद्धिरविनिगम्या इत्यस्वरससूचनायाऽऽह—**के चिदिति। तच्चेतीति। 'च'** कारसमुच्चेयस्याऽर्थान्तरस्याऽभावात्तद्वैयर्थ्यमित्याशङ्कानिरासायाऽऽह—**चस्त्वर्थ इति।** त्वर्थेन 'च' इत्यनेन विभुपरिमाणे पृथ्वादिसमवेतत्वस्य व्यवच्छेदान्न तद्वैयर्थ्यमिति भावः॥ २५॥ इति क्षित्यप्तेजोवायुमनसां साधर्म्यकथनम्॥

कालादाविति। सर्वमूर्तकर्मकगतिमत्त्वरूपस्य सर्वगतत्वस्य क्रियारहितकालादावसम्भवादिति भावः। ननु परममहत्त्वत्वस्य जातित्वमभिधाय तस्य कारणताद्यनवच्छेदकत्वेन तत्र जातित्वसाधकप्रमाणविरहेण **'अपकर्षानाश्रयपरिमाणत्वं वा तत्'** इति कल्पान्तरमनुसृतं मूले, तच्चाऽयुक्तम्, आत्मगतपरिमाणे तादृशजातेः प्रत्यक्षसम्भवेन प्रत्यक्षप्रमाणस्यैव तत्साधकस्य सत्त्वादित्याशङ्कां निरस्यति—**अहमित्यादिना। महानित्यस्य परमेत्यादिः,** तेन महानितिप्रतीतौ परममहत्त्वस्याऽविषयत्वेऽपि न क्षतिः। **यद्यपीत्यादि।** न च परमाणुपरिमाणे अणुपरिमाणापेक्षया अपकर्षाभावेऽपि घटादिपरिमाणापेक्षयाऽपकर्षो वर्त्तत एव, प्रत्यक्षसाधनत्व-तदसाधनत्वाभ्यां तयोरप्युत्कर्षापकर्षसम्भवादिति वाच्यम्। परिमाणनिष्ठोत्कर्षापकर्षयोः परिमाणविभाजकजात्या स्वसजातीयपरिमाणावधिकत्वस्यैव नियमात्, कथमन्यथा विभुपरिमाणे परमाणुपरिमाणापेक्षया नाऽपकर्षः? क्रियोपयोगित्व-तदनुपयोगित्वाभ्यां तयोरप्युत्कर्षापकर्षयोः सम्भवादिति भावः। उत्कर्षापकर्षौ गुणनिष्ठजातिविशेषौ, अयमस्मादुत्कृष्ट इत्यादिप्र-

क्षित्यादि पञ्च भूतानि चत्वारि स्पर्शवन्ति हि ॥ २६ ॥

क्षित्यादीति । **पृथिव्यप्तेजोवाय्वाकाशानां भूतत्वम् । तच्च बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वम् । अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यम् । तेन ज्ञातो घट इति प्रत्यक्षे ज्ञानस्याऽप्युपनीतभानविषयत्वात्तद्व-त्यात्मनि नाऽतिप्रसङ्गः । न वा लौकिकप्रत्यक्षाविषयरूपादिमति परमाण्वा-दाव्याप्तिः, तस्याऽपि स्वरूपयोग्यत्वात् , महत्त्वलक्षणकारणान्तरासन्निधा-**

दिनकरी ।

कर्षाश्रयः, न परमाणुपरिमाणमिति परमाणावतिव्याप्तिः, तथाऽप्यपकर्षानाश्रयमहत्परिमाणवत्त्वं बोध्यम् । ॥ इति कालाकाशात्मदिशां साधर्म्यकथनम् ॥

बहिरिन्द्रियेति । आत्मन्यतिव्याप्तिवारणाय–**बहिःपदम्** । बहिरिन्द्रियग्राह्यजातीयसंयोगादिमति कालादावतिव्याप्तिवारणाय **विशेषेति** । **विशेषगुणत्वं** च गुणनिरूपणे वक्ष्यते। द्रव्यत्वमादायऽतिव्याप्तिवारणाय **गुणेति**। लौकिकत्वनिवेशस्य फलमाह **तेनेति**। **ज्ञातो घट इति** । ज्ञाने च प्रकारीभूतज्ञानांशे न लौकिकी विषयता, चक्षुरादेस्तत्र लौकिकसन्निकर्षाभावादिति भावः। स्वरूपयोग्यताप्रवेशस्य फलमाह–**न वेति** । ननु परमाणुरूपादेर्योग्यत्वे कुतो न तस्य प्रत्यक्षमत आह–**महत्त्वेति** । लौकिकविषतया द्रव्यसमवेतप्रत्यक्षे सामानाधिकरण्यसम्बन्धेन कारणस्य महत्त्वस्य परमाणुरूपादावभावान्न तल्लौकिकप्रत्यक्षमिति भावः ननु चक्षुरिन्द्रयादिगतरूपादिविशेषगुणानामनुद्भूतत्वेन बहिरिन्द्रियग्रहणा-

रामरुद्री ।

तीतिबलात्तयोरपि सावधिकत्वस्वीकार इति बोध्यम् । **महत्परिमाणवत्त्वमिति** । तथा च परमाणुपरिमाणे अपकर्षानाश्रयत्वसत्त्वेऽपि महत्त्वत्वाभावादेव न परममहत्त्वत्वमिति भावः ।

॥ इति कालाकाशात्मदिशां साधर्म्यकथनम् ॥

बहिःपदमिति । मनोभिन्नत्वमेव बहिष्ट्वं ग्राह्यम् । **ग्राह्यजातीयेति** । बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयजातिमदिति तदर्थः । संयोगप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य कारणत्वेन तदभावात् कालसंयोगो न प्रत्यक्षविषय इति जातीर्यपर्यन्तानुधावन मावश्यकमिति । आवश्यकं च ग्राह्यजातीयत्वविवक्षणम्, अन्यथा परमाणुरूपादेरप्रत्यक्षतया तत्राऽव्याप्तिप्रसङ्गादिति भावः । **वक्ष्यत इति** । **'बुद्ध्यादिषट्कम्' इत्यादिकारिकयेति** शेषः । **द्रव्यत्वमादायेति**। यद्यपि विशेषगुणत्वं रूपाद्यन्यतमत्वमेवाऽग्रे वक्ष्यमाणं, तत्र च विशेषत्व—गुणत्वयोर्न घटकता, तथाऽप्यत्र विशेषत्वं सामान्यगुणभिन्नत्वं, तत्सहितगुणत्वमेव विशेषगुणत्वमित्यभिप्रायेण द्रव्यत्वस्याऽपि सामान्यगुणभिन्नतया तदादायाऽतिव्याप्तिरभिहिता । न चैवमपि द्रव्यत्वे बहिरिन्द्रियग्राह्यजातिविरहादेव तदादाय नाऽतिव्याप्तिरिति वाच्यम् । द्रव्यत्वपदस्य द्रव्येतरासमवेतार्थकतया क्रियाया अपि तथात्वेन तामादाय मनस्यतिव्याप्तेरेव तात्पर्यविषयत्वात्, अन्यतमत्वस्य भेदकूटावच्छिन्नप्रतियोगिताकभेदरूपस्य गुरुत्वेन सामान्यगुणभेदकूटवत्त्वे सति गुणत्वस्यैव लक्षणघटकतोचितेति भावः । **चक्षुरादेरिति** । यद्यपि चक्षुःसंयुक्तात्मसमवायस्य ज्ञाने सत्त्वात् लौकिकसन्निकर्षाभावादित्यसङ्गतं, तथापि चक्षुःसंयुक्तयोग्यसमवायस्यैव सन्निकर्षत्वमावश्यकम्, अन्यथा परमाणौ चक्षुःसंयोगदशायां तत्समवेतद्रव्यत्वादिप्रत्यक्षापत्तेरिति आत्मनोऽयोग्यत्वात् ज्ञाने न लौकिकसन्निकर्ष इति भावः । **महत्त्वेतीति** । ननु घटरूपादौ महत्त्वाभावेऽपि तत्प्रत्यक्षदर्शनात् परमाणुरूपे तदभावेऽपि तत्प्रत्यक्षं स्यादित्याशङ्क्य निरस्यति—**लौकिकेति** । **ग्रहणायोग्यत्वादिति** । बहिरिन्द्रियजन्यलौकिकप्रत्यक्षं प्रति उद्भूतरूपत्वेनैव कारणतया कारणतावच्छेदकधर्मवत्त्वस्यैव योग्यतारूपत्वा-

द्रव्यारम्भश्चतुर्षु स्यादथाऽऽकाशशरीरिणाम् ।

नाम्न न प्रत्यक्षत्वम् । अथ वाऽऽत्मावृत्तिविशेषगुणवत्त्वं तत्त्वम् ।

॥ इति क्षित्यप्तेजोवाय्वाकाशसाधर्म्यकथनम् ॥

चत्वारीति । **पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वम् ॥**

द्रव्यारम्भ इति । **पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारम्भकत्वम् । न च द्रव्यानारम्भके घटादावव्याप्तिः । द्रव्यसमवायिकारणवृत्ति—द्रव्यत्वव्याप्य-जातिमत्त्वस्य विवक्षितत्वात् ।**

॥ इति क्षित्यप्तेजोवायूनां साधर्म्यकथनम् ॥

अथाऽऽकाशेति । **आकाशात्मनामव्याप्यवृत्ति(१)-क्षणिकविशेषगुणवत्त्वं साधर्म्यमित्यर्थः । आकाशस्य विशेषगुणः शब्दः, स चाऽव्याप्यवृत्तिः, यदा किञ्चिदवच्छेदेन शब्द उत्पद्यते, तदाऽन्यावच्छेदेन तदभावस्याऽपि सत्त्वात् । क्षणिकत्वं च तृतीयक्षण(२)वृत्तिध्वंसप्रतियोगित्वम् । योग्यविभुवि-**

दिनकरी ।

योग्यत्वाच्चक्षुरादावव्याप्तिमाशङ्क्य लाघवाच्चाऽऽह-**अथ वेति** । अत्र च कल्पे दैशिकपरत्वापरत्वमादाय मनस्यतिव्याप्तिवारणाय—**विशेषेति** ।

इति क्षित्यप्तेजोवाय्वाकाशसाधर्म्यकथनम् ॥

स्पर्शवत्त्वं-समवायेन स्पर्शवत्त्वम् । **द्रव्यसमवायिकारणेत्यादि**। सत्तादिकमादाय गगनेऽतिव्याप्तिवारणाय-**द्रव्यत्वव्याप्येति** ॥ इति क्षित्यप्तेजोवायूनां साधर्म्यकथनम् ॥

'आकाशशरीरिणाम्' इति मूले 'शरीरि'पदमात्मपरमित्यभिप्रायेणाऽऽह-**आकाशात्मनामिति** । लक्ष्ये लक्षणं योजयितुं शब्दज्ञानादीनामव्याप्यवृत्तित्वं क्षणिकत्वं चोपपादयति—**आकाशस्येत्यादिना** । क्षणिकस्य विशेषगुणस्याऽनभ्युपगमादाह-**क्षणिकत्वं**

रामरुद्री ।

दिति भावः । ननु बहिरिन्द्रियजन्यलौकिकप्रत्यक्षस्वरूपयोग्यत्वं न लक्षणे निवेश्यते, किन्तु बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयगुणत्वन्यूनवृत्तिजातिमत्त्वमेव लक्षणघटकं, तथा च तथाविधरूपत्वादिजातेश्चक्षुरादिरूपेऽपि सत्त्वेन न चक्षुरादावव्याप्तिरित्यस्वरसादाह—**लाघवाच्चेति** । **अथ वेतीति** । नन्वत्र कल्पे आत्मावृत्तित्वं समवायेन आत्मवृत्तितानवच्छेदकधर्मवत्त्वमेव वक्तुमुचितम्, अन्यथा तस्याऽऽत्मवृत्तिभिन्नत्वरूपत्वे सामान्यगुणभेदकूटरूपविशेषत्वनिवेशेन गौरवप्रसङ्गात्, इत्थं च विशेषत्वनिवेशनं विनाऽपि कालादावतिव्याप्तिवारणं सम्भवति, कालादिनिष्ठसंयोगे तादृशधर्मवत्त्वाभावादिति विशेषत्वनिवेशनमनर्थकमित्याशङ्कामपनेतुं तन्निवेशे प्रयोजनान्तरमाह—**अत्र चेति** ।

॥ इति क्षित्यप्तेजोवाय्वाकाशसाधर्म्यकथनम् ॥

समवायेनेति । बोध्यमिति शेषः । अन्यथा कालिकदिक्कृतविशेषणताभ्यां स्पर्शवतोः कालदिशोरतिव्याप्तिप्रसङ्गादिति भावः । **द्रव्यत्वव्याप्येतीति** । यद्यपि द्रव्यत्वमपि द्रव्यत्वव्याप्यमित्युक्तदोषता-

---

(१) स्वप्रतियोगित्व-स्वसामानाधिकरण्योभयसम्बन्धेनाऽभावविशिष्टत्वमव्याप्यवृत्तित्वम्।

(२) स्वध्वंसाधिकरणकालध्वंसाधिकरणकालध्वंसानधिकरणत्व-स्वध्वंसाधिकरणकालध्वंसाधिकरणत्वोभयसम्बन्धेनोत्पत्तिक्षणविशिष्टक्षणत्वं तृतीयक्षणत्वम् । उत्पत्तिक्षणश्च स्वाधिकरणध्वंसानधिकरणत्व-स्वाधिकरणत्वोभयसम्बन्धेन कार्यविशिष्टः क्षणः।

शेषगुणानां स्वोत्तरवृत्तिविशेषगुणनाश्यत्वात् प्रथमशब्दस्य द्वितीयशब्देन नाशः। एवं ज्ञानादीनामपि। ज्ञानादिकं यदाऽऽत्मनि विभौ शरीरावच्छेदे-

दिनकरी।

चेति। घटादिव्यावृत्तये-**तृतीयक्षणवृत्तीति। स्वोत्तरवृत्तीति।** स्वपदं नाश्यत्वाभिमतपरं, तदुत्तरवृत्तिः—तद्द्वितीयक्षणवृत्तिर्यो विशेषगुणस्तन्नाश्यत्वादित्यर्थः। अत्र च यत्र प्रतियोगितासम्बन्धेन योग्यविभुविशेषगुणनाशः, तत्र स्वसामानाधिकरण्य-स्वाव्यवहितपूर्ववर्त्तित्वोभयसम्बन्धेन योग्यविभुविशेषगुण इति सामानाधिकरण्येन नाशकत्वं बोध्यम्। कार्यतावच्छेदके योग्यत्वानुपादाने प्रायश्चित्तादिजन्यादृष्टनाशे व्यभिचारः, योग्यत्वं च लौकिकसाक्षात्कारविषय-निर्विकल्पकान्यतरत्वं, अतीन्द्रियजातिशून्यत्वं वा। रूपादिनाशे व्यभिचारवारणाय-**विभ्विति।** संयोगादिनाशे व्यभिचारवारणाय-**विशेषेति।** कारणतावच्छेदके योग्यत्वविशेषत्वयोरुपादानान्न द्वितीयक्षणोत्पन्नादृष्टसंयोगादिना तृतीयक्षणेऽपेक्षाबुद्धिनाशः। सामानाधिकरण्यसम्बन्धनिवेशान्न शब्दादिना व्यधिकरणानां ज्ञानेच्छादीनां नाशः। स्वाव्यवहितपूर्ववृत्तित्वसम्बन्धनिवेशाच्च न ज्ञानादीनां उत्पत्तिकालिकेच्छादिना नाशः।

रामरुद्री

दवस्थ्यं, तथाऽप्यत्राऽपि पूर्वोक्तरितिरनुसन्धेया, अतो न कश्चिद्दोष इति ध्येयम्।

॥ इति क्षित्यप्तेजोवायूनां साधर्म्यकथनम् ॥

घटादिव्यावृत्तय इति। क्षणिकविशेषगुणवत्त्वस्य लक्षणान्तरताया अग्रे वक्ष्यमाणतया ध्वंसप्रतियोगिविशेषगुणवत्त्वस्य घटादावतिव्याप्तिः, तन्निरासायेत्यर्थः। न चेदानीमपि यद्घटरूपादिकं तृतीयक्षणे नष्टं तत्राऽतिव्याप्तितादवस्थ्यमिति वाच्यम्। अग्रे समाधास्यमानत्वात्। **द्वितीयक्षणवृत्तिरिति।** स्वद्वितीयक्षणवृत्तिरित्यर्थः। इदं च अपेक्षाबुद्ध्यतिरिक्तस्थले, तत्र तु तृतीयक्षणवृत्तिरित्येव वक्तव्यमिति बोध्यम्। वस्तुतस्तु मूले **स्वोत्तरवृत्तीत्यस्य** स्वाव्यवहितोत्तरवर्त्तीत्यर्थः। **अव्यवहितोत्तरत्वं** स्वोत्तरविशेषगुणानुत्तरत्वे सति स्वोत्तरत्वम्। स्वोत्तरत्वं च स्ववृत्तिप्रागभावप्रतियोगित्वमित्येकोक्त्यैवोभयसङ्ग्रहः सम्भवतीति ध्येयम्। अत्र च स्वत्वस्याऽननुगतत्वेन तत्तद्व्यक्तिविश्रान्त एव कार्यकारणभाव इति तत्तद्व्यक्तिनाशं प्रति तत्तद्व्यक्तित्वेनैव कारणता युक्ता, स्वद्वितीयक्षणवृत्तित्वादेरव्यावर्तकत्वात्, अनन्तकार्यकारणभावापत्त्या गौरवं चेत्याशयेनाऽऽह—**अत्र चेति। स्वाव्यवहितेति।** स्वप्रागभावाधिकरणकालप्रागभावानधिकरणत्वे सति स्वप्रागभावाधिकरणत्वमव्यवहितपूर्वत्वम्। अत्र चाऽपेक्षाबुद्धिद्वितीयक्षणोत्पन्नपुरुषान्तरीयज्ञानादिना तृतीयक्षणे तन्नाशवारणाय-**स्वसमानाधिकरण्यप्रवेशः। अपेक्षाबुद्धिद्वितीयक्षणे** च तत्पुरुषस्य न योग्यविशेषगुणोत्पाद इति सिद्धान्तः। ज्ञानादेः क्षणिकत्ववारणाय द्वितीयसम्बन्धप्रवेशः। **न व्यभिचार इति।** नान्वयव्यभिचार इत्यर्थः। ननु योग्यत्वस्य लौकिकप्रत्यक्षविषयत्वरूपत्वेन निर्विकल्पकस्य स्वोत्तरोत्पन्नज्ञानादिना नाशो न स्यादित्याशङ्कामपनेतुं योग्यतां निर्वक्ति-**योग्यत्वं चेति।** लाघवादाह—**अतीन्द्रियेति।** निर्विकल्पकत्वं तु न जातिः, निष्प्रकारकज्ञानत्वस्यैव निर्विकल्पकत्वरूपत्वात्, ज्ञानत्वं तु नाऽतीन्द्रियमिति भावः। **रूपादिनाश इति।** अत्र व्यभिचारपदं व्यतिरेकव्यभिचारपरं, रूपसत्त्वे रूपान्तरानुत्पत्त्या अन्वयव्यभिचारासम्भवात्। एवमुत्तरत्राऽपि। पाकजन्यरूपादिना घटवृत्तिगगनादिसंयोगस्य नाशानुत्पादाद्व्यभिचारो बोध्यः। **व्यधिकरणानामिति।** एवं च समानाधिकरणगुणानामेव नाशकत्वमिति वस्तुगतिमनुरुध्योक्तं, व्यधिकरणेच्छया शब्दनाशेऽपि तस्य द्वित्रक्षणावस्थायित्वनिर्वाहेण चेष्टापत्तिसम्भवात्, परन्तु अस्मदुक्तयैव व्यावृत्तिरिति ध्येयम्। **उत्पत्तिकालिकेच्छादिनेति।** पूर्वक्षणोत्पत्तेच्छादिनेत्यर्थः। यद्यपि **स्वस्यैव** स्वनाशकत्वापत्तिरेव

नोत्पद्यते, तदा घटाद्यवच्छेदेन तदभावोऽस्त्येव । एवं ज्ञानादिकमपि क्षणद्वयावस्थायि । इत्थं चाऽव्याप्यवृत्तिविशेषगुणवत्त्वं, क्षणिकविशेषगुणवत्त्वं चाऽर्थः । पृथिव्यादौ रूपादिर्विशेषगुणोऽस्तीत्यतोऽव्याप्यवृत्तीत्युक्तम् । पृथिव्यादावव्याप्यवृत्तिः संयोगादिरस्तीति विशेषगुणेत्युक्तम् । न च रूपा-

दिनकरी

के चित्तु स्वत्त्वस्य तत्तद्व्यक्तिपर्यवसायितया ततद्गुणस्य तत्तद्गुणो नाशकः, अपेक्षाबुद्धेस्तु द्वित्वप्रत्यक्षमित्याहुः । **परे तु**–एतत्क्षणोत्पन्नयोग्यविभुविशेषगुणत्वेन नाश्यता, एतत्क्षणोत्तरक्षणवृत्तित्वाविशिष्टयोग्यविभुविशेषगुणत्वेन नाशकता, अपेक्षाबुद्धिनाशे तु द्वित्वप्रत्यक्षविशेषसामग्री, तेनाऽपेक्षाबुद्ध्युत्तरक्षणे सामान्यसामग्रीसत्त्वेऽपि न क्षतिः, चरमज्ञानादिकं तूत्तरक्षणवृत्तित्वविशिष्टं स्वयमेव नाशकम् , एतत्क्षणोत्पन्नसकलविशेषगुणसाधारणं चेदमित्यप्याहुः ।

शब्दस्याऽव्याप्यवृत्तित्व-क्षणिकत्वे उपपाद्य ज्ञानादीनामपि ते उपपादयति–**एवमिति** । क्षणिकपदस्य वैयर्थ्यालक्षणद्वयाभिप्रायेणाऽर्थमाह- **इत्थं चेति । अव्याप्यवृत्तीत्युक्तमिति** । न च रूपादीनामपि कालिकाव्याप्यवृत्तित्वात् कथं तद्वारणमिति वाच्यम् । अव्याप्यवृत्तिपदेन दैशिकाव्याप्यवृत्तित्वस्योक्तत्वात् । **विशेषगुणेत्युक्तमिति** । विशेषगुणाश्च—

बुद्ध्यादिषक्टं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ।
अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः–

रामरुद्री

वक्तुमुचिता, तथापि स्वाव्यवहितपूर्ववर्तित्वस्य गुरुत्वेन तत्स्थाने स्वभिन्नत्वमेव निवेश्य स्वस्य स्वनाशकत्ववारणसम्भवादेतावत्पर्यन्तानुधानमिति मन्तव्यम् ।

अपेक्षाबुद्धिनाशं प्रत्यपि तृतीयक्षणोत्पन्नद्वित्वनिर्विकल्पकव्यक्तीनां तत्तव्यक्तित्वेन कारणत्वेऽनन्तकार्यकारणभावापत्त्या गौरवात् तत्रैककारणताया अपि वक्तु शक्यत्वेन गौरवस्वीकारानौचित्यादित्याशयेनाऽऽह–**अपेक्षाबुद्धेस्त्विति** । एकस्मिन् क्षणे नानाविशेषगुणव्यक्तीनां नाशेन तत्तद्व्यक्तिनाशं प्रति तत्तद्व्यक्तित्वेन कारणत्वकल्पन बहुतरादिकार्यकारणभावाधिक्यसम्पादकम् , अतो लाघवेन तत्तत् क्षणोत्पन्नयोग्यविभुविशेषगुणनाशं प्रति तत्क्षणोत्तरक्षणवृत्तित्वविशिष्टगुणत्वेनैव कारणता वक्तुमुचितेत्याशयेनाह–**एतत्क्षणोत्पन्नेति** । नन्वेवमपेक्षाबुद्धेरपि स्वद्वितीयक्षणवृत्तिगुणेन नाशापत्तिः, तथा च द्वित्वनिर्विकल्पकक्षण एवाऽपेक्षाबुद्धिनाशे चतुर्थक्षणे द्वित्वनाशाद्विषयाभावेन तत्क्षणे द्वित्वविशिष्टप्रत्यक्षानुपपत्तिरित्यत आह–**अपेक्षाबुद्धीत्यादि । विशेषसामग्रीति** । तथा च विशेषसामग्रीसहितायाः एव सामान्यसामग्न्याः कार्योपधायकतया सामान्यसामग्रीसत्त्वेऽपि द्वित्वप्रत्ययक्षरूपविशेषकारणाभावात् तृतीयक्षणे नाऽपेक्षाबुद्धिविनाश इति भावः । नन्वेवं प्रथमकल्पे यज्ज्ञानानन्तरं मुक्तिः, तादृशज्ञानानन्तरं तदात्मनि ज्ञानाद्यनुत्पत्त्या तन्नाशानुपपत्तिः, तद्व्यक्तित्वेन स्वस्यैव नाशकत्वे तस्य क्षणिकत्वापत्तिः, यदि च तदनन्तरमपि तत्र घटादिसंयोगोत्पत्त्या तदेव नाशकमित्युच्यते, तथाऽपि महाप्रलयपूर्वतृतीयक्षणोत्पन्नचरमात्मसाक्षात्कारद्वितीयक्षणे गुणोत्पादस्वीकारे क्षणिकगुणानङ्गीकारेण तृतीयक्षणे महाप्रलयानुपपत्तेस्तन्नाशकं दुर्लभमेव, न च चरमात्मसाक्षात्कारेणाऽदृष्टमात्रनाशे कारणाभावेन महाप्रलयानुपपत्तिरिति वाच्यम् , महाप्रलयानुरोधेन तत्कारणस्यैव तज्जनकादृष्टनाशे प्रतिबन्धकत्वोपगमादित्यत आह–**चरमज्ञानादिकं त्विति** । अत्र कार्यकारणभावानन्त्यप्रयुक्तगौरवम् **'आहुः'** इत्यनेन

दीनामपि कदाचित् तृतीयक्षणे नाशसम्भवात् क्षणिकविशेषगुणवत्त्वं क्षित्यादावतिव्याप्तमिति वाच्यम्। चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वात्। अपेक्षाबुद्धिः क्षणत्रयं तिष्ठति, क्षणचतुष्टयं तु न किमपि जन्यज्ञानादिकं तिष्ठति, रूपत्वादिकं तु क्षणचतुष्टयस्थायिन्यपि रूपादौ वर्तते इति तद्व्युदासः। ईश्वरज्ञानस्य चतुःक्षणवृत्तित्वात् ज्ञानत्वस्य तद्वृत्तित्वाज्जन्येत्युक्तम्। यद्याकाशजीवात्मनोः साधर्म्यं, तदा जन्येति न देयं, द्वेषत्वादिकमादायाऽऽत्मनि लक्षणसमन्वयात्। परममहत्त्वस्य तादृशगुणत्वात्, चतुर्थक्षणे द्वित्वादीनां नाशाभ्युपगमाद् द्वित्वादीनामपि तथात्वात्

दिनकरी।

इति वक्ष्यमाणाः, तल्लक्षणं तु गुणनिरूपणे वक्ष्यते। यत्तु अव्याप्यवृत्तिविशेषगुणवत्त्वमीश्वरेऽव्याप्तं, तद्गुणानां व्याप्यवृत्तित्वादिति। तन्न। अव्याप्यवृत्तिवृत्तिपदेनाऽव्याप्यवृत्तिगुणत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। **चतुःक्षणवृत्तीति**। चतुःक्षणवृत्तीनि यानि जन्यानि-घटादीनि तदवृत्तिर्या जातिर्ज्ञानत्वादिः तद्वान् विशेषगुणः-ज्ञानादिः, तद्वत्त्वास्याऽऽत्मादौ सत्त्वाल्लक्षणसमन्वयः। अत्र च वृत्तित्वं समवायेन विवक्षितम्। तेन जन्यमात्रे कालिकेन ज्ञानत्वस्य वृत्तित्वेऽपि न क्षतिः। वृत्त्यन्तं च ज्ञानत्वादेर्जन्यवृत्तित्वात् असम्भववारणाय। **तदर्थत्वादिति**। क्षणिकविशेषगुणवत्त्वाथत्वादित्यर्थः। ननु त्रिक्षणवृत्तित्वमुपेक्ष्य चतुःक्षणवृत्तित्वपर्यन्तानुधावने प्रयोजनाभावः, न च त्रित्व-चतुष्ट्वयोर्लाघवगौरवविरहेण चतुष्ट्वोपादाने इच्छैव नियामिकेति वाच्यम्, प्रथमोपस्थितत्वरूपलाघवस्य त्रित्वे सम्भवादत आह—**अपेक्षाबुद्धिरिति**। तथा च त्रिक्षणवृत्तित्वस्य प्रवेशे ज्ञानत्वस्य सङ्ग्रहो न स्यादिति भावः। चतुःक्षणवृत्तिजन्यावृत्तीत्यस्य फलमाह-**रूपत्वादिकं त्विति**। तद्व्युदासः-रूपत्वजातिव्युदासः। तथा च रूपत्वजातिमद्विशेषगुणवति घटादौ याऽतिव्याप्तिः सा निरस्तेति भावः। जन्येत्यस्य फलमाह **ईश्वरेति**। 'शरीरिणाम्' इत्यत्र मूले 'शरीरि'पदस्य यथाश्रुतार्थकत्वाभिप्रायेणाऽऽह-**यद्याकाशजीवात्मनोरिति**। ननु जन्यत्वाप्रवेशे ज्ञानत्वेच्छात्वप्रयत्नत्वजातीनां चतुःक्षणवृत्त्यवृत्तित्वाभावात् कथं लक्षणसमन्वय इत्यत आह-**द्वेषत्वादिकमिति**। 'आदि'ना शब्दत्वपरिग्रहः। विशेषपदस्य कृत्यमाह-**परममहत्त्वस्येति**। **तादृशगुणत्वादिति**। चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्गुणत्वादित्यर्थः। ननु परममहत्त्वत्वं न जातिः, किन्त्वपकर्षानाश्रयपरिमाणत्वमित्युक्तं, तथा च कथं तदादायाऽतिप्रसङ्ग इत्यत आह-**चतुर्थक्षणे द्वित्वादीनामिति**। यद्वा ननु जन्यपदानुपादाने परममहत्त्वत्वस्य चतुःक्षणवृत्तित्वान्न परममहत्त्वमादाय कालादावतिव्याप्तिरत आह-**चतुर्थक्षणेति**। **द्वित्वादीनामिति**। **तथात्वादिति**। तादृशजा-

रामरुद्री।

सूचितम्। **व्याप्यवृत्तित्वादिति**। ईश्वरस्य शरीरविरहेण तदवच्छिन्नत्वासम्भवादिति भावः। **न क्षतिरिति**। नाऽसम्भव इत्यर्थः। **चतुःक्षणवृत्तीत्यस्य फलमाह-वृत्त्यन्तं चेति। ज्ञानत्वस्य सङ्ग्रहो न स्यादित्यनेन** ज्ञानत्वमादायाऽऽत्मनि लक्षणसमन्वयायैव तृतीयक्षणवृत्तित्वमुपेक्षितम्। इच्छात्वमादायैव लक्षणसमन्वयसम्भवेन त्रिक्षणवृत्तीत्यपिशक्यते वक्तुमिति सूचितम्। **यथाश्रुतार्थकत्वाभिप्रा-**

अव्याप्यवृत्तिक्षणिको विशेषगुण इष्यते ॥ २७ ॥
रूप-द्रवत्व-प्रत्यक्ष-योगिनः प्रथमास्त्रयः ।
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः ॥ २८ ॥

तद्धारणाय-विशेषेति। **त्रिक्षणवृत्तित्वं वा वक्तव्यम्**। इच्छात्वादिकमादायाऽऽत्मनि लक्षणसमन्वयात् ॥ २६ ॥ २७ ॥ इत्याकाशात्मनोः साधर्म्यकथनम् ॥

रूपद्रवत्वेति। **पृथिव्यप्तेजसां रूपवत्त्वं, द्रवत्ववत्त्वं, प्रत्यक्षविषयत्वं चेत्यर्थः। न च चक्षुरादीनां भर्जनकपालस्थवह्नेः ऊष्मणश्च रूपवत्त्वे किं मानमिति वाच्यम्**। तत्राऽपि तेजस्त्वेन रूपानुमानात्। एवं वाय्वानीतपृथिवीजलतेजोभागानामपि पृथिवीत्वादिना रूपानुमानं बोध्यम्।

न च घटादौ द्रुतसुवर्णादिभिन्ने तेजसि च द्रवत्ववत्त्वमव्याप्तमिति वाच्यम्। द्रवत्ववद्वृत्ति--द्रव्यत्वव्याप्य—जातिमत्त्वस्य विवक्षितत्वात्। घृतजतुप्रभृतिषु पृथिवीषु जलेषु द्रुतसुवर्णादौ तेजसि च द्रवत्वसत्त्वात्तत्र च पृथिवीत्वादिसत्त्वात्तदादाय सर्वत्र लक्षणसमन्वयः। **न च प्रत्यक्षविषयत्वं परमाण्वादावव्याप्तम्, अतिव्याप्तम् च रूपादाविति वाच्यम्। चाक्षुषलौकिकप्रत्यक्षविषयवृत्ति—द्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। आत्मन्यतिव्याप्तिवारणाय** चाक्षुषेति **इति पृथिव्यप्तेजसां साधर्म्यकथनम्**॥

गुरुणी इति। **गुरुत्ववत्त्वं रसवत्त्वं च पृथिवीजलयोरित्यर्थः। न च घ्राणेन्द्रियादीनां वाय्वानीतपृथिव्यादिभागानां च रसादिमत्त्वे किं मानमिति वाच्यम्। तत्रापि पृथिवीत्वादिना तदनुमानात्।**

इति पृथिवीजलयोः साधर्म्यकथनम्।

द्वयोरिति-**पृथिवी तेजसोरित्यर्थः। न च नैमित्तिकं द्रवत्वं घटादौ वह्न्यदौ चाऽव्याप्तमिति वाच्यम्। नैमित्तिकद्रवत्वसमानाधिकरण-द्रव्यत्वव्याप्य-**

दिनकरी।

तिमद्गुणत्वादित्यर्थः। प्रथमोपस्थितत्वरूपलाघवमभिसन्धायाऽऽह **त्रिक्षणेति**॥२६॥२७॥

इत्याकाशात्मनोः साधर्म्यकथनम् ॥

'चक्षुरादीनां' इत्यादिना घ्राणादिपरिग्रहः। **तत्राऽपि**-चक्षुरादिष्वपि। पृथिवीत्वादौ द्रवत्ववद्वृत्तित्वमुपपादयति **घृतजत्वित्यादिना**।

योगिप्रत्यक्षविषयत्वादाह **अतिव्याप्तं चेति**। घटो वायुमानिति वाय्वंशे उपनीतभानात्मकघटविशेष्यकचाक्षुषविषयवायुवृत्ति-द्रव्यत्वव्याप्य-वायुत्वजातिमति वायावतिव्याप्तिवारणाय-**लौकिकेति**॥ इति पृथिव्यप्तेजसां साधर्म्यकथनम्॥

गुरुत्ववत्त्वमिति। गुरुत्वं-रक्तिक-माषक-तोलकत्वादि। इदमुपलक्षणम्। पतन-

रामरुद्री।

येणेति। स्वावच्छिन्नाज्ञानादिमत्त्वसम्बन्धेन शरीरविशिष्टार्थकत्वाभिप्रायेणेत्यर्थः॥ २६ ॥ २७ ॥

॥ इत्याकाशात्मनोः साधर्म्यकथनम् ॥

मूलस्य न्यूनतामपनेतुमाह-**पतनवत्त्वमितीति**। बोध्यमित्यत्र क्षितिजलयोः साधर्म्यमित्यादिः। पतनत्वं निर्वक्ति-**गुरुत्वेति**। न च परमाणूनां सर्वदा पतनापत्त्या प्रकृष्टगुरुत्वस्यैव पतनासमवायिकार-

आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः ।
यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् ॥ २९ ॥
स्पर्शादयोऽष्टौ वेगाख्यः संस्कारो मरुतो गुणाः ।
स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः ॥ ३० ॥
स्पर्शादयोऽष्टौ वेगश्च गुरुत्वं च द्रवत्वकम् ।
रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ॥ ३१ ॥
स्नेहहीना गन्धयुताः क्षितावेते चतुर्दश ।
बुद्ध्यादिषट्कं सङ्ख्यादिपञ्चकं भावना तथा ॥ ३२ ॥
धर्माऽधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश ।

जातिमत्त्वस्य विवक्षितत्वात् ॥२८॥ इति पृथिवीतेजसोः साधर्म्यकथनम् ॥

आत्मान इति । **पृथिव्यप्तेजोवाय्वाकाशात्मनां विशेषगुणवत्त्वमित्यर्थः ।**

इति भूतात्मनोः साधर्म्यकथनम् ॥

यदुक्तमिति । **ज्ञेयत्वादिकं विहायेति बोध्यम् । तत्तु न कस्याऽपि वैधर्म्यं, केवलान्वयित्वात् ॥ २९ ॥ ॥ इति वैधर्म्यनिरूपणम् ॥**

दिनकरी ।

वत्त्वमित्यपि बोध्यम् । पतनत्वं-गुरुत्वासमवायिकारणककर्मत्वम् । उल्का पततीत्यादिप्रयोगस्तु लाक्षणिकः । वस्तुतस्तु गुरुत्वासमवायिकारणककर्मवृत्ति पतनत्वं जातिविशेष एव ॥२८॥

इति पृथिवीजलयोः साधर्म्यकथनम् ॥

ननु सप्तानामपि साधर्म्यं ज्ञेयत्वं, तत् कस्य वैधर्म्यमित्याशङ्कायामाह-**ज्ञेयत्वादिकमिति ॥ २९ ॥** इति वैधर्म्यनिरूपम् ॥

"वायोर्नवैकादश तेजसो गुणाः जल-क्षिति-प्राणभृतां चतुर्दश ।
दिक्कालयोः पञ्च, षडेव चाऽम्बरे, महेश्वरेऽष्टौ मनसस्तथैव च—"

इति प्राचीनश्लोकमनुसृत्य वायोस्तावद्गुणानाह मूले-**स्पर्शादयोऽष्टाविति । स्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वान्यष्टौ वेगाख्यसंस्कारश्चेति वायोर्गुणा इत्यर्थः ।**

तेजसो गुणानाह **स्पर्शाद्यष्टाविति ।** अपां गुणानाह-**स्पर्शादयोऽष्टाविति ।**

पृथिव्या गुणानाह-**स्नेहहीना इति ।** एते-अव्यवहितपूर्वोक्ताः ।

रामरुद्री ।

णत्वेनाऽङ्गीकरणीयतया परमाणौ तदभावेन पतनासम्भवादव्याप्तिरिति वाच्यम् । पतनवद्वृत्ति-द्रव्यत्वव्याप्य-जातिमत्त्वस्य विवक्षणीयत्वादिति भावः । **नन्वेवमप्युल्का पततीति प्रयोगानुपपत्तिः, तेजोरूपोल्कायां गुरुत्वाभावेन पतनासम्भवादित्यत आह-उल्केति । लाक्षणिक इति ।** 'गम' धात्वर्थ इत्यादिः । लाघवमभिप्रेत्याऽऽह **वस्तुतस्त्विति । जातिविशेष एवेति ।** गुरुत्वजन्यतावच्छेदकतयैव तत्सिद्धिरिति भावः ॥ २८ ॥ इति पृथिवीजलयोः साधर्म्यकथनम् ॥

ननु मूले **'यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत्-'** इति सामान्यतोऽभिधानमयुक्तं, सप्तपदार्थानां साधर्म्ये ज्ञेयत्वादौ तदितराप्रसिद्धया तदितरवैधर्म्यत्वाभावादित्याशङ्कामपनेतुं मुक्तावल्यां **'ज्ञेयत्वादिकं विहाय'** इति पूरयतीत्याह-**नन्वित्यादिना ॥ २९ ॥** इति वैधर्म्यनिरूपणम् ॥

प्राचीनश्लोकमिति । क चित् कारिकावलीग्रन्थेऽयं श्लोको दृश्यते, प्रक्षिप्त एव स इति मन्तव्यम्, एतद्वाक्यस्वरसात् ।

सङ्ख्यादिपञ्चकं कालदिशोः शब्दश्च ते च खे ॥ ३३ ॥
सङ्ख्यादिपञ्चकं बुद्धिरिच्छा यत्नोऽपि चेश्वरे ।
पराऽपरत्वे सङ्ख्याद्याः पञ्च वेगश्च मानसे ॥ ३४ ॥

स्पर्शादय इति ॥ **ते च पञ्च सङ्ख्यादयः । खे—आकाशे ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ इति सामान्यतो द्रव्यगुणकथनम् ॥**

दिनकरी ।

आत्मनो गुणानाह-**बुद्ध्यादिषट्कमिति** । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नाः, **सङ्ख्यादिपञ्चकं** सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागाः ।

कालदिशोर्गुणानामैक्यादेकोक्त्यैवाऽऽह-**सङ्ख्यादिपञ्चकमिति** ।

आकाशस्य गुणानाह-**शब्दश्चेति** । तथा चाऽऽकाशे शब्दः, सङ्ख्यादयः पञ्च, एवं षड् गुणा इत्यर्थः ।

ईश्वरस्य गुणानाह-**सङ्ख्यादीति** । अत्र नव्याः, ईश्वरस्य परिमाणवत्त्वे प्रमाणाभावः, न च द्रव्यत्वेन तदनुमानमिति वाच्यम् , अप्रयोजकत्वात् , ईश्वरे द्रव्यत्वसत्त्वे मानाभावाच्च । अत एव तत्र संयोगविभागयोः सत्त्वेऽपि मानाभावः । पृथक्त्वस्य च गुणत्वमेव निरस्तम् । यथा चेश्वरे सुखसम्भवः, तथाऽग्रे व्यक्तीभविष्यति । एवं च सङ्ख्याबुद्धीच्छाप्रयत्नसुखानीति पञ्चैवेश्वरस्य गुणा इत्याहुः॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥

इति सामान्यतो द्रव्यगुणकथनम् ॥

॥ इति श्रीभारद्वाजकुलाम्बुधिपूर्णचन्द्रबालकृष्णभट्टात्मज महादेवभट्टकृतौ मुक्तावलीप्रकाशे-
प्रथमः परिच्छेदः ॥

रामरुद्री ।

ऐक्यादिति । एकजातीयत्वादित्यर्थः । तेन दिक्कालयोः परिमाणादिभेदेऽपि न क्षतिः ।

अप्रयोजकत्वादिति । ईश्वरपरिमाणस्याऽजन्यत्वेन जन्यपरिमाणं प्रति द्रव्यत्वेन कारणत्वेऽपि तादृशकार्यकारणभावग्रहरूपानुकूलतर्कसहकृतेनोक्तानुमानेन ईश्वरे परिमाणसिद्धयसम्भवादिति भावः। ननु द्रव्यत्वं यदि परिमाणव्यभिचारि स्यान्निरूपाधिकं न स्यादित्यनुकूलतर्कसहकृतेनोक्तानुमानेन ईश्वरेऽपि परिमाणसिद्धिर्निष्प्रत्यूहैव, अन्यथा कालदिशोरपि परिमाणसिद्धिप्रसङ्गादित्यस्वरसादुक्तानुमाने स्वरूपासिद्धिमाह-**ईश्वर इति** । अत एव वेदान्तिनामीश्वरस्य स्वप्रकाशसुखात्मकत्वे विवादोऽपि सङ्गच्छते इति भावः । **निरस्तमिति** । रूपं घटात् पृथगिति व्यवहारानुरोधेन पृथक्पदस्य भिन्नार्थकताप्रौढ्येन घटः पटात् पृथगित्यत्राऽपि तद्विषयकतयैवोपपत्तौ तादृशप्रतीया पृथक्त्वरूपगुणान्तरासिद्धेरिति भावः । **तथाऽग्रे व्यक्तीभविष्यतीति** । 'नित्यं विज्ञानमानन्दं ब्रह्म-' इति 'आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्च न-' इत्यादिश्रुतिभिरीश्वरे नित्यसुखसिद्धेरिति भावः । **सङ्ख्येति** । 'एको ह वै नारायणः-' इत्यादिश्रुत्या तत्सिद्धिरिति भावः । ज्ञानेच्छाप्रयत्नास्तु क्षितौ सकर्तृकत्वानुमानेनैव सिद्धयन्तीति प्रतिपादितमधस्तात् । न चैवम् 'अणोरणीयान् महतो महीयान्-' इति श्रुत्या ईश्वरे परिमाणमपि कुतो न सिद्धयतीति वाच्यम्। महत्त्वाणुत्वयोर्विरुद्धत्वेन एकत्रोभयोरसम्भवान्महत्त्वस्य देशकालापरिच्छिन्नत्वरूपताया अणुत्वस्य च सर्वान्तर्यामित्वरूपताया एव प्रकृते वक्तव्यत्वादिति हृदयम् ॥३०॥ ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥ इति सामान्यतो द्रव्यगुणकथनम् ॥

॥ इति श्रीरामरुद्रभट्टाचार्यविरचितायां मुक्तावलीप्रकाशतरङ्गिण्यां प्रथमस्तरङ्गः ॥

तत्र क्षितिर्गन्धहेतुः नानारूपवती मता ।

साधर्म्यवैधर्म्ये निरूप्य सम्प्रति प्रत्येकं पृथिव्यादिकं निरूपयति—तत्रेति । गन्धहेतुरिति । **गन्धसमवायिकारणमित्यर्थः । यद्यपि गन्धवत्त्वमात्रं पृथि-**

दिनकरी ।

गन्धहेतुत्वं कालादौ गतमतो व्याचष्टे—**गन्धेति** । गन्धवद्वृत्ति-द्रव्यत्वव्याप्य-जाति-मत्त्वमित्यर्थः तेन सुरभ्यसुरभिकपालारब्धनिर्गन्धघटे (१) नाऽव्याप्तिः । वृत्त्यन्तेन न

रामरुद्री

कालादाविति । गन्धनिष्ठकार्यत्वावच्छिन्नकार्यतानिरूपित-तादात्म्यसम्बन्धावच्छिन्नकालत्वावच्छिन्नकारणतायाः कालेऽपि सत्त्वादिति भावः । ननु गन्धत्वावच्छिन्नकार्यताविवक्षणे नैष दोषः, आवश्यकं च तद्विवक्षणम्, अन्यथा कार्यतायां समवायसम्बन्धावच्छिन्नत्वविवक्षणेऽपि गन्धनिष्ठसमवायसम्बन्धावच्छिन्नगुणत्वावच्छिन्नकार्यतानिरूपितद्रव्यत्वावच्छिन्नकारणतामादाय जलादावतिव्याप्त्यापत्तिरित्याशयेन आदिपदमुपात्तम् । तेन च गन्धत्वावच्छिन्नकारणविजातीयादृष्टसङ्ग्रह इति ध्येयम् । गन्धवद्वृत्तीत्यादिग्रन्थस्य गन्धवत्त्वमात्रमित्यस्येत्यादिः । **द्रव्यत्वव्याप्येति** । द्रव्यत्वान्यूनवृत्तीत्यर्थः । तेन द्रव्यत्वस्याऽपि द्रव्यत्वव्याप्यत्वेन न तदादाय जलादावतिव्याप्तिः, एवमग्रेऽपि द्रष्टव्यम् । **नाऽव्याप्तिरिति** । अनेन

---

(१) तत्र हि यदि गन्ध उत्पद्यते इत्युच्यते तर्हि वक्तव्यमेतत् यत् सुरभिगन्धोऽसुरभिगन्धो वोत्पद्यत इति, किन्तु द्वयमपि न सम्भवति, विनिगमकाभावात् । उभयमप्युत्पत्स्यत इति चेन्न । गन्धमात्रस्य व्याप्यवृत्तित्वनियमेनैकत्र द्वयोरसम्भवात् । चित्ररूपवच्चित्रगन्धोत्पत्तिरेवाऽस्तु तत्रेति चेन्न । प्रमाणाभावात । उक्तरीत्या चित्ररूपमपि नैव सिध्येदिति चेन्न । प्रत्यक्षे उद्भूतरूपमहत्त्वयोः कारणत्वेन पटे च रूपाभावे तस्याऽप्रत्यक्षत्वापत्तिवारणाय चित्ररूपस्य नानारूपतन्त्वारब्धे पटेऽङ्गीकारात् । अत्र तु नंतादृशं प्रमाणमतोऽस्य निर्गन्धत्वमेवेष्टव्यमिति भावः ।

परमिदं यथाश्रुते । तत्र पृथिवीत्वे एव प्रमाणविरहेण तत्राऽव्याप्तिनिरासासङ्गतेः । गन्धसमवायिकारणतावच्छेदकतया सिद्धा पृथिवीत्वजातिरत्राऽपि सेत्स्यतीति चेन्न । निर्गन्धघटे गन्धसमवायिकारणतासत्त्व एव प्रमाणविरहात् । अथैवं द्रव्यत्वादिकमपि यत्र विभागो नोत्पन्नस्तादृशघटे न सिध्येत्, तत्र विभागसमवायिकारणतासत्त्व एव प्रमाणाभावात् इति वक्तुं शक्यत्वात् । न च समवायिकारणत्वस्य समवायसम्बन्धावच्छिन्नकार्यतानिरूपितातादात्म्यसम्बन्धावच्छिन्नकारणतारूपस्य कारणतावटितत्वेन कारणतायाश्च कार्याव्यवहितप्राक्क्षणावच्छिन्नकार्याधिकरणवृत्तिकाभावप्रतियोगितानवच्छेदकधर्मवत्त्वरूपत्वेन तादृशधर्मवत्त्वस्य निर्गन्धघटेऽपि सत्त्वेन तत्र कारणत्वमक्षतमेवेति वाच्यम् । कारणतायास्तादृशधर्मस्वरूपत्वे तादृशधर्मस्यव निर्गन्धघटे सत्त्वे प्रमाणविरहस्य दर्शितत्वात् । न च पाकजस्पर्शादिजनकतावच्छेदकतयैव सिद्धा पृथिवीत्वजातिरत्राऽपि कारणतात्मिका भविष्यतीति वाच्यम् । कारणतायाः पृथिवीत्वादभेदे अवच्छेद्यावच्छेदकभावस्याऽसम्भवात् । न च तत्राऽप्यवच्छेद्यावच्छेदकभावोऽभेदेऽपि समर्थनीयः । कार्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वविशिष्टस्यैव तस्य कारणतारूपत्वेन शुद्धपृथिवीत्वावच्छिन्नत्वसम्भवादिति वाच्यम् । एवमपि तादृशपृथिवीत्वरूपकारणतायां जातेर्वा पाकजाऽपाकजस्पर्शवत्सुरभ्यसुरभिकपालद्वयारब्धनिःस्पर्शगन्धघटेऽसिद्धेर्जागरूकत्वादिति चेन्मैवम् । पृथिव्यारब्धत्वेनैव तत्र पृथिवीत्वसिद्धेः । तदवयवेषु च पृथिवीत्वं गन्धवत्त्वेनैव सिद्धम् । न चैवं पथिवात्वस्याऽनवच्छेदकत्वं, पृथिवीत्वरूपगन्धसमवायिकारणतायां निर्गन्धघटेऽप्यभ्युपगमात् । गन्धोऽपि तन्त्वोरुत्पद्यतामिति मा वोचः, तत्रावयविनि समानजातीयगन्धारम्भं प्रति स्वसमवायिसम-

व्या लक्षणमुचितं, तथाऽपि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तम् (१)। तथा हि—पृथिवीत्वं हि गन्धसमवायिकारणतावच्छेदकत-

दिनकरी।

जलादावतिव्याप्तिः। द्रव्यत्वव्याप्येत्यनेन तत्रैव सत्तामादाय सा न। न वा जातिपदोपादानाज्जलपृथिव्यन्यतरत्वमादाय सा। गन्धवत्त्वं वृत्तित्वं च समवायेन, तेन कालिकसम्बन्धेन गन्धवति समवायसम्बन्धावच्छिन्नवृत्तित्ववज्जलत्वादिमति, पृथिवीनिरूपितकालिकसम्बन्धावच्छिन्नवृत्तित्ववज्जलत्वादिमति वा जलादौ नाऽतिव्याप्तिः। **प्रमाणोपन्यासायेति।**

रामरुद्री।

च तादृशघटेऽव्याप्तिवारणाय गन्धवत्त्वस्योक्तरूपस्यैव विवक्षणीयतया तदपेक्षया लाघवेन गन्धसमवायिकारणत्वमेव लक्षणं वक्तुमुचितं, तथाऽपि पृथिवीत्वावच्छिन्ने स्वरूपयोग्यतारूपकारणतामादाय तादृशघटेऽपि लक्षणसमन्वयसम्भवात्। न च द्रव्यत्वव्याप्यत्वं द्रव्यनिष्ठभेदप्रतियोगितावच्छेदकत्वमेव, कारणताशरीरे च गन्धवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वरूपनियमांशस्याऽनन्यथासिद्धत्वस्य च प्रवेशेन तत्रैव गौरवमिति वाच्यम्। अत्रापि नित्यत्वादिघटितगुरुशरीरजातित्वस्य प्रवेशात्। विनिगमनाविरहेणाऽपि तस्य लक्षणता दुर्वारैवेति सूचितम्। **नाऽतिव्याप्तिरिति**। एवं चाऽन्यतरत्वमादायाऽतिव्याप्त्यप्रसक्त्या जलपृथिवीद्वित्वमादाय जलेऽतिव्याप्तिवारणायैव जातिपदमिति विभावनीयम्।

वेतत्वसम्बन्धेन विजातीयगन्धस्यैव प्रतिबन्धकत्वात्। साजात्यं च सुरभित्वासुरभित्वान्यतररूपेण। एवमन्यत्राऽप्यूह्यम्॥

(१) लक्षणस्य तावत्प्रयोजनमितरभेदसाधनम्। तथा च न्यायवार्तिके–'समानासमानजातीयव्यवच्छेदो लक्षणार्थः' इति। गन्धवत्त्वस्य पृथवीलक्षणत्वे च प्रयोजनं तदेवेति वक्तव्यम्। तथा हि–पृथिवी इतरेभ्योऽवादिभ्यो भिद्यते गन्धवत्त्वादिन्यनुमानं फलितम्। तत्र च पक्षतावच्छेदकस्यैकस्याऽनुगतस्याऽभावे तादृशानुमित्यनुपपत्तिः। यद्वा व्यवहारसिद्धिरपि लक्षणप्रयोजनम्। तथा चाऽऽहुरभियुक्ताः—

"व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम्—"

इति। एवं च पृथिवी 'पृथिवी' इति व्यवहर्तव्या, गन्धवत्त्वात्, यन्नैवं तन्नवं, यथा जलमित्यनुमानेन व्यवहारसिद्धिर्भवति। अत्राऽपि सकलपृथिव्यनुगतस्य पक्षतावच्छेदकस्याऽभावे तादृशव्यवहारानुमानमपि न घटते इति सर्वलक्ष्यानुगतमेकं पृथिवीत्वाख्यं लक्ष्यतावच्छेदकं साधयित्वंवाऽनन्तरं लक्षणचिन्ता कार्यति प्रथमतो मूले पृथिवीत्वसाधकमेव प्रमाणमभिहितमिति निश्चित्य पृथिवीत्वं साधयितुं प्रक्रमते–तथाऽपि पृथिवीत्वजातावित्यादिना। प्रमाणोपन्यासाय—अनुमानरूपप्रमाणोपन्यासाय। घृतादिषु पृथिवीतिप्रत्ययाभावेन तत्र पृथिवीत्वसाधनायाऽनुमानस्यैवाऽऽवश्यकत्वादिति।

समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नकारणता किञ्चिद्धर्मावच्छिन्ना कारणतात्वादित्यनुमानम्। अथाऽत्र सुगन्धि सलिलं, सुरभिः समीरण इत्यादिप्रतीत्या जलादिष्वपि गन्धवत्त्वस्याऽऽवश्यकतया तत्समवायिकारणत्वमपि वाच्यवादावेष्टव्यम्। तत्र च पृथिवीत्वस्याऽभावेन तदन्यूनानतिरिक्तवृत्तित्वरूपस्य अवच्छेदकत्वस्य पृथिवीत्वेऽसम्भवेन पृथिव्यब्वायुसाधारण एव कश्चन धर्मोऽन्वेष्टव्यः, न तु जलादिव्यावृत्तः, अनवच्छेदकत्वात्। न च स्वरूपसम्बन्धरूपमेवाऽत्राऽवच्छेदकत्वं, तस्य च पृथिवीत्वे सम्भव इति वाच्यम्। एवमपि अकल्पसपृथिवीत्वे तत्कल्पनामपेक्ष्य कल्पते द्रव्यत्वादावेव तत्कल्पनेनाऽर्थान्तरत्वापातात्। नाऽप्यनतिरिक्तवृत्तित्वमेवाऽत्राऽवच्छेदकत्वं वक्तव्यम्। घटत्वादेरपि तथात्वापत्तेः। न च घटत्वपटत्वादीनामनन्तानां विनिगमनाविरहेण तथात्वक-

या सिद्ध्यति, अन्यथा गन्धत्वावच्छिन्नस्याऽऽकस्मिकत्वापत्तेः ।

दिनकरी ।

यद्यपि पृथिवीत्वस्य प्रत्यक्षतया न प्रमाणान्तरापेक्षा, तथाऽपि अयोग्यसाधारण्येन प्रत्यक्षासम्भवात् तत्साधारण्येन पृथिवीत्वसिद्ध्यर्थं तदुपन्यास इति भावः । **अन्यथा**—गन्धत्वावच्छिन्नं प्रति हेतुत्वानङ्गीकारे, **आकस्मिकत्वापत्तेः**—नियतकारणानियम्यत्वापत्तेरित्यर्थः । तथा च कार्यमात्रवृत्तेर्गन्धत्वस्य कार्यतावच्छेदकत्वानुरोधेन तदवच्छिन्ने

रामरुद्री ।

अयोग्यसाधारण्येनेति । अयोग्यविशेषणत्वेनेत्यर्थः वैशिष्ट्यं तृतीयार्थः । **तत्साधारण्येन**-अयोग्यपरमाण्वादिवृत्तित्वेनेत्यर्थः । तथाच परमाणौ प्रत्यक्षेण न पृथिवीत्वजातिसिद्धिः, अपि तु तत्राऽपि गन्धोत्पत्त्या गन्धरूपकार्यहेतुकानुमानेनैव तत्कारणतावच्छेदकपृथिवीत्वसिद्धिरिति भावः । **नियतकारणेति** । कारणे **नियतत्वं**-जलादिव्यावृत्तत्वमेव । **नियम्यत्वं**-कार्यतावच्छेदकधर्मत्वं,तथा च गन्धं प्रति पृथिवीत्वेनाऽकारणत्वे कदाचिज्जलादावपि तदुत्पादः स्यादिति भावः । ननु नेयमापत्तिः सम्भवति, पाकजगन्धे विजातीयतेजःसंयोगत्वेन तेजःसंयोगस्य, अपाकजे चाऽवयवगन्धस्यैव कारणतया तदभावादेव जलादौ गन्धोत्पादासम्भवात्, वैजात्यस्य पृथिव्यनुयोगिकसंयोग एव स्वीकरणीयत्वात्, अन्यथा एकवैजात्यस्यैव रूपादिजनकतावच्छेदकतया जलादौ रूपोत्पादापत्तेः । न च रूपात्मकपर्पतिबन्धकसत्त्वादेव न तत्र तदापत्तिरिति वाच्यम् । रूपान्तरोत्पादकतावच्छेदकस्यैव पूर्वरूपनाशकतावच्छेदकतया नाशस्यैवाऽऽपादनीयत्वादित्यस्वरसाद्भावमाह-**तथा चेति** । **कार्यतावच्छेदकत्वनियमादि**त्यस्य समवायिकारणकार्यतावच्छेदकत्वनियमादित्यर्थः । तेन गन्धत्वस्य विजातीयादृष्टजन्यतावच्छेदकत्वेऽपि न पृथिवीत्वासिद्धिप्रसङ्गः, व्याप्तिसिद्धिस्तु घटत्वादिकपालत्वादिभ्यां कार्यकारणभावदर्शनादेवेति भावः । ननूक्तव्याप्तौ मानाभावः,

---

ल्पनामपेक्ष्य लाघवात्पृथिवीत्व एव तत्कल्पयितुमुचितमिति वाच्यम् । घटीयगन्धत्वावच्छिन्नं प्रति घटत्वेन, पटीयगन्धत्वावच्छिन्नं प्रति पटत्वेन च कार्यकारणभावानामावश्यकत्वेन गन्धत्वावच्छिन्नं प्रति पृथिवीत्वेन कारणत्वे मानाभावात् । न च गौरवाद्विशेषकार्यकारणभावसत्त्व एव प्रमाणाभाव इति सामान्यकार्यकारणभावो निष्प्रत्यूह एवेति वाच्यम् । घटे पटीयगन्धापत्तिवारणाय विशेषकार्यकारणभावस्याऽऽवश्यकत्वात् । न च गन्धत्वावच्छिन्नं प्रति पृथिवीत्वेनैव कार्यकारणभावस्वीकारात् न घटे पटीयगन्धापत्तिः, कारणस्य पृथिव्यास्तादात्म्यसम्बन्धेनैव तत्र सत्त्वेन गन्धत्वावच्छिन्नस्य तत्रोत्पत्तेर्जायमानत्वात्, न हि वयं पटीयगन्धत्वावच्छिन्नं प्रति पृथिवीत्वेन कारणत्वं वदाम इति वाच्यम् । यो यद्धर्माश्रयनिष्ठकार्यतानिरूपितयावत्कारणतावच्छेदकावच्छिन्नजन्यः, स तद्धर्मवानिति व्याप्तिबलेन पटीयगन्धस्यैव तदूघटे आपाद्यमानत्वात् । न वा कारणताऽन्यूनवृत्तित्वं तत् । सत्तादौ तथात्वापत्तेः । तस्मात् अन्यूनानतिरिक्तवृत्तित्वरूपमेवाऽवच्छेदकत्वं वाच्यम् । तथा च वायावपि गन्धप्रत्ययात् तस्य गन्धकारणताया आवश्यकत्वेन तत्र च पृथिवीत्वाभावेन पृथिवीत्वस्याऽनवच्छेदकत्वापत्तिर्दुर्वारा । न च चम्पककर्पूरादिभागौपाधिकी सा वाय्वादौ गन्धप्रतीतिरिति वाच्यम् । तत्र चम्पककर्पूरादिभागानामनागमनात् । आगमने वा चम्पकदलानां सच्छिद्रताप्रसङ्ग इति चेन्न । वायावपि चम्पकादिगन्धप्रत्यभिज्ञानेन तत्र तदाश्रयचम्पकावयवकल्पनात् । न चैवं चम्पकदलानां सच्छिद्रत्वप्रसङ्ग इति वाच्यम् । अङ्कुरदशामारभ्याऽदृष्टवशात्कृष्टैर्भागैः शाखाद्युन्नवक्रमेण गगनमण्डलव्यापित्वस्य तरावि चम्पकदलेष्वपि पुरुषादृष्टवशात् कृष्टैर्भागैरुपचयेन तस्य तुल्यायव्ययताप्रौव्यात् । न चैवं कल्पनागौरवं, वायौ चम्पकभागस्याऽप्रत्यक्षत्वादिति वाच्यम् । फलमुखगौरवस्याऽदोषत्वादिति ।

न च पाषाणादौ गन्धाभावाद्गन्धवत्त्वमव्याप्तमिति वाच्यम्। तत्राऽपि गन्धसत्त्वात्, अनुपलब्धिस्त्वनुत्कटत्वेनाऽप्युपपद्यते, कथमन्यथा तद्भस्मनि गन्ध उपलभ्यते? भस्मनो हि पाषाणध्वंसजन्यत्वात् पाषाणेपादानो-

दिनकरी।

पृथिवीत्वेन हेतुत्वमावश्यकमिति भावः। **इदमुपलक्षणम्**। रूपादिनाशकतावच्छेदकतयाऽपि पृथिवीत्वजातिसिद्धिद्रष्टव्या, प्रतियोगितासम्बन्धेनाऽऽश्रयनाशाजन्यरूपनाशं प्रति स्वसमवायिपृथिवीसमवेतत्व-स्ववृत्तिरूपत्वोभयसम्बन्धेन विलक्षणतेजःसंयोगत्वेन हेतुत्वात् पृथिवीत्वस्य तादृशनाशकतावच्छेदकसम्बन्धघटकत्वात्। आश्रयनाशजन्यरूपनाशे व्यभिचारवारणायाऽजन्यान्तं नाशविशेषणम्। घटाग्निसंयोगेन पटरूपनाशापत्तिवारणाय स्वसमवेतत्वान्तस्य नाशकतावच्छेदकसम्बन्धे प्रवेशः। तेजोवृत्तिरूपे प्रतियोगितासम्बन्धेन तादृशरूपनाशापत्तिवारणाय तद्घटकतया पृथिवीत्वप्रवेशः। स्वसमानाधिकरणसगन्धादौ प्रतियोगितासम्बन्धेन तादृशरूपनाशोत्पत्त्यापत्तिवारणाय स्ववृत्तिरूपत्वस्य नाशकतावच्छेदकसम्बन्धे प्रवेशः। स्ववृत्तित्वं च कालिकविशेषणतया बोध्यम्। स्वसमवायिपृथिवीसमवेतत्वविशिष्टरूपत्वस्य सम्बन्धत्वे रूपत्वविशिष्टस्वसमवायिसमवेतत्वमादाय विनिगमनाविरहेण नाश्यनाशकभावद्वयापत्तिरिति तत्त्यागः। एतेन पाकजगन्धे तेजः-संयोगस्य कारणत्वेनाऽपाकजे च सुरभ्यादिगन्धादाववयवगतसुरभ्यादेर्नियामकत्वेन गन्धत्वेन पृथिवीत्वेन कार्यकारणभावे मानाभावात् पृथिवीत्वं न जातिरिति प्रत्युक्तम्।

ननु गन्धवत्त्वस्य पृथिवीलक्षणत्वे पाषाणादौ गन्धशून्येऽव्याप्तिरित्याशङ्कां निराकरोति—**न चेत्यादिना**। **तत्राऽपि**-पाषाणादावपि। पृथिवीत्वेनेति शेषः। **गन्धसत्त्वात्**--गन्धानुमानात्। ननु पाषाणादौ गन्धसत्त्वेऽनुपलम्भो न स्यादित्यत आह—**अनुपलब्धिस्त्वति**। **अनुत्कटत्वेन**-अनुद्भूतत्वेन। ननु पाषाणस्य पृथिवीत्व एव मानाभावे नितरां तदधीनगन्धवत्त्वे प्रमाणाभाव इत्यतस्तत्र पृथिवीत्वसाधनाय भूमिकामारचयति—**कथमन्यथेत्यादिना**। अन्यथा-पाषाणादौ पृथिवीत्वानङ्गीकारे। **तद्भस्मनि**—पाषाणभस्मनि। यद्यपि पाषाणे पृथिवीत्वाभावेनाऽलक्ष्यत्वादेव तत्र गन्धवत्त्वरामरुद्री।

तद्ग्राहकानुकूलतर्काभावादित्यस्वरसात् प्रमाणान्तरं दर्शयति—**इदमित्यादि**। **विलक्षणेति**। प्रभादिसंयोगेन रूपनाशानुत्पादाद्विलक्षणेति। **स्ववृत्तिरूपत्वस्येति**। रूपत्वस्य तेजःसंयोगप्रतियोगिकत्वे मानाभावात् **स्ववृत्तित्व**प्रवेशः। परम्परासम्बन्धे प्रविष्टविशेषणभागस्य सप्रतियोगिकत्वादेव विशिष्टपरम्परासम्बन्धस्य सप्रतियोगिकत्वनियमात्तद्वृत्तेराधेयतायास्तेजःसंयोगप्रतियोगिकत्वेन स्ववृत्तिरूपत्वस्य तत्प्रतियोगिकत्वसम्भवादिति भावः। **स्वसमवायिपृथिवीसमवेतत्वेति**। विलक्षणतेजःसंयोगप्रतियोगिकत्वविशिष्टसमवायानुयोगिसमवेतत्वेत्यर्थः। तेन पृथिवीत्वाप्रवेशेऽपि न क्षतिः। तेजःसंयोगप्रतियोगिकत्वविशिष्टसमवायानुयोगित्वस्य तेजस्यनङ्गीकारादिति भावः। **तेज इति**। विजातीयतेजःसंयोगेनेति शेषः। तेन जलादौ न गन्धापत्तिः, वैजात्यस्य पृथिव्यनुयोगिकसंयोग एव स्वीकारादिति हृदयम्। **प्रत्युक्तमिति**। तादृशकार्यकारणभावाभावेऽपि रूपनाशकतावच्छेदकसम्बन्धघटकतयैव तत्सिद्धेरिति भावः।

पृथिवीत्वेनेतीति। **'तत्राऽपि गन्धसत्त्वात्'** इति मूलमसङ्गतं तत्र तत्साधकप्रमाणाभावादित्याशङ्कानिरासाय-**'गन्धसत्त्वात्'** इत्यस्य गन्धानुमानादित्यर्थकताया आवश्यकत्वेन तत्र हेत्वनुपन्यासे

पादेयत्वं सिद्धयति, यद्द्रव्यं यद्द्रव्यध्वंसजन्यं, तत् तदुपादानोपादेयमिति

दिनकरी।

लक्षणं नाऽव्याप्तमिति व्यर्थस्तत्र गन्धसाधनाय परिश्रमः, तथाऽपि वस्तुस्थितिमनुरुध्य तथोक्तमिति ध्येयम्। पाषाणभस्मनि गन्धः प्रत्यक्षसिद्धः, तेन तत्र पृथिवीत्वमङ्गीकरणीयम्, ततश्च भस्मारम्भकावयवेष्वपि पृथिवीत्वसिद्धिः, ततश्च पाषाणारम्भकावयवेष्वपि पृथिवीत्वमङ्गीकरणीयं, भस्मारम्भकावयवपाषाणारम्भकावयवयोरैक्यात्, एवं च पाषाणस्याऽपि पृथिवीत्वसिद्धिरित्यभिप्रायः (१)। तदेतद्विशदयति—**भस्मनो ह्येति**। एतेन पाषाण इव तद्भस्मन्यप्यनुद्भूतगन्धापत्तिवारणाय पाषाणावयवेषु पाकाङ्गीकार आवश्यकः। एवं च पाकोत्पादितगन्धवद्भिः पाषाणावयवैरेव तद्भस्मारम्भः, निर्गन्धैश्च तैरेव पाषाणारम्भः, अन्यथा 'तद्भस्मनि–'इत्याद्यसङ्गतिरिति परास्तम्। तथा सत्यप्युक्तप्रणाल्या पाषाणे पृथिवीत्वसिद्धया तेन गन्धानुमानसम्भवादिति। **यद् द्रव्यमिति**। अत्र च घटध्वंसप्रत्यक्षे घटोपादानानुपादेये व्यभिचारवारणाय प्रथमं द्रव्यपदम्। अथ वा घटध्वंसजन्यरू-

रामरुद्री।

मूलस्य न्यूनतापत्तेरिति भावः। **व्यर्थ इति**। पाषाणस्य पृथिवीत्व एव लक्षणस्याऽव्याप्तिः, तस्याऽपृथिवीत्वे तु तत्र गन्धासत्त्वस्याऽतिव्याप्तिवारकतया अनुकूलत्वादिति भावः। **वस्तुस्थितिमनुरुध्येति**। पाषाणस्य पृथिव्यन्यद्रव्यताया अप्रसिद्धान्ततया लक्ष्यत्वेन तत्राऽव्याप्तिपरिहारस्यैवोचित्वादिति भावः। **पाषाणारम्भ इति**। न च पाकजगन्धे गन्धनाशोऽपि कारणम्, अन्यथा गन्धनाशात् पूर्वमेव पाकेन गन्धोत्पादप्रसङ्गादिति कथं निर्गन्धपरमाणौ गन्धोत्पादः सम्भवतीति वाच्यम्। गन्धं प्रति गन्धस्य प्रतिबन्धकत्वेन प्रतिबन्धकसंसर्गाभावविरहादेव गन्धसत्त्वे तदुत्पादासम्भवात्। न चैवमपि जलादौ पाकेन पाकजगन्धापत्त्या तद्वारणायैव पृथिवीत्वेन गन्धहेतुता आवश्यकेति वाच्यम्। विजातीयतेजःसंयोगस्यैव पाकत्वात्। जलादिवृत्तिसंयोगे वैजात्यानङ्गीकारादिति भावः। **द्रव्यपदमिति**। ननु अग्रेध्वंसत्वेन ध्वंसजन्यत्वं विवक्षणीयं, तथा चाऽत्र न व्यभिचारः, प्रत्यक्षं प्रति विषयस्य सामान्यतो विषयत्वेन, विशेषतश्च तत्तद्व्यक्तित्वेन हेतुतयैवोपपत्तौ मध्यविधानन्तकार्यकारणभावे मानाभावादित्यत

---

(१) पाषाणो गन्धवान्, गन्धवदुपादानोपादेयत्वात्, यद्गन्धवदुपादानोपादेयं तत् गन्धवत्, यथा घटः, इत्यनुमानेन तत्र गन्धसिद्धिः। ननु गन्धवदुपादानोपादेयत्वमेव पाषाणे नाऽस्ति कुतस्तत्र गन्धवत्त्वसिद्धिः? अत आह–भस्मन इत्यादिना। तथा च पाषाणावयवा गन्धवन्तः, गन्धवदारम्भकत्वादित्यनुमानेन पाषाणावयवेषु गन्धसिद्धिरिति भाव इति केचन व्याचक्षते। तदसत्। गन्धवदुपादानोपादेये सुरभ्यसुरभिकपालद्वयारब्धे निर्गन्धघटे गन्धवत्त्वव्यभिचारात्। एतेन पाषाणः पृथिवी, गन्धवदुपादानोपादेयत्वात्, यथा घटः, इत्यपि निरस्तम्। तेनाऽनुमानेन तत्र पृथिवीत्वसिद्धावपि तादृशरात्या प्रकृताव्याप्तिवारणासम्भवात्। न च पृथिवीत्वेनैव तत्र गन्धवत्त्वमनुमेयमिति वाच्यम्। तस्य निर्गन्धघटे व्यभिचारात्। अतो गन्धवदुपादानोपादेयत्वेन तत्र पृथिवीत्वं साधयित्वा गन्धवद्वृत्तिद्रव्यत्वव्याप्य-जातिमत्त्वमिति लक्षणपरिष्करणेन लक्षणसमन्वयः। वस्तुतस्तु 'तत्र क्षितिर्गन्धहेतुः'–इति मूलस्थं गन्धहेतुत्वमेव लक्षणम्। न चैवं कालादावतिव्याप्तिरिति वाच्यम्। गन्धसमवायिकारणत्वस्यैवाऽत्र निर्दिष्टत्वात्। तदर्थमेव हि पाषाणे पृथिवीत्वमपि साधनीयं गन्धवदुपादानोपादेयत्वहेतुना, सिद्धे च पृथिवीत्वे तस्यैव गन्धकारणतात्मकताया व्यवस्थापितत्वेन सर्वत्र गन्धहेतुत्वलक्षणस्य गमनसम्भवादिति विभावनीयम्।

व्याप्तेः, दृष्टं चैतत् खण्डपटे महापटध्वंसजन्ये । इत्थं च पाषाणपरमाणोः पृथिवीत्वात् तज्जन्यपाषाणस्याऽपि पृथिवीत्वं, तथा च तस्याऽपि गन्धवत्त्वे बाधकाभावः ।

दिनकरी ।

पध्वंसे व्यभिचारवारणाय तत् । मिथ्याज्ञानध्वंशजन्यकायव्यूहे नवीनमते, दण्डप्रागभाव-ध्वंसजन्ये घटे वा व्यभिचारवारणाय द्वितीयं द्रव्यपदम् । प्रतिबन्धकद्रव्यात्यन्ताभावजन्ये द्रव्ये व्यभिचारवारणाय ध्वंसपदम् । ध्वंसत्वेन चेह जनकत्वं विवक्षितम् । तेन प्राचां मते प्रतिबन्धकसंसर्गाभावत्वेन तस्य हेतुत्वेऽपि न क्षतिः । ध्वंसजन्यत्वं चाऽदृष्टाद्वारकत्वेन विवक्षितम् । तेन शालग्रामशिलाध्वंसजन्ये नारकीयशरीरे न व्यभिचारः । न च दुग्धध्वंस-जन्ये दध्नि दुग्धावयवजन्यत्वस्वीकारे दध्नोऽपि दुग्धत्वापत्त्या दुग्धावयवैर्दधि न जन्यते इत्यङ्गीकरणीयम्, तथा च दध्नि व्यभिचार इति वाच्यम् । दध्नो द्व्यणुकातिरिक्तदुग्धध्वंस-जन्यत्वास्वीकारात्, द्व्यणुकरूपदुग्धध्वंसजन्यत्वेऽपि तस्य न तत्र व्यभिचारः, तदुपादा-नपरमाणुजन्यत्वस्य दध्नि सत्त्वात् । न च दुग्धपरमाणुजन्यत्वेन दध्नोऽपि दुग्धत्वापत्ति-रिति वाच्यम् । दुग्धपरमाणौ दुग्धत्वाभावात्, द्रव्यत्वव्याप्यव्याप्यजातेः परमाणुवृत्तित्वे मानाभावात्, अन्यथा परमाणुस्वरूपदुग्धजन्यत्वेन दुग्धत्वापत्तिवारणासम्भवात्, दधित्व-दुग्धत्वयोः परमाणौ जातिसङ्करप्रसङ्गादिति । व्याप्तिबोधार्थं दृष्टान्तमाह—**दृष्टं चैतदिति ।**

रामरुद्री ।

आह—**अथ वेति । कायव्यूह इति ।** झटिति प्रारब्धक्षयार्थं सौभरिप्रभृतीनां युगपदनेकशरीरपरिग्रहः पुराणेषु श्रूयते, तादृशकायसमूहे मिथ्याज्ञानजन्यानादिवासनाध्वंसोऽपि हेतुत्वेनाऽङ्गीकरणीयः, तत्त्व-ज्ञानरहितानां युगपदनेकशरीरपरिग्रहस्य काऽप्यननुभवादिति । **यद्ध्वंसजन्य**मित्युक्तौ वासनोपादानानु-पादेये कायसमूहे भवति व्यभिचार इति भावः । **नवीनमत इति ।** दण्डप्रागभावध्वंसस्य नवीनमते दण्डरूपत्वानङ्गीकारेण दण्डजन्यघटादौ वक्ष्यमाणव्यभिचारासम्भवेन उक्तमेव प्रयोजनं तन्मत इति सूचनाय इदमुक्तम् । प्राचीनमते घटेऽपि व्यभिचारस्तदनुपादान इत्याह **दण्डेति । प्रतिबन्धकद्र-व्यात्यन्ताभावजन्येति ।** मण्यभावजन्यवह्न्यादावित्यर्थः । **प्राचां मत इति ।** नवीनमते तु प्रतिबन्ध-कात्यन्ताभावस्यैव कार्यहेतुतया नाऽयं व्यभिचारः सम्भवतीति भावः । **नारकीयशरीर इति ।** न च निषिद्धाचरणमेव पापद्वारा नरके तदुपयोगिशरीरे च हेतुरिति न व्यभिचार इति वाच्यम् । स्वानुकूलकृ तिमत्त्वसम्बन्धेन निषिद्धकर्मणोऽपि हेतुत्वसम्भवादिति भावः । **दध्नीति ।** स्थूलदध्नीत्यर्थः । **दुग्धाव-यवेत्वस्याऽपि** स्थूलदुग्धावयवेत्यर्थः, सिद्धान्तेऽपि दधिद्व्यणुकस्य दुग्धद्व्यणुकावयवजन्यत्वस्वीकारादिति । **व्यभिचार इतीति ।** दधिद्व्यणुकस्य दुग्धद्व्यणुकध्वसजन्यत्वे तत्र दुग्धद्व्यणुकावयवदुग्धद्व्यणुकोपादा-नोपादेयत्वविहेणेति भावः । **द्व्यणुकातिरिक्तेति ।** इदं च उपादानपदस्य साक्षादवयवपरताभिप्रायेणोक्तं, **तदुपादानोपादेय**मित्यस्य तदारम्भकपरमाण्वारब्धमित्यर्थकत्वे तु स्थूलदध्नोऽपि स्थूलदुग्धध्वंसजन्य-त्वेऽपि न क्षतिः, तदारम्भकपरमाण्वारब्धत्वस्य तत्र सत्त्वात् । परमाणौ तदारम्भकत्वं च तत्सत्ताप्रयो-जकसत्तावत्त्वमेव शक्यते निर्वक्तुम्, अन्यथा स्थूलपाषाणारम्भकावयवोपादेयत्वे भस्मनोऽपि पाषाणत्वा-पत्त्यविशेषाद्द्व्यधिपर्यन्तानुधावने प्रयोजनाभाव एवेति चिन्तनीयमिति । **तस्येति ।** नियमस्येत्यर्थः । **तत्र**—दधिद्व्यणुके । **मानाभावादिति ।** दुग्धारम्भकपरमाणुनामन्यत्र गमनं, दध्यारम्भकतद्भिन्नपरमाणूना-मत्राऽऽगमनमित्यस्य कल्पनं तत्प्रयोजकविरहेणाऽयुक्तमिति भावः । **अन्यथेति ।** दधिद्व्यणुकस्य दुग्ध-परमाणुजन्यत्वे इत्यर्थः । ननु द्रव्यत्वव्याप्यव्याप्यजातेः परमाणुवृत्तित्वे बाधकाभाव एव मानं भवि-ष्यतीत्यत आह—**दधित्वेत्यादि ।**

षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ॥ ३५ ॥
स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः ।

नानेति । **शुक्लनीलादिभेदेन नानाजातीयं रूपं पृथिव्यामेव वर्तते, न तु जलादौ, तत्र शुक्लस्यैव सत्त्वात्, पृथिव्यां त्वेकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसम्भवात् न च यत्र नानारूपं नोत्पन्नं, तत्राऽव्याप्तिरिति वाच्यम्। रूपद्वयवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्, रूपनाशवद्वृत्ति द्रव्यत्वव्याप्य-जातिमत्त्वस्य वा वाच्यत्वात्, वैशेषिकनये पृथिवीपरमाणौ रूपनाशस्य रूपान्तरस्य च सत्त्वात्, न्यायनये घटादावपि तत्सत्त्वाल्लक्षणसमन्वयः ।**

षड्विध इति । **मधुरादिभेदेन यः षड्विधो रसः, स पृथिव्यामेव, जले मधुर एव रसः । अत्राऽपि पूर्ववद्रसद्वयवदवृत्ति-द्रव्यत्वव्याप्य-जातिमत्त्वं लक्षणार्थोऽवसेयः ।**

'द्विविधः' इति वस्तुस्थितिमात्रं, न तु द्विविधगन्धवत्त्वं लक्षणं, द्विविधत्वस्य व्यर्थत्वात् । द्वैविध्यं च सौरभासौरभभेदेन बोध्यम् ।

स्पर्श इति । तस्याः—**पृथिव्याः । अनुष्णाशीतस्पर्शवत्त्व वायावपि वर्तत**

दिनकरी ।

मूले नानारूपवत्त्वं लक्षणान्तरमुक्तं, तल्लक्ष्ये प्रतिपादयति-**शुक्लेत्यादिना** । अलक्ष्ये लक्षणगमनासत्त्वं प्रतिपादयति—**न त्विति** । रूपद्वयवद्वृत्तिसत्तारूपजातिमति गुणादावतिव्याप्तिवारणाय-**द्रव्यत्वव्याप्येति** । द्रव्यत्वव्याप्यजलत्वादिमति जलादावतिव्याप्तिवारणाय-**रूपद्वयवद्वृत्तीति** । द्रव्यत्वव्याप्यजलपृथिव्यन्यतरत्वादिमति जलादावतिव्याप्तिवारणाय-**जातीति** । अपेक्षाबुद्धिविशेषविषयत्वरूपद्वित्वादिघटितत्वेन गौरवादाह—**रूपनाशेति** । अत्राऽपि प्रतिपदव्यावृत्तिः पूर्ववद्बोध्या ।

"षड्विधस्तु रसस्तत्र-" इति मूलोक्तं रसस्य षड्विधत्वं प्रकाशयति-**मधुरेत्यादिना** । यत्र नानारसा नोत्पन्नास्तत्राऽव्याप्तिरित्यत आह—**अत्राऽपीति** ।

ननु मूले **"गन्धस्तु द्विविधो मतः-"** इत्यनेन द्विविधगन्धवत्त्वं पृथिव्या लक्षणं प्रदर्शितं, तच्चाऽयुक्तं, द्वैविध्याशस्य वैयर्थ्यादित्यत आह—**वस्तुस्थितिमात्रमिति** । वस्तुगत्या गन्धो द्विविधस्तिष्ठतीति सूचयितुमुक्तं, न तु लक्षणे द्वैविध्यस्याऽपि प्रवेश इत्यर्थः । गन्धस्य द्वैविध्यं प्रकाशयति—**द्वैविध्यं चेति** ।

रामरुद्री ।

जातीति । अत्राऽपि वृत्तित्वं जातिमत्त्वं च समवायेनैव विवक्षणीयम् । अन्यथा जलत्वं पृथिवीत्वं चाऽऽदाय जलेऽतिव्याप्तिरादवस्थ्यात्, एव च जातिपदव्यावृत्तिर्जलपृथिव्युभयत्वादिकमादायैवेति द्रष्टव्यम् । **अपेक्षेति** । रूपनिष्ठं द्वित्वं न सङ्ख्यारूपं, गुणे गुणानङ्गीकारात्, अपि तु रूपद्वयविषयकापेक्षाबुद्धिविषयत्वरूपं तन्निवेशनीयमिति गौरवमतस्तदघटितं रूपनाशवटितलक्षणं प्रणिनाय । नाशत्वं च अखण्डोपाधिरूपमेवेति न गौरवमिति भावः । **द्वित्वादिघटितत्वेनेति** । **आदिपदं** सम्पातायातं तदितरभागस्योभयत्र तुल्यत्वादिति ध्येयम् । **जातीतीति** । अत्रापि पूर्वोक्तमनुसन्धेयम् ।

इत्युक्तं पाकज इति। इत्थं च पृथिव्याः स्पर्शोऽनुष्णाशीत इति ज्ञापनार्थं तदुक्तं, पाकजस्पर्शवत्त्वमात्रं तु लक्षणम्, अधिकस्य वैयर्थ्यात्। यद्यपि पाकजस्पर्शः पटादौ नाऽस्ति, तथाऽपि पाकजस्पर्शवद्वृत्ति—द्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः॥ इति पृथिवीनिरूपणे पृथिवीलक्षणकथनम्॥

दिनकरी।

अनुष्णाशीतत्वस्य वैयर्थ्यादाह—**इत्थं चेति**। पाकजस्पर्शवत्त्वमात्रोक्तावित्यर्थः। न्यायमते पाकजस्पर्शाभाववति पटे, वैशेषिकमते पाकजस्पर्शस्य परमाणुष्वेव विद्यमानत्वादवयविनि पाकासिद्धिमाशङ्क्य निषेधति—**यद्यपीति। पाकजस्पर्शेति। 'पटादौ'** इत्यादिपदेन वैशेषिकमतेऽवयविमात्रपरिग्रहः। सत्तारूपजातिमादाय गगनादावतिव्याप्तिवारणाय-**द्रव्यत्वव्याप्येति**। द्रव्यत्वसमानाधिकरणसत्तामादायाऽतिव्याप्तिवारणाय व्याप्यभागः। स्पर्शसमानाधिकरणजलत्वादिकमादाय जलादावतिव्याप्तिवारणाय-**पाकजेति**। पाकजद्रवत्वसमानाधिकरणतेजस्त्वमादाय तेजस्यतिव्याप्तिवारणाय-**स्पर्शति**। जलपृथिव्यन्यतरत्वमादाय जलादावतिव्याप्तिवारणाय-**जातीति**।

अत्र च पृथिवीत्वस्य लक्ष्यतावच्छेदकत्वाल्लक्षणत्वं न सम्भवतीति तत्परित्यागः। वस्तुतस्तु पृथिवीत्वजातिरपि पृथिव्या लक्षणम्। न च व्यतिरेकसहचारेणाऽप्यन्वयव्याप्तिरेव गृह्यत इत्याचार्यमते न पक्षतावच्छेदकस्य हेतुत्वमिति वाच्यम्। हेतुः साध्यसमानाधिकरण इति ज्ञानेऽपि हेतुमान् साध्यवानिति बोधस्याऽनिष्पन्नत्वेन पक्षतावच्छेदकत्वेऽपि हेतुत्वाविरोधात्, व्यतिरेकव्याप्तेर्गमकतायां तु सुतराम्।

इति पृथिवीनिरूपणे पृथिवीलक्षणकथनम्॥

रामरुद्री।

ननु पृथिवीत्वमपि पृथिवीलक्षणं सम्भवतीति तत् कथं त्यक्तमित्याशङ्क्य निरस्यति—**अत्रेति। आचार्यमत इति**। व्यापकसामानाधिकरण्यरूपान्वयव्याप्तिज्ञानमेव सर्वत्राऽनुमितौ कारणम्। न चैवमन्वयसहचारज्ञानेन पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वादित्यादावन्वयव्याप्तिज्ञानासम्भवात् कथमनुमितिरिति वाच्यम्। तत्र व्यतिरेकसहचारग्रहेणैवाऽन्वयव्याप्तिग्रहस्वीकारात्। तथा चाऽन्वयसहचारमात्रगृहीतव्याप्तिकत्वमेव केवलान्वयित्वम्, हेतौ व्यतिरेकसहचारमात्रगृहीतव्याप्तिकत्वं केवलव्यतिरेकित्वम्, उभयसहचारगृहीतव्याप्तिकत्वमन्वयव्यतिरेकित्वमित्याचार्यमतम्। उभयव्याप्तिज्ञानस्याऽनुमितिकारणतावादिमणिकारमत एव गृतीतान्वयमात्रव्याप्तिमत्त्वादिकं केवलान्वयित्वादिकमिति बोध्यम्। **न पक्षतावच्छेदकस्येति**। व्याप्तिग्रहदशायामेवाऽनुमितिग्राह्यस्य पक्षतावच्छेदके साध्यसाधनयोः सामानाधिकरण्यस्य गृहीततया सिद्धसाधनापत्तेरिति भावः। **अविरोधादिति**। समानाकारिकाया अधिकविषयिण्या अपि तथाविधाया एव सिद्धेरनुमितिप्रतिबन्धकत्वादिति भावः। यद्यपि तथा चाऽयमित्युपनयवाक्यात् पक्षो हेतुमानिति बोधस्यैव प्राचीनैः स्वीकारात्पक्षतावच्छेदकहेत्वोरैक्ये उपनयनवाक्याच्छाब्दबोधानुपपत्तिरस्ति, तथाऽपि परार्थानुमितावेव न्यायप्रयोगस्याऽपेक्षणीयतया स्वार्थानुमितिमादायैव लक्षणप्रयोजनसम्भवात् उपनयवाक्याच्छाब्दबोधासम्भवेऽपि क्षतिविरहात्। नवीनमते साध्यव्याप्यहेतुमत्ताबोधस्यैवोपनयजन्यत्वोपगमेन विधेयांशेऽधिकावगाहितया तत्सम्भवाच्चेति भावः। **सुतरामिति। इदमुपलक्षणम्**—अवच्छेदकावच्छेदेनाऽनुमितिसम्भवोऽपि बोध्यः, सामानाधिकरण्यमात्रविषयकसिद्धेस्तत्राऽप्रतिबन्धकत्वादिति दिक्॥

॥ इति पृथिवीनिरूपणे पृथिवीलक्षणकथनम्॥

नित्याऽनित्या च सा द्वेधा नित्या स्यादणुलक्षणा ॥ ३६ ॥
अनित्या तु तदन्या स्यात् सैवाऽवयवयोगिनी ।

नित्येति । **सा**-पृथिवी द्विविधा, **नित्याऽनित्या** चेत्यर्थः ।

अणुलक्षणा-**परमाणुरूपा** पृथिवी **नित्या** ॥ ३६ ॥

तदन्या-परमाणुभिन्ना पृथिवी द्व्यणुकादिरूपा सर्वाऽप्यनित्येत्यर्थः । **सैव अनित्या** पृथिव्येवावयववतीत्यर्थः ।

नन्ववयविनि किं मानं ? परमाणुपुञ्जैरेवोपपत्तेः (१) । **न च परमाणूनामतीन्द्रियत्वाद्घटादीनां प्रत्यक्षं न स्यादिति** (२) **वाच्यम्** । **एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वसम्भवात्** (३), **यथैकस्य केशस्य दूरेऽप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वम् । न चैको घटः स्थूल इति बुद्धेरनुपपत्तिरिति वाच्यम् । एको महान् धान्यराशिरितिवदुपपत्तेः ।**

मैवम् । परमाणोरतीन्द्रियत्वेन तत्समूहस्याऽपि प्रत्यक्षत्वाऽयोगात्, दूरस्थकेशस्तु नाऽतीन्द्रियः, सन्निधाने तस्यैव प्रत्यक्षत्वात् (४) । **न च**

दिनकरी ।

अणुत्वस्य द्व्यणुकेऽपि सत्त्वादाह--**परमाणुरूपेति** ।

बौद्धः शङ्कते--**नन्विति** । नन्वयं घट इत्यादिप्रतीतिरेव तत्र प्रमाणं भविष्यत्यत आह--**परमाणुपुञ्जैरेवेति** । विलक्षणसंस्थानविशिष्टैः परमाणुभिरेवेत्यर्थः । **उपपत्तेरिति** । अयं घट इत्यादिप्रतीतेरुपपत्तेरित्यर्थः । **तत्समूहस्य**-परमाणुसमूहस्य । तत्र दृष्टान्तमाह--**यथेति** । तत्समूहस्य केशसमूहस्य । **अनुपपत्तिरिति** । परमाणूनामनेकत्वादणुत्वाच्चेति भावः । **इति वदुपपत्तेरिति** । तत्र यथा धान्यसमूहस्यैकत्वादेक इति प्रतीतिः, एवं संयोगविशेषस्यैव महत्त्वात्मकतया महानिति प्रतीतिस्तथा परमाणुपुञ्जेष्वपीति भावः । **प्रत्यक्षत्वायोगादिति** । तथा च स्वभावतोऽयोग्यानां परमाणूनां परस्परसंयोगमात्रेण योग्यत्वं न सम्भवतीति भावः । दूरस्थकेशस्तु स्वभावतो नाऽतीन्द्रिय इति त्वदुक्तदृष्टान्तस्य वैषम्यमित्याह-**दूरस्थकेशस्त्विति** । **तस्यैवेति** । तस्य-दूरस्थ-

रामरुद्री ।

नन्वयं घट इति प्रतीतेः परमाणुपुञ्जविषयकत्वे मृत्पिण्डेऽपि तथा प्रतीत्यापत्तिः, तत्राऽपि तत्सत्त्वादित्यतस्तद्व्यावष्टे **विलक्षणेति** । **संस्थानं**-संयोगः । **समूहस्यैकत्वादिति** । **समूह**शब्दार्थस्तावद्धान्यनिष्ठसङ्ख्याविशेष एव, न तु तद्विशिष्टधान्यानि, तत्रैकत्वाभावात्, प्रत्येकमेकत्वसत्त्वेऽपि राशिपदप्रयोगानुपपत्तेरिति ध्येयम् । **संयोगविशेषस्येति** । एकधान्यसंयुक्तापरधान्यसंयुक्तान्यधान्यप्रतियोगिकसंयोगस्येत्यर्थः । **न सम्भवतीति** । अन्यथा पिशाचादीनामपि परस्परसंयुक्तानां प्रत्यक्षत्वापत्तिरिति भावः । ननु **'तस्यैव'** इत्यस्य दूरस्थकेशस्यैवेत्यर्थकत्व **'एव'** कारासङ्गतिः, सन्निधाने घटादेरपि

---

(१) घट इति प्रतीतिविषयस्य परमाणुपुञ्जात्मकतया परमाणुषु द्रव्यसमवायाभाव इति भावः ।

(२) परमाणवो न घट इति प्रतीतिविषयाः, अतीन्द्रियत्वादिति भावः ।

(३) परमाणुसमूहो नाऽतीन्द्रियः, समुदायत्वादित्यनुमानेन स्वरूपासिद्धिः पूर्वानुमाने इति भावः । दृष्टान्तश्चाऽत्र द्वरस्थकेशसमूह एव ।

(४) तथा च प्रागुक्तानुमाने बाध इति भावः ।

दानीं दृश्यपरमाणुपुञ्जस्य उत्पन्नत्वान्न प्रत्यक्षत्वेऽपि विरोध इति वाच्यम् (१)। अदृश्यस्य दृश्यानुपादत्वात्, अन्यथा चक्षुरूष्मादिसन्ततेः कदा चिदुद्भूदृश्यत्वप्रसङ्गात्(२)। न चाऽतितप्ततैलादौ कथमदृश्यदहनसन्ततेर्दृश्यदहनोत्पत्तिरिति वाच्यम्। तत्र तदन्तःपातिभिर्दृश्यदहनावयवैः स्थूलदहनोत्पत्तेरुपगमात्। न चाऽदृश्येन द्व्यणुकेन कथं दृश्यत्रसरेणोरुत्पत्तिरिति वाच्यम्। यतो न दृश्यत्वमदृश्यत्वं वा कस्य चित् स्वभावादाचक्ष्महे, किन्तु महत्त्वोद्भूतरूपादिकारणसमुदायवतो दृश्यत्वं, तदभावे चाऽदृश्यत्वम्। तथा च त्रसरेणोर्महत्त्वात् प्रत्यक्षत्वं, न तु द्व्यणुकादेः, तदभावात्, न हि त्वन्मतेऽपि सम्भवतीदं, परमाणौ महत्त्वाभावात्।

दिनकरी।

केशस्य। 'एव'कारश्च तच्छब्दप्राक्तन'सन्निधान'पदेनाऽन्वेति। तथा च सन्निधानत एव तस्य प्रत्यक्षत्वादित्यर्थः। तथा च दूरत्वस्य प्रतिबन्धकत्वात् तदृशायामप्रत्यक्षत्वमात्रं तस्य, न तु स्वाभाविकमप्रत्यक्षत्वमिति भावः। **उत्पन्नत्वादिति**। क्षणभङ्गवादिनां मते परमाणूनामुत्पत्तिस्वीकारादिति भावः। **अन्यथा**—अदृश्यस्य दृश्योत्पादकत्वे। **तत्र**—तादृशदहनोत्पत्तिस्थले। **तदन्तःपातिभिः**—अतितप्ततैलान्तःपातिभिः। **स्वभावात्**—कारणनैरपेक्ष्यात्। **उद्भूतरूपादीति**। आदिनाऽऽलोकादिपरिग्रहः। **तदभावे**—महत्त्वोद्भूतरूपाद्यभावे, **तदभावात्**—महत्त्वाभावादित्यर्थः।

रामरुद्री।

प्रत्यक्षत्वादत आह—**'एव'कारश्चेति**। ननु अदृश्यपरमाणुपुञ्जादृश्यपरमाणुपुञ्जोत्पत्तिर्मूलोक्ता न सङ्गच्छते, परमाणूनां नित्यत्वादित्याशङ्क्य निराकुरुते—**क्षणभङ्गेति**। तथाहि तेषां प्रयोगः,—यत् सत्, तत् क्षणिकं, दीपसन्ततिवदिति भावः। **'अदृश्यस्य दृश्यानुपादानत्वात्'** इति मूलं, तत्र यद्यपि **उपादानपदं** न कारणार्थकं सम्भवति, स्वमतेऽप्यदृश्यादृष्टस्य दृश्यघटादिकारणत्वात्, नाऽपि समवायिकारणार्थकं सम्भवति, अदृश्यपरमाणौ दृश्यपरमाणुसमवायिकारणतायास्तैरप्यनङ्गीकारात्, समवायेन परमाणौ परमाणोर्वृत्तित्वाङ्गीकारे परमाणोरेव सावयवत्वापत्त्याऽवयविनिराकरणानुपपत्तेः, नाऽपि प्रकृत्यर्थकं, प्रकृतित्वं हि दध्नो दुग्धादौ स्वजनकनाशप्रतियोगित्वं, तच्च न तेषां मते परमाणुषु सम्भवति, क्षणभङ्गवादिनां तेषां पूर्वपूर्वव्यक्तिन एवोत्तरोत्तरव्यक्तेरुत्पादस्याऽनुमततयाऽन्तरा नाशक्षणव्यवधानस्य तैरनङ्गीकारादिति रहस्यमवधेयम्, तथाऽपि त्वन्मत इत्यादिपूरणान्नाऽनुपपत्तिः, तन्मते पूर्वपूर्वव्यक्तिमात्रस्यैवोत्तरव्यक्तिहेतुतयाऽदृष्टादेः कारणतानभ्युपगमेनोपादानपदस्य कारणमात्रार्थकत्वे क्षतिविरहादिति ध्येयम्। **कारणनैरपेक्ष्यादिति**। तथा च त्वन्मतेऽतीन्द्रियत्वं प्रत्यक्षत्वञ्च स्वाभाविकमित्यतीन्द्रियस्यैन्द्रियकपदार्थो

---

(१) तथा च न बाध इत्याशयः। तथा च परमाणुपुञ्जो नाऽतीन्द्रियः दृश्यत्वादित्यनुमानं फलितम्। अत्र यद्यपि परमाण्वतिरिक्ते कस्मिंश्चित् कल्पिते सिद्ध एवाऽस्मात्रसरेणवीति मुक्तावलीकृतां दृश्यखण्डनमयुक्तं, तथाऽपि अदृश्यपरमाणुभिर्दृश्यपरमाणूनां पुञ्ज एव जन्यते, न त्वेकोऽवयवीति तेषां सिद्धान्तः, अन्यथा यद्येकोऽवयवी स्यात्, पाणौ कम्पमाने शरीरमपि कम्पेत! केषु चिद्भागेषु रक्तेषु सर्वोऽप्यवयवी रक्त उपलभ्येत! यन्न कचन भागे आवृतोऽवयवी नैवोपलभ्येत! तस्मात् सकम्पत्वाकम्पत्वरक्तत्वारक्तत्वावृतत्वानावृतत्वादिविरुद्धधर्माणामेकत्राऽसम्भवेन तदाश्रयतया परमाणुपुञ्ज एव कल्पनीय इति सर्वं रमणसमिति। तदेतत्खण्डयितुं मूलकारस्य प्रयास इत्यवधेयम्।

(२) तथा च स्वरूपासिद्धिरत्राऽप्याशङ्किता॥

इत्थं चाऽवयविसिद्धौ (१) **तेषामुत्पादविनाशयोः प्रत्यक्षसिद्धत्वाद-नित्यत्वम्। इत्यवयव्यनुमानम्॥**

तेषां चाऽवयवावयवधाराया अनन्तत्वे(२) **मेरुसर्षपयोरपि साम्यप्र-**

दिनकरी।

अत्र नास्तिकमतानुयायिनः—परस्परविभक्तपरमाणूनां महत्त्वाभावादप्रत्यक्षत्वेऽपि परस्परसंयुक्तानां पुञ्जात्मनां तेषां प्रत्यक्षे बाधकाभावः। न च महत्त्वाभाव एव बाधकः, परस्परविलक्षणसंयोगरूपस्यैव महत्त्वस्य प्रत्यक्षजनकत्वात्। न च परमाणूनां नित्यत्वाद्घटादावुत्पत्तिनाशप्रतीत्यनुपपत्तिरिति वाच्यम्। तन्मते पदार्थमात्रस्यैव क्षणिकत्वात् परमाणूनामुत्पत्तिनाशयोः स्वीकारात्। न च परमाणुपुञ्जेषु घटत्वाङ्गीकारे कपालाद्घट इति प्रतीत्यनुपपत्तिः, परमाणूनां कपालजन्यत्वाभावादिति वाच्यम्। तन्मते कपालस्याऽपि परमाणुपुञ्जरूपतया घटरूपपरमाणुपुञ्जेषु कपालरूपपुञ्जजन्यत्वस्वीकारात्, पुञ्जात् पुञ्जोत्पत्तिरिति तेषां सिद्धान्तादित्याहुः।

तन्न, घट इत्यादिप्रतीतिविषयताया अनेकपरमाणुषु कल्पने गौरवादित्यवयवातिरिक्तावयविसिद्धि रिति दिक्॥ **इत्यवयव्यनुमानम्॥**

मेरुसर्षपयोरिति। 'अपि'शब्दः 'साम्यप्रसङ्गः' इत्युत्तरं सम्बद्धयते, तेन च द्व्यणुकस्य सावयवारब्धत्वे महत्त्वापत्तिः समुचीयते। **साम्यं**—परिमाणतारतम्याभावः,

रामरुद्री।

त्पादकत्वे चक्षुरादौ कदाचिद्दृश्यत्वमापादितं, मन्मते तु कारणबलात् द्व्यणुकस्य प्रत्यक्षत्वेऽपि तदभावात् द्व्यणुकस्याऽतीन्द्रियत्वसम्भवादृश्यस्य दृश्यकारणत्वेऽपि न क्षतिरिति भावः।

विलक्षणसंयोगेति। विजातीयसंयोगेत्यर्थः। तच्च वैजात्यं चक्षुःपिशाचादिसंयोगव्यावृत्तमेवाऽङ्गीकरणीयम्, अतो न तेषां परस्परसंयोगेन प्रत्यक्षत्वापत्तिरिति भावः। 'एव' कारेण तदतिरिक्तमहत्त्वास्वीकारः सूचितः, अवयविमात्रस्यैवाऽनङ्गीकारात्, आकाशकालाद्यप्रत्ययक्षपदार्थानामप्यनङ्गीकाराच्च तन्महत्त्वेऽव्याप्त्यसम्भवादिति ध्येयम्। **उत्पत्तिनाशयोः स्वीकारादिति**। न चैवं प्रतिक्षणं घटादावुत्पत्तिविनाशप्रत्यक्षापत्तिरिति वाच्यम्। घटधारायां दीपकधारावदविच्छिन्नत्वेन तत्प्रत्यक्षासम्भवात्, प्रत्यक्षपुञ्जस्य सजातीयपुञ्जान्तरपूर्वत्वाभावे नाशस्य तादृशपुञ्जान्तरानुत्तरत्वे चोत्पत्तेः प्रत्यक्षसम्भवादिति भावः। **सिद्धान्तादिति**। कपालरूपपुञ्जद्वयाद्घटरूपैकपुञ्जोत्पत्तिरिति तत्सिद्धान्तादित्यर्थः।

दिगिति। द्व्यणुक एवाऽवयवधारायां विश्रान्तिरितिदीधितिकारमते द्व्यणुकपुञ्जस्य केशसमूहवत् प्रत्यक्षसम्भवेऽपि नानाद्व्यणुकानां तादृशप्रतीतिविषयत्वकल्पने गौरवादेवाऽतिरिक्तावयविसिद्धिरिति सूचितम्॥ इत्यवयव्यनुमानम्॥

महत्त्वापत्तिरिति। अपकृष्टमहत्त्वं प्रति स्वाश्रयसमवेतसमवेतत्वसम्बन्धेन सङ्ख्यायाः कारणत्वाभावा-

---

(१) नन्वेवमपि अवयवी स्वावयवेषु कात्स्न्येनैकदेशेन वा वर्तते? नाऽऽद्यः, एकत्र सम्बद्धे द्वितीयावयवसम्बन्धासम्भवप्रसङ्गात्। न द्वितीयः, अवयवव्यतिरिक्तस्यैकदेशस्याऽप्रसिद्धेः। किञ्च यदेकं तदेकत्रैव वर्तते, यथा रूपम्, एकश्चाऽवयवी भवदभिमतः, स कथं नानाऽवयवेषु स्थास्यति? अपि च यदनेकवृत्ति, तदनेकम्, यथाऽनेकभाजनगतानि तालफलानि, इति कथमवयविसिद्धिरिति चेन्न। वृत्तित्वे कृत्स्नैकदेशविकल्पस्याऽप्रामाणिकत्वात्। यद्वर्तते तदाश्रयाश्रितभावलक्षणया वृत्त्या वर्तते, न चैकस्याऽनेकस्मिन् सम्बन्धोऽनेकेषां वैकस्मिन् सम्बन्धोऽदृष्टः। प्रथमे नानामणिगतस्य सूत्रस्य, द्वितीये रूपरसगन्धादेरेव दृष्टान्तत्वात्। इति सिद्धोऽवयवी।

(२) अवयवावयवधाराया अनन्तत्वे—समवेतद्रव्यत्वस्य समवेतद्रव्यजन्यत्वव्याप्यत्वे इत्यर्थं

सङ्ख्यः (१), अतः क्व चिद्विश्रामो वाच्यः, यत्र तु विश्रामः, तस्याऽनित्यत्वेऽसमवेत(भाव)कार्योत्पत्तिप्रसङ्गात् तस्य नित्यत्वम्। महत्परिमाणतारतम्यस्य गगनादौ विश्रान्तत्वमिवाऽणुपरिमाणतारतम्यस्याऽपि क्व चिद्विश्रान्तत्वमस्तीति तस्य परमाणुत्वसिद्धिः (२)। न च त्रसरेणावेव विश्रामोऽस्त्विति वाच्यम्। त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुदिनकरी।

परिमाणकारणीभूताया अवयवसङ्ख्याया उभयत्र साम्यादिति भावः। न च मेर्ववयवानां सर्षपतुल्यपरिमाणवत्त्वं, न तु सर्षपावयवानां सर्षपतुल्यपरिमाणवत्त्वमित्यवयवपरिमाणविशेषाद्विशेष इति वाच्यम्। मेर्ववयवसर्षपावयवयोरप्यनन्तावयवत्वेन तत्परिमाणतारतम्याभावस्याऽप्यापादनीयत्वात्। न च मेरुसर्षपयोरवयवगतप्रचयाख्यसंयोगविशेषात्तद्विशेष इति वाच्यम्। प्रचयविशेषस्याऽपि सङ्ख्याविशेषनियम्यत्वेन सङ्ख्याविशेषाभावे तद्विशेषानुपपत्तेरिति। ननु तथाऽपि विश्रामाश्रयस्य नित्यत्वे मानाभाव इत्यत आह—**यत्र त्विति। असमवेतेति**। असमवेतभावकार्योत्पत्तिप्रसङ्ग इत्यर्थः। ननु तस्य नित्यत्वसिद्धावप्यणुत्वे किं मानमित्यत आह—**महत्परिमाणेति। चाक्षुषद्रव्यत्वादिति**। आत्मनि व्यभिरामरुद्री।

दिति भावः। **कारणीभूताया इति**। परमाणूत्कर्षापकर्षप्रयोजिकाया इत्यर्थः। **साम्यादिति। साम्य**मत्र उभयावयवनिष्ठाभावप्रतियोगित्वमेव, न त्वेकजातीयत्वम्, अवयवधारायां अविश्रान्तत्वे तत्सङ्ख्याया एवाऽसिद्धेरिति ध्येयम्। **संयोगविशेषादिति**। मुष्टिपरिमिततूलस्य यथा प्रचयविशेषेण परिमाणतारतम्यमनुभवसिद्धं, तथा मेरोरवयवेषु अत्यन्तशिथिलसंयोगात् मेरुपरिमाणस्योत्कर्षः, सर्षपावयवेषु च किञ्चिच्छिथिलसंयोगात्तत्परिमाणस्याऽपकर्ष इति भावः। **सङ्ख्याविशेषनियम्यत्वेनेति**। यद्यप्यवयवानां सङ्ख्यासाम्येऽपि प्रचयविशेषेण परिमाणतारतम्यमनुभूयते, तथाऽपि सर्षपावयवेषु दृढतरसंयोगेनाऽपि परिमाणापकर्षासम्भव इत्यत्र तात्पर्यम्। वस्तुतो मेरोरवयवेषु सर्षपावयवापेक्षयोत्कृष्टप्रचयाङ्गीकारे सर्षपापेक्षया मेरौ मार्दवापत्तिरेव बाधिकेति विभावनीयम्। **मूले—असमवेतेत्यादि**। ननु ध्वंसस्याऽसमवेतकार्यस्य सिद्धान्तिभिरप्युत्पादाङ्गीकारादापत्तिरियमसङ्गतेत्यत आह—**असमवेतभावेति**।

---

(१) मेरुर्यदि सर्षपविशिष्टः स्यात्सर्षपपरिमाणतुल्यपरिमाणवान् स्यादित्यापत्तिः। सर्षपवैशिष्ट्यं च स्वाश्रयत्व—स्वप्रयोजकावयवत्ववत्त्वोभयसम्बन्धेन। स्वाश्रयत्वं च स्वप्रयोजकावयवकूटवदवयवप्रयोज्यत्व—स्ववृत्तित्वोभयसम्बन्धेन। स्ववृत्तित्वमपि स्वप्रयोजकावयवप्रयोज्यत्वसम्बन्धेन। कूटवत्त्वं च स्वीयपरिमाणतुल्यपरिमाणवत्त्वसम्बन्धेन। स्वप्रयोजकावयवत्ववत्त्वं च स्वव्यापकतानवच्छेदकसङ्ख्याविभाजकधर्मावृत्तित्व—स्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगितावच्छेदकसङ्ख्याविभाजकधर्मवृत्तित्वान्यतरसम्बन्धेन। प्रथमवृत्तित्वं स्वप्रयोजकावयवकूटत्वव्यापकतावच्छेदकत्वसम्बन्धेन। द्वितीयवृत्तित्वं स्वप्रयोजकावयवत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोगितावच्छेदकत्वसम्बन्धेनेति तदर्थः। तेनाऽवयवधारायाः अनन्तत्वेऽपि तादृशानन्तावयवारब्धानां त्रसरेणूनामेव सामर्थ्यं युक्तं, मेरुसर्षपयोस्त्वारम्भकत्रसरेणूनामेव सङ्ख्यातारतम्येन परिमाणतारतम्यमुपपद्यते इति मेरौ सर्षपसमानताऽऽपत्तिः कथमुक्ता मूलकारेणेति केषां चिदाशङ्का प्रत्युक्ता।

(२) अणुपरिमाणतारतम्यं क्व चिद्विश्रान्तं परिमाणतारतम्यत्वात् महत्परिमाणतारतम्यवदित्यनुमानम्। ननु परमाणोरसिद्धौ अणुपरिमाणस्याऽसिद्ध्या तत्तारतम्यरूपपक्षा-

मानेन तद्वयवसिद्धौ, त्रसरेणोरवयवाः सावयवाः महदारम्भकत्वात् कपालवदित्यनुमानेन तद्वयवसिद्धेः। न चेदमप्रयोजकम्, अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यवत्त्वस्य प्रयोजकत्वात्। न चैवंक्रमेण तद्वयवधाराऽपि सिद्ध्येदिति वाच्यम्। अनवस्थाभयेन तदसिद्धेरिति (१)। इति परमाणुसाधनम्॥

दिनकरी।

चारवारणाय चाक्षुषपदम्। घटाभावे व्यभिचारवारणाय द्रव्यपदम्। **तद्वयवसिद्धाविति।** त्रसरेण्ववयवसिद्धावित्यर्थः। **तदसिद्धेरिति।** अवयवधारायाः असिद्धेरित्यर्थः।

अत्र नव्याः, 'त्रसरेणोरवयवाः सावयवाः—'इत्याद्यनुमानयोरुक्तयोरप्रयोजकत्वेन त्रुटावेव विश्रामः। न च चाक्षुषं प्रति महत्त्वं कारणं, तथा च त्रुटौ महत्त्वमावश्यकं, तच्चाऽवयवसङ्ख्याजन्यमित्यवयवं विना तन्नोत्पद्यत इत्यनुकूलतर्कसत्त्वान्नाऽप्रयोजकत्वं द्व्यणुकसाधकानुमानस्येति वाच्यम्। त्रसरेणुमहत्त्वस्य नित्यत्वस्वीकारेणोक्ततर्कानवतारात्। न चाऽणुव्यवहारस्याऽणुपरिमाणनिबन्धनतया तदाश्रयद्रव्यसिद्धिरावश्यकीति वाच्यम्। तस्याऽपकृष्टपरिमाणनिबन्धनत्वात्, महत्त्यऽपि महत्तमादणुव्यवहारात्। न चैवं त्रसरेणुपुञ्ज एवाऽस्त्ववयवीति वाच्यम्। विशकलितेष्वपि तेषु घट इत्यादिप्रत्ययप्रसङ्गात्। न च तत्संयोगवृत्त्येव घटत्वं, घटो द्रव्यमित्यादिप्रतीतौ च परम्परया तद्भानमिति वाच्यम्। सम्भवति साक्षात्सम्बन्धविषयत्वे परम्परासम्बन्धविषयत्वकल्पने गौरवादित्याहुः।

ननु परमाणुत्रयेण कुतो न द्रव्यान्तरोत्पत्तिः परमाणुद्वयेन द्व्यणुकवत्, एवं द्व्यणुकद्वयेन द्रव्यान्तरोत्पत्त्यापत्तिः त्रिभिर्व्यणुकैस्त्र्यणुकवदिति चेन्न। प्रमाणाभावेन तादृशद्रव्यासिद्धौ परमाणुत्रये द्व्यणुकद्वये च द्रव्यारम्भकसंयोगाकल्पनात्। अत्रेदं चिन्त्यम्। त्रिभिः परमाणुभिरेव त्र्यणुकमस्तु, परमाणुभ्यामनारम्भस्तु सिद्धान्तिनां द्व्यणुकाभ्यामनारम्भ इव मानाभावात् फलबलेन त्रयाणामेव युगपत् द्रव्यारम्भकसंयोगकल्पनात्।

रामरुद्री।

मूले—अनेकद्रव्यवत्त्वस्येति। स्वसमवेतसमवेतत्वसम्बन्धेन नानाद्रव्यवत्त्वस्येत्यर्थः, न तु समवेतत्वसम्बन्धेन तथात्वं तदर्थः, तथा सति परमाणुसाधकानुमानस्याऽप्रयोजकत्वशङ्काया अनिवृत्तेरिति ध्येयम्।

परम्परयेति। घटो द्रव्यमित्यादिप्रतीतौ स्वाश्रयसमवायित्वसम्बन्धेन घटत्वभानमित्यर्थः। **'आहुः'** इत्यनेन विलक्षणसंयोगविशिष्टाणुपुञ्ज एव घटत्वाङ्गीकारे नैष दोष इत्यस्वरसः सूचितः।

प्रमाणाभावेनेति। तादृशद्रव्ये इत्यादिः। त्र्यणुकस्य प्रत्यक्षसिद्धतया तदन्यथानुपपत्त्या द्व्यणु-

---

प्रसिद्धेरुक्तानुमाने दुर्वारता। यदि च महत्त्वापकर्ष एवाऽणुपरिमाणत्वेनाऽऽख्यायत इत्युच्यते, तदा तस्य त्रसरेणावेव विश्रान्तत्वेन परमाणोरसिद्धिरेव, अणुत्वत्व-महत्त्वत्वजात्योर्जातिसङ्करापत्तिश्च, इत्याशङ्क्य परमाणुसाधकप्रमाणान्तरोपन्यासाय शङ्कते-न चेत्यादिना।

(१) परमाणोरवयवा वर्तन्ते, त्रयाणां परमाणूनां संयोगस्यैव तदनुमापकत्वात्, तथा हि परमाणुः परमाणुना सम्बध्यते चैदेकदेशेन वा कात्स्न्यंन वा? आद्ये तदवयवसिद्धिः, द्वितीये संयोगस्याऽव्याप्यवृत्तितानियमभङ्गादपसिद्धान्तः, द्व्यणुकस्य प्रथिमानुपपत्तिश्चेति यत् केषां चिन्मतं, तदत्यन्तमसत्। निरवयवेष्वीदृशशङ्कायाः स्वात्मलाभासम्भवात्। यथा हि निरवयवेनाऽऽकाशेन घटपटादयः सम्बद्ध्यन्ते परं, न तेनाऽऽकाशोऽवयवी, तथैव परमाण्वपि।

सा च त्रिधा भवेद्देहमिन्द्रियं विषयस्तथा ॥ ३७ ॥

योनिजादिर्भवेद्देह इन्द्रियं घ्राणलक्षणम् ।

सा चेति । **सा**-कार्यरूपा पृथिवी **त्रिविधा**, शरीरेन्द्रियविषयभेदादित्यर्थः । **तत्र देहमुदाहरति**—योनिजादिरिति । **योनिजमयोनिजं चेत्यर्थः** ।

योनिजमपि द्विविधं-जरायुजमण्डजं चेति । **जरायुजं मानुषादीनाम्** । **अण्डजं**-सर्पादीनाम् । **अयोनिजं स्वेदजोद्भिज्जादिकम्** ।

स्वेदजाः-कृमिदंशाद्याः । **उद्भिज्जाः**-तरुगुल्माद्याः । **नारकिणां शरीरमप्ययोनिजम्** ।

दिनकरी ।

वस्तुतो गवाक्षरन्ध्रे दृश्यमानानां द्व्यणुकत्वमेव युक्तम्, अणुद्वयारब्धत्वे लाघवादिति ॥

इति परमाणुसाधनम् ॥

मूलस्थस्य **'देहमिन्द्रियं विषयस्तथा'** इत्यस्य त्रैविध्ये हेतुपरत्वं सूचयितुमर्थमाह—**सा-कार्यरूपेति** ।

योनिजं—शुक्रशोणितयोः परस्परमेलनजन्यं, तद्भिन्नमयोनिजम् । **जरायुजमिति** । गर्भवेष्टनचर्मपुटकं जरायुः । **मानुषादीनामित्यादिना** पशुमृगादीनां (१) परिग्रहः । **सर्पादीनाम्'इत्यादिना** विहङ्गमादिपरिग्रहः ।

स्वेदजमुदाहरति—**कृमिदंशाद्या** इति । तच्छरीराणामुत्पत्तेरधर्मविशेषसहितेभ्योऽणुभ्य एव स्वीकारादिति भावः । 'उद्भिज्जादिकम्' इत्यादिना देवादिशरीरपरिग्रहः, तच्छरीराणामुत्पत्तेर्धर्मविशेषसहितेभ्योऽणुभ्य एव स्वीकारादिति भावः । **तेषामयोनिजत्वे त्वा-**

रामरुद्री ।

कसिद्धिसम्भवेऽपि परमाणुत्रयारब्धद्रव्यादेः सिद्धयसम्भवादिति भावः । **लाघवादिति** । न चैवं तस्य त्र्यणुकपदवाच्यत्वानुपपत्तिरिति वाच्यम् । अप्रत्यक्षद्व्यणुकवासनावासितैरेव तथा व्यवहियमाणत्वात् ।

"जालसूर्यमरीचिस्थं यत् सूक्ष्मं दृश्यते रजः ।
प्रथम तत् प्रमाणानां त्रसरेणुरिति स्मृतः-"

इति स्मृतौ त्रसरेणुपदस्यैव प्रयोगात्, तत्पदञ्च मण्डपादिपदवत् केवलरूढमेव । यद्वा त्रिभिः सहितो रेणुस्त्रसरेणुः, हितलोपः आर्ष इत्येव तत्राऽस्तु व्युत्पत्तिरिति भावः । एतदपेक्षयाऽपि त्र्यणुकनित्यतायामेव लाघवं, परमाण्वादिकल्पने गौरवादिति ध्येयम् । **हेतुपरत्वं**—कार्यपरत्वम् । परमाणोर्विषयत्वेऽपि **'विषयस्तथा'** इत्यस्य जन्यविषयार्थकतया परमाणोस्तथात्वं नाऽस्त्येव, अत एव कारिकायामग्रेऽपि **"विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्तः-"** इत्येवं वक्ष्यतीति भावः ॥ इति परमाणुसाधनम् ॥

योनिजमित्यस्य योनिद्वारा निर्गतमित्यर्थकत्वे कदा चित् स्वेदजस्याऽपि योनिद्वारा निर्गमसम्भवादतिव्याप्तिरित्याशङ्कापरिहाराय व्याचष्टे—**शुक्रेति** । **पशुमृगादीनामिति** । यद्यपि **पशु**पदस्य लोमवल्लाङ्गूलवद्वाचकतया तेनैव मृगसंग्रहे पृथङ्मृगपदोपादानं व्यर्थं तथाऽपि गोबलीवर्दन्यायेन, लाङ्गूलरहितस्याऽपि मृगविशेषस्य सम्भवाभिप्रायेण वा तदुपादानमिति बोध्यम् । **विहङ्गमा**दीत्यादिना वल्लीप्रभृतीनां परिग्रहः ।

दंशाद्या इति । ननु कृम्यादीनामपि शरीरं शुक्रशोणितमेलनजमेव, शरीरमात्रस्य तथात्वादित्याशङ्कायामाह—**तच्छरीराणामिति । तेषामिति** । देवादिशरीराणामित्यर्थः, न तु कृम्यादिशरीराणा-

(१) ग्राम्याश्चतुष्पदः पशवः, आरण्याश्च ते मृगा इत्याख्यायन्ते ।

न च मानुषादिशरीराणां पार्थिवत्वे किं मानमिति वाच्यम्। गन्धादिमत्त्वस्यैव प्रमाणत्वात्। न च क्लेदोष्मादेरुपलम्भादाप्यत्वादिकमपि स्यादिति वाच्यम्। तथा सति जलत्वपृथिवीत्वादिना सङ्करप्रसङ्गात्। न च तर्हि जलीयत्वादिकमेवाऽस्तु, न तु पार्थिवत्वमिति वाच्यम्। क्लेदादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानात्, गन्धाद्युपलब्धेश्च पृथिवीत्वसिद्धेः, तेन पार्थिवादिशरीरे जलादीनां निमित्तत्वमात्रं बोध्यम्।

शरीरत्वं न जातिः, पृथिवीत्वादिना साङ्कर्यात्। किन्तु चेष्टाश्रयत्वं वृक्षादीनामपि चेष्टाश्रयत्वान्नाऽव्याप्तिः। न च वृक्षादेः शरीरत्वे किं मान-

दिनकरी।

गम एव-"ब्रह्मणो मानसा मन्वादयः पुत्राः" इत्यादिः प्रमाणम्। "योनिं विना न शरीरम्" इत्येवंविधागमे च योनिपदं कारणमात्रपदं, शरीरपदं मनुष्यदेहपरं वा।

'गन्धादि' इत्यानिना शुक्लेतररूपपरिग्रहः। **'क्लेदोष्मादेः'** इत्यादिना व्यूहावकाशपरिग्रहः। **क्लेदः**-क्षरणं, स्वेद इति यावत्। **ऊष्मा**—पाकः औष्ण्यमिति यावत्। तच्च शरीरसम्बन्धेन पुष्पादौ रूपादिपरावृत्त्याऽनुमीयते, अनुष्णात् तदनुत्पत्तेः। **व्यूहः**-क्रिया। **अवकाशः**-मुखादावन्नादिगत्यप्रतिबन्धः। ननु कथं तर्हि शरीरे पाञ्चभौतिकत्वव्यवहार इत्यत आह—**तेनेति**। शरीरस्य पार्थिवत्वसाधनेनेत्यर्थः। एवं च शरीरे पाञ्चभौतिकत्वव्यवहारो न पञ्चभूतोपादानकत्वनिबन्धनः, किन्तु तज्जन्यत्वनिबन्धनः, तत्राऽप्येकैकस्योपादानत्वं, चतुर्णां निमित्तत्वमिति विवेकः।

किन्तु चेष्टेति। चेष्टात्वं—जातिविशेषः, चेष्टत इतिप्रत्यक्षसिद्धः। न च शरीरत्वमेव पृथिवीत्वादिव्याप्यजातिः, चेष्टात्वं तु तत्क्रियात्वमिति वाच्यम्। पृथिवीत्वादिना

रामरुद्री।

मित्यर्थः, उत्तरत्र वक्ष्यमाणप्रमाणस्य तेषामयोनिजत्वसाधकत्वाभावादिति ध्येयम्। **योनिं विनेति**। शुक्रशोणितमेलनं विनेत्यर्थः। **कारणमात्रपरमिति**। नन्वेवं कार्यमात्रस्यैव कारणं विनाऽसम्भवाच्छरीरमात्रस्य कारणं विनाऽनुत्पत्तिकथनं न युज्यते इत्याशङ्कायामाह—**शरीरपदमिति**। अत्र **मनुष्यपदं** पश्वादीनाप्युपलक्षकम्।

ननु मानुषादिशरीरे पृथिवीत्वसाधनाय मूले **'गन्धादिमत्त्वात्'** इति हेतुरुपन्यस्तः, तत्र हेतौ **आदि**पदं व्यर्थं, केवलगन्धस्यैव पृथिवीत्वाव्यभिचारित्वात्। न चाऽऽदिपदं हेत्वन्तरसूचनायेति वाच्यम्। गुणान्तरस्यैव पृथिवीत्वव्यभिचारित्वेन तदभावादित्यत आह—**'गन्धादि'इत्यादिनेति**। तथा च नीलादिहेत्वन्तरसूचनायैवाऽऽदिपदमिति भावः। शरीरस्याऽद्रवत्वेन क्षरणासम्भवादाह—**स्वेद इतीति**। ननु पाको रूपपरावर्त्तकतेजःसयोगः, स च पृथिवीत्वस्यैव साधकः, न तु तेजस्त्वस्य, पृथिवीभिन्ने पाकानङ्गीकारादत आह—**औष्ण्यमितीति**। उष्मस्पर्श इत्यर्थः। **व्यूहः—क्रियेति**। यद्यपि क्रियावत्त्वं न वायुत्वसाधकं, तस्य पञ्चद्रव्यसाधारण्यात्, तथाऽपि वायोरेव सदागतिमत्त्वेन क्रियापदस्याऽत्र सर्वदा क्रियावत्त्वार्थकतया न तेन वायुत्वसाधनानुपपत्तिः। न च सुषुप्तिदशायां शरीरेऽपि क्रियाविरहात् स्वरूपासिद्धिरिति वाच्यम्। तदानीमपि श्वासादिप्रयुक्तक्रियासत्त्वादिति भावः। **चतुर्णामिति**। यद्यपि जलपरमाण्वादिसंयुक्तपार्थिवपरमाणुष्वेव घट इव शरीरमुत्पद्यत इति वाक्यान्तरयाणां तत्र कारणत्वं, जलसम्बन्धाभावे संश्लेषाभावेन अवयव्यनुत्पादादुष्णस्पर्शसर्वदागत्यभावापत्त्या च जलादीनां कारणतासम्भवादाकाशसंयोगस्याऽव्यावर्त्तकतया कथं तस्य कारणत्वं, तथाऽपि निविडपाषाणादौ भेकादीनामनुत्पत्त्याऽवकाशविधयाऽऽकाशस्य शरीरकारणत्वमिति मन्तव्यम्। **विवेक इति**। भेद इत्यर्थः।

मिति वाच्यम्। आध्यात्मिकवायुसम्बन्धस्य प्रमाणत्वात्। तत्रैव किं मानमिति चेत्, भग्नक्षतसंरोहणादिना तदुन्नयनात्। यदि हस्तादौ शरीरव्यवहारो न भवति, तदाऽन्त्यावयवित्वेन विशेषणीयम्। न च यत्र शरीरे चेष्टा न जाता तत्राऽव्याप्तिरिति वाच्यम्। तादृशे प्रमाणाभावात्। अथ वा चेष्टावदन्त्यावयवविवृत्ति-द्रव्यत्वव्याप्य-जातिमत्त्वम्, अन्त्यावयवविमात्रवृत्ति-चेष्टावद्वृत्ति-जातिमत्त्वं वा तत्, मानुषत्वचैत्रत्वादिजातिमादाय लक्षणसमन्वयः। न च नृसिंहशरीरे कथं लक्षणसमन्वयः? तत्र नृसिं-

दिनकरी।

सङ्करेण पृथिवीत्वादिव्याप्यानेकशरीरत्वकल्पने गौरवात्। **आध्यात्मिकेति। आध्यात्मिकवायुः**-प्राणाख्यः। शङ्कते-**तत्रैवेति। भग्नक्षतेति।** भग्नक्षतयोः विभागविशेषविश्लिष्टावयवयोः, संरोहणादिकम्, आदिना वृद्धिसंग्रहः। वृद्धिश्चाऽवयवोपचयः। **तदुन्नयनादिति।** आध्यात्मिकवायुसम्बन्धानुमितेः। ननु भग्नक्षतसंरोहणादिहेतुगतवायोः प्राणत्वे प्रमाणाभाव इति चेन्न।

"नर्मदातीरसञ्जाताः सरलार्जुनपादपाः। नर्मदातोयसंस्पर्शात् ते यान्ति परमां गतिम्॥
गुरुं हुंकृत्य तुंकृत्य विप्रं निर्जित्य वादतः। श्मशाने जायते वृक्षः कङ्कगृध्रोपसेवितः-"

इत्यागमस्यैव तत्र मानत्वात्। **अन्त्यावयवित्वेनेति।** द्रव्यानारम्भकद्रव्यत्वेनेत्यर्थः। मृतशरीरे चेष्टाया अभावेनाऽव्याप्तेराह—**अथ वेति।** घटत्वमादाय घटेऽतिव्याप्तिवारणाय—**चेष्टावदिति।** हस्तादावतिव्याप्तिवारणायाऽन्त्यावयवीति। न च हस्तत्वादिकं न जातिः, पृथिवीत्वादिना सङ्करादिति वाच्यम्। पृथिवीत्वादिव्याप्यनानाहस्तत्वावयङ्गीकारात्। पृथिवीत्वरूपतादृशजातिमति घटादावतिव्याप्तिरतो लक्षणान्तरमाह-**अन्त्यावयवीति।** 'अन्त्यावयवविमात्रवृत्ति' इत्यनेन पृथिवीत्वजातिव्युदासः। 'चेष्टावद्वृत्ति' इत्यनेन घटत्वादिव्युदासः। चेष्टा च हिताहितप्राप्तिपरिहारार्था क्रिया प्राह्या, न तु स्पन्दनमात्रं प्राह्यं, घटादावपि सत्त्वात्। ननु देवत्वजातिमादाय लक्षणसमन्वय इत्यत आह-

रामरुद्री।

न चेति। विनिगमनाविरहेणेति शेषः। **तत्क्रियात्वं**-शरीरसमवेतक्रियात्वम्। **सङ्करेणेति।** पृथिवीत्वं विहाय शरीरत्वस्य जलशरीरादौ, शरीरत्वं विहाय पृथिवीत्वस्य घटादौ, उभयोश्च मानुषादिशरीरे सत्त्वेनेत्यर्थः। **उपचयः**—आधिक्यम्। **तत्रेति।** तादृशवायोः प्राणत्व इत्यर्थः। **मानत्वादिति।** धर्मविशेषेणोत्तमगतिप्राप्तेर्वृत्तस्य जीवशरीरत्वमावश्यकं, तच्छरीरिजीवस्यैवोत्तमगतिप्राप्तिसम्भवात्, जीवात्मनो भोगायतनस्य च प्राणवत्त्वनियमादिति भावः। **मृतशरीर इति।** न च मृतशरीरेऽपि पूर्वं चेष्टासत्त्वात् कथमव्याप्तिः? न हि यदा यस्य चेष्टावत्त्वं, तदा तस्य शरीरत्वमिति कालघटितं लक्षणमिति वाच्यम्। यत्र मरणानन्तरं खण्डशरीरान्तरमुत्पन्नं, तत्राऽव्याप्तौ तात्पर्यात्। **न चेति।** यद्यपि हस्तत्वस्य जातित्वाभावेऽपि पृथिवीत्वादिकमादायैवाऽतिव्याप्तिः प्रसज्यते एव, तथापि पृथिवीत्वादिकमादायैतल्लक्षणे घटादावतिव्याप्तेर्वक्ष्यमाणतया तदादायाव्यावृत्तिप्रदर्शनमनुचितमिति हस्तत्वस्य जातित्वसाधनाय परिश्रमः। नन्वत्र शरीरलक्षणप्रविष्टं चेष्टात्वं यदि शरीरक्रियानिष्ठजातिविशेषः, तदा मन्त्रादिमहिम्ना नोदनं विनाऽपि यत्राऽचेतने घटादौ क्रियोत्पत्तिः, तत्राऽपि मन्त्रमहिम्ना घटश्चेष्टत इति प्रयोगात्तत्राऽपि तादृशजातेरङ्गीकरणीयतया घटत्वमादाय घटादावतिव्याप्तिः। यदि च शरीरक्रियात्वं चेष्टार्थं, तदाऽऽत्माश्रय इत्यतश्चेष्टात्वं प्रकारान्तरेण निर्वक्ति—**चेष्टा चेति। परिहारार्थेति।** अत्र **इष्टत्वं** स्वावच्छिन्ने-

हत्वस्यैकव्यक्तिवृत्तितया जातित्वाभावात्, जलीयतैजसशरीरवृत्तितया देवत्वस्याऽपि जातित्वाभावादिति वाच्यम्। कल्पभेदेन नृसिंहशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयात्।

इति पार्थिवशरीरनिरूपणम्॥

इन्द्रियमिति। **घ्राणेन्द्रियं पार्थिवमित्यर्थः। पार्थिवत्वं कथमिति चेदित्थम्। घ्राणेन्द्रियं पार्थिवं रूपादिषु मध्ये गन्धस्थवाऽभिव्यञ्जकत्वात् कुङ्कुमगन्धाभिव्यञ्जक(गो)घृतवत्। न च दृष्टान्ते स्वीयरूपादिव्यञ्जकत्वादसिद्धिरिति वाच्यम्। परकीयरूपाद्यव्यञ्जकत्वस्य तदर्थत्वात्॥ न च नवशराव(गत)गन्धव्यञ्जकजलेऽनैकान्तिकत्वमिति वाच्यम्। तस्य सक्तु-**

दिनकरी।

जलीयेति। देवत्वस्याऽपीति, अपिना नृसिंहत्वपरिग्रहः। **जातित्वाभावादिति**। जातिसाङ्कर्यादिति भावः। जातिसाङ्कर्यस्याऽदोषत्वे देवत्वशरीरत्वादेर्नानाजातित्वाङ्गीकारे वा देवत्वशरीरत्वजातिमादायैव लक्षणसमन्वय इति ध्येयम्। इति पार्थिवशरीरनिरूपणम्॥

रूपादिषु मध्ये इति। रसगन्धस्पर्शा आदिपदार्थाः। नवशरावगन्धव्यञ्जकजले मनसि च व्यभिचारवारणाय 'एव'कारः, तद्दाने च सक्तुरसस्याऽप्यभिव्यञ्जकत्वान्न दोषः। घ्राणेन्द्रिये गन्धत्वाभिव्यञ्जकत्वाद्धेत्वप्रसिद्धिवारणाय हेतौ मध्यान्तम्। न चाऽसिद्धिवारकविशेषणं निरर्थकमिति वाच्यम्। व्यभिचारज्ञान इव हेत्वप्रसिद्धावपि व्याप्तिज्ञानाभावे व्याप्तिग्रहौपयिकाप्रसिद्धिवारकविशेषणोपादानस्य सर्वसिद्धत्वात्। **तदर्थत्वात्**—हेतुवाक्यघटकमध्यान्तपदसमभिव्याहृतैवकारार्थत्वात्। तथा च दृष्टान्ते स्वीयरूपादिव्यञ्जकघृतादावसिद्धिवारणाय परकीयत्वं रूपादौ विशेषणम् देयमिति भावः। **तस्येति**। नवशरावगन्धव्यञ्जकजलस्येत्यर्थः। न च येन नवशरावगन्धव्यञ्जकजलेन सक्तुरसो नाऽभिव्यञ्जितस्तत्र जलविशेषेऽनैकान्तिक इति वाच्यम्। परकीयरूपादिविषयकसाक्षात्कारस्वरूपायोग्य-

रामरुद्री।

च्छाविषयत्वम्, **अनिष्टत्वं**—स्वावच्छिन्नद्वेषविषयत्वं, तेन घटादिक्रियाया अपि कस्य चिदिष्टानिष्टप्राप्तिपरिहारानुकूलत्वसम्भवेऽपि न घटत्वादिकमादायाऽतिव्याप्तिः, **तदर्थत्वञ्च** तत्प्रयोजनकत्वं तदनुकूलत्वमिति यावत्। न च शरीरे कीदृशजातिमादाय लक्षणं सङ्गमनीयम्? पृथिवीत्वादेरतथात्वादिति वाच्यम्। मनुष्यत्वादिकमादायैव तत्सम्भवात्। न च मनुष्यत्वमपि न जातिः, नृसिंहत्वादिभिरेव साङ्कर्यादिति वाच्यम्। तत्र मनुष्यत्वाद्यनङ्गीकारादिति भावः। **अपिनेति**। नृसिंहत्वस्य जातित्वे बाधकमेकव्यक्तिकत्वं, न तु साङ्कर्यमि बोध्यम्॥ इति पार्थिवशरीरनिरूपणम्॥

नवशरावेति। ननु **रूपाद्यव्यञ्जकत्वं**—तत्प्रत्यक्षानुपधायकत्वम्, तच्च परकीयरूपाद्यव्यञ्जकगन्धव्यञ्जकजलव्यक्ताववृतमेवेत्येवकारेण न तत्र व्यभिचारवारणसम्भव इत्याशयेनाऽन्यत्र व्यभिचारवारकतां तस्य प्रदर्शयति—**मनसि चेति**। **मध्यान्तमिति**। 'एव'कारेण गन्धभिन्नाद्यव्यञ्जकत्वं लभ्यते, तच्च न गन्धत्वव्यञ्जकघ्राणेन्द्रियेऽपीति स्वरूपासिद्धिवारणाय—मध्यान्तं, तत्सहितैवकारेण च गन्धभिन्नरूपाद्यन्यतमाव्यञ्जकत्वं लभ्यते, अतो न गन्धत्वव्यञ्जकघ्राणेन्द्रियेऽपि स्वरूपासिद्धिरिति भावः। **निरर्थकमिति**। व्यभिचारावारकत्वादिति भावः। **व्याप्तिग्रहौपयिकेति**। व्याप्तिग्रहानुकूलेत्यर्थः। व्यभिचारवारकविशेषणस्य हि हेतौ सार्थक्यं व्याप्तिग्रहानुकूलत्वप्रयुक्तमेव, तथा च **मध्यान्तानुपादाने** हेतोरेव काऽप्यप्रसिद्धया व्याप्तिज्ञानासम्भवेन तस्याऽप्येतद्व्याप्ति-

विषयो द्व्यणुकादिश्च ब्रह्माण्डान्त उदाहृतः ॥ ३८ ॥

रसाभिव्यञ्जकत्वात् । यद्वा परकीयेति न देयम्, वायूपनीतसुरभिभागानां दृष्टान्तत्वसम्भवात् । न च घ्राणेन्द्रियसन्निकर्षस्य गन्धमात्राभिव्यञ्जकत्वात्तत्र व्यभिचार इति वाच्यम् । द्रव्यत्वे सतीति विशेषणात् ।

इति पार्थिवेन्द्रियनिरूपणम् ॥

विषयमाह—विषय इति । **उपभोगसाधनं विषयः । सर्वमेव कार्यजातम-**

दिनकरी ।

त्वस्य विवक्षितत्वात्, नवशरावगन्धव्यञ्जकजलेऽपि रसव्यञ्जकतावच्छेदकजलत्वस्य सत्त्वादिति । परकीयेति विशेषणाप्रवेशे लाघवादाह—**यद्वेति** । तददाने हेतुमाह-**वायूपनीतेति** । इदमत्र बोध्यम् । 'रूपाद्यव्यञ्जकत्वे सति' इत्यस्य हेतुत्रये तात्पर्यं, शब्दाव्यञ्जकत्वे सति गन्धव्यञ्जकत्वस्य नवशरावगन्धव्यञ्जकोदके व्यभिचारेण तत्र ग्रन्थकर्तुस्तात्पर्याभावात् । तत्र हेतुषु रूपरसस्पर्शानां परकीयत्वं विशेषणम् । न च प्रथमहेतौ नवशरावगन्धव्यञ्जकजले व्यभिचारः, लुप्ताक्षरमसीनीलरूपव्यञ्जकत्वात् । न च तृतीयहेतौ तत्र व्यभिचारः, एतदस्वरसेनाऽपि यद्वेतिकल्पान्तरप्रणयनात्, तत्राऽपि परकीयत्वविशेषणाघटितं हेतुत्रयमिति । **तत्र**-घ्राणेन्द्रियसन्निकर्षे । इन्द्रियत्वं न जातिः—तेजस्त्वादिना साङ्कर्यात्, किन्तु 'शब्देतर-'इत्यादिना वक्ष्यमाणं बोध्यम् । इति पार्थिवेन्द्रियनिरूपणम् ॥

ननु विषयत्वं न जातिः, सामान्यादौ सत्त्वादतस्तल्लक्षणमाह—**उपभोगेति** । यद्यपि साक्षादुपभोगसाधनत्वं द्व्यणुकादावव्याप्तं, साक्षात्परम्परासाधारणभोगसाधनत्वं परमाणावपीति 'द्व्यणुकादिर्ब्रह्माण्डान्तः-'इति ग्रन्थविरोधः, तथाऽपि साक्षात्परम्परासाधारणभोगसाधनत्वं विवक्षितं, परमाणुरपि विषय एव, कार्यरूपपृथिव्या एव त्रिप्रकारेण विभजनात् कार्यपृथिवीविषय एव 'द्व्यणुक-'इत्यादिना प्रदर्शित इति न तद्ग्रन्थविरोधः, अत एवोक्तं-'तदुपभोगं साक्षात् परम्परया वा जनयत्येव' इति । 'कार्यजातं' इत्यत्र 'जात'पदं सम्पा-

रामरुद्री ।

ग्रहानुकूलत्वान्न तद्वैयर्थ्यमिति भावः । **नन्वत्र** हेतौ शब्दाव्यञ्जकत्वप्रवेशौ निरर्थक एव, **'आदि'** पदेन रसगन्धस्पर्शानां ग्रहणेऽपि रसाव्यञ्जकत्वे सति गन्धव्यञ्जकत्वमात्रस्य हेतुतासम्भवेन रूपस्पर्शयोरव्यञ्जकत्वस्य हेतुघटकत्वे प्रयोजनाभाव इत्यस्वरसात् प्रकारान्तरेण तद्ग्रन्थतात्पर्यं वक्तुमुपक्रमते—**इदमत्रेति । हेतुत्रय इति** । ननु रूपरसस्पर्शशब्दघटितत्वेन हेतोश्चातुर्विध्यात् **त्रये**'त्यसङ्गतमत आह-**शब्देति । कल्पान्तरेति** । परकीयत्वाघटितकल्पेत्यर्थः । तथा च तादृशजलस्याऽपि स्वीयस्पर्शव्यञ्जकत्वात् न तत्र तृतीयहेतौ व्यभिचार इति भावः । **'अपि'**शब्देन पूर्वोक्तलाघवसमुच्चयः । **'यद्वा-'**इत्यादिकल्पेऽप्येकत्र हेतौ रूपरसस्पर्शानां त्रयाणामुपादानं व्यर्थमित्यभिप्रायेणाऽऽह—**तत्राऽपीति** । ननु मूले देहविषययोरेव निर्वचनादिन्द्रियत्वं जातिरेवेत्याशयो लभ्यते, तच्च न। सम्भवतीत्याशङ्क्य समाधत्ते—**इन्द्रियत्वमिति** ॥ इति पार्थिवेन्द्रियनिरूपणम् ॥

उपभोगेतीति । सुखदुःखसाक्षात्कार उपभोगः, **तत्साधनं**—तत्प्रयोजकमित्यर्थः, तत्र घटादेरकारणत्वादिति ध्येयम् । **कार्यरूपपृथिव्या इति** । **'सा कार्यरूपा'** इति विवरणादिति भावः । **प्रदर्शित इति** । तत्र **'विषयः'** इत्यस्य जन्यविषय इत्यर्थकत्वादिति भावः । यद्यपि **'सा'** इत्यस्य पृथिवीत्वावच्छिन्नपरत्वेऽपि न क्षतिः, परमाणोर्द्व्यादिसम्भवेऽपि विषयतया त्रिविधान्तर्गतत्वसम्भवात्, तथाऽपि **'सा च'** इत्यत्र चकारस्य जलादीनां त्रैविध्यस्याऽग्रे वक्ष्यमाणतयाऽर्थान्तरसमुच्चायकत्वासम्भवेन एव-

द्वयणुकादि ब्रह्माण्डान्तं सर्वमेव विषयो भवति। शरीरेन्द्रिययोर्विषयत्वेऽपि प्रकारान्तरेणोपन्यासः शिष्यबुद्धिवैशद्यार्थः ॥ ३६ ॥ ३७ ॥ ३८ ॥

इति पार्थिवविषयनिरूपणम् ॥ इति पृथिवीग्रन्थः ॥

दिनकरी।

तादायातम्। **अदृष्टाधीनमिति।** अत्र कार्यमात्रं प्रत्यदृष्टस्य हेतुता न समवायसम्बन्धेन, घटाद्यधिकरणे कपालादौ समवायेन तदभावाद्घटमिचारात्। यत्तु 'स्वसमवायिसंयोगेनाऽदृष्टं कार्यमात्रे हेतुरिति' तन्न। शब्दरूपकार्याधिकरणे गगनेऽदृष्टसमवाय्यात्मसंयोगाभावेन व्यभिचारात्, परन्तु स्वसमवायिसंयुक्तसंयोगेन तस्य हेतुता बोध्या। इदन्तु बोध्यम्—अदृष्टस्य कार्यमात्रं प्रति हेतुता न साक्षात्, न हि सामग्रीसमवधानेऽदृष्टविलम्बेन कार्यविलम्बो दृष्टः, येन तत् साक्षाद्धेतुः स्यात्, परन्तु सामग्रीसम्पादकतया प्रायः परम्परयैव तदुपयोगः, क्व चित्तु मेघसञ्चारादौ साक्षादेव तद्धेतुः, अन्यथा सामग्रीसम्पादकत्वस्यैवाऽनुपपत्तेरिति, एतदर्थमेव साक्षात्परम्परासाधारणजन्यत्वबोधकं 'अधीन'पदमुपात्तम्। **यददृष्टाधीनं**—यत्पुरुषीयादृष्टाधीनम्। तत्-तत्कार्यमित्यर्थः। तदुपभोगः-तत्पुरुषस्योपभोगसाधनम्। **तेन**-द्वयणुकादिकार्यस्य तत्तत्पुरुषस्योपभोगसाधनत्वेन। नन्वेवं सर्वस्यैव विषयत्वेन शरीरेन्द्रियभेदेन पृथिव्यास्त्रैविध्यं न सिद्ध्येदित्यत आह—**शरीरेन्द्रिययोरपीति ॥ ३६ ॥ ३७ ॥ ३८ ॥** इति पार्थिवविषयनिरूपणम् ॥ इति पृथिवीग्रन्थः ॥

रामरुद्री।

कारार्थकताया एव स्वीकरणीयतया तस्य च जलादीनामपि त्रिविधत्वेन पृथिवीव्यतिरिक्तत्रैविध्यव्यवच्छेदकत्वासम्भवेन **'सा च'** इत्यस्य कार्यरूपाया एवेत्यर्थकताया आवश्यकत्वादिति भावः। **सम्पातादायातमिति। 'सर्वम्'** इत्यनेनैवाऽशेषत्वलाभादिति भावः। नन्वदृष्टाधीनत्वम् अदृष्टजन्यत्वमेव तच्च न घटादिरूपकार्यस्य सम्भवतीत्याशङ्कते—**अत्रेति। व्यभिचारादिति।** इदमुपलक्षणम्। कालिकविक्कृत-विधेषणताभ्यां तथात्वेऽपि तत्रैव व्यभिचारो बोध्यः। **बोध्येति।** गगनेऽप्यात्मसंयुक्तपवनादिसंयोगसत्त्वेन विभुद्वयसंयोगानङ्गीकारेऽपि क्षतिविरहादिति भावः। अदृष्टजन्यमित्युपेक्ष्याऽदृष्टाधीनमित्युक्तौ फलं वक्तुमुपक्रमते—**इदन्त्विति। स्यादिति।** तदितरयावत्कारणसत्त्वे तदभावे कार्याभावरूपव्यतिरेकसहचाराभावादिति भावः। **तदुपयोगः**—अदृष्टोपयोगः। तज्जनकादृष्टाभावे तत्कारणानामेव जननानुपपत्तेरिति भावः। नन्वेवं कार्यमात्रेऽदृष्टस्याऽप्रयोजकत्वमेवेत्याशङ्कामपाकरोति—**क्वचिदिति। 'आदिना'** औत्पातिकभूकम्पादिपरिग्रहः। **अन्यथा**-कार्यमात्रं प्रत्येव तस्याऽकारणत्वे। **सामग्रीसम्पत्तिः**—एकत्र सकलकारणतावच्छेदकावच्छिन्नसम्बन्धः। **अनुपपत्ते**रिति। सामग्रीसम्पत्तिरूपकार्यजनकत्वस्यैव सामग्रीसम्पादकतारूपत्वादिति भावः। **त्रैविध्यं**—विभाजकधर्मत्रयवत्त्वम्। परस्परासङ्कीर्णव्याप्यधर्माणामेव विभाजकत्वादिति भावः। मूले **'प्रकारान्तरेण'** इत्यस्य विषयत्वभिन्नदेहत्वादिनेत्यर्थः। **उपन्यासः**—कथनम्। **शिष्यबुद्धेर्वैशद्यं**—देहत्वाद्यवान्तरधर्मविषयकत्वं, **तदर्थः**—तत्प्रयोजकः। यद्यप्येतावता विभागव्याघातोन परिहृतः, तथाऽपि प्रकृते विषयत्वस्य देहेन्द्रियातिरिक्तोपभोगसाधनत्वरूपस्य विभाजकतावच्छेदकत्वोपगमेन न विभागानुपपत्तिरिति मन्तव्यम् ॥ ३६ ॥ ३७ ॥ ३८ ॥

॥ इति पार्थिवविषयनिरूपणम् ॥ इति पृथिवीग्रन्थः ॥

ननु स्नेहजनकतावच्छेदकतया जलत्वसिद्धावपि न तस्य जातित्वसिद्धिः, शब्दादिकारणतायां कारणतात्वस्य जात्यवच्छिन्नत्वव्यभिचारित्वेन हेतुना जलत्वावच्छिन्नत्वस्य साधनासम्भवादित्याशङ्कायामाह—

वर्णः शुक्लो रस-स्पर्शौ जले मधुर-शीतलौ ।

जलं निरूपयति—वर्णः शुक्ल इति । **स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिसिद्धिः ।**

यद्यपि स्नेहत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं, तथाऽपि जन्यस्नेहत्वं तथा बोध्यम् । अथ परमाणौ जलत्वं न स्यात्, तत्र जन्यस्नेहाभावात्, तस्य च नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भावनियमादिति चेन्न । जन्यस्नेहजनकतावच्छेदिकाया जन्यजलत्वजातेः सिद्धौ, तद्वच्छिन्नजनकतावच्छेदकतया जलत्वजातिसिद्धिः ।

दिनकरी ।

जलत्वजातौ प्रमाणमाह—**स्नेहेति** । कारणतावच्छेदकतया धर्मसिद्धौ बाधकाभावात्तस्य जातित्वमिति भावः ।

नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वाभावेन स्नेहत्वस्य कार्यतावच्छेदकत्वं न सम्भवतीति शङ्कते—**यद्यपीति** । तथा-कार्यतावच्छेदकम् । वस्तुतस्तु नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे दोषाभावात् जन्यपदं न देयमेव । ननु यथाऽरण्यस्थदण्डादौ फलानुपधायके कारणतावच्छेदकतया दण्डत्वादिजातिः,तथाऽत्राऽपि भविष्यतीत्यत आह—**तस्येति** । दण्डादेः स्वरूपयोग्यतायां न काऽपि क्षतिः, तस्याऽनित्यत्वेन फलोपधायकत्वाभावादिति भावः । **जन्यजलत्वजातेः**-जन्यजलमात्रवृत्तिजातेः । **तद्वच्छिन्नेति** । जन्यजलत्वजात्यवच्छिन्नेत्यर्थः । न चैवं जलान्त्यावयविनि जलत्वं न स्यादिति वाच्यम् । जलस्याऽन्त्यावयवित्वानुपगमात् ।

ननु जलत्वावच्छिन्नं प्रति समवायसम्बन्धेन स्नेहस्यैव कारणत्वमस्तु, अतिरिक्तजातिकल्पनापेक्षया लाघवादिति चेन्न । जलत्वावच्छिन्नं प्रति स्नेहत्वेन कारणत्वं, शीतस्पर्शत्वेन वेत्यत्र विनिगमनाविरहेणाऽतिरिक्तजलत्वजातिसिद्धेः,कल्पनमादाय कल्पनीयेन विनिगमनाविरहाभावादिति ।

रामरुद्री ।

बाधकाभावादिति । जातित्व इति शेषः । व्यक्त्यभेदादिरूपजातिबाधकविरहादित्यर्थः । **जातित्वमित्यस्याऽग्रे** लाघवादिति शेषः । एतेन कारणतावच्छेदकीभूतं जलत्वं शीतस्पर्शवत्त्वमेव, न जातिः पदार्थान्तरकल्पने गौरवादिति प्रत्युक्तम् । शीतत्वरूपजातिविशेषाणामनेकेषां कारणतावच्छेदकत्वे गौरवाल्लाघवेन शुद्धजलत्वजातेरेव कारणतावच्छेदकत्वौचित्यादिति ध्येयम् ।

दोषाभावादिति । कालविशेषावच्छेदेन स्नेहवत्त्वावच्छिन्नाधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकजलत्वधर्मकत्वरूपकार्यतायाः स्नेहत्वेऽनतिप्रसक्तत्वसम्भवादिति भावः । **अऽत्रापीति** । स्नेहानुपधायकपरमाणावपीत्यर्थः । **तथाऽत्राऽपि भविष्यतीति** । कारणतावच्छेदकजलत्ववत्ता निराबाधा भविष्यतीत्यर्थः । ननु जन्यजलत्वं जन्यत्वविशिष्टजलत्वं, विशिष्टञ्च न जातिरित्यत आह—**जन्यजलमात्रेति** । **जलान्त्यावयवनि**-जलान्तरजननायोग्यजलावयविनि । **न स्यादिति** । तादृशजले जनकतावच्छेदकजातिस्वीकारे तस्याऽयोग्यतैव न स्यादिति भावः । **अनुपगमादिति** । जलमात्र एव जलान्तरसंयोगेन वृहज्जलजननयोग्यतासत्त्वादिति भावः ।

जातिसिद्धेरिति । ननु जलत्वस्याऽपि ताभ्यां विनिगमनाविरह इत्यत आह—**कल्पनमिति विनिगमनाविरहाभावादितीति** । कल्पनीयस्य हि कारणतावच्छेदकत्वं धर्मिग्राहकप्रमाणसिद्धं

शुक्लरूपमेव जलस्येति दर्शयितुमुक्तं—वर्णः शुक्ल इति (१), न तु शुक्लरूपवत्त्वं लक्षणम्। अथ वा नैमित्तिकद्रवत्ववदवृत्ति-रूपवद्वृत्ति-द्रव्यत्वसाक्षाद्व्याप्य-जातिमत्त्वं, अभास्वरशुक्लेतररूपासमानाधिकरण-रूपवद्वृत्ति-

दिनकरी।

के चित्तु धूमादिकं प्रत्यार्द्रेन्धनादेः कारणत्वं निर्विवादम्, आर्द्रत्वं च जलसंयुक्तत्वं, तथा च जलसंयुक्तेन्धनत्वेनेन्धनसंयुक्तजलत्वेन वा कारणतेत्यत्र विनिगमनाविरहाज्जलत्वेन्धनत्वयोः पार्थक्येन कारणतावच्छेदकतया जलत्वजातिसिद्धिरित्याहुः।

परे तु स्थूलजलवृत्तिप्रत्यक्षसिद्धजलत्वरूपजात्यवच्छिन्नसमवायिकारणतावच्छेदकतया परमाणुसाधारणजलत्वजातिसिद्धिः, कार्यतावच्छेदक-कारणतावच्छेदकयोरैक्ये क्षत्यभावात्, नित्यसाधारणधर्मस्य कार्यतावच्छेदकत्वे दोषाभावाच्चेत्याहुः।

न त्विति। पृथिव्यादावव्याप्तेरिति शेषः। शुक्लरूपवत्त्वस्य लक्षणत्वेऽपि न क्षतिरित्यभिप्रेत्याऽऽह—**अथवेति**। द्रव्यत्वव्याप्यवायुत्वजातिमादाय वायावतिव्याप्तिवारणाय रूपवद्वृत्तीति। यथा च वायुत्वं जातिस्तथाऽग्रे वक्ष्यते। पृथिवीत्वादिजातिमादाय पृथिव्यादावतिप्रसङ्गवारणाय नैमित्तिकद्रवत्ववदवृत्तीति। साक्षादिति पटत्वादिवारणाय। द्रव्यत्वसाक्षाद्व्याप्यत्वं च द्रव्यत्वव्याप्याव्याप्यत्वमात्रं, न तु द्रव्यत्वव्याप्यत्वस्याऽपि तत्राऽन्तर्भावः, रूपवद्वृत्तित्वविशेषणेनैव रूपत्वादीनां वारणात्तन्निवेशे प्रयोजनाभावात्। यद्यप्यश्योपस्थितिकद्रवत्वस्यैव रूपस्थाने प्रवेशो युक्तः, तेनाऽपि वायुत्वादेर्वारणात्, एवं च द्रव-

रामरुद्री।

क्लृप्तस्य तु न तथात्वमिति विनिगमकस्यैव सत्त्वादिति भावः।

निर्विवादमिति। अन्वयव्यतिरेकाभ्यामित्यादिः। **पार्थक्येनेति**। इदं च वस्तुगतिमनुरुध्योक्तम्, आर्द्रेन्धनत्वेन धूमकारणत्वेऽपि कारणतावच्छेदककोटिप्रविष्टतयैव जलत्वसिद्धिसम्भवादित्यवधेयम्। **'आहुः'** इत्यस्वरसोद्भावनं, तद्बीजं तु परमाणुरूपजलसंयोगस्य धूमप्रयोजकत्वे मानाभावेन उक्तयुक्त्या परमाणौ जलत्वासिद्धेरिति।

'परे तु—' इत्यादिकं तु स्वानुमतमेव, स्नेहत्वस्यैव जन्यतावच्छेदकत्वसम्भवेन जन्यस्वाप्रवेशेऽपि न क्षतिरित्यस्य स्वेनैव पूर्वमुक्तत्वादिति मन्तव्यम्। **तत्राऽन्तर्भाव इति**। ननु द्रव्यत्वव्याप्याव्याप्यत्वमात्रस्य द्रव्यत्वसाक्षाद्व्याप्यतारूपत्वे तथाविधरूपत्वमादाय रूपादावतिव्याप्तिरित्यत आह—**रूपवदित्यादि। अवश्योपस्थितिकेति**। नैमित्तिकद्रवत्ववदवृत्तित्वस्य पृथिवीत्वादिवारणायाऽवश्यमुपात्ततया

---

(१) शुक्लमेव रूपमपामिति न सङ्गच्छते, कालिन्दीजलादौ नीलिमोपलब्धेः। औपाधिकं तच्चन्द्रमसीव शैत्यमिति चेन्न। प्रमाणाभावात्। वियति विक्षिप्तेषु जलेषु श्वेत्योपलब्धिर्बाधिकेति चेन्न। तत्र तैजसस्यैव श्वेत्यस्योपलम्भात्। नीलिमाऽपि तर्हि प्रतीयेतेति चेन्न। स्फटिकादौ श्वैत्यनिराकरणेन रक्तरूपाद्युपलम्भवत्तदुपपत्तेः। तथा च कथमुक्तं-'वर्णः शुक्लः-इति? इति चेन्मैवम्। जलस्य नीलरूपादिमत्त्वे वियति विक्षेपेऽपि जले नीलिमोपलम्भापत्तेः। स्फटिकादिवत्तदुपपत्तिरिति वाच्यम। शुक्लरूपे एवेतररूपेणाऽभिभवस्य दृष्टत्वात्। स्फटिकं चाभास्वरशुक्लमेव। कालिन्दीजलादौ नीलरूपसत्त्वे पुनरवश्यं तत्प्रत्यक्षं वियति विक्षेपेऽपि जलस्य भवेत्। ननु अप्रयोजकत्वमुक्तनियमे, इतररूपाणामपि अभिभवसम्भवादिति चेन्न। इन्द्रनीलादौ वियत्यपि नीलरूपोपलम्भस्य दृष्टत्वेन तत्र तैजसेन रूपेण तदभिभवाकरणेन तथा नियमकल्पनादिति सिद्धं शौक्ल्यं जले।

द्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः, तेन स्फटिकादौ नाऽतिव्याप्तिः।

रस-स्पर्शाविति। **जलस्य मधुर एव रसः (१)। शीत एव स्पर्शः(२)। तिक्तरसवदवृत्ति-मधुरवदवृत्ति-द्रव्यत्वसाक्षाद्व्याप्य-जातिमत्त्वं तदर्थः, तेन**

दिनकरी।

त्ववद्वृत्तित्वाभावादेव पटत्वादीनां वारणसम्भवे द्रव्यत्वसाक्षाद्व्याप्येत्यपि न देयमिति लाघवम्, तथाऽपि मूले 'वर्णः शुक्लः-'इत्यादिना रूपघटितलक्षणस्योक्तत्वात्तदघटितलक्षणपरिष्कारे मूलविरोधः स्यादिति तथा न कृतमिति ध्येयम्। मूर्तत्वजात्यनभ्युपगमेन चेदं, तेन जलत्वस्य द्रव्यत्वव्याप्यमूर्तत्वव्याप्यत्वेऽपि न क्षतिः। जलघटान्यतरत्वमादाय घटादावतिव्याप्तिवारणाय जातीति। क्वचित् 'शुक्लरूपवद्वृत्ति-'इति पाठः। तत्र 'शुक्ल'पदं रूपपदं वा सम्पातादायातम्। एवमेव च व्यावृत्तिरभास्वरशुक्लेतररूपेत्यत्र रूपवद्वृत्ति-द्रव्यत्वसाक्षाद्व्याप्यपदयोर्बोध्या। पृथिवीत्वमादाय पृथिव्यामतिव्याप्तिवारणायाऽभास्वरशुक्लेतररूपासमानाधिकरणेति। जलत्वस्य शुक्लरूपसामानाधिकरण्यादसम्भव इति शुक्लेतरेति। तेजस्त्वमादाय तेजस्यतिव्याप्तिवारणायाऽभास्वरेति।

शीत एवेति। यद्यपि 'शीतं गुणे-' इति कोशात् क्लीबतैवोचिता, तथाऽपि विशेष्यस्य स्पर्शशब्दस्य पुंल्लिङ्गत्वात्पुंल्लिङ्गतया निर्देशः, शुक्लं रूपमित्यादौ शुक्लपदस्य क्लीबतयैवेति।

रामरुद्री।

द्रवत्वस्याऽवश्योपस्थितिकत्वेन तत् परित्यज्याऽनुपस्थितरूपप्रवेशस्याऽनुचितत्वादिति भावः। **रूपघटितेति।** तत्र वर्णपदस्य रूपार्थकत्वादिति भावः। यद्यप्येवमपि मूले **'शुक्ल'** पदस्याऽप्युपात्तत्वेन तस्य चोक्तलक्षणाघटकतया मूलविरोधो दुर्वार एव, तथाऽपि शुक्लवद्वृत्तित्वं रूपवद्वृत्तित्वं वा प्रवेशनीयमित्यत्र विनिगमनाविरहेण लक्षणद्वये मूलतात्पर्यस्य विवक्षणीयतया न मूलविरोध इति भावः। **एवमेवेत्यादि।** एकस्मिन् लक्षणे **शुक्ल**-रूप-पदयोरघटकत्वेनाऽपरितोषान्मूले कारिकानुसारिलक्षणान्तरमित्यवधेयम्। **बोध्येति।** वायुत्वमादायाऽतिव्याप्तिवारणाय, पटत्वादिकमादाय तद्वारणाय च **रूपवद्वृत्तित्व-साक्षाद्व्याप्यत्वयोः** प्रवेश इत्यर्थः। न च पटे नीलादिरूपस्याऽप्यनुभवसिद्धतयाऽ**समानाधिकरणान्ते**नैव पटत्वादिवारणसम्भवात् शङ्खादावतिव्याप्तिवारणमेव **साक्षात्**पदप्रयोजनं तथा च**'एवमेव'** इति कीर्तनमसङ्गतमिति वाच्यम्। नीलपटादिस्थले नीलादिरूपं न पटस्य, अपि तु नीलयुक्तद्रव्यान्तरस्यैवेति सिद्धान्तात्।

क्लीबतयेवेति। 'गुणे शुक्लादयः पुंसि-' इति कोशसत्त्वेऽपि शुक्लं रूपमित्यादिप्रयोगो यथा चिन्तामण्यादौ दृश्यते, तथाऽत्राऽपीत्यर्थः। कोशस्य विशेष्यवाचकपदासमभिव्याहारस्थले एव प्रवृत्तिरिति

---

(१) मधुर एव रसोऽपामिति न सङ्गच्छते, प्रमाणाभावात्, न हि प्रत्यक्षेण कोऽपि रसस्तत्राऽनुभूयते, येन तत्र रसनिश्चयो भवेत्। तिक्तादिविलक्षणरसानुभवेन मधुररसकल्पनेति चेन्न। मधुरादिविलक्षणरससंवेदनेन तिक्तादेरेव कल्पयितुमुचितत्वेन विनिगमकाभावात्, जम्बीररसादावम्लादिरसोपलम्भाच्चेति चेन्न। निदाघपीतनिर्मलगङ्गाजलमाधुर्यस्य प्रत्यक्षसिद्धत्वादिति।

(२) शीत एव स्पर्श इति न सङ्गच्छते-उष्णजलादावुष्णप्रतीतेरपि सम्भवात्। तेजस्तदौष्ण्यमिति चेन्न। रूपवत्स्पर्शप्रत्यक्षस्य रूपप्रत्यक्षव्याप्यत्वेन तेजसोऽपि चाक्षुषापत्तेरिति चेन्न। ऊष्मादिषु रूपप्रत्यक्षमन्तरेणाऽपि स्पर्शप्रत्यक्षस्याऽऽनुभविकत्वेनोक्तनियमस्याऽप्रामाणिकत्वेन वह्निसंयोगाधिक्येन च तत्रौष्ण्याधिक्यप्रतीतेरनुभवसिद्धतया जले शीतस्पर्शकल्पनात्।

शर्करादौ नाऽतिव्याप्तिः। (शीतेतरस्पर्शवदवृत्ति-स्पर्शवदवृत्ति-द्रव्यत्व-साक्षाद्व्याप्य-जातिमत्त्वं तदर्थः)

ननु शुक्लरूपमेवेति कुतः ? कालिन्दीजलादौ नीलिमोपलब्धेरिति चेन्न। नीलजनकतावच्छेदिकायाः पृथिवीत्वजातेरभावाज्जले नीलरूपासम्भवात्, कालिन्दीजले नीलत्वप्रतीतिस्त्वाश्रयौपाधिकी, अत एव वियति विक्षेपे धवलिमोपलब्धिः।

अथ जले माधुर्यं किं मानम् ? न हि प्रत्यक्षेण कोऽपि रसस्तत्राऽनुभूयते, न च नारिकेलजलादौ माधुर्यमुपलभ्यत एवेति वाच्यम्। तस्याऽऽश्रयौपाधिकत्वात्, अन्यथा जम्बीरजलादावम्लादिरसोपलब्धेरम्लादिमत्त्वमपि स्यादिति चेन्न। हरीतक्यादिभक्षणस्य जलरसाभिव्यञ्जकत्वात्। न च हरीतक्यामेव जलोष्मसंयोगाद्रसान्तरोत्पत्तिरिति वाच्यम्। कल्पनागौरवात्,

दिनकरी।

द्रव्यत्वव्याप्या या पृथिवीत्वरूपा जातिस्तामादाय पृथिव्यामतिव्याप्तिवारणाय तिक्तावृत्तीति। तेजस्त्वादिजातिमादाय तेजआदावतिव्याप्तिवारणाय मधुरवद्वृत्तीति। शेषं दर्शितदिशाऽवसेयम्। **शीतेतरेति**। द्रव्यत्वरूपजातिमादायाऽतिव्याप्तिवारणाय शीतेतरस्पर्शवदवृत्तीति। आत्मत्वादिकमादायाऽऽत्मादावतिव्याप्तिवारणाय स्पर्शवद्वृत्तीति। शेषं पूर्ववत्।

ननु जले नीलरूपाभावे कथं नीलरूपप्रतीतिरत आह—**कालिन्दीति**। स्वसमवायिसंयोगसम्बन्धेनोपष्टम्भकपार्थिवभागगतनीलरूपप्रतीतिः कालिन्दीजलादाविति भावः। **अत एवेति**। उपदर्शितसम्बन्धस्य जलं नीलमिति प्रतीतिनियामकत्वादेवेत्यर्थः। **वियतीति**। तदोपदर्शितसम्बन्धघटकसंयोगनाशादिति भावः।

तत्र-जले। **तस्य**-माधुर्यस्य। **अन्यथा**-आश्रयौपाधिकत्वाभावे। 'व्यञ्जकत्वात्' इत्युत्तरं हरीतकीभक्षणोत्तरं प्रत्यक्षेण माधुर्योपलम्भादिति पूरणीयम्। **कल्पनागौरवादिति**। अवयवरसाजन्यस्य पृथिवीरसस्याऽग्निसंयोगसाध्यत्वदर्शनादेतदनुरोधमात्रेण जलसंयोगस्याऽपि पृथिवीरसोत्पादकत्वस्वीकारेऽतिरिक्तकार्यकारणभावस्य, हरीतक्यां मधुररसस्य च

रामरुद्री।

भावः। द्रव्यत्वेत्यादिमूले शीतस्पर्शवत्वस्य जललक्षणत्वे क्वाऽपि दोषाभावात्तन्निरुक्तिर्न कृतेति मन्तव्यम्। **शेषमिति**। वायुत्वमादायाऽतिव्याप्तिवारणाय **मधुरवदवृत्तीति**। शर्करात्वमादायाऽतिव्याप्तिवारणाय **साक्षाद्व्याप्येति**। जलशर्करोभयत्वमादाय तद्वारणाय **जातीति**पदमिति भावः।

उपष्टम्भकेति। कालिन्दीजलसंयुक्तेत्यर्थः। इदं तु बोध्यम्। कालिन्दीजले नीलत्वप्रतीतावाश्रयौपाधिकत्वं—आश्रयविशेषसंयोगरूपदोषजन्यत्वमेव मूलग्रन्थकर्तुरभिप्रेतं, न तूक्तपरम्परासंसर्गकत्वं, तथा सति जले नीलत्वस्येव पृथिवीत्वस्याऽपि प्रतीतिप्रसङ्गात्। न च त्वन्मतेऽपि तादृशदोषबलात् कुतो न पृथिवीत्वप्रत्यय इति वाच्यम्। स्फटिकादिस्वच्छद्रव्ये रक्तपटादिसयोगबलाद्रक्तत्वप्रतीतिरेव न तु पटत्वप्रतीतिरिति सर्वानुभवसिद्धमिति पित्तादिदोषस्य पीततामात्रभ्रान्तिजनकतामात्रकल्पनावदस्माऽप्यनुभवानुरोधेन नीलत्वभ्रान्तिजनकतामात्रस्यैव तादृशदोषे कल्पनीयत्वात्, दोषविशेषजन्यत्वादेव विशेषदर्शिनामपि समवायेनैव नीलत्वभ्रान्तिः, न हि नीलो घटो नीलं जलमिति प्रतीत्योर्वैलक्षण्यमनुभवसिद्धमिति कश्चिदुपैतीति।

'हरीतकीभक्षणस्य'—इत्यादिना हरीतकीभक्षणस्य जलरसव्यञ्जकत्वमुक्तं मूले, तत्र च हेतोरनभिधानान्मूलस्य न्यूनतामाशङ्क्य हेतुं पूरयति—**'व्यञ्जकत्वादीत्यादिना। हरीतक्यामिति**। यद्यपि हरीत-

पृथिवीत्वस्याऽम्लादिजनकतावच्छेदकत्वाच्च जले नाऽम्लादिकम् । जम्बीररसादौ त्वाश्रयौपाधिकी तथा प्रतीतिः ।

दिनकरी ।

कल्पने गौरवादिति भावः । नन्वस्तु जले मधुरो रसः, तथाऽपि जम्बीरजलादौ प्रत्यक्षसिद्धस्याऽम्लरसस्याऽपि स्वीकारे बाधकाभाव इत्यत आह–**पृथिवीत्वस्येति । अम्लादिजनकतावच्छेदकत्वादिति ।** यद्यपि पृथिवीत्वस्याऽम्लादेर्जनकतावच्छेदकतावन्मधुरजनकतावच्छेदकत्वमप्यस्तीति तुल्यं, तथाऽपि हरीतक्यादिभक्षणोत्तरं जलेऽपि मधुरोपलब्धेस्तत्र मधुरस्वीकारस्याऽऽवश्यकत्वाज्जलत्वेनाऽपि मधुरं प्रति हेतुत्वं कल्प्यत इति भावः । ननु जम्बीरसलिलादावम्लप्रत्यक्षाज्जलत्वेनाऽम्लादिरसेऽपि तुल्यवद्धेतुत्वं स्यादत आह–**जम्बीररसादाविति ।** स्वसमवायिसंयोगेन जम्बीरगताम्लरसप्रतीतिस्तद्गतजले इत्यर्थः । शुष्केऽपि जम्बीरे अम्लप्रतीतेस्तत्राऽम्लरसस्याऽऽवश्यकत्वे तस्यैव तद्गतजले परम्परया प्रतीतिः, हरीतक्यां तु मधुररसाभावान्न हरीतकीगतमाधुर्यस्य जले प्रतीतिरिति भावः । कर्कटीभक्षणोत्तरं जलपाने तिक्तरसस्याऽनुभवातिक्तरसोऽपि जले स्यादिति तु न, जलपानात् पूर्वमपि कर्कट्यां तिक्तरसोपलब्धेः, कर्कटीभक्षणोत्तरं रसनाप्रवर्त्तिपित्तक्षोभे तदीयतिक्तोपलब्धेर्वैयर्थ्यसिद्धत्वाच्च । वस्तुतो निदाघपीतनिर्मलगङ्गाजलमाधुर्यस्याऽनुभवसिद्धस्याऽपलापासम्भवान्मधुर एवेति युक्तम् ।

एतेन हरीतक्यादौ न जलसंयोगेन माधुर्यमुत्पद्यते येन कल्पनागौरवम् , परन्तु हरीतक्यां कषायवन्मधुररसोऽपि स्वीक्रियते, तद्व्यञ्जकश्च जलसंयोगः, न तु तद्गतरसान्तरस्य फलबलात् । यदि च चित्ररूपवच्चित्ररसे मानाभावाद्गुणविरोधेन नीरसैव हरीतकी रसप्रतीतिस्तु अवयवेषु रससत्त्वात् परम्परयेत्युच्यते, तदाऽस्तु जलसंयोगो हरीतक्यवयवगतमाधुर्यस्यैव व्यञ्जक इत्यपास्तम् ।

रामरुद्री ।

क्यां मधुररसकल्पनं सिद्धान्ते जले मधुररसकल्पनस्थानीयमितिगौरवात्तत्प्रदर्शनमनुचितं, तथाऽपि प्रतिवादिना मन्मते कार्यकारणभावस्यैकस्याऽधिक्यं त्वन्मते जले मधुररसकल्पनस्थानीयमिति यद्युच्यते, तदा जलेऽस्माकं तत्कल्पनं भवतो हरीतक्यां मधुररसकल्पनस्थानीयं कार्यकारणभावकल्पनं त्वन्मतेऽधिकमेवेति सूचयितुं तत्कीर्तनमिति ध्येयम् । अम्लजनकतावच्छेदकपृथिवीत्वस्य जलेऽभावान्नाऽम्लादिमत्त्वं जलस्येति मूलोक्तं न सङ्गच्छते, शर्करादौ मधुरजनकतावच्छेदकत्वेनाऽपि पृथिवीत्वस्य कल्पितया तदभावाज्जले मधुररसस्याऽभावप्रसङ्गादित्याशङ्कते–**यद्यपीति । तत्र**–हरीतक्यां, **आवश्यकतया** इत्यस्याऽनुभवानुरोधेनेत्यादिः, **जलत्वेने**त्यस्य पृथिवीत्वेनेवेत्यादिः । ननु जम्बीरगतरसस्य जले भानं जलगतरसस्य जम्बीरे भानं वेत्यत्र विनिगमकं दुर्लभमित्याशङ्क्यायामाह—**शुष्केऽपीति ।** न चैवं हरीतकीगतमधुररसस्यैव जलेऽपि परम्परया भानस्वीकारेणैवोपपत्तौ जले मधुरो रसोऽपि न स्यादित्यत आह–**हरीतक्यामिति ।**

तद्व्यञ्जकश्चेति । हरीतकीमधुररसव्यञ्जकस्त्विवस्यर्थः । **रसान्तरस्य**–कषायरसस्य, **फलबलात्**–तत्प्रत्यक्षरूपकार्यबलादित्यर्थः । **मानाभावादिति ।** चित्ररसस्याऽप्रामाणिकत्वे तत्र चित्ररूप इवाऽवयवावयवगतनानारसानां हेतुत्वसम्भवेऽपि नीरसद्रव्यप्रत्यक्षे बाधकाभावेन चित्ररूपवच्चित्ररसानङ्गीकारे च तिविरहान्नानारसायवककद्रव्ये परस्परविरोधेन कस्याऽपि रसस्याऽनुत्पत्त्या नीरसैव हरीतकीति समुदायार्थः । न चैवं हरीतकीभक्षणे तस्यापि रसस्य प्रत्यक्षं न स्यात् , अनुभूयते च कषायरसः प्रत्यक्षमत आह–**रसप्रतीतिस्त्विति । परम्परया**–स्वाश्रयसमवेतत्वसम्बन्धेन । **अपास्तमिति ।** गङ्गाजले माधुर्यस्य प्रत्यक्षसिद्धत्वादिति भावः ।

स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम् ॥ ३९ ॥

एवं जन्यशीतस्पर्शजनकतावच्छेदकं जन्यजलत्वं तदवच्छिन्नजनकतावच्छेदकं जलत्वं बोध्यम् । घृष्टचन्दनादौ तु शैत्योपलब्धिश्चन्दनान्तर्वर्तिशीततरसलिलस्यैव । तेजःसंयोगाज्जले उष्णप्रतीतिरौपाधिकी स्फुटैव, तत्र पाकासम्भवात् ।

स्नेहस्तत्रेति । **घृतादावपि तदन्तर्वर्तिजलस्यैव स्नेहः,जलस्य स्नेहसमवायिकारणत्वात् , तेन जल एव स्नेह इति मन्तव्यम् ।**

द्रवत्वमिति । **सांसिद्धिकद्रवत्वत्वं जातिविशेषः प्रत्यक्षसिद्धः तदेवच्छिन्नजनकतावच्छेदकमपि तदेवेति भावः । तैलादावपि जलस्यैव द्रवत्वं,(१) स्नेहप्रकर्षेण च दहनानुकूल्यमिति वक्ष्यति ॥ ३९ ॥**

॥ इति जलनिरूपणे जललक्षणकथनम् ॥

दिनकरी ।

जलत्वजातावनुमानान्तरं प्रमाणमाह-**एवमिति** । ननु जलत्वाभावेऽपि घृष्टचन्दनादौ शैत्योत्पत्तेर्व्यभिचारेण कथं जन्यजलत्वेन तत्र हेतुत्वमत आह—**घृष्टेति** । पूर्वं 'शीत एव स्पर्शः' इत्युक्तं, तत् साधयति-**तेजःसंयोगादिति** । **तत्र**-जले । विवेचयिष्यति च पाकासम्भवमुपरिष्टात् ।

'घृतादौ' इत्यादिपदेन तैलपरिग्रहः । 'जलस्यैव स्नेहः'-इत्यनन्तरं स्वाश्रयसंयोगेन प्रतीयत इति शेषः । तेन-घृतादौ समवायेन स्नेहनिरासेन । **जल एवेति** । स्नेहस्याऽवान्तरविशेषाभावात् स नोत्कीर्तितः ।

तदवच्छिन्नजनकतावच्छेदकं - **सांसिद्धिकद्रवत्वावच्छिन्नजनकतावच्छेदकम्** । **तदेव**-जन्यजलत्वमेव । तदवच्छिन्नजनकतावच्छेदकं जलत्वमिति भावः । अथैवंरीत्या परमाणुव्यावृत्तमाद्यद्व्यणुकं जलत्वमेकं, परमाणुसाधारणं द्वितीयमिति जलत्वयोर्भेदे भेदाग्रहः कुतः ? इति चेत् , समनियतयोग्यव्यक्तिवृत्तित्वादिति । एवमग्रेऽपि । 'तैलादौ' इत्यादिपदेन क्षीरपरिग्रहः, न तु घृतस्य तत्र नैमित्तिकद्रवत्वस्य समवायेनैव सत्त्वात् । 'द्रवत्वं' इत्यनन्तरं स्वाश्रयसंयोगेन प्रतीयत इति शेषः । ननु तैले जलस्य सत्त्वे तैलस्य दहनानुकूल्यं न स्यात् , जलस्य दहनप्रतिकूलत्वादित्यत आह-**स्नेहप्रकर्षेणेति** । प्रकृष्टस्नेहस्य जलस्य दहनानुकूल्यमेव । अपकृष्टस्यैव तस्य दहनप्रतिकूलत्वादिति भावः । इति वक्ष्यतीति । स्नेहनिरूपणावसरे इति शेषः ॥ ३९ ॥ इति जलनिरूपणे जललक्षणकथनम् ॥

रामरुद्री ।

ननु **'घृतादावपि तदन्तर्गतजलस्यैव स्नेहः'** इति मूलमसङ्गतं, घृतादेः पार्थिवत्वेन तत्र जलीयस्नेहासम्भवादतः पूरयति-**जलस्यैवेत्यादि** ।

जन्यजलत्वमेवेति । जन्यजलमात्रवृत्तिजातिरेवेत्यर्थः । परमाणौ जलत्वसिद्ध्यर्थमाह-**तदवच्छिन्नेति** । जन्यजलत्वावच्छिन्नेत्यर्थः । **समनियतेति** । अयमेव दोषो जात्योर्भेदग्रहप्रतिबन्धक इति भावः । अग्र ऽपीति । तेजोनिष्ठजात्योरपि भेदग्रहे प्रतिबन्धकमिदमेवेति भावः ॥ ३९ ॥

॥ इति जलनिरूपणे जललक्षणकथनम् ॥

---

(१) अत एवाऽतितप्ततैलादौ जलबिन्दुप्रक्षेपे सद्य एव ज्वालाजटिलस्याऽग्नेरुद्भवः ।

नित्यतादि प्रथमवत्, किन्तु देहमयोनिजम् ।
इन्द्रियं रसनं सिन्धुर्हिमादिर्विषयो मतः ॥ ४० ॥

प्रथमवदिति । पृथिव्या इवेत्यर्थः । तथा हि—जलं द्विविधं नित्यमनित्यं च, परमाणुरूपं नित्यं, द्व्यणुकादि सर्वमनित्यमवयवसमवेतं च । अनित्यमपि त्रिविधं-शरीरेन्द्रियविषयभेदात् । पृथिवीतो यो विशेषस्तमाह-किन्त्विति । देहमयोनिजं—अयोनिजमेवेत्यर्थः । जलीयं शरीरमयोनिजं वरुणलोके प्रसिद्धम् । ॥ इति जलीयशरीरनिरूपणम् ॥

इन्द्रियमिति । जलीयमित्यर्थः । तथा हि-रसनं जलीयं, गन्धाद्यव्यञ्जकत्वे सति रसव्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकोदकवत् । रसनेन्द्रियसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम् । ॥ इति जलीयेन्द्रियनिरूपणम् ॥

विषयं दर्शयति-सिन्धुरिति । सिन्धुः-समुद्रः, हिमं-तुषारः, आदिपदात् सरित्कासारकरकादिः सर्वोऽपि ग्राह्यः । न च हिमकरकयोः कठिनत्वात् पार्थिवत्वमिति वाच्यम् । ऊष्मणा विलीनस्य तस्य जलत्वस्य प्रत्यक्षसिद्धत्वात्, यद्द्रव्यं यद्द्रव्यध्वंसजन्यमिति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः ।

दिनकरी ।

प्रथमवदिति । षष्ठीसमर्थाद्वतिरित्यभिप्रायेणाऽऽह-पृथिव्या इवेत्यर्थ इति । एवमग्रेऽपि । जलीयं शरीरमिति । तच्च पार्थिवावयवैरुपष्टब्धं बोध्यम् । तेन जलमात्रे हस्तपादादिव्यवस्थाया असम्भवेऽपि न क्षतिः । ननु तादृशशरीरे मानाभावोऽनुपलम्भादित्यत आह-वरुणलोक इति । तत्र च श्रुतिरेव प्रमाणमिति भावः । इति जलीयशरीरनिरूपणम् ।

गन्धेति । रसव्यञ्जके मनसि व्यभिचारवारणाय गन्धाद्यव्यञ्जकत्व इति ।

इति जलीयेन्द्रियनिरूपणम् ॥

कासारः—सरः, करकादिरित्यत्राऽऽदिपदात् कूपादिपरिग्रहः । कठिनत्वादिति । कठिनस्पर्शवत्त्वादित्यर्थः । विलीनस्य तस्येति सप्तम्यर्थे षष्ठी । क्व चित् 'विलीनयोः' इति पाठः । स तु ऋजुरेव, विलीनताया द्रवत्वरूपाया जलत्वव्यञ्जकत्वादिति भावः । ननु विलीनता नैमित्तिकद्रवत्वमेव, तदुक्तं ऊष्मणेति, तच्च न जलत्वव्यञ्जकम्, यदि च 'विलीने तस्मिन्' इत्यस्य तस्मिन् नष्टे सतीत्यर्थः, तथाऽपि करकादिनाशोत्तरं द्रव्यान्तरोत्पादात्तत्रैव द्रवत्वजलत्वयोः प्रत्यक्षं, न करकायां, नष्टत्वादत आह-यद्द्रव्यमिति । तथा च करकादिनाशोत्पन्नद्रव्यान्तरे जलत्वस्य प्रत्यक्षसिद्धत्वादुक्तव्याप्त्या करकादिषु जलत्वसिद्धिरिति भावः । ननु हिमकरकयोः पार्थिवत्वाभावे कथं काठिन्यप्रत्यय इत्यत आह—

रामरुद्री ।

षष्ठीसमर्थादिति । प्रथमाया इवेति षष्ठ्यन्ताद्वतिप्रत्यय इत्यभिप्रायेणेत्यर्थः । अग्रेऽपि—तेजोनिरूपणेऽपि । जलमात्रे—केवले जले ।

स त्विति । तादृशपाठस्त्वित्यर्थः । ऋजुः—स्पष्टार्थकः । इति जलीयशरीरनिरूपणम् ॥

तदुक्तं—नैमित्तिकद्रवत्वमुक्तम् । उष्मण एव निमित्तत्वप्रतिपादनादिति भावः । तच्च—नैमित्तिकद्रवत्वञ्च, सांसिद्धिकस्यैव तस्य जलत्वव्यञ्जकत्वादिति भावः । नष्टत्वादित्यस्य करकाया इत्यादिः । मूले—

उष्णः स्पर्शस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम् ।

अदृष्टविशेषेण द्रवत्वप्रतिरोधात् करकायां काठिन्यप्रत्ययस्य भ्रान्तित्वात् ॥ ४० ॥ इति जलीयविषयनिरूपणम् ॥ इति जलग्रन्थः ॥

तेजो निरूपयति उष्ण इति । **उष्णत्वं-स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धः । इत्थं च जन्योष्णस्पर्शसमवायिकारणतावच्छेदकं तेजस्त्वं जातिविशेषः, तस्य परमाणुवृत्तित्वं जलत्वस्येवाऽनुसन्धेयम् । न चोष्णस्पर्शवत्त्वं चन्द्रकिरणादावव्याप्तमिति वाच्यम् । तत्राऽप्युष्णस्पर्शस्य सत्त्वात्, किन्तु तदन्तःपातिजलस्पर्शेनाऽभिभवादग्रहः । एवं रत्नकिरणादौ च पार्थिवस्पर्शेनाऽभिभवात्, चक्षुरादौ चाऽनुद्भूतत्वादग्रहः ।**

रूपमित्यादि । **वैश्वानरे मरकतकिरणादौ च पार्थिवरूपेणाऽभिभवात्**

दिनकरी ।

अदृष्टविशेषेणेति । ॥ इति जलीयविषयनिरूपणम् ॥ इति जलग्रन्थः ॥

इत्थं चेति । उष्णत्वजातिसिद्धौ चेत्यर्थः । ननु कथं तर्हि जन्योष्णस्पर्शसमवायिकारणभिन्नेषु परमाणुषु तेजस्त्वजातिसिद्धिरित्यत आह—**तस्येति ।** तेजस्त्वस्येत्यर्थः । **जलत्वस्येति ।** यथा च जन्यजलत्वावच्छिन्नजनकतावच्छेदकतया जलपरमाणौ जलत्वजातिसिद्धिः, तथा जन्यतेजस्त्वावच्छिन्नजनजतावच्छेदकतया तेजःपरमाणावपि तेजस्त्वरूपजातिसिद्धिरित्यर्थः । इदमुपलक्षणम् । समवायेन विलक्षणनीलोत्पत्तित्वावच्छिन्नं प्रति समवायेन तेजःसंयोगत्वेन हेतुत्वात्तेजस्त्वजातिसिद्धिरित्यपि द्रष्टव्यम् । 'चन्द्रकिरणादौ' इत्यादिना रत्नकिरणादेः परिग्रहः । तत्राऽपि—**चन्द्रकिरणादावपि ।** ननु तत्रौष्ण्यप्रतीतिः कुतो नेत्यत आह—**किन्त्विति । तदन्तःपातिजलस्पर्शेनेति ।** चन्द्रकिरणान्तर्गतजलभाग (गत)शीतस्पर्शेनेत्यर्थः । ननु चक्षुरादिनिष्ठस्योष्णस्पर्शस्य केनाऽप्यनभिभूतत्वात्प्रत्यक्षापत्तिरत आह **चक्षुरादौ चेति ।** 'मरकतकिरणादौ' इत्यादिना सुवर्णपरिग्रहः ।

"स्याद्रूपं शुक्लभास्वरं', इति मूलम् । तत्र शुक्लेति स्वरूपकथनम्, भास्वररूपमात्रस्य लक्षणत्वेऽतिप्रसङ्गाभावात् । भास्वरत्वं-जातिविशेषः, स च तेजोरूपमात्रवृत्तिः, शुक्लत्वव्याप्यश्चेति । ननु रूपाविषयकद्रव्यप्रत्यक्षस्याऽभावाद्वैश्वानरादेश्चाक्षुषत्वानापत्तिरिति शङ्कते-

रामरुद्री ।

'अदृष्टविशेषेण' इत्यस्य दुरदृष्टबलेनेत्यर्थः (१)। **प्रतिरोधः**-अप्रत्यक्षं, तथा च प्रतिबन्धकबलात् द्रवत्वाग्रहे भ्रान्तिरूपैव काठिन्यप्रतीतिरिति भावः ॥ ४० ॥ इति जलीयविषयनिरूपणम् ॥ इति जलग्रन्थः ॥

विलक्षणेति । अवयवनीलाजन्येत्यर्थः । नीलेत्युपलक्षणं, पाकेन रक्तादेरप्युत्पत्तेः । अतिप्रसङ्गाभावमुपपादयति **भास्वरत्वमिति ।** ननु तेजोगतरूपाणामनेकविधत्वात् पीतत्व-शुक्लत्वादिना साङ्कर्याद्भास्वरत्वस्य जातित्वं न सम्भवतीत्याशङ्क्य निकाकरोति-**शुक्लत्वव्याप्यश्चेति ।** न च विद्युदादौ भास्वरपीतस्याऽप्यनुभवात् कथं शुक्लत्वं तस्येति वाच्यम् । तत्रत्यशुक्ल एव पीतत्वभ्रान्तेरेवोपगमादिति भावः । **रूपाविषयकेति ।** न च निर्विकल्पके प्राथमिके घट इति प्रत्यक्षे च रूपविषयकत्वाननुभवात् कथमेतदिति वाच्यम् । घटत्वे सन्निकर्षदशायां रूपादावपि सन्निकर्षस्याऽऽवश्यकतया घट-घटत्वयोरिव

---

(१) अग्रे काठिन्यभ्रमस्यैव तत्र भावितया भ्रमस्य चाऽविद्यात्वेन तस्य दुरदृष्टजन्यताया एवोचितत्वादिति भावः ।

नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत् ॥ ४१ ॥

शुक्लरूपाग्रहः(१) । अथ तद्रूपाग्रहे धर्मिणोऽपि चाक्षुषत्वं न स्यादिति चेन्न । अन्यदीयरूपेणैव धर्मिणो ग्रहसम्भवात् शङ्खस्येव पित्तपीतिम्ना । वह्नेस्तु शुक्लं रूपं नाऽभिभूतं; किन्तु तदीयं शुक्लत्वमभिभूतमित्यन्ये ।

नैमित्तिकमिति । **सुवर्णादिरूपे तेजसि तत्सत्त्वात् । न च नैमित्तिकद्रवत्व-वत्त्वं दहनादावव्याप्तं, घृतादावतिव्याप्तं चेति वाच्यम् । पृथिव्यवृत्ति-नैमि-त्तिकद्रवत्ववद्वृत्ति-द्रव्यत्वसाक्षाद्व्याप्य-जातिमत्त्वस्य विवक्षितत्वात् ।**

॥ इति तेजोनिरूपणे तेजोलक्षणकथनम् ॥

पूर्ववदिति । **जलस्येवेत्यर्थः । तथा हि—तद्द्विविधं, नित्यमनित्यं च, नित्यं परमाणुरूपं, तदन्यदनित्यमवयवि च । तच्च त्रिधा शरीरेन्द्रियविषयभेदात्। शरीरमयोनिजमेव, तच्च सूर्यलोकादौ प्रसिद्धम् ॥ ४१ ॥**

इति तैजसशरीरनिरूपणम् ॥

दिनकरी ।

तद्रूपाग्रह इति । वैश्वानरादेरचाक्षुषत्वे तद्गतसङ्ख्यादिगुणानामपि चाक्षुषत्वं न स्यादिति योग्यव्यक्तिमात्रवृत्तित्वाभावात्, इति 'अपि'ना सूचितम् । **अन्यदीयरूपेणैवेति** । पार्थिवरूपेणैवेत्यर्थः । मतान्तरमाह—**वह्नेस्त्विति । सुवर्णादिरूपे तेजसि तत्सत्त्वादिति** । तेन नाऽसम्भव इति भावः ।

पृथिव्यवृत्तीति । नैमित्तिकद्रवत्ववद्वृत्तिपृथिवीत्वरूपजातिमादाय पृथिव्यामति-व्याप्तिवारणाय पृथिव्यवृत्तीति । पृथिव्यवृत्तिजलत्वजातिमादाय जले, पृथिव्यवृत्तिवायुत्वा-दिकमादाय वायावतिव्याप्तिवारणाय नैमित्तिकद्रवत्ववद्वृत्तीति । वायुतेजोन्यतरत्वमादाय वायावतिव्याप्तिवारणाय जातीति ॥ ४१ ॥ इति तेजोनिरूपणे तेजोलक्षणकथनम् ॥

रामरुद्री ।

रूप-रूपत्वयोरपि समूहालम्बननिर्विकल्पस्य प्राथमिकविशिष्टप्रत्यक्षस्याऽपि रूपत्वविशिष्टवैशिष्ट्यानवगा-हिनो रूपविषयकत्वस्यैव स्वीकरणीयत्वादिति भावः । **सूचित**मित्यस्य **वैश्वानरा**देरित्यादिपदेनेति शेषः । **पार्थिवेति** । पाकजपार्थिवरूपेणेत्यर्थः । तस्यैव पाकजत्वात् वैश्वानरे यादृशरूपप्रतीतिस्तादृशं रूपं न काष्ठादिरूपपृथिव्यां पूर्वमनुभूतमतः **पाकजत्वं** प्रदर्शितमि ध्येयम् ।

ननु सुवर्णरूपतेजसि नैमित्तिकद्रवत्वसत्त्वं मूले प्रदर्शितं, तच्चाऽनर्थकमेव, तावताऽप्यव्याप्तेरपरि हारादित्याशङ्क्यायामाह—**तेनेति** । तत्कथनेनेत्यर्थः, तथा च तद्ग्रन्थस्याऽसम्भवपरिहारकत्वमेव, अव्या-प्तिपरिहारस्तु उत्तरग्रन्थेनैव करणीय इति भावः । **पृथिव्यवृत्तीति** । अत्र जातिपदस्य द्रव्यत्वसा-क्षाद्व्याप्यजातिपरत्वेऽपि न निस्तार इति सूचनायैव **द्रव्यत्वसाक्षाद्व्याप्येत्युक्तम्** । जलत्वेत्युपल-क्षणं, वायुत्वादिकमादाय वाय्वादावप्यतिव्याप्तिसम्भवादिति द्रष्टव्यम् ॥ ४१ ॥

इति तेजोनिरूपणे तेजोलक्षणकथनम् ॥

---

(१) काष्ठादिसन्निकर्षेणैव भौमतेजस उपलम्भात् काष्ठादिगतस्यैव रक्तरूपस्य तत्रो-पलब्धिः । कथमन्यथा दिव्ये सौरविद्युदादौ तेजसि श्वेत्योपलम्भः ? अविन्धनत्वात्तोयरूपं तत्र सङ्क्रान्तामति चेन्न । तोयरूपस्येतरानभिभावकत्वादित्युक्तत्वात् । न हि जलमिश्रिता-नि नीलीद्रव्याणि श्वेतन्ते जातु चिदपीति बोध्यम् ।

इन्द्रियं नयनं वन्हिः स्वर्णादिर्विषयो मतः ।

अत्र यो विशेषस्तमाह-इन्द्रियमिति। **ननु चक्षुषस्तैजसत्वे किं मानमिति चेत्, चक्षुस्तैजस परकीयस्पर्शाद्यव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात् प्रदीपवत्, प्रदीपस्य स्वीयस्पर्शव्यञ्जकत्वादत्र दृष्टान्तेऽव्याप्तिवारणाय प्रथमं परकीयेति। घटादेः स्वीयरूपव्यञ्जकत्वाद्व्यभिचारवारणाय द्वितीयं**

दिनकरी।

परकीयस्पर्शादीति। गन्धाव्यञ्जकत्वादिघटितहेत्वन्तरसूचनायाऽऽदिपदेन गन्धादिपरिग्रहः। चक्षुषः परकीयरूपादिव्यञ्जकत्वादसिद्धिवारणाय स्पर्शपदम्।

अत्र के चिदाहुः-चक्षुर्विषयासम्बद्धमेव ग्राहकं, यदि प्राप्य प्रकाशकारि स्यात् तदा रसनादिवदधिष्ठानसम्बद्धं गृह्णीयात्, न चैवं, गोलकासम्बद्धग्रहणात्॥ किञ्च यदि चक्षुः प्राप्य गृह्णीयात्तर्हि स्वतोऽधिकपरिमाणवन्न गृह्णीयात्, न खलु नखरञ्जनिका परशुच्छेद्यं छिनत्तीति, शाखाचन्द्रमसोस्तुल्यकालग्रहणानापत्तिश्च, गतिक्रमेण प्राप्य ग्रहणे हि सन्निहितक्रमेण ग्रहणं स्यात् न तु तुल्यकालमुपलम्भः, अनुभवति तून्मीलयत्येव नयने शाखां, शीतमयूखं च। एवं च प्राप्यकारित्वानुरोधेन गोलकातिरिक्तं चक्षुः परैरङ्गीक्रियते, गोलकस्य चन्द्रादिप्राप्त्यसम्भवात्। अप्राप्यकारित्वे च गोलकमेव चक्षुः, तच्च न तैजसमिति।

रामरुद्री।

स्पर्शपदमिति। परकीयपदमपि स्वीयस्पर्शव्यञ्जकदीपे दृष्टान्तासिद्धिवारणाय। उक्तरीत्या परकीयरूपव्यञ्जकजले व्यभिचारवारणाय हेतौ सत्यन्तम्। गगनादौ तद्वारणाय विशेष्यदलम्। घटादौ स्वीयरूपव्यञ्जके तद्वारणाय तत्राऽपि **परकीयेति**। चक्षुःसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वे सतीत्यपि पूरणीयम्। एतत्सर्वं मूलोक्तत्वादुपेक्षितमिति बोध्यम्।

गोलकमेव चक्षुर्न तैजसमित्युच्छङ्कलमतं दर्शयति—**अत्र के चिदित्यादिना। विषयासम्बद्धं**-विषयसन्निकर्षरहितम्। **'एव'** कारेण सन्निकृष्टग्राहकत्वं व्यवच्छिद्यते, गोलकसंयुक्तस्य चक्षुषाऽग्रहणात्, **अत्र चक्षुः**पदं चक्षुरिन्द्रियत्वेनाऽभिमतपरं, तेन तेजोरूपचक्षुषः स्वमतेऽसत्त्वेऽपि न पक्षाप्रसिद्धिः, न वा पार्थिवगोलकस्य च सन्निकृष्टग्राहकतायाः केनाऽप्यङ्गीकारेण यदीत्याद्युत्तरग्रन्थानुत्थितिरिति ध्येयम्। अत्र चोत्तरग्रन्थानुसारादधिष्ठानासम्बद्धग्राहकत्वादिति हेतुरूहनीयः। परं त्वाभिमुख्यमव्यवधानं च ग्रहणे प्रयोजकमित्येवन्मतेऽवश्यमङ्गीकरणीयम्, अन्यथा पृष्ठदेशस्थितानां व्यवहितानां च चाक्षुषापत्तिवारणासम्भवात्, सिद्धान्तिभिस्तु चक्षुःसंयोगाभावेनैव तद्वारणसम्भवान्न तेषामेतत्कल्पनीयं, दूरस्थत्वस्य प्रतिबन्धकताकल्पनं तूभयमतेऽपि समानमिति बोध्यम्। ननूक्तहेतुरप्रयोजक इत्याशङ्कानिरासाय साध्याभावे हेतुरेव नास्यादिति हेतूच्छित्त्यापत्तिरूपमनुकूलतर्कं प्रदर्शयति—**यदीत्यादिना। प्राप्यप्रकाशकारिसन्निकृष्टग्राहि। न चैवमिति** च्छेदः। गोलकसम्बद्धमात्रग्राहकं न चेति तदर्थः। **ग्रहणादित्यन्तस्य** चक्षुषेत्यादिः। अत्र प्रदीपप्रभायां वक्ष्यमाणव्यभिचारूपारुचिं परिचिन्त्य स्वाधिकपरिमाणवद्द्रव्यग्राहकत्वेनाऽपि चक्षुष्युक्तसाध्यसिद्धिः सम्भवतीत्याह—**किञ्चेति। यद्यत्संयुक्तमेव यत्सम्बन्धिफलजनकं तत्तदपेक्षया** नाऽत्यन्तन्यूनपरिमाणवदिति सामान्यमुखव्याप्त्यभिप्रायेण दृष्टान्तमाह—**न खल्विति। नखरञ्जनिका**-नखकृन्तनी। तथा चैतद्व्याप्त्यनङ्गीकारे नखरञ्जनिकाऽपि परशुभेद्यं महादार्वपि च्छिन्द्यात्। अत्र च स्वाधिकपरिमाणदारोरपि परशुभेद्यत्वदर्शनादात्यन्तिकन्यूनताया निर्वक्तुमशक्यत्वाच्चेत्यस्वरसाद्धेत्वन्तरमाह—**शाखेति**। तथा च शाखाचन्द्रमसोरेककालीनचाक्षुषजनकत्वेनाऽपि चक्षुषि असन्निकृष्टग्राहकत्वमापादयितुं शक्यमिति भावः। उपसंहरति **एवं चेति**। चक्षुषः असन्निकृष्टग्राहकत्वे चेत्यर्थः। नन्विष्टापत्तिरित्याशङ्क्यायाह—**तच्चेति**। तथा च **'इन्द्रिय नयनं'** इति कारिकाविरोधापत्तेर्नेष्टापत्तेः सम्भव इति भावः।

परकीयेति।

अथ वा प्रभाया दृष्टान्तत्वसम्भवादाद्यं परकीयेति न देयम्। चक्षुःसन्निकर्षे व्यभिचारवारणाय द्रव्यत्वं देयम्। ॥ इति तैजसेन्द्रियनिरूपणम् ॥

विषयं दर्शयति–वन्हिरिति। **ननु सुवर्णस्य तैजसत्वे किं मानमिति चेन्न।**

दिनकरी।

तदसत्। अधिष्ठानासम्बद्धार्थग्राहिण्याः प्रदीपप्रभाया इव चक्षुषोऽपि प्राप्यकारित्वसम्भवात्, पृथुतरग्रहणस्य च गोलकनिर्गतस्य महतश्चक्षुषः पृथ्वग्रत्वेन प्रदीपप्रभाया इवोपपत्तेः। स्वाधिकपरिमाणवद्द्रव्यग्राहिणा त्वगिन्द्रियेण व्यभिचारात् तादृशनियमे मानाभावाच्च। तुल्यकालग्रहणं चाऽसिद्धमेव, तदभिमानस्य कालसन्निकर्षेणैवोपपत्तेः, अचिन्त्यो हि तेजसो लाघ्वातिशयेन वेगातिशयः, यत् प्राचीनाचलचूडावलम्बिन्येव भगवति मयूखमालिनि भवनोदरेष्वालोक इत्यभिमानो लोकानाम् (१)।

यत्त्वाहुः शालिकाचार्याः, चक्षुर्बाह्यालोकाभ्यामारब्धेन चक्षुषा तावदर्थसंस्पृष्टेन युगपत्तावदर्थग्रहणमिति शाखाचन्द्रमसोस्तुल्यकालग्रहणमुपपद्यत एवेति ॥

तन्न। चक्षुर्बाह्यालोकाभ्यामारब्धस्य चक्षुषः पृष्टभागेऽपि सत्त्वात् पृष्टभागस्थितपदार्थग्रहणापत्तेः। पृष्ठदेशस्थबाह्यालोकैश्चक्षुरुत्पादे मानाभाव इति चेत्, अग्रदेशस्थबाह्यालोकैरपि तदुत्पादे मानाभावः, तदनभ्युपगमेऽपि चाक्षुषोपपादनस्याऽनुपदमुक्तत्वादिति। लाघवादाह–**अथ वेति**। ॥ इति तैजसेन्द्रियनिरूपणम् ॥

तैजसत्वे किं मानमिति। सुवर्णं पार्थिवं नैमित्तिकद्रवत्ववत्त्वादित्यनुमानस्य पार्थिवरामरुद्री।

अधिष्ठानासम्बद्धेति। तथा चोक्तनियमो दीपरूपाधिष्ठानासम्बद्धघटादिग्राहिण्यां दीपप्रभायां व्यभिचरित इति भावः। **तदभिमानस्य**—एककालीनत्वभ्रमस्य। **कालसन्निकर्षेण**–अतिसन्निहितकालवृत्तित्वेन। ननु शाखातश्चन्द्रमसोऽतिदूरत्वेन झटिति चन्द्रच्छक्षुःसंयोगासम्भवात् शाखाचन्द्रमसोश्चाक्षुषयोरत्यन्तसान्निध्यमेव न सम्भवति, येन तुल्यकालताभ्रान्तिः स्यादित्याह–**अचिन्त्यो हीति**। निर्वक्तुमशक्य इत्यर्थः। **लाघवातिशयेन**–वेगजनकक्रियातिशयेनेत्यर्थः। गुरुत्वाभावरूपलाघवस्य वाय्वायपेक्षयाऽतिशयासम्भवादिति मन्तव्यम्। यत्–यस्मात्, **प्राचीनाचलः**–उदयगिरिः, **चूडा**—अग्रं, शिखरमिति यावत्। **मयूखमालिनि**–सूर्ये। **अभिमानः**–भ्रमः। उदयाचलारोहणग्रहणं किरणप्रसारयोर्वस्तुगत्यैककालीनत्वाभावादिति भावः। वस्तुतस्तु चक्षुरिन्द्रियस्य तैजसत्वसाधकानुमानस्य पूर्वमुक्ततया तत एव गोलकस्य चक्षुरिन्द्रियत्वं न शङ्कास्पदमपि, न हि सिद्धान्तिभिः प्राप्यकारित्वानुरोधेन चक्षुषस्तथात्वमङ्गीक्रियते, अन्यथा रसनेन्द्रियादीनामधिष्ठानातिरिक्तत्वं कथं सिद्ध्येत्? यद्यपि घ्राणेन्द्रियस्य पार्थिवत्वादधिष्ठानातिरिक्तत्वे न किञ्चिदपि मानं, तथाऽपि नासिकासत्त्वेऽपि केषांचिद्बन्धानुपलब्धिदर्शनात् घ्राणादीन्द्रियम् अतीन्द्रियम् अतीन्द्रियत्वात् मनोवदित्यनुमानाच्च तत्सिद्धिरिति ध्येयम्।

बाह्यालोकोऽत्र न सौरालोकादिपरमाण्वादिः, तदारब्धस्य प्रत्यक्षत्वापातात्, किन्त्वनुद्भूतरूपवत्तेज एवेति मन्तव्यम्। **लाघवादित्यस्य** परकीयत्वाप्रवेशेनेत्यादिः ॥ इति तैजसेन्द्रियनिरूपणम् ॥

---

(१) ननु तथाऽपि कथं काचाभ्रपटलान्तरितोपलब्धिः, कुड्यादिव्यवहितस्य राजदारादेरदर्शनप्रयोजकस्य चक्षुःसंयोगाभावरूपकारणाभावस्याऽवश्यकल्पनीयतया चक्षुषस्तावत्पर्यन्तगमनाभावसम्पादनाय कुड्यादिस्पर्शवद्द्रव्यमात्रस्य तत्प्रवेशप्रतिबन्धकताया आवश्यकत्वात् काचादिष्वपि चक्षुःप्रवेशासम्भवादिति चेन्न। स्वच्छद्रव्याणां तेजोऽप्रतिबन्धकत्वात्, अन्यथा कथं सूर्यरश्मीनां तत्र प्रवेश इति।

सुवर्णं तैजसम् असति प्रतिबन्धकेऽत्यन्तानलसंयोगेऽप्यनुच्छिद्यमान(जन्य) द्रवत्वा (धिकरणत्वा) त्, यन्नैवं तन्नैवं, यथा पृथिवीति। न चाऽप्रयोजकं, पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्य चाऽत्यन्ताग्निसंयोगनाश्यत्वात्।

दिनकरी।

वत्वसाधकस्यैव सत्त्वात्। समाधत्ते–**नेति। सुवर्णमिति।** न चाऽत्र पीतरूपवद्द्रव्यात्मकस्य सुवर्णस्य पक्षत्वे बाधः, तैजससुवर्णस्य चाऽनुमानात् पूर्वमसिद्धया पक्षाप्रसिद्धिः, धर्मशास्त्रे पीतद्रव्येऽपि सुवर्णपदप्रयोगेन तस्याऽपि सुवर्णपदवाच्यतया सुवर्णपदवाच्यत्वस्य पक्षतावच्छेदकत्वे बाधतादवस्थ्यमिति वाच्यम्। अत्यन्तानलसंयोगे सत्यनुच्छिद्यमानद्रवत्वाधिकरणत्वस्यैव पक्षतावच्छेदकत्वात्, अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यतया पक्षतावच्छेदकहेत्वभेदप्रयुक्तस्य सामानाधिकरण्येन सिद्धसाधनस्याऽदोषत्वात्। **असति प्रतिबन्धक इति।** जलमध्यस्थघृतादौ व्यभिचारवारणाय असति प्रतिबन्धक इति। अग्निसंयोगानाश्यद्रवत्ववति घृतादौ व्यभिचारवारणाय संयोगे सतीत्यन्तम्। तादृशद्रवत्वस्य स्वसमानाधिकरणात्यन्ताग्निसंयोगासमानकालीनत्वान्न व्यभिचारः। **'अनुच्छिद्यमानद्रवत्वात्' इत्यस्याऽनुच्छिद्यमानद्रवत्वाधिकरणत्वादित्यर्थः, न तूच्छिद्यमानद्रवत्वानधिकरणत्वादिति, गगनादौ व्यभिचारात्। अग्निसंयोगनाश्यत्वादिति।** एतच्चोपलक्षणम्। **"अग्नेरपत्यं प्रथमं हिरण्यं–"**इत्याद्यागमान्यथानुपपत्तेरप्यनुकूलतर्कत्वादिति। तेनाऽऽश्रयनाश-

रामरुद्री।

पीतरूपवदिति। उपष्टम्भकपार्थिवभागस्येत्यर्थः। **धर्मशास्त्र इति।** 'तोलकपरिमितं सुवर्णं दद्यात्' इत्यादिरूप इत्यर्थः। **तादवस्थ्यादिति।** अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यतया सामानाधिकरण्येन बाधप्रसङ्गादिति भावः। सामानाधिकरण्येन साध्यसिद्धावपि सुवर्णस्य तैजसविषयत्वसम्भवेन सामानाधिकरण्येन साध्यसिद्धौ सामानाधिकरण्येन बाधस्याऽदोषतया सुवर्णपदवाच्यत्वस्य पक्षतावच्छेदकत्वेऽपि न क्षतिः। शोभनो वर्णो यस्येति व्युत्पत्त्या सुवर्णपदबोध्यो दीपादिरपीति न सुवर्णस्य तेजोविषयत्वसिद्धिरिति नाऽऽशङ्कनीयं, तथा व्युत्पत्तौ तस्य वाचकत्वेन शक्यतारूपवाच्यत्वाप्रसिद्धेरिति तु विभावनीयम्। **सामानाधिकरण्येन सिद्धसाधनस्येति।** यद्यप्युक्तहेत्वधिकरणे अनुमानात्पूर्वं काऽपि साध्यानिश्चयेन व्यतिरेकव्याप्तिज्ञानादेवाऽनुमितिरुपगन्तव्या, व्यतिरेकव्याप्तौ च न साध्यसाधनयोः सामानाधिकरण्यं घटकमिति न सिद्धसाधनशङ्कावसरः, तथाऽपि रजतादौ व्यतिरेकेण सामानाधिकरण्येन अनुमित्युत्तरमन्वयव्याप्तिज्ञानस्याऽपि सम्भवात्तदुत्तरं तेनैव रूपेण सुवर्णस्थलेऽनुमितिरन्वयव्याप्तिज्ञानेनाऽपि सम्भवतीत्यभिप्रायेणैतदभिहितमिति ध्येयम्। **अग्निसंयोगानाश्येत्यस्य** अग्निसमवधानाभावेनेत्यादिः। तेन घृतद्रवत्वसामान्यस्यैव अग्निसंयोगनाश्यतावच्छेदकाक्रान्ततया तादृशघृतस्याऽप्रसिद्धावपि अग्नेरसमवधानेन अग्निसंयोगजन्यनाशाप्रतियोगिद्रवत्ववतो घृतस्य प्रसिद्धया न क्षतिः। **स्वसमानाधिकरणेति।** गुणकर्मान्यत्वे सति सत्त्वादित्यादौ सतिसप्तम्याः सामानाधिकरण्यार्थकतायाः, गोषु दुह्यमानासु गत इत्यादौ तस्याः समानकालीनत्वार्थकतायाश्च क्लृप्तत्वादिति भावः। अनुच्छिद्यमानद्रवत्वस्य स्वसमवायिसंयोगरूपपरम्परया गगनादिसामानाधिकरण्येन व्यभिचारित्वापत्त्या समवायेन तस्य हेतुतालाभायाऽधिकरणत्वांशं पूरयित्वा व्याचष्टे—**अनुच्छिद्यमानेत्यादि।** द्रवपदस्य गुणपरतायां अपि सम्भवेन उच्छिद्यमानो द्रवो यस्य स उच्छिद्यमानद्रवः, नोच्छिद्यमानद्रवोऽनुच्छिद्यमानद्रवः, तस्य भावस्तत्त्वमिति व्युत्पत्तिलभ्यार्थकतां तत्पदस्य निराकरोति–**न त्विति। 'अनधिकरणत्वात्'** इत्यस्य पूर्वतनेन **'इत्यर्थः'** इत्यनेनाऽन्वयः। **अनुकूलतर्कत्वात्**–सुवर्णं यदि तैजसं न स्यात्तर्ह्येतदागमप्रतिपाद्यान्यपत्यत्ववन्न स्यादिति तर्कस्य सत्त्वात्। स्वसमवायिकारणसमवायिकारणकमपत्यशब्दार्थः, जन्यमात्रं न तदर्थः,

ननु पीतिमगुरुत्वाश्रयस्याऽपि तदानीं द्रुतत्वात्तेन व्यभिचार इति चेन्न। जलमध्यस्थमसीक्षोदवत् तस्याऽद्रुतत्वात्।

अपरे तु पीतिमाश्रयस्याऽत्यन्ताग्निसंयोगेऽपि पूर्वरूपापरावृत्तिदर्शनात् तत्प्रतिबन्धकं विजातीयद्रवद्रव्यं कल्प्यते। तथा हि–अत्यन्ताग्निसंयोगे (१) पीतिमगुरुत्वाश्रयः विजातीयरूपप्रतिबन्धकद्रवद्रव्यसंयुक्तः अत्यन्ताग्निसंयोगे सत्यपि पूर्वरूपविजातीयरूपानधिकरणवार्थिवत्वात् जलमध्यस्थपी-

दिनकरी।

जन्यद्रवत्वनाशे व्यभिचारवारणाय द्रवत्वे आश्रयनाशनाश्यद्रवत्वव्यावृत्तं जातिविशेषं कल्पयित्वा विजातीयद्रवत्वनाशं प्रत्यग्निसंयोगत्वेन हेतुता स्वीकार्या, तच्च वैजात्यं सुवर्णद्रवत्वव्यावृत्तमपीति दर्शितानुकूलतर्कोऽसङ्गतः, सुवर्णस्य पृथिवीत्वेऽपि तदीयद्रवत्वस्याऽग्निसंयोगनाश्यतावच्छेदकानाक्रान्ततया अत्यन्ताग्निसंयोगसत्त्वेऽपि नाशापत्तेरसम्भवादित्यपि परास्तम्। क्षोदः–**चूर्णम्**। तस्य–पीतिमगुरुत्वाश्रयस्य।

प्रकारान्तरेण तस्य तैजसत्वं साधयतां मतमुपन्यस्यति–**अपरे त्वित्यादिना**। तत्प्रतिबन्धकं—**रूपपरावृत्तिप्रतिबन्धकम्**। अग्निसंयोगस्य तैजससुवर्णेऽपि सत्त्वादुक्तं **पीतिमेति**। साध्ये विजातीयपदमुद्देश्यसिद्ध्यर्थम्। हेतौ सत्यन्तमग्निसंयोगरहिते पूर्वरूपविजातीयरूपानाधारे घटे व्यभिचारवारणाय। अत्र हेतौ पृथिवीत्वं देयं, तेन जलपरमाणौ न व्यभिचारः। यथाकथञ्चिदग्निसंयुक्ते घटे तद्वारणायाऽत्यन्तेति। न चाऽप्रयोजकत्वं, विरोधिद्रवद्रव्यसम्बन्धं विना पार्थिवाग्निसंयोगस्य पूर्वरूपविजातीयरूपजनकत्वादिति भावः।

रामरुद्री।

तथा सति तस्य कालाकाशादृष्टादेरप्यत्वप्रसङ्गादिति भावः। **जातिविशेषमिति**। अन्यथा अवयवनाशजन्यत्वस्य(२) गुरुशरीरस्य जन्यतावच्छेदककोटिप्रवेशेन गौरवापत्तेरिति हृदयम्। **इत्यपि परास्तमित्यपिना** तादृशागमस्य शब्दविधयाऽपि सुवर्णस्य जैजसत्वे प्रमाणता सूचिता। **क्षोद इति**। यद्यपि पार्थिवभागस्य तदानीं द्रवत्वाङ्गीकारेऽपि तेजोरूपद्रवद्रव्यान्तरस्य प्रतिबन्धकस्य सत्त्वान्न व्यभिचार इति शक्यते वक्तुं, तथाऽपि पार्थिवद्रवत्वनाशप्रतिबन्धकत्वेन जलस्यैव कल्प्यतया नैमित्तिकद्रवत्ववतस्तेजसोऽनुमानात्पूर्वमसिद्धतया न तत्प्रतिबन्धकसत्तामादाय व्यभिचारवारणसम्भवः, पार्थिवद्रवत्वनाशप्रतिबन्धकत्वेन द्रव्यान्तरकल्पनं तु **'परे तु–'** इत्यादिना वक्ष्यमाणं मतान्तरमेवाऽनुसरतीति भावः। **तैजससुवर्णेऽपीति**। तत्र वक्ष्यमाणपृथिवीत्वघटितहेतोरभावेन अवच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यतया भागासिद्धिप्रसङ्गादिति भावः। अत एव अग्निसंयोगशून्यपीतपार्थिवे साध्यस्य विजातीयद्रवद्रव्यसंयोगस्य, हेतोश्च स्वसमानाधिकरणाग्निसंयोगकालीनपूर्वरूपविजातीयरूपानाधारत्वस्य चाऽसत्त्वेन बाधासिद्ध्योर्वारणाय–**अग्निसंयोगीति** सार्थकम्। अत्र च यत्किञ्चित्पीतपटादौ साध्यस्योभयवादिसिद्धतया सामानाधिकरण्येन साध्यतायां सिद्धसाधनापत्त्याऽवच्छेदकावच्छेदेनैव साध्यसिद्धिरुद्देश्येति बोध्यम्। **तेन जलपरमाणाविति**। यद्यपि पूर्वहेतावपि जलपरमाणौ व्यभिचारस्तदवस्थ एव, तत्राऽपि पृथिवीत्वस्य हेतुविशेषणत्वे हेत्वप्रसिद्धिरेव पृथिव्यामग्निसंयोगानाश्यद्रवत्वाभावात्, तथाऽपि तत्र **द्रवत्वपदस्य** नैमित्तिकद्रवत्वार्थकत्वोपगमान्न व्यभिचार इति विभावनीयम्। **विरोधीति**। विजातीयरूपप्रतिबन्धकेत्यर्थः। **द्रव-**

---

(१) 'अत्यन्ताग्निसंयोगी' इत्येव पाठः। रामरुद्र्यां तथैवोल्लेखात्।

(२) 'आश्रयनाशजन्यत्वस्य' इति पाठः।

तपटवत्। तस्य च पृथिवीजलभिन्नस्य तेजस्त्वनियमात्।
॥ इति तैजसविषयनिरूपणम् ॥ इति तेजोग्रन्थः ॥

दिनकरी।

न च द्रवद्रव्यादन्यदेव प्रतिबन्धकं वाच्यम्। अदृष्टकल्पनापत्तेरिति-**तस्य चेति**। **तस्य**-द्रवद्रव्यस्य। **पृथिवीजलभिन्नस्येति**। पृथिव्याः पक्षीकृतपीतिमाश्रयाया विजातीयत्वाभावाज्जलस्य तत्राऽसम्भवादिति भावः। **तेजस्त्वनियमादिति**। वाय्वादौ रूपाभावादिति भावः। न चाऽन्धकारे पीतिमरूपाश्रयद्रव्यग्रहापत्तिः, सुवर्णरूपालोकसंयोगसत्त्वादिति वाच्यम्। ऊद्भूतानभिभूतरूपालोकसंयोगस्यैव द्रव्यप्रत्यक्षे हेतुत्वात् सुवर्णरूपस्य त्वभिभूतत्वात्। न च तदानीं पीतरूपस्याऽप्यग्रहात् सजातीयग्रहणकृतमग्रहणं, न तु सुवर्णरूपस्याऽभिभूतत्वेनेति न तस्याऽभिभूतत्वमिति वाच्यम्। लघुतया सजातीयसम्बन्धस्यैवाऽभिभवपदार्थत्वात्। न च तथाऽप्यन्धकारे सुवर्णस्य साक्षात्कारापत्तिः (१), तेजोभिन्नद्रव्यप्रत्यक्षं प्रत्येवाऽऽलोकसंयोगस्य हेतुत्वादिति वाच्यम्। सुवर्णभिन्नं यत्तेजः तद्भिन्नद्रव्यप्रत्यक्षं प्रत्येव तस्य हेतुत्वात्।

नवीनास्तु-सुवर्णं वार्थिवमेव, पीतं सुवर्णं द्रुतमिति साक्षात्सम्बन्धेन द्रवत्वप्रतीतेर्भ्रमत्वायोगात्, द्रुतं द्रुततरमिति प्रतीतेर्द्रवत्वस्याऽप्यत्यन्तोच्छेदात्, पृथिवीत्वस्य पीतरूपसमवायिकारणतावच्छेदकत्वात्, रूपनाशे तादात्म्येन स्वर्णस्य विरोधित्वाच्च न पीतरूपनाश इति वदन्ति ॥ इति तैजसविषयनिरूपणम् ॥ इति तेजोग्रन्थः ॥

रामरुद्री।

द्रव्यादन्यत्—अदृष्टादिकमित्यर्थः। **तत्राऽसम्भवादिति**। सांसिद्धिकद्रवत्वस्य तत्राऽननुभवादिति भावः। **वाय्वादाविति**। यद्यपि तेजसोऽपि न तत्र रूपं प्रत्यक्षमिति रूपाभावो न वायौ प्रतिबन्धकत्वकल्पने (२) बीजं, तथाऽपि पार्थिवरूपनाशे नीरूपद्रव्यसंयोगस्य प्रतिबन्धकत्वे क्वाऽपि पार्थिवरूपनाशः पाकेन न स्यात्, तस्य सर्वदैव सम्भवा (३) दिति रूपवतो द्रव्यान्तरस्यैव तथात्वमङ्गीकरणीयमित्यभिप्रायेणैतदभिहितमित्यवधेयम्। **तदानीमिति**। अन्धकारस्थितिदशायामित्यर्थः। **सजातीयग्रहणकृतमिति**। रूपत्वेन स्वसजातीयं यत्पीतरूपं, **तत्प्रत्यक्षप्रयोज्यं अग्रहणं**-प्रत्यक्षविषयत्वाभाव इत्यर्थः। **तेजोभिन्नेति**। स्वस्मिन्स्वप्रतियोगिकसंयोगानङ्गीकारेण तेजोऽन्तरासंयुक्ततेजःप्रत्यक्षानुपपत्त्या तथैव कार्यकारणभावस्य स्वीकरणीयत्वादिति भावः। यद्यपि तेजःसंयुक्तसंयोगत्वेन हेतुत्वे नेयमनुपपत्तिः, तेजस्यपि तत्सत्त्वात्, तथाऽपि लाघवात्संयोगसम्बन्धेन तेजस एव द्रव्यप्रत्यक्षहेतुतायाः स्वीकरणीयतया स्वस्मिन्संयोगेन स्वस्याऽसत्त्वात्तेजोभिन्नत्वं द्रव्यविशेषणमावश्यकमिति भावः।

द्रुतमिति। इदं च जलमध्यस्थमसीद्रोदन्यायेन पीतद्रव्यस्य अद्रवत्वाङ्गीकारस्य ग्रन्थकृत्सम्मतत्वात्तदभिप्रायेणोक्तम्। **द्रवत्वस्याऽपीत्यपिकार उच्छेदादित्यनन्तरं** योजनीयः, तथा च जले द्रवत्वसत्वेऽपि तदीयद्रवत्वस्य पार्थिवद्रवत्वापेक्षयाऽतिविलक्षणत्वात्सांसिद्धिकत्वाच्च न जलमित्यर्थः। पीतरूपवत्त्वाच्च न पृथिव्यन्य दित्याह-**पृथिवीत्वस्येति**। ननु तर्ह्यग्निसंयोगे कुतो न रूपनाश इत्यत **आह-रूपनाश इत्यादि**। **वदन्ती**त्यस्वरसूचनाय। स च पार्थिवस्याऽपि तदानीं द्रवत्वाङ्गीकारसम्भवेन प्रतीतेः प्रामाण्यसम्भवात्, द्रव्यान्तरसंयोगस्यैव अन्यत्र पार्थिवरूपद्रवत्वनाशप्रतिबन्धकत्वेन कल्पिततया तत्रैव तादात्म्येन स्वस्य तदुभयनाशप्रतिबन्धकताकल्पनेऽन्यत्राऽदृष्टकल्पनापत्तेः, ग्रन्थकृता पार्थिवस्य द्रवत्वानङ्गीकारेण तदीयद्रवत्वनाशे द्रव्यान्तरसंयोगस्य प्रतिबन्धकत्वकल्पनाच्चैतन्मते तत्राऽपि स्वस्य प्रतिबन्धकताकल्पनाधिक्याच्चाऽवगन्तव्यः॥ इति तैजसविषयनिरूपणम्॥ इति तेजोग्रन्थः॥

---

(१) स्वकीयरूपस्याऽन्यदीयरूपेणाऽभिभवेऽपि तेन द्रव्यप्रत्यक्षस्य स्वयमेव पूर्वमङ्गीकारादिति भावः। (२) 'नैकप्रतिबन्धकत्वकल्पने' 'न द्रव्यान्तरप्रतिबन्धकत्वकल्पने' इत्यपि पाठौ। (३) नीरूपाकाशादिसंयोगस्य सर्वदैव सत्त्वादिति भावः।

अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः ॥ ४२ ॥
तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः ।

वायुं निरूपयति–अपाकज इति। **अनुष्णाशीतस्पर्शस्य पृथिवीव्यामपि सत्त्वादुक्तमपाकज इति। आपकजस्पर्शस्य जलादावपि सत्त्वादुक्तमनुष्णाशीतेति। एतेन वायवीयो विजातीयः स्पर्शो दर्शितः, तज्जनकतावच्छेदकं वायुत्वमिति भावः ॥ ४२ ॥ इति वायुनिरूपणे वायुत्वजातौ प्रमाणकथनम् ॥**

एषः—वायुः, स्पर्शादिलिङ्गकः–वायुर्हि स्पर्श–शब्द–धृति–कम्पैरनुमीयते, विजातीयस्पर्शेन विलक्षणशब्देन तृणादीनां धृत्या शाखादीनां कम्पनेन

दिनकरी

वायौ प्रमाणं दर्शयितुं मूले "अपाकजोऽनुष्णाशीतस्पर्शस्तु पवने मतः" इत्युक्तं, तत्राऽपाकजादिपदानां क्रमेण व्यावृत्तिमाह—**अनुष्णाशीतस्पर्शेति। उक्तमपाकज इति।** यद्यप्यपाकजानुष्णाशीतस्पर्शवत्त्वं पटादावतिव्याप्तं, तथाऽप्यपाकजानुष्णाशीतस्पर्शवन्मात्रवृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं, पाकजस्पर्शवदवृत्त्यनुष्णाशीतस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थोऽवसेयः । एतेन-स्पर्शस्याऽनुष्णाशीतत्वादिकथनेन । **तज्जनकतावच्छेदकमिति।** तथा च विजातीयस्पर्शजनकतावच्छेदकतया वायुत्वजातिसिद्धिः। इदमुपलक्षणम्। शब्दविशेषस्य वह्नित्वावच्छिन्नस्य वा निमित्तकारणतावच्छेदकतया वायुत्वजातिसिद्धिरित्यपि द्रष्टव्यम् ॥ ४२ ॥ इति वायुत्वजातौ प्रमाणकथनम् ॥

मूले-स्पर्शादिलिङ्गक इति। स्पर्शादीनि लिङ्गानि यस्य स तथा। **मुक्तावल्यां–धृतीति। धृतिः**–गुरुणो द्रव्यस्याऽपतनम्। **विजातीयस्पर्शेनेति।** तृतीयान्तचतुष्कमनुमानादित्यनेनाऽन्वितम्। अनुमितिप्रकारस्तु—

योऽयं रूपवद्द्रव्यासमवेतः स्पर्शः स क्वचिदाश्रितः स्पर्शत्वात् पृथिवीसमवेतस्पर्श-

रामरुद्री

अपाकजानुष्णाशीतस्पर्शवन्मात्रेति। पृथिवीत्ववारणाय **मात्रपदम्**। अपाकजानुष्णाशीतस्पर्शवद्भिन्ने पार्थिवपरमाणौ पृथिवीत्वस्य वृत्तेस्तदव्युदासः। अत्र च तादृशस्पर्शवन्मात्रवृत्तित्वं—तादृशस्पर्शवद्भिन्नावृत्तित्वमात्रं, न तु तादृशस्पर्शवद्वृत्तित्वमपि तत्र घटकं प्रयोजनविरहात्, आत्मत्वादेरपि तादृशस्पर्शवद्भिन्नवृत्तित्वादेव वारणात्। पटत्वादिकमादायाऽतिव्याप्तिवारणाय **साक्षाद्व्याप्यत्वनिवेशः**, तच्च द्रव्यत्वव्याप्यजात्यव्याप्यत्वमात्रं, गुणादिवृत्तिजातीना तादृशस्पर्शवद्भिन्नावृत्तित्वदलेनैव वारणात्। वायुपटद्वित्वमादायाऽतिव्याप्तिवारणाय जातिपदम्। अपाकजस्पर्शवद्भिन्नावृत्तित्वनिवेशेनैव पृथिवीत्ववारणसम्भवेऽपि जलत्वादीनामवारणा**दनुष्णाशीतस्पर्श**वदित्युक्तम्। प्रथमस्याऽधिकाभावद्व्यावच्छिन्नवृत्तिताद्वयघटितत्वेन आधिक्यादेकाधिकरणाधेयत्वघटितं लघुभूतं कल्पान्तरमाह–**पाकजेति।** पृथिवीत्ववारणायाऽवृत्त्यन्तम्। जलत्ववारणाय–**वृत्त्यन्तम्।** स्पर्शत्वव्याप्यजातिविशेषावच्छिन्नपरम**नुष्णाशीत**पदमिति लाभायैवाऽत्र **स्पर्श**पदम्, अन्यथा उष्णशीतभिन्नशानादिमद्वृत्त्यात्मत्वजातिमादायैव अतिव्याप्तेः। पूर्वदले **स्पर्श**पदं तु समवायेन पाकजवत्त्वलाभाय, अन्यथा वायोरपि कालिकादिना पाकजस्पर्शवत्त्वयाऽसम्भवापत्तेः। अन्यत्पूर्ववदनुसन्धेयम्। **एतेनेति।** वस्तुतस्तु **यद्यपीत्यादिना** दर्शिताशङ्कानिरासायैव मूले **एतेनेत्यादिग्रन्थः**, तथा च विजातीयस्पर्शवत्त्वस्यैव वायुलक्षणत्वे न कोऽपि दोष इति मूलाभिप्राय इति युक्तमुत्पश्यामः ॥ ४२ ॥ इति वायुत्वजातौ प्रमाणकथनम् ॥

दिनकरी

वत्। पृथिव्यादिस्पर्शे सिद्धसाधनवारणाय 'रूपवद्द्रव्यासमवेत' इति विशेषणम्।

एवमसति रूपवद्द्रव्याभिघाते योऽयं पणादिषु शब्दसन्तानः स स्पर्शवद्वेगवद्द्रव्य-संयोगजन्यः अविभज्यमानावयवद्रव्यसम्बन्धिशब्दसन्तानत्वात् दण्डाभिहतभेरीशब्द-सन्तानवत्। पृथिव्याद्यभिघातजन्यनि सिद्धसाधनवारणायाऽसतीत्यादिपक्षविशेषणम्। वि-भागजन्यनि शब्दे व्यभिचारवारणाय हेतावविभज्यमानेति।

एवं नभसि तृणतूलस्तनयित्नुविमानादीनां धृतिः स्पर्शवद्वेगवद्द्रव्यसंयोगहेतुका अ-स्मदाद्यनधिष्ठितद्रव्यधृतित्वात् नौकाधृतिवत् जलादिगततृणादौ सिद्धसाधनवारणाय-**नभ-सीति**। प्रयत्नवदात्मसंयोगहेतुकधृत्यादौ व्यभिचारवारणायाऽ**स्मदादीति**।

एवं रूपवद्द्रव्याभिघातमन्तरेण तृणे कम स्पर्शवद्वेगवद्द्रव्याभिघातजन्यं विजाती यकर्मत्वात् नदीपूराहतकाशादिकर्मवदिति।

रामरुद्री

सिद्धसाधनवारणायेति। इदञ्च स्पर्शत्वसामानाधिकरण्येन द्रव्याश्रितत्वसाधनाभिप्रायेण, अव च्छेदकावच्छेदेन साध्यसिद्धौ सामानाधिकरण्येन सिद्धेरप्रतिबन्धकत्वात्, एवमग्रेऽपि बोध्यम्।

शब्दसन्तान इति। यद्यपि वेगवद्द्रव्यसंयोगस्यैव शब्दजनकतया साध्ये स्पर्शवत्त्वविशेषणम नर्थकं शब्दजनने स्पर्शानुपयोगात्, तथाऽपि उक्तानुमानेनैव वायोः स्पर्शस्याऽपि सिद्धयर्थं तदुपात्तं साध्ये व्यर्थविशेषणत्वस्याऽदोषत्वादिति ध्येयम्। गगनादिसंयोगहेतुकत्वभिद्धयाऽर्थान्तरतावारणाय **स्पर्शवदिति**। न न्वेवमपि तेजःसंयोगहेतुकत्वसिद्धयाऽर्थान्तरता तदवस्थैवेत्यस्वरसादाह—**वेगवदि ति**। तत्र, **वेग**पदं चाऽत्र द्रव्यान्तरक्रियाजनकवेगपरं, तेन तेजस्यपि वेगसत्त्वेन तदुपादानेऽपि नाऽर्था न्तरतापत्तिः, एवं च स्पर्शवत्त्वोपादानं वायौ स्पर्शसिद्धयर्थमेवेत्यवधेयम्।

अस्मदाद्यनधिष्ठितेति। प्रयत्नवदात्मसंयोगप्रयुक्तद्रव्यधृतित्वादित्यर्थः। **नौकाधृतीति**। जल स्थद्रव्यधृतिवदित्यर्थः। **जलादिगतेति**। इदं चाऽवच्छेदकाऽवच्छेदेन साध्यसिद्धेर्नोद्देश्यता किन्तु सामा नाधिकरण्येनेत्यभिप्रायेण। अन्यथा तादृशतृणादिधृतौ साध्यस्य सिद्धावपि वायुमात्राधिष्ठिततृणादिधृतावेव साध्यस्याऽसिद्धतया अवच्छेदकावच्छेदेन साध्यसिद्धयभावात्, तादृशानुमितौ बाधकाभावेन सामाना धिकरण्येन साध्यसिद्धेरकिञ्चित्करत्वापातात्, सामानाधिकरण्येन साध्यसिद्धयाऽपि वायुसिद्धिसम्भवेनाव च्छेदकाऽवच्छेदेन साध्यसिद्धेरुद्देश्यत्वे प्रयोजनाभावादिति भावः। **नभसीति**। वायुभिन्नस्पर्शवदनधिष्ठि तेति तदर्थः। नभःसंयुक्तार्थकत्वे जलस्थतृणादिधृतिव्यावर्त्तनासम्भवादिति मन्तव्यम्। **प्रयत्नवदिति** परमेश्वरधृतपृथिव्यादिलोकधृत्यादावित्यर्थः, न त्वस्मदादिधृतघटादिधृत्यादाविति तदर्थः सम्भवति तत्राऽस्मदादिहस्तादिरूपतादृशद्रव्यसंयोगहेतुकत्वरूपसाध्यस्यापि सत्त्वेन व्यभिचाराप्रसक्तेरिति ध्येयम्

कर्मणा वायुसिद्धिप्रकारमाह—**एवमित्यादिना**। पार्थिवाभिघातजन्यतृणादिकर्मणि सिद्धसाधन वारणाय-**अन्तरेणेत्युक्तम्**। साध्ये **स्पर्शवत्वो**पादानप्रयोजनं पूर्ववदेव। चेष्टात्मकक्रियायां व्यभि चारवारणाय हेतौ—**विजातीयेति**। विलक्षणेति तदर्थः। वेगाजन्यत्वे सति चेष्टाभिन्नत्वमेव प्रकृते वैल क्षण्यं, न तु जातिविशेषः, अवच्छेदकतासम्बन्धावच्छिन्नयत्नगतकारणानिरूपितकार्यतावच्छेदकतया चेष्ट यां जातिविशेषसिद्धिसम्भवेऽपि अचेतननिष्ठक्रियासु तत्साधकप्रमाणाभावात्। न च स्पर्शवद्द्रव्याभिघा तजन्यतावच्छेदकतयाऽपि अचेतननिष्ठक्रियासु जात्यन्तरसिद्धौ बाधकाभावा इति वाच्यम्। तथा सति धूमादिपरामर्शजन्यतावच्छेदकतयापिऽनुमितौ जातिविशेषाणां सिद्धिप्रसङ्गात्, धूमादिलिङ्गकानुमितित्व स्यव तत्कार्यतावच्छेदकतया सर्वैरुपगमेनेष्टापत्त्यसम्भवात्, प्रकारान्तरेण कार्यकारणभावोपपत्तावतिरि क्तजातिकल्पनानौचित्यात्, तत्तदनन्तक्रियाव्यक्तिभेदस्य दुर्ज्ञेयतया चेष्टत इति प्रतीतेर्विलक्षणतया व

पूर्ववन्नित्यत्वताद्युक्तं देहव्यापि त्वगिन्द्रियम् ॥ ४३ ॥

च वायोरनुमानात् । यथा च वायुर्न प्रत्यक्षस्तथाऽग्रे वक्ष्यते ।

॥ इति वायुनिरूपणे वायौ प्रमाणकथनम् ॥

पूर्ववदिति । **वायुर्द्विविधः-नित्योऽनित्यश्च, परमाणुरूपो नित्यः, तदन्योऽनित्योऽवयवसमवेतश्च, सोऽपि त्रिविधः-शरीरेन्द्रियविषयभेदात् ।**

तत्र शरीरमयोनिजं पिशाचादीनाम्, परन्तु जलीय-तैजस-वायवीय-शरीराणां पार्थिवभागोपष्टम्भादुपभोगक्षमत्वं, जलादीनां प्राधान्याज्जलीयत्वादिकमिति । ॥ इतिवायवीयशरीरनिरूपणम् ॥

अत्र यो विशेषस्तमाह—देहव्यापीति । **शरीरव्यापकं स्पर्शग्राहकमिन्द्रियं**

दिनकरी ।

अग्रे वक्ष्यत इति । आत्मनिरूपणावसरे इत्यर्थः ॥ इति वायौ प्रमाणकथनम् ॥

मूले-पूर्ववन्नित्यताद्युक्तमिति । **पूर्ववत्**-जलवदित्यर्थः । 'नित्यतादि' इत्यादिनाऽनित्यत्वपरिग्रहः । उक्तं-बोध्यमित्यर्थः । एतदेव स्पष्टयति मुक्तावल्यां-**वायुर्द्विविध इति ।**

तत्र-तेषु मध्ये । **अयोनिजम्**-अयोनिजमेवेत्यर्थः । **पिशाचादीनामिति** । मरुतां लोके प्रसिद्धमिति शेषः । ननु वायोस्तालवादिवाग्व्यापाराभावात् करचरणाद्यभावेन चाऽऽहरणविहरणाद्यभावात् कथं भोगायतनत्वमित्यत आह—**परन्त्विति** । जलीयतैजसशरीरयोरप्याक्षेपस्य तुल्यत्वात् प्रकरणलाघवमभिप्रेत्य साधारण्येन समाधानमाह—**जलीयतैजसवायवीयेति**। ननु कथं तर्हि जलीयत्वादिव्यपदेश इत्यत आह-**जलादीनामिति** ।

॥ इति वायवीयशरीरनिरूपणम् ॥

अत्र-त्वगिन्द्रिये, यो विशेषः-अधिष्ठानादिः । **शरीरव्यापकमिति** । न च नखलोमकेशादीनां त्वगिन्द्रियानाधारत्वादसम्भव इति वाच्यम् । तेषां संयोगिद्रव्यत्वेन शरीर-

रामरुद्री

चेष्टात्वजातिसिद्धेर्निष्प्रत्यूहत्वादिति विभावनीयम् । **पूरं**-प्रवाहः, तदा**हतत्वं**-तत्संयुक्तत्वमेव ।

॥ इति वायौ प्रमाणकथनम् ॥

कारिकास्थपूर्वपदस्याऽव्यवहितपूर्वार्थकत्वे तेजसि नित्यत्वादेः कारिकायां कण्ठतोऽनुक्तेरित्यतस्तदर्थमाह—**जलवदिति** । ननु उक्तमित्यसङ्गतं वायोर्नित्यतादीनामनभिधानादित्यतस्तदर्थमाह—**बोध्यमिति** ॥

इति वायवीयशरीरनिरूपणम् ॥

तेषामिति । लोमादीनामित्यर्थः । **संयोगिद्रव्यत्वेन**-शरीरसयुक्तद्रव्यत्वेनेत्यर्थः । द्रव्यद्वयस्यैव संयोगसम्भवाल्लोम्नो न शरीरत्वमिति द्योतनाय-**शरीरसंयुक्तत्वाभिधानम्** । यद्यप्येवमपि पुरीतति शरीरावयवनाडीविशेषे त्वगिन्द्रियाभावेन तस्यैवमपि न देहव्यापकतासम्भवः, सुषुप्तिकाले ज्ञानवारणानुरोधेन पुरीतति तदनङ्गीकारात्, तथाऽपि **देहव्यापकत्वं** यावद्देहावयववृत्तित्वमेव विवक्षितं, तच्च पुरीतति त्वगिन्द्रियाभावेऽपि स्वप्नजनकमध्यस्थनाडीभागगतविशेषस्यैव पुरीततित्वाङ्गीकारेणाऽक्षतमेव । पुरीतत्प्रदेशस्य नाड्यवयवत्वेऽपि शरीरावयवत्वाभावात् । न च शरीरव्यापकत्वं शरीरनिष्ठप्रतियोगिव्यधिकरणाभावाप्रतियोगित्वमेव, तथा च पुरीततः शरीरावयवत्वेऽपि तदवच्छेदेन शरीरवृत्त्यभावप्रतियोगित्वेऽपि त्वगिन्द्रियस्य न शरीरव्यापकत्वानुपपत्तिरिति वाच्यम् । तथा सति केशादीनां शरीरावयवत्वेऽपि क्षतिविरहेण ग्रन्थकृतां तेषां द्रव्यान्तरताव्यवस्थापनस्य वैफल्यापत्तेः ।

परे तु मध्या(१)न्तर्नभोभाग इव पुरीतत्, गगने त्वगभावादेव तत्र मनसोऽवस्थानदशायां ज्ञानानुत्पा-

---

(१) **सिद्धेति पाठान्तरम् । एवमग्रेऽपि पद्ये ।**

प्राणादिस्तु महावायुपर्यन्तो विषयो मतः ।

त्वक्, तच्च वायवीयं रूपादिषु मध्ये स्पर्शस्यैवाऽभिव्यञ्जकत्वात् अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत् ॥४३॥ इति वायवीयेन्द्रियनिरूपणम्

विषयं दर्शयति–प्राणादिरिति । **यद्यप्यनित्यो वायुश्चतुर्विधः, तस्य चतुर्थी विधा प्राणादिरित्युक्तमाकरे, तथाऽपि सङ्क्षेपादेव त्रैविध्यमुक्तम् । प्राणस्त्वेक एव हृदादिनानास्थानवशान्मुखनिर्गमादिनानाक्रियाभेदाच्च नाना**

दिनकरी ।

त्वाभावात् । मूलस्थस्य 'त्वगिन्द्रियम्' इत्यस्य त्वचि स्थितमिन्द्रियमित्यर्थः । एतेन–देहसहजावरणं त्वगित्युच्यते, तच्च पार्थिवं प्रत्यक्षसिद्धं चेति नेन्द्रियं, न च वायवीयमिति परास्तम् । त्वगिन्द्रियलक्षणमाह–**स्पर्शेति** । कार्यमात्रजनककालादावतिव्याप्तिवारणायेन्द्रियमिति । चक्षुरादावतिव्याप्तिवारणाय–स्पर्शग्राहकेति । **त्वक्** त्वगिन्द्रियमित्यर्थः । **तच्चेति**—त्वगिन्द्रियं चेत्यर्थः । पक्षे स्पर्शत्वाभिव्यञ्जकत्वादसिद्धिवारणाय–**रूपादिषु मध्य इति** । मनसि व्यभिचारवारणाय 'एव' कारः । त्वगिन्द्रियसन्निकर्षे व्यभिचारवारणायद्रव्यत्वे सतीत्यपि बोध्यम् । **अङ्गसङ्गिसलिलं**–स्वेदः ॥४३॥

॥ इति वायवीयेन्द्रियनिरूपणम् ॥

आकरे—प्रशस्तपादभाष्यादौ । **प्राणस्त्वेक एवेति** । कथं तर्ह्यपानादिव्यवहार इत्यत आह—**स्थानवशादिति** ।

"हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः। उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः-"(*)

रामरुद्री ।

दः, एतदभिप्रायेणैव–

'रे रे मानस ! पालितं प्रतिजनुर्देहान्तरे त्वं सदा, तस्मात् कृष्णपदाम्बुजे क्षणमपि प्रस्थीयतां रे मनः ! । इत्थं प्रार्थितमानसं निजगृहप्रध्वंसशङ्काकुलं, मिथ्यामध्वियद्गतं न च गतं तत्पादपङ्केरुहम्–'

इति प्राचीनपद्यमपि सङ्गच्छत इति प्राहुः ॥

सहजावरणं–स्वाभाविकरणं चर्मरूपम् । **कालादावितिव्याप्तिः**। यद्यपि स्पर्शनत्वावच्छिन्नजन्यतानिवेशे न कालादावतिव्याप्तिः, आवश्यकश्च लक्षणे तादृशजन्यतानिवेशः, अन्यथा जन्यमात्रस्य कालोपाधितामते चक्षुष्यतिव्याप्तितादवस्थ्यात् । न च प्रलये क्रियायैव क्षणघटिकादिव्यवस्था वाच्या, तत्र तदनङ्गीकारे पुराणप्रसिद्धसृष्टिप्रलयकालयोरेकप्रमाणत्वस्य असम्भवात्, प्रलये दिक्कालविभागो नाऽस्तीत्यस्य महाप्रलयपरत्वात्, तथा च महाप्रलयोपाधित्वस्य ध्वंसे स्वीकारेऽपि तदतिरिक्तक्रियाभिन्नजन्यमात्रे कालोपाधित्वकल्पने बीजाभावान्मतमेतदसङ्गतमिति वाच्यम् । तथा सतीदानीन्तनदिनाद्युपाधित्वस्याऽनन्तक्रियाव्यक्तिषु कल्पने गौरवात्, जन्यमात्रस्व तथात्वे तु दिनमात्रस्थाव्येकघटादिव्यक्तेरेव तथात्वसम्भवे लाघवस्यैव तन्मूलतासम्भवेन तादृशमतस्य सङ्गतत्वात्, तथाऽपि त्वक्संयोगादावतिव्याप्तिवारणायैव **'इन्द्रिय'**–पदमिति ध्येयम् । **मूले इन्द्रियं त्वक्' इत्यसङ्गतं**, त्वचश्चर्मरूपस्य इन्द्रियाधिष्ठानत्वादत इन्द्रियपदपूरणेन तस्य **त्वचिस्थितमिन्द्रिय**मित्यर्थकतामाह–**त्वगिन्द्रियमिति । मध्य इतीति** । तत्सहित 'एव'कारेण रूपाद्यव्यञ्जकत्वस्यैव लाभेन स्वर्शत्वव्यञ्जकत्वेऽपि त्वगिन्द्रियस्य न स्वरूपासिद्धिरिति भावः । बोध्यमित्यस्य विशेषणमित्यादिः ॥ ४३ ॥ इति वायवीयेन्द्रियनिरूपणम् ॥

(*) अमरसिंहकृतं नामलिङ्गानुशासनम् ।

आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः ॥ ४४ ॥

सञ्ज्ञां लभत इति (१) पर्यवसितो वायुः।

इति वायवीयविषयनिरूपणम्। ॥ इति वायुग्रन्थः ॥

आकाशं निरूपयति-आकाशस्येति। **आकाशकालदिशामेकैकव्यक्तित्वादाकाशत्वादिकं न जातिः, किन्तु आकाशत्वं शब्दाश्रयत्वम्। 'वैशेषिकः'**

दिनकरी।

इति स्थानभेदादित्यर्थः। **क्रियाभेदाच्चेति।** मुखनासिकाभ्यां निष्क्रमणप्रवेशनात्प्राणः, मलादीनामधो नयनादपानः, आहारेषु पाकार्थं वह्नेः समुन्नयनात्समानः, ऊर्ध्वं नयनादुदानः, नाडीमुखेषु वितननाद्व्यान इति क्रियाभेदाद्धि पञ्च सञ्ज्ञा लभते, न तु सञ्ज्ञाभेदेन सञ्ज्ञिभेद इति भावः॥ इति वायवीयविषयनिरूपणम् ॥ इति वायुग्रन्थः ॥

आकाशेति। कालत्वं दिक्त्वं च न जातिरित्यग्रे वक्तव्यं, तल्लाघवेनाऽत्रैव प्रसङ्गाद्युगपदभिदधाति—**न जातिरिति।** अनेकसमवेतत्वाभावादिति शेषः, तेनैकव्यक्तित्वस्य जातित्वाभावहेतुत्वे वैयधिकरण्यमिति प्रत्युक्तम्। **किन्त्विति।** आश्रयता चाऽत्र समवायेन विवक्षिता।

रामरुद्री।

'हृदि प्राणः-'इत्यादेः हृन्मात्रावच्छिन्न इत्यादिरर्थः, यथाश्रुते व्यानस्याऽपि प्राणत्वापत्तिः। **समुन्नयनम्**-उद्दीपनं, वह्नेर्वायुसख्यत्वेन वायुसहकारेणैव तदभिवृद्धेरिति भावः। **वितननात्**-अन्नरसस्य विस्तारणादित्यर्थः।॥ इति वायवीयविषयनिरूपणम्॥ इति वायुग्रन्थः॥

ननु आकाशनिरूपणावसरे आकाशत्वं न जातिरित्येव वक्तव्यं, कालत्वदिक्त्वयोस्तत्तन्निरूपणावसर एव जातित्वनिषेधौचित्यात्, तत् किं मुक्तावल्यामिदानीमेव त्रयाणां जातित्वनिराकरणमारभत इत्याशङ्क्यायामाह—**कालत्वमित्यादि। अग्रे**—तत्तन्निरूपणावसरे, तथा च न जातिरित्यस्य वारत्रयलेखने ग्रन्थगौरवं स्यादिति भावः।

'तत्' इत्यव्यय, तस्मादित्यर्थः। ननु तथाऽप्यसङ्गताभिधानं दुर्वारमेवेत्यत आह—**प्रसङ्गादिति।** स्मृतस्योपेक्षानर्हत्व **प्रसङ्गः**, एकहेतुकानुमितिविषयत्वेन तयोरपि स्मृतत्वादिति भावः। तथा च प्रसङ्गसङ्गत्या तदभिधानान्नाऽर्थान्तरतापत्तिरिति बोध्यम्। मूले आकाशादीनाम् **'एकव्यक्तिकत्वात्'**-इति हेतुना आकाशत्वादेर्जातित्वाभावे हेतुरुक्तः, तत्र हेतुसाध्ययोर्वैयधिकरण्यमाशङ्क्य हेतुं पूरयति—**अनेकेति।** यद्यपि आकाशादीनामाकाशत्वादिकमेकव्यक्तिकत्वान्न जातिरित्यन्वयः, तत्र च एकैव व्यक्तिराश्रयो यस्येति बहुव्रीहौ कप्रत्ययः, तस्य भावस्तत्त्वं तस्मादित्यर्थः। आश्रये **एकत्वं** च स्वप्रतियोगिवृत्तिद्रव्यविभाजकोपाधिमत्त्व—स्वाश्रयत्वोभयसम्बन्धेन भेदविशिष्टो यस्तदन्यत्वम्, एतादृशविशिष्टो घटादिः न त्वाकाशः, तदाश्रयकत्वं—तदाश्रितत्वमिति यावत्। एव रीत्या मूलोक्तहेतुरपि परिष्कर्तुं शक्यः, तथापि एतादृशहेतौ गौरवमालोचयताऽनेकानुयोगिकसमवायप्रतियोगिकत्वाभावरूपहेतुः पूरितः। **अनेकत्वं**—**नैकत्वभिन्नसङ्ख्या,** तथा सति गुणे गुणानङ्गीकारेण गुणत्वजातावपि तथाविधसङ्ख्यावदनुयोगिकसमवायप्रतियोगिकत्वाभावसत्त्वेन व्यभिचारापत्तेः, किन्तु अपेक्षाबुद्धिविशेषविषयत्वं, तच्च यद्यपि अपेक्षाबुद्धीनामननुगतत्वादननुगतं यत्किञ्चिदेकबुद्धिव्यक्तिविषयानुयोगिकसमवायप्रतियोगिकत्वाभावस्य घटत्वादिजातिसाधारण्येन हेतुत्वमसम्भवदुक्तिकं तथाऽपि स्वप्रतियोगिसमवेतत्व—स्वाश्रयसमवेतत्वोभयसम्बन्धेन भेदविशिष्टान्यत्वादित्यर्थे तात्पर्यान्न दोषः। एतावताऽऽपि द्रव्यविभाजकोपाधिघटितमूलोक्तहेत्वपेक्षया लाघवान्नपायात्। अत्र च लाघवात् समवैतत्वाभावस्यैव हेतुता युक्तेति नाऽऽशङ्कनीयम्। शब्दसमवायिकारणत्वापेक्षया लाघवेन शब्दस्यैव आकाशत्वरूपतया स्वरूपासिद्धिप्रसङ्गादित्यवधेयम्। **वैयधिकरण्यमितीति।** इदं च एकव्यक्तिरेवै-

---

(१) 'पर्यवसितो वायुः इति क चिन्नाऽस्ति।

इति कथनं तु विशेषगुणान्तरव्यवच्छेदाय ।

एतेन प्रमाणमपि दर्शितं, तथाहि-शब्दो गुणः चक्षुर्ग्रहणायोग्य-बहिरिन्द्रियग्राह्यजातिमत्त्वात् स्पर्शवत् , शब्दो द्रव्यसमवेतः गुणत्वात् संयो-

दिनकरी ।

वक्षिता, तेन कालस्य जगदाधारत्वेन शब्दाश्रयत्वेऽपि न क्षतिः । मूले **'वैशेषिक'पदस्य** वैयर्थ्यमाशङ्क्याऽऽह—**वैशेषिक इतीति** । इत्थं च 'शब्दः' इति मूलं सावधारणं ज्ञेयम् ।

एतेन-विशेषगुणत्वकथनेन । **'प्रमाणम्'** इत्यस्याऽऽकाश इत्यादिः । 'तच्च' शब्दः पृथिव्याद्यष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रितत्वे सति द्रव्याश्रितत्वादित्येवंरूपं बोध्यम् । **दर्शितं**-सूचितम् । अत्राऽनुमाने स्वरूपासिद्धिं परिहर्तुमाह-**तथा हीति** । घटादौ व्यभिचारवारणायाऽऽ**योग्येति** । आत्मनि व्यभिचारवारणाय--**बहिरिन्द्रियग्राह्येति** । रसत्वादिव्यावृत्तये--**जातिमदिति** । एतच्चाऽनुमानमग्निमद्द्रव्यसमवेतत्वसाधकानुमाने स्वरूपासिद्धिनिरासायेति बोध्यम् । **गुणत्वादिति** । एतदनुमानेनोक्तपरि-

रामरुद्री ।

कव्यक्तिकं तस्य भावस्तत्त्वमिति व्युत्पत्त्या एकव्यक्तिकत्वादित्यर्थपर्यवसितं मूलोक्तं तत्र च द्रव्यत्वादेरप्येकव्यक्तिकत्वेन व्यभिचारापत्त्याऽऽकाशादीनामित्येकव्यक्तिकत्वादित्यनेनाऽन्वितमित्यभिप्रायेणोक्तं,यथोक्तार्थकत्वे वैयधिकरण्याभावात् । न चैवमिदानीं तादृशार्थकैकव्यक्तिकत्वादित्यस्य हेतुत्वसम्भवान्मूले तदुक्तिवैयर्थ्यमिति वाच्यम् । हेतुसाधकत्वेनैव तदुपन्यासादिति भावः । **इत्थं चेति** । वैशेषिकपदस्याऽऽकाशे विशेषगुणान्तरव्यवच्छेदपरत्वे चेत्यर्थः । **सावधारणमिति** । शब्द एवेत्येवकारसहितमित्यर्थः । तथा सत्येवोक्तार्थलाभसम्भवादिति भावः ।

विशेषगुणत्वेति । विशेषगुणत्वस्य शब्दे सिद्ध्यनन्तरमेव वक्ष्यमाणरीत्याऽऽकाशसाधकवक्ष्यमाण हेतोः शब्दे सिद्धिसम्भवादिति भावः । आकाशे प्रमाणप्रदर्शनरूपता शब्द एव आकाशविशेषगुण इत्यस्य न सम्भवतीत्यतो **'दर्शित'** मित्यस्याऽर्थमाह-**सूचितमिति । घटादाविति ।** त्वगिन्द्रियजन्यलौकिकप्रत्यक्षविषयघटत्वादिजातिमत्त्वादिति भावः । **चक्षुरित्यादि ।** चक्षुर्जन्यलौकिकप्रत्यक्षस्वरूपायोग्यत्वे सतीति सत्यन्तार्थः । घटः शब्दावच्छेदक इति शब्दाशे अलौकिकविषयताशालिचाक्षुषं प्रति शब्दस्याऽपि स्वरूपयोग्यतया स्वरूपासिद्धिवारणाय लौकिकत्वनिवेशः । तादृशप्रत्यक्षाविषयत्वोक्तौ चक्षुःसयोगाद्यभावेन तादृशप्रत्यक्षविषयघटादौ व्यभिचारतादवस्थ्यमतः स्वरूपयोग्यताप्रवेशः सा च 'उद्भूतरूपं नयनस्य गोचरं इत्यादिना परिगणितानामेवेति भावः । **बहिरिन्द्रियग्राह्येति । बहिरिन्द्रियग्राह्यत्वं**-बहिरिन्द्रियजन्यलौकिकप्रत्यक्षविषयत्वम् । आत्मनि व्यभिचारवारणाय-**लौकिकत्वनिवेशः ।** अथाऽऽत्मनि बहिरिन्द्रियग्राह्यद्रव्यत्वादिजातिसत्त्वाद्व्याभिचारो दुर्वार एव । न च सत्यन्तं जातावेव विशेषणमस्तु,तथ च द्रव्यत्वस्य चक्षुर्ग्रहणयोग्यत्वान्न तदादायाऽऽत्मनि व्यभिचार इति वाच्यम् । तथा सति चाक्षुषाविषयत्वोक्त्यैव सामञ्जस्ये योग्यताविशेषनिवेशनवैयर्थ्यापत्तेः, चाक्षुषाविषयबहिरिन्द्रियग्राह्यगुणावृत्तिजातौ मानाभावेन तादृशजातिमादाय यभिचारप्रसक्तेरिति चेत् । मैवम्, **बहिरिन्द्रियग्राह्यजातिमत्त्वा**दित्यस्य बहिरिन्द्रियग्राह्यत्वे सति जातिमत्त्वादित्यर्थकतया आत्मनि व्यभिचारासम्भवात्, शब्दध्वंसादौ व्यभिचारवारणायैव जातिमत्त्वस्य सार्थकत्वाच्च । न चैवं भागासिद्धिरिति वाच्यम् । बहिरिन्द्रियाग्राह्यशब्दसम्भवेऽपि शब्दत्वसामानाधिकरण्येन अष्टद्रव्यातिरिक्तद्रव्याश्रितत्वसिद्धेराऽप्याकाशसिद्धिसम्भवेन शब्दत्वावच्छेदेन गुणत्वसाधने प्रयोजनाभावेन सामानाधिकरण्येन गुणत्वसिद्धेरुद्देश्यत्वात् सामानाधिकरण्येन साध्यसिद्धेरुद्देश्यतायां भागासिद्धेरदोषत्वात् । **रसत्वादिव्यावृत्तये**-रसत्वादौ हेतोरभावज्ञानायेत्यर्थः अन्यथा चक्षुर्ग्रहणायोग्यत्वे सति रसनेन्द्रियग्राह्ये रसत्व गुणत्वाभावेन व्यभिचारापत्तेरिति भावः । शब्दे गुणत्वानुमानस्य प्रकृतोपयोगितां दर्शयति—**एतच्चेति** । द्रव्यसमवेतत्वानुमानस्य फलमाह—**एतदनु-**

गवदित्यनुमानेन शब्दस्य द्रव्यसमवेतत्वे सिद्धे, शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारणकत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात् सुखवत्। पाकजरूपादौ व्यभिचारवारणाय सत्यन्तम्। पटरूपादौ व्यभिचारवारणायाऽकारणगुणपूर्वकेति। जलपरमाणुरूपादौ व्यभिचारवारणाय प्रत्यक्षेति। शब्दो न दिक्कालमनसां गुणः विशेषगुणत्वात् रूपवत्। नाऽऽत्मविशेषगुणः बहिरिन्द्रियायोग्यत्वात् रूपवत्। इत्थञ्च शब्दाधिकरणं नवमं द्रव्यं गगनात्मकं सिद्धयति। न च वाय्ववयवेषु सूक्ष्मशब्दक्रमेण वा-

दिनकरी।

शेषानुमाने हेतौ विशेष्यासिद्धिर्निरस्ता। विशेषणासिद्ध्युद्धारायाऽऽह—**शब्दो न स्पर्शवद्विशेषगुण इति**। न स्पर्शवतो द्रव्यस्य पृथिव्यादिचतुष्टयस्य विशेषगुण इत्यर्थः। **अकारणगुणपूर्वकप्रत्यक्षत्वादिति**। अकारणगुणपूर्वकत्वे सति प्रत्यक्षत्वादित्यर्थः। हेतुसत्त्वं प्रतिपादयितुं—**पाकजेति**। **जलपरमाण्विति**। अनित्यानां पार्थिवरूपादीनां केषाञ्चिदग्निसंयोगासमवायिकारणकत्वात्, केषाञ्चित् कारणगुणपूर्वकत्वादत्रोपेक्षा। **न दिक्कालेति**। शब्द इत्यनुवर्तते। **बहिरिन्द्रियेति**। मनसोऽन्यदिन्द्रियं बहिरिन्द्रियम्, **तद्योग्यत्वात्**–तत्प्रत्यक्षत्वादित्यर्थः। एतेनाऽनात्मगुणग्राहकेन्द्रियत्वं, बाह्येन्द्रियत्वं, तच्च मनस्यतिप्रसक्तं, तेनाऽपि रूपादिग्रहणादिति निरस्तम्। **इत्थं च**–अनेन प्रकारेण पृथिव्यादयष्टद्रव्यानाश्रितत्वसिद्धौ च। **सिद्धयतीति**। पूर्वोक्तपरिशेषानुमानेन सिद्धयतीत्यर्थः। **नन्वेतत्सर्वं तदोपपद्येत यदि शब्दस्य विशेषगुणत्वे किञ्चित् प्रमाणं स्यात्, तत्रैव मानं न पश्याम इति चेन्न**। शब्दो विशेषगुणः लौकिकप्रत्यासत्त्येन्द्रियग्राह्यत्वे सति लौकिकप्रत्यासत्त्या द्वीन्द्रियग्रहणयोग्यताराहित्ये च सति गुणत्वव्याप्यजातिमत्त्वादित्यनुमानस्यैव

रामरुद्री।

मानेनेति। विशेषाभावसहकृतसामान्यहेतुकानुमानं परिशेषानुमानं, स्पर्शवद्द्रव्यविशेषस्य गुणो नेति साधने पृथिव्यादियत्किञ्चिद्द्रव्यविशेषगुणत्वाभावसिद्धौ उद्देश्यभूतस्पर्शवद्द्रव्यसामान्यविशेषगुणत्वाभावासिद्धिरतो व्याजष्टे—**न स्पर्शवत इत्यादि**। अपाकजत्वे सत्यकारण गुणपूर्वकप्रत्यक्षस्य विषयत्वादित्यस्य हेतुत्वे कारणगुणपूर्वकरूपादौ व्यभिचारः, आत्मनः कारणाभावेन प्रत्यक्षमात्रस्यैवाकारणगुणपूर्वकत्वाभावादतस्तदर्थमाह–**अकारणेति**। **पाकजेतीति**। पाकजत्वोक्त्यैव कारणगुणजन्यत्वाभावलाभेनाऽकारणगुणपूर्वकत्वे सति प्रत्यक्षत्वरूपहेतुप्रतिपत्तिसम्भवादिति भावः। **अत्रोपेक्षेति**। **अत्र**—प्रत्यक्षत्वदलव्यावृत्तिप्रदर्शने। **उपेक्षा**—तेषामग्रहणम्। **तत्प्रत्यक्षत्वात्**—तज्जन्यप्रत्यक्षविषयत्वादित्यर्थः। **प्रमाणं स्यादिति**। शब्दस्य सामान्यगुणत्वे **अष्टद्रव्यानाश्रितत्वरूपविशेषणासिद्धिप्रसङ्गात् कर्मजसंयोगादौ व्यभिचारेण उक्तहेतुना स्पर्शवद्गुणभेदसाधनासम्भवेन स्पर्शवद्विशेषगुणभेदसाधने च स्पर्शवतां सामान्यगुणत्वसम्भवादिति भावः। **लौकिकप्रत्यासत्त्येति**। इदं च गुरुत्वस्नेहादेरप्युपनयसन्निकर्षेणेन्द्रियग्राह्यत्वमादाय व्यभिचारवारणाय। द्वितीयमपि एतादृशपदं शब्दस्पर्शयोरप्युपनयसन्निकर्षेण चक्षुर्ग्राह्यतया असिद्धिवारणायैव। **द्वीन्द्रियेति**। जातौ तत्तदिन्द्रियग्रहणयोग्यत्वं—तत्तदिन्द्रिययोग्यवृत्तित्वमेव, द्वीन्द्रियपदं तु विजातीयेन्द्रियद्वयपरं बोध्यम्, अन्यथा रूपादीनामपि चक्षुर्द्वयग्रहणयोग्यतया द्वीन्द्रियग्रहणायोग्याप्रसिद्धेः। यद्यपि सङ्ख्यात्वादीनां सर्वासामेव जातीनां कालभेदेन पुरुषभेदेन च द्वीन्द्रियग्राह्यतया द्वीन्द्रियाग्राह्यत्वे सतीत्येव वक्तुमुचितं, योग्यतानिवेशे प्रयोजनाभावात्, तथाऽपीन्द्रियद्वयजन्यत्वस्य काऽप्यसम्भवेनाऽप्रसिद्धयापत्त्या तथा नोक्तम्। न च

इन्द्रियन्तु भवेच्छोत्रमेकः सन्नप्युपाधितः ।

यौ कारणगुणपूर्वकः शब्द उत्पद्यतामिति वाच्यम् । अयावद्द्रव्यभावित्वेन वायोर्विशेषगुणत्वाभावात् (१) ॥ ४४ ॥ इत्याकाशे प्रमाणकथनम् ॥

तत्र च शरीरस्य विषयस्य चाऽभावादिन्द्रियं दर्शयति—इन्द्रियमिति । **नन्वाकाशं लाघवादेकं सिद्धं श्रोत्रं पुनः पुरुषभेदाद्भिन्नं कथमाकाशं स्यादिति चेत्तत्राऽऽह**—एक इति । **आकाश एकः सन्नपि उपाधेः**—

दिनकरी ।

तत्र प्रमाणत्वात् । प्रभात्वमादाय व्यभिचारवारणाय गुणत्वव्याप्येति । गुरुत्वत्वमादाय व्यभिचारवारणाय प्रथमं सत्यन्तम् । सङ्ख्यात्वमादाय व्यभिचारवारणाय द्वितीयं सत्यन्तम् । सांसिद्धिकद्रवत्वस्नेहधर्माधर्मभावनासु प्रकृतहेतोरभावेऽपि तत्र हेत्वन्तरेणैव विशेषगुणत्वं साधनीयमिति । पूर्वोक्तानुमाने बाधं स्वरूपासिद्धिं चाऽऽशङ्कते—**न चेति । वायाविति** । तथा च स्पर्शवद्वायुगुणत्वस्य तत्र सत्त्वात्तदभावसाधने बाध इति भावः । कारणगुणपूर्वकत्वकथनं त्वकारणपूर्वकत्वघटितहेतोरसिद्धिप्रदर्शनार्थम् । **अयावद्द्रव्यभावित्वेनेति** । स्वाश्रयनाशजन्यनाशप्रतियोगि यद्यत् तत्तद्भिन्नत्वेनेत्यर्थः । ननु तथाऽप्याकाशे प्रत्यक्षमेव प्रमाणं किमिति नोपन्यस्तमि चेन्न । चाक्षुषत्वप्रयोजकस्य महत्त्वे सत्युद्भूतरूपवत्त्वस्याऽऽकाशेऽसम्भवेन चक्षुषः ग्रमाजनकत्वासम्भवात् । ननु यद्याकाशो न चाक्षुषस्तदेह पक्षीति चाक्षुषाधिकरणत्वेन किं भासते इति चेत् ,अलोक एवेति परिकलय ॥४४॥

॥ इत्याकाशे प्रमाणकथनम् ॥

नन्वाकाशीय शरीर विषययोः प्रदर्शनमुज्झित्वा कथमिन्द्रियप्रदर्शनं 'इन्द्रियं तु भवेच्छोत्रं–'इत्यनेन ग्रन्थेन क्रियते इत्याशङ्क्याऽऽह–तत्र चेति । आकाशे चेत्यर्थः ।

रामरुद्री ।

स्वात्मकेन्द्रियजन्यग्रहविषयत्वस्वभिन्नविजातीयेन्द्रियजन्यग्रहविषयत्वोभयसम्बन्धेनेन्द्रियविशिष्टत्वरूपं द्वीन्द्रियग्राह्यत्वमनुगतं निर्वक्तुं शक्यमिति वाच्यम् । जन्यत्वादिप्रवेशेनैतस्य अतिगुरुत्वादित्यभिप्रायात् । न चेन्द्रिययोग्यत्वमपि तज्जन्यलौकिकप्रत्यक्षविषयवृत्तित्वमेवेति आधेयत्वमधिकमेव योग्यतानिवेशपक्ष इति वाच्यम् । चक्षुर्योग्यत्वमुद्भूतरूपाद्यन्यतमत्वं, त्वग्योग्यत्वमुद्भूतस्पर्शाद्यन्यतमत्वमेवंरूपत्वादिन्द्रिययोग्यतायाः अन्यतमत्वं च भेदकूटावच्छिन्नभेदः, तस्य च तद्व्यक्तित्वेनैव योग्यताघटकत्वोपगमेन लाघवानपायादिति ध्येयम् । **सांसिद्धिकेति** । तथाविधद्रवत्वत्वस्नेहत्वयोस्त्वक्चक्षुरुभयग्राह्यत्वाद्धर्माधर्मभावनानामतीन्द्रियत्वान्न तेषु हेतुसत्त्वमिति भावः । **हेत्वन्तरेणैवेति** । एते पञ्च विशेषगुणाः स्थितिस्थापकान्यत्वे सति विभिन्नद्रव्यविभाजकोपाधिमद्व्यक्तिद्वयवृत्तितानवच्छेदकगुणत्वव्याप्यजातिमत्त्वात् सुखवदित्येवमनुमानं बोध्यम् । **पूर्वोक्तानुमाने**—स्पर्शवद्विशेषगुणत्वाभावसाध्यकानुमाने । 'हेतोरसिद्धिप्रदर्शनार्थम्' इत्यस्य पक्ष इत्यादिः । **चक्षुष इति** । नील नभ इति चाक्षुषभ्रमात्त प्रमेत्युक्तम् ॥

इत्याकाशे प्रमाणकथनम् ॥

---

(१) शब्दो न वायुगुणः अयावद्द्रव्यभावित्वात् ज्ञानवदित्यनुमानबलेन तथात्वसिद्धिरिति भावः । नन्वेतदनुमानमप्रयोजकमिति चेन्न । त्वगिन्द्रियावेद्यत्वेन शब्दस्य वायुविशेषगुणत्वाभावसिद्धेः । न हि शब्दस्त्वगिन्द्रियवेद्यः, हस्तादिना बधिरादेर्वा शब्दोपलब्ध्यापत्तेः, तदीयत्वगिन्द्रियेण वायुविशेषगुणसम्वेदनादित्यवधेयम् ।

जन्यानां जनकः कालः जगतामाश्रयो मतः ॥ ४५ ॥

कर्णशष्कुल्या भेदाद्भिन्नं श्रोत्रात्मकं भवतीत्यर्थः ।

॥ इत्याकाशेन्द्रियनिरूपणम् ॥ इत्याकाशग्रन्थः ॥

कालं निरूपयति–जन्यानामिति । **इति कालनिरूपणे काललक्षणकथनम् ॥**

दिनकरी ।

कर्णशष्कुल्या भेदादिति । चैत्रादिकर्णशष्कुल्यवच्छिन्नमाकाशं चैत्रादिश्रोत्रमिति भावः।

नव्यास्तु—शब्दनिमित्तकारणत्वेन कल्पितस्येश्वरस्यैव शब्दसमवायिकारणत्वम् । न चेश्वरस्य शब्दसमवायिकारणत्वं जीवस्य वेत्यत्र विनिगमनाविरहः जीवस्य शब्दसमवायित्वे ज्ञानवच्छब्दस्याऽपि मानसत्वापत्तेः, अदृष्टादिवत्प्रतिबन्धककल्पने चाऽतिगौरवम् । न चैवं कर्णशष्कुलीविवरावच्छिन्नाकाशस्य कथं श्रोत्रत्वोपपत्तिरिति वाच्यम् । तथाविधस्येश्वरस्यैव श्रोत्रत्वोपपत्तेरित्याहुः ।

स्वतन्त्रास्तु–मृदङ्गादीनामेव गुणः शब्दः, शब्दं प्रति मृदङ्गत्वादिना समवायिकारणतायाः स्वीकारात्, प्राचीनैरपि मृदङ्गत्वादिना निमित्तकारणतायाः स्वीकारात्, मृदङ्गे शब्द इत्यादिप्रतीतेश्च । न च तत्राऽवच्छेदकत्वं विषयः, मानाभावात्, अन्यथा तत्राऽवच्छेदकताख्यस्वरूपसम्बन्धस्याऽन्यत्र समवायस्य कल्पने गौरवादिति वदन्तीति ॥ इत्याकाशेन्द्रियनिरूपणम् । **॥ इत्याकाशग्रन्थः ॥**

मूले—जन्यानां जनक इति । कार्यत्वावच्छिन्नं प्रति निमित्तकारणमित्यर्थः । अत्र च कालिकसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपितमधिकरणविधया निमित्तत्वं काल-

रामरुद्री ।

अतिगौरवमिति । विनिगमनाविरहेण नानाजीवेषु शब्दसमवायिकारणताया अतिरिक्तप्रतिबद्धयप्रतिबन्धकभावकल्पनायाश्चाऽऽपत्तिरिति भावः । न च कालदिशावादाय विनिगमनाविरह इति वाच्यम् । नवीनैस्तयोरपीश्वर एवाऽन्तर्भावितत्वादिति मन्तव्यम् ।

अथ स्वतन्त्रमते शब्दग्राहकमिन्द्रियं किंस्वरूपं ? कर्णशष्कुलीस्वरूपमेव, बधिरस्य शब्दप्रत्यक्षवारणाय शरीरस्थदोषस्य तत्प्रत्यक्षप्रतिबन्धकताकल्पनस्य सर्वमत एवाऽऽवश्यकतया शष्कुलीमात्रस्य श्रोत्रत्वेऽपि तत्कल्पनाधिक्यविरहादिति चेत्, तर्हि मृदङ्गसमवेतशब्दे श्रोत्रस्य कः सन्निकर्षः ? स्वसयोगिसंयुक्तसमवाय इति चेत्, सन्निकर्षान्तरकल्पनागौरवादिति ।

मैवम् । तत्तदात्मन एव तदीयश्रोत्रेन्द्रियत्वोपगमात् । न च कर्तृत्वकरणत्वयोर्विरोधात्कथमेतदिति वाच्यम् । स्वात्मानं वेत्तीत्यादौ कर्तृत्वकर्मत्वयोरिव तयोरप्यविरोधात्, इत्थं च केवलसमवायस्य सन्निकर्षत्वाकल्पनेन लाघवान्तरमपि । न च कर्णशष्कुलीपिधानदशायामपि शब्दप्रत्यक्षापत्तिरिति वाच्यम् । तथाविधाकाशस्य श्रोत्रतामतेऽपि केनाऽपि वस्तुनाऽव्यवधीयमानाकाशे शब्दोत्पत्तौ बाधकाभावेन तस्य तत्प्रत्यक्षप्रतिबन्धकताकल्पनायाः सिद्धान्तेऽप्यावश्यकत्वादिति दिक् ॥ इत्याकाशेन्द्रियनिरूपणम् ॥

॥ इत्याकाशग्रन्थः ॥

कार्यसामान्ये कालस्य समवायिकारणत्वासम्भवादसमवायिकारणत्वस्य च द्रव्येऽसरत्वात् **'जनक'** पदं निमित्तकारणपरतया व्याचष्टे—**निमित्तकारणमित्यर्थं इति** । मूले **'जगतामाश्रयः–'**इत्यस्य कालप्रमाणप्रदर्शनपरतया व्याख्येयतया **'जन्यानाम्–'** इत्यादिकं काललक्षणप्रदर्शनपरमेवेति वाच्यम् । लक्षणप्रामाण्यस्वरूपाभिधानस्यैव निरूपणशब्दार्थत्वात्, तच्च न सम्भवति, दिगादीनामपि कार्यसामान्ये निमित्तकारणत्वेनाऽतिप्रसङ्गादित्यत आह–**अत्रेति । अधिकरणविधयेति** । अधिकरणत्वेनेत्यर्थः । यद्यपि कार्यमात्रं प्रति कालस्य कालत्वेनैव कारणता युक्ता, अधिकरणत्वस्य दिगाद्यतिप्रसक्तत्वेन

तत्र प्रमाणं दर्शयितुमाह–जगतामाश्रय इति । **(तथा हि) इदानीं घट इत्यादि**

दिनकरी ।

लक्षणम् । कालिकसम्बन्धावच्छिन्नेतिकरणात् दिशि, अधिकरणतयेतिकरणादद्दष्टेश्वरयोर्नाऽतिव्याप्तिरिति बोध्यम् ।

ननु कार्यमात्रं प्रति कालस्य निमित्तकारणत्वे किं मानमिति चेदत्राऽऽहुः । अद्य घटो भविष्यति, श्वः पटो भविता इत्यादिप्रत्ययेन तत्तत्कार्योत्पत्त्यधिकरणत्वेन कालो विषयीक्रियते, तत्तदुत्पत्त्यधिकरणत्वेन व्यवहारविषयस्य तत्तदुत्पत्तिहेतुत्वनियमात्, तदुत्पत्तिहेतुत्वस्य तद्धेतुत्वव्याप्यत्वात् । एवं च तत्तत्कार्यविशेषं प्रति तत्तत्कालविशेषस्य हेतुत्वे सिद्धे **'यद्विशेषयोः–'** इति व्याप्त्या कार्यमात्रे कालस्य हेतुतासिद्धिरिति । सा च हेतुता निमित्तकारणतैव । न च कार्यमात्रे कालस्य हेतुत्वं न सम्भवति, स्वसमवेतद्वित्वपृथक्त्वसंयोगविभागं प्रति कालस्य समवायिकारणत्वेन तद्भिन्नत्वघटितस्य निमित्तकारणत्वस्य तत्राऽभावादित्याचार्योक्तं शङ्क्यम्, समवायसम्बन्धेन द्वित्वादिकं प्रति तस्य समवायिकारणत्वेऽपि कालिकसम्बन्धेन द्वित्वादिकार्यं प्रति निमित्तकारणत्वस्याऽनपायात् । एवमेव कार्यमात्रे दिशोऽपि निमित्तकारणत्वं बोध्यम् । इति कालनिरूपणे काललक्षणकथनम् ॥

मुक्तावल्यां–तत्रेति । तत्र–काले । **जगतामाश्रयो मत इति** । कालः सर्ववानिति प्रतीत्या सर्वाधिकरणत्वेन कालसिद्धिरिति भावः । नन्वेतादृशी प्रतीतिर्दिग्विषयिण्येवाऽस्तु, अतिरिक्तकालकल्पने गौरवादिति न केवलमनया प्रतीत्या कालः सिद्ध्यति, परन्तु

रामरुद्री ।

कालनिष्ठकारणतायामवच्छेदकत्वासम्भवात्, तथाऽपि कालत्वस्यैकव्यक्तिकत्वेन जातित्वासम्भवात् कालिकसम्बन्धावच्छिन्नाधिकरणत्वादतिरिक्तस्य कालत्वस्य निर्वक्तुमशक्यतया **'अधिकरणविधया'** इत्युक्तम् । तथा च निरुक्तकालत्वस्याऽधिकरणतारूपत्वान्ना सङ्गतिः, एवं दिक्त्वमपि दिक्कृतविशेषणतयाऽधिकरणत्वमेव, नाऽतो दिश्यतिव्याप्त्यभिधानासङ्गतिरिति केचित् । तदसत् । तथा सति महाकाललक्षणस्य घटादावतिव्याप्त्यापत्तेः, अग्रे तत्रैव प्रमाणस्य प्रदर्शनीयतया तस्यैव लक्ष्यत्वावधारणात् । परन्तु तस्य तादात्म्यसम्बन्धेनेत्येवाऽर्थः, आधारस्य सर्वत्र तेनैव कारणत्वात्, **निमित्तत्वं** कारणत्वं, न तु निमित्तकारणत्वं, तन्निवेशे प्रयोजनाभावादिति ध्येयम् । दिशीत्यस्य नाऽतिव्याप्तिरित्यग्रेतनेनाऽन्वयः । **अदृष्टेश्वरयोरित्यत्रेश्वर**ग्रहणं कार्यमात्रे कर्तुरेव कारणत्वाभिप्रायेण, कृतिकारणतामते तु **ईश्वरपदं** तत्कृतिपरमिति द्रष्टव्यम् ।

उत्तत्त्यधिकरणत्वेनेति । भूधातोः प्रकृते उत्पत्त्यर्थत्वादिति भावः । **व्यवहारविषयस्येति** । कपाले घट उत्पद्यत इत्यादौ तथा दर्शनादिति भावः । यद्यपि कपालादेर्न घटोत्पत्तिसाक्षादाधारत्वं, तथाऽपि गृहे पचतीत्यादाविव परम्परया तथात्वं बोध्यम् । यद्यपि आद्यक्षणसम्बन्धरूपाया उत्पत्तेस्तत्तद्विशेषणविशिष्टक्रियाद्यात्मकतैव, तादृशक्षणानुयोगिककालिकसम्बन्धस्य तादृशक्षणस्वरूपत्वात्, तथा च तादृशक्षणहेतुता तत्तद्दिवसादौ विप्रतिपन्नैव, कपालादिदृष्टान्तोऽप्यसम्भवदुक्तिक एव, उक्तनियमोऽप्यप्रयोजकत्वेन विप्रतिपन्न एव, तथाऽपि यो यदुत्पत्त्याधारत्वेन प्रतिपन्नः, स तत्कारणमित्येव नियमस्यैवोपगमसम्भवादुत्पत्तिनिवेशे प्रयोजनाभाव एव, परन्तु उत्पत्तेराकस्मिकत्वापत्तिवारणायैव नियमे उत्पत्तेः प्रवेशिततया यदि तस्याः क्रियाद्यात्मकता, तदा तासां स्वकारणनियम्यतया नाऽऽकस्मिकतापत्तिरिति तन्निवेशो व्यर्थ एव, एवं च कालविशेषनियताग्रफलादौ कालविशेषकारणताया आवश्यकत्वेन **'यद्विशेषयोः–'**इति न्यायेन कार्यसामान्ये कालस्य हेतुतासिद्धिरिति युक्तमुत्पश्यामः । एतदभिप्रायेणैवाऽस्वरससूचनाय **'आहुः'** इत्युक्तम् । **सा चेति** । इतरकारणतयोरुक्तरीत्या कालेऽसम्भवादिति भावः ।

परापरत्वधीहेतुः, क्षणादिः स्यादुपाधितः ।

दिप्रतीतिः सूर्यपरिस्पन्दादिकं यदा विषयीकरोति, तदा सूर्यपरिस्पन्दादिना घटादेः सम्बन्धो वाच्यः, स च सम्बन्धः संयोगादिर्न सम्भवतीति काल एव सम्बन्धघटकः कल्प्यते । इत्थं च तस्याऽऽश्रयत्वमेव(१) सम्यक् ॥४५॥

प्रमाणान्तरं दर्शयति - परापरत्वेति । **परत्वापरत्वादिबुद्धेरसाधारणं**

दिनकरी ।

प्रमाणान्तरेण काले सिद्धे प्रकृतप्रतीतिबलात् सर्वाधारत्वं कल्प्यत इत्याह—**इदानीमित्यादिना । सूर्यपरिस्पन्दादिकमिति ।** न चेदानीं तदानीमिति प्रतीतिर्महाकालं **विषयीकरोतीति** वाच्यम् । तथा सतीदानीं घटो न तदानीमिति प्रत्ययानुपपत्तेः । न च तत्तत्क्रियाविशिष्टमहाकाल एवेदानीमित्यादिप्रत्ययविषयः, तथा चेदानीं घटो न तदानीमिति प्रत्ययस्यैतत्क्रियाविशिष्टमहाकाले घटो न तत्क्रियाविशिष्ट महाकाल इत्यर्थ इति वाच्यम् । तथा सति तत्तत्क्रियाविशिष्टमहाकालापेक्षया लाघवेन तत्तत्क्रियाया एव तादृशप्रतीतिविषयत्वस्योचितत्वात् । इतीत्यनन्तरं स्वाश्रयतपनसंयोगिसंयोग एव सम्बन्धो वाच्यस्तत्रेति शेषः । न चाऽऽकाशमेव सम्बन्धघटकमास्तामिति वाच्यम् । आकाशदिगात्मनां विनिगमनाविरहेणाऽतिरिक्तैककालस्य तथात्वात् । **इत्थं चेति ।** अतिरिक्तकालसिद्धौ चेत्यर्थः । **सम्यगिति ।** कालः सर्ववानिति प्रतीतेरतिरिक्तकालविषयकत्वस्योचितत्वादिति भावः ॥४५॥

परत्वापरत्वबुद्धेरिति । ज्येष्ठे परत्वप्रत्ययः, कनिष्ठेऽपरत्वप्रत्ययः, स च परत्वापरत्वगुणविशेषाधीनः, परत्वापरत्वे च सासमवायिकारणके, भावकार्यत्वात् , असमवायिकारणं च तयोः कालपिण्डसंयोग एवेति परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया काल-

रामरुद्री ।

इदानीमित्यादिप्रतीतीना **सूर्यपरिस्पन्दा**दिविषयकत्वं मूले प्रतिपादितं, तदुपादयति—**इदानीमित्यादिना । प्रतीत्यनुदयापत्तेरिति ।** महाकालस्य सर्वाधारत्वादिति भावः । यद्यपि तदानीं न घट इति प्रतीतेरेव बाधितार्थकता, न त्विदानी घट इत्यस्येति (इदानीं घट इति भागस्य) प्रकृते नोपयोगः, तथाऽपि कालस्य गगनादिवन्न कस्याऽपि कालिकसम्बन्धेनाऽऽधारतेति न तदानीं घट इत्यस्य नाऽनुपपत्तिरिति यदि ब्रूयात्तदेदानीं घट इत्यपि न स्यादित्यावेदयितुं तदुपादानमिति ध्येयम् । **आकाशमेवेति ।** स्वाश्रयसंयोगिसंयोगरूपपरम्परासम्बन्धस्याऽऽकाशमादायाऽपि घटयितुं शक्यत्वादिति भावः । **तथात्वात्**–सम्बन्धघटकत्वात् । यद्यपि स्वसंयोगित्वेनैवाऽऽकाशादीनां सम्बन्धघटकता, न त्वाकाशत्वादिनेति न विनिगमनाविरहावकाशः, तद्रूपेण क्लृप्तविभूनां सर्वेषामेव सम्बन्धघटकत्वमपीष्टमेव, विनिगमनाविरहात् । न चाऽनन्तव्यक्तीनां तादृशपरम्पराघटकत्वकल्पनापेक्षया एकातिरिक्तव्यक्तिकल्पनमेव लघ्विति वाच्यम् । कालस्य स्वसंयोगिसंयोगघटकतायाः स्वसंयोगिन्याकाशादिव्यावर्त्तकविशेषणमन्तरा दुरु(२)पपादत्वादिदमसङ्गतं, तथाऽपि अनन्तानामाकाशादिसंयोगव्यक्तीनां घटीयसंसर्गता' विनिगमनाविरहेण कल्पनीया, अतिरिक्तकालव्यक्तिकल्पने तु तदीयसंयोगमात्र एव तत्कल्पनमिति लाघव, क्लृप्ताकाशादिसंयोगमादायाऽक्लृप्तकालसंयोगस्य विनिगमनाविरहो न सम्भवतीति पूर्वमेवाऽऽवेदितमिति तात्पर्यमवगन्तव्यम् । **अतिरिक्तकालेति ।** कालाख्यातिरिक्तद्रव्यसत्त्वे उक्तप्रतीतेर्दिग्विषयकता न युज्यते, दिशोऽनुल्लेखात् , कालपदस्य दिगर्थकता च लक्षणां विना न सम्भवतीति तत्स्वीकारे मुख्यार्थपरित्यागापत्तेरिति भावः ॥ ४५ ॥

---

(१) 'तस्याऽऽश्रयत्वमपि'इत्यपि पाठः । (२) 'वारोपपाद'इति 'दुर्वारत्वात्' इत्यपि पाठः ।

निमित्तं काल एव, परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयो लाघवा दतिरिक्तः कालः कल्प्यत इति भावः । इति काले प्रमाणकथनम् ॥

नन्वेकस्य कालस्य सिद्धौ क्षण-दिन-मास-वर्षादिसमयभेदो न स्या-दित्यत आह—क्षणादिः स्यादुपाधित इति । **कालस्त्वेकोऽप्युपाधिभेदात् क्षणा-दिव्यवहारविषयः ।**

दिनकरी ।

सिद्धिरिति भावः । 'परत्वापरत्वयोः' इत्यस्यैव वक्तुमुचितत्वेऽपि तद्बुद्धिपर्यन्तानुधावनं कालिकपरत्वापरत्वयोः प्रमाणं दर्शयितुम् । न च पिण्डगतरूपादेरेव परत्वापरत्वासमवायि-कारणत्वमस्त्विति वाच्यम् । कालिकपरत्वापरत्वयोर्वायावुत्पत्त्या व्यभिचारात् । अत एव पृथिवीपिण्डसंयोगस्य न तत्र कारणत्वं, पृथिव्यसंयुक्तपदार्थेऽपि तादृशपरत्वापरत्वयोरुत्पा-देन व्यभिचारात् । ननु तथाऽप्याकाशदिगात्ममनोभिः पिण्डसंयोगस्य तथात्वं स्यात्, किं कालकल्पनयेत्यत आह—**लाघवादिति** । आकाशदिग्भ्यां पिण्डसंयोगस्य तथात्वे जीवात्मभिः प्रत्येकं विनिगमनाविरहादात्ममनसोस्त्वनन्तत्वाच्च तथात्वं, किन्तु लाघवाद-तिरिक्तः काल एव तथात्वेन कल्प्यत इति भावः ॥ इति काले प्रमाणकथनम् ॥

ननु यदि काल एक एव, तदा क्षण-लव-काष्ठादिनानाव्यवहारस्तत्र न स्यात् । न चै-कस्मिन्नेव घटे घटः कलशः कुम्भ इति व्यवहारवदत्राऽपि क्षणादिनानाव्यवहारे बाधकाभाव इति वाच्यम् । एकस्मिन् विरुद्धनानाव्यवहारायोगात्, न हि घटत्वकलशत्वादिकं मिथो विरुद्धं, क्षणत्वं दिनत्वादिकं तु विरुद्धमेव, न हि क्षणं दिनमिति प्रतीतिरस्तीत्याशङ्कते—**नन्वेकस्येति** । **समयभेदः**-समयभेदव्यवहारः । विभिन्नव्यवहारविषय इति यावत् । एकस्मिन् विरुद्धनानाव्यवहारविषयत्वाभावादिति भावः । **उपाधित इति** । तथा चैकस्य कालस्य किञ्चिद्धर्मविशिष्टस्य क्षणत्वं, किञ्चिद्धर्मविशिष्टस्य दिनत्वं, न तु केवलस्येति भावः । इदमुपलक्षणम् । तादृशोपाधीनामेव क्षणत्वादिव्यवहारविषयत्वं, न तु महा-कालस्येत्यपि द्रष्टव्यम् ।

रामरुद्री ।

मूले-'**असाधारणं निमित्तम्**' इत्यस्य तादृशबुद्धित्वावच्छिन्नं प्रति निमित्तकारणमित्यर्थो न स-म्भवति, तथाविधहेतुतायां मानाभावादतस्तत्पदस्य प्रयोजकार्थकतां स्पष्टयति—'ज्येष्ठे—'इत्यादिना '**भावः**' इत्यन्तेन । **प्रमाणमिति** (१) । रामः परो लक्ष्मणोऽपर इति विलक्षणप्रतीत्यैव कालिकपरत्वाप-रत्वयोः सिद्धिः, तादृशप्रतीतेः दिक्कृतपरत्वादिविषयकत्वासंभवादिति भावः । प्रत्यक्षे विषयस्य कारणतया विषयप्रयोजकस्य तत्प्रत्यक्षप्रयोजकताऽवश्येया । **व्यभिचारादिति** । यद्यपि स्पर्शस्य कारणत्वेन वायु-परत्वादौ व्यभिचारः, तथाऽपि सङ्ख्यादिकमादाय विनिगमनाविरहादनन्तगुणानां तथात्वापत्त्याऽक्लृप्तस्य कालसयोगस्यैव तथात्वमुचितमिति भावः । **तथात्वेन**—निरुक्तासमवायिकारणसंयोगाश्रयत्वेनेत्यर्थः ।

इति काले प्रमाणकथनम् ।

विरुद्धति । एकधर्मावच्छिन्नाबोधकत्वमेव व्यवहारगतो विरोधः । **नहीति** ।।घटत्वादीनामविरोधो-क्तिर्व्यवहारे एकधर्मावच्छिन्नाबोधकत्वरूपविरोधपरिहारायैव । एवमुत्तरत्राऽपीति मन्तव्यम् । **एकस्मि-न्नित्यनन्तरं** विरुद्धेति पूरणीयम्, उक्तयुक्तेः । **द्रष्टव्यमिति**। इदं च न मूलकारसमतं, तथा सत्युपाधीनां

---

(१) 'प्रमाणं लक्षणपरम्' इति पाठः ।

उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म, पूर्वसंयोगावच्छिन्नविभागो वा, पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो वा, उत्तरसंयोगावच्छिन्नं कर्म वा। न चोत्तरसंयोगानन्तरं क्षणव्यवहारो न स्यादिति

दिनकरी।

स्वजन्येति। स्वं-क्रिया। घटगतैककक्रियानाशोत्तरोत्पन्नतद्गतक्रियान्तरजन्यविभागप्रागभावविशिष्टस्य प्रथमकर्मणः क्षणचतुष्टयावस्थायिनः क्षणत्वापत्तिरतः स्वजन्येति। नन्वेवं प्रथमक्षणे क्षणव्यवहारोपपादनेऽपि द्वितीयक्षणे कथं तदुपपादनं? तत्र क्रियाजन्यविभागोत्पत्त्या विभागप्रागभावासम्भवात्। न च द्वितीयक्षणोत्पन्नक्रियान्तरस्यैव निरुक्तविशिष्टस्य तत्र क्षणत्वमिति वाच्यम्। प्रतिक्षणं क्रियोत्पत्तौ मानाभावात्, अतस्तत्राऽपि क्षणव्यवहारोपपादकमुपाधिमाह—**पूर्वसंयोगेति**। स्वजन्यविभागनाश्यपूर्वसंयोगविशिष्टस्वजन्यविभाग इत्यर्थः। तेन स्वजन्यविभागस्य यत्किञ्चित्पूर्वसंयोगविशिष्टस्य द्वित्रिक्षणवृत्तित्वेऽपि यत्किञ्चिद्विभागस्य स्वजन्यविभागनाश्यपूर्वसंयोगविशिष्टस्य तथात्वेऽपि न क्षतिः। तृतीयक्षणे तदुपपादकमुपाधिमाह—**पूर्वसंयोगनाशावच्छिन्नोत्तरसंयोगप्रागभावो-वेति**। स्वजन्यविभागजन्यपूर्वसंयोगनाशावच्छिन्नस्वजन्योत्तरसंयोगप्रागभाव इत्यर्थान्नाऽतिप्रसङ्गः। क्वचित् पुस्तके '**पूर्वसंयोगनाशावच्छिन्नविभागो वा**' इति पाठः, स च प्रामादिकः, प्रथमद्वितीयचतुर्थक्षणेष्वेकैकोपाधेरेवाऽभिहिततया तृतीयक्षणे उपाधिद्वयाभिधाने सन्दर्भविरोधापत्तेः, उत्तरसंयोगस्यैव विभागनाशकतायाः सिद्धान्तसिद्धतया निरुक्तोपाधेः, क्षणद्वयावस्थायिनः क्षणत्वायोगाच्च। यदि च तत्पाठप्रामाण्येऽप्याग्रहः, तदा पूर्वसंयोगनाशस्यैव विभागनाशकत्वाभिप्रायेण संयोजनीयः। चतुर्थक्षणे तमाह— **उत्तरसंयोगेति**। स्वनाशकोत्तरसंयोगेत्यर्थः। तेन सर्वस्यैव संयोगस्योत्तरसंयोगतया तद्विशिष्टकर्मणः क्षणचतुष्टयावस्थायिनः क्षणत्वापत्तिर्निरस्ता। नन्वेतादृशक्षणलक्षणं महाप्रलयात्मकक्षणेऽव्याप्तं, तत्र तादृशकर्माभावात्। न च महाप्रलयस्य क्षणत्वाभाव इष्ट एवेति

रामरुद्री।

कालघटितपरम्परासम्बन्धेनैव आधारताप्रत्ययस्योपगन्तव्यतया गौरवापत्तेः, साक्षादधिकरणत्वोपगमस्य नानाव्यक्तिषु तत्तदनन्तपदार्थीयकालिकसम्बन्धत्वल्पनाप्रयुक्तगौरवग्रस्तत्वादिति ध्येयम्। **निरुक्तेति**। स्वजन्यविभागप्रागभावेत्यर्थः। **प्रतीक्षणमिति**। द्वितीयतृतीयचतुर्थक्षणेषु क्रियान्तरोत्पत्तिमन्तरा क्षणनिर्वचनसम्भवेऽपि पञ्चमक्षणोपाधेः क्रियान्तरोत्पत्त्यैव निर्वाहात् **प्रतिक्षण**मित्युक्तम्। **स्वजन्येति**। स्वपदं पूर्वतत्तत्क्रियाव्यक्तिपरम्। **स्वजन्यविभागनाश्यत्व**निवेशे प्रयोजनमाह—**तेनेति**। **त्रिक्षणेति**। इदं च उत्तरदेशसंयोगेन चतुर्थक्षणे सर्वत्र विभागनाश इत्यभिप्रायेण, अन्यथा गगनादिगतविभागस्य ध्वंसादिवदविनाशित्वापत्तेरिति भावः। **त्रिक्षणवृत्तित्वेऽपी**त्यस्य **न क्षति**रित्यग्रेतनेनाऽन्वयः। विभागे **स्वजन्यत्व**निवेशप्रयोजनमाह—**यत्किञ्चिदिति**। **तथात्वेऽपि**—त्रिक्षणवृत्तित्वेऽपि। **नातिप्रसङ्ग इति**। पूर्वसंयोगनाशे **स्वजन्यविभागजन्यत्वा**प्रवेशे उत्तरसंयोगे **स्वजन्यत्वा**प्रवेशे च पूर्ववदातिप्रसङ्गो यः स नेत्यर्थः। **सन्दर्भेति**। ननु तृतीयक्षणे उपाधिद्वयस्याऽपि सम्भवेन एकमात्राभिधाने न्यूनता स्यादिति द्वयमप्युक्तम्, इतरत्र एकैकोपाधेरेव सत्त्वादेकैकमेवोक्तमिति नैतावता सन्दर्भविरोध इत्यत आह—**उत्तरेति**। '**एव**' कारेण पूर्वसंयोगनाशव्यवच्छेदः, तथा चोत्तरसंयोगोत्पत्तिक्षणेऽपि विभागस्तिष्ठत्येवेति भावः। **स्वनाशकेति**। उत्तरसंयोगोत्तरं क्रिया न तिष्ठतीति लाघवेनैतदभिहितं, लाघवेन स्वजन्यत्वस्यैव वक्तुमुचितत्वात्। न च पूर्वसंयोगनाशस्यैवोत्तरसंयोगजनकत्व-

दूरान्तिकादिधीहेतुरेका नित्या दिगुच्यते ॥ ४६ ॥

वाच्यम्। कर्मान्तरस्याऽपि सत्त्वादिति। महाप्रलये क्षणादिव्यवहारो यद्यस्ति, तदा ध्वंसेनैवोपपादनीय इति। दिनादिव्यवहारस्तु तत्तत्क्षणकूटैरिति ॥ इति कालस्यैकत्वव्यवस्थापनम् ॥ इति कालग्रन्थः ॥

दिशं निरूपयति—दूरान्तिकेति। **दूरत्वमन्तिकत्वं च दैशिकपरत्वमपरत्वं बोध्यम्। तदुबुद्धेरसाधारणं बीजं दिगेव। दैशिकपरत्वापरत्वयोरिति**

दिनकरी।

वाच्यम्। तत्राऽपि क्षणव्यवहारस्य सत्त्वात्, अन्यथा महाप्रलयोत्पत्तौ उत्पत्तिलक्षणस्य तदधिकरणक्षणावृत्तित्वव्याप्यस्ववृत्तिध्वंसप्रतियोगिताकसमयवृत्तित्वरूपस्याऽव्याप्त्यापत्तेः, तत्र महाप्रलयाधिकरणक्षणाप्रसिद्धेरत आह—**महाप्रलय इति**। महाप्रलये क्षणव्यवहारो नाऽस्त्येव, उत्पत्तिलक्षणस्य क्षणाघटितस्यैव स्ववृत्तिध्वंसप्रतियोगिकालावृत्तित्वविशिष्टस्ववृत्तित्वरूपस्य तदुत्पत्तौ सम्भवादित्यभिप्रेत्योक्तं-**यदीति**। **ध्वंसेनैवेति**। स्ववृत्तिध्वंसप्रतियोगिप्रतियोगिकयावद्ध्वंसविशिष्टसमयस्यैव तत्र क्षणव्यवहारविषयत्वादिति भावः। इति कालस्यैकत्वव्यवस्थापनम् ॥ इति कालग्रन्थः ॥

बीजं--प्रयोजकम्। कथं दिशस्तत्र प्रयोजकत्वं, तदृर्शयति—**दैशिकपरत्वापरत्वयोरिति**। परत्वापरत्वबुद्धि प्रति परत्वापरत्वे निमित्ते, तत्र दिक्पिण्डसंयोगः,

रामरुद्री।

मिति वाच्यम्। तथा सति क्रियाविगमेऽपि तदुत्पत्त्यापत्तेः, 'संयोगविभागयोरनपेक्षकारणं कर्म'* इति सूत्रविरोधापत्तेश्चेति। **तादृशकर्मेति**। विभागप्रागभावाद्यवच्छिन्नकर्मेत्यर्थः। इदमुपलक्षणं, उत्तरसंयोगप्रागभावादेरप्यसत्त्वादित्यपि बोध्यम्। **तदधिकरणेति**। **तत्पदमुत्पत्स्यमानपदार्थपरं**, अधिकरणत्वमाधेयताद्वय च कालिकेन, व्याप्यत्वं व्यापकत्वं च दैशिकस्वरूपेण बोध्यम्। तथा च यदधिकरणक्षणावृत्तित्वस्य व्याप्या यत्समयवृत्तिध्वंसप्रतियोगिता, तस्य तत्समयवृत्तित्वमुत्पत्तिरित्यर्थः। अत्र च **यदधिकरणसमयेत्युक्तौ** तद्घटाधिकरणमहाकालादिवृत्तित्वस्यैव तदुत्पत्तिसमयवृत्तिध्वंसप्रतियोगिपूर्वविनष्टपटादौ सत्त्वेन व्याप्तिभङ्गः स्यादिति क्षणत्वेनैव समयो निवेशनीय **इति** भावः। **स्ववृत्तीति**। अत्र स्वपदद्वयं यत्समयवृत्तित्वमुत्पत्तित्वेनाऽभिमतं, तत्समयव्यक्तिपरं, कालावृत्तित्व—तादृशकालवृत्तित्वसामान्याभावः, तेन न स्वपदेन द्वितीयक्षणाद्युपादानसम्भवः, अन्यथा द्वितीयादिक्षणवृत्तिध्वंसप्रतियोगियत्किञ्चित्पूर्वकालावृत्तित्वस्योत्पन्नघटादौ सत्त्वेन तस्य द्वितीयादिक्षणवृत्तित्वस्याऽप्युत्पत्तित्वप्रसङ्गात्। तादृशाभाववैशिष्ट्यं स्ववृत्तित्वे सामानाधिकरण्यसम्बन्धेन बोध्यम्। ननु मूले महाप्रलये ध्वसरूपसमयेनैव क्षणव्यवहार उपपादनीय इत्युक्तं, तत्र सङ्गच्छते, ध्वंसस्य क्षणत्वे सृष्टिकालेऽपि ध्वंसरूपस्थूलकालस्य क्षणत्वेन व्यवहारापत्तेः। यदि च चरमध्वंसव्यक्तेरेव तद्व्यक्तित्वेन क्षणत्वं, नाऽन्यध्वसस्येत्युच्यते, तदा कुतो नाऽन्यध्वंसस्य तद्व्यक्तित्वेन क्षणव्यवहारविषयता, चरमध्वंसस्यैव तथात्वमित्यत्र बीजालाभ इत्यतो यथा नाऽन्यध्वसस्य तद्व्यक्तित्वेन क्षणव्यवहारविषयत्वं, तथा विशेषणं प्रदर्शयति—**स्ववृत्तीति**। तादृशसमयश्चरमध्वंस एवेति भावः॥

॥ इति कालस्यैकत्वव्यवस्थापनम् ॥ इति कालग्रन्थः। ॥

कारिकास्थहेतुशब्दस्य मूले—**'बीजम्'** इति व्याख्यान कृत, तत्र सङ्गच्छते, कारणेऽपि क्वचिद्बीजशब्दप्रयोगात्, परापरत्वबुद्धौ दिशोऽपि कारणत्वाच्च, अतो बीजशब्दस्य प्रकृते प्रयोजकतार्थकतामाह—**बीजमिति**। ननु परत्वापरत्वाभ्यामेव दिशोऽनुमानसम्भवात्तद्बुद्धिपर्यन्तानुधावनमफलमित्यत

---

* वैशेषिकसूत्रम्।

उपाधिभेदादेकाऽपि प्राच्यादिव्यपदेशभाक् ।
समवायिकारणसंयोगाश्रयतया लाघवादेका दिक् सिद्धयतीतिभावः ॥४६॥
इति दिशि प्रमाणकथनम् ॥

ननु यद्येकैव दिक्, तदा प्राचीप्रतीच्यादिव्यवहारः कथमुपपद्यत इत्यत आह—उपाधिभेदादिति । **यत्पुरुषस्योदयगिरिसन्निहिता या दिक् सा तत्पुरुषस्य प्राची, एवमुदयगिरिव्यवहिता या दिक् सा प्रतीची । एवं यत्पुरु-**

दिनकरी ।

तत्र दिगितिक्रमेण परम्परया दिशस्तद्बुद्धौ निमित्तत्वं बोध्यम् । अत्राऽपि बुद्धिपर्यन्तानुधावनं दैशिकपरत्वापरत्वयोः प्रमाणं दर्शयितुं, तादृशपरत्वापरत्वाभ्यामेव तदनुमितेः सम्भवादिति ॥ ४६ ॥ इति दिशि प्रमाणकथनम् ॥

'प्रतीच्यादि' इत्यादिनोदीच्यादिपरिग्रहः । **मूले-उपाधीति** । वस्तुतो दिश एकत्वेऽपि तत्तदुपाधिभेदेन प्राच्यादिसञ्ज्ञाभेद इति भावः । प्राच्यादिसञ्ज्ञासु निमित्तभूतानुपाधीनाह-**यत्पुरुषस्येति** । पुरुषस्येति पदार्थमात्रोपलक्षणम् । पञ्चम्यर्थे षष्ठी । दिक्-मूर्त्तम् । एवमग्रेऽपि । तथा च यदपेक्षयोदयगिरिसन्निहितं यन्मूर्तं, सा ततः प्राचीत्यर्थः, तदपेक्षयोदयगिरिसन्निहितत्वं च तन्निष्ठोदयगिरिसंयुक्तसंयोगापेक्षयाऽल्पतरोदयगिरिसंयुक्तसंयोगवत्त्वम् । इत्थं च मथुरायाः प्राच्यः प्रयाग इत्यत्र मथुरानिष्ठोदयगिरिसंयुक्तसंयोगपर्याप्तसङ्ख्याव्याप्यसङ्ख्यापर्याप्त्यधिकरणोदयगिरिसंयुक्तसंयोगवन्मूर्तवृत्तिः प्रयाग इत्यन्वयबोधः । एवं काशीतः प्रतीच्यां प्रयाग इत्यत्र काशीनिष्ठोदयगिरिसंयुक्तसंयोगपर्याप्तसङ्ख्याव्यापकसङ्ख्यापर्याप्त्यधिकरणोदयगिरिसंयुक्तसंयोगवन्मूर्त्तवृत्तिः प्रयागः, एवमन्यत्राऽपि बोधा ऊहनीयाः । तन्निष्ठोदयाचलसंयुक्तसंयोगपरम्पराघटकं यन्मूर्तं तत्प्राचीत्यपि वदन्ति ।

रामरुद्री ।

आह—**अत्राऽपीति** ॥ ४६ ॥

अयमस्मात् सन्निहित इत्यादिप्रयोगात् पुरुषादित्येव प्रयोक्तुमुचितं न **पुरुषस्येत्यत** आह-**पञ्चम्यर्थ इति** । अवधित्वं पञ्चम्यर्थः । पुरुषावधिकोदयगिरिसान्निध्यवती दिक् तस्य प्राचीत्यर्थः पर्यवसितः । **अवधित्वं**-स्वरूपसम्बन्धविशेषः । **सेति** । तन्मूर्त्तावच्छिन्ना महती दिगित्यर्थः । नाऽतः स्त्रीलिङ्गासङ्गतिः । **संयोगापेक्षयेत्यस्याऽपि** तादृशसंयोगावधिकत्वमेवार्थः, तस्य च **अल्पतरत्वे** अन्वयः । **उदयगिरिसंयुक्तसंयोगपर्याप्तेत्यस्य** तादृशसंयोगादिपर्याप्तेत्यर्थः । **आदि**ना तद्घटसंयुक्तसंयोगादीनां पुरुषनिष्ठविशिष्टसंयोगघटकानां परिग्रहः, तेषु **पर्याप्तसङ्ख्या**-अपेक्षाबुद्धिविशेषविषयरूपैव, गुणेषु गुणानङ्गीकारात् । यद्वा मथुरानिष्ठो यः परम्परयोदयगिरिसंयुक्तसंयोगः, तत्तद्घटका ये मूर्तास्तत्पर्याप्तसङ्ख्यैर्यर्थे तात्पर्यान्न दोषः । **सङ्ख्याव्याप्यत्वं** च सङ्ख्यासमानाधिकरणप्रतियोग्यवृत्तिभेदप्रतियोगितावच्छेदकत्वमेव, न, तु व्यापकसमानाधिकरण्यादिकं, तथा सति स्वस्याऽपि स्वव्याप्यत्वापातात् । **मूर्त्तवृत्ति**रित्युपाधीनामेव प्राच्यादिरूपत्वमित्यभिप्रायेण, अन्यथा तु तादृशमूर्त्तावच्छिन्नवृत्तिरिति शब्दबोधो वर्णनीयः । **सङ्ख्याव्यापकेति । व्यापकत्व**मत्र न तादृशसङ्ख्यासमानाधिकरणप्रतियोग्यवृत्तिभेदप्रतियोगितानवच्छेदकत्व, तथा सति स्वस्य स्वव्यापकत्वेनाऽतिप्रसङ्गात् । नाऽपि स्वभिन्नत्वे सति स्वसमानाधिकरणतादृशभेदप्रतियोगितानवच्छेदकत्वं विभिन्नपुरुषीयापेक्षाबुद्धिजन्यसजातीयसङ्ख्यामादाय सङ्ख्यान्तरस्याऽपि व्यापकत्वापत्त्याऽतिप्रसङ्गतादवस्थ्यात्, परं तु स्वसमानाधिकरणतादृशभेदप्रतियोगितावच्छेदकनिरुक्तसङ्ख्याकत्वमेवेति न काशीतः प्राच्यां काशीति व्यवहारापत्तिः । **आहुरित्यनेन** दीधितिकृन्मते अस्वरसः सूचितः,

आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम् ॥ ४७ ॥

षस्य सुमेरुसन्निहिता या दिक्, सोदीची, तदुव्यवहिता त्ववाची । 'सर्वेषामेव वर्षाणां मेरुरुत्तरतः स्थितः'-इति नियमात् । इति दिश एकत्वव्यवस्थापनम् ॥ इति दिग्ग्रन्थः ॥

आत्मानं निरूपयति—आत्मेन्द्रियाद्यधिष्ठातेति । **आत्मत्वजातिस्तु सुखदुः-**

दिनकरी ।

दीधितिकृतस्तु दिक्कालौ नेश्वरादतिरिच्येते, मानाभावात्, तत्तत्कालोपाधि-दिगुपाधि-विशिष्टादीश्वरादेव क्षण-दिन-प्राची-प्रतीचीत्यादिव्यवहारोपपत्तेरित्याहुः ।

अत्र नव्याः, ईश्वरस्य दिक्कालरूपत्वं तत्तज्जीवस्य वेति विनिगमनाविरहेणाऽतिरिक्तयोस्तयोः स्वीकारः । न चाऽत्र जीवस्य जगज्जनकत्वं परत्वापरत्वजनकत्वं च कल्प्यं, ईश्वरस्य तु क्लृप्तमिति लाघवमिति वाच्यम् । **सम्बन्धघटकयोर्दिक्कालयोर्जगज्जनकत्वाकल्पनादिकालोपाधीनामेव** जगज्जनकत्वकल्पनात्, परत्वापरत्वयोर्गुणत्वे एव मानाभावः, सन्निकृष्टत्वविप्रकृष्टत्वाभ्यामेव परापरव्यवहारोपपत्तेरिति वदन्ति ॥ इति दिग्ग्रन्थः ॥

सुखदुःखादीति । आदिना ज्ञानेच्छाद्वेषप्रयत्नधर्माधर्मभावनापरिग्रहः । यद्यप्यात्मत्वस्याऽन्यात्मन्यप्रत्यक्षत्वेऽपि स्वात्मनि स्वरूपतो मानसप्रत्यक्षविषयत्वमस्त्येव, **तथाऽपि सकलात्मसाधारणानुगतप्रत्यक्षासम्भवेन** जातिरूपं तन्न सिद्ध्यति, **अनेकसमवेतत्वघटितजातित्वग्रहेऽनेकव्यक्तिग्रहहेतुत्वस्य सर्वसिद्धत्वादित्यनुमानमेव** तत्र प्रमाणमित्यभिप्रायेण सुखदुःखादिसमवायिकारणतावच्छेदकतया तत्सिद्धिः प्रदर्शिता ।

अथ सुखत्वाद्यवच्छिन्नं प्रत्यात्मत्वेन कारणत्वे मानाभावः, सुखदुःखद्वेषभावनाधर्मा-

रामरुद्री ।

द्वौ जं तु इदानीं तदानीमित्यादिप्रयोगाणां तत्तदुपाध्यवच्छिन्नेश्वरस्य विषयत्वोपगमे प्रत्येकं जीवमादाय विनिगमनाविरहेण अतिरिक्तकालसिद्धिः । न च कार्यमात्रजनकत्वेन क्लृप्तस्येश्वरस्यैव जन्यमात्रजनककालरूपता युक्ता, न तु जीवस्य, तत्र तस्याऽक्लृप्तत्वादिति विनिगमकमस्तीति वाच्यम् । कार्यमात्रं प्रति ईश्वरीयकृतेरेव हेतुत्वेन क्लृप्तत्वात् कर्तुः कार्यजनकत्वे मानाभावादिति । अत एव एतादृशास्वरसं स्पष्टीकर्तुं नवीनमतमुपन्यस्यति-**नव्यास्त्विति । दिक्कालोपाधीनामिति** । न चैवं ग्रन्थकृदुक्तकालल क्षणमसम्भवग्रस्तमिति वाच्यम् । नवीनानां ग्रन्थकृदननुयायित्वादिति भावः । **वदन्ती**त्यनेन अत्राऽप्यस्वरसः सूचितः, तद्वौ जं तु नानोपाधीनां कारणताकल्पनमपेक्ष्य एकस्य महाकालस्य कारणताकल्पनमेवोचितं, लाघवात्, कालस्य जगत्कारणत्वेऽपि उक्तरीत्याऽतिरिक्तकालसिद्धिसम्भवाच्चेति ध्येयम् ।

॥ इति दिग्ग्रथः ॥

नन्वहं सुखीत्यादिप्रतीत्या आत्मत्वेनाऽऽत्मनो विषयीकरणात् प्रत्यक्षमेवाऽऽत्मत्वे प्रमाणं सम्भवति, तत् कथं मूले सुखादिसमवायिकारणता किञ्चिदवच्छिन्ना कारणतात्वादित्यनुमानं तत्र प्रमाणत्वेन दर्शितमित्याशङ्कते-**यद्यपीति । स्वरूपतः**—स्वाशे किञ्चिद्धर्मप्रकारकेत्यर्थः । **सकलात्मसाधारणं**—सकलात्मविशेष्यकं, **अनुगतप्रत्यक्षं** सकलात्मगतैकाकारमत्वप्रकारकप्रत्यक्षम् । प्रकारकत्वस्य समासलभ्यषष्ठ्यर्थत्वात् । **जातिरूपमिति** । तथा चाऽऽत्मत्वस्य स्वरूपतः प्रत्यक्षत्वेऽपि तद्गतजातित्व न प्रत्यक्षसिद्धमिति भावः ।

ननु सुखादीनामात्मभिन्ने उत्पादो निमित्तकारणाभावादेव न सम्भवति, किमर्थं आत्मनस्तत्र समवायिकारणतेत्याशङ्कते—**अथेति ।**

आत्मानं निरूपयति—आत्मेन्द्रियाद्यधिष्ठातेति। **आत्मत्वजतिस्तु सुखदुःखादिसमवायिकारणतावच्छेदकतया सिद्धयति। ईश्वरेऽपि सा जातिरस्त्येव, अदृष्टादिरूपकारणाभावान्न सुखदुःखाद्युत्पत्तिः, नित्यस्य स्वरूपयोग्यस्य फलावश्यम्भावनियम इत्यस्याऽप्रयोजकत्वात्।**

परे तु ईश्वरे सा जातिर्नास्त्येव, प्रमाणाभावात्। न च दशमद्रव्यत्वापत्तिः, ज्ञानवत्त्वेन विभजनादित्याहुः। इत्यात्मत्वजातौ प्रमाणकथनम्॥

दिनकरी।

धर्मान् प्रति यथाक्रमं धर्माधर्मानिष्टसाधनत्वादिज्ञानानुभवविहितनिषिद्धकर्मणां समवायसम्बन्धेन निमित्तकारणत्वावश्यकतयाऽतिप्रसङ्गाभावात्, भावकार्याणां ससमवायिकारणकत्वनियमस्य तु द्रव्यत्वेन तत्तद्व्यक्तित्वेन वा समवायिकारणत्वमादायैवोपपन्नत्वादिति चेत्—

अत्र प्राञ्चः, कार्यमात्रवृत्तिजातेः (समवायिकारण) कार्यतावच्छेदकत्वनियमात् तादृशकार्यकारणभावस्याऽऽवश्यकत्वात्। न च तावता सुखत्वाद्यवच्छिन्नं प्रति सत्त्वेन द्रव्यत्वेन वा कारणत्वमस्तु, अदृष्टादेर्निमित्तकारणत्वादेवाऽतिप्रसङ्गविरहादिति वाच्यम्। व्याप्यलघुभूतधर्मे कारणतावच्छेदके सम्भवति व्यापकधर्मेण कारणत्वकल्पनाया अन्याय्यत्वादित्याहुः।

वस्तुतस्तु मनसि ज्ञानोत्पत्तिवारणाय ज्ञानत्वाद्यवच्छिन्नं प्रत्यात्मत्वेन हेतुत्वमावश्यकमिति।

ननु तथाऽप्यात्मत्वजातेर्भगवदात्मसाधारण्ये मानाभाव इत्यत आह–**ईश्वर इति।** "आत्मा वा अरे द्रष्टव्यः"— इत्यादिश्रुतावात्मपदव्यवहारादिति भावः। ननु तर्हीश्वरे सुखाद्युत्पत्तिः कुतो न भवतीत्यत आह–**अदृष्टादीति**। 'आदि'ना शरीरपरिग्रहः। ननु तथाऽपि नित्यस्य स्वरूपयोग्यत्वे फलावश्यम्भाव इति नियमेनेश्वरस्य स्वरूपयोग्यत्वे फलोपधानापत्तिरित्यत आह–**नित्यस्येति**। अप्रयोजकत्वादिति। जलपरमाणौ स्नेहानुत्पत्त्या तादृशनियमे मानाभावादिति भावः।

रामरुद्री।

कार्यतावच्छेदकत्वनियमादित्यस्य समवायिकारणेत्यादिः, तेन निमित्तकारणजन्यतावच्छेदकत्वेनाऽपि सुखत्वस्य समवायिकारणजन्यतानवच्छेकत्वेऽपि नोक्तनियमस्य भङ्गरूपाऽनुपपत्तिः। **अन्याय्यत्वादिति**। अनेकव्यक्तिषु कारणताकल्पने गौरवादिति भावः।

नन्वत्र कारणता न फलोपधायकतारूपा, तस्या द्रव्यत्वेन कारणतावादिनाऽपि आत्मन्यस्वीकारात्, किन्तु स्वरूपयोग्यतारूपैव, सा च कारणतावच्छेदकरूपैवेति नवद्रव्येषु द्रव्यत्वस्य क्लृप्तत्वान्न तत्कल्पनागौरवमित्यस्वरसादाह—**वस्तुतस्त्विति। आवश्यकमितीति**। तथा च सुखसमवायिकारणतावच्छेदकतया तदसिद्धावपि ज्ञानसमवायिकारणतावच्छेदकतयैव तत्सिद्धिरिति भावः। ज्ञानं प्रत्यात्ममनःसंयोगस्य हेतुत्वेन घटादौ तदभावान्मनस्येव व्यभिचारः प्रदर्शितः, एवमिच्छादिक प्रति ज्ञानादेः कारणत्वेन तदभावादेव मनसि तदापादनसम्भवेन ज्ञानमात्रानुसरणम्, इत्थं च कार्यवृत्तिजातेस्तदवच्छिन्नस्याऽऽकस्मिकत्वापत्तिवारणाय किञ्चित्कारणजन्यतावच्छेदकत्वनियम एवाऽङ्गीक्रियते, न तु समवायिकारणजन्यतावच्छेदकत्वनियमोऽपि, तदनभ्युपगमे ज्ञातिविरहादित्यात्मत्वं न पूर्वोक्तयुक्त्या सिद्धयतीति पूर्वपक्षोऽपि निरवकाश इति भावः।

सुखाद्युत्पत्तिरित्यत्र 'आदि' ना ज्ञानपरिग्रहः। अत एव तदापत्तिवारकशरीरस्याऽदिपदेन ग्रहणं सार्थकं, ज्ञानं प्रति शरीरस्य स्वावच्छिन्नभोगजनकादृष्टवत्त्वसम्बन्धेन हेतुता, तदभावादेव मुक्तस्य न ज्ञानोत्पत्तिरिति भावः। **अदृष्टशब्दस्याऽत्र धर्मोऽर्थः**, सुखं प्रति तस्यैव कारणत्वादिति ध्येयम्।

इन्द्रियाद्यधिष्ठाता-**इन्द्रियाणां शरीरस्य च परम्परया चैतन्यसम्पादकः ।**

दिनकरी ।

नन्वीश्वरेऽदृष्टं कुतो नोत्पद्यते इति चेन्न । मिथ्याज्ञानरूपकारणाभावात् । मिथ्याज्ञानस्याऽहेतुत्वे च मुक्तात्मन्यप्यदृष्टोत्पत्तिप्रसङ्गः । वेदस्थात्मपदादेर्ज्ञानादिमति **लक्षणापत्तिरित्यस्वरसः** 'आहुः' इत्यनेन सूचितः ।

'इन्द्रियाद्यधिष्ठाता' इति मूलमात्मनि प्रमाणपरतया व्याचष्टे-**इन्द्रियाणामिति । 'आदि'पदसङ्ग्राह्यमाह-शरीरस्येति । परम्परया** जनकतासम्बन्धेन, अवच्छेदकतासम्बन्धेन वा । **चैतन्यं**- ज्ञानवत्त्वम् ।

एतेनाऽऽत्मनि प्रमाणं दर्शितम्—अचेतनं चेतनाधिष्ठितं कार्यं करोतीति व्याप्तेः ।

रामरुद्री ।

कुतो नोत्पद्यत इतीति । अथेश्वरस्य शरीराभावेन तदीयशुभाशुभकर्माभावादियमापत्तिरयुक्ता, न ह्यस्मदादिशुभादिकर्मणा ईश्वरेऽदृष्टोत्पत्तिरापादयितुं शक्या, चैत्रक्रियया मैत्रात्मन्यदृष्टोत्पत्तिवारणाय क्रियाया अवच्छेदकतासम्बन्धेन स्वकारणीभूता या कृतिस्तद्वत्त्वसम्बन्धेनैवाऽदृष्टकारणतायाः स्वीकरणीयत्वादीश्वरकृतेरस्मदादिशरीरानवच्छिन्नतया अवच्छेदकतासम्बन्धेनाऽहेतुत्वात् । न च स्वजनककृतिमत्त्वसम्बन्धेनैव कर्मणोऽदृष्टहेतुत्वमस्तु, चैत्रक्रियायां मैत्रीयकृतेरजनकत्वान्न पूर्वोक्तापत्तिः, एवञ्च कार्यमात्र एवेश्वरकृतेः कारणत्वेन ईश्वरेऽदृष्टापत्तिः सम्भवत्येवेति वाच्यम् । कालिकसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपित-कालिकसम्बन्धावच्छिन्न-कृतित्वावच्छिन्नकारणतायाः कृतिमात्रे सत्त्वात् तद्भिन्नायां विशेषकारणतायामीश्वरकृतौ मानाभावादिति चेन्न । जीवादृष्टवशेन ईश्वरपरिगृहीतरामकृष्णादिशरीरचेष्टाया ईश्वरकृतिजन्यत्वस्वीकारात्तच्छरीरचेष्टाया जीवीयकृत्यसाध्यतयाऽवच्छेदकतयेश्वरकृतिजन्यत्वमावश्यकम्, अस्मदीयचेष्टातो विलक्षणत्वात् । न च तदीयमुखप्रसादमालिन्याभ्यां सुखदुःखयोरनुमानाद्भोगस्याऽपीश्वरे प्रसङ्ग इति वाच्यम् । ईश्वरशरीरे अहं स्यामित्युपासनया कस्य चित् तच्छरीरमित्युपगमात्, परन्तु जीवादृष्टसाध्यचेष्टोपपत्तये भूतावेशन्यायेन तच्छरीरे अवच्छेदकतयेश्वरकृतिकल्पनादिति नाऽनुपपत्तिलेशोऽपीत्यवधेयम् । **मुक्तात्मन्यपीति** । जीवन्मुक्तात्मन्यपीत्यर्थः । परममुक्तस्य शरीराभावेन कर्मण एवाऽभावात् । **मिथ्याज्ञान**पदमपि शरीरे आत्मज्ञानजन्यवासनापरम्, अन्यथा तादृशज्ञानविरहदशायाम् अदृष्टानुत्पादप्रसङ्गात्, जीवन्मुक्तस्य आत्मसाक्षात्कारेण तादृशवासनानाशेऽपि प्रारब्धबलात्तत्कार्यस्य शरीरस्य न नाश इति बोध्यम् ।

मूले-**इन्द्रियाणामधिष्ठातेति । अधिष्ठातृ**शब्दस्य तन्निष्ठक्रियाजनकार्थकत्वे **'प्रवृत्त्याद्यनुमेयोऽयम्-'** इत्यनेन गतार्थता स्यात्, तन्निष्ठव्यापारजनकज्ञानजनक इत्यर्थकत्वे च गौरवमतस्तन्निष्ठज्ञानवत्त्वसम्पादकतार्थकता **'इन्द्रियाणाम्'** इत्यादिना मूले दर्शितेति । **अवच्छेदकतेति । यद्यप्यवच्छेदकतासम्बन्धेन** तदीयज्ञान प्रति तादात्म्यसम्बन्धेन तदीयशरीरस्य हेतुताया आवश्यकतयाऽवच्छेदकत्वोपादाने प्रयोजनाभावः, तथाऽपि खण्डशरीरसमकालोत्पन्नज्ञानव्यक्तौ द्वितीयक्षणोत्पन्नखण्डशरीरस्य पूर्वमसत्त्वेनाऽकारणतया व्यभिचारेणोक्तकार्यकारणभावासम्भवः, परन्तु तत्समवेतगुणानां तदीयशरीरेणैवाऽवच्छेद्यावच्छेदकभावनियमोपगमादेव घटादीनां न ज्ञानावच्छेदकत्वमिति भावः । तथा चोत्तरत्र मूलोक्तं ज्ञानोपधानमुक्तान्यतरसम्बन्धेन ज्ञानवत्त्वमेवेति पर्यवसितम् । **एतेनेति ।** इन्द्रियाणि शरीरञ्च ज्ञात्रधिष्ठितं, अचेतनत्वे सति उक्तान्यतरसम्बन्धेन ज्ञानवत्त्वात्, वास्यादिवदित्यनुमानमात्मनि प्रमाणं दर्शितमित्यर्थः । अत्राऽ**धिष्ठितत्वं**-सहकृतत्वं, तच्च स्वभिन्नत्वे सति स्वजन्यकार्योपधायकत्वं, स्वस्मिन् स्वसहकृतत्वाप्रतीतेः स्वभिन्नत्वनिवेशः, तथा चोक्तानुमानेनेन्द्रियादिभिन्नज्ञातृसिद्धिः, ज्ञानोपधायके आत्मनि व्यभिचारवारणाय हेतौ सत्यन्तम् । न चेश्वरमादाय साध्यसत्त्वान्न व्यभिचार इति वाच्यम् । सहकारिताघटकजन्यतायाः कार्यत्वानवच्छिन्नाया एव

शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः ।

यद्यप्यात्मनि अहं सुखी अहं दुःखीत्यादिप्रत्यक्षविषयत्वमस्त्येव, तथाऽपि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नस्तत्प्रतीतिगोचर इति प्रतिपादयितुं न शक्यते, इत्यतः प्रमाणान्तरं दर्शयति-करणमिति । वास्यादीनां च्छिदादिकरणानां कर्त्तारमन्तरेण फलानुपधानं दृष्टम्, एवं चक्षुरादीनां ज्ञानकरणानामपि फलोपधानं कर्तारमन्तरेण नोपपद्यत इत्यतिरिक्तः कर्ता कल्प्यते ॥ ४७ ॥ इत्यात्मनि प्रमाणकथनम् ॥

ननु शरीरस्य कर्तृत्वमस्त्वत आह – शरीरस्येति । **ननु चैतन्यं ज्ञानादिकमेव, मुक्तात्मनां त्वन्मत इव मृतशरीराणामपि तदभावे का क्षतिः ? प्राणाभावेन ज्ञानाभावस्य सिद्धेरिति चेन्न । शरीरस्य चैतन्ये बाल्ये विलोकितस्य**

दिनकरी ।

'अहं सुखी–'इत्यादिनाऽहं जानाम्यहं करोमीत्यादिपरिग्रहः । न चाऽऽत्मा तावन्न प्रत्यक्ष इति सूत्रभाष्यविरोध इति वाच्यम् । आत्मतत्त्वविवेके परात्माभिप्रायेण भाष्यव्याख्यानस्य प्रदर्शितत्वात् । **विप्रतिपन्नं प्रतीति** । अहमिति प्रतीतेः शरीराद्यतिरिक्तविषयकत्वे विप्रतिपन्नं प्रतीत्यर्थः ॥ ४७ ॥ इत्यात्मनि प्रमाणकथनम् ॥

नैयायिकमते यथा मुक्तात्मनां ज्ञानाभावेन न ज्ञानाधिकरणत्वरूपं चैतन्यं, तथा ममाऽपि मते मृतशरीरस्य न चैतन्यमिति शरीरमेवाऽऽत्मेतिवादी चार्वाकः शङ्कते–**ननु चैतन्यमिति । ज्ञानादिकं**—ज्ञानाद्यधिकरणत्वम् । तदभावे-ज्ञानाद्यभावे । **ननु तव मते मृतशरीरे चैतन्याभावः किंनिबन्धनः ? मन्मते तु प्राणविशिष्टात्मनो विरह एव तत्र प्रयोजक इत्यत आह–प्राणाभावेनेति । तथा च लाघवात् प्राणाभावश्चैतन्यविरहे प्रयो-**

रामरुद्री ।

प्रकृते निवेशितत्वात्, ईश्वरजन्यत्वस्य ज्ञानेऽसम्भवाच्च, तदीयकृतेरेव कार्यमात्रे कारणत्वादिति ध्येयम् । यद्यपि शरीरस्य ज्ञानाकारणत्वेन तत्र चेतनसहकृतत्वं दुर्घटं, तथाऽपि चेतनाधिष्ठितत्वं–उक्तान्यतरसम्बन्धेन चेतनप्रयोज्यतत्तत्क्रियावत्त्वमेव, प्रयोज्यत्वञ्च जन्य–तज्जन्यसाधारणं, तेन च्छिदां प्रति चेतनस्याऽकारणत्वेऽपि तत्कारणप्रवृत्तिकारणत्वेन दृष्टान्तस्य न साध्यवैकल्यमिति विभावनीयम् । **अचेतनमिति** । यद्यपि **'करणं हि सकर्तृकम्–'** इति व्याप्तिः प्रदर्शिता, यद्यत् करणं तत्तत्फलोपहितकारणं सत्सकर्तृकं, तदुपधाने तत्कर्तृसहकृतमिति तदर्थात्, व्यापारवत्कारणस्य करणत्वं, चक्षुःसंयोगेन जानातीति प्रयोगानुपपत्त्या फलोपहितकारणत्वस्यैव तत्त्वात्सहकृतत्वं पूर्वनिरुक्तमेव, एतादृशसामान्यमुखव्याप्तिरेवोत्तरत्र मूले **'वास्यादीनाम्–'** इत्यादिना दर्शयिष्यते, तथाऽपि आत्मनि उक्तनियमस्य व्यभिचारः, स्वभिन्नतज्ज्ञानकर्तुरप्रसिद्धेः, हेतोर्दृष्टान्तपक्षसाधारण्यानुरोधेन उक्तनियमस्याऽऽश्रयत्वानुकूलकृतिमत्त्वैतदन्यतररूपतत्तत्क्रियाकर्तृत्वघटितत्वाद्वौरवं चेत्यालोच्य तादृशव्याप्तेरेवाऽयं परिष्कार आदृतः, यद्यदचेतन यत्करोति—यदुपधायकं भवति, तत्तदुपधाने चेतनाधिष्ठित भवतीति तदर्थः । **चेतनाधिष्ठितत्वं** पूर्वनिरुक्तमेवेत्युक्तानुमानेन चक्षुरादिभिन्नज्ञातृसिद्धिः, चेतनाचेतनयोरेकत्वासिद्धेरिति भावः । उक्तानुमाने वास्यादिरेव दृष्टान्तः, उत्तरमूलग्रन्थानुसारादिति भावः ॥

इत्यात्मनि प्रमाणकथनम् ॥

शरीरमेवाऽऽत्मेति । तथा चोक्तहेतोरसिद्धिरिति भावः । **ज्ञानाद्यधिकरणत्वमिति** । कालिकादिना ज्ञानादेः कालादावपि सत्त्वेन तेषामपि चेतनत्वापत्त्या समवायावच्छिन्नज्ञानाद्याधारत्वमेव चैतन्यमिति

स्थाविरे स्मरणानुपपत्तेः, शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात् । न च पूर्वशरीरोत्पन्नसंस्कारेण द्वितीयशरीरे संस्कार उत्पाद्यत इति वाच्यम् । अनन्तसंस्कारकल्पने गौरवात् । एवंशरीरस्य चैतन्ये बालकस्य स्तन्यपाने प्रवृत्तिर्न स्यात्, इष्टसाधनताज्ञानस्य तद्धेतुत्वात्, तदानीमिष्टसाधनतास्मारकाभावात् । मन्मते तु जन्मान्तरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृत्तिः । न च जन्मान्तरानुभूतमन्यदपि स्मर्यतामिति वाच्यम् । उद्बोधकाभावात्, अत्र त्वनायत्या जीवनादृष्टमेवोद्बोधकं कल्प्यते । इत्थञ्च संसारस्याऽनादितया आत्मनोऽनादित्वसिद्धावनादिभावस्य नाशासम्भवान्नित्यत्वं सिद्ध्यतीति(१) बोध्यम् ॥

॥ इति शरीरात्मवादिचार्वाकमतखण्डनम् ॥

ननु चक्षुरादीनामेव ज्ञानादिकं प्रति करणत्वं कर्तृत्वं चाऽस्तु, विरोधे

दिनकरी ।

जक इति भावः । चार्वाकमतं परिहरति-**नेति** । **स्मरणानुपपत्तेरिति** । अनुभवाश्रयस्य बाल्यशरीरस्य तदानीमभावादिति भावः । ननु बाल्यशरीरं तदाऽस्त्येवेत्यत आह-**शरीराणामिति** । **संस्कार उत्पाद्यत इति** । तथा च स्वप्रयोज्यसंस्कारवत्त्वसम्बन्धेन बाल्यशरीरसमवेतानुभवस्य स्थविरशरीरे सत्त्वान्न स्मरणानुपपत्तिरिति भावः । गौरवस्य फलमुखत्वाद्दूषणान्तरमाह-**एवमिति** । न स्यादित्यत्र हेतुमाह-**इष्टेति** । **तद्धेतुत्वात्**—प्रवृत्तिहेतुत्वात् । तदानी-स्तन्यपानप्रवृत्त्यव्यवहितपूर्वकाले । ननु प्रवृत्त्यन्यथानुपपत्तिस्तवाऽपि समानेत्याशङ्क्य स्वमते प्रवृत्त्यन्यथानुपपत्तिं परिहरति-**मन्मतेत्विति** । **अन्यदपीति** । इष्टसाधनत्वादन्यदपीत्यर्थः । अत्र तु—स्तन्यपानप्रवृत्त्यनुकूलेष्टसाधनतास्मरणे तु । आत्मनो नित्यत्वं साधयति **इत्थं चेति** । स्तन्यपानप्रवृत्त्यनुकूलेष्टसाधनतास्मरणे च । प्रागभावस्य नाशसम्भवादाह—**भावस्येति** । **नाशासम्भवादिति** । नाशं प्रति जन्यभावत्वेन हेतुत्वादात्मनोऽनादित्वेन जन्यभावत्वरूपहेतोरभावेन नाशासम्भवादित्यर्थः ॥ इति शरीरात्मवादिचार्वाकमतखण्डनम् ॥

ननु चक्षुरादीनामेव ज्ञानादिकं प्रति करणत्वं कर्तृत्वं चाऽस्त्विति । करणत्वं च व्यापारवत्त्वे सति कारणत्वं, भवति हि चक्षुरादौ चक्षुःसंयोगादिरूपव्यापारवति चाक्षुषज्ञानाव्यवहितपूर्वकालवृत्तित्वम् । ननु फलोपहितत्वं, राजसूयेन स्वाराज्यकामो यजे-

रामरुद्री ।

भावः । **उत्पाद्यत इतीति** । ननु पूर्वपूर्वशरीरनिष्ठसंस्कारेणोत्तरशरीरसंस्कारोत्पत्तावपि न स्मरणोपपत्तिः, स्थविरशरीरे बालकशरीरगतानुभवस्य स्वजन्यसंस्कारवत्त्वसम्बन्धेन विरहादित्यत आह-**तथा चेति** ।

गौरवस्य-अनेकसंस्कारव्यक्तिकल्पनरूपगौरवस्य । **फलमुखत्वादिति** । **फलं**—विचारफलं शरीरस्याऽऽत्मत्वनिश्चयः, **तन्मुखत्वात्**-तदुत्तरकालीनत्वादित्यर्थः, **फलं मुखं**-पूर्वकालीनं यस्येति व्युत्पत्तेः, तथा चोत्तरकालीनगौरवज्ञानस्य पूर्वकालीननिश्चयप्रतिबन्धकत्वासम्भव इति भावः । **इष्टसाधनत्वादन्यदपीत्यर्थं इतीति** । तथा च सर्वेषां जातिस्मरत्वापत्तिरिति भावः । मूले-**'अनायत्या'** इत्यस्याऽऽगत्येत्यर्थः । अन्यथेष्टसाधनतानुभवाभावेनोद्बोधकाभावेन स्मरणासम्भवे च प्रवृत्त्यसम्भवेन बालः शुष्ककण्ठो म्रियेतेति भावः ॥ इति शरीरात्मवादिचार्वाकमतखण्डनम् ॥

---

(१) **'सम्भवतीति' इत्यपि पाठः ।**

तथात्वं चेदिन्द्रियाणामुपघाते कथं स्मृतिः ? ॥४८॥

साधका (१)भावादत आह–तथात्वमिति । तथात्वं–चैतन्यम् । उपघाते–नाशे सति, अर्थाच्चक्षुरादीनामेव । कथं स्मृतिः ? पूर्वं चक्षुषाऽनुभूतानां चक्षुरभावे स्मरणं न स्यात्, अनुभवितुरभावात् अन्येनाऽनुभूतस्याऽन्येन स्मरणासम्भवात्, अनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारणभा-

दिनकरी ।

तेत्यादौ यागादिनिष्ठकरणत्वादावप्रसङ्गात्, करणत्वकारणत्वयोरविशेषप्रसङ्गाच्च । कर्तृत्वं च यद्यपि क्रियानुकूलकृतिमत्त्वं न सम्भवत्यचेतने चक्षुरादौ, तथाऽपि पूर्वपक्षिणाऽतिरिक्तस्याऽऽत्मनः, कृत्यादीनामात्मसमवेतत्वस्य चाऽनङ्गीकरणात् कृत्याश्रयत्वमपि चक्षुरादीनामस्त्वित्यर्थः । नन्वेकस्यैव करणत्वे कर्तृत्वे कर्तृकरणादिव्यवहारभेदोऽनुपपन्न इत्यत आह–**विरोध इति । विरोधे**–विभिन्नाधिकरणवृत्तित्वे । तथा च कर्तृत्वकरणत्वादिलक्षणोपाधेर्भेदात्कर्तृकरणादिव्यवहारभेदोपपत्तिरित्याशयः । **'न चैतन्यम्'** इत्यत्र विशेष्यतयोपस्थितस्याऽभावस्य तच्छब्देन परामर्शसम्भवाह्याचष्टे–**तथात्वं–चैतन्यमिति । 'उपघात'** पदस्य केवलाऽवयवनाश एव प्रयोगस्तदाह–**नाश इति** । मूले 'उपघाते कथं स्मृतिः ?' इत्युक्तं, तत्रोपघातः केषामित्याकाङ्क्षायाः **सत्त्वादाह—अर्थादिति** । तथा चैकमेव 'इन्द्रियाणाम्' इति पदमाकाङ्क्षावशादुभयत्र सम्बद्ध्यत **इत्याशयः** । 'कथं स्मृतिः ?' इति मूलेनेन्द्रियाणां चैतन्यपक्षे चक्षुरभावे स्मृत्यभाव **आपादितः**, तत्र हेतोरनुक्तेः **स्वयं हेतुं पूरयन्नर्थमाह–पूर्वं चक्षुषेति** । नन्विन्द्रियान्तरेणैव स्मृतिर्भविष्यतीत्यत आह–**अन्येनाऽनुभूतस्येति** । अत्र हेतुमाह–**अनुभवेति** । यद्यपि व्यधिकरणयोः कार्यकारणभावविरहात् सामानाधिकरण्येन इत्युक्तिर्विफला, **तथाऽपि यत्र विषयतासम्बन्धेन स्मृतिः**, तत्र विषयतासम्बन्धेनाऽनुभव इतीदृशविषयत्वघटितसामानाधिकरण्यप्रत्यासत्त्या कार्यकारणभाव आवश्यकः, आत्मनिष्ठसमानाधिकरण्यघटितकार्यकारणभावेन **घटाद्यनुभवोत्तरं** पटादौ विषयतासम्बन्धेन स्मृत्यापत्तेरवारणादिति । चक्षुःकर्तृकानुभवस्य घटे सत्त्वादिन्द्रियान्तरक-

रामरुद्री ।

अप्रसङ्गादिति । तादात्म्येनाऽव्याप्तेरित्यर्थः । यागस्य स्वर्गाव्यवहितपूर्वत्वाभावादिति भावः । **नन्वव्यवहितपूर्ववृत्तित्व**मवश्यं कारणतावच्छेदकसम्बन्धेन विवक्षणीय, तथा च स्वजन्यापूर्वसम्बन्धस्यैव प्रकृते तथात्वान्नाऽव्याप्तिः, अन्यथा व्यापारवस्त्वोपादानेऽपि विशेष्यदलसत्त्वेन यागस्याऽकारणत्वापत्तेरित्यतो दूषणान्तरमाह—**कारणत्वेति** । इदञ्चाऽव्यवहितपूर्ववृत्तित्वमेव कारणत्वमित्यभिप्रायेण । वस्तुतोऽरण्यस्थदण्डादौ कारणताव्यवहारानुरोधेन नियतपूर्ववर्तितावच्छेदकधर्मवत्त्वस्यैव कारणतारूपत्वेन न तयोर्भेदानुपपत्तिगन्धोऽपि । **व्यवहारभेदः**–व्यवहारवैलक्षण्यं, तच्च परस्परविरोध एव, न त्वानुपूर्वीगतभेदोऽत्र भेदशब्दार्थः, एकार्थकयोरपि घटकुम्भशब्दयोस्तथा दर्शनादसङ्गत्यापत्तेः । नन्वेवं कर्तृकरणपदयोः पर्यायतापत्तिः, एकार्थकत्वात्, न चेष्टापत्तिः, कर्तृप्रयोगस्थले करणशब्दाप्रयोगादित्यत आह—**तथा चेति । भेदोपपत्तिः**–वैलक्षण्योपपत्तिः । तदपि विभिन्नप्रवृत्तिनिमित्तकत्वमेव । **केवलावयवेति** । अवयविरहितावयवेत्यर्थः । अवयवनाशेऽप्यवयविनो नाशस्याऽऽवश्यकत्वात् **केवलेत्युक्तम्**, न त्ववयविनाशव्यवच्छेदाय, तदुक्तिः, **'एव'** कारेणैव तत्सिद्धेः । **उभयत्रेति । 'इन्द्रियाणां'** इत्यस्य **'तथात्वं नाशे'** इत्युभयोरित्यर्थः । **घटाद्यनुभवोत्तरं पटादाविति** । न च घटविषयकस्मरणं प्रति

(१) 'बाधका–' इत्यपि पाठः ।

मनोऽपि न तथा, ज्ञानाद्यनध्यक्षं तदा भवेत् ।
वादिति भावः(१) ॥ ४८ ॥ इतीन्द्रियात्मवादिमतखण्डनम् ॥

ननु चक्षुरादीनां चैतन्यं माऽस्तु, मनसस्तु नित्यस्य चैतन्यं स्यादत

दिनकरी ।

तृकं स्मरणं तत्र नाऽनुपपन्नमित्याशङ्कानिराकरणाय तथोक्तिः, समवायघटितसामानाधिकरण्यप्रत्यासत्त्येति तदर्थः । चैत्रस्य घटानुभवकाले मैत्रस्य घटस्मरणवारणाय तत्तत्पुरुषीयत्वनिवेशे पुरुषभेदेनाऽनन्ततत्तत्कार्यकारणभावकल्पने गौरवात् , समवायघटितसामानाधिकण्यप्रत्यासत्त्या तयोर्हेतुहेतुमद्भावस्वीकारादिति भाव इति ध्येयम् ॥

इतीन्द्रियात्मवादिमतखण्डनम् ॥४८॥

इन्द्रियाणां चैतन्यपक्षे यो दोषः, सोऽत्र कल्पे नाऽस्तीति सूचयितुमाह-**नित्यस्येति ।**

रामरुद्री ।

घटविषयकानुभवत्वेन कारणत्वे नैष दोष इति वाच्यम् । तथा सति विषयभेदेनाऽनन्तकार्यकारणभावप्रसङ्गादिति भावः । **तयोर्हेतुहेतुमद्भावस्वीकारादिति ।** अनुभवस्मरणयोः कार्यकारणभावस्वीकारादित्यर्थः । तथा च विषयतयैक., समवायेन चैकः कार्यकारणभाव इति भावः । एतच्चाऽऽपाततः, उक्तरीत्या कार्यकारणभावद्वयानङ्गीकारेऽपि घट-घटत्व-समवाय-विषयकनिर्विकल्पकादपि घटत्वप्रकारकस्मरणापत्तेः । न च प्रकारत्व-विशेष्यत्व-सांसर्गिकविषयतताभिः कार्यकारणभावत्रयोपगमान्नैष दोषः, निर्विकल्पकस्य तादृशविषयतानभ्युपगमादिति वाच्यम् । एवमपि घटत्वपटत्वाभ्यां पटघटविषकानुभवाद्घटत्वप्रकारकघटविशेष्यकपटत्वप्रकारकपटविशेष्यकस्मरणापत्तेः । कालिकेन घटत्वप्रकारकात् समवायेन(२) पटत्वप्रकारकपटविशेष्यकादनुभवात् समवायेन घटत्वप्रकारकस्य कालिकेन पटत्वप्रकारकस्य पटविशेष्यकस्मरणापत्तेरशक्यपरिहारत्वात् , अनायत्या घटत्वप्रकारकसमवायससर्गकघटविशेष्यकानुभवः समवायेन घटत्वप्रकारकसमवायससर्गकघटविशेष्यकस्मरणं प्रति समवायेन कारणमिति रीत्या विषयभेदेनाऽनन्तकार्यकारणभावस्यैव कल्पनीयत्वात् । परन्तु कालिकविशेषणतात्रत्यासत्तिघटितसामानाधिकरण्यप्रत्यासत्त्या स्मरणानुभवयोः कार्यकारणभावाभ्युपगमे एकेन्द्रियेणाऽनुभूतस्य इन्द्रियान्तरेणाऽपि स्मरणोपपत्तेः समवायघटितसामानाधिकरण्यार्थकस्य **सामानाधिकरण्यप्रत्यासत्त्येत्यस्य** मूलेऽभिधानमिति युक्तमुत्पश्यामः ॥ ४८ ॥

॥ इतीन्द्रियात्मवादिमतखण्डनम् ॥

---

(१) अम्लद्रव्यादिषु चक्षुषा दृष्टेषु रसनविक्रियया ऽपीन्द्रियस्याऽनात्मत्वावधारणात् यदि होन्द्रियमेवाऽऽत्मा स्यात्, तदा चक्षुषाऽनुभवे रसनविक्रिया न स्यात्, वैयधिकरण्यात् । तस्मादात्मा कश्चनाऽति रिक्त एवेत्येष्टव्यमेव । तथा चाऽनेकगवाक्षान्तर्गतप्रेक्षकवदात्मैकोऽपि चक्षुषा रसनेन च विजानाति, इति नाऽनुपपत्तिः ।

वस्तुतस्तु 'कारणं हि सकर्तृकं-' इत्यत्र कारिकोपदर्शितेन चक्षुरादिकं फलोपधाने कर्तृसापेक्षं करणत्वादित्यनुमानेनैवाऽतिरिक्तात्मासिद्धिसम्भवः । न च कर्तृत्वकरणत्वयोर्विरोधे बाधकाभावेन चक्षुरादीनामेव कर्तृत्वमप्यस्त्विति वाच्यम् । त्वगिन्द्रियादिभिर्विनिगमनाविरहेण चक्षुरादौ तत्कल्पनामपेक्ष्याऽतिरिक्तात्मन्येव तथा स्वीकारस्यैव लघीयस्त्वात् । कल्पसमादाय कल्पनीयेन विनिगमनाविरहासम्भवाच्च । किञ्चाऽहमिति प्रत्ययासिद्धायाः सुखादिसमवायिकारणतावच्छेदकतया वा सिद्धाया आत्मत्वजातेस्तेजस्त्वादिना चक्षुरादिषु साङ्कर्यापत्तेश्चेति तु विभावनीयम् ।

(२) कालिकेन घटत्वप्रकारकसमवायेन घटत्वप्रकारकस्य कालिकेन पटत्वप्रकारकस्य घटविशेष्यकस्मरणापत्तेः' इति पाठः । 'कालिकेन घटत्वप्रकारकसमवायेन घटत्वप्रकारकघटविशेष्यकानुभवात्-' इत्यपि पाठः ।

आह–मनोऽपीति। **न तथा**–**न चेतनम्**। ज्ञानाद्यनध्यक्षं तदा भवेत्, **मनसोऽणुत्वात्प्रत्यक्षे महत्त्वस्य हेतुत्वात् मनसि ज्ञानसुखादिसत्त्वे तत्प्रत्यक्षानुपपत्तिरित्यर्थः**(१)। **यथा च मनसोऽणुत्वं, तथाऽग्रे वक्ष्यते**।

॥ इति मनआत्मवादिमतखण्डनम् ॥

नन्वस्तु विज्ञानमेवाऽऽत्मा, तस्य स्वतःप्रकाशरूपत्वाच्चेतनत्वम्। ज्ञानसुखादिकन्तु तस्यैवाऽऽकारविशेषः। तस्याऽपि भावत्वादेव क्षणिक-

दिनकरी।

ननु 'तथा'इत्यत्र मूले तच्छब्देन पूर्वोपस्थितचैतन्यस्यैव परामर्शः स्यात्, तथा चाऽसङ्गतिः स्यादत आह–**न तथा—न चेतनमिति**। 'अनध्यक्षं तदा भवेत्'इति मूलेन मनसश्चैतन्ये ज्ञानादेरप्रत्यक्षत्वमुक्तम्, तत्र हेतुं प्रदर्शयन्नाह–**मनस इति तत्प्रत्यक्षेति**। ज्ञानादिप्रत्यक्षानुपपत्तिरित्यर्थः। ननु मनसोऽणुत्वमेवाऽसिद्धमत आह–**यथा चेति। अग्रे वक्ष्यत इति**। "अयौगपद्याज्ज्ञानानां तस्याऽणुत्वमिहेष्यते" इति ग्रन्थेन साधयिष्यते इत्यर्थः॥ ॥ इति मनआत्मवादिमतखण्डनम् ॥

विज्ञानमेवेति। आत्मनिरूपणस्य प्रस्तुतत्वादात्मेत्युक्तं वस्तुमात्रस्यैव तन्मते विज्ञानरूपत्वादिति बोध्यम्। अत्र विज्ञानत्वं प्रमेयत्वस्य सत्त्वस्य व्यापकं न वेति विप्रतिपत्तिः, तत्र विधिकोटियोगाचारस्य निषेधकोटिर्नैयायिकस्येति बोध्यम्। द्विविधं विज्ञानं–प्रवृत्तिविज्ञानमालयविज्ञानञ्चेति। तत्राऽयं घट इत्यादिप्रवृत्तिविज्ञानम्, अहं जानामीत्यालयविज्ञानं, तदेवाऽऽत्मा। तस्य-विज्ञानस्य। ननु सुषुप्तावात्मा न सिद्धयेत्, पूर्वोत्पन्नविज्ञानस्य क्षणिकत्वेन नाशाद्विज्ञानान्तरस्य च तदानीमुत्पादकाभावादत

रामरुद्री।

असङ्गतिः स्यादिति। मनसो ज्ञानरूपत्वासम्भवादिति भावः। **साधयिष्यत इत्यर्थ इति**। यद्यपि मानसान्यप्रत्यक्षं प्रत्येव महत्त्वस्य कारणत्वोपगमे नैष दोषः, अत एव माध्वादिमते जीवानामणुत्वमेव अङ्गीकृतं, तथाऽपि मानसान्यत्वप्रत्यक्षत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण गुरुतरकार्यकारणभावद्वयापत्त्या गौरवापत्तेर्न तथोपगमसम्भवः। न च सिद्धान्तमते अनन्तजीवानां कल्पनीयतया कारणताद्वयकल्पनेन ततो गौरवमिति वाच्यम्। अनेकजीवकल्पनागौरवस्य फलमुखत्वेनाऽदोषत्वादिति भावः।

॥ इति मनआत्मवादिमतखण्डनम् ॥

विज्ञानात्मवादिविचारे तदङ्गविप्रतिपत्तिं दर्शयति–**अत्रेति। सत्त्वस्य वेति**। सामान्यादीनां तन्मते अलीकत्वादिति भावः। सत्त्वमत्र कालसम्बन्धित्वमेव ग्राह्यम्। **अहं जानामीत्यादीति**। अहमित्याकारकज्ञानमित्यर्थः। तेन सुषुप्तिकाले उत्तरत्र वक्ष्यमाणालयविज्ञानधारानुवृत्तेरविरोधः, अन्यथा तत्काले प्रवृत्तिज्ञानविरहेण जानामीत्याकारकज्ञाने च घटः पट इत्यादिप्रवृत्तिज्ञानस्यैव विषयत्वेन आलयविज्ञानानुवृत्तेस्तदानीमसम्भवापत्तेः, अहमित्याकारकज्ञाने च स्वयमेव विषयः, घट इत्यादिज्ञानस्य तद्गोचरप्रवृत्तिसाधनत्वात् प्रवृत्तिविज्ञानत्वमिति बोध्यम्। **उत्पादकाभावादिति**। पुरीतद्भिन्नदेशावच्छिन्नमनःसंयो-

---

(१) अत्राऽयं भावः। ज्ञानाद्याश्रयो हि नाऽणुपरिमाणः सम्भवति, अप्रत्यक्षत्वापत्तेः। नाऽपि मध्यमपरिमाणः अनित्यत्वापत्तेः। किं तु विभुरित्युपगन्तव्यम्। सिद्धे चैवं तेन विभुना सह सर्वेषामिन्द्रियाणां सर्वदैव संयोगसत्त्वाद्युगपज्ज्ञानद्वयापत्तिः, अतोऽणु करणान्तरमभ्युपेयम्। यत्संयोगादेकदैकमेव ज्ञानं स्यात्। तथा च यो ज्ञानाश्रयो विभुः, सोऽस्माकमात्मा, यच्च करणं, तन्मन इति सिद्धं नः समीहितम्। ज्ञानाद्याश्रयो मन एवाऽस्त्विति चेत्, शब्दभेदमात्रे विवादः। ज्ञानाद्याश्रयस्य विभोर्भवताऽपि स्वीकर्त्तव्यत्वादिति।

त्वं, (१) पूर्वपूर्वविज्ञानस्योत्तरोत्तरविज्ञाने हेतुत्वात् सुषुप्त्यवस्थायामप्यालयविज्ञानधारा निराबाधैव, मृगमदवासनावासितवसन इव पूर्वपूर्वविज्ञानजनितसंस्काराणामुत्तरोत्तरविज्ञाने हेतुत्वान्नाऽनुपपत्तिः स्मरणादेरिति चेन्न। तस्य जगद्विषयकत्वे सर्वज्ञत्वापत्तिः, यत्किञ्चिद्विषयकत्वे विनिगमनाविरहः, सुषुप्तावपि विषयावभवासप्रसङ्गाच्च ज्ञानस्य सविषयत्वात्। तदानीं निराकारा चित्सन्ततिरनुवर्तत इति चेन्न। तस्याः प्रकाशत्वे प्रमा-

दिनकरी।

आह-**पूर्वपूर्वेति**। ननु विज्ञानस्य क्षणिकत्वेन तदाश्रितसंस्कारस्याऽपि क्षणिकत्वात् कालान्तरे स्मरणं न स्यादित्याशङ्कां परिहरति-**मृगमदेति**। विज्ञानस्य जगद्विषयकत्वं यत् किञ्चिद्विषयकत्वं वाऽभिप्रेतमिति विकल्प्याऽऽद्ये दूषणमाह-**तस्येति**। विज्ञानस्य। द्वितीये आह-**यत्किञ्चिदिति**। आत्मस्वरूपविज्ञानस्य सविषयत्वे दूषणमाह **सुषुप्ताविति**। शङ्कते-**तदानीमिति**। निराकारा-निर्विषया। चित्सन्ततिः-विज्ञानसन्ततिः।

रामरुद्री।

गरूपकारणाभावादित्यर्थः। मूले-**सुषुप्ताविति**। तदानीन्तदालयविज्ञानस्य स्वमात्रविषयकत्वोपगमेऽपि

---

(१) अत्राऽयमभिसन्धिः। सत्त्वं हि न सत्ताख्या जातिः, तस्यव्यापकत्वेऽतिप्रसङ्गापत्तेः, अव्यापकत्वे च यत्र क्वचन देशे पिण्डेन सह सम्बन्धासम्भव इति। किन्त्वर्थक्रियाकारित्वमेव सत्त्वं, यदा घटेन जलानयनादिरूपोऽर्थः स्वसंवित्तिरूपा क्रिया वा क्रियते, तदैवाऽसौ सन्। न हि अन्यदा तत्सत्त्वे किञ्चित्प्रमाणमस्तीति असत्वमेव तदा तस्येति नाऽस्त्यत्र विवादः।

एवं सति हि बीजादेः सत्त्वं तदेव यदङ्कुरादिनिमित्तत्वं, यदा हि बीजात्किमपि कार्यं न जायते, तदा तदसदेव, तथा ह्येकमेव बीजमङ्कुरादीनि बहूनि कार्याणि करोति, तत्कि कृत्स्नमपि युगपदेव करोति? आहो स्वित्क्रमेण? युगपदित्युच्यमाने यानि किल कार्याणि कर्तुं बीजं प्रभवेत्, तानि सर्वाण्यप्येकदैव जनयेत्, इष्टापत्तौ च तदुत्तरं तस्याऽसत्त्वमावश्यकमेव। तस्य द्वितीयक्षणे करणयाभावात्। यदि क्रमेण कुर्यादित्युच्यते तर्हि क्रमेण किमिति कुर्यात्? न हि बीजं तादृशकार्यकारणस्वभावशून्यं, येन प्रथमक्षणे एव न तानि कार्याणि कुर्यात्, तथा सति द्वितीयादिक्षणेऽपि तदनुत्पत्त्यापत्तेः द्वितीयक्षणे स्वभावान्तरमुत्पद्यत इति चेद्वीजान्तरमेवोत्पद्यत इति किन्न कल्प्यते? तदेवेदं बीजमिति प्रत्यभिज्ञानेन बीजस्य प्राक्क्षणस्थात् बीजात् भेदोऽवगाह्यते, अतः स्वभावान्तरकल्पनेति चेत्प्रत्यभिज्ञानस्य साजात्यावलम्बनत्वात्। ननु बीजं तावत्कार्यकारणस्वभावयुक्तमपि सहकारिसमवधानविरहेण न युगपत्कार्याणि करोति, नाऽन्यथा, यथा कुसूलस्थबीजादिः, यदा च पृथिव्युदकसंयोगादिसामग्रीसमवधानं, तदैतत्कार्यकारणक्षममुपजायत इति चेन्न। सा सामग्री यदि बीजे कञ्चन विशेषं न जनयेत्, नाऽजनयेत्तर्हि कार्यमपि, बीजस्य तत्पूर्वं कार्यकारणस्वभावरहितत्वात्। यदि सामग्रीविशिष्टस्य तस्याऽङ्कुरजनकत्वमुच्यते कोऽपि विशेषस्तत्र सामग्र्या समाहितो न वा? आद्ये तस्य विशेषस्यौवाऽर्थक्रियाकारित्वमस्तु, द्वितीये कार्यानुत्पत्त्यापत्तिरिति सामग्रीसमवधानक्षणे बीजादौ कञ्चन विशेषः स्वीकार्यः, यं कुर्वद्रूपमित्याचक्ष्यौ भगवान् बुद्धः, सत्येवं तस्य विशेषस्याऽपि क्षणमात्रावस्थायित्वमावश्यकमेव। अन्यथा तत्राऽपि क्रमयौगपद्यव्यवस्थानुपपत्तेः। एवं चाऽर्थक्रियाकारिषु क्षणसन्तानेष्वेव सत्त्वम्। ननु तादृशविशेषसहितमेव बीजमारभतामिति न क्षणिकत्वव्यवस्थितिरिति चेन्न। विशेषेणापि, बीजे विशेषान्तरानाधानेऽसहकारितायास्तुल्यत्वात्। इति सिद्धेयं व्याप्तिः-यत् सत् तत् क्षणिकमिति सौगता आहुः।

णाभावात्, अन्यथा घटादीनामपि ज्ञानत्वापत्तिः। न चेष्टापत्तिः, विज्ञानव्यतिरिक्तवस्तुनोऽभावा(१)दिति वाच्यम्। घटादेरनुभूयमानस्याऽपलपितुमशक्यत्वात्। आकारविशेष एवाऽयं विज्ञानस्येति चेन्न। किमयमाकारोऽतिरिच्यते विज्ञानात्? तर्हि समायातं विज्ञानव्यतिरिक्तेन। नाऽतिरिच्यते चेत्, तर्हि समूहालम्बने नीलाकारोऽपि पीताकारः स्यात्, स्वरूपतो विज्ञानस्याऽविशेषात्। अपोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न। नीलत्वादीनां विरुद्धानामेकस्मिन्नसमावेशात्, इतरथा विरोधावधारणस्यैव दुरुपपादत्वात्। नववासनासङ्क्रमः सम्भवति, मातृपुत्रयोरपि वासनासङ्क्रमप्रसङ्गात्। न चोपादानोपादेयभावो नियामक इति वाच्यम्। वास-

दिनकरी।

प्रकाशत्वे-ज्ञानत्वे। ज्ञानत्वस्य विषयिताव्याप्यत्वादिति भावः। **अन्यथा**-प्रमाणाभावेऽपि तत्र ज्ञानत्वस्वीकारे। आकारस्य विज्ञानातिरिक्तत्वमनतिरिक्तत्वं वेति विकल्प्याऽऽद्ये दूषणमाह-**तर्हि समायातमिति**। द्वितीये त्वाह-**समूहालम्बन** इति। नीलपीते इति समूहालम्बन इत्यर्थः। **स्याद्रिति**। तदभिन्नाभिन्नस्य तदभिन्नत्वनियमादिति भावः। **एतदेवोपपादयति स्वरूपतो विज्ञानस्येति**। विज्ञानस्वरूपस्येत्यर्थः। **अविशेषात्**-एकत्वात्। ननु नीलाकारः पीताकारश्चाऽभिन्न एव, भेदप्रतीतिस्तु तद्धर्मयोर्नीलत्वपीतत्वयोर्भेदात्। न च तयोरपि विज्ञानस्वरूपत्वादभेदः, नीलत्वादेरपारमार्थिकस्य पारमार्थिकविज्ञानेनाऽभेदासम्भवादित्यभिप्रायवान् **शङ्कते-अपोहरूप इति**। अनीलव्यावृत्तिरूप इत्यर्थः। **इतरथा**-विरुद्धनीलत्वादीनामेकत्र समावेशे। ननु समूहालम्बने न नीलाकारो न वा पीताकारोऽभ्युपेयते, परन्तु चित्राकार एवेति नोक्तदोष इति वासनासङ्क्रमं मुख्यतया दूषयति-**न चेति**। **मातृपुत्रयोरिति**। मात्राऽनुभूतस्य गर्भस्थेनत नयेन स्मरणप्रसङ्गादिति भावः। उपादानेनाऽनुभूतमुपादेयेन स्मर्यते इत्यपि निरस्यति-**न चेति**।

रामरुद्री।

तस्यैव तदानीं भानप्रसङ्ग इति भावः। **प्रमाणाभावेऽपीति**। विषयितात्मकज्ञानत्वव्याप्याभावेऽपीत्यर्थः। **तदभिन्नेति**। नीलरूपाकारात्मकविज्ञानाभिन्नस्य पीताकारस्य नीलाभिन्नत्वनियमादिति भावः। **एकत्रसमावेशे** इति। एकाधिकरणवृत्तित्वेनाऽवधारणे, तेनैकाधिकरणवृत्तीनामपि तथात्वेनाऽप्रतीतिदशायां भ्रमात्मकविरोधावधारणेऽपि नाऽसङ्गतिः। **उपादानेनेति**। अत्र **उपादानत्वं** न समवायिकारणत्वं, विभिन्नकालीनयोः क्षणिकज्ञानव्यक्त्योरेकव्यक्ति प्रति अपरव्यक्तेरुक्तसमवायिकारणत्वासम्भवात्। नाऽपि तन्मते स्वकारणत्वे सति स्वोत्पत्तिकालोत्पत्तिकध्वंसप्रतियोगित्वमुपादानत्वं, तन्मते वस्तुमात्रस्यैव क्षणिकत्वेन मातुरपि पुत्रोपादानतापत्तेः। अत एव न स्वभिन्नासमवेतत्वे सति स्वकारणत्वमुपादानत्वम्, उत्तरो-

(१) अत्राऽयमभिसन्धिः। बाह्यवस्तुजातस्य सत्त्वे किं प्रमाणं? यदि प्रत्यक्षादिकमुच्यते, तदा घटस्य स्वसंवित्त्या सहोपलम्भेनाऽभेद एव किं न कल्प्यते? भेदो हि सहानुपलब्धिव्याप्यः, यथा गवाश्वयोः। न हि तयोः सहोपलब्धिनियमोऽस्ति। गोपरिहारेणापि वाजिनः प्रतीतेः। अत एव गोव्यक्तिरश्ववतो भिन्नेति सिद्धे व्याप्यव्यापकभावे व्यापकस्य सहानुपलम्भस्य व्यतिरेकेण ज्ञानविषययोर्भेदोऽपि निवर्तते। यश्च ज्ञानविषययोः पार्थक्यविभासः, स तु मृषाकल्पित एवेति। तथा चोक्तम्—
'सहोपलम्भनियमादभेदो नीलतद्धियोः। भेदश्च भ्रान्तिविज्ञानैर्दृश्यतेन्दाविवाऽद्वये।' इति।

नाथाः सङ्क्रमासम्भवात्। उत्तरस्मिन्नुत्पत्तिरेव सङ्क्रम इति चेन्न। तदुत्पादकाभावात्, चितामेवोत्पादकत्वे संस्कारानन्त्यप्रसङ्गः। क्षणिकविज्ञानेष्वतिशयविशेषः कल्प्यत इति चेन्न। मानाभावात्, कल्पनागौरवात्।

॥ इति क्षणिकविज्ञानात्मवादिबौद्धमतखण्डनम् ॥

एतेन क्षणिकशरीरेष्वेव चैतन्यं प्रत्युक्तं, गौरवात्, अतिशये मानाभावाच्च। बीजादावपि सहकारिसमवधानासमवधानाभ्यामेवोपपत्तेः कुर्वद्रूपत्वेन हेतुत्वमङ्गीक्रियते, कुर्वद्रूपत्वं चाऽङ्कुरजनकतावच्छेदकतया सिद्धो जातिविशेषः, स च फलोपधायकक्षणिकसमर्थबीजमात्रवृत्तिबीजत्वव्याप्यः कल्प्यते, एवमत्राऽपि कुर्वद्रूपत्वेनैव क्षणिकशरीरेषूत्तरोत्तरशरीरनिष्ठवासनोत्पादकत्वं वाच्यमत आह—बीजादाविति। उप-

दिनकरी।

शङ्कते—उत्तरस्मिन्निति। तदुत्पादकेति। वासनोत्पादकेत्यर्थः। चितामेवेति। ज्ञानानामेव संस्कारोत्पादकत्वे तेषामानन्त्यात् संस्कारानन्त्यापत्तिरित्यर्थः। शङ्कते क्षणिकेति। अतिशयविशेषः—शक्तिविशेषः, उत्तरोत्तरविज्ञानानुकूलतयेति शेषः। गौरवादिति। स एवाऽयमित्यापामरप्रत्यभिज्ञानात् क्षणिकानन्तशक्तितत्प्रागभावध्वंसकल्पने गौरवादित्यर्थः।

॥ इति क्षणिकविज्ञानात्मवादिबौद्धमतखण्डनम् ॥

ननु क्षेत्रस्थ बीजादङ्कुरोत्पत्तिः, न कुसूलस्थबीजात्, अतोऽङ्कुरत्वावच्छिन्नं प्रति कुर्वद्रूपत्वेन हेतुत्वमङ्गीक्रियते, कुर्वद्रूपत्वं चाऽङ्कुरजनकतावच्छेदकतया सिद्धो जातिविशेषः, स च फलोपधायकक्षणिकसमर्थबीजमात्रवृत्तिबीजत्वव्याप्यः कल्प्यते, एवमत्राऽपि कुर्वद्रूपत्वेनैव क्षणिकशरीरेषूत्तरोत्तरशरीरनिष्ठवासनोत्पादकत्वं वाच्यमत आह—बीजादाविति। उप-

रामरुद्री।

त्तरघटादिव्यक्तिं प्रति पूर्वपूर्वघटादिव्यक्तीनामुपादानत्वानुपपत्तेः, तन्मते तत्राऽप्युपादानोपादेयभावाभ्युपगमेनेष्टापत्त्यसम्भवात्, परन्तु असहकृतं कारणमुपादानम्, उत्तरव्यक्तौ पूर्वव्यक्तिमात्रस्यैव तैः कारणत्वाङ्गीकारात् भवत्युत्तरव्यक्तौ पूर्वव्यक्तेरुपादानत्वं, माता च पुत्रं प्रति नाऽसहकृतं कारणं, शुक्रशोणितादेरपि पुत्रकारणत्वादिति ध्येयम्। शक्तिविशेष इति। अयं भावः। ज्ञानव्यक्तीनां संस्कारज्ञानजनकत्वे प्रतिज्ञानं भिन्नसंस्कारव्यक्तिकल्पनागौरवेऽपि यादृशज्ञानव्यक्त्युत्तरं स्मरणमनुभवसिद्धं, तज्ज्ञाननिष्ठसंस्कारानुकूला काचित् शक्तिः पूर्वज्ञानव्यक्तौ स्वीकरणीया, न तु सर्वज्ञानव्यक्तावतिशयः कल्प्यते, तेन न संस्कारानन्त्यम्। क्षणिकेति। तन्मते पदार्थमात्रस्य क्षणिकत्वेऽपि यदा यदा यत्स्मरणमनुभवसिद्धं, तदा तदा तज्ज्ञानेष्वेकैव शक्तिः कल्पनीया, नाऽतोऽनन्तशक्तिकल्पनागौरवमिति यदि ब्रूयात्तदा ज्ञानव्यक्तिभेदेन शक्तिभिन्नैवाऽङ्गीकरणीया, पदार्थानां तन्मते क्षणिकत्वादिति समाधानसूचनाय पदार्थमात्रसाधारणक्षणिकत्वस्याऽपि शक्तावनुवादः, अत एव ध्वंसप्रागभावावप्यवश्यकल्प्याविति द्योतनाय ध्वंसप्रागभावयोरुपादानमपि सङ्गच्छते। अनन्तेति तु अनन्तव्यक्तिकल्पनागौरवस्फुरणाय, यदा यदा स्मरणमनुभूयते, तदा तदा विभिन्नशक्तिव्यक्तिकल्पनस्याऽऽवश्यकत्वादिति भावः। इदमुपलक्षणं, तत्तदतिशयं प्रति पूर्वकालीनज्ञानव्यक्तीनां कारणताकल्पनेनाऽपि गौरवं बोधयम्। अत्र च प्रामाणिकं गौरवं न दोषायेति न्यायेन नानाशक्तिकल्पनेऽपि न दोष इत्याशङ्कानिरासायैव 'सोऽयमित्यभेदप्रत्यभिज्ञानात्' इत्युक्तम्, अभेदस्यैवाऽनुभवसिद्धतया नानाव्यक्तिकल्पनं न प्रामाणिकमिति तदभिप्रायः। वस्तुतस्तु पदार्थमात्रस्यैव क्षणिकत्वानुपगमे हेतुरेतत्, तथा च क्षणिकपदार्थोपगन्तॄणां मते नानाव्यक्तिकल्पनागौरवमेव हेतुत्वेनाऽभिमतं, तत्रैव प्रामाणिकं गौरवं न दोषायेत्याशङ्कायामाह—स एवाऽयमिति। तथा चाऽभेदस्यैव अनुभवसिद्धतया क विभिन्नव्यक्तीनां प्रामाणिकतावित्तेति भावः। एतेन प्रत्यभिज्ञायाः प्रत्यक्षरूपत्वेन शक्तीनामतीन्द्रियत्वेन तद्विषयकप्रत्यभिज्ञानं न सम्भवतीति दूषणमपि प्रत्युक्तम् ॥ इति क्षणिकविज्ञानात्मवादिबौद्धमतखण्डनम् ॥

जातिविशेष इति। अङ्कुरोपधायकक्षणिकबीजव्यक्तिमात्रवृत्तिजातिरित्यर्थः। स चाऽयमपोहरूप एव, अनुगतधर्ममात्रस्य तन्मतेऽलीकत्वादिति।

द्रूपत्वाकल्पनात्(१) ॥ इति क्षणिकशरीरात्मवादिमतखण्डनम् ॥

दिनकरी ।

पत्तेः–कस्माच्चिद्बीजादङ्कुरोत्पत्तिः, कस्माच्चिन्नेति नियमोपपत्तेः । **कुर्वद्रूपत्वाकल्पनादिति** । कुसूलस्थबीजादिषु धरणिसलिलसंयोगादिरूपसहकार्यभावादेवाऽङ्कुरानुपपत्तेः, कुर्वद्रूपत्वं तद्रूपेण जनकत्वं च न कल्प्यते प्रमाणाभावादिति भावः ।

अत्र वदन्ति–यत् सत् तत् क्षणिकमिति व्याप्त्या जगतः क्षणिकता, तदनुरोधेन च कुर्वद्रूपत्वं, तद्रूपेण कार्यं प्रति हेतुत्वं चाऽऽवश्यकम् । न च तादृशव्याप्तौ मानाभावः, तादृशव्याप्त्यस्वीकारे कुसूलस्थबीजादङ्कुरोत्पतिवारणाय धरणिसलीलसंयोगादीनां सहकारित्वकल्पने गौरवात् तादृशव्याप्तिस्वीकारे तु कुर्वद्रूपत्वेन हेतुत्वकल्पनात् कुसूलस्थबीजे कुर्वद्रूपत्वाभावादेवाऽङ्कुरानुपपत्तेर्न सहकारिता कारणान्तराणामिति लाघवात् । न च क्षणिकत्वमतेऽपि बीजस्य धरणिसलिलसंयोगादेर्वा कुर्वद्रूपत्वेन हेतुत्वमित्यत्र विनिगमनाविरहेण सर्वेषां सहकारिणां कारणत्वकल्पनमावश्यकमिति वाच्यम् । मन्मते अङ्कुरं प्रति बीजानां धरणिसलिलसंयोगादिसहकारिणां च कुर्वद्रूपत्वेनैव हेतुत्वकल्पनात्, कुर्वद्रूपत्वानङ्गीकारे तु बीजत्वधरणिसलिलसंयोगत्वादिनानाहेतुत्वकल्पने गौरवादिति ।

तदसत्, ईदृशगौरवापेक्षया क्षणिकानन्तपदार्थकल्पनेऽतिगौरवात् । न च लाघवात् कुर्वद्रूपत्वेन तेषामेकहेतुतासिद्धावीदृशं गौरवं न दोषाय, फलमुखत्वादिति वाच्यम् । फलमुखगौरवस्याऽपि दोषत्वात् । किञ्च जगतः क्षणिकत्वे स एवाऽयं घट इति प्रत्यभिज्ञानुपपत्तेः, पूर्वकालीनघटाभेदस्यैतत्कालीनघटेऽभावात् । न च तज्जातीयाभेद एव तादृशप्रतीतेर्विषयः, तन्मते जातेरपि क्षणिकत्वेन पूर्वकालीनघटवृत्तिघटत्वस्यैतत्कालीनघटेऽभावात् ।

एतेन जगतः क्षणिकत्वे नाशत्वावच्छिन्नं प्रति सत्त्वेनैकमेव हेतुत्वमिति लाघवमित्यपास्तम् ।

यदपि स्थिरपदार्थाङ्गीकारे एकस्मिन् पदार्थे सामर्थ्यमसामर्थ्यं च विरुद्धमतस्तद्भेद इति, तदपि न । एकस्मिन्नेव पदार्थे एककालावच्छेदेन सामर्थ्य–तदभावयोरेव विरुद्धतया, कालभेदेन तत्स्वीकारे बाधकाभावात् ।

यत्तु पूर्वापरकालीनधर्मिणोरभेदे तद्धर्मयोः सामर्थ्यासामर्थ्ययोर्भेदोऽनुपपन्नः, तन्मते धर्मधर्मिणोरभेदादिति, तन्न । घटत्वं न घट इत्यादिप्रतीतीनामप्रामाण्यापत्त्या धर्मधर्मिणोरभेदस्य वक्तुमशक्यत्वादिति दिक् ॥ इति क्षणभङ्गवादिमतखण्डनम् ॥

रामरुद्री ।

तादृशव्याप्त्यस्वीकार इति । तथा च जगद्यदि क्षणिकं न स्यात्तदा नानाकारणताकल्पनरूपगौरवोपधायकं स्यादिति तर्क एवोक्तव्याप्तौ प्रयोजक इति भावः । **मन्मत इति** । तथा च कुर्वद्रूपत्वेन सर्वेषां कारणत्वेऽपि कारणता एकैव, त्वन्मते तु नानाकारणता कल्पनीयेति गौरवमिति भावः ।

ईदृशगौरवेति । कतिपयकारणताकल्पनगौरवेत्यर्थः । **फलमुखत्वादिति** । नानाकारणताकल्पनापेक्षया लाघवेन कुर्वद्रूपत्वेनैव कारणता सिद्धौ, एतदुपपत्तये नानाव्यक्तिकल्पने तादृशकल्पनायाः कारणतासिद्ध्युत्तरकालीनतया तादृगौरवज्ञानस्य पूर्वतनानुमितिप्रतिबन्धकत्वासम्भवादिति भावः । न च कारणतानिश्चयात्पूर्वमपि **'यत्सत्–'** इत्यादिव्याप्त्या नानाव्यक्तिकल्पनमुपतिष्ठत एवेति वाच्यम् । तादृशव्याप्तेरप्रयोजकत्वाशङ्कानिरासाय उक्ततर्कापेक्षया तत्र चाऽऽपाद्यव्यतिरेकनिश्चयसम्पादकस्यैकरूपेण तादृशनिश्चयस्याऽपेक्षणीयतया गौरवोपस्थितेः कारणतासिद्ध्युत्तरत्वनियमादिति भावः । **दोषत्वादिति** । उत्पन्नायामप्यनुमितौ उत्तरकालीनगौरवज्ञानेनाऽप्रामाण्यज्ञानोत्पत्त्या अप्रामाण्यज्ञानास्कन्दिता-

---

(१) यच्चोक्तं यत् सत् तत् क्षणिकमिति, तदप्यसारम् । कारणसामग्रीसहितादेव बी-

अस्तु तर्हिक्षणिकविज्ञाने गौरवात् नित्यविज्ञानमेवाऽऽत्मा, अविनाशी वा अरेऽयमात्मा, सत्यं ज्ञानमनन्तं ब्रह्म-" इत्यादिश्रुतेश्चेति चेन्न। तस्य सविषयकत्वासम्भवस्य दर्शितत्वात्, निर्विषयस्य ज्ञानत्वे मानाभावात्, सविषयकत्वस्याऽप्यननुभवात्, अतो विज्ञानादिभिन्नो नित्य आत्मेति सिद्धम्। "सत्यं ज्ञानं-" इति तु ब्रह्मपरं, जीवे तु नोपयुज्यते, ज्ञानाज्ञान-सुखि(त्वदुःखि)त्वादिभिर्जीवानां भेदसिद्धौ सुतरामीश्वरभेदः, सिद्ध्य-

दिनकरी।

वेदान्ती शङ्कते--**अस्तु तर्हीति। क्षणिकविज्ञान** इति। आत्मनः क्षणिकविज्ञान-स्वरूपत्वपक्ष इत्यर्थः। आत्ममात्रस्य नित्यविज्ञानरूपत्वमीश्वरस्य वेति विकल्प्याऽऽद्ये दूषण-माह—**तस्येति। दर्शितत्वादिति।** 'तस्य जगद्विषयकत्वे-'इत्यादिग्रन्थेन दर्शितत्वा-दित्यर्थः। तथा च जीवस्य तथात्वासम्भवात् नाऽऽत्ममात्रस्य नित्यज्ञानस्वरूपत्वमिति भावः। ननु जीवस्य न जगद्विषयकत्वं, न वा नियतयत्किञ्चिद्विषयकत्वं ब्रूमः, परन्तु यद्विषयकत्वं यत्र जीवेऽनुभवसिद्धं, तत्र तद्विषयकत्वमत आह सविषयकत्वस्येति। ननु "सत्यं ज्ञानं-" इति श्रुतिरेव जीवस्य ज्ञानस्वरूपत्वे प्रमाणमत आह—"**सत्यमिति।** ननु जीवब्रह्मणोरैक्यान्नित्यविज्ञानरूपत्वं जीवस्य निराबाधमित्यतो जीवब्रह्मणोर्भेदं साध-यति--**ज्ञानाज्ञानेति।** 'सुखित्वादि' इत्यादिना दुःखित्वपरिग्रहः। **सुतरामिति।**

जीवात्मनां नानात्वसिद्धावीश्वरस्यैकस्याऽनेकजीवात्मकत्वासम्भवादेकत्वानेकत्वयोर्विरो-

रामरुद्री।

नुमित्या एककारणतासिद्धयसम्भवादिति भावः। यद्यपि तन्मते जातेरलौकतया सत्त्वाभावेन न क्षणिक-त्वं, नित्यपदार्थानां तैरनङ्गीकाराद्, अनुगतधर्मानङ्गीकाराच्च, कुर्वद्रूपत्वस्याऽप्यपोहरूपत्वात्, न च तर्हि सदसतोः सम्बन्धाभावेन तज्जातीयत्वं घटे नाऽस्त्येवेति प्रत्यभिज्ञानुपपत्तिरिति वाच्यम्, असतोऽपि तैर्भानाङ्गीकारेण प्रत्यभिज्ञानसम्भवादिदमसङ्गतम्। तथाऽपि असद्विषयकत्वेन प्रत्यभिज्ञाया भ्रमत्वापत्तिरेव तन्मते दूषणम्। न चेष्टापत्तिः, तथा सति अभेदावगाहितयैव प्रतीत्युपपत्तौ तज्जातीयत्वावगाहित्वानुसर-णवैयर्थ्यापत्तेः, प्रतीतेः प्रमात्वोपपादनायैव तदनुसरणात् तदनुसरणेनाऽप्यप्रतीकारादिति विभावनीयम्॥

इति क्षणभङ्गवादिमतखण्डनम्॥

'क्षणिकविज्ञानपक्षे' इत्यस्य विज्ञानस्य क्षणिकत्वपक्ष इत्यर्थकताभ्रमं निराकुरुते—**आत्मन इति।** उत्तरत्र दूषणद्वयस्य मूले वक्तव्यतया विकल्प्य दूषणद्वयं सङ्गमयति—**आत्ममात्रस्येति। यत्किञ्चि-द्विषयकत्वमिति।** नियतैकविषयकत्वमित्यर्थः। यथाश्रुते अनुभवानुसारेण नियतयत्किञ्चिद्विषयक-त्वस्यैव व्यवस्थापनीयतया असङ्गत्यापत्तेः। **तद्विषयकत्वमिति।** तथा चाऽनुभवानुसारित्वात् कल्पनाया न विनिगमनाविरहावकाश इति भावः। **सविषयकत्वस्येतीति।** न हि घटविषयकः, अपि

जादङ्कुरोत्पत्तिस्वीकारेण क्रमयौगपद्यानुयोगायोगात्। न च सामग्री यदि तत्र कञ्चन विशेषं नाऽऽदधाति, किन्तत्र तया साहाय्यं कृतमिति शङ्क्यम्। सामग्र्या स्वसमवहितत्वरूपवि-शेषसम्पादनेनैव तत्सम्भवात्। अत एव बीजमङ्कुरारम्भे धरणिसलिलेऽवश्यमपेक्षते। अत एव कृषीवलोऽङ्कुरकामो बीजवापाय प्रवर्तते। अन्यथा कुर्वद्रूपस्यैव कारणत्वे कदाचिद्ध-रणिसलिलसंयोगमन्तरेणाऽपि बीजमङ्कुरं जनयेत्। कृषीवलोऽपि वा बीजादौ न प्रवर्तेत, बीजस्याऽङ्कुरेऽकारणत्वात्। तादृशक्षणोत्पादनायैव तत्र प्रवर्तते इति चेन्न। तादृशक्षणोत्पा-दकस्याऽपि क्षणत्वेन बीजादेस्तत्राऽकारणत्वात् तत्राऽपि क्षणान्तरानुसरणे चाऽनवस्थापा-तात्, इति य सदित्यादिनियमोऽप्रामाणिक इति सिद्धम्। विस्तरस्त्वन्यत्र द्रष्टव्यः।

ति। अन्यथा बन्धमोक्षव्यवस्थाऽनुपपत्तेः। योऽपीश्वराभेदबोधको वेदः, सोऽपि तद्भदेन तदीयत्वं प्रतिपादयँस्तौति, अभेदभावनयैव यतितव्यमिति वदति। अत एव "सर्वे आत्मानः समर्पिताः" इति श्रूयते। मोक्षदशायामज्ञाननिवृत्तावभेदो जायते, इत्यपि न, भेदस्य नित्यत्वेन नाशासम्भवात्, भेदनाशेऽपि व्यक्तिद्वयं स्थास्यत्येव। न च द्वित्वमपि नश्यतीति वाच्यम्। तव निर्धर्मके ब्रह्मणि सत्यत्वाभावेऽपि सत्यस्वरूपं तदितिवत् द्वित्वाभावेऽपि व्यक्तिद्वयात्मको तावितिं सुवचत्वात्। मिथ्यात्वाभावोऽधि-

दिनकरी।

धादिति भावः। **ईश्वरभेदः**—ईश्वरजीवात्मनोर्भेदः सिद्धयतीत्यर्थः। **अन्यथा**-ईश्वरस्य जीवात्मकत्वे। **बन्धमोक्षेति**। कश्चित् संसारी **बद्धः**, कश्चिन्मुक्त इति व्यवस्थाऽनुपपन्ना स्यादित्यर्थः। **चैत्रमैत्रात्मनोरीश्वररूपयोरैक्यादिति** भावः। ननु कथं तर्हि 'तत्त्वमसि-" इत्यादितच्छब्दप्रतिपाद्यब्रह्मणि युष्मच्छब्दप्रतिपाद्यजीवस्याऽभेदबोधको वेदः प्रमाणमित्यत आह—**योऽपीति**। मोक्षकाले जीवात्मनां ब्रह्मणा सहाऽभेद उत्पद्यत इति मतं निरस्यति—**मोक्षेति**। भेदस्याऽनित्यत्वमभ्युपेत्याऽपि मोक्षकाले जीवब्रह्मणोर्भेदं व्यवस्थापयति—**भेदनाशेऽपीति**। भेदसत्त्वे व्यक्तिद्वयं निर्विवादमेव इति 'अपि'ना सूचितम्। **तव**-वेदान्तिनः। **निर्धर्मक इति**। इदं च 'सत्यत्वाभावेऽपि' इत्यत्र हेतुतयोक्तम्। ननु निर्धर्मकत्वं-स्वभिन्नधर्मशून्यत्वं, मिथ्यात्वाभावरूपसत्यत्वस्य ब्रह्मरूपत्वादभावस्याऽधिकरणात्मकत्वान्नाऽनुपपन्नमित्यभिप्रायेण शङ्कते—**मिथ्यात्वाभाव इति**। ननु कथमेकत्वा-

रामरुद्री।

तु घटविषयकज्ञानवानित्येव अनुभवादिति मूलाशयः। **अन्यथेति**। नन्वेकस्मिन्नेव ब्रह्मणि जीवोपाधीनामनन्ततया तत्तदन्तःकरणावच्छेदेन विलक्षणसुखित्वदुःखित्वाद्यनेकानुभवो न विरुद्ध्यते, एकस्मिन्नेव गगने विभिन्नकर्णशष्कुल्यवच्छेदेन विरुद्धशब्दतदभावयोरनुभववदि(१)त्याशङ्कायामुक्तं मूले—**अन्यथेति**। तदर्थमाह—**ईश्वरस्येति**। **'संसारी' इति 'बद्धः'**इत्यस्य विवरणम्। **मुक्त इति**। निवृत्तसंसार इत्यर्थः। **अनुपपत्तिः स्यादित्यत्र** हेतुमाह—**चैत्रमैत्रात्मनोरिति**। बद्धमुक्तात्मनोरिति तदर्थः। **ईश्वरस्वरूपयोः**—एकेश्वररूपयोः। इदं **चैक्यहेतुत्वेनोक्तम्**। अथ तत्तदन्तःकरणावच्छिन्नचैतन्यस्य एकत्वेऽपि तदन्तःकरणस्य नाशे तदन्तःकरणावच्छिन्नचैतन्यस्य मुक्तत्वव्यवहारः, यदन्तःकरणस्य न नाशः तदन्तःकरणावच्छिन्नचैतन्ये बद्धत्वव्यवहार इति बद्धमुक्तव्यवस्थाया नाऽनुपपत्तिरिति चेत्, एवमपि मोक्षार्थं प्रयत्नानुष्ठानवैफल्यापत्तेरवारणात्, एतदन्तःकरणनाशेऽपि अन्तःकरणान्तरावच्छिन्ने स्वात्मनि दुःखोत्पत्तेरावश्यकतया प्रवृत्तिफलस्य निर्दुःखत्वस्याऽसम्भवादिति भावः। यदि चाऽन्तःकरणस्यैव सुखदुःखादिः, **न चैतन्यस्य** कदाऽपीत्युच्यते, तदा विमुक्त्यर्थप्रयत्नो व्यर्थ एव, स्वस्य नित्यमुक्तत्वात्। यदि च भ्रान्तिनिवृत्त्यर्थं तदप्युच्यते, तदाऽप्यन्तःकरणान्तरावच्छिन्ने स्वस्मिन्नेव भ्रान्तेरावश्यकत्वेन प्रयत्नस्य निष्फलत्वापत्तेरावश्यकत्वादिति भावः। **भेदमिति**। द्वित्वमित्यर्थः। यथाश्रुते भेदनाशाभ्युपगमेन पुनर्भेदोत्पादस्य मूलानुक्तत्वेन च भेदव्यवस्थापनस्याऽसङ्गत्यापत्तेरिति ध्येयम्। न च भेदनाशे प्रतिबन्धकाभावेन तादात्म्यमप्युत्पद्यतामिति वाच्यम्। अभेदभावनामात्रेण तादात्म्योत्पत्तौ घटपटयोरपि तथात्वापत्तेरिति भावः। **स्वभिन्नधर्मशून्यत्वमित्यस्य** नाऽनुपपन्नमित्यन्वेतनेनाऽन्वयः। **द्वितीय इति**। नाऽत्मसामान्यस्य ज्ञानरूपत्वं, किन्तु परमात्मन एवेति द्वितीयपक्षे **इत्यर्थः**। **मत्वर्थीयेति**। तदस्याऽस्तीत्यर्थे मतुवादीनामिव "अर्शआदिभ्योऽच्"इति सूत्रेण अच्प्रत्यय-

(१) 'भवात्' इत्यपि पाठः।

करणात्मकस्तत्र सत्यत्वमिति चेत्, एकत्वाभावो व्यक्तिद्वयात्मको द्वित्वमित्यप्युच्यताम्, प्रत्येकमेकत्वेऽपि पृथिवीजलयोर्न गन्ध इतिवदुभयं नैकमित्यस्य सर्वजनसिद्धत्वात्। योऽपि तदानीमभेदप्रतिपादको वेदः, सोऽपि निर्दुःखत्वादिना साम्यं प्रतिपादयति,सम्पदाधिक्ये पुरोहितोऽयं राजा संवृत्त इतिवत्। अत एव "निरञ्जनः परमं साम्यमुपैति" इति श्रूयते। ईश्वरोऽपि न ज्ञानसुखात्मा, किन्तु ज्ञानाद्याश्रयः, "नित्यं विज्ञानमानन्दं ब्रह्म" इत्यादौ विज्ञानपदेन ज्ञानाश्रय एवोक्तः, "यः सर्वज्ञः स सर्ववित्" इत्याद्यनुरोधात्। 'आनन्दम्' इत्यस्याऽप्यानन्दवदित्यर्थः। अर्शआदित्वान्मत्वर्थीयोऽच्प्रत्ययः, अन्यथा पुँल्लिङ्गत्वापत्तेः। आनन्दोऽपि दुःखाभावे उपचर्यते, भाराद्यपगमे सुखी संवृत्तोऽहमिति वत्। अस्तु वा तस्मिन्नानन्दः, न त्वसावानन्दः, "असुखम्"इति श्रुतेः। न विद्यते सुखं यस्येति कुतो नाऽर्थ इति चेन्न। क्लिष्टकल्पनापत्तेः, प्रकरणविरोधात्, 'आनन्दम्' इत्यत्र मत्व-

दिनकरी।

धिकरणे तदभावरूपद्वित्वमत आह—**प्रत्येकमिति**। ननु "ब्रह्मविद्ब्रह्मैव भवति" इति श्रुतेर्मोक्षदशायामभेद उत्पद्यत इत्यर्थिकायाः का गतिरत आह-**योऽपीति**। **अत एव**-"ब्रह्मविद्ब्रह्मैव भवति" इति श्रुतेः साम्यप्रतिपादकत्वादेव। निरञ्जनः--निर्दुःखः। द्वितीये दोषमाह--**ईश्वरोऽपीति**। **विज्ञानपदेन**--"नित्यं-" इत्यादिश्रुत्यन्तर्गतविज्ञानपदेन। अधिकरणल्युडन्तेन विज्ञानाश्रयत्वबोधनादिति भावः। **आनन्दवदित्यर्थ इति**। मत्वर्थीयाच्प्रत्ययान्तेन 'आनन्द'शब्देनाऽऽनन्दवतो बोधनात्, अन्यथा 'आनन्दम्' इति नपुंसकत्वानुपपत्तेरिति भावः। नन्वानन्दवदित्यर्थो न सङ्गच्छते, तव मते ईश्वरे आनन्दाभावादत आह--**आनन्दोऽपीति**। लक्षणाकल्पनमेव तव दोष इत्यत आह--**अस्तु वेति**। **असुखमिति**। 'असुखम्'इत्यत्र नञा ब्रह्मणि सुखभेदबोधनादिति भावः। **क्लिष्टकल्पनापत्तेरिति**। बहुव्रीहावन्यपदार्थलाभार्थं नञस्तत्र लक्षणापत्तेरित्यर्थः। न च नञ्तत्पुरुषेऽपि नञो लक्षणाऽऽवश्यकी, अन्यथा नञर्थस्य नामार्थतया भेदेनाऽन्वयासम्भवादिति वाच्यम्। तस्य नामत्वेऽपि निपातत्वादिति। ननु नञ्तत्पुरुषेऽपि तत्र 'असुख'पद'ब्रह्म'पदयोरेकधर्मिबोधकत्वलक्षणं सामानाधिकरण्यमनुभवसिद्धम्, अन्यथा तयोः समानवचनत्वानुपपत्तेः, अतस्तन्निर्वाहार्थं नञोऽभाववति

रामरुद्री।

विधानादिति भावः। **नपुंसकत्वानुपपत्तेरिति**। "स्यादानन्दथुरानन्दः*"इति कोशेन तस्य नित्यपुँल्लिङ्गत्वावधारणादिति भावः। न च च्छान्दसं नपुंसकलिङ्गत्वमिति वाच्यम्। गत्यन्तराभाव एव च्छान्दसत्त्वाभ्युपगमादित्यवधेयम्। **आवश्यकीति**। ब्रह्मणि सुखभिन्नस्यैवाऽभेदान्वयसम्भवादिति भावः। ननु नञर्थभेदस्याऽऽश्रयतयैव ब्रह्मण्यन्वयो वाच्य इत्यत आह—**अन्यथेति**। **नामार्थतयेति** नामार्थयोः भेदान्वयबोधोपगमे राजा पुरुष इत्यत्राऽपि राजकीयः पुरुष इति बोधापत्तेरिति भावः। **निपातत्वादिति**। निपातातिरिक्तनामार्थयोरेवाभेदेनाऽन्वयनियमः, कथमन्यथा घटो नाऽस्तीत्यादौ नञर्थाभावे प्रतियोगितया घटादेरन्वयाभ्युपगम इति भावः। **समानवचनेति**। अभेदान्वयस्थल एव समानवचन-

* अमरसिंहकृतं नामलिङ्गानुशासनम्।

र्थीयाच्प्रत्ययविरोधाच्चेति सङ्क्षेपः ॥

॥ इति नित्यविज्ञानात्मवादिवेदान्तिमतखण्डनम् ॥

एतेन-प्रकृतिः कर्त्री, पुरुषस्तु पुष्करपलाशवन्निर्लेपः, किन्तु चेतनः, कार्यकारणयोरभेदात् कार्यनाशे सति कार्यरूपतया तन्नाशोऽपि न स्यादित्यकारणत्वं तस्य, बुद्धिगतचैतन्याभिमानान्यथानुपपत्त्या तत्कल्पनम् । बुद्धिश्च प्रकृतेः परिणामः, सैव महत्तत्वमन्तःकरणमित्युच्यते, तत्सत्त्वा-

दिनकरी ।

लक्षणा तवाऽप्यावश्यकीत्यत आह--**प्रकरणेति** । **प्रत्ययविरोधाच्चेति** । 'आनन्द' शब्दस्य पुँलिङ्गत्वनियमेनाऽऽनन्दमिति रूपस्य मत्वर्थीयाच्प्रत्ययं विनाऽनुपपत्तेरिति भावः । ॥ इति नित्यविज्ञानात्मवादिवेदान्तिमतखण्डनम् ॥

साङ्ख्यमतं दूषयितुमुपन्यस्यति—**एतेनेति** । पूर्वोक्तयुक्त्याऽऽत्मनो ज्ञानवत्त्वसाधनेन, वक्ष्यमाणयुक्त्या चेत्यर्थः । **प्रकृतिरिति** । मूलप्रकृतिरित्यर्थः । **कर्त्रीति** । कर्तृत्वं चाऽत्र कर्तृभूतान्तःकरणप्रकृतित्वम् । अनुकूलकृतिमत्त्वलक्षणकर्तृत्वस्य तन्मतेऽन्तःकरणधर्मत्वादिति ध्येयम् । **पुष्करपलाशवदिति** । पद्मपत्रवदित्यर्थः । यथा च पद्मपत्रमम्भसा लिप्तं न सम्भवति, तथा पुरुषः कर्तृत्वाद्याश्रयो न भवतीति भावः । तथा च पुरुषः कर्तृत्वाभाववान् । कारणत्वाभावादित्यनुमानं तत्र प्रमाणं बोध्यम् । ननु तत्र कारणत्वसत्त्वाद्धेत्वसिद्धिरत आह-**कार्यकारणयोरिति** । **न स्यादिति** । मा भवत्वित्यर्थः । **तस्य**-पुरुषस्य । नन्वेतादृशपुरुषसत्त्वे किं मानमत आह-**बुद्धिगतेति** । क्व चित् प्रसिद्धस्यैव चैतन्यस्य बुद्धावारोपसम्भवादिति भावः । **प्रकृतेरिति** । मूलप्रकृतेरित्यर्थः । ननु पुरुषस्य कर्तृत्वाभावे तत्र धर्माधर्मयोरुत्पत्त्यभावात्तदधीनसुखदुःखयोस्तत्राऽनुत्पत्तौ दुःख-

रामरुद्री ।

त्वनियमादिति भावः । **प्रत्ययविरोधादिति** । न विद्यते सुखं यस्येति बहुव्रीह्यादरणे आनन्दमित्यत्र मत्वर्थकाच्प्रत्ययश्रुतिविरोधादिति भावः । वस्तुतः प्रकरणपदस्य प्रत्ययार्थकता न प्रसिद्धा, अतो नञ्तत्पुरुषनिष्पन्नपदपरम्परापठितत्वमेव प्रकरणं, तद्विरोधादित्यर्थः । अस्थूलम्, अनणु, अदीर्घमित्यादौ सर्वत्र नञ्तत्पुरुषदर्शनेन तत्सन्निधौ पठितस्य असुखमिति पदस्य बहुव्रीहिनिष्पन्नत्वे प्रकरणविरोधादित्यर्थो ज्यायानिति प्रतिभाति ॥ इति नित्यविज्ञानात्मवादिवेदान्तिमतखण्डनम् ॥

मूलस्थएतेनेत्यस्याऽर्थमाह—पूर्वोक्तेति । न च पुरुषस्य साङ्ख्यमतेऽपि **'किन्तु चेतनः'** इत्यनेन चेतनत्वाङ्गीकाराच्चैतन्यस्य ज्ञानरूपत्वादात्मनो ज्ञानवत्त्वसाधनेन साङ्ख्यमतनिराकरणासम्भवादिदमसङ्गतमिति वाच्यम् । चेतनत्वस्य तन्मते विज्ञानरूपत्वाभ्युपगमात्, अन्यथा चेतनातिरिक्तज्ञानाभ्युपगमे तस्य पञ्चविंशतितत्त्वमध्येऽप्रविष्टतया तत्त्वाधिक्यापत्तेः ।

"मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।
षोडशकस्तु विकारो न प्रकृतिर्न विकृति पुरुषः" (साङ्ख्यकारिका ९)

इति तन्सिद्धान्तादिति भावः । **'एतेन'इत्यस्यैवाऽर्थान्तरमाह—वक्ष्यमाणेति । मूलेति** । सर्वकारणेत्यर्थः । **प्रकृतित्वमिति** । कारणत्वमित्यर्थः । नन्वनुकूलकृतिमत्त्वमेव कर्तृत्वमिति कुतो नाऽभ्युपेयत इत्यत आह—**अनुकूलेति । मा भवत्विति** । पुरुषस्य घटादिकारणत्वे घटादिकार्यस्याऽपि नाशो न स्यात्, कार्यकारणयोरभेदात् पुरुषस्य चाऽविकारस्य नाशरूपविकारासम्भवादिति

सत्त्वाभ्यां पुरुषस्य संसारापवर्गौ, तस्या एवेन्द्रियप्रणालिकया परिणतिर्ज्ञानरूपा घटादिना सम्बन्धः, पुरुषे कर्तृत्वाभिमानो बुद्धौ चैतन्याभिमानश्च भेदाग्रहात्, ममेदं कर्तव्यमिति मदंशः पुरुषोपरागो बुद्धेः स्वच्छतया तत्प्रतिबिम्बादतात्त्विकः, दर्पणस्येव मुखोपरागः, इदमिति विषयोपराग इन्द्रि-

दिनकरी।

ध्वंसरूपमोक्षः पुरुषस्य न स्यादत **आह-तत्सत्त्वासत्त्वाभ्यामिति**। बुद्धिसत्त्वासत्त्वाभ्यामित्यर्थः। बुद्धिसत्त्वे इन्द्रियप्रणालिकया तत्परिणामेनाऽयं घट इत्यादिज्ञानेन **सम्बद्धो** घटादिर्विषयः स्वाकारकज्ञानपरिणामिबुद्ध्याऽगृहीतासंसर्गकत्वसम्बन्धेन पुरुषनिष्ठः पुरुषस्वरूपतिरोधानेन पुरुषस्य संसारसम्पादकः, बुद्धिनाशे तु तत्परिणामस्याऽयं घट इत्यादिज्ञानरूपस्याऽभावाद्विषयावच्छेदाभावात् कैवल्यावस्थानरूपो मोक्षः, दुःखसम्बन्धतद्ध्वंसरूपौ संसारमोक्षौ तु न पुंसः, किन्तु बुद्धेरेवेति भावः। ननु पुरुषे साक्षात्सम्बन्ध एव विषयतयाऽस्तु, स एव च तस्मिन् संसारव्यवहारनियामकोऽस्तु, किमुक्तबुद्धिघटितपरम्परासम्बन्धेनेत्यत **आह--तस्या एवेति**। तथा च विषये बुद्धेरेव सम्बन्धः पुरुषसम्बन्धः, बुद्धिपुरुषयोरसंसर्गाग्रहात्, न तु पुरुषे स्वातन्त्र्येण विषयसम्बन्धोऽस्ति, मानाभावात्। न च विषयप्रकाशार्थं साक्षात्सम्बन्ध एव स्वीकार्यः, किमुक्तपरम्परयेति वा वाच्यम्। **तस्य** पुरुषस्वभावनिबन्धनत्वे पुरुषस्य नित्यत्वेन तत्स्वभावाधीनविषयसम्बन्धस्य सत्त्वान्मोक्षाभावप्रसङ्गात्, घटप्रकाशकाले पटादिरूपविषयस्वभावाधीनस्य पटादिरूपचैतन्यसम्बन्धस्य सत्त्वात्पटादेरपि प्रकाशापत्तेरिति। यद्वा बुद्धितो ज्ञानस्य भेदमाह- **तस्या एवेति**। तथा च बुद्धेः परिणतिर्ज्ञानं, न तु बुद्धिरेवेति भावः। **भेदाग्रहादिति**। बुद्धिपुरुषयोर्भेदाग्रहादित्यर्थः। इदानीं बुद्धित उपलब्धेर्भेददर्शनार्थं बुद्धेरंशत्रयं प्रदर्शयति-**ममेदमित्यादिना**। **पुरुषोपरागः**-पुरुषसम्बन्धः, दर्पणस्य यथा मुखसम्बन्धः प्रतिबिम्बमात्रं, न तु तात्त्विकः, तथा बुद्धिपुरुषयोर्भेदाग्रहादेकत्वाभिमानः पुरुषोपराग इत्यर्थः।

रामरुद्री।

भावः। **इन्द्रियप्रणालिकयेति**। इन्द्रियद्वारेत्यर्थः। इन्द्रियमार्गेण बहिर्निर्गताया बुद्धेर्घटादिविषयदेशप्राप्तौ तदाकारेण बुद्धेः परिणामो जायते, स एव वृत्तिरूपं घटादिज्ञानमिति रीत्येन्द्रियाणां द्वारता बोध्या। **सम्बद्ध इति**। स्वाकारकत्वमेव ज्ञानघटयोः सम्बन्धः। **स्वाकारकेति**। घटादिविषयाकारकेत्यर्थः। **परिणामित्वं**-कारणत्वम्। **अगृहीतासंसर्गकत्वं**—अगृहीतभेदकत्वम्। **भेदाग्रहस्तु** बुद्धिसान्निध्याख्यदोषादेवेति बोध्यम्। **स्वरूपतिरोधानं**-सम्बन्धमात्ररहितस्वभावस्याऽप्रकाशः। **विषयावच्छेदः**—विषयसम्बन्धभानम्। **'कैवल्येन'**इत्यस्याऽपि विषयसम्बधभानं विनेत्येवाऽर्थः। **बुद्धेरेवेति**। बुद्धावेव दुःखस्य तद्धर्मस्य चोत्पादादिति भावः। **साक्षात्सम्बन्धः**—स्वरूपसम्बन्धरूप इत्यर्थः। बुद्धेः पुरुषसम्बन्धित्वं तत्र पुरुषसम्बन्धं विनाऽनुपपन्नमित्याशङ्क्याऽऽह-**बुद्धीति**। तथा च भेदाग्रह एव तत्र तत्सम्बन्ध इति भावः। **स्वातन्त्र्येण**—भेदाग्रहातिरेकेण। **मानाभावादिति**। बुद्धौ तद्भिन्नपुरुषसम्बन्धे प्रमाणाभावादित्यर्थः। **विषयप्रकाशार्थमिति** साक्षात्सम्बन्धकल्पने प्रमाणोपन्यासाय, **तस्य**-साक्षात्सम्बन्धस्य, **पुरुषस्वभावनिबन्धनत्वे**-पुरुषस्वरूपप्रयुक्तत्वे-स्वात्मकस्वरूपसम्बन्धस्य स्वस्वभावाधीनत्वादिति भावः। उक्ताशयकल्पनागौरवमभिसन्धाय प्रकारान्तरेणैतद्ग्रन्थमेवाऽवतारयति-**यद्वेति**। पुरुषोपरागविषयोपरागाभ्यामिति विशेषणे तृतीया, तदर्थस्य च बुद्धेर्ज्ञानरूपपरिणामार्थकाध्यवसायपदार्थेऽन्वयः। **कर्तव्यघटादेरिति** षष्ठ्यर्थोऽपि अत्रैवाऽ-

यप्रणालिकया परिणतिभेदस्तात्त्विकः, निःश्वासाभिहतदर्पणस्येव मलिनिमा, कर्तव्यमिति व्यापारांशः, तेनांऽशत्रयवती बुद्धिः, तत्परिणामेन ज्ञानेन पुरुषस्याऽतात्त्विकः सम्बन्धः, दर्पणस्य मलिनिम्नेव मुखस्योपलब्धिरुच्यते। ज्ञानवत् सुखदुःखेच्छाद्वेषधर्माधर्मा अपि बुद्धेरेव, कृतिसामानाधिकरण्येन प्रतीतेः। न च बुद्धिश्चेतना, परिणामित्वात्, इति मतमपास्तम्।

कृत्यदृष्टभोगानामिव चैतन्यस्याऽपि सामानाधिकरण्यप्रतीतेः, तद्भिन्ने मानाभावाच्च। चेतनोऽहं करोमीति प्रतीतिश्चैतन्यांशे भ्रम इति चेत्, कृत्यं-

दिनकरी।

इन्द्रियप्रणालिकया–इन्द्रियद्वारा। **परिणतिभेदः**–अयं घट इत्यादिज्ञानरूपः परिणाम एव विषयेण घटादिना बुद्धेः सम्बन्ध इत्यर्थः। तस्य पारमार्थिकत्वे निःश्वासाभिहतदर्पणस्य मलिनिमा दृष्टान्तः। **कर्तव्यमितीति**। पूर्वोक्तपुरुषोपराग–विषयोपरागाभ्यां कर्तव्यस्य घटादेरवभासः, तेन कर्तव्यमित्यध्यवसायो व्यापारांश इत्यर्थः। **ज्ञानेन पुरुषस्याऽतात्त्विकः सम्बन्ध इति**। अत्र ज्ञानेन पुरुषस्य योऽतात्त्विकः सम्बन्धः, स उपलब्धिरित्युच्यत इत्यन्वयः। अतात्त्विके दृष्टान्तो दर्पणस्य मलिनिम्नेव मुखस्य सम्बन्ध इति। **तथा** च ज्ञानेन सह चेतनोऽहमिदं जानामीत्याकारो बुद्धावारोपितस्य यः सम्बन्धोऽतात्त्विकः स उपलब्धिः, न तु बुद्धिरेवोपलब्धिरिति भावः। **कृतिसामानाधिकरण्येनेति**। अदृष्टस्याऽतीन्द्रियत्वेऽपि धार्मिकोऽहं करोमीत्यादौ तदंशे उपनीतभानरूपं बोध्यम्। **परिणामित्वादिति**। अनित्यधर्माश्रयत्वादित्यर्थः।

कृत्यदृष्टभोगानामिति। कृतिः स्वसमानाधिकरणमेवाऽदृष्टं जनयति, तच्चाऽदृष्टं स्वसमानाधिकरणमेव भोगं जनयतीति कृत्यदृष्टभोगानां परम्परया सामानाधिकरण्यप्रमितिवच्चेतनोऽहं करोमीति सामानाधिकरण्यप्रमितिप्रतीतेरित्यर्थः। **तद्भिन्न इति**। कर्तृभिन्ने। 'मानाभावात्' इत्यस्य चेतन इत्यादिः। 'चः' पूर्वोक्तदूषणसमुच्चायकः। कर्तृत्वाश्रयो न चेतनः जन्यधर्माश्रयत्वात् घटवदिति बाधकसत्त्वाच्चेतनोऽहं करोमीति प्रतीतिश्चैतन्यांशे भ्रम इत्याशङ्कते **चैतन्यांश इति**। **कृत्यंशेऽपीति**। बुद्धिः कर्तृत्वाभाववती,

रामरुद्री।

न्वेति। **व्यापारांश इति**। **व्यापारः**—कर्त्तव्यमित्यभिलप्यमान **अंशः** सम्बन्धो यस्य स तथेत्यर्थः। तथा च ममेदं कर्त्तव्यमिति बुद्धयभिलापकशब्दे ममेत्यनेन पुरुषसम्बन्धः, इदमित्यनेन विषयसम्बन्धः, कर्त्तव्यमिति व्यापारसम्बन्धो बुद्धावभिलप्यत इति सम्बन्धत्रयवती बुद्धिरिति सिद्धमिति भावः। **तथाचेत्यादि**। चेतनोऽहं करोमीत्याकारेण बुद्धावारोपितस्य पुरुषस्य ज्ञानेन सहेदं ज्ञानमिति प्रतीयमानोऽतात्त्विकसम्बन्धो यः स उपलब्धिरित्यर्थो योजनया प्रतीयमान इत्यस्याऽध्याहारेण च बोध्यः। ननु कृतिसामानाधिकरण्येन अदृष्टप्रतीतिः प्रात्यक्षिकी न सम्भवति, तस्याऽतीन्द्रियत्वादत आह—**अदृष्टस्येति**। **तदंशे**—अदृष्टांशे। **अनित्यधर्माश्रयत्वादिति**। यद्यपि धर्माश्रयत्वांशो व्यर्थः, तथाऽपि क्षणिकविज्ञानवादिना अनित्यविज्ञाने व्यभिचारोद्भावनमभिसन्धाय तदुक्तं, क्षणिकविज्ञानस्य वृत्तिमत्त्वलक्षणधर्मत्वविरहान्न तत्र व्यभिचार इति भावः। वृत्तिमत्वं च दैशिकसम्बन्धेन बोध्यम्, तेन कालिकेन क्षणिकविज्ञानस्य वृत्तिमत्त्वेऽपि न व्यभिचारतादवस्थ्यम्, बुद्धेस्तु प्रकृतिपरिणामत्वेन तद्वृत्तित्वान्न स्वरूपासिद्धिः।

ननु 'तद्भिन्ने **मानाभावात्**' इत्यसङ्गतं, कर्तृभिन्नानां प्रकृत्यादीनां सत्त्वादत **आदिं पूरयति। चेतन इत्यादिरिति**। बुद्धिः कर्तृत्वाभाववती जन्यत्वादिति पाठः। **जन्यधर्माश्रयत्वा**दिति प्रामादि-

शेऽपि किं नेष्यते? अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावः, अनित्यत्वे तत्पूर्वमसंसारापत्तिः। नन्वचेतनायाः प्रकृतेः कार्यत्वात् बुद्धेरचेतनत्वम्, कार्यकारणयोस्तादात्म्यादिति चेन्न। असिद्धेः, कर्तुर्जन्यत्वे मानाभावात्। वीतरागजन्मादर्शनादनादित्वम्, अनादेर्नाशासम्भवान्नित्यत्वम् तत् किं प्र-

दिनकरी।

जन्यधर्माश्रयत्वात्, इति बाधकस्य तत्राऽपि सत्त्वादिति भावः। **अन्यथेति**। कर्तृचेतनयोर्भेदाङ्गीकार इत्यर्थः। **बुद्धेर्नित्यत्व इति**। कर्तृभिन्नस्य चेतनस्य स्वीकारे तस्मिन् सुखदुःखाभावात् संसारमोक्षयोरनुपपत्त्या पूर्वोक्तरीत्या बुद्धिसत्त्वासत्त्वाभ्यामेव संसारापवर्गौ वाच्यौ, तथा च बुद्धेर्नित्यत्वे तु तत्सत्त्वनिबन्धनस्य संसारस्य सर्वदाऽऽपत्त्या मोक्षाभाव एव स्यात्। बुद्धेरनित्यत्वे तु तत्र जन्यत्वं स्वीकरणीयम् अजन्यस्य नाशासम्भवात्, तथा च तदुत्पत्तेः पूर्वं तत्सत्त्वनिबन्धनः संसारो न स्यादित्यर्थः। वस्तुतस्तदुत्पत्तेः पूर्वं तदाश्रितादृष्टादेरभावाद्बुद्धेरनुत्पत्त्या संसारः कदाऽपि न स्यादित्यवधेयम्। **असिद्धेरिति**। बुद्धौ प्रकृतिकार्यत्वाभावादिति भावः। ननु कर्तृत्वेन जन्यत्वानुमितिः परिशेषात् प्रकृतिजन्यत्वविषयिणी स्यादित्यत आह-**कर्तुरिति**। कर्तृत्वस्य जन्यत्वव्याप्यत्वेऽनुकूलतर्काभावादिति भावः। प्रत्युत तद्विपरीतानादित्वग्राहकतर्कसत्त्वादनादित्वमेव कर्तुरित्याह-**वीतरागेति**। 'वीतरागजन्मादर्शनात्' इति न्यायसूत्रं, सरागजन्मदर्शनादिति तदर्थः। **अनादित्वमिति**। स्तन्यपाने बालस्य प्रवृत्तिर्नेष्टसाधनताज्ञानमन्तरेण, तच्च नाऽनुभवस्वरूपं बाधात्, स्मरणस्य स्वसमानाधिकरणपूर्वानुभवसापेक्षतया पूर्वजन्मसत्त्वे पूर्वजन्मन्यपि प्रथमप्रवृत्त्यनुरोधेन तत्पूर्वस्य, एवं तत्पूर्वस्य जन्मनः सिद्धावनादित्वमात्मन इति भावः। 'अनादेः'इत्यस्य भावस्येति शेषः। जन्यभावत्वेन नाशे हेतुत्वादिति भावः।

रामरुद्री।

कः। यद्ययं नैयायिकानां प्रयोगः, तदा तन्मते कर्तुर्जन्यधर्माश्रयत्वाद्व्यभिचारित्वापत्तेः, यदि च साङ्ख्यमतप्रविष्टस्यैव तन्मतसिद्धपुरुषस्यैव कर्तृत्वमस्तु, न बुद्धेरित्यभिप्रायेणाऽयं प्रयोग इत्युच्यते तदा स्वमतव्याघातः, कर्तृत्वस्याऽपि जन्यधर्मतया पुरुषधर्मत्वासम्भवेन कर्तृत्वस्याऽधित्यापत्तिश्चेति। यदि च तत्पाठप्रामाण्येऽप्याग्रहः, तदा जन्यधर्मः कर्तृत्वातिरिक्तत्वेन विशेषणीयः, तथा च साङ्ख्यमतानुयायिन एव पुरुषस्यैव कर्तृत्वं चेतनत्वं चाऽस्तीत्यभिप्रायेणेयमाशङ्का भवति। के चित्तु **जन्यधर्मत्वा**दित्यस्य बहुव्रीहिमाश्रित्य जन्यधर्माश्रयत्वादित्यर्थं परिकल्प्य एतद्ग्रन्थस्य कर्तृत्वाभावसाधने न तात्पर्यम्, अपि तु व्यभिचरेणोक्तहेतुनाचेतनत्वाभावो न साधयितुं शक्यः, अन्यथा तेनैव व्यभिचारिहेतुना कर्तृत्वाभावोऽपि किन्न सिद्ध्येदित्यापादान एव तात्पर्यमित्याहुः। ननु कर्तृनित्यत्वे निर्मोक्षप्रसङ्ग इति मूलमसङ्गतं,कर्तृनित्यात्वेऽपि तद्भिन्नस्य चेतनस्याऽऽत्यन्तिकदुःखनिवृत्तिरूपमोक्षे बाधकाभावादित्यत **आह-कर्तृभिन्नस्येति**। **तस्मिन्**-चेतने। **सुखेति**। शुभाशुभकर्मकर्त्तरि सुखदुःखयोरसम्भवादिति भावः। **न स्यादित्यर्थ इति**। न चेष्टापत्तिरिति वाच्यम्। पूर्वमसंसारिणोऽपि संसारित्वोपगमे मुक्तस्याऽपि पुनः संसारित्वापत्त्या मोक्षार्थं कोऽपि न प्रवर्तेतेति भावः। पूर्वमसंसारे कदाऽपि संसारो न स्यादित्यप्यापत्तिः सम्भवतीत्याह—**वस्तुतस्त्विति**। **तदुत्पत्तेः**-बुद्ध्युत्पत्तेः। **तदाश्रितेति**। बुद्ध्याश्रितेत्यर्थः। **अदृष्टादेरित्यादिना** तज्जनककर्मणः परिग्रहः। **अनुत्पत्त्येति**। कार्यमात्रे अदृष्टस्य कारणत्वादिति भावः। नन्वनादेर्नाशा**योगादिति** मूलमसङ्गतं, प्रागभावस्याऽनादेरपि नाशदर्शनादित्यत आह **अनादेरित्यस्येति**। 'प्रकृतेर्गुणैः क्रियमाणानि सर्वशः कर्माणी'त्यस्योत्तरार्धे अन्वयासम्भवः, **कर्माणी**त्यस्य द्वितीयान्तत्वोपगमेऽपि **कर्त्ते**ति कृधोगे षष्ठ्यापत्त्या साधुत्वानुपपत्तेर्निराकाङ्क्षता

धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ॥ ४९ ॥

कृत्यादिकल्पनेन ? न च —

"प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताऽहमिति मन्यते–" (भगवद्गीता)

इत्यनेन विरोध इति वाच्यम् । प्रकृतेः–अदृष्टस्य, गुणैः–अदृष्टजन्यैरिच्छादिभिः, कर्ताऽहमिति-कर्ताऽहमेवेत्यस्य तदर्थत्वात्,

"तत्रैवं सति कर्तारमात्मानं केवलं तु यः–" (भगवद्गीता)

इत्यादि वदता भगवता प्रकटीकृतोऽयमुपरिष्टादाशय इति सङ्क्षेपः ॥

इति साङ्ख्यमतखण्डनम् ॥

धर्माधर्मेति । आत्मेत्यनुषज्यते । शरीरस्य तदाश्रयत्वे देहान्तरकृतकर्मणां देहान्तरेण(१) भोगानुपपत्तेः । विशेषेति । योग्यविशेषगुणस्य ज्ञानसुखादेः सम्बन्धेनाऽऽत्मनः प्रत्यक्षत्वं सम्भवति, न त्वन्यथा, अहं जानेऽहं करोदिनकरी ।

न चेति । प्रकृतिः–माया, तस्या गुणैः–सत्त्वरजस्तमोलक्षणैः क्रियमाणानि कर्माणि भवन्ति, अहङ्कारः–अहमिति प्रत्ययः, तेन विमूढः आत्मा–अन्तःकरणं यस्य तथाविधः पुरुषः कर्ताऽहमिति मन्यते इत्यर्थकेन भगवद्वचनेनेत्यर्थः । तेनाऽऽत्मनः कर्तृत्वाभावप्रतिपादनादिति भावः । अहमेवेति । तथा च तेन स्वतन्त्रकर्तृत्वाभाव एवाऽऽत्मनि प्रतिपाद्यते, न तु कर्तृत्वसामान्याभाव इति भावः । प्रकटीकृतोऽयमिति ।

"अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक् चेष्टा दैवं चैवाऽत्र पञ्चमम्–" (भगवद्गीता)

इत्यनेन पञ्चानामपि कर्तृत्वं प्रतिपाद्य "तत्रैवं सति–"इत्यादिनाऽपि स्वतन्त्रकर्तृत्वस्यैवाऽऽत्मनो निषिद्धत्वादिति भावः । एवं पुरुषस्यैव कर्तृत्वमस्तु, न च कारणत्वाभावेन कर्तृत्वाभाव एव साधनीय इति वाच्यम् । स्वरूपासिद्धेः । कार्यकारणयोरभेदात् कार्यनाशे कार्यरूपतया नाशः स्यादित्यकारणत्वं पुरुषस्येत्यपि न स्यात्, कार्यकारणयोरभेदस्यैवाऽसिद्धत्वादित्यादि विस्तरभिया नोक्तमित्यभिप्रायवानाह- सङ्क्षेप इति ।

इति साङ्ख्यमतखण्डनम् ॥

रामरुद्री ।

परिहाराय क्रियापदमध्याहरति—भवन्तीति । इत्थं चोत्तरार्धात् प्रागेवमपीत्यपिः पूरणीय इति भावः । अहमिति । प्रत्यय इत्यस्य कर्त्तरि बुद्धौ इत्यादिः, तथा सत्येव तेन विमूढत्वोपपत्तेः, आत्मेत्यस्य पुरुषार्थकत्वे भेदनियतविग्रहस्थषष्ठ्यनुपपत्तिरतो व्याचष्टे—अन्तःकरणमिति । विरोधे हेतुमाह—तेनेति । स्वतन्त्रकर्तृत्वं—कारणान्तरनिरपेक्षनिष्प्रकर्तृत्वम् , अधिष्ठानम्—आधारः, दैवम्—अदृष्टं, कर्तृत्वं प्रतिपाद्य—कारणत्वं प्रतिपाद्येत्यर्थः, क्रियानुकूलकृतिमत्त्वरूपस्य तस्याधिष्ठानादौ बाधात् , एवं चाऽहमेव कर्त्ता इत्यत्राऽपि अहमेव कारणमित्येवार्थः, तथा सत्येव मूढतोपपत्तिः अन्यथा कारणानां बहुत्वेऽपि स्वस्यैव कर्तृतयाऽहमेव कर्त्तेत्यस्य प्रमात्वापत्तिरिति ध्येयम् ॥४९॥

॥ इति साङ्ख्यमतखण्डनम् ॥

---

(१) देहान्तरे' इत्यपि पाठः ।

प्रवृत्त्याद्यनुमेयोऽयं रथगत्येव सारथिः ।
अहङ्कारस्याऽऽश्रयोऽयं मनोमात्रस्य गोचरः ॥ ५० ॥
विभुर्बुद्ध्यादिगुणवान् बुद्धिस्तु द्विविधा मता ॥

मीत्यादिप्रतीतेः ॥ ४९ ॥ इत्यात्मनि प्रमाणकथनम् ॥

प्रवृत्त्येति । **अयमात्मा परदेहादौ प्रवृत्त्यादिनाऽनुमीयते । प्रवृत्तिरत्र चेष्टा, ज्ञानेच्छाप्रयत्नादीनां देहेऽभावस्योक्तप्रायत्वात्, चेष्टायाश्च प्रयत्नसाध्यत्वात्, चेष्टया प्रयत्नवानात्माऽनुमीयत इति भावः ।**

अत्र दृष्टान्तमाह—रथेति । **यद्यपि रथकर्म चेष्टा न भवति, तथाऽपि तेन कर्मणा सारथिर्यथाऽनुमीयते, तथा चेष्टात्मकेन कर्मणा परात्माऽनुमीयत इति भावः । इति परदेहादावात्मनि प्रमाणकथनम् ॥**

अहङ्कारस्येति । **अहङ्कारः-अहमिति प्रत्ययः, तस्याऽऽश्रयः-विषयः आत्मा, न शरीरादिरिति ।**

मन इति । **मनोभिन्नेन्द्रियजन्यप्रत्यक्षाविषयः, मानसप्रत्यक्षविषयश्चेत्यर्थः, रूपाद्यभावेनेन्द्रियान्तरायोग्यत्वात् ॥ ५० ॥**

विभुरिति । **विभुत्वं-परममहत्परिमाणवत्त्वम् । तच्च पूर्वमुक्तमपि स्पष्टार्थमुक्तम् ।** बुद्ध्यादिगुणवानिति । **बुद्धिसुखदुःखेच्छादयश्चानुदेश गुणाः पूर्वमुक्ता वेदितव्याः । इत्यात्मस्वरूपकथनम् ॥**

दिनकरी ।

तदाश्रयत्वे-धर्माधर्माश्रयत्वे । अन्यथा-विशेषगुणसम्बन्धादृते । **इत्यादिप्रतीतेरिति ।** इत्यादौ ज्ञानादिसम्बन्धप्रकारेणैवाऽऽत्मनः प्रत्यक्षस्याऽनुभवसिद्धत्वादित्यर्थः ॥४९॥

इत्यात्मनि प्रमाणकथनम् ॥

परकीयप्रवृत्त्यादेरतीन्द्रियत्वेन हेतुज्ञानासम्भवात्, स्वरूपासिद्धेश्चाह-**प्रवृत्तिरत्रेति । उक्तप्रायत्वादिति ।** 'शरीरस्य न चैतन्यम्-' इत्यनेनोक्तत्वादित्यर्थः । इच्छादीनामभावस्य कण्ठरवेणाऽनुक्तेः 'प्रायः'पदम् । चेष्टायाः प्रवृत्तिज्ञापकत्वेऽनुकूलतर्कमाह-**चेष्टायाश्चेति । चेष्टयेति ।** शरीरे समवायेन चेष्टानुमितस्याऽवच्छेदकतया प्रयत्नस्य समवायेनाऽऽश्रय आत्मैवेति भावः ।

दृष्टान्तासिद्धिमाशङ्क्य निराकरोति-**यद्यपीति ।** तथा चोत्तरसंयोगप्राप्तियोग्यक्रियावत्त्वस्यैव हेतुत्वमिति भावः । इति परदेहादावात्मनि प्रमाणकथनम् ॥

आत्मनो मनोमात्रजन्यज्ञानविषयत्वे हेतुमाह-**रूपाद्यभावेनेति ॥ ५० ॥**

"कालस्वात्मदिशां सर्वगतत्वं परमं महत्-"

इत्यनेनाऽऽत्मनि परममहत्त्वस्योक्तेः पौनरुक्त्यमाशङ्क्याऽऽह-**तच्चेति । पूर्वमुक्ता इति ।**

रामरुद्री ।

स्वरूपासिद्धेरिति । परकीयशरीरस्यैव पक्षतया तत्र प्रवृत्तिरूपहेतोरभावादिति भावः ।

दृष्टान्तासिद्धिमिति । शरीरमिदं चेतनाधिष्ठितं चेष्टावत्त्वात् रथवदित्यनुमाने चेतनाधिष्ठितत्वं-चेतनप्रयुक्तक्रियावत्त्वमेव, तस्य दृष्टान्तरथे सत्त्वेऽपि चेष्टारूपहेतोरभावात् शरीरक्रियायामेव चेष्टात्वाङ्गी-

अनुभूतिः स्मृतिश्च स्यात् अनुभूतिश्चतुर्विधा ॥ ५१ ॥

अत्रैव प्रसङ्गात् कतिपयं बुद्धेः प्रपञ्चं दर्शयति–बुद्धिस्त्विति । **द्वैविध्यं व्युत्पादयति**-अनुभूतिरिति । **एतासां चतसृणां करणानि चत्वारि 'प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि(१)'इति सूत्रोक्तानि वेदितव्यानि । इन्द्रियजन्यं ज्ञानं प्रत्यक्षम् । यद्यपि मनोरूपेन्द्रियजन्यं सर्वमेव ज्ञानं, तथाऽपीन्द्रियत्वेन रूपेणेन्द्रियाणां यत्र ज्ञाने करणत्वं, तत्प्रत्यक्षमिति विवक्षितम् । ईश्वरप्रत्य-**

दिनकरी ।

"बुद्ध्यादिषट्कं सङ्ख्यादिपञ्चकं भावना तथा ॥
धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश–"

इत्यनेन साधर्म्यप्रकरणे कथिता इत्यर्थः । इत्यात्मस्वरूपकथनम् ॥

इति श्रीभारद्वाजकुलाम्बुधिपूर्णचन्द्रबालकृष्णभट्टात्मजमहादेवभट्टकृतौ
मुक्तावलीप्रकाशे द्वितीयः परिच्छेदः ॥

मूले–'बुद्धिस्तु द्विविधा मता, अनुभूतिः स्मृतिश्च, तत्राऽनुभूतिः प्रत्यक्षात्मिकैवेति चार्वाकाः । अनुमितिरपीति कणादसुगतौ । उपमितिरपीति के चिच्चैयायिकैकदेशिनः । अर्थापत्तिरपीति प्राभाकराः । अनुपलब्धिरपीति भाट्टा वेदान्तिनश्च । सम्भवैतिह्यरूपे अपीति पौराणिकाः । तत्सर्वमयुक्तमिति सूचयितुमनुभूतेश्चातुर्विध्यमाह—**अनुभूतिश्चतुर्विधेति।** अनुमिनोमि, उपमिनोमि, शाब्दयामीति प्रतीतिसिद्धानामनुमित्यादीनां दुर्वारतया चार्वाकाद्युदितमयुक्तम् । अर्थापत्तेश्चाऽनुमितावेवाऽन्तर्भावो व्यतिरेकिप्रन्थे व्यक्तीभविष्यति । अनुपलब्धेस्त्वभाव एवाऽन्तर्भावः । **अन्यासाञ्च यथायथमनुमित्यादावन्तर्भावः ।** उद्दिष्टासु प्रमासु प्रथमोपस्थितत्वात् प्रत्यक्षं लक्षयति मुक्तावल्याम्—**इन्द्रियजन्यमिति । इन्द्रियजन्यत्वमिन्द्रियरूपादावप्यस्त्यतो ज्ञानमिति।** अनुमित्यादावतिव्याप्तिवारणाय—**इन्द्रियजन्यमिति ।** इन्द्रियजन्यत्वविशेषणे दत्तेऽप्यनुमित्यादावतिव्याप्तिस्तदवस्थेत्याशङ्कते–**यद्यपीति ।** नन्विन्द्रियजन्यत्वाभावादीश्वरप्रत्यक्षेऽव्याप्तिरत आह—**ईश्वरप्रत्यक्षरामरुद्री ।**

कारादिति भावः ॥ ५० ॥ इति परदेहादावात्मनि प्रमाणकथनम् ॥

॥ इति श्रीरामरुद्रभट्टाचार्यविरचितायां मुक्तावलीप्रकाशतरङ्गिण्यां द्वितीयस्तरङ्गः ॥

अर्थापत्तिरपीति । पीनो देवदत्तो दिवा न भुङ्क्त इति ज्ञानानन्तर पीनत्वान्यथानुपपत्त्या रात्रिभोजनं कल्पयति इयमर्थापत्तिरित्यर्थः । **अनुपलब्धिरिति** । अभावे क्लृप्तसन्निकर्षाभावेन प्रत्यक्षासम्भवात्तदग्रहार्थं प्रतियोग्युपलम्भाभावस्य प्रमाणत्वं परिकल्प्य तज्जन्यैवाभावप्रतीतिरिति भाट्टा वेदान्तिनश्चेत्यर्थः । **सम्भवैतिह्यरूपे अपीति** । शतमस्तीति ज्ञानानन्तरं शतं पञ्चाशद्घटितमिति ज्ञानात् पञ्चाशदस्तीति सम्भवानुभवः । इह वटे यक्षस्तिष्ठतीत्यज्ञातमूलवक्तृकवाक्याज्जायमानोऽनुभव ऐतिह्यम् । न चाऽयं शाब्दानुभवः । आप्तोक्तत्वेन निश्चितशब्दस्यैव तत्करणत्वेन तदभावादिति भावः । नन्वनुभूतिश्चतुर्विधेति वाङ्मात्रेण कथं न्यूनाधिकसङ्ख्यानिरास इत्याशङ्क्य स्वयं युक्तिमाह–**अनुमिनोमित्यादि । अभाव एवाऽन्तर्भाव इति** । उपलब्ध्यभाव एवाऽनुपलब्धिः, न तु प्रमितिः विशेषणतासन्निकर्षेणाऽभावज्ञानं प्रत्यक्षात्मकमेवेति भावः । **यथायथमिति** । सम्भवस्याऽनुमितावैतिह्यस्य शब्दे अन्तर्भावः, आप्तोक्तत्व सन्देहादप्रामाण्यशानास्कन्दितः स इति भावः । **इन्द्रियरूपादावपीति** । इदं च यथाश्रुताभिप्रायेण ।

---

(१) **न्यायसूत्रम्** । अ० १ आ० १ सू० ३ ।

क्षं तु न लक्ष्यम्, 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्(१)' इति सूत्रे तथैवोक्तत्वात्।

अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्। अनुमितौ व्याप्तिज्ञानस्य, उपमितौ

दिनकरी।

न्त्विति। तथा च जन्यप्रत्यक्षमेव लक्ष्यमिति भावः। ननु तस्यैव लक्ष्यत्वे किं मानमत आह—**इन्द्रियार्थेति**। इन्द्रियार्थसन्निकर्षोत्पन्नमित्यनेनेश्वरप्रत्यक्षमनुमित्यादि च व्यावर्त्यते। भ्रमवारणायाऽऽह—**अव्यभिचारीति**। भ्रमभिन्नमित्यर्थः। एतावता प्रत्यक्षप्रमाया लक्षणमुक्तं, तद्विभागमाह-**अव्यपदेश्यमिति**। निर्विकल्पकमित्यर्थः। न चाऽव्यपदेश्यपदेन कथं निर्विकल्पकलाभ इति वाच्यम्। व्यपदेशः-पदवाच्यत्वं, तदविषयकमित्यर्थाद्विशिष्टज्ञाने तत्तत्पदवाच्यत्वमुपनीतं भासते इति प्राचीनमतानुसारित्वात्। अत एव कणादं-कणादनामानं मुनिमित्यादि तत्र तत्रोक्त सङ्गच्छते। यद्वा व्यपदेशः-शब्दप्रयोगः, स च विशिष्टज्ञानादेवेत्यव्यपदेश्यत्वेन-व्यपदेशानर्हत्वेन निर्विकल्पकलाभः। **व्यवसायात्मकमिति**। विशिष्टव्यवसायात्मकमित्यर्थः। विशिष्टज्ञानात्मकमिति यावत्। एवं च सूत्रे इन्द्रियार्थसन्निकर्षोत्पन्नमव्यभिचारि अव्यपदेश्यं व्यवसायात्मकमिति योजना बोध्या। अन्यथा लक्षणवाक्ये विभागबोधकपदेन व्यवधानादसङ्गतेरिति। **तथैवोक्तत्वादिति**। ईश्वरप्रत्यक्षालक्ष्यत्वस्यैवाऽभिप्रेतत्वादित्यर्थः।

ईश्वरप्रत्यक्षस्याऽपि लक्ष्यत्वमभिप्रेत्याऽऽह—**अथ वेति**। **ज्ञानाकरणकमिति**। ज्ञानाजन्यमित्युक्तौ चाऽव्याप्तिः, विशिष्टज्ञानमात्रस्य विशेषणज्ञानजन्यत्वादतो ज्ञानाकरण-

रामरुद्री।

वस्तुतो मनोरूपेन्द्रियजन्यानुमित्यादावतिव्याप्तिवारणाय इन्द्रियत्वावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकस्याऽऽवश्यकतया ज्ञानपदं स्वरूपकोर्तनमेवेति बोध्यम्। **अनुमित्यादा**वित्यादिनोपमित्यादिपरिग्रहः। ननु सूत्रे अव्यभिचारिपदवैयर्थ्यमित्याशङ्क्याऽऽह—**भ्रमेति**। ननूक्तलक्षणस्य प्रत्यक्षभ्रमे अव्याप्तिरित्यत आह—**एतावतेति**। तथा च प्रत्यक्षप्रमाया लक्ष्यतया भ्रमस्याऽलक्ष्यत्वान्न तत्राऽव्याप्तिरिति भावः। न चैवं मूलोक्तलक्षणस्य भ्रमेऽतिव्याप्तिः, तस्याऽपि लक्ष्यत्वाभ्युपगमे च सूत्रानुसारिता न स्यादिति वाच्यम्। ज्ञानपदस्य मूलस्थलक्षणे प्रमापरत्वात्, अत एव न तद्वैयर्थ्यमिति भावः। **तदविषयकमितीति**। पदवाच्यत्वाविषयकमित्यर्थः। नन्वयं घट इत्यादिविशिष्टज्ञानस्याऽपि पदवाच्यत्वाविषयकत्वान्निर्विकल्पकविभाजकधर्मस्य विशिष्टज्ञानसाधारण्यादसङ्गतिरित्यत आह—**विशिष्टज्ञान इति**। तथा चाऽयं घटपदवाच्य इत्यादिरेव विशिष्टज्ञानाकार इति भावः। एतत्कल्पे व्यपदेश्यपदे विषयः प्रत्ययार्थः। नवीनमतमनुसृत्याऽऽह—**यद्वेति**। एतत्कल्पे तु अर्ह एव प्रत्ययार्थ इति भावः। अनुव्यवसायभिन्नज्ञानमात्रस्यैव व्यवसायत्वेन निर्विकल्पकसाधारण्यं(२) व्यवसायत्वमत आह—**विशिष्टेति**। 'इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकम्-इति सूत्रयोजनमाह-**एवं चेति**। **नन्वीश्वरप्रत्यक्षं तु न लक्ष्यमित्युक्त्वा सूत्रे तथैवोक्तत्वादिति** मूलकारोक्तिरसङ्गता, उक्तसूत्रे ईश्वरप्रत्यक्षालक्ष्यताया(३) अनभिधानात्तदर्थमाह—**ईश्वरेति**।

ननु जन्यप्रत्यक्षप्रमा(४)लक्षणस्य सूत्रकारोक्तावपि प्रत्यक्षप्रमासामान्यलक्षणं किमिति शिष्यजिज्ञासया प्रत्यक्षप्रमासामान्यलक्षणं वक्तव्यमेवेत्यस्वरसाल्लक्षणान्तरमवतारयति-**ईश्वरेति**। **अव्याप्तिरिति**। निर्विकल्पकस्य ज्ञानाजन्यतया लक्षणस्य तत्र सत्त्वेन विशिष्टज्ञानमात्रेऽव्याप्तिरित्यर्थः। न च निर्विकल्प-

---

(१) न्यायसूत्रम्। अ० १ आ० १ सू० ४। (२) 'साधनव्यवसायत्वं' इत्यपि पाठः।
(३) 'प्रत्यक्षलक्ष्यतायाः' इत्यपि पाठः। (४) 'प्रमाण' इत्यपि पाठः।

दिनकरी ।

कमिति । अनुमित्यादौ व्याप्त्यादिज्ञानस्य करणत्वमस्त्येवेति नाऽनुमित्यादावतिव्याप्तिः । अकरणकत्वादेव चेश्वरज्ञानसङ्ग्रहः । **अथ** निदिध्यासनद्वारा मननादिज्ञानकरणके योगिप्रत्यक्षे लक्षणमिदमव्यापकमिति चेन्न । ज्ञानाकरणकपदेन ज्ञानत्वगर्भधर्मावच्छिन्नकरण(क)त्वाभावस्य विवक्षितत्वात् । न चेदं योगिप्रत्यक्षाव्यापकं, श्रवणादिप्रतिपत्तीनां शाब्दत्वादिनैव जनकत्वेन विशिष्टाभावसत्त्वादिति । अथ वा ज्ञानकरणकत्वाव्यभिचारिजातिशून्यज्ञानत्वमिह विवक्षितं, तादृशी च जातिरनुमितित्वादिरेव । एतेनाऽनुमित्यादौ व्याप्तिज्ञानादेर्ज्ञानत्वेन करणतानये ज्ञानत्वघटितकरणतावच्छेदकधर्माप्रसिद्ध्याऽसम्भवोऽपि प्रत्युक्त इति। **व्याप्तिज्ञानस्येति** षष्ठ्यन्तचतुष्टयस्य करणत्वमित्यनेनाऽन्वयः । न च स्मरणात्मकपरामर्शस्थले व्याप्तिज्ञानस्य करणत्वासम्भव इति वाच्यम् । तत्र व्याप्तिज्ञानस्य संस्कारद्वारा हेतुत्वात् । न च ज्ञानपदं सविषयकपर(१ मेवाऽऽस्ताम् , किं व्याप्तिज्ञानस्य संस्कारद्वारा

रामरुद्री ।

कस्यापीश्वरज्ञानजन्यतयाऽसम्भव एव वक्तुमुचित इति वाच्यम् । एवमपीश्वरप्रत्यक्षे लक्षणसमन्वस्याऽऽवश्यकत्वात् । अव्याप्तौ हेतुमाह—**विशिष्टेति** । जन्येत्यादिः, तेनेश्वरविशिष्टज्ञानस्य विशेषणज्ञानाजन्यत्वेऽपि न कृत्स्नार्थकमात्रपदासङ्गतिः । यत्त्वीश्वरज्ञानं निर्विकल्पकमेवेति, तदसत् , कार्यमात्रं प्रत्यन्वयव्यतिरेकाभ्यां लोके विशिष्टज्ञानस्यैव कारणत्वावधारणात् विशिष्टज्ञानस्यैवेश्वरे सकर्तृकत्वानुमित्या सिद्धेः। यदि च कार्यसामान्ये कृतेरेव कारणत्वं, न ज्ञानेच्छयोः, तया तयोरन्यथासिद्धत्वात , तथा च सकर्तृकत्वानुमाने नेश्वरे कृतेरेव सिद्धिः, न ज्ञानेच्छयोः । न चैवमीश्वरे ज्ञानेच्छयोः कथं सिद्धिरिति वाच्यम् । "यः सर्वज्ञः—" इत्यादिश्रुत्या ज्ञानस्य, "सऐक्षत बहु स्याम्—"इति श्रुत्या इच्छायास्तत्र सिद्धेः, ईक्षणस्येच्छारूपत्वादिति विभाव्यते, तदा यथाश्रुतमेव साधु। न चैवमपि जन्यनिर्विकल्पकस्यापि ईश्वरज्ञानजन्यतया तत्राऽव्याप्तेरनुपपादनाद्ग्रन्थकारस्य न्यूनता दुर्वारैवेति वाच्यम् । ज्ञानाजन्येत्यस्य समवायसम्बन्धावच्छिन्नजनकतानिरूपितजन्यताशून्यार्थकत्वे निर्विकल्पकेऽव्याप्त्यसम्भवेन तदुपेक्षणसम्भवादिति ध्येयम् । अनुमित्यादौ लक्षणासत्त्व(२)मुपपादयति—**अनुमित्यादाविति** । इदं लक्षणमीश्वरप्रत्यक्षसाधारणमित्याह—**अकरणकत्वादेवेति**(३) । करणसामान्यशून्यत्वादेवेत्यर्थः। ननु तत्त्वज्ञानात्मकप्रत्यक्षे अव्याप्तिः, तत्र निदिध्यासनव्यापारकस्य अनुमित्यादिज्ञानस्य करणत्वादित्याशङ्क्य-**अथेति । ज्ञानत्वगर्भेति** । ज्ञानत्वघटितेत्यर्थः । **करणत्वाभाव**स्येत्यस्य निरूपकतासम्बन्धेनेत्यादिः । योगिप्रत्यक्षं तत्त्वज्ञानरूप बोध्यम् । नन्वेवमपि विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे विशेषणतावच्छेदकप्रकारकज्ञानव्यापारकनिर्विकल्पकरणके अव्याप्तिर्दुर्वारैवेत्यस्वरसादाह—**अथ वेति । करणतानय इति** । परामर्शाभावादेव घटादिज्ञानादनुमितिवारणसम्भवादिति भावः । एतच्च यथाश्रुताभिप्रायेणोक्तं, पर्याप्त्यनिवेशसूचनायैव घटतेत्युपादानात् , एवं **ज्ञानत्वघटितत्वं—**ज्ञानत्वाविषयकप्रतीत्यविषयत्वमात्रं(४), न तु ज्ञानत्वभिन्नत्वमपि तत्र घटकं, प्रयोजनाभावात् , असम्भवापत्तेश्चेति विभावनीयम् । **करणत्वासम्भव इति** । व्याप्तिज्ञानासत्त्वेऽपि विशिष्टविषयकसंस्कारादिशिष्टविषयकस्मरणात्मकपरामर्शोत्पत्तेरिति भावः। **संस्कारद्वारेति** । तथा च व्याप्तिज्ञानस्य स्वजन्यपरामर्शसम्बन्धेन अनुमितौ कारणता, परामर्शे स्वजन्यत्वं च स्वनिष्ठ—समवायस्वजन्यसंस्कारान्यतरसम्बन्धावच्छिन्न कारणतानिरूपितकार्यतारूपं, नाऽतः प्रात्यक्षिकपरामर्शजन्यानुमितेर्व्याप्तिज्ञानकरणकत्वानुपपत्तिरिति भावः । **ज्ञानपदमिति** । अनुमितौ व्याप्तिज्ञानं करणमित्यत्र **ज्ञानपद**मित्यर्थः, तथा च स्मरणात्मकपरामर्शस्यापि व्याप्तिविषय-

---

(१) 'ज्ञानपदस्य सविषयकपरत्वमेव' इत्यपि पाठः ।

(२) 'लक्षणसत्त्वम्' इति पाठः । (३) 'अकारणकत्वादेवेति' इत्यपि पाठः ।

(४) ज्ञानत्वविषयकप्रतीत्यविषयत्वमात्रम्' इति पाठः ।

सादृश्यज्ञानस्य, शाब्दबोधे पदज्ञानस्य, स्मृतावनुभवस्य करणत्वात्तत्र नाऽतिव्याप्तिः। इदं लक्षणमीश्वरप्रत्यक्षसाधारणम्। परामर्शजन्यं ज्ञानमनुमितिः। यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं, तथाऽपि परामर्शज-

दिनकरी।

तत्र हेतुत्वकल्पनेनेति वाच्यम्। इच्छादितः संस्काराच्चाऽनुमितेरनुदयात् **सविषयकत्वस्याऽतिप्रसक्तत्वात्। सादृश्यज्ञानस्य**-सादृश्यप्रकारकज्ञानस्य। **तत्र**-अनुमित्यादौ। अनुमितिं लक्षयति-**परामर्शेति।** परामर्शत्वं च व्याप्तिविशिष्टपक्षधर्मताज्ञानत्वम्। **तथा च** व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिरिति फलितम्। भवति हि वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं व्याप्तिविशिष्टपक्षधर्मताज्ञानं, तज्जन्यं पर्वतो वह्निमानिति ज्ञानमिति **तत्र लक्षणसमन्वयः। यद्यपीत्यादि।** प्रत्यक्षादिकमित्यादिना विशेषणतावच्छेदकप्रकारकनिश्चयविधया परामर्शजन्यस्य विशिष्टवैशिष्ट्यबोधस्य परिग्रहः। **परामर्शजन्यमिति।**

रामरुद्री।

कसंस्कारजन्यतया करणत्वमक्षतमिति भावः। एवं च **"कारणं व्याप्तिधीः-"** इति कारिकायामपि धीपदं सविषयकपरमेवेति भावः। **तत्रेति।** स्मरणात्मकपरामर्शे इत्यर्थः। यद्यपि समानविषयकनिश्चयस्य संस्कारद्वारा कैश्चिदनुभवत्वेन, कैश्चिज्ज्ञानत्वेन स्मरणजनकत्वं क्लृप्तमेवेति नैतदनुरोधेन तत्कल्पनीयमित्यसङ्गतमेवैतत्, तथाऽपि **हेतुत्वकल्पनेने**त्यस्य तादृशहेतुत्वघटितलक्षणकल्पनेनेत्यर्थकतया अन्यतरसम्बन्धेन व्याप्तिज्ञानजन्यत्वस्य लक्षणघटकत्वमपेक्ष्य समवायेन व्याप्तिविषयकजन्यत्वस्य लक्षणघटकत्वे लाघवान्नाऽसङ्गतिः। **अतिप्रसक्तत्वादिति।** अथ व्याप्तिविषयकत्वेन कारणतापक्षे व्याप्तिविषयकेच्छादावपि कारणत्वमस्त्येवेति कथमतिप्रसक्तता ? अन्यथा अनुमित्यनुपधायकव्याप्तिज्ञानेऽपि व्याप्तिज्ञानत्वसत्त्वेन अतिप्रसक्तनया तदपि कारणतावच्छेदकं न स्यात्। यदि च अनुमित्यनुपधायकेऽपि व्याप्तिज्ञाने स्वरूपयोग्यतारूपकारणत्वस्वीकारान्नाऽतिप्रसक्तिरित्युच्यते, तदा प्रकृतेऽपीदमेवोत्तरमिति। मैवम्। कतिपयव्याप्तिज्ञानेषु कारणत्वकल्पनापेक्षया अनन्तेच्छादिषु तत्कल्पनागौरवस्यैव तन्मते दूषणत्वेन प्रकृतग्रन्थाभिप्रेतत्वात्, अत एवैतत्सूचनायैवेच्छात इत्युपेक्ष्य **'इच्छादितः संस्काराच्च' इत्येतावत्पर्यन्तमभिहितमित्यवधेयम्।** उपमितौ सादृश्यज्ञान करणमित्यत्र गवयादिविशेष्यकसादृश्यप्रकारकज्ञानस्य व्यापारताभ्रमं निराकर्तुं व्याचष्टे—**सादृश्यप्रकारकेति।** न चैवं तद्व्यापारदौर्लभ्यम् अतिदेशवाक्यार्थस्मृतेर्व्यापारत्वेन वक्ष्यमाणत्वात्। **तथा चेति। व्याप्तिविशिष्टं**—व्याप्तिप्रकारकं यत् पक्षविशेष्यकं **पक्षधर्मताज्ञानं**-हेतुतावच्छेदकसंसर्गावगाहिज्ञानमित्यर्थः। परामर्शजन्यसंस्कारेऽतिव्याप्तिवारणाय ज्ञानपदोपादानम्। ननु व्याप्तिविशिष्टपक्षधर्मताज्ञानमिति व्युत्पत्त्या वह्निव्याप्यविशेष्यकपर्वतादिवृत्तित्वप्रकारकज्ञानजन्यत्वं ततो लभ्यते, तथा च वह्निव्याप्यधूमवानिति परामर्शजन्यानुमितावव्याप्तिरित्याशङ्क्याहाह—**भवति हीति।** वह्निव्याप्यधूमवान्पर्वत इति ज्ञानं व्याप्तिविशिष्टपक्षधर्मताज्ञानं भवतीत्यन्वयः। उक्तरीत्या व्याप्तिप्रकारकपक्षविशेष्यकहेतुतावच्छेदकसम्बन्धावगाहिज्ञानस्यैव तादृशवाक्यलभ्यत्वादिति भावः। न चैवमपि वह्निव्याप्यो धूमः पर्वत इति ज्ञानजन्यानुमितावव्याप्तिः, धूमो वह्निव्याप्यो धूमवान् पर्वत इति परामर्शात्मकज्ञानजन्यप्रत्यक्षादावतिव्याप्तिः, वह्निव्याप्यधूमवानिति परामर्शस्याऽपि कालविधया घटादिप्रत्यक्षहेतुतया तत्राऽतिव्याप्तेर्वारणाय च हेतुतावच्छेदकसम्बन्धावच्छिन्नव्याप्यवच्छिन्नप्रकारतानिरूपितपक्षविशेष्यताशालिनिश्चयत्वावच्छिन्नजनकतानिरूपितजन्यताया एव लक्षणे निवेशनीयत्वादिति वाच्यम्। अनुमितिसमानविशेष्यतया पक्षादिविशेष्यकपरामर्शस्यैवाऽनुमितिहेतुत्वादिति भावः। **यद्यपीत्यादीति।** ननु प्रत्यक्षे विषयस्य सामान्यतो विषयत्वेन, विशेषतश्च तत्तद्व्यक्तित्वेनैव हेतुतया लक्षणे चोक्तनिश्चयत्वावच्छिन्नजनकतानिरूपितजन्यताया एव विवक्षणीयतया नोक्तातिव्याप्तिरित्यत आह—**आदिनेत्यादि।** तथा चैतदस्वरसेनैव **आदि**पदमुपात्तम्। विशिष्टवैशि-

न्यं हेत्वविषयकं यत् ज्ञानं तदेवाऽनुमितिः । न च कादाचित्कहेतुविषयकानुमितावव्याप्तिरिति वाच्यम् । तादृशज्ञानवृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् ।

अथ वा व्याप्तिज्ञानकरणकं ज्ञानमनुमितिः ।
एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः ।
पदज्ञानकरणकं ज्ञानं शाब्दबोधः ।

दिनकरी ।

विषयविधया तत्र परामर्शस्य हेतुत्वादिति भावः । **कादाचित्केति** । धूमवान् पर्वतो वह्निमानित्यनुमितौ पक्षतावच्छेदकविधया धूमस्य भानादिति भावः । **तादृशेति** । कथितनिश्चयजन्यहेत्वविषयकेत्यर्थः, सत्तामादायाऽतिव्याप्तिरतोऽनुभवत्वव्याप्येति । अनुभवत्वन्यूनवृत्तित्वं तदर्थः । तेन नाऽनुभवत्वजातिमादाय प्रत्यक्षादावतिव्याप्तिः । **जातिमत्त्वं च** समवायेन विवक्षितं, तेन कालिकसम्बन्धेन जातिमति काले नाऽतिव्याप्तिः ।

पक्षधर्मताया अप्रवेशेन लाघवाल्लक्षणान्तराह—**अथ वेति** । अत्राऽपि साध्यतावच्छेदकधर्म-साध्यतावच्छेदकसम्बन्ध-हेतुतावच्छेदकधर्म-हेतुतावच्छेदकसम्बन्धानामननुगमादेकव्याप्त्युपादानेऽन्यानुमितावव्याप्तेरेकां व्याप्तिमुपादाय **तज्ज्ञानकरणकवृत्त्यनुभवत्वव्याप्यजातिमत्त्वं** विवक्षणीयम् ।

नन्वनुमिति प्रत्यपि न व्याप्तिज्ञानत्वेन करणत्वं, किं तु ज्ञानत्वेन मनस्त्वेनैव वा,

रामरुद्री ।

ष्टयावगाहिबुद्धित्वावच्छिन्नं प्रति च विशेषणतावच्छेदकप्रकारकविशेषणनिश्चयत्वेनैव हेतुतया भवति तत्राऽव्याप्तिरिति भावः । **धूमवान् पर्वत इत्यादि** । आलोकादिलिङ्गकधूमवत्पर्वतपक्षकानुमित्यादाविति यर्थः । **सत्तामादायेति** । पर्वतो वह्निमानित्यनुमितिवृत्तिसत्ताजातिमत्त्वस्य प्रत्यक्षादावपि सत्त्वादिति भावः । नन्वनुभवत्वमप्यनुभवत्वव्याप्यमेवेति तदादायैव अतिव्याप्तिरवस्थमित्यत आह—**अनुभवत्वेति** । अत्र च धूमवान् पर्वतो वह्निमानित्यनुमितावव्याप्तिवारणायैव जातिघटितलक्षणादरणमिति बोध्यम्।

लाघवादिति । व्याप्तिज्ञाननिष्ठस्वजन्यज्ञानसम्बन्धावच्छिन्नजनताकत्वं व्याप्तिज्ञानकरणकत्वं, न तु व्याप्तिज्ञानजन्यज्ञानजन्यत्वे सति व्याप्तिज्ञानजन्यत्वं व्याप्तिज्ञानकरणत्वं, तेन कालोपाधिविषया व्याप्तिज्ञानजन्यत्वमादाय तथैव परामर्शजन्यत्वमादाय च घटादिप्रत्यक्षे नाऽतिव्याप्तिः । अत्राऽपि लिङ्गाविषयकत्वनिवेशनमावश्यकम् , अन्यथा वह्निव्याप्यधूमवत्पर्वतवान् देश इति विशिष्टवैशिष्ट्यावगाहिज्ञानेऽतिव्याप्तिप्रसङ्गात् । **लिङ्गाविषयकत्वं**—व्याप्यत्वावच्छिन्नप्रकारताशून्यत्वमेव, तेन धूमत्वादिना धूलीपटलादिविषयकविशेष्यावगाहिप्रत्यक्षे नाऽतिव्याप्तिरवस्थम् । न चैवमपि व्याप्तित्वेन घटाद्यवगाहिविशिष्टवैशिष्ट्यप्रत्यक्षवारणासम्भव इति वाच्यम् । हेतुतावच्छेदकावच्छिन्नप्रकारतानिरूपिताधिकरणत्वावच्छिन्नप्रकारतानिरूपिताधेयत्वावच्छिन्नप्रकारतेत्यादिक्रमेणाऽऽधेयत्वावच्छिन्नप्रकारतापर्यन्तमुपादाय तन्निरूपितसाधनतावच्छेदकावच्छिन्नप्रकारताशून्यत्वस्य निवेशनीयत्वादिति भावः । **तज्ज्ञानकरणकवृत्तीति**(१) । तद्व्याप्तिज्ञानकरणकज्ञानवृत्तीत्यर्थः ।

करणत्वमिति । परामर्शरूपकारणान्तराभावादेव यत्किञ्चिज्ज्ञानात्केवलमनसो वाऽनुमितिवारणसम्भवादिति भावः । अत्र च ज्ञानत्वेन करणतापक्षे अनन्तज्ञानव्यक्तीनां करणत्वकल्पनापत्तेः, अपि च ज्ञानस्य समवायेन कारणत्वेऽपि क्षत्यभवात्, परामर्शस्याऽपि ज्ञानत्वात् गुरुभूतस्वजन्यज्ञानवत्त्वसम्बन्धेन तस्य तथात्वे मानाभावाच्चेति **मनस्त्वेन** वेत्युक्तम् । ननु परामर्शातिदेशवाक्यार्थस्मरणद्वाराऽनुमित्यु-

(१) 'तज्ज्ञानवृत्तीति' इत्यपि पाठः ।

प्रत्यक्षमप्यनुमितिस्तथोपमितिशब्दजे ।
घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ॥ ५२ ॥

वस्तुतो यां काञ्चिदनुमितिव्यक्तिमादाय तद्व्यक्तिवृत्तित्वे सति यां काञ्चित् प्रत्यक्षव्यक्तिमादाय तदवृत्तिजातिमत्त्वमनुमितित्वम् । एवं यत्किञ्चित्प्रत्यक्षादिकमादाय तद्व्यक्तिवृत्त्यनुमित्यवृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकं वाच्यमिति । ॥ इति प्रत्यक्षादिप्रमालक्षणकथनम् ॥

जन्यप्रत्यक्षं विभजते--घ्राणजादीति । **घ्राणजं, रासनं, चाक्षुषं, स्पार्शनं,**

दिनकरी ।

एवमेवोपमित्यादावपि मनस्त्वेनैव करणत्वम् । न च कार्यवैजात्यं न स्यादिति वाच्यम् । सामग्रीवैलक्षण्यादेव तदुपपत्तेः । न च प्रमाणविभागानुपपत्तिः, क्रियाविशेषात्तदुपपत्तेरतः पूर्वोक्तानुमित्यादिलक्षणानामसम्भव इत्यत आह—वस्तुत इति । घटेऽतिव्याप्तिवारणाय वृत्त्यन्तम् । वृत्तित्वं समवायेन विवक्षितम् । तेनाऽनुमितौ कालिकेन घटत्वस्य वृत्तित्वेऽपि नाऽतिव्याप्तिः । ज्ञानत्वानुभवत्वादिकमादाय प्रत्यक्षादावतिव्याप्तिवारणाय विशेष्यदलम् । ननु मनसः करणतापक्षे ज्ञानाकरणकत्वं प्रत्यक्षलक्षणमनुमित्यादावतिव्याप्तमतः प्रत्यक्षस्य लक्षणान्तरमाह-एवमिति । प्रत्यक्षत्वादिकमिति । यत्किञ्चिदुपमितिव्यक्तिमादाय तद्व्यक्तिवृत्तिप्रत्यक्षासमवेतजातिमत्त्वमुपमितित्वम् । यत्किञ्चिच्छाब्दबोधव्यक्तिमादाय तद्व्यक्तिवृत्तिप्रत्यक्षासमवेतजातिमत्त्वं निर्वाच्यमित्यर्थः । शब्दभेदेनाऽनुमित्यादीनां लक्षणकथनमनुभवत्वजात्यङ्गीकारेण, तदनङ्गीकारे तद्व्यक्तिसमवेतस्मरणासमवेतधर्मसमवायित्वरूपस्य लक्षणचतुष्टयस्यैकशब्देन वक्तुं शक्यत्वादिति ध्येयम् ॥इति प्रत्यक्षादिप्रमालक्षणकथनम्॥

रामरुद्री ।

पमित्योरेकमनःकरणकत्वे इन्द्रियत्वव्याप्तिज्ञानत्वादिना प्रमाणविभागो न स्यात् । न च प्रत्यक्षकरणत्वानुमितिकरणत्वादिना एकस्याऽपि मनसो विभागसम्भवः, परस्परासङ्कीर्णव्याप्यधर्मकथनं विभाग इत्यत्र परस्परासङ्कीर्णेत्यस्य स्वावच्छिन्नविषयत्वाव्यापकविषयतावच्छेदकत्वरूपत्वात्, अन्यथा व्यभिचारभिन्नविरोधाप्रसिद्धया हेत्वाभासविभागानुपपत्तेरिति वाच्यम् । मनस्त्वेनैवोभयत्र करणत्वे अनुमितित्वोपमितित्वयोरेव नियामकाभावेन कथञ्चिदपि विभागासम्भवादित्याशङ्कते—**न चेति । क्रियाविशेषादिति । क्रिया**—धात्वर्थः न तु कर्म, तथा च प्रत्यक्षादिप्रमारूप'मा'धात्वर्थविजातीयप्रमाभेदेनैव प्रमाणानां विभागसम्भवादिति भावः । **'मनस' इत्यस्याऽनुमित्यादावित्यादिः । अतिव्याप्तमिति ।** नित्यप्रत्यक्षेऽव्याप्तिभिया इन्द्रियजन्यत्वस्य प्रत्यक्षलक्षणत्वासम्भवादिति भावः । **प्रत्यक्षत्वादिकमितीति ।** उपमित्यादेः सर्वमतासिद्धतया प्रथमोपस्थितत्वाच्च अनुमित्यसमवेतत्वस्यैव प्रत्यक्षलक्षणघटकत्वेनोक्तिः । **'आदि'**पदग्राह्यमुपमितित्वं शाब्दत्वं च निर्वक्ति—**यत्किञ्चिदिति । शब्दभेदेनेति ।** प्रत्यक्षलक्षणे अनुमित्यसमवेतेति, तदितरलक्षणेषु प्रत्यक्षासमवेतेति शब्दविशेषेणेत्यर्थः । प्रथमतो मूले अनुमितिलक्षणस्यैव जातिघटितस्योक्तत्वात्प्रत्यक्षादीनामित्युपेक्ष्य **अनुमित्यादीना**मित्युक्तम् । **अनुभवत्वजात्यङ्गीकारेणेति ।** विशेषणज्ञानादिजन्यतावच्छेदककोटौ स्मृत्यन्यत्वनिवेशे गौरवापत्त्या तज्जन्यतावच्छेदककोटिप्रविष्टतयैवाऽनुभवत्वजातिसिद्धेरिति भावः । एवं च सर्वलक्षणेषु **स्मृत्यसमवेते**त्युक्तौ अनुभवत्वमादाय अनुमित्यादावतिव्याप्त्यापत्त्या एकत्राऽनुमित्यसमवेतत्वस्याऽन्यत्र प्रत्यक्षासमवेतत्वस्यैव निवेशनीयतया ,,शब्दभेदेन लक्षणाभिधानमावश्यकमेवेति बोध्यम् । **तद्व्यक्तिसमवेतेति ।** एकशेषेण प्रत्यक्षादिव्यक्तिसमवेतेत्यर्थः । ज्ञानत्वादिकमादाय अन्यत्राऽतिव्याप्तिवारणायाऽत्र **स्मरणासमवेते**त्युक्तम्।

॥ इति प्रत्यक्षादिप्रमालक्षणकथनम् ॥

घ्राणस्य गोचरो गन्धो गन्धत्वादिरपि स्मृतः।
तथा रसो रसज्ञायाः तथा शब्दोऽपि च श्रुतेः ॥ ५३ ॥
उद्भूतरूपं नयनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसङ्ख्ये।
विभागसंयोगपरापरत्वस्नेहद्रवत्वं परिमाणयुक्तम् ॥ ५४ ॥
क्रियां जातिं योग्यवृत्तिं समवायं च तादृशम्।
गृह्णाति चक्षुःसम्बन्धादालोकोद्भूतरूपयोः ॥ ५५ ॥

श्रौत्रं, मानसमिति षड्विधं प्रत्यक्षम्। न चेश्वरप्रत्यक्षस्याऽविभजनान्न्यूनत्वं, जन्यप्रत्यक्षस्यैव निरूपणीयत्वात्, उक्तसूत्रानुसारात् ॥५१॥५२॥

गोचर इति। ग्राह्य इत्यर्थः। गन्धत्वादिरित्यादिपदात् सुरभित्वादिपरिग्रहः। गन्धस्य प्रत्यक्षत्वात् तद्वृत्तिजातिरपि प्रत्यक्षा, गन्धाश्रयग्रहणे तु घ्राणस्याऽसामर्थ्यमिति बोध्यम्।

तथा रस इति। रसत्वादिसहित इत्यर्थः।

तथा शब्दोऽपि-शब्दत्वादिसहितः। गन्धो रसश्चोद्भूतो बोध्यः ॥५३॥

उदभूतरूपमिति। ग्रीष्मोष्मादावनुद्भूतं रूपमिति न तत्प्रत्यक्षम्। तद्वन्ति-उद्भूतरूपवन्ति। योग्येति। पृथक्त्वादिकमपि योग्यव्यक्तिवृत्तितया बोध्यम्। तादृशं-योग्यव्यक्तिवृत्तिम्। चक्षुर्योग्यत्वमेव कथं? तदाह-गृह्णातीति। आलोकसंयोग उद्भूतरूपं च चाक्षुषप्रत्यक्षे कारणम्। तत्र द्रव्यचाक्षुषं प्रति तयोः समवायसम्बन्धेन कारणत्वं, द्रव्यसमवेतरूपादिप्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन, द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेनेति ॥ ५४ ॥ ५५ ॥

दिनकरी।

उक्तसूत्रेति। 'इन्द्रियार्थसन्निकर्षोत्पन्नं-'इत्याद्युपदर्शितसूत्रानुसारादित्यर्थः ५१-५२

घ्राणस्य निर्विषयकत्वादाह—ग्राह्य इति। 'सुरभित्वादि' इत्यादिनाऽसुरभित्वपरिग्रहः। तद्वृत्तीति। गन्धवृत्तीत्यर्थः ॥ ५३ ॥

उद्भूतपदस्य कृत्यमाह-ग्रीष्मेति। 'ऊष्मादौ' इत्यादिना चूर्णप्रविष्टतेजःपरिग्रहः। न तत्प्रत्यक्षम्-नोष्मादिगतरूपप्रत्यक्षम्। न्यूनतां परिहर्तुमाह-पृथक्त्वादिकमपीति। आलोकसंयोग इति। तस्य कारणत्वमन्धकारे चाक्षुषापत्तिवारणाय, उद्भूतरूपस्य तु पिशाचादीनां प्रत्यक्षवारणायेत्यवधेयम्। तयोः-उद्भूतरूपालोकसंयोगयोः ॥५४॥५५॥

रामरुद्री।

सूत्रानुसारादिति। सूत्राननुसारेण प्रत्यक्षसामान्यस्य लक्षणप्रदर्शनपक्षे तु नित्यप्रत्यक्षस्यैकत्वेन तद्विभागासम्भवाज्जन्यप्रत्यक्षस्यैव विभाग इति भावः ॥ ५१ ॥ ५२ ॥

ननु गोचरपदस्य विषयार्थकतया 'घ्राणस्य गोचरो गन्धः-' इत्यसङ्गतमित्याशङ्कां निराकरोति-घ्राणस्येति। ग्राह्य इतीति। गोचरपदस्य जन्यज्ञानविषयार्थकतया नाऽसङ्गतिरिति भावः ॥ ५३ ॥

न तत्प्रत्यक्षमित्यस्य नोष्मादिप्रत्यक्षमिति नाऽर्थः, रूपे उद्भूतत्वप्रवेशेन तत्प्रत्यक्षवारणसम्भवात्, 'द्रव्याणि तद्वन्ति—'इत्यनेनैव तत्प्रत्यक्षस्य वारणीयत्वादतो व्याचष्टे। नोष्मादिगतेति॥५४॥५५॥

उद्भूतस्पर्शवत् द्रव्यं गोचरः सोऽपि च त्वचः ।
रूपान्यच्चक्षुषो योग्यं रूपमत्राऽपि कारणम् ॥ ५६ ॥

उद्भूतेति । **उद्भूतस्पर्शवद्द्रव्यं त्वचो गोचरः** । सोऽपि-**उद्भूतस्पर्शोऽपि, स्पर्शत्वादिसहितः** । रूपान्यदिति । **रूपभिन्नं रूपत्वादिभिन्नं यच्चक्षुषो योग्यं, तत् त्वगिन्द्रियस्याऽपि ग्राह्यम्** । **तथा च पृथक्त्वसङ्ख्यादयो ये चक्षुर्ग्राह्या उक्ताः, एवं क्रियाजा(तिप्रभृ)तयो योग्यवृत्तयस्त्वचो ग्राह्या इत्यर्थः।**

अत्राऽपि-त्वगिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणम् । **तथाच बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणम्** ।

नवीनास्तु बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे न रूपं कारणं, प्रमाणाभावात्, किन्तु चाक्षुषप्रत्यक्षे रूपं, स्पार्शनप्रत्यक्षे स्पर्शः कारणं, अन्वयव्यतिरेकात् । **बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति चेत्, नकिञ्चित्, आत्मावृत्तिशब्दभिन्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु** । **रूपस्य कारणत्वे लाघवमिति चेन्न** । **वायोस्त्वगिन्द्रियेणाऽग्रहणप्रसङ्गात्** । **इष्टापत्तिरिति चेत्** । **उद्भूतस्पर्श एव लाघवात् कारणमस्तु** । **प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिरेव किं नेष्यते ? तस्मात् प्रभां पश्यामीतिवत् वायुं स्पृशामीति प्रत्ययस्य सत्त्वाद्वायोरपि प्रत्यक्षत्वं सम्भवत्येव(१), बहिरिन्द्रियजन्य-**

दिनकरी ।

रूपभिन्नस्य रूपत्वादेस्त्वगिन्द्रियेणाऽग्रहणादाह-**रूपत्वादिभिन्नमिति** । आदिना **नीलत्वादिपरिग्रहः** । द्रव्याध्यक्ष इति पूर्वान्वयी, न तूत्तरान्वयीति बोधयितुं **'रूपमत्राऽपि कारणं द्रव्याध्यक्षे'** इत्यन्तप्रतीकधारणम् । शङ्कते-**बहिरिन्द्रियेति** । ननु कार्याभावे कारणाभावस्य प्रयोजकतया गगनादौ बहिरिन्द्रियजन्यप्रत्यक्षाभावे रूपाभाव-स्पर्शाभावयोः प्रयोजकत्वकल्पने गौरवात्तादृशप्रत्यक्षे रूपत्वेन हेतुतां कल्पयित्वा तदवच्छिन्नाभावत्वेनैव तादृशप्रत्यक्षाभावे प्रयोजकत्वमुचितमित्यत आह-**आत्मावृत्तीति** । आत्मनो बहिरिन्द्रियजन्यप्रत्यक्षवारणायाऽऽत्मावृत्तीति । आकाशस्य बहिरिन्द्रियजन्यप्रत्यक्षवारणाय शब्दभिन्नेति । कालादेस्तद्वारणाय विशेषेति । शङ्कते-**रूपस्येति** । पुनः शङ्कते-**इष्टेति** । प्रतिबन्धोत्तरयति-**उद्भूतेति** । उपसंहरति—**तस्मादिति** । ननु त्वचेः स्पार्शनानङ्गीकारात्तत्स्पार्शनवारणाय स्पर्शान्यद्रव्यसमवेतस्पार्शनं प्रति त्वक्संयुक्तस्पार्शनवद्द्रव्यसमवायत्वेन

रामरुद्री ।

रूपत्वादिभिन्नमितीति । इदञ्च पूरणं, न तु विवरणं, तथात्वे रूपादिभिन्नमित्येव ब्रूयादिति बोध्यम् । ननु **'रूपमत्राऽपि कारणम्'** इत्यत्रैव श्लोकसमाप्तेः **'द्रव्याध्यक्षे'** इति द्वितीयकारिकास्थमेकं पदं किमित्यत्रैवोपात्तमित्याशङ्क्य निरस्यति-**द्रव्याध्यक्ष इतीति** । **पुनः शङ्कतइति** । मूले लाघवादित्यस्य आत्मवृत्तित्वावच्छिन्नाभावत्वेनैव तादृशप्रत्यक्षाभावे प्रयोजकत्वे शब्दभिन्नविशेषगुणापेक्षयेत्यादिः । रूपापेक्षया स्पर्शस्य लाघवाभावात्, तथा च उद्भूतरूपत्वेन उद्भूतस्पर्शत्वेन वा कारणत्वमित्यत्र विनिगमनाविरहः, वायोरिव प्रभायाः प्रत्यक्षाभावे इष्टापत्तिसम्भवादित्यत्रैव तद्ग्रन्थतात्पर्यमिति बोध्यम् । एतदेव स्पष्टयति । **प्रतिबन्धेति** । समानं विरोध्युत्तरं **प्रतिबन्दी** । **उपसंहरतीति** । गुरुभूतस्यापि **'आत्मावृ-**

(१) **संभवाद्वायोरपि 'प्रत्यक्षं भवत्येव' इत्यपि पाठः ।**

द्रव्यप्रत्यक्षमात्रे न रूपस्य, न वा स्पर्शस्य हेतुत्वम् । वायुप्रभयोरेकत्वं गृह्यत एव, क्व चित् द्वित्वादिकमपि, क्व चित् सङ्ख्यापरिमाणाद्यग्रहो दोषादित्याहुः ॥ ५४ ॥ इति चाक्षुषादिप्रत्यक्ष-चक्षुर्विषयादिकथनम् ॥

दिनकरी ।

हेतुत्वस्य वाच्यतया वायोः स्पार्शनाङ्गीकारो नोचितः, अन्यथा वायुगतसङ्ख्यापरिमाणयोस्त्वचा ग्रहणप्रसङ्गादित्यत आह-**वायुप्रभयोरिति ।** प्रभोपादानं दृष्टान्तार्थम् । **गृह्यत एवेति ।** तथा च वायुगतसङ्ख्यादिग्रहे इष्टापत्त्या वायोः स्पार्शनाङ्गीकारे बाधकाभाव इति भावः । **क्व चिदिति ।** सजातीयसंवलनाभाव इत्यर्थः । आदिपदात् परिमाणपरिग्रहः, तद्ग्रहश्च भूयोवयवावच्छेदेन त्वगिन्द्रियसन्निकर्षस्थले बोध्यः । ननु सजातीयसंवलनदशायां भूयोवयवावच्छेदेन त्वगिन्द्रियसन्निकर्षाभावे च कथं न वायुगतद्वित्वपरिमाणयोर्ग्रह इत्यत आह-**क्व चित् सङ्ख्यापरिमाणेति । दोषादिति ।** सजातीयसंवलनादिरूपदोषादित्यर्थः । **आहुरित्यनेनाऽस्वरसः,** तद्बीजं तु वायोः प्रत्यक्षतासन्देहेन लाघवान्मूर्त्तप्रत्यक्षत्वावच्छिन्नं प्रति रूपत्वेनैव कारणत्वमुचितम् । न च वायुगतप्रत्यक्षतासन्देहाधीनव्यभिचारसन्देहस्य प्रतिबन्धकस्य सत्त्वात्कथं कारणताग्रह इति वाच्यम् । लाघवतर्कभावविशिष्टस्यैव व्यभिचारसन्देहस्य प्रतिबन्धकतया प्रकृते पूर्वोक्तलाघवतर्कस्य सत्त्वेन तदभावविशिष्टव्यभिचारसन्देहाभावस्य सत्त्वात् । यच्चोक्तं-प्रभाया अप्रत्यक्षे त्विष्टापत्तिरित्येव किं न स्यादिति । तदपि न, उपरि देशे विहङ्गम इत्यत्र प्रभामण्डलस्यैवोपरिदेशतया तत्प्रत्यक्षं विनोपरिदेशे विहङ्गम इति प्रत्यक्षानुपपत्तेरित्यादिकमिति ॥ ५६ ॥

॥ इति चाक्षुषादिप्रत्यक्ष-चक्षुर्विषयादिकथनम् ॥

रामरुद्री ।

त्तिविशेष-इत्यादिना पूर्वमुक्तस्य कारणत्वमेव व्यवस्थापयतीत्यर्थः । **नोचित इति ।** चतुरणुकादिवायोरपि स्पर्शान्यत्वाद्द्रव्यसमवेतत्वाच्च, तत्र च कारणीभूतत्वक्संयुक्तस्पार्शनवत्समवायाभावात् द्व्यणुकस्य स्पार्शनाविषयत्वादिति भावः । ननु वायुगतसङ्ख्यादिप्रत्यक्षापत्तिदोषेणैव **'वायुप्रभयोः-'** इति ग्रन्थस्याऽवतारितत्वेन तत्र प्रभागतसङ्ख्याप्रत्यक्षे इष्टापत्तिरयुक्तेत्यत आह-**इष्टान्तार्थमिति । बाधकाभाव इति ।** अत्र च यद्यपि वायोः स्पार्शनोपगमे तस्याऽपि स्पर्शान्यद्रव्यसमवेतत्वेन तत्प्रत्यक्षे कारणीभूतस्य त्वक्संयुक्तस्पार्शनवत्समवेतत्वस्य विरह एव बाधको भवति, परमाणुस्तु महत्त्वाभावादेव न स्पार्शनयोग्यः, न च वायुचतुरणुकस्य नेष्यत एव स्पर्शनमपि तु पञ्चाणुकादीनामेवेति वाच्यम्, चतुरणुकस्य स्पार्शनाविषयत्वे पञ्चाणुकेऽपि कारणासम्पत्तेरिदमसङ्गतमित्याक्षिप्य, तथाऽपि वायोः स्पार्शनमङ्गीकुर्वता नवीनेन **द्रव्यसमवेते**त्यत्र द्रव्ये त्रुटिभिन्नत्वस्य प्रकृष्टमहत्त्वस्य वा विशेषणनामङ्गीकृतयैव वायुस्पार्शनस्योपपादनीयत्वान्नाऽसङ्गतिः, अन्थकारेण च प्राचीनसम्मतकार्यकारणभाव एव प्रदर्शितः, तेन वायोः स्पार्शनानङ्गीकारेण द्रव्ये तद्विशेषणस्याऽनर्थकत्वादिति केचन समादधिरे । तन्न मनोरमम् । वायुस्पार्शनानङ्गीकर्त्राऽपि पार्थिवचतुरणुकादिस्पार्शनोपपत्तये द्रव्ये तद्विशेषणस्योपादेयत्वात् । वस्तुतः स्पार्शनवत्त्वं च न लौकिकविषयतया स्पार्शनविशिष्टत्वं, तथा सत्यवयवस्पार्शनानुत्तरावयविस्पार्शनानुपपत्तेः, नाऽपि स्पार्शनोपलक्षितत्वं, यदङ्कुरावयवस्य स्पार्शनमसिद्धं, तस्य स्पार्शनानुपपत्तेः, अतः स्पार्शनयोग्यत्वमेव तद्वाच्यं, तद्योग्यता च प्राचां महत्त्वे सति उद्भूतरूपस्पर्शवत्त्वं, नवीनानां उद्भूतस्पर्शसहितं महत्त्वमतो नाऽनुपपत्तिः, इत्थञ्च पूर्वोक्ते वायुस्पार्शनानौचित्ये **अन्यथेत्यादिनोक्त**स्य वायुगतसङ्ख्यापरिमाणप्रत्यक्षापादनस्यैव बीजता बोध्या । **तद्ग्रहश्चेति ।** परिमाणग्रहश्चेत्यर्थः । **मूर्तप्रत्यक्षेति । इन्द्रियत्वस्याऽतिगुरुतया बहिरिन्द्रियजन्यत्वपरित्यागः कृतः । उक्तलाघवेति ।** मूर्त-

द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम् ।

त्वचो योग इति । **त्वङ्मनःसंयोगो ज्ञानसामान्ये कारणमित्यर्थः । किन्तत्र प्रमाणं ? सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्तमानेन मनसा ज्ञानाजननमिति । ननु सुषुप्तिकाले किं ज्ञानं भविष्यति ? अनुभवरूपं स्मरणरूपं वा ? नाऽऽद्यः, अनुभवसामग्र्यभावात्, तथा हि—चाक्षुषादिप्रत्यक्षे चक्षुरादिना सह मनःसंयोगस्य हेतुत्वात्तदभावादेव न चाक्षुषादिप्रत्यक्षम्। ज्ञानादेरभावादेव न मानसं प्रत्यक्षं, ज्ञानाद्यभावे च आत्मनोऽपि न प्रत्यक्षमिति । व्याप्तिज्ञानाभावादेव नाऽनुमितिः, सादृश्यज्ञानाभावान्नोपमितिः,**

दिनकरी ।

ज्ञानसामान्ये-जन्यज्ञानसामान्ये । **ज्ञानाजननमितीति** । प्रमाणमित्यनुषज्यते । 'चक्षुरादि'इत्यादिना त्वगादिपरिग्रहः । **तदभावादेव**-चक्षुरादिना मनोयोगाभावादेव । **ज्ञानादेरभावादेव न मानसमिति** । अत्र ज्ञानादेर्न मानसमित्यन्वयः । 'अभावात्' इत्यत्राऽपि ज्ञानादेरित्यस्याऽन्वयो बोध्यः । **न प्रत्यक्षमिति** । योग्यगुणसम्बन्धेनैवाऽऽत्मनो मानसप्रत्यक्षस्वीकाराद्योग्यविशेषगुणप्रत्यक्षसामग्र्यन्तर्गतस्य ज्ञानादेरभावादेव ना-

रामरुद्री ।

प्रत्यक्षाभावे रूपस्पर्शयोरभावद्वयस्य प्रयोजकताकल्पनमपेक्ष्य एकस्य रूपाभावस्य तथात्वे लाघवमित्याह—नेनोक्तलाघवेत्यर्थः । नन्वेकस्य स्पर्शाभावस्य तथात्वेऽपि लाघवानपायात् स्पर्शस्यैव कारणता लाघवात् सिद्धयतामित्यत आह—**यच्चोक्तमिति । उपरिदेशे विहङ्गम इति ।** एतच्च प्रार्थ्यचक्षुःप्रतीत्यभिप्रायेण । शब्दबोधे प्रथमान्तपदोपस्थाप्यस्यैव मुख्यविशेष्यतया भाननियमेन उपरिदेशस्याऽप्रत्यक्षत्वेऽपि विहङ्गमांशे विशेषणतयोपनयसन्निकर्षेण भानसम्भवादनुपपत्त्यभावात्, तथा चोपरिदेशविशेष्यकविहङ्गमप्रकारकप्रत्यक्षस्यैवाऽनेन शब्देनाऽभिलापादुपनीत विशेषणतयैव भासत इति नियमादुपरिदेशस्याऽप्रत्यक्षत्वे तस्य प्रत्यक्षे मुख्यविशेष्यतया भानानुपपत्तिः, वायोरप्रत्यक्षत्वे तु न का चिदनुपपत्तिरस्तीति भावः ॥ ५६ ॥

इति चाक्षुषादिप्रत्यक्ष-चक्षुर्विषयादिकथनम् ॥

ननु ज्ञानसामान्ये त्वङ्मनोयोगस्य कारणत्व मूलोक्तमसङ्गतं, नित्यज्ञाने तस्याऽकारणत्वादतो व्याचष्टे—**जन्यज्ञानेति । प्रमाणमितीति** । इदमुपलक्षणं, तत्रेत्यस्याऽप्यनुषङ्गो बोध्यः । आम्रस्य को रस इति प्रश्नोत्तरभूते मधुर इत्यादौ किंशब्दं विहाय प्रश्नस्थस्य सर्वस्यैव अनुषङ्गदर्शनात्, **अन्यथा प्रश्नवाक्यतो** रसत्वावान्तरधर्मप्रकारकाम्रविशेष्यकज्ञानेच्छाया लाभेनोत्तरतो मधुरत्वप्रकारकाम्ररस विशेष्यकबोधानुत्पत्तौ तस्योत्तरत्वानुपपत्तेरिति ध्येयम् । **त्वगादीति** । पुरीतति त्वगिन्द्रियाभावेन तत्र स्थितमनसस्त्वक्संयोगासम्भवादिति भावः । **ननु ज्ञानादेरभावादेव न मानसमिति** मूले केषामित्याकाङ्क्षाया अनिवृत्तेराह—**अत्रेति** । नन्वेवम् **'अभावात्' इत्यत्राऽपि** तादृशाकाङ्क्षायाः सत्त्वात् तदनिवृत्तितादवस्थ्यमत आह—**अभावादित्यत्रार्षेति** । यद्यपि **'न मानसम्' इत्यस्य** मानससामान्याभाव एवार्थः सम्भवति, मनोयोग्यस्याऽऽत्मनःसत्त्वेऽपि योग्यगुणसम्बन्धाभावादेव तत्प्रत्यक्षस्याऽप्यसम्भवात्, तथाऽप्यत्रैव मानससामान्याभावोक्तौ उत्तरग्रन्थानुत्थितेस्तथा नोक्तमिति ध्येयम् । **योग्यगुणेति** । मनोग्रहणयोग्येत्यर्थः । **'धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः-'**

इति कारिकायामेवोक्तत्वादिति भावः । ननु जातमात्रस्य प्राथमिकेष्टसाधनतास्मरणे जीवनादृष्टस्याऽप्युद्बोधकस्य कल्पनादत्राऽपि सम्बन्धिज्ञानरूपोद्बोधकासम्भवेऽप्यदृष्टविशेषस्याद्बोधकत्वसम्भवादुद्बोधका-

पदज्ञानाभावान्न शाब्दबोधः, इत्यनुभवसामग्र्यभावान्नाऽनुभवः । उद्बोधकाभावाच्च न स्मरणम् । मैवम् । सुषुप्तिप्राक्कालोत्पन्नेच्छादिव्यक्तेस्तत्सम्बन्धेनाऽऽत्मनश्च प्रत्यक्षत्वप्रसङ्गात्, तदतीन्द्रियत्वे मानाभावात्, सुषुप्तिप्राक्काले निर्विकल्पकमेव नियमेन जायते इत्यत्राऽपि प्रमाणाभावात् । अथ ज्ञानमात्रे त्वङ्मनःसंयोगस्य यदि कारणत्वं, तदा रासन-चाक्षुषादिप्रत्यक्षकाले त्वाचप्रत्यक्षं स्यात्, विषयत्वक्संयोगस्य त्वङ्मनःसंयोगस्य च (तत्र) सत्त्वात्, परस्परप्रतिबन्धादेकमपि वा न स्यादिति । अत्र के चित्—पूर्वोक्तयुक्त्या त्वङ्मनःसंयोगस्य ज्ञानहेतुत्वे सिद्धे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबन्धकत्वमनुभवानुरोधात् कल्प्यत इति । अन्ये तु सुषुप्त्यनुरोधेन चर्ममनःसंयोगस्य ज्ञानहेतुत्वं कल्प्यते,

दिनकरी ।

ऽऽत्मप्रत्यक्षमित्यर्थः । **उद्बोधकाभावादिति** । उद्बोधकस्य फलबलकल्प्यत्वादिति भावः। **इच्छादिव्यक्तेरिति** । इच्छाया आदिरिति व्युत्पत्त्या ज्ञानमात्रं विवक्षितम् । **तदतीन्द्रियत्वे**–ज्ञानातीन्द्रियत्वे । ननु सुषुप्तिप्राक्कालीनज्ञानस्य निर्विकल्पकरूपत्वात् तदतीन्द्रियत्वमुभयवादिसिद्धमेवेत्यत आह–**सुषुप्तिप्राक्काले इति। त्वङ्मनःसंयोगस्य चेति।** तदस्वीकारे चाक्षुषमपि न स्यादिति भावः । ननु चाक्षुषादिसामग्र्याः स्पार्शनप्रतिबन्धकत्वादेव न स्पार्शनं तत्रेत्यत आह–**परस्परेति । अनुभवानुरोधादिति** । अनुभवस्य त्वयाऽपि **स्वहस्िततत्वात्**, अन्यथा इष्टापत्त्यादिना त्वदुक्तापत्तेरसङ्गतत्वापातादिति भावः । मिश्रमतमाह–**अन्ये त्वित्यादिना । सुषुप्त्यनुरोधेन**–सुषुप्तौ ज्ञानानुत्पादानुरोधेन ।

रामरुद्री ।

भावादिति मूलमसङ्गमत आह—**उद्बोधकस्येति** । तथा च स्मरणस्य प्रमाणसिद्धत्वे तदनुरोधेन कस्य चिदुद्बोधः कल्पनीयः । न चाऽत्र स्मरणमनुभवसिद्धमिति भावः । ननु प्रथमोपस्थितज्ञानमुपेक्ष्येच्छादिव्यक्तेरिति मूलाभिधानमसङ्गतमित्यत आह—**इच्छाया इत्यादि । ज्ञानमात्रमिति** । यद्यपि सुषुप्तिप्राक्काले कदा चिदिच्छादेरपि सम्भवेन तदनुक्त्या मूलस्य न्यूनतापत्त्या **मात्र**पदमसङ्गतं, किन्तु तत्पुरुषबहुव्रीहिभ्यां ज्ञानादिनिवक्षितमित्येव वक्तुमुचितं, तथाऽपि स्वप्नावस्थानन्तरमेव सुषुप्तिरिति नियमेन स्वप्नदशाया च मिथ्याज्ञानसंयोगरूपदोषवशात् भ्रमात्मकज्ञानमेवोत्पद्यते, न त्विच्छादिकम्, अन्यथा स्वप्नदशायां चिकीर्षाबलात्प्रवृत्तेरप्यापत्त्या गत्यादेरप्यापत्तेरिति सिद्धान्तमनुसृत्यैवमभिहितमिति मन्तव्यम् । वस्तुतो ज्ञानादिव्यक्तेरित्युक्तौ केषांचिज्ज्ञानां सिद्धान्तेऽप्यतीन्द्रियतया वक्ष्यमाणस्य **'तस्याऽतीन्द्रियत्वे–'** इत्यादिदूषणस्याऽसङ्गत्यापत्त्या मूलकृता ज्ञानमुपेक्षितं, एतद्दूषणस्य सविकल्पकज्ञानोपगमेऽपि सुगमतया तदुपेक्ष्य **'निर्विकल्पकमेव जायते'** इत्याशङ्क्याग्रे मूले निराकरिष्यते । अत एव स्वप्नावस्थायां प्रलापादेरप्यनुभवसिद्धतया तदानीमिच्छादेः प्रामाणिकत्वेऽपि नाऽसङ्गतिरिति युक्तमुत्पश्यामः । ननु सुषुप्तिप्राक्कालोत्पन्नज्ञानव्यक्तीनामतीन्द्रियत्वे मानाभाव इति मूलोक्तमसङ्गतं, तदानीं निर्विकल्पकस्यैवोत्पत्त्या तदतीन्द्रियत्वस्य सर्ववादिसिद्धत्वादित्याशङ्क्योत्तरग्रन्थमवतारयति–**नन्वित्यादि । तदतीन्द्रियत्वं**–निर्विकल्पकातीन्द्रियत्वम् । मूले **'विषयत्वक्संयोगस्य'** इत्यस्य भुज्यमानद्रव्यत्वाश्वादिना त्वक्संयोगस्येत्यर्थः । **तदस्वीकार इति** । त्वङ्मनःसंयोगास्वीकार इत्यर्थः । **न स्यादितीति** । ज्ञानसामान्ये त्वया तस्य हेतुत्वस्वीकारादिति भावः । **स्वहस्िततत्वादिति**। स्वीकृतत्वादित्यर्थः। **इष्टापत्त्यादिनेति** । स्पार्शनं चाक्षुषादिकालेऽपि भवत्येवेतीष्टापत्तेरित्यर्थः । **आदिना** चाक्षुषादिक कदाऽपि नोत्पद्यत एवेत्यपलापपरिग्रहो बोध्यः । ननु पुरीतति मनःप्रवेशस्यैव सुषुप्तिपदार्थतया त्वङ्मनःसंयोगस्य

चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसंयोगाभावान्न त्वाचप्रत्यक्षमिति ॥

॥ इति त्वङ्मनःसंयोगस्य ज्ञानहेतुत्वव्यवस्थापनम् ॥

दिनकरी ।

इत्थञ्च चाक्षुषादिकाले पूर्वोक्तस्पार्शनापत्तिर्न **सम्भवतीत्याह—चाक्षुषादीति ।**

अत्र नव्याः—सुषुप्त्यव्यवहितप्राक्काले ज्ञानोत्पत्तिर्यदि स्यात्, तदा तत्प्रत्यक्षापत्तिभिया त्वङ्मनःसंयोगस्य, चर्ममनःसंयोगस्य वा हेतुत्वं, सैव तु न युक्तिसिद्धा, तथा हि—सुषुप्त्यनुकूलमनःक्रियया मनसा आत्मनो विभागः, तत आत्ममनःसंयोगनाशः, ततः पुरीततिरूपोत्तरदेशेन मनःसंयोगरूपा सुषुप्तिरुत्पद्यते, एवं च सुषुप्त्यव्यवहितपूर्वक्षणे आत्ममनःसंयोगरूपासमवायिकारणनाशात् तत्क्षणे ज्ञानोत्पत्तेरभावात्, असमवायिकारणस्य कार्यसहभावेन हेतुत्वात्। यदि च कार्यनाशजनकनाशप्रतियोगिन एवाऽसमवायिकारणस्य कार्यसहभावेन हेतुत्वमिति मन्यते, तथाऽपि न सुषुप्त्यव्यवहितप्राक्कालोत्पन्नज्ञानव्यक्तेः सुषुप्तिकाले तत्प्रत्यक्षापत्तिभिया त्वङ्मनःसंयोगादेर्हेतुत्वं, विजातीयात्मनःसंयोगस्य हेतुत्वेनैव तत्प्रत्यक्षवारणात्। तच्च वैजात्यं परात्ममनःसंयोग-पुरीतत्यवच्छिन्नात्ममनःसंयोग-व्यावृत्तमेषितव्यमिति भावः। न च वैजात्येनाऽऽत्ममनःसंयोगस्य त्वङ्मनःसंयोगस्य वा हेतुत्वमित्यत्र विनिगमकाभावः, त्वङ्मनःसंयोगादेरवच्छेदकतासम्बन्धेन हेतुत्वापेक्षया समवायेनाऽऽत्ममनःसंयोगस्य हेतुत्वे लाघवात्, त्वङ्मनःसंयोगस्य हेतुत्वे चाक्षुषादिसामग्र्याः स्पार्शनप्रतिबन्धकत्वकल्पनागौरवाच्च। एतेन यत्र मनःक्रियया न पुरीततिसंयोगरूपा सुषुप्तिः, किन्तु पुरीततिक्रिययैवाऽऽत्मसंयुक्तेन मनसा पुरीततिसंयोगरूपा सुषुप्तिः, तत्र पूर्वोक्तापत्तिवारणाय त्व मनःसंयोगादेर्हेतुत्वमित्यपास्तम्। पुरीततिक्रियाजन्यमनः-

रामरुद्री ।

ज्ञानकारणत्वेऽपि तदनुपपत्त्यभावात् **'सुषुप्त्यनुरोधेन'** इत्यसङ्गतमत आह—**सुषुप्ताविति । न सम्भवतीति ।** चर्ममनःसंयोगस्य चाक्षुषादिकाले सत्त्वेऽपि तत्र स्थितेन त्वगिन्द्रियेण मनःसंयोगाभावादिति भावः।

नव्यमतमुपन्यस्यति—**अत्र नव्या इति । तत्क्षणे**—सुषुप्त्यव्यवहितप्राक्क्षणे। **अभावादिति ।** ननु कारणस्य कार्योत्पादपूर्वक्षण एव सत्त्वमपेक्षितं, न तु कार्योत्पत्तिकालेऽपि, तथा च ज्ञानोत्पत्तिपूर्वक्षणे विभागकालेऽपि आत्ममनःसंयोगोऽस्त्येव, ज्ञानोत्पत्तिकाल एव पूर्वोत्पन्नविभागेन तस्य नाशादत सुषुप्त्यव्यवहितपूर्वक्षणेऽपि ज्ञानोत्पत्तौ न बाधकमत आह—**असमवायिकारणस्येति । कार्यसहभावेनेति ।** कार्यकालवृत्तित्ववैशिष्ट्येनेत्यर्थः। **यदि चेति । असमवायिकारणनाशस्य** द्रव्यरूपकार्यनाशं प्रत्येव हेतुता, न तु गुणादिरूपकार्यनाशं प्रत्यपीति द्रव्यं प्रत्येवाऽसमवायिकारणस्य कार्यकालवृत्तित्वेन कारणता, न तु गुणादिकं प्रत्यपीति भावः। **तत्प्रत्यक्षवारणात्**—सुषुप्त्यव्यवहितपूर्वक्षणोत्पन्नज्ञानप्रत्यक्षवारणात्, पुरीतदवच्छेदेनाऽऽत्ममनःसंयोगे वैजात्यानङ्गीकारादिति भावः। **वैजात्येनेति ।** यद्यप्यात्ममनःसंयोगस्य कारणता क्लृप्तैव, वैजात्यस्य तदवच्छेदकत्वमेव कल्पनीय, त्वङ्मनःसंयोगस्य तु कारणतैव न क्लृप्तेति वैषम्यान्न विनिगमनाविरहावकाशः, तथाऽपि वैजात्यस्याऽक्लृप्तस्य कल्पनीयतया क्लृप्तत्वङ्मनःसंयोगे कारणतैव किं न कल्प्यते? कल्पनीयत्वोभयत्र तुल्यत्वादिति भावः। **'त्वङ्मनःसंयोगादेः—'** इत्यादिना चर्ममनःसंयोगपरिग्रहः। **अवच्छेदकतेति ।** समवायेन तयोरात्मन्यसत्त्वादिति भावः। **लाघवादिति ।** अवच्छेदकतायास्तत्तदवच्छेदकस्वरूपायाः कारणतावच्छेदकसम्बन्धत्वे नानाव्यक्तिषु सम्बन्धत्वकल्पने गौरवम्, एकस्य समवायस्य तथात्वे लाघवादित्यर्थः। त्वङ्मःसंयोगस्य कारणतापक्षे गौरवान्तरमप्याह—**चाक्षुषादीति । एतेनेत्यादि ।** वक्ष्यमा-

मनोग्राह्यं सुखं दुःखमिच्छा द्वेषो मतिः कृतिः ॥ ५७ ॥
ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते ।

मनोग्राह्यमिति । **मनोजन्यप्रत्यक्षविषय इत्यर्थः** । मतिः—**ज्ञानम्** । कृतिः—**प्रयत्नः** । **एवं सुखत्वदुःखत्वादिकमपि मनोग्राह्यम् । एवमात्माऽपि मनोग्राह्यः, किन्तु 'मनोमात्रस्य गोचरः' इत्यनेन पूर्वमुक्तत्वादत्र नोक्तः ॥५७॥**

॥ इति मनोग्राह्यविषयनिरूपणम् ॥

दिनकरी ।

पुरीततिसंयोगस्य सुषुप्तित्वाभावाच्च । तदानी मनसः सर्वावयवावच्छेदेन पुरीततिसंयोगाभावेन पुरीततिबहिर्देशावच्छिन्नात्ममनःसंयोगस्य सत्त्वात् ज्ञानाऽनुत्पत्तौ बाधकाभावात् । अत एव यदा त्वचं त्यक्त्वा मनः पुरीततिमनुविशतीति ग्रन्थकाराणां लेखः सङ्गच्छत इति वदन्ति । ॥ इति त्वङ्मनःसंयोगस्य ज्ञानहेतुत्वव्यवस्थापनम् ॥

मनोग्राह्यत्वस्य सार्वत्रिकत्वादाह—**मनोजन्येति** । मनोमात्रजन्येत्यर्थः । न्यूनतां परिहरति—**एवमिति** ॥ ५७ ॥ इति मनोग्राह्यविषयनिरूपणम् ॥

रामरुद्री ।

णदूषणेनेति तदर्थः । एवं चेत् **'तत्र सुषुप्तित्वाभावाच्च'** इति **'च'**कारः प्रामादिक एवेति बोध्यम् । न च विजातीयात्ममनःसंयोगस्य समवायेन कारणत्वे लाघवस्याऽपि **'च'**कारेण समुच्चयसम्भवात् 'च'-कारस्य प्रामादिकत्वकल्पनमसङ्गतमिति वाच्यम् । पुरीततिक्रियया सुषुप्तिस्थले पूर्वतनात्ममनःसंयोगानपायात्सुषुप्तावपि ज्ञानोत्पादापत्त्या तद्वारणाय पुरीततिमनःसंयोगस्य ज्ञानं प्रति प्रतिबन्धकताकल्पनस्याऽऽवश्यकत्वे वैजात्यं कल्पयित्वा विजातीयात्ममनःसंयोगत्वेन कारणतायामेव मानाभावात् । यदि च तत्संयोगव्यक्तावपि वैजात्यं नाऽङ्गीक्रियत इत्युच्यते, तदा जाग्रदवस्थायामपि तदात्ममनःसंयोगव्यक्तितो ज्ञानानुत्पादप्रसङ्ग इत्यवधेयम् । अथ पुरुषान्तरीयात्मना पुरुषान्तरीयमनःसंयोगात् ज्ञानोत्पत्तिवारणाय पुरुषान्तरीयात्ममनःसंयोगव्यावृत्तवैजात्यं कल्पयित्वा विजातीयात्ममनःसंयोगत्वेन ज्ञानहेतुता आवश्यकी, तच्च वैजात्यं सुषुप्तिकालीनात्ममनःसंयोगव्यावृत्तमपीति कल्पनयोपपत्तौ त्वङ्मनःसंयोगादेः कारणत्वान्तरकल्पनमयुक्तमिति चेदनधिगतभावोऽसि, पूर्वोक्तसुषुप्तिदशायां पूर्वाज्ञानोत्पत्त्यनुरोधेन कल्पवैजात्यात्ममनःसंयोगस्य सत्त्वेन विजातीयात्ममनःसंयोगकारणताया वारयितुमशक्यतया सुषुप्तेरेव ज्ञानप्रतिबन्धकत्वस्याऽऽवश्यकत्वे वैजात्यस्य तद्भिन्नसुषुप्तिकालीनात्ममनःसंयोगव्यावृत्तत्वकल्पनेऽपि बीजाभावात् । तादृशसुषुप्त्यङ्गीकारपक्षे ज्ञानसामान्ये त्वङ्मनःसंयोगस्य कारणत्वमप्यप्रामाणिकमेव, तथाविधसुषुप्तिसमये मनसो निश्चलत्वेन पूर्वतनत्वक्संयोगस्याऽपि सत्त्वेन तत्कारणतयाऽपि ज्ञानवारणासम्भवेन अगत्या पुरीततिमनःसंयोगस्य ज्ञानमात्रप्रतिबन्धकत्वमेव कल्पनीयम् , इत्थं च त्वङ्नःसंयोग-चर्ममनःसंयोगयोः कारणतयापि तदानीं ज्ञानवारणासम्भवेनाऽऽदिपदेन पुरीतति मनः-संयोगस्यैव प्रतिबन्धकतायां ग्रन्थकारेण तात्पर्यं सूचितमिति विभावनीयम् । नव्यमत एव ग्रन्थकाराणामपि निर्भरो लाघवादित्यवधेयम् ॥ इति त्वङ्मनःसंयोगस्य ज्ञानहेतुत्वव्यवस्थापनम् ॥

लौकिकचाक्षुषादेरपि मनोजन्यतया मनोग्राह्यत्वस्य घटादावतिव्याप्तिमाशङ्क्याऽऽह—**मनोमात्रेति** । मनोलौकिकसन्निकर्षजन्यत्वविवक्षायां मात्रपदं विनाऽप्युपपत्तिरिति ध्येयम् ॥ ५७ ॥

इति मनोग्राह्यविषयनिरूपणम् ।

ननु विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वे मानाभावः, चक्षुःसंयोगद्वितीयक्षण एव घट इति विशिष्टप्रत्यक्षोपगमे क्षतिविरहात् , न हि तृतीयक्षण एव तादृशप्रत्यक्षमिति लोकानामनुभवः, क्षणस्याऽतिसूक्ष्मत्वेन क्षणविलम्बस्य शपथनिर्णेयत्वात् , रक्तो दण्ड इति निर्णयं विना रक्तदण्डवानिति निर्णयानु-

चक्षुःसंयोगाद्यनन्तरं घट इत्याकारकं घटत्वादिविशिष्टविषयकं ज्ञानं न सम्भवति, पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात्, विशिष्टबुद्धौ विशेषणज्ञानस्य कारणत्वात् तथा च प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाह्येव ज्ञानं

दिनकरी।

निर्विकल्पके प्रमाणं दर्शयति-**चक्षुःसंयोगादीति**। विशेषणज्ञानस्य कारणत्वादिति। कदाचिद्घट इत्याकारकं स्वरूपतो घटत्वप्रकारकं, कदा चिज्जातिमानिति जातित्वेन घटत्वादिप्रकारकं ज्ञानं जायते इत्यनुभवसाक्षिकं, तन्निर्वाहाय घटत्वांशेऽन्याप्रकारकघटत्वप्रकारकबुद्धौ तादृशघटत्वज्ञानत्वेन, घटत्वांशे जातित्वप्रकारकघटत्वविशिष्टबुद्धौ च तादृशघटत्वज्ञानत्वेन हेतुत्वस्यऽऽवश्यकत्वादिति भावः। **वैशिष्ट्यानवगाह्येवेति**। वैशिष्ट्यनिष्ठसांसर्गिकविषयताशून्यमेवेत्यर्थः। वैशिष्ट्यसांसर्गिकविषयतानिरासेनैव घटघटत्वयोर्विशेष्यताप्रकारताशून्यत्वं लब्धं, तयोर्वैशिष्ट्यसांसर्गिकविषयतानियतत्वात्। न चैवं निर्विकल्पकस्य निर्विषयकत्वापत्तिः, तुरीयविषयताया एव तत्र स्वीकारात्। एतेन निर्विकल्पकस्य घटघटत्वावगाहित्वद्वैशिष्ट्यावगाहित्वमपि दुर्वारम्, घटेन्द्रियसन्निकर्षकाल इन्द्रियसम्बद्धविशेषणतायास्तद्वैशिष्ट्ये सत्त्वादिति वैशिष्ट्यानवगाहित्वोक्तिरसङ्गतेत्यपास्तम्। वैशिष्ट्यानवगाह्येवेत्येवकारेण कल्पनीयविशेषणज्ञानस्य वैशिष्ट्यावगाहित्वे तस्याऽपि विशिष्टबुद्धितया विशेषणज्ञानान्तरसापेक्षता स्यादेवं तस्याऽपि वैशिष्ट्यावगाहित्वमित्यनवस्थाभिया प्रथमं विशेषणज्ञानं वैशिष्ट्यानवगाह्येव स्वीकार्यमिति सूचितम्। **तदेव**-तादृशविषयतान्नयशून्यमेव।

रामरुद्री।

दयेन अन्वयव्यतिरेकाभ्यां भवतु विशिष्टवैशिष्ट्यप्रत्यक्षे विशेषणतावच्छेदकप्रकारकनिश्चयस्य कारणत्वं, निर्विकल्पकस्य अतीन्द्रियत्वेन विशेषणज्ञाने हेतुतायामन्वयव्यतिरेकप्रत्यक्षासम्भवादतो विशेषणज्ञानहेतुत्वे युक्तिमाह—**कदा चिदित्यादि**। **तन्निर्वाहाय**-तादृशानुभवनिर्वाहाय। अन्यथा जातिमानिति घटत्वप्रकारकबोधोत्पादवेला(१)यामपि घट इत्याकारकप्रत्यक्षापत्तेरिति भावः। घट इति प्रत्यक्षकाले जातिमानिति प्रत्यक्षापत्तिस्तु न सम्भवति, विशेषणतावच्छेदकप्रकारकज्ञानरूपकारणविरहादित्यवधेयम्। **ज्ञानत्वेनेति**। अथ विशिष्टवैशिष्ट्यावगाहितया जातिमानिति बुद्धेस्तत्र जातित्वप्रकारकघटत्वविशेष्यकनिश्चयत्वेनैव हेतुतया ज्ञानत्वेनेत्यसङ्गतमिति चेन्न। विशेष्ये विशेषणं, तत्राऽपि विशेषणान्तरमिति रीत्या जायमानस्य जातिमानिति ज्ञानस्य विशिष्टवैशिष्ट्यानवगाहित्वात्। न च प्रकारांशे किञ्चित्प्रकारकत्वादतिरिक्तस्य विशिष्टवैशिष्ट्यावगाहित्वस्य दुर्वचतया तदपि विशिष्टवैशिष्ट्यावगाह्येवेति वाच्यम्। विशेषणावच्छिन्नप्रतियोगिकत्वेन तत्संसर्गावगाहिज्ञानस्य विशिष्टवैशिष्ट्यावगाहित्वात्।

विशेषणावच्छिन्नप्रकारताशालित्वमेव तत्, विशेष्ये विशेषणमिति रीत्या उत्पन्नज्ञाने तु प्रकारप्रकारेणाऽवच्छेदकताख्या विलक्षणा विषयता, नाऽतस्तस्य तथात्वापत्तिरित्यपि के चित्।

इत्थमेव च दण्डो रक्तो न वेति संशयानन्तरमौचित्याज्जातो रक्तदण्डवान्न वेति सन्देहोऽप्युपपादनीयः। इदं पुनरिहाऽवधेयं, विशेष्ये विशेषणमिति न्यायेन जायमाने जातिमानिति ज्ञाने न जातित्वप्रकारकघटत्वज्ञानत्वेन हेतुता, विशकलितजातित्वघटत्वज्ञानादपि तादृशबुद्ध्युत्पादादिति विशिष्टवैशिष्ट्यावगाहिबुद्धिपरमेवेदम्। एवं च ज्ञानपदं निश्चयार्थकतया व्याख्येयमिति। ननु निर्विकल्पकस्य वैशिष्ट्यानवगाहित्वमसिद्धं, विशेषणतासन्निकर्षेण घटघटत्वयोरिव तत्समवायस्याऽपि निर्विकल्पके भानसम्भवादत आह—**वैशिष्ट्यनिष्ठेति**। एवं प्रकारताशून्यत्वं, विशेष्यताशून्यत्वं च लक्षणं सम्भवतीति सूचयन्नाह—**वैशिष्ट्येत्यादि**। **निर्विषयकत्वापत्तिरिति**। त्रिविधविषयतानामप्यसत्त्वादिति भावः। **तुरीयविष-**

(१) 'बाधोत्पादिकायामपि' इत्यपि पाठः।

महत्त्वं षड्विधे हेतुः, इन्द्रियं करणं मतम् ॥ ५८ ॥

जायते, तदेव निर्विकल्पकम्। तच्च न प्रत्यक्षम्। तथा हि-वैशिष्ट्यानवगाहिज्ञानस्य प्रत्यक्षं न भवति, घटमहं जानामीति प्रत्ययात्, तत्राऽऽत्मनि ज्ञानं प्रकारीभूय भासते, ज्ञाने घटः, तत्र घटत्वं, यः प्रकारः, स एव विशेषणमित्युच्यते, विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकमित्युच्यते, विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यज्ञाने कारणं, निर्विकल्पके च घटत्वादिकं न प्रकारः, तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं ज्ञाने न सम्भवति, घटत्वाद्यप्रकारकं च घटादिविशिष्टज्ञानं न सम्भवति, जात्यखण्डोपाध्यतिरिक्तपदार्थज्ञानस्य किञ्चिद्धर्मप्रकारकत्वनियमात्।

॥ इति निर्विकल्पकस्याऽतीन्द्रियत्वनिरूपणम् ॥

महत्त्वमिति। द्रव्यप्रत्यक्षे महत्त्वं समवायसम्बन्धेन कारणम्। द्रव्यसमवेतानां गुणकर्मसामान्यानां प्रत्यक्षे स्वाश्रयसमवायसम्बन्धेन, द्रव्यसमवेतानां गुणत्वकर्मत्वादीनां प्रत्यक्षे स्वाश्रयसमवेतसमवायसम्बन्धेन कारणमिति ॥ इति महत्त्वस्य प्रत्यक्षहेतुत्वव्यवस्थापनम् ॥

इन्द्रियमिति। अत्राऽपि 'षड्विधे' इत्यनुषज्यते। इन्द्रियत्वं न जातिः,

दिनकरी।

निर्विकल्पकं-निर्विकल्पकस्वरूपं, लक्षणन्तु प्रकारताशून्यत्वादिकं प्रत्येकमेवेति ध्येयम्।

इति निर्विकल्पकप्रत्यक्षनिरूपणम् ॥

निर्विकल्पके मूलोक्तमतीन्द्रियत्वं साधयति-तथा हीत्यादिना। ज्ञानस्य प्रत्यक्षं वैशिष्ट्यानवगाहि न भवतीत्यन्वयः। इति प्रत्ययादिति। घटाद्यवगाहित्वेनैव ज्ञानप्रत्यक्षस्याऽनुभवसिद्धत्वादित्यर्थः। तत्र-घटमहं जानामीति प्रत्यये। घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं ज्ञाने न सम्भवतीति। न च विशेष्ये विशेषणमिति रीत्यैव निर्विकल्पकानुव्यवसायोऽस्त्विति वाच्यम्। रक्तः पटो घटो द्रव्यमिति समूहालम्बनानन्तरं रक्तं घटं जानामीति प्रतीत्यापत्त्या विशिष्टवैशिष्ट्यविषयताशून्यज्ञानानुव्यवसायानभ्युपगमादिति।

॥ इति निर्विकल्पकस्याऽतीन्द्रियत्वनिरूपणम् ॥

महत्त्वं षडिध इति। यद्यपि श्रावणादौ महत्त्वस्य हेतुत्वे प्रयोजनाभावः, तथाऽपि द्रव्यसमवेतप्रत्यक्षत्वादेस्तज्जन्यतावच्छेदकस्य श्रावणादिसाधारण्यात् श्रावणाद्यन्यत्वरामरुद्री।

यतायां एवेति। प्रकारतादित्रितयभिन्नविषयतायां इत्यर्थः। प्रत्येकमेवेति। एकत्र लक्षणे इतरविषयतावत्त्वशून्यत्वनिवेशे प्रयोजनाभावादिति भावः ॥ इति निर्विकल्पकप्रत्यक्षनिरूपणम् ॥

समूहालम्बनेति। विशेष्ये विशेषणमिति न्यायेनाऽनुव्यवसायोपगमे रक्तत्वघटयोः पूर्वमुपस्थित्या तादृशानुव्यवसायसम्भवात्, विशिष्टवैशिष्ट्यावगाहित्वे तु पूर्वं रक्तो घट इति ज्ञानविरहान्न तादृशानुव्यवसाय इति भावः। यद्यपि घटत्वप्रकारकशाब्दबोधोत्तरोत्पन्ननिर्विकल्पकस्य तादृशानुव्यवसायः सम्भवत्येव, तथाऽपि पूर्वं घटत्वज्ञानसत्त्वे विशिष्टप्रत्यक्षस्य सामग्रीसत्त्वाच्चक्षुःसंयोगानन्तर विशिष्टप्रत्यक्षमेव स्वीक्रियते, न तु निर्विकल्पकम्, अत एव स्थिरचक्षुःसंयोगस्थले घटविशिष्टप्रत्यक्षधारैवोपेयते, न तु निर्विकल्पकान्तरितप्रत्यक्षधारेति मन्तव्यम्। अथैवमपि निर्विकल्पकस्य घटत्वरूपविषयोपरागेण प्रत्यक्षं दुर्वारमेव, जातीतरस्यैव स्वरूपतः प्रकारत्वानभ्युपगमेन तस्य ज्ञाने विषयितया स्वरूपत एव प्रकारत्वस-

पृथिवीत्वादिना साङ्कर्यात्, किन्तु शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्वम्(१)। आत्मादिवारणाय सत्यन्तम्। उद्भूतविशेषगुणस्य श्रोत्रे सत्त्वाच्छब्देतरेति। विशेषगुणस्य रूपादेश्चक्षुरादावपि सत्त्वादुद्भूतेति। उद्भूतत्वं न जातिः, शुक्लत्वादिना सङ्करात्(२)। न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यम्। उद्भूतरूपत्वादिना चाक्षुषादौ जनकत्वानुपपत्तेः, किन्तु शुक्लत्वादिव्याप्यं नानैवाऽनुद्भूतत्वं, तदभावकूटश्चोद्भूतत्वम्। तच्च संयोगादावप्यस्ति, तथा च शब्देतरोद्भूतगुणः संयोगादिश्चक्षुरादावप्यस्त्यतो विशेषेति। कालादिवारणाय विशेष्यदलम्। इन्द्रियावयवविषयसंयोगस्याऽपि प्राचां मते प्रत्यक्षजनकत्वादिन्द्रियावयववारणाय, नवीनमते कालादौ रूपाभावप्रत्यक्षे सन्निकर्षघटकतया कारणीभूतचक्षुःसंयोगाश्रय-

दिनकरी।

निवेशे गौरवात् प्रयोजनाभावाच्च 'षड्विधे' इत्युक्तमिति ध्येयम्।

॥ इति महत्त्वस्य प्रत्यक्षहेतुत्वव्यवस्थापनम् ॥

आत्मादिवारणायेति। आत्मादौ योऽतिव्याप्तिरूपो दोषस्तद्वारणायेत्यर्थः। सत्यन्तदाने च शब्दादितरे ये उद्भूतविशेषगुणाः सुखादयस्तदाश्रयत्वस्यैवाऽऽत्मनि सत्त्वान्नाऽतिव्याप्तिरिति भावः। **श्रोत्रे सत्त्वादिति**। तथा च तत्राऽव्याप्तिरिति भावः। विशेषपदस्य प्रयोजनं वक्तुं भूमिकामाह-**उद्भूतत्वमिति**। **जनकत्वानुपपत्तेरिति**। एकैकस्य कारणतावच्छेदकत्वे व्यभिचारात्, कूटस्यैकत्राऽवृत्तितया कारणतानवच्छेदकत्वादिति भावः। **तदभावकूटश्चोद्भूतत्वमिति**। तथा च तादृशकूटस्य कारणतावच्छेदकत्वमिति नोक्तदोष इति भावः। 'इन्द्रियावयववारणाय' इति 'मनःपदम्'इत्यनेनाऽन्वितम्। नवीनमते 'मनः'पदप्रयोजनमाह-**कालादाविति**। समवायेन घटाद्यभावादीनां काले सत्त्वे-

रामरुद्री।

म्भवादिति। मैवं, जातेः समवायेनैव स्वरूपतः प्रकारत्वाभ्युपगमात्, अन्यथा कालो घटो ज्ञानं इत्यादिप्रत्ययापत्तेः, तादृशप्रतीतेरनुभवविरुद्धत्वादिति ध्येयम्॥ इति निर्विकल्पकस्याऽतीन्द्रियत्वनिरूपणम्॥

षड्विध इत्युक्तमिति। तथा च षड्विध इत्यस्य षडविधसाधारणप्रत्यक्षत्वावच्छिन्न इत्येवाऽर्थः, न तु श्रावणत्वाद्यवच्छिन्न इति तदर्थ इति भावः॥ इति महत्त्वस्य प्रत्यक्षहेतुत्वव्यवस्थापनम्॥

आत्मादाविति। अत्राऽऽदिपदेन चर्ममनःसंयोगस्य ज्ञानकारणत्वपक्षे तत्सङ्ग्रहः, अत एव लघुभूतस्याऽपि आत्मभिन्नत्वस्य परित्यागः, तथा सति आत्मभिन्ने चर्मण्येवाऽतिप्रसङ्गात्, नवीनमते तु **शब्देतरेत्यत्र शब्द**पदं ज्ञानेच्छाकृतीनामप्युपलक्षणं बोध्यं, तेनेश्वरस्यैव श्रोत्रेन्द्रियत्वोपगमेन अन्यथा श्रोत्रेऽव्याप्तिप्रसङ्गात्, एवं तन्मते अनुद्भूतविशेषगुणवदसमवेतभूतमेव मन इति न तत्राऽव्याप्तिरिति ध्येयम्। **भूमिकामिति**। प्रयोजनसंपादिकां युक्तिमित्यर्थः। उद्भूतत्वस्य प्रत्यक्षजनकतानिरूपकत्वे तादृशजातेः संयोगादिसामान्यगुणे कल्पकाभावेन उद्भूतगुणशून्यत्वोक्तावपि चक्षुरादावव्याप्त्यप्रसक्तेरनुद्भूतत्वाभावकूटस्य तत्त्व एव संयोगादावनुद्भूतत्वजातौ मानाभावेन तदादायाऽव्याप्तिदानसम्भवाद्भूमिकात्वमवसेयम्। **नोक्तदोष इतीति**। एकत्राऽवृत्तित्वप्रयुक्तकारणत्वानुपपत्तिरूपदोष इत्यर्थः। **इन्द्रियावयवेति**। इन्द्रियावयवार्थावयवयोः संयोगस्याऽपि प्राचां मते ज्ञानकारणतया तमादायेन्द्रियावयवेऽतिव्याप्तिवारणाय

(१) 'संयोगाश्रयत्वम्' इत्यपि पाठः। (२) 'साङ्कर्यात्' इत्यपि पाठः।

विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः ।
द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः ॥ ५९ ॥
द्रव्येषु समवेतानां तथा तत्समवायतः ।
तत्राऽपि समवेतानां शब्दस्य समवायतः ॥ ६० ॥
तद्वृत्तीनां समवेतसमवायेन तु ग्रहः ।
प्रत्यक्षं समवायस्य विशेषणतया भवेत् ॥ ६१ ॥
विशेषणतया तद्वदभावानां ग्रहो भवेत् ।

स्य कालादेर्वारणाय मनःपदम् । ज्ञानकारणमित्यपि तद्वारणायैव । करणमिति । **असाधारणं कारणं करणम्** । **असाधारणत्वं व्यापारवत्त्वम्** ॥ ५८ ॥

॥ इतीन्द्रियनिरूपणम् ॥

विषयेन्द्रियसम्बन्ध इति । व्यापारः-**सन्निकर्षः** ।

षड्विधं सन्निकर्षमुदाहरणद्वारा प्रदर्शयति- द्रव्यग्रह इति । **द्रव्यप्रत्यक्षमिन्द्रियसंयोगजन्यम्** । **द्रव्यसमवेतप्रत्यक्षमिन्द्रियसंयुक्तसमवायजन्यम्** ।

दिनकरी ।

ऽपि न तत्प्रत्यक्षं, योग्यानुपलब्धेरभावात् , अतो रूपाभावपर्यन्तानुधावनम् । **तद्वारणायेति** । कालादेर्वारणायेत्यर्थः ॥५८॥ इतीन्द्रियनिरूपणम् ॥

जन्यत्वघटितस्य व्यापारत्वस्य श्रोत्रशब्दसम्बन्धे समवायरूपेऽभावादाह-**व्यापारः-सन्निकर्ष इति** ।

द्रव्यप्रत्यक्षमिति । द्रव्यवृत्तिर्लौकिकविषयतासम्बन्धेन प्रत्यक्षमित्यर्थः । **द्रव्यस-**

रामरुद्री ।

मनःपदमिति भावः । **योग्यानुपलब्धेरिति** । यदि काले घटः स्यात्तदा घटवत्तया उपलभ्येतेत्यापत्तेः कालस्याऽयोग्यत्वेन असम्भवादिति भावः । काले यदि रूपं स्यात्तदा उपलभ्येतेत्यापत्तिस्तु सम्भवति, नीरूपत्वेनैव कालस्याऽयोग्यतायाः सम्पादनीयतया रूपसत्त्वे तदनिर्वाहादिति भावः । मूले-**तद्वारणायैवेति** । कालस्येन्द्रियत्ववारणायैवेत्यर्थः । यद्यपि ज्ञानकारणत्वोपादानेऽपि कालविधया कालमनःसंयोगस्याऽपि ज्ञानकारणतया तद्दोषतादवस्थ्यं, समवायेन कारणत्वविवक्षणे तु क्वाऽपि कार्ये कालमनःसंयोगस्य समवायेनाऽकारणत्वात् **ज्ञान**पदमनर्थकं, तथाऽपि समवायेन कारणतालाभायैव ज्ञानपदम् , अथ वा दैशिकपरत्वादिकारणदिङ्मनःसंयोगमादाय दिश्यतिव्याप्तिवारणाय तत्पदमिति भावः ॥ ५८ ॥

इति इन्द्रियनिरूपणम् ॥

ननु **'विषयेन्द्रियसम्बन्धो व्यापारः-'**इति मूलमसङ्गतं, शब्दश्रोत्रसम्बन्धस्य नित्यतया समवायस्य तज्जन्यत्वे सति तज्जन्यजनकत्वरूपव्यापारत्वस्याऽसम्भवात्, अत एवैतदस्वरसेनैव **व्यापारपदं सन्निकर्षार्थकतया** विवृतं मुक्तावल्यामित्याह—**जन्यत्वेत्यादि** । वस्तुतस्तु तत्र समवायोऽपि व्यापार एव, कथमन्यथा शब्दप्रत्यक्षे श्रोत्रेन्द्रियस्य करणत्वं ? व्यापारवत्कारणस्यैव करणत्वात् , किन्तु तज्जन्यत्वं व्यापारलक्षणप्रविष्टं तदधीनसत्ताकत्वमेव, शब्दप्रतियोगिकत्वविशिष्टसमवायस्यैव प्रत्यक्षजनकतया तादृशस्याऽऽकाशात्मकश्रोत्रसत्त्वाधीनसत्ताकत्वान्न व्यापारत्वविरोध इति मन्तव्यम् । अस्तु वा इन्द्रियस्य करणत्वोपपत्तये शब्दादेर्विषयस्यैव व्यापारत्वं, प्रत्यक्षविषयस्य कारणत्वात् , शब्दादेर्विषयस्याऽऽकाशादिजन्यत्वात् , सुखादेरप्यात्ममनःसंयोगजन्यत्वेन मनोजन्यत्वानपायादिति विभावनीयम् ।

एवमग्रेऽपि ।

वस्तुतस्तु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणं, द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः कारणं, द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तेसमवतसमवायः, एवमन्यत्राऽपि विशिष्यैव कार्यकारणभावः । परन्तु पृथिवीपरमाणुनीले नीलत्वं, पृथिवीपरमाणौ पृथिवीत्वं च चक्षुषा कथं न गृह्यते ? तत्र परम्परयोद्भूतरूपसम्बन्धस्य महत्त्वसम्बन्धस्य च सत्त्वात् । तथा हि नीलत्वजातिरेकैव घटनीले परमाणुनीले च वर्तते, तथा च महत्त्वसम्बन्धो घटनीलमादाय वर्तते, उद्भूतरूपसम्बन्धस्तूभयमादायैव वर्तते । एवं पृथिवीत्वेऽपि घटादिकमादाय महत्त्वसम्बन्धो बोध्यः । एवं वायौ तदीयस्पर्शादौ च सत्तायाश्चाक्षुषप्रत्यक्षं स्यात्, तस्मादुद्भूतरूपावच्छिन्न-महत्त्वावच्छिन्न-चक्षुःसंयुक्तसमवायस्य

दिनकरी ।

मवेतेति । द्रव्यसमवेतवृत्तिलौकिकविषयतासम्बन्धेन प्रत्यक्षमित्यर्थः । **एवमग्रेऽपीति ।** द्रव्यसमवेतसमवेतवृत्तिलौकिकविषयतासम्बन्धेन प्रत्यक्षमिन्द्रियसंयुक्तसमवेतसमवायजन्यमित्यर्थः ।

ननु द्रव्यप्रत्यक्षे इन्द्रियसन्निकर्षत्वेन हेतुत्वे स्वक्प्रभासंयोगाच्चाक्षुषापत्तिः, एवमन्धकारे घटचक्षुःसंयोगात् स्पार्शनापत्तिश्चेत्यत आह—**वस्तुतस्त्विति ।** नन्वेवमात्मप्रत्यक्षानुरोधेन मनःसयोगस्य, ज्ञानादिप्रत्यक्षानुरोधेन मनःसंयुक्तसमवायस्य प्रत्यासत्तित्वेऽपि चक्षुरादिसंयोग-तत्संयुक्तसमवाययोः प्रमाणाभावः, चक्षुरादिसंयुक्तसमवेतसमवायेनैव त्र्यणुकादेश्चाक्षुषाद्युपपत्तेरत आह—**परन्त्विति । परम्परया**—स्वाश्रयसमवेतसमवेतत्वादिसम्बन्धेन । **उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्येति ।** अत्र

रामरुद्री ।

ननु द्रव्यप्रत्यक्षे इन्द्रियसंयोगस्य न समवायेन कारणतासम्भवः, तस्य विषयनिष्ठस्याऽऽत्मन्यसम्भवादिति विषयतैव कायतावच्छेदकसम्बन्धो वाच्यः, तथा च द्रव्यविषयकप्रत्यक्षस्य घट इत्याद्याकारकस्य विषयतया घटत्वादावप्युत्पत्त्या इन्द्रियसंयोगस्य व्यभिचार इत्यतो **'द्रव्यप्रत्यक्षम्'** इत्यस्याऽर्थमाह—**द्रव्यवृत्तीति ।** तथा च प्रत्यक्षत्वमेवेन्द्रियसयोगजन्यतावच्छेदकं, द्रव्यवृत्तिलौकिकविषयतायाः कार्यतावच्छेदकसम्बन्धत्वादेव घटत्वादौ न व्यभिचार इति भावः । एव संयुक्तसमवायादावप्यूहनीयमित्याह—**द्रव्यसमवेतेति ।**

द्रव्यप्रत्यक्ष इति । द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन प्रत्यक्ष इत्यर्थः । **इन्द्रियसन्निकर्षत्वेन**—इन्द्रियसयोगत्वेन । **चाक्षुषापत्तिरिति ।** यद्यपि चाक्षुषत्वस्येन्द्रियसंयोगजन्यतानवच्छेदकत्वेनेन्द्रियसंयोगकारणबलाच्चाक्षुषापत्तिरयुक्ता, तद्बलेन प्रत्यक्षत्वावच्छिन्नस्यैव आपादनसम्भवात्, तथाऽपि जायमानं प्रत्यक्षं चाक्षुषमेवाऽङ्गीकार्यं, न स्पार्शनं, तत्रोद्भूतस्पर्शाभावात्, स्पार्शने तस्य हेतुत्वात्, इन्द्रियान्तरञ्च द्रव्यग्राहकमेव नेत्यभिप्रायेण चाक्षुषापादनान्नाऽसङ्गतिः, एवमुत्तरत्राऽपि । चाक्षुषे आलोकसंयोगस्य हेतुतया तदभावान्नाऽन्धकारे चाक्षुषापत्तिरत स्पार्शनापादनमिति बोध्यम् । अथ विशिष्य कार्यकारणभावस्योक्तयुक्त्याऽऽवश्यकत्वेऽपि **'यद्विशेषयोः—'**इति न्यायेनोक्तकार्यकारणाभावोऽप्यावश्यक एवेति **'वस्तुतस्तु—'**इत्यादिना मूले तत्परित्यागोऽनुचित इति चेन्मैवम् । तादृशव्याप्तौ मानाभावात् । न चैकस्येन्द्रियसंयोगाभावस्य प्रत्यक्षसामान्याभावप्रयोजकत्वे लाघवमेव तत्र मानमिति

द्रव्यसमवेतचाक्षुषे, तादृशचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्यसमवेतसमवेतचाक्षुषे कारणत्वं वाच्यम् । इत्थं च परमाणुनीलादौ न नीलत्वादिग्रहः, परमाणौ चक्षुःसंयोगस्य महत्त्वावच्छिन्नत्वाभावात् । एवं वाय्वादौ न सत्तादिचाक्षुषं, तत्र चक्षुःसंयोगस्य रूपावच्छिन्नत्वाभावात् । एवं यत्र घटस्य पृष्ठावच्छेदेनाऽऽलोकसंयोगः चक्षुःसंयोगस्त्वग्रावच्छेदेन, तत्र घटप्रत्यक्षाभावादालोकसंयोगावच्छिन्नत्वं चक्षुःसंयोगे विशेषणं देयम्(१) ।

दिनकरी ।

चक्षुर्घटितचक्षुःसन्निकर्षाच्चक्षुष्ट्वादीनां प्रत्यक्षवारणायोद्भूतेति । **उद्भूतरूपावच्छिन्नेति** महत्त्वावच्छिन्नेति च चक्षुःसंयुक्तपदार्थैकदेशसंयोगेनाऽन्वेति । **तथा** च महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवेतसमवायस्य त्रसरेणावभावात् तच्चाक्षुषायनुपपत्तिरतः संयोगस्य प्रत्यासत्तित्वमावश्यकमिति भावः । संयुक्तसमवेतसमवायेन संयुक्तसमवायस्य नाऽन्यथासिद्धिरित्याह— **द्रव्यसमवेतेति । तादृशेति । महत्त्वावच्छिन्नेत्यर्थः । तथा** च **महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायस्य** त्रसरेणुरूपेऽभावाच्चाक्षुषानुपपत्त्या संयुक्तसमवायस्य प्रत्यासत्तित्वमिति भावः । एतत्प्रसङ्गेन पूर्वं रूपावच्छिन्नत्वमग्रे चाऽऽलोकसंयोगावच्छिन्नत्वं चक्षुःसंयोगे, तत्प्रयोजनं चाऽभिहितमिति बोध्यम् ।

स्पार्शनप्रत्यक्षे त्वक्सन्निकर्षस्य कारणत्वं प्रपञ्चयति—**एवमित्यादिना ।**

रामरुद्री ।

वाच्यम् । घ्राणेन्द्रियादिसंयोगसत्त्वेऽपि द्रव्यनिष्ठलौकिकविषयतया प्रत्यक्षसामान्याभावसत्त्वेन तस्य तत्र प्रयोजकत्वासम्भवादिति ध्येयम् । **एवं**—विशिष्यैव कार्यकारणभावे । **चक्षुर्घटितेति** । परकीयचक्षुर्घटितेत्यर्थः । स्वस्मिन्स्वप्रतियोगिकसंयोगानुयोगित्वासम्भवात् । **संयुक्तपदार्थैकदेशेति** । यद्यपि सामानाधिकरण्यसम्बन्धेन संयोगे रूपावच्छिन्नत्वनिवेशापेक्षया संयुक्त एव समवायेन रूपावच्छिन्नत्वनिवेश एव लाघवं, तथाऽपि विभिन्नावच्छेदेनाऽऽलोकचक्षुःसंयोगाभ्यां दण्डादिप्रत्यक्षवारणायाऽग्रे चक्षुःसंयोगे आलोकसंयोगनिष्ठावच्छेदकतानिरूपकत्वस्य विवक्षणीयतया तत्रैव महत्त्वोद्भूतरूपवैशिष्ट्यं निवेशितम्, एकत्रयिकं विशेषणम् अपरत्र विशेषणद्वयमिति स्वीकारे अर्धजरतीयन्यायापत्तेरिति भावः । वस्तुत उक्तलाघवानुरोधेन चक्षुःसयोग एव विशेषणद्वयमुचितम्, एकत्र विशेषणत्रयोपगमे परस्परविशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावाधिक्यप्रसङ्गादित्यवधेयम् । ननूक्तग्रन्थस्य संयुक्तसमवेतसमवायेनैवोपपत्तौ संयोग—संयुक्तसमवाययोर्वैयर्थ्यमित्याशङ्क्यैव अवतारिततया संयोगे महत्त्वावच्छिन्नत्वनिवेशेनैव तादृशशङ्कानिरासादुद्भूतरूपावच्छिन्नत्वविशेषणप्रदर्शनं मूले विफलमित्याशङ्कां परिहरति—**एतदिति** । तथा च स्मृतस्योपेक्षानर्हत्वादेव तत्र विशेषणद्वयमभिहितमिति

---

(१) के चित्तु उद्भूतरूपावच्छिन्नमहत्त्वावच्छिन्नालोकसंयोगावच्छिन्नचक्षुःसंयोगत्वादिना चाक्षुषं प्रति हेतुत्वे साञ्जनचक्षुषो बिडालादेर्वा तमःस्थितघटादिप्रत्यक्षानुपपत्तिरतो विजातीयचक्षुःसंयोगादेरेव चाक्षुषादिजनकत्वमेषितव्यम् । तच्च नैजात्यं चाक्षुषानुपधायकचक्षुःसंयोगाद्व्यावृत्तं चक्षुःसंयोगमात्रवृत्त्येव कल्पनीयमिति वदन्ति । तन्न । आलोकसंयोगाभावस्य चाक्षुषप्रतिबन्धकत्वेनावच्छिन्नत्वसम्बन्धेन तदभावस्य प्रतिबन्धकसंसर्गाभावविधया निवेशनैवोपपत्तेः । अञ्जनसंयोगस्य बिडालचक्षुःसंयोगस्य च स्वातन्त्र्येणोत्तेजकत्वकल्पन एव पूर्वोक्तापत्तिवारणसम्भवात् । आलोकत्वं तु तेजस्त्वव्याप्यो जातिविशेषः । दिवसादौ च ग्रहनक्षत्राद्यदर्शनं प्रबलसूर्यरश्म्यभिहतैश्चक्षुरश्मिभिर्ग्रहादीनां संयोगाभावादेवोपपादनीयमिति ।

एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः कारणम्, द्रव्यसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवायः, द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षे त्वक्संयुक्तसमवेतसमवायः। अत्राऽपि महत्त्वावच्छिन्नत्वमुद्भूतस्पर्शावच्छिन्नत्वं च पूर्ववदेव बोध्यम्।

एवं गन्धप्रत्यक्षे घ्राणसंयुक्तसमवायः, गन्धसमवेतस्य घ्राणजप्रत्यक्षे घ्राणसंयुक्तसमवेतसमवायः।

रासनप्रत्यक्षे रसनासंयुक्तसमवायः, रससमवेतरासनप्रत्यक्षे रसनासंयुक्तसमवेतसमवायः कारणम्।

शब्दप्रत्यक्षे श्रोत्रावच्छिन्नसमवायः, शब्दसमवेतश्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः कारणम्।

अत्र सर्वं प्रत्यक्षं लौकिकं बोध्यम्। वक्ष्यमाणमलौकिकप्रत्यक्षमिन्द्रियसंयोगादिकं विनाऽपि सम्भवति।

एवमात्मप्रत्यक्षे मनःसंयोगः, आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः, आत्मसमवेतसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवेतसमवायः कारणम्।

अभावप्रत्यक्षे समवायप्रत्यक्षे चेन्द्रियसम्बद्धविशेषणता हेतुः। वैशेषिक

दिनकरी।

पूर्ववदेवेति। परमाणुघटितत्वक्सन्निकर्षेण स्पर्शत्वस्पार्शनवारणाय महत्त्वावच्छिन्नत्वं, प्रभाघटितसन्निकर्षेण स्पर्शत्वस्पार्शनवारणायोद्भूतस्पर्शावच्छिन्नत्वादिविशेषणं बोध्यमित्यर्थः।

श्रोत्रावच्छिन्नेति। सकलपुरुषाणां सर्वशब्दप्रत्यक्षापत्तिरतः श्रोत्रावच्छिन्नेति।

इन्द्रियसम्बद्धेति। यद्यपीन्द्रियसंयुक्तविशेषणता इन्द्रियसंयुक्तसमवेतविशेषणतेत्यादिक्रमेण बाहुल्यमेव, तथापि विशेषणतात्वेनैव रूपेण विभागः। न चैवं समवायत्वेन च-

रामरुद्री।

न दोष इति भावः। अत्र च 'अग्रे च'इत्यादिकं यथाऽऽलोकसंयोगावच्छिन्नत्वोपादानं प्रयोजनान्तरार्थमेव, न तु संयोगसंयुक्तसमवाययोः सन्निकर्षत्वोपपत्त्यर्थं, तथोद्भूतरूपावच्छिन्नत्वनिवेशनमपि चक्षुष्टादेः चाक्षुषनिरसनायैवेति दृष्टान्तविधयैवोक्तं, तेन वक्ष्यमाणग्रन्थस्योक्ताशङ्क्याऽनवतारितत्वेपि न क्षतिः।

प्रभायां सत्तास्पार्शनवारणं त्वक्संयोगे उद्भूतरूपावच्छिन्नत्वनिवेशान्न सम्भवतीति स्पर्शानुधावनम्।

श्रोत्रावच्छिन्नत्वस्य समवायविशेषणस्य फलमाह—**सकलेति।**

नन्विन्द्रियसम्बद्धविशेषणतया समवायाभावयोः प्रत्यक्षमिति वदतो मूलकारस्येन्द्रियसम्बद्धविशेषणतात्वेन विशेषणताया विभाग इति ग्रन्थकाराणामाशयो लभ्यते, स चाऽसङ्गतः, इन्द्रियेण कालिकेन सम्बद्धे घटादौ विशेषणतया पटत्वाभावादेः(१) प्रत्यक्षानुत्पत्तेः(२), किन्तु संयुक्तविशेषणतात्वादिनैव सन्निकर्षता वाच्येति विभागोऽपि तेन तेन रूपेणैव कार्यः, तथा च सन्निकर्षस्य षड्विधत्वव्याघात इत्याशङ्क्य निराचष्टे—**यद्यपीति।** यद्यपीयमाशङ्काऽग्रे मूलकृतैव क्रियते, समाधीयते चोक्तसमाधानेनैवेति व्याख्याने एतदाशङ्कायास्तत्समाधानस्य च वैफल्यमेव, तथाऽपि विशेषणतानां विशेषणतात्वेन विभागे संयुक्तसमवायादीनां चतुर्णां (केवलसमवायविभाजक) समवायत्वेनाऽनुगमसम्भवेन संयोगसमवायविशेषणतास्त्रयः सन्निकर्षा इत्येव कुतो नोक्तमित्याशयस्य मूलकृता तादृशसमाधानोपर्यनिराकृततया

---

(१) 'घटत्वाभावादेः' 'कालत्वाभावादेः' 'फलत्वाभावादेः' इत्यपि पाठा।

(२) 'प्रत्यक्षत्वानुत्पत्तेः' 'प्रत्यक्षत्वानुपपत्तेः' 'प्रत्यक्षत्वापत्तेः' इत्यपि पाठः।

यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ॥ ६२ ॥

क्रमते तु समवायो न प्रत्यक्षः । अत्र यद्यपि विशेषणता नानाविधा, तथा हि—भूतलादौ घटाद्यभावः संयुक्तविशेषणतया गृह्यते । सङ्ख्यादौ रूपाद्यभावः संयुक्तसमवेतविशेषणतया, सङ्ख्यात्वादौ रूपाद्यभावः संयुक्तसमवेतसमवेतविशेषणतया, शब्दाभावः केवलश्रोत्रावच्छिन्नविशेषणतया, कादौ खत्वाद्यभावः श्रोत्रावच्छिन्नसमवेतविशेषणविशेषणतया, एवं कत्वाद्यवच्छिन्नाभावे गत्वाभावादिकं श्रोत्रावच्छिन्नविशेषणतया, घटाभावादौ पटाभावश्चक्षुःसंयुक्तविशेषणविशेषणतया, एवमन्यत्राऽप्यूह्यं, तथाऽपि विशेषणतात्वेन एकैव सा गण्यते, अन्यथा षोढा सन्निकर्ष इति प्राचां प्रवादो व्याहन्येतेति ॥ इति लौकिकसन्निकर्षनिरूपणम् ॥

(१) अत्राभावप्रत्यक्षे योग्यानुपलब्धिः कारणम्, तथा हि-भूतलादौ घ-

दिनकरी ।

तुणामनुगमप्रसङ्गः, परिभाषाया अपर्यनुयोज्यत्वात् । **समवायो न प्रत्यक्ष इति** । सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वादिति भावः । ॥ इति लौकिकसन्निकर्षनिरूपणम् ॥

रामरुद्री ।

तन्निरासायैव मूलोक्तार्थस्याऽनुवाद इति विभावनीयम् । **परिभाषायाः**—षडवधसन्निकर्ष इति शास्त्रकारीयसंकेतस्य । **अपर्यनुयोज्यत्वादिति** । संयोगादिभेदेन त्रिविधः सन्निकर्ष इत्येव कृतो नोक्तमित्याक्षेपानर्हत्वादित्यर्थः । तथा विभागेऽपि क्षतिविरहादिति भावः । मूले **'वैशेषिकमते समवायो न प्रत्यक्षः'** इत्युक्तं तत्र युक्तेरनुक्तत्वात्तत्र युक्तिमाह—**सम्बन्धप्रत्यक्ष इति** । समवायस्यैकतया एकदा भाविभूतसकलाश्रयव्यक्तीनां ज्ञानासम्भवादिति भावः । न्यायमते तु सम्बन्धप्रत्यक्षत्वं न कार्यतावच्छेदकं, सम्बन्धत्वस्यानुगतस्य निर्वक्तुमशक्यत्वात्, सांसर्गिकविषयतावत्त्वस्य कथञ्चित्सुवचत्वेऽपि

---

(१) पूर्वं 'विशेषणतया तद्गदभावानां ग्रहो भवेत्' इत्यनेनाऽभावोपलब्धौ विशेषणतासन्निकर्षेणेन्द्रियस्य करणत्वमभिहितम्, अत्र तावदेवं भाट्टानामभिप्रायः—अभावज्ञानं हि प्रतियोग्युपलम्भविरह एव भवतीति योग्यप्रतियोग्युपलम्भाभावस्याऽभावज्ञाने कारणताऽवश्यमभ्युपगन्तव्या, तत्र प्रतियोग्युपलम्भाभावस्यैव कारणत्वकल्पनया निर्वाहे इन्द्रियस्य तत्र कारणतायां युक्तिविरहेणेन्द्रियाजन्यत्वभावज्ञानस्य । अभावज्ञानस्य च प्रत्यक्षादिप्रमाणचतुष्कानन्तर्गततयाऽतिरिक्तत्वमप्येवं सिद्धं भवति । ननु अभावप्रत्ययस्तावदधिकरणविषयकतयैवोपलभ्यते, अघटं भूतलमिति दर्शनात्, अतोऽधिकरणभानोपपत्तये तत्प्रतीतेरिन्द्रियजन्यत्वमावश्यकमिति चेन्न । अधिकरणांशभानस्येन्द्रियजन्यत्वेऽपि अभावांशभानस्य योग्यानुपलब्धिजत्वसम्भवात् । तस्याऽपीन्द्रियजत्वमस्त्विति तु न वक्तव्यम् । इन्द्रियव्यापारोपरमेऽप्यभावप्रतीतेर्दर्शनात् इन्द्रियस्य व्यभिचारात् । यथा स्वरूपतो देवकुलं दृष्ट्वा गृहे आगतः पृच्छ्येत, देवकुले देवदत्तो अस्ति न वेति-तत्र स देवकुले देवदत्तो यद्यभावस्यात्तर्हि स उपलभ्येतेति विचार्य योग्यानुपलब्ध्याऽभावं प्रतीत्य वदति-देवकुले देवदत्तो नाऽस्तीति, न ह्यसौ प्रत्ययः इन्द्रियजः तदानीमिन्द्रियव्यापाराभावादिति योग्यानुपलब्धेरेवाऽभावोपलब्धिकारणत्वमभ्युपगन्तव्यम् । नाऽपि देवकुले देवदत्तविरहो देवकुलग्रहणसमय एव निर्विकल्पकेन गृहीतः सम्प्रति स्मर्यते, अभावस्य प्रतियोग्युपरक्तत्वेन तद्ग्रहस्य विशिष्टग्रहात्मकतया निर्विकल्परूपत्वासम्भवात् । अत्र के चिदाहुः-किं पूर्वं देवकुलस्य देवदत्तसङ्कीर्णस्य तद्विविक्तस्य वा ग्रहणमासीत् ? आद्ये त्वन्मतेऽपि न देवदत्तविरहावगमः सम्भवति, प्रतियोग्युपलम्भाभावविरहात् । यदि विविक्तस्य, गृहीत एव तर्हि देवदत्तस्याऽभाव इति

दिनकरी ।

ननु 'विशेषणतया तद्वत्'-इत्याद्यसङ्गतं, विशेषणताप्रत्यासत्तेरभावात् । न च तत्प्रत्यासत्तेरनभ्युपगमेऽभावप्रत्यक्षानुपपत्तिरिति वाच्यम् । इष्टापत्तेः, अनुपलम्भस्यैव तत्प्रत्यक्षस्योपगमात् । न च समवायप्रत्यक्षानुरोधात् विशेषणताप्रत्यासत्तिस्वीकारः, तस्याऽनुपगमात् , अत एवाऽभावप्रत्यक्षे इन्द्रियं न करणं, किन्तु योग्यानुपलब्धिरेव, इति भाट्टानामाक्षेपं दूषयितुं मूले-यदि स्यादिति । तथा चेन्द्रियाणामभावप्रत्यक्षे जननीये योग्यानुपलब्धेः सहकारितामात्रेण निर्वाहेऽतिरिक्तप्रमाणकल्पनमनुचितमिति भावः । तत्र योग्या-

रामरुद्री ।

तादृशसम्बन्धत्वस्य घटत्वादिसाधारणतया तत्प्रत्यक्षे व्यभिचारापत्तेः(१), अपि तु संयोगप्रत्यक्षत्वमेव कार्यतावच्छेदकमतः समवायस्य तन्मते न प्रत्यक्षत्वानुपपत्तिरिति भावः ॥ इति लौकिकसन्निकर्षनिरूपणम् ।

समवायप्रत्यक्षानुरोधादित्यस्य विशेषणतायाः सन्निकर्षत्वमिति शेषः । **तस्य**—समवायप्रत्यक्षस्य । **अनुपगमात्**—अस्वीकारादित्यर्थः । भट्टैरिति शेषः । **तैः** समवायस्यैवाऽनङ्गीकारादवयवावयव्यादीनां स्वरूपस्यैव तन्मते सम्बन्धत्वादिति भावः । **अत एव**–विशेषणताप्रत्यासत्तेरभावादेवेत्यर्थः । **ननु यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते तत्र विशेषणतया तद्वद्भावानां ग्रहो भवेदित्यनेन** मूलेन नोक्तभट्टमतनिराकरणं सम्भवति, तत्र तादृशमतनिरासकयुक्तेरस्फुरणादतस्तद्भावमाह—**तथा चेति । निर्वाह इति** । विशेषणतासन्निकर्षेणाऽभावप्रत्यक्षोपगमे तया पिशाचादीनामप्यभावप्रत्यक्षा-

---

इन्द्रियमेवाऽभावोपलब्धौ कारणमिति । तन्न । न तावद्देवकुलस्य देवदत्तसङ्कीर्णस्य तद्विविक्तस्य वा ग्रहणं पूर्वमासीत् , कितर्हि ? देवकुलस्यैव स्वरूपतो ज्ञानमासीत् , तादृशस्थले इन्द्रियव्यापाराभावात् योग्यानुपलब्धेरेवाऽभावज्ञानकारणत्वमिति ।

अत्रोच्यते । देशान्तरगतोऽन्येन केन चित्पृष्टो देवकुले देवदत्तोऽस्ति नाऽस्ति वेति, तत्र स किमिदानीन्तनेनाऽनुपलम्भेनेदानीन्तनदेवदत्ताभावं प्रत्येति ? प्राक्तनानुपलम्भेन वा प्राक्तनं देवकुले देवदत्तव्यतिरेकं तत्रेदानीमनुपलब्धिं तावद्योग्यानुपलब्धिः,उपलब्धिकारणस्य देवकुलचक्षुःसंयोगस्य विरहेण यदीदानीं देवदत्तो देवकुले स्यादुपलभ्येतेत्यापत्तेरेवाऽसम्भवात् । प्राक्तनानुपलब्धिस्तु नेदानीम् । स्मृत्यारूढा भविष्यतीति चेन्न, पूर्वमसंविदितत्वात् । स्मृतिर्हि तत्रैव प्रवर्तते यद्धि पूर्वमनुभूतं स्यात् , न चैवमत्रेति नैतदेवम् । अथ तस्या अपि योग्यानुपलब्ध्यैवोपलब्धिरिष्यते, तर्ह्यनवस्थायाः कीदृशः प्रतिक्षेपः ? ननु योग्यानुपलब्धिस्तावदुपलब्ध्यभाव एव, स चेदानीमप्यनुवृत्त एवेति नाऽनुपपत्तिरिति चेत् , अस्तु तावदिदैवम् । यत्र पुनर्देवदत्ताभावः प्रथमं न गृहीतः, पश्चाद्देवदत्तो गृहीतः, तत्र देवदत्तः प्राङ्नाऽऽसीदिति प्रतीतिः कथमुपपद्यते ? इदानीं देवदत्तोपलब्ध्या तदनुपलम्भस्य निवर्तितत्वात् , तस्मान्न योग्यानुपलब्ध्याऽभावः परिच्छिद्यते । केन तर्हि ? इन्द्रियेणाऽनुमानेन वेति गृहाण । अत्र तु अनुमानेनैव । तथा हि—यो हि स्मृतियोग्यः स्मर्यमाणः सत्यामपि सुस्मूर्षायां न स्मर्यते स तत्र नाऽऽसीदिति । तर्हि स्मृत्यभावः एवाऽभावप्रत्ययकारणमस्त्विति चेन्न । इदानीं घटाभावप्रत्ययानुपपत्तेः । यत्र चेन्द्रियस्य कारणत्वे व्यभिचारो दर्शितस्तत्र तु प्राग्वदनुमानेनैवाऽभावागम इति सर्वमवदातम् । गुरवस्तु अभावो नाम कश्चित्पदार्थो यदि स्यात्तर्हि तदुपलब्धिकारणचिन्ता श्रेयस्करी, स एव तु नाऽस्तीत्याहुः । तत्राऽभावपार्थसिद्धिप्रकारोऽभावनिरूपणे दर्शित इति सिद्धमभावोपलब्धाविन्द्रियस्य कारणत्वम् । नन्वेवं प्रतियोग्युपलम्भदशायामपि इन्द्रियसन्निकर्षसत्त्वादभावप्रत्यक्षापत्तिरित्यत आह–अत्रेत्यादि । विस्तयस्त्वन्यत्र द्रष्टव्यः ।

(१) तत्राऽपि तदाश्रयीभूतभाविभूतघटादिज्ञानासम्भवादिति भावः ।

टादिज्ञाने जाते घटाभावादिकं न ज्ञायते, तेनाऽभावोपलम्भे प्रतियोग्यु-

दिनकरी।

नुपलब्धेरभावप्रत्यक्षे हेतुत्वे युक्तिमाह—**तथा हीति। घटादिज्ञाने**—घटादिभ्रमे। न च घटादिभ्रमहेतुदोष एव तत्प्रतिबन्धकः, अन्यथा भ्रमोत्पत्तिकाले तदभावप्रत्यक्षापत्तिरिति वाच्यम्। विनश्यदवस्थदोषाद्यत्र भ्रमः, तत्र भ्रमोत्पत्तिकाले प्रतिबन्धकीभूतदोषाभावस्य सत्त्वादभावप्रत्यक्षापत्तेः। **अभावोपलम्भे**—तदिन्द्रियजन्यतत्सम्बन्धावच्छिन्नतदभावलौकिकप्रत्यक्षे। **प्रतियोग्युपलम्भाभाव इति**। तदिन्द्रियजन्यानाहार्ये(१)तत्सर्गकतत्प्रकारकोपलम्भाभाव इत्यर्थः। इन्द्रियान्तरजन्ये आनुमानिके च तदुपलम्भे सत्यपि तदभावप्रत्यक्षात्तदिन्द्रियजन्येति। अभावप्रत्यक्षहेतुप्रतियोग्यारोपसत्त्वेऽप्यभावप्रत्यक्षादनाहार्येति।

रामरुद्री।

पत्तिरित्यनिर्वाहः, योग्यानुपलब्धेरभावग्राहकत्वे तु विशाचस्याऽयोग्यतया योग्यप्रतियोग्युपलम्भाभावरूपकारणाभावेन न तत्प्रत्यक्षापत्तिरिति भावः। इदानीन्तु अभावग्राहकसन्निकर्षसत्त्वेऽपि सहकारिणो योग्यानुपलम्भस्याऽभावादेव न पिशाचाभावादिप्रत्यक्षापत्तिरिति भावः। **अनुचितमिति**। यद्यप्यनुपलब्धेः कारणत्वकल्पनं विशेषणतासन्निकर्षकल्पनं चाऽपेक्ष्य अनुपलब्धौ प्रमाणत्वकल्पनमेवोचितं, तथाऽपि अनुपलब्धेर्व्यापाराभावेन व्यापारवत्कारणत्वघटितप्रमाणत्वासम्भवात्, अभावज्ञानस्य अधिकरणाविषयकस्य अननुभवेन अनुपलब्धिजन्याभावज्ञाने अधिकरणभानानुपपत्तेश्च अभावज्ञानस्य प्रत्यक्षरूपताया एव स्वीकरणीयत्वात्, तथा सति चाऽभावस्य विशेषणतयाऽधिकरणस्य च संयोगादिना एकस्मिन्नेव ज्ञाने भानसम्भवान्नाऽनुपपत्तिरिति भावः। **ननु** घटस्य प्रमारूपज्ञानदशायामभावप्रत्यक्षमेव न सम्भवति, घटसत्त्व एव तत्प्रमासम्भवेन तदानीमभावे विशेषणतासन्निकर्षस्यैव अभावादतो **ज्ञान**पदं भ्रमार्थकमित्याह—**घटादिभ्रम इति**। ननु घटभ्रमकाले घटाद्यभावप्रत्यक्षानुदयेन अभावप्रत्यक्षे प्रतियोगिभ्रमजनकदोषाभावस्यैव कारणत्वमस्तु, न तु प्रतियोग्युपलम्भाभावस्य तत्कारणता, तथा सत्यपि भ्रमोत्पत्तिकाले अभावप्रत्यक्षापत्तेरवारणादित्याशङ्कते—**न चेति**। दोषाभावस्याऽभावप्रत्यक्षकारणत्वेऽपि यत्र विनश्यदवस्थापन्नदोषाद्घटादिभ्रमः, तत्र भ्रमानन्तरमभावप्रत्यक्षवारणाय प्रतियोगिन उपलम्भाभावस्याऽपि कारणत्वमावश्यकमिति समाधत्ते—**विनश्यदवस्थेति**। वस्तुतः प्रतिबन्धकाभावस्य कार्यकालवृत्तित्वेन कारणतया प्रतियोग्युपलम्भस्याऽभावप्रत्यक्षप्रतिबन्धकतया कारणीभूताभावप्रतियोगित्वेन प्रतिबन्धकताया दुरपह्नवतया चाऽभावप्रत्यक्षोत्पत्तिकालेऽपि प्रतियोग्युपलम्भाभावस्याऽपेक्षिततया दोषप्रतिबन्धकतां विनैव उपपत्तिरित्यवधातव्यम्। **तदिन्द्रियजन्येतीति**। कारणतावच्छेदककोटौ कार्यतावच्छेदककोटौ चेति शेषः। **अभावप्रत्यक्षहेत्वित्वात**। इदञ्चाऽभावप्रत्यक्षे प्रतियोग्यारोपस्याऽपि कारणत्वमिति प्राचीनमताभिप्रायेण। न चैवं **'यत्र प्रसज्यते'** इत्यनेन मूलकारेणाऽपि तादृशापत्तिसहकारेणैवाऽभावस्य प्रत्यक्षोपगमात्तादृशापत्तेरपि घटप्रकारकतया स्वमतेऽपि तस्य हेतुता सिद्धेत्याशङ्कनीयं, घटप्रकारकोपलम्भविषयः स्यादित्यापत्तेर्भूतले घटाप्रकारकत्वात्, यद्यत्र घटः स्यादिति तु आपत्तिकारणीभूतापादकवत्ताज्ञानप्रदर्शनपरमेव(२), न त्वापत्तिविषयाभिलापरूपं, तथा चाऽऽपत्तेः कारणत्वेऽपि तस्याः घटप्रकारकत्वेन स्वमते प्रतियोग्यारोपस्य कारणत्वाप्रसक्तेः, तादृशापत्तियोग्यतैवाऽपेक्षिता, न त्वापत्तिरपीत्यग्रे वक्ष्यमाणत्वाच्चेति मन्तव्यम्। **अनाहार्येति**। एवमेकससर्गेण प्रतियोगिप्रकारकज्ञानसत्त्वेऽप्यन्यससर्गेणाऽभावप्रत्यक्षोत्पत्त्या उभयत्र ससर्गनिवेश इत्यपि बोध्यम्।

ननु मूले अभावप्रत्यक्षजनकप्रतियोगितावच्छेदकावच्छिन्नतत्सम्बन्धावच्छिन्नप्रकारतानिरूपिततदधिकरणनिष्ठविशेष्यताशाल्युपलम्भाभावे योग्यता निवेशिता, तत्प्रयोजनन्तु नोक्तमतस्तत्प्रयोजनं प्रदर्श-

---

(१) बाधकालीनेच्छाजन्यज्ञानमाहार्यज्ञानम्, तदन्येत्यर्थः।

(२) आपत्ति प्रत्यापाद्यव्याप्यापादकवत्तानिश्चयस्य हेतुत्वादिति भावः।

पलम्भाभावः कारणम्। तत्र योग्यताऽप्यपेक्षिता, सा च प्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितप्रतियोगिकत्वरूपा, तदर्थश्च प्रतियोगिनो घटादेः सत्त्वप्रसक्त्या प्रसञ्जित उपलम्भरूपः प्रतियोगी यस्य सोऽभावप्रत्यक्षे हेतुः, तथा हि-यत्रऽऽलोकसंयोगादिकं वर्तते तत्र यद्यत्र घटः स्यात्तर्हि उपलभ्येतेत्यापादयितुं शक्यते, तत्र घटाभावादेः प्रत्यक्षं भवति, अन्धकारे तु नाऽऽपादयितुं

दिनकरी।

तत्र—प्रतियोग्युपलम्भाभावे। **अपेक्षितेति**। तेन न जलपरमाण्वादौ पृथिवीत्वाभावादेः प्रत्यक्षमिति भावः। मणिकृन्मतानुसारेण योग्यतां निर्वक्ति—**सा चेति**। **प्रसञ्जितः**-**आपादितः**, **सः**-**उपलम्भाभावः**। **अभावप्रत्यक्षे हेतुरिति**। अत्र तदधिकरणविषयकाभावप्रत्यक्षे तदधिकरणकतदापादककापत्तियोग्यतदुपलम्भस्य विषयतासम्बन्धावच्छिन्नप्रतियोगिताकोऽभावो हेतुरित्यर्थः। **उपलम्भे तदधिकरणकतदापादककापत्तियोग्यत्वं च तत्प्रतियोगिसत्त्वनिष्ठव्याप्यनिरूपकत्वम्। अत्र च तदापादककापत्तिर्यत्र नोत्पन्ना, तत्र तद-**

रामरुद्री।

यन् तद्वैयर्थ्यशङ्कामपाकरोति—**तेनेत्यादि**। तथा च तदनिवेशे जलपरमाणुविशेष्यकसमवायावच्छिन्नपृथिवीत्वत्वावच्छिन्नप्रकारकोपलम्भाभावरूपकारणबलात्तत्र पृथिवीत्वाभावप्रत्यक्षापत्तिरिति भावः।

मणिकृन्मतेति। अनन च योग्यप्रतियोगिप्रकारकयोग्याधिकरणविशेष्यकोपलम्भप्रतियोगिकत्वरूपयोग्यतानिवेशनमपि सम्भवतीति सूचितम्। एवमपि स्तम्भादिविशेष्यकपिशाचोपलम्भस्य जलपरमाण्वादौ पृथिवीत्वोपलम्भस्य च योग्य(१)प्रकारकत्वयोग्यविशेष्यकत्वविरहेणैव स्तम्भे पिशाचाभावस्य जलपरमाण्वादौ पृथिवीत्वाभावस्य च अप्रत्यक्षत्वोपपादनसम्भवादिति भावः। मूले-**प्रतियोगिसत्त्वेति**। **प्रतियोगिसत्त्वस्य**-प्रत्यक्षविषयाभावप्रतियोगिसत्त्वस्य, **प्रसञ्जनेन**-आहार्यारोपेणेत्यर्थः। आपत्तावापाद्यव्यापादकवत्ताज्ञानस्य हेतुतया निर्घटदेशादौ प्रतियोगिसत्त्वज्ञानस्याऽऽहार्यत्वाच्चेतिभावः। **'प्रसञ्जितः' इत्याऽर्थमाह-आपादित इति**। ननु जलादिविशेष्यकप्रतियोगिसत्त्वप्रसञ्जनप्रसञ्जितोपलम्भस्य विशेष्यतासम्बन्धेन अभावस्य जलपरमाण्वादौ सत्त्वेन तत्र पृथिवीत्वस्याऽभावप्रत्यक्षत्वापत्तिः। समवायावच्छिन्नभूतलविशेष्यकघटप्रकारकोपलम्भाभावस्य घटत्वयपि भूतले सत्त्वेन तत्र विशेष्यतासम्बन्धेन घटाभावप्रत्यक्षापत्तिः। न च पृथिवीत्वाभावे(२) सन्निकर्षाभावादेव नेयमापत्तिरिति वाच्यम्। अधिकरणान्तरान्तर्भावेन पृथिवीत्वा(३)भावे सन्निकर्षस्याऽपि सत्त्वात्। न च समवाय एव कार्यतावच्छेदकसम्बन्धो वाच्यः, आत्मनि च तादृशोपलम्भस्य सत्त्वादेवाऽभावविरहान्न तत्र समवायेन भूतलविशेष्यकघटाभावप्रत्यक्षापत्तिरिति वाच्यम्। तथा सति **तदधिकरणकतदापादकापत्तियोग्यत्वस्य** तदधिकरणावृत्तिधर्मानवच्छिन्नप्रतियोगिसत्त्वनिष्ठव्याप्यनिरूपकत्वस्यैव वक्ष्यमाणतया भूतलातिरिक्तविशेष्यकघटप्रकारकोपलम्भदशायामपि भूतलविशेष्यकघटाभावप्रत्यक्षानुपपत्तिः, तादृशोपलम्भाभावस्याऽऽत्मन्यभावादतो निष्कृष्टकार्यकारणभावं दर्शयति—**अत्रेति**। **तदधिकरणविषयकाभावप्रत्यक्ष इति**। तदधिकरणनिष्ठलौकिकविषयतासम्बन्धेन तदभावप्रकारकप्रत्यक्षं प्रतीत्यर्थः। **तदुपलम्भस्य**-यदभावप्रत्यक्षं जननीयं तत्प्रकारकोपलम्भस्य। **तत्प्रतियोगिसत्त्वेति**। यत्प्रतियोगिकाभावप्रत्यक्षं जननीयं तत्प्रतियोगिसत्त्वेत्यर्थः। ननु मूले **'आपादितः'** इत्युक्त्या आपादनमेवाऽपेक्षितमिति लभ्यते, तत् कथं योग्यता विवक्षितेत्यत आह-**अत्रेति**। **तत्रेति**। भूतलादौ चक्षुःसंयोगानन्तरमापादन विनाऽपि घटो नाऽस्तीति प्रतीतेरनुभवसिद्धतया योग्यतानिवेश इति भावः। ननु घटादिसत्त्वेऽपि चक्षुःसंयोगाद्यभावे घटोपलम्भानुदयान्न

(१) **'योग्यता' इति पाठः।**

(२) **'घटाभावे' इत्यपि पाठः।**

(३) **'घटाभावे' इत्यपि पाठः। एतौ पाठौ प्रामादिकावेव।**

दिनकरी।

भावप्रत्यक्षानुपपत्तिरिति योग्यत्वनिवेशः। न च प्रतियोगिसत्त्वस्योपलम्भव्याप्यत्वं न निर्विशेषितस्य, उपलम्भकसामग्र्यन्तरविरहे प्रतियोगिसत्त्वेऽप्युपलम्भाभावात्, किन्तु महत्त्वोद्भूतरूपाश्रयच्छिन्नस्यैव, एवं च महत्त्वादिविशिष्टपृथिवीत्वस्योपलम्भव्याप्यत्वाज्जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षापत्तिरिति वाच्यम्। तदधिकरणावृत्तिधर्मो(१)-नवच्छिन्नत्वस्य योग्यताघटकाभूतव्याप्यंशे निवेशात्, महत्त्वस्य जलपरमाण्ववृत्तित्वेन तादृशव्याप्तौ तादृशधर्मानवच्छिन्नत्वाभावात्। न च गन्धवदणुभिन्नत्वविशिष्टस्याऽपि पृथिवीत्वस्य तदुपलम्भव्याप्यत्वात् गन्धवदणुभिन्नत्वस्य जलपरमाणुवृत्तित्वाच्च तदोषतादवस्थ्यमिति वाच्यम्। योग्यताघटकव्याप्तौ प्रतियोगिग्राहकातिरिक्तधर्मानवच्छिन्नत्वस्याऽपि निवेशाद्गन्धवदणुभिन्नत्वादेश्च प्रतियोगिग्राहकातिरिक्तत्वेन तादृशधर्मानवच्छिन्नत्वस्योक्तव्याप्तावभावात्। न च प्रतियोगिग्राहकत्वं प्रतियोगिप्रहजनकत्वं, तच्च गन्धवदणुभिन्नत्वपृथिवीत्वोभयसमूहालम्बनात्मकलौकिकप्रत्यक्षे विषयावधया हेतुत्वात् गन्धवदणुभिन्नत्वस्याऽप्यक्षतमिति वाच्यम्। प्रतियोगिप्रकारतानिरूपितलौकिकविशेष्यताविरहप्रयोजकीभूताभावप्रतियोगित्व-

रामरुद्री।

केवलप्रतियोगिसत्त्वस्य(२) व्यापकता उपलम्भ इति क्वाऽप्यभावप्रत्यक्षं न स्यात्। यदि च प्रतियोगिसत्त्वातिरिक्त(३)प्रतियोग्युपलम्भकारणकूटावच्छिन्नप्रतियोगिसत्त्वव्यापकता विवक्षितत्युच्यते, तदा परमाणौ पृथिवीत्वाभावप्रत्यक्षवारणमशक्यमेवे(४)त्याशङ्कते—**न चेति। वाच्यमिति**परिणाऽन्वयः। **सामग्र्यन्तरेति**। तादृशसामग्रीघटकप्रतियोगिसत्त्वातिरिक्तकारणेत्यर्थः। यथाश्रुते यत्किञ्चित्सामग्र्यासत्त्वे तदन्तरविरहेऽपि प्रतियोग्युपलम्भादसङ्गत्यापत्तेः। **महत्त्वोद्भूतरूपत्युपलक्षण**, प्रतियोगिसत्त्वातिरिक्तप्रतियोग्युपलम्भकारणकूटावच्छिन्नस्यैव प्रतियोगिसत्त्वस्योपलम्भव्याप्यत्वात्। न चैवं तथाविधनानाचक्षुःसंयोगव्यक्तीना त्वक्संयोगव्यक्तीना च एकत्राऽसम्भवेन तादृशप्रतियोगिसत्त्वं न कुत्राऽपीति वाच्यम्। यत्किञ्चिदनुभवनिष्ठकार्यतानिरूपितकारणतावच्छेदका यावन्तः, प्रतियोगिसत्त्वातिरिक्ततदवच्छिन्नकूटविशिष्टप्रतियोगिसत्त्वव्यापकताया विवक्षणीयत्वात्। **तदधिकरणेति**। यदधिकरणविशेष्यकाभावप्रत्यक्षत्वं कार्यतावच्छेदकं तदधिकरणेत्यर्थः। तथा चैतच्छाभार्यैव पूर्वं **तदधिकरणकतदापादकेत्यत्र तदधिकरणेत्युक्तमिति**भावः। **तादृशधर्मानवच्छिन्नत्वाभावादिति**। परमाण्ववृत्तिधर्मानवच्छिन्नत्वाभावादित्यर्थः'(५)। तथा च **तदधिकरण**पदेन जलपरमाणुग्रादाने प्रतियोगिसत्त्वनिष्ठपरमाण्ववृत्तिधर्मानवच्छिन्नव्याप्तिनिरूपकोपलम्भाप्रसिद्ध्या तदभावरूपकारणविरहादेव न परमाणौ पृथिवीत्वाभावप्रत्यक्षमिति भावः। ननु महत्त्वस्थाने गन्धवदणुभिन्नत्व निवेश्य तद्विशिष्टत्वे सति इन्द्रियसंयोगादिवाशिष्टपृथिवीत्वसत्त्वस्य पृथिवीत्वोपलम्भव्याप्यतया तस्य च जलपरमाणुवृत्तितया जलपरमाणौ पृथिवीत्वाभावप्रत्यक्षापत्तिरित्याशङ्कते—**न चेति। प्रतियोगिग्राहकेति**। प्रतियोगिप्रत्यक्षजनकेत्यर्थः। गन्धवदणुभिन्नत्वन्तु न प्रत्यक्षजनकं, तथा सति जलपरमाणौ जलत्वादिप्रत्यक्षापत्तिरिति भावः। **विरहप्रयोजकेति**।

---

(१) धर्मे प्रतियोगितावच्छेदकान्यत्वमपि विशेषणं देयम्। अन्यथा घटत्वादेरेव तदधिकरणावृत्तिधर्मत्वेन भूतले घटाभावप्रत्यक्षानुपपत्तेः। एवञ्च न दोष इति ध्येयम्।

(२) 'प्रतियोगित्वस्य' इत्यपि पाठः।

(३) वैशिष्ट्यस्य प्रतियोगिसत्त्व एव निवेशेन पुनः प्रतियोगिसत्त्वस्य तत्र विशेषणविधया निवेशने गौरवमतः प्रतियोगिसत्त्वातिरिक्तेति।

(४) महत्त्वोद्भूतरूपादिविशिष्टपृथिवीत्वस्योपलम्भव्याप्यतायामविवादादिति भावः।

(५) 'धर्मावच्छिन्नत्वाभावाभावादित्यर्थः' इत्यपि पाठः।

दिनकरी ।

स्यैव प्रतियोगिग्राहकपदार्थत्वात् । अथैवं पिशाचत्वप्रकारतानिरूपितलौकिकविशेष्यत्वाप्रसिद्धौ तद्घटितनिरुक्तयोग्यानुपलम्भविरहात्तदभावप्रत्यक्षं न स्यादिति चेन्न । न हि वयं सर्वत्राऽभावप्रत्यक्षे निरुक्तयोग्यानुपलम्भस्य हेतुत्वं ब्रूमः, किन्तु योग्यस्याऽभावप्रत्यक्षे, अयोग्यपिशाचत्वाद्यभावप्रत्यक्षे तु तदधिकरणीयत्वप्रसञ्जनप्रसञ्जितप्रतियोगिकस्तदधिकरणीयत्वोपलम्भस्य विषयतासम्बन्धावच्छिन्नाभाव एव प्रतियोगिनिष्ठो हेतुः । अत्राऽप्यापादनस्य सर्वत्राऽसम्भवेन तदधिकरणीयत्वप्रसञ्जनप्रसञ्जितत्व-तदधिकरणीयत्वनिष्ठव्याप्तिनिरूपकत्वं, जातित्वादिविशिष्टस्य स्तम्भवृत्तित्वस्योपलम्भव्याप्यत्वात् स्तम्भे पिशाचत्वाभावप्रत्यक्षम् , जातित्वादिविशिष्टस्य पिशाचवृत्तित्वस्योपलम्भाव्याप्यत्वान्न पिशाचे स्तम्भ-

रामरुद्रा ।

यद्यपि कारणाभावस्यैव कार्यविरहप्रयोजकतयोक्तविशेष्यतायामकारणस्य महत्त्वस्याऽप्यभावो नोक्तविशेष्यतावि रहे प्रयोजकः सम्भवति, तथाऽपि लौकिकविषयतासम्बन्धेन प्रत्यक्ष प्रति महत्त्वस्य कारणतया लौकिकविषयतया प्रत्यक्षाभावस्य लौकिकविषयत्वाभावसमनियततया तदभिन्नत्वेन लौकिकविषयत्वाभावे प्रयोजकता महत्त्वाभावे अक्षतैव । यद्वा व्यापकाभावे प्रयोजकस्य च व्याप्याभावप्रयोजकतानियमेन निरुक्तविशेष्यताविरहप्रयोजकत्वं महत्त्वाभावस्याऽक्षतमेव । लौकिकविशेष्यत्वाभावप्रयोजकत्वयुक्तावपि महत्त्वाभावस्य सग्रहेऽपि इन्द्रियसयोगादीनामभावासङ्ग्रहात्, **प्रतियोगिप्रकारतानिरूपितत्वस्य** विशेष्यताविशेषणत्वेनोपादनम् । यद्यप्येवमप्यालोकसंयोगासङ्ग्रहो दुर्वार एव, अन्धकारे स्पार्शनोत्पत्त्या पृथिवीत्वप्रकारतानिरूपितलौकिकविशेष्यतासामान्याभावे आलोकसंयोगाभावस्याऽप्रयोजकत्वात्, विशेष्यतायां चाक्षुषनिरूपितत्वमादाय तत्सङ्ग्रहे च त्वक्संयोगासङ्ग्रहः, तथाऽपि चाक्षुषनिरूपिततादृशविशेष्यत्वाभावस्पार्शनानिरूपितातादृशविशेष्यत्वाभावान्यतरप्रयोजकाभावप्रतियोगित्वेन सर्वेषामेव सङ्ग्रहः सम्भवतीति विभावनीयम् । **प्रतियोगिनिष्ठ इति** । तदधिकरणनिष्ठलौकिकविशेष्यतानिरूपिताभावानिष्ठप्रकारतानिरूपितप्रतियोगित्वसम्बन्धावच्छिन्नप्रकारतासम्बन्धेनाऽयोग्याभावप्रत्यक्ष इति शेषः। **व्याप्तिनिरूपकत्वमिति** । ननु स्तम्भवृत्तित्व नोपलम्भव्याप्यं, पिशाचे स्तम्भवृत्तित्वसत्त्वेऽपि तत्प्रकारकोपलम्भस्य विषयतया पिशाचे विरहादित्यत आह—**जातित्वादिविशिष्टस्येति** । **आदि**ना इन्द्रियसंयुक्तसमवायादिपरिग्रहः, तथा च पिशाचे जातित्वविरहान्न व्याप्तिभङ्ग इति भावः । अथैव वह्नौ पिशाचत्वाभावोऽप्येतादृशयोग्यानुपलम्भेनैव गृह्यत इत्यायातं, तच्च न सम्भवति, वन्हिवृत्तित्वविशिष्टतृणादिजन्यतावच्छेदकजातीनामप्रत्यक्षतया जातित्वादिविशिष्टवह्निवृत्तित्वस्योपलम्भाव्याप्यत्वात् । न च जातित्वादिशब्देन योग्यताऽपि ग्राह्या (चेत्) तथा च तृणादिजन्यतावच्छेदकजातीनामयोग्यतया न व्याप्तिभङ्ग इति वाच्यम् । तथा सति पिशाचत्वस्याऽप्ययोग्यतया तस्य स्तम्भवृत्तित्वेऽपि तत्त्वेनोपलम्भासम्भवेन (तदापादनासम्भवेन) पिशाचत्वाभावप्रत्यक्षस्यैव असम्भवादिति चेन्न । प्रत्यक्षप्रतिबन्धकत्वा(१)भावविशिष्टत्वेन जातित्वस्य विशेषणीयत्वात्, तादृशजातीनां च तादात्म्येन प्रत्यक्षप्रतिबन्धकत्वात् न तासु व्याप्तिभङ्गः, पिशाचत्वन्तु न प्रत्यक्षप्रतिबन्धकम्, अयोग्यवृत्तित्वेनैव तस्याऽयोग्यतया तत्प्रत्यक्षापादनासम्भवात् तत्प्रतिबन्धकताकल्पने बीजाभावात् । **न पिशाच इति** । यद्यपि पिशाचे स्तम्भत्वाभावप्रत्यक्षापत्तिर्नोक्तयोग्यानुपलम्भेन सम्भवति, अयोग्यप्रतियोगिकाभावप्रत्यक्ष एव तस्य कारणतायाः पूर्वमुक्तत्वादेतत्कथनमफलं, तथाऽपि स्तम्भत्वस्योपलक्षणतया मनस्त्वाभावप्रत्यक्षापत्तिनिरासपरत्वान्न वैयर्थ्यमिति ध्येयम् । ननु योग्यवृत्तिजातेरेव यथा योग्यत्वं, तथा योग्ययोग्यजात्यन्यतरप्रतियोगिकाभावस्यैव योग्यत्वमित्युक्तयैव पिशाचाद्यभावप्रत्यक्षवारणं सम्भवति, अन्धकारे घटाद्यभावस्य जलपरमाणौ पृथिवीत्वाभावस्य च प्रत्यक्षवारणाय महत्त्वोद्भूतरूपावच्छिन्नालोकसंयोगावच्छिन्नेन्द्रियसंयुक्तविशेषणताया एवाऽभावग्राहकत्वमा-

(१) 'प्रतिबन्धकाभाव' इत्यपि पाठः ।

शक्यते, तेन घटाभावादेरन्धकारे न चाक्षुषप्रत्यक्षं, स्पार्शनप्रत्यक्षन्तु भवत्येव आलोकसंयोगादिकं विनाऽपि स्पार्शनप्रत्यक्षस्याऽऽपादयितुं शक्यत्वात् । गुरुत्वादिकं यदयोग्यं तदभावस्तु न योग्यः, तत्र गुरुत्वादिप्रत्यक्षस्याऽऽपादयितुमशक्यत्वात्, वायावुद्भूतरूपाभावः, पाषाणे सौरभाभावः,

दिनकरी ।

त्वाभावप्रत्यक्षम् ' एवन्तादात्म्येन स्तम्भवृत्तित्वपिशाचवृत्तित्वयोरुपलम्भव्याप्यत्वाव्याप्यत्वाभ्यां स्तम्भपिशाचयोः पिशाचभेदस्तम्भभेदयोः प्रत्यक्षत्वाप्रत्यक्षत्वे अप्युपपादनीये इति । **न चाक्षुषप्रत्यक्षमिति** । अनुपलम्भे विद्यमानेऽपि निरुक्तयोग्यताविशिष्टस्य तस्य तत्राऽभावादिति भावः । **आपादयितुं शक्यत्वादिति** । तथा च समानेन्द्रियजन्योपलम्भव्याप्यत्वस्य योग्यताघटकत्वान्न तत्र चाक्षुषमिति भावः । ननु जातित्वादिविशिष्टस्य तेजोवृत्तित्वस्योपलम्भव्याप्यत्वात् तेजसि गुरुत्वाभावप्रत्यक्षापत्तिः, एवं स्तम्भे पिशाचत्वाभावस्याऽपि प्रत्यक्षापत्तिरत आह—**गुरुत्वादिकमिति** । 'आदि'पदेन पिशाचादिपरिग्रहः । अयोग्यस्य पिशाचत्वादिजातेरभावस्य प्रत्यक्षत्वाद् गुरुत्वादिकमित्युक्तम् । **न योग्यः**–न प्रत्यक्षविषयः । **अशक्यत्वादिति** । निरुक्तयोग्यताघटकव्याप्तौ प्रतियो-

रामरुद्री ।

स्थीयतां, किमुक्तगुरुतरयोग्यानुपलब्धिद्वयस्य कारणतयेत्याशङ्कानिरासायाऽऽह–**एवमिति** । तथा चोक्तरीत्या स्तम्भे पिशाचभेदप्रत्यक्षोपपादनस्याऽसम्भवादेव गुरुभूताया योग्यानुपलब्धेः कारणताऽङ्गीकृतेति भावः । **शक्यत्वादितीति** । ननु यद्यन्धकारेऽपि घटादेः स्पार्शनोपलम्भापादनसम्भवेन घटाद्यभावस्य स्पार्शनं जायते, तदा चाक्षुषमपि स्यात्, अन्धकारे घटसत्त्वे स्पार्शनोत्पत्त्या [प्रतियोगिमत्त्वे स्पार्शनोत्पत्त्या] प्रतियोगिमत्त्वातिरिक्तप्रतियोगिप्रकारतानिरूपितचाक्षुषनिरूपितलौकिकविशेष्यत्वाभावप्रयोजकाभावप्रतियोगितावच्छेदकावच्छिन्नकूटतथाविधस्पार्शननिरूपितलौकिकविशेष्यत्वाभावप्रयोजकाभावप्रतियोगितावच्छेदकावच्छिन्नकूटेतदन्यतरविशिष्टप्रतियोगिसत्त्वनिष्ठव्याप्तिनिरूपकत्वस्य यत्किञ्चिदिन्द्रियजन्यघटोपलम्भे सत्त्वेन प्रतियोग्युपलम्भाभावे योग्यतासत्त्वात् । यदि च प्रतियोग्युपलम्भे प्रमेयत्वादिना व्याप्तिनिरूपकता सर्वत्रैव सम्भवतीति किञ्चिदिन्द्रियजन्यप्रतियोग्युपलम्भाभावे योग्यतासत्त्वात् किञ्चिदिन्द्रियजन्यप्रतियोग्युपलम्भत्वावच्छिन्नैव] व्याप्तिनिरूपकता योग्यतालक्षणे निवेशनीया, तथा चाऽन्धकारे घटाभावचाक्षुषवारणाय प्रतियोग्युपलम्भा यद्यदिन्द्रियजन्याः प्रसिद्धाः, प्रत्येकं तत्तदिन्द्रियजन्यप्रतियोग्युपलम्भत्वावच्छिन्ना व्याप्तिनिरूपकता विवक्षणीयेति विभाव्यते, तदा घटाभावस्य स्पार्शनमपि न स्यादित्याशङ्कां भाववर्णनेन निराकरोति–**तथा चेति । समानेति** । तथा च तदभावचाक्षुषत्वाद्यवच्छिन्नं प्रति तत्प्रतियोगिचाक्षुषाद्यभावत्वेन विशिष्यैव हेतुता, योग्यताघटकव्याप्तिनिरूपकताऽपि प्रतियोगिचाक्षुषत्वाद्यवच्छिन्नैव निवेश्या, एवं च व्याप्तावपि चाक्षुषाद्युपलम्भकारणकूटविशिष्टप्रतियोगिसत्त्वनिष्ठत्वमेव निवेशनीयमिति न पूर्वोक्तान्यतरघटनाऽपीति लाघवमिति भावः । न चैवमिन्द्रियान्तरजन्योपलम्भसत्त्वेऽपीन्द्रियान्तरेणाऽभावप्रत्याक्षापत्तिरिति वाच्यम् । इष्टत्वात्, लौकिकमन्निकर्षजन्यबुद्धौ समानेन्द्रियजन्यविरोधिनिश्चयस्यैव प्रतिबन्धकत्वादिति भावः । **पिशाचादीत्यादिना** परमाण्वाद्यतीन्द्रियसङ्ग्रहः । नन्वेवं **गुरुत्वादिकमिति** व्यर्थं, यदयोग्यं तदभावश्च न योग्य इत्यस्यैव वक्तुमुचितत्वादित्यत आह–**अयोग्यस्येत्यादि** । तथा च **गुरुत्वादिकमिति** पदं तादात्म्येन प्रत्यक्षप्रतिबन्धकजातिभिन्नसामान्य(१)परमेव, तेन वह्निनिष्ठवैजात्याभावस्य स्तम्भादौ न प्रत्यक्षापत्तिरिति भावः । ननु **न योग्य** इत्यस्य गुरुत्वादिकं यथाऽयोग्यं, तद्वद्गुरुत्वाद्यभावोऽपि **इत्यर्थकत्वे आपादयितुमशक्यत्वा**दित्यन्तहेतोर्मूलोक्तस्याऽसङ्गतिः, गुरुत्वादिवत्तस्याऽप्यप्र

(१) 'सामान्याभावपरमेव' इत्यपि पाठः ।

गुडे तिक्ताभावः, वह्नावनुष्णत्वाभावः, श्रोत्रे शब्दाभावः, आत्मनि सुखाद्यभावः, एवमादयस्तत्तदिन्द्रियैर्गृह्यन्ते तत्तत्प्रत्यक्षस्याऽऽपादयितुं शक्यत्वात्

दिनकरी ।

ग्यवृत्तिधर्मानवच्छिन्नत्वस्य निवेशात् . प्रकृते च जातित्वविशष्टतेजोवृत्तित्वस्योपलम्भव्याप्यत्वेऽपि जातित्वस्य गुरुत्वावृत्तित्वेन तादृशव्याप्यत्वे प्रतियोग्यवृत्तिधर्मानवच्छिन्नत्वाभावादिति भावः । न च तदधिकरणीयत्वप्रसञ्जनप्रसञ्जितप्रतियोगिकस्तदधिकरणीयत्वोपलम्भस्याऽभाव ऐन्द्रियकघटाभावादिप्रत्यक्षे हेतुरास्तां, किं पूर्वोक्तयोग्यानुपलम्भहेतुतयेति वाच्यम् । तथा सति परमाण्वादौ महत्त्वाभावप्रत्यक्षानुपपत्तेरिति । **वायावुद्भूतरूपाभाव इति** । रूपत्वावच्छिन्नाभावस्याऽतोन्द्रियानुद्भूतरूपप्रतियोगिकत्वेन प्रत्यक्षासम्भवादुद्भूतेति । 'एवमादयः' इत्यादिना प्रभाया उद्भूतस्पर्शाभावपरिग्रहः । प्रत्यक्षे विषयत्वेन कारणत्वस्य क्लृप्तत्वात्तेनैव गुरुत्वाद्यतीन्द्रियाभावप्रत्यक्षवारणे तदनुरोधेन तदधिकरणीयत्वेत्यादिद्वितीययोग्यानुपलम्भस्य हेतुता न स्वीकार्येत्यभिप्रायवान् संसर्गाभावे योग्य-

रामरुद्री ।

त्यत्तत्वादित्यस्यैव वक्तुमुचितत्वादतस्तस्य न प्रत्यत्त इत्यर्थकतामाह—न **प्रत्यक्ष इति। ऐन्द्रियकेति** । इन्द्रियग्राह्यं यत् घटादि तदभावप्रत्यक्षेऽपीत्यर्थः । **परमाण्वादाविति** । परमाणौ महत्त्वसत्त्वे तद्वृत्तित्वेन परमाणूपलम्भापादनस्य कर्तुं शक्यतया परमाणावपि महत्त्वाभावस्य प्रत्यत्तत्वोपगमादिति भावः । **प्रत्यक्षानुपपत्तेरिति** । परमाणोरयोग्यतया तद्वृत्तित्वस्योपलम्भाव्याप्यत्वादिति भावः । **प्रत्यक्ष इति** । विषयतया लौकिकप्रत्यक्षं प्रतीत्यर्थः । **विषयत्वेनेति** । लौकिकप्रत्यत्तविषयतोपलत्तितत्वेनेत्यर्थः । **क्लृप्तत्वादिति** । विषयासत्त्वदशायां तद्विषयकलौकिकप्रत्यत्तवारणाय तत्तल्लौकिकप्रत्यक्षे तत्तद्व्यक्तित्वेन तादात्म्येन कारणतायाः आवश्यकतया 'यद्विशेषयोः'—इति न्यायेन सामान्यतः कार्यकारणभावस्याऽप्यावश्यकत्वादिति भावः । **गुरुत्वाद्यतोन्द्रियाभावप्रत्यक्षवारणे इति** । तेषु प्रत्यत्तवारणसम्भव इत्यर्थः । तेषां लौकिकप्रत्यक्षविषयत्वोपलत्तितत्वाभावेनैव तेषु लौकिकविषयतासम्बन्धेन प्रत्यक्षापत्तेरयोगादिति भावः । **तदनुरोधेन**—तेषां प्रत्यत्तापत्तिवारणानुरोधेन । न च पिशाचत्वाभावप्रत्यत्तार्थमेव द्वितीययोग्यानुपलब्धिस्वीकार इति पूर्वमुक्ततया तदभावे प्रथमयोग्यानुपलब्धेस्तत्राऽसम्भवात्पिशाचत्वाभावप्रत्यक्षं न स्यादिति वाच्यम् । योग्यप्रतियोगिकाभावप्रत्यक्ष एव प्रथमयोग्यानुपलब्धिकारणतायाः पूर्वमुक्ततया तदभावेऽपि पिशाचत्वाभावप्रत्यक्षे बाधकाभावात् । न चैवमयोग्यप्रतियोगिकाभावप्रत्यक्षे योग्यानुपलब्धेरकारणत्वापत्तिरिति वाच्यम् । इष्टत्वात् , पूर्वमयोग्यस्याऽभावप्रत्यक्षे योग्यानुपलब्धेः कारणत्वाभावे गुरुत्वाद्यभावस्याऽपि प्रत्यक्षं स्यादित्यापत्तिवारणार्थमेव अयोग्याभावप्रत्यक्षे तद्धेतुतास्वीकारादिति भावः । **संसर्गाभाव इत्यादि** । यद्यप्येतादृशाभिप्राये संसर्गाभावे योग्यतापदर्शनमफलमेव, तादृशयोग्यत्वाऽल्पनेऽपि गुरुत्वाभावादौ विषयत्वाभावेन अप्रत्यत्तत्वस्य पिशाचाभावादौ विषयत्वाभावेन अप्रत्यक्षत्वस्य चोपपत्तेः । न च गुरुत्वाभावादेः प्रत्यत्तविषयत्वोपलत्तितत्वाभावे किं प्रयोजकमित्याकाङ्क्षानिरासायैव संसर्गाभावे योग्यता प्रदर्शितेति वाच्यम् । गुरुत्वादौ विषयत्वाभावो यथा तादात्म्येन गुरुत्वत्वादिना प्रत्यत्तप्रतिबन्धकताप्रयुक्तः, तथा प्रत्यक्षे सामान्यतः संसर्गाभावत्वेन प्रतिबन्धकत्वासम्भवेऽपि गुरुत्वाभावादीना तत्तद्व्यक्तित्वेन प्रत्यक्षप्रतिबन्धकत्वकल्पनयैव तेषां विषयत्वाभावोपपादनसम्भवात् , तथाऽपि तत्तदभावानां तत्तद्व्यक्तित्वेन अनन्तप्रतिबन्धकताकल्पने गौरवमित्यभिप्रायेणैव योग्यताप्रदर्शनमिति बोध्यम् ।

ननु केयं योग्यता नाम? न तावज्जातिरूपेति शक्यते वक्तुम्, अभावावृत्तित्वप्रसङ्गात्, नाऽपि प्रत्यत्तप्रयोजकोपाधिरूपा, सप्तानिरिक्तपदार्थस्य सिद्धान्ते अभावात्। न चाऽभावरूपैव सेति वाच्यम्। कस्याऽभावरूपा सेत्याक्षेपस्य तथाऽप्यनुद्धारादिति।

संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता, अन्योन्याभावप्रत्यक्षेऽधिकरणयोग्यताऽपेक्षिता, अतः स्तम्भादौ पिशाचादिभेदोऽपि चक्षुषा दिनकरी ।

त्वमाह—**संसर्गेति । प्रतियोगिनो योग्यतेति ।** योग्यमात्रप्रतियोगिकत्वे सति योग्यधर्ममात्रावच्छिन्नप्रतियोगिताकत्वमित्यर्थः । अत्र द्रव्यसामान्याभाववारणाय **मात्रेति ।** गुरुत्ववद्घटात्यन्ताभाववारणाय विशेष्यदलम् । रूपगुरुत्वान्यतरावच्छिन्नाभाववारणाय विशेष्यदले **मात्रेति । अधिकरणयोग्यतेति ।** योग्याधिकरणवृत्तित्वमित्यर्थः । इदं चाऽभावग्राहकयोग्यसन्निकर्षप्रदर्शनार्थं, तेन स्तम्भ इव वाय्वादौ न पिशाचान्योन्याभावप्रत्यक्षमिति भावः । अन्योन्याभावे योग्यता तु जात्यवच्छिन्नप्रतियोगिताकत्व-जात्यतिरिक्तयोग्यधर्मावच्छिन्नप्रतियोगिताकत्वान्यतरदेव तेन स्तम्भे पिशाचान्योन्याभावपिशाच-

रामरुद्री ।

मैवम् । प्रतिबन्धकाभाव(१)स्यैव योग्यतारूपत्वोपगमात्, घटादियोग्यत्वस्य गुरुत्वाद्ययोग्यत्वस्य चोपपादनसम्भवात् । न चैवं गुरुत्वाभावादीनां गुरुत्वप्रतियोगिकाभावत्वेनैकप्रतिबन्धकतासम्भवेऽपि परमाण्वादिद्वितानन्तरूपादीनां च मनस्त्वपिशाचत्वादीनां च अभावव्यक्तीनां तत्तद्व्यक्तिप्रतियोगिकाभावत्वेन अनन्तप्रतिबन्धकताकल्पनेन गौरवमपरिहार्यमेवेति वाच्यम् । योग्यमात्रप्रतियोगिकत्वे सति योग्यमात्रधर्मावच्छिन्नप्रतियोगिताकान्यसंसर्गाभावत्वेनैकप्रतिबन्धकतायाः प्रदर्शनायैव एतादृशयोग्यतानिर्वचनादिति ध्येयम् । अथैवमपि पिशाचत्वादीनां संसर्गाभावप्रत्यक्षानुपपत्तिरशक्यसमाधिरेव, निरुक्तप्रतिबन्धकतावच्छेदकधर्माक्रान्तत्वात्तेषामभावानामिति चेन्न । अन्योन्याभावभिन्नत्वरूपसंसर्गाभावत्वस्य पिशाचत्वाभावादावभावेन प्रतिबन्धकतावच्छेदकानाक्रान्तत्वात् । पिशाचत्वात्यन्ताभावस्य पिशाचभेदसमनियततया तदभिन्नत्वाद्वक्ष्यमाणान्योन्याभावयोग्यतायास्तत्र सत्त्वाच्च न प्रत्यक्षानुपपत्तिः । (२)यदि च समनियताभावानामनैक्यमते पिशाचत्वाभावप्रत्यक्षानुपपत्तिरिति विभाव्यते, तदाऽस्तु पिशाचत्वं नाऽस्तीति प्रतीतावपि पिशाचभेद एव विषयः, मणिकारमते मूले महीरुहो न विहङ्गमसंयोगीति प्रतीतेर्विहङ्गमसंयोगात्यन्ताभावविषयकत्ववत्, प्रकृतग्रन्थस्य समनियताभावैक्यपक्षमवलम्ब्यैव प्रवृत्तिरित्यस्याऽपि सुवचत्वाच्च, तदनैक्यपक्षमवलम्ब्यैव द्वितीययोग्यानुपलब्धेः पूर्वं हेतुताङ्गीकारस्याऽपि सयुक्तिकत्वाच्चेति विभावनीयं सुधीभिः ।

ननु प्रतियोगिनिष्ठयोग्यतायाः संसर्गाभावे असत्त्वात् कथं तस्याः संसर्गाभावयोग्यतात्वमित्यभिप्रायेणाऽऽह—**योग्यमात्रेति । द्रव्यसामान्याभाववारणायेति ।** तत्प्रत्यक्षवारणायेत्यर्थः । एवमग्रेऽपि । **गुरुत्ववद्घटात्यन्ताभावे**त्यस्य गुरुत्वावच्छिन्नघटादिनिष्ठप्रतियोगिताकात्यन्ताभावोऽर्थः, तेन गुरुधर्मस्य प्रतियोगितानवच्छेदकतया गुरुत्वघटत्वोभयधर्मावच्छिन्नाभावस्याऽप्रसिद्धत्वेऽपि न क्षतिः, अत एव नाऽत्र मात्रपदव्यावृत्तिः सम्भवतीति तद्व्यावृत्तिमन्यत्रैव दर्शयति—**रूपेति ।** रूपस्य गुरुण्येव सत्त्वादुभयावच्छिन्नाभावस्याऽप्रसिद्ध्या **अन्यतरावच्छिन्नेति ।** एतच्चाऽऽपातनः, रूपवान्नाऽस्तीति यत्र प्रतीतिः तत्रैवाऽन्यतरवान्नाऽस्तीति प्रतीतेर्लाघवाद्रूपमात्रस्यैव तादृशप्रतियोगितावच्छेदकत्वौचित्यान्मात्रपदप्रयोजनं रूपावच्छिन्नाभावप्रत्यक्षवारणमेव, उद्भूतानुद्भूतरूपयोग्यायोग्ययोर्द्वयोरेव तदभावप्रतियोगितावच्छेदकत्वादिति मन्तव्यम् । **योग्यसन्निकर्षेति ।** इन्द्रियसंयुक्तयोग्यविशेषणतारूपाभावग्राहकसन्निकर्षप्रदर्शनपरमेवेदं, न त्वन्योन्याभावयोग्यताप्रदर्शनपरमिति भावः । **तेनेति ।** एतादृशसन्निकर्षस्यैवाऽभावग्राहकत्वेनेत्यर्थः । अन्योन्याभावयोग्यताया मूलेऽनुक्तत्वात्तामेवाऽऽह—**अन्योन्येति ।**

---

(१) 'भावत्व' इत्यपि पाठः ।

(२) **अथैवं गुरुत्वाभावप्रत्यक्षापत्तिः, तस्याऽपि गुरुत्ववद्भेदात्मकतया भेदभिन्नत्वरूपसंसर्गाभावत्वविरहादित्यत आह यदि चेति ।**

अलौकिकस्तु व्यापारस्त्रिविधः परिकीर्तितः ।
सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ॥ ६३ ॥

गृह्यते ॥ ५९ ॥ ६० ॥ ६१ ॥ ६२ ॥ इति योग्यानुपलब्धिनिरूपणम् ॥

एवं प्रत्यक्षं लौकिकालौकिकभेदेन द्विविधं, तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षा वर्णिताः ।

अलौकिकसन्निकर्षस्त्विदानीमुच्यते-अलौकिकस्त्विति । **व्यापारः-सन्निकर्षः । सामान्यलक्षण इति । सामान्यं लक्षणं यस्येत्यर्थः ।**

तत्र लक्षणपदेन यदि स्वरूपमुच्यते, तदा सामान्यस्वरूपा प्रत्यासत्तिरित्यर्थो लभ्यते, तच्चेन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं बोध्यं, तथा हि-यत्रेन्द्रियसंयुक्तो धूमादिः, तद्विशेष्यकं धूम इति ज्ञानं यत्र जातं, तत्र ज्ञाने धूमत्वं प्रकारः, तत्र धूमत्वेन सन्निकर्षेण धूमा इत्येवं रूपं सकलधूमविषयकं ज्ञानं जायते । अत्र यदीन्द्रियसम्बद्धप्रकारीभूतमित्येवोच्यते, तदा धूलीपटले धूमत्वभ्रमानन्तरं सकलधूमविषयकं ज्ञानं न स्यात्, तत्र धूमत्वेन सह इन्द्रियसम्बन्धाभावात् । मन्मते त्विन्द्रियसम्बद्धं धूलीपटलं, तद्विशेष्यकं धूम इति ज्ञानं, तत्र प्रकारीभूतं धूमत्वं प्रत्यासत्तिः । इन्द्रिय-

दिनकरी ।

वदन्योन्याभावयोः प्रत्यक्षत्वाप्रत्यक्षत्वोपपत्तिरित्यन्यत्र विस्तरः ॥ ५९-६०-६१-६२ ॥

॥ इति योग्यानुपलब्धिनिरूपणम् ॥

धूमत्वादिसामान्यलक्षणाया इन्द्रियजन्यत्वाभावाद्व्यापारत्वकथनमसङ्गतमत आह—**व्यापारः-सन्निकर्ष इति** । यद्यपि धूमत्वादेरिन्द्रियप्रतियोगिकत्वाभावात् **सन्निकर्षत्वमयुक्तं, तथाऽपि** संयोगस्येन्द्रियप्रतियोगिकत्वात् तद्घटितस्यैन्द्रियसंयुक्तविशेष्यकज्ञानप्रकारीभूतधूमत्वादेः प्रत्यासत्तितानिर्वाहः ।

तच्च-सामान्यस्वरूपं च । **अत्र यदीति । इन्द्रियसम्बद्धं सामान्यं प्रत्यासत्तिरित्यु-**

रामरुद्री ।

नन्वेतादृशयोग्यतायाः किमित्यन्योन्याभावप्रत्यक्षप्रयोजकता कल्पनीयेत्याशङ्क्यायामाह—**तेनेति**। पिशाचभेदप्रत्यक्षोपपत्तये **जात्यवच्छिन्नप्रतियोगिताक**त्वोपादान, घटवदन्योन्याभावादेः प्रत्यक्षोपपत्तये-**जात्यतिरिक्ते**त्यादि उपात्तमिति बोध्यम् । नन्विन्द्रियसन्निकृष्टयोग्यविशेषणता अभावग्राहकसन्निकर्षे इत्युक्तं, तत्र योग्यत्वं महत्त्वोद्भूतरूपवच्छिन्नत्वमेव, अन्यस्य दुर्वचत्वात्, तथा च परमाणौ महत्त्वाभावस्य वायावुद्भूतरूपाभावस्य च प्रत्यक्षं न स्यादित्यत आह-**अन्यत्र विस्तर इति** । अयंभावः-महत्त्वाभावप्रत्यक्ष इन्द्रियसंयुक्तोद्भूतरूपवद्विशेषणता सन्निकर्षः, उद्भूतरूपाभावप्रत्यक्षे चेन्द्रियसयुक्तमहद्विशेषणतैव सन्निकर्षः कारणमतो नाऽनुपपत्तिरिति ॥५९-६०-६१-६२॥ इति योग्यानुपलब्धिनिरूपणम् ॥

सन्निकर्ष इतीति । ननु सन्निकर्षत्वमिन्द्रियसम्बन्धत्वमेव, तदपि सामान्यस्येन्द्रियप्रतियोगिकत्वाभावेन दुरुपपादमेवेत्याशङ्क्य समाधत्ते—**यद्यपीति । प्रत्यासत्तितानिर्वाह इति** । यद्यप्येवमपि ज्ञानलक्षणयोग्यधर्मयोरिन्द्रियप्रतियोगिकत्वानुपपत्तिस्तदवस्थैव, तथापि कालेन स्वाश्रयत्वविशिष्टयोस्तयो सन्निकर्षत्वाभ्युपगमादाश्रयत्वस्य स्वप्रतियोगिकत्वादेवेन्द्रियप्रतियोगिकत्वस्य ज्ञानस्य विषयवृत्तितया धर्मस्य स्वजन्यज्ञानविषयतावच्छेदकत्वोपलक्षितधर्मसम्बन्धेन विषयवृत्तितया च तदनुयोगिकत्वस्याऽप्युपपत्त्या नाऽनुपपत्तिः । नन्वेवं व्यापारविरहेणाऽलौकिकप्रत्यक्षं इन्द्रियस्य करणत्वं कथमुपपादनीयमिति

सम्बन्धश्च लौकिको ग्राह्यः । इदं च बहिरिन्द्रियस्थले, मानसस्थले तु ज्ञानप्रकारीभूतं सामान्यं प्रत्यासत्तिः ॥ ६३ ॥

दिनकरी ।

त्युच्यते, तदेत्यर्थः । ननु यत्र चक्षुःसन्निकर्षेण धूम इति ज्ञानं जनितं, तत्र चक्षुःसंयोगं विनाऽपि तादृशज्ञानमादायेन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारस्य धूमत्वादेर्धूमान्तरे सत्त्वात् धूमान्तराणां सामान्यलक्षणया ज्ञानापत्तिः । न च तदा धूमो नेन्द्रियसम्बद्धः, ज्ञानलक्षणात्मकसन्निकर्षस्य धूमे सत्त्वात् । न च तत्रैकक्षणे सामान्यलक्षणाजन्यज्ञानस्वीकारे क्षतिविरह इति वाच्यम् । तन्मूलकज्ञानधारापत्तेर्दुर्वारत्वादित्यत आह–**लौकिको ग्राह्य इति** । अत्र लौकिकसन्निकर्षस्य विशेषणविधया घटकत्वं बोध्यम् । अन्यथा तत्र धूमे पूर्वकालीनचक्षुःसंयोगमादाय तद्दोषतादवस्थ्यमिति ध्येयम् । इदमुपलक्षणं, यत्र चक्षु संयोगे विद्यमानेऽपि दोषवशान्न धूमचाक्षुषं, किन्तु धूमत्वप्रकारक स्मरण, तत्रधूमत्वसामान्यलक्षणाजन्यज्ञानापत्तिवारणाय सामान्यलक्षणाघटकज्ञाने तदिन्द्रियजन्यत्वस्य वाच्यत्वात् । नन्विन्द्रियसम्बद्धेत्यत्र लौकिकसम्बन्ध ज्ञानप्रकारेत्यत्र ज्ञानस्य तदिन्द्रियजन्यत्वं चेद्विवक्षितं, तदाऽणुत्वेन यत्किञ्चिदणूपस्थितावणुत्वसामान्यलक्षणया सकलाणुगोचरो मानसो बोधो न स्यात्, तदाऽणौ मनसो लौकिकसम्बन्धस्य ज्ञाने मनोजन्यत्वस्य चाऽभावादत आह–**इदं चेति** । तथा च

रामरुद्री ।

चेत्, संयोगस्यैव व्यापारत्वोपगमेनेति गृहाण । कथमन्यथा स्मरणाद्यात्मकज्ञानलक्षणप्रत्यासत्तेः करणीभूतेन्द्रियाजन्यत्वात्तस्या व्यापारत्वासम्भवेन इन्द्रियस्य करणत्वमिति भावः ।

चक्षुःसंन्निकर्षेणेत्यस्य विनश्यदवस्थापन्नेत्यादिः । तेन **चक्षुःसंयोगं विनाऽपीत्यस्य** नाऽसङ्गतिः । **धूमान्तर इति** । प्रत्यक्षभूतधूमभिन्नधूम इत्यर्थः, प्रत्यक्षधूमव्यक्तेर्द्वितीयक्षणे तज्ज्ञानरूपज्ञानलक्षणप्रत्यासत्त्या अलौकिकप्रत्यक्षमिष्टमेवेत्यत **अन्तरपदम्** । **ज्ञानापत्तिरिति** । पूर्वं धूमान्तर एव सन्निकर्षस्योपपादिततया तस्यैव ज्ञानापादनं लभ्यत इति नेष्टापत्तिसम्भवः । **सम्बद्ध इति** । इन्द्रियसम्बन्धस्य विशेषणतासन्निकर्षघटकत्वोपगमान्नोक्तापत्तिरिति भावः । **एकक्षण इति** । एतत्पूर्वं चक्षुःसंयोगसत्त्वेन सामान्यलक्षणया ज्ञानोत्पत्तापिष्टापत्तेः, ज्ञाननाशानन्तरं च ज्ञानप्रकारत्वविरहादेव आपत्त्यसम्भवादिति भावः । न चैवमपि ज्ञानद्वितीयतृतीयक्षणयोरापत्तिसम्भवादेकक्षण इत्यसङ्गतमिति वाच्यम् । यत्र तत्पूर्वक्षणेऽपि घटत्वप्रकारकज्ञानमासीत्तत्र जायमानस्यैव सामान्यलक्षणया सकलधूमविषयकतया क्षणद्वयेऽपि तादृशज्ञानस्य सर्ववादिसिद्धतया तृतीयक्षण एव तदापत्तिः कर्त्तव्येत्यभिप्रायेणैकक्षणाऽभिधानात् । **क्षतिविरह इति** । क्षणस्याऽतिसूक्ष्मत्वेन तत्क्षणे तादृशज्ञानानुत्पादस्य प्रमाणेन निश्चेतुमशक्यत्वादिति भावः । **तन्मूलकेति** । आपाद्यमानज्ञानव्यक्तिमूलकेत्यर्थः । **ज्ञानधारेति** । सामान्यलक्षणया प्रत्यक्षे लौकिकसन्निकर्षस्य अहेतुत्वेन पूर्वपूर्वज्ञानव्यक्तेरेव सन्निकर्षसम्पादकत्वादिति भावः यद्यपि सिद्धान्तेऽपि घट इति ज्ञानानन्तरं मनसा सामान्यप्रत्यासत्तिजन्यज्ञानधारा इष्टैव, तथाऽप्यत्र चाक्षुषसामान्यप्रत्यासत्तिजन्यज्ञानस्य यत्किञ्चित्सामान्याश्रयांशे लौकिकत्वनियमेन इष्टापत्त्यसम्भवेन चाक्षुषतादृशज्ञानधारायाः एवाऽऽपादनान्नाऽनुपपत्तिरित्यवधेयम् । **विशेषणविधयेति** । विशेषणत्वेनेत्यर्थः । विशेषणत्व च स्वविशेष्यान्वयित्वसन्निकर्षविशेष्यीभूतसन्निकर्षवत्ता विशेष्यतासम्बन्धेन अन्वयिनि ज्ञाने समानकालीनत्वसम्बन्धेन सन्निकर्षस्य विशेषणतया विवक्षणाद्विशेषणत्वमिति भावः **वाच्यत्वादित्यस्य** विशेषणतयेत्यादिः । तथा च तदिन्द्रियेण सामान्यलक्षणया ज्ञाने जननीये तदिन्द्रियजन्यतदिन्द्रियलौकिकसन्निकर्षवद्विशेष्यकज्ञानप्रकारीभूतं सामान्यं सन्निकर्ष इति भावः । **मनो जन्यत्वस्य चेति** । यद्यपि ज्ञानसामान्यस्यैव मनोजन्यतयाऽणूपस्थितौ मनोजन्यत्वमस्त्येव, तथाऽपि स्मरणस्याऽपि कालोपाधिविधया इन्द्रियजन्यत्वेन तद्वारणाय तदिन्द्रियनिष्ठजनकतानिरूपिततत्प्रत्यक्षवि

परन्तु समानानां भावः सामान्यं, तच्च क्वचिन्नित्यं धूमत्वादि, क्वचिन्नाऽनित्यं घटादि। यत्रैको घटः संयोगेन भूतले समवायेन कपाले वा ज्ञातः, तदनन्तरं सर्वेषामेव तद्घटवतां भूतलादीनां कपालादीनां वा ज्ञानं भवति, तत्रेदं बोध्यम्। परन्तु सामान्यं येन सम्बन्धेन ज्ञायते, तेन सम्बन्धेनाऽधिकरणानां प्रत्यासत्तिः। किन्तु यत्र तद्घटनाशानन्तरं तद्घटवतः स्मरणं जातं, तत्र सामान्यलक्षणया सर्वेषां तद्घटवतां भानं न स्यात्, सामान्यस्य तदानीमभावात्। किञ्चेन्द्रियसम्बद्धविशेष्यकं घट इति ज्ञानं यत्र जातं, तत्र परदिने इन्द्रियसम्बन्धं विनाऽपि तादृशज्ञानप्रकारीभूतसामान्यस्य सत्त्वात् तादृशज्ञानं कुतो न जन्यते? तस्मात् सामान्यविषयकं ज्ञानं

दिनकरी।

बहिरिन्द्रियेण सामान्यलक्षणया ज्ञाने जननीये तद्विवक्षितं, नतु मानससामान्यलक्षणाजन्यज्ञाने इति नोक्तदोष इति भाव. ॥ ६३ ॥

'आसत्तिराश्रयाणां तु-'इत्यादिमूलमवतारयितुं भूमिकां रचयति-**परन्त्वित्यादिना**। 'भूतले' इत्यस्य 'ज्ञातः' इत्यनेनाऽन्वयः। 'भूतलादीनाम्' इत्यादिना संयोगेन तद्घटाधिकरणद्रव्यान्तरपरिग्रहः। तत्रेदं बोध्यमिति। ज्ञायमानमनित्यं सामान्यं तत्र प्रत्यासत्तिरिति बोध्यमित्यर्थः। परम्परया प्रत्यासन्नस्य घटत्वादेरेव प्रत्यासत्तित्वसम्भवात् **'किन्तु-'**इत्यादिना वक्ष्यमाणदोषासङ्गतिरत **आह-परन्त्विति**। तथा च घटत्वस्य परम्परया कपालादावज्ञानाद्वक्ष्यमाणदोषसङ्गतिः। **तेन सम्बन्धेनेति**। अन्यथा समवायेन ज्ञानप्रकारीभूतघटत्वादिसामान्यप्रत्यासत्त्या कालादिज्ञानापत्तेरिति भावः। **किन्त्विति**। एवं चेत्यर्थः। **किञ्चेति**। **कुतो न जन्यत इति**। इदमापाततः, सामान्यलक्षणाघट-

रामरुद्री।

भाजकोपाध्यवच्छिन्नजन्यताया एव विवक्षणीयतया तादृशमनोजन्यतायाः सुखादिज्ञान एव सत्त्वान्नाऽसङ्गतिः ॥ ६३ ॥

भूमिकामिति। अवतारणानुकूला युक्तिरेव तद्**भूमिका**। **ज्ञायमानसामान्य**मित्यत्र जातेरेव सामान्यपदार्थत्वे अनित्यसामान्यस्यैव अप्रसिद्ध्या तत्र दोषदानानुपपत्त्या तद्वारणार्थं सामान्यमुपेक्ष्य तज्ज्ञानस्य प्रत्यासत्तित्वोपगमवैयर्थ्यमित्यस्य सामान्यत्वव्यवस्थापनमुत्तरग्रन्थावतारणोपयुक्तमिति बोध्यम्। मूले—**समानानामिति**। तथा च प्रकृते **सामान्य**पदं यौगिकमेव, न तु पारिभाषिकमिति भावः। **परिग्रह इति**। यद्यपि समवायेन तद्घटाधिकरणं कपालमेवेति मूले **'कपालादीनाम्'** इत्यसङ्गतं, तथाऽपि **'तद्घटादिमताम्'**-इति पूर्ववाक्यस्थादिपदेन पटादेरपि परिग्रहात्तदनुरोधेन **'यत्रैको घटः'**इति तत्पूर्ववाक्यस्थघटपदस्याऽपि पटाद्युपलक्षकत्वेन **आदि**पदेन तन्त्वादिसंग्रहसम्भवान्नासङ्गतिः। **'कालादि'**इत्यादिना विषयतया धूमत्वादिमतां ज्ञानादीनां परिग्रहः। अव्यवहितपूर्वोक्तयुक्त्यैवोत्तरत्र आपादनीयतया **किन्त्विति**त्यसङ्गतमतस्तत्यैवचेत्यर्थकतामाह **एवञ्चेत्यर्थ इति**। यद्यप्यत्रैतद्घटवान् कपाल इति प्रत्यक्षे परम्परासम्बन्धेन कपालांशे घटत्वस्याऽपि प्रकारता कल्पयितुं शक्यते, तन्नाशानन्तरं कपालादिप्रत्यक्षस्यैव तत्कल्पकस्य सत्त्वात्। न चैवमपि तादृशशाब्दादिस्थले का गतिरिति वाच्यम्। तत्राऽपि विशिष्टवैशिष्ट्यबोधमर्यादया मतुबर्थसम्बन्धे निरूपितत्वसम्बन्धेन घटस्येव तद्विशेषणतापन्नघटत्वस्याऽपि अन्वयसम्भवात्, समवायसयोगयोरिव स्वाश्रयाश्रयत्वस्याऽपि मतुपा बोधयितुं शक्यत्वाच्च, तथाऽपि यत्र तद्वयक्तिमानित्याकारकशाब्दादिज्ञानं, तत्र घटत्वस्य कथञ्चित्प्रकारत्वासम्भवेन अनुपपत्तिर्द्रष्टव्या। **कुतो न जन्यत इतीति**। अत्र यद्यपि परदिनेऽयं घट इति ज्ञानं यदि

आसत्तिराश्रयाणां तु सामान्यज्ञानमिष्यते ।
तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते ॥ ६४ ॥

प्रत्यासत्तिः, न तु सामान्यमित्याह—आसत्तिरिति । आसत्तिः—**प्रत्यासत्तिरित्यर्थः । तथा च 'सामान्यलक्षणः' इत्यत्र 'लक्षण'शब्दस्य विषयोऽर्थः, तस्मात् सामान्यविषयकं ज्ञानं प्रत्यासत्तिरित्यर्थो लभ्यते । ननु चक्षुःसंयोगादिकं विनाऽपि सामान्यज्ञानं यत्र वर्तते, तत्र सकलघटादीनां चाक्षुषप्रत्यक्षं स्यादत आह**—तदिति । **अस्याऽर्थः—यदा बहिरिन्द्रियेण सामान्यलक्षणया ज्ञानं जननीयं, तदा यत्किञ्चिद्धर्मिणि तत्सामान्यस्य तदिन्द्रियजन्यज्ञान-**

दिनकरी ।

कीभूतलौकिकसन्निकर्षस्य विशेषणत्वविवक्षणेन कालान्तरीयसंयोगमादायोक्तातिप्रसङ्गस्याऽभावादिति । तस्मात् पूर्वोक्तदोष एवाऽत्र कल्पे बोध्यः । न च तत्र स्वसमवायिसमवायादिसम्बन्धेन घटत्वादेरेवाऽऽसत्तितया पूर्वोक्तदोषोऽपि न सम्भवतीति वाच्यम् । स्वसमवायिसमवायादिना घटत्वं कपालादौ यदि न ज्ञातं, किं तु तदा तद्घट एव समवायादिना ज्ञातः, तदुत्तरमपि तद्घटाश्रयकपालानां ज्ञानस्य सर्वानुभवसिद्धस्य घटत्वप्रत्यासत्त्या उपपादनासम्भवात् । एवं ज्ञायमानस्य प्रत्यासत्तित्वे चैत्रीयज्ञानविषयसामान्यप्रत्यासत्त्या मैत्रस्य तदाश्रयप्रत्यक्षापत्तिभिया तत्पुरुषीयत्वनिवेशस्याऽऽवश्यकतया गौरवं, ज्ञानस्य प्रत्यासत्तित्वे तु पुरुषनिष्ठप्रत्यासत्त्या हेतुत्वान्न तत्पुरुषीयत्वनिवेश इति लाघवमित्यपि बोध्यम् । **तस्मात् सामान्यविषयकं ज्ञानमिति** । इन्द्रियसम्बद्धविशेष्यकं सामान्यप्रकारकं ज्ञानमित्यर्थः । यद्वा सामान्यविषयकं ज्ञानमात्रमित्यर्थः । **सामान्यविषयकज्ञानत्वं प्रत्यासत्तितावच्छेदकमिति यावत्** । **तथा चाऽत्र कल्पे इन्द्रियसम्बद्धविशेष्यकत्व—प्रकारकत्व—तदिन्द्रियजन्यत्वानि ज्ञानस्य विशेषणानि नोपादेयानीति** । पूर्वमते तु **तदिन्द्रियजन्यत्वादेर्निवेशेन इन्द्रियभेदेन कार्यकारणभावभेदकल्पनेन च गौरवमिति भावः । एतन्मते**

रामरुद्री ।

स्मरणादिरूपं, तदा तदिन्द्रियजन्यत्वाभावादेव नाऽऽपत्तिः, यदि चाक्षुषं, तदा चक्षुःसंयोगावश्यकतेति नाऽऽपत्तिसम्भवः, तथाऽपि अलौकिकचाक्षुषमादाय आपत्तिर्बोध्या । **विशेषणत्वविवक्षणेनेति** । विशेष्यतासमानकालीनतद्विशेष्यताव्यावर्तकत्वेनेत्यर्थः । अन्यथा यत्र धूमे चक्षुःसंयोगे सत्यपि धूमस्मरणमूलकं धूमकालीनो घट इति धूमांशे अलौकिकचाक्षुषं, तदा धूमत्वप्रत्यासत्त्या चक्षुषा सकलधूमविषयकचाक्षुषापत्तिरिति भावः । ननु तद्घटवान् तद्व्यक्तिमान्वा कपाल इति ज्ञानस्य कपालांशे घटत्वप्रकारकत्वस्य प्रत्यक्षासिद्धत्वेऽपि उत्तरकालीनकार्यानुरोधेन तत्र तदनुमेयमित्यस्वरसात्सामान्यप्रत्यासत्तित्वपक्षे तत्पुरुषीयत्वनिवेशप्रयुक्तगौरवमाह—**एवमिति । पुरुषनिष्ठप्रत्यासत्त्या**—समवायेन । **इन्द्रियसम्बद्धेति** । नन्वेतत्कल्पे सामान्यज्ञानमात्रस्य प्रत्यासत्तित्वेऽपि न दोषः, इन्द्रियसम्बन्धाभावदशायां सामान्यप्रत्यासत्त्या ज्ञानोत्पादस्य मूलकृतैव वारणीयत्वादित्यभिप्रायेणाऽऽह—**यद्वेति** । एतत्कल्पे लाघवान्तरमपि प्रदर्शयति—**तथा चेति । कल्पनेन चेति । 'च—'** कारेण पूर्वोपदर्शितविशेषणत्रयघटितत्वेन कारणतावच्छेदकशरीरगौरवस्य समुच्चयः । यद्यपि **सामान्यप्रकारकत्वस्थाने सामान्यविषयकत्व**प्रवेशो ज्ञानस्य प्रत्यासत्तित्वपक्षेऽप्यविशिष्ट एव, तथाऽपि त्रितयघटितत्वं कारणतावच्छेदकस्येति दर्शयितुमेतदुत्कीर्त्तनमिति ध्येयम् । **निर्विकल्पकस्मरणसाधारणत्वं—ज्ञानान्तर्गतनिर्विकल्पकादिकत्वम्** । इदं च सामान्यज्ञानमात्रशब्दार्थे सामान्यज्ञानसामान्ये विवक्षितम् ।

स्य सामग्र्यपेक्षिता, सा च सामग्री चक्षुःसंयोगालोकसंयोगादिकं, तेनाऽन्धकारादौ चक्षुरादिना तादृशं ज्ञानं न जन्यते ॥ ६४ ॥

इति सामान्यलक्षणप्रत्यासत्तिनिरूपणम् ॥

दिनकरी ।

च निर्विकल्पकसाधारणं स्मरणसाधारणं च सामान्यज्ञानमात्रं प्रत्यासत्तिः, **तथा** च घटत्वप्रकारकप्रत्यक्षत्वं कार्यतावच्छेदकं, घटत्वज्ञानत्वं च कारणतावच्छेदकं, **स्वप्रकारीभूतघटत्वाश्रयत्वं** च कार्यतावच्छेदकः **सम्बन्धः**, स्वविषयघटत्वाश्रयत्वं कारणतावच्छेकः **सम्बन्धः**, चक्षुःसंयोगादिशून्यकाले पूर्वोक्तातिप्रसङ्गस्य वक्ष्यमाण-'तदिन्द्रियज-' इत्यादिनैव वारणादिति ध्येयम् । अणुत्वज्ञानमात्रेणैव सकलाणुगोचरमानसबोधोदयादाह-**बहिरिति** । **'आलोकसंयोगादिकं'** इत्यादिना दोषाभावपरिग्रहः । **न जन्यत इति** । अयमाशयः,-यदा घटचक्षुःसन्निकर्षादिघटिता चाक्षुषादिसामग्री, तदुत्तरक्षणे घट इति चाक्षुषं, **सैव सामान्यलक्षणा**, तयोत्तरक्षणे सकलघटविषयकं ज्ञानं जन्यत इति प्राचीनमते क्षणैकविलम्बः कल्प्यते, तत्र च मानाभावः, यदैव घट इति चाक्षुषमुत्पद्यते, तदैव सन्निकृष्टघटांशे **लौकिकमन्यघटांशेऽलौकिकमित्यभ्युपगमात्** , तथा **च सामान्यलक्षणाजन्यघटत्वप्रकारकचाक्षुषत्वस्य** व्यापकं **घटत्वप्रकारकलौकिकचाक्षुषत्वमिति** फलितम् । **तथा** च चक्षुःसन्निकर्षादिशून्यकाले व्यापकधर्मावच्छिन्नजनकसामग्र्याः सहकारिण्या विरहादेव न चाक्षुषं **सामान्यलक्षणया ज्ञानमिति** ॥ ६४ ॥ **इति सामान्यलक्षणप्रत्यासत्तिनिरूपणम् ॥**

रामरुद्री ।

निर्गलितकार्यतावच्छेदककारणतावच्छेदकधर्मसम्बन्धानेतन्मतानुसारेण दर्शयति **तथा चेति** । सामान्यलक्षणाजन्यप्रत्यक्षे नियमेन घटत्वस्य प्रकारतया भानोपपत्तये घटत्वप्रकारकत्वस्य कार्यतावच्छेदकघटकतया उपादानम् । न चैवमपि प्रत्यक्षे सन्निकर्षं विना भानासम्भवाद्घटत्वे सामान्यप्रत्यासत्त्यभावात् कथं घटत्वस्य स्मरणादिना सामान्यज्ञानेन जन्ये प्रत्यक्षे भानमिति वाच्यम् । ज्ञानप्रत्यासत्तेस्तत्र सत्त्वात् । **स्वप्रकारीभूतेति** । एतच्चाऽऽपाततः, तथा सति घटत्वसामान्यलक्षणादिजन्यप्रत्यक्षे निखिलघटादिभाननियमानुपपत्तेः, किंत्वलौकिकविषयतैव कार्यतावच्छेदकसम्बन्धः, सन्निकृष्टघटांशे च विषयताद्वयमुपगम्यते, प्रयोजकसत्त्वादिति मन्तव्यम् । ननु सामान्यज्ञानस्य प्रत्यासत्तित्वनये पूर्वोक्तरीत्या कार्यकारणभावे लाघवसत्त्वेऽपि सामान्यलक्षणप्रत्यासत्त्या तदिन्द्रियजन्यप्रत्यक्षं प्रति तदिन्द्रियजन्यतद्धर्मप्रकारकलौकिकप्रत्यक्षस्य नानाकारणघटितगुरुभूतसामग्र्याः तत्सदृकारित्वं कल्पनीयमितीन्द्रियभेदेन सामान्यप्रत्यासत्तिजन्यप्रत्यक्षे गुरुतरसामग्रीकारणताकल्पनस्याऽऽवश्यकतया नैतन्मते लाघववार्ताऽपि । न च प्राचीनमते पुरुषभेदेन अनन्तकार्यकारणभावः कल्पनीयः, नवीनमते तदभावाल्लाघवमिति वाच्यम् । एतन्मतेऽपि सामग्र्यास्तत्तत्पुरुषीयचक्षुःसंयोगादिघटितत्वेन लौकिकसम्बन्धेन तत्पुरुषीयचाक्षुषं प्रति तेन सम्बन्धेन तत्पुरुषीयचक्षुःसंयोगादिघटितसामग्र्याः कारणताकल्पनस्याऽऽवश्यकतया तादृशलाघवस्याऽप्यभावात् , अन्यथा पुरुषान्तरीयचक्षुःसंयोगादिघटितसामग्रीतः पुरुषान्तरस्य निमीलितनयनस्याऽपि सामान्यज्ञानवतः सामान्यप्रत्यासत्तिजन्यचाक्षुषापत्तिरित्याशङ्क्याशयवर्णनेन निराकरोति-**अयमाशय इति** । **चाक्षुषादिसामग्रीति** । विशिष्टचाक्षुषादिसामग्रीत्यर्थः । तेन निर्विकल्पकस्याऽपि लाभः, अन्यथा तदुत्तरक्षणे घट इति विशिष्टचाक्षुषानुपपत्तेरिति ध्येयम् । **इत्यभ्युपगमात्-** इत्यभ्युपगमसम्भवात् । इदं च मानाभावे हेतुः । **व्यापकधर्मावच्छिन्नेति** । अयं भावः—व्याप्यधर्मावच्छिन्नस्योत्पत्तौ व्यापकधर्मावच्छिन्नसामग्र्याः प्रयोजकत्वस्य कल्पितया तत एव तत्पुरुषीयचक्षुःसंयोगादिघटितसामग्रीविरहदशायां तत्पुरुषीयसामान्यप्रत्यासत्तिजन्यघटत्वादिप्रकारकचाक्षुषापादनं न सम्भवति, नव्यमते अतिरिक्तकार्यकारणभावस्य अकल्पनाल्लाघवमत्रतमेवेति ॥ ६४ ॥

॥ इति सामान्यलक्षणप्रत्यासत्तिनिरूपणम् ॥

विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ।

ननु ज्ञानलक्षणा प्रत्यासत्तिर्यदि ज्ञानरूपा, सामान्यलक्षणाऽपि ज्ञानरूपा, तदा तयोर्भेदो न स्यादत आह विषयीति । सामान्यलक्षणाप्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति । ज्ञानलक्षणा प्रत्यासत्तिस्तु यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिः । अत्राऽयमर्थः-प्रत्यक्षे सन्निकर्षं विना भानं न सम्भवति, तथा च सामान्यलक्षणां विना धूमत्वेन सकलधूमानां, वह्नित्वेन सकलवह्नीनां च भानं कथं भवेत् ? तदर्थं सामान्यलक्षणा स्वीक्रियते। न च सकलवह्निधूमभानाभावे का क्षतिरिति वाच्यम् । प्रत्यक्षधूमे वह्निसम्बन्धस्य गृहीतत्वात् अन्यधूमस्य चाऽनुपस्थितत्वात् धूमो वह्निव्याप्यो न वेति संशयानुपपत्तेः । मन्मते तु सामान्यलक्षणया सकलधूमोपस्थितौ कालान्तरीयदेशान्तरीयधूमे वह्निव्याप्यत्वसन्देहः सम्भवति । न च सामान्यलक्षणास्वीकारे प्रमेयत्वेन सकलप्रमेयज्ञाने जाते सार्वज्ञ्यापत्तिरिति वाच्यम् । प्रमेयत्वेन सकलप्रमेयज्ञाने जातेऽपि विशिष्य सकलपदार्थानामज्ञातत्वेन सार्वज्ञ्याभावात् ।

एवं ज्ञानलक्षणाया अस्वीकारे सुरभि चन्दनमिति ज्ञाने सौरभस्य भानं कथं स्यात् ? यद्यपि सामान्यलक्षणयाऽपि सौरभस्य भानं सम्भवति,

दिनकरी ।

यदि ज्ञानरूपेति । अत्रत्यो 'यदि' शब्दः 'सामान्यलक्षणाऽपि' इत्युत्तरं योज्यः । सामान्यलक्षणास्वीकारे बीजमाह-अत्रेति । अयमर्थः-अयमभिप्रायः । भानं-विषयता । न सम्भवतीति । प्रत्यक्षविषयतायाः सन्निकर्षाश्रयत्वव्याप्यत्वादिति भावः । वह्निसम्बन्धस्य गृहीतत्वादिति । तथा च प्रत्यक्षधूमे व्याप्तेर्निर्णयान्न तद्विशेष्यको व्याप्यत्वसंशयः सम्भवतीति भावः । अनुपस्थितत्वादिति । तथा च धर्मिज्ञानाभावान्न तद्विशेष्यकोऽपि व्याप्यत्वसंशयः सम्भवतीति भावः ।

ज्ञानलक्षणास्वीकारे बीजमाह-एवमित्यादिना । कथं स्यादिति । चन्दनखण्डस्य चाक्षुषे जायमाने उपस्थितसौरभभानं न स्यात् , सौरभांशे चक्षुःसन्निकर्षाभावादित्यर्थः । सौरभत्वप्रकारकलौकिकप्रत्यक्षसामग्र्याः सहकारिण्या विरहेण सौरभत्वसामान्यलक्षणयाऽपि सौरभभानं न सम्भवतीति भावः । सुरभि चन्दनमित्यादौ सौरभादेर्भानं सौरभत्वादिसामान्यलक्षणयैव सम्भवति, सौरभत्वप्रकारकलौकिकप्रत्यक्षसौरभत्वावच्छिन्नप्रकारकप्रत्यक्षान्यतरसामग्रीसहकारेणैव तस्याः फलजनकत्वाङ्गीकारत् , प्रकृते च द्वितीयसामग्र्याः सहकारिण्याः सत्त्वादित्यभिप्रायेणाऽऽह-यद्यपीति । सौरभत्वस्य भानमिति । स्वरूप

रामरुद्री ।

'ज्ञानरूपा यदि' इत्यत्र 'यदि'शब्दस्य पूर्वान्वयित्वं न सम्भवति, ज्ञानलक्षणाया ज्ञानरूपतायाः सर्ववादिसिद्धत्वादिति भ्रमवारणायाऽऽह-अत्रत्य इति । वक्ष्यमाणस्य व्याख्येयग्रन्थार्थत्वाभावादाह-अयमभिप्राय इति ।

सन्निकर्षाभावादिति । योग्यवृत्तित्वविशिष्टसन्निकर्षाभावादित्यर्थः । तेन चन्दने चक्षुःसंयोगजायां सौरभेऽपि संयुक्तसमवायस्य आवश्यकत्वेऽपि न क्षतिः । अथ वा सुरभि चन्दनमिति भ्रमात्मक

तथाऽपि सौरभत्वस्य भानं ज्ञानलक्षणया। एवं यत्र धूमत्वेन धूलीपटलं

दिनकरी।

तः सौरभत्वस्य भानमित्यर्थः। **ज्ञानलक्षणया** ज्ञानलक्षणयैव। तदानीं सौरभत्वांशे धर्मान्तरस्याऽगृहीततया **सामान्यलक्षणया** तद्भानानिर्वाहादिति भावः। ननु धर्मान्तरस्य सौरभत्वांशेऽग्रहेऽपि सौरभत्वसामान्यलक्षणयैव सौरभत्वादेर्भानमस्तु, सौरभत्वप्रकारकसौरभविशेष्यकत्वस्यैव तत्कार्यतावच्छेदकत्वादिति चेन्न। सौरभत्वादिविषयताप्रयोजिकायाः सामान्यलक्षणायाः स्वविषयसौरभत्वादिमत्त्वरूपसम्बन्धस्य सौरभत्व अभावेन **सामान्यलक्षणया** तद्भानानिर्वाहात्। सौरभत्वसामान्यलक्षणायाः कार्यतावच्छेदके **सौरभत्वान्तरकत्वनिवेशे** प्रयोजनाभावाच्च। न च ज्ञानलक्षणायाः कारणत्वान्तरकल्पने गौरवमियैव सामान्यप्रकारकत्वस्य कार्यतावच्छेदके निवेश इति वाच्यम्। विशेषणज्ञानहेतुतयैव निर्वाहे ज्ञानलक्षणायाः कारणत्वान्तरकल्पनाविरहादिति। ननु विशेषणज्ञानजन्यतावच्छेदकं विशिष्टबुद्धित्वं, ज्ञानलक्षणायास्तु विशिष्टप्रत्यक्षत्वमिति न क्लृप्तेन निर्वाहः, एवं यत्र ज्ञानलक्षणया **स्वविषयमुख्यविशेष्यकं** भानं, तत्र विशेषणज्ञानकारणतया न निर्वाह **इत्यत** आह—**एवमिति। ज्ञानलक्षणया**—ज्ञानलक्षणयैव। तत्र धूमत्वज्ञानरूपसामान्यलक्षणायाः **स्वविषयधूमत्वाश्रयत्वसम्बन्धेन** धूलीपटलेऽभावेन **सामान्यलक्षणया**ऽनुव्यवसाये धूलीपटल-

रामरुद्री।

प्रत्यक्षाभिप्रायेण इदमुक्तमिति नाऽसङ्गतिः। ननु सुरभि चन्दनमिति प्रत्यक्षे सौरभत्वप्रकारकज्ञानरूपसामान्यलक्षणप्रत्यासत्त्यैव सौरभभानं सम्भवतीत्याशङ्क्य निराकरोति—**सौरभत्वेति**। ननु मूले **'यद्यपि—'** इत्याद्याशङ्का न सङ्गच्छते, उक्तरीत्या सामान्यलक्षणया सौरभभानस्याऽसम्भवादतः तद्भावमाह—**सुरभीत्यादि**। अत्र च **सौरभत्वावच्छिन्नप्रकारके**त्यपपाठः। ज्ञानलक्षणप्रत्यासत्त्यनङ्गीकारे सौरभप्रकारकप्रत्यक्षसामग्र्या एव प्रकृते उपपादयितुमशक्यत्वात्, किन्तु **सौरभत्वप्रकारकप्रत्यक्षेत्यै**व पाठः। सौरभत्वप्रकारकालौकिकमानससामग्रीसत्त्वेन एतादृशपाठे अनुपपत्त्यभावादिति ध्येयम्। **स्वरूपत इति**। प्रमेयत्वादिसामान्यलक्षणया प्रमेयत्वादिना तद्भानसम्भवेऽपि स्वरूपतः सौरभत्वभानं ज्ञानलक्षणानङ्गीकारे न सम्भवतीति भावः। धर्मान्तरेत्यत्राऽन्तरपदं सम्पातायातं, सौरभत्वांशे कस्याऽपि प्रकारतयाऽभानादिति बोध्यम्। **तद्भानानिर्वाहादिति**। सौरभत्वज्ञानरूपसामान्यप्रत्यासत्तेः सौरभत्वप्रकारतानिरूपितालौकिकविषयतासंसर्गस्य कार्यतावच्छेदकसम्बन्धत्वेऽपि प्रत्यक्षे सन्निकृष्टस्यैव भानमिति नियमेन सौरभत्वे सामान्यप्रत्यासत्तेः कारणतावच्छेदकसम्बन्धत्वेनाऽभावादिति भावः। अलौकिकविषयतासम्बन्धेन प्रत्यक्षत्वावच्छिन्नं प्रत्येव सौरभत्वादिज्ञानस्य कारणता स्वीकार्या, सौरभत्वादेः प्रकारतया भानं तु विशेषणज्ञानरूपकारणान्तरबलादेव, उपस्थितावाधितधर्मान्तरभानमपि सामान्यप्रत्यासत्तिजन्यप्रत्यक्षे इष्यत एव, प्रत्यक्षे सन्निकर्षाऽनाश्रयस्य भानानियमोऽपि नाऽङ्गीक्रियत एव, घटादिचक्षुषे पटादेरभानं तु तद्भासककारणाभावादेव सम्भवतीत्याशयेनाऽऽह **कार्यतावच्छेदक इति**। तथाविधसम्बन्ध इत्यर्थः। **विशिष्टप्रत्यक्षत्वमिति**। तत्प्रकारकप्रत्यक्षं प्रति तज्ज्ञानत्वेन कारणत्वमित्यभिप्रायेणेदं, तथा च कार्यतावच्छेदकधर्मभेदेन, कार्यकारणभावयोर्भिन्नत्वादेर्वा परस्याऽसिद्धिर्न सम्भवतीति भावः। न नु प्रत्यक्षे ज्ञानप्रत्यासत्तेः कारणताऽनङ्गीकरणीया, विशेषणज्ञानकारणतायां तु युक्तिः पूर्वमुपदर्शितैवेत्यत आह **एवं यत्रेति। स्वविषयमुख्यविशेष्यकमिति**। तथा च तद्विषयकलौकिकप्रत्यक्षं प्रति तद्विषयकज्ञानत्वेन कारणत्वमावश्यकम्, अन्यथा घटादिविशेष्यकालौकिकभानेन घटादेर्भानस्याऽलौकिकत्वाऽपत्तिरिति भावः। **इत्यत आहेति**। इत्यभिप्रायेण ज्ञानलक्षणप्रत्यासत्तेः प्रयो-

योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ॥ ६५ ॥
युक्तस्य सर्वदा भानं, चिन्तासहकृतोऽपरः ।

अथाऽनुमानखण्डम् ।

व्यापारस्तु परामर्शः, करणं व्याप्तिधीर्भवेत् ॥ ६६ ॥

ज्ञातं, तत्र धूलीपटलस्याऽनुव्यवसाये भानं ज्ञानलक्षणया ॥

॥ इति ज्ञानलक्षणप्रत्यासत्तिनिरूपणम् ॥

योगज इति । योगाभ्यासजनितो धर्मविशेषः श्रुतिपुराणादिप्रतिपाद्य इत्यर्थः । युक्तयुञ्जानरूपयोगिद्वैविध्याद्धर्मस्याऽपि द्वैविध्यमिति भावः ॥६५॥

युक्तस्येति । युक्तस्य तावद्योगजधर्मसहायेन मनसा आकाशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति, द्वितीयस्य चिन्ताविशेषोऽपि सहकारीति ॥ इति योगजप्रत्यासत्तिनिरूपणम् ॥

॥ इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायां
सिद्धान्तमुक्तावल्यां प्रत्यक्षपरिच्छेदः समाप्तः ॥

अनुमितिं व्युत्पादयति । व्यापारस्त्विति । अनुमायाम्—अनुमितौ व्याप्तिदिनकरी ।

भानासम्भवादिति भावः ॥ ६५ ॥ इति ज्ञानलक्षणप्रत्यासत्तिनिरूपणम् ॥

सर्वदैवेति । ध्यानाद्यभावेऽपीत्यर्थः ॥ इति योगजप्रत्यासत्तिनिरूपणम् ॥

॥ इति श्रीभारद्वाजकुलाम्बुधिपूर्णचन्द्रबालकृष्णभट्टात्मजमहादेवभट्टविरचिते
मुक्तावलीप्रकाशे प्रत्यक्षपरिच्छेदाख्यस्तृतीयः परिच्छेदः ॥

अनुमितिमिति । सङ्गतिश्चाऽत्र प्रत्यक्षेणोपजीव्योपजीवकभावो बोध्यः । करणे निर्दिष्टे एव व्यापारे जिज्ञासोदयान्मूले पश्चान्निर्दिष्टमपि करणं प्रथमं दर्शयति—व्याप्तिरामरुद्री ।

जनमाहेत्यर्थ इति शिवम् ॥ इति ज्ञानलक्षणप्रत्यासत्तिनिरूपणम् ॥

॥ इति श्रीरामरुद्रभट्टाचार्यविरचितायां मुक्तावलीप्रकाशतरङ्गिण्यां
प्रत्यक्षतरङ्गाख्यस्तृतीयस्तरङ्गः ॥

सङ्गतिश्चाऽत्रेति । प्रत्यक्षनिरूपणानन्तरमनुमाननिरूपणे सङ्गतिश्चेत्यर्थः । सप्तम्यर्थः प्रयोजकत्वम् । सङ्गतिपदार्थे तदन्वयो बोध्यः । अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयस्मरणानुकूलसम्बन्धो निरूपणीयनिष्ठा सङ्गतिः । तथा हि—प्रत्यक्षनिरूपणानन्तरमनुमाननिरूपणे प्रयोजकजिज्ञासा अनुमानज्ञानं मे भवत्वित्याकारिका, तज्जनकज्ञानमनुमानज्ञानं मदिष्टसाधनमित्याकारकं, तद्विषयोऽनुमानं, तत्स्मरणानुकूलसम्बन्धः अनुमाननिष्ठप्रत्यक्षकार्यत्वं सङ्गतिः । अत्राऽनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानं सङ्गतिनिरूपकज्ञानप्रयोज्यत्वेन विशेषणीयम् । तेन घटादिनिरूपणानन्तरमपि सम्बन्धिविशेषज्ञानाधीनप्रत्यक्षज्ञानेन तत्कार्यत्वेन अनुमानस्मरणसम्भवेऽपि न प्रत्यक्षकार्यत्वेन घटादिनिरूपित-

ज्ञानं करणं परमर्शो व्यापारः ।

तथाहि-येन पुरुषेण महानसादौ धूमे वह्निव्याप्तिर्गृहीता, पश्चात् स एव पुरुषः क्व चित् पर्वतादावविच्छिन्नमूलां धूमरेखां पश्यति, तदनन्तरं धूमो

दिनकरी ।

ज्ञानमिति । परामर्शो व्यापार इति । ननु व्यापारत्वं तज्जन्यत्वे सति तज्जन्यजनकत्वं, तच्च परामर्शे न सम्भवति, वह्निव्याप्यधूमवान् पर्वत इति परामर्शे व्याप्तिज्ञानजन्यत्वस्याऽभावात्, महानसीयवह्निव्याप्तिज्ञानस्य तदानीमभावेन व्यभिचारादतस्तदुपपादयति **तथा हीत्यादिना । पश्यतीति ।** धूमदर्शनस्य व्याप्तिस्मरणे उद्बोधकविधया हेतुत्वसम्पत्त्यर्थं यादृशविशेषणविशिष्टस्य धूमस्य सम्बन्धितया ज्ञानं, तादृशधूमदर्शनस्यैव व्याप्तिस्मृतावुद्बोधकत्वमित्यभिप्रायेणाऽविच्छिन्न(मूल)त्वमुक्तम् । **एवं रूपं व्या-**

रामरुद्री ।

सङ्गतिस्त्वापत्तिः, अनुमानज्ञानस्य घटज्ञानाप्रयोज्यत्वात्, प्रकृते च चक्षुरादिना अनुमानस्य व्याप्तिज्ञानस्य जननादनुमाने प्रत्यक्षप्रमाणकार्यत्वरूपोपजीवकत्वमिति भावः । एवमनुमितावपि परामर्शरूपप्रत्यक्षप्रमितिजन्यत्वमस्तीति प्रत्यक्षप्रमानिरूपणोत्तरमनुमितिनिरूपणमिति बोध्यम् । अथ दीपदानं मदीयचक्षुःसाधनं (भवितुमर्हति) 'दीपश्चक्षुरुत्तमः' इति वेदेन चक्षुःसाधनत्वेन बोधितत्वादित्यनुमानेन दीपदाने यत्र प्रवृत्तिः, तत्र तज्जनितचक्षुरादिव्यक्तेरनुमानोपजीव्यतया अनुमाननिरूपणानन्तरमेव प्रत्यक्षं किमिति न निरूपितमिति । न च उपजीवकत्व कार्यतारूपमेव, न तु प्रयोज्यतारूपमिति चक्षुरादौ साक्षादनुमानजन्यत्वाभावान्नाऽनुमाननिरूपणानन्तरं प्रत्यक्षनिरूपणापत्तिरिति वाच्यम् । तथा सति शक्तिज्ञानात्मकोपमितेः पदार्थस्मरण एवोपयोगात् साक्षाच्छब्दबोधाजनकत्वेनोपमित्यनन्तरं शाब्दनिरूपणानुपपत्तेः । न चाऽदृष्टद्वारकमुपजीवकत्वमनन्तराभिधाननियामकमिति वाच्यम् । यत्रेष्टसाधनतानुमानेन दर्पणादौ प्रवृत्तिः, तत्र दर्पणेन महाचक्षुर्नाशे तज्जन्यखण्डचक्षुर्व्यक्तावदृष्टद्वारकोपजीवकत्वस्याऽपि सम्भवात् । यदि च प्रत्यक्षप्रमाणत्वावच्छेदेन नाऽनुमानोपजीवकत्व, मनःश्रवणयोरजन्यत्वात्, अनुमानं च निखिलमेव मनोरूपेन्द्रियजन्यमिति न वैपरीत्यापादनसम्भव इति विभाव्यते, तदा ईश्वरीयव्याप्तिज्ञानस्याऽप्यनुमितिस्वरूपयोग्यत्वेनाऽनुमापकतया तत्र प्रत्यक्षोपजीवकत्वाभावेन प्रत्यक्षानन्तरमनुमाननिरूपणस्याऽप्यनुपपत्तिरिति चेत् । मैवम् । न हि यत् यत्सङ्गतं भवति, तत्तदनन्तरं निरूपणीयमिति नियमः, येनाऽनुमाननिरूपणानन्तरं प्रत्यक्षनिरूपणापत्तिः, किन्तु यदनन्तरं निरूप्यं भवति, तत्तत्सङ्गतं भवतीत्येवं व्याप्तिः, 'नाऽसङ्गतं प्रयुञ्जीत' इत्यभियुक्तोक्तेः । एवं च कारणे कार्ये वा ज्ञाते किमस्य कार्यं कारणं वेति जिज्ञासोदयेन उपजीवकत्वमुपजीव्यत्वं च द्वयमपि सङ्गतिः । अत एव चिन्तामणावनुमितिनिरूपणानन्तरमनुमाननिरूपणमपि सङ्गच्छते । न च कार्यत्वकारणत्वयोर्द्वयोरपि सङ्गतित्वे सङ्गतेः षोढात्वं व्याहन्यते, तथा चोक्तं—

स प्रसङ्ग उपोद्घातो हेतुताऽवसरस्तथा । निर्वाहकैककार्यैक्ये षोढा सङ्गतिरिष्यते ॥

इति वाच्यम् । हेतुतायां निरूपकतासम्बन्धेन आश्रयतासम्बन्धेन च सङ्गतित्वेन कार्यत्वस्य हेतुतायामेवाऽन्तर्भावात् । कारणतानिरूपकत्वस्यैव कार्यतारूपत्वात् । तत्र उपोद्घातादिभिन्नः स्मरणप्रयोजकसम्बन्धः प्रसङ्गः । प्रकृतोपपादकत्वमुपोद्घातः । न चैवस्य प्रयोजकतात्मकहेतुतया गतार्थता शङ्कनीया । अनुमितिलक्षणोपोद्घातसङ्गत्या विशिष्टपरामर्शस्याऽनुमितिहेतुताव्यवस्थापनात् । न हि लक्षणे विशिष्टपरामर्शहेतुत्वं साक्षात्परम्परया वा कारणं, किन्तु घटकमेवेति ध्येयम् । अवसरः—अनन्तरवक्तव्यत्वं, यथा प्रत्यक्षनिरूपणानन्तरं तत्कार्यत्वेनाऽनुमानोपमानयोरुभयोर्निरूपणप्राप्तौ बह्वादिसम्मतत्वेन प्रथममनुमान एव जिज्ञासोदयेन अनुमाननिरूपणेन प्रतिबन्धकजिज्ञासानिवृत्तावावसरसङ्गत्या उपमाननिरूपणमिति मन्तव्यम् । निर्वाहकैक्यम्—एकप्रयोजकप्रयोज्यत्वम् । कार्यैक्यम्—एककार्यानुकूलत्वमिति

वह्निव्याप्य इत्येवं रूपं व्याप्तिस्मरणं तस्य भवति, पश्चाच्च वन्हिव्याप्यधूमवानयमिति ज्ञानं, स एव परामर्श इत्युच्यते । तदनन्तरं पर्वतो वह्निमानित्यनुमितिर्जायते ॥ इत्यनुमितिकारणनिरूपणम् ॥

अत्र प्राचीनास्तु व्याप्यत्वेन ज्ञायमानं लिङ्गमनुमिति-करणमिति वद-

दिनकरी ।

प्तिस्मरणमिति । उद्बुद्धसंस्कारस्य पूर्वं सत्त्वादिति भावः । **स एव परामर्श इति ।** तथा च स्मरणात्मकज्ञानस्य पूर्वं सत्त्वान्न व्यभिचार इति भावः । न च तथाऽपि यत्र व्याप्तिघटकानां पदार्थानां विश्रृङ्खलोपस्थितिमूलको विशेष्ये विशेषणं, तत्राऽपि विशेषणमिति रीत्या परामर्शस्तत्र विशिष्टव्याप्तिज्ञानस्य व्यभिचारो दुरुद्धर एवेति वाच्यम् । व्याप्त्यंशे निश्चयत्वानिवेशप्रयुक्तलाघवेन विशिष्टस्य वैशिष्ट्यमिति रीत्या परामर्शस्यैवाऽनुमितिहेतुत्वादित्यभिप्रायात् । स्मरणात्मकपरामर्शे व्याप्तिज्ञानस्य व्यभिचार, इत्यपि न । संस्कारसम्बन्धेन पूर्वं व्याप्तिज्ञानस्य सत्त्वात् । **अत्र नव्याः**—व्याप्तिज्ञानत्वस्य परामर्शत्वव्यापकतयाऽनुमितिं प्रति हेतुत्वमेव नास्ति, कुतः करणत्वम् ? अन्यथा कपालादेर्घटं प्रति द्रव्यत्वेन हेतुतापत्तिः, तस्मादनुमिति प्रति मनस्त्वेनैव कारणत्वमित्याहुः ।

॥ इत्यनुमितिकारणनिरूपणम् ॥

लिङ्गमनुमितिकरणमिति । अनुमितौ परामर्शमात्रं न हेतुः, अपि तु लिङ्गपरामर्शः । तथा च विशिष्टस्य कारणताग्रहे विशेषणस्याऽपि कारणताग्रहात् परामृश्यमानलिङ्गस्य लिङ्गपरामर्शस्य वा हेतुतेत्यत्र विनिगमनाविरहादुभयोर्हेतुतासिद्धौ तत्र च व्या-

रामरुद्री ।

दिक् । **सम्बन्धितयेति ।** व्याप्तिसम्बन्धितयेत्यर्थः । **विशेष्ये विशेषणमितीति ।** विशिष्टवैशिष्ट्यानवगाहित्वे वन्हिव्याप्यो धूम इति ज्ञानं विनाऽपि शाब्दपरामर्शसम्भवादिति भावः । **लाघवेनेति ।** व्याप्तिदभावत्वद्धूमवान् पर्वत इति व्याप्त्यंशे संशयाकारपरामर्शादनुमितिवारणाय धूमांशे इव व्याप्त्यंशे निश्चयत्वं निवेशनीयमिति गौरवम् । विशिष्टवैशिष्ट्यावगाहिज्ञानस्य कारणत्वे तु कारणीभूतविशेषणतावच्छेदकप्रकारकनिश्चयप्रतिबन्धादेव व्याप्त्यंशे संशयत्वासम्भवेन तन्निवेशे प्रयोजनाभावादिति भावः । **संस्कारसम्बन्धेनेति ।** स्वजन्यसंस्कारसम्बन्धेनेत्यर्थः । स्वजन्यसंस्कार—समवायान्यतरसम्बन्धेन व्याप्तिज्ञानस्य परामर्शहेतुत्वान्न कुत्राऽपि व्यभिचार इति भावः । **परामर्शव्यापकतयेति ।** तादात्म्येन परामर्शस्य व्याप्यत्व ग्राह्यम् । **कारणत्वमेव नाऽस्तीति ।** नियतपूर्ववर्त्तितावच्छेदकव्याप्यसत्त्वे व्यापकधर्मेण हेतुतायामन्यथासिद्धेरिति भावः ॥ इत्यनुमितिकारणनिरूपणम् ॥

परामर्शमात्रमिति । ज्ञानमात्रमित्यर्थः । 'परा'पूर्वक'मृश'धातोः ज्ञानार्थकत्वादिति भावः । **लिङ्गेति ।** व्याप्तिविशिष्टपक्षधर्मताविशिष्टहेतुर्लिङ्गं, विषयितासम्बन्धेन तद्विशिष्टज्ञानमेव अनुमितिहेतुर्बोध्य इत्यर्थः । **कारणताग्रहादिति ।** असति बाधके विशिष्टस्य कारणताग्राहकप्रमाणेन विशेषणांशेऽपि कारणताग्रहात्, अत एव 'अरुणया पिङ्गाक्ष्यैकहायन्या गवा सोमं क्रीणाति' इत्यत्र तृतीयया गोविशेषणीभूतानामारुण्यादीनामपि सोमक्रयणसाधनता प्रतीयत इति मीमांसकानां सिद्धान्तोऽपि सङ्गच्छत इति भावः । विनिगमनाविरहेणाऽपि लिङ्गस्य कारणता सिद्धयतीत्याह—**परामृश्यमानेति । किन्त्विति ।** परामर्शस्यैव विषयविधया लिङ्गजन्यत्वसम्भवादिति भावः । **तद्व्यापारत्वासम्भवादिति ।** शाब्दादिपरामर्शस्य अतीतानागतादिलिङ्गाजन्यतया लिङ्गव्यापारत्वासम्भवादित्यर्थः । **अनुमितिप्रसङ्ग इति ।** पक्षनिष्ठस्य लिङ्गस्य समवायेनाऽनुमितिं प्रति हेतुताऽसम्भवेनोद्देश्यतासम्बन्धेनाऽनुमितिं प्रति हेतुतावच्छेदकसम्बन्धेन लिङ्गस्य कारणतायाः स्वीकरणीयत्वादिति भावः । **अस्म**

अनुमायां ज्ञायमानं लिङ्गं तु करणं न हि ।
अनागतादिलिङ्गेन न स्यादनुमितिस्तदा ॥ ६७ ॥
व्याप्यस्य पक्षवृत्तित्वधीः परामर्श उच्यते ॥

न्ति, तत् दूषयति ज्ञायमानमिति । लिङ्गस्याऽनुमित्यकरणत्वे युक्तिमाह अनागतादीति । यद्यनुमितौ लिङ्गं करणं स्यात्, तदाऽनागतेन लिङ्गेन, विनष्टेन चानुमितिर्न स्यात्, अनुमितिकरणस्य लिङ्गस्य तदानीमभावादिति ॥६६॥ ॥६७॥ इति ज्ञायमानलिङ्गस्याऽनुमितिहेतुत्वखण्डनम् ॥

व्याप्यस्येति । व्याप्तिविशिष्टस्य पक्षेण सह वैशिष्ट्यावगाहिज्ञानमनुमितौ जनकं, तच्च पक्षे व्याप्य इति ज्ञानं, पक्षो व्याप्यवानिति ज्ञानं वा, अनुमितिस्तु पक्षे व्याप्य इति ज्ञानात् पक्षे साध्यमित्याकारिका, पक्षो व्याप्यवानिति ज्ञानात् पक्षः साध्यवानित्याकारिका ।

द्विविधादपि परामर्शात् पक्षः साध्यवानित्येवाऽनुमितिरित्यन्ये ।

दिनकरी ।

पाराभावान्न परामर्शस्य करणता, अपि तु लिङ्गस्यैवेत्याशयः । लिङ्गस्य तदानीमभावादिति । न च परामर्शरूपव्यापारसम्बन्धेन तदानीं लिङ्गमस्त्येवेति वाच्यम् । अतीतादिलिङ्गस्य परामर्शाजनकतया परामर्शस्य तद्व्यापारत्वासम्भवात् । इदमुपलक्षणं, लिङ्गस्य हेतुत्वे चैत्रीयपरामर्शविषयाल्लिङ्गान्मैत्रस्याऽनुमितिप्रसङ्गः, तत्तत्पुरुषीयत्वनिवेशे गौरवम्, अस्मन्मते सामानाधिकरण्यप्रत्यासत्त्या हेतुहेतुमद्भावेनैवाऽतिप्रसङ्गाभावान्न तत्पुरुषीयत्वनिवेश इति लाघवमित्यपि बोध्यम् ॥ ६६ ॥ ६७ ॥

॥ इति ज्ञायमानलिङ्गस्याऽनुमितिहेतुत्वखण्डनम् ॥

तच्च—व्याप्यस्य पक्षेण सह वैशिष्ट्यावगाहि ज्ञानं च । ननु परस्परं व्यभिचार इत्यत आह-अनुमितिस्त्विति । कार्यतावच्छेदकस्य परस्परानुमितिव्यावृत्तत्वान्न व्यभिचारः।

पक्षविशेष्यकत्वमेव सर्वत्राऽनुमितौ नियतमिति नवीनमतमाह—द्विविधादपीति । पक्षविशेष्यकव्याप्यविशेष्यकोभयपरामर्शादपीत्यर्थः । कारणतावच्छेदकं च परामर्शद्वयसाधारणं व्याप्यपक्षोभयवैशिष्ट्यावगाहिनिश्चयत्वम्, अतो न व्यभिचार इति भावः ।

रामरुद्री ।

न्मते-परामर्शहेतुतावादिमते, सामानाधिकरण्यप्रत्यासत्त्या—एकात्मानुयोगिकसमवायसम्बन्धेन, कार्यकारणभावान्नैकपुरुषीयपरामर्शादन्यस्याऽनुमित्यापत्तिरिति भावः ॥ ६५-६६-६७ ॥

॥ इति ज्ञायमानलिङ्गस्याऽनुमितिहेतुत्वखण्डनम् ॥

परस्परेति । पक्षविशेष्यकपरामर्शोत्तरानुमितौ व्याप्यविशेष्यकपरामर्शस्य तदुत्तरानुमितौ पक्षविशेष्यकपरामर्शस्य व्यभिचार इत्यर्थः ।

सर्वत्राऽनुमितावितिं । प्रसिद्धसाध्यकसकलानुमितावित्यर्थः । तेन पृथिवीतरत्वाभावव्यापकाभावप्रतियोगिगन्धवती पृथिवीति व्यतिरेकिपरामर्शादप्रसिद्धसाध्यविशेष्यकानुमित्युपगमेऽपि न क्षतिरिति मन्तव्यम् । नन्वेवं परस्परजन्यानुमितौ व्यभिचारो दुर्वार इत्याशङ्क्यायाह—कारणतावच्छेदकञ्चेति । व्याप्यपक्षोभयेति । यद्यपि निश्चयत्वमुभयसाधारणमेकं दुर्वचं, तदभावाप्रकारकत्वे सति तत्प्रकारकत्वरूपनिश्चयत्वस्य प्रकारीभूतव्याप्यपक्षरूपधर्मविशेषघटितत्वात्, तत्प्रकारतावच्छेदकसम्बन्धा-

ननु वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं विनाऽपि यत्र पर्वतो धूमवानिति प्रत्यक्षं, ततो वह्निव्याप्यो धूम इति स्मरणं, तत्र ज्ञानद्वयादेवाऽनुमितेर्दर्शनात् व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं न सर्वत्र कारणं, किन्तु व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वस्याऽऽवश्यकत्वात् तत्र विशिष्टज्ञानकल्पने गौरवाच्चेति चेन्न । व्याप्यतावच्छेदकाज्ञानेऽपि वह्निव्याप्य-

दिनकरी ।

द्विविधयोरपि परामर्शयोः स्वस्वाव्यवहितोत्तरानुमिति प्रति तत्तद्रूपेण हेतुत्वमित्यपि केचित् । वस्तुतोऽनुभवानुरोधात् पक्षविशेष्यकपरामर्शस्यैव हेतुत्वम्, अत एव वह्निव्याप्यधूमवांश्चाऽयमित्याकारकः पक्षविशेष्यक एवोपनयः सर्वसम्मत इति ध्येयम् ।

मीमांसकः शङ्कते **नन्विति** । ज्ञानं विनाऽपीत्यस्याऽनुमितेर्दर्शनादित्यनेनाऽन्वयः । **ज्ञानद्वयादेव**—ज्ञानद्वयादपि । **विशिष्टवैशिष्ट्यावगाहिज्ञानमिति** भावप्रधानो निर्देशः । **सर्वत्र न कारणमिति** । अनुमितित्वावच्छिन्नं प्रति न कारणताच्छेदकमित्यर्थः । **आवश्यकत्वादिति** । व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वस्योभयमतसिद्धनियतपूर्ववृत्तितावच्छेदकताकत्वादित्यर्थः । ननु ज्ञानद्वयस्थलेऽपि विशिष्टज्ञानं कल्पनीयमतो न व्यभिचार इत्यत आह-**विशिष्टज्ञानेति** । **व्याप्यतावच्छेदकेति** । अयमालोको धूमो

रामरुद्री ।

ननुगमाच्च, सांसर्गिकविषयतायाः विशिष्याऽनिवेशे कालिकादिना व्याप्यपरामर्शादनुमित्यापत्तेरनुगतैकरूपेण कारणत्वं दुर्घट, तथाऽपि हेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयत्वसम्बन्धावच्छिन्नप्रतियोगिताकपक्षतावच्छेदकावच्छिन्नाभावप्रकारत्वानिरूपिता या हेतुतावच्छेदकसम्बन्धान्यसम्बन्धानवच्छिन्ना व्याप्यवच्छिन्ना विषयता तन्निरूपिता या हेतुतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकव्याप्याभावप्रकारत्वानिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्ना (प्रकारतानिरूपिता) ऽऽधेयत्वसम्बन्धान्यसम्बन्धानवच्छिन्ना पक्षतावच्छेदकावच्छिन्ना विषयता तच्छालिङ्गज्ञानत्वेनाऽनुगतकारणत्वं सम्भवति, प्रकारतायामेव ससर्गावच्छिन्नत्व, न विशेष्यतायामपीति सिद्धान्तादिति भावः । एवमपि व्याप्यप्रतियोगिकाभावत्वेन अभावनिवेशे आलोकाभाववति धूमप्रकारकनिश्चयसङ्ग्रहस्य व्याप्यसामान्याभावनिवेशे च वह्निव्याप्यधूमवान्न वेति संशयवारणस्याऽसम्भव एव, अप्रामाण्यज्ञानानामपि विभिन्नाकाराणामेकैकनिश्चयकारणतावच्छेदककोटावभावा निवेशनीया इत्यतोऽपि नाऽनुगतहेतुतासम्भव इत्यभिप्रायेण मतान्तरमुपन्यस्यति **द्विविधयोरिति । तादृप्येणेति** । पक्षविशेष्यकत्वेन व्याप्यविशेष्यकत्वेनेत्यर्थः । स्वमतमुपदर्शयति—**वस्तुत इति । अनुभवानुरोधादिति** । पक्षविशेष्यकादेव परामर्शादनुमितिः, न व्याप्यविशेष्यकादनुमितिरित्यनुभवानुरोधादित्यर्थः । स्वोक्ते प्राचां सम्मतिमाह—**अत एवेति । वह्निव्याप्यधूमवानिति** नवीनमताभिप्रायेणोक्तम्, प्राचीनमते तु तथा चाऽयमित्युपनयाकार इति मन्तव्यम् ।

ननु वह्निव्याप्यधूमवान् पर्वत इति ज्ञानादिपरामर्शस्थले ज्ञानद्वयं विनाऽपि मीमांसकैरप्यनुमितिस्वीकारात् **'ज्ञानद्वयादेव'** इति **'एव'**कारासङ्गतिरित्यतस्तस्याऽप्यर्थकतामाह—**ज्ञानद्वयादपीति** । विशिष्टवैशिष्ट्यावगाहिज्ञानं सर्वत्र न कारणमिति मूलस्य सर्वत्र नाऽनुमित्यव्यवहितपूर्ववर्त्तीत्यर्थकत्वे अग्रे अतो विशिष्टवैशिष्ट्यावगाहिनिश्चयत्वं नाऽनुमितिजनकतावच्छेदकमिति पूरणीयम्, उक्तवाक्यस्य साक्षाद्विशिष्टपरामर्शत्वेन हेतुत्वनिरासकत्वादिति प्रयासाधिक्यमतस्तद्ग्रन्थस्य विशिष्टपरामर्शत्वेन हेतुतानिरासकत्वं सम्पादयन्नाह-**भावप्रधानो निर्देश इति** । एतदनुरोधेन **'सर्वत्र न कारणत्वम्'** इत्यस्याऽर्थमाह—**अनुमितित्वावच्छिन्नं प्रतीति । आवश्यकत्वा**दित्यस्य उभयवादिसिद्धनियतपूर्ववर्तितावच्छेदकत्वादित्यर्थकतामाह—**व्याप्यतावच्छेदकेत्यादि** । तथा चाऽनन्यथासिद्धत्वमात्रं मीमांसकैः कल्पनीयं; नैयायिकैस्तूभयं कल्पनीयमिति गौरवमिति भावः । ननु व्याप्यतावच्छेदकानिर्णये

वानिति ज्ञानादनुमित्युत्पत्तेः लाघवाच्च व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वम्।

किञ्च धूमवान् पर्वत इति ज्ञानादनुमित्यापत्तिः, व्याप्यतावच्छेदकीभूतधूमत्वप्रकारकस्य पक्षधर्मताज्ञानस्य सत्त्वात्।

न च गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य हेतुत्वमिति वाच्यम्। चैत्रस्य व्याप्तिग्रहे मैत्रस्य पक्षधर्मताज्ञानात् अनुमितिः स्यात्।

यदि तत्पुरुषीयगृह्यमाणव्याप्यतावच्छेदकप्रकारकं तत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरित्युच्यते, तदाऽनन्तकार्यकारणभावः। मन्मते तु समवायसम्बन्धेन व्याप्तिप्रकारकपक्षधर्मताज्ञानं समवायसम्बन्धेनाऽनुमितिं जनयतीति नाऽनन्तकार्यकारणभावः।

यदि तु व्याप्तिप्रकारकं ज्ञानं पक्षधर्मताज्ञानं च स्वतन्त्रं कारणमित्युच्यते-तदा कार्यकारणभावद्वयं, वह्निव्याप्यो धूम आलोकवांश्च पर्वत इति

दिनकरी।

वेति सन्देहदशायां व्याप्यतावच्छेदकप्रकारकनिर्णयाभावेऽपीत्यर्थः। **वह्निव्याप्यवानिति**। वह्न्यभाववदवृत्तिमानित्यर्थः। न तु धूमसमानाधिकरणेत्यादिरूपव्याप्तिविशिष्टवानित्यर्थः, अत्र हेतुतावच्छेदकभाननैयत्यात्। **अनुमित्युत्पत्तेरिति**। तथा च व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानस्य तत्र व्यभिचाराच्च तेन रूपेण हेतुत्वमिति भावः। **ननु** तत्र फलबलाद्व्याप्यतावच्छेदकप्रकारकं ज्ञानं कल्पनीयमतो न व्यभिचार इत्यत आह-**लाघवाच्चेति**। व्याप्यतावच्छेदकप्रकारकत्वापेक्षया व्याप्तिप्रकारकत्वस्य लघुत्वादित्यर्थः।

नन्वस्तु तवाऽवच्छेदकलाघवं, तथाऽपि पूर्वोक्तकल्पनालाघवमेव मीमांसकानां मूलयुक्तिर्भविष्यतीत्यत आह--**किञ्चेति**।

न च गृह्यमाणेति। अत्र ज्ञानचा ग्रहस्य वर्त्तमानतयाऽभिधानान्न कालान्तरीयतादृशग्रहमादाय दोषः।

व्याप्तिप्रकारकं ज्ञानमिति स्वतन्त्रमित्यनेनाऽन्वयि। **इत्युच्यते इति**। इत्थं च न तत्पुरुषीयत्वं निवेश्यते, चैत्रस्य व्याप्तिग्रहकाले तच्छून्यस्य मैत्रस्याऽनुमित्यापत्तेरभावात्, मैत्रात्मनि स्वतन्त्रहेतुभूतव्याप्तिज्ञानाभावादिति भावः।

ननु व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वेन, पक्षधर्मताविषयकव्याप्तिप्रकारकज्ञानत्वेन वा हेतुतेत्यत्र विनिगमनाविरहेण हेतुताद्वयं तवाऽपीत्यत आह-**वह्निव्याप्य इति। अनुमितिः**

रामरुद्री।

वह्निव्याप्यवानिति शाब्दपरामर्शोऽपि न सम्भवत्येव, धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्वादेरेव व्याप्तित्वादित्याशङ्कानिरासायाऽऽह—**वन्ह्यभाववदवृत्तीति**। **फलबलादिति**। अनुमितिरूपकार्येण कारणानुमानसम्भवादिति भावः। **लघुत्वादिति**। उभयत्राऽपि व्यभिचारस्याऽविशिष्टतया लघुरूपेणैव कारणतायाः कल्पयितुमुचितत्वादिति भावः।

मूलयुक्तिरिति। व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानहेतुनासाधकयुक्तिरित्यर्थः।

शानचेति। "लटः शतृशानचौ" इति सूत्रेण वर्तमानार्थकलस्थानिकत्वेन शतृशानचोर्विधानादिति भावः।

तवाऽपीति। यद्यपि व्याप्यतावच्छेदकप्रकारकपक्षविशेष्यकनिश्चयत्वेन पक्षविशेष्यक-

ज्ञानादप्यनुमितिः स्यात् । इत्थं च यत्र ज्ञानद्वयं, तत्राऽपि विशिष्टज्ञानं कल्पनीयं, फलमुखगौरवस्याऽदोषत्वात् ॥ इति परामर्शनिरूपणम् ॥

दिनकरी ।

स्यादिति न्यायनये तु व्याप्तिप्रकारतानिरूपितहेतुप्रकारतानिरूपितपक्षविशेष्यताशालिज्ञानत्वेन हेतुत्वस्य विवक्षितत्वात्। न तादृशज्ञानात् न वा धूमो वन्हिव्याप्यो धूमवान् पर्वत इति ज्ञानादनुमित्यापत्तिः, तत्र व्याप्तिप्रकारतानिरूपितधूमविशेष्यतायाः पर्वतविशेष्यतानिरूपितप्रकारतानात्मकत्वादिति भावः । ननु ज्ञानद्वयस्थले विशिष्टज्ञानकल्पने कल्पनागौरवं न्यायमते दूषणं भविष्यतीत्यत आह-**इत्थं चेति । फलमुखगौरवस्याऽदोषत्वादिति । फलं**-कार्यकारणभावग्रहः, तन्मुखं-तदधीनं, **गौरवं**-गौरवज्ञानमित्यर्थः । विशिष्टज्ञानत्वावच्छेदेन कारणत्वग्रहे विशिष्टज्ञानत्वधर्मिकगौरवनिश्चयो विरोधी वाच्यः, तच्च गौरव प्रमाणान्तरासिद्धत्तदनुमित्यव्यवहितपूर्ववर्त्तिस्वाश्रयकत्वमेव, तादृशगौरवनिश्चयो विशिष्टज्ञानत्वेन कारणत्वनिश्चयाधीनः स्वघटकीभूततत्तदनुमित्यव्यवहितपूर्ववर्त्तिस्वाश्रयनिर्णयं विना न सम्भवतीति कार्यकारणभावनिर्णयात् पूर्वं गौरवनिर्णयाभावान्न तादृशगौरवं दूषकमिति भावः ॥

॥ इति परामर्शस्याऽनुमितिहेतुत्वव्यवस्थापनम् ॥

मूले परामर्शलक्षणानन्तरं व्याप्तिनिरूपणे सङ्गतिमुपोद्घातं निरूपयन्नाह—**व्याप्यो नामेति । तत्रेति** । घटकत्वं सप्तम्यर्थः ।

रामरुद्री ।

व्याप्यतावच्छेदकप्रकारकनिश्चयत्वेन वा कारणत्वमित्यत्र विनिगमनाविरहेण मीमांसकमते कार्यकारणभावचतुष्टयापत्त्या न्यायमते विनिगमनाविरहेण कारणतावच्छेदकानां तथाऽपि व्याप्तिप्रकारत्वहेतुप्रकारत्वपक्षविशेष्यत्वानां त्रयाणां विशेषणविशेष्यभावे विनिगमनाविरहेण गुरुभूतकार्यकारणभावत्रयापत्त्या मीमांसकमते न गौरवमित्यर्थे तात्पर्यान्नाऽसङ्गतिरिति भावः । मूले-**आलोकवानिति** । यद्यपि व्याप्यतावच्छेदकानां धूमत्वादीनां निवेशे न तदापत्तिः, धूमत्वप्रकारकपक्षधर्मताज्ञानस्य धूमविशेष्यकव्याप्तिज्ञानसहकारेणैव फलजनकत्वस्योपगन्तव्यत्वात्, तथाऽपि व्याप्यतावच्छेदकानां निवेशे व्याप्यतावच्छेदकभेदेन अनन्तकार्यकारणभावापत्त्या गौरवमिति बोध्यम् । **व्याप्तिप्रकारतानिरूपितहेतुप्रकारतेति । इदं** च प्रकारताविशेष्यतयोरभेदवादिमताभिप्रायेण । भट्टाचार्यमते तु व्याप्तिप्रकारतानिरूपितविशेष्यतावच्छिन्नप्रकारतानिरूपितपक्षविशेष्यताशालित्वेन वक्तव्यम्, एकनिष्ठप्रकारताविशेष्यतयोर(भेदवादिनाऽ) वच्छेद्यावच्छेदकभावस्वीकारात्, विशेष्यताप्रकारतयोर्भेदास्वीकारे रक्तदण्डवानिति बुद्धौ रक्तरूपविशेष्यकदण्डाभावनिश्चयप्रतिबद्धत्वापत्तेः, दण्डप्रकारतानिरूपितरक्तरूपनिष्ठविशेष्यताशालित्वात्तादृशबुद्धेरिति ध्येयम्। वक्ष्यमाणगौरवस्य कारणतानिश्चयानधीनत्वादाह—**गौरवज्ञानमिति । प्रमाणान्तरेति** । कार्यलिङ्गकानुमानातिरिक्तप्रमाणेत्यर्थः । **स्वाश्रयकत्वं**-स्वाश्रयवृत्तित्वम् । **निश्चयाधीन इति** । तादृशकारणतानिश्चये सत्येव कार्यलिङ्गेन तत्तदनुमित्यव्यवहितपूर्ववृत्तित्वविशिष्टपरामर्शस्य निर्णयसम्भवादिति भावः । **स्वघटकीभूतेति** । गौरवघटकीभूतेत्यर्थः । **न तादृशेति** । स्वोत्तरोत्पन्नगौरवज्ञानस्य प्रतिबन्धकत्वासम्भव इति भावः ॥ इति परामर्शनिरूपणम् ॥

उपोद्घातमिति । व्याप्यपक्षोभयवैशिष्ट्यावगाहिज्ञानस्य व्याप्तिज्ञानसाध्यत्वेनोपोद्घातसङ्गत्या परामर्शनिरूपणानन्तरं व्याप्तिनिरूपणमिति भावः । **घटकत्वमिति** । स्वाविषयकप्रतीत्यविषयत्वं तद्घटकत्वं, व्याप्यघटकीभूता व्याप्तिः केत्यर्थः पर्यवसितः । साध्यवदन्यावृत्तित्वलक्षणे साध्यतावच्छेदकसम्बन्धेन साध्यवत्त्वाविवक्षणे वन्हिमान् धूमादित्यादौ अव्याप्तिर्मूलोक्ता न सङ्गच्छते, साध्यवत्त्वाव-

व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः ॥ ६८ ॥

व्याप्यो नाम ? व्याप्त्याश्रयः, तत्र व्याप्तिः केत्यत आह व्याप्तिरिति । **वह्निमान् धूमादित्यादौ साध्यो वह्निः, साध्यवान् महानसादिः, तदन्यो जलह्रदादिः, तदवृत्तित्वं धूमस्येति लक्षणसमन्वयः । धूमवान् वह्नेरित्यादौ साध्यवदन्यस्मिंस्तप्तायःपिण्डादौ वह्नेः सत्त्वान्नाऽतिव्याप्तिः ।**

अत्र येन सम्बन्धेन साध्यं, तेन सम्बन्धेन साध्यवान् बोध्यः, अन्यथा समवायसम्बन्धेन वह्निमान् वह्नेरवयवः, तदन्यो महानसादिः, तत्र धूमस्य विद्यमानत्वादव्याप्तिप्रसङ्गात् (१) ।

दिनकरी ।

अव्याप्तिप्रसङ्गादिति । अव्याप्त्यभिधानमिदं येन केन चित्सम्बन्धेन साध्यवत्त्व·

रामरुद्री ।

च्छिन्नभेदस्य संयोगेन साध्यवति पर्वतादावसम्भवादित्यतस्तद्ग्रन्थभावमाह–**येन केन चिदिति** ।

---

(१) अथेदं न सम्भवति । लक्षणे साध्यवदन्यनिरूपितवृत्तित्वाभावस्यैव निवेशेन तादृशयत्किञ्चित्सम्बन्धेन साध्यवदन्यनिरूपितवृत्तित्वाभावस्याऽपि तद्घटकतया तथाविधसंयोगादिना साध्यवदन्यनिरूपितवृत्तित्वाभावस्य हेतौ सत्त्वेनैवाऽव्याप्तिविरहादिति चेन्न । धूमवान् वह्नेरित्यादावतिव्याप्तिः, कालिकेन धूमवदन्यनिरूपितवृत्तित्वाभावस्य हेतौ सत्वात्, अतः साध्यवदन्यनिरूपितवृत्तित्वसामान्याभाववत्त्वं निवेशनीयम्, एवं सति संयोगेन साध्यवदन्ययोगोलकनिरूपितवृत्तित्वाभावस्यैव हेतावसत्त्वान्नाऽतिव्याप्तिः, अव्याप्तिश्च निरुक्तस्थले, तत्र समवायेन साध्यवदन्यनिरूपितवृत्तित्वाभावस्यैव हेतावसत्त्वादिति नाऽसङ्गतिः । न च कोऽसौ साध्यवदन्यनिरूपितवृत्तित्वसामान्याभावः ? यदि साध्यवदन्यनिरूपितवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः, तदा धूमवदन्यवृत्तित्व–जलत्वोभयाभावस्याऽपि तथात्वेन तस्यैव वह्नौ सत्त्वेन धूमवान् वह्नरित्यादावतिव्याप्तिः, यदि च साध्यवदन्यनिरूपितत्व–वृत्तितात्व–धर्मद्वयमात्रावच्छिन्नप्रतियोगिताकाभावः, तथाऽपि धूमवदन्यजलह्रदादिवृत्तित्वाभावमादाय पुनस्तत्रैवाऽतिव्याप्तिः, यदि च साध्यवद्भेदनिष्ठावच्छेदकताभिन्ना सती अधिकरणत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदता, तदनिरूपिका अथ चैतादृशावच्छेदकताद्वयनिरूपिका याऽधिकरणनिष्ठा निरूपितत्वसम्बन्धावच्छिन्नाऽवच्छेदकता, तद्भिन्ना सती वृत्तित्वत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छदकता तदनिरूपिका, अथ चौत–दृशावच्छेदकताद्वयानिरूपिका या वृत्तित्वनिष्ठा प्रतियोगिता, तद्भिन्नरूपकोऽभावः स इत्युच्यते, तथाऽपि ह्रदवृत्तित्वविशिष्टधूमवद्भेदवन्निरूपितवृत्तित्वाभावमादाय प्रागुक्तातिव्याप्तिः स्थिरैव, अतः प्रतियोगित्वसम्बन्धावच्छिन्नसाध्यवन्निष्ठावच्छेदकताभिन्ना सती भेदत्वनिष्ठानवच्छेदकताभिन्ना या अवच्छेदकता तदनिरूपिका अथ चौतादृशावच्छेदकताद्वयनिरूपिका या भेदनिष्ठावच्छेदकता, तद्भिन्ना सती अधिकरणत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छेदकता तदनिरूपिका अथ चौतादृशावच्छेदकताद्वयनिरूपिका या अधिकरणनिष्ठाऽवच्छेदकता, तद्भिन्ना सती वृत्तितात्वनिष्ठावच्छेदकता भिन्ना याऽवच्छेदकता तदनिरूपिका अथ चौतादृशावच्छेदकताद्वयनिरूपिका या वृत्तित्वनिष्ठा प्रतियोगिता तन्निरूपकोऽभाव एव वाच्यः । अत्र ह्रदवृत्तित्वविशिष्टधूमवद्भेदवन्निरूपितवृत्तित्वाभावमादायाऽतिव्याप्तिवारणाय प्रथमानिरूपकान्तप्रवेशः । धूमवद्भेदवज्जलह्रदादिवृत्तित्वाभावमादायाऽतिव्याप्तिवारणाय द्वितीयानिरूपकान्तप्रवेशः । धूमवदन्यवृत्तित्वजलत्वोभयाभावमादायाऽतिव्याप्तिवारणाय तृतीयानिरूपकान्तप्रवेशः । अत्र च तद्वयक्तेः स्वरूपतो भानमते तद्वयक्तिपदेन वह्निमद्भेदमुपादाय तद्वय-

साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान् बोध्यः, तेन यत्किञ्चिद्वह्निमतो महानसादेर्भिन्ने पर्वतादौ धूमसत्त्वेपि न क्षतिः (१) ।

क्तिमन्निरूपितवृत्तित्वाभावस्य वन्हौ सत्त्वेन धूमवान् वन्हेरित्यादावतिव्याप्तिवारणाय प्रथमनिरूपकान्तम् । तत्राऽपि तद्व्यक्तेर्भेदस्वरूपत्वेन भेदत्ववत्तद्व्यक्तिमद्वृत्तित्वाभावमादाय तथैवाऽतिव्याप्तिवारणाय प्रथमनिरूपकताघटकसाध्यनिष्ठावच्छेदकतानिरूपकत्वमुपात्तम् । वह्निमान् जलादित्यादिविरुद्धव्यभिचारिणि तद्व्यक्तिपदेन साध्यतावच्छेदकसंसर्गमादाय प्रतियोगित्वसम्बन्धेन वह्निविशिष्टतद्व्यक्तिमद्वृत्तित्वाभावमादायाऽतिव्याप्तिवारणाय भेदत्वनिष्ठावच्छेदकतानिरूपकत्वस्याऽपि निवेशः । तद्व्यक्तिपदेन जलह्रदादिकमादायतद्व्यक्तिवृत्तित्वं नाऽस्तीत्यभावमादाय धूमवान् वह्नेरित्यादावतिव्याप्तिवारणाय द्वितीयनिरूपकान्तप्रवेशः । तत्राऽपि अधिकरणत्ववत्तद्व्यक्तिवृत्तित्वं नाऽस्तीत्यभावमादाय पुनस्तथैवाऽतिव्याप्तिवारणाय तद्घटकभेदनिष्ठावच्छेदकतानिरूपकत्वप्रवेशः । अधिकरणत्वनिष्ठावच्छेदकतानिरूपकत्वस्य चाऽखण्डाभावघटकतयैव सार्थक्यं बोध्यम् । अनुपादेयमेव वा तत्, प्रयोजनविरहात् । मीनशैवालादिनिष्ठवृत्तित्वमेव तद्व्यक्तिपदेनोपादाय तद्व्यक्तिनाऽस्तीत्यभावस्य हेतौ सत्त्वादतिप्रसङ्गवारणाय तृतीयनिरूपकान्तप्रवेशः । तत्राऽपि वृत्तितात्ववत्तद्व्यक्त्यभावमादायाऽतिप्रसङ्गवारणायाऽधिकरणनिष्ठावच्छेदकतानिरूपकत्वप्रवेशः । तद्व्यक्तिपदेन धूमनिष्ठप्रतियोगित्वमादाय धूमवद्भिन्ननिरूपिततद्व्यक्त्यभावमादाय पुनरतिव्याप्त्यापत्तिः, धूमाभावस्याऽपि धूमवद्भिन्नत्वात्, अतो वृत्तितात्वनिष्ठावच्छेदकतानिरूपकत्वनिवेशनमिति । एवं च धूमवान् वन्हेरित्यादावेवाऽतिव्याप्तिः, कालिकेन धूमवदन्यनिरूपितवृत्तित्वाभावस्य हेतौ सत्त्वात् । न तु वन्हिमान् धूमादित्यत्राऽव्याप्तिः, तत्र संयोगेन साध्यवदन्यनिरूपितवृत्तित्वाभावस्यैव हेतौ सत्त्वेन लक्षणसमन्वयात्, तथा च वह्निमान् धूमादित्यादावव्याप्तिप्रदर्शनपरोऽयं ग्रन्थोऽसङ्गत इति वाच्यम् । एतादृशवृत्तित्वसामान्याभावनिवेशेऽपि तद्व्यक्तिपदेन ह्रदादिकमादाय धूमवदन्यतद्व्यक्तिवृत्तित्वाभावमादाय धूमवान् वन्हेरित्यादावतिव्याप्तेर्दुरुद्धरत्वात् । किन्तु साध्यवदन्यनिरूपितवृत्तित्वाभावकूटत्वत्वमेव तादृशवृत्तित्वसामान्याभावो वाच्यः । एवं सति धूमवद्ह्रदवज्जलह्रदादिवृत्तित्वाभावस्य वह्नौ सत्त्वेऽपि तादृशकूटान्तर्गतस्य धूमवदन्यवृत्तित्वं नाऽस्तीत्याकारकाभावस्यैव तत्राऽसत्त्वान्नाऽतिव्याप्तिः । अव्याप्तिश्च वह्निमान् धूमादित्यादौ, तादृशकूटान्तर्गतस्य समवायेन वह्निमदन्यनिरूपितवृत्तित्वाभावस्यैव हेतावसत्त्वादिति नाऽव्याप्तिप्रदर्शनपरग्रन्थासङ्गतिरिति सङ्क्षेपः ।

(१) अथ किमिदं साध्यवदन्यत्वं नाम ? यदि साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवत्त्वं, तदा साध्यवत्त्वस्य साध्यस्वरूपतया तद्वह्निमदन्यमहानसादिवृत्तित्वस्यैव धूमे सत्त्वादव्याप्तिप्रसङ्गः । यदि च साध्यतावच्छेदकावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदवत्त्वं, तथाऽपि तद्वह्निमद्ह्रदस्य वारणासम्भवः । यदि साध्यतावच्छेदकेतरानवच्छिन्नसाध्यतावच्छेदकावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदवत्त्वं, तदा प्रमेयाश्रयवान् धूमादित्यादौ साध्यतावच्छेदकेतराप्रसिद्ध्याऽव्याप्तिः । यदि च साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्त्यवच्छेदकताकप्रतियोगिताकभेदवत्त्वं तत्, वृत्तित्वञ्च स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन । अत्र महानसीयवह्नेः प्रतियोगितया साध्यतास्थले तद्व्यक्तित्वस्य हेतुतायां प्रतियोगितासम्बन्धेन वह्निमदन्यमहानसीयवन्ह्यभाववृत्तित्वस्य हेतौ सत्त्वादव्याप्तिवारणाय प्रथमपर्याप्तिनिवेशः । महानसीयवह्निमद्ह्रदादिकमादाय वह्निमान् धूमादित्यादावव्याप्तिवारणाय द्वितीयपर्याप्तिनिवेश इत्युच्यते, तदाऽपि अव्याप्यवृत्तिधर्मस्य पर्याप्त्यनभ्युपगमे वह्निमान्

धूमादित्यादौ साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यप्रसिद्ध्याऽव्याप्तिः, किञ्चाऽवच्छेदकतावच्छेदकसाधारणावच्छेदकत्वानभ्युपगमे प्रमेयाश्रयवान् धूमादित्यादावव्याप्तिः । तत्र साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकस्य तादृशप्रमेयगतसमुदायत्वस्यैव वाच्यतया यावत्प्रमेयाश्रयवान्नेत्याकारकतादृशाभावस्याऽलीकत्वेन लक्षणाघटकत्वात्, अन्यभेदानाञ्च निरूक्तरूपवृत्त्यवच्छेदकताकप्रतियोगिताकत्वविरहेणैव लक्षणाघटकत्वात्साध्यवद्भेदस्यैवाऽप्रसिद्धेरिति चेदुच्यते । साध्यतावैशिष्ट्यावच्छेदकतावैशिष्ट्यप्रतियोगिताकभेद एव साध्यवद्भेदः । साध्यतावैशिष्ट्यत्वं च स्वनिरूपितावच्छेदकतावैशिष्ट्यान्यावच्छेदकत्वानिरूपितत्वसम्बन्धेन । अवच्छेदकतावैशिष्ट्यं च स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्वस्ववृत्तित्वचतुष्टयसम्बन्धेन । स्ववृत्तित्वमपि स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन । अवच्छेदकतावैशिष्ट्यं च प्रतियोगितायां स्वनिरूपितत्व-स्वान्यावच्छेदकत्वानिरूपितत्वोभयसम्बन्धेन । तत्र चतुष्टयसम्बन्धमध्ये स्वरूपतोघटत्वविशिष्टस्य विषयितासम्बन्धेन साध्यतायां तज्ज्ञानत्वहेतौ स्वरूपतःपटत्वादिनिष्ठावच्छेदकताकावच्छेदकताकप्रतियोगिताकभेदमादायाऽव्याप्तिवारणाय स्वसामानाधिकरण्यप्रवेशः । तत्रैव घटत्वत्वेन घटत्वविशिष्टवद्भेदमादायाऽव्याप्तिवारणाय स्वानवच्छेदकतानवच्छिन्नत्वप्रवेशः । घटत्वत्वेन घटत्वविशिष्टस्य विषयितया साध्यतायां तज्ज्ञानत्वादित्यादौ स्वरूपतोघटत्वविशिष्टवद्भेदवारणाय स्ववृत्तित्वप्रवेशः । वह्निमान् धूमादित्यादौ विषयितया वह्नित्वविशिष्टवदन्यत्वमादायाऽव्याप्तिवारणाय स्वावच्छेदकसम्बन्धावच्छिन्नत्वप्रवेशः । न च तथाऽपि विषयित्वसमवायान्यतरसम्बन्धेन रूपत्वविशिष्टस्य समवायेन साध्यतायां आत्मघटान्यतरत्वादिहेतौ विषयितया रूपत्वविशिष्टवद्भेदं घटे, समवायेन रूपत्वविशिष्टवद्भेदं चाऽऽत्मनि समादायाऽव्याप्तिः । यदि च स्वावच्छेदकसंसर्गतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन स्वावच्छेदकसंसर्गतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपवृत्तित्वमेव स्वावच्छेदकसम्बन्धावच्छिन्नत्वपदार्थः, वह्निमान् धूमादित्यादौ तद्वन्ह्यनुयोगिकसमवायेन वह्नित्वविशिष्टवद्भेदवारणाय संसर्गकोटावितरवारकपर्याप्तिनिवेशः प्रथमः, द्वितीयस्त्वेतदव्याप्तिवारणायैवेति विभाव्यते, तदाऽपि अव्याप्यवृत्तिधर्मस्य पर्याप्त्यनभ्युपगमे शुद्धसमवायादेः साध्यतावच्छेदकताघटकतास्थले तादृशावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यप्रसिद्ध्याऽव्याप्त्यापत्तेरिति वाच्यम् । स्वावच्छेदकसम्बन्धावच्छिन्नत्वपदेन स्वानवच्छेदकसंसर्गतावच्छेदकावच्छिन्नावच्छेदकत्वानिरूपकत्व-स्ववृत्तित्वोभयस्यैव विवक्षितत्वात् । स्ववृत्तित्वमपि स्वानवच्छेदकसंसर्गतावच्छेदकावच्छिन्नावच्छेदकत्वानिरूपकत्व-स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेनेत्यादिकं बहुतरमूहनीयम् । एवं अवच्छेदकत्ववैशिष्ट्यघटकसंसर्गद्वये वह्निमत्पर्वतभेदमादाय वह्निमान् धूमादित्यादावव्याप्तिवारणाय स्वान्यावच्छेदकत्वानिरूपकत्वमुपात्तम् । तद्व्यक्तेःस्वरूपतोभानमते तद्व्यक्तिपदेन घटादिभेदमादायाऽव्याप्तिवारणाय स्वनिरूपितत्वं निवेशितमिति विभावनीयम् । अथैवमपि समवायेन वह्निमद्भेदवारणासम्भव इति चेन्न । साध्यताविशिष्टेत्यादिनिरुक्तानुगमघटकीभूतसाध्यतावैशिष्ट्यस्य तादृशयथोक्तसम्बन्धेन स्वावच्छेदकसम्बन्धावच्छिन्नत्वसम्बन्धेन च विवक्षणीयत्वात् । स्वावच्छेदकसम्बन्धावच्छिन्नत्वमपि पूर्ववदेव बोध्यम् । नाऽतः समवायेन वह्निमद्भेदमादाय वह्निमान् धूमादित्यादौ विषयितासमवायान्यतरसम्बन्धेन रूपस्य साध्यतायां समवायेन रूपवद्भेदं चाऽऽदायाऽव्याप्तिः । पर्याप्तिनिवेशस्तु न सम्भवति, अव्याप्यवृत्तिधर्मस्य पर्याप्त्यनभ्युपगमे वह्निमान् धूमादित्यादौ निरुक्तरीत्याऽव्याप्तिप्रसङ्गादिति विभावनीयम् ।

येन सम्बन्धेन हेतुता तेनैव सम्बन्धेन साध्यवदन्यावृत्तित्वं बोध्यं,तेन साध्यवदन्यस्मिन् धूमावयवे धूमस्य समवायसम्बन्धेन सत्त्वेऽपि न क्षतिः।

साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावः, तेन धूमवान् वह्नेरित्यत्र साध्यवदन्यजलह्रदादिवृत्तित्वाभावेऽपि नाऽतिव्याप्तिः।

अत्र यद्यपि द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ विशिष्टसत्तायाः शुद्धसत्तायाश्चैक्यात् साध्यवदन्यस्मिन् गुणादाववृत्तित्वं नाऽस्ति, तथाऽपि

दिनकरी।

विवक्षणाभिप्रायेण। यदि च **सम्बन्धसामान्येन** साध्यवत्त्वं विवक्ष्यते, तदा धूमवान् वह्नेरित्यादावतिव्याप्तिर्बोध्या।

अवृत्तित्वं नाऽस्तीति। विशिष्टाधेयतायाः अनतिरिक्तत्वादिति भावः। **फलितमाह**।

रामरुद्री।

यत्किञ्चित्सम्बन्धेनेति तदर्थः। तथा च समवायेन वन्हिमदन्यत्वस्य पर्वतादौ सत्त्वान्नाऽव्याप्त्यसङ्गतिरिति भावः। यद्यपि विषयतादिक्कृतविशेषणतादियत्किञ्चित्सम्बन्धेन साध्यवदन्यस्मिन् हेतोर्वृत्त्या सर्वत्राऽसम्भव एवेत्यव्याप्त्यभिधान मूलकृतोऽसङ्गतं, तथाऽपि अय(१) (२)सविषयकान्यत्वविशिष्टतद्रूपवान्(३) तद्घटभिन्नान्यत्वविशिष्टतद्रूपवान्वा तद्रसादित्यादौ लक्षणसम्भवादव्याप्त्यभिधानमिति बोध्यम्। ननु सम्बन्धसामान्येन साध्यवत्त्वं विवक्षणीयमतो नाऽव्याप्तिरित्यत आह—**यदि चेति**। **अतिव्याप्तिरिति**। धूमशून्ययोगोलकादेरपि सम्बन्धसामान्यान्तर्गतकालिकादिना धूमवत्त्वेन धूमसमानकालीनपदार्थस्यैव धूमवदन्यत्वात् वह्न्यधिकरणस्य धूमासमानकालीनस्याऽप्रसिद्धेरिति भावः। यदि च धूमासमानकालीनः प्रलयोत्पन्नपरमाणुक्रियादिरेव, तत्र हेतुतावच्छेदकसयोगेन वृत्त्यप्रसिद्धयैव नाऽतिव्याप्तिरिति विभाव्यते, तदा तदभिप्रायेणैवाऽऽदिपदेन वह्निमत्त्वप्रकारकप्रमाविशेष्यत्वस्य स्वरूपसम्बन्धेन हेतोरुपसङ्ग्रह इति मन्तव्यम्।

मूले-**साध्यवत्त्वावच्छिन्नेति**। साध्यतावच्छेदकावच्छिन्नपर्याप्तप्रतियोगितावच्छेदकताकभेदवानित्यर्थः। यथाश्रुते साध्यस्यैव साध्यवत्त्वरूपतया तत्तद्व्यक्तिमद्भेदस्य महानसीयवह्निमद्भेदस्य च वारणासम्भवात्। इदं च गुरुधर्मस्याऽपि प्रतियोगितावच्छेदकत्वमताभिप्रायेण, तेन द्रव्यत्वादिसाध्यकस्थले द्रव्यत्वत्वरूपसाध्यतावच्छेदकविशिष्टपर्याप्तावच्छेदकताया गुरुधर्मस्याऽनवच्छेदकतामतेऽप्रसिद्धावपि न क्षतिरिति ध्येयम्।

एवं साध्यवदन्यवृत्तित्वत्वावच्छिन्नेति मूलस्यापि तादृशवृत्तित्वत्वपर्याप्तावच्छेदकताकेत्यर्थो बोध्यः। अन्यथा वह्निमदन्यह्रदवृत्तित्वाभावस्य वारणानुपपत्तेः, एवं साध्यवदन्यवृत्तित्वं साध्यवदन्यानुयोगिकत्वविशिष्टहेतुतावच्छेदकसम्बन्धप्रतियोगित्वमेव, न तु साध्यवदन्यनिरूपिततत्सम्बन्धावच्छिन्नाधेयत्वम्, वृत्यनियामकसम्बन्धेन हेतुतायां तदप्रसिद्धेः, तादृशाधेयतानवच्छेदकं हेतुतावच्छेदकमित्यत्राऽपि तादृशप्रतियोगितानवच्छेदकमित्येवार्थ इति ध्येयम्।

---

(१) 'इदम्' इत्यपि पाठः।

(२) 'घटभिन्नसंयोगसंयुक्तसमवेतसविषयकान्यत्वविशिष्टतद्रूपवान्' इत्येव पाठः। स च प्रामादिक एव।

(३) तथा च सविषयकान्यत्वविशिष्टतद्रूपाधिकरणताया ज्ञानेऽसम्भव इति भावः। विशिष्टाधिकरणताया अतिरिक्तत्वात्। महाकालाद्यनुयोगिककालिकसम्बन्धेन महाकालस्यैव तत्र साध्यवत्त्वेन तद्भिन्ने तद्वृत्तेर्हेतोर्वृत्तेरत्राऽपि लक्षणं नैव घटत इत्यतः स्थलान्तरमाह। तद्घटभिन्नान्यत्वेति इत्यवधेयम्।

अथ वा हेतुमान्निष्ठविरहाप्रतियोगिना ।
साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते ॥ ६९ ॥

हेतुतावच्छेदकरूपेणाऽवृत्तित्वं वाच्यं, हेतुतावच्छेदकं वृत्तितानवच्छेदकमिति फलितोऽर्थः ॥ ६८ ॥ इति व्याप्तिनिरूपणे पूर्वपक्षग्रन्थः ॥

ननु ,केवलान्वयिनि ज्ञेयत्वादौ साध्ये साध्यवदन्यस्याऽप्रसिद्धत्वाद-व्याप्तिः, किञ्च सत्तावान् जातेरित्यादौ साध्यवदन्यस्मिन् सामान्यादौ हेतुतावच्छेदकसम्बन्धेन समवायेन वृत्तेरप्रसिद्धत्वादत आह-अथ वेति । **हेतुमति निष्ठा-वृत्तिर्यस्य स तथा विरहः-अभावः, तथा च हेत्वधिकरणवृत्तिर्योऽभावस्तदप्रतियोगिना साध्येन सह हेतोः सामानाधिकरण्यं व्याप्तिरुच्यते ।**

दिनकरी ।

तोऽर्थ इति । तथा च तन्निष्ठाधिकरणतानिरूपकतावच्छेदकस्यैव तन्निरूपिताधेयतावच्छेदकत्वनियमेन विशिष्टसत्तात्वस्य गुणाधेयतानवच्छेदकत्वान्नाऽव्याप्तिरिति भावः ॥ ६८ ॥

इति व्याप्तिनिरूपणे पूर्वपक्षग्रन्थः ॥

'अथ वा-' इत्यादिलक्षणमवतारयितुमाद्यलक्षणे दोषमाह-**नन्विति** । ननु केवलान्वयित्वज्ञानकाले पक्षतात्मक (१)(साध्य) संशयाभावान्नैवाऽनुमितिः, तच्छून्यकाले तु भ्रमात्मकव्याप्तिज्ञानादनुमितिर्भवत्येवेत्यत आह—**किञ्चेति** । 'इत्यादौ' इत्यादिना संयोगेन हेतुतायां गुणवान् घटादित्यादेः संग्रहः । ननु स्वाधिकरणावृत्तिसाध्यवदन्योन्याभावकत्वं लक्षणार्थः, तथा च नेयमव्याप्तिरिति चेन्न । वह्निमान् धूमादित्यादौ धूमाधिकरणे वन्हिमदन्योन्याभावस्य कालिकसम्बन्धेन वृत्तेरव्याप्त्यापत्तेः साध्यवत्ताग्रहविरोधितानियामकसम्बन्धेनाऽवृत्तित्वस्याऽवश्यं विवक्षणीयतया सत्ताभाववान् जात्यभावादित्यादावव्याप्तेः, जात्यभावाधिकरणे साध्यवत्ताग्रहविरोधितानियामकसम्बन्धेन समवायेन वृत्तेरप्रसिद्धेः । न च सत्तावान् जातेरित्यादौ स्वाधिकरणेत्यादिव्याप्तिज्ञानं कारणं, सत्ताभाववान् जात्यभावादित्यादौ तु साध्यवदन्येत्यादिव्याप्तिज्ञानं कारणमिति वाच्यम् । तथापि संयोगसम्बन्धावच्छिन्नघटाभावे साध्ये विषयितया हेतौ घटे लक्षणद्वयस्याऽप्यव्याप्तिः, तत्र विषयितया हेत्वधिकरणज्ञाने साध्यवत्ताग्रहविरोधितानियामकसयोगेन, घटाधिकरणे हेतुतावच्छेदकविषयितया वृत्तेरप्रसिद्धेः।

रामरुद्री ।

विशिष्टाधेयताया इति । यद्यपि विशिष्टस्याऽनतिरिक्तत्वादित्येव वक्तव्यम् । तच्च मूले उक्तमेव, तथाऽपि विशिष्टस्याऽनतिरिक्तत्वेऽपि विशिष्टनिष्ठाधेयताया अतिरिक्तत्वेन शुद्धसत्तापर्याप्ताधेयताया गुणादिनिरूपितत्वेऽपि विशिष्टपर्याप्ताधेयताया न गुणादिनिरूपितत्वमित्याशङ्कानिरासायैव तदुक्तमिति बोध्यम् ।

॥ इति व्याप्तिनिरूपणे पूर्वपक्षग्रन्थः ॥

केवलान्वयित्वेति । भेदप्रतियोगितानवच्छेदकत्वरूपकेवलान्वयित्वनिश्चयकाल इत्यर्थः । **पक्षताघटकेत्यपपाठः** । साध्यसन्देहस्यैव पक्षतात्वात्, सिद्धयभावरूपपक्षतायाः सन्देहाघटित्वाच्च, किन्तु **पक्षतात्मकेत्येव** पाठः, तथा च वाच्यो न वेति संशयाभावादेव नाऽनुमितिरिति भावः । वस्तुतः सिद्धान्ते सिषाधयिषाविरहविशिष्टसिद्धयभावस्यैव पक्षतात्वोपगमात् मीमांसकमते केवलान्वयिसाध्यकानुमित्यनङ्गीकारादिद्वितीयदूषणाभिधानमिति युक्तमुत्पश्यामः । **न च सत्तावानित्यादि** । साध्यसाधन-

---

(१) 'पक्षताघटक'इत्यपि पाठः ।

अत्र यद्यपि वह्निमान् धूमादित्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वं (१) तत्तद्वह्न्याद्येरस्तीत्यव्याप्तिः । न च समानाधिकरणवह्निधूमयोरेव व्याप्तिरिति वाच्यम् । तत्तद्वह्न्याद्येरप्युभयाभावसत्त्वात्, एकसत्त्वेऽपि द्वयं नाऽस्तीति प्रतीतेः । गुणवान् द्रव्यत्वादित्यादावव्याप्तिश्च ।

दिनकरी ।

नन्वतिरिक्तोभयाभावे मानाभाव इत्यत आह-**एक सत्त्वेऽपीति** । इदमुपलक्षणं, विशिष्टाभावमादायाऽव्याप्तिरित्यपि बोध्यम् । ननु वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वेनाऽभावविशेषणान्नाऽव्याप्तिरत आह—**गुणवानिति** । अत्र हेतोरेकव्यक्तिकतया समानाधिकरणयोरेव व्याप्तिरित्युक्तावपि न निस्तार इति भावः । एतद्रूपवानेतद्रूपादित्यादौ लक्षणसत्त्वादसम्भवाभावादाह—**अव्याप्तिश्चेति** ।

रामरुद्री ।

भेदेन व्याप्तिभेदस्याऽऽवश्यकतया शब्दैक्यस्याऽनुपादेयत्वादिति भावः ।

अतिरिक्तोभयाभाव इति । प्रत्येकाभावातिरिक्तोभयाभाव इत्यर्थः । तथा च वह्निसत्त्वेऽपि वह्निघटोभयन्नास्तीति प्रतीत्या नाभावद्वयं तादृशप्रतीति विषयः । अपि त्वतिरिक्ताभाव एवेति भवत्येवाव्याप्तिरिति भावः । **विशिष्टाभावमिति** । महानसीयत्वविशिष्टवह्न्याभावमित्यर्थः । ननु वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकाभावनिवेशेऽपि वह्निमान् धूमादित्यत्रैव तत्तद्व्यक्तिभेदमादायाऽव्याप्तिसम्भवे स्थलान्तरेऽव्याप्तिप्रदर्शनं किमर्थमित्याशङ्क्य निरस्यन्नाह-**अत्रेति** । अथ प्रतियोगितानवच्छेदकं साध्यतावच्छेदकमित्युक्तावपि नाऽव्याप्तिपरिहारः, हेत्वधिकरणपर्वतादौ महानसीयवन्ह्यभावादिसत्त्वेन तत्प्रतियोगितायां महानसीयत्वादिसहितस्य वह्नित्वादेरवच्छेदकत्वात् । न चानऽवच्छेदकत्वमवच्छेदकतापर्याप्त्यनधिकरणत्वम्, अवच्छेदकतापर्याप्तिश्चोभयस्मिन्, न तु प्रत्येकमतो नाऽव्याप्तिरिति वाच्यम् । प्रत्येकावृत्तेरुभयवृत्तित्वासम्भवेनोभयोरवच्छेदकतापर्याप्त्यधिकरणत्वे प्रत्येकस्य तथात्वस्याऽऽवश्यकत्वात् । न च प्रत्येकमवच्छेदकतासत्त्वेऽप्यवच्छेदकतायाः व्यासज्यवृत्तित्वेन प्रत्येकमुभयभेदवत्पर्याप्तिसम्बन्धेनाऽवच्छेदकत्वावच्छिन्नभेदो वह्नित्वे अक्षत एवेति वाच्यम् । तथा सति 'महानसीयवह्निमान् धूमादित्यादौ महानसीयवन्ह्यभावप्रतियोगितावच्छेदकत्वावच्छिन्नभेदस्य प्रत्येकं महानसीयत्व-वह्नि-

(१) अथेदं विचारणीयम् । तत्तद्वन्ह्यभावस्य लक्षणघटकत्वे तादृशाभावप्रतियोगितावच्छेदकतायास्तद्व्यक्तित्व-वह्नित्वयोर्विद्यमानत्वेन वह्नित्वस्याऽपि तादृशाभावप्रतियोगितावच्छेदकतयाऽग्रे विवक्षणीयेन साध्यतावच्छेदके तादृशाभावप्रतियोगितानवच्छेदकत्वेनाऽप्युक्ताव्याप्तितादवस्थ्यमेवेति । न च साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूपे हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितानवच्छेदकत्वस्यैव निवेशान्नैष दोष इति वाच्यम् । एवं सति धूमवान् वह्नेरित्यादावतिव्याप्त्यापत्तेः, साध्यतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदके धूमत्वगतैकत्वे तादृशहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकीभूत-घटत्व-पटत्व-धूमत्वादिगतसमुदायत्वभिन्नत्वस्य सत्त्वादिति चेन्मैवम् । हेतुसमानाधिकरणाभावविशिष्टान्यत्वस्यैव साध्यतावच्छेदकगतरूपे निवेशनीयत्वात् । वैशिष्ट्यञ्च स्वनिरूपप्रतियोगितावच्छेदकतात्वावच्छिन्ननप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेनेति ।

अथाऽत्र सर्वत्रैव घटघटान्यप्रमेयोभयाभावमादायाऽसम्भवसम्भवेऽव्याप्तिदानमनुचितमिति चेन्न । महानसीयवह्नित्वविशिष्टजातिमान्नाऽस्तीत्यभावमादाय वह्निमान् धूमादित्यादावव्याप्तिवारणाय प्रतियोगितावच्छेदकतायां निरवच्छिन्नत्वस्योपादेयतया तादृशाभावसङ्ग्रहसम्भवात् ।

तथाऽपि प्रतियोगितानवच्छेदकं यत् साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरिति वाच्यम् ।

ननु रूपत्वव्याप्यजातिमत्त्वान् (१) पृथिवीत्वादित्यादौ साध्यतावच्छेदिका रूपत्वव्याप्यजातयः, तासां च शुक्लत्वादिस्वरूपाणां नीलघटादिवृत्त्यभावप्रतियोगितावच्छेदकत्वमस्तीत्यव्याप्तिरिति चेन्न ।

तत्र परम्परया रूपत्वव्याप्यजातित्वस्यैव साध्यतावच्छेदकत्वात्, न

दिनकरी ।

इति वाच्यमिति । गुणत्वस्य द्रव्यत्वसमानाधिकरणा भावप्रतियोगितानवच्छेकत्वान्नाऽव्याप्तिरिति भावः ।

परम्परया-स्वाश्रयसमवायेन । तथा चोक्तपरम्परया यदवच्छेदकं तदन्यत्वस्य जा-

रामरुद्री ।

त्वयोः सत्त्वेनाऽतिव्याप्तिप्रसङ्गादिति चेन्मैवम् । हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतापर्याप्त्यनवच्छेदकं साध्यतावच्छेदकतापर्याप्त्यवच्छेदकमित्यस्य विवक्षितत्वात्, वन्हिमान्धूमादित्यादौ वह्नित्वादेर्निरवच्छिन्नैव यद्यपि साध्यतावच्छेदकता, तथाऽपि साध्यतावच्छेदकतापर्याप्त्यवच्छेदकं वह्नित्वनिष्ठं तद्व्यक्तित्वं, तच्च न महानसीयवन्ह्यभावप्रतियोगितावच्छेदकतापर्याप्त्यवच्छेदकं, व्यासज्यवृत्तिधर्मपर्याप्तेरेकमात्रवृत्तिधर्मस्याऽनवच्छेदकत्वात्, अन्यथाऽऽकाशादिति प्रयोगापत्तेः । न चैवं घटपटादित्यादौ घटमात्रवृत्तिधर्मस्य कथं घटपटगतद्वित्वपर्याप्त्यवच्छेदकत्वेन भानमिति वाच्यम् । एकमात्रोद्देश्यतावच्छेदकताकस्थल एव द्वित्वपर्याप्त्यनवच्छेकत्वस्योद्देश्यतावच्छेदके भानोपगमात्, अत्र तु महानसीयत्ववह्नित्वोभयत्वमेवेति नाऽव्याप्तिः, न वा महानसीयवन्हिसाध्यकव्यभिचारिण्यतिव्याप्तिरिति परमरहस्यमनुसन्धेयम् । परे तु हेतुसमानाधिकरणाभावप्रतियोगितायां साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वं विशेषणमुपादायोक्ताव्याप्तिवारणीया, महानसीयवन्ह्यभावादिप्रतियोगिताया वह्नित्वतद्भिन्नमहानसीयत्वाभ्यामवच्छिन्नतया लक्षणघटकतया घटाद्यभावीयप्रतियोगिताया एव लक्षणघटकत्वात्, व्यभिचारिणि साध्याभावस्य लक्षणघटकत्वोपपत्तये तदितरेति । सद्धेतौ तथाविधप्रतियोगिताप्रसिद्धये च साध्यतावच्छेदकेति । न चैवमपि महानसीयवह्निवृत्तित्वविशिष्टवह्नित्ववान्नाऽस्तीति प्रतीतिविषयाभावमादाय तद्वारणमशक्यमेव, यदि च प्रतियोगितावच्छेदकतायां निरवच्छिन्नत्वविशेषणमुपादीयते,, तदा तद्वह्नित्वेन वह्नित्वस्य साध्यतावच्छेदकतायां व्यभिचारिण्यतिव्याप्तिरिति वाच्यम् । साध्यतावच्छेकतादिभेदेन व्याप्तेर्भिन्नतया निरवच्छिन्नसाध्यतावच्छेदककस्थलीयलक्षण एव प्रतियोगितावच्छेदकतायां निरवच्छिन्नत्वविशेषणस्योपादेयत्वात् । न चैवमपि वह्नित्ववत्वावच्छिन्नसाध्यतावच्छेकताकस्थलीयसद्धेतौ तद्वह्निवृत्तित्वविशिष्टवह्नित्ववान्नाऽस्तीतिप्रतीतिविषयभावमादायाऽव्याप्तिरिति वाच्यम् । सावच्छिन्नसाध्यतावच्छेदककस्थलीयलक्षणे प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकतदितरोभयानवच्छिन्नत्वविशेषणस्याऽप्युपादेयत्वात् । अथैवमपि यत्र प्रमेयत्वैव साध्यतावच्छेदकता, तादृशसद्धेतुस्थले प्रमेयरूपसाध्यतावच्छेदकेतराप्रसिद्धयोक्तविशेषणोपादानासम्भवः, तादृशस्थले तद्विशेषणानुपादाने च प्रमेयवद्घटाद्यभावमादायाऽव्याप्तिर्दुर्वारेति चेन्न । दण्ड्यादिसाध्यके परम्परया दण्डत्वस्येवाऽत्राऽपि परम्परया प्रमेयत्वस्यैव साध्यतावच्छेदकत्वोपगमादिति वदन्ति ।

ननु परम्परया रूपत्वन्यूनवृत्तिजातित्वस्य साध्यतावच्छेदकत्वेऽपि साक्षात्सम्बन्धेन तादृशजातित्वविशिष्टस्य पृथिव्यामभावसत्त्वेन साध्यतावच्छेदकं न तादृशाभावप्रतियोगितानवच्छेदकमिति कथमव्याप्तिनिरास इत्यत आह—**तथा चेति** । रूपवान् पृथिवीत्वादित्यादौ विषयितया रूपत्ववतो

---

(१) जातिमत्त्वान् पृथिवीत्वादित्युक्तौ सत्त्वगुणत्वादिरूपजातीनामेव प्रतियोगितानवच्छेदकत्वाद्रूपत्वव्याप्येत्युपात्तम् । तद्व्यक्तित्वादिहेतुकस्थले तद्व्यक्तिवृत्तिनीलरूपादिगतनीलत्वादेरेवाऽनवच्छेदकत्वसम्भवात्पृथिवीत्वपर्यन्तानुधावनमिति मन्तव्यम् ।

हि तादृशधर्मावच्छिन्नाभावः क्वाऽपि पृथिव्यामस्ति, रूपत्वव्याप्यजातिमान्नास्तीति बुद्ध्यापत्तेः ।

साध्यादिभेदेन व्याप्तेर्भेदात् तादृशस्थले साध्यतावच्छेदकतावच्छेदकं प्रतियोगितावच्छेदकतानवच्छेदकमित्येव लक्षणघटकमित्यपि वदन्ति ।

दिनकरी ।

तित्वे सत्त्वान्नाऽव्याप्तिरिति भावः । तादृशधर्मावच्छिन्नाभावः–उक्तपरम्परया रूपत्वव्याप्यजातित्वावच्छिन्नस्य समवायेनाऽभावः । 'नाऽस्ति'इत्यत्र पृथिव्यामित्यनुषज्यते ।

मतान्तरमाह-**साध्यादीति** । 'आदि'ना साधनादि (१)परिग्रहः । **व्याप्तेर्भेदादिति** । व्याप्तिज्ञानस्य कारणतोभेदादित्यर्थः । पूर्वोक्तरीत्या निर्वाहे तत्र साध्यतावच्छेदकतावच्छेदकधर्मिकप्रतियोगितावच्छेदकतानवच्छेदकत्वप्रकारकज्ञानस्य हेतुत्वं नोचितं, कारणतावच्छेदकगौरवात् । न च पूर्वोक्तरीत्या जातिमानित्येवाऽनुमितिः स्यात् , न तु जातिमत्त्वानित्याकारिकेति वाच्यम् । पृथिवीत्वादिहेतुके जाति मानित्येवाऽनुमित्याकारः(२), जातिमत्त्वानित्याकारस्तु तद्व्यक्तित्वहेतुक इत्यदोषादित्यपि 'वदन्ति'इत्यनेनाऽस्वरसः सूचितः ।

रामरुद्री ।

नादेः समवायेनाऽभावस्य पृथिव्यामपि सत्त्वेनाऽव्याप्त्यापत्त्या प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकसम्बन्धावच्छिन्नत्वस्य निवेशनीयतया तादृशपरम्परासम्बन्धावच्छिन्नावच्छेदकतानिरूहस्य साध्यतावच्छेदकेऽन्तर्गतत्वान्नाऽव्याप्तिरिति भावः ।

ननु साध्यसाधनभेदेन व्याप्तेर्भेदोपगमो नोचितः, उक्तरीत्या व्याप्तेरेकशब्दाभिलप्यमानत्वसम्भवादित्यत आह—**व्याप्तिज्ञानस्येति** । अयं भावः, कदा चिद्रूपत्वन्यूनवृत्तिजातिमानित्याकारिका, कदा चिच्च तादृशजातिमत्त्वानित्याकारिकाऽनुमितिरिति सर्वानुभवसिद्धं, तच्च कारणवैलक्षण्यं विना न सम्भवीति यदा तादृशजातित्वस्य विधेयतावच्छेदकतया भानं, तदा तादृशानुमितौ परम्परयाऽनवच्छेदकत्वस्य साध्यतावच्छेदकधर्मिकं ज्ञान कारणं, यदा तु तादृशजातित्वस्य विधेयतावच्छेदकतावच्छेदकत्वेन भानं, तदा तादृशानुमितौ साध्यतावच्छेदकतावच्छेदकधर्मिकं प्रतियोगितावच्छेदकतानवच्छेदकत्वज्ञानं कारणमिति व्याप्तिज्ञानकारणताभेद एव पर्यवसानं, एवञ्च मूले **'साध्यसाधनभेदेन'**इत्यस्य साध्यतावच्छेदकसाधनतावच्छेदकभेदेनेत्येवार्थ इति ध्येयम् । **जातिमानित्येवेति** । वह्निमानित्याद्यनुमितौ यद्धर्मिकमनवच्छेदकत्वज्ञानं, तस्यैव विधेयतावच्छेदकतया भाननियमादिति भावः । **इष्टापत्त्या समाधत्ते—पृथिवीत्वादीति** । न त्वेवं रूपत्वन्यूनवृत्तिजातिमत्त्वानित्याकारानुमितेः तन्मतेऽपलापापत्तिरित्यत आह—**जातिमत्त्वानिति । तत्तद्व्यक्तित्वेनेति** । नीलघटादिनिष्ठतद्व्यक्तित्वादेर्हेतुत्वे तत्तद्व्यक्तिनिष्ठाभावप्रतियोगितावच्छेदकत्वस्य नीलत्वादिजातौ बाधितत्वादिति भावः ।

ननु मूले द्रव्यं विशिष्टसत्त्वादित्यत्राऽव्याप्त्यभिधानमसङ्गतं, समवायस्य हेतुतावच्छेदकसम्बन्धत्वे तेन सम्बन्धेन सत्ताऽभिन्नविशिष्टसत्तायाः साध्याभाववति गुणे सत्त्वेन व्यभिचारितयाऽलक्ष्यत्वात् । यदि च विशिष्टसत्तात्वावच्छिन्नाधिकरणतैव हेतुतावच्छेदकसम्बन्धः, तेन च गुणावृत्तित्व तस्या इति लक्ष्यत्वम् । न चैवं तेन सम्बन्धेन सत्तामात्रस्यैव हेतुताऽस्तु, तेन सम्बन्धेन विशिष्टसत्त्वस्य हेतुत्वे व्यर्थविशेषणतापत्तिरिति वाच्यम् । शुद्धसत्ताप्रतियोगित्वस्य विशिष्टाधिकरणतायामनङ्गीकारादित्युच्यते, तदा

---

(१) **अत्राऽव्यादिना साध्यतावच्छेदक-साधनतावच्छेदकसम्बन्धयोरपि परिग्रहो बोध्यः ।**

(२) साध्यतावच्छेदकधर्मिकहेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वज्ञानादित्यर्थः । तेन साध्यवदन्यावृत्तित्वादिरूपव्याप्तिज्ञानात्पृथिवीत्वादिहेतुकतादृशानुमित्यभ्युपगमेऽपि न क्षतिरिति मन्तव्यम् ।

हेत्वधिकरणं हेतुतावच्छेदकविशिष्टाधिकरणं वाच्यम्। तेन द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ शुद्धसत्ताधिकरणगुणादिनिष्ठाभावप्रतियोगित्वेऽपि द्रव्यत्वस्य नाऽव्याप्तिः(१)।

हेतुतावच्छेदकसम्बन्धेन हेत्वधिकरणं बोध्यं, तेन समवायेन धूमाधि-

दिनकरी।

शुद्धसत्ताधिकरणेति। न च विशिष्टनिरूपिताधिकरणतायाः हेतुतावच्छेदकसम्बन्धत्वे कथं तेन सम्बन्धेन सत्ताधिकरणं गुणः? समवायस्य तथात्वे तु द्रव्यत्वे साध्ये विरामरुद्री।

हेतुतावच्छेदकसम्बन्धनिवेशेनैवाऽव्याप्तिपरिहाराद्धेतुतावच्छेदकधर्मनिवेशो विफल इत्याशङ्क्य समवाय एव हेतुताया अवच्छेदकसम्बन्धः, तेन सम्बन्धेन साध्याभाववद्वृत्तित्वं न अलक्ष्यताप्रयोजको व्यभिचारः, किन्तु साध्याभाववन्निरूपिततत्सम्बन्धावच्छिन्नाधेयतावच्छेदकहेतुतावच्छेदकवत्त्वमेव तथा, तथा च न व्यभिचारित्वं विशिष्टसत्त्वस्येति समाधत्ते-न चेत्यादिना। नच हेतुतावच्छेदकविशिष्टेति। हेतुतावच्छे-

---

(१) अथैवमपि हेतुतावच्छेदकीभूतविशिष्टसत्तात्वविशिष्टसत्ताधिकरणत्वस्य गुणादौ सत्त्वाद्द्रव्यं विशिष्टसत्त्वादित्यत्राऽव्याप्तिः स्थिरैव। न च हेतुतावच्छेदकविशिष्टाधिकरणमित्यनेन हेतुतावच्छेदकावच्छिन्नाधेयतानिरूपिताधिकरणत्ववतो विवक्षिततया नैष दोष इति वाच्यम्। एवमपि तत्रैव हेतुतावच्छेदकीभूतगुणकर्मान्यत्ववैशिष्ट्य-सत्तात्वोभयघटक-सत्तात्व-मात्रमादायाऽव्याप्तितादवस्थ्यात्। न च हेतुतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकरूप-वृत्तिनिरूपकताकाधिकरणतावदेव तदर्थः। वृत्तित्वञ्च स्वावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन। तत्र द्रव्यं विशिष्टसत्त्वादित्यत्राऽव्याप्तिवारणाय प्रथमपर्याप्तिनिवेशः। वन्ह्यभावत्वस्य साध्यतायां प्रतियोगितासम्बन्धेन वह्निहेतुकस्थले प्रतियोगितासम्बन्धेन महानसीयत्व-वह्नित्व-धर्मद्वयावच्छिन्ननिरूपकताकाधिकरणतावन्महानसीयवन्ह्यभावमादायाऽव्याप्तिवारणाय द्वितीयपर्याप्तिनिवेश इति वाच्यम्। अव्याप्यवृत्तिधर्मस्य पर्याप्त्यनभ्युपगमे वह्निमान् धूमादित्यादौ तादृशपर्याप्त्यप्रसिद्ध्याऽव्याप्तेः। न च हेतुताविशिष्टत्वमेव तादृशाधेयतायां देयम्। वैशिष्ट्यञ्च स्वानवच्छेदकानवच्छिन्नत्व-स्ववृत्तित्वोभयसम्बन्धेन स्ववृत्तित्वमपि स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन। तत्र वन्ह्यभावत्वसाध्यक-प्रतियोगितया वह्नि-हेतुकस्थले प्रागुक्तदिशाऽव्याप्तिवारणाय प्रथमसम्बन्धप्रवेशः। द्वितीयसम्बन्धप्रवेशस्तु द्रव्यं विशिष्टसत्त्वादित्यत्रैवाऽव्याप्तिवारणायेति वाच्यम्। एवमपि सामान्यधर्मावच्छिन्नाधिकरणतायां मानाभावेन वह्निमान् धूमादित्यत्र तादृशाधेयत्वाप्रसिद्ध्याऽव्याप्त्यापत्तेः। तत्र तत्तद्धूमत्वावच्छिन्नाधेयतायां एव ग्राह्यत्वेन तत्र निरुक्तोभयसम्बन्धेन हेतुतावैशिष्ट्यस्याऽसत्त्वात्। न च सामान्यधर्मावच्छिन्नाधिकरणत्वानभ्युपगमे धूमवानिति प्रतीतेः को विषय इति वाच्यम्। तद्धूमवानितिप्रतीतिसिद्धायास्तत्त्व-धूमत्व-धर्मद्वयावच्छिन्नाधिकरणतायां एव धूमवानिति प्रतीतिविषयत्वोपपत्तेः। न चैवं तद्धूमवानितिप्रतीतेर्धूमवानितिप्रतीतेश्चाऽविशेषापत्तिरिति वाच्यम्। तद्धूमवानितिप्रतीत्या आधेयतायां तत्त्वावच्छिन्नत्व-धूमत्वावच्छिन्नत्वयोरवगाहनेन धूमवानितिप्रतीत्या च धूमत्वावच्छिन्नत्वमात्रस्याऽवगाहनेन तयोर्भेदसम्भवादिति चेन्न। यन्निष्ठाभावप्रतियोगितानवच्छेदकं हेतुतावच्छेदकं तस्यैव हेत्वधिकरणपदार्थत्वात्। न चैवमपि पर्वतादावपि नितम्बाद्यवच्छेदेन धूमाभावसत्त्वात्पर्वतादेरपि हेत्वधिकरणत्वानुपपत्तिरिति वाच्यम्। यन्निष्ठपदेन यन्निरूपितनिरवच्छिन्नवृत्तिताया एव विवक्षितत्वादित्यन्यत्र विस्तरः।

करणतदवयवनिष्ठाभावप्रतियोगित्वेऽपि वह्नेर्नाऽव्याप्तिः ।

अभावश्च प्रतियोगिव्यधिकरणो बोध्यः । तेन कपिसंयोग्येतद्वृक्षत्वादित्यादौ मूलावच्छेदेनैतद्वृक्षवृत्तिकपिसंयोगाभावप्रतियोगित्वेऽपि कपिसंयोगस्य नाऽव्याप्तिः ।

न च प्रतियोगिव्यधिकरणत्वं यदि प्रतियोग्यनधिकरणवृत्तित्वं, तदा तथैवाऽव्याप्तिः, प्रतियोगिनः कपिसंयोगस्याऽनधिकरणे गुणादौ वर्तमानो योऽभावस्तस्यैव वृक्षे मूलावच्छेदेन सत्त्वात् । यदि तु प्रतियोग्यधिकरणावृत्तित्वं, तदा संयोगो सत्त्वादित्यादावतिव्याप्तिः, सत्ताधिकरणे गुणादौ यः संयोगाभावस्तस्य प्रतियोग्यधिकरणद्रव्यवृत्तित्वादिति वाच्यम् । हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्वविशिष्टस्य विवक्षितत्वात्, स्वप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभावेति निष्कर्षः ।

प्रतियोग्यनधिकरणत्वं च प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वाच्यम् । तेन विशिष्टसत्तावान् जातेरित्यादौ जात्यधिकरणगुणादौ विशि-

दिनकरी ।

शिष्टसत्ताया व्यभिचारित्वात्तत्राऽव्याप्त्यभिधानमसङ्गतमिति वाच्यम् । साध्याभाववद्वृत्तितावच्छेदकहेतुतावच्छेदकस्यैव व्यभिचारपदार्थतया शुद्धसमवायसम्बन्धस्य हेतुतावच्छेदकसम्बन्धत्वेऽपि विशिष्टसत्त्वस्य हेतोर्व्यभिचारित्वाभावात् । **नाऽव्याप्तिरिति** । न च हेतुतावच्छेदकविशिष्टसत्तात्वविशिष्टसत्त्वस्य गुणे सत्त्वादेर्विवक्षणेऽपि कथमव्याप्तिपरिहार इति वाच्यम् । हेतुतावच्छेदकावच्छिन्ननिरूपिताधिकरणत्वस्य विवक्षितत्वात्, विशिष्टसत्तात्वस्य गुणनिष्ठाधिकरणतानिरूपिताधेयतानवच्छेदकतया तदवच्छिन्ननिरूपिताधिकरणत्वस्य गुणेऽभावादिति ।

तथैव-तदवस्थैव । **तस्यैव वृक्ष इति** । अधिकरणभेदेनाऽभावभेदानभ्युपगमादिति भावः । **प्रतियोग्यधिकरणावृत्तित्वं** प्रतियोग्यधिकरणवृत्तिभिन्नत्वम् ।

विवक्षितत्वादिति । प्रतियोगिव्यधिकरणपदेन विवक्षितत्वादित्यर्थः । नन्वेवं हेतुसमानाधिकरणेत्यस्य वैयर्थ्यं, सत्तावान् जाते (१)रित्यादौ सत्ताद्यभावस्य निरुक्तप्रतियोगिवैयधिकरण्याभावादव्याप्तिविरहादत आह—**स्वप्रतियोग्यनधिकरणेति** । **निष्कर्ष इति** । प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभाव इत्यन्तस्य निष्कर्षः । तथाच हेतुसमानाधिकरणत्वविशेषणबलादेव तादृशप्रतियोगिवैयधिकरण्यलाभान्न तद्वैयर्थ्यमिति भावः ।

रामरुद्री ।

दकीभूतविशिष्टसत्तात्वविशिष्टा सत्तैव, तदधिकरणं गुणोपीति भावः ।

प्रदर्शिताऽव्याप्तौ पूर्वोक्ताव्याप्तिभेदाभावेन तथैवेत्यस्य सादृश्यार्थकता न घटत इत्यत आह—**तदवस्थैवेति** ।

---

(१) प्रतियोगिवैयधिकरण्यस्याऽप्रवेशे हेतुसामानाधिकरण्यस्याऽप्रवेशे सत्तावान् जातेरित्यादावव्याप्तिः प्रथममुपादेया । न तु वन्हिमान् धूमादित्यादौ । तत्र हेतुसामानाधिकरण्यनिवेशेऽपि नितम्बाद्यवच्छेदेन पर्वते वन्ह्यभावसत्त्वेनाऽव्याप्तस्तदुपादानेऽपि तादवस्थ्यात्, इति तल्लाप्रवेशे यत्राऽव्याप्तिरिष्टा तत्रैव तामुद्धर्तुं वन्हिमान् धूमादितिप्रसिद्धस्थलं परित्यज्यैतादृशस्थलानुसरणमिति बोध्यम् ।

घटसत्ताभावप्रतियोगिसत्ताधिकरणत्वसत्त्वेऽपि न क्षतिः ।

अत्र साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वं बोध्यं, तेन ज्ञानवान् सत्त्वादित्यादौ सत्ताधिकरणघटादेर्विषयतया ज्ञानाधिकरणत्वेपि न क्षतिः (१) ।

इत्थञ्च वह्निमान् धूमादित्यादौ धूमाधिकरणे समवायेन वह्निविरहसत्त्वे-

दिनकरी ।

सत्ताधिकरणत्वेऽपीति । तथा च विशिष्टसत्ताभावो न प्रतियोगिव्यधिकरणः, अभावान्तरप्रतियोगितायाश्चाऽनवच्छेदकमेव विशिष्टसत्तात्वमित्यतिव्याप्तिः । **न क्षतिः** नाऽतिव्याप्तिः । एवमग्रेऽपि ।

ननु प्रतियोगितावच्छेदकसम्बन्धेनैव प्रतियोग्यनधिकरणत्वमुच्यतां तावताऽपि ज्ञानवान् सत्त्वादित्यादावनतिप्रसङ्गादित्यत आह-**इत्थं चेति** । साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वविवक्षणे चेत्यर्थः ।

वन्हिविरहसत्त्वेऽपीति । तथा च प्रतियोगितावच्छेदकसमवायेन प्रतियोगिव्यधिकरणतादृशाभावप्रतियोगितावच्छेदकत्वाद्वह्नित्वस्याऽव्याप्तिः साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वेनाऽग्रिमप्रतियोगितविशेषणे तु सम्बन्धद्वयप्रवेशेन गौरवमिति भावः ।

रामरुद्री ।

तथा चेति । वस्तुतः प्रतियोगिव्यधिकरणत्वं हेतुविशेषणम् । तच्च प्रतियोग्यनधिकरणवृत्तित्वं, तदधिकरणवृत्तित्वमभावविशेषणम् । तथाच लाघवात्प्रतियोग्यनधिकरण-हेत्वधिकरण-वृत्तित्वमभावविशेषणं वक्तुमुचितमिति भावो मूलकारस्येति युक्तमुत्पश्यामः ।

गौरवमितीति । अथ यत्र वह्निप्रतियोगिकसंयोगेन वह्नेः साध्यता तत्र घटाभावादिर्न प्रतियोगिव्यधिकरणः, साध्यतावच्छेदकसम्बन्धेन तत्प्रतियोगितावच्छेदकावच्छिन्नाधिकरणाप्रसिद्धेः । न च तत्तद्द्रव्यत्वाभाव एव लक्षणघटकोऽस्त्विति वाच्यम् । रूपवान् पृथिवीत्वादित्यादौ विषयितया रूपवत्त्वतोऽभावमादायाऽव्याप्तिवारणाय प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशस्याऽऽवश्यकतया तत्तद्द्रव्यत्वाभावप्रतियोगितावच्छेदकतायास्तत्सम्बन्धावच्छिन्नत्वाभावेन तस्य लक्षणघटकत्वात् । न च तृणादिजन्यतावच्छेदकजात्यावच्छिन्नाभाव एव तथाविधः प्रसिद्ध्यतीति वाच्यम् । एवमपि तद्रूपप्रतियोगिकत्वविशिष्टसमवायेन तद्रूपसाध्यकसद्धेतावव्याप्तेः, साध्यस्यैव तेन सम्बन्धेनाऽधिकरणप्रसिद्धेरिति चेन्न । विशेषरूपेण संसर्गतानभ्युपगमात् । तदभ्युपगमे तु साध्यतावच्छेदकसम्बन्धसामान्ये यदभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्व-हेत्वधिकरणीभूतयत्किञ्चिद्द्रव्यत्वानुयोगिकत्वोभयाभावः, तादृशाभाव एव हेत्वधिकरणे प्रतियोगिव्यधिकरण इति निर्वचनीयम् । एवञ्च घटाभावादिरेव तादृशः प्रसिद्ध्यति, यत्किञ्चिद्घटादिसंयोगे वह्नित्वावच्छिन्नप्रतियोगिकत्व-पर्याप्तानुयोगिकत्वोभयाभावसत्त्वात् वह्न्यभावस्यापि हेत्वधिकरणे प्रतियोगिव्यधिकरणत्वापत्त्याव ह्निमान् धूमादित्यादावव्याप्तिरतः सामान्यपदम् । व्यभिचारिणि साध्याभावस्य लक्षणघटकत्वोपपत्तये यत्किञ्चित्पदं, तेनाऽयोगोलकं यत्किञ्चित्पदेनोपादायोभयाभावोपपत्तेर्लक्षणघटकता साध्याभावस्याऽपीति ध्येयम् । एवं विशेषरूपेण संसर्गताभ्युपगमे यत्र वह्नित्वप्रतियोगिकसमवायेन वह्नित्वस्य साध्यतावच्छेद-

---

(१) अथैवमपि वन्हिप्रतियोगिकसंयोगेन वन्ह्यादिसाध्यकधूमादिहेतुकस्थलेऽव्याप्तिः । तत्र साध्यतावच्छेदकसम्बन्धेन निरुक्तप्रतियोग्यनधिकरणहेत्वधिकरणाप्रसिद्धेरिति चेन्न। साध्यतावच्छेदकसम्बन्धावच्छिन्नाधिकरणत्वीयस्वरूपसम्बन्धेन प्रतियोग्यधिकरणत्वाभावस्यैव प्रतियोग्यनधिकरणत्वपदार्थत्वात् ।

ऽपि न क्षतिः।

ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्य चित्प्रतियोगिनोऽनधिकरणत्वं (१), तत्सामान्यस्य वा (२), यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं (३) वा विवक्षितम्? आद्ये कपिसंयोगी एतद्वृक्षत्वादित्यत्र तथैवाऽव्याप्तिः, कपिसंयोगाभावप्रतियोगितावच्छेदकावच्छिन्नो वृक्षावृत्तिकपिसंयोगोऽपि भवति, तदनधिकरणं वृक्ष इति।

द्वितीये तु प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः, सर्वस्यैवाऽभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात्। न च वह्निमान् धूमादित्यादौ घटाभावादेः पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं यद्यपि पर्वतादेः, तथापि साध्यतावच्छेदकसम्बन्धेन तत्प्रतियोग्यनधिकरणत्वमस्त्येवेति कथं प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति (४) वाच्यम्। घटाभावे यो वन्ह्यभावः, तस्य घटाभावात्मकतेत्यर्थः।

दिनकरी।

न क्षतिः–नाऽव्याप्तिः। समवायेन वह्न्यभावस्य साध्यतावच्छेदकसंयोगेन प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तित्वाभावादिति भावः।

तत्सामान्यस्य–प्रतियोगितावच्छेदकावच्छिन्नसामान्यस्य। **यत्किञ्चिदिति।** यत्किञ्चिद्यत्प्रतियोगितावच्छेदकं तदवच्छिन्नसामान्यस्य वेत्यर्थः।

पूर्वक्षणवृत्तित्वविशिष्टेति। पूर्वक्षणवृत्तित्वविशिष्टस्य स्वस्य घटाभावादेर्योऽभावस्तदात्मकेत्यर्थः। घटाभावाद्यधिकरणेऽपि पूर्वक्षणवृत्तित्वविशिष्टघटाभावादेरभावस्योत्तरक्षणावच्छेदेन सत्त्वादिति भावः। न च पूर्वक्षणवृत्तित्वविशिष्टस्य घटाभावादेरभावः स्वाभावस्य प्रतियोगी, न घटाभावादेरिति वाच्यम्। पूर्वक्षणवृत्तित्वविशिष्टस्य घटाभावादेर्योऽभावः, तदभावस्य पूर्वक्षणवृत्तित्वविशिष्टघटाभावानतिरेकितया विशिष्टघटाभावप्रतियोगिनस्तस्य शुद्धघटाभावप्रतियोगित्वात्, तथा च प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्याऽसम्भव इति भावः। **घटाभावात्मकतयेति।** अभावाधिकरणकाभावस्याऽधिकरणानतिरामरुद्री।

कता, तत्र हेतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नाया अप्रसिद्ध्याऽव्याप्तिरतः प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वं न निवेशनीयं, परन्तूक्ताव्याप्तिवारणाय साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकत्वीयस्वरूपसन्बन्धेन प्रतियोगितावच्छेदकत्वाभावो विवक्षणीय इति विभावनीयम्। मूले—**भिन्न इत्युच्यत इति।** अन्यथा वन्हिमति घटशून्यदेशे वह्निर्नाऽस्तीति घटवति वह्निशून्ये घटो नाऽस्तीति प्रत्ययस्य चाऽऽपत्तेरिति भावः।

---

(१) प्रतियोगितावच्छेदकावच्छिन्नविशिष्टत्वमित्यर्थः। वैशिष्ट्यञ्च स्वानधिकरणत्वसम्बन्धेन।

(२) प्रतियोगितावच्छेदकावच्छिन्नविशिष्टान्यत्वमित्यर्थः। वैशिष्ट्यञ्च स्वाधिकरणत्वसम्बन्धेन।

(३) प्रतियोगितावच्छेदकविशिष्टत्वमित्यर्थः। वैशिष्ट्यञ्च स्वावच्छिन्नानधिकरणत्वसम्बन्धेनेति। तेन नाऽननुगमः। **(४) 'कथमप्रसिद्धिरिति' इत्यपि पाठः।**

या घटाभावस्य वह्निरपि प्रतियोगी, तदधिकरणं च पर्वतादिरित्येवंक्रमेण (१) प्रतियोगिव्यधिकरणस्याऽप्रसिद्धत्वात् । यदि च घटाभावादौ वन्ह्यभावादिर्भिन्न इत्युच्यते, तथाऽपि धूमाभाववान् वन्ह्यभावादित्यादावव्याप्तिः, तत्र साध्यतावच्छेदकसम्बन्धः स्वरूपसम्बन्धः, तेन च सम्बन्धेन सर्वस्यैवाऽभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरणत्वं हेत्वधिकरणस्येति ।

तृतीये तु कपिसंयोगाभाववानात्मत्वादित्यादावव्याप्तिः, तत्राऽऽत्मवृत्तिकपिसंयोगाभावाभावः कपिसंयोगः, तस्य च गुणत्वात् तत्प्रतियोगितावच्छेदकं गुणसामान्याभावत्वमपि, तदवच्छिन्नानधिकरणत्वं हेत्वधिकरणस्याऽऽत्मन इति ।

मैवम् । यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतः, तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात् (२) ।

दिनकरी ।

रिक्तत्वादिति भावः । 'इत्यादौ' इत्यादिना अभावसाध्यकसद्धेतुमात्रपरिग्रहः । **स्वरूपसम्बन्ध इति** । अभावीयविशेषणतेत्यर्थः । **पूर्वक्षणवृत्तित्वविशिष्टस्वाभावेति** । पूर्वक्षणवृत्तित्वविशिष्टं यत् स्वं—घटाभावादि, तदभावात्मकेत्यर्थः ।

प्राचां मते द्रव्ये संयोगसामान्याभावानङ्गीकारादाह—**कपीति** । घटाभावीययत्किञ्चित्प्रतियोगितावच्छेदकघटत्वावच्छिन्नानधिकरणत्वस्य हेत्वधिकरणे सम्भवान्न प्रतियोगिव्यधिकरणाभावाप्रसिद्धिनिबन्धनाऽव्याप्तिः सम्भवतीति भावः । घटत्वहेतुके यत्किञ्चित्प्रतियोगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वं हेत्वधिकरणस्य घटादेर्न सम्भवति, उत्पत्तिकाले घटे गुणसामान्याभावसत्त्वादत आत्मपर्यन्तानुधावनम् ।

तृतीयविवक्षानुसारेण समाधत्ते—**यादृशेति** । यादृश्याः प्रतियोगिताया अवच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तादृशप्रतियोगितावच्छेदकतानाश्रयत्वमित्यर्थः । **विवक्षितत्वात्**—अप्रतियोगिपदेन विवक्षितत्वात् । कपिसंयोगाभाववानात्मत्वादित्यादौ गुणसामान्याभावत्वावच्छिन्नप्रतियोगिताया एव यादृशप्रतियोगितापदेनोपादातुं शक्यतया तदनवच्छेदकत्वस्य कपिसंयोगाभावत्वे सत्त्वान्नाऽव्याप्तिरिति भावः । अत्र च यद्धर्मविशिष्टान-

रामरुद्री ।

तृतीयविवक्षेति । यत्किञ्चित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वविवक्षानुसारेणेत्यर्थः । **अप्रतियोगिपदेनेति** । इदञ्च यथाश्रुतमूलाभिप्रायेणोक्तम् । वस्तुतस्तादृशप्रतियोगितानवच्छेदकत्वमेव साध्यतावच्छेदके विवक्षणीयम् । अन्यथा वह्निमान् धूमादित्यत्रैवाऽव्याप्तेः पूर्वमुपदर्शितत्वादिति बोध्यम् । **अत्र चेति** । साध्यतावच्छेदकसम्बन्धेन यद्धर्मावच्छिन्नवदन्यत्वं हेतुमतस्तदन्यसाध्यतावच्छेदकाव-

---

(१) 'पर्वतादीतिक्रमेण' इत्यपि पाठः ।

(२) प्रतियोगिता-विशिष्ट-प्रतियोगितानवच्छेदक-साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति फलितार्थः । वैशिष्ट्यञ्च स्वतादात्म्य-स्वावच्छेदकावच्छिन्नानधिकरण-हेत्वधिकरणवृत्त्यभावीयत्वोभयसम्बन्धेन । तेन नाऽननुगमः ।

ननु कालो घटवान् कालपरिमाणादित्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः, हेत्वधिकरणस्य महाकालस्य जगदाधारतया सर्वेषामेवाऽभावानां साध्यतावच्छेदकसम्बन्धेन कालिकविशेषणतया प्रतियोग्यधिकरणत्वात्।

अत्र के चित् । **महाकालभेदविशिष्टघटाभावस्तत्र प्रतियोगिव्यधिकरणः, महाकालस्य घटाधारत्वेऽपि महाकालभेदविशिष्टघटानाधारत्वात्, महाकाले महाकालभेदाभावात् ।**

वस्तुतस्तु प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणीभूत–

दिनकरी ।

धेकरणत्वं हेत्वधिकरणस्य, तद्धर्मभिन्नसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यस्य लघोर्नैर्दुष्टत्वसम्भवेऽपि यथासन्निवेशे न वैयर्थ्यमिति भावः ।

साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणत्वविवक्षणेऽव्याप्तिमाशङ्कते–**नन्विति ।**

महाकालभेदविशिष्टघटाभाव इति । अभावीयविशेषणताघटितसामानाधिकरण्यसम्बन्धेन महाकालभेदविशिष्टस्य घटस्याऽभाव इत्यर्थः । **महाकाले महाकालभेदाभावादिति ।** अभावीयविशेषणतासम्बन्धेन महाकालभेदाभावादित्यर्थः । सामानाधिकरण्यघटकीभूतविशेषणविशेष्यसम्बन्धाभ्यां यत्र विशेषणविशेष्योभयसत्त्वं तत्रैव विशिष्टाधिकरणत्वोपगमादिति भावः ।

ननु महाकालमात्रवृत्तिविशेषणतासम्बन्धेन साध्यतायां महाकालान्यत्वविशिष्टघटाभावोऽपि न प्रतियोगिव्यधिकरणः, तत्र तेन सम्बन्धेन महाकालान्यत्वविशिष्टघटाधिकरणाप्रसिद्धेरत आह—वस्तुत इति । अत्र प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणहेत्वधिकरण–वृत्त्यभावीय–साध्यतावच्छेदकसम्बन्धावच्छिन्न–प्रतियोगितानवच्छेदकत्वघटेतलक्षणकरणेऽपि कालो घटवान् कालपरिमाणादित्यादावव्याप्तिस्तदवस्थैव, साध्यतावच्छेदकसम्बन्धावच्छिन्नतादृशप्रतियोगितायाः अप्रसिद्धेः, अतः प्रतियोगिताधर्मिकोभयाभावपर्य-

रामरुद्री ।

च्छिन्नसामानाधिकरण्यं व्याप्तिरित्यर्थः । न च प्रतियोगितानवच्छेकाऽनन्तधर्मभेदनिवेशे गौरवमिति वाच्यम् । गुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वमते गुरुधर्मघटितकम्बुग्रीवादिमद्भेदस्याऽप्यप्रसिद्धया ऽसाम्यादिति भावः ।

अभावीयविशेषणतेति । दैशिकविशेषणतेत्यर्थः, न त्वभावप्रतियोगिकविशेषणतेति तदर्थः, तथा सति कालिकविशेषणतायाः अप्यभावप्रतियोगिकत्वेन तद्व्यावृत्तेरसम्भवात् । एवमग्रेऽपि बोध्यम् । **महाकालभेदाभावादित्यर्थ इति ।** ननु दैशिकविशेषणतया महाकाले महाकालभेदासत्त्वेऽपि कालिकसम्बन्धेन तत्र महाकालभेदविशिष्टघटसत्त्वे बाधकाभावः, तेन सम्बन्धेन तस्य जगदाधारत्वादित्याशङ्कायामाह—**सामानाधिकरण्येति । विशेषणेति ।** विशेषणविशेष्यप्रतियोगिकसंसर्गाभ्यामित्यर्थः ।

महाकालमात्रवृत्तीति । महाकालानुयोगिकविशेषणतया साध्यत्व इत्यर्थः । **अप्रसिद्धेरिति ।** यद्यपि पूर्वोक्तोभयाभावघटितप्रतियोगिवैयधिकरण्यप्रवेशे(१) गगनाभाव एव तत्राऽपि प्रसिद्ध्यति, तथाऽपि गगनादेरपि कालिकसम्बन्धेन महाकालवृत्तित्वमस्त्येव, अन्यथा पूर्ववृत्तितावटितशब्दादिकारणत्व

---

(१) 'प्रतियोग्यधिकरणवृत्तित्वात्' इत्यपि पाठः ।

(१) साध्यतावच्छेदकसम्बन्धसामान्ये यदभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्व–हेत्वधिकरणीभूतयत्किञ्चिद्व्यक्त्यनुयोगिकत्वोभयाभाव इत्यादिरीत्येति भावः ।

हेत्वधिकरण-वृत्त्यभावप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्व—यद्धर्मावाच्छिन्नत्वोभयाभावः, तेन सम्बन्धेन तद्धर्मावच्छिन्नस्य तद्धेतुव्यापकत्वं बोध्यम्। (१) इत्थं च कालो घटवान् कालपरिमाणादित्यादौ संयोगसम्बन्धेन घटाभावप्रतियोगिनोऽपि घटस्याऽनधिकरणे हेत्वधिकरणे महाकाले वर्तमानः स एव संयोगेन घटाभावः, तस्य प्रतियोगितायां कालिकसम्बन्धावच्छिन्नत्व—घटत्वावच्छिन्नत्वोभयाभावसत्त्वान्नाऽव्याप्तिः।

ननु प्रमेयवह्निमान् धूमादित्यादौ प्रमेयवह्नित्वावच्छिन्नत्वमप्रसिद्धं, गुरुधर्मस्याऽनवच्छेदकत्वादिति चेन्न। कम्बुग्रीवादिमान्नाऽस्तीति प्रतीत्या कम्बुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताविषयीकरणेन गुरुधर्मस्याऽप्यवच्छेदकत्वस्वीकारादिति सङ्क्षेपः॥ ६९ ॥इति व्याप्तिनिरूपणे सिद्धान्तग्रन्थः॥

दिनकरी।

न्तानुधावनम्। समवायेन वन्ह्यभावप्रतियोगितायां वह्नित्वावच्छिन्नत्वसत्त्वात्, संयोगेन घटाभावप्रतियोगितायां साध्यतावच्छेदकसंयोगावच्छिन्नत्वस्य सत्त्वात् वह्निमान्, धूमादित्यादावव्याप्तिवारणाय यत्सम्बन्धावच्छिन्नत्व-यद्धर्मावच्छिन्नत्वयोर्निवेशः। संयोगेन घटाभावप्रतियोगितायां धूमत्वावच्छिन्नत्वघटितोभयाभावसत्त्वाद्व्याप्तिवारणाय–**सामान्ये** इति।

अप्रसिद्धमिति। तथा चाऽव्याप्तिरिति भावः। यदि च कम्बुग्रीवादिमान्नास्तीत्यादौ कम्बुग्रीवादिमत्प्रतियोगिताकाभाव एव विषयः, न तु कम्बुग्रीवादिमत्त्वे तत्प्रतियोगितावच्छेदकत्वमपीत्युच्यते, तदा यत्किञ्चिद्घटवत्यपि कम्बुग्रीवादिमान्नाऽस्तीति वाक्यस्य प्रामाण्यापत्तिरिति हृदि निधाय सङ्क्षेप इ(त्युक्तमि)ति ॥ ६९ ॥

इति व्याप्तिनिरूपणे सिद्धान्तग्रन्थः॥

रामरुद्री।

गगनादौ न स्यात्, अवृत्तित्वप्रवादस्तु कालिकादिकृतविशेषणतातिरिक्तसंसर्गेणाऽवृत्तित्वादेव। अत एव **'जगतामाश्रयो मतः'** इति मूलमपि सङ्गच्छत इति भावः। ननु प्रतियोगितावर्मिकोभयाभावघटितलक्षणमनर्थकम्, प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यनिवेशे समवायादिना घटाद्यभावस्यैव प्रसिद्धिसम्भवादित्याशङ्क्य यथोक्तावपि समवायेन वन्ह्यभावमादायाऽव्याप्तिवारणायोत्तरत्र प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्याऽवश्यं निवेशनीयतया समवायेन घटाद्यभावीयतादृशप्रतियोगित्वाप्रसिद्ध्याऽव्याप्तितादवस्थ्यादिति समाधत्ते—**अत्रेति**। एकैकाभावनिवेशेऽव्याप्तिप्रदर्शनेनोभयाभावनिवेशं सार्थकयति—**समवायेनेति**। सामान्यपदमतिव्याप्तिवारकतया सार्थकयति–**संयोगेनेति**।

हृदि निधायेति। तथा चैतस्याऽर्थस्याऽनुक्तत्वादेवैतदर्थसूचनाय **'सङ्क्षेपः'** इत्युक्तमिति भावः।

---

(१) व्यापकसामानाधिकरण्यं च व्याप्तिः। यत्सम्बन्धः-साध्यतावच्छेदकसम्बन्धः। यद्धर्मः-साध्यतावच्छेदको धर्मः। तत्र यदि यद्धर्मावच्छिन्नत्वाभावमात्रमित्युच्यते, तदा समवायेन यो वन्ह्यभावस्तस्य प्रतियोगितावच्छेदकसम्बन्धः समवायस्तेन प्रतियोग्यनधिकरणपर्वतादिवृत्तिः स एव, तत्प्रतियोगितावच्छेदकं वह्नित्वमित्यव्याप्तिः स्यात्। यदि च यत्सम्बन्धावच्छिन्नत्वाभावमात्रमुच्यते, तदा तादृशस्य संयोगेन घटाभावस्य प्रतियोगितायां संयोगसम्बन्धावच्छिन्नत्वसत्त्वादव्याप्तिः स्यादत उभयमुपात्तम्।

सिषाधयिषया शून्या सिद्धिर्यत्र न तिष्ठति ।

पक्षवृत्तित्वमित्यत्र पक्षत्वं किं ? तदाह – सिषाधयिषयेति ।

दिनकरी ।

मूले पक्षतानिरूपणे सङ्गतेरप्रदर्शनात् तां प्रदर्शयति–**पक्षवृत्तित्वमित्यत्रेति । तथा च** प्रकृतस्य परामर्शस्य घटकतया पक्षधर्मत्वमपि प्रकृतं, तदुपपादकत्वरूपोपोद्घातसङ्गत्या **पक्षतानिरूपणम्** । व्याप्तिनिरूपितैकैकार्यकारित्वमेव **सङ्गतिरिति** बोध्यम् । मूले पक्षतालक्ष-

रामरुद्री ।

नन्ववच्छेदकत्वमवगाहत एव कम्बुग्रीवादिमान्नाऽस्तीति प्रतीतिः, किन्तु तत्र स्वरूपसम्बन्धरूपं, किंत्वनतिरिक्तवृत्तित्वं, तदपि न प्रतियोगितावच्छेदकशून्यावृत्तित्व, तथा सति गुणे सत्ता नाऽस्तीतिप्रतीत्यापत्तेः, [तादृशाभावप्रतियोगितावच्छेदकशून्यावृत्तिघटत्वाद्यवच्छिन्नाभावस्य तत्र सत्त्वात् । अपि तु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्धर्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकं तद्धर्मवत्त्वं तत् ।] न च कम्बुग्रीवादिमत्त्वावच्छिन्नव्यापकतावच्छेदकत्वं तदवच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वमेव वाच्यम्, तथा च अप्रसिद्धिनादवस्थेयम्, घटसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वापेक्षया कम्बुग्रीवादिमत्त्वावच्छिन्नवन्निष्ठाभावप्रतियोगितावच्छेदकत्वत्वस्य गुरुत्वेन तदवच्छिन्नाभावाप्रसिद्धया तद्घटितोक्तावच्छेदकताया असम्भव इति वाच्यम् । कम्बुग्रीवादिमत्समानाधिकरणाभावप्रतियोगितावच्छेदकं यद्यत् , तत्तद्भेदकूटस्यैव व्यापकतावच्छेदकत्वेनोपगन्तव्यत्वात्तस्य च प्रसिद्धत्वादिति चेन्मैवम् । घटो नाऽस्तीति प्रतीत्या हि घटत्वादेः स्वरूपसम्बन्धरूपमवच्छेदकत्वं सिद्ध्यतीति वक्तव्यम् । तत्र च नञर्थाभावे घटस्य घटत्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेनाऽन्वयात्तादृशप्रतीत्या घटत्वादेरवच्छेदकत्वावगाहनावश्य तादृशप्रतीतिः घटत्वादेरवच्छेदकत्वे मानं, तथा कम्बुग्रीवादिमान्नाऽस्तीति प्रतीत्या कम्बुग्रीवादिमत्त्वे निरुक्तावच्छेदकत्वानवगाहनात् कथं तस्य तादृशावच्छेदकत्वं तत्प्रतीतिगोचर इति घटो नाऽस्तीतिवदियमपि स्वरूपसम्बन्धरूपमेवाऽच्छेदकत्वं कम्बुग्रीवादिमत्त्वेऽवगाहत इति तद्बलाद्गुरुरपि भवत्यवच्छेदकः प्रतियोगितायां इति ग्रन्थकृत्तात्पर्यात् । तेन च गुरुधर्मे स्वरूपसम्बन्धरूपावच्छेदकत्वस्य बाधादुक्तप्रतीतौ स्वा(१) वच्छिन्नव्यापकतावच्छेदकावच्छिन्नप्रतियोगितासम्बन्धेनैव प्रतियोगिनोऽभावे अन्वयोऽभ्युपेयते, घटो नाऽस्तीत्यादौ तु लाघवाद्घटत्वावच्छिन्नप्रतियोगितासम्बन्धेनैव घटादेरन्वयोऽभ्युपगन्तुमुचित इति वाच्यम् । समानाकारकप्रतीत्या एकत्र प्रतियोग्यंशे प्रकारीभूतधर्मावच्छिन्नप्रतियोगितासंसर्गावगाहित्ववदपरत्र तादृशधर्मावच्छिन्नव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगितासंसर्गावगाहित्वमितिकल्पनस्याऽनुचितत्वेन लाघवादुभयत्रैव प्रतियोगिविशेषणीभूतधर्मावच्छिन्नप्रतियोगितासंसर्गावगाहितावकल्पनस्यैव उचितत्वेन गुरुधर्मस्य नाऽवच्छेदकत्वमित्यत्रैव प्रमाणदौर्लभ्यात् , प्रतीत्यनुरोधेनैव अवच्छेदकतासिद्धेरुपगन्तव्यत्वादिति ध्येयम् । ननु प्रतियोगिताधर्मिकोभयाभावघटितलक्षणे गुरुधर्मावच्छिन्नसाध्यकाव्याप्त्याशङ्कैव न सम्भवति, गुरुधर्मस्य साध्यतावच्छेदकताया असम्भवादिति कथमेतदिति चेन्न । स्वरूपसन्बन्धरूपावच्छेदकताया एव गुरुधर्मे प्राचीनैरनङ्गीकारात् , साध्यतावच्छेदकताया विषयताविशेषरूपत्वेन गुरुधर्मस्याऽपि तत्सम्भवादिति हृदयम् ॥ ६९ ॥

॥ इति व्याप्तिनिरूपणे सिद्धान्तग्रन्थः ॥

पक्षवृत्तित्वमित्यत्रेतीति मूले किमुत्तरं **'इति'** इति पूरणीयम् । तथा च पक्षवृत्तित्वघटकं पक्षत्वं मज्जिज्ञासाविषय इति हेतोस्तत् पक्षत्वमाहेत्यर्थः । नन्वेतावता का सङ्गतिः प्रदर्शितेत्याशङ्कायामाह— **तथा चेति** । ननु परामर्शनिरूपणानन्तरं पक्षतानिरूपणे भवतूपोद्घातसङ्गतिः, व्याप्तिनिरूपणाव्यवहितोत्तरं पक्षतानिरूपणे का सङ्गतिरित्यत आह–**व्याप्तिनिरूपितेत्यादि । एककार्यकारित्वम्**–एककार्यप्रयोजकत्वं, प्रयोजकत्वञ्च कारणकारणतावच्छेदकसाधारणम्(२) तेनाऽनुमितौ पक्षतायाः कारणत्वेऽपि

---

१) स्वं-कम्बुग्रीवादिमत्त्वम् । (२) प्रथमान्यथासिद्धिभिन्नान्यथासिद्धिशून्यत्वे

स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेत् ॥ ७० ॥

सिषाधयिषाविरहविशिष्टसाद्ध्यभावः पक्षता, तद्वान् पक्ष इत्यर्थः। सिषाधयिषामात्रं न पक्षता, विनाऽपि सिषाधयिषां घनगर्जितेन मेघानुमानात्। अत एव साध्यसन्देहोऽपि न पक्षता, विनाऽपि साध्यसन्देहं तदनुमानात्। सिद्धौ सत्या मपि सिषाधयिषासत्त्वेऽनुमितिर्भवत्येव, अतः सिषाधयिषाविरहविशिष्टत्वं सिद्धौ विशेषणं, तथा च यत्र सिद्धिर्नाऽस्ति, तत्र सिषाधयिषायां सत्यामसत्यामपि पक्षता, यत्र सिषाधयिषाऽस्ति, तत्र सिद्धौ सत्यामसत्यामपि पक्षता, यत्र सिद्धिरस्ति, सिषाधयिषा च नाऽस्ति, तत्र न पक्षता, सिषाधयिषाविरहविशिष्टसिद्धेः सत्त्वात्।

दिनकरी।

णस्य स्पष्टतयाऽनुक्तेः पक्षतालक्षणं स्वातन्त्र्येण प्रदर्शयन् मूलार्थमाह-**सिषाधायषाविरहेति**। घनगर्जितेन मेघानुमितिस्थलेऽव्याप्त्यापत्त्या सिषाधयिषामात्रस्य पक्षतात्वं निषेधति-**सिषाधयिषामात्रं** न पक्षतेति। **मेघानुमानात्**-मेघानुमितेः। अत एव-वक्ष्यमाणदूषणादेव। सिषाधयिषाविरहरूपविशेषणस्य प्रयोजनमाह-**सिद्धौ सत्यामिति। अत इति।** तत्राऽनुमितिनिर्वाहकपक्षतासिद्ध्यर्थमिति भावः। **तत्र सिषाधयिषायां सत्यामसत्यामपीति।** सत्यामुभयाभावप्रयुक्तस्य, असत्यां विशेष्याभावमात्रप्रयुक्तस्योक्तविशिष्टाभावस्य सत्त्वादिति भावः। **सिद्धौ सत्यामसत्यामपीति।** सत्यां विशेषणाभावमात्रप्रयुक्तस्याऽसत्यां तूभयाभावप्रयुक्तस्य विशिष्टाभावस्य सत्त्वादिति भावः। **सिद्धेः सत्त्वादिति।** सिद्धेः सत्त्वेन तदभावरूपपक्षताया अभावादिति भावः। सिषाधयिषाविरहवैशिष्ट्यं च सिद्धावेककालावच्छेदेनैकात्मवृत्तित्वम्, तेन सिषाधयिषाकालीनसिद्धेः कालिकसम्बन्धेन सिषाधयिषाविरहविशिष्टत्वसत्त्वेऽपि न क्षतिः।

परामर्शरूपकारणसत्त्वे सिद्धिरूपविरोधिसत्त्वे यद्यनुमित्सा स्यात्तदा तस्या उत्तेजकत्वं

रामरुद्री।

व्याप्तेर्विषयविधया कारणतावच्छेदकत्वेऽपि च न क्षतिः। अत एव सङ्केतनिरूपणानन्तरं हेत्वाभासनिरूपणेऽप्येककार्यकारित्वसङ्गतिप्रदर्शनं दीधितिकृतां सङ्गच्छते, स्वोक्तसद्धेतोः परामर्शेनाऽनुमितेर्जननात् परोक्तप्रतिहेतोर्दुष्टत्वेन ज्ञानस्य प्रतिबन्धकनिरासद्वाराऽनुमितावुपयोगाच्च। वस्तुतस्तूपोद्घातोऽपि व्याप्तिनिरूपिता सङ्गतिर्भवत्येव, तदभिधानानन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वस्यैव तन्निरूपिततत्सङ्गतित्वात्, व्याप्तिनिरूपणानन्तरमप्येकपरामर्शविषयत्वेन पक्षवृत्तित्वस्मरणे वृत्तित्ववटकं किं पक्षत्वमिति जिज्ञासोत्पादसम्भवात्, अत एव पक्षतानिरूपणानन्तरं परामर्शस्य कारणताव्यवस्थापने दीधित्युक्तानुमितिलक्षणोपोद्घातस्य पक्षतानिरूपितसङ्गतित्वमुपपादितं गदाधरभट्टाचार्यैरिति ध्येयम्। **स्पष्टतयेति।** सिषाधयिषाविरहविशिष्टसिद्ध्यभावो यत्र स पक्ष इत्युक्त्वाऽप्यर्थात्तादृशाभावः पक्षतेति लाभसम्भवात् **स्पष्टतयेत्युक्तम्। अव्याप्त्यापत्त्येति।** पक्षे पक्षताभावापत्त्येत्यर्थः। न च सिषाधायिषाविरहविशिष्टसिद्धेः समवायेन पुरुषे सत्त्वेऽपि पक्षे तदभावसत्त्वात्पक्षतापत्तिरिति वाच्यम्। विशेष्यतासम्बन्धेन वर्त्तत इति तदर्थात्। **अत इतीति।** चतुर्थ्यन्तात्तसिरिति भावः। **एककालेति।** एकक्षणेत्यर्थः। तेन न स्थूलकालमादायाऽतिप्रसङ्गः।

विरोधिसत्त्वे—प्रतिबन्धकसत्त्वे। **अनुमित्सा स्यात्**—अनुमित्सा वर्त्तेतेत्यर्थः। अन्यथा परामर्शा-

---

सति कार्यनियतपूर्ववर्तित्वं जनकजनकतावच्छेदकसाधारणप्रयोजकत्वमिति ध्येयम्।

ननु यत्र परामर्शानन्तरं सिद्धिः, ततः सिषाधयिषा, तत्र सिषाधयिषाकाले परामर्शनाशान्नाऽनुमितिः, यत्र सिद्धि-परामर्श-सिषाधयिषाः क्रमेण भवन्ति, तत्र सिषाधयिषाकाले सिद्धेर्नाशात् प्रतिबन्धकाभावादेवाऽनुमितिः, यत्र सिषाधयिषा-सिद्धि-परामर्शास्तत्र परामर्शकाले सिषाधयिषैव नाऽस्ति, एवमन्यत्रापि सिद्धिकाले परामर्शकाले च न सिषाधयिषा, योग्यविभुविशेषगुणानां यौगपद्यनिषेधात् , तत् कथं सिषाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति चेन्न ।

यत्र वह्निव्याप्यधूमवान् पर्वतो वह्निमानिति प्रत्यक्षं, स्मरणं वा ततः सिषाधयिषा, तत्र पक्षतासम्पत्तये तद्विशेषणस्याऽऽवश्यकत्वात् ।

इदं तु बोध्यम् । यादृशयादृशसिषाधयिषासत्त्वे सिद्धिसत्त्वे यल्लिङ्कानुमितिः, तादृशतादृशसिषाधयिषाविरहविशिष्टसिद्ध्यभावस्तल्लिङ्कानुमितौ पक्षता। तेन सिद्धिपरामर्शसत्त्वे यत्किञ्चिज्ज्ञानं जायतामितीच्छा-

दिनकरी

वाच्यं, न चैतत् सम्भवतीत्याशङ्कते-**ननु यत्रेति** । **परामर्शानन्तरं**-परामर्शद्वितीयक्षणे । **ततः**-सिद्ध्युत्पत्तिद्वितीयक्षणे । **क्रमेण**-अव्यवधानेन । **एवमन्यत्राऽपीति** । यत्र परामर्श-सिषाधयिषा-सिद्धयः क्रमेण भवन्ति, एवं सिद्धि-सिषाधयिषा-परामर्शाः, एवं सिषाधयिषा-परामर्श-सिद्धयश्चेत्यर्थः। **सिद्धिकाले परामर्शकाले चेति** । सिद्धि-परामर्शोभयक्षण इत्यर्थः । **कथमिति** । किमर्थमित्यर्थः ।

इति प्रत्यक्षमिति । अनुमितीष्टसाधनताविषयकमिति शेषः । (अन्यथा) प्रत्यक्षोत्पत्तेः पूर्वमनुमितीष्टसाधनताधीस्वीकारे इच्छासामग्र्या प्रतिबन्धात् प्रत्यक्षमेव न स्यात् ।

यादृशयादृशेति । घटानुमितिर्जायतामितीच्छासत्त्वेऽपि पर्वतो वह्निमानितिसिद्धयसत्त्वे वह्निमानित्यनुमित्युत्पत्तेः पर्वतो वह्निमानितिसिद्धिसत्त्वेऽपि तदिच्छाबलात्तादृशानुमित्यापत्तिरत उक्तं-**सिद्धिसत्त्व इति** । इदं चोत्तेजकेच्छादिव्यक्तेः परिचायकं रूपम् । उत्तेजकत्वं तु तत्तद्व्यक्तित्वेनैवेति बोध्यम् । **तेन**-तत्तदिच्छाया उत्तेजकत्वेन । **यत्किञ्चि-**

रामरुद्री

भावेऽनुमितेरेवाऽनुत्पत्त्या सिषाधयिषाया उत्तेजकत्वकल्पने बीजाभावात्, प्रतिबन्धकसत्त्वे कार्योत्पादार्थमेवोत्तेजकस्य कल्पनीयत्वात् , सिद्ध्यसत्त्वे प्रतिबन्धकाभावादेव कार्योत्पादसम्भवेनोत्तेजकस्यैवाऽनपेक्षितत्वात् सिषाधयिषाऽभावे धर्मिणोऽसत्त्वेन कस्योत्तेजकत्व कल्पनीयमिति भावः । सिद्धिमात्रकाले परामर्शमात्रकाले च सिषाधयिषायाः सम्भवात् **'सिद्धिकाले'**-इत्यादि मूलमसङ्गमतो व्याचष्टे-**सिद्धीति** ।

ननु वह्निव्याप्यधूमवान्पर्वतो वह्निमानितिप्रत्यक्षानन्तर सिषाधयिषैव न सम्भवति, इष्टसाधनताज्ञानाभावात् , उपयेच्छां प्रति इष्टसाधनताज्ञानस्य हेतुत्वात् , इष्टसाधनताज्ञानस्य तादृशप्रत्यक्षात्पूर्वमेवोपगमे प्रत्यक्षमेव न सम्भवति, बलवदिच्छासामग्र्या प्रतिबन्धात्, प्रत्यक्षानन्तरं तदुपगमे सिषाधयिषाक्षणे प्रत्यक्षमेव न तिष्ठतीत्याशङ्कानिरासाय शेषं पूरयति—**अनुमितीत्यादि** ।

परिचायकं रूपमिति । यद्यदिच्छासत्त्वे सिद्धिसत्त्वे अनुमितिरित्यनन्तरं तत्तद्व्यक्तित्वेन विशिष्येच्छाव्यक्तीनां ज्ञानसम्पादकमित्यर्थः । **तत्तद्व्यक्तित्वेनेति** । 'एव' कारेणाऽनुमितिरित्यन्तभागस्योत्तेजकतावच्छेदककोटिप्रवेशो व्यवच्छिद्यते । ननु यत्किञ्चिज्ज्ञानं जायतामितीच्छैव न सम्भवति, सिद्धे वस्तुनि इच्छानुत्पत्तेः, यत्किञ्चिज्ज्ञानस्य सिद्धत्वात् । न च सिद्धेऽपि सिद्धत्वेनाऽज्ञानदशायामि-

यामपि नाऽनुमितिः, वह्निव्याप्यधूमवान् पर्वतो वह्निमानितिप्रत्यक्षसत्त्वे प्रत्यक्षातिरिक्तं ज्ञानं जायतामितीच्छायां तु भवत्येव। एवं धूमपरामर्शसत्त्वे आलोकेन वह्निमनुमिनुयामितीच्छायामपि नाऽनुमितिः।

दिनकरी।

ज्ञानमित्यस्यैतदुत्तरकालीनमित्यादिः, **अन्यथा** यत्किञ्चिज्ज्ञानस्य सर्वदा सिद्धत्वेन तद्रूपेणेच्छाविरहात्। **नाऽनुमितिरिति।** नाऽनुमित्यापत्तिरित्यर्थः। तदिच्छायास्तद्व्यक्तित्वेनोत्तेजकत्वानभ्युपगमादिति भावः। न च यत्किञ्चिज्ज्ञानं जायतामित्येतादृशेच्छाकाले सिद्धिसत्त्वेऽप्यनुमितिर्भवत्येवेति वाच्यम्। अनुमितिसामग्रीसत्त्वे आत्मादिविषयकयत्किञ्चिन्मानसादिसामग्रीसत्त्वनियमेन यत्किञ्चिन्मानसाद्युत्पत्त्यैव तादृशेच्छाविषयसिद्धेः तत्राऽनुमित्युत्पत्तापिष्टापत्त्यसम्भवात्(१)। नन्वनुमितित्वप्रकारकेच्छात्वेनाऽनुगतरूपेणैवोत्तेजकत्वं वाच्यं, तावतैव यत्किञ्चिज्ज्ञानं जायतामितीच्छावारणसम्भवात्, न तु तत्तद्व्यक्तित्वेनोत्तेजकत्वं कल्प्यं, गौरवादित्यत आह—**वह्निव्याप्येति। प्रत्यक्षातिरिक्तं ज्ञानमित्यस्य** शाब्दसामग्र्यसत्त्वे इत्यादिः, शाब्दसामग्रीसत्त्वे शाब्दबोधेनैवेच्छाविषयसिद्धिसम्भवात्। **भवत्येवेति।** अनुमितिरित्यनेन सम्बद्ध्यते। तथा चानुमितित्वप्रकारकेच्छात्वेनोत्तेजकत्वे **तत्राऽनुमितिर्न स्यादिति** भावः। तल्लिङ्गकत्वप्रवेशस्य फलमाह—**एवमित्यादिना। नाऽनुमितिरिति।** इच्छायास्तत्तद्व्यक्तित्वेनोत्तेजकतया तदिच्छाव्यक्तेरनुत्तेजकत्वादिति भावः। इदं तु बोध्यं,—पर्वते वन्ह्यनुमितिर्जायतामित्याद्यनुगतेच्छानां पर्वतत्वावच्छिन्नोद्देश्यकत्वप्रकारतानिरूपितवह्निविधेयकत्वप्रकारताशाल्यनुमितिगोचरेच्छात्वेनाऽनुगतरूपेणैवोत्तेजकत्वं वाच्यं, तावतैव यत्किञ्चिदनुमितिगोचरेच्छाया उत्तेजकत्वे सिद्धिसत्त्वेऽपि पर्वतोद्देश्यकवह्निविधेयकप्रत्यक्षसामग्रीकालेऽपि तादृशेच्छाबलात्तादृशानुमित्यापत्तिरिति वाच्यम्। प्रत्यक्षे उद्देश्यत्वविधेयत्वयोरप्रामाणिकत्वात्। न चैवमनुमितिगोचरत्वनिवेशोऽपि व्यर्थः, तादृशेच्छाया अनुमितिमात्रविषयकत्वादिति वाच्यम्। पर्वतोद्देश्यकवह्निविधेयकप्रत्यक्षं जायतामिति विसंवादीच्छाबलाद-

रामरुद्री।

च्छादर्शनान्नाऽनुपपत्तिरिति वाच्यम्। सिद्धत्वज्ञानाभावेऽप्युत्पन्नज्ञानादिव्यक्त्याविच्छानुत्पत्त्या ज्ञानादिव्यतिरिक्तस्थल एव सिद्धत्वज्ञानं प्रतिबन्धकं, ज्ञानादौ तु सिद्धिमात्रं विरोधीति सिद्धान्तात्। अत एवोक्तम् 'सिद्धे इच्छाविरहात्' इति तत्र तत्र ग्रन्थकृद्भिरित्यनो व्याचष्टे—**एतदुत्तरकालीनमिति। अनुमितिसामग्रीसत्त्व इति।** अनुमितिसामग्र्यभावे तादृशेच्छाबलादनुमितापत्तिरेव न सम्भवति, तत्सत्त्वे परामर्शादिसत्त्वेनाऽऽत्मनो मानससामग्रीसत्त्वेन तादृशमानसोत्पत्त्याऽपीच्छाया विषयसिद्ध्या अनुमित्युत्पादासम्भवात् यादृशेच्छाया अनुमितिं विना न विषयसिद्धिः, तादृशेच्छाया एवोत्तेजकत्वोपगमादिति भावः। ननु वह्निव्याप्यधूमवान् पर्वतो वह्निमानितिप्रत्यक्षानन्तरं वह्नेः प्रत्यक्षातिरिक्तं ज्ञानं जायतामितीच्छाबलेन वह्नेर्नाऽनुमितिः सम्भवति, वह्निविषयकशाब्दबोधेनाऽपि तादृशेच्छाविषयसिद्धिसम्भवादित्याशङ्क्यानिरासाय पूरयति—**शाब्दसामग्र्यसत्त्व इत्यादिरिति।** तथा च तदानीं वह्नेः शाब्दासम्भवेनाऽनुमित्यैवेच्छाया विषयसिद्धिर्भवतीत्यभिप्रायः। **तदिच्छाव्यक्तेरिति।** धूमपरामर्शकालीनाया आलोकेन वह्निमनुमिनुयामितीच्छाव्यक्तेरित्यर्थः। **अनुत्तेजकत्वादिति।** पर्वतत्वावच्छिन्नोद्देश्यकवह्नित्वावच्छिन्नविधेयताकधूमत्वावच्छिन्नलिङ्गकानुमितिप्रतिबन्धकताया अनुत्तेजकत्वादित्यर्थः। तादृशप्रतिबन्धकतानिरूपितावच्छेदकतावदभावाप्रतियोगित्वादिति यावत्। **अनुमितिगोचरेच्छात्वेनेति।** अनुमितित्वावच्छिन्नविधेयकेत्युक्तौ पर्वतोद्देश्यकवह्निविधेयकज्ञानं मे जायतामित्यादीच्छानामसङ्ग्रहापत्तिरिति तत्परित्यागः। न चैतादृशेच्छाया उत्तेजकत्वेऽपि सिद्धिसत्त्वे पर्वतोद्देश्यकवह्निविधेयकप्रत्यक्षादिसामग्रीकालेऽपि तादृशेच्छाबलात्तादृशानुमित्यापत्तिरिति वाच्यम्। प्रत्यक्षे उद्देश्यत्वविधेयत्वयोरप्रामाणिकत्वात्। न चैवमनुमितिगोचरत्वनिवेशोऽपि व्यर्थः, तादृशेच्छाया अनुमितिमात्रविषयकत्वादिति वाच्यम्। पर्वतोद्देश्यकवह्निविधेयकप्रत्यक्षं जायतामिति विसंवादीच्छाबलाद-

(१) **प्रकारान्तरेण स्वविषयपर्यवसानसम्भवेऽनुमित्सानामवगतार्थगोचरज्ञानानर्जकत्वादिति भावः।**

दिनकरी ।

जकत्वं, प्रत्यक्षातिरिक्तं ज्ञानं जायतामित्याद्यननुगतेच्छानां तु तत्तद्व्यक्तित्वेन, न तु सकलेच्छानां तत्तद्व्यक्तित्वेन, गौरवादिति ।

रामरुद्री ।

नुमित्यापत्तिवारणाय तदावश्यकत्वात् । न चैवमपि शाब्दबोधेऽप्युद्देश्यत्वविधेयत्वयोरङ्गीकाराच्चादृशेच्छाबलात्तादृशशाब्दसामग्रीसत्त्वेऽपि सिद्धिसत्त्वेऽपि अनुमित्यापत्तिरिति वाच्यम् । पर्वतो वह्निमानितिशाब्दबोधे पर्वते वह्निमत एव तादात्म्येन प्रकारतया पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्नित्वावच्छिन्नविधेयतायास्तत्राऽसत्त्वात् तादृशवह्निविधेयताकत्वप्रकारताशाल्यनुमितिविषयकेच्छात्वेनैवोत्तेजकतायाः स्वीकरणीयत्वात् । अथैवमपि पर्वते वह्निमतस्तादात्म्येन साध्यतायां पर्वते वह्निमद्विधेयकशाब्दसामग्रीदशायां सिद्धिसत्त्वेऽपि पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्निमत्त्वावच्छिन्नविधेयताशालिज्ञानं जायतामितीच्छाबलात्पर्वतोद्देश्यकवह्निमद्विधेयकानुमित्यापत्तिरिति चेन्न । शाब्दबोधेऽप्युद्देश्यताविधेयतयोरुपगमे एतादृशेच्छानामपि वह्निमद्विधेयकानुमितिस्थले तत्तद्व्यक्तित्वेनैवोत्तेजकतायाःस्वीकरणीयत्वात्, लघूपायसम्भवस्थले एव गौरवस्य स्वीकर्तुमनुचितत्वात् । वस्तुतस्तु शाब्दबोधे विधेयत्वादिकमप्रामाणिकमेव, अनुमितावेव तदङ्गीकार आवश्यकः, अन्यथा पर्वतो वह्निमानित्यनुमितितात्पर्येण पर्वतमनुमिनोमीत्यादिप्रयोगापत्तेः, अनुमितेर्विधेयत्वादिमत्त्व एवाऽन्यत्र द्वितीयाया विषयित्वार्थकत्वेऽप्यनुमित्यर्थकधातुसमभिव्याहारे विधेयत्वस्य द्वितीयार्थतामुद्देश्यत्वस्य सप्तम्यर्थतामुपगम्य तादृशप्रयोगवारणसम्भवात् । न च प्रकारित्वमेव तत्र द्वितीयार्थेऽस्तु, तावताऽपि पर्वतमनुमिनोमीति प्रयोगवारणसम्भवादिति वाच्यम् । तथाऽपि पर्वतत्वमनुमिनोमीत्यादिप्रतीत्यापत्तेः, अत एवोक्तं गदाधरभट्टाचार्यैः—'अनुमित्यर्थकधातुयोगे विधेयत्व विधेयित्वं वा द्वितीयार्थः' इति, शाब्दार्थकधातुयोगे तु विषयित्वस्य द्वितीयार्थत्वेऽपि न क्षतिः । यदि चैवं सति पर्वते पर्वतं शृणोमीति प्रयोगापत्तिः, पर्वतविशेष्यकशाब्दस्याऽपि पर्वतविषयकत्वादिति विभाव्यते, तदा सप्तम्यन्तपदसमभिव्याहारस्थले तादात्म्यातिरिक्तसम्बन्धावच्छिन्नप्रकारितैव द्वितीयार्थोऽस्तु, अतिरिक्तान्तोपादानात्पर्वते वह्निमन्तं शृणोमीति न प्रयोग इति ध्येयम् ।

अथैवमपि धूमपरामर्शमात्रदशाया पर्वतोद्देश्यतानिरूपितवह्निविधेयताकालोकलिङ्गकानुमितिर्जायतामितीच्छाबलात् धूमलिङ्गकवन्ह्यनुमित्यापत्तिः, तादृशेच्छाया अपि तादृशसाध्यविधेयकत्वप्रकारकत्वादनुमितिविषयकत्वाच्च । न च किञ्चिल्लिङ्गकत्वाप्रकारकत्वमपीच्छाविशेषणं देयमतो न तादृशेच्छाबलादुक्तानुमित्यापत्तिरिति वाच्यम् । तथा सति तादृशवह्निविधेयताका धूमलिङ्गकानुमितिर्जायतामितीच्छासत्त्वेऽपि धूमलिङ्गकवन्ह्यनुमितिर्न स्यात् । न च तद्धर्मावच्छिन्नलिङ्गकानुमितौ तदन्यधर्मावच्छिन्नलिङ्गकत्वाप्रकारिकैवेच्छोत्तेजिका वाच्येति धूमलिङ्गकत्वप्रकारकेच्छायाः सङ्ग्रहो भिन्नलिङ्गकत्वप्रकारकेच्छाया वारणञ्च सम्भवतीति वाच्यम् । एवमपि तादृशवह्निविधेयताका धूमलिङ्गकानुमितिरालोकलिङ्गकानुमितिश्च जायतामितीच्छाबलात् धूमलिङ्गकानुमितेरशस्योपपादनत्वादिति चेत्—,

मैवम् । तद्धर्मावच्छिन्नलिङ्गकानुमितौ निरुक्तवह्निविधेयकत्वप्रकारतानिरूपिततद्धर्मान्यधर्मोच्छिन्नलिङ्गकत्वप्रकारकत्वानिरूपितानुमितिनिष्ठविशेष्यताशालित्वेनैवोत्तेजकत्वस्योपगन्तव्यत्वात् । उक्तसमूहालम्बनेच्छायां त्वनुमितौ—विशेष्यताद्वयम्, एका धूमलिङ्गकत्वप्रकारतानिरूपिता, अपरा चाऽऽलोकलिङ्गकत्वप्रकारतानिरूपिता, समूहालम्बने प्रकारताभेदेनैव विशेष्यताभेदात्, अन्यथा वृक्षः कपिसंयोगवाँस्तदभाववाँश्चेति समुच्चयस्य वृक्षः कपिसयोगी न वेति सशयस्य च भेदो न स्यात्, एकधर्मावच्छिन्नविशेष्यकसमूहालम्बनेऽपि प्रकारताभेदेन विशेष्यताभेदः, सशये चोभयप्रकारतानिरूपितैकविशेष्यतेत्येवं तयोर्वैलक्षण्यात्, इत्थञ्च धूममात्रलिङ्गकानुमितित्वमेवैतादृशेच्छाविरहविशिष्टसिद्ध्यभावकार्यतावच्छेदकं वाच्यम्, अन्यथा धूमालोकोभयपरामर्शाभ्यां धूमलिङ्गकत्ववदालोकलिङ्गकानुमितिर्जायतामित्येकविशिष्टापरविशिष्टयावगाहीच्छाबलात्तादृशानुमाने वन्ह्यनुमितावुक्तसिद्ध्यभावस्य व्यभिचारापत्तेः । अथ वा किञ्चिल्लिङ्गकत्वाप्रकारकत्वमेवेच्छाविशेषणमुपादेयम्, धूमलिङ्गकत्वप्रकारकेच्छायाः पृथगेवोत्तेजकत्वस्य कल्पनीयतया तदसङ्ग्रहो न दोषायेति कृतं पल्लवितेन ।

सिषाधयिषाविरहकाले यादृशसिद्धिसत्त्वे नाऽनुमितिस्तादृशी सिद्धि विशिष्यैव तत्तदनुमितिप्रतिबन्धिका वक्तव्या, तेन पर्वतस्तेजस्वी, पाषाणमयो वह्निमानितिज्ञानसत्त्वेऽप्यनुमितेर्न विरोधः। परं तु पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनाऽनुमितेर्दर्शनात् पक्षतावच्छेदकावच्छेदेनाऽनुमितिं प्रति पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिरेव प्रतिबन्धिका, पक्षतावच्छेदकसामानाधिकरण्येनाऽनुमितिं प्रति तु सिद्धिमात्रं विरोधि।

इदं तु बोध्यम्। **यत्राऽयं पुरुषो न वेति संशयानन्तरं पुरुषत्वव्याप्यकरादिमानयमिति ज्ञानं, तत्राऽसत्यामनुमित्सायां पुरुषस्य प्रत्यक्षं भवति, न त्वनुमितिः, अतोऽनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री कामि**

दिनकरी।

सिषाधयिषाकाले पर्वतो वह्निमानितिसिद्धिसत्त्वेऽपि पर्वतो वह्निमानित्यनुमित्युत्पत्तेस्तादृशसिद्धेर्न तादृशानुमितिप्रतिबन्धकत्वं स्यादत उक्तं **सिषाधयिषाविरहकाल इति विशिष्येति**। पवतो वह्निमानित्यनुमितौ पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नप्रकारताशालिनिश्चयत्वेन प्रतिबन्धकता वक्तव्येत्यर्थः। तत्प्रयोजनमाह—**तेनेति**। सिद्धिरेवेत्येवकारेण सामानाधिकरण्येन सिद्धिव्यवच्छेदः। **सामानाधिकरण्येनाऽनुमितिं प्रति त्विति**। सामानाधिकरण्यमात्रेणाऽनुमितिं प्रतीत्यर्थः। **अन्यथाऽवच्छेदकावच्छेदेनाऽनुमितेरपि सामानाधिकरण्यावगाहितया तद्व्यवच्छेदाप्रतीतेः। सिद्धिमात्रमिति**। पक्षविशेष्यकसाध्यप्रकारकनिश्चयत्वेन विरोधित्वमित्यर्थः।

उपाध्यायास्तु **सिषाधयिषाविरहविशिष्ट**–सिद्धि–प्रत्यक्षसामग्र्योरन्यतरस्याऽभावः पक्षता, तेन सिद्धिकाले समानविषयकप्रत्यक्षसामग्रीकालेऽपि च नाऽनुमित्यापत्तिरित्याहुः तत् दूषयितुं प्रत्यक्षसामग्र्यभावस्य पक्षताकुक्ष्यप्रवेशे प्रत्यक्षसामग्रीकाले कथं नाऽनुमितिरित्युत्कटशिष्यजिज्ञासानुत्पादार्थं प्रथमतः स्वसिद्धान्तमाह–**इदं तु बोध्यमित्यादिना** संशयोत्तरप्रत्यक्षं प्रति हेतुभूतस्य विशेषदर्शनस्य सत्त्वादिति भावः। एतादृशप्रत्यक्षसामग्रीविशेषपर्यन्तानुधावन च तद्विषयेऽनुमितिसामग्रीसम्पत्तिदर्शनार्थम्, अन्यथा स्वातन्त्र्येण

रामरुद्री।

यादृशसिद्धिसत्त्वे न पर्वतो वन्हिमानित्यनुमितिः, तादृशसिद्धिः तादृशानुमितौ प्रतिबन्धकेत्युक्ते तादृशानुमितौ पर्वतो वन्हिमानित्याकारकसिद्धेरपि प्रतिबन्धकत्वं न स्यात्, तादृशसिद्धिसत्त्वेऽपि सिषाधयिषयाऽनुमित्युपादादत उक्तं-**सिषाधयिषेत्यादि**। **पर्वतत्वावच्छिन्नेति**। **'सिषाधयिषाविरह'**–इत्यादिकं परिचायकमात्रं, अन्यथा **विशिष्येत्यस्य** वैयर्थ्यापत्तेरिति भावः।

भिन्नविषयकप्रत्यक्षसामग्रीसत्त्वेऽपि सिषाधयिषां विनैवाऽनुमित्युत्पादात् **प्रत्यक्षसामग्री**त्यस्य समानविषयकप्रत्यक्षसामग्रीपरतां दर्शयति–**तेनेति**। ननु वन्ह्यादौ चक्षुःसन्निकर्षदशायां वह्निव्याप्यधूमवान्पर्वत इति ज्ञानवतो वन्हेः प्रत्यक्षं, नाऽनुमितिरित्येव मूले कुतो नोक्तं ? किं संशयोत्तरप्रत्यक्षस्थलानुरोधेनेत्याशङ्कां निरसितुमाह। **एतादृशेति**। **तद्विषये**-प्रत्यक्षविषये। विषयित्वं सप्तम्यर्थः, तस्य चाऽनुमितावन्वयः, तथा च प्रत्यक्षविषयसाध्यविषयकानुमितिसामग्रीप्रदर्शनार्थमित्यर्थः। **स्वातन्त्र्येणेति**। प्रत्यक्षसामग्र्यनन्तर्गतत्वेनेत्यर्थः। **प्रयासापत्तेरिति**। एकसामग्रीप्रदर्शनेनैवोभयसामग्रीप्रद

नीजिज्ञासादिवत् स्वातन्त्र्येण प्रतिबन्धिका, एवं परामर्शानन्तरं विना प्रत्यक्षेच्छां पक्षादेः प्रत्यक्षानुत्पत्तेः प्रत्यक्षेच्छाविरहविशिष्टानुमितिसामग्री भिन्नविषयकप्रत्यक्षे प्रतिबन्धिका ॥ ७० ॥ इति पक्षतानिरूपणम् ॥

दिनकरी ।

अनुमितिसामग्रीप्रदर्शनेन प्रयासापत्तेः । **स्वातन्त्र्येणेति** । न तु पक्षताकुक्षिप्रविष्टत्वेनेत्यर्थः । शाब्दसिद्धौ सत्यामशाब्दज्ञानं जायतामितीच्छायामनुमितेरुत्पादात्सिद्धावनुमितिगोचरेच्छात्वेन, तादृशेच्छाकाले प्रत्यक्षसामग्रीकालेऽनुमित्यनुत्पादेन सामग्न्यामनुमितित्वप्रकारकेच्छात्वेनोत्तेजकत्वस्याऽऽवश्यकतया एकरूपेणोत्तेजकत्वाऽसम्भवात् । एवमुभयत्र सिषाधयिषाविरहस्य नैकसम्बन्धेन विशेषणत्वं, सिद्धौ समवायघटितसामानाधिकरण्येन, चक्षुःसंयोगादिरूपसामग्न्यां तु स्वाश्रयचक्षुःसंयुक्तमनःप्रतियोगिकविजातीयसंयोगघटितसामानाधिकरण्येनेत्येकरूपेण तयोः प्रतिबन्धकत्वासम्भवादित्याशय इति दिक् । **नन्वनुमिति प्रति प्रत्यक्षसामग्न्याः स्वातन्त्र्येण प्रतिबन्धकत्वे भिन्नविषयेऽपि प्रत्यक्षसामग्रीकालेऽनुमित्यनुपपत्तिः** । मन्मते तु अनुमानातिरिक्तप्रकृतसाध्यसाधकमानत्वेन पक्षताकुक्षौ तस्याः प्रवेशेनोक्तापत्त्यनवकाशादत आह । **एवमिति । अनुमितिसामग्री प्रतिबन्धिकेति** । तथा च भिन्नविषयकानुमितिसामग्न्यभावघटितप्रत्यक्षसामग्न्यास्तत्राऽभावान्न पूर्वोक्तस्थलेऽनुमित्यनुपपत्तिरिति भावः । यद्वाऽनुमितिसामग्री प्रतिबन्धिका—अनुमितिसामग्न्येव प्रतिबन्धिका, न तु भिन्ने विषये प्रत्यक्षसामग्न्यनुमितौ प्रतिबन्धिकेत्यर्थः । तथा च प्रत्यक्षसामग्न्याः समानविषयकानुमितिं प्रत्येव प्रतिबन्धकतया न पूर्वोक्तानुमित्यनुपपत्तिरिति भावः ॥ ७० ॥ इति पक्षतानिरूपणम् ॥

रामरुद्री ।

र्शनोपपत्तौ पृथक् पृथक् सामग्रीप्रदर्शनस्याऽनुचितत्वादिति भावः । ननु पक्षताकुक्ष्यप्रविष्टत्वेन प्रत्यक्षसामग्न्याः प्रतिबन्धकत्वे किं लाघवं ? प्रत्युत पक्षताकुक्षिप्रविष्टत्वेन प्रतिबन्धकत्व एव लाघवम्, एकप्रतिबन्धकतयैवोपपत्तेरित्याशङ्क्य निराकर्तुमेकप्रतिबन्धकतैव न सम्भवति, भिन्नाभिन्नरूपेणैवेच्छायाः सिद्धौ सामग्न्याश्चोत्तेजकत्वस्य वाच्यत्वादित्याह—**शाब्देत्यादि** । नील इत्यादिवाक्यजन्यशाब्देत्यर्थः । पर्वतो वह्निमानित्यादिवाक्यजसिद्धेरप्रतिबन्धकत्वादिति बोध्यम् । **अनुमितिगोचरेच्छात्वेनेति** । यथोक्तानुमितिगोचरेच्छानिष्ठतद्व्यक्तित्वेनेत्यर्थः । उक्तानुगतेच्छानां तत्तद्व्यक्तित्वेनैवोत्तेजकतायाः पूर्वमुक्त्वादिति ध्येयम् । **अनुमित्यनुत्पादेनेति** । प्रत्यक्षेणैव तादृशेच्छाया विषयसिद्धिसम्भवादिति भावः । **अनुमितित्वप्रकारकेच्छात्वेनेति** । यद्यप्येव सति वह्निप्रत्यक्षसामग्रीकाले प्रत्यक्षातिरिक्तं ज्ञानं जायतामिनीच्छया वह्नेरनुमितिर्न स्यात्, तथाऽपि प्रत्यक्षान्यत्वप्रकारकेच्छात्वेनापि प्रत्यक्षसामग्न्या उत्तेजकत्वस्य कल्पनीयत्वाददोषः । **चक्षुःसंयोगादिरूपेति** । यद्यपि चक्षुःसंयोगमात्रं न सामग्री, तथाऽप्येकचक्षुर्वृत्तित्वसम्बन्धेन तत्पुरुषीयविशेषणज्ञानादिविशिष्टचक्षुःसंयोगस्य सामग्रीत्वसम्भवो बोध्यः । **विजातीयेति** । परात्ममनःसंयोगव्यावृत्तत्वं जात्यावच्छिन्नत्वमित्यर्थः । **स्वातन्त्र्येणेति** । पक्षताकुक्ष्यप्रविष्टत्वेनेत्यर्थः । प्रत्यक्षसामग्रीत्वमात्रेणेति यावत् । **अनुमानातिरिक्तति** । सिषाधयिषाविरहविशिष्टसिद्ध्यनुमित्युपधायकातिरिक्तसिद्ध्युपधायकान्यतरत्वेन प्रतिबन्धकत्वादिति पर्यवसितोऽर्थः । यथाश्रुते सचक्षुषोऽनुमित्यनुपपत्तेरिति बोध्यम् । ननु पक्षत्वसामग्री यथा भिन्नविषयकानुमितिसामग्न्यभावघटिता, तथा भिन्नविषयकानुमितिसामग्न्यपि प्रत्यक्षसामग्न्यभावघटितेति भिन्नविषयकप्रत्यक्षानुमित्योः सामग्रीसमवधानदशायामनुमित्यनुपपत्तिरशक्यसमाधिरेव, अनुमितिं प्रति प्रत्यक्षसामग्रीत्वेन प्रतिबन्धकतया तदभावघटितभिन्नविषयकानुमितिसामग्न्यभावादित्यत आह—**यद्वेति** ॥७०॥ इति पक्षतानिरूपणम्॥

'विजयलक्षण—'इत्यादेः सद्धेतुनिरूपणानन्तरमसद्धेतुनिरूपण **इत्यादिः** । वादिनो **विजयस्वरूपं**

अनैकान्तो विरुद्धश्चाऽप्यसिद्धः प्रतिपक्षितः ।
कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा ॥ ७१ ॥

हेतुप्रसङ्गाद्धेत्वाभासान् विभजते अनैकान्त इत्यादि । **तल्लक्षणं तु यद्विषयकत्वेन ज्ञानस्याऽनुमितिविरोधित्वं तत्त्वम् । तथा हि-व्यभिचारादिविषयकत्वेन ज्ञानस्याऽनुमितिविरोधित्वात्ते दोषाः ।**

दिनकरा ।

हेत्वाभासानिति । विजयलक्षणैककार्यकारित्वमत्र सङ्गतिर्बोध्या । ननु लक्षणात्मकसाधारणधर्मज्ञानं विना विशेषे जिज्ञासानुदयाद्विभागो निष्प्रयोजक इत्यतो लक्षणमाह— **तल्लक्षणं त्विति** । हेत्वाभासलक्षणं त्वित्यर्थः । लक्ष्ये लक्षणं ग्राहयति-**तथा हीति । ते-व्यभिचारादयः** । ननु यद्विषयकत्वेनेत्यत्र तृतीयार्थोऽवच्छेदकत्वं, तथा च वह्निमान् धूमादित्यत्र वन्ह्यभावेऽतिव्याप्तिः, पर्वतविशेष्यकवन्ह्यभावप्रकारकनिर्णयत्वेन वन्ह्यनुमिति प्रति प्रतिबन्धकत्वेन वन्ह्यभावविषयकत्वस्य प्रतिबन्धकतावच्छेदककोटिप्रविष्टत्वात् । न च स्वरूपसम्बन्धरूपावच्छेदकतापर्याप्त्यधिकरणत्वमनतिरिक्तवृत्तित्वं वाऽवच्छेदकत्वं तृतीयार्थः, वन्ह्यभावविषयकत्वस्याऽवच्छेदककोटिप्रविष्टत्वेऽप्यवच्छेदकतापर्याप्त्यनधिकरणत्वादतिरिक्तवृत्तित्वाच्च नाऽतिव्याप्तिरिति वाच्यम् । पर्याप्तिनिवेशेऽसम्भवापत्तेः, अप्रामाण्यज्ञानानास्कन्दितत्वस्याऽधिकस्य प्रतिबन्धकतावच्छेदककोटिप्रविष्टत्वात्, अनतिरिक्तवृत्तित्वरूपावच्छेदकत्वनिवेशे ह्रदो वह्निमान् धूमादित्यादौ वन्ह्यभावविशिष्टह्रदादावव्याप्त्यापत्तेः, प्रतिबन्धकत्वाभाववति ह्रद इत्येतादृशज्ञाने वन्ह्यभावविशिष्टह्रदविषयकत्वस्य सत्त्वात्, वि-

रामरुद्रो ।

यदेकं कार्यं तत्कारित्वं—तत्प्रयोजकत्वमित्यर्थः । स्वोक्तहेतोः सद्धेतुत्वप्रतिपादनेनैव परोक्तप्रतिहेतोर्दुष्टत्वप्रतिपादनेनाऽपि कथाया वादिनो विजयादिति भावः । **विजयेत्युपलक्षणमनुमितिलक्षण—तत्त्वनिर्णयोऽप्यत्रैकं कार्यमित्यपि बोध्यम् । साधारणधर्मज्ञानं विनेति** । तद्धर्मावान्तरधर्मप्रकारकज्ञानगोचरेच्छा प्रति तद्धर्मज्ञानस्य हेतुत्वादिति भावः । **निष्प्रयोजक इति** । नाऽस्ति प्रयोजको यस्मिन्निति व्युत्पत्त्या प्रयोजकशून्य इत्यर्थः । विभागे शिष्यजिज्ञासाया एव प्रयोजकत्वादिति भावः । **हेत्वाभासलक्षणं त्विति । हेतोराभासाः**—दोषा इति व्युत्पत्त्या हेतुदोषलक्षणं त्वित्यर्थः । यद्यपि दुष्टहेतूनामेव विभजनात् दुष्टहेतुलक्षणमेव वक्तव्यम्, तथाऽपि दोषज्ञाने जाते दोषवत्त्वरूपदुष्टत्वलक्षणस्य ज्ञातुं शक्यत्वादादोषः । एवञ्च मूले **'हेत्वाभासाः'** इति पद हेतुवदाभासन्त इति व्युत्पत्त्या दुष्टहेतुपरमेवेति मन्तव्यम् ।

वह्न्यभावेऽतिव्याप्तिरिति । तथा च सद्धेतोरपि दुष्टतापत्तेरिति भावः । **न चेति** । नन्ववच्छेदकतापर्याप्तिनिवेशे वह्न्यभाववद्ह्रदादावसम्भव एव, वह्न्यभाववद्ह्रदविषयकत्वेऽप्यवच्छेदकतापर्याप्तिविरहात्, अप्रामाण्यज्ञानानास्कन्दितत्वानाहार्यत्वनिश्चयत्वान्तर्भावेणैवाऽवच्छेदकतापर्याप्तेः । न चैतत्त्रितयसहितयद्विषयकत्वे प्रतिबन्धकतावच्छेदकतापर्याप्तिस्तत्त्वमिति विवक्षणान्न दोष इति वाच्यम् । विशिष्टविषयकत्वेन प्रतिबन्धकत्वे वह्नित्वादिना गुञ्जाद्यवगाहिभ्रमाणां प्रतिबन्धकत्वानुपपत्त्या निरूप्यनिरूपकभावापन्नविषयिताशालिनिश्चयत्वेनैव प्रतिबन्धकताया वक्तव्यतया विशिष्टविषयकत्वाद्रिसमुदायत्वस्य न्यूनवृत्तितया पर्याप्त्यनवच्छेदकत्वात् । न च प्रमात्मकज्ञानीयनिरूप्यनिरूपकभावापन्नविषयितैव विशिष्टविषयितेति निरूप्यनिरूपकभावापन्नविषयितात्वेन विशिष्टविषयितानां प्रतिबन्धकतावच्छेदकतापर्याप्तिरक्षतैवेति वाच्यम् । प्रत्येकावृत्तेः समुदायावृत्तित्वनियमेनैकदेशातिव्याप्तिवारणाय पर्याप्त्यवच्छेदकतापर्यन्तनिवेशस्याऽऽवश्यकतया यादृशविशिष्टविषयितायामवच्छेदकतापर्याप्तेः कथञ्चिदप्यसम्भवादत आह—**अनतिरिक्तवृत्तित्वं वेति** । प्रतिबन्धकताशून्यावृत्तित्वमेव प्रतिबन्धकतावच्छेदकत्वं, तथा च वन्ह्यभावप्रकारक-

यद्विषयकत्वं च यादृशविशिष्टविषयकत्वं, तेन बाधभ्रमस्याऽनुमिति विरोधित्वेऽपि न क्षतिः, तत्र पर्वतो वह्न्यभाववानितिविशिष्टस्याऽप्रसिद्धत्वान्न हेतुदोषः ।

दिनकरी ।

शिष्टह्रदस्य ह्रदानतिरेकादत आह—**यद्विषयकत्वं चेति** । एतद्विवक्षणप्रयोजनमाह—**तेनेति** । बाधभ्रमस्य–बाधभ्रमत्वसमानाधिकरणस्य पर्वतविशेष्यकवन्ह्यभावप्रकारकत्वादेरित्यर्थः । **अनुमितिविरोधित्वेऽपि**–अनुमितिविरोधितावच्छेदकत्वेऽपि । **न क्षतिः**–न वह्न्यभावादावतिव्याप्तिः । इतरथा वह्न्यभावविषयकत्वस्य पर्वतविशेष्यकवन्ह्यभावप्रकारकत्वरूपानुमितिप्रतिबन्धकतावच्छेदककोटिप्रविष्टत्वात्तत्राऽतिव्याप्तिः स्यादिति भावः । **यादृशविशिष्टेति** विवक्षिते तु तत्र नाऽतिव्याप्तिरित्याह–**तत्रेत्यादिना** । न च वन्ह्यभावविशिष्टपर्वतस्याऽप्रसिद्धत्वेऽपि यादृशविशिष्टपदेन वन्ह्यभावत्वविशिष्टं वह्न्यभावमुपादाय तत्राऽतिव्याप्तिरिति वाच्यम् । यादृशविशिष्टेति विवक्षणेऽनतिरिक्तवृत्तित्वस्यैवाऽवच्छेदकत्वस्य लक्षणे निवेशनीयतया वन्ह्यभावविषयकत्वस्य प्रतिबन्धकत्वाभाववति वह्न्यभाव इति ज्ञाने वृत्तेस्तत्राऽतिव्याप्तेरभावात् । न चैवं पूर्वोक्तरीत्या वह्न्यभावविशिष्टह्रदादावव्याप्तिरिति वाच्यम् । यादृशविशिष्टविषयकत्वेनेत्यस्य यद्रूपावच्छिन्नविषयकत्वेनेत्यर्थकत्वात् , तत्त्वमित्यस्य च तद्वत्त्वमित्यर्थकत्वात् , ह्रद इति ज्ञाने च वह्न्यभावविशिष्टह्रदत्वावच्छिन्नविषयकत्वाभावात् ।

रामरुद्री ।

त्वादेरप्रतिबन्धकनिर्धर्मितावच्छेदककज्ञानसाधारण्यात्वान्न वन्ह्यभावादावतिव्याप्तिरिति भावः । **पूर्वोक्तरीत्येति** । विशिष्टस्य शुद्धानतिरिक्ततया ह्रद इत्यप्रतिबन्धकज्ञानस्याऽपि विशिष्टविषयकतयेत्यर्थः । एवंरीत्या काऽपि लक्षणागमनाद**व्याप्ति**पदं केवललक्षणासत्त्वपरमेव, तथा चाऽसम्भव एवेति पर्यवसितम् । **यद्रूपावच्छिन्नेति** । नन्वेवं तत्त्व वह्न्यभाववद्ह्रदत्वादावेव, न तु दोषे वह्न्यभाववद्ह्रदादाविति कथं तस्य दोषलक्षणत्वमत आह–**तत्त्वमित्यस्येति** । ननु यद्रूपपदेन वह्न्यभाववद्ह्रदत्वमेव ग्राह्यं, तच्च सामानाधिकरण्यसम्बन्धेन वह्न्यभावविशिष्टह्रदत्वमेव, 'कर्मधारयोत्तरभावप्रत्ययस्य पदार्थतावच्छेदकद्वयसामानाधिकरण्यवाचकत्वात्' इति दीधित्युक्तेः, तदवच्छिन्ना च विषयिता न प्रतिबन्धकीभूतज्ञाने, ह्रदो वह्न्यभाववानिति ज्ञाने सामानाधिकरण्यसम्बन्धेन ह्रदत्वे वह्न्यभावस्याऽप्रकारत्वादित्यत आह । **वह्न्यभावविशिष्टेति** । तथा च वह्न्यभावह्रदत्वोभयमेव तत्र यद्रूपपदेन ग्राह्यं, न तूक्तविशिष्टं, येनोक्तदोषः स्यात् , निर्धर्मितावच्छेदककवह्न्यभावविशिष्टह्रदत्ववानित्यप्रतिबन्धकज्ञानेऽप्युक्तयद्रूपावच्छिन्नविषयतासत्त्वेनासम्भवश्च स्यादिति भावः । ह्रद इति ज्ञानेऽपि ह्रदत्वावच्छिन्नविषयितासत्त्वात् वह्न्यभावावच्छिन्नविषयत्वाभावादेवोभयावच्छिन्नविषयितारिह इति सूचनायैव ग्रन्थकृता वह्न्यभावावच्छिन्नविषयतारिरह मात्रं प्रदर्शितं, न तु वह्न्यभावमात्रं यद्रूपपदग्राह्यमिति तदभिप्रायः,तथा सति केवलवह्न्यभावावच्छिन्नविषयिताया अप्रतिबन्धकवह्न्यभाववानिति निर्धर्मितावच्छेदककज्ञानसाधारण्येन वह्न्यभावमात्रं यद्रूपपदेनोपादाय लक्षणागमनादिति बोध्यम् ।

अथैवं वह्न्यभावह्रदत्वोभयावच्छिन्नं विषयित्वं वह्न्यभावह्रदत्वोभयनिष्ठप्रकारतानिरूपितविशेष्यता निरूपकत्वमेव, तच्चाऽप्रतिबन्धके एकत्र द्वयमितिरीत्या वह्न्यभावह्रदत्वोभयप्रकारके, वह्न्यभावावच्छिन्नविशेष्यकह्रदत्वप्रकारके च ज्ञाने वर्तत इति तादृशविषयितायाःप्रतिबन्धकतातिरिक्तवृत्तित्वादसम्भव इति चेत्–

अत्र केचित् , यद्रूपावच्छिन्नप्रकारतानिरूपितयद्रूपावच्छिन्नविशेष्यतानिरूपकत्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नविशिष्टतद्रूपावच्छिन्नो दोष इत्यर्थे तात्पर्यात्। वह्न्यभावत्वावच्छिन्नप्रकार-

न च वह्न्यभावव्याप्यपाषाणमयत्ववानितिपरामर्शकाले वह्निव्याप्यधूमस्याऽऽभासत्वं न स्यात्, तत्र वह्न्यभावव्याप्यवान् पक्ष इति विशिष्टस्याऽ-

दिनकरी ।

अथाऽत्राऽनतिरिक्तवृत्तित्वरूपस्याऽवच्छेदकत्वस्य विवक्षणेऽनुमितिप्रतिबन्धकत्वाभाव-वति ह्रदो वह्निमान्न वेति संशये, वह्न्यभाववान् ह्रदो वह्निमानित्याहार्यनिश्चये, अप्रामाण्य-ज्ञानास्कन्दिततादृशनिश्चये च वह्न्यभावविशिष्टह्रदविषयकत्वस्य सत्त्वादसम्भव इति चेन्न ।

रामरुद्री ।

तानिरूपितह्रदत्वावच्छिन्नविशेष्यतानिरूपकत्वस्याऽनुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वाद्भवति वह्न्यभा-वत्वावच्छिन्नविशिष्टो ह्रदत्वावच्छिन्नो दोष इत्याहुः ।

तदसत् । तथा सति घटो न द्रव्यमित्यनुमितिप्रतिबन्धकीभूत-घटो द्रव्यमिति-निश्चयविषयशुद्धद्र-व्यत्वविशिष्टघटादावव्याप्तिप्रसङ्गात्, यद्रूपावच्छिन्नप्रकारतात्वेन द्रव्यत्वप्रकारताया उपादातुमशक्यत्वात्, तस्या निरवच्छिन्नत्वात्।

परे तु-यद्रूपवैदेन वह्न्य भावधर्मितावच्छेदकतापन्नह्रदत्वादिकमेव ग्राह्यम्। धर्मितावच्छेदकतापन्नह्रद-त्वावच्छिन्नत्वं च स्वविषयितायां धर्मितावच्छेदकतानिरूपितस्वनिरूपकतावच्छेदकताकत्वं ह्रदो वह्न्यभा-ववानिति ज्ञानीयविषयितानिरूपकतावच्छेदकतैव वह्न्यभावधर्मितावच्छेदकतानिरूपिता, एकनिष्ठैकज्ञानी-यप्रकारताविशेष्यतयो[र्विशेष्यताप्रकारतयो]र्भेदवादिमते निरूप्यनिरूपकभाववत् धर्मितावच्छेदकत्व-विषयितानिरूपकतावच्छेदकतयोरपि निरूप्यनिरूपकभावोऽभ्युपेयते, ह्रदत्वावच्छिन्नविशेष्यकवह्न्यभावप्र-कारकज्ञान एव वह्न्यभ वधर्मितावच्छेदकतापन्नह्रदत्वावच्छिन्नविषयकत्वं, प्रतीत्यनुरोधादिति वदन्ति ।

केचित्तु-वह्न्यभावह्रदत्वोभयप्रकारकज्ञानस्य समूहालम्बनतया तत्र प्रकारताभेदेन विशेष्यतया भि-न्नत्वेन न तत्रोभयप्रकारतानिरूपितविशेष्यतानिरूपकत्वं, वह्न्यभावधर्मितावच्छेदककज्ञानीयविषयितावार-णाय प्रकृतानुमित्यनिरूपितप्रतिबन्धकतानवच्छेदकत्वेन विशेषणीया यद्रूपावच्छिन्नविषयिता, उक्तज्ञाने उभयप्रकारतानिरूपितैकविशेष्यतासत्त्वेऽपि तस्या वह्न्यभाववान् ह्रद इति ज्ञाननिष्ठप्रकृतानुमित्यनिरूपित-प्रतिबन्धकतावच्छेदकत्वात्तामादाय नाऽसम्भव इत्याहुः ।

तदप्यसत् । वह्न्यभाववद्भ्रदादिविषयिताया अपि ह्रदो न वह्न्यभाववानित्यादिज्ञाननिरूपितप्रति-बन्धकतायामवच्छेदकत्वेनाऽसम्भवप्रसङ्गात् । प्रतिबध्यताभेदेन प्रतिबन्धकताभेदादिति ।

अथ जातित्वेन ह्रदत्वावगाहि-जातिमान् वह्न्यभाववानित्यप्रतिबन्धकज्ञानेऽपि यद्रूपावच्छिन्नविषयि-तासत्त्वेनाऽसम्भवापत्त्या यद्रूपावच्छिन्नविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्यद्रूपाव-च्छिन्नविषयतात्वं तत्तद्रूपावच्छिन्नविषयिताशून्यज्ञानीयत्वेन विशेषणीया यद्रूपावच्छिन्नविषयिता, एवञ्च तादृशज्ञानीययद्रूपावच्छिन्नविषयिता, स्वरूपसम्बन्धरूपावच्छेदकतावती तद्रूपावच्छिन्नो दोष इत्युक्त्यैव सामञ्जस्ये व्यर्थमनतिरिक्तवृत्तित्वरूपावच्छेदकत्वानुधावनं, ह्रदत्वावच्छिन्नविषयितादिशून्यज्ञानीयवह्न्य-भावविषयकत्वस्य प्रतिबन्धकतानवच्छेदकत्वेनैकदेशातिव्याप्तेरयोगादिति चेन्न । संयोगः संयोगवानि तिबाधभ्रमविषयसंयोगत्वविशिष्टऽतिव्याप्तेर्दुर्वारत्वात्, तत्र संयोगत्वाद्यवच्छिन्नविषयितानां संयोगत्व-विशिष्टविषयकत्वव्यापकत्वात्, संयोगवत्संयोगाप्रसिद्धया तदवच्छिन्नविषयिताया यद्रूपावच्छिन्नविष यितात्वेन ग्रहीतुमशक्यत्वात्। न च संयोगावच्छिन्नैव विषयिता संयोगत्वविशिष्टविषयकत्वाव्यापिका तत्राऽस्ति, संयोगवतस्तत्राऽपि विषयत्वेऽपि संयोगनिष्ठविषयितानिरूपकतायां व्यधिकरणीभूय संयोग-स्याऽवच्छेदकत्वादिति वाच्यम्। संयोगत्वेन संयोगत्वप्रकारकोक्तभ्रमे तस्या अप्यभावात्।

अथैवमप्यभावत्वेन ह्रदत्वावगाहिन्यामभाववान् वह्न्यभाववानितिबुद्धावपि वह्न्यभावह्रदत्वोभयावच्छि न्नविषयितासत्त्वेन तत्र च यद्यद्रूपावच्छिन्नविषयितात्वमुक्तोभयावच्छिन्नविषयितासमानाधिकरणाभावप्र-तियोगितावच्छेदकं तत्तद्रूपावच्छिन्नविषयिता-शून्यत्वमप्यक्षतमेव, अभावत्वावच्छिन्नविषयितात्वस्य-अतथात्वात्तादृशबुद्धेरनुमित्यप्रतिबन्धकत्वाच्चाऽसम्भवो दुर्वार इति चेत्-,

दिनकरी ।

'ज्ञानस्य' इत्यत्र 'ज्ञान'पदस्याऽनाहार्यप्रामाण्यज्ञानानास्कन्दितनिश्चयपरतया तादृशनिश्चयनिष्ठं यादृशविशिष्टविषयकत्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तत्त्वमित्यर्थलाभादिति दिक्।

रामरुद्री ।

मैवम् । यत्सम्बन्धावच्छिन्नयद्रूपावच्छिन्नविषयितात्वं तादृशाभावप्रतियोगितावच्छेदकं तत्सम्बन्धावच्छिन्नतद्रूपावच्छिन्नविषयिताशून्यत्वस्य ज्ञानविशेषणत्वेन विवक्षणीयत्वात्, उक्तज्ञानस्य च तथाविधसमवायसम्बन्धावच्छिन्नाभावत्वावच्छिन्नविषयितावत्त्वेन वारणसम्भवात्। न चैवमपि यत्र तत्तद्व्यक्तित्वेन ह्रदादेः पक्षता, तत्राऽभावत्वेन तद्व्यक्तित्वावगाह्यप्रतिबन्धकज्ञानवारणमशक्यमेवेति वाच्यम्। तद्व्यक्तित्वस्य जात्यतिरिक्तस्य स्वरूपतोभानासम्भवेन तद्व्यक्तीतरावृत्तित्वेनैव तस्य पक्षतावच्छेदकताया वक्तव्यतयाऽभावत्वेन तत्तद्व्यक्तित्वावगाहिज्ञानस्य यद्रूपावच्छिन्नाविषयकत्वात्। यदि चाऽनवस्थाभयेन तद्व्यक्तित्वं जात्यतिरिक्तमपि स्वरूपनो भासत इत्येवाऽङ्गीकरणीयं, गत्यन्तराभावादिति विभाव्यते, तदा स्वनिरूपितविषयितानिरूपितत्व–स्वभिन्नत्वोभयसम्बन्धेन यद्रूपावच्छिन्नविषयितात्वविशिष्टयद्रूपावच्छिन्नविषयितात्वं तादृशाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयिताविशिष्टतद्रूपावच्छिन्नविषयिताविशेषशून्यज्ञानीयत्वेन लक्ष्यतावच्छेदकीभूतयद्रूपावच्छिन्नविषयिता विशेषणीया, वह्न्यभावत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपिताभावत्वावच्छिन्नप्रकारताशालित्वादेवाऽभाववान् वह्न्यभाववानितिज्ञानवारणमवसेयं,वह्न्यभावत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपितस्वात्मकाभावत्वावच्छिन्नप्रकारतायाः वह्न्यभाववान् ह्रद इति ज्ञानेऽपि सत्त्वेन तद्रूपावच्छिन्नविषयिताविशिष्टतद्रूपावच्छिन्नविषयितात्वस्याऽभावप्रतियोगितावच्छेदकत्वोपपत्तये स्वभिन्नत्वप्रवेश इति निपुणतरमूहनीयम् ।

यद्यप्येवं सति अनतिरिक्तवृत्तित्वानुधावनमफल, संसर्गत्वावच्छिन्नप्रकारतानिरूपितससर्गविषयितानिरूपितसंयोगत्वावच्छिन्नविशेष्यताशालित्वादेवोक्तभ्रमवारणसम्भवेनोक्तप्रयोजनासम्भवात्, तथाऽपि पाषाणमयो न वह्निमानितिज्ञानकालीनस्य पर्वतः पाषाणमय इति ज्ञानस्याऽप्यवच्छेदकधर्मदर्शनविधयाऽनुमितिप्रतिबन्धकत्वेन तद्विषये पाषाणमयपर्वतेऽतिव्याप्तिः, अनतिरिक्तवृत्तित्वनिवेशे तु पाषाणमयो न वह्निमानितिज्ञानशून्यकालीनतादृशज्ञानस्याऽप्रतिबन्धकत्वान्नाऽतिव्याप्तिः । **तादृशनिश्चयनिष्ठमिति** । तथा च **ज्ञानस्येत्यत्र** षष्ठ्यर्थो निष्ठत्वम्, तस्य च यद्विषयकत्वेऽन्वयः, तथा च वह्न्यभाववद्ह्रदविषयकत्वस्याऽनुमितिप्रतिबन्धकतातिरिक्तवृत्तित्वेऽपि तादृशनिश्चयवृत्तित्वविशिष्टस्य तस्याऽनतिरिक्तवृत्तित्वान्नाऽसम्भव इति भावः। यद्यपि विशेष्यीभूतवह्न्यभाववद्ह्रदविषयकत्वस्य प्रतिबन्धकतातिरिक्तवृत्तित्वात् विशिष्टेऽपि तस्मिन्नतिरिक्तवृत्तित्वं दुर्घटं, विशिष्टस्य शुद्धानतिरिक्ततया गुणान्यत्वविशिष्टसत्तायामपि गुणवृत्तित्वाभ्युपगमात्। न च तादृशनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयितात्वमनुमितिप्रतिबन्धकनाशून्यनिरूपिताधेयतानवच्छेदकमिति विवक्षणीयमिति वाच्यम्। तादृशविशिष्टविषयितात्वस्य वैशिष्ट्यविषयितात्वोभयरूपतया तयोः प्रत्येकं प्रतिबन्धकताशून्यवृत्तितावच्छेदकतयोभयस्मिंस्तादृशवृत्तितानवच्छेदकत्वस्योपपादयितुमशक्यत्वात्, तथाऽपि स्वव्याप्यकतत्त्वमेवाऽनतिरिक्तवृत्तित्वं, तथा च तादृशनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयिताव्याप्यकमनुमितिप्रतिबन्धकत्वं तद्रूपावच्छिन्नो दोष इत्यर्थपर्यवसानात्, व्याप्यकताशरीरे च विशिष्टाधिकरणताप्रवेशान्नोक्तदोषावकाशः, तादृशनिश्चयवृत्तित्वविशिष्टयद्रूपावच्छिन्नविषयितात्वावच्छिन्नाधिकरणतायां वा प्रतिबन्धकताशून्यावृत्तित्वं विवक्षणीयमिति ध्येयम्। अत्रेदमवधेयम्। जलवत्त्वावच्छेदेन वह्न्यभाववत्त्वघटितस्य वह्न्यभाववज्जलवद्वृत्तिजलवद्ह्रदस्य बाधादावनन्तर्भूतत्वेन असम्भवल्लक्ष्यभावस्य [जलवान् वह्न्यभाववान् जलवांश्च ह्रद इति ज्ञानस्य] अवच्छेदकधर्मदर्शनविधया अनुमितिप्रतिबन्धकतानतिरिक्तवृत्तिविषयिताकतया तत्राऽतिव्याप्तिः। न च पक्षे साध्यग्रहप्रतिबन्धकतावच्छेदकतया सत्प्रतिपक्षभिन्नतया च बाध एव तदन्तर्भावोऽस्त्विति वाच्यम्। तथा सति यो यत्र यादृशोऽपि हेत्वाभासस्तत्र तद्व्याप्योऽपि तत्रैवाऽन्तर्भवतीत्यत्र तदवच्छेदकस्याऽपि तदन्तर्भावानुक्त्या न्यूनताप्रसङ्गात्, तस्मादवच्छेदकधर्मदर्शनविधया प्रतिबन्धकता न हेत्वाभासलक्षणघटिकेत्येव ग्रन्थकृतां तात्पर्यमित्यङ्गीकरणीयत्वात्। न च ज्ञानवैशिष्ट्यानवच्छिन्न-

प्रसिद्धत्वादिति वाच्यम्। इष्टापत्तेः, अन्यथा बाधस्याऽनित्यदोषत्वापत्तेः, तस्मात्तत्र वन्ह्यभावव्याप्यपाषाणमयत्ववानितिपरामर्शकाले वह्निव्याप्यधू-

दिनकरी।

सत्प्रतिपक्षस्याऽनित्यदोषत्ववादी शङ्कते-**न चेति। विशिष्टस्याऽप्रसिद्धत्वा-दिति। पाषाणमयत्वे वन्ह्यभावव्याप्यत्वाभावादिति भावः। इष्टापत्तेरिति।** तथा च सद्धेतूनां प्रतिपरामर्शेऽपि न दुष्टत्वमिति भावः। **अन्यथा**-प्रतिबन्धकीभूतभ्रमविषय-स्याऽपि दोषत्वे। **अनित्यदोषत्वापत्तेरिति।** पक्षे साध्याभावभ्रमदशायां सद्धेतावपि

रामरुद्री।

त्वेन प्रतिबन्धकता विशेषणीया, अवच्छेदकधर्मदर्शनस्य ज्ञानविशिष्टज्ञानत्वेनैव प्रतिबन्धकतया नोक्त-विशिष्टेऽतिव्याप्तिरिति वाच्यम्। तथा सति जलव्यापको वह्न्यभावो जलवान् ह्रद इतिज्ञानदशयकालेऽपि ह्रदो वह्निमानित्यनुमित्यनुत्पादेन सत्प्रतिपक्षविषयकज्ञानस्याऽपि ज्ञानविशिष्टज्ञानत्वेनैव प्रतिबन्धक-ताया वक्तव्यतया तत्राऽव्याप्तिप्रसङ्गात्। न च व्यापकसामानाधिकरण्यरूपव्याप्तिघटितस्य सत्प्रतिपक्षता न स्वीक्रियते, किन्तु वह्निमदवृत्तिमत्पक्षस्यैव सत्प्रतिपक्षता, अन्यथा जलव्यापकवह्न्यभावकालीनजल-वद्ध्रदादावतिप्रसङ्गापातादिति वाच्यम्। एवमपि साध्यव्यापकीभूताभावप्रतियोगिहेतुरूपविरोधव्याप्तेर-परिहारात्, तस्याऽपि पक्षधर्मताज्ञानकालीनप्रतिबन्धकज्ञान एव विषयत्वात्। न चैवं तद्विषयकत्वस्य प्रतिबन्धकतातिरिक्तवृत्तित्वात् कथं सामान्यलक्षणाक्रान्तता? पक्षवृत्तित्वविशिष्टस्य तादृशहेतेरेव विरोध त्वोपगमे पर्वतो वह्निमान् जलादित्यादौ वह्निव्यापकीभूताभावप्रतियोगिजलादेर्विरोधत्वानुपपत्तेः, तस्य पक्षावृत्तित्वादिति वाच्यम्। यद्रूपावच्छिन्नविषयकनिश्चयसामान्येऽनुमित्यप्रतिबन्धकत्व-पक्षधर्मताग्रह-कालीनत्वोभयाभावस्तद्रूपावच्छिन्नो दोष इत्येवोक्तलक्षणपर्यवसितार्थ इत्युपगमादिति चेन्न। तत्राऽति-व्याप्तिवारणाय प्रकृतानुमितिप्रतिबन्धकतानवच्छेदककिञ्चिदवच्छिन्नविषयिताशून्यत्वेन तादृशनिश्चयो विशेषणीयः, उक्तविशिष्टविषयकनिश्चयश्च तथाविधाधेयतात्वावच्छिन्नविषयिताशाल्येवेति न तत्राऽति-व्याप्तिः। ह्रदो वह्न्यभाववानिति निश्चयस्याऽपि तथाविधह्रदत्वप्रकारतानिरूपितनिरवच्छिन्नविशेष्यता-शालित्वादुक्तं किञ्चिदवच्छिन्नेति। यद्यप्येवं सति एकदेशाव्याप्तिः, एकदेशविषयकस्याऽपि ह्रदो वह्न्य-भाववानिति निश्चयस्य तथात्वात्, तथाऽपि निश्चये यद्रूपावच्छिन्नविषयित्वाघटितविषयिताशून्यत्वमपि निवेश्य साऽपि निरसनीया, एकदेशविषयकतादृशनिश्चयस्याऽप्रसिद्धेः, तादृशविषयितासमानाधिकरणा-भावप्रतियोगितावच्छेदकत्वमेव तद्घटितत्वमिति ध्येयम्। इत्थञ्च जातिमान् वह्न्यभाववानिति ज्ञानवार-णायोक्तगुरुतरविशेषणमपि न देयमेवेति, तदीयविषयितायाः प्रतिबन्धकतानवच्छेदकत्वादेव तद्वारणसम्भ-वात्, एवञ्च ग्रन्थकृल्लेखनस्वरसाद्यद्रूपदेन वह्न्यभावह्रदत्वोभयोपादानेऽपि न क्षतिः, उक्ताप्रतिबन्ध-कज्ञानयोरेतद्विशेषणेनैव वारणात्। न चैवं प्रमेयत्वादिविशिष्टव्यभिचारादावतिव्याप्तिस्तद्वारणाय तादृश-विशिष्टान्तराघटितत्वनिवेशोऽपि नोपादेय इति महालाघवम्।

अथैवं स्वरूपसम्बन्धरूपावच्छेदकत्वनिवेशेऽपि क्षत्यभावादनतिरिक्तवृत्तित्वनिवेशनमफलमिति चेत्प-रित्यज्यतां तदपि, तावताऽप्यनाद्यार्थत्वादिविशेषणानिवेशेन लाघवातिशयस्यैव सम्पत्तेरिति।

वस्तुत उक्तविशिष्टेऽतिव्याप्तिवारणाय स्वातन्त्र्येणैव प्रतिबन्धकतानवच्छेदककिञ्चिदवच्छिन्नवि-षयताशून्यज्ञानविषयत्वरूपं विशेषणमुपादेयम्। एकदेशादावतिव्याप्तिवारणायाऽव्यापकविषयिताशून्य-त्वादिविशेषितनिश्चयवृत्तियद्रूपावच्छिन्नविषयित्वमित्यादि विशेष्यदलमित्यत्रैव ग्रन्थकृत्तात्पर्यमिति दिक्।

के चित्तूक्तविशिष्टेऽतिव्याप्तिवारणाय यादृशविशिष्टविषयकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चय-त्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धकतानवच्छेदकतादृशविशिष्टविषयि-ताद्वयशून्यप्रतीतिविषयत्वेन तादृशविशिष्टो विशेषणीयः, विशिष्टद्वयविषयितायां ज्ञानवैशिष्ट्यानव-च्छिन्नप्रतिबन्धकतानवच्छेदकत्वविशेषणात् वह्न्यभावविषयकनिश्चयविशिष्टवह्न्यभाववद्ध्रदविषयक-निश्चयत्वस्याऽनुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वेऽपि न वन्ह्यभाववद्ध्रदादावसम्भवप्रसङ्ग इत्याहुः।

मस्य नाऽऽभासत्वं, भ्रमादनुमितिप्रतिबन्धमात्रं, हेतुस्तु न दुष्टः । इत्थं च साध्याभाववद्वृत्तिहेत्वादिकं दोषः, तद्वत्त्वं च हेतौ येन केनापि सम्बन्धेनेति नव्याः ।

परे तु यद्विषयकत्वेन ज्ञानस्याऽनुमितिविरोधित्वं, तद्वत्त्वं हेत्वाभासत्वं, सत्प्रतिपक्षे विरोधिव्याप्त्यादिकमेव तथा, तद्वत्त्वं च हेतोर्ज्ञानरूपसम्बन्धेन । न चेवं वह्निमान् धूमादित्यादौ पक्षे बाधभ्रमस्य साध्याभावविषयकत्वेनाऽनुमितिविरोधित्वात् ज्ञानरूपसम्बन्धेन तद्वत्त्वस्याऽपि सत्त्वात् पक्षहेतोरपि बाधितत्वापत्तिरिति वाच्यम् । तत्र ज्ञानस्य सम्बन्धत्वाकल्पनात्, अत्र सत्प्रतिपक्षित इति व्यवहारेण तत्कल्पनात्, तत्र बाधित इति व्यवहाराभावादित्याहुः ।

दिनकरी ।

दोषवत्त्वापत्तेरित्यर्थः । **इत्थं च**–यादृशविशिष्टविषयकत्वेन ज्ञानस्य प्रतिबन्धकत्वं तादृशविशिष्टस्य दोषत्वे च । 'हेत्वादिकम्' इत्यादिना साध्याभावविशिष्टपक्षपरिग्रहः । यादृशविशिष्टपदेन व्यभिचारत्वादिविशिष्टं व्यभिचारादिकमादाय लक्षणं न सम्भवति, व्यभिचारविषयकत्वस्य प्रतिबन्धकताशून्ये व्यभिचार इति ज्ञाने वृत्तित्वेनाऽतिरिक्तवृत्तित्वात्, किन्तु व्यभिचारादिविशिष्टं हेत्वादिकमादायैवेति व्यभिचारादिविशिष्टं हेत्वादिकं दोष इति भावः । नन्वेवं व्यभिचारादिविशिष्टस्य हेतोर्दोषत्वे तद्वत्त्वस्य हेतावभावाद्धेतौ दुष्टत्वव्यवहारो न स्यात् । न च तादात्म्येन तद्वत्त्वं विवक्षणीयमिति वाच्यम् । तथा सति वह्न्यभाववविशिष्टह्रदादेस्तादात्म्येन धूमेऽभावेन ह्रदपक्षके धूमस्य दुष्टत्वं न स्यादत आह–**तद्वत्त्वं चेति**। न च वन्हिव्यभिचारविशिष्टद्रव्यत्वादेर्धूमेऽपि सत्त्वादतिव्याप्तिरिति वाच्यम् । यादृशविशिष्टविषयकज्ञानत्वेन यद्धेतुकानुमितिप्रतिबन्धकत्वं तादृशविशिष्टाश्रयतद्धेतुत्वस्यैव दुष्ट(इति व्यवहारनियामक)त्वादिति दिक् ।

सत्प्रतिपक्षादेरनित्यदोषत्ववादिनां मतमाह–**परे त्विति** । न च वन्ह्यभावादिव्याप्तेरर्थत्पदेनोपादातुं शक्यत्वेऽपि तस्या धूमावृत्तितया न धूमस्य दुष्टत्वं स्यादत आह–**तद्वत्त्वं चेति । ज्ञानेति** । एकज्ञानविषयत्वेन तद्वत्त्वमित्यर्थः । **तद्वत्त्वस्य**–साध्याभाववत्त्वस्य । **तत्र**–बाधकालीनधूमादिसद्धेताविवित्यर्थः । **अत्र**–प्रतिपरामर्शकालीने धूमादिसद्धेतौ । **तत्कल्पनात्**–ज्ञानस्य सम्बन्धत्वकल्पनात् । **ननु** सद्धेतावपि **बाधित** इति व्यवहारेण सम्बन्धत्वकल्पनं ज्ञानस्य भविष्यतीत्यत आह–**तत्रेति** । **बाधभ्रमकालीने** सद्धेताविवित्यर्थः । प्रत्युताऽयं न बाधितः, पुरुषस्तु भ्रान्त इत्येव व्यवहारादिति भावः । **तादृशव्यवहारयोः** स्वानुभवमात्रसाक्षिकत्वं 'आहुः' इत्यस्वरसबीजम् ।

रामरुद्री ।

व्यभिचारत्वादिविशिष्टमिति । वह्निर्धूमस्य व्यभिचारी, पक्षे साध्यस्य बाध इत्यादिव्यवहारात् साध्याभाववद्वृत्तित्वस्य व्यभिचारपदार्थत्वेन साध्याभावस्यैव च बाधपदार्थत्वेन प्रसिद्धतया साध्याभाववद्वृत्तित्वस्यैव प्रकृते व्यभिचारपदार्थता बोध्या । **व्यभिचारादिकमित्यादिना** साध्याभावरूपबाधपरिग्रहः । **तादृशविशिष्टाश्रयतद्धेतुत्वस्यैवेति** । तथा च वह्न्यभाववद्वृत्तिद्रव्यमितिज्ञानस्य तद्धूमहेतुकानुमितावप्रतिबन्धकत्वान्न तादृशद्रव्यत्वविशिष्टत्वेऽपि (धूमस्य) धूमो दुष्ट इतिव्यवहारापत्तिरिति भावः।

अनुमितिविरोधित्वं चाऽनुमितितत्करणान्यतरविरोधित्वं, तेन व्यभिचारिणि नाऽव्याप्तिः ।

दोषज्ञानं च यद्धेतुविषयकं, तद्धेतुकानुमितौ प्रतिबन्धकं, तेनैकहेतौ व्यभिचारज्ञाने हेत्वन्तरेणाऽनुमित्युत्पत्तेः, तदभावाद्यनवगाहित्वाच्च व्यभिचारज्ञानस्याऽनुमितिविरोधित्वाभावेऽपि न क्षतिरिति सङ्क्षेपः ।

दिनकरी

यथाश्रुतविरोधित्वत्यागे बीजमाह-**तेनेत्यादिना** ।

ननु तद्धेतुकतत्साध्यकानुमिति प्रति तद्धेतौ तत्साध्यव्यभिचारग्रहाभावो हेतुर्वाच्यस्तत्राऽऽह-**तदभावेति** । **न क्षतिः**-नाऽव्याप्तिः । नन्वत्र लक्षणेऽवच्छेदकत्वं न स्वरूपसम्बन्धविशेषः, पूर्वोक्तदोषात्, इत्यनतिरिक्तवृत्तित्वमेव निवेशनीयं, तथा च धूमवान् वह्नेरित्यादौ प्रमेयत्वविशिष्टव्यभिचारेऽतिव्याप्तिस्तद्विषयकत्वस्य प्रतिबन्धकतानतिरिक्तवृत्तित्वादत आह-**संक्षेप इति** । प्रकृतानुमितिप्रतिबन्धकतावच्छेदकान्तराघटितत्वेनाऽनुमितिविरोधितावच्छेदकं विशेषणीयं, प्रमेयत्वविशिष्टव्यभिचारश्च प्रकृतानुमितिप्रतिबन्धकतावच्छेदकीभूतो यो व्यभिचारस्तद्घटित एवेति न तत्राऽतिप्रसङ्ग इति दिक् ।

नन्वत्राऽनुमितितत्करणज्ञानान्यतरप्रतिबन्धकत्वमन्यतरनिष्ठप्रतिबध्यतानिरूपकत्वघटितं यदि, तदा पर्वतो वह्निमान् धूमादित्यादौ वह्न्यभावविशिष्टह्रदस्याऽपि दोषताप्रसङ्गः, तस्य पर्वतो वह्निमान् ह्रदो वह्निमानितिसमूहालम्बनात्मकप्रकृतानुमितिनिष्ठप्रतिबद्ध्यतानिरूपितप्रतिबन्धकतावच्छेदकत्वात् । यदि च तादृशान्यतरत्वावच्छिन्नप्रतिबध्यतानिरूप-

रामरुद्री ।

ननु तद्धेतुकेति । न च **तद्धेतुकत्वं** तत्परामर्शोत्तरत्वं, तथा चोभयपरामर्शोत्तरं यत्र एकहेतौ व्यभिचारज्ञानं तत्राऽनुमितेरुभयहेतुकत्वेन तत्र व्यभिचार इति वाच्यम् । अव्यवहितोत्तरत्वसम्बन्धेन तद्धेतुधर्मिकव्यभिचारज्ञानविशिष्टान्यत्वस्यैव प्रकृते तद्धेतुकत्वपदार्थत्वादिति । **प्रकृतानुमितिप्रतिबन्धकतावच्छेदके**त्यस्य विषयविधेर्व्यादिः । तथा च यादृशविशिष्टविषयकत्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तादृशविशिष्टान्तराघटितत्वे सति यादृशविशिष्टविषयकत्वं तथाविधं, तादृशविशिष्टो दोष इति पर्यवसितोऽर्थः । अघटितत्वस्य तदविषयकप्रतीतिविषयत्वरूपत्वेन स्वस्मिन् स्वाविषयकप्रतीतिविषयत्वाभावादसम्भव इत्यन्तरपदं, तच्च न स्वभिन्नार्थकं, व्यभिचारादेः प्रमेयत्वविशिष्टव्यभिचाराभिन्नत्वेनाऽतिव्याप्तिवारणासम्भवात्, किन्तु स्वाविषयकप्रतीतिविषयत्वम् । यद्यपि प्रमेयत्वमवृत्ति, प्रमेयत्वादित्यादाववृत्तित्वाभाववदवृत्तिप्रमेयत्वरूपव्यभिचारेऽव्याप्तिस्तस्य वृत्तिप्रमेयत्वरूपबाधघटितत्वात्, तथाऽपि प्रतिबन्धकतायामेव विशिष्टान्तरविषयकत्वानवच्छिन्नत्वं देयं, व्याप्तिज्ञानप्रतिबन्धकतायां बाधविषयिताव्यापकत्वविरहेणोक्ताव्याप्तिविरहादिति विभावनीयम् ।

केचित्तु स्वसजातीयविशिष्टान्तराघटितत्वनिवेशान्नोक्तदोषः । बाधस्य हेत्वाभासविभाजकरूपेण व्यभिचारसजातीयत्वविरहान्न दोष इत्याहुः ।

तन्न मनोरमम् । 'विशिष्टान्तराघटितत्वाघटितहेत्वाभासविभाजकरूपेणैव साजात्यं विवक्षणीयम् । अन्यथा व्यभिचारविशिष्टमेयत्वादौ हेत्वाभासविभाजकरूपस्यैवाऽभावेन स्वपदेन तस्योपादातुमशक्यत्वेन विशिष्टान्तरघटितं यन्मेयत्वविशिष्टव्यभिचारादि तदन्यत्वस्य तत्र सत्त्वात्तत्राऽतिव्याप्त्यापत्तेः । तथा च बाधोऽपि व्यभिचारसजातीय एव, विशिष्टान्तरघटितत्वाघटितबाधत्वस्य व्यभिचारेऽपि सत्त्वादिति ध्येयम् ।

यदि च स्वपदमनुयोगिपरमेव, स्वसजातीयं यद्विशिष्टान्तरं तदविषयकप्रतीतिविषयत्वमेव लक्षणम् । विशेष्यदलं नैवोपादेयम्, उदासीनघटादेः स्वसजातीयाप्रसिद्धयैव तत्राऽतिव्याप्तिविरहात्, साजात्यमपि

यादृशसाध्यपक्षहेतौ यावन्तो दोषास्तावदन्यान्यत्वं तत्र हेत्वाभासत्वम् , पञ्चत्वकथनं तु तत्सम्भवस्थलाभिप्रायेण ।

दिनकरी ।

कत्वघटितं, तदा तादृशान्यतरत्वस्य कस्य चित्प्रतिबध्यतानवच्छेदकतयाऽसम्भवः, तादृशान्यतरत्वव्यापकप्रतिबध्यतानिवेशे च व्यभिचारादौ बाधादौ चाऽव्याप्तिः, व्यभिचारादेरनुमित्यविरोधितया, बाधादेश्च व्याप्तिज्ञानाविरोधितया तत्प्रतिबद्धयतायास्तथाविधान्यतरत्वाव्यापकत्वात् । किं च तद्धर्मावच्छिन्नपक्षकतद्धर्मावच्छिन्नसाध्यकतद्धर्मावच्छिन्नहेतुकानुमितितत्करणज्ञानान्यतरविरोधित्वं लक्षणे निवेशनीयं, अन्यथा पर्वतो वह्निमान् धूमादित्यादौ पर्वतादेः काञ्चनमयत्वाभावो हेत्वाभासः स्यात् , एवं च निर्वह्निः पर्वतो वह्निमान् धूमादित्यादौ न कोऽपि हेत्वाभासः स्यात् , तादृशानुमितेरप्रसिद्धेरत आह—**यादृशसाध्येति । सम्भवेति । वायुर्गन्धवान् स्नेहादित्यादौ सर्वहेत्वाभाससम्भव इति भावः ।**

हेत्वाभासलक्षणमुक्त्वा मूले वक्ष्यमाणेष्वनैकान्तिकादिलक्षणेषु क्वचिद्दोषं हृदि निधाय

रामरुद्री ।

सम्पूर्णहेत्वाभासविभाजकरूपेणैव विवक्षणीयं, मेयत्वविशिष्टव्यभिचारादौ शुद्धव्यभिचारत्वस्याऽपि सत्त्वेन व्यभिचारस्य तत्सजातीयत्वसम्भवात् । इत्थं च व्यभिचारविशिष्टमेयत्वस्य स्वसजातीयाप्रसिद्धेरेव नाऽतिव्याप्तिरित्युच्यते, तदा मूलविरोधातिरिक्तो नैतन्मते दोष इति ध्येयम् । अत्र च प्रमेयत्वविशिष्टव्यभिचारो दोष इति व्यवहाराभावात्तद्वारणायासो बोध्यः ।

यद्यपि विशिष्टान्तराघटितत्वनिवेशेऽपि तादृशव्यवहारो दुर्निवारः, तथाविधस्य शुद्धव्यभिचारत्वस्याऽपि तत्र सत्त्वेन तेन रूपेण तस्य दोषत्वे इष्टापत्तिसम्भवात् , तथाऽपि विशिष्टान्तराघटितत्वस्य लक्षणे प्रवेशे तेन रूपेणोद्देश्यतावच्छेदकधर्मबोधकत्वनियमोपगमात् दोषपदस्य मेयत्वविशिष्टव्यभिचारत्वस्याऽतथात्वान्न तादृशव्यवहारापत्तिरित्यवधेयम् ।

ननु तादृशान्यतरत्वव्याप्ययत्किञ्चिद्धर्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकता यद्रूपावच्छिन्नविषयिताव्यापिका तद्रूपावच्छिन्नो दोष इत्युक्तौ न दोषः, वस्तुतोऽत्राऽनुमितिपदं पक्षे साध्य—साध्याभाव्याप्यहेतूभयविधेयकसमूहालम्बनानुमितिपरमतो न कोऽपि दोषः, तादृशानुमितित्वव्यापकप्रतिबध्यतानिवेशेन समूहालम्बनानुमितिमादाय दोषवारणसम्भवात् , व्याप्तिश्चाऽन्वयतो व्यतिरेकतश्च निवेश्यते, तेन साधारण्यानुपसंहारित्वयोर्नैकतरासङ्ग्रह इत्यत आह—**किञ्चेति । मूले—यादृशसाध्येति ।** तद्धर्मावच्छिन्नसाध्यपक्षहेतुकानुमितित्वेन किमुद्दिश्य न्यायप्रयोगे यद्धर्मावच्छिन्ने दोषव्यवहारः सम्प्रदायसिद्धस्तावदन्यान्यत्वं तत्रत्यदोषसामान्यलक्षणमित्यर्थः । तेन निर्वह्निः पर्वतो वह्निमानित्यनुमितेरप्रसिद्धावपि न क्षतिः । एवं च निर्वह्निपर्वते वह्निसाधने बाधो दोष इत्यादिव्यवहारेऽपि निर्वह्निपर्वतोद्देश्यकत्व—वह्निविधेयकत्व—**प्रकार**कानुमितिविषयकेच्छया न्यायप्रयोगे तादृशान्यतमो बाध इत्येवाऽर्थः । यद्यपि प्रमेयं गगनवदित्यादौ गगनाभाववत्प्रमेयभिन्नाप्रसिद्धया लक्षणमव्याप्तं, धर्माणामन्यतमत्वेन निवेशेऽपि प्रमेयपक्षतावच्छेदकस्थले अप्रसिद्धितादवस्थ्यम् , वह्न्यभावभिन्नत्वे सति ह्रदत्वभिन्नो यस्तदन्यत्वस्य केवलह्रदत्वसाधारण्येन ह्रदो दोष इति व्यवहारापत्तिश्च, तथाऽपि यद्यद्धर्मावच्छिन्ने दोषत्वव्यवहारस्तत्तद्धर्मावच्छिन्नविषयितान्यतमविषयितानिरूपकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नो दोष इति विवक्षया न दोषः, एकविधदोषस्थलेऽपि विशेषणविशेष्यभावतद्वयाप्यभेदेनाऽन्यतमाप्रसिद्धिरपनेया । एतल्लक्षणे प्रमेयत्वविशिष्टव्यभिचारादौ दोषव्यवहारविरहाद्विशिष्टान्तराघटितत्वनोपादेयमेव । नन्वेतादृशसामान्यलक्षणस्य क्वचिद्दोषद्वयसाधारण्येन क्वचिद्दोषत्रयसाधारण्येन च हेत्वाभासानां पञ्चधा विभागो ऽसङ्गत इत्यत आह—**वायुरित्यादि ।** तथा च तत्तत्स्थलीयदोषसामान्यलक्षणमभिप्रेत्यैव पञ्चधा विभागकरणमिति भावः ।

क्वचिदिति । 'यः सपक्षे विपक्षे च—' इत्यत्र सपक्षवृत्तित्वनिवेशनमनर्थकं, विरुद्धस्याऽनैकान्ति-

एवं च साधारणाद्यन्यतमत्वमनैकान्तिकत्वम् ।

साधारणः साध्यवदन्यवृत्तिः, तेन च व्याप्तिज्ञानप्रतिबन्धः क्रियते ।

असाधारणः साध्यासमानाधिकरणो हेतुः, तेन साध्यसामानाधिकरण्यग्रहः प्रतिबद्ध्यते । (यथा शब्दो नित्यः शब्दत्वादित्यादावसाधारण्यं, शब्दोऽनित्यः शब्दत्वादित्यादौ त्वसाधारण्यभ्रमः ।)

अन्ये तु सपक्षावृत्तिरसाधारणः, सपक्षश्च निश्चितसाध्यवान् , तथा च शब्दोऽनित्यः, शब्दत्वादित्यादौ यदा पक्षे साध्यनिश्चयस्तदा नाऽसाधारण्यं, तत्र हेतोर्निश्चयादिति वदन्ति ।

अनुपसंहारी च अत्यन्ताभावाप्रतियोगिसाध्यकादिः, अनेन व्यतिरेकव्याप्तिज्ञानप्रतिबन्धः क्रियते ।

दिनकरी ।

स्वयमनैकान्तिकादीनां लक्षणान्याह-**एवमिति** । 'साधारणादीत्यादिना असाधारणामुपसंहारिणोः परिग्रहः ।

नन्वेतस्याऽनुमितितत्करणज्ञानान्यतरविरोधिज्ञानविषयत्वाभावात् कथं हेत्वाभासत्वमित्यतो दूषकताबीजमाह-**तेन चेति** । एवमग्रेऽपि । **क्रियत इति** । व्याप्तिघटकाव्यभिचारांशे व्यभिचारज्ञानस्य प्रतिबन्धकत्वादिति भावः ।

प्रतिबध्यत इति । व्याप्तिघटकीभूतसामानाधिकरण्यग्रहः प्रतिबध्यत इत्यथः । एवं च साधारणासाधारणानुपसंहारिणां व्याप्तिज्ञानप्रतिबन्धकता(रूप) दूषकताबीजैक्येनैकहेत्वाभासत्वमुपपद्यते, साधारणेनाऽव्यभिचारग्रहस्य, असाधारणेन सामानाधिकरण्यग्रहस्य, अनुपसंहारिणा च व्यतिरेकव्याप्तिग्रहस्य प्रतिबन्धादिति भावः ।

प्राचीनमतमाह-**अन्ये त्विति** । पक्षे साध्यसन्देहदशायामेवाऽसाधारणस्य हेत्वाभासता, न तु निश्चयदशायां, तदा पक्षस्यैव सपक्षत्वेन निश्चितसाध्यवद्वृत्तित्वाभावादित्यनित्यदोषत्वं तस्येत्याह-**इत्थं चेति** । **असाधारण्यघटकसपक्षत्वस्य निश्चयघटितत्वे** चेत्यर्थः । **तत्र**-निश्चितसाध्यवति पक्षे । साधारणादित्रयाणामेकहेत्वाभासत्वानुपपत्तिः 'वदन्ति' इत्यनेनाऽस्वरसः सूचितः ।

व्यतिरेकव्याप्तिग्रहप्रतिबन्ध इति । केवलान्वयिसाध्यके चाऽन्वयव्याप्तिज्ञानादेर्नाऽनुमितिरिति भावः ।

रामरुद्री ।

कत्वे इष्टापत्तेः, धर्मिण एकत्वेऽपि विशेषणभेदेन विशिष्टस्य प्रतिबन्धकज्ञाने विषयितया साङ्कर्यविरहेण विभागोपपत्तेरिति भावः ।

व्याप्तिघटकाव्यभिचारांशे इति । इदञ्च साध्यवदन्यावृत्तित्वे सति साध्यसामानाधिकरण्यं व्याप्तिरित्यभिप्रायेण, व्यापकसामानाधिकरण्यस्य व्याप्तित्वे तु स्वसमानाधिकरणाभावप्रतियोगितावच्छेदक एव साधारणो बोध्यः, तदभावज्ञानस्यैव तज्ज्ञानप्रतिबन्धकत्वादिति ध्येयम् ।

एकहेत्वाभासत्वानुपपत्तिरिति । निश्चितसाध्यवदवृत्तित्वज्ञानस्य नीलघटाधिकरणावृत्तित्वज्ञानस्य घटवत्ता ज्ञान इव साध्यसामानाधिकरण्यज्ञाने प्रतिबन्धकताविरहेण दूषकताबीजाभावेनाऽसाधारणस्य हेत्वाभासत्वानुपपत्तिरिति भावः ।

ननु केवलान्वयिसाध्यकहेतोर्दुष्टत्वे तत्साध्यकानुमित्युपपत्तये व्यापकसामानाधिकरण्यमेव व्याप्तिरिति नैयायिकसिद्धान्तो विरुध्यत इत्याशङ्क्याऽऽह-**केवलान्वयीति** । **प्रतिबन्ध**पदं प्रतिबन्धकग्रह-

विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी, अयं साध्याभावग्रहसामग्रीत्वेन प्रतिबन्धकः । सत्प्रतिपक्षे तु प्रतिहेतुः साध्याभावसाधकः, अत्र तु हेतुरेवेति विशेषः, साध्याभावसाधक एव हेतुः साध्यसाधकत्वेनोपन्यस्त इत्यशक्तिविशेषोपस्थापकत्वाच्च विशेषः ।

सत्प्रतिपक्षः साध्याभावव्याप्यवान् पक्षः ।

अगृहीताप्रामाण्यकसाध्यव्याप्यवत्त्वोपस्थितिकालीनागृहीताप्रामाण्यक-

दिनकरी ।

नन्वेवं साध्याभावसाधकात् सत्प्रतिपक्षाद्विरुद्धस्य भेदो न स्यादत आह–**सत्प्रतिपक्षे त्विति । प्रतिहेतुः**–प्रतिकूलो द्वितीयो हेतुः । ननु यदि दूषकताबीजैक्येऽपि हेतुभेदे सत्प्रतिपक्षः, हेत्वैक्ये विरुद्धरूपं हेत्वाभासान्तरमित्युच्यते, तदा यत्राऽन्वयिना हेत्वन्तरेण प्रतिरोधस्तत्र सत्प्रतिपक्षः, यत्र तु व्यतिरेकिणा तत्र हेत्वाभासान्तरं स्यादतो भेदकान्तरमप्याह–**साध्याभावेति** । वस्तुगत्या साध्याभावसाधके हेतावेव तव साध्यसाधकत्वभ्रम इति स्थापनावादिनं प्रति भ्रमरूपाऽशक्तिसूचकत्वं विरुद्धस्य, न त्वेवं सत्प्रतिपक्षस्येति भावः ।

साध्याभावव्याप्येति । एवं साध्यवदन्यत्वव्याप्यवान् पक्षः, पक्षनिष्ठौ साध्याभाव–साध्यवदन्यत्व–व्याप्यावपि बोध्यौ, अन्यतमत्वादिनाऽनुगमान्न विभागव्याघातः ।

सत्प्रतिपक्षव्यवहारौपयिकमन्येषां सत्प्रतिपक्षलक्षणमाह–**अगृहीतेति** । नित्यत्वव्याप्यशब्दत्ववत्ताज्ञानशून्यकालीनानित्यत्वव्याप्यकृतकत्वपरामर्शसत्त्वेऽपि सत्प्रतिपक्षव्यवहाराभावात् कालीनान्तमुपस्थितिविशेषणम् । गृहीताप्रामाण्यकनित्यत्वव्याप्यवत्ताज्ञानकालीनानित्यत्वव्याप्यकृतकत्वपरामर्शसत्त्वेऽपि तद्व्यवहाराभावाद्**गृहीताप्रामाण्यकेति प्रथमो**पस्थितिविशेषणम् । तादृशकालीनानित्यत्वव्याप्यवत्तापरामर्शसत्त्वेऽपि तत्राऽप्रामाण्यग्रहकाले **तथा व्यवहाराभावाद्गृहीताप्रामाण्यकत्वं** द्वितीयोपस्थितिविशेषणम् । व्यवहारमात्रोपयोगिनो निरुक्तरूपस्य प्रकृतानुपयोगः, **उपस्थितिघटितयोक्तरूपस्य स्वरूपसत एवो-**

रामरुद्री ।

विषयार्थकं, तस्य च केवलान्वयिसाध्यशब्दार्थेऽत्यन्ताभावाप्रतियोगिसाध्येऽन्वयः ।

भेदो न स्यादिति । यद्यपि साध्याभावव्याप्यवान् पक्षः सत्प्रतिपक्षः, विरोधस्तु साध्यव्यापकाभावप्रतियोगी प्रकृतो हेतुरिति स्वरूपभेदो वर्तत एव, तथाऽपि यथा साधारणादीनां परस्परवैलक्षण्येऽपि दूषकताबीजस्यैक्येनैकहेत्वाभासत्वं, तथा सत्प्रतिपक्षविरोधयोरपि विरोध्यनुमितिसामग्रीत्वेन प्रतिबन्धकतारूपदूषकताबीजैक्यादेकहेत्वाभासत्वं स्यादिति भावः । **अन्वयिना**—अन्वयव्याप्तिमता । **व्यतिरेकिणा**–व्यतिरेकव्याप्तिमता । **अशक्तीति** । तथा चाऽशक्तिसूचकत्वमेव दूषकताबीजं विरोधे भिन्नमिति भावः ।

बोध्याविति । नन्वेवञ्चतुष्टयस्याऽनुगतरूपाभावात् कथमेकरूपेणैषां विभागः ? यदि च साध्याभावोत्थापकत्वेन विभागस्तदा विरुद्धोऽप्येतन्मध्य एवाऽन्तर्भूत इत्यत आह–**अन्यतमत्वेति** । **आदिनै**–तच्चतुष्टयविषयकधीविषयतावच्छेदकधर्मवत्त्वपरिग्रहः ।

सत्प्रतिपक्षव्यवहारौपयिकमित्यनेनैतादृशस्थले प्राचां सत्प्रतिपक्षव्यवहारमात्रं नत्वयं हेतुदोषात्मकः सत्प्रतिपक्ष इति सूचितम् । **'प्रथमोपस्थिति' इत्युपलक्षणं**, समबलविरोधिपरामर्शद्वयसत्त्व एव तथा व्यवहारादित्यवधेयम् । **प्रकृतानुपयोगः**–हेत्वाभासनिरूपणप्रस्तावे उपयोगाभावः । नन्वयमेव सत्प्रतिपक्षाभिधो हेत्वाभास इति कुतो न व्यवहारोपयोग इत्यत आह–**उपस्थितीति**। विरोधिपरामर्शद्व-

तदभावव्याप्यवत्त्वोपस्थितिविषयस्तथेत्यन्ये ।

अत्र च परस्पराभावव्याप्यवत्ताज्ञानात् परस्परानुमितिप्रतिबन्धःफलम्।

अत्र के चित् । **यथा घटाभावव्याप्यवत्ताज्ञानेऽपि घटचक्षुःसंयोगे सति घटवत्ताज्ञानं जायते, यथा च शङ्खे सत्यपि पीतत्वाभावव्याप्यशङ्खत्ववत्ताज्ञाने सति पित्तादिदोषे पीतः शङ्ख इति धीः, एवं कोटिद्वयव्याप्यदर्शनेऽपि कोटिद्वयस्य प्रत्यक्षरूपः संशयो भवति, तथा सत्प्रतिपक्षस्थले संशयरूपाऽनुमितिर्भवत्येव, यत्र चैककोटिव्याप्यदर्शनं तत्राऽधिकबलतया द्वितीयकोटिभानप्रतिबन्धान्न संशयः, फलबलेन चाऽधिकबल-समबलभावः कल्प्यत इत्याहुः ।**

तन्न । तदभावव्याप्यवत्ताज्ञाने सति तदुपनीतभानविशेषशाब्दबोधादेरनुदयाल्लौकिकसन्निकर्षजन्यदोषविशेषाजन्यज्ञानमात्रे तस्य प्रतिबन्धकता, लाघवात्, न तूपनीतभानविशेषे शाब्दबोधे च पृथक् प्रतिबन्धकता, गौरवात् । तथा च प्रतिबन्धकसत्त्वात् कथमनुमितिः ? न हि लौकि-

दिनकरी ।

पयुक्तस्याऽऽभासतायामप्रयोजकत्वादित्यस्वरसं सूचयति-**अन्य इति ।**

सत्प्रतिपक्षस्य दूषकताबीजं दर्शयति-**अत्रेत्यादिना ।**

सत्प्रतिपक्षस्य संशयजनकत्वं दूषकताबीजं, नत्वनुमितिप्रतिबन्धकत्वं, **तदभावव्याप्यवत्ताज्ञानस्याऽनुमितिप्रतिबन्धकत्वे** मानाभावादिति रत्नकोशकारमतं **दूषयितुमुपन्यस्यति-अत्र केचिदित्यादिना । अनुमितिर्भवत्येवेति ।** अनुमितिं प्रति **तदभावव्याप्यवत्ताज्ञानस्य** प्रतिबन्धकत्वे मानाभावात्, क्लृप्तत्तदभावानुमितिसामग्रीसामग्रीमेव तत्तदभावकोटिकसंशयानुमित्युत्पत्तौ संशयानुमितिं प्रत्युभयव्याप्यवत्तानिश्चयत्वेनाऽतिरिक्तहेतुताकल्पनप्रयुक्तगौरवाभावाच्चेति भावः । ननु यद्युभयभासकसत्त्वे तदुभयभानं, तदा पित्तादिदोषसत्त्वेऽपि पीतत्वशुक्लत्वोभयस्मृतावुभयोर्भानापत्तिरित्यत आह-**फलबलेनेति ।** तथा च तत्र पीतत्वसाक्षात्कारस्यैवाऽऽनुभविकतया शुक्लत्वग्रहे पित्तरूपदोषस्य प्रतिबन्धकत्वं कल्पयित्वा पीतत्वसाक्षात्कारसामग्र्या अधिकबलवत्त्वं, एवं दूरत्वदोषे सत्यपि स्थाणुत्वपुरुषत्वयोः स्मृतौ संशयस्यैवोदयात्तत्सामग्र्याः समबलवत्त्वमेव कल्प्यत इति भावः ।

ज्ञानमात्रे-तादृशज्ञानत्वावच्छिन्ने । **विशेषे**-दोषविशेषाजन्ये । **गौरवात्**-कार्यकारणभावद्वयकल्पने गौरवादिति भावः । **कथमनुमितिरिति ।** अनुमितेरपि तत्प्रति-

रामरुद्री ।

यस्य स्वरूपसत एव परामर्शकार्यप्रतिबन्धकत्वं, न तु ज्ञातस्य, यादृशरूपावच्छिन्नज्ञानमनुमितिप्रतिबन्धकं तद्रूपावच्छिन्नस्यैव हेत्वाभासतया नैतस्य हेत्वाभासतासम्भव इति भावः । **सूचयतीति ।**

ननु रत्नकोशकारमते तद्वत्ताज्ञाने तदभावव्याप्यवत्ताज्ञानस्याऽप्रतिबन्धकत्वेन परस्परानुमितिप्रतिबन्धकस्य सत्प्रतिपक्षस्थलेऽसम्भवेऽपि निश्चयोत्पादने क्लृप्तशक्तिकयोस्तत्तदभावव्याप्यवत्ताज्ञानयोर्मिलितयोः साध्यसंशयहेतुत्वं कल्पनीयमिति गौरवमित्याशङ्कां निराकर्तुमाह । **क्लृप्तेति ।** अयं भावः-तत्तत्परामर्शस्य तत्तद्विधेयकानुमितित्वमेव कार्यतावच्छेदकं, न तु निश्चयत्वमपि तद्घटकम् । परन्तु एकैकपरामर्शसत्त्वे कोट्यन्तरभासकसामग्र्यभावात् निश्चयात्मिकाऽनुमितिर्भवति, उभयपरामर्शसत्त्वे च कारणबलादुभयकोट्योर्विरोधितया भानेऽर्थात्संशयो भवतीति नाऽधिककार्यकारणभावकल्पनं तन्मते इति । **उभयस्मृताविति ।** संशये कोटिद्वयस्योपनयसन्निकर्षेणैव भानात् पीतत्वशुक्लत्वरूपकोटिद्वयोपस्थितौ पित्तदोषादपि संशय एव स्यात्, न पीतत्वनिश्चय इति भावः ।

कसन्निकर्षस्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयाकाराऽनुमितिः प्रामाणिकी, येनाऽनुमितिभिन्नत्वेनाऽपि विशेषणीयम् । यत्र च कोटिद्वयव्याप्यवत्ताज्ञानं, तत्रोभयत्राऽप्रामाण्यज्ञानात् संशयः, नाऽन्यथा, अगृहीताप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबन्धकत्वादिति ।

असिद्धिस्तु आश्रयासिद्ध्याद्यन्यतमत्वम् ।

आश्रयासिद्धिः पक्षे पक्षतावच्छेदकस्याभावः, यत्र काञ्चनमयः पर्वतो वह्निमानिति साध्यते, तत्र पर्वतो न काञ्चनमय इति ज्ञाने विद्यमाने काञ्चनमये पर्वते परामर्शप्रतिबन्धः फलम् ।

स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याऽभावः, तत्र च ह्रदो द्रव्यं, धूमादित्यादौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावे ज्ञाते पक्षे साध्यव्याप्यहेतुमत्ताज्ञानरूपस्य परामर्शस्य प्रतिबन्धः फलम् ।

साध्याप्रसिद्ध्याद्यस्तु व्याप्यत्वासिद्धिमध्येऽन्तर्भूताः ।

साध्ये साध्यतावच्छेदकस्याऽभावः साध्याप्रसिद्धिः, एतज्ज्ञाने जाते काञ्चनमयवह्निमानित्यादौ साध्यतावच्छेदकविशिष्टसाध्य (व्याप्यवत्ताज्ञानरूप) परामर्शप्रतिबन्धः फलम् ।

एवं हेतौ हेतुतावच्छेदकाभावः साधनाप्रसिद्धिः, यथा काञ्चनमयधूमादित्यादौ, अत्र हेतुतावच्छेदकविशिष्टहेतुज्ञानाभावात् तद्धेतुकव्याप्तिज्ञानादेरभावः फलम् ।

एवं वह्निमान् नीलधूमादित्यादौ गुरुतया नीलधूमत्वस्य हेतुतानवच्छेदकत्वमपि व्याप्यत्वासिद्धिरित्यपि वदन्ति ।

दिनकरी ।

बध्यतावच्छेदकाक्रान्तत्वादिति भावः । कथं तर्ह्युभयव्याप्यवत्तानिश्चयात् प्रात्यक्षिकः संशय इत्याशङ्क्य न भवत्येव तावद्यावत्तनिश्चयेऽप्रामाण्यं न गृह्यते इत्याह–यत्र चेति ।

आश्रयासिद्ध्यादीत्यादिना स्वरूपासिद्धिव्याप्यत्वासिद्धयोः परिग्रहः ।

साध्याप्रसिद्ध्यादीनामाधिक्यं निराकरोति–साध्याप्रसिद्ध्याद्यस्त्विति । आदिना साधनाप्रसिद्धिपरिग्रहः ।

केषांचिन्मतमाह–एवं वह्निमानित्यादिना । वदन्तीत्यनेनाऽस्वरसः, तद्बीजं तु नीलधूमे व्याप्तिसत्त्वात् कथं व्याप्यत्वासिद्धिः । न च तत्र व्याप्तिसत्त्वेऽपि नीलधूमत्वस्यानवच्छेदकतया तदवच्छेदेन व्याप्यत्वासिद्धिरेवेति वाच्यम् । अनतिरिक्तवृत्तित्वरूपा-

रामरुद्री ।

आधिक्यमिति । मूले नीलधूमादिहेतुकस्थल एव व्याप्यत्वासिद्धेरभिधानादिति भावः । अत्र चाऽव्यभिचारविशिष्टसाध्यसामानाधिकरण्याभावतद्व्याप्यावपि व्याप्यत्वासिद्धी बोध्यौ, अन्यतमत्वेनाऽनुगमः, दूषकताबीजं व्याप्तिज्ञानप्रतिबन्धकतावच्छेदकत्वम् । न चैवं दूषकताबीजस्यैक्येन व्यभिचारस्य हेत्वाभासान्तरत्वं न स्यादिति वाच्यम् । दूषकताबीजस्यैक्येऽपि बाधसत्प्रतिपक्षयोरिव व्यभिचारासिद्धयोर्मुनिना पृथगुपदेशेन हेत्वाभासान्तरतासम्भवात् ।

अस्वरस इति। सूचित इति शेषः। सत्त्वादिति। नीलधूमस्य धूमानतिरिक्ततया धूमे व्याप्तिसत्त्वादिति भावः। अनवच्छेदकतयेत्यस्य व्याप्तेरित्यादिः। तदवच्छेदेनेति। यो धर्मो यस्यानवच्छेदकस्तदव-

बाधस्तु पक्षे साध्याभावादिः, एतस्य त्वनुमितिप्रतिबन्धः फलम् । तद्धर्मिकतदभावनिश्चयो लौकिकसन्निकर्षाजन्य-

दिनकरी ।

वच्छेदकत्वस्य नीलधूमत्वेऽपि सत्त्वात् । स्वरूपसम्बन्धरूपावच्छेदकत्वाभावाद्व्याप्यत्वा-प्रसिद्धिरित्यपि न, तथा सति पशुमान् सास्नादिमत इत्यादावपि व्याप्यत्वासिद्धयापत्तेः। सास्नाद्यपेक्षया गोत्वादिजातेर्लघुत्वेन सास्नादेः स्वरूपसम्बन्धरूपावच्छेदकत्वाभावात् । अस्तु वा नीलधूमत्वादेः स्वरूपसम्बन्धरूपावच्छेदकत्वाभावात्तदवच्छेदेन व्याप्त्यभावरू-पव्याप्यत्वासिद्धिः, न तु हेत्वाभासत्वमनुमितितत्कारणीभूत(व्याप्ति)ज्ञानाविरोधित्वात् । न च वह्निमदन्यावृत्तिप्रमेयवानिति प्रमेयत्वसामानाधिकरण्येन व्याप्त्यवगाहिज्ञानादनुमि-त्यापत्तिवारणाय हेतुतावच्छेदकावच्छेदेन व्याप्तिज्ञानस्यैव कारणतया तद्विरोधितया नि-रुक्तव्याप्यत्वासिद्धिर्हेत्वाभास इति वाच्यम् । तावताऽप्यनतिरिक्तवृत्तित्वरूपावच्छेदकत्वज्ञा-नस्य कारणत्वेऽपि तत्र स्वरूपसम्बन्धरूपावच्छेदकत्वाभावग्रहस्य प्राग्याभावानवगाहित-याऽविरोधित्वात् , तस्मात् व्यर्थविशेषणस्थले न व्याप्यत्वासिद्धिर्हेत्वाभासः, पुरुषस्त्वधि-केन निगृह्यत इति ।

साध्याभावादिरित्यादिना साध्यवदन्यत्वस्य पक्षावृत्तिसाध्यादेश्च परिग्रहः । तद्ध-र्मिकतदभावनिश्चयः—आनाहार्याप्रामाण्यज्ञानानास्कन्दिततद्धर्मिकतदभावनिश्चयः । **बाधबुद्ध्युत्तरक्षणे लौकिकसन्निकर्षजन्यविशिष्टबुद्धेरानुभविकत्वादाह । लौकिकसन्निक-र्षाजन्येति** । नन्वेवं तदिन्द्रियजन्यलौकिकबाधनिश्चयोत्तरं तदिन्द्रियजन्यलौकिकतद्-विशिष्टबुद्ध्यापत्तिरिति चेन्न । अलौकिकत्वं प्रतिबद्धयतावच्छेदककोटावनिवेश्य तदिन्द्रिय-

रामरुद्री ।

च्छेदेन तदभावः, मूलावच्छेदेन वृक्षे कपिसंयोगाभाववदिति भावः। **अवच्छेदकत्वाभावादिति।** तन्मूल-स्य वृक्षवृत्तिकपिसंयोगानतिरिक्तवृत्तित्वेऽपि स्वरूपसम्बन्धरूपावच्छेदकत्वाभावादेव मूलावच्छेदेन वृक्षे कपिसंयोगाभावोपगमादिति भावः। **व्याप्यत्वासिद्ध्यापत्तेरिति** । यत्र स्वरूपसम्बन्धरूपावच्छेदकत्वं यस्य नाऽस्ति, तदवच्छेदेन व्याप्यत्वाभावोपगमे व्यर्थविशेषणत्वाभावेऽपि गुरुधर्मेण हेतुतायां सर्वत्र व्याप्य-त्वासिद्धिप्रसङ्गादिति भावः । ननु गुरुधर्मेण हेतुतायां सर्वत्र व्याप्यत्वासिद्धिरिष्टेवेत्यत आह । **अस्तु—वेति । अविरोधित्वादिति** । हेतुतावच्छेदकांशे व्याप्त्यवच्छेदकतानवगाहिनोऽपि व्याप्तिप्रकार-कपक्षधर्मताज्ञानस्याऽनुमितिहेतुत्वोपगमात् , अत एव व्याप्त्यंशे निर्धर्मितावच्छेदकादपि वह्निव्याप्यवा निति शाब्दपरामर्शादप्यनुमितिरङ्गीक्रियत इति भावः। मीमांसकमतानुयायी शङ्कते । **न चेति** । तथा चोक्तपरामर्शस्थलेऽपि (वह्निव्याप्यो) वह्निव्याप्य इति ज्ञानान्तरतोऽनुमितिर्नाऽन्यथेति भावः । **तावताऽपि**—उक्तस्थलेऽनुमितिवारणानुरोधेनाऽपि । उपसंहरति । **तस्मादिति** । गुरुधर्मस्य हेतुताव-च्छेदकत्वस्थले सर्वत्र प्राचीनैर्व्याप्यत्वासिद्धिर्नाऽङ्गीक्रियते, अपि तु स्वसमानाधिकरणव्याप्यतावच्छेद कधर्मान्तरघटितस्य तथात्वस्थले एवेत्यभिप्रायेणाऽऽह । **व्यर्थविशेषणस्थल इति । अधिकेनेति ।** अधिकोक्तेर्निग्रहस्थानत्वेन धूमादित्युक्त्यैव सामञ्जस्ये नीलपदप्रयोगस्याऽधिकत्वादिति भावः ।

साध्यादेश्चेत्यादिना साध्याभाववत्पक्ष–साध्यवदन्यपक्षयोः परिग्रहः । प्रतिबध्यतावच्छेदककोटौ लौकिकसन्निकर्षाजन्यत्वनिवेशस्य फलमाह । **बाधबुद्ध्युत्तरक्षण इति । एवं**–प्रतिबद्धयतावच्छेदककोटावलौकिकत्वनिवेशे । **तद्विशिष्टबुद्ध्यापत्तिरिति** । समानेन्द्रियजन्यबाधबुद्ध्युत्तरं लौकिकसन्निक-र्षेणापि तद्विशिष्टबुद्धेरनुपगमान्नाऽत्रेष्टापत्तिरपि सम्भवतीति भावः । **अलौकिकत्वं**–लौकिकसन्निकर्षा-जन्यत्वम् । ननु लौकिकाभावप्रमायां सत्यां प्रतियोगिनि लौकिकसन्निकर्षासम्भवादेव न लौकिकतद्वत्ता-

दोषविशेषाजन्यतद्धर्मिक-तज्ज्ञानमात्रे विरोधोति।

दिनकरी।

अन्यतद्विशिष्टबुद्धौ तदिन्द्रियजन्यलौकिकतदभावनिश्चयत्वेन प्रतिबन्धकत्वोपगमात्, तदिन्द्रियजन्योपनीतभानात्मकबाधनिश्चयोत्तरं तदिन्द्रियजन्यलौकिकतद्विशिष्टबुद्ध्युदयात् प्रतिबन्धकतावच्छेदककोटौ लौकिकत्वनिवेशः। न च लौकिकतदिन्द्रियजन्याभावप्रमास्थले तदधिकरणे प्रतियोगिनोऽसत्त्वादेव न तद्विशिष्टलौकिकप्रत्यक्षापत्तिरित्यलं तथाविधप्रतिबध्यप्रतिबन्धकभावेनेति वाच्यम्। यत्र प्रतियोग्यधिकरण एव सन्निकृष्टाधिकरणान्तरवृत्तेरभावस्य लौकिकप्रत्यक्षात्मकारोपो दोषेण जनितस्तदुत्तरं तदधिकरणे प्रतियोगिनो लौकिकप्रत्यक्षापादनात्। तत्राऽभावलौकिकप्रत्यक्षजनकदोषस्य प्रतिबन्धकत्वादेव नेयमापत्तिः, अन्यथाऽभावारोपोत्पत्तिक्षणे प्रतियोगिप्रत्यक्षापत्तिरिति तु न, यत्र विनश्यदवस्थदोषेणाऽभावलौकिकप्रत्यक्षात्मकारोपस्तदुत्तरं प्रतियोगिप्रत्यक्षापादनात्, यत्राऽभावलौकिकप्रमासमकालं तद्द्वितीयक्षणे वा तदधिकरणे प्रतयोगिप्रकारकानुभूयमानारोपजनकदोषसमवधानं, तत्राऽभावप्रमोत्तरं प्रतियोगिनो लौकिकप्रत्यक्षात्मकारोपापादनवारणाय वा इन्द्रियभेदेन तथाविधप्रतिबध्यप्रतिबन्धकभावोपगमात् शङ्खो न पीतः, वंशो नोरग इति निश्चयेऽपि पित्तमण्डूकवसाञ्जनादिदोषवशाच्छङ्खः पीतः वंश उरग इत्यारोपोदयात्तत्र व्यभिचारवारणायाऽऽह—**दोषविशेषति।** दोषसामान्याजन्यत्वनिवेशे भ्रममात्रस्यैव बाधाप्रतिबद्धत्वापत्तिरतो विशेषेति। तथा च पित्तमण्डूकवसाञ्जनादिदोषान् विशिष्योपादाय तदजन्यत्वं प्रतिबद्धत्वतावच्छेदककोटौ निवेशनीयमिति भावः। न च पित्तद्रव्यात्मकदोषाजन्यत्वनिवेशो व्यर्थः, शङ्खः पीत इति भ्रमे शङ्खांशेऽनुभूयमानस्यैव पित्तद्रव्यपीतिम्न आरोपोपगमेन तदंशेऽपि लौकिकत्वादलौकिकत्वस्य प्रतिबद्धत्वतावच्छेदके निवेशादेव तत्र व्यभिचारवारणादिति वाच्यम्। पित्तद्रव्यस्याऽन्तराऽनवस्थानदशायामपि तत्पीतिम्नः शङ्खादौ प्रत्यक्षोदयेन स्मर्यमाणारोपस्यैव तत्र नवीनैः स्वीकारात्तदंशे तस्याऽलौकिकत्वात्। तथा सति शङ्खः पीत इति प्रत्यक्षोत्तरं पीतं साक्षात्करोमीति साक्षात्कारित्वप्रहानुपपत्तिः, तद्व्यञ्जकलौकिकविषयतायास्तत्राऽभावादिति तु न, लौकिकविषयताया इव दोषविशेषजन्यत्वस्याऽपि साक्षात्कारित्वव्यञ्जकत्वात्, अन्यथाऽयमुरग इति स्मयमाणारोपे साक्षात्कारित्वप्रहानुपपत्तेः। शङ्खो न पीत इत्यादितदिन्द्रियजन्यबाधबुद्ध्युत्तरं पित्तादिदोषवशात्तदिन्द्रियजन्यः शङ्खः पीत इत्यारोपो यद्यनुभवसिद्धस्तदा पूर्वोक्तेन्द्रियभेदभिन्नप्रतिबद्धत्वप्रतिबन्धकभावेऽपि दोषविशेषा-

रामरुद्री।

द्ध्यापत्तिरिति किं समानेन्द्रियस्थले प्रतिबद्धत्वप्रतिबन्धकभावान्तरेणेति शङ्कते। **न चेति। प्रतियोगिनो लौकिकप्रत्यक्षापादनात्**—तत्प्रत्यक्षापादनसम्भवात्। लौकिकाभावभ्रमस्थले प्रयोजनमुपपाद्य प्रमास्थले तदाह। **यत्राऽभावेति। समवधानमिति।।** इदञ्च प्रमातः पूर्वमेव तादृशदोषसमवधाने बाधप्रमैव न सम्भवति, प्रतियोगिभ्रमजनकदोषेण प्रतिबन्धादित्यभिप्रायेणोक्तमिति बोध्यम्। **दोषविशेषाजन्यत्वनिवेशस्य प्रयोजनमाह। शङ्खो न पीत इत्यादि। भ्रममात्रस्यैवेति।** दोषं विना भ्रमानुत्पत्तेरिति भावः। **मण्डूकेति।** मेकवसाञ्जनरूपदोषाद्धंश उरगस्य।प्रत्यक्षभ्रमोत्पादादिति भावः। **आदिना** इन्द्रजालमन्त्रादिदोषाणां सङ्ग्रहः। **तद्व्यञ्जकेति।** साक्षात्कारित्वजातिव्यञ्जकेत्यर्थः। **'यद्यनुभवसिद्धः'इत्यनेन** वस्तुतस्तादृशानुभव एव नाऽस्ति किमर्थं समानेन्द्रियस्थलीयप्रतिबध्यतावच्छेदके

न तु संशयसाधारणं पक्षे साध्यसंसृष्टत्वज्ञानमनुमितिकारणं तद्विरोधितया च बाधसत्प्रतिपक्षयोर्हेत्वाभमिति युक्तम्। अप्रसिद्धासाध्यकानुमिति-

दिनकरी ।

जन्यत्वं प्रतिबद्ध्यतावच्छेदके निवेशनीयमिति ध्येयम्। ननु बाधप्रतिबद्ध्यतावच्छेदककोटौ लौकिकान्यत्वस्य निवेशे बाधनिश्चयोत्तरं लौकिकसन्निकर्षजन्यसंशयापत्तिरिति चेन्न। भूतलं घटवदित्याकारकलौकिकप्रत्यक्षोत्पत्तिकाले स्वातन्त्र्येण कथञ्चिदुपस्थितस्य घटाभावादेर्भूतले प्रकारतया भानवारणाय समानधर्मितावच्छेदककतत्कोटिकलौकिकप्रत्यक्षसामग्न्या विपरीतकोटिभानप्रतिबन्धकत्वमवश्यमङ्गीकरणीयम्, तथा च बाधनिश्चयोत्तरमपि नाऽऽपत्तिर्लौकिकसन्निकर्षजन्यसंशयस्य, तत्कोटिकलौकिकप्रत्यक्षसामग्न्याः प्रतिबन्धिकाया :सत्त्वेन विपरीतकोटिभानासम्भावात्। तर्हि क्वाऽपि लौकिकसन्निकर्षजन्यसंशयो न स्यादिति चेत्, ओम्, ज्ञानलक्षणाप्रत्यासत्त्यैव पूर्वोपस्थितकोटयोर्भानसम्भवादिति। यत्तु संशयपूर्वं तत्कोटयंशे लौकिकसन्निकर्षसत्त्वे कथं संशयस्य न लौकिकत्वं? कथं वा तत्र संशये विपरीतकोटिभानं? तत्कोटिकलौकिकप्रत्यक्षसामग्न्याः प्रतिबन्धिकायाः सत्त्वादिति, तन्न। तत्र लौकिकसन्निकर्षसत्त्वेऽपि संशयजनकदूरत्वादिदोषस्य लौकिकप्रत्यक्षप्रतिबन्धकस्य सत्त्वेन लौकिकप्रत्यक्षसामग्न्यभावादुभयोपपत्तेरित्यन्यत्र विस्तरः।

कस्य चिन्मतं दूषयति-**नत्विति**। इति युक्तमित्यनेनान्वयः। नन्वेवं बाधनिश्चयकाले संसृष्टत्वज्ञानाभावादेवाऽनुमित्यभावोपपत्तौ बाधनिश्चयस्य नाऽनुमितिविरोधित्वमिति हेत्वाभासत्वं न स्यादत आह—**तद्विरोधितयेति**। अनुमितिकारणीभूतस्य साध्यसंसृष्टत्वज्ञानस्य विरोधितयेत्यर्थः। नन्वप्रसिद्धसाध्यकानुमितिः कुत्राऽपि न भवत्येवेत्यत

रामरुद्री ।

तन्निवेशनीयमिति सूचितम्। **संशयापत्तिरितीति**। संशयनिश्चयसाधारणतद्वत्ताबुद्धित्वस्यैव प्रतिबद्ध्यतावच्छेदकत्वेन संशये पृथक्प्रतिबन्धकताया अभावादिति भावः। **लौकिकसन्निकर्षजन्यसंशय एव न सम्भवति**, एककोटिलौकिकप्रत्यक्षसामग्न्या विरोधिकोटिज्ञानप्रतिबन्धकत्वात्, अन्यथा भूतलं घटवदितिनिश्चयकालेऽपि संशयापत्तेरिति कथं बाधनिश्चयोत्तरं लौकिकसन्निकर्षजन्यसंशयापत्तिरिति समाधत्ते—**भूतलमित्यादि। तर्हीति**। एककोटिलौकिकप्रत्यक्षसामग्न्या विपरीतकोटिभानप्रतिबन्धकत्वे इत्यर्थः। **क्वाऽपि**—बाधनिश्चयानुत्तरमपि। **संशयो न स्यादिति**। दूरस्थस्थाण्वादिधर्मिकस्थाणुत्वादिसंशयो न स्यादित्यर्थः। उक्ताशङ्कायामिष्टापत्तिमाह—**ओमिति। न लौकिकत्वं**—न लौकिकसन्निकर्षजन्यत्वं, लौकिकसन्निकर्षसत्त्वे कोटिभाने बाधकाभावादिति भावः। **उभयोपपत्तेरिति**। संशये लौकिकसन्निकर्षजन्यत्वस्य विपरीतकोटिभानस्य चोपपत्तेरित्यर्थः। लौकिकसन्निकर्षसत्त्वेऽपि तस्य दूरत्वदोषेण कोट्यभासकत्वादिति भावः। **'अन्यत्र विस्तरः'इत्यनेन** संशयजनकदोषसामान्याभावे तु सन्निकृष्टकोटेर्निश्चयाऽपवेति सूचितम्।

कस्य चिन्मतमिति। न तु संशयपक्षतावादिन इति भावः। श्रुत्याऽऽत्मनिश्चयवतोऽपि सिषाधयिषयाऽनुमित्युपपत्तये सशयनिश्चयसाधारणसाध्यसंसर्गज्ञानत्वेनैवैतन्मते कारणतायाः प्रतिपादितत्वादिति विभावनीयम्। मूले-**अप्रसिद्धेति**। पूर्वमगृहीतसाध्यविधेयकेत्यर्थः। तथा च पृथिवीतरवृत्त्यभावप्रतियोगिगन्धवती पृथिवीतिव्यतिरेकपरामर्शजन्यसाध्यविशेषणिकायाः पृथिव्यामितरभेद इत्यनुमितेरभावापत्तेरित्यर्थः(१)। उत्तरदूषणमवतारयति-**नन्वप्रसिद्धेति। न भवत्येवेति**। आचार्यमते सर्वत्रा-

---

(१) अत्राऽयं भावः। विशिष्टबुद्धि प्रति विशेषणज्ञानस्य हेतुतयाऽप्रसिद्धसाध्यकस्थले

त्यनापत्तेः, साध्यसंशयादिकं विनाऽप्यनुमित्युत्पत्तेश्च ।

एवं साध्याभावज्ञाने प्रमात्वज्ञानमपि न प्रतिबन्धकं, मानाभावात्,

दिनकरी ।

आह—साध्यसंशयेति । ननु संशयशून्यकालेऽपि सिषाधयिषाकालीनसाध्यनिश्चयात्मकं साध्यसंसृष्टत्वज्ञानमस्त्येवेत्यत आह **आदाति ।** आदिना सिषाधयिषाकालीनसिद्धिपरिग्रहः । न च संशयो(१)त्पत्त्यैवाऽनुमितिसिद्धिरिति वाच्यम् । सति विशेषदर्शने संशया(न्तरा)योगात् ।

पक्षविशेष्यकसाध्याभावज्ञाने प्रमात्वनिश्चयोऽनुमितिप्रतिबन्धकस्तदभावः कारणमतस्तादृशप्रमात्वमेव बाध इति प्राचीनमतं दूषयति-**एवमिति । प्रमात्वज्ञानमपि** प्रमात्वनिश्चयोऽपि । **मानाभावादिति ।** ग्राह्याभावानवगाहिनस्तादृशज्ञानस्य विरोधित्वे मानाभावादित्यर्थः । ननु पक्षे साध्याभावज्ञानेऽपि तत्राऽप्रामाण्यज्ञानकालेऽनुमितेरुदयान्न साध्याभावज्ञानं प्रतिबन्धकम्, अस्मन्मते तु तदा साध्याभावज्ञानप्रमात्वनिश्चयाभावा-

रामरुद्री ।

ऽन्वयव्याप्तिज्ञानस्यैवाऽनुमितिहेतुतया व्यतिरेकसहचारेणाऽपि अन्वयव्याप्तिरेव गृह्यते इति तैरङ्गीकारादुभयपरामर्शादनुमितेरसिद्धत्वादन्वयव्याप्तेः साध्यघटितमूर्तिकत्वेन व्याप्तिज्ञानसमय एव साध्यज्ञानावश्यकत्वादिति भावः । **सिद्धिपरिग्रहद्वारा । सिद्धेः**—साध्यनिश्चयः, सिद्धिसत्त्वे सिषाधयिषां विना नाऽनुमितिरतः **कालीनान्तम्** । तथा च घनगर्जितेन मेघानुमितिस्थले सशयनिश्चययोर्द्वयोरप्यभावेन साध्यवत्ताज्ञानं नाऽनुमितिहेतुरिति भावः । घनगर्जितेन मेघानुमितिस्थलेऽपि संशय कल्पयित्वा क्षणविलम्बेनैवाऽनुमितिरुपेयते 'अतो नाऽनुपपत्तिरित्याशङ्क्य**—न चेति । संशयोत्पत्त्यैवेति** पाठः **सतीति । ग**र्जितश्रवणानन्तरमेव मेघव्याप्यगर्जितवत्तापरामर्शोत्पत्त्या तेन मेघाभावकोटिकसशयप्रतिबन्धादित्यर्थः । न च विशेषदर्शनेन प्रतिबन्धादभावकोटिभानासम्भवान्मनसा निश्चय एवाऽस्त्विति वाच्यम् । तथा सति सिद्धेः प्रतिबन्धकत्वेनाऽनुमित्यनुपपत्तेः । क्षणविलम्बेन कल्प्यत इति चेत्, परामर्शस्यैव नाशापत्त्याऽनुमित्यनिर्वाहादिति भावः । अत्राऽप्यन्तरपदं प्रामादिकमेव, उक्तस्थले पूर्वं सशयाभावादिति ध्येयम् । यदि चेत्पाठप्रामाण्येऽप्याग्रहः, तदा **'संशयं विना-'**इत्यादिमूलस्य व्याप्तिस्मरणादिना वा परामर्शोत्पत्तिक्षणे पूर्वं संशयस्य नाशादित्यभिप्रायकतां परिकल्प्य घनगर्जितस्थलेऽपि सशयोत्पत्त्यनन्तरमेवाऽनुमितिरित्यभिप्रायश्च कल्पयित्वैव सयोजनीयम् ।

न च साध्याभावज्ञानस्य ज्ञानत्वेन निर्विशे संशयधर्मिकप्रमात्वनिश्चयदशायामपि अनुमितिप्रतिबन्धापत्तिरिति वाच्यम् । इष्टापत्तेः, साध्याभावांशे निश्चितप्रामाण्यकस्य संशयस्याऽपि साध्याभावनिश्चयसमशीलत्वात्, अन्यथोभयत्राऽपि निश्चयनिर्विशेषत्वैतन्मते गौरवापत्तिरिति भावः । **ग्राह्याभावानवगाहिन इति ।** यद्धर्मावच्छिन्ने साध्यवत्त्वमवगाहतेऽनुमितिस्तदवच्छिन्ने ग्राह्यसाध्यस्याऽभावानवगाहिन इत्यर्थः । तेन साध्याभववति साध्याभावप्रकारकमितिप्रामाण्यनिश्चयस्य साध्याभावावगाहित्वेऽपि नाऽनुपपत्तिः । **न साध्याभावज्ञानमिति** । न साध्याभावनिश्चय इत्यर्थः । प्रतिवादिना साध्याभावनि-

---

पूर्वं विशेषणस्य साध्यस्य ज्ञानाविरहादगत्या तत्र साध्यविशेष्यकानुमित्यभ्युपगम आवश्यकः । प्रसिद्धसाध्यकस्थले तु तादृशविशिष्टबुद्धिसामग्रीसम्भवात्पक्षविशेष्यकैवाऽनुमितिर्जायते । तत्र विशेष्यविधया साध्यस्य भानपरिहाराय पुनः तथाविधानुमितिं प्रति साध्यज्ञानमात्रस्य विरोधित्वमावश्यकमित्यन्यत्र विस्तरः ।

(१) 'संशयान्तरोत्पत्त्यैव'इत्यपि पाठः ।

गौरवाच्च, अन्यथा सत्प्रतिपक्षादावपि तदभावव्याप्यवत्ताज्ञाने प्रमात्वविषयकत्वेन प्रतिबन्धकतापत्तेः, किन्तु भ्रमत्वज्ञानानास्कन्दितबाधबुद्धेः प्रतिबन्धकता, तत्र भ्रमत्वशङ्काविघटनेन प्रामाण्यज्ञानं क्वचिदुपयुज्यते।

न च बाधस्थले पक्षे हेतुसत्त्वे व्यभिचारः, पक्षे हेत्वभावे स्वरूपासिद्धिरेव दोष इति वाच्यम्। बाधज्ञानस्य व्यभिचारज्ञानादेर्भेदात्।

दिनकरी।

देवाऽऽऽनुमित्युत्पत्तिरत आह-**गौरवादिति**। तथा च तत्राऽनुमितिनिर्वाहाय संशयनिश्चयसाधारणाप्रामाण्यज्ञानाभाव एव प्रतिबन्धकतावच्छेदककोटौ निवेश्यते, न तु पक्षविशेष्यकसाध्याभावज्ञानप्रमात्वनिश्चयत्वेन प्रतिबन्धकत्वं, गौरवादित्यर्थः। यत्र पक्षे साध्याभावज्ञानमस्ति—ननु तत्र प्रामाण्यज्ञानं, न वाऽप्रामाण्यज्ञानं, तत्राऽप्यनुमितिर्न भवत्येवेति भावः। साध्याभाववत्पक्षघटितप्रमात्वविषयकत्वेऽनुमितिप्रतिबन्धकतानतिरिक्तवृत्तित्वसत्त्वात्तस्याऽऽभासत्व दुर्वारमिति तु न, प्रमेयत्वविशिष्टव्यभिचारादेरिव तादृशविशिष्टान्तरघटितत्वेनाऽऽभासत्वायोगादिति। नन्वगृहीताप्रामाण्यकसाध्याभावनिश्चयस्य प्रतिबन्धकत्वे प्रथमोपस्थितप्रमात्वनिश्चय एव तथा स्यादत आह-**अन्यथेति**। सत्प्रतिपक्षादावित्यादिना विरोधादिपरिग्रहः(१)। प्रतिबन्धकतापत्तेरित्यस्याऽनुमित्यादावित्यादिः। ननु साध्याभावज्ञानप्रमात्वज्ञानेऽनुमितिप्रतिबन्धस्तदभावे तु नेत्यन्वयव्यतिरेकाभ्यां प्रमात्वज्ञानस्याऽनुमितिप्रतिबन्धकत्वमत आह-**किं त्विति। क्वचिदुपयुज्यत इति**। तथा चाऽनुमितितत्कारणज्ञानान्यतरं प्रति साक्षात्प्रतिबन्धकीभूतज्ञानविषयत्वाभावान्न साध्याभावज्ञानप्रमात्वं हेत्वाभास इति भावः।

व्यभिचारज्ञानादेरित्यादिनाऽसिद्धिज्ञानपरिग्रहः। **भेदादिति**। तथा च बाधस्थलेऽसिद्धिव्यभिचारान्यतरनियमेऽपि बाधज्ञानस्य व्यभिचारादिविषयकत्वाभावेन तस्य हेत्वाभासान्तरत्वमिति भावः। न च हेतुमान् पक्षः साध्याभाववानित्याकारक एव बाधग्रहः कुतो न भवति? **सामग्री सत्त्वात्**, तथा च व्यभिचारात्मिकैव बाधबुद्धिरिति वाच्यम्। परामरुद्रा।

श्चयस्यैव प्रतिबन्धकत्वोपगमादित्यवधेयम्। **गौरवादिति**। पक्षविशेष्यकसाध्याभावज्ञानविशेष्यकत्वस्य, साध्याभावनिश्चयत्वापेक्षया साध्याभाववति साध्याभावप्रकारकनिश्चयत्वस्य चाऽतिगुरुत्वादित्यर्थः। नन्वप्रामाण्यज्ञानानास्कन्दितयद्रूपावच्छिन्नविषयकनिश्चयत्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नत्वमेव हि हेत्वाभासलक्षणम्, तच्च साध्याभाववति प्रकृतपक्षे साध्याभावप्रकारकत्वरूपप्रामाण्यसाधारणमेव, अधिकन्तु प्रविष्टमित्यादिन्यायादिति तादृशप्रामाण्यस्य हेत्वाभासता त्वन्मतेऽपि दुर्वारित्याशङ्क्य निराकरोति—**साध्याभाववत्पक्षेत्यादि। आभासत्वायोगादित्यत्र** पूर्ववाक्यस्थं **तस्येत्यनुषज्यते। प्रथमोपस्थितेति**। उक्तप्रतिबन्धकतावच्छेदकधर्मस्य प्रमात्वाभावघटितत्वेन प्रतियोगिज्ञानविधया प्रमात्वज्ञानस्य प्रतिबन्धकतावच्छेदकधर्मज्ञानात् पूर्वमपेक्षितत्वेन प्रथमोपस्थितत्वलाघवादेव साध्याभावप्रमात्वस्य हेत्वाभासत्वमुचितमिति भावः। **विरोधादीति**। यद्यपि व्यभिचारादीत्येव वक्तुमुचितं, तथाऽपि सत्प्रतिपक्षस्येव विरोधस्याऽपि साक्षादनुमितिप्रतिबन्धकत्वम्, व्यभिचारादीनां तु अनुमित्यादावित्यादिपदग्राह्यपरामर्श एवेति तथाऽभिधानमिति ध्येयम्। **साक्षादित्यनेन** प्रतिबन्धकत्वोपयोगिज्ञानव्यावृत्तिः। **तस्येति**। बाधस्येत्यर्थः।

(१) 'असिद्ध्यादि'इत्यपि पाठः।

किं च यत्र परामर्शानन्तरं बाधबुद्धिः, तत्र व्यभिचारज्ञानादेरकिञ्चित्करत्वाद्बाधस्याऽनुमितिप्रतिबन्धकत्वं वाच्यम्। एवं यत्रोत्पत्तिक्षणावच्छिन्ने घटादौ गन्धव्याप्यपृथिवीत्ववत्ताज्ञानं तत्र बाधस्यैव प्रतिबन्धकत्वं वाच्यम्। न च पक्षे घटे गन्धसत्त्वात् कथं बाध इति वाच्यम्। पक्षतावच्छेदकदेशकालावच्छेदेनाऽनुमितेरनुभवसिद्धत्वादिति। बाधतद्व्याप्यभिन्ना ये हेत्वाभासाः, तद्व्याप्या अपि तन्मध्य एवान्तर्भवन्ति अन्यथा हेत्वाभासाधिक्यप्रसङ्गात्। बाधव्याप्यसत्प्रतिपक्षो भिन्न एव स्वतन्त्रश्छेन मुनिना

दिनकरी।

र्शात्मकाव्यभिचारज्ञानरूपप्रतिबन्धकसत्त्वेन बाधबुद्धेर्व्यभिचारविषयकत्वासम्भवात्, एकत्र हेतौ व्यभिचाराव्यभिचारविषयैकनिश्चयासम्भवाच्च।

नन्वयोगोलकपक्षकधूमसाध्यकवह्निहेतुके बाधलौकिकप्रत्यक्षवद्व्यभिचारलौकिकप्रत्यक्षमपि व्याप्तिनिश्चये सत्यपि भविष्यतीत्यत आह—**किञ्चेति**। **अकिञ्चित्करत्वादिति**। व्यभिचारज्ञानं ह्यनुमितौ न साक्षात्प्रतिबन्धकं, किन्तु परामर्शप्रतिबन्धद्वारा, तथा च परामर्शोत्तरकालीनं व्यभिचारज्ञानमकिञ्चित्करमिति तत्र बाधबुद्धिरेव प्रतिबन्धिकेति भावः। व्यभिचाराद्यसङ्कीर्णमपि बाधं प्रदर्शयति—**एवमि त्यादिना**। **बाधस्यैवेति**। तत्र पक्षे हेतुसत्त्वेन स्वरूपासिद्धेः, प्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्वरूपस्य व्यभिचारस्य चाऽभावादिति भावः। बाधतद्व्याप्यभिन्ना ये हेत्वाभासास्तद्व्याप्या अपि तन्मध्ये एवाऽन्तर्भवन्तीति पाठः। बाधः—साध्याभावविशिष्टपक्षादिः, तद्व्याप्यः—सत्प्रतिपक्षः, तद्भिन्नाः—व्यभिचारविरुद्धासिद्धाः, तद्व्याप्यानां तत्रैवाऽन्तर्भाव इत्यर्थः। व्यभिचारादेरिव व्यभिचारादिव्याप्यस्याऽपि व्याप्तिग्रहप्रतिबन्धकज्ञानविषयत्वेन पञ्चहेत्वाभासानन्तर्गतत्वे

रामरुद्री।

व्यभिचारविषयकत्वासम्भवादिति। ननु परामर्शोत्तरं बाधबुद्धेर्व्यभिचारविषयकत्वासम्भवेऽपि परामर्श एव बाधग्रहात्मकोऽस्तु, तथा च साध्यव्याप्यहेतुमान् पक्षः साध्याभाववानितिव्यभिचारविषयकबाधबुद्धिसम्भव इत्याशङ्क्यायाह—**एकत्रेति**। प्रतिबन्धकाभावस्य कार्यकालवृत्तित्वेन कारणत्वादिति भावः। इदमुपलक्षणम्। एकत्र पक्षे साध्यव्याप्य—साध्याभाव—विषयकज्ञानासम्भवाच्चेत्यपि द्रष्टव्यम्।

बाधलौकिकेति। विरोधिज्ञानप्रतिबध्यतावच्छेदककोटौ लौकिकसन्निकर्षजन्यत्वनिवेशेनाऽयोगोलकधर्मिकपरामर्शोत्तरमपि तद्धर्मिकलौकिकबाधबुद्धिरिव(१) तदुत्तरमपि वह्निधर्मिकधूमाभाववदयोगोलकवृत्तित्वरूपव्यभिचारविषयकलौकिकप्रत्यक्षं भविष्यतीत्यर्थः। तथा च बाधबुद्धेर्व्यभिचारविषयकत्वमुपपद्यत एवेति भावः। **तत्रेति**। अनुमितावित्यर्थः। ननु स्वरूपासिद्धयभावेऽपि व्यभिचारोऽस्त्येव, उत्पत्तिक्षणावच्छेदेन गन्धाभाववति घटे पृथिवीत्वस्य सत्त्वादित्यत आह—**प्रतियोगिव्यधिकरणेति**। व्यभिचारघटकसाध्याभावे प्रतियोगिवैयधिकरण्यस्याऽप्रवेशे कपिसंयोग्येतद्वृक्षत्वादित्यासिद्धेरपि व्यभिचारित्वापत्तिरिति भावः। अथोक्तसद्धेतोर्बाधितत्वापत्तिवारणाय प्रतियोगिव्यधिकरणसाध्याभाववत्पक्षादिरेव बाधत्वेनाऽङ्गीकरणीयः, एवमुक्तहेतोः सत्प्रतिपक्षितत्ववारणाय प्रतियोगिव्यधिकरणसाध्याभावव्याप्यवत्पक्षस्यैव सत्प्रतिपक्षत्वमप्यङ्गीकरणीयम्। यत्तु साध्यस्य प्रतियोगिवैयधिकरण्यघटितसाध्याभावव्याप्तिता मविरोधाभावेन सत्प्रतिपक्षग्रहस्य साध्यग्रहाविरोधित्वात्प्रतियोगिवैयधिकरण्याघटितव्याप्तिघटित एव सत्प्रतिपक्षोऽङ्गीक्रियत इति नोक्तसद्धेतोः साध्याभावव्याप्यवत्पक्षकत्वमिति।

(१) 'बुद्धेरपि' इत्यपि पाठः।

आद्यः साधारणस्तु स्यादसाधारणकोऽपरः ।
तथैवाऽनुपसंहारी त्रिधाऽनैकान्तिको भवेत् ॥ ७२ ॥
यः सपक्षे विपक्षे च भवेत्साधारणस्तु सः ।
यस्तूभयस्माद्व्यावृत्तः सत्त्वसाधारणो मतः ॥ ७३ ॥
पृथगुपदेशात्, सत्प्रतिपक्षव्याप्यस्तु न प्रतिबन्धक इति प्रघट्टकार्थः ॥७१॥

॥ इति हेत्वाभाससामान्यनिरूपणम् ॥

यः सपक्ष इति । सपक्ष विपक्ष-वृत्तिः साधारण इत्यर्थः । सपक्षः-निश्चितसाध्यवान् । विपक्षः साध्यवद्भिन्नः । विरुद्धवारणाय सपक्षवृत्तित्वमुक्तम् । वस्तुतो विपक्षवृत्तित्वमेव वाच्यं विरुद्धस्य साधारणवेऽपि दूषकतावीजस्य भिन्नतया तस्य पार्थक्यात् ॥ इति साधारणनिरूपणम् ॥

यस्तूभयस्मादिति । सपक्ष-विपक्ष-व्यावृत्त इत्यर्थः । सपक्षः-साध्यवत्तया निश्चितः । विपक्षः-साध्यशून्यतया निश्चितः । शब्दोऽनित्यः शब्दत्वादित्यादौ यदा शब्देऽनित्यत्वस्य सन्देहः, तदा सपक्षत्वं विपक्षत्वं च घटादीनामेव, तद्व्यावृत्तं च शब्दत्वमिति तदा तदसाधारणम् यदा तु शब्देऽ-

दिनकरी ।

तस्याऽतिरिक्तहेत्वाभासत्वं स्यादित्यर्थः । न प्रतिबन्धक इति । साध्याभावव्याप्यव्याप्यवत्ताज्ञानस्य साध्यवत्ताज्ञानविरोधित्वे मानाभावादिति भावः ॥ ७१ ॥

इति हेत्वाभाससामान्यनिरूपणम् ॥

दूषकतावीजस्य भिन्नतयेति । साधारणस्याऽव्यभिचरज्ञाने, विरुद्धस्य सामानाधिकरण्यग्रहे प्रतिबन्धकत्वादिति भावः । ॥ इति साधारणनिरूपणम् ॥

असाधारण्यघटकं सपक्षत्वं निश्चयगर्भं, न तु साध्यवत्त्वमात्रमित्याह-सपक्ष इति ।

रामरुद्रो ।

तन्न, तथा सति प्रतियोगिवैयधिकरण्याघटिततदभावव्याप्यवत्ताज्ञानस्यैव सर्वत्र तद्वत्ताबुद्धिप्रतिबन्धकत्वमित्यायातं, तथा च पूर्वं ग्रन्थकारोक्तस्याऽनुमितिकारणपरामर्शस्य साध्यसंशयप्रतिबन्धकत्वस्याऽनुपपत्तेः, अनुमितिकारणपरामर्शे प्रतियोगिवैयधिकरण्यघटितव्याप्तेरेव विषयत्वात् तस्मात् प्रतियोगिवैयधिकरण्यघटितव्याप्तिघटितस्याऽपि साध्याभावव्याप्यवत्त्वस्य साध्यविरोधित्वसम्भवेन तस्यैव सत्प्रतिपक्षत्वमुचितम् । अथैवमुत्पत्तिक्षणावच्छिन्नघटे यत्र गन्धः साध्यते, तत्र न बाधः सम्भवति, गन्धाभावस्य घटे प्रतियोगिसमानाधिकरणत्वादिति । मैवम् । यत्र देशकालयोः स्वरूपसम्बन्धरूपपक्षतावच्छेदकत्वं, तत्र तदवच्छेदेन साध्याभाववत्त्वस्याऽपि बाधत्वाङ्गीकारादिति ध्येयम् । अत्र न सत्प्रतिपक्षोऽपि, प्रतियोगिव्यधिकरणगन्धाभावव्याप्यस्य घटेऽसम्भवात्, अत एवाऽसङ्कीर्णबाधोदाहरणमिदम् । अन्यथा सत्प्रतिपक्षसङ्कीर्णत्वेन बाधस्य हेत्वाभासान्तरताऽत्रापि न स्यात्, सत्प्रतिपक्षस्य बाधव्याप्यत्वं नाऽनुपपन्नं, व्यापकस्याऽधिकदेशवृत्तित्वे क्षतिविरहात् । न च गन्धाभावस्य केवलस्य सयोगाभाववत् केवलान्वयितया प्रतियोगिवैयधिकरण्यघटितगन्धाभावव्याप्यवत्त्वस्याऽत्राऽपि सम्भवेनैतस्याऽपि सत्प्रतिपक्षसङ्कीर्णतैवेति वाच्यम् । एतादृशस्य सत्प्रतिपक्षत्वाङ्गीकारे घटो गन्धवान् पृथिवीत्वादित्यादिसद्धेतोरपि दुष्टत्वापत्तिरित्यलं पल्लवितेन ॥ ७१ ॥ इति हेत्वाभाससामान्यनिरूपणम् ॥

इति पाठ इति । क चित्पुस्तके तत्पदरहितस्य पाठस्य दर्शनादेतदभिहितम् ।

तथैवाऽनुपसंहारी केवलान्वयिपक्षकः ।

अनित्यत्वनिश्चयः, तदा नाऽसाधारण्यम् । इदं तु प्राचां मतम् । नवीनमतं तु पूर्वमुक्तम् ॥ ७२–७३ ॥ इत्यसाधारणनिरूपणम् ॥

केवलान्वयीति । **सर्वमभिधेयं प्रमेयत्वादित्यादौ सर्वस्यैव पक्षत्वात् सामानाधिकरण्यग्रहस्थलान्तराभावान्नाऽनुमितिः । इदं तु न सम्यक्, पक्षैकदेशे सहचारग्रहेऽपि क्षतेरभावात्,**

दिनकरी ।

एवमग्रेऽपि । सपक्षत्व–विपक्षत्वयोर्निश्चयत्वनिवेशस्य फलमाह–**शब्द इत्यादिना । पूर्वमुक्तमिति ।** असाधारणः साध्यसमानाधिकरणोहेतुरित्यादिनोक्तमित्यर्थः ।। ७२–७३ ।।

।। इत्यसाधारणनिरूपणम् ।।

केवलान्वयिपक्षक इति । अत्र पक्षता साध्यसंशयरूपा गृह्यते, तेन सर्वमभिधेयं प्रमेयत्वादित्यादौ यदा सिद्धिः सिषाधयिषा च, तदा साध्यनिश्चयसम्भवेन सामानाधिकरण्यघटितव्याप्तिग्रहसम्भवात्तस्य सद्धेतोरलक्ष्यतया सिषाधयिषाविरहविशिष्टसिद्धयभावरूपपक्षत्वस्य तदा केवलान्वयित्वेऽपि तत्र नाऽतिव्याप्तिः । अनुपसंहारिणो हेत्वाभासत्वमुपपादयति–**सर्वमभिधेयमित्यादिना । सामानाधिकरण्यग्रहस्थलान्तराभावादिति ।** संशयोत्पत्तिक्षणे निश्चयवारणाय निश्चयं प्रति संशयसामग्र्याः प्रतिबन्धकत्वस्याऽवश्यं वाच्यतया प्रकृते सर्वत्र साध्यसन्देहसत्त्वे तत्पूर्वं तत्सामग्र्याः सत्त्वेन साध्यनिश्चयस्य कुत्राऽप्यसम्भवेन व्यापकसाध्यसामानाधिकरण्यविशिष्टप्रमेयत्वादिरूपव्याप्तिग्रहानुत्पादा(१)न्न तत्राऽनुमितिरित्यनुपसंहारिणो हेत्वाभासत्वमिति भावः । **क्षतेरभावादिति ।** तदानीमपि केवलान्वयिपक्षताकत्वस्याऽनुपसंहारित्वस्य क्षतेरभावादित्यर्थः । **तथा च** तत्राऽनुपसंहारित्वस्य सत्त्वात्तस्य व्याप्तिज्ञानानुत्पादप्रयोजनकत्वानुपपत्तिरिति भावः । न च संशयसामग्र्याः सत्त्वात् कथं पक्षैकदेशे साध्यनिश्चय इति वाच्यम् । सर्वत्वधर्मितावच्छेदककसंशयसाध्यसत्त्वेऽपि घटत्वादिधर्मितावच्छेदककसाध्यनिश्चयोत्पादे बाधकाभावात्, समानप्रकारत्वेनैव विरोधात् । (अ)समानविषयकत्वेन प्रतिबन्धकत्वेऽप्याह–

रामरुद्री ।

अग्रेऽपि–विपक्षत्वनिर्वचनेऽपि । साध्याभाववन्मात्रं न विपक्ष इत्येतल्लाभायैव निश्चितत्वाञ्चनिवेश इति भावः ॥ ७२ ॥ ७४ ॥ ॥ इत्यसाधारणनिरूपणम् ॥

गृह्यत इति । न तु सिषाधयिषाविरहविशिष्टसिद्धयभावरूपेति शेषः । **साध्यनिश्चयेत्यादि सम्भवादित्यन्तं** सद्धेतुत्वे हेतुः । **पक्षत्वस्येति ।** तथा च मूले पक्षपदं पक्षतापरं, भावप्रधाननिर्देशत्वात्, अन्यथा आकाशात्यन्ताभावो नित्यः, ध्वंसप्रागभावभिन्नाभावत्वादित्यादेरनुपसंहारित्वाभावेनानुपपत्तेरिति ध्येयम् । ननु संशयस्य निश्चयाप्रतिबन्धकत्वेन सर्वत्र साध्यसन्देहसत्त्वेऽपि क्वचित् साध्यनिश्चयसम्भवेन सामानाधिकरण्यनिश्चयो न दुर्घट इत्यत आह—**संशयोत्पत्तीति । तदानीमपि ॥** घटोऽभिधेय इत्यादिनिश्चयदशायामपीत्यर्थः । **क्षतेरभावादितीति ।** तादृशनिश्चयकालेऽपि सर्वमभिधेयं न वेति संशयसम्भवात्, सर्वत्वावच्छेदेन निश्चयाभावादिति भावः । ननु किमेतावतेत्यत आह— **तथा चेति । समानप्रकारकत्वेनैवेति ।** तद्धर्मितावच्छेदककसंशयसामग्र्या एव तद्धर्मितावच्छेदक-

---

(१) अत्र **'व्यापकसाध्यसामानाधिकरण्यरूपव्याप्तिविशिष्टप्रमेयत्वादिग्रहानुत्पादात्'** इति पाठः समीचीनः ।

यः साध्यवति नैवाऽस्ति स विरुद्ध उदाहृतः ॥ ७४ ॥
आश्रयासिद्धिराद्या स्यात्, स्वरूपासिद्धिरप्यथ ।
व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ॥ ७५ ॥
पक्षासिद्धिर्यत्र पक्षो भवेन्मणिमयो गिरिः ।
ह्रदो द्रव्यं धूमवत्त्वादत्राऽसिद्धिरथाऽपरा ॥ ७६ ॥
व्याप्यत्वासिद्धिरपरा नीलधूमादिके भवेत् ।

अस्तु वा सहचाराग्रहः, तावताऽप्यज्ञानरूपाऽसिद्धिरेव, न तु हेत्वाभासत्वं तस्य, तथाऽपि केवलान्वयिसाध्यकत्वं तत्त्वमित्युक्तम् ॥

इत्यनुपसंहारिनिरूपणम् ॥

यः साध्यवतीति । 'एव'कारेण साध्यवत्त्वावच्छेदेन हेत्वभावो बोधितः । तथा च साध्यव्यापकीभूताभावप्रतियोगित्वं तदर्थः ॥ ७४ ॥

॥ इति विरुद्धनिरूपणम् ॥

असिद्धिं विभजते– आश्रयासिद्धिरित्यादि ॥ ७५ ॥

पक्षासिद्धिरिति । **आश्रयासिद्धिरित्यर्थः** ।

अपरेति । **स्वरूपा सद्धिरित्यर्थः** ॥ ७६ ॥

नीलधूमादिक इति । **नीलधूमत्वादिकं गुरुतया न हेतुतावच्छेदकं, स्वसमानाधिकरण-व्याप्यतावच्छेदक-धर्मान्तराघटितस्यैव व्याप्यतावच्छेदकत्वात् । धूमप्रागभावत्वसङ्ग्रहाय** स्वसमानाधिकरणेति ॥ इत्यसिद्धिनिरूपणम् ॥

दिनकरी ।

अस्तु वेति । तस्य सहचाराग्रहस्य । तस्य स्वरूपसत एव विरोधित्वेन तज्ज्ञानस्याऽनुमित्यनुत्पादप्रयोजकत्वाभावादिति भावः । न च तत्र सहचाराग्रहप्रयोजकः संशय एव हेत्वाभासः, तस्याऽपि स्वरूपसत एव विरोधित्वात् । न च संशयविषयस्य साध्याभावविशिष्टपक्षादेरेव तत्राऽऽभासत्वमिति वाच्यम् । सर्वमभिधेयमित्यादावभिधेयत्वाभावविशिष्टपक्षाप्रसिद्धेरित्यन्यत्र विस्तरः । ॥ इत्यनुपसंहारिनिरूपणम् ॥

तदर्थ इति । तेनाऽसाधारणे नाऽतिव्याप्तिरिति भावः ॥ ७४ ॥

॥ इति विरुद्धनिरूपणम् ॥

धूमप्रागभावत्वेति । तस्य व्याप्यतावच्छेदकीभूतधूमत्वघटितत्वेन तत्संग्रहो न

रामरुद्री ।

कनिश्चयप्रतिबन्धकत्वेन घटत्वावच्छिन्ने चाऽभिधेयत्वव्याप्यघटपदवाच्यत्ववत्तानिश्चयसत्त्वेन तदवच्छिन्ने संशयसामग्र्यभावादिति भावः । **(अ)समानविषयकत्वेनेति** । तद्विशेष्यकसंशयसामग्र्याः तद्विशेष्यकनिश्चयप्रतिबन्धकत्वे त्वित्यर्थः । ननु सर्वमभिधेयमित्यादौ साध्याभावविशिष्टपक्षाप्रसिद्धावपि संशयविषयसाध्यादेरेवाऽऽभासत्वमस्तु इत्यत आह–**अन्यत्रेति** । पर्वतो वह्निमानित्यादौ साध्यादेर्हेत्वाभासत्ववारणाय यद्रूपावच्छिन्नविषयकत्वमनुमितिप्रतिबन्धकतानतिरिक्तवृत्ति तद्रूपावच्छिन्नस्यैव हेत्वाभासत्वेनाऽङ्गीकरणीयतया साध्यादेरतथात्वादिति भावः ॥ ७३ ॥ ७४ ॥ इत्यनुपसंहारिनिरूपणम् ॥

विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षता ॥ ७७ ॥

विरुद्धयोरिति । **कपिसंयोग-तदभावव्याप्यवत्तापरामर्शेऽपि न सत्प्रतिपक्षत्वमत उक्तं विरुद्धयोरिति। तथा च स्वसाध्यविरुद्धसाध्याभावव्याप्यवत्तापरामर्शकालीन-साध्यव्याप्यवत्तापरामर्शविषय इत्यर्थः ॥ ७७ ॥**

इति सत्प्रतिपक्षनिरूपणम् ॥

दिनकरी ।

स्यादिति भावः । स्वस्य स्वाविषयकप्रतीतिविषयत्वरूपस्वाघटितत्वाभावाद्धूमान्तरेति । न च नीलधूमत्वस्याऽपि तादृशधर्मान्तराघटितत्वमस्त्येव, धूमत्वस्य नीलधूमत्वभिन्नत्वाभावादिति वाच्यम् । स्वाविषयकप्रतीतिविषयत्वस्य स्वपर्याप्तावच्छेदकतानिरूपकप्रकारतानिरूपितावच्छेदकतापर्याप्त्यनधिकरणत्वपर्यवसितस्य तदर्थत्वात्, शुद्धधूमत्वपर्याप्तावच्छेदकताकप्रकारत्व-नीलत्वादिविशिष्टधूमत्वपर्याप्तावच्छेदकताकप्रकारत्वयोर्भेदात् । नन्वेवं वह्निमदन्यावृत्तित्वस्य वह्निव्याप्यतावच्छेदकतानुपपत्तिः, तस्य वह्नित्वरूपतादृशधर्मान्तरघटितत्वात्, धूमान्यान्यत्वादेर्व्याप्यतावच्छेदकत्वापत्तिभिया धर्मान्तरस्य विशेष्यविधयाऽघटकत्वविवक्षणस्याऽशक्यत्वादिति चेन्न । स्वसमानाधिकरणपदेन स्वव्यापकत्वस्य विवक्षितत्वात्, वह्नित्वस्य वह्निमदन्यावृत्तित्वाव्यापकत्वात्, धूमत्वस्य धूमान्यान्यत्वव्यापकत्वाच्चोक्तदोषासम्भवात् । स्वव्यापकत्वं च धर्मान्तरस्य स्वघटकसाध्यसम्बन्धितावच्छेदकत्वेन, अन्यथा धूमालोकान्यतरत्वस्य वह्निव्याप्यतावच्छेदकत्वापत्तेः, धूमत्वालोकत्वयोः प्रत्येकमन्यतरत्वाव्यापकत्वादिति ॥ इत्यसिद्धिनिरूपणम् ॥

'विरुद्धयोः परामर्शे हेत्वोः–' इत्यत्र विरुद्धयोर्हेत्वोः परामर्श इतिभ्रमवारणायाऽऽह–स्वसाध्येति । स्वं–सत्प्रतिपक्षत्वेनाऽभिमतो हेतुः, तत्साध्यविरुद्ध यः साध्याभाव इत्यर्थः ॥ ७५ ॥ ७६ ॥ ७७ ॥ इति सत्प्रतिपक्षनिरूपणम् ॥

ननु **'उत्पत्तिकालीनघटे–'**इत्यादि मूलोक्तमयुक्तं, तत्र पक्षे घटे गन्धशून्यत्वाभावादत

रामरुद्री ।

ननु धूम इति प्रतीतेरपि न विशिष्टधूमत्वादिविषयकत्वं, शुद्धस्य विशिष्टानतिरिक्तत्वाद तस्तदर्थमाह–**स्वेति । तदर्थत्वात्**–अन्तरपदार्थत्वात् । पर्याप्तेः प्रत्येकवृत्तित्वे तु पर्याप्तिसम्बन्धेन तादृशावच्छेदकत्वावच्छिन्नभिन्नत्वमेव पर्याप्त्यनधिकरणत्वस्थाने वक्तव्यं, प्रत्येकमुभयभिन्नत्वस्यैव केवलधूमत्वे विशेषणविशेष्योभयपर्याप्तावच्छेदकत्वावच्छिन्नभेदसत्त्वादिति ध्येयम् । **वह्निमदन्यावृत्तित्वस्येति** । पर्वतो वह्निमान् वह्निमदन्यावृत्तेरितिसन्न्यायप्रयोगस्य सर्वसम्मतत्वेनेष्टापत्त्यसम्भवादिति भावः । **ननु धर्मान्तराघटितत्वं** विशेष्यविधया धर्मान्तरघटितं यत्तदन्यत्वमेव, नीलधूमत्वस्य विशेष्यविधया धूमत्वघटितत्वेऽपि वह्निमदन्यावृत्तित्वे वह्नित्वस्य न तथा घटकत्वमिति न तस्य व्याप्यतानवच्छेदकतापत्तिरित्यत आह–**धूमान्यान्यत्वादेरिति । साध्यसम्बन्धितावच्छेदकत्वेन**–साध्यव्याप्यतावच्छेदकत्वेन । स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकतादृशधर्मवत्त्वमेव व्यापकत्वमिति भावः ॥इत्यसिद्धिनिरूपणम्॥

इति भ्रमेति । यथार्थत्वे पर्वतो वन्हिमान् धूमादित्यादौ वह्न्यभावव्याप्यपाषाणमयत्वस्य परामर्शदशायां सत्प्रतिपक्षानुपपत्तेः, प्राचीनैः तत्राऽपि सत्प्रतिपक्षाङ्गीकारादिति भावः । साध्यसाध्याभावयोरविरोधस्थले तूभयपरामर्शसत्त्वेऽपि न सत्प्रतिपक्षव्यवहार इति मन्तव्यम् ॥७५॥७६॥७७॥

॥ इति सत्प्रतिपक्षनिरूपणम् ॥

गन्धशून्यत्वाभावादिति । निरवच्छिन्नवृत्तिकगन्धाभावविरहादित्यर्थः । तेनोत्पत्तिकालावच्छेदेन

साध्यशून्यो यत्र पक्षस्त्वसौ बाध उदाहृतः ।
उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ॥ ७८ ॥

अथ उपमितिखण्डम् ।

ग्रामीणस्य प्रथमतः पश्यतो गवयादिकम् ।

साध्यशून्य इति । पक्षः–**पक्षतावच्छेदकविशिष्ट इत्यर्थः । तेन घटे गन्धसत्त्वेऽपि न क्षतिः । एवं मूलावच्छिन्नो वृक्षः कपिसंयोगीत्यत्राऽपि बोध्यम्॥७८॥**

॥ इति बाधनिरूपणम् ।

॥ इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायां सिद्धान्तमुक्तावल्यामनुमानखण्डम् ।

उपमितिं व्युत्पादयति । ग्रामीणस्येति । **यत्राऽऽरण्यकेन केनचित् ग्रामीणायोक्तं गोसदृशो गवयपदवाच्य इति, पश्चाच्च ग्रामीणेन क्वचिदरण्यादौ गवयो दृष्टः, तत्र गोसादृश्यदर्शनं यज्जातं, तदुपमितिकरणं, तदनन्तरं गोस-**

दिनकरी ।

आह । **पक्षतावच्छेदकेति** । कालस्येव देशस्याऽपि पक्षतावच्छेदकत्वे बाधसम्भवात्तदप्रदर्शनेन मूलस्य न्यूनतां परिहर्तुमाह–**एवमिति** । **बोध्यमिति** । तत्र पक्षे वृक्षे संयोगसत्त्वेऽपि पक्षतावच्छेदकमूलावच्छेदेन संयोगाभावादिति ॥ ७८ ॥ इति बाधनिरूपणम् ॥

॥ इति श्रीभारद्वाजकुलाम्बुधिपूर्णचन्द्रबालकृष्णभट्टात्मजमहादेवभट्टविरचिते मुक्तावलीप्रकाशेऽनुमानखण्डाख्यश्चतुर्थः परिच्छेदः ॥

अवसरसङ्गतिमभिप्रेत्याऽऽह–**उपमितिमिति** । **तत्र** गवये । **सादृश्यदर्शनं**–सादृश्यप्रत्यक्षम् । **तदुपमितिकरणमिति** । नवीनमतेनैतत् । अतिदेशवाक्यार्थशाब्दबोधः करणम् ,

रामरुद्री ।

घटे गन्धाभावसत्त्वेऽपि न क्षतिः, पक्षपदस्य पक्षतावच्छेदकविशिष्टार्थत्वे तूत्पत्तिकालीनत्वविशिष्टघटनिरूपितगन्धाभावनिष्ठाधेयतायाः निरवच्छिन्नत्वेन भवति तादृशगन्धाभाववद्विशिष्टपक्षो बाध इति भावः । अथ वा गन्धशून्यत्वाभावात्–गन्धाभावादित्यर्थः । गन्धसत्त्वादिति यावत् । तथा च प्रतियोगिव्यधिकरणसाध्याभाववत्पक्षस्यैव बाधत्वेन कथमत्र बाध इति भावः । पक्षपदस्य पक्षतावच्छेदकविशिष्टार्थकत्वे च देशकालयोः पक्षतावच्छेदकत्वस्थले पक्षतावच्छेदकावच्छेदेन साध्याभाववत्त्वस्याऽपि पृथक् बाधतया न बाधानुपपत्तिरिति भावः ॥ ७८ ॥ इति बाधनिरूपणम् ॥

॥ इति श्रीरामरुद्रभट्टाचार्यविरचितायां मुक्तावलीप्रकाशतरङ्गिण्यामनुमानतरङ्गाख्यश्चतुर्थस्तरङ्गः ॥

अवसरसङ्गतिमिति । प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्त्या अनन्तरवक्तव्यत्वमवसरः, प्रकृते चाऽनुमानोपमानयोर्द्वयोरपि प्रत्यक्षोपजीवकत्वेऽप्यनुमानस्य बहुवादिसम्मतत्वेन निरसनीयाल्पवादिविप्रतिपत्तिकत्वेन सुगमतया अनुमान एव प्रायशो व्युत्पित्सोः प्रथमतो जिज्ञासा जायत इत्यनुमाननिरूपणेन प्रतिबन्धकीभूतजिज्ञासानिवृत्त्या अवश्यवक्तव्यत्वमुपमानस्येत्यवसरसङ्गत्याऽनुमाननिरूपणानन्तरमुपमाननिरूपणमिति भावः । **सादृश्यप्रत्यक्षमिति** । सादृश्यज्ञानस्य प्रत्यक्षान्यस्यैवोपमितिकरणत्व उपमानस्य प्रत्यक्षोपजीवकत्वमेव न सम्भवति, सादृश्यविषयकलौकिकप्रत्यक्षानन्तरमेवोपमितिरनुभूयते चेत्यभिप्रायेण ज्ञानपदं **प्रत्यक्ष**परतया व्याख्यातमिति बोध्यम् । **एतदिति** । गवयधर्मिकगोसादृश्यप्रत्यक्षस्य करणत्वाभिधानमित्यर्थः । साम्प्रदायिकमतमुपदर्शयति—**अतिदेशवाक्यार्थशाब्दबो-**

सादृश्यधीर्गवादीनां या स्यात् सा करणं मतम् ॥ ७९ ॥
वाक्यार्थस्याऽतिदेशस्य स्मृतिर्व्यापार उच्यते ।
गवयादिपदानां तु शक्तिधीरुपमाफलम् ॥ ८० ॥

दृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थस्मरणं यज्जायते, तदेव व्यापारः, तदनन्तरं गवयो गवयपदवाच्य इति ज्ञानं यज्जायते तदुपमितिः । न त्वयं गवयपदवाच्य इत्युपमितिः, गवयान्तरे शक्तिग्रहाभावप्रसङ्गात् ॥७९॥८०॥

॥ इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायां सिद्धान्तमुक्तावल्यामुपमानखण्डम् ॥

दिनकरी ।

अतिदेशवाक्यार्थस्मरणं व्यापारः, सादृश्यविशिष्टपिण्डदर्शनं सहकारीति साम्प्रदायिकमतं तु सहकारितयाऽऽवश्यकसादृश्यविशिष्टपिण्डदर्शनस्यैव करणत्वं युक्तमित्युपेक्षितम् । **स्मरणं यज्जायत इति ।** सादृश्यविशिष्टपिण्डदर्शनस्योद्बोधकविधया तादृशवाक्यार्थस्मारकत्वादिति भावः । **तदेव व्यापार इति ।** एतेन सादृश्यविशिष्टपिण्डदर्शनोत्तरं यत्राऽतिदेशवाक्यार्थ(शाब्द)बोधः, तत्राऽतिदेशवाक्यार्थस्मरणापेक्षाभावान्नाऽतिदेशवाक्यार्थस्मृतिव्यापारकं सादृश्यविशिष्टपिण्डदशनं करणं, किं तु सादृश्यज्ञानमात्रं करणं, विशेषणज्ञानविधया तज्जन्यमतिदेशवाक्यार्थज्ञानं सादृश्यविशिष्टपिण्डदर्शनं चोभयं व्यापार इति कस्य चिन्मतं प्रत्युक्तम् । यत्र सादृश्यविशिष्टपिण्डदर्शनोत्तरमतिदेशवाक्यार्थशाब्दबोधः, तत्रोपमित्यनभ्युपगमात्, किं तु तदुत्तरं पुनः सादृश्यविशिष्टपिण्डदर्शनं, ततोऽतिदेशवाक्यार्थस्मरणं, तदुत्तरमेवोपमितिरिति भावः । **गवयो गवयपदवाच्य इति ज्ञानं यज्जायत इति ।**

रामरुद्री ।

ध इति । वाक्यार्थस्मरणमिति । व्यापारद्वारा तज्जन्यस्याऽपि तद्व्यापारत्वोपगमादिति भावः । नन्वेवमुद्बोधकान्तरवशाच्चरमेऽतिदेशवाक्यार्थस्मरण, तत्र सादृश्यविशिष्टपिण्डदर्शनं विनाऽप्युपमितिप्रसङ्ग इत्यत आह—**सादृश्यविशिष्टेति ।** साम्प्रदायिकमतोपेक्षायां बीजमाह—**सहकारितयेति । युक्तमिति ।** तदतिरिक्तस्य करणान्तरस्य कल्पने गौरवादिति भावः । ननु सादृश्यविशिष्टपिण्डदर्शनस्योपमानत्वेऽतिदेशवाक्यार्थस्मरणस्य तद्व्यापारत्वानुपपत्तिः, तज्जन्यत्वे सति तज्जन्यजनकस्यैव व्यापारत्वात्, स्मरणस्य च स्वसमानप्रकारकानुभवजन्यत्वनियमादिति मूलोक्तमतिदेशवाक्यार्थस्मरणस्य व्यापारत्वमसङ्गतमित्याशङ्क्य निराकुरुते—**सादृश्येति ।** तथा चाऽतिदेशवाक्यार्थस्मरणस्य पूर्वतनशाब्दबोधजन्यत्वेऽपि तत्रोद्बोधकतया सदृशपिण्डदर्शनमपि कारणमेवेति नाऽनुपपत्तिरिति भावः । **एतेनेति ।** अतिदेशवाक्यार्थस्मरणव्यापारकसदृशपिण्डदर्शनस्यैवोपमितिकरणत्वोपवर्णनेनेत्यर्थः । **बोध इति । शाब्दबोध इत्यर्थः । अभावादिति ।** अनुभवात्मकातिदेशवाक्यार्थज्ञानस्यैव सत्त्वादिति भावः । **नन्वेवं** तादृशस्थले किं करणं ? को व्यापारः ? शाब्दबोधस्य सदृशपिण्डदर्शनाजन्यत्वेन तद्व्यापारत्वासम्भवादित्याशङ्क्यायमेकदेशिमतानुसारेण करणव्यापारौ प्रदर्शयति—**किन्त्वित्यादि । सादृश्यज्ञानमात्रमिति ।** मात्रपदेन गवयत्वावच्छिन्नविशेष्यकत्वांशस्य प्रतिक्षेपः । **उभयमिति ।** उभयोरपि विशेषणज्ञानविधया सादृश्यज्ञानजन्यत्वात्, सदृशपिण्डदर्शनमतिदेशवाक्यार्थज्ञानञ्च विनोपमितेरनुदयेन तयोरुपमितिकरणत्वाच्च, विनिगमनाविरहादिति भावः । एतेनेत्यनेनोक्तमर्थं प्रकटयति—**यत्रेत्यादि । अनभ्युपगमादिति ।** नन्वेवं तादृशस्थलेऽप्युपमितेरनुभवसिद्धतयाऽनुभवापलापप्रसङ्ग इत्यत आह—**किन्त्विति । तदुत्तरमेवेति ।** तथा च क्षणद्वयविलम्बेनोपमितेरुपपादनसम्भवान्नाऽनुभवापलापापत्तिरिति भावः । **गवयो गवयपदवाच्य इतीति ।** पिण्डे चक्षुःसंयोगानन्तरं योग्यवृत्तितया गवयत्वजाते-

दिनकरी ।

एतेनोपमितिर्न प्रमित्यन्तरं, किन्तु शाब्दबोधात्मिकैव, गोसदृशो गवय इत्यत्र सदृशपदेनोपस्थितसादृश्यावच्छेदेन गवयपदवाच्यत्वप्रहस्य गोसदृशो गवयपदवाच्य इत्याकारस्यैवोपमितिस्वरूपत्वादित्यपास्तम् । गवयत्वावच्छेदेन गवयपदवाच्यत्वविषयिण्या उपमितेर्गवयपदजन्यगवयत्वविशिष्टोपस्थितिं विना शाब्दबोधरूपत्वासम्भवादिति । न च गोसादृश्यस्य गवयत्वस्य च प्रत्यक्षेणोपस्थितौ कथं गवयत्वावच्छेदेनैव गवयपदवाच्यत्वोपमितिः? न तु सादृश्यावच्छेदेनेति वाच्यम् । उपस्थितेस्तौल्येऽपि गवयत्वजात्यपेक्षया गोसादृश्यस्य गौरवज्ञानेन तदवच्छेदेन गवयपदवाच्यत्वोपमितेरनुदयात्, गवयपदाद्गवयत्वप्रकारकशाब्दबोधानुपपत्तेश्च, तत्प्रकारकशाब्दबोधे तदवच्छेदेन शक्तिग्रहस्य हेतुत्वात् । न च द्रव्यत्वविशिष्टे सादृश्यज्ञानात् गवयत्वावच्छेदेन गवयपदवाच्यत्वोपमितेरनुदयात् तद्धर्मविशिष्टे सादृश्यज्ञानं तद्धर्मावच्छेदेनोपमितिजनकं वाच्यं, तथा च यदा गवयत्वादिजात्यनुपस्थितिस्तदा सादृश्यस्य(१) संस्थानादिगुरुधर्मविशिष्टे ग्रहात्तदवच्छेदेन गवयादिपदवाच्यत्वोपमित्यापत्तिरिति वाच्यम् । इष्टापत्तेः, तस्या भ्रमत्वेन तादृशगुरुधर्मावच्छेदेन गवयादिपदवाच्यत्वासाधकत्वादिति ।

रामरुद्री ।

रपि प्रत्यक्षेण ग्रहणात्तदवच्छिन्नधर्मिकमेव गोसादृश्यज्ञानं गोपदवाच्यत्वप्रकारिकोपमितिरपि नाऽनुपपन्नेति मूलाभिप्राय । यत्तु गोसदृशो गवयपदवाच्य इत्यारण्यकवाक्याज्जायमानः शाब्दबोध एवोपमितिः, न तु प्रमित्यन्तरम् । न चैव गोसादृश्यस्यैव गवयपदवाच्यतावच्छेदकत्वमुपमितिविषयः, न तु गवयत्वस्यैवेति वाच्यम् । इष्टत्वादित्याह, तन्मतं दूषयति—**एतेनेति** । उपमितेर्गवयो गवयपदवाच्य इत्याकारकत्वेनेत्यर्थः । **गवयत्वविशिष्टोपस्थितिं विनेति** । उक्तवाक्यार्थघटकगवयपदश्रवणेऽपि तदानीं गवयत्वजातेरेव प्रत्यक्षतया तद्विशिष्टे शक्तिग्राहकप्रमाणाभावेन च वृत्त्या गवयपदजन्यगवयत्वावच्छिन्नोपस्थितेरसम्भवेन तदवच्छिन्नधर्मिकगोपदवाच्यत्वप्रकारकशाब्दबोधासम्भवेन तादृशोपमितेः प्रमित्यन्तरत्वावश्यकत्वादिति भावः । ननु गवयत्वावच्छेदेनैव गवयपदवाच्यत्वप्रकारिकोपमितिः, न तु गोसादृश्यावच्छेदेनेत्यत्रैव प्रमाणं न पश्यामो यत उपमितेः प्रमित्यन्तरताऽऽवश्यकी स्यादित्याशङ्कते—**न चेति** । त्वन्मत इति शेषः । स्वमते तु गवयत्वजातिप्रत्यक्षात् पूर्वमेव शाब्दबोधात्मकोपमितेरुपगमादिति ध्येयम् । **अनुदयादिति** । ननु प्रत्यक्षेण गवयत्वोपस्थित्यनन्तरं गौरवज्ञानेन प्रतिबन्धात् गोसादृश्यावच्छेदेन गवयपदवाच्यत्वज्ञानासम्भवेऽपि तत्प्रत्यक्षात्पूर्वमेवाऽऽरण्यकपुरुषवाक्यात्तादृशशाब्दबोधोत्पत्तौ बाधकाभाव इत्यत आह—**गवयपदादिति** । अनुभूयते च गवयपदात्तादृश एव शाब्दबोध इति भावः । नन्वस्तु गवयपदाद्गवयत्वप्रकारशाब्दबोधोपपत्तये गवय गवयपदवाच्य इत्युपमित्या गवयत्वस्य गवयपदवाच्यत्वावच्छेदकत्वसिद्धिः, तथाऽप्यतिदेशवाक्याद्गोसादृश्यसामानाधिकरण्येनैव गवयपदवाच्यत्वावगाहिशाब्दबोध इत्यत्र मानाभावः, गोसादृश्यावच्छेदेनाऽपि गवयपदवाच्यत्वावगाहिशाब्दबोधोत्पत्तौ बाधकाभावात् । न च गवयत्वावच्छिन्ने गवयपदवाच्यत्वावगाहिज्ञानसामग्र्येव तत्र बाधिकेति वाच्यम् । तादृशज्ञान प्रति गवयत्वावच्छिन्नधर्मिकगोसादृश्यादिज्ञानस्य कारणत्वेन प्रत्यक्षेण गवयत्वानुपस्थितिदशायां तादृशज्ञानघटितोपमितिसामग्र्या असम्भवात् । तथा चोक्तशाब्दबोधबलादेव गोसादृश्यस्याऽपि गवयपदवाच्यतावच्छेदकत्वसिद्धिर्निष्प्रत्यूहैवेत्याशङ्कते । **न चेति । ग्रहादिति** । शाब्दबोधात्मकग्रहादित्यर्थः । तादृशशाब्दबोधोत्पत्तावपि गोसादृश्यस्य गुरुत्वेन तत्र गवयपदवाच्यतावच्छेदकत्वस्य बाधितत्वात् बाधितार्थविषयकत्वेन तस्य भ्रमत्वात् न ततो विषयसिद्धिरिति समाधत्ते । **इष्टापत्तेरित्यादि** ।

---

(१) 'सादृश्यज्ञानस्य'इति पाठः ।

पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः ।

शाब्दबोधप्रकारं दर्शयति-पदज्ञानं त्विति । न तु ज्ञायमानं पदं करण-दिनकरी ।

इदमुपलक्षणं, वैधर्म्यविशिष्टपिण्डदर्शनं करणं, जलादिविधर्मगुणवती पृथिवीत्यतिदेश-वाक्यार्थस्मृतिर्व्यापारः, पृथिवीत्वावच्छेदेन पृथिवीपदवाच्यत्वोपमितिः फलमित्यपि बोध्यम्।

॥ इत्युपमाननिरूपणम् ॥

ननूपमानस्य प्रमाणान्तरत्वे मानाभावः । न च प्रत्यक्षादिप्रमितिविजातीयप्रमितिकरणत्वात् तस्य प्रमाणान्तरत्वम् , उपमितेः प्रत्यक्षादिप्रमितितो विजातीयत्वाभावादिति चेन्न । चक्षुरादिव्यापारविगमेऽपि उपमितेरुत्पादेन चाक्षुषत्वाद्यसम्भवात् । न वा मानसत्वं, मानसोत्तरमनुत्पद्यमानाया उपमिनोमीति प्रतीतेर्विषयत्वात् , उपमित्यनन्तरं साक्षात्करोमीति प्रतीतेरनुदयेन तत्र प्रत्यक्षत्वसत्त्वे प्रमाणाभावाच्च । अन्यथाऽनुमितेरपि मानसत्वापत्तेः । नाऽप्यनुमितिः, व्याप्त्यादिज्ञान विनाऽप्युदयात् । न शब्दः, पदज्ञानाजन्यत्वात् । न स्मृतिः, अननुभूतार्थस्य स्मरणायोगादिति सङ्क्षेपः ॥ ७९ ॥ ८० ॥

इत्युपमानस्याऽतिरिक्तप्रमाणत्वव्यवस्थापनम् ॥

॥ इति श्रीभारद्वाजकुलाम्बुधिपूर्णचन्द्रबालकृष्णभट्टात्मजमहादेवभट्टविरचिते मुक्तावलीप्रकाशे उपमानपरिच्छेदाख्यः पञ्चमः परिच्छेदः ॥

उपजीव्योपजीवकभावसङ्गतिमभिप्रेत्याऽऽह मूले-पदज्ञानं त्विति । एवकारार्थ-रामरुद्री ।

सादृश्यविशिष्टपिण्डदर्शनमिव वैधर्म्यविशिष्टपिण्डदर्शनमपि क्वचिदुपमितौ करणम् । अत्र जलादिवैधर्म्यवती पृथिवीपदवाच्येत्यतिदेशवाक्यार्थस्मरण व्यापारः, पृथिवीं पृथिवीपदवाच्येत्युपमितिरित्याह।

इदमुपलक्षणमिति ॥

ननु नोपमानस्य प्रमाणान्तरत्वं, गवयो गवयपदवाच्य इत्युपमितिस्थानाभिषिक्तस्य गवयांशे लौकिकस्य गवयपदवाच्यत्वांश अलौकिकस्य चाक्षुषस्यैवोपगमसम्भवात् । न च चक्षुर्व्यापारोपरमेऽप्यतिदेशवाक्यार्थस्मरणेनोपमितिदर्शनात् न तत्र चाक्षुषत्वसम्भव इति वाच्यम् । एवमप्यलौकिकमानसप्रत्यक्षत्वसम्भवेनोपमितेर्विजातीयप्रमितित्वे मानाभावादित्याशङ्क्योपमिनोमीत्यनुव्यवसायसाक्षिकीं विलक्षणप्रमितिं व्यवस्थाप्य तत्कारणत्वेनोपमानस्य प्रमाणान्तरत्वं व्यवस्थापयति-**नन्वित्यादि । साक्षात्करोमीति प्रतीतेरनुदयेनेति**। ननु लौकिकविषयतैव साक्षात्कारत्वव्यञ्जिका, मनसस्तु बहिर्विषये लौकिकसन्निकर्षाभावेन लौकिकविषयत्वाभावात् उपमितेर्मानसप्रत्यक्षत्वेऽपि तदुत्तरं न साक्षात्करोमीतिप्रतीति सम्भवः, व्यञ्जकाभावात् , अन्यथा स्वर्गविषयकालौकिकमानसोत्तरमपि स्वर्गं साक्षात्करोमीतिप्रतीत्यापत्तेः, इत्थञ्चोपमिनोमीति प्रतीतेरपि सादृश्यज्ञानोत्तरमानसमेव विषयोऽस्तु, न तु विजातीयप्रमितिरित्यस्वरसादाह-**अन्यथेति । अनुमितेरपीति ।** व्याप्तिज्ञानोत्तरमानसस्यैवाऽनुमिनोमीतिप्रतीतिविषयत्वसम्भव इति भावः । तथा चाऽनुमिनोमीत्यनुव्यवसायविषयिभूताऽनुमितिर्यथा प्रमित्यन्तरं, तथोपमिनोमीतिविलक्षणानुव्यवसायविषयीभूतोपमितिरपीति भावः । ननु गवयो गवयपदवाच्यः, गोसदृशत्वात्, यन्नैवं तन्नैवमित्यन्वयव्यतिरेक्यनुमितिरेवोपमितिरस्तु, उपमिनोमीति प्रतीतेरपि शक्तिविषयकानुमितिरेव विषयोऽस्त्विति तथाशङ्कां निराचष्टे-**नाऽपीति । संक्षेप इति ।** नाऽनुमिनोमि, न शृणोमि, न स्मरामि, किन्तूपमिनोमीति प्रतीतेरपि प्रमित्यन्तरमेवोपमितिरिति भावः ॥ ७९ ॥ ८० ॥

॥ इत्युपमानस्याऽतिरिक्तप्रमाणत्वव्यवस्थापनम् ॥

॥ इति श्रीरामरुद्रभट्टाचार्यविरचितायां मुक्तावलीप्रकाशतरङ्गिण्यामुपमानतरङ्गाख्यः पञ्चमस्तरङ्गः ॥

उपजीव्योपजीवकभावेति । अतिदेशवाक्यजन्यशाब्दबोधस्यैवोपमानत्वमिति प्राचीनमते

म्(१)। पदाभावेऽपि मौनिश्लोकादौ शाब्दबोधात्।

पदार्थधीरिति। **पदजन्यपदार्थस्मरणं व्यापारः। अन्यथा पदज्ञानवतः प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः। तत्राऽपि वृत्त्या पदजन्यत्वं बोध्यम्। अन्यथा घटादिपदात् समवायसम्बन्धेन आकाशस्मरणे जाते आकाशस्याऽपि शाब्दबोधापत्तेः। वृत्तिश्च शक्तिलक्षणान्यतरसम्बन्धः। अत्रैव शक्तिज्ञानस्योपयोगः। (पूर्व) शक्तिग्रहाभावे पदज्ञानेऽपि तत्स-**

दिनकरी।

कस्य मूलस्थ'तु' शब्दस्य व्यवच्छेद्यं स्पष्टयति मुक्तावल्यां-न तु ज्ञायमानमिति। 'मौनिश्लोकादौ' इत्यादिना द्वित्वादिबोधकविजातीयहस्तचेष्टादेः सङ्ग्रहः।

अन्यथा-पदार्थज्ञानमात्रस्य व्यापारत्वे। **तत्राऽपि**-पदजन्यपदार्थोपस्थितावपि। **घटकत्वं** सप्तम्यर्थः। **अन्यथा**-वृत्त्येत्यस्याऽनुपादाने। **ननु** वृत्तिर्यदि शक्तिस्तदा गङ्गापदात् तीरादेर्बोधो न स्यात्, तत्र शक्त्या पदजन्यतीरोपस्थितेरभावादत **आह-वृत्तिश्चे-**

रामरुद्री।

उपमानप्रमाणस्याऽतिदेशवाक्यजन्यशब्दप्रमाणजन्यत्वेन शब्दस्याऽर्थज्ञानजन्यत्वमितिमते(२) वाक्यार्थज्ञानरूपप्रयोगमूलभूतज्ञानजन्यत्वेन शब्दस्यैव तन्मते प्रमाणत्वेन स्वरूपत उपजीव्योपजीवकभावः। शक्तिज्ञानात्मकोपमितिजन्यत्वेन शाब्दबोधस्य फलयोरप्युपजीव्योपजीवकभावः। सादृश्यज्ञानमेवोपमानमिति नवीनमते फलनिष्ठयोरेवोपजीव्योपजीवकभावयोः स्वाश्रयकरणत्वात्मकपरम्परासम्बन्धेन प्रमाणनिष्ठयोः सङ्गतित्वमिति के चिदाहुः। तन्न श्रद्धेयम्, सादृश्यज्ञानात्मकोपमानजन्यत्वस्य साक्षात्सम्बधेनैवोपमितौ सत्त्वादुपमितेरपि पदज्ञानरूपत्वेन शब्दप्रमाणरूपत्वात् स्वरूपत एव सङ्गतित्व सम्भवात्। यद्यपि शाब्दबोधस्योपमानत्वनये उपमानेपि शब्दोपजीवकत्वमस्तीति शब्दनिरूपणानन्तरमेवोपमानं कुतो न निरूपितमिति वक्तुं शक्यते, तथाऽपि सङ्गतेरनन्तराभिधानव्याप्यत्वाभावेन न दोषः। प्रपञ्चितं चेदमनुमानखण्ड एव। **एवकारार्थकस्येति**। एवकारार्थो अर्थो यस्येति मध्यमपदलोपिसमासेनैव कारार्थबोधकस्येत्यर्थः। **हस्तचेष्टादेरिति**। तथा च मौनिश्लोकस्थले विजातीयहस्तचेष्टास्थले च शब्दोच्चारणाभावेन ज्ञायमानपदाभावाच्छाब्दबोधो न स्यात्। पदज्ञानस्य करणत्वमिति नवीनमते तु लिप्या हस्तचेष्टया च सङ्केतितपदज्ञानाद्भवति शाब्दबोध इति भावः।

पदार्थज्ञानमात्रस्येति। यद्यपि प्रत्यक्षादिना घटादिज्ञाने पदज्ञानजन्यत्वाभावेन पदज्ञानव्यापारत्वमसम्भवदुक्तिकमेव, तथाऽपि घटपदबोध्योऽयं घट इत्यस्याऽप्युपनयसन्निकर्षविधया-पदज्ञानजन्यत्वेन व्यापारत्वसम्भवो बोध्य। अयं घट इति शाब्दबोधस्य तु पदज्ञानजन्यत्वं सुलभमेवेति भावः। **घटकत्वमिति**। पदजन्यपदार्थोपस्थितिघटकं पदजन्यत्व वृत्तिरूपसम्बन्धसहकारेणेति मूलार्थो बोध्य इति भावः। ननु वृत्तिरूपसम्बन्धज्ञानस्य सहकारित्वं कुत इति चेदित्थम्। एकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकं, पदज्ञानादर्थोपस्थिति(३)रितिरीत्या पदपदार्थयोर्वृत्तिरूपसम्बन्धज्ञाने सत्येव पदज्ञानात् पदार्थस्मरणं जायते, न तु पदज्ञानमात्रे, हस्तिहस्तिपकयोः सम्बन्धाज्ञाने हस्तिपकदर्शनेऽपि हस्तिनोऽस्मरणादिति सम्बन्धज्ञानस्य सम्बन्धिज्ञानसहकारित्वमावश्यकमिति। **इत्थञ्च पदजन्ये**त्यादिमूले पदज्ञानजन्येत्यादिरेवाऽर्थो बोध्यः। एकसम्बन्धिज्ञानस्यैवाऽपरसम्बन्धिस्मारकत्वादिति। **तीरोपस्थितेरभावादिति**। गङ्गापदशक्यप्रवाहसम्बन्धस्य तीरे गृहीतत्वादेव गङ्गापदेन प्रवाहोपस्थितौ

---

(१) कालिकसम्बन्धेन तत्तत्पुरुषीयशाब्दबोधं प्रति कालिकेन तत्तत्पुरुषनिष्ठज्ञानविषयः पदं करणं नेत्यथः। तेन नाऽऽकाशात्मनिष्ठयोः शाब्दबोधपदयोः कार्यकारणभावानुपपत्तिशङ्केति।

(२) मतेऽपि'इति पाठः। (३) पदज्ञानादर्थोपस्थितावितिरीत्या'इति पाठः।

शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ॥ ८१ ॥

म्बन्धेन तत्स्मरणानुपपत्तेः । पदज्ञानस्य हि एकसम्बन्धिज्ञानविधयाऽर्थ-स्मारकत्वम् ।

शक्तिश्च पदेन सह पदार्थस्य सम्बन्धः । सा चाऽस्माच्छब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपः । आधुनिके नाम्नि शक्तिरस्त्येव । 'एकादशेऽहनि

दिनकरी ।

ति । अन्यतरसम्बन्धः–अन्यतरात्मकः सम्बन्धः। अत्रैव–पदजन्यपदार्थोपस्थितावेव ।

सा चेति । यद्यपीश्वरेच्छाया ऐक्यात् घटशब्दात् घटो बोद्धव्य इतीश्वरेच्छा पटे-ऽप्यस्तीत्यतिप्रसङ्गः । एवं गङ्गापदजन्यबोधविषयत्वप्रकारकेच्छायास्तीरेऽपि सत्त्वाच्छक्त्यैव तीरबोधोपपत्तेर्लक्षणोच्छेदापत्तिः, तथाऽपि गङ्गापदवाच्यत्वव्यवहारस्य तीरेऽभावाद्गङ्गादिपदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेनेश्वरेच्छैव गङ्गा-दिपदानां शक्तिः । तीरादिनिष्ठविशेष्यताया गङ्गादिपदजन्यबोधविषयत्वप्रकारतानिरूपित-त्वेऽपि न तस्यास्तादृशविषयतात्वेन तादृशप्रकारतानिरूपितत्वं, अपि तु शुद्धविषयतात्वे-नेति नाऽतिप्रसङ्गः, न वा लक्षणोच्छेदप्रसङ्ग इति । **आधुनिके नाम्नि**–आधुनिकैः पित्रा-

रामरुद्री ।

तीरोपस्थितिसम्भवेन तीरे गङ्गापदशक्त्यकल्पनादिति भावः । **'अन्यतरसम्बन्धः'**–इत्यत्र षष्ठीतत्पु-रुषभ्रमं निराकुरुते । **अन्यतरात्मक इति** । **पदजन्यपदार्थोपस्थितावेवेति** । शक्तिज्ञानाभावे शक्य-सम्बन्धरूपलक्षणाग्रहस्याऽप्यसम्भवेन पदपदार्थयोः सम्बन्धज्ञानाभावात्पदज्ञानेन शाब्दबोधप्रयोजकी-भूतपदार्थस्मरणोत्पादनासम्भवात् । तथा चैतदभिप्रायेणैव कारिकायां शक्तिधियः पदज्ञानसहकारित्व-मुक्तमिति भावः ।

अतिप्रसङ्ग इति । घटपदबोध्यत्वप्रकारकेच्छायाः घटपदशक्तित्वे तस्या ईश्वर(१)मात्रवृत्तित्वेन घटे घटपदशक्तिर्न स्यादिति विशेष्यतासम्बन्धेनैव तादृशेच्छात्वं शक्तिरित्युपेयम् । तथा च ईश्वरस्य अनेकेच्छाकल्पने गौरवात् घटपदाद्घटो बोद्धव्यः, पटपदात् पटो बोद्धव्य इतिसमूहालम्बनैरूपैकेच्छा-व्यक्तेरेव तत्त्वस्याऽङ्गीकरणीयतया तस्याश्च विशेष्यतासम्बन्धेन पटेऽपि सत्त्वेन घटपदशक्यत्वप्रसङ्ग इति भावः । **तीरेऽपि सत्त्वादिति** । भगवदिच्छायाः सन्मात्रविषयकत्वेन गङ्गापदाल्लक्षणया तीरबो-धस्याऽपि जायमानत्वेन तद्विषयत्वस्याऽपि ईश्वरेच्छायामावश्यकत्वादिति भावः । **नाऽतिप्रसङ्गः, न वा लक्षणोच्छेदप्रसङ्ग इति** । तत्पदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन ईश्वरेच्छात्वस्य तत्पदशक्यत्वाभ्युपगमेनेश्वरेच्छानिरूपितघटपदजन्यबोधविषयतात्वावच्छिन्नप्रकार-तानिरूपितविशेष्यतायाः पटादावसत्त्वेन न पटादेस्तादृशविशेष्यतासम्बन्धेनेश्वरेच्छात्वत्वमिति न पटादे-र्घटपदशक्यत्वमिति भावः । अन्यथा तदभाववति तत्प्रकारकत्वेनेश्वरेच्छाया विसंवादित्वापत्तेः । तीरादौ गङ्गापदवाच्यत्वव्यवहाराभावेनेश्वरेच्छायां गङ्गापदजन्यबोधविषयस्तीरं भवत्वित्याकारकता न स्वीक्रि-यते अपितु विषयता गङ्गापदजन्यबोधीया भवतु तीरं विषयतावच्छेदकत्वित्येवंरीत्या विशकलितव्यपदेशेन विषयतात्वेनैव गङ्गापदजन्यबोधविषयतायास्तीरे भगवदिच्छयाऽवगाहनात्तीरादौ गङ्गापदजन्यबोधविष-यतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन नेश्वरेच्छात्वत्वमिति तीरादौ गङ्गापदशक्यत्वाभा-वात् तीरादिविषयकशाब्दबोधनिर्वाहाय लक्षणाङ्गीकारोऽप्यावश्यक इति भावः । एतेन विशेषणे यद्वि-शेषणं तस्यैव प्रकारतावच्छेदकत्वेन गङ्गापदजन्यबोधविषयस्तीरं भवत्वितीश्वरेच्छानिरूपिततीरनिष्ठ-विशेष्यतायां गङ्गापदजन्यबोधविषयतात्वावच्छिन्नप्रकारतानिरूपितत्वं नाभ्युपैयते किंतु शुद्धविषयता-

(१) **'ईश्वरेच्छा'इत्यपि पाठः ।**

पिता नाम कुर्यात्' इतीश्वरेच्छायाः सत्त्वात्। आधुनिकसङ्केतिते तु न शक्तिरिति सम्प्रदायः।

नव्यास्तु-ईश्वरेच्छा न शक्तिः, किन्त्विच्छैव, तेनाऽऽधुनिकसङ्केतितेऽपि शक्तिरस्त्येवेत्याहुः।

शक्तिग्रहस्तु व्याकरणादितः। तथा हि—

"शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च।
वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥"

धातुप्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति। क्वचित् सति

दिनकरी।

दिभिरेकादशेऽहनि सङ्केतिते नाम्नि। इतोश्वरेच्छाया इति।

एकादशाहकालीनपित्रुच्चारणविषयनामत्वेन सामान्यरूपेणेत्यर्थः। आधुनिकसङ्केतिते-आधुनिकमात्रसङ्केतिते नदीवृद्धयादिपदे तु।

सम्प्रदायमतेऽस्वरसं हृदि निधाय नवीनमतं दर्शयति-नव्यास्त्विति। न शक्तिरिति। तथा सत्याधुनिकसङ्केतिताघ्रयादिपदाच्छाब्दबोधो न स्यादिति भावः। मतद्वयेऽप्यपभ्रंशा(१)त्मकगगर्यादिपदे शक्तिभ्रमादेव बोध इत्यवधेयम्॥ इति शक्तिनिरूपणम्॥

व्याकरणादीति। 'भू सत्तायां(धा० १),' 'वर्तमाने लट्(३।२।२३)' इत्यादिव्याकरणाद्धि।

रामरुद्री।

स्वावच्छिन्नप्रकारतानिरूपितत्वमेवेति ग्रन्थकारोक्तिर्न सङ्गच्छत एवेति केषांचिदाक्षेपो निरवकाशः। आधुनिकसङ्केतिते तु न शक्तिरिति मूलग्रन्थविरुद्धं आधुनिके नाम्नि शक्तिरस्त्येवेति मूलमित्याशङ्क्याधुनिके नाम्नीत्यस्य नामविशेषपरतामाह—**आधुनिक इत्यादि**। मूले एकादशेऽहनि पिता नाम कुर्यादित्यनन्तरं श्रुत्येति पूरणीयम्। ईश्वरेच्छायाः सत्त्वादित्यस्य सङ्केतिततत्तत्पदजन्यबोधविषयत्वप्रकारकतत्तदर्थविशेष्यकभगवदिच्छायाः सत्त्वादित्यर्थः। नन्वसाधुशब्दानामपि क्वचित्संकेतदर्शनात्तेषां तद्रूपेण भगवदिच्छाया अवगाहो न प्रामाणिकः। अनन्तप्रकारताविशेष्यताव्यक्तिकल्पने गौरवं चेत्यभिप्रायेणाह—**एकादशाहकालीनेति**। तथा चैकादशाहकालीनपित्रुच्चारितशब्दजन्यबोधविषयः पित्रादिसङ्केतविशेष्यो भवत्वित्याकारकमेव, भगवदिच्छाकल्पनमिति भावः। नन्वेवमप्याधुनिकसङ्केतिते तु इत्यादिमूलमसङ्गतमेव एकादशेऽहनि पित्रादिसङ्केतितनाम्नि शक्तिस्वीकारादतो मात्रपदं पूरयति—**आधुनिकमात्रेति**। मात्रपदेनेश्वरव्यावृत्तिः। पूर्वोक्तनाम्नां सामान्यरूपेणेश्वरसङ्केनसत्त्वात्तेषु शक्तिसत्त्वेऽपि न क्षतिरिति भावः।

अस्वरसमिति। वक्ष्यमाणमित्यर्थः। अस्वरसं प्रकटयति—**तथा सतीति**। शक्तिभ्रमं लक्षणाग्रहं च विनेत्यादिः। तेन शक्तिभ्रमादिना शाब्दबोधसंभवेऽपि न क्षतिः। इदमुपलक्षणम्। ईश्वराङ्गीकर्तॄणां प्राभाकरादीनामीश्वरेच्छारूपशक्तिग्रहासंभवेन शाब्दबोधानुपपत्तिरित्यपि द्रष्टव्यम्।

मूले धातुप्रकृतीति। धातुप्रातिपदिकेत्यर्थः। प्रत्ययाः विभक्तिद्धिताख्यातकृतः। आदिना समासादिपरिग्रहः, समासादावपि वैयाकरणैः शक्त्यङ्गीकारात्। तत्र 'भूसत्तायामित्यादि धातोः शक्तिग्राहकम्। पाचकादिप्रातिपदिकस्यापि व्याकरणाच्छक्तिग्रहः। पचधातोः पाकार्थकत्वस्य तदुत्तरकृत्प्रत्ययस्य कर्तृत्वार्थकत्वस्य च तत्र प्रतिपादनात्। अत्र गवादिप्रधानप्रातिपदिकानां कोशादेव शक्तिग्रह इति मन्त-

---

(१) अत्राऽयं भावः। गगर्यादिपदेषु तन्मूलभूतगर्गरीपदशक्त्यैव निर्वाहान्नाऽतिरिक्तशक्तिकल्पनम्। किन्तु गर्गर्यादिपदनिष्ठाया एव शक्तेर्भ्रमाद्गर्यादिपदेभ्यो बोध इति। अत एव "नाऽपभ्रंशितवै" इति श्रुतिरपि सङ्गच्छते।

बाधके त्यज्यते। यथा वैयाकरणैराख्यातस्य कर्तरि शक्तिरुच्यते। चैत्रः पचतीत्यादौ कर्त्रा सह चैत्रस्याऽभेदान्वयः। तच्च गौरवात् त्यज्यते। किन्तु कृतौ शक्तिः, लाघवात्। कृतिश्चैत्रादौ प्रकारीभूय भासते।

न च कर्तुरनभिधानाच्चैत्रादिपदोत्तरं तृतीया स्यादिति वाच्यम्। कर्तृसङ्ख्यानाभिधानस्य तत्र तन्त्रत्वात्।

सङ्ख्याभिधानयोग्यश्च कर्मत्वाद्यनवरुद्धः प्रथमान्तपदोपस्थाप्यः।

दिनकरी।

करणादित्यर्थः। लाघवादिति। कृतित्वजातेः शक्यतावच्छेदकत्वे लाघवादित्यर्थः।

न च कर्तुरनभिधानादिति। 'अनभिहिते(२।३।१)' इत्यधिकारीयेण 'कर्तृकरणयोस्तृतीया (२।३।१८)' इत्यनेनाऽनभिहिते कर्तरि तृतीयाविधानादिति भावः। तत्र—तृतीयायाम्। तन्त्रत्वात्-प्रयोजकत्वात्।

ननु कर्तृसङ्ख्याभिधान एव किं प्रयोजकमित्याशङ्क्य तत्प्रयोजकं दर्शयति—सङ्ख्याभिधानेति। चैत्रः पचति तण्डुल इत्यादौ कर्मत्वादिलाक्षणिकप्रथमान्तपदोपस्थाप्यतण्डुलादिव्युदासायाऽऽह—कर्मत्वाद्यनवरुद्ध इति। ननु चैत्र इव मैत्रो गच्छतीत्यत्राऽऽरामरुद्धौ।

व्यम्। वस्तुनो धातुरूपप्रकृतीत्यस्य धातुरूपप्रकृतीत्यर्थः। धातौ प्रकृतित्वप्रदर्शनं च प्रत्ययतो वैलक्षण्योतनायैव। अत एवादिना समासादिवृत्तीनां संग्रहोऽपि सङ्गच्छते, तेषामपि प्रातिपदिकत्वादिति सारम्। 'वर्तमाने लडि'त्यादिकं तु प्रत्यये शक्तिग्राहकमिति विवेकः। कृतित्वजातेरिति। किंचिदविशेषितस्यैकस्य कृतित्वस्य शक्यतावच्छेदकत्वे लाघवं, कृतित्वविशिष्टानामनन्तकृतीनां शक्यतावच्छेदकत्वे गौरवम्। जातेरेव स्वरूपतो भानाभ्युपगमेन कृतेः स्वरूपतः शक्यतावच्छेदकत्वासभवादिति भावः। नवीनैर्वैयाकरणैस्तु आश्रयमात्र एव कर्तृकर्माख्यातयोः शक्तिः स्वीक्रियते, कृत्यादिव्यापारफलयोर्धातुनैव लाभात्, आश्रयत्वं चाखण्डोपाधिरिति तन्मते न गौरवम्। परंतु 'लः कर्मणि च भावे चाकर्मकेभ्यः' इत्यादिमूलभूतसूत्रविरोध एव। नच कर्तरीत्यस्याश्रय इत्येवार्थ इति वाच्यम्। तथा सति 'स्वतन्त्रः कर्ते'ति सूत्रकृत्परिभाषाया वैयर्थ्यापत्तेः। स्वशास्त्रे यत्र कर्तृपदप्रयोगस्तत्रायमर्थ इति ज्ञापयितुमेव परिभाषादरात्। स्वातन्त्र्य च कारकान्तरव्यापारानधीनव्यापारवत्त्वं तच्चातिगुरुभूतमेव। इत्थं च—

"फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः"—

इति कारिकापि सूत्रविरुद्धैव। किंच कर्तृपदस्य लक्षणयैवाश्रयार्थकत्वं वाच्यम्। कृतिमत एव तस्य मुख्यार्थत्वात्। तथाच वरं तदपेक्षया कृतावेव लक्षणाकल्पनम्। आश्रयत्वस्याखण्डोपाधिरूपत्वे मानाभावादाधारतारूपस्य तस्य स्वरूपसम्बन्धरूपत्वेनाननुगतत्वादिति मन्तव्यम्।

अनभिहित इत्यधिकारीयेणेति। अनभिहिताधिकारसूत्रानन्तरपठित 'कर्तृकरणयोस्तृतीये'तिसूत्रेणेत्यर्थः।

किं प्रयोजकमित्याशङ्क्येति। चैत्रस्तण्डुलं पचतीत्यादौ चैत्रगतसंख्यैवाख्यातेनाभिधीयते ननु तण्डुलादिगतेत्यत्र नियामकाभावे चैत्रेण पच्यते तण्डुल इत्यादावपि चैत्रगतसंख्याभिधानसंभवेन तृतीया न स्यादित्याशङ्कायामिति पर्यवसितार्थः। कर्मत्वाद्यनवरुद्ध इतीति। प्रथमान्तपदोपस्थाप्य इतिपदस्य तु मूल एवाग्रे यत्र तण्डुलं पचतीति प्रयोगे द्वितीयायाः कर्मत्वे नैव तात्पर्यं तत्र तण्डुले सख्यान्वयवारणं प्रयोजनं दर्शयिष्यतीति तदुपेक्षितम्। नच कर्मत्वाद्यविवक्षायां द्वितीयैव न साधु 'कर्मणि द्वितीये'तिद्विधानादिति वाच्यम्। असाधुत्वेऽपि प्रयोजनप्रदर्शने बाधकाभावात्। साधुप्रयोग एव प्रयोजनं दर्शनीयमिति नियमाभावात्। अपभ्रंशादपि शाब्दबोधोत्पत्त्या तत्र शाब्दबोधोपपादनस्यावश्यकत्वादिति ध्येयम्। नन्वित्यादि। कर्मत्वाद्यनवरुद्धत्वं यदि द्वितीयादिकारकविभक्त्यर्थाविशेषणत्वं तदा चैत्र

कर्मत्वादीत्यस्येतरविशेषणत्वतात्पर्याविषयत्वमर्थः। तेन चैत्र इव मैत्रो गच्छतीत्यादौ न चैत्रे सङ्ख्यान्वयः। यत्र कर्मादौ न विशेषणत्वे तात्पर्यं तद्धारणाय प्रथमान्तेति।

दिनकरी।

ख्यातेनैकवचनत्वरूपेणोक्तायाः सङ्ख्यायाश्चैत्रेऽन्वयः स्यात्, कर्मत्वाद्यनवरुद्धत्वात्, प्रथमान्तपदोपस्थाप्यत्वाच्च। किञ्च पक्कमन्नं भुज्यत इत्यादावन्नादौ सङ्ख्यान्वयानुपपत्तिः, पाककर्मत्वस्याऽन्नेऽन्वयेन कर्मत्वाद्यनवरुद्धत्वाभावादत आह-**कर्मत्वादीत्यस्येति।** तथा च कर्मत्वपदमितरपरम्, अनवरुद्धत्वं च विशेषणतयाऽविवक्षितत्वम्। वस्तुतस्त्वितरस्याऽपि न विवक्षा, अविशेषणत्वमात्रस्य विवक्षितत्वात्। अविशेषणत्वं-प्रकारताशून्यत्वं, तस्य च शाब्दबोधात् पूर्वं चैत्रादावपि सत्त्वाच्चैत्र इव मैत्रो गच्छतीत्यादौ चैत्रेऽपि सङ्ख्यान्वयापत्तिः। न च चैत्रीयं सादृश्यमित्यवान्तरवाक्यार्थबोधस्य पूर्वं सत्त्वात् कथमविशेषणत्वं चैत्रस्येति वाच्यम्। यत्र खलेकपोतन्यायेन बोधस्तत्र चैत्रीयं सादृश्यमित्यवान्तरवाक्यार्थबोधस्य पूर्वमभावादतो विशेषणत्वतात्पर्याविषयत्वपर्यन्तानुधावनम्। न च

रामरुद्री।

इवेत्यादौ चैत्रस्येवार्थसादृश्य एव विशेषणत्वेऽपि कारकविभक्त्यर्थकर्मत्वादावविशेषणत्वेनाख्यातार्थसंख्याया मैत्र इव चैत्रेऽप्यन्वयः स्यादतः कर्मत्वाद्यनवरुद्धत्वं निर्वक्तीति भावः। एवं कर्मत्वाद्यनवरुद्धत्वं यदि कर्मत्वाद्यनन्वितत्वं तदा पक्कमन्नं भुज्यत इत्यादौ पाककर्मत्वेनान्विते अन्ने आख्यातार्थसंख्याया अन्वयो न स्यादत इदमावश्यकमिति भावः। (१)इत्थं चेतरान्वितत्वेन तात्पर्याविषयत्वमित्यस्य परित्यागोऽनुचित इति ध्येयम्। नन्वितरार्थककर्मत्वादिपदं व्यर्थम्। विशेषणत्वेन तात्पर्याविषयत्वार्थकानवरुद्धत्वपदोपादानेनैव सामञ्जस्यादित्यस्वरसात् कर्मत्वाद्यनवरुद्धत्वमिति समुदायस्यैव विशेषणत्वेन तात्पर्याविषयत्वपरताभाह-**वस्तुतस्त्विति।** नन्वितरविशेषणत्वं परित्यज्येतरविशेषणत्वेन तात्पर्याविषयत्वानुधावनमफलमित्याशङ्क्यां निरसितु तत्प्रयोजनं दर्शयन्नाह—**अविशेषणत्वमिति। एवकारार्थोऽन्यस्मिन्निति।** एवकारार्थस्त्रिविधः, अन्ययोगव्यवच्छेदः, अयोगव्यवच्छेदः, अत्यन्तायोगव्यवच्छेदश्चेति। अत्र विशेष्यसङ्गतैवकारस्यान्ययोगव्यवच्छेदोऽर्थः। यथा चैत्रएव पचतीत्यादौ चैत्राद्यन्यस्मिन् पाककर्तृत्वयोगो व्यवच्छिद्यते तत्रान्यस्मिन् योगे व्यवच्छेदे च पृथगेवैवकारस्य शक्तिः। अन्यरूपार्थस्तु चैत्रांशे विशेष्यविधया भासते। सम्बन्धरूपयोग एवाख्यातार्थकृतेः प्रतियोगित्वेनान्वयः। तादृशयोगस्याभावरूपव्यवच्छेदे प्रतियोगिविधयाऽन्वयः। अभावश्चान्यस्मिन् प्रकारविधया भासते। तथाच चैत्रः पाकानुकूलकृतिमान् चैत्रान्यः पाकानुकूलकृतिसंम्बन्धाभाववानित्याकारक एव शाब्दबोधो भवति। एवंचोक्तस्थले सम्बन्धस्य केवलान्वयित्वेन सम्बन्धाभावाप्रसिद्धया शक्तिग्रह एव न संभवतीत्यपि प्रत्युक्तम्। विशेषणसङ्गतैवकारस्य चायोगव्यवच्छेदोऽर्थः। यथा शङ्खः पाण्डुर एवेत्यादौ शङ्खे पाण्डुरायोगो व्यवच्छिद्यते। क्रियासङ्गतैवकारस्य चात्यन्तायोगव्यवच्छेदोऽर्थः। यथा नीलं सरोजं भवत्येवेत्यादौ सरोजे नीलभवनस्यात्यन्तायोगो व्यवच्छिद्यते नत्वयोगो व्यवच्छिद्यते। क्वचित्सरोजे नीलत्वासम्बन्धस्यापि सत्त्वादिति ध्येयम्। यद्यप्ययोगेऽप्यत्यन्तत्वं सरोजत्वव्यापकत्वमेव वाच्यमन्यस्य दुर्वचत्वात्, तथाच सरोजनिष्ठभेदप्रतियोगितानवच्छेदकनीलत्वसम्बन्धाभावस्याप्रसिद्धया तद्व्यवच्छेदो दुर्घटः। तथाप्ययोगेऽत्यन्तत्वस्य सरोजनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपस्य व्यवच्छेद एवात्यन्तायोगव्यवच्छेदपदार्थ इति नोक्तानुपपत्तिः। नन्वेवकारार्थातिरिक्तविशेषणत्वेन तात्पर्याविषयत्वमेव कर्मत्वाद्यनवरुद्धत्वं वाच्यम्। अतश्चैत्रस्यैवकारार्थान्यस्मिन् विशेषणत्वेऽपि न तत्र संख्यान्वयानुपपत्तिरत

(१) 'इत्थञ्च इतरान्वितत्वेन तात्पर्याविषयत्वमित्यस्य परित्यागोऽनुचित इति ध्येयम्।' इति पाठोऽत्र दृश्यते।

दिनकरी।

चैत्र एव पचति, चैत्रश्चैत्रं पश्यतीत्यादावेवकारार्थेऽन्यस्मिन् कर्मादौ च चैत्रस्य विशेषणत्वात् कथं तत्र सङ्ख्यान्वय इति वाच्यम्। विशेषणत्वमात्रेण तात्पर्याविषयत्वस्य विवक्षितत्वात्। चैत्रस्योक्तस्थले विशेषणत्व-मुख्यविशेष्यत्वाभ्यां तात्पर्यविषयत्वात् तत्र सङ्ख्यान्वयोपपत्तिः। यदि च चैत्र इव मैत्र इत्यादौ चैत्रादेर्यदा न विशेषण(त्वतात्पर्यविषय)त्वं, तदा चैत्रेऽपि सङ्ख्यान्वयापत्तिः। न च शाब्दबोधे तात्पर्यज्ञानस्य हेतुत्वान्नैवमिति वाच्यम्। नानार्थातिरिक्तस्थले शाब्दबोधे तात्पर्यज्ञानस्य हेतुत्वे मानाभावादित्युच्यते, तदा विशेषणत्वमात्रप्रयोजकप्रथमान्ततत्तत्पदानुपस्थाप्यत्वं बोध्यम्। न विशेषणत्वे तात्पर्यम्-न विशेषणत्वमात्रे तात्पर्यम्। तथा च तण्डुलं पचतीत्यादौ यदि विशेषणत्वमुख्यविशेष्यत्वाभ्यां तण्डुलबोधे तात्पर्यं, तत्र तण्डुले सङ्ख्यान्वयवारणाय प्रथमान्तेत्यादीति भावः। इदमुपलक्षणम्। चैत्रेण सुप्यत इत्यादौ धात्वर्थस्वापादौ सङ्ख्यान्वयवारणाय प्रथमान्तपदोपस्थाप्यत्वस्याऽऽवश्यकत्वात्।

रामरुद्री।

एवेतरपदमपि सार्थकमित्याशङ्कायामाह—**चैत्र इत्यादि**। अत्र द्वितीयार्थे कर्मत्व एव चैत्रस्य विशेषणत्वेन तात्पर्यविषयत्वाच्चैत्रे संख्यान्वयो न स्यादिति भावः। **विशेषणत्वमात्रेणेति**। मुख्यविशेष्यत्वेन तात्पर्याविषयत्वे सति विशेषणत्वेन तात्पर्यविषयत्वं तदभावः संख्यान्वये नियामक इति भावः। **ननु नानार्थकसैन्धवादिपदात्कदाचिल्लवणस्यैव कदाचिदश्वस्यैव बोध इति नियमनिर्वाहाय तादृशस्थल एव तात्पर्यज्ञानस्य हेतुत्वं नतु सर्वत्र, एकार्थकपदस्थले तद्धेतुत्वकल्पने बीजाभावादेवं च चैत्र इवेत्यादौ चैत्रादेरिवार्थे यदा न विशेषणत्वे तात्पर्यं तदा चैत्रादौ संख्यान्वयः स्यादित्याशङ्कते—यदि चेत्यादिना। नानार्थातिरिक्तस्थल इति**। इदमुपलक्षणम्। तात्पर्यासत्त्वेऽपि भ्रमात्मकतात्पर्यज्ञानसंभवेन शाब्दबोधमात्रे तात्पर्यज्ञानस्य हेतुत्वेऽपि चैत्रे संख्यान्वयापत्तिर्दुष्टेत्या। **तदेत्यादि**। विशेषणत्वमात्रप्रयोजकं यच्चैत्र इवेत्यादौ प्रथमान्तचैत्रपदं तदनुपस्थाप्यत्वमेवाविशेषणत्वपदेनात्र विवक्षितम्। तथाच चैत्र इवेत्यत्र प्रथमान्तचैत्रपदस्यैवार्थे विशेषणत्वमात्रप्रयोजकतया तदुपस्थाप्यत्वेन न तत्र संख्यान्वयः। चैत्र एव पचतीत्यादौ चैत्रे संख्यान्वयोपपत्तये मात्रपदम्। मुख्यविशेष्यत्वाप्रयोजकत्वे सति विशेषणत्वप्रयोजकत्वं विशेषणत्वमात्रप्रयोजकत्वम्। यद्यपि चैत्र इवेत्यादावपि चैत्रपदजन्यपदार्थस्मरणे चैत्रो मुख्यविशेष्यतयैव भासत इति न तस्यापि विशेषणत्वमात्रप्रयोजकत्वं, तथापि शाब्दबोधनिरूपितविशेषणत्वमात्रप्रयोजकत्वमिह विवक्षितमिति न कोऽपि दोषः। नचात्र प्रथमान्तेति व्यर्थमिति वाच्यम्। चैत्रश्चैत्रं पश्यतीत्यत्र द्वितीयान्तचैत्रपदस्य विशेषणत्वमात्रप्रयोजकतया तदुपस्थाप्यत्वस्य चैत्रे सत्त्वेन तत्र संख्यान्वयोपपत्तये तदुपादानस्यावश्यकत्वात्। नचैवमपि यत्र चैत्रः पचति चैत्र इव मैत्रः सुन्दर इति वाक्यद्वयजन्यसमूहालम्बनशाब्दबोधस्तत्र चैत्रे संख्यान्वयो न स्यात्। तत्र तथाविधप्रथमान्तपदोपस्थाप्यत्वस्यैव तदानीं सत्त्वादिति वाच्यम्। यत्र यत्प्रथमान्तपदाख्यातपदाभ्यां स्वप्रयोज्यपरस्परनिरूप्यनिरूपकभावापन्नविषयताशालिशाब्दबोधो जन्यते तत्र विशेषणतामात्रप्रयोजकतत्प्रथमान्तपदोपस्थाप्यत्वाभावस्याख्यातार्थसंख्यान्वयप्रयोजकत्वोपगमादित्युक्तस्थले पचतीत्याख्यातपद-चैत्रइवेत्यादिभिन्नवाक्यस्थचैत्रपदाभ्यां न तादृशशाब्दबोधो जन्यत इति न तत्र संख्यान्वयानुपपत्तिः। अतस्तत्तत्पदमपि यत्र यस्यं साधु सङ्गच्छत इति ध्येयम्। ननु तण्डुलं पचतीत्यत्र तण्डुलस्य कर्मत्वांशे विशेषणत्वविवक्षाभावे द्वितीयैव नोपपद्यते। कर्मत्वांशे प्रकृत्यर्थस्य विशेषणत्वविवक्षाया मेव 'कर्मणि द्वितीये'त्यनेन तदुत्तरं द्वितीयाविधानात्। इत्थं च "न विशेषणत्वे तात्पर्य"मिति मूलमसंगतमत आह—न विशेषणत्व इत्यादि। विशेषणत्वमुख्यविशेष्यत्वाभ्यामित्यादि**। यत्र तण्डुल-

यद्वा धात्वर्थातिरिक्तविशेषणत्वं प्रथमदलार्थः। तेन चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रादेर्वारणम्। स्तोकं पचतीत्यादौ स्तोकादेर्वारणाय द्वितीयदलम्। तस्य द्वितीयान्तपदोपस्थाप्यत्वाद्वारणमिति।

दिनकरी।

द्वितीयदलस्य प्रकारान्तरेण प्रयोजनं वक्तुमन्यथा प्रथमदलार्थमाह-**यद्वेति। चैत्रादेर्वारणमिति।** तस्य साद्दश्ये विशेषणत्वादिति भावः। **द्वितीयान्तपदोपस्थाप्यत्वादिति।** प्रथमान्तपदोपस्थाप्यत्वाभावादित्यर्थः। अत्र कल्पे चैत्र एव पचतीत्यादौ चैत्रे सङ्ख्यान्वयोपपादनं सुधीभिर्विभावनीयम्। इदं त्ववधेयम्। सङ्ख्यान्वयबोधं प्रति न स्वातन्त्र्येण प्रथमान्तपदोपस्थाप्यत्वं हेतुः। आख्यातेन भावनानवगाहिसङ्ख्यान्वयबोधस्य कुत्राऽप्यजननात्। सङ्ख्यान्वयबोधत्वव्यापकभावनान्वयबोधत्वावच्छिन्नहेतुभूततादृशप्रथमान्तपदोपस्थाप्यत्वरूपकारणविरहेणैव प्रथमान्तपदानुपस्थाप्ये सङ्ख्यान्वयापत्त्यसम्भवात्। न च निरुक्तप्रथमान्तपदोपस्थाप्यत्वस्य जन्यतावच्छेदकं सङ्ख्यान्वयबोधत्वं भावनान्वयबोधत्वं वेत्यत्र विनिगमनाविरहः। सङ्ख्यान्वयमविषयीकृत्याऽपि भावनान्वयबोधस्याऽनुभवसिद्धतया भावनान्वयबोधत्वस्य जन्यतावच्छेदकत्वेन सङ्ख्यान्वयबोधत्वस्य तथात्वे मानाभावात्।

रामरुद्री।

कर्मकपाकानुकूलव्यापारवांस्तण्डुल इति शाब्दबोधे तात्पर्यं तत्र तण्डुलेऽपि संख्यान्वयवारणाय प्रथमान्तेत्यादीति भावः। ननु तण्डुल पचतीत्यत्र यदोक्तबोधे तात्पर्यं तदा तण्डुलेऽप्याख्यातार्थसंख्यान्वय इष्टापत्तिरेवेति यदि ब्रूयात्तदा स्थलान्तरे प्रथमान्तेत्यादेः प्रयोजनं दर्शयति—**इदमिति।** तथाच चैत्र इवेत्यादौ चैत्रे संख्यान्वयवारणाय कर्मत्वादीत्यादि। चैत्रेण सुप्यत इत्यादौ स्वापे तदन्वयवारणाय प्रथमतान्तेत्यादीति प्रयोजनमपि साधुप्रयोग एव संभवतीति भावः।

द्वितीयदलस्येति। तण्डुलं पचतीत्यत्राख्यातार्थस्य व्यापारस्य तण्डुले विशेषणत्वेनान्वयतात्पर्ये भावनान्वयिन्येव सख्यान्वय इति नियमात्तत्र संख्यान्वयोऽप्यावश्यकः। एवं संख्याया अभिहितत्वे प्रथमाप्यावश्यकी। उभयप्राप्तौ पर कारकमिति नियमात्। द्वितीयापेक्षया अभिहितकर्तुः प्रथमाया बलवत्त्वात्। तथाच चैत्रश्चैत्र पश्यतीतिवत्तण्डुलस्तण्डुलं पचतीति प्रयोगः साधुः। वस्तुतस्तु कर्मकर्तृ तु कर्मवदिति (कर्माभिन्नकर्तुः कर्मत्वातिदेशाद्य(१)गात्मनेपदयोरावश्यकत्वेन पच्यते तण्डुलः स्वयमेवेत्येव प्रयोगः साधुः। साधुप्रयोग एव प्रयोजनं दर्शनीयमित्यभिप्रायेण स्तोकं पचतीत्यादौ क्रियाविशेषणे सख्यान्वयवारणं प्रथमान्तेत्यादेः प्रयोजनमुक्तमित्यर्थः। भावनात्वं कर्तृत्वकर्मत्वान्यतरत्वम्।

'अपादानं संप्रदान ततोऽधिकरणं तथा। करणं कर्म कर्तेति कारकाणां क्रमो मतः॥' इत्यवधेयम्।

द्वितीयान्तेति। क्रियाविशेषणानां कर्मत्वं नपुंसकलिङ्गता चेतिवार्तिकेन कर्मत्वानुशासनात् क्रियाविशेषणानां द्वितीयान्तत्वादिति भावः। **विभावनीयमिति।** धात्वर्थातिरिक्तविशेषणत्वमात्रेण तात्पर्याविषयत्वमेव कर्मत्वाद्यनवरुद्धत्वमेतत्कल्पेऽपि विवक्षणीयमिति भावः। **संख्यान्वयमविषयीकृत्येति।** दाराः सन्तीत्यादौ नित्यबहुवचनान्तशरशब्दार्थे आख्यातार्थबहुत्वसंख्याया बाधितत्वादिति भावः। तथाच लः कर्तरीत्यत्रापि कर्तृपदस्य भावप्रधाननिर्देशत्वात् कर्तृत्वमेवार्थः। कर्तृत्वं च क्रियानुकूलकृतिमत्त्वं मुख्यं, गौण च क्रियानुकूलव्यापारवत्त्वमाश्रयत्वं वा, नश्यतीत्यादौ प्रतियोगित्वमपीति बोध्यम्। एवं चानभिहित इत्यधिकारीय 'कर्तृकरणयोस्तृतीये'त्यादावपि कर्तृत्वकरणत्वयोरित्यादिरेवार्थः। यत्र कर्मत्व कर्तृत्वं करणत्वं चाभिहितं तत्र प्रथमैव न द्वितीयातृतीये। 'कर्मणि द्वितीये'ति

(१) कर्तुर्ल्डात्मनेपदयोरिति पाठान्तरम्।

एवं व्यापारेऽपि न शक्तिः, गौरवात्। रथो गच्छतीत्यादौ तु (स्व) व्यापारे, आश्रयत्वे वा लक्षणा(१)। जानातीत्यादौ त्वाश्रयत्वे, नश्यतीत्यादौ तु प्रतियोगित्वे निरूढलक्षणा।

दिनकरी।

लकारसामान्यस्य व्यापारोऽर्थ इति मीमांसकमतं दूषयति—**गौरवादिति**। जन्यत्वादिघटितस्य व्यापारत्वस्य कृतित्वजात्यपेक्षया गुरुत्वादिति भावः। नन्वाख्यातस्य न यत्नार्थकत्वं, रथो गच्छतीत्यादौ तदभावेऽप्याख्यातपदप्रयोगादत आह—**रथ इति**। रथो गच्छतीत्यत्र गमनानुकूलव्यापारस्य न बोधः, किन्तु गमनाश्रयत्वस्यैवेति नवीनमतमाश्रित्याऽऽह। **आश्रयत्वे वेति**। लक्षणा—निरूढलक्षणा। क्वचित्त्वेव पाठः। चक्षुर्जानातीत्यादौ व्यापारे जनकत्वे वा लक्षणास्वीकाराज्जानातीत्यादावाख्यातस्याऽऽश्रयत्वे लक्षणानियमो न सम्भवतीत्यत आह। **आदाविति**। आदिना(२) इच्छति, यतते इत्यादेः **सङ्ग्रहः**। इदमत्र बोध्यम्। तण्डुलं पचति चैत्र इत्यादौ कर्मत्वं द्वितीयार्थः, तत्र तण्डु-

रामरुद्री।

तद्विधायकसूत्राणामनभिहिताधिकारस्थत्वात्। प्रातिपदिकार्थस्य मुख्यविशेष्यत्वविवक्षायां संबोधने लकाराद्यभिहितकर्तृत्वाद्याश्रये प्रथमाया एव विधानात्। एतेनाख्यातेन तद्वतसख्यानभिधानस्यैव तद्बोधकपदोत्तरतृतीयाप्रयोजकत्वे दाराः सन्तीत्यादावाख्यातेन दारेषु बहुत्वस्य बाधितत्वेनाबोधनाद्दारैरिति तृतीयापत्तिरित्यपि प्रत्युक्तमित्यपि विभावनीयम्।

जन्यत्वादीति। तज्जन्यत्वे सति तज्जन्यजनकस्यैव व्यापारपदार्थत्वादिति भावः। **तदभावेऽपीति**। रथस्याचेतनत्वेन यत्नाभावेऽपीत्यर्थः। **गमनानुकूलव्यापारस्येति**। उत्तरदेशसंयोगानुकूलक्रिया गमधात्वर्थः। तदाश्रयत्वमेव रथो गच्छतीत्यादौ रथे प्रतीयते नतु तादृशक्रियानुकूलाश्वादिसंयुक्तरज्ज्वादिसंयोगवत्त्वमिति भावः। **निरूढलक्षणेति**। अनादितात्पर्यविषयलक्षणेत्यर्थः। **आदिनेति**। तथाच

---

(१) अत्रेदमाहुः। विभक्तौ लक्षणानङ्गीकारात्कथं तत्र बोधः? न च विभक्तौ लक्षणाऽङ्गीक्रियते, बाधकाभावात्, तथा च नैष दोष इति वाच्यम्। तथा सति व्यत्ययानुशासनवैयर्थ्यापत्तेः। तथा हि—व्यासस्य कृतिः, भारतस्य श्रवणमित्यादौ कर्तृकर्मकृत्योगे षष्ठ्यापि कर्तृत्व-कर्मत्वबोधोऽनुभवसिद्धः, तत्र 'कर्मणि द्वितीया(२।३।२)', 'कर्तृकरणयोस्तृतीया(२।३।१८)' इत्यनुशासनबलेन द्वितीया-तृतीययोर्विहिततया षष्ठ्यनुपपत्तिरतः 'कर्तृकर्मणोः कृति(२।२।६५)' इत्यनुशासनं कृतम्। यदि विभक्तावपि लक्षणासम्भवस्तदा तदनुशासनं व्यर्थमापद्येत, षष्ठ्याः कर्तृत्व—कर्मत्वादिलाक्षणिकतायाः प्रागुक्तस्थले कल्पनसम्भवात्, तस्माद्विभक्तौ लक्षणामनङ्गीकृत्यैव तदनुशासनस्य सार्थकत्वं नेयम्। तथा च रथो गच्छतीत्यादौ तिबः कथं व्यापारादिलाक्षणिकता? इति।

तदसत्। अनुशासितविभक्त्यर्थातिरिक्तविभक्त्यर्थ एव विभक्तौ लक्षणाऽस्वीकारात् अतो विभक्त्यर्थे व्यापारादौ लक्षणास्वीकारे बाधकाभावात्।

किञ्च विभक्तौ लक्षणाऽस्वीकारे भाविनं घटं जानातीत्यादौ कथमन्वयबोधः? तत्र विषयताया द्वितीयाऽशक्यत्वात्। विषयतैव द्वितीयार्थः, क्रियाजन्यफलशालित्वापेक्षया लघुत्वादिति चेत्तर्हि ग्रामं गच्छतीत्यादौ कथमन्वयबोध इति निपुणैरेव निरूपणीयम्। वस्तुतस्तु विभक्तौ लक्षणा नाऽस्तीति व्यवहारः सुब्विभक्तौ लक्षणा नास्तीत्यभिप्रायकः, अत एव विद्यते व्योम, घटस्तिष्ठति, सत्ताऽस्तीत्यादिप्रयोगाः, तिङ्विभक्तौ लक्षणास्वीकारादिति हृदयम्। (२) 'आदितः' इत्यपि पाठः।

उपमानाद्यथा शक्तिग्रहस्तथोक्तम् ।

एवं कोशादपि शक्तिग्रहः । सति बाधके क्वचित् त्यज्यते । यथा नीलादिपदानां नीलरूपादौ नीलविशिष्टे च शक्तिः कोशेन व्युत्पादिता, तथाऽपि लाघवान्नीलादावेव शक्तिः नीलादिविशिष्टे तु लक्षणेति ।

दिनकरी ।

लस्याऽऽधेयतयाऽन्वयः, कर्मस्वस्य पाके, पाकस्याऽऽख्यातार्थकृतौ, तस्याश्चैत्र इति तण्डुलकर्मकपाकानुकूलकृतिमाँश्चैत्र इति बोधः । चैत्रेण पच्यते तण्डुल इत्यत्र कृतिस्तृतीयार्थः, तस्यामाधेयतया चैत्रादेरन्वयः, तस्याश्च धात्वर्थपाके, तस्याऽऽत्मनेपदार्थफले, तस्य चाऽऽश्रयतासम्बन्धेन तण्डुले इति चैत्रवृत्तिकृतिजन्यपाकजन्यफलाश्रयस्तण्डुल इत्यन्वयबोधः । कृतां तु कर्ता कर्म चाऽर्थः, चैत्रः पक्ता, तण्डुलः पक्व इत्यादावभेदान्वयानुरोधात्, नामार्थयोर्भेदान्वयबोधस्याऽव्युत्पन्नत्वादित्यन्यत्र विस्तरः ।

तथोक्तमिति । उपमाननिरूपणावसर इति शेषः ।

शक्तिग्रह इति । भवतीति शेषः । कोशेन व्युत्पादितेति ।

'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति*–'

इति कोशस्योभयत्र शक्तिग्राहकत्वादिति भावः । **लाघवादिति ।** नीलादिमत्त्वापेक्षया नीलत्वादिजातेर्लघुतया शक्यतावच्छेदकत्वादिति भावः । **नीलादिविशिष्टे तु लक्षणेति ।** "गुणवचनेभ्यो मतुपो लुगिष्टः–" इति स्मरणाल्लुप्तेन मतुपैव विशिष्टार्थबोधसम्भवेऽलं लक्षणयेत्यपि वदन्ति ।

तत्–घटानयनम् ।

ननु व्यवहारेणाऽनयनादिनाऽनुमितघटानयनादिधर्मिककार्यताज्ञाने पदानां कारणत्वं

रामरुद्री ।

जानातीत्यत्राख्यातस्याश्रयत्वे लक्षणानियामकाभावेऽपीच्छति यतत इत्यादौ तन्नियमो वर्तत एवेति भावः । इदं च चैत्रादिपदस्य तत्तच्छरीरावच्छिन्नात्मपरतामभ्युपगम्योक्तम् । चैत्रो गौरः कृशः सच्छाय इत्यादिप्रयोगानुरोधेन यदि तेषां तत्तच्छरीरपरत्वं तदाऽऽख्यातस्य लक्षणयाऽवच्छेदकत्वार्थकत्वमेवेति मन्तव्यम् । इदानीं शाब्दबोधप्रकारमाह—**कृतामिति ।** कृत्प्रत्ययानामित्यर्थः । **अर्थ इति ।** ननु कर्तृत्वं कर्मत्वं वेति शेषः । चैत्रः पक्तेत्यादौ मास्त्वभेदान्वयबोधः । कृदर्थकर्तृत्वादेश्चैत्रादावाश्रयतयैवान्वयसंभवादत आह—**नामार्थयोरिति ।** निपातातिरिक्तनामार्थयोरित्यर्थः । तेन घटो नास्तीत्यादौ घटादेर्नञर्थे भेदेनान्वयेऽपि न क्षतिः । **भेदेन** अभेदातिरिक्तसम्बन्धेन । **अव्युत्पन्नत्वात् ।** निराकाङ्क्षत्वादित्यर्थः । नामार्थयोस्तथाऽन्वयबोधेऽप्याकाङ्क्षास्वीकारे भूतलं घट इत्यादावपि भूतलवृत्तिर्घट इति बोधापत्तिरिति भावः । ननु पक्तृपदोत्तरचैत्रादिपदस्वरूपसमभिव्याहारज्ञानं भेदान्वयबोधे प्रयोजकं तदभावादेव भूतलं घट इत्यादौ न भेदान्वयबोध इत्यत आह—**अन्यत्र विस्तर इति ।** अनन्ततत्तत्समभिव्याहाराणां भेदान्वयबोधप्रयोजकत्वकल्पनामपेक्ष्य नामार्थस्य प्रत्ययार्थेन सममेव भेदान्वयबोध आकाङ्क्षा, नतु नामार्थेनापीति कल्पनस्यैवोचितत्वादिति भावः । **शक्तिग्राहकत्वादिति ।** सप्तम्याः कोशे वाचकत्वार्थकत्वाद्वाचकत्वस्य शक्ततारूपत्वादिति भावः । **नीलादिमत्त्वेति ।** नीलपीतादिरूपापेक्षयेत्यर्थः । **लघुतयेति ।** अनन्तानां नीलत्वादिविशिष्टानां नीलादिरूपाणां शक्यतावच्छेदकत्वकल्पनामपेक्ष्य एकस्या नीलत्वादिजातेः स्वरूपतः शक्यतावच्छेदकत्वे लाघवाज्जातेः स्वरूपतोऽपि भानसंभवेन स्वरूपतस्तथात्वे बाधकाभावादिति भावः । **गुणवचनादिति ।** गुणवाचकान्नीलादि-

* अमरसिंहकृतं नामलिङ्गानुशासनम् ।

एवमाप्तवाक्यादपि । यथा कोकिलः पिकशब्दवाच्य इत्यादिशब्दात् पिकादिशब्दानां कोकिले शक्तिग्रहः ।

एवं व्यवहारादपि । यथा प्रयोजकवृद्धेन घटमानयेत्युक्तं, तच्छ्रुत्वा प्रयोज्यवृद्धेन घट आनीतः, तदवधार्य पार्श्वस्थो बालो घटानयनरूपं कार्यं घटमानयेतिशब्दप्रयोज्यमित्यवधारयति । ततश्च घटं नय, गामानयेत्यादिवाक्यादावापोद्धापाभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति ।

इत्थञ्च भूतले नीलो घट इत्यादिवाक्यान्न (१) शाब्दबोधः, घटादिप-

दिनकरी ।

लाघवात् पदत्वावच्छेदेनैव गृहीतम् । एवञ्च साक्षात् परम्परया वा कार्यत्वान्वितविषयकशाब्दत्वावच्छिन्नं प्रति पदत्वेन कारणतेति कार्यकारणभावः पर्यवसितः । इयमेव कार्यान्विते पदानामानुभाविकी शक्तिः । एवञ्च कार्यत्वान्वितविषयकशाब्दत्वव्यापकीभूतकार्यतावि-षयकशाब्दत्वावच्छिन्नजनककार्यतावाचकलिङादिपदाभावात् कथं कोशादितः शक्तिग्रह इति प्रभाकराक्षेपं तन्मतदूषणेन दूषयितुं तन्मतसिद्धमर्थं प्रदर्शयति—**इत्थञ्चेत्यादिना ।**

रामरुद्री ।

शब्दान्मतुप'स्तदस्यास्ती'त्यर्थे विहितस्य मतुवर्थकप्रत्ययस्य लोपो व्याकरणप्रणेतृभिरिष्ट इत्यर्थका-दृगुणवचनादिति व्याकरणस्मृतेरिति समुदायार्थः । अत्र च नीलो घटोऽस्तीत्यादौ सर्वत्रैव शाब्दबो-धात्पूर्वं लुप्तमतुवर्थकप्रत्ययकल्पनामपेक्ष्य नीलादिरूपविशिष्टे नीलादिपदानां लक्षणाकल्पनमेव ज्यायः । किंचास्मृतमतुपः पुरुषस्य शाब्दबोधानुपपत्तिः । अनुभूयते च तादृशानुपूर्वीज्ञानान्मतुपोऽस्मरणेऽपि शाब्दबोध इत्यस्वरसोऽपि वदन्तीभ्यां सूचितः । **कार्यज्ञान इति** । अभेदसंबन्धेन कार्यप्रकारक-ज्ञान इत्यर्थः । यद्यपि कार्यत्वे लिङादेः शक्तिकल्पनमुचितं, तस्य घटानयनादौ प्रकारतया भानोपगमेनैव घटानयनं कार्यमिति निर्वाहात्, अनन्तकार्यरूपधर्मिणि तेषां शक्तिकल्पनमनुचितं गौरवादित्यभेदेन कार्यप्रकारकबोधे पदानां सामर्थ्यावधारणोक्तिरसंगता । तथापि प्राभाकरैर्वैदलिङादेः कार्यत्वेनापूर्वविषयकः शाब्दबोधः स्वीक्रियते । अत्र चापूर्वस्य पूर्वमनुपस्थितत्वेन तत्र शक्तिग्रहासंभव इत्याशङ्क्य सामान्यलक्षणानभिज्ञैरेवैरेव स्वन्मते यथानुभूते गवि गृहीतशक्तिकाद्गवादिपदाद्योग्य-ताबलात्पूर्वानुभूतगवादिविषयकशाब्दबोधो भवति तथा मन्मतेऽपि घटादौ कार्यत्वेन गृहीतशक्तिकलि-ङादितोऽपि यजेतेत्यादौ यागजन्यकार्यमिति घटादिरूपकार्ये यागजन्यत्वस्य बाधितत्वेन योग्यताबलाद-पूर्वविषयकशाब्दबोधो भवतीति समाहितत्वात् कार्यबोध इत्युक्तमित्यवधेयम् । जातिशक्तिवादिना तद-न्तरशक्यतावच्छेदकपदे विशिष्ट एव शक्तत्वमुपेयते । तत्र शक्त्या निरवच्छिन्नत्वैकत्वयोः संभवादित्यपि बोध्यम् । **इत्थंचाग्रे कार्यतावि**षयकशाब्दबोध इति मूलस्यैव कार्यत्वावच्छिन्नविषयकशाब्दबोध इत्ये-वार्थो बोध्यः । **लाघवादिति** । तत्तत्पदत्वावच्छेदेन नानाकारणताग्रहकल्पने गौरवात्तदपेक्षया पदत्वा-वच्छेदेनैव कारणताग्रहकल्पने लाघवादित्यर्थः । **आनुभाविकीति** । शाब्दबोधानुभवजनिकेत्यर्थः । **शक्तिः** सामर्थ्यं । तन्मते पदानां शक्तिर्द्विविधा स्मारिका आनुभाविकी चेति । तत्र स्मारिका शक्तिः कार्यान्विते घटादावेव । एवंच घटादिपदात्केवलघटादिस्मरणमुपपद्यते । आनुभविकी तु कार्यान्वितघ-टादावेवेति मन्तव्यम् । नन्वत्र नीलो घट इत्यादौ लिङाद्यभावेऽपि पदमात्रस्यैव कार्यान्वितविषयकशा-ब्दबोधकारणत्वेन तादृशशाब्दबोधः स्यादेवेत्यत आह—**एवञ्चेति** । व्याप्यधर्मावच्छिन्नस्य कारणेन कार्योत्पादने व्यापकधर्मावच्छिन्नस्य कारणापेक्षणाल्लिङादिकं विना न तादृशशाब्दबोध इति भावः । **कार्यतेति** । कार्यत्वावच्छिन्नविषयकस्यापि कार्यतेति विषयकत्वादित्थमभिधानम् । एवं

(१) 'दिशब्दान्न' इत्यपि पाठः ।

दानां कार्यान्वितघटादिबोधे सामर्थ्यावधारणात्, कार्यताबोधं प्रति च लिङादीनां सामर्थ्यात्तदभावान्न शाब्दबोध इति केचित्।

तन्न। प्रथमतः कार्यान्वितघटादौ शक्त्यवधारणेऽपि लाघवेन पश्चात्तस्य परित्यागौचित्यात्। अत एव चैत्र! पुत्रस्ते जातः, कन्या ते गर्भिणीत्यादौ मुखप्रसाद-मुखमालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन परिशेषाच्छाब्दबोधं निर्णाय तद्धेतुतया तं शब्दमवधारयति। तथा च व्यभिचारान्न कार्यान्विते शक्तिः। न च तत्र तं पश्येत्यादिशब्दान्तरमध्याहार्यं, मानाभावात्। चैत्र! पुत्रस्ते जातो मृतश्चेत्यादौ तदभावाच्च।

इत्थं च लाघवादन्वितघटेऽपि शक्तिं त्यक्त्वा घटपदस्य घटमात्रे शक्तिमवधारयति।

दिनकरी।

एतेन स्मारकशक्तिप्रसङ्गे आनुभावकशक्तिप्रदर्शनमनुचितमित्याशङ्का निरस्ता। ननु भूतले नीलो घट इत्यादितः कार्यताविषयकबोधापत्तिः, तत्र तादृशपदानां सामर्थ्यावधारणादिति त्वयैवोक्तत्वादित्यत आह—**कार्यताबोधं प्रति चेति। सामर्थ्यात्तदभावादिति।** कार्यताबोधं प्रति लिङादिपदानां स्वजन्यकार्यत्वोपस्थितिद्वारा हेतुत्वम्। घटाद्रिपदानां कार्यत्वानुभवं प्रति हेतुत्वेऽपि घटादिपदेषु कार्यत्वस्मारकशक्त्यभावेन स्मारकशक्त्या कार्यत्वोपस्थापकलिङादिपदाभावान्न भूतले घट इत्यादितः शाब्दबोध इति भावः।

लाघवेनेति। कार्यत्वान्वितघटशाब्दत्वापेक्षया घटशाब्दत्वस्य कार्यतावच्छेदकत्वे लाघवेनेत्यर्थः। **अत एव** कार्यत्वाविषयकबोधं प्रति पदानां हेतुत्वादेव। **तत्कारणत्वेन** सुखदुःखयोः कारणत्वेन। **तद्धेतुतया**-तादृशशाब्दबोधहेतुतया। **व्यभिचारादिति।** घटादिपदैः कार्यताविषयक एव बोधो जन्यते इति नियमे व्यभिचारादित्यर्थः। कार्यत्वाविषयकबोधस्य चैत्र! पुत्रस्ते जात इत्यादिपदैर्जननादिति भावः। **अध्याहार्यमिति।** तथा च तत्राऽपि लोडादिजन्यकार्यत्वोपस्थितेः सत्त्वेन कार्यताविषयकबोधस्यैवोत्पादान्न तादृशनियमे व्यभिचार इति भावः। **तदभावाच्चेति।** तं पश्येत्यादिकार्यताबोधकपदाध्याहारासम्भवाच्चेत्यर्थः।

भट्टमतं प्रक्षिपन् स्वमतमुपसंहरति। **इत्थं चेति। लाघवादिति।** अन्वितघटे शक्तिकल्पनापेक्षया घटमात्रे तत्कल्पने लाघवादित्यर्थः।

रामरुद्री।

कार्यतावैशिष्ट्यवाचकस्यापि कार्यतावाचकत्वादेव कार्यतावाचकेत्युक्तमित्यपि बोध्यम्। **एतेनेति।** उक्तरीत्या एतद्ग्रन्थस्यावतारणेनेत्यर्थः। **स्मारकशक्तिप्रसङ्ग इति।** स्मारकशक्तिग्राहकत्वेनैव व्याकरणादीनां प्रकृतग्रन्थ उपन्यस्तत्वादिति भावः। **पदानामिति।** लिङादिपदानामित्यर्थः। घटादिपदानां स्वजन्यकार्यत्वोपस्थित्यभावादिति मन्तव्यम्। **मूले प्रथमत इति।** कार्यान्वितघटशाब्दत्वापेक्षया घटशाब्दत्वे लाघवज्ञानात्पूर्वमित्यर्थः। **भट्टमत प्रक्षिपन्निति।** तन्मतं निरस्यन्नित्यर्थः। शाब्दबोधे पदानुपस्थितार्थभानोपगमे घटोऽस्तीत्यादौ पटविषयकशाब्दबोधापत्त्या पदादुपस्थितार्थ एव शाब्दबोधे भासत इति नियमः स्वीकार्यः। तथाच पदार्थद्वयसंसर्गस्य तु पदानुपस्थाप्यत्वे तादृशनियमभङ्गः स्यादितीतरान्विते पदानां शक्तिरिति भट्टः। तत्र चेतरत् पदार्थान्तरं तदन्विते तत्प्रतियोगिकसंसर्गविशिष्टे घटादौ घटादिपदानां शक्तिरित्यर्थः। तत्रेतरस्य पदान्तरादेव लाभान्न तदन्तर्भावेन घटादि-

एवं वाक्यशेषादपि शक्तिग्रहः। यथा 'यवमयश्चरुर्भवति' इत्यत्र यवपदस्य दीर्घशूकविशेषे आर्याणां प्रयोगः, कङ्गौ तु म्लेच्छानाम्। तत्र हि "यदान्या ओषधयो म्लायन्ते, अथैते मोदमानास्तिष्ठन्ति-"

("वसन्ते सर्वसस्यानां जायते पत्रशातनम्।
मोदमानाश्च तिष्ठन्ति यवाः कणिशशालिनः-")

इति वाक्यशेषाद्दीर्घशूके शक्तिर्निर्णीयते (१), कङ्गौ तु शक्तिभ्रमात् प्रयोगः, नानाशक्तिकल्पने गौरवात्। हर्यादिपदे तु विनिगमकाभावान्ना-

दिनकरी।

'यवपदस्य' इत्यस्य देहलीदीपन्यायेनाऽन्वयः। तत्र हि तादृशद्विविधव्यवहारेण कङ्गौ दीर्घशूके वा **यवपदस्य शक्तिरिति** सन्देहे सति यवपदस्य इति वाक्यशेषाद्दीर्घशूके शक्तिर्निर्णीयते इत्यन्वयः। **नन्वस्तु यवपदस्य वाक्यशेषाद्दीर्घशूके शक्तिः। कङ्गावपि शक्तिसत्त्वे बाधकाभाव इत्यत आह—नानाशक्तीति।** कथं तर्हि हर्यादिपदे नानाशक्तिकल्पनेत्यत आह—**हर्यादिपदे त्विति। विनिगमकाभावादिति।** तत्र कोशस्योभयत्र तुल्यत्वा-

रामरुद्री।

पदानां शक्तिरुपेयते।' किंत्वितरप्रतियोगिकत्वोपलक्षिततत्तत्संसर्गविशिष्टघटादावेवेति भट्टमतं तदप्यनुपादेयमेव, घटविषयकशाब्दत्वापेक्षयाऽन्वितघटादिविषयकत्वस्य गुरुत्वादिति मूलग्रन्थतात्पर्यम्। **नचैवं** घटोऽस्तीत्यादितः पटादिविषयकशाब्दबोधापत्तिरिति वाच्यम्। संसर्गतामिन्नतत्तन्निष्ठविषयताशालिशाब्दत्वावच्छिन्नं प्रति पदजन्यतत्तद्विषयकोपस्थितित्वेन हेतुत्वात्। प्रकारविशेष्यमर्यादया शाब्दबोधे पदानुपस्थितस्य भानासंभवात्। संसर्गभानं तु शाब्दबोधे पदद्वयसमभिव्याहाररूपविशेषाकाङ्क्षानियम्यमेवेति न तत्रानियमः। अनन्यलभ्यः शब्दार्थ इति न्यायानुरोधादपि संसर्गे न शक्तिरुपेयते। संसर्गस्याकाङ्क्षालभ्यत्वादिति भावः। **यवपदस्येत्यस्येति।**

देहलीदीपेति। देहलीस्थो दीपो भवनान्तर्बहिस्थविश्ववस्तुप्रकाशकत्वेन संबध्नाति तथोक्तषष्ठ्यन्तपदमपि पूर्वतनशक्तिग्रहे उत्तरत्र प्रयोगे चान्वेतीत्यर्थः। **तत्र हीत्यादि** मूलग्रन्थेऽन्वयप्रकारमाह—**तत्र हीति।** यवमयश्चरुर्भवतीत्यत्र हीत्यर्थः। शक्तिनिर्णये वाक्यशेषापेक्षा सन्देहस्थल एव संभवती-

---

(१) इदमुपलक्षणम्।

'यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदम्-'

**इत्यादिवाक्यशेषात्स्वर्गेऽपि स्वःपदशक्तिग्रहः। एवमेवेन्द्रादिपदानामपि 'वज्रहस्तः पुरन्दरः' इत्यादिवाक्यशेषादेव शक्तिग्रह इत्यपि बोध्यम्। ननु स्वःपदशक्यतावच्छेदकं किं? न तावत् सुखत्वं, अस्मदादिसुखस्याऽपि स्वर्गत्वापत्तेः। नाऽपि दुःखासमानाधिकरणसुखत्वम्, स्वर्गसुखस्याऽपि आदावन्ते च दुःखसमानाधिकरणतया तादृशसुखाप्रसिद्धेः। न च दुःखासमानकालीनत्वम्, अस्मदीयदुःखमादाय स्वर्गस्याऽपि दुःखसमानकालीनत्वात्। न वा स्वसमानाधिकरणदुःखासमानकालीनत्वम्, अस्मदीयसुखस्याऽपि कदाचित् तथात्वसम्भवेन स्वर्गत्वापत्तेरिति चेदत्र केचित्। नित्यसुखत्वमेव स्वःपदशक्यतावच्छेदकम्। न च तस्य यागादिकार्यतावच्छेदकत्वानुपपत्तिरिति वाच्यम्। तदभिव्यक्ति प्रत्येव यागादेः कारणत्वादित्याहुः। तन्न। नित्यसुखसत्त्वे प्रमाणाभावात्। किन्तु अधर्माजन्यशरीरावच्छिन्नसुखत्वम्। न च स्वर्गेऽपि पतनशङ्कया परसमुत्कर्षोपतापेन च दुःखोत्पत्तेः कथं तच्छरीरस्याऽधर्माजन्यत्वमिति वाच्यम्। तादृशदुःखजनकाधर्मातिरिक्ताधर्माजन्यत्वस्यैव विवक्षितत्वादित्यन्यत्र विस्तरः।

नाशक्तिकल्पनम् ।

एवं विवरणादपि शक्तिग्रहः । विवरणं तु तत्समानार्थकपदान्तरेण तदर्थकथनम् । यथा घटोऽस्तीत्यस्य कलशोऽस्तीत्यनेन विवरणात् घटपदस्य कलशे शक्तिग्रहः । एवं पचतीत्यस्य पाकं करोतीत्यनेन विवरणादाख्यातस्य यत्नार्थकत्वं कल्प्यते ।

एवं प्रसिद्धपदस्य सान्निध्यादपि शक्तिग्रहः । यथा-इह सहकारतरौ मधुरं पिको रौतीत्यादौ पिकशब्दस्य कोकिले शक्तिग्रह इति ।

इति शक्तिग्रहोपायनिरूपणम् ॥

तत्र जातावेव शक्तिग्रहः, न तु व्यक्तौ, व्यभिचारात्, आनन्त्याच्च ।

दिनकरी ।

तं , प्रकृते च वाक्यशेषस्यैव विनिगमकत्वादिति भावः ।

आख्यातस्य यत्नार्थकत्वमिति । न च विवरणस्य कथं शक्तिग्राहकत्वं, तद्वाचकपदाभावादिति वाच्यम् । आख्यातं यत्नत्वविशिष्टे शक्तं, यत्नत्वविशिष्टशक्त-करोति-प्रतिपादितार्थप्रतिपादकत्वादित्यनुमानविधया तस्य शक्तिग्राहकत्वात् ।

प्रसिद्धपदस्येति । प्रसिद्धार्थकपदस्येत्यर्थः । तिङर्थधर्मिणि नामार्थान्वयस्याऽव्युत्पन्नतया नेदं शक्तिग्रहस्योदाहरणमिति तु न ।

'यो यः शूद्रस्य पचति द्विजोऽन्नं सोऽतिनिन्दितः-'

इत्यादौ तिङर्थधर्मिणि तथाऽन्वयदर्शनेन तादृशनियमस्याऽसिद्धेः ॥

इति शक्तिग्रहोपायनिरूपणम् ॥

प्रसङ्गात् परमतनिराकरणपूर्वकं स्वमते जात्यादिविशिष्टे शक्तिं व्यवस्थापयितुं मीमांसकमतमाह--**जातावेवेति** । जातिविशिष्टे शक्तिस्वीकारे जातावपि शक्तिग्रहस्याऽऽवश्यकता, नाऽगृहीतविशेषणन्यायात् तथा च जातावेव शक्तिः, लाघवात् । तदुक्तं--

'विशेष्यं नाऽभिधागच्छेत् क्षीणशक्तिर्विशेषणे-'

रामरुद्री ।

त्यभिप्रायेण तादृशेत्यादि सत्यन्तं पूरयति—**तादृशेति** । **तद्वाऽचकेति** । शक्तिवाचकपदाभावादित्यर्थः । कोशे तु 'विनायको विघ्नराज' इत्यादौ सप्तम्या वाचकत्वार्थकतया वाचकतायाश्च शक्तिनिरूपकतारूपतया तद्वाचकपदमस्त्येवेति भावः । 'अमरा निर्जरा देवा' इत्यादौ एते शब्दा एकार्थवाचका इत्यध्याहाराच्छक्तिग्राहकत्वमित्यपि बोध्यम् ।

प्रसिद्धार्थकपदस्येति । प्रसिद्धार्थकपदसमभिव्याहारोऽप्यनुमानविधयैव शक्तिग्राहकः । तथा युक्तवाक्यादिहाम्रवृक्षे मधुरारावकर्ता पिकपदवाच्य इत्येव बोधः । पिकपदस्य पूर्वं शक्तिग्रहाभावात्कोकिलदर्शनानन्तरं कोकिलः पिकपदवाच्यः सहकारतरौ मधुरारावकर्तृत्वादित्यनुमानादेव शक्तिग्रह इति ध्येयम् ।

इति शक्तिग्रहोपायनिरूपणम् ।

प्रसङ्गादिति । प्रसङ्गसङ्गतेरित्यर्थः । **नागृहीतेति** । नागृहीतविशेषणा बुद्धिर्विशिष्टेषूपजायत इति न्यायः । अगृहीतं अविषयीकृतं विशेषणं ययेति व्युत्पत्त्या विशेषणाविषयिणी बुद्धिर्विशिष्टेषु नोपजायते विशिष्टविषयिणी न भवतीत्यर्थः । सप्तम्या विषयत्वार्थकत्वात् । **लाघवादिति** । घटत्वविशिष्टनानाघटेषु शक्तिकल्पनामपेक्ष्य शुद्धैकघटत्वे शक्तिकल्पने लाघवादित्यर्थः । **विशेष्यमित्यादि** ।

व्यक्तिं विना जातिभानस्याऽसम्भवाद्व्यक्तेरपि भानमिति केचित् ।

तन्न । शक्तिं विना व्यक्तिभानानुपपत्तेः । न च व्यक्तौ लक्षणा, अनुपपत्तिप्रतिसन्धानं विनाऽपि व्यक्तिबोधात् । न च व्यक्तिशक्तावानन्त्यम् सकलव्यक्तावेक-

दिनकरी ।

इति भावः । यस्यां कस्यांचिद्व्यक्तौ शक्तिः, सर्वासु वेति विकल्प्य आद्ये दोषमाह— **व्यभिचारादिति** । अगृहीतशक्तिकव्यक्तावपि शाब्दबोधोदयेन तत्र शक्तिज्ञानाभावाद्व्यभिचार एवेति भावः । द्वितीये तमाह । **आनन्त्यादिति** । व्यक्तिभेदेन शक्तिभेदाच्छक्त्यानन्त्यमित्यर्थः । **असम्भवादिति** । जातिभासकसामग्र्या एव व्यक्तिभासकत्वादिति भावः । इदमेव **कथमिति** चेत् , व्यक्तिविशेष्यकजातिप्रकारकशाब्दबोधे जातिविषयकशक्तिज्ञानत्वेन हेतुत्वात् । न च तादृशबोधे व्यक्तिशक्तिज्ञानत्वेन हेतुत्वमुपगम्य व्यक्तावेव शक्तिः किं नाऽङ्गीक्रियत इति वाच्यम् । तथा सति उक्तानन्त्यादिदोषप्रसङ्गादिति ।

शक्तिं विनेति । पदजन्यपदार्थोपस्थितेः शाब्दबोधं प्रति हेतुतया व्यक्तिशक्तिं विना तद्भानानिर्वाहादिति भावः । **लक्षणेति** । तावतैव वृत्त्या पदजन्यपदार्थोपस्थितेर्निर्वाहादिति भावः । **अनुपपत्तिप्रतिसन्धानं विनाऽपीति** । गामानयेत्यादौ गोत्वजातेरानयनान्वयानुपपत्त्या गोपदस्य गवि लक्षणास्वीकारेऽपि गौरस्तीत्यादौ गोत्वजातेरस्तित्वाद्यन्वयानुपपत्तेर्लक्षणाबीजस्याऽभावेन लक्षणायाः स्वीकर्तुमशक्यत्वादिति भावः । **स्वमते पूर्वोक्तदोषमाशङ्क्य वारयति—न चेत्यादिना । एकस्या इति । ईश्वरेच्छारूपमरुद्वो ।**

अभिधा पदशक्तिः । विशेष्यं न गच्छेत् न प्राप्नोति । कुत इत्याकाङ्क्षायामाह—**क्षीणेति** । क्षीणशक्तिविशेषण इत्यनन्तरं यत इति पूरणीयम् । तथाच यतो विशेषणं प्राप्य पदशक्तिः क्षीणशक्तिः क्षीणसामर्थ्या भवत्यतो विशेष्यं नाभिधा गच्छेन्न प्राप्नुयादिति पर्यवसितार्थः । वक्ष्यमाणरीत्या विशेषणशक्तात्पदादेव विशिष्टविषयकशाब्दबोधोत्पत्तौ विशेष्यांशे शक्तिकल्पने बीजाभावादिति भावः । व्यक्तौ शक्तिस्वीकारे व्यभिचारादानन्त्याच्चेति दूषणद्वय मूलेऽभिहितम् । तयोः सङ्गमनाय(१) विकल्प्य दूषयति—**यस्यामिति । व्यभिचारादितीति** । तद्विषयकशाब्दबोधं प्रति तद्धर्मिकशक्तिज्ञानमेव हेतुर्वाच्यः । अन्यथा घटादिपदात्पटादिशाब्दबोधापत्तेः । तथा चैकघटव्यक्तावेव घटपदशक्तिस्वीकारे घटान्तरविषयकशाब्दबोधोत्पत्त्या तादृशकार्यकारणभावे व्यभिचार इति भावः । द्वितीयविकल्पदूषणमाह— **आनन्त्यमिति** । सकलव्यक्तिषु शक्तिस्वीकारे व्यक्तीनामानन्त्येन शक्तीनामानन्त्यमिति द्वितीयदूषणसङ्गतिरिति भावः । मूले व्यक्तौ शक्त्यभावे शाब्दबोधे व्यक्तिभानासंभव इत्याशङ्क्यां व्यक्तिं विना जातिभानासंभवाद्व्यक्तिभानमित्युक्तं । तत्र सङ्गच्छते । यत्र गोत्वमुख्यविशेष्यकस्मरणं तत्र व्यक्तिं विनापि जातिभानसंभवात् । एवं व्यक्तिभासकसामग्रीमन्तरेण शाब्दबोधे व्यक्तिभानासंभवाच्चेत्यतस्तद्ग्रन्थं व्याचष्टे—**जातीति । हेतुत्वादिति** । तथाच जातिविशेष्यकशक्तिज्ञानं शाब्दबोधे जातिभासकं तदेव व्यक्तिभासकमपीति भावः ।

पदजन्येति । तद्विषयकशाब्दबोधं प्रति तद्विषयकपदजन्योपस्थितेर्हेतुतया जातिपदयोरेव संबन्धग्रहेण पदरूपैकसंबन्धिज्ञानाज्जातिरूपसंबन्ध्यन्तरस्यैव स्मरणं भवति नतु व्यक्तेरिति पदजन्यव्यक्तिस्मरणाभावेन व्यक्तिशाब्दबोधानिर्वाहाद्व्यक्तौ शक्तिरावश्यकीति भावः । ननु व्यक्तौ पदस्य लक्षणास्वीकारेऽपि शक्त्या पदजन्यव्यक्तिस्मरणाभावेन कथं व्यक्तिविषयकशाब्दबोध इत्याशङ्क्यायामाह— **तावतैवेति । निर्वाहादिति** । शक्तिलक्षणयोर्द्वयोरपि वृत्तित्वादिति भावः । **पूर्वोक्तेति** । शक्त्या-

(१) 'सङ्गमनीयं' इत्यपि पाठः ।

स्या एव शक्तेः स्वीकारात्। न चाऽननुगमः गोत्वादेरेवाऽनुगमकत्वात्। किञ्च गौः शक्येति शक्तिग्रहो यदि, तदा व्यक्तौ शक्तिः। यदि तु गोत्वं शक्यमिति शक्तिग्रहः, तदा गोत्वप्रकारकपदार्थस्मरणं शाब्दबोधश्च न स्यात्, समानप्रकारकत्वेन शक्तिज्ञानस्य पदा-

दिनकरी।

पायास्तस्या एकत्वादित्यर्थः। **न चाऽननुगम इति**। गोव्यक्तीनामननुगततया विषयतासम्बन्धेन शक्तिज्ञानकारणतायामवच्छेदकत्वासम्भव इत्यर्थः। **गोत्वादेरेवेति**। तथा च गोशाब्दबोधे गोत्वविशिष्टविषयकशक्तिज्ञानत्वेन हेतुत्वान्नोक्तदोष इति भावः। **ननु सर्वत्र पदजन्यपदार्थोपस्थितेर्हेतुत्वे मानाभावः, कथमन्यथा शाब्दबोधे संसर्गज्ञानम्? न चैवं पदानुपस्थितघटादेरपि भानापत्तिरिति वाच्यम्**। गोविशेष्यकगोत्वप्रकारकशाब्दबोधं प्रति गोत्वशक्तिज्ञानत्वेन हेतुत्वस्योक्तत्वादेतादृशातिप्रसङ्गविरहादित्यत आह—**किञ्चेति**। **तदा व्यक्तौ शक्तिरिति**। गौः शक्येति विशिष्टज्ञानं प्रमात्मकमेव, त्वन्मतेऽन्यथाख्यात्यभावात्, प्रमायाश्च वस्तुसाधकत्वादिति भावः। **समानप्रकारकत्वेनेति**। ईदृशशक्तिज्ञानस्य गोत्वप्रकारकत्वाभावेन गामानयेत्यादौ गोत्वप्रकारक-स्मरण-शाब्दबोधानुपपत्तिरित्यर्थः। न च गोपदं गोत्वे शक्तमित्येतादृशशक्तिग्रहस्यैव शाब्दबोधे हेतुत्वात् तस्य च शक्त्यंशे गोत्वप्रकारकत्वान्न तत्प्रकारकशाब्दबोधानुपपत्तिरिति वाच्यम्। शक्तिग्रहे यदंशे गोत्वादिप्रकारकत्वं, शाब्दबोधस्याऽपि तदंशे गोत्वादिप्रकारकत्वमित्येतादृशसमानप्रकारकत्वस्य परमते सिद्धान्ततत्वात्। अत एवाऽपूर्ववादेऽपूर्वस्य पूर्वमनुपस्थितत्वात् कथं तत्र शक्तिग्रह इत्याशङ्क्य कार्यत्वेन घटादिषु शक्तिग्रहात् कार्यतया(१)शाब्दबोधेऽपूर्व-

रामरुद्री।

नन्त्यप्रसङ्गरूपेत्यर्थः। **अननुगततयेति**। अनुगतानतिप्रसक्तधर्मानवच्छिन्नतयेत्यर्थः। **अवच्छेदकत्वासंभव इति**। व्यक्तिषु तथाविधैकधर्मसत्त्वे तदवच्छिन्नविषयकशाब्दं प्रति तदवच्छिन्नविशेष्यकशक्तिज्ञानत्वेन हेतुतासंभवाच्छक्तिज्ञाननिष्ठकारणतायां विषयविधया शक्तेरेवावच्छेदकत्वं संभवति न तादृशधर्माभाव इत्यर्थः। न च तद्विषयकशाब्दबोधं प्रति तद्विषयकशक्तिज्ञानं हेतुरस्विति वाच्यम्। तथा सति शक्तिज्ञानाविषयस्य पूर्वाननुभूतगवादेः शाब्दबोधानुपपत्तेरिति भावः। व्यक्तीनां गोत्वेनानुगमे व्यक्तेर्यथा शक्तिज्ञाननिष्ठकारणतायामवच्छेदकत्वसंभवस्तथोपपादयति—**तथा चेति**। **गोशाब्दबोधे** गोत्वावच्छिन्नविषयकशाब्दबोध इत्यर्थः। **सर्वत्रेति**। तद्विषयकशाब्दबोधसामान्ये तद्विषयकपदजन्योपस्थितित्वेन हेतुत्वे मानाभाव इत्यर्थः। **उक्तत्वादिति**। तथाच घटत्वेन घटपदशक्तिज्ञानरहितस्य घट विषयकशाब्दबोधापत्तिर्न संभवतीति भावः। न चैवमपि तादृशशक्तिज्ञानवतः पटोऽस्तीति शब्दादपि तादृशशाब्दबोधापत्तिरिति वाच्यम्। तादृशशक्तिज्ञानसहकारेण पदजन्यघटत्वोपस्थितेरपि तादृशशाब्दबोधहेतुत्वोपगमादिति भावः। शक्तिज्ञानं च न साक्षाच्छाब्दबोधे हेतुः किंतु संस्कारद्वारा। तेन शाब्दबोधाव्यवहितप्राक्क्षणे सर्वत्र शक्तिज्ञानाभावेऽपि न क्षतिः। **किंचेतीति**। ननु गौर्गोपदशक्येति शक्तिज्ञानस्य शाब्दबोधहेतुत्वेऽपि न व्यक्तौ शक्तिसिद्धिः। उक्तज्ञानस्य भ्रमत्वाङ्गीकारात्। नहि भ्रमाद्वस्तुसिद्धिरिति न्यायादत आह—**गौरित्यादि**। **शाब्दबोधानुपपत्तिरिति**। गोत्वगोपदयोरेव शक्तिरूपसंबन्धज्ञानाद्गोत्वबोधस्यैव स्मरणत्वमुपपद्यते न तु व्यक्तेरपीत्याशयेन स्मरणपरित्यागः। **यदंश इति**। स्वात्मकयद्धर्माश्रयांश इत्यर्थः। तदंश इत्यत्रापि तद्धर्माश्रयांश इत्यर्थः। तत्पदद्वयं एकधर्मपरं। तथाच स्वाश्रयगोत्वादिप्रकारकज्ञानं स्वाश्रयगोत्वादिप्रकारकशाब्दं प्रत्येव हेतुरिति **शक्यंशे**

(१) 'योग्यतया'इत्यपि पाठः।

र्थस्मरणं, शाब्दबोधं प्रति च हेतुत्वात्। किञ्च गोत्वेयदि शक्तिः, तदा गोत्वत्वं शक्यतावच्छेदकं वाच्यम्. गोत्वत्वं तु गवेतरासमवेतत्वे सति सकलगोसमवेतत्वम्, तथा च गोव्यक्तीनां शक्यतावच्छेदकेऽनुप्रवेशात् तवैव गौरवम्।

दिनकरी ।

भानमित्युक्तं तैरिति । ननु कार्यत्वाद्युपाधिप्रकारकशाब्दबोधस्थले तादृशसमानप्रकारकत्वस्य तदनुमतत्वेऽपि जातिप्रकारकशाब्दबोधस्थले तादृशसमानप्रकारकत्वं न तदनुमतमत आह । **किञ्चेति । शक्यतावच्छेदकं वाच्यमिति** । गोत्वधर्मिकशक्यत्वज्ञानस्य गोपदधर्मिकगोत्वादिशक्तिज्ञानस्य वा शाब्दबोधहेतुत्वे गोत्वत्वावच्छिन्नगोत्वविषयतायां निवेश आवश्यकः । निर्धर्मितावच्छेदककशक्तिज्ञानस्य, गोत्वाद्यंशे निष्प्रकारकशक्तिज्ञानस्य वा विपरीतज्ञानाविरोधिनः शाब्दबोधाहेतुत्वात् । तथा च गोत्वत्वे शक्यतावच्छेदकत्वावगाहितादृशप्रमाया विषयसाधकत्वाद्गोत्वत्वे शक्यतावच्छेदकत्वसिद्धिरिति भावः । **तवैव गौरवमिति** । न च गोत्वत्वावच्छिन्नविषयकशक्तिज्ञानस्य कारणत्वेऽपि स भ्रमः, न तु तस्य विषयसाधकत्वमिति वाच्यम् । तथा सति प्रतीतेः कारणतावच्छेदकत्वांशेऽपि भ्रमत्वस्य वक्तुं शक्यतया, कारणतावच्छेदकत्वादीनां कुत्राऽपि सिद्धिर्न स्यात्।

रामरुद्री ।

गोत्वप्रकारकशक्तिज्ञानात् व्यक्तौ गोत्वप्रकारकशाब्दबोधानुपपत्तेः । शक्तेर्गोत्वाश्रयत्वादित्यर्थः । यद्यंश इत्यादेर्यथाश्रुतार्थकत्वं न संभवति । तथासति अग्र वक्ष्यमाणस्य कार्यत्वावच्छिन्ने घटादेः शक्तिज्ञानास्कार्यत्वेनापूर्वविषयकशाब्दबोधस्यानुपपत्तेरिति मन्तव्यम् । **तौः** प्राभाकरैरित्यर्थः । **जातिप्रकारकेति** । तथाच तत्रैव शक्त्यैक्यं, निरवच्छिन्नत्वसम्भवेन लाघवसम्भवादिति भावः । अत एव तैरपि पशुपदस्य लोमलाङ्गूलादिविशिष्टव्यक्तावेव शक्तिरुपेयते नतु लाङ्गूल एव, तेषां आनन्त्यात् स्वरूपतो भानासंभवाच्चेति ध्येयम् । **विपरीतज्ञानाविरोधिन इति** । समानधर्मितावच्छेदकयोर्बाधविशिष्टबुद्ध्योरेव प्रतिबध्यप्रतिबन्धकभावान्निर्धर्मितावच्छेदककविशिष्टबुद्धेर्बाधबुद्धयप्रतिबध्यतया गोत्वजातिर्न गोपदशक्येति बुद्धिदशायामप्युक्तशक्तिज्ञानात् गोपदात् गोत्वप्रकारकशाब्दबोधापत्तिर्निर्धर्मितावच्छेदककशक्तिज्ञानस्य हेतुत्वाभ्युपगम इति भावः । अनुभवविरुद्धं चेदम् । न हि गोत्वत्वेन गोत्वावगाहिनो गोत्वं न गोपदशक्यमिति बाधबुद्धिकाले गोपदात् गोत्वविषयकशाब्दबोधः केनाप्यङ्गीक्रियत इत्याशयात् । यद्यपि स्वरूपतो गोत्वप्रकारकस्येयं गौरित्याकारकस्य बोधस्य नेयं गौरिति बाधबुद्धिप्रतिबध्यत्वात् शक्त्यंशे स्वरूपतो गोत्वप्रकारकमपि गोपदं न गोत्वशक्तमिति बाधबुद्धिप्रतिबध्यमेवेति गोत्वत्वेन गोत्वस्य प्रकारत्वं नावश्यक, तथापि समवायेनैव जातेः स्वरूपतः प्रकारत्वमभ्युपगम्यते नान्यसंबन्धेनेति नियमः । अन्यथा ज्ञानं गुण इतिवज्ज्ञानं घट इत्यादिव्यवहारापत्तेः । ज्ञाने विषयतया घटत्वसत्त्वाच्छक्त्यंशे तु गोत्वस्याधेयतासंबन्धेनैव प्रकारता वाच्या । तथाच गोत्वत्वेनैव गोत्वभानमङ्गीकार्यमित्यत्रैव तात्पर्यम् । इत्थंच विपरीतज्ञानमविरोधि यस्मिन्निति व्युत्पत्त्या विपरीतज्ञानाप्रतिबध्यस्येति विपरीतज्ञानाविरोधिन इत्यस्यार्थः । प्रथमज्ञानस्याप्रतिबध्यत्वे निर्धर्मितावच्छेदककत्वं हेतुः । द्वितीयस्य तु तथात्वे प्रतिबध्याप्रसिद्धिरेव हेतुरिति विभावनीयम् । **शक्यतावच्छेदकत्वसिद्धिरितीति** । न च प्रतीतौ शक्यताया गोत्वत्वसामानाधिकरण्यमेव विषयो नतु तदवच्छिन्नत्वमपीति वाच्यम् । प्रतीतीनां विशिष्टवैशिष्ट्यावगाहित्वस्यौत्सर्गिकत्वेन तत्परित्यागस्यानौचित्यात् । विशिष्टवैशिष्ट्यबोधे च विशेषणतावच्छेदकविशेष्यतावच्छेदकयोर्धर्मिपारतन्त्र्येण विशेषणविशेष्ययोरवच्छिन्नत्वादिसंबन्धेन भानोपगमादिति भावः । **नचेति** । तटस्थानामियमाशङ्का नतु प्राभाकराणां तैर्भ्रमानङ्गीकारादिति ध्येयम् । ननूत्सर्गबाधकयोरेको बाधनियम एव । प्रकृते च अनन्तव्यक्तीनां शक्यताव-

तस्मात् तत्तज्जात्याकृतिविशिष्टतत्तद्व्यक्तिबोधानुपपत्त्या कल्प्यमाना शक्तिर्जात्याकृतिविशिष्टव्यक्तावेव विश्राम्यतीति ॥ इति जातिशक्तिवादः ॥

दिनकरी ।

अस्तु वा गोत्वत्वादीनामनवच्छेदकत्वं, तथाऽपि गवेतरासमवेतत्वादिघटितगोत्वत्वादेर्धर्मितावच्छेदकतायात्मकगोविषयतायाः शाब्दबोधकारणतावच्छेदककोटिप्रवेशप्रयुक्तं गौरवं दुर्वारमेवेति । स्वमतमुपसंहरति । **तस्मादिति । व्यक्ताविति ।** जात्याकृतिविशिष्टव्यक्तावेव । अवयवसंस्थानविशेषरूपाया आकृतेः **शक्यत्वेऽपि न जातिवत्तदवच्छेदकत्वम्, सामानाधिकरण्यसम्बन्धस्य शक्यतावच्छेदकतावच्छेदकत्वकल्पने गौरवात् । अत एव च परस्परपरित्यागेन परस्परस्य बोधाभावात् त्रिष्वेकैव शक्तिः । एतद्बोधनायैव सूत्रे 'जात्याकृतिव्यक्तयः पदार्थः' इत्येकवचनमिति सम्प्रदायः ।**

नव्यास्तु संस्थानानुपस्थितावपि गोत्वादिना गवाद्यन्वयबोधाज्जातिविशिष्टव्यक्तावेव शक्तिः । संस्थाने च पृथगेव शक्तिः । व्युत्पत्तिवैचित्र्याच्च संस्थानव्यक्त्योरेकपदार्थयोरपि परस्परमन्वयबोधः । सौत्रं 'पदार्थः' इत्येकवचनं तु जातिव्यक्त्योरेकशक्तिलाभायैवेत्याहुः ।

॥ इति जातिशक्तिवादः ॥

रामरुद्री ।

च्छेदककोटिप्रवेशगौरवमेव विशेष्यावगाहितायां बाधकं जागर्त्येव । वस्तुतो विशिष्टवैशिष्ट्यबोधे संसर्गांश एव विशेषणतावच्छेदकविशेष्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वानुयोगिताकत्वयोर्बोध उपेयते नतूक्तरीत्या प्रकारत्वं प्रतीतेर्भिन्नाकारकत्वापत्तेरित्यस्वरसादाह—**अस्तु वेति । गोविषयतायाः इति ।** गोत्वस्य गोघटितमूर्तिकत्वादिति भावः । मूले जात्याकृतिविशिष्टव्यक्तौ शक्तिप्रतिपादनाज्जात्याकृत्योर्द्वयोरेव शक्यतावच्छेदकत्वमित्यापतितम् । तन्न सङ्गच्छते । लाघवाज्जातिमात्रस्यैव शक्यतावच्छेदकत्वौचित्यात् । न च त्रिष्वप्येकैव शक्तिरिति वक्ष्यमाणतया गोत्वस्य शक्यतान्यूनवृत्तितया कथं तदवच्छेदकतासंभव इति वाच्यम् । व्यक्तिवृत्तित्वविशिष्ट(१)शक्यताव्यापकत्वेन शुद्धशक्यतात्वावच्छिन्नानतिप्रसक्तत्वेन च विशिष्टशक्यतायामवच्छेदकत्वसंभवात् । अन्यथोभयोः शक्यतावच्छेदकत्वेऽपि तद्घोषतादवस्थ्यात् । एवं त्रयाणामेकशक्तिमत्त्वेऽपि कस्यचिद्विशेषणतया कस्यचिद्विशेष्यतया भानमपि मतद्वयेऽपि व्युत्पत्तिवैचित्र्येणैवोपपादनीयमिति भावः । **अवयवसंस्थानं** अवयवसंयोगः । **सामानाधिकरण्येति ।** शक्ये गवि सामानाधिकरण्यसंबन्धेनैवावयवसंयोगसत्त्वादिति भावः इदमुपलक्षणम् । शुद्धगोत्वजातेरवयवसंयोगापेक्षया शरीरलाघवं नानासंयोगव्यक्तीनामवच्छेदकताकल्पनमपेक्ष्य एकस्या जातेस्तत्कल्पनेऽपि लाघवमप्यनुसंधेयम् । **एकैवेति ।** नानाशक्तिकनानार्थहर्यादिपदादेकैकस्यार्थस्य शाब्दबोधादिति भावः । **एकवचनमिति ।** एकवचनार्थैकत्वस्य पदार्थत्वे पदशक्तिरूपेऽन्वय एव सूत्रकर्तुस्तात्पर्यादिति भावः । जातिविशिष्टव्यक्तावेवेत्यनन्तरं एकेति पूरणीयम् । अन्यथा आकृतावपि पृथक्शक्तिस्वीकारादेवकाराऽसङ्गतिरिति ध्येयम् । नन्वेकपदार्थयोः परस्परं नान्वयबोधः । अन्यथा हरिपदार्थयोरश्वसूर्ययोरपि परस्परमन्वयप्रसङ्गात् । नचाभेदान्वये योग्यतैव नास्ति भेदान्वये चाकाङ्क्षाविरहः नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वादिति वाच्यम् । तथासत्याकृतेरपि व्यक्त्यावाश्रयतयाऽन्वयानुपपत्तेः । तस्मान्नामद्वयोपस्थापितार्थयोरेव भेदान्वये निराकाङ्क्षत्वस्योपगन्तव्यत्वादित्यत आह—**व्युत्पत्तीति ।** तथाचैकपदार्थयोः परस्परमन्वयेऽन्यत्राकाङ्क्षाविरहेऽपि एवकारार्थानामिवाकृतिव्यक्त्योरप्यन्वये आकाङ्क्षा कल्प्यते अनुभवानुरोधादिति भावः । नन्वेवमपि सूत्रे एकवचनानुपपत्तिः, त्रिषु शक्तेरैक्याभावादित्यत आह—**सौत्रमिति ।** आहुरित्यस्वरसोद्भावनम् । तद्बीजं तु पदार्थतावच्छेदके शक्तिसत्त्वे एकत्वस्य बाधितत्वेनैकवचनार्थान्वयानुपपत्तिरेवेति ध्येयम् । इति जातिशक्तिवादः ।

---

(१) **'व्यक्तिशक्तित्वविशिष्ट' इत्यपि पाठः ।**

दिनकरी ।

तच्छब्दस्य वक्तृबुद्धिविषयतावच्छेदकीभूतघटत्वाद्यवच्छिन्ने शक्तिः । अथ घटत्वादीनां शक्यतावच्छेदकत्वे शक्यतावच्छेदकभेदाच्छक्तिभेदापत्तिः । न च शक्यतावच्छेदकभेदेऽपि शक्यतावच्छेदकतावच्छेदकस्य बुद्धिविषयतावच्छेदकत्वस्य ऐक्यान्न शक्तिभेद इति वाच्यम् । तस्य शक्यतावच्छेदकतावच्छेदकत्वे शाब्दबोधे तद्भानापत्तेरिति चेन्न । बुद्धिविषयतावच्छेदकत्वस्योपलक्षणतया शक्यतावच्छेदकतावच्छेदकत्वात् । उपलक्षणस्य च शाब्दबोधे भानानङ्गीकारात् । घटत्वादेश्च शक्यतावच्छेदकत्वं विशेषणत्वेनैव, अतस्तस्य शाब्दबोधे भानम् । विशेषणत्वं च तत्तत्पदजन्यबोधविषयत्वेन शक्तिविषयत्वम् । उपलक्षणत्वं च तत्तत्पदजन्यबोधविषयत्वेन शक्त्यविषयत्वमिति । एवमिदम्पदादिष्वपि । तत्राऽपीदमेतदोः प्रत्यक्षबुद्धिविषये, अदसः परोक्षबुद्धिविषये शक्तिः । अत एव तेषां विभिन्नार्थकत्वम् । एवं तदोऽपि ।

'इदमः प्रत्यक्षगतं समीपतरवर्ति चैतदो रूपम् ।
अदसस्तु विप्रकृष्टं तदिति परोक्षे विजानीयात्—'

रामरुद्री ।

प्रसङ्गात्तदादिशब्दानां शक्यतावच्छेदकमाह—**तच्छब्दस्येति** । वक्ता तच्छब्दोच्चारकः । तदीयज्ञानविषयतायामवच्छेदकं घटत्वादि, तदवच्छिन्ने तदुच्चरिततत्पदस्य शक्तिरित्यर्थः । यद्यपि लाघवाद्बुद्धिस्थ इत्येवं वक्तुमुचितं, तथापि सोऽस्तीत्यादौ अनुभवसिद्धस्य(१) घटत्वेन घटबोधस्योपपत्तये गौरवमप्यङ्गीकृतमिति ध्येयम् । **शक्तिभेदापत्तिरिति** । शक्तिभेदे तदादीनामपि नानार्थत्वापत्तिरिति भावः । नचेष्टापत्तिः । तथासति सकृदुच्चरित इति न्यायेन(२) तावित्यादावेकदा घटपटयोर्बोधानुपपत्तेः । नानार्थप्रकरणे तदादीनां कोशेऽनुक्तेश्चेति भावः । **तद्भानापत्तेरिति** । पश्वादिपदजन्यशाब्दबोधे लोमलाङ्गूलत्वादेस्तथाविधस्य भानदर्शनादिति भावः । प्रकृते च सोऽस्तीत्यादौ घटोऽस्तीत्येव शाब्दबोधोऽनुभवसिद्धः न तु बुद्धिविषयतावच्छेदकावच्छिन्नोऽस्तीत्याकारक इति नेष्टापत्तिसम्भव(३)इति मन्तव्यम् । **उपलक्षणतयेति** । तत्पदजन्यशाब्दबोधविषयत्वेन भगवदिच्छायामविषयत्वे सति तत्पदशक्यतावच्छेदकत्वानुगमकत्वमुपलक्षणतया तत्पदशक्यतावच्छेदकनावच्छेदकत्वम् । वस्तुतस्तु शाब्दबोधविषयतावच्छेदका ये धर्मास्तत्तदवच्छिन्नाः तत्पदजन्यबोधविषया भवन्तित्थाकारकभगवदिच्छायां बोधविषयतावच्छेदकत्वस्य तत्पदजन्यबोधविषयत्वेनाविषयत्वं तस्योपलक्षणविधया शक्यतावच्छेदकतावच्छेदकत्वम् । यद्यपि बोधविषयतावच्छेदकत्वं विषयतारूपं विषयभेदेन भिन्नमेवेति तथापि बोधविषयतावच्छेदकतात्वरूपानुगतैकधर्मावच्छिन्नत्वादेकत्वव्यपदेशः । एवमेवाविषयत्वस्थाने विषयत्वं निवेश्य विशेषणविधया शक्यतावच्छेदकतावच्छेदकत्वं निर्वाच्यम् । तच्च लोमलाङ्गूलत्वादिकमेवेति विभावनीयम् । **प्रत्यक्षबुद्धिविषय इति** । तादृशबुद्धिविषयतावच्छेदकावच्छिन्न इत्यर्थः । बुद्धिश्च वक्तुरेव ग्राह्या । इत्थंचाऽयमित्यादिपदाद्घटत्वादिना घटादिबोधनिर्वाहः । अयं घट इत्यादौ तु एतद्देशतत्कालवृत्तित्वादिकमेव वक्तुः प्रत्यक्षविषयतावच्छेदकमतो नाभेदान्वयानुपपत्तिः । **अत एवेति** । यतः प्रत्यक्षविषये इदमेतदोः परोक्षबुद्धिविषयेऽदसः शक्तिस्तत एवेत्यर्थः । **तेषां** इदमेतददसाम् । **विभिन्नार्थकत्वमिति** । इदमेतदोरेकोऽर्थः । तदन्यस्त्वदसोऽर्थः । अदसो योऽर्थस्तदन्यस्तु इदमेतदोरितिरीत्या भिन्नार्थकत्वमित्यर्थः । **एवमिति** । भिन्नार्थकत्वमित्यर्थः । **एतत्तदोरपीति** । एतदः प्रत्यक्षावेषयार्थकत्वं । तदस्तु सामान्यतो बुद्धिविषयार्थकत्वमिति भावः । केषांचिन्मतमाह—**इदम इति** । **प्रत्यक्षगतं** प्रत्यक्षविषयीभूतमित्यर्थः । शक्यमिति शेषः । एवमुत्तरत्रापि । **समीपतरवर्ति चेति** । चकारेण प्रत्यक्षगतमित्यस्यानुकर्षः । रूपमित्यस्य स्वरूपमित्यर्थः। **विप्रकृष्टं तदिति**। प्रत्यक्षगतमित्यर्थः। **परोक्षे इति**।

(१) 'अनुभव' इति पाठः । (२) 'अन्यौ' इति पाठः । (३) 'नेष्टशापत्ति' इति पाठः ।

शक्तं पदम्। तच्चतुर्विधम्। क्वचिद्यौगिकं, क्वचिद्रूढं, क्वचिद्योग-रूढं क्वचिद्यौगिकरूढम्।

तथा हि—यत्राऽवयवार्थ एव बुद्ध्यते तद्यौगिकम्। यथा पाचकादिपदम्।

दिनकरी।

इत्यपि वदन्ति। किम्पदस्य जिज्ञासाविषयत्वविशिष्टे शक्तिः। सर्वपदस्य व्यापकत्वे। सर्वे घटा रूपवन्त इत्यादौ घटत्वव्याप्यं रूपवत्त्वमिति बोधात्। त्वम्पदस्य तत्कालीन-सम्बोध्यचैत्रत्वादि शक्यतावच्छेदकम्। एवमहम्पदस्य तत्कालीनस्वतन्त्रोच्चारयितृचैत्र-त्वादि। स्वातन्त्र्योक्त्या च 'वाच्यस्त्वया मद्वचनात् स राजा-' इत्यादौ न मत्पदात् कवेर्बोध इत्यास्तां विस्तरः॥ इति शक्तिप्रन्थः॥

पदं विभजते। **शक्तं पदमिति। क्वचिदिति।** किञ्चिदित्यर्थः। एवमग्रेऽपि।

रामरुद्री।

सप्तम्या वाचकत्वमर्थः। तथाचादसः परोक्षवाचकत्वं विजानीयादित्यर्थः पर्यवसितः। **जिज्ञासाविषय-त्वविशिष्ट इति।** ज्ञातुमिच्छाविषयः किंशब्दार्थ इत्यर्थः। इच्छा उच्चारयितुरेव किंशब्देन प्रत्याय्यते। तथा च को घट इत्यादौ घटो मदीयजिज्ञासाविषय इति शाब्दबोध इति भावः। **व्यापकत्व इति।** उद्देश्यतावच्छेदकनिरूपिते विधेयतावच्छेदकनिष्ठ इति शेषः। सर्वे घटा इत्यादौ घटनिष्ठाभावप्रतियो-गितानवच्छेदकरूपत्वत्त्वमेव रूपे घटत्वव्यापकत्वमिति बोध्यम्। त्वंपदस्येत्यपपाठः। किन्तु युष्मत्प-दस्येत्येव पाठः। अन्यथा युवामित्यादौ शक्त्यभावापत्तेः। त्वमित्यस्य स्वमते पदत्वाभावाच्चेति ध्येयम्। **संबोध्यचैत्रत्वादिकं।** संबोध्यत्वसमानाधिकरणं चैत्रत्वादिकमित्यर्थः। कर्मधारयोत्तर-भावप्रत्ययस्यैकपदार्थतावच्छेदकसमानाधिकरणापरपदार्थतावच्छेदकबोधकत्वात्। तत्कालीनसंबोध्य त्वं च तत्कालोच्चरितसंबोधनप्रथमान्तचैत्रादिपदाव्यवहितोत्तरवाक्यजन्यशाब्दबोधाश्रयत्वेन वक्तुरि-च्छाविषयत्वं। **चैत्र,** त्वया भुज्यतामित्यादौ चैत्रादिपदोत्तरप्रथमया चैत्रादिविशेषणत्वेन एतादृश-मेव संबोध्यत्वं प्रतिपाद्यते। तत्समानाधिकरणखोपलक्षितचैत्रत्वादिकमेव युष्मच्छब्दशक्यतावच्छेदकमिति भावः। **एवमस्मत्पदस्येति।** प्रागुक्तेन शक्यतावच्छेदकमित्यनेनान्वेति। **स्वतन्त्रेति।** स्वतन्त्रो-च्चारणकर्तृत्वसमानाधिकरणचैत्रत्वादिकमित्यर्थः। उच्चारणं चैतादृशार्थवाचकत्वेनाभिमतस्यास्मच्छ-ब्दस्यैवेति ध्येयम्। उच्चारणे स्वतन्त्रत्वं च अन्योच्चारणानधीनत्वम्। अन्योच्चारणाननुवादक-त्वमिति यावत्। **न कवेर्बोध इति।** पक्षस्थास्मच्छब्दस्योच्चारणकर्तृत्वेऽपि कवेः परकीयोच्चारणानु-वादकत्वात्तदुच्चरितास्मच्छब्दान्न कवेर्बोध इति भावः। एवंच युष्मच्छब्दशक्यतावच्छेदकघटकतत्तत्का-लोच्चरितेत्यत्रोच्चारणमपि स्वतन्त्रमेव ग्राह्यम्। तेन "गर्ज गर्ज क्षणं मूढे" त्यादौ संबोधनप्रथमान्तमूढ-पदोत्तर "मया त्वयि हतेऽत्रैवेति" वाक्यजन्यबोधाश्रयत्वेनेच्छाविषयत्वेऽपि सुरथस्य न मेधामहर्षिणोक्त-युष्मत्पदाच्छाब्दबोध इति मन्तव्यम्। **पदं विभजत इति।** यद्यपि शक्तं पदमिति न पदविभागरूपं किंतु पदलक्षणमेव। तथा च विभजते शक्तमित्यनुपपन्नमेव। तथापि इतिशब्दस्यार्थकतया पदविभाग-स्य पदसामान्यलक्षणाभिधानानन्तरत्वनियमेन च नानुपपत्तिरिति ध्येयम्। नचैवमपि केवलयौगिकं पाचकादिपदमेव। तच्च न किंचिदर्थं शक्तं तस्य वाक्यत्वादिति यौगिकस्य सामान्यलक्षणाक्रान्ततया तद्विभागोऽनुपपन्न एवेति वाच्यम्। पचधातूत्तराकप्रत्ययस्यैव पाचकपदरूपतया तस्य कर्तरि शक्ततया पदत्वेन तद्विभागे बाधकाभावादिति भावः। एकस्यैव पदस्यैकस्मिन्नर्थे यौगिकत्वमन्यस्मिन्नर्थे रूढत्वं न संभवति उच्चारणभेदेन पदभेदादिति सकृदुच्चरितन्यायाच्चेत्याशयेन क्वचिदित्यस्य किंचिदर्थकता-माह—**क्वचिदितीति।**

यत्राऽवयवशक्तिनैरपेक्ष्येण समुदायशक्तिमात्रेण बुद्ध्यते, तद्रूढम्। यथा गो-मण्डला(पा)दिपदम्।

यत्र तु अवयवशक्तिविषये समुदायशक्तिरप्यस्ति, तद्योगरूढम्। यथा पङ्कजादिपदम्। तथा हि-पङ्कजपदमवयवशक्त्या पङ्कजनिकर्तृत्वरूपमर्थं बोधयति, समुदायशक्त्या च पद्मत्वेन रूपेण पद्मं बोधयति। न च केवलयाऽवयवशक्त्या कुमुदे प्रयोगः स्यादिति वाच्यम्। रूढिज्ञानस्य केवलयौगिकार्थज्ञानप्रतिबन्धकत्वादिति प्राञ्चः।

दिनकरी।

'मण्डलादि'इत्यत्र बहुपुस्तकेषु 'मण्डपादि' इति पाठः, स प्रामादिकः।

प्रतिबन्धकत्वादिति। न च रूढिज्ञानस्य यौगिकार्थबुद्धौ प्रतिबन्धकत्वे पद्मेऽपि योगार्थस्य पङ्कजनिकर्तृत्वस्य बोधो न स्यादिति वाच्यम्। पद्मत्वावच्छिन्नविशेष्यत्वानिरूपित(पङ्कजपद (योग) जन्य) पङ्कजनिकर्तृत्वावच्छिन्नविषयताशालिबोधं प्रति रूढिज्ञानस्य प्रतिबन्धकत्वेन पद्मधर्मिकयोगार्थबुद्धेः प्रतिबद्धयतावच्छेदकानाक्रान्तत्वादिति।

रामरुद्री।

यत्तु ननु मूले मण्डपादिशब्दानां रूढमध्ये परिगणनमनुपपन्नम्। मण्डं पिबति रक्षतीति वा मण्डपमिति व्युत्पत्त्या तेषां मण्डपानकर्तृत्वाद्यर्थकत्वस्य संभवेन यौगिकरूढमध्य एवान्तर्भावः स्यादित्याह-मण्डलादीत्यत्रेतीत्यवतार्य तथाच गृहविशेषवाचकं मण्डलपदमेव नतु मण्डपपदम्। तच्च न क्वापि यौगिकमिति न तस्य रूढमध्ये परिगणनानुपपत्तिरिति भाव इति व्याचक्रुः। तन्न चारुतरम्। यौगिकरूढस्यापि यौगिकरूढत्वयोरर्थविशेषे संभवेन मण्डपपदस्य गृहविशेषे रूढतया रूढमध्ये परिगणनसंभवात्। अतएव मूले यत्रावयवार्थ एव बुध्यते तद्यौगिकमित्येव यौगिकलक्षणमुक्तम्। यत्रावयवशक्तिनिरपेक्षया समुदायशक्त्या गृह्यते तद्रूढमित्येव रूढलक्षणमुक्तम्। तत्र यौगिकलक्षणे योगरूढे यौगिकत्ववारणायैवकारः। न चैवमपि यौगिकरूढस्योद्भिदादिपदस्योद्भेदनकर्त्राद्यर्थे योगिकत्वं स्यादिति वाच्यम्। इष्टापत्तेः। रूढलक्षणेऽपि योगरूढे रूढतावारणायैव निरपेक्षयेत्यन्तम्। यौगिकरूढस्योद्भिच्छब्दस्यापि यागविशेषरूपार्थे रूढत्वमिष्टमेव। गृह्यत इत्यस्यार्थो बुध्यत इत्यर्थः। एवंच मण्डपपदस्य गृहरूपार्थे रूढत्वसंभवेन न रूढमध्ये परिगणनानुपपत्तिरिति मन्तव्यम्। न च यत्रेत्यस्य यादृशानुपूर्व्यवच्छिन्न इत्यर्थकतया यौगिकरूढस्थले एकानुपूर्व्यवच्छिन्नस्यैव स्थलविशेषेऽवयवार्थमात्रस्य क्वचित्समुदायार्थमात्रस्य बोधकत्वेन तत्र रूढत्वानुपपत्तिरिति वाच्यम्। प्रयासगौरवात्। यौगिकरूढस्य यौगिकत्वे रूढत्वे चेष्टापत्तौ क्षतिविरहात्। यौगिकरुढभिन्नयोरपि केवलयौगिककेवलरूढयोरपि सत्त्वेन विभागव्याघाताभावात्। एकादशेऽहनि पित्रा क्वचित्पाचकादिपदस्य सङ्केतितत्वसंभवात् तेषामपि यौगिकत्वानुपपत्तेः। रूढलक्षणेऽवयवशक्तिरहितयेत्युपेक्ष्यावयवशक्तिनिरपेक्षयेत्येतावत्पर्यन्तानुसरणवैय्यर्थ्यापाताच्चेति ध्येयम्। वस्तुतो दाक्षिणात्यामरकोशादौ मण्डपा (वा) वास्तुजले गृह इति पाठदर्शनात् गौडास्तु जपाशब्दस्थाने जवेतिवन्मण्डप(व) स्थाने मण्डपेत्येव प्रयुञ्जतइति गौडग्रन्थपरम्परया मुक्तावल्यां बहुपुस्तकेषु मण्डपशब्दमुपलभ्य ग्रन्थकृता तदभिहितमितिबोध्यम्।

मूलेऽवयवशक्तिविषय इति। अवयवशक्तिज्ञानजन्यशाब्दबोध इत्यर्थः। समुदायशक्तिरप्यस्तीत्यस्य समुदायशक्तिस्मारितार्थविषयकत्वमप्यस्तीत्यर्थः। यथाश्रुते पाचकादिपदस्यापि योगरूढत्वापत्तेः। पाककर्तरि प्रयुक्तस्य एकादशेऽहनि पित्रासङ्केतितपाचकपदस्यावयवशक्तिविषये समुदायशक्तिसत्त्वात्। अस्माकं पङ्कजपदादित एव पद्मत्वावच्छिन्ने पङ्कजनिकर्त्राद्यभेदान्वयबोधेऽनादितात्पर्योपगमात्। पाककर्त्राद्यभिन्नः पाचक इति शब्दबोधस्यानुदयेन तस्य योगरूढत्वापत्तिविरहादिति बोध्यम्। **मूले स्यादिति।** कुमुदेऽपि अवयवार्थमात्रस्याबाधितत्वेन तदर्थविषयकबोधेच्छया तत्रापि पङ्कजपदप्रयोगसंभवा-

वस्तुतस्तु समुदायशक्त्युपस्थितपदुमेऽवयवार्थपङ्कजनिकर्तुरन्वयो भवति, सान्निध्यात्।

यत्र तु रूढयर्थस्य बाधः प्रतिसन्धीयते, तत्र लक्षणया कुमुदादेर्बोधः। यत्र तु कुमुदत्वेन रूपेण बोधे न तात्पर्यज्ञानं, पद्मत्वस्य च बाधः, तत्र चा-

दिनकरी।

प्रतिबन्धकत्वं जनकज्ञानविघटकत्वेनैवेतिनियमभङ्गमस्वरसं 'प्राञ्चः' इत्यनेन सूचयन् मणिकारमतमाह। **वस्तुतस्त्विति। सान्निध्यादिति।** रूढयर्थस्य सन्निहितोपस्थितिकत्वादित्यर्थः। व्यक्तिवचनानां सन्निहितविशेषपरत्वनियमादिति भावः(१)। व्यक्तिवचनानां—किञ्चिद्व्यक्तितात्पर्यकाणां, सन्निहितपरत्वम्—उपस्थितविशेषपरत्वमित्यर्थः। तथा च पद्मे तात्पर्यसत्त्वेन रूढयर्थयोगार्थयोः परस्परान्वयबोधजनकसामग्र्यन्तरसत्त्वेन च रूढयर्थ एव योगार्थान्वयः, न कुमुदादाविति न रूढिज्ञानस्य यौगिकार्थबुद्धौ प्रतिबन्धकत्वम्। एवं रूढयर्थयोगार्थयोः परस्परान्वयबोधसामग्रीस्थल एव न कुमुदादेः पङ्कजपदाद्बोधः। यत्र तु तयोः परस्परमन्वयबोधसामग्रीविरहस्तत्र कुमुदादेर्बोधो भवत्येव। परं तु कुमुदत्वेन रूपेण कुमुदत्वविशिष्टपङ्कजनिकर्तृत्वेन वा लक्षणया, शुद्धपङ्कजनिकर्तृत्वेन तु शक्त्यैवेत्याह। **यत्र तु रूढ्यर्थेत्यादिना।** 'प्रतिसन्धीयते' इत्यनन्तरं कुमुदत्वेन बोधे

रामरुद्री।

दिति भावः। केवलेत्यस्य समुदायशक्तिस्मारितार्थाविषयकेत्यर्थः। **यौगिकार्थज्ञाने** अवयवार्थज्ञानइत्यर्थः। **नचेत्यादि।** आपातत इयमाशङ्का। मूलोक्तकेवलपदानुसंधान एतस्या अनुदयादिति सुधीभिर्विभावनीयम्।

प्रतिबन्धकत्वमिति। प्रतिबन्धकत्वमित्यस्य विरोध्यविषयकज्ञानस्येत्यादिः। तेन परामर्शाविरोधिनोऽपि बाधनिश्चयस्यानुमितिप्रतिबन्धकत्वेऽपि न नियमानुपपत्तिरिति ध्येयम्। **सान्निध्यादितीति।** मूले पद्मत्वावच्छिन्नस्य सन्निहितोपस्थितिविषयत्वेन तत्र पङ्कजनिकर्तुरवयवार्थस्याभेदान्वय एव भवति नतूक्तप्रतिबध्यप्रतिबन्धकभावः प्रामाणिक इत्युक्तं नवीनैः। तन्न सङ्गच्छते। कुमुदतात्पर्येणापि योगव्युत्पत्त्या पङ्कजपदप्रयोगस्येष्टत्वेन तत्रापि पङ्कजनिकर्त्रभिन्न पद्ममिति बोधापत्तेः। नच तत्र पद्मत्वावच्छिन्नस्योपस्थितिविरहादेव नेयमापत्तिरिति वाच्यम्। पङ्कजेत्यस्य पद्मे स्मारकशक्तिसत्त्वात्ततः पद्मस्मरणस्यावश्यकत्वादित्याशङ्कानिरासाय सान्निध्यादित्यनेन तत्र पङ्कजपदस्य पद्मरूपार्थे तात्पर्यसत्त्वादित्येवोक्तमित्याह—**व्यक्तिवचनानामिति।** घटपटादिव्यक्तिवाचकानामित्यर्थः। जातिपरशब्दव्यावृत्त्यर्थं विशेषोपादानम्। **सन्निहितपरत्वम्।** अव्यवहितोपस्थितव्यक्तितात्पर्यकत्वमित्यर्थः। अतएव घटमानयेत्युक्तौ सन्निधाने घटसत्त्वेन न दूरस्थघटानयने लोकः प्रवर्तत इति भावः। तथाचोपस्थितपद्मत्वावच्छिन्नपरत्वे पङ्कजपदस्य तात्पर्यविषयीभूतस्य पङ्कजनिकर्तुः पद्मेऽप्यभेदान्वयबोधे योग्यतासत्त्वात्तत्र भवति तादृशान्वयबोधः। यत्र तु कुमुदतात्पर्येणैवात्र पङ्कजमस्तीति प्रयुज्यते, तत्र पद्मे एतद्देशवृत्तित्वस्य बाधितत्वेन कुमुद एव तात्पर्यनिश्चयसत्त्वात् तात्पर्यविषयस्य पङ्कजनिकर्तुः कुमुदस्य पद्मे भेदसत्त्वाद्योग्यताया विरहेण तत्र न तादृशान्वयबोध इति भावः। नन्वेतद्देशे रूढयर्थस्य पद्मस्य बाधनिश्चयेऽपि पद्मकुमुदातिरिक्तपङ्कजनिकर्तृपदार्थतात्पर्येण पङ्कजनिकर्तृत्वमात्रतात्पर्येण वा कुमुदस्यैव बोधे तात्पर्यं तत्र लक्षणया कुमुदबोधाभावात्तद्ग्रन्थासङ्गतिरित्यतःपूरयति—**कुमुदत्वेनेति। तेनेति।** बाधः

---

(१) **बाधकं विनेति पूरणीयम्। तेन घटेन जलमाहरेत्यत्र न सन्निहितस्य सच्छिद्रघटस्य बोध इति ध्येयम्।**

लक्षणा शक्यसम्बन्धः तात्पर्यानुपपत्तितः ।

ऽवयवशक्तिमात्रेण निर्वाह इत्याहुः । यत्र तु स्थलपद्मादाववयवार्थबाधः, तत्र समुदायशक्त्या पद्मत्वेन रूपेण बोधः । यदि तु स्थलपङ्कजं विजातीयमेव, तदा लक्षणयैव(१) ।

यत्र तु यौगिकार्थरूढ्यर्थयोः स्वातन्त्र्येण बोधः, तद्यौगिकरूढम् । यथोद्भिदादिपदम् । तत्र हि उद्भेदनकर्ता तरुगुल्मादिरपि बुद्ध्यते, यागविशेषोऽपीति ॥ ८१ ॥ इति पदनिरूपणम् ॥

लक्षणा शक्यसम्बन्ध इति । **गङ्गायां घोष इत्यादौ गङ्गापदस्य शक्यार्थे प्रवाहरूपे घोषस्याऽन्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वा यत्र प्रतिसन्धीयते, तत्र लक्षणया तीरस्य बोध इति । सा च शक्यसम्बन्धरूपा । तथा हि—**

दिनकरी ।

च तात्पर्यमिति पूरणीयम् । **लक्षणयेति** । पङ्कजनिकर्तृकुमुदत्वेन बोधो **लक्षणयेत्यर्थः** । रूढ्यर्थयोगार्थयोः परस्परसामग्रीविरहोपलक्षणमेतत् । तेन रूढ्यर्थबाधप्रतिसन्धानासत्त्वेऽपि यत्र सामग्र्यन्तरविरहस्तत्राऽपि लक्षणया कुमुदादेर्बोधो भवत्येव । **अवयवशक्तिमात्रेणेति** । **मात्र**पदेन लक्षणानादरः सूचितः । **निर्वाहः**—पङ्कजनिकर्तृत्वेन कुमुदशाब्दबोधनिर्वाह इत्यर्थः । **पद्मत्वेन बोधः**—पद्मत्वेनैव बोधः । **लक्षणयैवेति** । रूढ्यर्थतावच्छेदकपद्मत्वजातेस्तत्राऽभावेन रूढया तद्बोधनासम्भवादिति भावः ॥ ८१ ॥

॥ इति पदनिरूपणम् ॥

लक्षणा द्विविधा—**जहत्स्वार्थाऽजहत्स्वार्था** च । तत्राऽऽद्यां प्रदर्शयति **गङ्गायामिति** । वक्ष्यमाणास्वरसादाह—**तात्पर्यानुपपत्तिर्वेति** । **सा च**—लक्षणा च । द्वितीरामरुद्री ।

प्रतिसन्धीयत इत्यस्य सामग्रीविरहोपलक्षणत्वेनेत्यर्थः । **सामग्र्यन्तरेति** । ग्रामादिको ऽयं पाठः । कारणान्तरविरह इत्येव वक्तुमुचितत्वात् । सामग्रीपदं सामग्रीघटककारणमात्रपरमत्र द्रष्टव्यम् । अन्तरपदं बाधाभावभिन्नपरम् । तच्च कारणं रूढ्यर्थस्मरणादिकमेवेति ध्येयम् । ननु योगरूढस्थले पङ्कजनिकर्त्रभिन्नं पद्ममिति बोधस्योपगमो नोचितः । सकृदुच्चरित इति न्यायविरोधात्, अतएव यौगिकरूढस्थले एकार्थ बोध इति चेन्न । एकपदोपस्थाप्ययोगरूढ्यर्थयोर्भेदेनान्वयबोधे आकाङ्क्षावैचित्र्यस्यैव योगरूढस्थले तादृशव्युत्पत्तिसङ्कोचस्यावश्यकत्वादिति भावः । **मूले यत्र त्विति**। यादृशैकानुपूर्व्यवच्छिन्न इत्यर्थः । तेनोच्चारणभेदेनोद्भित्पदस्य भेदेऽपि न क्षतिः । उच्चरित इति शेषः पूरणीयः ।

स्वातन्त्र्येणेति । अर्थान्तरमविषयीकृत्येत्यर्थः । इदं च योगरूढव्यावृत्त्यर्थमुक्तम् । **मूले यागविशेषोऽपीति** । उद्भिदा यजेत पशुकाम इत्यादावित्यर्थः । उद्भिदस्तरुगुल्माद्या इत्यादौ तरुगुल्माद्या उद्भेदनकर्तार इति बोध इति भावः ॥८१ ॥ इति पदनिरूपणम् ॥

जहत्स्वार्थेति । जहत्स्वार्थ ययेति व्युत्पत्त्या शक्यार्थाविषयकलक्ष्यार्थविषयकशाब्दबोधजनिका गङ्गापदादेस्तीरादौ लक्षणा । अत्र स्वपदं लक्षकत्वेनाभिमतपरम् । अर्थपदं शक्यार्थपरम् । एवमग्रेऽपि बोध्यम् । एवमेव न जहत्स्वार्थ ययेति व्युत्पत्त्याऽजहत्स्वार्था । छत्रिण इत्यादौ छत्रिघटितपथिकसमुदायत्वेन छत्रिपदस्य बोधजनिका छत्रिघटितैकसमुदायत्वावच्छिन्ने लक्षणेत्यर्थः । **आद्यामिति** । जहत्स्वार्थामित्यर्थः । **वक्ष्यमाणास्वरसादिति** । अन्वयानुपपत्तेर्लक्षणाबीजत्वे यष्टीः प्रवेशयेत्यादौ

---

(१) 'यदि तु-'इत्येतद्वाक्यं बहुषु पुस्तकेषु नाऽस्ति, परं प्राचीनलिखितपुस्तकसंवादेन दिनकरीयसंवादेन च स्थापितमिति ज्ञेयम् ।

प्रवाहरूपशक्यार्थसम्बन्धस्य तीरे गृहीतत्वात् तीरस्य स्मरणम्, ततः शाब्दबोधः। परन्तु यद्यन्वयानुपपत्तिर्लक्षणाबीजं स्यात्, तदा यष्टीः प्रवेशयेत्यादौ लक्षणा न स्यात्। यष्टिषु प्रवेशान्वयस्याऽनुपपत्तेरभावात्। तेन तत्प्रवेशे भोजनतात्पर्यानुपपत्त्या यष्टिधरेषु लक्षणा। एवं काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य दध्युपघातके लक्षणा, सर्वतो दधिरक्षायास्तात्पर्यविषयत्वात्। एवं च्छत्रिणो यान्तीत्यादौ च्छत्रिपदस्यैक सार्थवाहित्वे लक्षणा। इयमेवाऽजहत्स्वार्था लक्षणेत्युच्यते, एकसार्थवाहित्वेन रूपेण.

दिनकरी।

यां प्रदर्शयति **एवं काकेभ्य इति**। **दध्युपघातके**—काकबिडालादिसाधारणदध्युपघातकत्वविशिष्टे। **एकसार्थवाहित्वे**—एकसार्थवाहित्वविशिष्टे। च्छत्रिपदलक्षणाभिधानं च वाक्यलक्षणावादिमताभिप्रायेण। न्यायमते तु च्छत्रपदस्यैवैकसार्थवाहित्वे लक्षणा,

रामरुद्री।

यष्टिपदस्य यष्टिधरे लक्षणानुपपत्तिरूपास्वरसादित्यर्थः। **मूले एकसार्थवाहित्वेनेति**। एकः सार्थः समुदायत्वं तद्विषयकबुद्धिविषयत्वरूपम्। तद्वाहित्वेन तद्वत्त्वेनेत्यर्थः। तृतीयार्थोऽवच्छिन्नत्वं तस्य च लक्षणापदार्थे लक्ष्यतायामन्वयो बोध्यः। **मूले इयमेव चेति**। काकपदस्य दध्युपघातके छत्रिपदस्य छत्रिघटितसमुदाये लक्षणैव चेत्यर्थः। क्वचिन्मूले एकसार्थवाहित्वे लक्षणेति पाठो दृश्यते तदभिप्रायेण व्याचष्टे—**एकसार्थवाहित्वविशिष्ट इति**। ननु छत्रीत्यस्य मूलोक्तलक्षणा न सङ्गच्छते। छत्रमस्यास्तीत्यर्थे छत्रपदोत्तरं तद्धितेनिप्रत्ययेनैव छत्रीत्यस्य निष्पन्नतया प्रकृतिप्रत्ययसमुदायरूपत्वेन तस्य वाक्यत्वात् वाक्ये च शक्तिविरहेण लक्षणाया अप्यसंभवादित्यत आह—**छत्रीत्यादि**। **वाक्यलक्षणावादिमतेति**। वैयाकरणैः राजपुरुषादिसमासस्य राजस्वत्ववत्पुरुषे पाचकछत्र्यादिपदस्य पाककर्तृछत्रसंबन्ध्यादौ शक्तेरङ्गीकारादिति भावः। ननु नेदं मतं विचारसहम्। समासे राजपदस्य राजसंबन्धिनि लक्षणया पुरुषपदस्य पुरुषे शक्त्या च राजसंबन्ध्यभिन्नः पुरुष इति बोधोपपत्तौ समासे स्वतन्त्रशक्तिकल्पने छत्र्यादौ च छत्रार्थकच्छत्रपदसंबन्ध्यर्थकेनिप्रत्ययाभ्यामेव छत्रसंबन्धीति बोधोपपत्तौ छत्रीत्यस्य छत्रसंबन्धिनि शक्तिकल्पने च बीजाभावात्। अन्यथा निरर्थकनानाशक्तिकल्पनागौरवप्रसङ्गात्। नच समासादौ शक्तिस्वीकार आवश्यकः। अन्यथा ऋद्धस्य राजमातङ्गा इत्यादिप्रयोगापत्तेः। तत्र हि राजमातङ्गपदार्थतावच्छेदके राजन्यभेदेन ऋद्धपदार्थस्यान्वयो न संभवति। पदार्थः पदार्थनान्वेति न तु पदार्थतावच्छेदकेनेति नियमात्। राजपदस्यैव राजार्थत्वे तु तत्र ऋद्धपदार्थस्याभेदेनान्वये न किंचिद्बाधकमिति तादृशप्रयोगो दुर्वार इति वाच्यम्। राजपदस्य राजसंबन्धिलक्षकतया राज्ञः पदार्थतावच्छेदकत्वसंभवाच्छक्यतावच्छेदकस्यैव लक्ष्यतावच्छेदकस्यापि पदार्थतावच्छेदकत्वात्। छत्रीत्यादौ पदार्थान्तरस्यान्वयबोधाभावस्तु वृत्तस्य न विशेषणयोगः, विशेषणयुक्तस्य न वृत्तिरिति समासकृत्तद्धितादिरूपवृत्त्येकदेशार्थस्य पदार्थान्तरेणानन्वयनियमरूपव्युत्पत्त्यन्तरादेवेत्यस्वरसादाह—**न्यायमते त्विति**। वस्तुतो वृत्त्येकदेशार्थेऽपि दासशातनादौ चैत्रस्वत्वशरकरणत्वादिरूपपदार्थान्तरस्य भेदसंबन्धेन चैत्रस्य दासभार्या शरैः शातितपत्र इत्यादावन्वयबोधदर्शनादभेदसंबन्धेन तत्र पदार्थान्तरान्वयोऽव्युत्पन्न इत्यवश्यमङ्गीकरणीयम्। तथाचाभेदेनान्वयप्रयोजकसमानविभक्तिकपदोपस्थाप्यत्वाभावादभेदेनान्वयबोधवारणसंभवे वृत्तस्येत्यादिव्युत्पत्त्यनङ्गीकारेऽपि न क्षतिः। नच चैत्रस्य पितेत्यादौ पितृपदार्थतावच्छेदकघटकजनकत्वे चैत्रनिरूपितत्वस्य षष्ठ्यन्तार्थस्यान्वयदर्शनात्पदार्थतावच्छेदकेऽपि अभेदेनैव पदार्थान्तरस्यान्वयोऽव्युत्पन्न इत्यवश्यमङ्गीकरणीयम्। तथाविधान्वयबोधस्य च समानविभक्तिकपदोपस्थाप्यत्वादेरभावादेव वारणसंभवे पदार्थः पदार्थेनान्वेतीत्यादिव्युत्पत्तिकल्पनमपि नावश्यकमिति वाच्यम्। तथासति गवि पशुर्गौरित्यादितो गोवृत्तिलोमलाङ्गूलवान् गौरित्यादि-

च्छत्रि-तदन्ययोर्बोधात्। यदि चाऽन्वयानुपपत्तिर्लक्षणाबीजं स्यात्, तदा क्वचित् गङ्गापदस्य तीरे, क्वचित् घोषपदस्य मत्स्यादौ लक्षणेति नियमो न स्यात्।

इदं तु बोध्यम्। शक्यार्थसम्बन्धो यदि तीरत्वेन रूपेण गृहीतः, तदा तीरत्वेन तीरबोधः, यदि तु गङ्गातीरत्वेन रूपेण गृहीतः, तदा तेनैव रूपेण स्मरणम्। अत एव लक्ष्यतावच्छेदके न लक्षणा, तत्प्रकारकबोधस्य तत्र लक्षणां

दिनकरी।

प्रत्ययार्थश्च सम्बन्धी। तथा चैकसार्थवन्तो गच्छन्तीत्यन्वयः। एकसार्थवाहित्वं चैकसार्थ एव, न त्वेकसार्थगन्तृत्वम्। नैराकाङ्क्ष्येण यान्तीत्यस्याऽनन्वयापत्तेः। न चाऽजहत्स्वार्थतोक्तिर्विरुद्धेति वाच्यम्। वाक्यलक्षणावादिमतेनैव तदभिधानादिति। क्वचित्-गङ्गापदस्य तीरतात्पर्यग्रहस्थले। क्वचित्-घोषपदस्य मत्स्यादौ तात्पर्यग्रहस्थले।

तेनैव रूपेणेति। न च गङ्गायामित्यादौ गङ्गातीरत्वेन बोधे जहत्स्वार्थत्वहानिरिति वाच्यम्। तीरत्वेन लक्षणायामेव जहत्स्वार्थत्वस्य सर्वसम्मतत्वात्। गङ्गातीरत्वेन भाने त्वजहत्स्वार्थैव लक्षणेति। एवं पूर्वोक्तस्थले यष्टीः प्रवेशय, मञ्चाः क्रोशन्तीत्यादावपि यष्टिधरत्वमञ्चस्थत्वादिना बोधे अजहत्स्वार्थैव लक्षणेति ध्येयम्। अत एव-तद्धर्मविशिष्टे लक्षणाग्रहस्य तेन रूपेणोपस्थितिशाब्दबोधौ प्रति हेतुत्वादेव। एवञ्च पदानुपस्थाप्यस्याऽपि लक्ष्यतावच्छेदकस्य शाब्दे भानं सुकरम्। अतिप्रसङ्गस्य तद्धर्मविशिष्टेत्या-

रामरुद्री।

बोधापत्तिः। चैत्रस्य पितेत्यादौ तु ससंबन्धिकपदशक्यतावच्छेदकेऽपि पदार्थान्तरान्वयस्य व्युत्पन्नतया नान्वयबोधानुपपत्तिः। ससंबन्धिकं च पदं नियतसंबन्धाकाङ्क्षोत्थापकमित्यवधेयम्। एकसार्थवाहित्व इति। एकसमुदायत्व इत्यर्थः। यद्यपि छत्रपदस्य छत्रिघटितसमुदाये लक्षणोपगमेऽपि संभवति निर्वाहस्तथापि संभवति प्रत्ययस्य सार्थक्ये तत्परित्यागस्यानुचितत्वादेवमभिहितमित्यवधेयम्। एकसार्थे एवेति। एकसमुदायत्वमेवेत्यर्थः। नैराकाङ्क्ष्येणेति। उद्देश्यतावच्छेदकविधेययोरैक्येऽभेदेनान्वयस्याव्युत्पन्नतया गमनकर्तृत्वविशिष्टे गमनकर्तृत्वस्याश्रयतयाऽन्वयबोधे आकाङ्क्षाविरहादिति भावः। नचेति। छत्रपदस्य छत्रिघटितसमुदायलक्षकत्वे तज्जन्यशाब्दबोधे छत्ररूपमुख्यार्थस्य मुख्यविशेष्यतया भानाभावादिति ध्येयम्। वाक्यलक्षणेति। एतच्चापातत एव समाधानम्। वस्तुतः स्वजन्यबोधे शक्यार्थस्य विशेषणतया भानेऽपि नाजहत्स्वार्थताभङ्गः। यादृशलक्षणया शक्यार्थस्य कथं चिदपि न बोधस्तस्या एव जहत्स्वार्थत्वात्। अतएव गङ्गापदस्य यत्र गङ्गातीरत्वेन लक्षणा साऽजहत्स्वार्था। यत्र तु तीरत्वेन लक्षणा तत्रैव जहत्स्वार्थेति न्यायमतेऽपि छत्रीत्यादौ अजहत्स्वार्थलक्षणोपपादनमिति ध्येयम्।

तीरत्वेनेति। इदमपि पूर्वोक्तविरुद्धमेव छत्रिघटितसमुदायलक्षकच्छत्रपदस्य विशेषणतया छत्रबोधकत्वेन तत्राप्यजहत्स्वार्थलक्षणोपपादनमिति तस्यामप्यजहत्स्वार्थत्वसभवादिति ध्येयम्। नच केवलसमुदायत्वेन यत्र छत्रपदस्य लक्षणा तत्रैवाजहत्स्वार्थत्वविरोधो नचेत्यादिना पूर्वमाशङ्कित इति न पूर्वोत्तरग्रन्थविरोध इति वाच्यम्। एवमपि यत्र छत्रिघटितसमुदायत्वेन छत्रपदस्य लक्षणा तत्रैवाजहत्स्वार्थत्वोपपत्तेरिति समाधानस्यैव कार्यत्वाद्वाक्यलक्षणावादिमताभिप्रायेणाजहत्स्वार्थत्वोपपादनस्यानौचित्यात्। अतएव ग्रन्थकृतैव यत्र तीरत्वेन गङ्गापदस्य लक्षणा तत्रैव गङ्गापदस्य जहत्स्वार्थलक्षणायाः सर्वसंमतत्वादिति वक्ष्यते। तत्र हि सर्वपदमहिम्ना गङ्गातीरत्वेन लक्षणायामपि जहत्स्वार्थत्वस्य केषांचिदनुमतत्वं लक्ष्यते, तच्च शक्यार्थस्य पदार्थान्तरेण साकं यत्रान्वयबोधस्तत्रैवाजहत्स्वार्थत्वमितिमताभिप्रायेणैव घटत इति मन्तव्यम्। अतिप्रसङ्गस्येति। वृत्त्या पदजन्योपस्थित्यविषयस्याऽपि शाब्दबोधे भानोपगमे घटादिपदात्पटादिविषयकशाब्दबोधप्रसङ्गस्येत्यर्थः। तथाच यद्धर्मावच्छिन्नविशेष्यकशक्यसं-

विनाऽप्युपपत्तेः । परन्त्वेवंक्रमेण शक्यतावच्छेदकेऽपि शक्तिर्न स्यात्, तत्प्रकारकशक्यार्थस्मरणं प्रति तत्पदस्य सामर्थ्यमित्यस्य सुवचत्वादिति विभावनीयम् ।

यत्र तु शक्यार्थस्य परम्परासम्बन्धरूपा लक्षणा, सा लक्षितलक्षणेत्यु-

दिनकरी ।

दिनैव वारणादिति भावः । इदमुपलक्षणम् । गङ्गापदशक्यप्रवाहसम्बन्धस्य तीरत्वे बाधादित्यपि द्रष्टव्यम् ।

लक्षितलक्षणाया आधिक्यमाशङ्क्य जहत्स्वार्थायामन्तर्भावमाह—यत्र त्विति । परम्परासंबन्धरूपेति । स्ववाच्यरेफद्वयघटितपदवाच्यत्वादिरूपा । न च द्वौ रेफौ यत्रेति व्युत्पत्त्या द्विरेफपदेन स्वशक्यरेफद्वयसम्बन्धिभ्रमरपदं लक्ष्यते, भ्रमरपदेन च शक्त्या

रामरुद्री ।

बन्धग्रहस्तद्धर्मावच्छिन्नविशेष्यकमेव पदार्थस्मरणं शाब्दबोधश्च इति नियमोपगमेनैव घटादिपदान्न पटादिविषयकशाब्दबोधापत्तिरिति भावः । प्रवाहसम्बन्धस्येति । तथाच शक्यसंबन्धरूपलक्षणाया लक्ष्यतावच्छेदके तीरत्वेऽभावादपि लक्ष्यतावच्छेदके न लक्षणेति भावः । यद्यपि तीरत्वे संयुक्तसमवायरूपशक्यसंबन्धोऽस्त्येव तथापि युगपद्वृत्तिद्वयविरोधेन शक्तिद्वयेनैव लक्षणाद्वयेनापि एकदैव पदार्थद्वयशाब्दबोधस्यानुपगमेनैकपदात्तीरतत्वयोर्बोधानुपपत्तिरिति ग्रन्थकृतां तात्पर्यम् । गङ्गायां घोषमस्त्यौ स्त इत्यादिप्रयोगस्य प्रामाण्योपगमे तु सजातीयवृत्तिद्वयेनैव युगपन्नार्थद्वयविषयकशाब्दबोध इत्यवधेयम् । अत उक्तस्थले गङ्गापदादेकदैवतीरप्रवाहयोर्बोधेऽपि न क्षतिरिति मन्तव्यम् । मूले परंत्वित्यादि । अत्रेदमवधेयम् । शक्यतावच्छेदके शक्त्यस्वीकारे पृथिवीपदात्कदाचिदृष्टद्रव्यातिरिक्तद्रव्यत्वेन कदाचिद्गन्धवत्त्वेन कदाचित्पृथिवीत्वेन च शाब्दबोधापत्तिः । पृथिवीपृथिवीपदशक्येतिवदृष्टद्रव्यातिरिक्तद्रव्यं गन्धवद्वा पृथिवीपदशक्यमित्याकारकस्य शक्तिज्ञानस्य संभवात्, तीरं गङ्गातीरं वा प्रवाहसंयोगवदिति लक्षणाग्रहेण शक्तिग्रहस्य तुल्ययोगक्षेमत्वात् । तथा च लक्षणया यत्किंचिदेकधर्मावच्छिन्नविषयक एव शाब्दबोध इति न नियमस्तथा शक्यार्थबोधेऽपि नियमो न स्यात् । शक्यतावच्छेदके शक्तिस्वीकारे तु पृथिवीपदात्पृथिवीत्वेनैव शाब्दबोध इति नियम उपपद्यते । पृथिवीपदस्य पृथिवीत्वपृथिव्योरेव शक्तताया शक्त्या शक्यार्थस्यैव शाब्दबोधे भानमिति नियमेन च तदुपपादनसंभवात् । लक्षणयाऽलक्ष्यस्यापि शाब्दबोधे भानोपगमेन लक्षणया कदाचित्तीरत्वेन कदाचिद्गङ्गातीरत्वेनाशाब्दबोधो भवत्येव । इदमत्र पुनश्चिन्त्यम् । धर्मितावच्छेदके शक्यतावच्छेदकत्वावगाहिशक्तिज्ञानमेव शाब्दबोधहेतुरुपेयते । शक्यतावच्छेदकं च सर्वत्र लघ्वन्यूनानतिरिक्तवृत्तिरेव धर्मः, संभवति लघौ गुरौ स्वरूपसंबन्धरूपावच्छेदकत्वास्वीकारात् । अतएव पृथिवी पृथिवीपदशक्येतिशक्तिज्ञानमेव प्रमा । शक्तेः पृथिवीत्वावच्छिन्नत्वात् । नतु जलाद्यष्टद्रव्यातिरिक्तद्रव्यं तथेत्यादिशक्तिज्ञानं, तेषां गुरुत्वेन शक्यतानवच्छेदकत्वात् । शक्यसंबन्धरूपप्रवाहसंबन्धस्य तु स्वरूपसंबन्धरूपावच्छेदकत्वे मानाभावः । तीरं प्रवाहसंबन्धवदितिवद्गङ्गातीरं भूखण्डं प्रवाहसंयोगीति प्रतीतेः सर्वजनानुभवसिद्धत्वात् । पृथिवी पृथिवीपदशक्येति बोधस्यैव प्रमात्वं नत्वष्टद्रव्यातिरिक्तद्रव्यं तथेति शक्तिज्ञानस्य तथात्वमित्यस्य सर्वसंमतत्वात् । शक्तिप्रतीतीनां स्वरूपसंबन्धरूपावच्छेदकत्वावगाहित्वसिद्ध्या शक्तेस्तथाविधावच्छेदकत्वं प्रामाणिकमेव, घटो नास्तीत्यादिप्रतीतौ घटत्वस्येव प्रतियोगितावच्छेदकत्वम् । इत्थंच शक्यतावच्छेदके शक्तिविरहेऽपि पृथिवीपदात् शक्तिभ्रमया पृथिवीत्वप्रकारकशाब्दबोधः । शक्तिभ्रमेण तु गन्धवत्त्वादिनापि शाब्दबोध इति । अत एव भ्रान्तस्य गन्धवत्त्वावच्छेदेनापि शक्तिज्ञानसंभवादिति परैरपरिशीलितः पन्थाः ।

च्यते। यथा द्विरेफादिपदाद्रेफद्वयसम्बन्धो भ्रमरपदे ज्ञायते, भ्रमरपदस्य च सम्बन्धो भ्रमरे ज्ञायते, तत्र लक्षितलक्षणा।

किन्तु लाक्षणिकं पदं नाऽनुभावकम्। लाक्षणिकार्थस्य शाब्दबोधे तु पदान्तरं कारणम्। शक्तिलक्षणान्यतरसम्बन्धेनेतरपदार्थान्वितस्वशक्यार्थ-शाब्दबोधं प्रति पदानां सामर्थ्यावधारणात्।

दिनकरी।

भ्रमरः कल्प्यते(१) इत्येतावतैव सामञ्जस्येऽलं द्विरेफपदस्य भ्रमरे परम्परासम्बन्ध-रूपलक्षणया, एवञ्च लक्षितेन लक्षणा-ज्ञापनमिति लक्षितलक्षणाशब्दार्थोऽप्यस्त्विति वाच्यम्। तथा सति द्विरेफमानयेत्यादितः कर्मत्वादौ भ्रमरपदार्थान्वयानुपपत्तेः, प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वादिति।

ननु तच्छाब्दबोधे तच्छक्तपदज्ञानत्वेन हेतुत्वाल्लाक्षणिकशाब्दबोधः कथं स्यादित्यत आह। किन्त्विति। पदान्तरं-समभिव्याहृतं शक्तं पदम्। शक्तिलक्षणेति। अन्यतरसम्बन्धेन य इतरपदार्थस्तदन्वितो यः स्वार्थः।

कुमतिः पशुरित्यादिसर्वलाक्षणिकस्थले शाब्दबोधस्याऽनुभवसिद्धतया लाक्षणिक-

रामरुद्री।

कल्प्यत इति। उपस्थाप्यत इत्यर्थः। अवयवशक्त्या द्विरेफपदाद्भ्रमरपदस्य स्मरणं भवति। तेन च स्मरणात्मकपदज्ञानेन कीटकविशेषार्थस्मरणं शाब्दबोधश्चेतिरीत्या शक्त्यैव द्विरेफपदात्साक्षात्संबन्ध-रूपनिरूढलक्षणाया निर्वाह्यतया भ्रमरबोधनिर्वाहे शक्यपरम्परासंबन्धरूपलक्षितलक्षणास्वीकारोऽनुचित इति भावः। नन्वेवं द्विरेफपदे लक्षितलक्षणेति सर्वसिद्धप्रवादस्य का गतिरित्यत आह—लक्षितेनेति। द्विरेफपदलक्षितेन भ्रमरपदेन लक्षणं शाब्दबोधरूपं ज्ञानम्। आकारान्तप्रयोगस्तु "उपासनैव क्रियते श्रवणानन्तरागते" त्यादिवदिति भावः। प्रत्ययानामिति। यस्मात्प्रत्ययो विधीयते सा प्रकृतिः(२) तदर्थो वृत्त्या तज्ज्ञन्योपस्थितिविषयो यस्तदन्वितस्वार्थबोधकत्वादित्यर्थः। प्रत्ययाश्च विभक्तिकृत्तद्धिताख्याताः। तथाच द्विरेफपदेन लक्षणयोपस्थितं भ्रमरपदमेव ननु(३)तदर्थ इति कथं तत्र विभक्त्यर्थकर्मत्वान्वय इत्यनुपपत्तिः स्यादतः शक्यस्य रेफद्वयस्य स्वघटितपदवाच्यत्वरूपपरम्परासंबन्धात्मिकया लक्षित-लक्षणया द्विरेफपदात् भ्रमरोपस्थित्यर्थं तादृशलक्षणास्वीकार आवश्यक इति भावः। मूले नानुभावकमिति। शाब्दानुभवजनकं नेत्यर्थः। तथाच लाक्षणिके पदे स्मारिका शक्तिरेव नानुभाविकीति भावः। ननु तर्हि लाक्षणिकार्थस्य कथं शाब्दबोधे भानमित्याशङ्क्य लाक्षणिकपदसमभिव्याहृतशक्तपदान्तरमेव लाक्षिणकार्थान्वितस्वार्थबोधं प्रति कारणमिति शक्तपदान्तरादेव शाब्दबोधे लाक्षणिकार्थस्य भानमिति समाधत्ते—लाक्षणिकार्थस्येति। सामर्थ्यावधारणात् शक्त्यवधारणादित्यर्थः। मूलस्थपदान्तरमित्यस्य लाक्षणिकपदभिन्नार्थकत्वेन सकलशक्तपदानामपि लाक्षणिकार्थशाब्दबोधजनकत्वं प्रतीयते। तच्चाप्युक्तम्। गङ्गायां घोष इत्यत्र घोषपदस्यैव तीरशाब्दबोधजनकतायाः सर्वानुभवसिद्धत्वादतो व्याचष्टे—पदान्तरमिति। समभिव्याहृतमिति। तल्लाक्षणिकपदसमभिव्याहृतमित्यर्थः। तथाच तल्लाक्षणिकपदसमभिव्याहृतं शक्तं पदं तत्स्मारितलक्ष्यार्थविषयकशाब्दबोधजनकमिति भावः। इतरपदार्थ इति। इतरपदजन्यस्मृतिविषय इत्यर्थः। (तत्रेतरपदे तृतीयार्थस्य स्वविषयकज्ञानसहितवैशिष्ट्यपदस्य वाऽन्वयः।)

कुमतिरिति। कुत्सिता मतिर्यस्य स कुमतिरिति बहुव्रीहावुत्तरपदस्य कुत्सितज्ञानवल्लाक्षणिक-

---

(१) 'उपस्थाप्यते' इति पाठः। (२) 'तदर्थेन प्रत्युत' इति पाठः।
(३) 'तथा च द्विरेफपदेन भ्रमरपदमेव, न तु तदर्थ इति' इत्यपि पाठः।

वाक्ये तु शक्तेरभावात् शक्यसम्बन्धरूपा लक्षणाऽपि नाऽस्ति। यत्र गभीरायां नद्यां घोष इत्युक्तं, तत्र नदीपदस्य नदीतीरे लक्षणा, गभीरपदार्थस्य नद्या सहाऽभेदान्वयः। क्वचिदेकदेशान्वयस्याऽपि स्वीकृतत्वात्। यदि तत्रैकदेशान्वयो न स्वीक्रियते, तदा नदीपदस्य गभीरनदीतीरे लक्षणा, गभीरपदं तात्पर्यग्राहकम्।

दिनकरी।

स्याऽप्यानुभावकत्वमिति नव्याः।

ननु शक्यसम्बन्धो न लक्षणा, तथा सति (हि) वाक्यस्य शक्याप्रसिद्धया तत्र लक्षणा न स्यादिति मीमांसकाक्षेपमिष्टापत्त्या निराकुरुते। वाक्ये त्विति। ननु गभीरायां नद्यां घोष इत्यादौ नदीपदस्य नदीतीरे लक्षणास्वीकारे गभीरपदार्थस्यैकदेशान्वयापत्त्या पदलक्षणाया असम्भवेन वाक्यलक्षणाऽऽवश्यकीत्यत आह। **यत्र गभीरेति। क्वचिदिति।** चैत्रस्य गुरुकुलमित्यादावित्यर्थः। **स्वीकृतत्वादिति।** पदभेदेन व्युत्पत्तिभेदात् प्रकृते तथा व्युत्पत्त्यकल्पनादिति भावः। **नदीपदस्येति।** न च विनिगमनाविरहेण गभीरपदस्य लक्षणा, नदीपदं तात्पर्यग्राहकमित्यस्याऽपि वक्तुं शक्यत्वात् कथं नदीपदमात्रे लक्षणाभिधानमिति वाच्यम्। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः-रुत्तरपद एव लक्षणाया उक्तत्वात्।

अत्र मीमांसकमतानुयायिनः। वाक्यलक्षणयैवोपपत्तौ गभीरपदस्य तात्पर्यग्राहकत्वकल्पनमयुक्तम्। न च वाक्ये शक्त्यभावाच्छक्यसम्बन्धरूपा लक्षणाऽपि न सम्भवतीति वाच्यम्। **स्वबोध्यसम्बन्धस्यैव** लक्षणापदार्थत्वात्, **गङ्गायां घोष इत्यादौ गङ्गापदबोध्यस्य प्रवाहस्य** सम्बन्धस्तीरे इति **तत्र** लक्षणा। **गभीरायां नद्यामिति** वाक्यस्य **बोध्या गभीराऽभिन्ना नदी**, तत्सम्बन्धस्तीरे इति वाक्येऽपि **लक्षणा। एवं समासात्मके चित्रगुरिति** वाक्येऽपि **चित्रगुपदस्याऽवयवशक्त्या चित्राऽभिन्ना गौः स्वबोध्या, स्वजन्यबोधविषयस्यैव स्वबोध्यत्वात्, तत्सम्बन्धस्य स्वामिनि सत्त्वादित्याहुः।**

रामरुद्री।

तया पूर्वपदस्य तात्पर्यग्राहकतया निरर्थकतया कुमतौ पशुत्वस्य बाधितत्वेन पशुपदस्यापि पशुसदृशे लाक्षणिकतया कुमतिः पशुरित्यत्र कस्यापि शक्तपदस्याभावात् तत्र शाब्दबोधो न स्यादिति तत्र शाब्दबोधोपपत्तये लाक्षणिकपदेऽप्यानुभाविकी शक्तिरवश्यमङ्गीकरणीयेति भावः।

गुरुकुलमित्यादि। कुलमिति संघातायातम्। चैत्रस्य गुरुरित्यत्रापि गुरुत्व एव चैत्रनिरूपितत्वस्यान्वयात्। न च गुरावेव चैत्रसंबन्धोऽन्वीयतामिति वाच्यम्। तथा सति चैत्रपुत्रादावपि तथा प्रयोगप्रसङ्गात्। चैत्रपुत्रस्यापि कस्यचिद्गुरुत्वाच्चैत्रसंबन्धित्वाच्चेति ध्येयम्। नन्वेवं पदस्य ससंबन्धिकत्वेन तदर्थैकदेशे पदार्थान्तरान्वयसंभवेऽपि नदीपदस्यातथात्वात्कथं तदेकदेशे गभीरपदार्थस्यान्वय इत्यत आह—**पदभेदेनेति। व्युत्पत्तिभेदात्** आकाङ्क्षाभेदात्। **प्रकृत इति।** एतद्वाक्यस्थनदीपद इत्यर्थः। **उत्तरपद एवेति।** यद्यपि गभीरायां नद्यां घोष इत्यस्यैव पूर्वमुदाहृतत्वेन तत्र गभीरपदोत्तरमपि सप्तमी श्रूयत एवेति नेयमनुपपत्तिः तथापि विशेषणविभक्तेः सर्वत्र निरर्थकत्वेन तस्याः सार्थकत्वोपगमस्यायुक्तत्वात् घोषपदेन गभीरायामित्यस्यानासन्नत्वाच्छाब्दबोधानुपपत्तेश्च। गभीरनद्यां घोष इत्यादौ सर्वथानुपपत्तेश्च न तथोपगमसंभव इति भावः। **(गङ्गापदजन्यबोधेति।** गङ्गापदशक्यार्थस्मरणरूपेत्यर्थः। वाक्यजन्यबोधस्तु शाब्दबोधरूप एवेति भावः।)

दिनकरी।

तन्न। स्वबोध्यत्वं हि न स्वजन्यबोधविषयत्वम्। गङ्गायां घोष इत्यादौ गङ्गायामित्यस्याऽपि लाक्षणिकत्वापत्तेः, अतस्तत्त्वेन बोधकत्वं वाच्यम्। न चैतावताऽपि निर्वाहः, अपभ्रंशस्याऽपि लाक्षणिकत्वापत्तेः अतस्तत्त्वावच्छिन्ना या शक्त्यवच्छिन्ना बोधकता सैव निवेश्या। तथा च कथं वाक्यस्य लक्षकत्वम्? वस्तुतस्तु स्वबोध्यत्वं यदि स्वजन्यशाब्दबोधविषयत्वं, तदा गङ्गायां घोष इत्यादौ गङ्गापदे लक्षणानुपपत्तिः, गङ्गापदेन तत्र प्रवाहशाब्दबोधाजननेन प्रवाहस्य गङ्गापदबोध्यत्वाभावात्, किन्तु शक्त्या स्वजन्यज्ञानविषयत्वं तद्वाच्यम्। न च शक्त्येत्यधिकम्, समवायेन घटपदस्मारिताकाशस्याऽपि स्वबोध्यत्वापत्त्या तत्सम्बन्धज्ञानात् घटपदेन पटादेः शाब्दबोधप्रसङ्गात्। एवञ्च शक्यसम्बन्धापेक्षया शक्त्या स्वबोध्यसम्बन्धस्य गुरुत्वान्न तस्य लक्षणात्वमिति। किञ्च गभीरायां नद्यामिति सप्तम्यन्तस्य गभीरनदीतीरलक्षकत्वे घोषे तादृशतीराधेयताबोधानुपपत्तिः, आधेयताबोधकपदाभावात्, नामार्थयोर्भेदसम्बन्धेनाऽन्वयस्याऽव्युत्पन्नतया आधे-

रामरुद्री।

गङ्गायामित्यस्यापीति। गङ्गायां घोष इत्यत्र गङ्गापद एव लक्षणा सर्वानुमता नतु गङ्गायामिति वाक्ये पदलक्षणायामनुपपत्तेरभावात्। गङ्गायामिति वाक्यजन्यस्यापि गङ्गातीरवृत्तिरितिशाब्दबोधस्य गङ्गाविषयकत्वात्तत्संबन्धस्य तीरे सत्त्वात्तादृशवाक्यस्यापि तीरे लाक्षणिकत्वापत्तिरिति भावः। इदं च गङ्गातीरत्वेन शक्यसंबन्धग्रहमभिप्रेत्योक्तम्। तीरत्वेन तथात्वे तु प्रवाहस्य न वाक्यजन्यबोधविषयत्वमित्यवधेयम्। **तत्त्वेनेति**। यादृशानुपूर्व्यवच्छिन्नस्य लक्षकत्वमभिमतं तादृशानुपूर्व्यवच्छिन्नजनकता निरूपितजन्यतायाशालिबोधविषयसबन्ध एव तादृशानुपूर्व्यवच्छिन्नस्य लक्षणा वाच्येति भावः। एवं च गङ्गायामित्यानुपूर्वी न शाब्दबोधजनकतावच्छेदिकेति न वाक्यलक्षणापत्तिः। यद्यपि गङ्गातीरवृत्तिरित्याकारकशाब्दबोधं प्रत्याकाङ्क्षाज्ञानविधया गङ्गापदोत्तरसप्तमीरूपसमभिव्याहारज्ञानस्य कारणत्वमावश्यकम्। अन्यथा सप्तम्युत्तरगङ्गापदज्ञाने तादृशशाब्दबोधापत्तेः। तथापि तादृशानुपूर्व्यवच्छिन्नविषयकज्ञानमेव शाब्दबोधजनकं न तु तादृशानुपूर्व्यवच्छिन्नमेवेति नेदानीं वाक्यलाक्षणिकत्वापत्तिरिति भावः। नचैवं पदज्ञानमेव शाब्दबोधकारणं नतु पदमिति तादृशानुपूर्व्यवच्छिन्नजनकतानिरूपितजन्यताशालिबोधाप्रसिद्ध्या पदस्यापि लाक्षणिकत्वानुपपत्तिरिति वाच्यम्। शायमानपदस्य कारणत्वाभिप्रायेणैतदभिधानात्। ननु मौनिश्लोकादौ पदाभावेऽपि शाब्दबोधोत्पत्त्या मतमिदं न विचारसहमिति तादृशानुपूर्व्यवच्छिन्नज्ञानजन्यबोधविषयसंबन्ध एव तादृशानुपूर्व्यवच्छिन्नस्य लक्षणेत्यवश्यमङ्गीकरणीयम्। तथाचागतमेव वाक्यस्य लाक्षणिकत्वमित्यत आह—**नन्वेतावतेति**। **तत्त्वावच्छिन्नेति**। तत्त्वं तादृशानुपूर्वी तदवच्छिन्ना तन्निष्ठावच्छेदकतानिरूपिका शक्त्यवच्छिन्ना विषयितासंबन्धावच्छिन्नशक्तिनिष्ठावच्छेदकतानिरूपिका ज्ञाननिष्ठबोधजनकता या सैवेत्यर्थः। तथाच तादृशानुपूर्व्यवच्छिन्नशक्तिज्ञानजन्यबोधविषयसंबन्धस्तदानुपूर्व्यवच्छिन्नस्य लक्षणेति पर्यवसानाद्वाक्यस्य च शक्त्यभावात्तस्य लक्षकत्वासंभव इति भावः। ननु शक्त्यभावेऽपि वाक्यस्येवापभ्रंशस्यापि लाक्षणिकत्वमिष्यत एवेति यदि ब्रूयात्तदाप्याह—**वस्तुत इति**। **लक्षणानुपपत्तिरिति**। तीरत्वावच्छिन्ने शक्यसंबन्धग्रहे शुद्धतीरत्वावच्छिन्नविषयकशाब्दबोधोत्पत्त्या प्रवाहस्य शाब्दबोधाविषयत्वादिति भावः। **स्वजन्यज्ञानेति**। स्वजन्यस्मरणेत्यर्थः। यद्यपि शक्त्येत्यनुपादानेऽपि वाक्यलक्षणानिरासः संभवति, पदस्यैवार्थस्मारकत्वेन वाक्यस्य स्मारकत्वाभावात्। तथापि वाक्यवाक्यार्थयोर्बोध्यबोधकभावसंबन्धज्ञाने वाक्यस्यापि वाक्यार्थस्मारकत्वसंभवात्तज्जन्यस्मृतिविषयसंबन्धस्यैव लक्षणात्वोपगमे लक्षणायाः शक्त्यघटिततया लक्षणायाः शक्यसंबन्धरूपत्वे न लाघवावकाशः अतः शक्त्येत्युपात्तम्। नन्वेवं यत्किंचित्पदस्य तात्पर्याग्राहकत्वभिया गौरवमप्यस्तीति यदि ब्रूयात्तदाप्याह—**किंचेति**। **नामार्थयोरिति**। नच नामार्थत्वं

बहुव्रीहावप्येवम्। तत्र हि चित्रगुपदादौ यदैकदेशान्वयः स्वीक्रियते, तदा गोपदस्य गोमति लक्षणा, गवि चित्राऽभेदान्वयः। यदि त्वेकदेशान्वयो न स्वीक्रियते, तदा गोपदस्य चित्रगोस्वामिनि लक्षणा, चित्रपदं तात्पर्यग्राहकम्। एवमारूढवानरो वृक्ष इत्यत्र वानरपदस्य वानरारोहण-

दिनकरी।

यतासम्बन्धेनाऽपि तीरस्य घोषादावन्वयासम्भवात्। गभीरायां नदीतिसप्तमीशून्यभागस्य तीरे लक्षकत्वे सप्तम्यर्थाधेयत्वादौ तादृशतीरादेरनन्वयानुपपत्तिः, प्रत्ययानां प्रकृत्यर्थान्वित-स्वार्थबोधकत्वव्युत्पत्तेः, गभीरायां नदीति भागस्य सप्तमीप्रकृतित्वाभावात्। न च गभीरायां नद्यामिति सप्तम्यन्तस्य गभीरनदीतीरवृत्तित्वे लक्षणाऽस्त्विति शङ्क्यम्। तादृशतीरवृत्ति-त्वस्य घोषादावन्वयानुपपत्तेः। नामार्थयोर्भेदसम्बन्धेनाऽन्वयस्याऽव्युत्पन्नत्वात्। सप्त-म्यन्तभागस्य तादृशतीरवृत्तौ लक्षणामुपगम्य तस्याऽभेदेन घोषादावन्वय इत्यपि न। अभेदेनाऽन्वयबोधे समानविभक्तिकत्वस्य तन्त्रत्वादित्यास्तां विस्तरः।

एवम्—अवयवलक्षणैव, न तु वाक्ये लक्षणेत्यर्थः। **गोपदस्येति**। प्रत्ययार्थान्वया-नुरोधेनोत्तरपदलक्षणाया युक्तत्वादिति भावः। **गोमति**—गोस्वामिनि। **न स्वीक्रियत इति**। गोधर्मिकान्वयबोधे गोधर्मिकवृत्तिज्ञानस्य हेतुताया आवश्यकत्वात्। अन्यथा चित्र-

रामरुद्री।

वृत्त्या नामजन्यस्मृतिविषयत्वम्। वाक्यं च ननामेति कथं गभीरनदीतीरस्य बोधः। यदि च वाक्यस्य पदसमूहरूपतया समूहस्य प्रत्येकानतिरिक्ततया वाक्यजन्यस्मरणस्यापि नामजन्यत्वमक्षतमेवेत्युच्यते' तदा तत्र प्रत्ययजन्यत्वस्याप्यवर्जनीयतया गभीरनदीतीरस्य प्रत्ययार्थत्वसंभवेन प्रत्ययार्थस्य नामार्थे भेदेना-न्वयोपगमान्नानुपपत्तिरिति वाच्यम्। तथा सति गभीरनदीतीरीयरजनेति बोधतात्पर्येण गभीरायां नदी रजनेति प्रयोगापत्तेः। वाक्यलक्षणावादिभिरपि गभीरायां रजनेत्यत एव तादृशबोधोपगमे(न) इष्टापत्तेर-योगादिति भावः। **सप्तमीप्रकृतित्वाभावादिति**। प्रातिपदिकमुद्दिश्यैव सुब्विभक्तेर्विधानात्। प्रत्ययविध्युद्देश्यस्यैव प्रकृतित्वादर्थवदधातुरित्यनेन प्रत्ययधातुभिन्नशक्तस्यैव प्रातिपदिकसंज्ञाविधानेन गभीरायां नदीत्यस्य किंचिदर्थाशक्तत्वेन सप्तमीप्रकृतित्वाभावादिति भावः। नचैवं नीलोत्पलं पाचक मित्यादौ पाचकनीलोत्पलसमुदायादेर्वाक्यतया किंचिदर्थशक्तत्वेन तेषां विभक्तिप्रकृतित्वं न स्यादिति वाच्यम्। कृत्तद्धितसमासाश्चेति सूत्रान्तरेण तेषामपि प्रातिपदिकत्वविधानेन कृत्तद्धितान्तसमासानां विभक्तिप्रकृतित्वसंभवात्। वस्तुतः प्रकृत्यर्थत्वं वृत्त्या प्रकृतिजन्यबोधविषयत्वमेव। तच्च प्रकृतिघटितसमु-दायजन्यबोधविषये गभीरनदीतीरेऽप्यक्षतम्। समुदायस्य प्रत्येकानतिरिक्ततया प्रकृतिघटितसमुदायज-न्यस्य प्रकृतिजन्यतानपायात्। प्रकृतिमात्रजन्यत्वनिवेशे प्रयोजनविरहात्। चैत्रस्य गामानयेत्यादौ चैत्र-संबन्धिगोः प्रत्ययार्थकर्मत्वेऽन्वयदर्शनेन तन्निवेशासंभवाच्च। वृत्तौ प्रकृतिनिरूपितत्वमपि न शक्यते विवक्षितुम्। वाक्यलक्षणाङ्गीकर्तुर्मते नीलोत्पलादिप्रकृतिनिरूपिताप्रसिद्धेरित्यापाततो रमणीयमेतल्लक्ष-णमिति प्रतिभाति। **समानविभक्तिकेति**। गभीरायां नद्यामिति समुदायस्य किंचिद्विभक्तेरप्यप्रकृति-त्वादिति भावः। अथ राजपुरुष इत्यादौ राजपदस्याविभक्तिकत्वेऽपि पुरुषपदान्यवहितपूर्वराजपदा-र्थस्य राजसंबन्धिनः पुरुषेऽभेदेनान्वयदर्शनात् प्रकृतेऽपि सप्तम्यन्तवाक्यस्य घोषपदान्यवहित-पूर्वतया तदर्थस्य गभीरनदीतीरवृत्तेर्घोषेऽभेदान्वये बाधकाभावादिदमसङ्गतम्। नचाऽव्यवहितपूर्ववृत्तिनः शक्तत्वरूपपदत्वमपि तादृशान्वयबोधे प्रयोजकम्। नीलघट(रूप)मित्यादौ नीलघटेत्यस्य वाक्यत्वेन पद-त्वाभावेऽपि तदर्थस्य नीलघटसंबन्धिनो रूपादावभेदेनान्वयदर्शनादिति चेन्न। घोषो गभीरायां नद्यामिति वाक्यादपि तादृशशाब्दबोधस्यानुभवसिद्धत्वेन तत्राप्यव्यवहितपूर्वत्वसमानविभक्तिकत्वयोरभावादभेदा-

कर्मणि लक्षणा, आरूढपदं च तात्पर्यग्राहकम्। एवमन्यत्राऽपि।

तत्पुरुषे तु पूर्वपदे लक्षणा। तथा हि राजपुरुषादिपदे राजपदार्थेन पुरुषादिपदार्थस्य साक्षान्नाऽन्वयः, निपातातिरिक्तनामार्थयोर्भेदेनाऽन्वयबोधस्याऽव्युत्पन्नत्वात्। अन्यथा राजा पुरुष इत्यत्राऽपि तथाऽन्वयबोधः स्यात्। घटः पटो नेत्यादौ घटपटाभ्यां नञः साक्षादेवाऽन्वयान्निपातातिरिक्तेति। नीलो घट इत्यादौ नामार्थयोरभेदसम्बन्धेनाऽन्वयाद्भेदेनेति। न च राजपु-

दिनकरी।

व्रजोऽस्तीत्यादावपि व्रजपदार्थस्य गोस्थानरूपस्यैकदेशे गवि चित्रान्वयप्रसङ्गात्। यद्यपि घटशून्यमित्यादावेकदेशान्वयो दृश्यते, तथाऽपि तादात्म्येन तथाऽन्वयो न स्वीक्रियत इति हृदयम्।

निपातातिरिक्तेति। निपातपदमव्ययस्योपलक्षकम्। तेन चन्द्र इवेत्यादाविवार्थसादृश्ये चन्द्रस्य प्रतियोगितयाऽन्वयोपपत्तिः। **अन्यथा**—अव्ययनिपातातिरिक्तनामार्थयोरपि भेदेनाऽन्वयबोधस्वीकारे। **तथान्वयबोध इति।** भेदेनाऽन्वयबोधः स्यादित्यर्थः। साक्षादेव—प्रत्ययार्थमद्वारीकृत्यैव। भूतले घट इत्यादावाधेयतासंसर्गेणाऽपि घटभूतलयोरन्वयात् साक्षादित्यस्याऽपि व्युत्पत्तौ निवेशादिति भावः। **नञः**—

रामरुद्री।

न्वयबोधानुपपत्तेर्वज्रलेपायमानत्वादिति विभावनीयम्।

घटशून्यमिति। शून्यपदस्याभाववदर्थकतया तदेकदेशेऽभाव एव घटत्वावच्छिन्नप्रतियोगिताकत्वसंबन्धेन घटपदार्थस्यान्वयस्वीकारादिति भावः। **तथान्वय इति।** तादृशान्वय इत्यर्थः। पदार्थैकदेशे पदार्थान्तरस्य तादात्म्येनैवान्वयो न स्वीक्रियते भेदसम्बन्धेन तु स्वीक्रियत एवेति भावः। व्रजपदार्थैकदेशे गवि चित्रपदार्थस्याभेदेनतान्वयाभावे बहुव्रीहौ गोपदार्थैकदेशगव्यपि चित्रपदार्थस्याभेदान्वयासम्भवाच्चित्रपदस्य तात्पर्यग्राहकत्वमेवाङ्गीकरणीयमिति भावः। **मूले आरूढवानर इति।** आरूढो वानरो यमिति विग्रहवाक्येन यत्कर्मकारोहणकर्ता वानर इति बोधात् बहुव्रीहिसमासे विग्रहवाक्याद्यादृशविशेषणविशेष्यभावापन्नार्थबोधो भवति समासवाक्यात्तद्विपरीतविशेषणविशेष्यभावापन्नार्थबोध इति नियमेन वानरकर्तृकारोहणकर्मवृक्ष इति बोधस्योपगन्तव्यतया वानरपदस्य वानरकर्तृके लक्षणां स्वीकृत्य आरूढपदस्यारोहकर्मणि लक्षणास्वीकारे पदद्वये लक्षणापत्तिः, बहुव्रीहावुत्तरपद एव समासप्रयुक्तलक्षणेति नियमस्योत्तरपदार्थप्राधान्यनियमस्य च भङ्गापत्तिः स्यादिति वानरपदस्यैव वानरारोहकर्मणि लक्षणा आरूढपदं तात्पर्यग्राहकमेवेति भावः।

ननु निपातमात्रार्थस्य नामार्थान्तरेण भेदान्वयस्वीकारे चन्द्र इव मुखमित्यादौ इवार्थे सादृश्ये चन्द्रस्य निरूपितत्वसंबन्धेनान्वयो न स्यात्। "चादयोऽद्रव्ये निपाता" इत्यनुशासने द्रव्यभिन्नार्थकानां चादीनामेव निपातसंज्ञाविधानात् इवशब्दस्य चादिगणमध्ये पाठाभावादित्याशङ्कां निराकुरुते—**निपातपदमिति।** तथाचात्र निपातपदमव्ययार्थकमेवेति निपातानामव्ययत्वादेव लाभसंभवादिति भावः। **प्रत्ययार्थमद्वारीकृत्यैवेति।** विभक्त्यर्थभिन्नसबन्धेनैवेत्यर्थः। ननु मूले निपातातिरिक्तेत्यस्य भेदेनेत्यस्य च प्रयोजनमुक्तं न तु साक्षादित्यस्येति नियमे साक्षात्पदमनर्थकमित्याशङ्कां निराकुरुते—**भूतल इत्यादि। आधेयतासंसर्गेणापीति।** अपिना स्वरूपसंबन्धेन घटे भूतलवृत्तित्वान्वयस्य समुच्चयः। **अन्वयादिति।** यद्यपि घटे भूतलवृत्तित्वप्रकारकबोधस्वीकारेणैवोपपत्तौ आधेयतया भूतलस्यापि घटे प्रकारत्वोपगमोऽनुचितः पदार्थस्य संसर्गविधया भानानङ्गीकारात्। तथापि भूतले घट इति वाक्यजन्यज्ञानानन्तरं घटो भूतलीयो न वेति संशयानुत्पादस्याप्यनुभवसिद्धतया आधेयतया भूतलाभाववान् घटः

रुष इत्यादौ लुप्तविभक्तेः स्मरणं कल्प्यमिति वाच्यम्। अस्मृतविभक्तेरपि ततो बोधोदयात्। तस्मात् राजपदादौ राजसम्बन्धिनि लक्षणा। तस्य च पुरुषेण सहाऽभेदान्वयः।

दिनकरी।

नञर्थान्योन्याभावस्य। **स्मरणं कल्प्यमिति**। तथाचाऽत्रापि प्रत्ययार्थद्वारैव राजपुरुषयोरन्वयान्नोक्तव्युत्पत्तिविरोध इति भावः।

परे तु राजपुरुष इत्यादितत्पुरुषे न लक्षणा। व्युत्पत्तिवैचित्र्येण स्वत्वादिसंसर्गेणैव राज्ञः पुरुषादावन्वयबोधस्वीकारात्। अन्यथा—

"दशैते राजमातङ्गास्तस्यैवाऽमी तुरङ्गमाः—"

इत्यादौ तच्छब्देन राज्ञः परामर्शो न स्यात्, तस्यैकदेशत्वादित्याहुः।

रामरुद्री।

प्रमेय इति विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षं प्रति तादृशशाब्दसाम्ग्र्याः प्रतिबन्धकत्वाकल्पनाप्रयुक्तलाघवेन विभक्त्यर्थस्य संसर्गविधयाऽपि भानमादृतम्। तादृशवाक्यजन्यबोधस्य घटो भूतलीय इत्याकारकत्वे घटे आधेयतया भूतलाभावज्ञानमपि बाधज्ञानमेवेति तदभावावगाहिघटितशाब्दबोधसामग्रीसत्त्वे विशेष्यतावच्छेदकप्रकारकनिर्णयघटितोक्तप्रत्यक्षसामग्र्येव न तिष्ठतीत्येतादृशप्रत्यक्षे तादृशशाब्दसामग्र्याः प्रतिबन्धकत्वं न कल्पनीयमिति लाघवमिति भावः। घटः पटो नेत्यत्रास्त्यन्ताभावो नञा न बोधयितुं शक्यते नञोऽस्त्यन्ताभावबोधेऽनुयोगिवाचकपदोत्तरं सप्तम्यपेक्षणादतो नञर्थोऽन्योन्याभाव एवेत्याह— **नञर्थेति। प्रत्ययार्थद्वारैवेति**। षष्ठीस्मारितस्वत्वसंबन्धेनैवेत्यर्थः। अथवा स्वत्वे राजपदार्थान्वयः। स्वत्वस्यैव पुरुषेऽन्वयो नतु राजपुरुषयोरित्यर्थः। उभयत्रापि षष्ठीविषयकस्मरणकल्पनमावश्यकमिति भावः॥ **मूले अस्मृतविभक्तेरपीति**। यद्यपि तत्पुरुषे पूर्वपदस्य स्वार्थविशेषितविग्रहवाक्यस्थविभक्त्यर्थविशिष्टे निरूढलक्षणोपगमेन तत्तद्विभक्त्यस्मरणे पूर्वपदस्य तत्तदर्थे निरूढलक्षणानिर्णय एव न संभवतीति लक्षणारूपवृत्तिज्ञानाभावादेव पदजन्यपदार्थस्मरणाभावेन शाब्दबोधो न संभवत्येवेत्यस्मृतविभक्तेः शाब्दबोधोपपादनं दुर्वचम्। तथापि विभक्तिस्मरणं विना निरूढलक्षणार्थस्यानिर्णयेऽपि सामान्यतो लक्षणाज्ञानं तदधीनपदार्थस्मरणं च संभवत्येव। निरूढलक्षणाज्ञानादेव पदार्थस्मरणमिति न नियमः। तथा सति गङ्गायां घोष इत्यादौ गङ्गापदात्तीरस्मरणानुपपत्तेः। एवं च तत्तत्स्थलेषु नाना विभक्तिस्मरणकल्पनमपेक्ष्य लक्षणया राजपदाद्राजसंबन्ध्युपस्थितिं कल्पयित्वाऽभेदशाब्दबोधोपगम एवोचितो लाघवात्। राजपुरुष इति कर्मधारये स्वन्वयानुपपत्त्यादिलक्षणाबीजाभावेन राजाभिन्नः पुरुष इति शक्यार्थाऽभेदबोध एव स्वीक्रियत इति भावः।

मतान्तरमाह—**परे त्विति। व्युत्पत्तिवैचित्र्येणेति**। पुरुषविशेष्यकस्वत्वसंसर्गकराजप्रकारकशाब्दबोधं प्रति राजपदान्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वीज्ञानस्य कारणत्वादित्यर्थः। तथाचात एव राजा पुरुष इत्यादौ तादृशान्वयबोधवारणसंभवेन नोक्तापत्तेरवकाश इति भावः। **परामर्शो न स्यादिति**। तत्पदेन पूर्ववाक्यस्थपदार्थस्यैव परामर्शो न तु तादृशपदार्थतावच्छेदकस्यापीति नियमः। अन्यथाऽत्र शुक्लो घटोऽस्ति स न द्रव्यमिति स्वारसिकप्रयोगापत्तेः। तथाच राजपदस्य राजसंबन्ध्यर्थकत्वे तत्पदेन राज्ञः परामर्शो न स्यादिति भावः। आदुरित्यस्वरसोद्भावनम्। तद्बीजं तु एवं सति राज्ञः पुरुष इत्यादावपि स्वत्वसंसर्गकबोधस्वीकार एवोचितः। अतिप्रसक्तस्य षष्ठ्यन्तराजपदसमभिव्याहारज्ञानस्य तादृशशाब्दबोधनियामकत्वोपगमेनैव वारणसंभवात्। न चैवं व्याससमासवाक्यज्ञानयोः परस्परजन्यशाब्दबोधे व्यभिचारेण कारणतैवानुपपन्नेति वाच्यम्। तादृशानुपूर्वीज्ञानान्यवहितोत्तरत्वस्यापि कार्यतावच्छेदककोटौ निवेशनीयतया व्यभिचाराप्रसक्तेः। अन्यथा स्वन्मतेऽपि राजस्वत्वं पुरुष इत्यतस्तादृशशाब्दबोधवारणाय षष्ठ्यन्तराजपदसमभिव्याहारज्ञानस्य राजस्वत्वप्रकारकशाब्दबोधहेतुतायाः कल्पनीय-

द्वन्द्वे तु धवखदिरौ छिन्धीत्यादौ धवः खदिरश्च विभक्त्यर्थद्वित्वप्रका-

दिनकरी ।

द्वन्द्वे तु–इतरेतरद्वन्द्वे तु । 'धवखदिरौ' इत्यत्र धवत्वं खदिरत्वं च प्रत्येकं नोद्देश्यतावच्छेदकम् । सुपामुद्देश्यतावच्छेदकव्याप्यसङ्ख्याबोधकत्वस्याऽऽकाशावित्यादिवाक्ये प्रामाण्यापत्तिभिया कल्पितत्वेन धवद्वयस्य खदिरद्वयस्य वा बोधापत्तेः । परन्तु, खदिरपदस्य धवखदिरसाहित्याश्रये लक्षणोपगम्यते । एवञ्चोद्देश्यतावच्छेदकीभूतताद्दशसाहित्यव्याप्यत्वं न धवद्वयवृत्तिद्वित्वस्य, न वा खदिरद्वयवृत्तिद्वित्वस्य, अपि तु धवखदिरोभयवृत्तिद्वित्वस्येति न धवद्वयादेर्बोध इति मीमांसकमतं

रामरुद्री ।

तया पर्यायपदान्तरघटितवाक्यादपि तादृशशाब्दबोधोत्पत्त्या व्यभिचारस्य दुर्वारत्वात् । यदिच पुरुषो न राज इत्यादौ आश्रयतया स्वत्वाद्यभाव एव नञा बोधनीयः वृत्त्यनियामकसंबन्धस्याभावप्रतियोगितानवच्छेदकतया स्वत्वादिसंबन्धेन राजाद्यभावस्य नञा बोधयितुमशक्यत्वादिति स्वत्वादेर्विभक्त्यर्थत्वमावश्यकमित्युच्यते । तदा वृत्त्यनियामकसंबन्धस्याभावप्रतियोगितावच्छेदकत्वे को दोष इति वक्तव्यम् । अभावान्तरकल्पने गौरवमिति चेत् । समनियताभावानामैक्येन तादृशाभावस्य राजस्वत्वाभावरूपत्वाभ्युपगमेनाभावान्तराकल्पनात् । न च स्वत्वादिसंबन्धावच्छिन्नप्रतियोगिताकल्पने गौरवमिति वाच्यम् । स्वत्वादिषु विभक्तीनां शक्तिकल्पनं विभक्तिजन्यस्वत्वाद्युपस्थितीनां शाब्दबोधहेतुताकल्पनं तादृशोपस्थितीनां भिन्नविषयकप्रत्यक्षादिप्रतिबन्धकतावच्छेदककोटौ प्रवेशं चापेक्ष्य तादृशप्रतियोगितान्यक्तिकल्पनस्यैव लघुत्वादिति । इदं पुनरिहानुसंधेयम् । उक्तक्रमेण विभक्तेः संख्याभिन्नार्थकतैव न स्यादिति । किंच राजसंबन्धिनि राजपदस्य स्वारसिकलक्षणाग्रहदशायां तादृशलाक्षणिकराजपदघटितराजपुरुष इति कर्मधारयाद्राजसंबन्ध्यभिन्नः पुरुष इत्यादिबोधस्य सर्वानुमततया तादृशानुपूर्वीज्ञानस्य द्विविधशाब्दबोधहेतुताकल्पने गौरवम् । अपिच राजसंबन्ध्य (न्धि) भिन्नः पुरुषः प्रमेय इत्यादिविशिवैशिष्ट्यावगाहिप्रत्यक्षं प्रति तादृशानुपूर्वीज्ञानघटितशाब्दसामग्र्याः प्रतिबन्धकत्वकल्पने गौरवम् । मन्मते च बाधाभावादिघटितशाब्दसामग्रीकाले विशेष्यतावच्छेदकप्रकारकनिर्णयघटितप्रत्यक्षसामग्र्या एवासत्त्वेन प्रत्यक्षापत्त्ययोगात्तदकल्पनात् । नच त्वयापि स्वत्वसंबन्धेन राजाभाववान् पुरुषः प्रमेय इति तादृशप्रत्यक्षं प्रति पृथक् तादृशशाब्दसामग्र्याः प्रतिबन्धकत्वं कल्पनीयमिति साम्यमिति वाच्यम् । राजकीयाभिन्नसंबन्धः प्रमेय इति प्रत्यक्षं प्रत्यपि स्वत्वस्य संसर्गतावादिना तादृशशाब्दसामग्र्याः प्रतिबन्धकत्वस्य कल्पनीयतया पूर्वोक्तप्रतिबन्धकत्वकल्पनस्य तन्मतेऽधिकत्वादित्यलं विस्तरेण ॥ मूले द्वन्द्वे न लक्षणेत्युक्तं तन्न संगच्छते । अहिनकुलमित्यादौ समाहारद्वन्द्वे उत्तरपदस्याहिनकुलसमुदाये लक्षणायाः स्वतः सिद्धत्वादतो द्वन्द्वपदमितरेतरद्वन्द्वपरमित्याह—**इतरेतरेति** । मूले विभक्त्यर्थद्वित्वप्रकारेणेत्यत्र विभक्त्यर्थः कर्मत्वं तस्मिन् प्रकारतया धवखदिरौ बुध्येते इत्यर्थो बोध्यः । **सुपामिति** । आकाशावितिवाक्यस्य प्रामाण्याभ्युपगमे नैतन्निर्वाहः । विभक्त्यर्थद्वित्वादेरुद्देश्यतावच्छेदकव्याप्तिविशिष्टसङ्ख्याया स्वात्मकपर्याप्त्याख्यस्वरूपसंबन्धेनैव स्वप्रकृत्यर्थेऽन्वयो नियत इत्युपेयम् । अन्यथा घटाकाशगतद्वित्वस्य केवलपर्याप्त्याख्यसंबन्धेन समवायेन चाकाशेऽपि सत्त्वेन तादृशप्रयोगस्य प्रामाण्यापत्तेः । तथाचाकाशत्वव्याप्यद्वित्वाप्रसिद्ध्याऽऽकाशस्य तादृशपर्याप्तिसंबन्धेन न तद्वत्त्वमिति नोक्तवाक्यस्य प्रामाण्यापत्तिः । एवं च तादृशपर्याप्तिसंबन्धेन तद्वत्त्वं द्वित्वस्योद्देश्यतावच्छेदकव्याप्यत्व एव पर्यवसितं भवतीत्युद्देश्यतावच्छेदकव्याप्यद्वित्वादिसंख्याप्रमाजनकत्वंविभक्तीनामित्यर्थः । प्रमोपादानादाकाशावित्यादिवाक्यायोग्यताभ्रमे घटाकाशगतद्वित्वस्याकाङ्क्षे प्रकारतावगाहिशाब्दबोधोत्पत्तावपि न क्षतिः । नचोक्तस्थले तादृशपर्याप्तेरप्रसिद्धतया कथं तदवगाहिभ्रमः संभवतीति वाच्यम् । एकत्वादिपर्याप्तेराकाशत्वव्याप्यतया तेन व्यधिकरणसंबन्धेन घटाकाशगतद्वित्वस्य भ्रमे प्रकारत्वोपगमात् । एतेनोद्देश्यतावच्छेदकव्याप्यद्वित्वस्यैव द्विवचनशक्यत्वे आकाशावित्यादिवाक्यात् भ्रमात्मकोऽपि शा-

रेण बुद्ध्येते, तत्र न लक्षणा । न च साहित्ये लक्षणेति वाच्यम् । साहित्यशून्ययोरपि द्वन्द्वदर्शनात् । न चैकक्रियान्वयित्वरूपं साहित्यमस्तीति वाच्यम् । क्रियाभेदेऽपि धवखदिरौ पश्य छिन्धीत्यादिदर्शनात्, साहित्यस्याऽननुभवाच्च । अत एव "राजपुरोहितौ सायुज्यकामौ यजेयाताम्"—इत्यत्र लक्षणाभावात् द्वन्द्व आश्रीयते । तस्मात् साहित्यादिकं नाऽर्थः, किन्तु

दिनकरी ।

शङ्कते । न च साहित्ये इति । साहित्याश्रये इत्यर्थः । सहवृत्तित्वं साहित्यं लक्ष्यमुतैकक्रियान्वयित्वमिति विकल्प्याऽऽद्यं दूषयति। **साहित्यशून्ययोरपीति।** द्वितीयं शङ्कते । **न चैकेति । अननुभवादिति ।** वस्तुगत्यैकक्रियान्वयित्वस्य धवखदिरयोः सत्त्वेऽप्येकक्रियान्वयित्वस्य शाब्दबोधाभावादित्यर्थः । इदमुपलक्षणम् । चैत्रमैत्रौ गच्छत इत्यादौ चैत्रादिपदस्य यदि साहित्यविशिष्टे लक्षणा, तदा साहित्यस्य व्यासज्यवृत्तितया तदवच्छेदेनाऽन्वयासम्भव इत्यपि बोध्यम् । ननु यदि द्वन्द्वे न लक्षणा तदा कर्मधारयात् द्वन्द्वस्य को विशेष इत्यत आह । **किन्त्विति । 'चार्थे द्वन्द्वः'** (२।२।२९)-इत्यनुशासनम् । तत्र चार्थाश्चत्वारः । समुच्चयान्वाचयेतरेतरयोगसमाहार-

रामरुद्री ।

ब्दबोधो न स्यादाकाशत्वव्याप्यद्वित्वाप्रसिद्ध्या विभक्तेस्तदबोधकत्वादिति प्रयुक्तम् । उक्तरीत्या भ्रमस्योपपादितत्वात् । द्वित्वमात्रे विभक्तेः शक्तिभ्रमेण तादृशशाब्दबोधोपपादनमसत् । तथासति तादृशवाक्यजन्यशाब्दबोधस्य भ्रमत्वानुपपत्तेः । घटाकाशगतद्वित्वस्याकाशे पर्याप्त्यादिसंबन्धेनाबाधितत्वादिति बोध्यम् । अत्र चैत्रो मैत्रश्च गच्छत इत्यादावाख्यातेनोद्देश्यतावच्छेदकचैत्रत्वाद्यव्याप्यद्वित्वादेरपि बोधनाद्विभक्तीनामित्युपेक्ष्य सुपामित्युक्तमित्यवधेयम् । नच सिद्धान्ते घटपटावित्यादौ केवलपर्याप्तिसंबन्धेनैव द्वित्वान्वयात् सुपामित्यत्रैकधर्मावच्छेदेनोद्देश्यतावच्छेदकस्थल इत्यस्य पूरणीयतयोक्तस्थले धर्मद्वयस्योद्देश्यतावच्छेदकतयेदमसङ्गतमिति वाच्यम् । सिद्धान्ते तथात्वेऽपि मीमांसकमते साहित्यस्यैवोद्देश्यतावच्छेदकतया पूरणस्यानावश्यकत्वात् । घटपटौ तिष्ठत इत्यादौ तु तिङो न संख्याबोधकता सुप एव सङ्ख्याबोधकत्वादिति मन्तव्यम् । **सहवृत्तित्वमिति ।** एकदेशवृत्तित्वमित्यर्थः । **लक्ष्यं** लक्ष्यतावच्छेदक । **एकक्रियान्वयित्वम्** एकशक्त्युपस्थाप्यार्थान्वयित्वम् । **मूले साहित्यशून्ययोरिति ।** गोत्वाश्वत्वाद्योरित्यर्थः । गोत्वाश्वत्वे पश्येत्यादौ दर्शनरूपक्रियान्वयित्वस्य सत्त्वान्न द्वन्द्वानुपपत्तिः अतो द्वितीये दूषणान्तरमाह—**पश्य छिन्धीति ।** यथाक्रमं धवे दर्शनस्य खदिरे छेदनस्य तात्पर्येणापि । **दर्शनात्** द्वन्द्वदर्शनादित्यर्थः । साहित्यस्याननुभवादिति दूषणमपि द्वितीयकल्पाभिप्रायेणैवेत्याशयेनव्याचष्टे—**वस्तुगत्येति । शाब्दबोधाभावादिति ।** एकक्रियान्वयित्वं हि एकक्रियाविषयतानिरूपितसंसर्गतानिरूपितशाब्दबोधीयविषयत्वमेव । तच्च न शाब्दबोधविषयः । स्वस्मिन्स्वविषयकत्वस्यानुभवादिति भावः । वस्तुतस्त्ववृत्तीनामपि कलिकसंबन्धेन वृत्तितामते एकमहाकालवृत्तित्वमक्षतमेवेति न कापि द्वन्द्वानुपपत्तिरित्याशङ्कायामेव साहित्यस्येत्यादिदूषणमभिहितम् । एककालवृत्तित्वादेः शाब्दबोधविषयत्वाननुभवाच्चेति तदर्थ इति युक्तमुत्पश्यामः **व्यासज्यवृत्तितयेति ।** यद्यप्येकदेशवृत्तित्वमेकक्रियान्वयित्वं च न व्यासज्यवृत्ति तथापि पक्षद्वये दूषणाभिधानादपेक्षाबुद्धिविषयत्वमेव साहित्यं वाच्यम् । तच्च व्यासज्यवृत्त्येवेति भावः । एतच्चापाततः । द्वौ गच्छत इत्यादौ व्यासज्यवृत्तिद्वित्वाद्यवच्छेदेनापि गमनकर्तृत्वान्वयस्य सर्वसंमतत्वादिति विभावनीयम् । **कर्मधारयादिति ।** कर्मधारये पदद्वये लक्षणाविरहेण लक्षणाविरहितसमासत्वस्य द्वन्द्वकर्मधारयोभयसाधारणत्वादिति भावः । **समुच्चयेति ।** घटं पटं चानये-

वास्तवो भेदो यत्र तत्र द्वन्द्वः । न च नीलघटयोरभेद इत्यादौ कथमिति वाच्यम् । तत्र नीलपदस्य नीलत्वे, घटपदस्य घटत्वे लक्षणा, अभेद इत्यस्य चाऽऽश्रयाभेद इत्यर्थात् ।

दिनकरी ।

भेदात् । तत्र समुच्चयान्वाचययोः सामर्थ्याभावान्न समासः । इतरेतरसमाहारयोः सामर्थ्यसत्त्वात्तत्र समासः । तत्र चार्थस्य भेदव्याप्यत्वाद्भेदे द्वन्द्व इत्याशयः । 'इत्यादौ' इत्यादिपदेन 'प्रमाणप्रमेय–( ) इत्यादिसूत्रपरिग्रहः । **कथमिति** । यदि समासघटकपदार्थयोर्यत्र भेदस्तत्रैव द्वन्द्वस्तदा नीलघटयोर्भेदाभावात् कथं द्वन्द्वः ? एवं 'प्रमाणप्रमेय–' इत्यादिसूत्रे 'आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्–(२)'इतिसूत्रोपात्तद्वादशविधप्रमेयान्तर्गतमनोबुद्धीन्द्रियाणां प्रमाणत्वेन प्रमाणप्रमेययोर्भेदाभावात् कथं द्वन्द्व इत्यर्थः । **लक्षणेति** । तथा च तयोर्भेदसत्त्वाद्द्वन्द्व इति भावः । नन्वभेद इत्यसङ्गतं नीलत्वघटत्वयोरभेदाभावादत आह । **अभेद इत्यस्येति** । केचित्तु पदार्थत्वं पदजन्यप्रतीतिविषयत्वम् । तथा च क्वचित् पदार्थभेदात् , क्वचित् पदार्थतावच्छेदकभेदाद्द्वन्द्वः । प्रकृते च नीलत्वघटत्वयोः पदार्थतावच्छेदकयोर्भेदाद्द्वन्द्वः । अस्तु वा पदार्थतावच्छेदकभेद एव द्वन्द्वः । न चैवं घटा इत्यादौ द्वन्द्वस्याऽप्रसक्तत्वेन तदपवादकः सरूपैकशेषो न स्यादिति वाच्यम् । इष्टपत्तेः । तत्र घटपदोपस्थापितेषु बहुत्वान्वयादेव बहुघ-

रामरुद्रो ।

त्यत्र चार्थः समुच्चयः । तत्र घटपटयोः समासनिष्ठानयनक्रियान्वयित्वेन सापेक्षत्वान्न समासः । एवं भिक्षामट गां चानयेत्यत्र चार्थोऽन्वाचयः । अत्रापि भिक्षागवोः समासनिष्ठक्रियामापेक्षत्वादेवासामर्थ्यादेव न समासः । किंतु रामश्च लक्ष्मणश्च रामलक्ष्मणौ अहिश्च नकुलश्चाहिनकुलमितीतरेतरसमाहारयोरेव यत्र चार्थत्वं तत्रैव समास इति भावः । परंतु यत्र पदार्थयोर्भेदस्तत्रैव चकारः प्रयुज्यत इति समुच्चयान्वाचयेतरेतरसमाहारेषु चार्थो भेद एव । तस्मिन् भेदे समस्यमानपदार्थयोर्वस्तुतो वर्तमाने सति द्वन्द्वसमासो भवतीति चार्थे द्वन्द्व इति सूत्रार्थः । **प्रमाणप्रमेयेत्यादीति** । प्रमाणस्य प्रमेयाभिन्नत्वेन तत्र द्वन्द्वो न स्यादिति भावः । तथाच नीलघटयोरित्यत्र नीलत्वघटत्वयोर्यथा नीलघटपदयोर्लक्षणा तथा प्रमाणप्रमेयेत्यादिसूत्रेऽपि प्रमाणत्वादौ प्रमाणादिपदस्य लक्षणा, अभेदपदस्याश्रयाऽभेद इव पदार्थपदस्यापि पदार्थतावच्छेदके लक्षणेत्यभिप्रायः । **पदजन्येति** । विशेषणविशेष्यविधया पदार्थतावच्छेदकस्य पदार्थस्य च पदजन्यप्रतीतेर्विषयत्वेन पदार्थतावच्छेदकयोः पदार्थयोर्वा भेदेद्वन्द्वः साधुः । नीलघटयोरित्यादौ पदार्थतावच्छेदकभेदादेव द्वन्द्वस्य साधुता । नचैवं पदार्थयोर्भेदः कथं द्वन्द्वस्य साधुतानियामक इति वाच्यम् । घटश्च घटश्च घटावित्यत्र द्वन्द्वोपपत्तये पदार्थभेदस्य द्वन्द्वसाधुतानियामकत्वोपगमात् । न च तत्र सरूपाणामेकशेष इति सूत्रेण पदान्तरस्य लोपविधानात् द्वन्द्व एव नास्तीति कृतं पदार्थभेदस्य द्वन्द्वसाधुतानियामकत्वोपगमेनेति वाच्यम् । सरूपैकशेषस्य द्वन्द्वसमासापवादकत्वेन द्वन्द्वस्य साधुतास्थल एव सरूपैकशेषविधेः प्रवर्तनीयतया तत्रच पदार्थतावच्छेदकघटत्वस्य भेदाभावेन पदार्थयोर्घट्यक्त्योर्भेदादेव द्वन्द्वस्य साधुतामुपपाद्य तदपवादकसरूपैकशेषविधेः प्रवर्तनीयत्वादिति भावः । नचैवं नीलघट इति कर्मधारयस्थलेऽपि पदार्थतावच्छेदकभेदसत्त्वेन द्वन्द्वप्रवृत्त्या कर्मधारयोच्छेदापत्तिरिति वाच्यम् । समस्यमानपदार्थयोरभेदविवक्षायामेव कर्मधारयविधानाद्विशेषेण सामान्यबाधादभेदवि-

---

(१) न्यायसूत्रम् । अ० १ आ० १ सू० १

(२) न्यायसूत्रम् । अ० १ आ० १ सू० ९

समाहारद्वन्द्वे तु यदि समाहारोऽप्यनुभूयत इत्युच्यते, तदाऽहिनकुलमित्यादौ परपदेऽहिनकुलसमाहारे लक्षणा, पूर्वपदं तात्पर्यग्राहकम्। न च भेरीमृदङ्गं वादयेत्यत्र कथं समाहारस्याऽन्वयः? अपेक्षाबुद्धिविशेषरूपस्य तस्य वादनासम्भवादिति वाच्यम्। परम्परासम्बन्धेन तदन्वयात्। एवं पञ्चमूलीत्यादावपि।

परे त्वहिनकुलमित्यादावहिर्नकुलश्च बुद्ध्यते। प्रत्येकमेकत्वान्वयः।

दिनकरी।

टबोधस-भवात्। 'सकृदुच्चरितः-'। इत्यादिव्युत्पत्तौ मानाभावात्। सरूपैकशेषविधेः 'हरी' इत्यादौ सार्थकत्वात्। अस्तु वा 'सकृत्-'इत्यादिव्युत्पत्तिः। परन्तु 'सकृत्'इति 'अर्थ' पदार्थैकदेशे वृत्तौ विशेषणम्। वस्तुतो बोधविशेषणमेव तदिति न दोष इत्याहुः।

समाहार इति अहिनकुलमित्यादौ अहिनकुलयोः समाहार इति प्रतीतेरित्यर्थः (१)। वस्तुतस्तत्राऽहिनकुलमात्रप्रतीतेर्नोत्तरपदे समाहारलक्षणा, न वा शक्तिरित्यभिप्रेत्योक्तं—यदीति। **पूर्वपदमिति**। प्रत्ययानामिति व्युत्पत्तेर्विनिगमकत्वादिति भावः। **कथमिति**। कथं समाहारबोध इत्यर्थः। तत्र हेतुमाह। **वादनासम्भवादिति**। अभिघाताख्यसंयोगावच्छिन्नक्रियाया एव वादनपदार्थतया धात्वर्थतावच्छेदकीभूतताद्दशाभिघाताख्यसंयोगस्य समाहारेऽसम्भवेन वादनकर्मत्वासम्भवादित्यर्थः। **परम्परासम्बन्धेन**—स्वाश्रयवृत्तित्वरूपेण। **तदन्वयात्**—वादनकर्मत्वान्वयात्। **एवमिति** उत्तरपदे समाहारलक्षणेत्यर्थः।

नव्यमतमाह। **परे त्विति**। 'बुद्ध्यते' इत्यस्य न तु समाहारोऽपीति शेषः। ननु यदि समाहारो न बुद्ध्यते, तदैकत्वस्य कुत्राऽन्वयः? समाहियमाणयोरेकत्वाभावादत आह। **प्रत्येकमिति**। तत्रैकवचनं साधुत्वार्थमित्यपि वदन्ति। ननु पाणिपादमित्यादिसमुदायस्य

रामरुद्री

वक्तृभाव एव द्वन्द्वसमासविधेरभ्युपगमादिति ध्येयम्। **सकृदुच्चरित इति**। एकवारोच्चरितपदादेकस्यैवार्थस्य बोधेन घटपदादेकदा नानाघटबोधासंभवादित्याशङ्क्यायमुक्तम्। नचैवं सरूपाणामिति सूत्रवैयर्थ्यम्। एवं घटपदेनैव नानाघटोपस्थितिसंभवेन पदान्तरं कल्पयित्वा तल्लोपविधानस्यानुचितत्वादित्याशङ्क्यायाह—**एकशेषविधेरिति**। हरिपदे सूर्यत्वसिंहत्वादिपदार्थतावच्छेदकानां भेदेन द्वन्द्वप्रसक्त्या तत्रैव तदुपबादकसरूपैकशेषविधेः सार्थकत्वादिति भावः। ननु सकृदुच्चरित इति व्युत्पत्त्यनभ्युपगमे सैन्धवादिपदादेकदैव लवणाश्वयोर्बोधापत्तिः। नच तात्पर्यज्ञानस्य नियामकत्वान्नानुपपत्तिरिति वाच्यम्। तात्पर्यसत्त्वेऽप्येकदा लवणाश्वयोर्बोधाननुभवादित्यत आह—**अस्तु वेति**। **पदार्थैकदेश इति**। सकृदर्थमित्यत्राथशब्दार्थो वृत्त्या पदबोध्यः। तदेकदेशवृत्तौ सकृदित्यर्थस्यैकत्वस्यान्वयः। तथाच सकृदुच्चरितः शब्द एकया वृत्त्या स्वबोध्यमर्थं बोधयतीति व्युत्पत्त्यर्थकतया घटत्वावच्छिन्नैकशक्तेर्नानाघटबोधोपपत्तिरिति भावः। ननु हरयस्तिष्ठन्तीत्यादौ तात्पर्यसत्त्वे सिंहसूर्यादीनामपि बोधोऽनुभवसिद्ध इति नानावृत्त्यापि नानार्थानामेकदा नानार्थबोधकत्वमङ्गीकरणीयमित्याशयेनाह—**वस्तुत इति** तथाचैकपदशानादेक एव शाब्दबोधो नतु क्रमिकशाब्दबोधद्वयमित्येवोक्तव्युत्पत्तेः पर्यवसितार्थ इति भावः। घटा इत्यादेरप्येकशेषोदाहरणत्वेन व्याकरणप्रतिपादितत्वादाहुरित्युक्तम्। **समाहारबोध इति**। द्वितीयार्थकर्मत्वविशेष्यकसमाहारप्रकारकशाब्दबोध इत्यर्थः।

मूले वादनासंभवादिति। शब्दजनकसंयोगानुकूलो व्यापारो वादनपदार्थः। धात्वर्थतावच्छेद-

(१) 'इति प्रतीतेरनुभवसिद्धत्वादित्यथः' इति पाठः।

समाहारसञ्ज्ञा च यत्रैकत्वं नपुंसकत्वं च 'प्राणितूर्य्य-(२।४।२)' इत्यादिसूत्रेणोक्तं तत्रैव, अन्यत्रैकवचनमसाधिवति वदन्ति ।

पितरौ श्वशुरावित्यादौ पितृपदे जनकदम्पत्योः, श्वशुरपदे स्त्रीजनकदम्पत्योर्लक्षणा । एवमन्यत्रापि । घटा इत्यादौ तु न लक्षणा । घटत्वेन रूपेण नानाघटोपस्थितिसम्भवात् ।

कर्मधारयस्थले तु नीलोत्पलमित्यादावभेदसम्बन्धेन नीलपदार्थे उत्पलपदार्थं प्रकारः । तत्र च न लक्षणा । अत एव "निषादस्थपति याजयेत्"

दिनकरी ।

समाहारबोधकत्वाभावे कथं तस्य समाहारसञ्ज्ञेत्यत आह । **समाहारसञ्ज्ञेति । तत्रैवेति ।** तथा च पारिभाषिकयेव सा, अन्वर्थत्वेऽन्यत्राऽतिप्रसङ्गादिति भावः । ननु तादृशसञ्ज्ञायाः किं प्रयोजनमत आह । **अन्यत्रेति ।** समाहारातिरिक्तद्वन्द्वे इत्यर्थः । तथा च नित्यैकवचनक्लीबलिङ्गत्वादिपदसंस्कारार्थत्वात्र तस्या वैयर्थ्यमिति भावः ।

पितरौ श्वशुरावित्यादाविति । चैत्रस्य पितरावित्यादौ विरूपैकशेषस्थले इत्यर्थः। **लक्षणेति ।** एकस्य चैत्रादेः पितृद्वयासम्भवेन तत्र विरूपैकशेषं विना गत्यभावादिति-भावः । विरूपैकशेषत्वेऽपि तत्र लुप्तमात्रादिशब्दस्मरणेनैव शाब्दबोधात्र लक्षणेत्यन्ये । **एवमन्यत्राऽपीति ।** 'पुमान् स्त्रिया-' (१।२।६७) इत्यनेन यत्रैकशेषस्तत्र, दम्पतीपूजाप्रकरणे ब्राह्मणावानयेत्यादौ, शिवौ नमस्कुर्यादित्यादौ, भ्रातरौ पुत्रावित्यत्राऽपि प्रमाणान्तरेण स्त्रीपरत्वज्ञाने 'भ्रातृपुत्रौ स्वसृदुहितृभ्यां-' (१।२।६) इति विरूपैकशेषात् भ्रातृपदे भ्रातृस्वस्रोः पुत्रपदे च पुत्रदुहित्रोर्लक्षणेत्यर्थः । **न लक्षणेति ।** बहुत्वान्वययोग्यानेकोपस्थितेः शक्तित एव सम्भवादिति भावः ।

रामरुद्री ।

संयोगे द्वितीयार्थविशेषत्वान्वयो वाच्यः । संयोगे बुद्धिवृत्तित्वस्य बाधादिति भावः । **अन्वर्थत्व इति ।** समाहारसंज्ञायाः समाहारबोधकत्वप्रयुक्तत्व इत्यर्थः । **अन्यत्रेति ।** असमुदायपदेष्वित्यर्थः । **अतिप्रसङ्गात्** समाहारसंज्ञातिप्रसङ्गात् । **पदसंस्कारार्थत्वादिति ।** पदस्य अहिनकुलादिपदस्य **संस्कारो** विलक्षणधर्मः स च नपुंसकत्वनित्यैकवचनान्तत्वरूपः । **तदर्थत्वात्** तत्प्रयोजकत्वात् । समाहारद्वन्द्व एव तथोपगमादिति भावः ।

विरूपैकशेषेति । 'सरूपाणामेकशेष' इति सूत्रेण समानानुपूर्वीकपदानामेकशेषविधानाद्विभिन्नानुपूर्वीकपदस्थले 'पिता मात्रा' 'श्वशुरः श्वश्वा' 'भ्रातृपुत्रौ स्वसृदुहितृभ्या' मित्यादिना मातृश्वश्वादिशब्दानां लोपो विधीयते तत्रावशिष्टस्य पितृपदस्यैव जनकदम्पत्योर्लक्षणा समभिव्याहृतपदसत्त्वे तदर्थनिरूपितजनकत्वमेव प्रतीयते । तदभावे तूच्चारयितुरेवेति मन्तव्यम् **पितृद्वयेति** । जनकपुंस्त्वावच्छिन्नस्यैव पितृशब्दादिति भावः । गत्यभावादित्यनेन सरूपघटादिपदस्थले एकेनैव घटपदेन नानाघटबोधसंभवाल्लक्षणां विनापि गतिः सूचिता । आद्युरित्यनेनास्मिन्कल्पेऽस्वरसः सूचितः । तद्बीजं त्वस्मृतमातृशब्दस्यापि शाब्दबोधानुभवो नानास्मृतिव्यक्तिकल्पने गौरवं च । **प्रमाणान्तरेण** अनुमानादिना । **स्त्रीपरत्वज्ञाने** भ्रातृपदस्य भ्रातृभगिन्युभयनात्पर्यकत्वज्ञाने पुत्रपदस्य पुत्रीपुत्रोभयपरत्वज्ञाने चेत्यर्थः । इदंच लक्षणायां बीजप्रदर्शनम् । तात्पर्यानुपपत्तेर्लक्षणाबीजत्वादिति भावः ।

इत्यत्र न तत्पुरुषः, लक्षणापत्तेः, किं तु कर्मधारयः, लक्षणाभावात्। न च निषादस्य सङ्करजातिविशेषस्य वेदानधिकाराद्याजनासम्भव इति वाच्यम्। निषादस्य विद्याप्रयुक्तेस्तत एव कल्पनात्। लाघवेन मुख्यार्थस्याऽन्वये तदनुपपत्त्या तत्कल्पनायाः फलमुखगौरवतयाऽदोषत्वादिति।

दिनकरी।

न तत्पुरुष इति। स्वीक्रियत इति **शेषः**। **वेदानधिकारादिति**। "स्त्रीशूद्रौ नाऽधीयाताम्-"इत्यनेन निषेधादिति भावः। **याजनासम्भव इति**। अध्ययनविधिसिद्धज्ञानाभावादिति भावः। **तत एवेति**। श्रुतिबोधितयाजनानुपपत्त्यैवेत्यर्थः। **ननु निषादस्य विद्याकल्पने गौरवमत आह। लाघवेनेति**। ननु "स्त्रीशूद्रौ नाऽधीयाताम्" इति श्रुतेरप्रामाण्यापत्तिभिया लाघवमकिञ्चित्करम्। शूद्रपदस्य निषादेतरशूद्रपरत्वे **निषादस्य** वेदान्तराध्ययनप्रसङ्गः, अध्ययनपदस्य यागोपयुक्ताध्ययनेतराध्ययनपरत्वे च शूद्रान्तरस्याऽपि यागोपयुक्ताध्ययनप्रसङ्ग इति चेन्न। तत्र विशेषतःप्राप्ताध्ययनेतराध्ययनपरत्वाद्ध्ययनपदस्य। तेन निषादस्य यागोपयुक्ताध्ययनेतराध्ययननिषेधः, शूद्रान्तरस्य त्वध्ययनमात्रनिषेधः सिद्ध्यतीति। **अदोषत्वादिति**। ननु लक्षणाकल्पनेऽपि न दोषः। **शक्यसम्बन्धरूपलक्षणायाः क्लृप्तत्वात्**। न च शाब्दबोधं प्रति लक्षणाज्ञानस्य हेतुत्वकल्पनमधिकमिति वाच्यम्। निषादानां स्थपतिरिति व्युत्पत्त्या निषादसम्बन्ध्यभिन्नस्थपत्यनुभवस्य

रामरुद्री।

अध्ययनविधिसिद्धेति। अर्थी समर्थो विद्वानित्यादिना यागोपयुक्तद्रव्यवतः शक्तिमतोऽज्ञानवतश्च यागेऽधिकारत्वप्रदर्शने ज्ञानस्य च 'स्वाध्यायोऽध्येतव्य' इति श्रुत्या प्रयोजनवदर्थप्रतीतिजनकस्वाध्यायो वेदः कर्तव्य इत्यर्थकतया वेदाध्ययनेनैव ज्ञानसंपादनस्य बोधितत्वात्। उक्तनिषेधश्रुत्या च निषादस्याध्ययनस्य निषिद्धत्वाद्वेदाध्ययनजन्यज्ञानाभावेन निषादस्य यजनासंभवः। तदसंभवे तद्याजनस्याप्यसंभव इति भावः। **गौरवं** कल्पनागौरवमित्यर्थः। **लाघवमकिंचित्करमिति**। लक्षणाऽकल्पनाप्रयुक्तलाघवं दोषावहमित्यर्थः। उक्तश्रुतेरप्रामाण्यापत्त्या शक्यार्थान्वये लाघवेऽपि तदनादरणीयमिति भावः। ननु 'मा हिंस्यात् सर्वा भूतानी' ति निषेधविधिना हिंसामात्रस्य निषिद्धत्वे 'वायव्यं श्वेतमालभेत भूतिकाम' इति यागे पशुहिंसाविधानबलाद्विहितहिंसातिरिक्तहिंसानिषेधपरत्वमेव यथोक्तनिषेधविधेः स्वीक्रियते तथात्रापि निषादस्थपतिमिति विधानबलात्'न स्त्रीशूद्रा'वित्यादिनिषेधवाक्ये शूद्रपदं वा निषादातिरिक्तशूद्रपरमधिपूर्वकायधात्वर्थो वा यागोपयुक्ताध्ययनभिन्नाध्ययनार्थकोऽङ्गीकरणीयः यथाश्रुतेऽप्रामाण्यापत्तेरित्याशङ्क्य निराकुरुते—**तत्रेति**। **विशेषतः** विशेषविधानेन प्राप्तं यदध्ययनं तदतिरिक्ताध्ययनमेवोक्तश्रुतेस्तात्पर्यार्थः। तथाच निषादस्थपतिमिति विधिना प्राप्तं निषादस्य यागोपयुक्तवेदाध्ययनमिति तदतिरिक्तवेदाध्ययनं निषादस्य, वेदाध्ययनमात्रं च शूद्रमात्रस्य निषिद्धमिति भावः। **अदोषत्वादितीति**। ननु निषादस्थपतिमित्यत्र कर्मधारयोपगमे लाघवं तत्पुरुषोपगमे निषादपदस्य निषादसम्बन्धनि लक्षणायाः कल्पनीयतया गौरवात्। एवंच विधितो निषादस्य यजने प्राप्ते तदनुरोधेन निषादस्याध्ययनकल्पनेऽपि न कल्पनागौरवम्। फलमुखगौरवस्यादोषत्वादित्युक्तम्। तदिदमसङ्गतम्। शक्यसम्बन्धरूपलक्षणायाः सर्वसिद्धतया तस्या अकल्पनीयत्वादिति तत्पुरुषोपगमेऽपि न किञ्चिद्गौरवम्। अतः कर्मधारयमुपगम्य निषादस्याध्ययनकल्पनमेव गौरवग्रस्तमिति शङ्कते—**नन्वि**ति। लक्षणायाः क्लृप्तत्वेऽपि तज्ज्ञानस्य वेदजन्यशाब्दं प्रति हेतुत्वकल्पने गौरवमक्षुण्णमेवेति शङ्कते—**नचेति**। लौकिकशाब्दबोधानुरोधेन लक्षणाज्ञानस्यापि लाक्षणिकार्थविषयकशाब्दबोधं प्रति हेतुतायाः क्लृप्ततया तत एव वैदिकशाब्दस्याप्युपपत्त्या वेदस्थले कार्यकारणभावान्तरकल्पनाविरहादिति समाधत्ते-

उपकुम्भमर्द्धपिप्पलीत्यादौ परपदे तत्सम्बन्धिनि लक्षणा, पूर्वपदार्थप्रधानतया चाऽन्वयबोध इति।

दिनकरी।

लौकिकवाक्ये क्लृप्तत्वात् तदनुरोधेन लक्षणाज्ञानहेतुत्वस्य सर्वसिद्धत्वेन वेदेऽधिकस्याऽकल्पनादिति चेन्न। शक्यसम्बन्धरूपलक्षणाज्ञानस्य शक्तिज्ञानं विनाऽसम्भवेन शक्तिज्ञानस्य तत्रोभयसिद्धतया भवन्मते वैदिकवाक्यजन्यशाब्दबोधात् पूर्वं लक्षणाज्ञानव्यक्तिकल्पनागौरवस्य वज्रलेपत्वादिति।

उपकुम्भमर्द्धपिप्पलीत्यादाविति। अत्र कुम्भस्य समीपमित्यस्वपदविग्रहः। अव्ययीभावस्य नित्यसमासत्वात्। **पूर्वपदार्थप्रधानतयेति।** कुम्भपदलक्षितस्य कुम्भसम्बन्धिन उपपदार्थसमीपेऽभेदान्वयात् कुम्भसम्बन्ध्यभिन्नसमीपमित्युपपदार्थविशेष्यकोऽन्वयबोध इत्यर्थः। केचित्तु उपपदार्थः सामीप्यं, न तु समीपम्, समीपे उपपदलक्षणास्वीकारे तु पदद्वयलक्षणापेक्षया कुम्भपदस्यैव कुम्भसमीपे लक्षणा, उपपदं तात्पर्यग्राहकं, कुम्भसमीपमिति चाऽन्वयबोध इत्याहुः। अत्र यद्यप्यर्द्धपिप्पलीति तत्पुरुषे शक्तिनिराकरणं पुनरुक्तं पूर्वं तत्पुरुषे तन्निरासात्, तथाऽपि पूर्वमुत्तरपदार्थप्रधानराजपुरुषादौ तन्निराकरणं पूर्वपदलक्षणया, इह च पूर्वपदार्थप्रधानेऽर्धपिप्पलीत्यादितत्पुरुषे उत्तरपदलक्षणया तन्निराकरणमिति भेदादपौनरुक्त्यमिति ध्येयम्।

रामरुद्री।

नेषादानामिति। लक्षणाज्ञानहेतुतायाः आधिक्यविरहेऽपि वेदजन्यशाब्दबोधव्यक्तीनामव्यवहितपूर्वकालसम्बन्धज्ञानव्यक्तीनामनन्तानां कल्पनाप्रयुक्तगौरवं वज्रलेपरूपमेव। न च तन्मतसिद्धशक्तिज्ञानव्यक्तिकल्पनास्थानीयलक्षणाज्ञानकल्पनमिति नाधिक्यमिति वाच्यम्। शक्यसंबन्धरूपलक्षणाज्ञाने विशेषणज्ञानविधया शक्तिज्ञानस्यावश्यकतया शक्तिज्ञानव्यक्तीनां वेदजन्यशाब्दबोधात्पूर्वमुभयवादिसिद्धत्वादिति समाधत्ते—**शक्यसम्बन्धरूपेति।** **अस्वपदेति।** समस्यमानपदमात्रघटितविग्रहकसमासस्य स्वपदविग्रहस्य समासस्य तादृशविग्रहवाक्यं स्वपदाविग्रहवाक्यमित्युच्यते। स एव नित्यसमास इति व्यवह्रियते। स्वपदमात्रघटितविग्रहवाक्यसिध्यर्थमेव समासविधेर्वैकल्पिकत्वस्याङ्गीकारादिति भावः। **उपपदार्थविशेष्यक इति।** न चैवमुपकुम्भादागत इत्यादौ विभक्त्यर्थापादानत्वादौ समीपादेरन्वयो न स्यात्। प्रत्ययानां प्रकृत्यर्थान्वितत्वार्थबोधकत्वनियमात्। उपपदाव्यवहितोत्तरकुम्भपदस्यैव विभक्तिप्रकृतित्वादिति वाच्यम्। पदभेदेन व्युत्पत्तिभेदस्वीकारात्। पूर्वपदार्थप्रधानसमासस्थले तादृशसमस्तपदविभक्तेरव्यवहितपूर्वापरभावस्यैव तादृशशाब्दबोधनियामकत्वोपगमेनाक्तव्युत्पत्तेस्तादृशस्थले सङ्कोचोपगमादिति भावः। कुम्भपदस्यैव कुम्भसमीपे लक्षणा उपपदं तात्पर्यग्राहकम्। एवंच प्रत्ययानामिति व्युत्पत्तेरपि तत्र सङ्कोचकल्पनमिति केचिदाहुः तन्मतमुपन्यस्यति—**केचित्त्विति।** **कुम्भसमीपमितीति।** यद्यपि कुम्भपदस्यैव कुम्भसमीपार्थकत्वेन न कुम्भसमीपमित्यन्वयबोधाकारः, किन्तु स्मरणमेवेत्यन्वयबोधेत्यसङ्गतम्। तथाप्यन्वययोत्तरमपि विभक्तिसत्त्वेन तदर्थसङ्गत्याप्रकारकबोधतात्पर्येण कुम्भसमीपमेकमेति शाब्दबोध इत्यभिप्रायः। आहुरित्यस्वरसोद्भावनम्। तद्वीज तु समासानन्तर्भावेन क्वाप्युपपदस्य प्रयोगाभावेन उपपदस्य सामीप्यार्थकताया निश्चेतुमशक्यतयाऽस्वपदविग्रहस्थलेऽपि समानार्थकपदान्तरेणैव विग्रहवाक्यस्वीकाराच्च समीपपदस्य सामीप्यविशिष्टार्थकतया उपपदस्यापि तदर्थकताया एवोचितत्वात्। नैवं भवति सार्थकत्वे किंचित्पदस्य निरर्थकताकल्पनमयुक्तमिति मन्तव्यम्। **शक्तिनिराकरणमिति।** यद्यपि राजपुरुष इत्यादौ तत्पुरुषे पूर्वपदस्य लक्षणैव पूर्वं प्रतिपादिता न तु तत्पुरुषे शक्तिर्निराकृता। अर्धपिप्पलीति तत्पुरुषेऽपि न पूर्वपदेऽपि लक्षणा किंतूत्तरपद एवेति इदानीमभिधानान्न पौनरुक्त्यशङ्कावकाशः। अग्रे

आसत्तिर्योग्यताकाङ्क्षातात्पर्यज्ञानमिष्यते ॥ ८२ ॥
कारणं सन्निधानं तु पदस्याऽऽसत्तिरुच्यते ।

इत्थञ्च समासे न क्वाऽपि शक्तिः । पदशक्त्यैव निर्वाहादिति । ॥ इति लक्षणाग्रन्थः ॥

आसत्तिरित्यादि । **आसत्तिज्ञानं, योग्यताज्ञानं, आकाङ्क्षाज्ञानं, तात्पर्यज्ञानं च शाब्दबोधे कारणम् । ॥ इति शाब्दबोधकारणकथनम् ॥**

तत्राऽऽसत्तिपदार्थमाह । सन्निधानं त्विति । **अन्वयप्रतियोग्यनुयोगिपदयोरव्यवधानमासत्तिः । तज्ज्ञानं शाब्दबोधे कारणम् , क्वचिद्व्यवहितेऽप्यव्यवधानभ्रमाच्छाब्दबोधादिति केचित् । वस्तुतस्तु अव्यवधानज्ञानस्याऽनदिनकरी ।**

वैयाकरणमतं दूषयति **इत्थञ्चेति । पदशक्त्यैवेति ।** समासघटकीभूतपदशक्तिलक्षणाभ्यामित्यर्थः । ॥ इति लक्षणाग्रन्थः ॥

'आसत्तिर्योग्यताऽऽकाङ्क्षा–'इतिमूलादासत्तेः स्वरूपसत्या एव कारणत्वं लभ्यते, न तु योग्यताज्ञानादिवदासत्तिज्ञानस्य । ज्ञानपदस्य समासघटकत्वेन समासाघटकासत्तिपदार्थेनाऽनन्वयात् , स्वरूपसत्याश्चाऽऽसत्तेः कारणत्वं न सम्भवति, गिरिर्भुक्तमित्यादौ गिरिपदाग्निमत्पदयोरव्यवधानभ्रमेण शाब्दबोधोदयेन व्यभिचारात् , अतो मूलस्थं 'आसत्ति' पदमासत्तिज्ञानपरतया व्याचष्टे । **आसत्तिज्ञानमिति** । 'आसत्तियोग्यता–'इतिविसर्गशून्यपाठस्त्वृजुरेव ।

ननु 'सन्निधानं तु पदस्याऽऽसत्तिरुच्यते–'इतिमूलोक्तस्याऽऽसत्तिलक्षणस्य गिरिर्भुक्तरामरुद्री ।

च तत्र तत्र समासेषु समासघटकपदानां शक्त्या लक्षणया वा तत्तद्विशिष्टबोधोपपत्तौ न क्वापि समासे शक्तिः कल्प्यते गौरवादिति समासमात्रे शक्तिरेकदैव निराकरिष्यत इति नानुपपत्तिः । तथापि तत्पुरुषे पूर्वपदलक्षणाभिधान समासे शक्तिनिरासायेति तदुक्त्यैव क्वचित्तत्पुरुषे उत्तरपदलक्षणयैव निर्वाहेण तत्रापि न शक्तिकल्पनमिति लाभसम्भवात्पौनरुक्त्यशङ्कावकाशः कथंचिदुपपादनीयः ।

विसर्गशून्येति । आसत्तीत्यस्य निर्विभक्तिकत्वेन समासान्तर्गतत्वसम्भवेन आसत्त्यादिनात्पर्यान्तानां द्वन्द्वसमासमाश्रित्य तेषां ज्ञानमिति षष्ठीतत्पुरुषाश्रयणेनासत्त्यादिज्ञानलाभसम्भवादिति भावः ।

'सन्निधानंतु पदस्ये'ति मूलकारिकायां चोपपदसान्निध्यमासत्तिरिति यथाश्रुतार्थः प्रतीयते । तत्रचोपपदयोर्यत्र न परस्परान्वयबोधजनकत्वं तत्र पदयोः सान्निध्यस्यासत्तित्वापत्तिरिति दोषस्य स्पष्टतया तस्यैव ग्रन्थकर्तुः स्वाभिमतासत्तेर्निर्वचनबीजतां प्रदर्शयन्नाह— **नन्वित्यादि ।** वस्तुतः सन्निधानमित्यादिमूलं प्राचीना एव परिष्कुर्वन्ति । ययोः पदयोः परस्परमन्वयबोधजनकत्वे तात्पर्यं तयोः पदयोरव्यवधानमासत्तिः । तस्याः स्वरूपसत्याः शाब्दबोधकारणत्वे गिरिर्भुक्तमित्यादौ गिरिपदाग्निमत्पदयोरव्यवधानभ्रमाच्छाब्दबोधस्यानुभवसिद्धतया तदपलापापत्तिः । तस्मादभ्रमप्रमासाधारणं तादृशपदयोरव्यवधानज्ञानमेव शाब्दबोधहेतुतयोपगन्तव्यमिति तन्मतं निरूपयितुं मूलकृदुपन्यस्यति—**अन्वयप्रतियोगीत्यादि ।** अन्वयः शाब्दबोधविषयीभूतः संसर्गः । तत्प्रतियोग्यनुयोगिपदेत्यस्य तत्प्रतियोग्यनुयोगिबोधकपदेत्यर्थः । मतमेतद्दूषयति–**वस्तुत इति । अनपेक्षितत्वात्** शाब्दबोधात्प्राक्सर्वत्राव्यवधानज्ञाननियमाभावादित्यर्थः । तथाचोक्तासत्तिज्ञानस्य हेतुता व्यभिचारेण वक्तुमशक्येति भावः । नचोक्तव्यतिरेकव्यभिचार एवासिद्ध इति वाच्यम् । पदद्वयेनाऽप्यव्यवधानेन पदार्थद्वयस्योपस्थितिज्ञाने ,पदाव्यवधा-

पेक्षितत्वात् यत्पदार्थस्य यत्पदार्थेनाऽन्वयोऽपेक्षितस्तयोरव्यवधानेनोपस्थितिः शाब्दबोधे कारणम्। तेन गिरिभुंक्तमग्नमान् दे दत्तेनेत्यादौ न शाब्दबोधः। तात्पर्यगर्भा चाऽऽसत्तिः। नीलो घटो द्रव्यं पट इत्यादावासत्तिभ्रमाच्छाब्दबोधः। आसत्तिभ्रमात् शाब्दभ्रमाभावेऽपि न क्षतिः।

दिनकरी ।

मित्यत्राऽतिव्याप्तिः, तत्रापि गिरिपदभुक्तपदयोरव्यवधानसत्त्वादतो व्याचष्टे । **यत्पदार्थेति । अपेक्षितः**-तात्पर्यविषयः **तयोरिति** । तयो पदयोरित्यर्थः । तादृशपदयोरव्यवधानमासत्तिः, तदुपस्थितिः कारणमित्यर्थः । तथा च गिरिपदार्थभुक्तपदार्थयोरन्वयो न तात्पर्यविषयः, अपि तु गिरिपदार्थान्वितमत्पदार्थयोरेवेति तयोरव्यवधानाभावान्नाऽतिव्याप्तिरिति भावः । **तेन** — एतादृशयत्तत्पदगर्भासत्तिनिर्वचनेन । **ननु नीलो घटो द्रव्यं पट** इत्यत्र नीलपदार्थपटपदार्थयोर्यत्राऽन्वयो वक्तुस्तात्पर्यविषयः, न तु नीलपदार्थघटपदार्थयोस्तत्र नीलपदघटपदयोरासत्तिर्न स्यात्, तत्तत्पदार्थान्वयस्य तात्पर्यविषयत्वाभावात्, अतस्तत्रेष्टापत्तिमाह-**नीलो घट इत्यादिना** । तर्हि तत्र नीलो घट इति कथं **शाब्दबोध** इत्यत आह । **भ्रमाच्छाब्दबोध इति** । तथा च भ्रमाच्छाब्दबोधमात्रं, न तु तत्राऽऽसत्तिरिति भावः । **ननु** तत्र यद्यासत्तिभ्रमस्तदा शाब्दबोधो भ्रमात्मकः स्यात् । **न चेष्टापत्तिः**, घटे नीलस्य सत्त्वेन विषयबाधाभावात्, **आसत्तिभ्रमाच्छाब्दभ्रमाङ्गीकारे चाऽऽसत्तिभ्रमाच्छाब्दभ्रम** इति प्राचीनगाथाविरोध इत्यत आह । **आसत्तिभ्रमेणेति । न क्षतिरिति** । आसत्तिभ्रमस्य न शाब्दभ्रमप्रयोजकत्वं, किन्तु योग्यताभ्रमस्य । 'आसत्तिभ्रमाच्छाब्दभ्रमः-'इति प्राचीनगाथा तु निर्युक्तिकत्वादश्रद्धेयेति भावः । क्वचित् पुस्तके **'न शाब्दबोधः—'इत्यनन्तरं 'नीलो घटः-'इत्यतः पूर्वं 'तात्पर्यगर्भा चाऽऽसत्तिः-'इतिपाठः।** स च यत इत्यादिपूरणेन यतस्तात्पर्यगर्भा—**तात्पर्यविषयीभूतान्वयबोधविषयीभूतार्थबोधकपदान्वयरूपा** पूर्वनिरुक्ताऽऽसत्तिरतो न शाब्दबोध इत्यर्थकतया व्याख्येयः । पाठा-

रामरुद्री ।

नज्ञानं विनापि शाब्दबोधस्यानुभवसिद्धत्वादिति भावः । स्वमतेनासत्तिं निर्वक्ति—**यत्पदार्थेनेति । तात्पर्यविषय इति** । तात्पर्यविषयत्वप्रकारकनिश्चयविषय इत्यर्थः । **तादृशपदयोरिति**। तादृशपदज्ञानयोरित्यर्थः । **तदुपस्थितिरिति** । तेनोपस्थितिस्तदुपस्थितिरिति व्युत्पत्त्या तादृशासत्तिविशिष्टपदजन्योपस्थितिरित्यर्थः। यथाश्रुतेऽव्यवधानज्ञानस्यानपेक्षितत्वादिति पूर्वमूलविरोधापत्तेरित्थंच पदद्वयोपस्थित्योरव्यवधानमेवासत्तिः। साच स्वरूपसत्यैव शाब्दबोधकारणम् । नातः पूर्वमूलविरोधः । अतएवासत्तिर्योग्यतेति मूलकारिकायामासत्तेः समासानन्तर्गतत्वेन निर्देशोऽपि साधु संगच्छते । तस्याः स्वरूपसत्या एव शाब्दबोधकारणत्वात् । नचैवमप्यात्तत्तिभ्रमाच्छाब्दबोध इत्यग्रिममूलविरोधः आसत्तिज्ञानस्य शाब्दबोधे कारणत्वादिति मन्तव्यम् । **आसत्तिभ्रमादित्यस्य** भ्रमनिर्वाह्यासत्तेरित्यर्थकत्वादुक्तासत्तेस्तात्पर्यनिश्चयघटितत्वेन नीलघटपदार्थयोरन्वये वक्तुस्तात्पर्यविरहेण तात्पर्यभ्रमेणैव तत्रासत्तेर्निर्वाह्यत्वादिति ध्येयम् । **भ्रमादिति** । भ्रमनिर्वाह्यासत्तेरित्यर्थः । ययोः पदयोः परस्परान्वयबोधजनकत्वेन वक्तुस्तात्पर्यविषयत्वनिश्चयस्तयोरव्यवधानस्यैवासत्तितया तादृशतात्पर्यविषयकनिश्चयस्य भ्रमरूपत्वादित्यवधेयम् । एवं चासत्तिभ्रमाच्छाब्दभ्रमाभावेऽपीत्यग्रिममूलेऽपि भ्रमप्रयोज्यासत्तेः शाब्दभ्रमाभावेऽपीत्यर्थो वर्णनीयः । नातः पूर्वोक्तमूलग्रन्थसंदर्भविरोधः । **भ्रमात्मक इति** । भ्रमेण आत्मा स्वरूपं यस्येति व्युत्पत्त्या भ्रमप्रयुक्तः शाब्दबोधः स्यादित्यर्थः । इदं च भाववर्णनमेव प्रकृतग्रन्थे तयोरभावात् । तथा भ्रमप्रयुक्ता-

ननु यत्र छत्री कुण्डली वासस्वी देवदत्त इत्युक्तं, तत्रोत्तरपदस्मरणेन पूर्वपदस्मरणस्य नाशादव्यवधानेन तत्तत्पदस्मरणासम्भव इति चेन्न।

प्रत्येकपदानुभवजन्यसंस्कारैश्चरमस्य तावत्पदविषयकस्मरणस्याऽव्यवधानेनोत्पत्तेः। नानासन्निकर्षैरेकप्रत्यक्षस्येव नानासंस्कारैरेकस्मरणोत्प-

दिनकरी।

न्तरं काल्पनिकमिति न चोक्तायां आसत्तेः श्लोकेऽभावाद्विशेषदर्शनेन पदाव्यवधानभ्रमस्याऽपि तत्राऽभावाच्छाब्दबोधो न स्यादिति वाच्यम्। श्लोकादौ योजनावाक्यादेवाऽन्वयबोधोपगमात्। नव्यास्तु उक्तासत्तिर्मौनिश्लोके न सम्भवति, तत्र पदाभावेन पदाव्यवधानासम्भवात्, उक्तासत्तिज्ञानविलम्बेन शाब्दबोधविलम्बाभावाच्च, किन्त्वव्यवधानेन वृत्त्या पदजन्यपदार्थोपस्थितिरासत्तिः, तत्राऽव्यवधानांशो न निवेश्यते, शाब्दबोधं प्रति पदजन्यपदार्थोपस्थितेः कारणतयाऽव्यवधानेनैव तत्सम्भवात्, तस्मात्, वृत्त्या पदजन्यपदार्थोपस्थितिरासत्तिरित्याहुः।

नन्वव्यवधानेन पदोपस्थितिः शाब्दबोधे कारणमित्ययुक्तम्। अनेकपदघटितवाक्यस्थलेऽव्यवधानेन पदोपस्थित्यसम्भवादित्याशङ्कते। नन्वति।

अव्यवधानेनोत्पत्तेरिति। अभेदेऽप्यव्यवधानसम्भवादिति भावः। **ननु तद्विशेष्यकतत्प्रकारकस्मृतिं प्रति** तद्विशेष्यकतत्प्रकारकसंस्कारत्वेन जनकत्वात् कथं प्रत्येकपदसंस्कारैर्नानापदविशेष्यकस्मरणम्? भिन्नविषयकत्वादत आह। **नानासन्निकर्षेरिति।**

रामरुद्रो।

सत्तेरेव तत्र शाब्दबोधो नतु प्रमाप्रयुक्तासत्तेरपीति ग्रन्थतात्पर्यमिति भावः। **श्लोके इति।** तत्र क्रियाकारकपदयोः पदान्तरेण व्यवधानेऽपि शाब्दबोधस्यानुभवसिद्धत्वादिति भावः। **पदाव्यवधानेति। इत्थंचैतदनु** पदस्यैवासत्तिज्ञानमेव शाब्दबोधे कारणमङ्गीकरिष्यामः न तु स्वरूपसत्या आसत्तेरितिशङ्कानिरासायैवेत्युक्तम्। तेन ग्रन्थकृता स्वरूपसत्या आसत्तेः कारणत्वोपगमेऽपि नैतद्ग्रन्थासंगतिरित्यवधेयम्। **योजनावाक्यादिति।** शाब्दबोधोपपत्तयेऽव्यवहितोच्चरितक्रियाकारकपदादेवेत्यर्थः। **अव्यवधानेनैव तत्सम्भवादिति।** पदद्वयजन्योपस्थितिरूपयोर्व्यवहितत्वे शाब्दबोधाव्यवहितप्राक्क्षणे एकोपस्थितिव्यक्तिनाशस्यावश्यकतया उपस्थितिरूपायाः शाब्दबोधात्प्रागासत्त्या एव दुर्घटत्वादिति भावः। आदुरित्यनेन नव्यमतेऽस्वरसः सूचितः। तद्बीजं तु एवं सति पदजन्यपदार्थोपस्थितेः कारणत्व एव पर्यवसानादासत्तेः शाब्दबोधकारणतायाः सर्वसिद्धाया विलयप्रसङ्ग इति। न च मौनिश्लोकादौ पदाभावात् कथमासत्तिरिति वाच्यम्। पदाभावेऽप्यानुमानिकपदज्ञानस्यावश्यकत्वात्। अन्यथा पदज्ञानरूपकारणाभावेन मौनिश्लोकादौ शाब्दबोधस्यैवानुपपत्तेः। एवंच ययोः पदयोरन्वयबोधजनकत्वे मौनिनस्तात्पर्यमुपगम्यते तयोरव्यवधानेनानुमानिकज्ञानं वर्तत एवेति न ग्रन्थकृन्मते शाब्दबोधानुपपत्तिरिति विभावनीयम्।

अभेद इति। तत्तत्पदस्मरणव्यक्तीनां परस्परमभेद इत्यर्थः। तथाच तत्तत्पदविषयकसमूहालम्बनमेकमेव स्मरणं भवति। तत्र समूहालम्बनपदार्थस्मृतेस्तत्तच्छाब्दबोध इति भावः। **तद्विशेष्यकेत्यादि।** तत्तद्विशेष्यकतत्तत्प्रकारकस्मरणं प्रति तत्तद्विशेष्यकतत्तत्प्रकारकसंस्कारस्यैव हेतुतया यावदर्थविशेष्यकयावदर्थप्रकारकस्मरणं जायते तावदर्थविशेष्यकतावदर्थप्रकारकसंस्कारस्यैव हेतुतया प्रत्येकपदविषयकसंस्कारैः कथं नानापदविषयकस्मरणोत्पत्तिः। समानविशेष्यकत्वसमानप्रकारकत्वाभ्यामेव स्मृतिसंस्कारयोः कार्यकारणभावादित्यभिमानः। यथाश्रुतं तु न सङ्गच्छते। यद्यद्विशेष्यकं यत्तत्प्रकारकं स्मरणं तत्तद्विशेष्यकतत्तत्प्रकारकसंस्कारव्यक्तीनां सत्त्वेनानुपपत्त्यभावात्। सिद्धान्ते तु तद्विशेष्यकत-

क्षेरपि सम्भवात् । तावत्पदसंस्कारसहितचरमवर्ण(१)ज्ञानस्योद्बोधकत्वात् । कथमन्यथा नानावर्णैरेक (२) स्मरणम् (३) ?

परंतु तावत्पदार्थानां स्मरणादेकदैव खले कपोतन्यायात् तावत्पदार्थानां क्रियाकर्मभावेनाऽन्वयबोधरूपः शाब्दबोधो भवतीति केचित् ।

"वृद्धा युवानः शिशवः कपोताः खले यथाऽमी युगपत् पतन्ति ।
तथैव सर्वे युगपत् पदार्थाः परस्परेणाऽन्वयिनो भवन्ति ॥"

दिनकरी ।

सम्भवादिति । तथा च यथा घटचक्षुःसंयोगस्य पटप्रत्यक्षांशे कारणत्वाभावेऽपि घटचक्षुःसंयोगपटचक्षुःसंयोगाभ्यामेकं प्रत्यक्षं, तथा तत्तत्पदगोचरसंस्कारस्य भिन्नविषयकत्वांशेऽजनकत्वेऽपि तत्तत्संस्कारजन्यं स्मरणमेकमेव जायते, बाधकाभावादिति भावः । **अन्यथा**—नानासंकाराणामेकस्मरणजनकत्वाभावे । **नानावर्णैरिति ।** नानावर्णानां प्रत्येकसंस्कारैरित्यर्थः । **एकस्मरणं**—नानावर्णगोचरमेकस्मरणं, पदस्मरणवदित्यर्थः ।

आशुतरविनाशिनीनां क्रमिकाणां पदजन्यपदार्थोपस्थितीनामपि मेलनासम्भवात् सर्वत्र शाब्दबोधे पदजन्यपदार्थोपस्थितिः समूहालम्बनात्मिकैव कारणम् । एवञ्च सर्वत्र युगपदेव सकलपदार्थानां विशेष्ये विशेषणमिति न्यायेनैव शाब्दबोधः, न तु विशिष्टस्य वैशिष्ट्यमितिरीत्या,तज्जनकविशेषणतावच्छेदकप्रकारकनिर्णयस्य पूर्वमभावादिति प्राचीनमतं दर्शयति-**परं त्वित्यादिना । एकदैवेति ।** न तु घटमानयेत्यादौ प्रथमं घटीया कर्मतेत्येवं बोधस्तदनन्तरं च घटकर्मकानयनमित्यादिबोध इत्यादिक्रमेणेत्यर्थः । 'वृद्धा युवानः—' इत्यस्य 'तदाहुः—' इत्यादिः । अत्र वृद्धयुवशिशुभिः कपोतैश्चिरतर—चिरसन्निहित—कालोक्तानां पदार्थानां साम्यं बोध्यम् ।

रामरुद्री ।

प्रकारकस्मरणंप्रति तद्विशेष्यकतत्प्रकारकसंस्कारत्वेनैव हेतुता । तावदर्थविशेष्यकस्मरणे तु तावदर्थविशेष्यक एव संस्कारो हेतुरिति नानासंस्कारैः समूहालम्बनरूपैकस्मरणस्य नानुपपत्तिरिति हृदयम् । **बाधकाभावादिति ।** तत्तत्संस्कारजन्यवाक्यस्मरणस्यैकव्यक्तित्वादिति भावः । **नानावर्णगोचरेति ।** वर्णसमुदायस्यैव पदरूपत्वेनैतादृशपदस्मरणस्य वर्णसमुदायविषयकानुभवाभावेन तावद्वर्णविषयकसंस्काराभावात्प्रत्येकवर्णविषयकसंस्कारैरेव समूहालम्बनतावद्वर्णविषयकपदस्मरणस्योपगन्तव्यत्वादिति भावः। इदमत्रावधेयम् । यद्यपि संसर्गप्रतियोग्ययोगिबोधकपदज्ञानयोरव्यवधानरूपासत्तेः शाब्दबोधजनकत्वकल्पने प्रयोजनविरहः । स्वजन्यपदार्थोपस्थितिद्वारा पदद्वयज्ञानसत्त्वाच्छाब्दबोधोत्पत्तिसंभवेन व्यवहितपदज्ञानयोः शाब्दबोधप्राक्क्षणोत्पत्त्यसंभवेनैव व्यवहितपदज्ञानाभ्यां शाब्दबोधापादनासंभवात् । अव्यवहितपूर्वत्वस्यासत्तौ सत्त्वेऽपि अनन्यथासिद्धित्वकल्पने प्रयोजनाभावात् । तथापि यत्र प्रथमं घटपदज्ञानं ततः पटपदज्ञानं तदुत्तरक्षणे घटपदज्ञानजन्यघटरूपार्थविषयिण्युद्बोधकान्तरसहकारेण शुक्लपदविषयिणी च समूहालम्बनस्मृतिः ततः शुक्लपदार्थस्मरणं तत्र शुक्लो घट इति शाब्दबोधापत्तिवारणायोक्तासत्तेः शाब्दबोधे हेतुत्वकल्पनस्यावश्यकत्वान्न दोषः ।

परंत्वित्यादिग्रन्थमवतारयति—**आशुतरविनाशिनीनामित्यादि ।** केचिदित्यनन्तरं **वृद्धा युवान** इत्यादिश्लोकस्य मूले पाठात्तत्रान्वयानुपपत्तिं मन्यमानः पूरयति—**तदाहुरित्यादिरिति । चिरेति ।** प्रथमोक्तपदार्थस्य वृद्धसाम्यं द्वितीयोक्तस्य तस्य युवसाम्यं सन्निहितोक्तस्य शिशुसाम्यमिति भावः ।

---

(१) 'पद' इति पाठः । (२) 'वर्णात्मक' इति पाठः । (३) 'पदस्मरणम्' इतिपाठः ।

अपरे तु—

"यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते ।
तेन तेनाऽन्वितः स्वार्थः पदैरेवाऽवगम्यते ॥"

तथा च खण्डवाक्यार्थबोधानन्तरं तथैव पदार्थस्मृत्या महावाक्यार्थबोध इत्यप्याहुः ।

दिनकरी ।

'केचित्' इत्यनेन सूचितमस्वरसं प्रकाशयन् मतान्तरमाह **अपरे त्विति। यद्यदिति।** स्वार्थाकाङ्क्षितं स्वार्थयोग्यं यद्यत् सन्निधानं प्रपद्यते-स्वार्थोपस्थितिविषयो भवति, तेन तेनैवाऽन्वितः स्वार्थः पदैः प्रथममनुभाव्यते, **अनन्तरं** च महावाक्यार्थबोध इत्यर्थः । एवञ्च पूर्वोक्तसमूहालम्बनात्मकं पदार्थस्मरणं विनाऽपि निर्वाह इति भावः । न च घटमानयेत्यादौ चरमपदार्थस्मृतिकाले घटादिपदार्थस्मृतेर्नाशात् समूहालम्बनस्मृतिरावश्यकीति वाच्यम् । तत्र घटस्मरणनाशेऽपि घटीया कर्मतेत्याकारकावान्तरबोधस्यैव (पदजन्य) **पदार्थोपस्थितित्वेन** तेनैव **'घटकर्मकानयनम्-'इत्यादिमहावाक्यार्थबोधनिर्वाहात्** , न हि पदजन्यपदार्थस्मृतित्वेन **शाब्दबोधं** प्रति हेतुत्वं, अपि तु शाब्दबोधसाधारणतादृशोपस्थितित्वेनैवेति । एवञ्चैतन्मते खण्डवाक्यार्थबोधपूर्वक एव महावाक्यार्थबोधः । अत एव सर्वत्र खण्डवाक्यार्थबोधरूपस्य विशेषणतावच्छेदकप्रकारकनिश्चयस्य पूर्वं सत्त्वाद्विशिष्टस्य **वैशिष्ट्यमितिरीत्यैव** महावाक्यार्थबोध उत्पद्यत इति । एवं यत्र खण्डवाक्यार्थबोधनाशोत्तरं महावाक्यर्थबोधस्तत्रापि खण्डवाक्यार्थसमानाकारं स्मरणं कल्पयित्वा विशिष्टवैशिष्ट्यबोधनिर्वाह इत्याह-**तथैव पदार्थस्मृत्येति** । अत्रेदं बोध्यम् । यत्र खण्डवाक्यार्थबोधानन्तरं चरमपदस्मृतिः, तदुत्तरं तदर्थस्मृतिः, तत्र खण्डवाक्यार्थानुभवस्य नाशात् समूहालम्बनस्मरणमावश्यकम् । एवञ्च यत्र न विशिष्टवैशिष्ट्यबोधसामग्री तत्र विशेष्ये

रामरुद्री ।

स्वार्थेत्यादि । स्व घटादिपदं तस्यार्थो घटादिः तेनाकाङ्क्षितं तदुपस्थितिजन्यकिंघटीयमितिजिज्ञासाविषयीभूतं योग्यताज्ञानाधीनं कर्मत्वादि यद्यत् सन्निधानं घटरूपार्थविषयकसमूहालम्बनस्मृतिविषयत्वं प्रपद्यते तेन कर्मत्वादिनाऽन्वितो यः स्वर्थो घटादिपदैरेवावगम्यते तज्जन्यशाब्दबोधविषयो भवतीति कारिकार्थ इति भावः । प्रथममित्यनेनानयरूपार्थोपस्थितेः पूर्वमेव घटमितिपदेन घटीया कर्मतेति शाब्दबोधो भवतीति सूचितम् । **अनन्तरं चेति ।** खण्डवाक्यार्थविषयकशाब्दबोधानन्तरमित्यर्थः । महावाक्यार्थबोधो भवतीति मूलोक्त्या न पदार्थोपस्थित्यनन्तरमेव महावाक्यार्थबोधो भवतीति बोध्यम् । मूले तथैवपदार्थस्मृत्येत्यस्य पदज्ञानजन्यानयनादिपदार्थस्मृत्यैवेत्यर्थः । प्राचीनमते अस्वरस प्रकटयति—**एवं चेति । चरमपदार्थेति ।** आनयनादिरूपपदार्थस्मृतिकाल इत्यर्थः । **नाशादिति ।** घटकर्मत्वयोरुपस्थित्यनन्तरं घटीयाकर्मतेति खण्डवाक्यार्थबोधः । तदनन्तरमानयनादिपदज्ञानं तदनन्तरं पदार्थस्मरणमितिरीत्यैवानयनपदार्थस्मृत्या तत्काले पूर्वतनघटाद्यपस्थितेर्नाशादित्यर्थः । **पदार्थोपस्थितित्वेनेति ।** पदार्थज्ञानत्वेनेत्यर्थः । खण्डवाक्यार्थशाब्दबोधस्यापि पदजन्यत्वादिति भावः । नहि पदजन्यपदार्थोपस्थितित्वेनेति पाठे तूपस्थितिपदं स्मृत्यर्थकमेव । **शाब्दबोधसाधारणेति ।** खण्डवाक्यार्थविषयकशाब्दबोधानुगतेत्यर्थः । **तादृशोपस्थितित्वेनैव** पदजन्यज्ञानत्वेनैव । तथाच पदजन्यज्ञानत्वेन क्वचिच्छाब्दबोधस्य क्वचित्स्मरणस्य च शाब्दबोधहेतुतेति भावः । एतन्मते महावाक्यार्थबोधस्य विशिष्टवैशिष्ट्यावगाहितामुपपादयति—**अत एवेति । तत्रेति ।** यादृशस्थले खण्डवाक्यार्थबोधानन्तरं चरमपदस्मरणं ततस्तदर्थस्मरणं ततो महावाक्यार्थबोधस्तत्र चरमपदार्थस्मृतिकाले खण्डवाक्यार्थशाब्दबोधनाशाच्चरमपदा-

एतेन तावद्वर्णाभिव्यङ्ग्यः पदस्फोटोऽपि निरस्तः । तत्तद्वर्णसंस्कारसहितचरमवर्णोपलम्भेन तद्व्यञ्जकेनैवोपपत्तेरिति ।

दिनकरी ।

विशेषणमितिरीत्यैव बोधः, यत्र तत्सामग्री तत्र विशिष्टस्य वैशिष्ट्यमिति रीत्येत्यन्यत्र विस्तरः ।

रामरुद्री ।

र्थस्मरणमेव खण्डवाक्यार्थविषयकसमूहालम्बनरूपमुपगन्तव्यम् । यत्र तु खण्डवाक्यार्थशाब्दबोधजनकस्मृतिरेव चरमपदविषयिणी समूहालम्बनरूपा तत्रैव महावाक्यार्थबोधप्राक्क्षणे खण्डवाक्यार्थशाब्दबोधसत्त्वमिति भावः । एवं च खण्डवाक्यार्थविषयकशाब्दबोधं विनापि समूहालम्बनस्मरणेन विशिष्टवैशिष्ट्यावगाहिशब्दबोधोत्पत्तिस्वीकारे यत्किंचित्कारणवैगुण्येन न खण्डवाक्यार्थविषयकशाब्दबोधः किन्तु पदार्थविषयकसमूहालम्बनस्मरणमेवासीत् तत्र विशेष्ये विशेषणमितिरीत्या महावाक्यार्थबोधसामग्र्या अक्षततया तादृशरीत्या महावाक्यार्थबोधोऽप्यवर्जनीय इत्याह—**अत्रेदं बोध्यमित्यादिना । अन्यत्र विस्तर इति ।** प्रत्यक्षादिकं यथा विशिष्टवैशिष्ट्यरूपं विशेष्ये विशेषणमिति न्यायेन च भवति तथा शाब्दबोधोऽपि, सामग्रीसमवधानासमवधानयोरुभयत्र तुल्यत्वादिति भावः ।

मूले वैयाकरणमतं निरस्यति—**एतेनेत्यादिना** । पूर्ववर्णानुभवजनितसंस्कारसहितचरमवर्णानुभवरूपोद्बोधकोद्बोधितचरमवर्णानुभवजनितसंस्कारेणैव क्रमिकतत्तद्वर्णविषयकपदस्मरणस्योपपादितत्वेनेत्यर्थः । **तद्व्यञ्जकेनैवेति** । स्फोटव्यञ्जकेनैवेत्यर्थः । वैयाकरणैर्घटादयोऽर्थोपस्थापकः स्फोट एवेत्युच्यते । घटपदस्य क्रमिकवर्णचतुष्टयात्मकस्य कदाप्यसत्त्वेनार्थोपस्थापकत्वासंभवात् । स्फोटस्तु ब्रह्मैव नातिरिक्तः पदार्थस्तस्यैकत्वेऽपि तत्तद्वर्णाभिव्यक्तिस्तत्तदर्थोपस्थापिका भवतीति घटपदोच्चारणदशायां न पटाद्युपस्थित्यापत्तिः । पदस्फोटवाक्यस्फोटादीनां भेदव्यवहारोऽपि पदजन्याभिव्यक्तिवाक्यजन्याभिव्यक्तिभेदादेवेति । अत्र च पदस्यार्थबोधकत्वमर्थबोधजनकज्ञानविषयत्वमेव । तच्च वर्णानामनेकत्वेऽपि चरमवर्णानुभवानन्तरक्रमिकतावद्वर्णविषयकसमूहालम्बनस्मृतितः घटरूपार्थस्मृतौ ततो घटविषयकशाब्दबोधोत्पत्त्या वर्णसमुदायरूपपदस्यापि घटबोधकत्वमुपपद्यत एव किं घटशाब्दबोधजनकता स्फोटे स्वीकरणीया, स्फोटाभिव्यक्त्यर्थं त्वयापि तादृशचरमवर्णानुभवस्य स्वीकरणीयतया तत एवार्थोपस्थापकपदस्मरणोपपत्तेरिति समुदायार्थः । अत्र वैयाकरणाः तत्तत्पदार्थवाचकतायाः पर्याप्तिः क्रमिकवर्णसमुदाय एव स्वीकरणीया नतु प्रत्येकम् । तथासति एकैकवर्णादप्यर्थप्रतीत्यापत्तेः । वर्णानां चास्थिरत्वेन पर्याप्त्यधिकरणीभूतसमुदायस्य कदाप्यसत्त्वेन क्रमिकवर्णसमुदायात्मकपदे न वाचकतापर्याप्तिसंभव इति स्थिरपदस्फोट एव तत्तदर्थवाचकत्वेन स्वीकरणीय इति वदन्ति । तदपि न विचारक्षमम् । यतो हि वाचकत्वं समवेतं तत्समवायिकारणं वर्णसमुदाय इति न ब्रूमः । येन समवायिकारणस्य कर्यकालवृत्तित्वेन कारणतया न क्रमिकवर्णसमुदाये वाचकत्वं समवायेनोत्पत्तुमर्हतीत्यनुपपत्तिः स्यात्, समुदायस्यैकस्मिन्क्षणेऽसत्त्वात्, किन्तु तत्तदर्थविषयकबोधजनकत्वेन भगवदिच्छाविषयत्वमेव तत्तदर्थवाचकत्वम् । तच्च क्रमिकेष्वपि वर्णेषु संभवत्येव । नचास्माच्छब्दादयमर्थो बोद्धव्य इति भगवदिच्छायास्तद्विषयताया वा वाचकत्वरूपत्वेन नैयायिकैरभ्युपगमात् तत्र जन्यत्वस्य पञ्चम्यर्थत्वाद्वर्णसमुदायस्य ज्ञानरूपकार्याऽव्यवहितप्राक्क्षणेऽसत्त्वादीश्वरेच्छाया अपि विसवादित्वापत्तिरित्यस्माच्छब्दादित्यस्यैतच्छब्दाभिव्यक्तस्फोटादिरेवार्थो वक्तव्य इति वाच्यम् । नव्यानां मते पदस्यार्थबोधाजनकत्वेन ज्ञानजन्यत्वस्यैव पञ्चम्यर्थत्वेनोपगन्तव्यत्वात् । वस्तुतस्तु वर्णसमुदायस्य न पदत्वं किंतु पूर्वपूर्ववर्णोत्तरचरमवर्णस्यैव । तस्यच ज्ञानरूपकार्याव्यवहितपूर्वक्षणवृत्तित्वं संभवत्येवेति नानुपपत्तिगन्धोऽपि । **मूले तद्व्यञ्जकेनैवेति** । पूर्वपूर्ववर्णानुभवजनितसंस्कारसहितचरमवर्णानुभवस्यैव स्फोटव्यञ्जकत्वेन वैयाकरणैः स्वीकारात्तद्व्यञ्जकत्वेन भवदभिमतेनेत्यर्थः । **उपपत्तेरिति** । वर्णसमुदायात्मकपदस्मरणोपपत्तेरित्यर्थः । स्फोटव्यञ्जकत्वेन भवदङ्गीकृतस्यैव यावदर्थविषयकसंस्काराणामुद्बोधकत्वेनास्माभिरु-

इदं तु बोध्यम्। यत्र द्वारमित्युक्तं, तत्र पिधेहीति पदस्य ज्ञानादेव बोधः, न तु पिधानादिरूपार्थज्ञानात्, पदजन्यतत्तत्पदार्थोपस्थितेस्तत्तच्छाब्दबोधे हेतुत्वात्। किञ्च क्रियाकर्मपदानां तेन तेनैव रूपेणाऽऽकाङ्क्षितत्वात्

दिनकरी।

अवान्तरवाक्यार्थबोधपूर्वकमहावाक्यार्थबोधेऽवान्तरवाक्यार्थस्मरणमेव कारणं, न तु समूहालम्बनस्मृतिः, न हि शाब्दबोधे पदजन्यपदार्थोपस्थितिः कारणम्, लाघवेन पदार्थोपस्थितेरेव हेतुत्वात्, अत एव द्वारमित्यादौ न पिधेहीतिपदाध्याहारः, किन्त्वर्थाध्याहार एवेति प्रभाकरमतं दूषयति—**इदं तु बोध्यमित्यादिना। पदजन्येति**। पदार्थोपस्थितिमात्रस्य हेतुत्वे प्रत्यक्षादिनोपस्थितस्याऽपि शाब्दबोधापत्तिरिति भावः। ननु प्रत्यक्षोपस्थितकलशपटादेः शाब्दबोधाभावस्तात्पर्याभावात्, तत्सत्त्वे त्विष्टापत्तिरत आह **किञ्चेति**। **तेनैवेति**। द्वारं कर्मत्वं पिधानं कृतिरिति वाक्याद्द्वारकर्मकपिधानान्वयबोधानुदयाद्द्वारं पिधेहीत्यानुपूर्वीरूपाकाङ्क्षाज्ञानहेतुत्वस्याऽवश्यं वाच्यतया तादृशाकाङ्क्षाज्ञानार्थं पिधेहीतिपदाध्याहार आवश्यक इति भावः। ननु द्वारकर्मकपिधानानुकूलकृतिबोधे आनुपूर्वीविशेषस्य द्वारपदोत्तराऽम्पदरूपस्य पिधेहीत्याकारस्य वा ज्ञानं कारणमतो न द्वारं कर्मत्वं पिधानं कृतिरित्यस्माच्छाब्दबोधापत्तिः, तथा च द्वारमित्युक्ते पिधेहीति पदस्य नाऽध्याहारः। न च तादृशानुपूर्व्याः परस्परं व्यभिचारः, अव्यवहितोत्तरत्वस्य कार्यतावच्छेदके निवेशात्। न च यत्र द्वारं पिधानं कृतिरिति द्वारं कर्मत्वं पिधेहीति चोक्तं, तत्राऽपि द्वारकर्मकपिधानानुकूलकृतेः शाब्दबोधापत्तिरिति वाच्यम्। इष्टापत्तेः। प्रत्यक्षानुमानादिनोप-

रामरुद्री।

पगन्तव्यत्वादिति भावः। **ननु समुहालम्बनेति**। पूर्वाकरीत्या समूहालम्बनपदस्मरणजन्ययावत्पदार्थविषयिणी खण्डवाक्यार्थस्मृतिरित्यर्थः। नन्वेवं पदजन्यतत्तत्पदार्थस्मरणं विना तत्तत्पदार्थविषयकशाब्दबोधः कथमुत्पद्येत खण्डवाक्यार्थविषयकस्मरणस्य पदजन्यत्वाभावादित्यत आह—**नहीति**। मूले पदजन्यपदार्थोपस्थितेस्तच्छाब्दबोधे हेतुतया पिधेहीतिपदज्ञानं विना पिधानविषयकशाब्दबोधानुपपत्तेः पदाध्याहार आवश्यक इत्युक्तम्। तत्र सङ्कुच्छते। लाघवात्पदार्थोपस्थितित्वेनैव शाब्दबोधं प्रति कारणतायास्तैरङ्गीकारादित्यतस्तद्भावमाह—**पदार्थोपस्थितिमात्रस्येति**। प्राभाकरैर्यत्किंचित्पदार्थोपस्थितिसत्त्व एव तत्सहकृतपदजन्यपदार्थस्मरणाच्छाब्दबोधः स्वीक्रियते नतु यत्किञ्चित्पदज्ञानं विनापि शाब्दबोधः स्वीक्रियते। एवं च पदार्थोपस्थितित्वेनैव शाब्दबोधहेतुत्वे प्रत्यक्षादिनोपस्थितानां तत्तत्पदार्थानां पदज्ञानं विनैव शाब्दबोधापत्तिरिति मूलाभिप्राय इति भावः। **तात्पर्याभावादिति**। तात्पर्यज्ञानस्यापि शाब्दबोधहेतुत्वोपगमाद्वक्तुरिच्छाया एव तात्पर्यरूपत्वात्किंचित्पदस्याप्यनुच्चारणे वक्तुरिच्छारूपतात्पर्यस्यैवासंभवादिति भावः। यत्किंचित्पदोच्चारणस्थले स्वध्याहृतार्थान्तरविषयकशाब्दबोधोऽपि तत एवेत्याह—**तत्सत्त्वेत्यित्यादिना**। ननु कारकपदस्य क्रियापदं विना शाब्दबोधजनकत्वे द्वारं पिधानं कृतिरित्यत्रापि द्वारकर्मकपिधानानुकूलकृतिविषयकशाब्दबोधापत्तिरिति क्रियापदं विना कारकपदस्य शाब्दबोधाजनकत्वमुपेयम्। तथा च क्रियापदाध्याहार आवश्यक इति किंचेत्यादिमूलाशयो न संभवति द्वारमित्युक्ते प्रत्यक्षादिनोपस्थितपिधानादिविषयकशाब्दबोधोपगन्तॄणां निराकाङ्क्षितपदादुपस्थितपिधानादेः शाब्दबोधेऽपीष्टापत्तिसंभवादित्यतस्तात्पर्यं वर्णयति—**द्वारमिति**। तथा च तात्पर्यसत्त्वेऽपि निराकाङ्क्षसकलपदस्थले शाब्दबोधस्यानुभवविरुद्धत्वेन द्वारकर्मकपिधानानुकूलकृतिशाब्दबोधे द्वा पिधेहीत्यानुपूर्वीज्ञानस्य हेतुताया आवश्यकत्वेन क्रियापदानध्याहारे तादृशानुपूर्वीज्ञानाभावेन शाब्दबोधानुपपत्तिरिति क्रियापदाध्याहार आवश्यक इति

पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता ॥ ८३ ॥

तेन क्रियापदं विना कथं बोधः स्यात् ? तथा पुष्पेभ्य इत्यादौ स्पृहयतीत्यादिपदाध्याहारं विना चतुर्थ्यनुपपत्तेः पदाध्याहार आवश्यकः । ॥ इत्यासत्तिनिरूपणम् ॥

योग्यतां निर्वक्ति, पदार्थ इति । **एकपदार्थेऽपरपदार्थसम्बन्धो योग्यतेत्यर्थः । तज्ज्ञानाभावाच्च वह्निना सिञ्चतीत्यादौ न शाब्दबोधः । नन्वेतस्या योग्यताया ज्ञानं शाब्दबोधात् प्राक् सर्वत्र न सम्भवति, वाक्यार्थस्याऽपूर्वत्वादिति चेन्न । तत्तत्पदार्थस्मरणे सति क्वचित् संशयरूपस्य, क्वचिन्निश्चयरूप-**

दिनकरी ।

स्थितस्येव निराकाङ्क्षपदेनोपस्थितस्याऽपि बोधे बाधकाभावादत आह—**तथा पुष्पेभ्य इति** । स्पृहयतीत्यादिना क्रुध्यति, द्रुह्यति, असूयति, ईर्ष्यतीत्यादिपरिग्रहः । **चतुर्थ्यनुपपत्तेरिति** । कर्मत्वार्थकचतुर्थ्याः स्पृहयतियोग एवाऽनुशासनेन बोधनादिति भावः । अत्रेदं चिन्त्यम् । अस्त्वेवंरीत्या क्वचित् पदाध्याहारः, तावताऽपि तज्जन्योपस्थितित्वेन न शाब्दबोधहेतुत्वम् , लाघवेन पदार्थोपस्थितित्वस्यैव जनकतावच्छेदकत्वात् , तथा च द्वारमित्यादौ कथञ्चिदुपस्थितस्य पिधानादेर्बोधे बाधकाभावादर्थाध्याहारपक्ष एवोचित इति ।

॥ इत्यासत्तिनिरूपणम् ॥

मूले—'पदार्थे तत्र तद्वत्ता योग्यता परिकीर्तिता—'इत्यनेन तत्तत्पदार्थे तत्तत्पदार्थवत्त्वं योग्यतेत्युक्तम् , तच्चाऽयुक्तमनुपयुक्तं च । स्वस्मिन् स्वाधिकरणत्वाभावात् , तज्ज्ञानस्य शाब्दबोधे हेतुत्वाभावाच्चेत्यतः प्रथमं तत्पदमेकपदार्थपरं, द्वितीयं च तत्पदमपरपदार्थपरमित्यभिप्रायेण व्याचष्टे **एकपदार्थ इति** । योग्यताज्ञानस्य शाब्दबोधहेतुत्वे मानमाह—**तज्ज्ञानाभावाच्चेति** । **अपूर्वत्वादिति** । सर्वत्र शाब्दबोधात् पूर्वमनिश्चितत्वादित्यर्थः । **क्वचित् संशयरूपस्येति** । संशयनिश्चयसाधारणयोग्यताज्ञानत्वेन हेतुत्वादिति भावः । अत एव निश्चयमपि दर्शयति **क्वचिदिति** । भूतले घट इति-

रामरुद्री ।

भावः । **क्रुध्यतीत्यादि** । क्रुधद्रहेर्ष्यासूयार्थधातुयोगे यं प्रति कोपस्तस्य सम्प्रदानसंज्ञाविधानात्संप्रदाने चतुर्थीविधानादिति भावः । **अनुशासनेनेति** । स्पृहियोगे इच्छाविषयस्य संप्रदानसंज्ञाविधानादितिभावः । इच्छार्थकधातुयोगे तु पुष्पादिपदोत्तरं द्वितीयैव साधुर्न चतुर्थी । तद्योगे इच्छाविषयस्य संप्रदानसंज्ञाया अविधानादतश्चतुर्थ्या साधुत्वोपपत्तये स्पृहयतीतिपदाध्याहार आवश्यक इति समुदायतात्पर्यम् । **क्वचिदिति** । पुष्पेभ्य इत्यादावित्यर्थः । चतुर्थीसाधुत्वोपपत्तये स्पृहयतीत्यादिपदाध्याहारोऽस्त्वित्यर्थः । **तज्जन्योपस्थितित्वेनेति** । स्पृहादिधातुजन्योपस्थितित्वेनेत्यर्थः । **न शाब्दबोधहेतुत्वमिति** । लाघवेन शाब्दबोधमात्रंप्रत्येव पदार्थोपस्थितित्वेनैव हेतुत्वावधारणात् । तथाच द्वारमित्यादौ पिधेहीत्यादिशब्दाध्याहारो नावश्यक इति भावः । इदमत्र चिन्त्यम् । पिधान कुर्विति शब्दप्रयोगं द्वारमिति द्वितीयापि न साधुः । कर्तृकर्मणोः कृतीत्यनेन षष्ठ्या द्वितीयाबाधनात् । तथाच पुष्पेभ्य इत्यादाविव द्वारमित्यत्रापि द्वितीयासाधुत्वोपपत्तये पिधेहीतिपदाध्याहार आवश्यक एवेति ।

इत्यासत्तिनिरूपणम् ॥

तच्चायुक्तमिति । अयुक्तत्वमेवोपपादयति—**स्वस्मिन्निति** । अनुपयुक्तत्वमुपपादयति—**तज्ज्ञानस्येति**॥

स्य योग्यताज्ञानस्य सम्भवात् ।

नव्यास्तु योग्यताज्ञानं न शाब्दबोधहेतुः, वह्निना सिञ्चतीत्यादौ सेके वह्निकरणकत्वाभावरूपायोग्यतानिश्चयेन प्रतिबन्धान्न शाब्दबोधः । तदभावनिश्चयस्य लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे प्रतिबन्धकत्वाच्छाब्दबोधं प्रत्यपि प्रतिबन्धकत्वं सिद्धम् । योग्यताज्ञानविलम्बाच्च शा-

दिनकरी ।

प्रात्यक्षिकनिश्चयोत्तरभाविनि शाब्दबोध इत्यर्थः ।

नव्यास्त्विति । ननु अयोग्यतानिश्चयस्य प्रतिबन्धकत्वे तदभावत्वेन हेतुत्वं वाच्यम्, तदपेक्षया लाघवेन योग्यताज्ञानहेतुत्वस्यैवोचितत्वादत आह **तदभावनिश्चयस्येति** । बाधनिश्चयकालेऽपि लौकिकसन्निकर्षजन्यतद्विशिष्टबुद्धेरुदयादाह **लौकिकसन्निकर्षाजन्येति** । शङ्खो न पीत इति निश्चयेऽपि पित्तादिदोषवशात् पीतः शङ्ख इति प्रत्ययोदयात् दोषविशेषाजन्येत्युक्तम् । शुक्तौ नेदं रजतमिति ज्ञानोत्तरं दोषजन्यस्येदं रजतमिति भ्रमस्य वारणाय विशेषेति । पित्तमण्डूकवसाञ्जनादिदोषेत्यर्थः । **तद्ज्ञानमात्रे**—तद्विशिष्टबुद्धिमात्रे । **सिद्धमिति** । तथा चाऽयोग्यताज्ञानस्य शाब्दबोधं प्रति प्रतिबन्धकत्वस्य क्लृप्तत्वात् तेनैव निर्वाहेऽयोग्यताज्ञानस्यातिरिक्तप्रतिबन्धकत्वं न कल्प्यते इति भावः । ननु यत्र न योग्यताज्ञानं तत्र शाब्दबोधापत्तिरित्यत आह—**योग्यताज्ञानविलम्बाच्चेति** । तथा चेष्टापत्तिरिति भावः । 'आहुः'इत्यस्वरसः । तद्बीजं तु यद्विषयकमनुमित्यादिकं न जातं, शाब्दबोध एव जातः, तद्विशिष्टबुद्धावयोग्यताज्ञानाभावत्वापेक्षया लाघवेन योग्यताज्ञानत्वेनैव हेतुतासिद्धिः । एवञ्च 'यद्विशेषयोः–' इतिव्याप्तिबलाच्छाब्दसामान्ये योग्यताज्ञानत्वेन हेतुतासिद्धिर्दुर्वारेति । एवमिच्छाया उत्तेजकत्वानुरोधेनाऽयोग्यताज्ञानप्रतिबन्धकत्वस्य विशेषतः पर्यवसानात् क्लृप्तप्रतिबध्यतावच्छेदकस्याऽनुमितित्वादेः शाब्दबोधसाधारण्याभावाच्छाब्दबोधेऽयोग्यत्वनिश्चयस्याऽतिरिक्तप्रतिबन्धकताकल्पने गौरवाल्लाघवेन योग्यताज्ञानस्यैव हेतुत्वं युक्तमिति । न च योग्यताज्ञानस्य हेतुत्वे

रामरुद्री ।

ननु वाक्यार्थज्ञानं विना वाक्यप्रयोगासंभवेन वाक्यप्रयोगमूलभूतं ज्ञानं प्रत्यक्षादिरूपमेव वाच्यम् । तस्यापि शाब्दत्वेऽनवस्थाप्रसङ्गात् । तथाच यद्विषयकमनुमित्यादिकं न जातं शाब्दबोध एव जात इत्यादिकमसङ्गतमेव । एवं यद्विशेषयोरित्यादिनियमोऽप्यप्रयोजक एवेत्यस्वरसादाह—**एवमिच्छाया इत्यादि** । लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतद्वत्ताबुद्धिसामान्ये तदभावनिश्चयत्वेन सामान्यतः प्रतिबन्धकता न संभवति । घटाभाववदूभूतलमितिनिश्चयोत्तरमपि घटप्रकारकभूतलविशेष्यकचाक्षुषं मे जायतामितीच्छाबलाद्घटादेरुपनयसन्निकर्षेण भूतलादौ चाक्षुषोत्पत्त्या व्यभिचारापत्तेः, किन्तु तच्चाक्षुषेच्छाविरहविशिष्टतदभावनिश्चयत्वेन विशिष्यैव प्रतिबध्यप्रतिबन्धकभावो वक्तव्यः । अनुमितिस्थले च तत्प्रकारकानुमितित्वेन तदभावनिश्चयत्वेनेच्छाविरहविशिष्टत्वमन्तर्भाव्यैव प्रतिबध्यप्रतिबन्धकभावः कल्पनीयः, परोक्षज्ञानस्याहार्यस्यानभ्युपगमात् । एवं च शाब्दबुद्धावयोग्यतानिश्चयस्य पृथगेव प्रतिबन्धकत्वं कल्पनीयम् । तदपेक्षया लाघवेन योग्यताज्ञानहेतुताकल्पनमेवोचितमिति भावः । नच प्रत्यक्षान्यतद्वत्ताज्ञानत्वेन तदभावनिश्चयत्वेनानुमितिस्थले प्रतिबन्धकताकल्पनाच्छाब्दबोधस्थले न प्रतिबध्यप्रतिबन्धकभावान्तरं कल्पनीयमिति वाच्यम् । प्रत्यक्षान्यत्वज्ञानत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहेण गुरुभूतप्रतिबध्यप्रतिबन्धकभावद्वयापत्त्या प्रतिबध्यतावच्छेदककोटौ शाब्द-

ब्दबोधविलम्बोऽसिद्ध इत्याहुः ॥ ८२ ॥ ८३ ॥ इति योग्यतानिरूपणम् ॥

दिनकरी ।

ऽप्रामाण्यनिश्चयाभावस्तत्र विशेषणम् , तदपेक्षया अप्रामाण्यज्ञानाभावविशिष्टायोग्यतानिश्चयाभावस्य हेतुत्वे लाघवमिति वाच्यम् । **योग्यताज्ञानस्य** हेतुत्वे **तदभाववति** तत्प्रकारकमित्येकविधाप्रामाण्यग्रहाभावनिवेशेन लाघवात् । **अयोग्यतानिश्चयस्य** प्रतिबन्धकत्वे तु **तदभावाभाववति** तदभावप्रकारकं, तद्वति तदभावप्रकारकमितिद्विविधाप्रामाण्यग्रहाभावनिवेशेन प्रतियोगितासम्बन्धावच्छिन्नप्रतियोगिताकतदभाववत्यभावे प्रतियोगितासम्बन्धेन तत्प्रकारकमित्यप्रामाण्यग्रहाभावनिवेशेन च गौरवात् , **बाधनिश्चयस्येव** तदभावव्याप्यतदभावावच्छेदकनिश्चययोः प्रतिबन्धकत्वेनाऽतिगौरवाच्चेति । एवं योग्यताज्ञानस्य शाब्दबोधाजनकत्वे शाब्दसामग्रीकाले योग्यताज्ञानाभावविशिष्टात्मत्वमानसवारणाय तत्र शाब्दसामग्र्याः प्रतिबन्धकत्वं कल्पनीयमिति गौरवम् । योग्यताज्ञानस्य शाब्दबोधजनकत्वे तु तत्र योग्यताज्ञानाभावरूपविषयाभावादेव न तादृशमानसमिति तत्र शाब्दसामग्रीप्रतिबन्धकत्वं न कल्प्यते इति लाघवमित्याशयेनसेयम्(१) ॥८२–८३॥ ॥इति योग्यतानिरूपणम्॥

रामरुद्री ।

त्वानुमितित्वे निवेश्य लघुभूतप्रतिबध्यप्रतिबन्धकभावस्यैवोचितत्वादिति भावः । **अप्रामाण्यनिश्चयाभाव इति ।** ससयनिश्चयसाधारणज्ञानं यत्र हेतुस्तत्राप्रामाण्यसन्देहो न कारणताविघटकः । ज्ञानेऽप्रामाण्यसन्देहेन विषयसदेहस्यैव जननात् संदेहस्यापि कारणत्वादतस्तत्राप्रामाण्यनिश्चयस्यैव कारणताविघटकत्वेन निश्चयाभाव एव कारणताबच्छेदककोटौ निवेशनीय इति निश्चयत्वांशस्य निवेशनीयतया गौरवम् । अयोग्यतानिश्चयस्य प्रतिबन्धकत्वे तु अप्रामाण्यसन्देहस्यापि प्रतिबन्धकताविघटकत्वेनाप्रामाण्यज्ञानसामान्याभाव एव प्रतिबन्धकतावच्छेदककोटौ निवेशनीय इति निश्चयत्वांशानिवेशप्रयुक्तलाघवमिति भावः । यद्यप्ययोग्यतानिश्चयाभावत्वेन कारणत्वेऽपि निश्चयत्वांशनिवेश आवश्यक एव तथापि तदप्रकारकत्वे सति तदभावप्रकारत्वरूपायोग्यतानिश्चयत्वापेक्षया तदभाववति तत्प्रकारत्वरूपाप्रामाण्याभाववति तादृशाप्रामाण्यप्रकारकत्वरूपाप्रामाण्यनिश्चयत्वस्य गुरुतयाऽयोग्यतानिश्चयत्वमेव कारणतावच्छेदककोटौ निवेशयितुमुचितमिति भावः । **योग्यताज्ञानस्य हेतुत्व इत्यादि ।** भूतलं घटवदित्यादिशाब्दबोधे भूतलविशेष्यकघटप्रकारकज्ञानं कारणम् । तत्र चाप्रामाण्यज्ञानं घटाभाववति घटप्रकारकमित्येकविधमेव । भूतलविशेष्यकघटाभावप्रकारकनिश्चयधर्मिकं चाप्रामाण्यज्ञानं घटाभावाभाववति घटाभावप्रकारकं घटवति घटाभावप्रकारकं प्रतियोगितया घटाभाववत्यभावे प्रतियोगितया घटप्रकारकमिति त्रिविधम् । तथाच त्रिविधाप्रामाण्यज्ञाननिवेशापेक्षया एकविधाप्रामाण्यनिश्चया एव लाघवमिति भावः । एव यत्र यदभावनिश्चयः प्रतिबन्धकस्तत्र तदभावव्याप्यवत्तानिश्चयस्तदभावावच्छेदकत्वेन गृहीतो यो धर्मस्तन्निश्चयश्चप्रतिबन्धक इति तादृशनिश्चयाभावस्य कारणता अयोग्यत्वनिश्चयाभावहेतुता वादिना कल्पनीया । योग्यताज्ञानहेतुतावादिना तु न कल्पनीया । तादृशान्यतमनिश्चयसत्त्वे योग्यताज्ञानरूपकारणविरहादेव शाब्दबोधवारणसंभवादिति लाघवमित्याह—**बाधनिश्चयस्येवेति । शाब्दबोधाजनकत्व इति ।** अयोग्यताज्ञानाभावस्यैव शाब्दबोधकारणत्वपक्ष इत्यर्थः । **शाब्दसामग्रीकाले** अयोग्यतानिश्चयाभावघटितसामग्रीसत्त्वे इत्यर्थः । **योग्यताज्ञानाभावेति ।** एकपदार्थेऽपरपदार्थप्रकारकज्ञानाभाववानहमिति मानसप्रत्यक्षं प्रति भूतलं घटवदितिशाब्दसामग्र्याः प्रतिबन्धकत्वं कल्पनीयमित्यर्थः । भिन्नविषयक शाब्दसामग्र्या बलवत्त्वादिति भावः । **कल्पनीयमिति ।** योग्यताज्ञानघटितशाब्दसामग्रीसत्त्वे तदभावरूपविषयाभावादेव न प्रत्यक्षसामग्री, योग्यताज्ञानाभावे तु शाब्दसामग्र्यभावात्तादृशप्रत्यक्ष इष्टापत्तिरेवेति भावः॥ ८२ ॥ ८३ ॥ इति योग्यतानिरूपणम् ।

---

(१) वस्तुतस्तु शाब्दधीसाधारणविशिष्टबुद्धिसामान्यं प्रत येव बाधनिश्चयस्य प्रतिबन्ध

यत्पदेन विना यस्याऽननुभावकता भवेत् ।

आकाङ्क्षां निर्वक्ति यत्पदेनेत्यादि । **येन पदेन विना यत्पदस्याऽन्वयान-**

दिनकरी ।

तेन पदेन सह तस्येति । तत्पदविशिष्टत्वं तत्पदस्येत्यर्थः । घटमानयेत्यत्र **घट-**

पदं विना अम्पदस्याऽन्वयाननुभावकत्वाद्घटपदविशिष्टत्वमम्पदे आकाङ्क्षा । घटः

रामरुद्री

ननु मूले तेन पदेन सह तस्याकाङ्क्षेत्युक्तम् । नैतावताऽऽकाङ्क्षाज्ञानस्वरूपनिर्वाह इत्यस्वरसाद्याचष्टे—**तत्पदविशिष्टत्वमिति** । अव्यवहितपूर्ववृत्तित्वाव्यवहितोत्तरत्वान्यतरसंबन्धेनेत्यादिः ।

कत्वे मुखं चन्द्र इत्यादिमुखचन्द्राद्यभेदान्वयबोधकरूपकादौ प्रहसनादौ च बाधनिश्चयसत्त्वेऽपि अनुभवसिद्धस्य शाब्दबोधस्याऽपलापापत्तिः, कलहादौ मिथ्याभिशापवचनाच्छाब्दबोधानुपपत्तिश्च । न च तत्रेष्टापत्तिः कर्तुं शक्या, तत्र शाब्दबोध विना क्रोधाद्यनुपपत्तेः । अत एवोक्तं—

'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि ।

बाधात्तु न प्रमा तत्र अतः प्रामाण्यनिश्चयः—'इत्यादि ।

बाधितत्वेत निश्चितेऽप्यर्थे शब्दो ज्ञानं जनयति, किन्तु तदानीं तज्ज्ञाने प्रामाण्याभावज्ञानमात्रं जायते, अतः प्रामाण्यनिश्चयो निष्कम्पप्रवृत्तिप्रयोजकः अन्यथा तत्राऽपि प्रवृत्त्यापत्तेरिति तदर्थात् । तथा च शाब्दान्यविशिष्टबुद्धि प्रत्येव बाधनिश्चयस्य प्रतिबन्धकतया वह्निना सिञ्चतीत्यादौ बाधनिश्चयसत्त्वे शाब्दबोधवारणाय योग्यताधीः शाब्दधीहेतुरावश्यकी । न च योग्यताज्ञानस्य हेतुत्व एव बाधितार्थकरूपकादौ कथ शाब्दधीः ? बाधनिश्चयसत्त्वेन तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नवत्त्वरूपयोग्यताज्ञानस्यैवाऽसम्भवात्, अन्यथा वन्हिना सिञ्चतीत्यादावपि शाब्दबोधस्य दुर्वारत्वादिति वाच्यम् । बाधनिश्चयसत्त्वेऽप्याहार्ययोग्यताज्ञानादेव तत्र शाब्दबोधसम्भवात् । वह्निना सिञ्चतीत्यादावपि बाधनिश्चयसत्त्वेऽप्याहार्ययोग्यताज्ञानात् कदाचिच्छाब्दबोधस्येष्टत्वात् । न चैवं शङ्खो न पीत इत्यादिबाधनिश्चयेऽपि शङ्खः पीत इति दोषविशेषजन्ययोग्यताभ्रमेण शङ्ख पीत इति शाब्दबोधप्रसङ्गः, बाधनिश्चयविरहदशायां शङ्खः पीत इति दोषविशेषजन्ययोग्यताभ्रमाच्छङ्खः पीत इतिशाब्दबोधोदयाद्दोषविशेषजन्ययोग्यताज्ञानस्याऽपि हेतुत्वेनाऽभ्युपेयत्वादिति वाच्यम् । असत्यप्रामाण्यनिश्चये इष्टत्वात्, आहार्ययोग्यताज्ञानतुल्यत्वात् । एवं यदैकेन्द्रियजन्यबाधनिश्चयसत्त्वेऽप्यन्येन्द्रियजन्ययोग्यताज्ञानं, आनुमानिकबाधनिश्चयसत्त्वेऽपि लौकिकप्रत्यक्षात्मकयोग्यताज्ञानं च, तदा तत्राऽपि शाब्दबोधे इष्टापत्तिः आहार्ययोग्यताज्ञानतुल्यत्वात् । ननु बाधितार्थकरूपकादौ शाब्दबोध एवाऽऽहार्यात्मकोऽभ्युपेयताम्, तथा चाऽऽहार्यप्रत्यक्षेतरत्ववदाहार्यशाब्देतरत्वस्याऽपि बाधनिश्चयप्रतिबध्यतावच्छेदके प्रवेशादेव बाधितार्थकरूपकादौ बाधनिश्चयसत्त्वे शाब्दबोधस्य वह्निना सिञ्चतीत्यादौ शाब्दबोधाभावस्य च सम्भवे किं पृथग्योग्यताधीहेतुत्वेन ? तवाऽपि शाब्देतरत्वस्य प्रतिबद्धयतावच्छेदके प्रवेशस्याऽऽवश्यकत्वात् । न च मम शाब्देतरत्वं शाब्दत्वावच्छिन्नप्रतियोगिताकोऽखण्डो भेदः, तवाऽऽहार्यशाब्देतरत्वमाहार्यत्वस्याऽनुगतस्याऽभावात्तत्तच्छाब्दबुद्धिभेदकूटरूपमिति प्रतिबद्धयतावच्छेदकगौरवमिति वाच्यम् । अतिरिक्तकार्यकारणभावकल्पनामपेक्ष्य कार्यतावच्छेदककारणतावच्छेदकयोः शरीरगौरवस्य न्याय्यत्वात्, तत्तदप्रामाण्यज्ञानाभावकूटविशिष्टयोग्यताज्ञानस्यैव शाब्दधीहेतुतया कार्यकारणभावान्तरकल्पनं पुनरधिकमिति चेन्न । शाब्दबोधस्याऽऽहार्यत्वाभ्युपगमेऽपसिद्धान्तात्, प्रत्यक्षेतरज्ञानस्याऽऽहार्यत्वानभ्युपगमादिति ध्येयम् ।

नुभावकत्वं, तेन पदेन सह तस्याऽऽकाङ्क्षेत्यर्थः। क्रियापदं विना कारकपदं नाऽन्वयबोधं जनयतीति तेन तस्याऽऽकाङ्क्षा।

वस्तुतस्तु क्रियाकारकपदानां सन्निधानमासत्त्या चरितार्थम्। परं तु घटकर्मतावोधं प्रति घटपदोत्तरद्वितीयारूपाकाङ्क्षाज्ञानं कारणम्। तेन घटः कर्मत्वमानयनं कृतिरित्यादौ न शाब्दबोधः। अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ तु पुत्रेण सह राजपदस्य तात्पर्यग्रहसत्त्वात् तेनैवाऽन्वय-

दिनकरी।

कर्मत्वमित्यादौ कर्मत्वपदे घटपदवत्त्वं तु नाऽऽकाङ्क्षा, कर्मत्वपदे घटीया कर्मतेति शाब्दबोधाननुभावकत्वस्य घटपदविरहाप्रयुक्तत्वात्। अत्र चाऽननुभावकत्वं तादृशपदपरिचायकं, न त्वाकाङ्क्षास्वरूपान्तर्गतम्। यद्वा अननुभावकत्वमप्याकाङ्क्षास्वरूपान्तर्गतम्, शाब्दबोधे तस्य स्वरूपत एवोपयोगः तेन जनितान्वयबोधाद्वाक्यान्न पुनरन्वयबोधापत्तिः। एकपदेऽपरपदवत्त्वांशश्च ज्ञात एवोपयुज्यते। **तेन**–क्रियापदेन। **तस्य**–कारकपदस्य।

अत्र चैकपदेऽपरपदवत्त्वं–अपरपदाव्यवहितोत्तरत्वम्। तत्र चाऽव्यवधानांशस्याऽऽसत्त्यैव लाभः। आसत्तेः पदाव्यवधानरूपतायाः पूर्वमुपवर्णितत्वात्। उत्तरत्वं च क्रियाकारकपदयोर्नाऽपेक्षितम्। चैत्रः पचति, पचति चैत्र इति वाक्यद्वयादप्यन्वयबोधात्, अतः क्रियाकारकपदयोराकाङ्क्षा नाऽस्त्येव, किन्तु प्रकृतिप्रत्यययोरेव। तत्राऽप्यव्यवधानांशस्याऽऽसत्त्या लाभात् प्रत्यये प्रकृत्युत्तरत्वरूपाकाङ्क्षाज्ञानं कारणमित्याह–**नस्तुतस्त्वि-**

रामरुद्री।

तथाच येन पदेन विना यत्पदस्य यादृशशाब्दबोधाजनकत्वमुक्तान्यतरसंबन्धेन तत्पदविशिष्टतत्पदत्वं तादृशशाब्दबोधप्रयोजकाकाङ्क्षेति भावः। **अत्र चेति।** अम्पदे घटपदाव्यवहितोत्तरत्वज्ञानसत्त्वे अम्पदे घटपदं विना शाब्दबोधाजनकत्वज्ञानविलम्बेन शाब्दबोधविलम्बस्याननुभवादम्पदस्यघटपदाव्यवहितोत्तरत्वमेवाकाङ्क्षा। अम्पदे घटपदज्ञानं विना शाब्दबोधाजनकत्वं नाऽऽकाङ्क्षाशरीरे निविष्टम्। तदुक्तिस्तु अम्पदघटपदादीनां विशिष्यज्ञानार्थमेव। घटपदकर्मत्वपदयोस्तु न तादृशत्वं कर्मत्वपदस्य घटीया कर्मतेतिशाब्दबोधाजनकताया घटपदविरहाप्रयुक्तत्वात्। घटपदसत्त्वेऽपि तस्य तथाविधशाब्दबोधाजनकत्वादिति भावः। नन्वेवमपि जनितान्वयशाब्दबोधस्थले पुनः शाब्दबोधापत्तिरित्यस्वरसादाह—**यद्वेति। स्वरूपत एवेति।** तज्ज्ञानस्य शाब्दबोधे नोपयोगित्वमिति भावः।

ननु क्रियाकारकपदानां सन्निधानमासत्त्या चरितार्थमिति मूलमसङ्गतम्। अव्यवधानरूपसन्निधानस्याकाङ्क्षात्वानुपगमात्। किन्तूक्तान्यतरसंबन्धेनैकपदेऽपरपदवत्त्वस्यैवाऽऽकाङ्क्षारूपत्वेन पूर्वमभ्युपगतवादतस्तद्ग्रन्थं सङ्गमयितुमाह–**अत्रेति। अव्यवहितोत्तरत्वमिति।** अव्यवहितोत्तरत्वादीनां संबन्धत्वेमानाभावादिति भावः। ननु पदाव्यवधानस्यासत्तिरूपत्वेऽपि उत्तरत्वांशस्याकाङ्क्षात्वं स्वीकरणीयमित्यत आह—**उत्तरत्वं चेति।** इदंच पदयोरव्यवधानमासत्तिरिति प्राचीनमताभिप्रायेणोक्तम्। ग्रन्थकृन्मते तु पदज्ञानयोरव्यवधानस्यैवासत्तित्वेन तस्य च स्वरूपत एव शाब्दबोधकारणत्वेनाव्यवधानांशस्यापि नासत्त्या चरितार्थता। परंतु क्रियाकारकपदज्ञानयोरव्यवधानेनैव शाब्दबोधनिर्वाहे क्रियाकारकपदयोः

बोधः । पुरुषेण सह तात्पर्यग्रहे तु तेन सहाऽन्वयबोधः स्यादेव ।

॥ इत्याकाङ्क्षानिरूपणम् ॥

दिनकरी ।

त्यादिना । नन्वयमेति पुत्रो राज्ञ इत्यादावजनितान्वयबोधदशायां राजपदस्य पुत्रपदेनेव पुरुषपदेनाऽप्याकाङ्क्षासत्त्वाद्राज्ञः पुरुष इत्यन्वयबोधः स्यादत आह । **अयमेतोति । तथा** च राजपदपुरुषपदयोराकाङ्क्षायाः सत्त्वेऽपि तात्पर्याभावान्न तथाऽन्वयबोध इति भावः । **स्यादेवेति** । भवत्येवेत्यर्थः । ननु पुरुषेण पुत्रेण च राजपदस्य तात्पर्यज्ञानेऽपि पुत्रपदराजपदयोरेव यत्रैकवाक्यतानिश्चयः, पुरुषपदराजपदयोरेकवाक्यत्वाभावनिश्चयश्च, तत्र पुरुषपदेन सह निरुक्ताकाङ्क्षायाः सत्त्वाद्राज्ञः पुरुष इति बोधापत्तिरिति चेन्न । यत्पदं विनेत्यस्य समभिव्याहृतयत्पदं विनेत्यर्थकतया समभिव्याहारस्याऽप्याकाङ्क्षाशरीरे प्रवेशात् । समभिव्याहारश्चेदं पदमेतत्पदेन सहाऽन्वयं बोधयत्विति पदतात्पर्यम् । प्रकृते च तद्ज्ञानाभावात्तद्घटिताकाङ्क्षाज्ञानाभाव इति । समभिव्याहारस्य नाऽऽकाङ्क्षाशरीरे प्रवेशः, किन्तु स्वातन्त्र्येण तद्ज्ञानं शाब्दबोधे कारणमित्यन्ये । नव्यास्तु अर्थतात्पर्यज्ञानस्य राजपदं पुरुषविषयकराजसंसर्गप्रतीतीच्छयोच्चरितमित्याकारकज्ञानत्वादिना हेतुत्वादेन्नाऽतिप्रसङ्गाभावे समभिव्याहारज्ञानस्य हेतुत्वे मानाभावः । निरुक्ततात्पर्यनिश्चये पूर्वोक्तसमभिव्याहारस्य पदतात्पयरूपस्य संशये व्यतिरेकनिश्चये वा भवत्येव शाब्दबोध इत्याहुरित्यन्यत्र विस्तरः । **इदं तु बोध्यम्** । आकाङ्क्षालक्षणे तत्पदं तत्पदज्ञानपरम्, मौनिश्लोकानुरोधात्, अत एवाऽध्याहृतपदेनाऽप्याकाङ्क्षानिर्वाहः । अध्याहारश्चाऽश्रुतपदानामनुसन्धानम्,

रामरुद्री ।

पौर्वापर्यस्यानियमेन च तत्रैव नाकाङ्क्षाज्ञानस्योपयोग इति । वस्तुतो मौनिश्लोकानुरोधेनाग्रे एकपदज्ञानेऽपरपदज्ञानवत्त्वस्यैवाकाङ्क्षात्वेनोपगन्तव्यतया तदभिप्रायेणैवाव्यवधानांशस्यासत्त्या चरितार्थतोक्तेत्यवधेयम् । **अन्वयबोधः स्यादिति** । इदं च यत्पदेन विना यत्पदस्य नान्वयानुभावकत्वमित्यंशस्य पदद्वयपरिचायकत्वपक्षमादृत्योक्तम् । तदंशस्याप्याकाङ्क्षाशरीरान्तर्गतत्वे तु तस्य स्वरूपतः शाब्दबोधकारणत्वेन पुरुषपदं विना पुत्रपदेन सह राजपदस्य जनितान्वयबोधजनकत्वेन नेयमापत्तिः संभवतीत्यवधेयम् । **मूले अयमित्यादि** । पुत्रराज्ञोर्वक्तुः सबन्धबोधेच्छायां पुत्रेण सहैव राजपदार्थस्यान्वयबोधः । यदा तु पुरुषराज्ञोः संबन्धबोधेच्छा वक्तुस्तदा पुरुषराज्ञोरेवान्वयबोधो भवत्येव । तथाच तात्पर्यमेव कदाचित्पुत्रेण कदाचित्पुरुषेण बोधे नियामकं न त्वाकाङ्क्षेति भावः । **नन्वित्यादि । तात्पर्यज्ञान इति । पुरुषे पुत्रे** च राजसंबन्धबोधो भवत्विति वक्तुरिच्छाज्ञान इत्यर्थः । **एकवाक्यतानिश्चय इति** । राज इतिपदं पुत्रपदार्थेनान्वयबोधेच्छयोच्चरितं ननु पुरुषपदार्थेनान्वयेच्छयोच्चरितमिति निश्चयकाल इति समुदायार्थः ।

मतान्तरमाह—**समभिव्याहारस्य नाऽऽकाङ्क्षाशरीर इत्यादि । हेतुत्वादेवेति** । ननु राजपुरुषयोः संसर्गज्ञानं भवत्विति वक्तुरिच्छाज्ञानत्वेन तात्पर्यज्ञानं शाब्दबोधे हेतुरिति भावः ।

पूर्वोक्तसमभिव्याहारस्येति । इदं पदमेतत्पदेनान्वयबोधं जनयत्वित्याकारकवक्तुरिच्छारूपपदतात्पर्यस्येत्यर्थः । **आकाङ्क्षालक्षण इति** । तत्पदस्याव्यवहितोत्तरत्वसंबन्धेन तत्पदवत्त्वमाकाङ्क्षे याकाङ्-

आकाङ्क्षा वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम् ॥ ८४ ॥

तात्पर्यं निर्वक्ति—वक्तुरिच्छेति । **यदि तात्पर्यज्ञानं कारणं न स्यात्, तदा सैन्धवमानयेत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य बोध इति न स्यात् । न च तात्पर्यग्राहकाणां प्रकरणादीनां शाब्दबोधे कारणत्वमस्त्विति वाच्य-**

दिनकरी

अत एव सर्वापेक्षया जघन्यत्वं तस्य, यतः स्वस्थानस्थितस्य पुनरनुसन्धानमावृत्तिः, नेदीयःस्थानान्तरस्थितस्याऽनुसन्धानमनुषङ्गः, दवीयः स्थानान्तरस्थितस्याऽनुसन्धानमनुवृत्तिः । इदं च सिंहावलोकित—मण्डूकप्लुति—गङ्गास्रोतोवत्रिधेति । निराकाङ्क्षत्वज्ञानस्य प्रतिबन्धकत्वं, न त्वाकाङ्क्षाज्ञानस्य हेतुत्वमिति तु न सत् । तथा सत्याकाङ्क्षाभाव—तद्व्याप्य—तदवच्छेदकधर्मज्ञानानां प्रतिबन्धकत्वे गौरवादित्यलम् । ॥ इत्याकाङ्क्षानिरूपणम् ॥

वक्तुरिच्छेतोति । घटमानयेत्यादौ कर्मत्वविशेष्यकाधेयतासंसर्गकघटप्रकारकप्रतीतीच्छा वक्तुस्तात्पर्यं, तादृशेच्छयोच्चरितमिदं वाक्यमित्याकारकं श्रोतुस्तात्पर्यज्ञानं शाब्दबोधे कारणमित्यर्थः । तत्र युक्तिमाह । **सैन्धवेति** । आदिना श्वेतो धावतीत्यादिपरिग्रहः । तत्र कदाचिच्छ्वेतगुणविशिष्टस्य, कदाचित् कुक्कुरादेर्बोधस्य तात्पर्यज्ञाननियम्यत्वात् । **क्वचिल्लवणस्येति** । क्वचित्तदुभयोरित्यपि बोध्यम् । **इति न स्यादिति** । इति नियमो न स्यादित्यर्थः । इदमुपलक्षणम् । तात्पर्यसंशये व्यतिरेकनिश्चये वा शाब्दबोधानुदयाच्छाब्दबोधे तात्पर्यज्ञानं कारणम्, 'यत्संशय—' इति व्यासेरित्यपि बोध्यम् । **प्रकरणेति** ।

रामरुद्री ।

ज्ञालक्षण इत्यर्थः । **तत्पदज्ञानपरमिति** । तत्पदज्ञानस्याव्यवहितोत्तरत्वसंबन्धेन तत्पदज्ञानवत्त्वमेवाकाङ्क्षेत्यर्थः । अन्यथा मौनिश्लोके पदाभावादाकाङ्क्षानुपपत्तिरिति भावः । **सर्वापेक्षयेति** । अनुषङ्गाद्यपेक्षयेत्यर्थः । तेषु श्रुतपदस्यैवानुसन्धानकल्पनादिति भावः । **सिंहावलोकितेत्यादि** । सिंहस्तु स्वगृहान्निर्गत्य दूरं गत्वा पुनः परावृत्य स्वगृहं पश्यति तद्वदुत्तरत्र केषुचिद्वाक्येषु पूर्वतनपदस्यान्वयो नास्ति क्वचिदुत्तरवाक्ये पूर्वतनपदस्यान्वयः सा सिंहावलोकना । उत्तरवाक्येषु एकत्र पूर्वपदस्यान्वयः एकत्र नान्वयः पुनर्वाक्यान्तरे च तदन्वयस्तत्र मण्डूकप्लुतिः । उत्तरवाक्येषु क्रमेण सर्वत्र पूर्वपदान्वयो गङ्गास्रोत इति विभागो बोध्यः । इत्याकाङ्क्षानिरूपणम् ।

ननु मूले वक्तुरिच्छायास्तात्पर्यत्वं प्रतिपादितम् । तज्ज्ञानं शाब्दबोधे हेतुर्वाच्यः । तत्र च घटमानय पटमानयेति वाक्यद्वयप्रयोगस्थले वक्तुरिच्छाद्वयज्ञानात्कस्माद्वाक्यात्कीदृशार्थस्य बोधो भवतीति निर्णेतुमशक्यमतस्तात्पर्यज्ञानाकारं दर्शयति—**तादृशेच्छयेति** । तथाच स्वप्रयोज्योच्चरितत्वसंबन्धेन यादृशवाक्यविशेष्यकं वक्तुरिच्छारूपतात्पर्यज्ञानं भवति तत् तादृशवाक्यजन्यशाब्दबोधे कारणमिति नानियम इति भावः । **तत्र कदाचिदिति** । श्वेतः श्वेतवर्णो धावतीत्यर्थस्तात्पर्यविषयः, कदाचित् श्वा कुक्कुर इतो धावतीत्यर्थस्तात्पर्यविषय इत्यर्थः । **उभयोरित्यपीति** । इदं च सकृदुच्चरितः शब्दः सकृदेवार्थं गमयतीति नियमानभ्युपगमेनोक्तम् । अन्यथा सैन्धवपदस्यावृत्त्यभिप्रायेणेदमुक्तमिति मन्तव्यम् । **यत्संशयेति** । यत्संशयव्यतिरेकनिश्चयौ यदुत्पत्तिप्रतिबन्धकौ तन्निश्चयस्तद्धेतुरनुमितौ व्याप्तिरिवेति चिन्तामणावुक्तत्वादिति भावः । संयोगः सान्निध्यम् । वियोगो दूरत्वम् । साहचर्यम् एकदेशवृत्तित्वम् । घटोऽपसारणीय इत्यादौ समीपस्थे घटे तात्पर्यग्रहः सामीप्यात् । घटमत्रानयेत्यादौ घटपदस्य दूरस्थे घटे तात्पर्यग्रहो दूरत्वात् । घटं पटं चानयेत्यादौ घटपटपदयोरेकदेशवृत्तिघटपटयोस्ता-

म्। तेषामननुगमात्। तात्पर्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्यज्ञानमेव लाघवात् कारणमस्तु।

इत्थञ्च वेदस्थलेऽपि तात्पर्यज्ञानार्थमीश्वरः कल्प्यते। न च तत्राऽध्यापकतात्पर्यज्ञानं कारणमिति वाच्यम्। सर्गादावध्यापकाभावात्। न च प्रलय एव नाऽस्ति, कुत्र सर्गादिरिति वाच्यम्। प्रलयस्याऽऽगमेषु प्रतिपाद्यत्वात्।

इत्थञ्च शुकवाक्येऽपीश्वरीयतात्पर्यज्ञानं कारणम्। विसंवादिशुकवाक्ये तु शिक्षयितुरेव तात्पर्यज्ञानं कारणं वाच्यम्।

दिनकरी।

आदिना संयोग-वियोग-साहचर्यादीनां परिग्रहः। प्रकरणादीनां कल्पनियतपूर्ववर्तितावत्वेन अनन्यथासिद्धत्वमात्रकल्पने लाघवादिति भावः। **अननुगमादिति**। तथा च परस्परजन्यशाब्दबोधे परस्परव्यभिचारेण न हेतुत्वसम्भव इति भावः। **इत्थञ्चेति**। शाब्दबोधत्वावच्छिन्नं प्रति तात्पर्यज्ञानस्य हेतुत्वे चेत्यर्थः। एवमग्रेऽपि। प्रलयस्य-कार्यद्रव्यानधिकरणकार्याधिकरणकालविशेषात्मकखण्डप्रलयस्य। **आगमेष्विति**। 'नाऽहो न रात्रिर्न नभो न भूमिर्नाऽऽसीत्तमो ज्योतिरभून्न चाऽन्यत्-' इत्याद्यागमेष्वित्यर्थः।

शुकवाक्येऽपि—संवादिशुकवाक्यजन्यबोधेऽपि। **शिक्षयितुरेवेति**। ईश्वरेच्छायां

रामरुद्री।

स्पर्यग्रहः साहचर्यात्। आदिना आभिमुख्यादिपरिग्रहः। **कल्पनियतपूर्ववृत्तितकत्वेनेति**। तात्पर्यज्ञानहेतुतावादिनापि तात्पर्यज्ञानार्थमेव शाब्दबोधोत्पत्तेः पूर्वं प्रकरणादीनामवश्यं स्वीकरणीयत्वादिति भावः। **न हेतुतासभव इति**। तत्तदव्यवहितोत्तरत्वस्य तत्तत्कार्यतावच्छेदककोटौ निवेशेन व्यभिचारवारणे तु अतियुरुभूतानेककार्यकारणभावापत्तिरिति भावः।

अध्यापकाभावादिति। ईश्वरातिरिक्ताध्यापकाभावादित्यर्थः। तेनाध्यापकाभावे वेदात्मकवाक्यज्ञानाभावेन शाब्दबोधस्यैवासंभवेऽपि न क्षतिः। मूले महाप्रलयस्यागमप्रतिपाद्यत्वमुक्तम्। तच्चायुक्तम्। महाप्रलयस्यागमेनाप्रतिपादित्वात्। 'धाता यथापूर्वमकल्पय'दित्यादिना आगमे खण्डप्रलयस्यैव सूचितत्वात्। अतएव महाप्रलयविवादोऽपि सङ्गच्छते, आगमप्रतिपादितत्वे विवादासंभवादित्यतः प्रलयपदस्य खण्डप्रलयपरतामाह—**कार्यद्रव्येति। कार्याधिकरणेति**। अदृष्टादिरूपकार्याधिकरणेत्यर्थः। यद्यपि लाघवाद्द्रव्याधिकरणत्वमेव वक्तुमुचितम् तथापि प्रलये नित्यद्रव्यवृत्तितायां प्रमाणान्तरविरहेण तथा नोक्तम्। नच नित्यद्रव्याणां सदातनत्वरूपनित्यत्वानुपपत्तिरेव तत्र मानमिति वाच्यम्। ध्वंसप्रागभावाप्रतियोगित्वस्यैव नित्यतारूपत्वात्। अदृष्टस्य तु प्रलयवृत्तित्वमुत्तरसर्गानुपपत्त्या सिद्धमिति भावः। आगमे नभःशब्दार्थोऽन्तरिक्षादिलोक एव नभसो नित्यत्वात्। तमःशब्दार्थोऽपि परिच्छिन्नतम एव तेजोभावरूपतमसोनित्यत्वात्। ननु वह्निना सिञ्चतीत्यादिशुकवाक्ये ईश्वरीयतात्पर्यज्ञानं न कारणम्। ईश्वरेच्छाया विसंवादित्वापत्तेः। इत्थं च शुकवाक्येऽपीश्वरीयतात्पर्यज्ञानं कारणमिति मूलमसङ्गतम्। तादृशशुकवाक्ये तात्पर्यज्ञानस्याहेतुत्वादित्यतस्तदर्थमाह—**संवादीति**। प्रमाजनकेत्यर्थः। इदं च वह्निना सिञ्चतीति शुकवाक्यजन्यशाब्दबोधे ईश्वरीयतात्पर्यज्ञानं न हेतुः ईश्वरस्य विसंवादीच्छापत्तेरित्यतस्तादृशवाक्यव्युदासार्थमुक्तम्। न च वक्तुरिच्छायास्तात्पर्यरूपत्वेन ईश्वरस्य शुकवाक्यवक्तृत्वाभावेन कथमीश्वरेच्छायास्तात्पर्यरूपतेति वाच्यम्। वाक्यानुकूलप्रयत्नवत एव वक्तृत्वेन ईश्वरप्रयत्नस्य कार्यमात्रानुकूलत्वेन शुकवाक्यानुकूलत्वादिति भावः। शुकीयतात्पर्याभावेन अगत्या ईश्वरस्यैव वक्तृत्वस्वीकारादिति मन्तव्यम्। एवं शिक्षयितुः प्रयत्नस्य परम्परया शुकवाक्यानुकूलत्वेन शिक्षयितुरिच्छाया अपि तात्पर्यरूपता बोध्या।

अन्ये तु–नानार्थादौ क्वचिदेव तात्पर्यज्ञानं कारणम् । तथा च शुकवाक्ये विनैव तात्पर्यज्ञानं शाब्दबोधः । वेदे त्वनादिमीमांसापरिशोधिततर्कैरर्थावधारणमित्याहुः ॥ ८४ ॥ इति तात्पर्यनिरूपणम् ॥

इति श्रीविश्वनाथपञ्चाननभट्टाचार्यविरचितायां सिद्धान्तमुक्तावल्यां शब्दखण्डम् ॥ ४ ॥

दिनकरी ।

विसंवादित्वाभावादिति भावः । **अन्ये त्विति** । 'क्वचित्' इत्यस्य विवरणं नानार्थादाविति । गृहीतनानार्थवृत्तिकादावित्यर्थः । तेन गृहीतनानार्थशक्तिकस्य गृहीतनानार्थलक्षणाकस्य गृहीतविभिन्नार्थशक्तिलक्षणाकस्य च सङ्ग्रहः । आदिना एकार्थगृहीतलक्षणाकस्य सङ्ग्रहः। मीमांसा–लाघवज्ञानात्मकस्तर्कः । **परिशोधितेति** । सहकृतेत्यर्थः । तर्कः–अनुमानम् । 'आहुः'इत्यस्वरसोद्भावनम् । तद्बीजं तु गृहीतनानार्थवृत्तिकपदजन्यानुभवत्वापेक्षया लाघवेन पदजन्यानुभवत्वस्यैव तात्पर्यज्ञानजन्यतावच्छेदकत्वमुचितमित्यन्यत्राऽधिकमनुसन्धेयम् ॥ ८४ ॥ इति तात्पर्यनिरूपणम् ॥

इति श्रीमद्भारद्वाजकुलाम्बुधिपूर्णचन्दबालकृष्णभट्टात्मजमहादेवभट्टारब्धे तत्पुत्रदिनकरभट्टप्रपूरिते मुक्तावलीप्रकाशे शब्दपरिच्छेदाख्यः षष्ठः परिच्छेदः ।

रामरुद्री ।

सर्वत्र नानार्थस्थले तात्पर्यज्ञानस्य हेतुत्वोपगमात्क्वचिदित्यसङ्गतमित्यभिप्रायेणैव क्वचिदित्यस्यैव विवरणं नानार्थादावितीत्याह–**क्वचिदिति** । ननु नानार्थत्वं यदि नानार्थशक्तत्वं तदा नानार्थलाक्षणिकस्थले कदाचित्कस्यचिदर्थस्य बोधतात्पर्यनियमो न स्यादतो नानार्थगृहीतवृत्तिकत्वमेव नानार्थत्वमित्याह—**गृहीतेति** । गृहीतपदं तु नानार्थकहर्यादिपदस्यापि यदा एकस्मिन्नेवार्थे शक्तिग्रहस्तदा शक्तिग्रहेणैव शाब्दबोधनियमसंभवात्तात्पर्यज्ञानस्य शाब्दबोधनियामकत्वाभावादुपात्तम् । **विभिन्नार्थेति** । एकस्मिन्नर्थे गृहीतशक्तिकस्यान्यस्मिन्नर्थे गृहीतलक्षणाकस्येत्यर्थः । नन्वेवमादिपदग्राह्यं किमित्यत आह–**आदिनेति** । नच शक्यसम्बन्धस्यैव लक्षणात्वेन लक्षणाज्ञाने शक्तिज्ञानमावश्यकमेव तथाच विभिन्नार्थगृहीतशक्तिलक्षणाकस्येत्यनेन पूर्वोक्तेन गतार्थमिदमिति वाच्यम् । विभिन्नार्थस्य बहुवचनान्ततया गृहीता विभिन्नार्थेषु शक्तिर्लक्षणा यस्येति विग्रहेणानेकार्थेषु गृहीतशक्तिकस्य गृहीतलक्षणाकस्य पदस्यैव पूर्ववाक्यार्थत्वात् । मीमांसाशब्दार्थमाह–**लाघवज्ञानात्मकस्तर्क इति** । "कपिञ्जलानालभेते"त्यत्र प्रथमोपस्थितत्वलाघवेन त्रित्वस्यैव बहुवचनार्थतानिश्चयः । ननु परिशोधितेत्यस्य सहकृतार्थकत्वे लाघवतर्कसहकृततर्कान्तरं किमित्याकाङ्क्षायामाह–**तर्कोऽनुमानमिति** । अनुमानाकारश्च 'कपिञ्जलानितिबहुवचनार्थस्त्रित्वादिः बहुवचनवाच्यत्वादित्येवं रूपः । तत्र च लाघवज्ञानं सहकारि चतुष्ट्वादीनामपि बहुवचनवाच्यत्वादिति । एवं च वेदस्थले तात्पर्याज्ञानेनार्थनिर्णय इति । **अन्यत्राधिकमिति** । तात्पर्यसंशयादिस्थले शाब्दबोधाननुभवादपि शाब्दबोधमात्रे तात्पर्यज्ञानस्य हेतुत्वमावश्यकमिति भावः ॥८४॥ इति तात्पर्यनिरूपणम् ।

इति श्रीरामरुद्रभट्टाचार्यविरचितायां मुक्तावलीप्रकाशदिनकरीतरङ्गिण्यां शब्दतरङ्गः समाप्तः ॥

प्राप्तिस्थानम्—

चौखम्बा संस्कृत पुस्तकालय,

बनारस सिटी।

अथ स्मरणनिरूपणम् ।

पूर्वमनुभवस्मरणभेदाद् बुद्धेर्द्वैविध्यमुक्तं तत्राऽनुभवप्रकारा दर्शिताः स्मरणं तु सुगमतया न दर्शितम् । तत्र हि पूर्वानुभवः कारणम् ।

दिनकरी ।

सुगमतयेति । सुगमस्य स्वयमप्यूहितुं शक्यतया दुरूह एवाऽऽदौ सुधियां जिज्ञासोदयादिति भावः । **तथा चावसरसङ्गत्याऽनुभवानन्तरं स्मरणनिरूपणमिति भावः । तत्र हि—स्मरणे हि ।**

अथ पण्डितराजश्रीराजेश्वरशास्त्रिप्रपूरिता—
रामरुद्री

अमरगणकिरीटस्फारमाणिक्यमालारुचिरर्चरतडागद्योति पङ्केरुहश्रि ।
असिततुलसिमालाभृङ्गवृन्दश्रितं तत् कलयतु कुशलं नः श्रीपतेः पादयुग्मम् ॥१॥

श्रीरामरुद्रभट्टाचार्यैः शब्दाख्यखण्डपर्यन्ता ।
मुक्तावलीप्रकाशे तरङ्गिणीति व्यधायि या टीका ॥ २ ॥
पूरणमस्याः कुर्वे तास्तानालोच्य तार्किकग्रन्थान् ।
श्रीरामचन्द्रचरणध्यानविनिर्धूतविघ्नोऽहम् ॥ ३ ॥

ननु 'बुद्धिस्तु द्विविधा मता, अनुभूतिः स्मृतिश्च स्यात्-(५१)'इत्यादिकारिकायामनुभवस्मरणभेदेन बुद्धेर्द्वैविध्यमुक्तम् , तत्राऽनुभवप्रकारास्तावदेतावत्पर्यन्तं निरूपिताः, स्मरणं तु कारिकावल्यां कुतो न व्याख्यातमित्याशङ्क्योक्तं मूले-**पूर्वमित्यादि । सुगमतयेति** । अयं भावः । अनुभवस्य प्रत्यक्षादिभेदेन बहुविधतया शिष्यैर्दुरूहत्वेनाऽशक्यज्ञानतया प्रथमतः स्मृतिनिरूपणमकृत्वा तन्निरूपणमेतावता ग्रन्थेन कारिकावल्यां कृतम् , स्मरणस्य त्वेकविधतयाऽदुरूहत्वेन शक्यज्ञानतयोत्कटजिज्ञासाऽविषयत्वेन न तन्निरूपणं कारिकावल्यां कृतमिति स्मरणनिरूपणं न ग्रन्थकृतां दोषावहमिति भावः । **अवसरसङ्गत्येति** । प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्तावनन्तरवक्तव्यत्वमवसरः, प्रतिबन्धिका चाऽत्राऽनुभवविषयिणी शिष्यजिज्ञासेति बोध्यम् । इदं पुनरिहाऽनुसन्धेयम् । अवसरसङ्गतिलक्षणे प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्तावित्यंश उपलक्षणविधयैवाऽनन्तरवक्तव्यत्वे निविष्टः, न तु विशेषणविधया, तथा सति तत्र सङ्गतिलक्षणाव्याप्तेः, अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वं हि सङ्गतित्वम् , तच्चाऽवसरे व्याहन्येत । तत्र हि अनुभवनिरूपणानन्तराभिधानप्रयोजकीभूता जिज्ञासा अनन्तरवक्तव्यं किमित्याकारिकैव ग्राह्या, अन्यस्या असम्भवात् , तादृशजिज्ञासाजनकं चाऽनन्तरवक्तव्यत्वज्ञानमिति तद्विषयः केवलानन्तरवक्तव्यत्वमेव, तत्र च प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्तिकालीनत्वं न विषय इति कथं तत्र सङ्गतिलक्षणसमन्वयो भवेत् ? तस्मात्प्रतिबन्धकीभूतशिष्यजिज्ञासानिवृत्तावित्यस्योपलक्षणत्वमवश्यमङ्गीकरणीयम् । तथा च केवलानन्तरवक्तव्यत्वे तादृशज्ञानविषयत्वसत्त्वान्न कश्चिद्दोष इति । **स्मरणनिरूपणमिति** । मुक्तावल्यामिति शेषः । वस्तुतस्तु **'अनुभूतिः स्मृतिश्च स्यात्-'** इत्यनेनाऽनुभवस्यैव पूर्वमुद्दिष्टतया तदनुसारेण पूर्वमनुभवं निरूप्योद्देशक्रमानुसारेणेदानीं स्मृतिनिरूपणमिति ध्येयम् । **'अनुभूतिः स्मृतिश्च स्यात्-'**इत्यत्र अनुभवस्मृत्युद्देशपौर्वापर्यनियामकं किमिति शङ्कायां तूपर्युक्तं अनुभवस्य दुरुहत्वेनोत्कटजिज्ञासाविषयत्वं, स्मरणस्य चाऽदुरूहत्वं नियामकमिति विभावनीयम् ।

ननु स्मृतित्वं तावज्जातिरूपमेव ग्रन्थकृदभिमतं प्रतीयते, अन्यथा पूर्वमुपपादितस्य अनुभवस्मरण-

रामरुद्री।

भेदेन ज्ञानद्वैविध्यस्य वक्तुमशक्यत्वात्, स्मरणानामनन्तत्वात्, जातिरूपत्वे तु स्मृतित्वस्यैक्येन 'अनुभूतिः स्मृतिश्च स्यात्-'इत्यस्य भावप्रधाननिर्देशतयाऽनुभवत्वस्मरणत्वे ज्ञानविभाजकौ द्वौ धर्माविति-बोधसम्भवान्न काचिदापत्तिरिति वक्तव्यम्, तच्च तदैव सम्भवति, यदि तस्याऽखण्डधर्मत्वं सिद्धयेत्, तदेव तु न सम्भवति, तत्साधकप्रमाणाभावात्। न चाऽनुगतप्रतीतिरेव तत्साधिकेति साम्प्रतम्, तस्या अनुभवभिन्नज्ञानत्वावगाहितयाऽप्युपपत्तेः। न च तर्ह्यनुभवभिन्नज्ञानत्वमेव तदस्तु, तावताऽपि अनुभवत्वावच्छिन्नप्रतियोगिताकभेदस्याऽखण्डस्यैक्येन ज्ञानविभाजकधर्मद्वैविध्यस्य न व्याहतिरिति वाच्यम्। अनुभवत्वस्य स्मृतिभिन्नज्ञानत्वरूपत्वेन तदन्यत्वस्यैव स्मृतित्वस्योक्तावन्योन्याश्रयापत्तेः, स्मृतित्वादेरखण्डधर्मत्वविरहेऽनुगतत्वाभावेन सामान्यधर्मावच्छिन्नप्रतियोगिताकभेदनिवेशासम्भवात्तत्तत्स्मृतित्वावच्छिन्नभेदकूटस्यैवाऽनुभवत्वादिरूपताया अवश्यवक्तव्यतया ज्ञानविभाजकधर्मद्वैविध्यकथनस्याऽपि व्याहतत्वापत्तेस्तादवस्थ्याच्चेत्याशङ्क्य परिजिहीर्षुरादौ तन्निरासायाऽऽवश्यकेऽनुगतस्मृतित्वसाधन उपयुक्तं पूर्वानुभवस्य स्मृतिहेतुत्वमाह मूले-**तत्र हीत्यादिना। पूर्वानुभव इति**। स्वसमानविषयक इत्यादिः। तेन न घटानुभवतः पटस्मरणापत्तिः। यद्यपि घटाद्यनुभवमात्रस्य स्मृतिहेतुत्वे न काचिदापत्तिः, उद्बुद्धसंस्कारस्याऽपि स्मृतिहेतुत्वेन घटाद्यनुभवजनितसंस्कारस्याऽनुद्बुद्धत्वादेव तदा पटादिस्मरणापत्तिवारणसम्भवात्, तथाऽपि घटादिस्मरणस्य पटादिविषयकत्वापत्तिरेव तथा बोध्या, न हि तत्र संस्कारोऽनुद्बुद्ध इति वक्तुं शक्यम्, घटस्मरणस्याऽप्यनुत्पादप्रसङ्गात्। अथ तत्तद्विषयकस्मृतौ तत्तद्विषयकोद्बुद्धसंस्कारत्वेन हेतुतयैव स्मृतेर्विषयनियमे ज्ञानत्वेनैव स्मृतित्वावच्छिन्नं प्रति हेतुताऽङ्गीकर्तव्या, अतः स्वसमानविषयकपूर्वानुभवत्वेन स्मृतित्वेन च कार्यकारणभावे मानाभावः। न चैवं स्वजन्यसंस्कारसम्बन्धेन ज्ञानमात्रस्य स्मृतिं प्रति हेतुत्वे तत्संशयात्तत्स्मरणवारणाय तत्र स्मृतौ तन्निश्चयत्वेन हेतुत्वमावश्यकम्, तन्निश्चयत्वं च तदभावप्रकारत्वानिरूपिततत्प्रकारतानिरूपिततद्धर्मिनिष्ठविशेष्यताकज्ञानत्वमिति ज्ञाननिष्ठस्मृतिकारणतायां विषयनिवेशो दुर्वारः. यतोऽन्यविषयकज्ञानादन्यविषयकसंस्कारोत्पत्तिवारणाय तत्तद्विषयकसंस्कारं प्रत्यपि तत्तद्विषयकज्ञानत्वेनैव हेतुताया आवश्यकतया तत्र च कारणतावच्छेदककोटौ गुरुशरीरनिश्चयत्वनिवेशे प्रयोजनविरहेण ज्ञानमात्रस्यैव हेतुतया तद्विषयकसंशयात्तद्विषयकसंस्कारोत्पत्तेरावश्यकत्वात्तत्र संशयजन्यसंस्कारस्याऽपलपितुमशक्यतया संशयसमानविषयकस्मरणापत्तेर्दुर्वारत्वम्, यद्यप्येतादृशापत्तिवारणाय ज्ञाननिष्ठस्मृतिकारणतायामिव ज्ञाननिष्ठसंस्कारहेतुतायामेव जनकतावच्छेदककुक्षौ निश्चयत्वनिवेशनं युक्तं, तावतैव संशयस्य निश्चयत्वविरहेण संस्काराजनकतया ततः संस्कारानुत्पादेन तत्संशयात्तत्स्मरणापत्तिवारणसम्भवात्, एवञ्च ज्ञाननिष्ठस्मृतिहेतुतावच्छेदककुक्षौ निश्चयत्वनिवेशनमनावश्यकमेवेति क्व तत्र विषयनिवेश इति वक्तुं शक्यम्, तथाऽपि ज्ञाननिष्ठसंस्कारहेतुतायामिव तन्निष्ठस्मृतिहेतुतायामपि तन्निवेशनमावश्यकमेव, फलव्यापारयोरेकेनैव रूपेण कारणत्वमिति नियमाद्यादृशरूपेण व्यापारीभूतसंस्कारहेतुता कल्प्यते, तेनैव स्मृतिरूपफलहेतुतायाऽपि कल्पनीयत्वात्, तथा च ज्ञाननिष्ठस्मृतिहेतुतायां विषयनिवेशो दुर्वार इति वाच्यम्। फलव्यापारयोरित्यादिनियम एव मानाभावात्, तत्संस्कारस्य तद्धर्मिविशेष्यकतद्धर्मप्रकारकस्मरणे तद्धर्मिधर्मिकतदभावप्रकारकान्यतद्धर्मिकतत्प्रकारकसंस्कारत्वेन हेतुतयैव तद्गोचरसंशयात्तत्स्मरणापत्तिवारणसम्भवात्, संशयजन्यसंस्कारस्य विरोधिप्रकारकत्वनियमेन तदभावप्रकारकान्यत्वाभावात् इति 'संस्कारहेतुतावच्छेदककोटौ निश्चयत्वनिवेशे प्रयोजनविरहात् फलव्यापारयोरित्यादिनियमाङ्गीकारेऽपि ज्ञाननिष्ठस्मृतिहेतुतायां विषयविशेषस्याऽवच्छेदकत्वाकल्पनाच्च नाऽनुभवत्वेन कारणतेति चेन्न। संस्कारस्य संस्कारत्वेनैव हेतुता, ज्ञानस्य तु तद्गोचरस्मृतौ तत्तन्निश्चयत्वेनेत्यस्याऽपि सम्भवेन विनिगमकाभावात् ज्ञानत्वेन हेतुतायामपि विषयनिवेशस्याऽप्रत्याख्येयत्वात्। न च तद्गोचरज्ञानजन्यस्य संस्कारस्य कालादिना नाशे अन्यगोचरसंस्कारात्तद्गोचरस्मरणवारणाय संस्कारहेतुतायां विषयनिवेशनमावश्यकमिति वाच्यम्।

रामरुद्री ।

संस्कारहेतुतायां विषयानिवेशेऽप्युक्तस्थले तन्निश्चयरूपकारणजन्यतत्संस्काररूपव्यापारविरहेण तत्स्मरणापत्त्यसम्भवात्, तज्जन्यत्वे सति तज्जन्यजनकस्यैव व्यापारत्वेन अन्यगोचरसंस्कारस्य तदजन्यतया तद्व्यापारत्वासम्भवात्, तज्जन्यसंस्कारस्य च विनष्टत्वादिति ध्येयम् । वस्तुतोऽन्वयव्यतिरेकाभ्यां तद्गोचरस्मृतौ तद्गोचरनिश्चयत्वेन हेतुतासिद्धौ तन्निर्वाहकतया व्यापारीभूतसंस्कारकल्पना, संस्कारे प्रमाणान्तराभावादिति कथमकल्पितेन साधनीयेन संस्कारेण तद्गोचरनिश्चयत्वावच्छिन्नस्याऽन्यथासिद्धिः? यतस्तद्रूपावच्छिन्नमहेतुः स्यात्, न हि यदुपजीव्य यत्सिद्ध्यति तत्तद्व्यावर्तकम् । एतेन संस्कारहेतुतायां विषयानिवेशे तदंशे उपेक्षात्मकज्ञानजन्यादन्यगोचरसंस्कारात्तत्स्मरणापत्तिवारणाय तत्तद्विषयकस्मृतौ तत्तद्विषयकसंस्कारत्वेन हेतुत्वमावश्यकमिति ज्ञानहेतुतायां विषयनिवेशो व्यर्थ इति प्रत्युक्तम् । तथाविधसंस्कारस्य स्मृतिहेतुत्वनिश्चयात्प्रागेव तत्तद्विषयकनिश्चयस्य स्मृतिहेतुत्वसिद्ध्या तदुत्तरभाविनो गौरवज्ञानस्य पूर्वज्ञानं प्रत्यकिञ्चित्करत्वादिति । करणस्य फलव्यापारौ प्रति एकेनैव रूपेण हेतुत्वमितिप्राचीनसम्मतनियमभङ्गभियाऽपि तत्तद्विषयकनिश्चयत्वेन स्मृतिहेतुत्वं वक्तव्यमित्यवधेयम् । यद्यप्येवमपि अनुभवत्वेन कारणत्वे न किञ्चित्प्रमाणमुपन्यस्तम्, तथापि विशेषरूपेण कारणत्वे सम्भवति सामान्यरूपेण न कारणत्वमित्यग्रे वक्ष्यमाणमेव प्रमाणमनुसन्धेयम् । मूले—**कारणमिति** । तथा च तादृशानुभवजन्यतावच्छेदकतयैव स्मृतित्वजातिसिद्धिरिति भावः । यद्यपि स्मरामीति प्रतीत्यैव स्मृतित्वजातिसिद्धिः सम्भवति, तथाऽपि स्वात्मपरात्मसाधारणस्मृतिमात्रविषयिण्या अबाधिताया एतादृशप्रतीतेः सत्त्वे प्रमाणाभावात्स्मृतित्वजातावनुमानरूपप्रमाणकथनमित्यवधातव्यम् । यद्यपि यावदाश्रयप्रत्यक्षस्याऽसत्वेऽपि जातिसिद्धौ न किञ्चिद्बाधकं, अन्यथाऽनुगतप्रतीत्या घटत्वादिजातीनामप्यसिद्धिप्रसङ्गात्, तत्राऽपि यावद्घटत्वाश्रयाप्रत्यक्षतायास्तुल्यत्वात्, तथाऽपि स्मृतित्वरूपधर्मसिद्धेः प्रत्यक्षेण सम्भवेऽपि तेन तस्य सकलस्मृतिसाधारणत्वं न सिद्ध्येत्, तत्तद्व्यक्तिवृत्तित्वज्ञाने तत्तद्व्यक्तिज्ञानस्याऽपि हेतुत्वात्, तस्य चाऽभावात्, ततश्च सकलस्मृतिसाधारणस्मृतित्वसिद्ध्यसम्भवेऽनुभवस्मरणभेदेन ज्ञानद्वैविध्यं निरङ्कुशतया ज्ञातुमशक्यं, कदाचित्स्मृतित्वानाश्रयस्याऽप्यनुभवभिन्नज्ञानस्य सम्भवशङ्काया अनिरासात्, अनुमानकथने च सर्वस्यैवाऽनुभवजन्यत्वावगमान्निरङ्कुशं ज्ञानद्वैविध्यं निश्चेतुं शक्यं, अनुभवजन्यतावच्छेदकतया कल्प्यमानायाः स्मृतित्वजातेः सर्वत्रैवाऽनुभवजन्यज्ञाने कल्पनस्याऽऽवश्यकत्वात्, अन्यथा स्मृतित्वस्य जन्यतान्यूनवृत्तितया जन्यतावच्छेदकत्वासम्भवादित्यतः कारणात् तत्राऽनुमानमुपन्यस्तम् । अत एव पृथिवीनिरूपणे परमाणौ पृथिवीत्वस्य प्रत्यक्षेणाऽसिद्धि, आत्मनिरूपणे च परात्मनि आत्मत्वासिद्धिमाशङ्क्य तत्र तत्राऽनुमानमुपन्यस्तं मन्तव्यम् । पूर्वमुपपादितं ज्ञानद्वैविध्यं स्मृतित्वस्य सकलस्मृतिसाधारण्यमज्ञानद्भिर्न ज्ञातुं शक्यमिति तदुपपादनैदम्पर्येणाऽनुभवत्वेन स्मृतित्वेन च कार्यकारणभावो दर्शित इति तु परमार्थः । एतेन स्मृतिपदशक्यतावच्छेदकतया स्मृतित्वजातिसिद्धिरित्यपि प्रत्युक्तम् । शक्यतावच्छेदकतादिनैव जातिसिद्धौ तत्र तत्र ग्रन्थेषु जातिसाधकप्रमाणोपन्यासवैयर्थ्यात्, पृथिव्यादिनिरूपणे पृथिवीत्वादेर्गन्धादिसमवायिकारणतावच्छेदकतया साधनस्य सन्दर्भविरुद्धत्वापातात् । यद्यपि पुष्पादिषु आपामरसाधारणपृथिवीतिव्यवहारविरहेण पृथिवीत्वस्य शक्यतावच्छेदकतया साधनमसम्भवीति तत्र प्रमाणोपन्यासः कृत इति वक्तुं शक्यं, तथाऽपि जलत्वादिजातिसाधनस्य स्वन्मतावलम्बने सन्दर्भविरुद्धत्वं दुर्वारमेव । तस्मान्न कुत्रचिदपि शक्यतावच्छेदकतादिना जातिसिद्धिसम्भवः, शक्यतावच्छेदकतासाधकव्यवहार एव विप्रतिपत्तेः, एवं च सर्वासु पृथिवीव्यक्तिषु पृथिवीतिव्यवहारस्य वादिप्रतिवाद्युभयमतसिद्धस्याऽभावेन यथा तत्र पृथिवीत्वसिद्ध्येऽनुमानमुपन्यस्तं, तथैव जलादिष्वपि सर्वत्र जल तथाविधव्यवहारस्याऽभावात् शक्यतावच्छेदकतया जातिसाधनस्य शशविषाणसोदरतया तत्तज्जातिसाधनाय तत्र तत्र प्रमाणोपन्यासो युक्त एवेति वक्तव्यम् । एवञ्च न कदाचिदपि स्मृत्यादिपदशक्यतावच्छेदकतया स्मृतित्वजातिसिद्धिः सम्भवति, अत्राऽपि तादृशव्यवहारे विप्रपत्तिसम्भवादिति विभावयन्तु । वस्तुतस्तु स्मृत्यादिपदशक्यतावच्छेदकत्वमनुभवजन्यज्ञानत्व एव स्वीकर-

रामरुद्री ।

णीयमिति कथं स्मृतित्वजातिसिद्धिसम्भवः ? न च विशिष्टबुद्धिमात्रस्यैव विशेषणज्ञानादिजन्यतया सविकल्पकादेरपि निर्विकल्पकादिजन्यस्य स्मृतिपदार्थतापत्तिरिति वाच्यम्। स्वजन्यसंस्कारसम्बन्धावच्छिन्नस्वसमानविषयकानुभवत्वावच्छिन्नजनकतानिरूपितजन्यताशालिज्ञानत्वस्यैव स्मृतिपदशक्यतावच्छेदकत्वात्। न चैतादृशगुरुभूतधर्मस्य तथात्वकल्पनामपेक्ष्य लाघवात्स्मृतित्व एव तत्कल्पनं युक्तमिति वाच्यम्। प्रामाणिकगौरवस्य दोषावहत्वाभावात्, स्मृतित्वरूपजातिसिद्धौ तत्र शक्यतावच्छेदकत्वस्य कल्पनीयतया तस्याश्च स्मृतित्वसिद्धयपेक्षित्वेऽन्योन्याश्रयात्। न च स्मृतिपदशक्यता किञ्चिद्धर्मावच्छिन्ना, शक्यतात्वात्, घटपदशक्यतावदित्यनुमानेन शक्यतावच्छेदकतया तस्सिद्धिरिति वाच्यम्। निरुक्तानुभवजन्यज्ञानत्वरूपधर्ममादायाऽर्थान्तरात्। न च लाघवादतिरिक्तस्यैव धर्मस्य तत्कल्पनं युक्तं, अन्यथा यावत्स्मृतिगतान्यतमत्वादेरपि विनिगमनाविरहेण शक्यतावच्छेदकत्वापातादिति वाच्यम्। यावत्स्मृत्यन्यतमत्वस्य तत्तत्स्मृतिव्यक्तिभेदकूटावच्छिन्नभेदस्वरूपतया तत्प्रतियोगितावच्छेदकभेदकूटस्य च तत्तत्स्मृतिव्यक्तीनामनन्ततयाऽसर्वज्ञदुर्ज्ञानतया तद्घटितान्यतमत्वरूपधर्मेण एवाऽज्ञाने तत्र शक्यतावच्छेदकत्वग्रहस्याप्यसम्भवादेव तादृशान्यतमत्वस्य शक्यतानवच्छेदकत्वे विनिगमकत्वेन निरुक्तानुभवजन्यज्ञानत्वस्य शक्यतावच्छेदकत्वौचित्यादतिरिक्तकल्पनायां मानाभावात्। न चैवं घटादिपदशक्यतावच्छेदकताऽपि कपालद्वयसंयोगादिजन्यद्रव्यत्व एव स्वीकरणीयेति घटत्वादेस्तदवच्छेदकत्वं व्याहन्येतेति वाच्यम्। यतो हि घटत्वं न घटपदशक्यतावच्छेदकतया सिध्यति, किन्तु कपालद्वयसंयोगजन्यतावच्छेदकतया, अनुगतप्रत्यक्षेण वा, तथा च प्रमाणान्तरेण सिद्धे घटत्वे लाघवात्तत्रैव घटपदशक्यतावच्छेदकत्वकल्पने न किञ्चिद्बाधकमिति तत्तत्र कल्प्यते, कपालद्वयसंयोगजन्यद्रव्यत्वस्य तथात्वे गौरवात्। प्रकृते तु स्मृतित्वस्य प्रमाणान्तरासिद्धतयाऽक्लृप्तत्वेन कथं क्लृप्तस्याऽनुभवजन्यज्ञानत्वस्याऽक्लृप्तेन तेन सह विनिगमनाविरहावकाशः स्यात् ? तस्मात् स्मृतित्वसाधकप्रमाणविरहेण स्मृतिपदशक्यतावच्छेदकत्वस्याऽनुभवजन्यज्ञानत्वेऽबाधिततया तेनैव निर्वाहेऽतिरिक्तस्मृतित्वजातिसिद्धिकथा दूरोत्सारितैव भवेत्। ननु अनुभवजन्यतावच्छेदकतया सिद्ध एव स्मृतित्वरूपाखण्डधर्मे शक्यतावच्छेदकत्वं लाघवात्कल्पनयीमिति चेदायात मार्गेण। एवं सति स्मृतित्वजातिरनुभवजन्यतावच्छेदकतयैव साधनीया, न पुनः स्मृतिपदशक्यतावच्छेदकतयेति। अत एव भूतपदशक्यतावच्छेदकतयाऽपि न भूतत्वादिजातिसिद्धिः, अन्यथा ऽऽत्मावृत्तिविशेषगुणवत्त्वरूपस्य भूतत्वस्य शक्यतावच्छेदकत्वकल्पनमपेक्ष्य लाघवादतिरिक्तधर्म एव तत्कल्पनप्रसङ्गात्। न च क्रियाजनकतावच्छेदकतया सिद्धया मूर्तत्वजात्या सह साङ्कर्यभयान्न तस्य जातित्वं साधयितुं शक्यमिति वाच्यम्। वैपरीत्यस्याऽपि सम्भवात्, भूतत्वस्याऽपि भूतपदशक्यतावच्छेदकतया सिद्धयोभयत्र प्रमाणतौल्यात्, तस्मादक्लृप्ते शक्यतावच्छेदकत्वं क्लृप्ते सम्भवति न कल्प्यत इति वक्तव्यम्। तथा च भूतत्वस्याऽक्लृप्ततया न तत्र शक्यतावच्छेदकत्वं कल्पयितुं शक्यमिति आत्मावृत्तिविशेषगुणवत्त्वे शक्यतावच्छेदकत्वकल्पनं सङ्गतमेव। अत एव च न यावद्भूतान्यतमत्वमादायाऽत्र विनिगमनाविरहोऽपि सम्भवति, प्रागुक्तरीत्या तस्याऽसर्वज्ञदुर्ज्ञेयत्वात्। न चैवं मूर्तत्वस्य कथं जातित्वमङ्गीक्रियत इति वाच्यम्। मूर्तत्वजातेर्मूर्तपदशक्यतावच्छेदकतयाऽकल्पनात्, क्रियाजनकतावच्छेदकतयैव तत्कल्पनात्, क्रियाजनकतावच्छेदकतया सिद्धे तु मूर्तत्वे मूर्तपदशक्यतावच्छेदकत्वकल्पनं पुनर्लाघवप्रतिसन्धानाधीनमित्यन्यदेतत्। मूर्तत्वजातिस्तु न मूर्तपदशक्यतावच्छेदकतया प्रसाधिता कुत्रचिदपीत्येव तु वक्तव्यम्। तथा च भूतत्वसाधकप्रमाणान्तरविरहेण आत्मावृत्तिविशेषगुणवत्त्वे भूतपदशक्यतावच्छेदकत्वल्पनं युक्तमेवेति वक्तव्यम्। एवं सति स्मृतित्वजातेरपि तथैवाऽसिद्धौ तत्र जाग्रत्यां तत्र शक्यतावच्छेदकत्वकल्पनस्यैवाऽसम्भवेन स्मृत्यादिपदशक्यतावच्छेकतया स्मृतित्वादिजातिसाधनमुपहासास्पदमेवेति मन्तव्यम्। किञ्च शक्यतावच्छेदकतायास्तत्तत्पदजन्यबोधविषयत्वप्रकारकेच्छीयविशेष्यतावच्छेदकत्वरूपत्वेन विषयतात्वेन तस्य गुरुधर्मेऽपि सम्भवात्तदनुपपत्त्या धर्मान्तरकल्पनमयुक्तमिति वक्तुं शक्यम्। कारणतावच्छेदकत्वस्य तु स्वरूपसम्बन्धविशेषरूपस्य गुरुधर्मे कल्प-

अत्र केचित्। अनुभवत्वेन न कारणत्वं, किन्तु ज्ञानत्वेनैव, अन्यथा स्मरणोत्तरं स्मरणं न स्यात् समानप्रकारकस्मरणेन पूर्वसंस्कारस्य विनष्टत्वात्।

दिनकरी।

स्मरणं न स्यादिति। अनुभवस्य नष्टत्वादिति भावः। ननु अनुभवस्य व्यापारद्वारा कारणत्वं, तच्च कार्याव्यवहितपूर्वक्षणवृत्ति–स्वस्वव्यापारान्यतरकत्वं, तच्चाऽनुभवनाशेऽपि तज्जन्यसंस्कारस्य सत्त्वान्निराबाधमत आह। **समानप्रकारकेति। विनष्टत्वा-**

रामरुद्री।

नमसम्भवि, गौरवरूपान्यथासिद्धिज्ञानस्यैव तत्र प्रतिबन्धकत्वादित्यादिकमूहनीयम्। इदमत्राऽऽकूतम्। अनुभवजन्यज्ञानत्वे ईश्वरेच्छीयविशेष्यतावच्छेदकत्वं तावत्कल्पमेव, स्मृतिपदादनुभवजन्यज्ञानबोधो भवत्विति ईश्वरेच्छाऽपि कल्प्तैव, तस्याः सर्वविषयकत्वात्, केवलं तत्र पदपदार्थससर्गत्वमेव कल्पनीयं, कारणतावच्छेदकत्वं तु न तथाविधम्, तत्र प्रथमतोऽकल्पायाः कारणतायास्तदवच्छेदकत्वस्य चोभयस्य कल्पनीयत्वात्, एवमनुभवजन्यज्ञानत्वस्य कारणतावच्छेदकत्वेऽनुभवत्वादावच्छेदकतावच्छेदकतावच्छेदकतादिकं कल्पनीयमिति महद्गौरवम्, तदपेक्षया कारणतावच्छेदकीभूतातिरिक्तधर्मकल्पने तु तत्रैव कारणतावच्छेदकतायाः कल्पनसम्भवात्, तस्याश्च निरवच्छिन्नतया तदवच्छेदकत्वादिकल्पनाया अनावश्यकतया लाघवादतः कारणतावच्छेदकतया धर्मसिद्धौ न किञ्चिद्बाधकमिति ध्येयम्। अथैवमपि पूर्वानुभवजन्यतावच्छेदकतयैव स्मृतित्वसाधने प्रत्यभिज्ञाया अपि संस्कारकार्यतया पूर्वानुभवजन्यत्वेन तस्या अपि स्मृतित्वापत्तिः। न चेष्टापत्तिः, तथा सति स्मृतित्वस्य प्रत्यक्षत्वादिना साङ्कर्यादिति चेदत्र केचित्, स्वजन्यसंस्कारसम्बन्धावच्छिन्नानुभवत्वावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकतया कल्प्यमाना स्मृतिस्वजातिः स्मृतावेवोपेया, न तु प्रत्यभिज्ञायाम्, तस्याः संस्कारत्वावच्छिन्नजनकतानिरूपितजन्यतावत्त्वेऽपि स्वजन्यसंस्कारसम्बन्धावच्छिन्नानुभवत्वाच्छिन्नजनकतानिरूपितजन्यतायाः प्रत्यभिज्ञायामभावात्। तादृशानुभवत्वावच्छिन्नजनकतानिरूपितजन्यतावच्छेदकतया कल्प्यमानाया जातेस्तत्र कल्पने मानाभावात्। अत एव मूलेऽपि–'तत्र हि पूर्वसंस्कारः कारणम्' इत्यनुक्त्वा **'पूर्वानुभवः कारणम्'** इत्युक्तम्। संस्कारस्य तद्धेतुत्वकथने संस्कारजन्यतायाः अतिप्रसक्तत्वेन स्मृतित्वसाधनानुपपत्तिमवगत्यैवाऽनतिप्रसक्तानुभवजन्यतायाः स्मृतित्वसाधनाय ग्रन्थकृताभिमतत्वादिति प्राहुः। तत्तुच्छम्। संस्कारस्य स्मृतिजनकत्वेनैव सिद्ध्या प्रत्यभिज्ञां प्रति यस्य 'अन्यं प्रति—' इत्यादितृतीयान्यथासिद्ध्याक्रान्तत्वेनाऽकारणत्वात्। इदमत्र तत्त्वम्। यद्यपि 'अन्यं प्रति–'इत्याद्यन्यथासिद्धिलक्षणस्य यथाश्रुतेऽपूर्वं प्रति पूर्ववृत्तित्वं पूर्वं गृहीत्वैव यागस्य स्वर्गं प्रति पूर्ववर्तित्वग्रहात्तन्नाऽतिव्याप्तिरतः प्रकृतकार्याननुगुणं प्रतीति 'अन्यं प्रति–' इत्यनेन विवक्षितमतो नोक्तदोष इति वक्तव्यम्, एवं च स्मरणस्य विशेषणज्ञानविधया प्रकृतप्रत्यभिज्ञारूपकार्यानुगुणत्वात्तत्पूर्ववर्तित्वग्रहो नाऽन्यथासिद्धिप्रयोजक इति वक्तुं शक्यते, तथाऽपि यागस्य हेतुतानिर्वाहाय 'अन्य प्रति–'इत्यस्य स्वनिष्ठप्रकृतकार्यपूर्ववर्तित्वानुपपादकं यं प्रति पूर्ववर्तित्वं गृह्यत इति वक्तव्यतया संस्कारस्य तृतीयान्यथासिद्धत्वं दुष्परिहरमेव, अन्यथा पूर्वोक्तमतावलम्बने गगनस्य शब्दाश्रयत्वादिना कारणत्वे तृतीयान्यथासिद्ध्यभावप्रसङ्गादिति। अपि च यादृशस्थलविशेषे चरमस्मृत्यनन्तरतृतीयक्षणे प्रत्यभिज्ञा, तत्र प्रत्यभिज्ञायाः ज्ञानलक्षणासन्निकर्षत्वमावहत्या स्मृत्याऽपि सम्भवात् तत्पूर्वक्षणे च चरमस्मृत्याऽव्यवहितोत्तरक्षणविनाशितत्वेन संस्कारस्याऽप्यभावात् व्यतिरेकव्यभिचारादपि संस्कारस्य न प्रत्यभिज्ञाहेतुत्वं सम्भवतीति ध्येयम्। कुतस्तर्हि प्रत्यभिज्ञानमिति चेत, सुरभि चन्दनमित्यादिवत्संस्कारजन्यया ज्ञानलक्षणासन्निकर्षत्वमावहत्या स्मृत्यैव सर्वत्र तत्सम्भव इति गृहाण। तथा च प्रत्यभिज्ञायाः स्वजन्यसंस्कारसम्बन्धेनाऽनुभवाजन्यतया न स्मृतित्वमिति ध्येयम्। मूले 'तत्र हि पूर्वसंस्कारः कारणम्'इत्युपेक्ष्य **'पूर्वानुभवः कारणम्'** इति कथनं तु संस्कारस्य व्यापारविधया कल्पनीयस्याऽनुभवनिष्ठकारणतावच्छेदककुक्षौ विषयनिवेशे बाधकत्वाभावसूचनायेति ध्येयम्।

मन्मते तु तेनैव स्मरणेन संस्कारान्तरद्वारा स्मरणान्तरं जन्यत इत्याहुः। तन्न। यत्र समूहालम्बनोत्तरं घटपटादीनां क्रमेण स्मरणमजनिष्ट, सकलविषयकस्मरणं तु नाभूत्, तत्र फलस्य संस्कारनाशकत्वाभावात् कालस्य, रोगस्य, चरमफलस्य वासर्वत्र संस्कारनाशकत्वं वाच्यम्। तथा च न क्रमिकस्मरणानुपपत्तिः। न च पुनः पुनः स्मरणाद् दृढतरसंस्कारानुपपत्तिरिति

दिनकरी।

दिति। तथा च तादृशमपि कारणत्वमनुभवे न सम्भवतीति भावः। ज्ञानत्वेन कारणतावादिनस्तु न काऽप्यनुपपत्तिरित्यत आह। **मन्मते त्विति**। **तेनैव**—संस्कारनाशकेन समानप्रकारकस्मरणेनैव। **संस्कारान्तरद्वारेति**। स्मरणस्य तृतीयक्षणे नाशेन स्वरूपतो हेतुत्वासम्भवादिति भावः।

फलस्य-प्रत्येकविषयकक्रमिकस्मरणरूपस्य। **संस्कारनाशकत्वाभावादिति**। समानप्रकारकत्वाभावादिति भावः। **कालस्य- रोगस्येति**। अन्यथा उक्तसमूहालम्बनसंस्कारस्याऽनाशप्रसङ्गादिति भावः। **न चेष्टापत्तिः**, जन्यभावत्वेन विनाशित्वनियमात्। ननु कालादेः कालत्वादिना नाशकत्वे संस्कारमात्रस्य क्षणिकत्वापत्तिः, तत्तद्व्यक्तित्वेन तथात्वे गौरवमत आह। **चरमफलस्य वेति**। चरमफले वैजात्यं काल्पयित्वा तेन रूपेण नाशकत्वं वाच्यमिति भावः। **न क्रमिकेति**। स्मरणोत्तरस्मरणेत्यर्थः।

रामरुद्री।

स्व-स्वव्यापाराऽन्यतरकत्वमिति। स्वजन्यव्यापार—समवायान्तरसम्बन्धेन कार्याव्यवहितप्राक्क्षणवृत्तित्वमित्यर्थः। **न सम्भवतीतीति**। अनुभवस्य कार्यसमानाधिकरणाभावप्रतियोगित्वनिश्चयेन तदभावरूपकारणत्वनिश्चयस्य प्रतिबन्धादिति भावः। **न काऽप्यनुपपत्तिरिति**। पूर्वानुभवस्य कार्यसमानाधिकरणाभावप्रतियोगित्वेऽपि ज्ञानस्याऽतथात्वात्, तत्र स्मरणान्तरस्यैव सम्भवात् ज्ञानसामान्याभावस्य धर्तुमशक्यत्वादिति भावः। **स्वरूपतो हेतुत्वासम्भवादितीति**। अयं भावः। यत्र प्रथमदिने घटानुभवः, द्वितीयदिने च घटस्मरणम्, तृतीयदिने च पुनस्तत्स्मरणम्, तत्र द्वितीयदिनोत्पन्नस्मरणेन संस्कारस्य नाशात्तृतीयदिनोत्पत्स्यमानस्मरणाव्यवहितपूर्वक्षणे समवायसंस्कारान्यतरसम्बन्धेनाऽपि पूर्वानुभवस्याऽविद्यमानत्वात्तत्स्मरणानुपपत्तिरतो ज्ञानत्वेन स्मृतिहेतुता वाच्या, साऽपि खलु न सम्भवति, तृतीयदिवसोत्पन्नस्मरणपूर्वक्षणे ज्ञानस्याऽनुभवरूपस्य वाऽसम्भवादतो द्वितीयदिवसोत्पन्नस्मरणस्यैव स्वजन्यसंस्कारसम्बन्धेन तत्र कल्पनमावश्यकम्, तच्च द्वितीयस्मृत्या सस्कारोत्पत्तिकल्पन एव सम्भवतीति तादृशस्मृत्या संस्कारोत्पत्तिमङ्गीकृत्यैव तत्र निर्वाहः कार्य इति।

मूले-नाऽभूदिति। कदाचिदपीति शेषः। अयमाशयः। एतादृशस्थले संस्कारस्यानाशप्रसङ्गः, संस्कारनाशत्वावच्छिन्नं प्रति स्वसमानविषयकस्वजन्यस्मरणस्यैव हेतुत्वात्। न च तद्विषयकसंस्कारनाशं प्रति तद्विषयकस्मरणत्वेन हेतुत्वोपगमेनैव सामञ्जस्ये समानविषयकत्वेन नाश्यनाशकभावोपगमो व्यर्थ इति वाच्यम्। तथा सति तादृशस्थले क्रमिकस्मरणान्तरानुत्पत्तिप्रसङ्गात्, प्रथमस्मरणेनैव संस्कारस्य नाशादिति। ननु स संस्कारोऽविनाश्येवाऽस्तु, तथा च नेयमापत्तिरित्याशङ्क्याऽऽह। **जन्यभावत्वेनेति**। ध्वंसे व्यभिचारवारणाय भावत्वनिवेशो बोध्यः। **क्षणिकत्वापत्तिरिति**। संस्कारोत्पत्तेः प्राक् नाशत्वावच्छिन्नं प्रति सिद्धकारणभावस्य प्रतियोगिरूपकारणस्य विरहेण तदसम्भवेऽपि संस्कारोत्पत्तिक्षणे तत्सम्भवात्संस्कारस्य द्वितीयक्षण एव नाशापत्तिरिति भावः। **गौरवमिति**। तत्तद्व्यक्तिभेदेन कार्यकारणभावानन्त्यादिति शेषः। **वैजात्यं कल्पयित्वेति**। सस्कारनाशकतावच्छेदकतया च तत्सिद्धिरिति भावः। मूले-**पुनःपुनरिति**। नानेत्यर्थः। **दृढेति**। **दृढत्वं**-जातिविशेषः।

वाच्यम् । झटित्युद्बोधकसमवधानस्यैव दार्ढ्यपदार्थत्वात् । नच विनिगमनाविरहादेव ज्ञानत्वेनाऽपि जनकत्वं स्यादिति वाच्यम् । विशेषधर्मेण व्यभिचाराज्ञाने सामान्यधर्म्मेणान्यथासिद्धत्वात्, कथमन्यथा दण्डस्य भ्रमिद्वारा द्रव्यत्वेन रूपेण न कारणत्वम् । न चाऽऽन्तरालिकस्मरणानां

दिनकरी ।

दार्ढ्यपदार्थत्वादिति । तथा च पुनःपुनःस्मरणान्न दृढतरसंस्कारोत्पत्तिः, किं तु विद्यमानसंस्कारस्यैव पुनः पुनः स्मरणेन झटित्युद्बोधकसमवधानं जायते, उद्बुद्धाच्च

रामरुद्री ।

तच्च दृढ–दृढतर–दृढतमादिव्यवहारान्नैकं, किन्तु नानैव । तथा च तत्तद्दृढसंस्कारं प्रति तत्तत्स्मृतीनां कारणत्वं सर्वाभ्युपेतं न सिद्ध्येत्, संस्कारस्य स्मृत्यजन्यत्वादिति भावः । दृढत्वं न जातिः, न वा तत्तद्दृढत्वावच्छिन्नं प्रति तत्तत्स्मृतीनां हेतुत्वमङ्गीकार्यमित्याह । **झटित्युद्बोधकसमवधानस्येति** । अविलम्बितक्षणावच्छेदेनोद्बोधकसम्पत्तेरित्यर्थः । तत्तत्स्मरणानामेव संस्कारोद्बोधकत्वेन तैरुद्बोधकसमवधानस्योपपादनात्, तथा हि उद्बोधकानां **समवधानं** नाम सम्बन्धः, स च 'झटिति'इत्युक्त्याऽविलम्बितकालावच्छेदेनैवाऽर्थाद्ग्राह्यः, तदुपपादकत्वं च परम्परया तत्प्रयोजकत्वम् । तच्च विभिन्नकालीनयोः, सम्बन्धविरहात् समानकालीनत्वस्य तत्र प्रयोजकत्वात्तत्तत्स्मरणस्य च तद्दृढत्वादुपपन्नमिति ध्येयम् । वस्तुतस्तु पूर्वानुभवस्य स्मृतिहेतुत्वे आन्तरालिकस्मृतिभ्यो दृढदृढतरादिसंस्कारोत्पत्तावपि न किञ्चिद्बाधकम् । न चान्तरालिकस्मरणेन दृढसंस्कारोत्पत्तौ पूर्वानुभवजनितादृढसंस्कारस्य विनष्टत्वादेकस्मरणानन्तरस्मरणपूर्वक्षणे स्वजन्यसंस्कारसम्बन्धेन पूर्वानुभवस्याऽभावाद्व्यभिचारापत्तिरिति वाच्यम् । आन्तरालिकस्मरणेभ्यः संस्कारान्तरोत्पादेऽपि पूर्वसंस्कारनाशानभ्युपगमात् । कालादिना दृढसंस्कारविनाशेऽपि ध्यानवशाद्दृढसंस्कारादेवोद्बुद्धात्स्मरणोत्पत्तेर्दृष्टत्वात् । जीवनादृष्टबलेन प्राक्तनजन्मानुभूतस्येष्टसाधनत्वादेर्दृढतरसंस्कारविरहेऽपि स्तन्यपानादिस्थले स्मरणस्य सर्वैरङ्गीकरणीयत्वात् । न हि दृढ एव संस्कारः कालेनाऽदृढो जायत इति वक्तुं शक्यं, तथा सति दृढत्वादृढत्वयोः साङ्कर्यप्रसङ्गादित्यवधेयम् । न चैव दृढतरादिसंस्कारकल्पनं निरर्थकं स्यात्, प्राक्तनसंस्कारेणैवाऽनुभवस्य फलोपधायकत्वादिति वाच्यम् । तेषां प्राक्तनसंस्कारोद्बोध एवोपयोगित्वादित्यलं पल्लवितेन । न च तर्हि पूर्वानुभवजन्यसंस्कारस्याऽनाशप्रसङ्ग इति वाच्यम् । चरमफलस्यैव तन्नाशकत्वोपगमात् । प्रत्येकं जन्मनि जायमानस्याऽऽद्यस्मरणस्यैव चरमफलत्वकल्पनात् । न च तर्हि भाविजन्मान्तरे इष्टसाधनतास्मरणानुपपत्तिरिति वाच्यम् । एतज्जन्मनि पुनरपि स्तन्यादिपानानन्तरं तत्रेष्टसाधनत्वानुभवसम्भवेन तत एव दृढसंस्कारान्तरोत्पत्त्या तत्सम्भवात् । केचित्तु स्वप्रयोज्यसंस्कारसम्बन्धेनैवाऽनुभवस्य स्मृति प्रति हेतुत्वादान्तरालिकस्मरणात्पूर्वसंस्कारविनाशेऽपि न क्षतिः, अनुभवप्रयोज्यसंस्कारेणैव कार्योत्पत्तिसम्भवादित्याहुः । मूले—**विशेषधर्मेणेति** । व्याप्यधर्मेणेत्यर्थः । **सामान्यधर्मेणेति** । व्यापकधर्मेणेत्यर्थः । **अन्यथासिद्धत्वादिति** । कारणत्वाभावव्यवहारविषयत्वादित्यर्थः । एतादृशानुभवत्वजातिश्चाऽनुभवामि न स्मरामीतिप्रतीतिसाक्षिकैवेति ज्ञेयम् । वस्तुतो विशिष्टानुभवं प्रत्येव विशेषणज्ञानस्य कारणतया विशेषणज्ञानकार्यतावच्छेदकतया तत्सिद्धिः । 'तच्चाऽनुभवत्वं प्रत्यक्षादिज्ञानचतुष्टयवृत्त्यभ्युपेयम्, अनुमित्यादीनां वैशिष्ट्यावगाहित्वेन तासां तत्कार्यत्वाक्रान्ततया तत्र तत्स्वीकारस्याऽऽवश्यकत्वात् । प्रत्यक्षेऽपि सविकल्पकस्य तथात्वमावश्यकं, तस्य वैशिष्ट्यावगाहित्वात् । निर्विकल्पके वैशिष्ट्यानवगाहितया विशेषणज्ञानकार्यत्वानाक्रान्तेऽनुभवत्वानङ्गीकारे च प्रत्यक्षत्वचाक्षुषत्वादिनाऽनुभवत्वस्य साङ्कर्योपत्तिरतो निर्विकल्पकेऽपि तदभ्युपेयमिति । अनुभवामीति प्रतीतौ विवादाच्च न प्रत्यक्षं प्रमाणत्वेनोपन्यस्तमिति ध्येयम् । यद्यपि अनुभवत्वं स्मृतिभिन्नज्ञानत्वमेव प्रागभ्यधायि, तथाऽपि वस्तुस्थितिमनुरुध्य तस्याऽखण्डत्वमुक्तम् । मूले–**कथमन्यथेति** । तदेव चाऽनुभवत्वं स्मृतिजनकताच्छेदकं, न ज्ञानत्वं, अगुरुव्याप्यधर्मस्याऽवच्छेदकत्वसम्भवे लघुभूतस्याऽपि

संस्कारनाशकत्वसंशयाद् व्यभिचारसंशय इति वाच्यम्। अनन्तसंस्कारत-

दिनकरी।

तस्मात् स्मरणान्तरमिति भावः। **व्यभिचारसंशय** इति। अनुभवत्वेन हेतुत्वे व्यभिचारसंशय इत्यर्थः। **व्यभिचारसंशयाभावादिति**। तथा च न विशेषधर्मेण व्यभिचारज्ञानमिति भावः। सकृदनुभूतस्थले संस्कारनाशकचरमस्मृतेस्तदानीमभावेन संस्कारनाशाभावादनुभवत्वेन हेतुत्वेऽपि न व्यभिचारसन्देह इति भावः। यद्यप्यनन्तसंस्कारतन्नाशकल्पनागौरवस्य फलमुखत्वेन न दोषत्वम्, अन्यथा विशिष्टज्ञानकल्पनागौरवभि-

रामरुद्री।

व्यापकधर्मस्याऽवच्छेदकत्वाकल्पनात्। अन्यथा घटादिजनकतावच्छेदकत्वं दण्डत्वे विहाय द्रव्यत्व एव कल्प्येतेति भावः। न च द्रव्यत्वस्य कारणतावच्छेदकत्वे तादृशकारणतावच्छेदकावच्छिन्नात्पटादेरपि घटोत्पादापत्तिः स्यादित्यस्मात् कारणादेव द्रव्यत्वेन दण्डस्य घटहेतुत्वं नाऽभ्युपेयते, न तु अगुरुव्याप्यधर्मसत्त्वे व्यापकधर्मेऽवच्छेदकत्वं न कल्प्यत इतिनियमभङ्गभयेनेति त्वदुक्तानयमोऽयमप्रयोजक इति वाच्यम्। सामान्यतो घटत्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुत्वेऽपि तद्दण्डव्यक्तेरपरघटोत्पादवारणायेमवश्यकल्पनीयेन तत्तद्व्यक्तिं प्रति तत्तद्व्यक्तेः कारणत्वेनैव पटादेर्घटोत्पादवारणसम्भवात्, तत्र सामान्यधर्मावच्छिन्नसामग्रीसत्त्वेऽपि विशेषधर्मावच्छिन्नसामग्रीविरहस्य वक्तुं शक्यत्वात्, तद्विरहस्य च फलबलकल्प्यत्वात्, तथा चोक्तनियमानभ्युपगमे दण्डादेर्घटादिहेतुत्व द्रव्यत्वादिनाऽप्यन्याहतमेवेति तत्राऽपि तत्कल्प्येत, अत उक्तनियमाङ्गीकार आवश्यक इति तु हृदयम्। मूले—**व्यभिचारसंशय इति।** यद्यप्येतदापाततः—कारणे कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्यसमानाधिकरणाभावप्रतियोगित्व—तदभावरूपकोटिद्वयावगाहिनो व्यभिचारसन्देहस्य प्राद्यसंशयपर्यवसन्नतया अनुभवनिष्ठस्मृतिकारणत्वानुभावविरोधित्वेनाऽकिञ्चित्करत्वात्, तथापि स्मृतिहेतुता ज्ञानत्वावच्छिन्ना, उताऽनुभवत्वावच्छिन्नेति संशये सामान्यधर्मे नियतपूर्ववर्तितावच्छेदकत्वं कल्प्यम्, विशेषरूपे तु कल्पनीयमितिकल्पनागौरवभयादेव विशेषरूपावच्छिन्नत्वं तत्र न कल्प्यते इति सूचयितुं व्यभिचारसंशयो मूले दर्शितोऽनुभवत्वेन हेतुतायामिति ध्येयम्। मूलेऽनन्तसंस्कारादिकल्पनागौरवभियाऽनुभवत्वेन स्मृतिहेतुत्वमङ्गीकृतं, तच्च न सम्भवति, कल्पनायाः फलमुखत्वेनाऽदोषत्वादित्याशङ्कते—**यद्यपीत्यादि। फलमुखत्वेनेति। फलं**—कार्यकारणभावग्रहः, **तन्मुखस्य**—तदधीनस्येत्यर्थः। **न दोषत्वमिति**। ज्ञानत्वेन स्मृतिहेतुत्वनिश्चयानन्तरमेव तत्तत्संस्कारादिकल्पनागौरवस्य ज्ञानादुत्तरभाविनो गौरवज्ञानस्य पूर्वज्ञानं प्रत्यकिञ्चित्करत्वस्य पूर्वमुक्तप्रायत्वादिति भावः। उत्तरभाविनो गौरवज्ञानस्य पूर्वज्ञानं प्रत्यविरोधित्वे ग्रन्थकृतां समतिमाह। **अन्यथेति**। उत्तरभाविनो गौरवज्ञानस्याऽविरोधित्वानङ्गीकार इत्यर्थः। **विशिष्टज्ञानकल्पनागौरवभियेति**। व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानकल्पनागौरवभयेनेत्यर्थः। तत्र व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानेन व्याप्तिस्मरणेन चाऽनुमितिनिर्वाहाद्विशिष्टवैशिष्ट्यावगाहिज्ञानकल्पने गौरवादिति भावः। तथा च तत्र यथा विशिष्टज्ञानकल्पनगौरव तत्राऽनुमितिहेतुतानिश्चयानन्तरभावीति न दोषावहमित्युच्यते, तथैवेहाऽपि स्यादिति भावः। वस्तुतस्तु **'अनन्त-'**इत्यादि—**'गौरवात्-'**इत्यन्तमूले संस्कारादिकल्पनागौरवं न दूषणतया प्रतिपिपादयिषितं, अपि तु आन्तरालिकस्मृतिषु संस्कारनाशकत्वकल्पनागौरवमेव, एवं चाऽऽन्तरालिकस्मरणेषु संस्कारनाशहेतुत्वनिश्चयात्प्रागेव गौरवज्ञानात्तत्र न तन्निश्चयः सम्भवतीति मूलोक्तिः समञ्जसैव। अत एव **'चरमस्मरणस्यैव संस्कारनाशकत्वकल्पनेन-'**इत्याद्यग्रिमग्रन्थोऽपि स्वारस्येन सङ्गच्छते। अन्यथा 'चरमस्मरणादेव संस्कारनाशकल्पनेन'इति वक्तव्यत्वात्। **'अनन्तसंस्कारतन्नाशकल्पनापेक्षया—'**इति पूर्वमूलस्य तु अनन्ताः संस्काराः, तन्नाशाश्च यास्यस्तदपेक्षयेति व्युत्पत्त्या अनन्तसंस्कारतन्नाशहेतुकल्पनापेक्षयेत्यर्थः। आन्तरालिकस्मरणानां संस्कारतन्नाशकत्वकल्पनापेक्षयेत्यर्थः पर्यवसितः। तथा च हेतुत्वकल्पनागौरवस्यैव मूलोक्तत्वात् तस्य हेतुत्वकल्पनाविरो-

साक्षात्कारे सुखादीनां करणं मन उच्यते ।

नाशकल्पनापेक्षया चरमस्मरणस्यैव संस्कारनाशकत्वकल्पनेन व्यभिचार-संशयाभावात् ॥ इति स्मृतिकारणनिरूपणम् । इति स्मृतिप्रक्रिया ॥ ८४ ॥

इदानीं क्रमप्राप्तं मनो निरूपयितुमाह—साक्षात्कारे इति । **एतेन** दिनकरी ।

या अनुमिति प्रति विशिष्टज्ञानत्वेन हेतुताविलयप्रसङ्गात्, तथाऽपि ज्ञानत्वेन हेतुत्वे उपेक्षात्मकतत्तत्स्मृतिव्यक्तिभेदस्य कारणतावच्छेदककोटिनिवेशेन गौरवम्, अनुभवत्वेन स्मृतिहेतुत्वे तु तत्तत्स्मृतिव्यक्तिभेदानिवेशे लाघवमिति लाघवज्ञानरूपोत्तेजकसत्त्वाद्व्यभिचारशङ्काऽकिञ्चित्करीत्यत्र तात्पर्यम् ॥ इति स्मृतिकारणनिरूपणम् ॥

इति श्रीमद्भारद्वाजकुलाम्बुधिपूर्णचन्द्रबालकृष्णभट्टात्मजमहादेवभट्टारब्धे तत्पुत्र-दिनकरभट्टप्रपूरिते मुक्तावलीप्रकाशे स्मृतिप्रक्रियाख्यः सप्तमः परिच्छेदः ॥

रामरुद्री ।

धित्वं दुर्वारमेव, परामर्शस्थले तु विशिष्टज्ञानहेतुता नकल्पनीया कुत्रचिदपि, कालान्तरभावितादृशविशिष्टस्मरणान्यथानुपपत्त्या क्लृप्तहेतुभावात्संस्कारादेव तदुत्पत्तिसम्भवादिति न तत्रैतादृशदोषप्रसक्तिरिति तु परेषामपरः पन्थाः । **उपेक्षात्मकतत्तत्स्मृतिव्यक्तिभेदस्येति** । उपेक्षात्वं हि न जातिः, प्रत्यक्षत्वादिना साङ्कर्यात्, उपेक्षात्वस्य प्रत्यक्षत्वं विहायाऽनुमितौ, प्रत्यक्षत्वस्य चोपेक्षात्वं विहाय निर्विकल्पके सस्वादुभयोश्च सविकल्पके समावेशात् । यद्यप्येवमपि चाक्षुषत्वादिव्याप्यान्युपेक्षात्वानि नानाविधान्यभ्युपेत्यैतादृशदोषवारणं सम्भवति, तथाऽपि एकस्मिन्नेव ज्ञाने कुत्रचिदुपेक्षात्वतदभावयोर्व्यवहाराशिकत्वपत्त्योपेक्षात्वं न जातित्वेनाऽभ्युपगन्तुं शक्यमिति ध्येयम् । नाऽप्युपाधिस्वरूपमनुगतं तद्वक्तुं शक्यम्, तादृशस्य धर्मस्याऽभावात् । न च स्मृत्यजनकज्ञानत्वमेव तदिति वाच्यम् । स्मृतिजनकतावच्छेदकस्यैवाऽनिर्णयेन तदृशधर्मनिश्चयस्याऽपि तन्निश्चयसापेक्षस्याऽसम्भवात् । तथा च तत्तदुपेक्षाव्यक्तिभेदकूटाऽवच्छेदककोटौ निवेशनीया इति ज्ञानमात्रस्यैव कारणत्वे उपेक्षात्मकतत्तत्स्मृतिव्यक्तिभेदकूटस्य कार्यतावच्छेदककोटौ निवेशाद्गौरवमिति भावः । इदमुपलक्षणम् । ज्ञानत्वेन कारणत्वे चरमस्मृत्यनन्तरमपि स्मृत्यन्तरापत्तिः । न च स्मृतिजनकस्य संस्कारस्य तत्र विनष्टत्वादेव न तदुत्पत्तिरिति वाच्यम् । कारणस्य फलव्यापारौ प्रति समानरूपेण कारणत्वनियमभङ्गभयेन ज्ञानत्वेन स्मृतिहेतुत्वाङ्गीकारे तेनैव रूपेण संस्कारहेतुत्वस्याऽप्यङ्गीकरणीयत्वात् तत्र तयैव स्मृत्या संस्कारान्तरोत्पादनसम्भवात् । न च तत्तत्स्मृतिव्यक्तीनां संस्कारप्रतिबन्धकत्वकल्पनान्नैष दोषः, तथा च चरमस्मृतीनां संस्कारप्रतिबन्धकतया तदनन्तरं संस्कारस्यैव हेतुभूतस्य तत्राऽभावेन अग्रे स्मृतिवारणसम्भवादिति वाच्यम् । एवं सति अनुभवत्वेन हेतुताकल्पने तथाविधानन्तप्रतिबध्यप्रतिबन्धकभावकल्पनागौरवाभावस्यैव विनिगमकस्य सम्भवेनाऽनुभवत्वेन हेतुतासिद्धेरिति विभावनीयम् । ॥ इति स्मृतिकारणनिरूपणम् ॥

इति श्रीरामरुद्रभट्टाचार्यारब्धायां राजेश्वरशास्त्रिप्रपूरितायां महामहोपाध्यायजटापाठ्युपाह्वश्रीलक्ष्मणशास्त्रिसंशोधितायां मुक्तावलीप्रकाशतरङ्गिण्यां स्मृतिप्रक्रियाख्यः सप्तमस्तरङ्गः ।

मूले—**इदानीमिति** । आत्मनिरूपणानन्तरमित्यर्थः । **क्रमप्राप्तमिति** । विभागवाक्यघटकपदजन्योपस्थित्यव्यवहितोत्तरस्मृतिविषयत्वप्रकारकशिष्यज्ञानविषयमित्यर्थः । तथा चाऽऽत्मस्वरूपाज्ञाने शिष्याणां आत्मोपस्थित्यव्यवहितोत्तरस्मृतिविषयत्वप्रकारकज्ञानस्यैवाऽसम्भवात्प्रथमतः शिष्याणां आत्मस्वरूपज्ञानं विशदतया यथा भवेत्तथा निरूपणं कृतम्, इदानीं चाऽऽत्मस्वरूपज्ञानात्तत्स्मृत्यव्यवहितोत्तरस्मृतिविषयत्वप्रकारकज्ञानं तेषां सम्भवति, तज्ज्ञानजन्यजिज्ञासाधीनं मनोनिरूपणमिति भावः । एवं च

अयौगपद्याज्ज्ञानानां तस्याणुत्वमिहोच्यते(१) ॥ ८५ ॥

मनसि प्रमाणं दर्शितम्। तथाहि—सुखसाक्षात्कारः सकरणकः जन्यसाक्षात्कारत्वाच्चाक्षुषसाक्षात्कारवदित्यनुमानेन मनसः करणत्वसिद्धिः। न चैवं दुःखादिसाक्षात्काराणामपि करणान्तराणि स्युरिति वाच्यम्। लाघवादेकस्यैव तादृशसकलसाक्षात्करणतया सिद्धेः। एवं सुखादीनामसमवायिकारणसंयोगाश्रयतया मनसः सिद्धिर्बोद्धव्या।

तत्र मनसोऽणुत्वे प्रमाणमाह अयौगपद्यादिति। **ज्ञानानां चाक्षुषरासना-**

दिनकरी।

जन्यसाक्षात्कारत्वादिति। ईश्वरीयसाक्षात्कारे व्यभिचारवारणाय। **जन्येति।** नन्वतिलाघवात्त्वगिन्द्रियस्य, प्राणस्य वा कारणत्वमस्त्वत **आह। 'एवमिति असमवायिकारणसंयोगाश्रयतयेति।** भावकार्यस्य सासमवायिकारणकत्वनियमादिति भावः।

इति मनसि प्रमाणकथनम् ॥

रामरुद्री।

क्रमप्राप्तेरुपोद्घातादिपञ्चकभिन्नसङ्गतिरूपे प्रसङ्ग एवाऽन्तर्भावः। **निरूपणं** च प्रतिपत्त्यनुकूलव्यापार इति ध्येयम्। **एतेनेति।** मनसः सुखादिसाक्षात्कारकरणत्वकथनेनेत्यर्थः। **प्रमाणं**—अनुमानरूपमित्यर्थः। मनसोऽनीन्द्रियत्वेन प्रत्यक्षायोग्यत्वात्तस्य प्रत्यक्षेण सिद्ध्यसम्भवात्र प्रत्यक्षं मानमत्रोपन्यस्तमिति भावः। **सुखसाक्षात्कार इतीति।** अत्र साक्षात्कारमात्रस्य पक्षत्वे सामानाधिकरण्येन साध्यसिद्धेरुद्देश्यतायां चाक्षुषादिसाक्षात्कारे चक्षुरादिकरणकत्वसिद्ध्या सिद्धसाधनम्, अवच्छेदकावच्छेदेन तथात्वे तु ईश्वरप्रत्यक्षे बाध इति हृदि दोषं निधाय **'सुख'** इत्युक्तम्। तथा च सामानाधिकरण्येनैव साध्यसिद्धेरुद्देश्यत्वमिति न बाधः, ईश्वरसाक्षात्कारस्याऽतथात्वेऽपि जन्यसाक्षात्कारस्यैव तथात्वेन तत्र बाधासम्भवात्, कुत्राऽपि सुखसाक्षात्कारेऽनुमानात्प्राक् यत्किञ्चित्करणकत्वासिद्ध्या च न सिद्धसाधनमिति ध्येयम्। मूले—**सकरणक इति।** एतादृशानुमितौ च साधनतावच्छेदके करणे नित्यत्वं लाघवज्ञानसहकारेण, इतरविशेषबाधसहकारेण चाऽष्टद्रव्यानिरिक्तत्वं भासत इति ध्येयम्। **व्यभिचारवारणायेति।** तत्र साक्षात्कारत्वस्य सत्त्वेऽपि तस्य सकरणकत्वाभावादिति शेषः। **जन्येतीति।** तथा च तस्य नित्यत्वान्न व्यभिचार इति भावः। तत्रेतरविशेषबाधनिश्चयमेव दृढयितुं प्रथमतस्त्वगिन्द्रियादीनां तथात्वमाशङ्क्य निराचष्टे—**अतिलाघवादिति।** कल्पितत्वगाद्यतिरिक्ताकल्पितमनःकल्पनमपेक्ष्येत्यर्थः। **त्वगिन्द्रियस्येति।** त्वङ्मनोयोगश्च ज्ञानसामान्यहेतुतामते त्वच एव मनोरूपत्वे स्वस्य स्वेन सह संयोगासम्भवादाह—**प्राणस्य वेति।** इदमप्यापातत एव, सुषुप्त्यवच्छेदेन ज्ञानोत्पत्त्यापत्तेस्तथाऽपि वज्रलेपत्वात्, तत्राऽपि प्राणात्मसंयोगस्य सत्त्वेन कारणाभावात्कार्यानुत्पत्तिनिर्वाहस्याऽत्र कल्पयितुमशक्यत्वात्, अतस्त्वक्प्राणाद्यतिरिक्तमेव मनोऽभ्युपेतव्यम्। यद्यपि मनःस्वीकर्तृणामपि तेन सहाऽऽत्मनः संयोगस्य नियतनया सुषुप्ति-काले ज्ञानोत्पादापत्तिरबाधितैव, तथाऽपि त्वङ्मनःसंयोगस्य ज्ञानहेतुत्वाङ्गीकारादस्मन्मते सुषुप्तिकाले च तदसम्भवान्निर्वाहः सम्भवति, मनसस्तदा पुरीतति प्रवेशेन त्वङ्मनोयोगाभावात्, इतरेषां तु प्राणस्य संयोगस्त्वचा सह सुषुप्तावपि वर्तत तत्र एवेति तत्र ज्ञानोत्पादापत्तिरिति त्वङ्मनोयोगस्य ज्ञानहेतुत्वं स्वीकृत्य सुषुप्तौ ज्ञानवारणं न तैः कर्तुं शक्यमतस्तन्मते एष दोषः स्थिर एवेति। तथा चेदमत्राऽनुमानं फलितम्—सुखादिप्रतीतिस्त्वगिन्द्रियप्राणाद्यतिरिक्तकरणिका, त्वगिन्द्रियाद्यन्वयव्यतिरेकानुविधायित्वादिति विभावनीयम्। ॥ इति मनसि प्रमाणकथनम् ॥

---

(१) **'तस्याऽणुत्वमिहेष्यते', 'तस्याऽणुत्वमिहोच्यते'** इति पाठद्वयम्।

दीनां, यौगपद्यमेककालोत्पत्तिर्नास्तीत्यनुभवसिद्धम् । तत्र नानेन्द्रियाणां सत्यपि विषयसन्निधाने यत्सम्बन्धादेकेनेन्द्रियेण ज्ञानमुत्पद्यते यदसम्बन्धाच्च परैर्ज्ञानं नोत्पाद्यते तन्मनसो विभुत्वे चासन्निधानं न सम्भवतीति न विभु मनः । न च तदानीमदृष्टविशेषोद्बोधकविलम्बादेव तज्ज्ञानविलम्ब

दिनकरी ।

विभुत्वे चेति । तदसन्निधानं मनसो विभुत्वे न सम्भवतीत्यर्थः ।

रामरुद्री ।

नन्वात्मकरणकत्वमादाय पूर्वोक्तानुमानेऽर्थान्तरम् । न चाऽऽत्मनः करणत्वे सुषुप्तिकालेऽपि ज्ञानोत्पादप्रसङ्ग इति किञ्चिदेतत् मनो ज्ञानकरणं स्वीकरणीयं, येन तस्य तदानीं पुरीतत्प्रवेशान्न ज्ञानोत्पत्तिप्रसङ्ग इति वक्तुं शक्येतेति वाच्यम्। एवमपि निदाघे जलनिमग्नस्य जनस्य सर्वाङ्गीणशैत्यानुभवस्याऽनुभवसिद्धतया तत्करणस्य मनसोऽविभुनोऽपि मध्यमपरिमाणस्यैवाऽऽवश्यकतया तस्याऽणुत्वासिद्धेः, सुषुप्तौ विषयानवभासोपपादनं च दृष्टकारणविरहेऽपि कालविशेषस्य अदृष्टविशेषस्य वा ज्ञानादिप्रतिबन्धकत्वकल्पनया करणीयमित्यत आह मूले—**तत्रेत्यादि।** मनोनिरूपण इत्यर्थः । घटकर्त्वं सप्तम्यर्थः । **अन्वयश्चास्य 'प्रमाणम्' इत्यनेन** । तस्य च निरूपणघटकर्त्वं निरूपणस्य लक्षणप्रमाणस्वरूपादिप्रतिपत्त्यनुकूलव्यापारत्वादुपपन्नम् । **'मनसः'इत्यत्र** च निष्ठत्वं षष्ठ्यर्थः, अन्वयश्चास्याणुत्वपदार्थे बोध्यः । **'अणुत्वे'इत्यत्र** च सप्तम्यर्थो विषयत्वम् । **अन्वयोऽस्य 'प्रमाण'**पदार्थनावच्छेदके प्रमायां बोध्यः । तथा च मनोनिरूपणघटकमनोनिष्ठाणुत्वविषयकप्रमाकरणप्रतिपत्त्यनुकूलव्यापारवानिति वाक्यार्थः । मनोऽणुत्वविषयकज्ञाने प्रमात्वप्रयोजकं करणमाहेति तु परमार्थ इति ध्येयम् । तेन निरूपणात् पूर्वं मनोऽणुत्वविषयकज्ञाने प्रमात्वप्रतिपत्त्यसम्भवेन निरुक्तवाक्याच्छाब्दबोधासम्भवेऽपि न क्षतिः । तथा च मनोऽणुत्वज्ञानं प्रमा न वेति प्रथमा विप्रतिपत्तिः, तदङ्गनया च मनोऽणु न वेतीति । तत्र विधिकोटिर्नैयायिकानां, निषेधकोटिर्मीमांसकादीनामिति मन्तव्यम् । कारिकास्थस्य **'ज्ञानानां'**इति पदस्य ज्ञानमात्रार्थकत्वे मानसादिज्ञानद्वयस्याऽयौगपद्यं सन्दिग्धं, मनसो विभुत्ववादिभिस्तत्स्वीकारसम्भवादतस्तदयौगपद्यहेतुनाऽणुत्वसिद्धयनुपपत्तिरित्यतस्तदर्थमाह । **चाक्षुषेति** । परस्परमिति शेषः । **'आदि'**पदात् स्पार्शनादिपरिग्रहः । **'यौगपद्य'** पदार्थं निर्वक्ति । **एककालेत्यादि** । स्वाधिकरणक्षणध्वंसानधिकरणस्वाधिकरणक्षणसम्बन्ध इत्यर्थः । **अनुभवसिद्धमिति** । नृत्यादिस्थले चाक्षुषमात्रस्य, गीते श्रावणमात्रस्य, मृदुशय्यादौ च स्पार्शनमात्रस्य, अत्युत्कटसुरभिगन्ध—तथाविधमधुरादौ च क्रमेण घ्राणजरासनयोः, कामातुरस्य कामिनीपरिभावनादिस्थले मानसकामिनीमात्रप्रत्यक्षस्यैवोत्पत्तेर्दृष्टत्वादिति भावः । **तत्र**—तादृशस्थले इत्यर्थः । **नानेन्द्रियाणामिति** । तत्तत्पुरुषीयनानेन्द्रियाणामित्यर्थः । तेन पुरुषान्तरीयेन्द्रियमादाय न दोषः । **विषयसन्निधान इति** । विषयसन्निकर्ष इत्यर्थः । मनःसंयोगेतरयावत्कारणसामग्र्या उपलक्षणमेतत् । तेन कामिनीजिज्ञासादिस्थले मनःसंयोगादितरज्ञानाभावेऽपि न क्षतिः । तत्र मनःसंयोगातिरिक्तसामग्र्या एवाऽसत्त्वात्, कामिनीजिज्ञासायाः कामिनीज्ञानान्यज्ञानत्वावच्छिन्नं प्रति स्वातन्त्र्येण प्रतिबन्धकत्वेन प्रतिबन्धकाभावविधया तदभावस्यैव सामग्रीघटकस्य तत्राऽभावादिति मन्तव्यम् । **यत्सम्बन्धादिति** । यत्संयोगादित्यर्थः । **तन्मन इति** । तदेव मन इत्यर्थः । मनःस्वरूपमेतादृशमिति यावत् । **विभुत्वे चेति** । मनस इति शेषः । अत्र क्वचित् पुस्तके **'तत्र नानेन्द्रियाणां सत्यपि विषयसन्निधाने यत्सम्बन्धादेकेन्द्रियेण ज्ञानं जन्यते, यदसम्बन्धाच्च परैर्ज्ञानं नोत्पाद्यते, तन्मनसो विभुत्वे च'** इति पाठः, स च क्लिष्टत्वादनादरणीयः । **न सम्भवतीतीति** । सर्वमूर्तसंयोगवत्त्वस्यैव विभुत्वपदार्थत्वादिति भावः । । अत्रेदमनुमानशरीरम्—तत्तदिन्द्रियजन्यज्ञानाश्रयः कालः स्वपूर्वक्षणावच्छेदेन तत्तदिन्द्रियाश्रयशरीरवृत्तितत्तदितरेन्द्रियासंयुक्तमनस्कः, तत्तदिन्द्रियविशिष्टेन्द्रियजन्यज्ञानानाश्रयत्वात्, तत्तदिन्द्रियाश्रयशरीरावच्छिन्नात्मसुषुप्तिक्षणवदिति ।

इति वाच्यम्। तथा सति चक्षुरादीनामपि-अकल्पनापत्तेः। न च दीर्घशष्कुलीभक्षणादौ नानावधानभाजाञ्च कथमेकदा नानेन्द्रियजन्यज्ञानमिति वाच्यम्। मनसोऽतिलाघवात् त्वरया नानेन्द्रियसम्बन्धान्नानाज्ञानोत्पत्तेः। उत्पलशतपत्रभेदादाविव यौगपद्यप्रत्ययस्य भ्रान्तत्वात्। न च मनसः सङ्को-

दिनकरी।

तथा सतीति। दृष्टसामग्रीसत्त्वेऽप्यदृष्टविलम्बात्कार्यविलम्बाङ्गीकार इत्यर्थः। चक्षुरादीनामपिति। चाक्षुषतद्विरहयोरदृष्टतद्विरहाभ्यामुपपत्तेरिति भावः। भ्रान्तत्वादिति। अन्य

रामरुद्री।

हेतुतावच्छेदके वैशिष्ट्यं स्वेतरत्व-स्वसामानाधिकरण्योभयसम्बन्धेन। तथा चोक्तानुमानेन तत्तदिन्द्रियजन्यज्ञानाश्रयकालपूर्वकालत्वावच्छेदेन तत्तदितरेन्द्रियसंयुक्तत्वाभावस्य मनसि सिद्धौ तेनैव हेतुना मनः पक्षीकृत्य तत्र विभुत्वाभावः साधनीयः। तथा चाऽनुमानम्—मनो न विभु, तत्तदितरेन्द्रियजन्यज्ञानकालपूर्वक्षणावच्छेदेन तत्तदिन्द्रियसमानाधिकरणतत्तदिन्द्रियभिन्नेन्द्रियासंयुक्तत्वात्, तद्वदवदिति। विभुत्वाभावे सिद्धे च मनोऽणु, विभुभिन्नत्वे सति नित्यपरिमाणाश्रयत्वात्, परमाणुवदित्यनुमानेन तस्याऽणुत्वं साध्यम्। नित्यपरिमाणाश्रयता च नित्यद्रव्यत्वेन साधनीयेति सर्वमनवद्यम्। नित्यत्वद्रव्यत्वे तु लाघवज्ञानसहकारेण 'सुखसाक्षात्कारः सकरणकः-'इत्यादिपूर्वोक्तानुमितावेव भासेते इति ध्येयम्। अत एव 'तदभावादणु मनः'इति वैशेषिकसूत्रेऽपि विभुत्वाभावेनाऽणुत्वं साधितमिति ध्येयम्। मूले मीमांसकः शङ्कते। न चेति। तदानीमिति। पूर्वोक्तादृशकालावच्छेदेनेत्यर्थः उद्बोधविलम्बादिति। उद्बोधाभावादित्यर्थः। तज्ज्ञानविलम्ब इति। तज्ज्ञानाभाव इत्यर्थः। मूले 'चक्षुरादीनामप्यकल्पनापत्तेः'इत्युक्तम्, तदयुक्तम्, चाक्षुष-तद्विरहनियमायैव तत्कल्पनादित्यतस्तद्ग्रन्थभावार्थमाह टीकायाम्-चाक्षुषेत्यादिना। यद्यपि चाक्षुष-तदभावादिन्यवस्थापकतयाऽदृष्टविशेषकल्पने चक्षुरादिकल्पने च विनिगमनाविरहः। न चाऽल्पत्वयोस्तयोः कथं विनिगमनाविरह इति वाच्यम्। चाक्षुष-तद्विरहव्यवस्थापकतया सिद्धेऽपि कस्मिंश्चिदतीन्द्रिये वस्तुनि तैजसत्व-गुणत्वयोर्विनिगमनाविरहसम्भवात्, 'चक्षुस्तैजसं स्पर्शाव्यञ्जकत्वे सति परकीयरूपव्यञ्जकत्वात्'इत्यादिप्रायुक्तानुमानस्य तैजसत्वे विनिगमकत्वसम्भवाच्च, मनसि तु नैषा स्थितिः, तस्याऽतिरिक्तद्रव्यत्वे युक्तिविरहादिति वक्तुं शक्यत्वात्, तथाऽपि मनःस्थलेऽपि तस्य गुणत्वाङ्गीकारेऽदृष्टस्य जन्यत्वावश्यकतया तत्तदात्मभेदेनाऽनन्तादृष्टकल्पने गौरवम्, नित्यगुणत्वस्वीकारेऽपि तस्याऽऽत्मसमवेतत्वं तत्तत्काले उद्बोधश्च कल्पनीयः, अन्यथा सुषुप्तिकालेऽपि ज्ञानोत्पादापत्तेः, चाक्षुषरासनादेर्यौगपद्यापत्तेश्च, तस्याऽविशेषादिति गौरवम्। अस्माकं तु मनसो द्रव्यत्वेन तत्संयोग-तदभावाभ्यामेव ज्ञानोत्पादानुत्पादनिर्वाहादुद्बोधाकल्पनात्तस्याऽसमवेतत्वादपि लाघवमिति मनःसिद्धिर्निष्प्रत्यूहैवेति ध्येयम्। ननु द्विशिरश्छिन्नगोधाभुजगादावेककालिकचलनानुपपत्तिः, खण्डत्रयेऽपि मनसोऽभावेन तदवच्छेदेन भुजगादेः प्रयत्नासम्भवात्, तत्रत्यक्रियायाश्च प्रयत्नं विनाऽनुपपन्नत्वात्। न च तत्र प्राणक्रिययैव कम्पः, नाऽऽत्मप्रयत्नात्, तज्जनकस्य मनसोऽभावादिति वाच्यम्। एवमपि दीर्घशष्कुलीभक्षणादौ-एककालिकचाक्षुषरासनाद्यनुत्पत्तिप्रसङ्गादित्यत आह मूले-अतिलाघवादिति। वेगप्रकर्षवत्त्वादित्यर्थः। झटितीति। अविलम्बेनेत्यर्थः। तथा च तत्रत्यप्रत्ययेषु एककालिकत्वप्रत्ययो भ्रान्तिरिति भावः। ननु प्रतीतेर्भ्रान्तित्वं दोषजन्यत्वप्रयोज्यमिति दीर्घशष्कुलीभक्षणादिस्थलीयैककालिकत्वप्रत्ययानां भ्रान्तित्वं तदैव सिद्ध्येद्यदि तस्य दोषजन्यत्वं सिद्ध्येत्, तदेव तु न सिद्ध्यति, तज्जनकदोषानिरूपणादित्याशङ्क्याऽऽह टीकायाम्-अव्यवहितकालोत्पत्तिकत्वस्येति। इत्थञ्चाऽस्य दोषत्वमुपपादयितुमेव मूले-'उत्पलशतपत्रभेदादाविव-'इति दृष्टान्तः प्रदर्शित इति ध्येयम्। साङ्ख्यः शङ्कते मूले-न चेत्यादिना। टीकायां-

चविकासशालित्वादुभयोपपत्तिरस्त्विति वाच्यम् । नानावयवतन्नाशादिकल्पने गौरवाल्लाघवान्निरवयवस्याणुरूपस्यैव मनसः कल्पनादिति

दिनकरी ।

वहितकालोत्पत्तिकत्वस्य दोषत्वादिति भावः । **उभयोपपत्तिरिति । सङ्कोचे** एकेन्द्रियमात्रसम्बन्धादेकमेव ज्ञानं, **विकासे तु**—नानेन्द्रियैर्मनसः सम्बन्धाद्युपगन्नानाज्ञानानामुपपत्तिरिति भावः ।

यद्यपि नानेन्द्रियैर्मनःसन्निकर्षकाले चाक्षुषाद्युत्पत्तिकाले रासनाद्युत्पादस्य रासनादिकं प्रति चाक्षुषसामग्र्याः प्रतिबन्धकत्वेनैवोपपत्तेर्मनसो विभुत्वेऽपि बाधकाभावः, तथाऽपि तथा प्रतिबन्धकत्वे गौरवमित्यभिप्रायः । न च त्वङ्मनोयोगस्य ज्ञानमात्रहेतुत्वाच्चाक्षुषसामग्रीकाले स्पार्शनसामग्र्या नियमतः सत्त्वात् स्पार्शनापत्तिर्मनसोऽणुत्वपक्षेऽपि दुर्वारैवेति वाच्यम् । अनन्यगत्या स्पार्शनं प्रति चाक्षुषादिसामग्र्याः प्रतिबन्धकत्वस्वीकारात्, एवमपि रासनादिप्रत्यक्षे चाक्षुषादिसामग्रीप्रतिबन्धकत्वाकल्पनप्रयुक्तलाघवस्याऽणुत्वपक्षे निष्प्रत्यूहत्वात् । यद्वा ज्ञानसामान्यं प्रति त्वङ्मनःसंयोगस्याऽहेतुत्वमित्यभिप्रायः । अत एव **'यदसम्बन्धाच्च परैर्ज्ञानं नोत्पाद्यते—'** इत्युक्तं प्राक् । यथा च त्वङ्मनो-

रामरुद्री ।

सङ्कोच इति । अल्पपरिमाणतापत्तावित्यर्थः । **विकासे त्विति** । महत्परिमाणतापत्तावित्यर्थः । मूले—**गौरवादिति** । परिमाणतारतम्यस्याऽवयवतारतम्यं विनाऽसम्भवादिति शेषः ।

उपपत्तेरिति । रसनादिभिः सह मनःसंयोगसत्त्वेऽपि चक्षुर्विषयसंयोगादिचाक्षुषसामग्रीकाले रासनाद्युत्पादस्य सर्वानुभवसिद्धत्वात्, यदा तु चक्षुषो विषयासन्निकर्षस्तदा तत्र रसनादिसन्निकर्षाद्रासनादिकं जायत एवेति भावः । एवमपि रासनघ्राणजयोरेककालिकोत्पत्तिर्दुर्वारैव । न च रासनसामग्र्याः घ्राणज प्रति घ्राणजसामग्र्या वा रासनं प्रति प्रतिबन्धकत्वाङ्गीकारान्नैष दोष इति वाच्यम् । आद्ये मुखवर्तिलालादिद्रव्यगतरससन्निकर्षस्य सार्वदिकत्वेन घ्राणजप्रत्यक्षस्यैवाऽसम्भवात्, द्वितीये च घ्राणगतसिङ्घाणादिमलवृत्तिगन्धसन्निकर्षस्य घ्राणे सार्वदिकत्वेन रासनाद्युत्पत्त्यापत्तेस्तुल्यत्वात्, तस्मान्मनोऽङ्गीकरणीयमेव, तदङ्गीकारे च तत्सम्बन्धस्याऽसार्वदिकत्वेन न तत्तत्प्रत्यक्षापत्तिरिति मादृशामपरः पन्थाः । **गौरवमितीति** । मनःस्वीकर्तृभिस्तथा प्रतिबन्धकत्वस्याऽनङ्गीकरणीयत्वात्तदपेक्षयैतन्मते गौरवादिति भावः । ननु मनोऽङ्गीकारेऽपि चाक्षुषसामग्रीकाले स्पार्शनसामग्र्या नियतत्वात्तदुत्पत्त्यापत्त्या चाक्षुषसामग्र्यास्तत्प्रतिबन्धकत्वं कल्पनीयमिति स्वन्मतेऽपि गौरवं तदवस्थमेवेति शङ्कते—**न चेत्यादिना । एवमपि रासनादिप्रत्यक्ष इति** । इदं च स्पार्शनत्व-रासनत्वादिना चाक्षुसामग्रीप्रतिबध्यत्वमभिप्रेत्योक्तम् । न चाक्षुषसामग्र्याः चाक्षुषेतरज्ञानत्वावच्छिन्न प्रति प्रतिबन्धकत्वाङ्गीकारेणैव चाक्षुषसामग्रीकाले स्पार्शनरासनाद्यनुत्पादनिर्वाहादिदमसङ्गतमिति वाच्यम् । एवं सति रासनसामग्र्यादशायां स्पार्शनाद्यनुत्पादनिर्वाहाय तत्तत्सामग्र्या अपि रासनेतरप्रत्यक्षत्वावच्छिन्नं प्रति प्रतिबन्धकत्वस्य वक्तव्यतया रासनसामग्रीकाले चाक्षुषस्याऽप्यनुत्पादप्रसङ्गात् । न च रासनादिसामग्र्याश्चाक्षुषातिरिक्तरासनादिभिन्नप्रत्यक्षत्वावच्छिन्नं प्रत्येव प्रतिबन्धकत्वं वक्तव्यम्, चाक्षुषसामग्र्यास्तु चाक्षुषेतरप्रत्यक्षत्वावच्छिन्नं प्रति प्रतिबन्धकत्वं स्वीकरणीयमिति नैष दोष इति वाच्यम् । एवमपि चाक्षुषादिसामग्रीकाले रासनादीच्छासत्त्वे रासनाद्युत्पादनिर्वाहाय तत्तदिच्छानामुत्तेजकत्वस्याऽऽवश्यकतया तत्तदिच्छाविरहविशिष्टचाक्षुषादिसामग्र्या एव चाक्षुषेतरप्रत्यक्षे प्रतिबन्धकत्वेऽपि चाक्षुषसामग्रीकाले रासनं जायतामितीच्छाकाले रासनस्येव स्पार्शनादेरपि उत्पत्त्यापत्तेश्चाक्षुषादिसामग्र्याश्चाक्षुषेतरत्वाद्यवच्छिन्नं प्रति प्रतिबन्धकत्वं परित्यज्य रासनत्वादितत्तद्धर्मावच्छिन्नं प्रत्येव तत्तदिच्छाविरहवि-

दिनकरी ।

योगस्य ज्ञानसामान्यं प्रत्यजनकत्वेऽपि सुषुप्तौ ज्ञानानुत्पादनिर्वाहः, तथोपपादितमधस्तात् ।

एवं मनसो विभुत्वे आत्ममनःसंयोगानुपपत्तिः, आत्ममनसोः कर्माभावेन कर्मजन्य-संयोगस्य विभुत्ववादिमतेऽसम्भवात् ।

यदपि भौतिका एव परमाणवो मनांसि, अनन्तधर्मिणामतिरिक्तायाश्च जातेः कल्पनामपेक्ष्य क्लृप्तानामेव धर्मिणां तद्रूपेण हेतुत्वस्य युक्तत्वात्, नियमस्त्वदृष्टोपग्रहादिति नव्यैरुक्तं, तदपि न । यत्संयोगव्यतिरेकात् सुषुप्तिकाले कार्यानुत्पादः, तस्य मनसोऽवश्य-मङ्गीकरणीयत्वात् । न च कालविशेषस्य प्रतिबन्धकत्वादेव सुषुप्तिकाले कार्यानुत्पाद इति वाच्यम् । अनन्तानां कालविशेषाणां प्रतिबन्धकत्वे गौरवात् । न चोदासीनमनःसंयोगस्य सुषुप्तिप्राक्काले सत्त्वादापत्तिस्तदवस्थैवेत्यदृष्टविशेषाकृष्टं मन एव ज्ञानादिहेतुत्वेन वक्तव्यं, तदपेक्षया चाऽदृष्टविशेषाकृष्टभौतिकपरमाणूनामेव तद्धेतुत्वमुचितमिति वाच्यम् । तस्य

रामरुद्री ।

शिष्टतत्तत्सामग्र्याः प्रतिबन्धकत्वावश्यकतया गौरवस्य दुर्वारत्वादिति ध्येयम् । **इत्युक्तं प्रागिति** । अन्यथा त्वङ्मनोयोगतोऽपि ज्ञानोत्पादात् **'परैर्ज्ञानं नोत्पाद्यते'** इति कथनमयुक्तं स्यादिति ।भावः । एतच्च यथाश्रुतमूलस्वारस्यावगतिनिबन्धनं, अन्यथा **यदसम्बन्धात्'**-इतिपञ्चम्यन्तरस्य प्रयोजकत्वमर्थं स्वीकृत्य मनोऽसम्बन्धात्परैर्ज्ञानं नोत्पाद्यते इत्यर्थकरणे बाधकाभावात् । मनःसंयोगविरहदशायां त्वङ्मनः संयोगतोऽपि ज्ञानोत्पादस्य सिद्धान्तेऽनभिमतत्वादिति द्रष्टव्यम् । **अधस्तादिति** । **'द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम्**—(का० ५५)' इतिकारिकाव्याख्यानावसर इत्यर्थः ।

संयोगानुपपत्तिरिति । क्रियाजन्यतावच्छेदकतया सिद्धायाः संयोगत्वजातेरजन्यवृत्तित्वासम्भवादिति भावः । इदमुपलक्षणम् । मनसो विभुत्वे तत्संयोगस्याऽपि नित्यत्वेन सार्वदिकतया सुषुप्तावपि विषयावभासप्रसङ्ग इत्यपि दूषणं बोध्यम् । न च त्वङ्मनःसंयोगाभावान्नैवमिति वाच्यम् । मनसो विभुत्वेन तत्कालेऽपि तत्सम्भवादिति ।

नव्यमतमाह । **भौतिका इति** । भूताभिन्ना इत्यर्थः । **युक्तत्वादिति** । लाघवज्ञानविषयत्वादित्यर्थः । **अदृष्टोपग्रहादिति** । अदृष्टबलादित्यर्थः । **अवश्यमङ्गीकरणीयत्वादिति** । अन्यथा भौतिक-परमाणूनामेव तथात्वे तन्मनः पृथिवी जलं वेत्यत्र विनिगमनाविरहेण पञ्चविधानामपि परमाणूनां मनःस्वरूपत्वावश्यकतया तेषाञ्च कदाचित्परस्परं विप्रकृष्टानां रसनाचक्षुरादिनानेन्द्रियसन्निकर्षसम्भवेन पुनश्चाक्षुषकाले रासनाद्युत्पादप्रसङ्गादिति मनोऽतिरिक्तताया अवश्याङ्गीकरणीयत्वादिति भावः । एवञ्च न नानेन्द्रियसन्निकर्षे इति न ज्ञानद्वयापत्तिरिति ध्येयम । **अनन्तानां कालविशेषाणामित्यादि** । इदमत्राऽवधेयम् । कालविशेषाणां प्रतिबन्धकत्वबादिभिः क्लृप्ताः कालविशेषाः प्रतिबन्धका इत्युच्यन्ते, अक्लृप्ता वा ? आद्ये कालविशेषाणां तत्तत्कालोपाधिरूपत्वेन विनिगमकाभावादनन्तकालोपाधीनां प्रतिबन्धकत्वकल्पनया नव्यानामेव गौरवम् । यद्यक्लृप्तास्तर्हि अक्लृप्तमनःकल्पनैव लघीयसी, कल्पनाया उभयमते तुल्यत्वात्, भवद्भिर्भौतिकपरमाणूनां ज्ञानजनकत्वकल्पनेन महागौरवाच्चेति । इतोऽपि नव्यमतमनुपपन्नं, ये किल परमाणवो मनःशब्देनाऽभिधीयन्ते तत्र निरर्थकपृथिवीत्वादिजातिकल्पनायाः रूपरसादिकल्पनायाश्च तैरेव करणीयत्वात्' न हि किञ्चिदपि तादृशं प्रमाणं पश्यामो यन्मनसःरूपादि साधयेत्, अस्मन्मते तु तत्र रूपाद्यकल्पनेन महालाघवम् । न हि तेऽपि परमाणवः क्लृप्ता ये मनांसीत्युच्यन्ते, अनादिकालमारभ्य प्रत्यात्मनियतानां तत्तन्मनसां तैरपि कल्पनीयतया तेषामनादिकालमारभ्य तत्तदात्मनियतत्वासम्भवात्, तस्मात्कल्पनीयेषु मनस्त्वमनुपपन्नमेव, तादृशकारणतानिर्वाहाय मनःसंयोगव्यक्तिषु वैजात्यकल्पनस्याऽऽवश्यकतया तादृशवैजात्यावच्छिन्नमनःसंयोगाभावादेव तदानीं ज्ञानानुदयनिर्वाहादित्यवधेयम् । **तदपेक्षया चेत्यादि** । इदमप्यनुपपन्नमेव ।

अथ द्रव्याश्रिता ज्ञेया निर्गुणा निष्क्रिया गुणाः।

सङ्क्षेपः ॥ ८५ ॥ इति मनोनिरूपणम् ॥

इति सिद्धान्तमुक्तावल्यां द्रव्यपदार्थव्याख्या समाप्ता ॥

अथ गुणनिरूपणम्।

द्रव्यं निरूप्य गुणान्निरूपयति—अथेत्यादिना। **गुणत्वजातौ किं मानमिति चेत्, द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किञ्चिद्धर्मावच्छिन्ना कारणतात्वात् निरवच्छिन्नकारणताया असम्भवात्। नहि रूप**

दिनकरी।

भौतिकत्वे पृथिवीत्वं जलत्वादिकं वेत्यत्र विनिगमकाभावात्। उभयकल्पने च जातिसाङ्कर्यम्, तदेतदभिप्रेत्योक्तं-सङ्क्षेप इति ॥ ८५ ॥ इति मनसोऽणुत्वकथनम् ॥

॥ इति द्रव्यपदार्थव्याख्यानम् ॥

इति श्रीभारद्वाजकुलाम्बुधिपूर्णचन्द्रबालकृष्णभट्टात्मजमहादेव-
भट्टारब्धे तत्पुत्रदिनकरभट्टप्रपूरिते मुक्तावलीप्रकाशे
मनोनिरूपणाख्योऽष्टमः परिच्छेदः।

अवसरसङ्गतिमभिप्रेत्याह। **द्रव्यं निरूप्येति**। तस्मिन्निरूपिते प्रतिबन्धकीभूतजिज्ञासानिवृत्तेरिति भावः। 'इति चेदिदम्' इत्यपि पाठः। **ननु रूपत्वस्य सत्ताया वा गुणनिष्ठकारणतावच्छेदकत्वं स्यादित्याशङ्क्याऽऽह। न हीति**। 'रूपत्वादिकं' इत्यादिना रस-

रामरुद्री।

युक्तिस्तुप्रागभिहिता। **जातिसाङ्कर्यमिति**। वस्तुतस्तु सुषुप्तिकाले पुरीततिमनःसंयोगस्य ज्ञानप्रतिबन्धकत्वकल्पनेन त्वङ्मनःसंयोगस्य चर्ममनःसयोगस्य वा ज्ञानकारणत्वकल्पनेनैव वा सुषुप्तिकाले ज्ञानानुत्पादनिर्वाहान्नैष दोषे नव्यैरुद्भावयितुं शक्यः। न चैवंविधायाः कल्पनाया नवीनमतेऽपि सम्भव इति वाच्यम्। जाग्रदवस्थायामपि कैश्चित्परमाणुभिः पुरीतता सह संयोगात् तदानीमपि ज्ञानानुत्पादापत्तेः, सुषुप्तावपि ज्ञानोत्पादापत्तेश्च, तन्मतानुसारेण त्वङ्मनःसंयोगस्य च सुषुप्तौ सत्त्वात्। न च विजातीयपरमाणूनामेव मनस्त्वमिति तादृशवैजात्यावच्छिन्नमनःसंयोगाभावादेव न सुषुप्तौ ज्ञानोत्पत्तिर्जाग्रदशायां ज्ञानप्रतिबन्धो वा, तदानीं तथाविधसंयोगानभ्युपगमादिति वाच्यम्॥ विजातीयपरमाणूनामेव मनस्त्वेन तत्र पार्थिवत्वादिकल्पने तवैव गौरवात्। न च कालविशेषस्यैव ज्ञानप्रतिबन्धकत्वकल्पनात् न सुषुप्तौ ज्ञानोत्पत्त्यापत्तिः, भवन्मते पुरीतन्मनसंयोगस्य ज्ञानप्रतिबन्धकत्ववदस्मन्मते तथा कल्पने गौरवाभावादिति वाच्यम्। एवमपि एकस्य सुषुप्तौ सर्वेषामेव सुषुप्त्यापत्तेः, प्रतिबन्धकीभूतकालस्याऽविशेषात्। तत्तदात्मसुषुप्तिं प्रति तत्तत्कालस्य हेतुत्वोपगमे च महागौरवमिति न भौतिकाः परमाणवो मन इति सिद्धमिति सर्वमवदातम्॥ ८५ ॥ ॥ इति मनोनिरूपणे मनसोऽणुत्वकथनम्॥

॥ इति श्रीरामरुद्रभट्टाचार्यारब्धायां राजेश्वरशास्त्रिप्रपूरितायां महामहोपाध्याय-जटापाठ्युपाह्व-श्रीलक्ष्मणशास्त्रिसंशोधितायां मुक्तावलीप्रकाशतरङ्गिण्यां मनोनिरूपणाख्योऽष्टमस्तरङ्गः॥

॥ इति द्रव्यपदार्थो व्याख्यातः॥

अवसरेति। निरूपिततत्त्वमेतत्। **रूपत्वस्येति**। **अतीन्द्रियरूपादाविति**। परमाणुगते इन्द्रियादिगतें

दिनकरी ।

त्वादिपरिग्रहः । यद्यपि गुणत्वजातौ प्रत्यक्षमेव प्रमाणं, रूपादिषु संयुक्तसमवेतसमवायेन गुणत्वप्रत्यक्षसम्भवात्, तथाऽप्यतीन्द्रियरूपादौ तत्प्रत्यक्षासम्भवेन तत्साधारण्यं गुणत्वस्य न घटत इत्यनुमानं प्रदर्शितम् । न च रूपत्वादिना साङ्कर्यभियाऽतीन्द्रियरूपादौ गुणत्वसिद्धिः, गुरुत्वादौ तु धर्मिग्राहकमानेन तत्सिद्धिरित्यनुमानप्रदर्शनं व्यर्थमिति वाच्यम् । रूपादावप्यापामरसाधारण-'गुणः'-इति प्रत्यक्षस्याऽप्रसिद्धेः ।

रामरुद्री।

चेत्यर्थः। **न घटत इति**। न सिद्ध्यतीत्यर्थः। प्रत्यक्षे महत्त्वोद्भूतरूपयोः कारणत्वेन परमाण्विन्द्रियादौ तदभावान्न प्रत्यक्षसम्भव इति भावः। **साङ्कर्यभियेति**। रूपत्वं विहाय गुणत्वं रसादौ, गुणत्वं विहाय च रूपत्वं परमाण्वादिरूपे वर्तते, उभयोश्च प्रत्यक्षरूपे समावेश इति तत्प्रयुक्तसाङ्कर्यभियेत्यर्थः। तथा च गुणत्वं रूपत्वसमानाधिकरणात्यन्ताभावाप्रतियोगि, रूपत्वविशिष्टजातित्वात्, सत्त्ववदित्यनुमानेन गुणत्वे रूपत्वव्याप्यकत्वं प्रथमतः साधनीयम्। वैशिष्ट्यञ्च स्वसामानाधिकरण्य-स्वाभावसामानाधिकरण्योभयसम्बन्धेनेति। ततश्च गुणत्वमतीन्द्रियरूपवृत्ति, रूपत्वव्याप्यकत्वादित्यनुमानेन गुणत्वस्याऽतीन्द्रियरूपे सिद्धिरिति ध्येयम्। **ननु** जातिसाङ्कर्यादिभयेनाऽतीन्द्रियैरिन्द्रियकसाधारणजातीयगुणेषु गुणत्वजातिसिद्धावपि अतीन्द्रियमात्रजातीये गुरुत्वादौ कथं तत्सिद्धिरित्यत आह। **गुरुत्वादाविति**। 'आदि'पदात् धर्माधर्मपरिग्रहः। **धर्मिग्राहकमानेनेति**। अतीन्द्रियत्वसहकृतेनेति शेषः। इदमत्र तत्त्वम्। गुरुत्वस्य हि आद्यपतनासमवायिकारणत्वेनैव सिद्धिः। तथा च गुरुत्वं गुणः, द्रव्यकर्मभिन्नसामान्यवत्त्वात्, रूपवदित्यनुमानेन गुरुत्वे गुणत्वं प्रसाधनीयम्। द्रव्यकर्मभिन्नत्वं तु अतीन्द्रियत्वसहकृतासमवायिकारणत्वेनेति भावः। अतीन्द्रियत्वं च विषयतासम्बन्धावच्छिन्नप्रत्यक्षत्वावच्छिन्नप्रतिबध्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्नप्रतिबन्धकतावत्त्वम्। नाऽतः परमाणुकर्मणि व्यभिचारः। गुरुत्वादिप्रत्यक्षवारणाय चैतादृशप्रतिबध्यप्रतिबन्धकभावः स्वीकरणीय इति भावः। धर्माधर्मयोस्तु विभुवृत्तित्वविशिष्टातीन्द्रियत्वेन द्रव्यकर्मभिन्नत्वं साधनीयमिति विभावनीयम्। **अप्रसिद्धेरिति**। रूपादिषु पामराणां गुणत्वव्यवहाराभावादिति भावः।

अत्र केचित्—पामराणां गुणत्वप्रत्ययाभावेऽपि न तावता गुणत्वं नाऽस्तीति वक्तुं शक्यम्। रत्नपरीक्षाशास्त्राभ्याससहकृतेनेन्द्रियेण रत्ने रत्नत्वग्रहणवत्, वंशपरम्परया ब्राह्मणत्वग्राहकोपदेशसहकृतेन ब्राह्मणे ब्राह्मणत्वादिग्रहणवच्च शास्त्रकारोपदेशसहकृतेन तेनैव चक्षुषा गुणत्वग्रहणात्। न हि दृष्टिपातमात्रेण रत्नत्वं काचादिविलक्षणमविदितरत्नपरीक्षाशास्त्रेण ज्ञातुं शक्यम्, ब्राह्मणत्वादिकमेव वा क्षत्रियादिविलक्षणं ज्ञातुं शक्यम्, चाकचक्यादेरुपवीतादिधारणस्य चोभयत्र तुल्यत्वात्, तदेवं गुणेऽपि द्रव्यकर्मविलक्षणं गुणत्वमश्रुतशास्त्रेण न ज्ञातुं शक्यम्, द्रव्याद्याश्रितत्वस्य तुल्यत्वात्। इत्थं च कथं पामराणां गुणत्वग्रहणसम्भवः? द्रव्याश्रितत्वादेर्दोषस्य प्रतिबन्धकत्वात्, पण्डितानां तु भवत्येवेति न गुणत्वासिद्धिः। यदि हि दुष्टेनेन्द्रियेण न गृह्यत इति वस्तु सदपि नाऽस्तीत्युच्यते, तथासति दूरत्वादिदोषेण घटाद्यग्रहेऽपि घटाद्यभावसिद्ध्यापत्तिः। टीकायां तु तत्प्रत्यक्षं द्रव्यकर्मभिन्नसामान्यवत्त्वरूपोपाधिनैव सम्भवतीत्याशयेनैव गुणत्वप्रत्यक्षासम्भव उक्तः। एतादृशोपाधेस्तादृशप्रतीतिविषयतावच्छेदकत्वकल्पने गौरवात्, द्रव्याद्यज्ञानेऽपि गुणत्वग्रहणाच्च गुणत्वमतिरिक्तमेवेति तु वयम्। यद्यपि द्रव्यकर्मभेदस्य तादृशभेदत्वेन ग्रहण एव प्रतियोगिग्रहणस्याऽपेक्षा, गुणत्वत्वेन ग्रहणे तु नेति कुतो गौरवमित्युच्यते, तथाऽपि गुणत्वत्वं नाम किञ्चिद्वस्तु भवद्भिः कल्पनीयमेवेति तदपेक्षया गुण एव गुणत्वरूपधर्मकल्पने लाघवम्। न च भेदनिष्ठं गुणत्वत्वं तद्वृत्तं तद्व्यक्तित्वमेवेति वाच्यम्। तथा सति सामान्यादावपि गुण इतिप्रत्ययप्रसङ्गात्, तत्र द्रव्यकर्मभेदस्य सत्त्वात्। न च द्रव्यकर्मभेदसामान्योभयपर्याप्तं गुणत्वत्वमतिरिक्तमेवेति चेत्तत्त्वैव पर्याप्त्यादिकल्पनप्रयुक्तं गौरवम्। न च तद्वृत्तमुभयत्वमेव तदिति वाच्यम्। भेदसामान्यादिगतस्योभयत्वस्य धीविशेषविषयत्वरूपत्वेन धीभेदेन भिन्नतयाऽनन्तो-

त्वादिकं सत्ता वा तत्रावच्छेदिका, न्यूनाधिकदेशवृत्तित्वात्, अतश्चतुर्विंशतिकरी ।

इदमत्र बोध्यम् । सकलगुणसाधारणी एका कारणता नाऽस्त्येवेति कथं तदवच्छेदकतया गुणत्वजातिसिद्धिः ? न च चतुर्विंशतिगुणेषु प्रत्येकं याः कारणतास्तासामेव पक्षतया तादृशसकलकारणतावच्छेदकतया गुणत्वजातिसिद्धिरिति वाच्यम् । तथा सति द्रव्यकर्मरूपभिन्नसामान्यवति या कारणता सा किञ्चिद्धर्मावच्छिन्नेत्यनुमानेन रूपभिन्नत्रयोविंशतिगुणसाधारणवैजात्यस्याऽपि सिद्धिप्रसङ्गात्, परिमाण्डल्यस्य क्वाऽप्यकारणतया गुणत्वरामरुद्रौ ।

भयत्वानां विनिगमनाविरहेण तथात्वकल्पनाया गुरुत्वापादकत्वात्, एतादृशोभयत्वाग्रहेऽपि गुणत्वत्वप्रतीतेश्च । न च द्रव्यकर्मभेदविशिष्टं सामान्यमेव गुणत्वमिति न कश्चिद्दोषः, भेदस्य च तद्व्यक्तित्वेनैव प्रकारत्वमिति न गुणत्वग्रहणे द्रव्यादिज्ञानमपेक्षितम्, तद्व्यक्तित्वं च तादात्म्येन सैव व्यक्तिः, तस्याश्च स्वरूपतोभानप्रङ्गीकियत इति वाच्यम् । सामान्यविशिष्टतादृशभेदस्तादृशभेदविशिष्टसामान्यं वा गुणत्वमित्यत्र विनिगमनाविरहेण द्वयोस्तथात्वाङ्गीकारे महागौरवापत्त्याऽतिरिक्तगुणत्वकल्पनाया एव लघीयस्त्वादित्याहुः ।

तन्न । रत्नादिवु रत्नत्वादेरुपदेशासहकारेऽपि ग्रहणात् । न च तर्ह्युपदेशाभावे पद्मरागादिषु पद्मरागादिबुद्धिः कुतो न जायते इति वाच्यम् । इतररत्नविलक्षणाया जातेः पद्मरागादौ ग्रहणेऽपि तत्र पद्मरागादिपदवाच्यत्वस्यैवाऽप्रतीत्या पद्मरागादिव्यवहाराभावसम्भवात् । अयं मणिः पद्मरागपदवाच्य इत्याद्युपदेशे हि तत्तत्पदवाच्यत्वमेव प्रतीतं, न तु जातिरिति भवतामपि कथमुपदेशेन तद्ग्रहणसम्भवः? न चैवं ब्राह्मणत्वादिकमप्यापतत एव कुतो न ज्ञायत इति वाच्यम् । ब्राह्मणत्वादेरतीन्द्रियत्वेन तद्ग्रहणस्य कदाऽप्यसम्भवात् । न च तर्ह्युपदेशानन्तरं कथं तद्ग्रहणमिति वाच्यम् । उपदेशानन्तरं तत्प्रत्यक्षस्य तद्विषये उपनीतभानात्मकस्यैव स्वीकारात् । एवं च तुल्ययुक्त्या गुणत्वस्याऽपि प्रत्यक्षमेव नाऽस्तीति न तत्सिद्धिस्तेनेति विभावनीयम् ।

यत्तु गुणपदशक्यतावच्छेदकतया गुणत्वजातिसिद्धिरिति कश्चिदाह । तत्तुच्छम् । शक्यतावच्छेदकतया जातिसाधनस्य प्रागेव दूषितत्वादिति विभावनीयम् ।

एतेन पाकेन रूपादेर्नाशदशायां नीरूपपरमाणौ क्रियानुत्पादात् क्रियाजनकतावच्छेदकतया गुणत्वजातिसिद्धिरित्युक्तिः परास्ता । पाकेन रूपादिनाशकाले सङ्ख्यादिसत्त्वात् गुणत्वावच्छिन्नाभावाभावेन क्रियोत्पत्त्यापत्तेर्वज्रलेपतया तादृशजाते रूपरसगन्धस्पर्शादिगततत्तद्वैजात्यरूपताया एवाऽङ्गीकारसम्भवेऽपि चतुर्विंशत्यनुगतजात्यसिद्धेर्जागरूकत्वात् ।

प्रसङ्गादिति । इदमत्राऽवधेयम्—पूर्वपक्षिमते हि रूपादिनिष्ठकारणताः पक्षीकृत्य किञ्चिद्धर्मावच्छिन्नत्वं साधनीयम्, तत्तु न सम्भवत्येव, तादृशकारणतानां रूपत्वाद्यवच्छिन्नत्वस्योभयवादिसिद्धतया तत्साधने सिद्धसाधनात् । न च तादृशकारणतात्वावच्छेदेन यत्किञ्चिद्धर्मावच्छिन्नत्वं साधनीयम्, रूपत्वादे रूपादिनिष्ठतत्तत्कारणतावच्छेदकत्वेऽपि कारणतासामान्यानवच्छेदकत्वादेव सिद्धसाधनविरहादिति वाच्यम् । तथा सति बाधप्रसक्तेः । तादृशकारणतानां रूपत्वाद्यवच्छिन्नतया चतुर्विंशत्यनुगतविलक्षणधर्मावच्छिन्नत्वासम्भवात्, गुणत्वस्य तत्तत्कारणतातिरिक्तवृत्तित्वादवच्छेदकत्वासम्भवाच्च । यदि च रूपत्वाद्यनवच्छिन्नचतुर्विंशत्यनुगतकारणता पक्षीकर्तव्येत्युच्यते, तदा तादृशकारणत्वस्यैवाऽभाव इति पक्षाप्रसिद्धिरिति प्राक्तनशङ्का असमाहितैव । टीकायां तु प्रौढयैव परोक्तमङ्गीकृत्य परमते त्रयोविंशतिसाधारणजातिसिद्धिप्रसञ्जनमिति ध्येयम् । चतुर्विंशतिसाधारणकारणतासाधकप्रमाणाभाव एव पूर्वमुक्तः इदानीं बाधकप्रमाणमपि दर्शयति । **पारिमाण्डल्यस्येत्यादिना ।**

अत्र त्रूमः । प्रलयाद्यवच्छिन्नगगनदिक्कालेषु मुक्तेषु जीवेषु भगवति च क्रियाऽजन्यजन्यद्रव्यकर्म-

रामरुद्री ।

भिन्नसत्ताकास्तो नोत्पद्यन्त इत्यनुभवसिद्धम् । तदनुत्पत्तिप्रयोजकं किमिति जिज्ञासायां पाकजापाकजादि-भेदविभिन्नरूपत्व—रसत्वादिप्रत्येकधर्मावच्छिन्नानन्तजन्यतानिरूपितानन्तजनकतावच्छेदकीभूतानन्तत-त्तद्धर्मावच्छिन्नप्रतियोगिताकाभावकूटस्य तत्प्रयोजकत्वं वक्तव्यम् । अस्माकं तु जन्यमात्रवृत्तिजन्यगुण-त्वावच्छिन्नं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन गुणस्य, आत्मवृत्तिविशेषगुणत्वावच्छिन्नं प्रति चाऽऽ-त्ममनःसंयोगस्य हेतुत्वाच्छब्दं प्रति च गगनस्य हेतुतायाः सिद्धत्वेन प्रसङ्गोऽयमभावचतुष्टयस्य तत्प्र-योजकतामुपगम्य वारयितुं शक्यते इति लाघवम् । तथा हि क्रियाऽजन्यजन्यगुणास्तज्जन्यविलक्षणसंयो-गविभागवेगरूपत्रितयभिन्नाः सर्वे एव, तत्र जन्यमात्रवृत्तिगुणाः रूप—रस—गन्ध—स्पर्शाः, जन्यवृत्तिस-ङ्ख्या—परिमाण—पृथक्त्व—संयोगविभाग—गुरुत्व—द्रवत्व—स्नेह—भावनान्यसंस्काराश्चेति त्रयोदश, आत्म-वृत्तिविशेषगुणाश्च बुद्धि—सुख—दुःखेच्छा—द्वेष—प्रयत्न—धर्माऽधर्मरूपा अष्टौ भावना चेति नव, मिलित्वा द्वाविंशतिर्गाता, तेषां कारणीभूतौ गुणात्ममनःसंयोगौ तत्र स्वसमवायिसमवेतत्व—समवायरूपसम्बन्धा-भ्यां न स्त इति तदभावप्रयोजकौ द्वावभावौ जातौ, अवशिष्टाः विभुमात्रवर्तिनी सङ्ख्यापृथक्त्वे अपेक्षा-बुद्धिजन्ये, शब्दश्च । तत्र सङ्ख्या—पृथक्त्वयोरपेक्षाबुद्ध्यभावादभावः, शब्दस्य च तादात्म्येन गगनाभा-वादिति, तथा च कालदिगादिषु क्रियाऽजन्यजन्यद्रव्यकर्मभिन्नसत्तावदनुत्पत्तिप्रयोजका गुणाऽऽत्ममनः-संयोगापेक्षाबुद्धिगगनानां तत्तत्सम्बन्धावच्छिन्नप्रतियोगिकाभावाश्चत्वार इत्यस्माकं लाघवम् । एतादृश कार्यकारणभावानङ्गीकर्तॄणां तु पाकजापाकजरूपत्वादिप्रत्येकधर्मावच्छिन्नानां कारणानामनन्ता अभावा स्तत्प्रयोजकतयाऽभ्युपेया इति महद्गौरवम् । तथा च लाघवज्ञानसहकारेणैतादृशकार्यकारणभावसिद्धौ गुणत्वजातिसिद्धिरपि सम्भवति । तथा हि—जन्यमात्रवृत्तिजन्यगुणत्वावच्छिन्नं प्रति स्वसमवायिसम-वेतत्वसम्बन्धेन गुणः कारणमिति प्रथमः कार्यकारणभावः, अयं च 'कारणगुणाः कार्यगुणानार-भन्ते' इति प्रवादमूलकः । तत्र च कार्यतावच्छेदककोटौ गुणत्वानिवेशे घटादीनामपि कपालिकारूपादिका र्यत्वापत्तिः, इष्टापत्तौ च पिठरपाकवादिमते श्यामादिरूपनाशे तन्नाशापत्तिः, असमवायिकारणनाशस्य कार्यद्रव्यनाशकत्वात्, पीलुपाकवादिमते तु द्व्यणुकनाशानन्तरं क्रमेण तन्नाशापत्तिर्बोध्या, गुणत्व-स्थाने द्रव्यभिन्नत्वप्रवेशे च क्रियाया अपि तत्कार्यतापत्तिः, इष्टापत्तौ च 'कारणगुणाः कार्यगुणानारभन्ते' इत्येतादृशोपजीव्यप्रवादविरोधः तत्र गुणानामेव स्वसमवायिसमवेतत्वसम्बन्धेन गुणजन्यताबोधनात्, तद्भेदस्यापि निवेशे ध्वंसस्य कार्यत्ववारणार्थं सत्त्वनिवेशोऽप्यावश्यक इति त्रयाणां विशेषणविशेष्य-भावे विनिगमनाविरहेण कार्यकारणभावत्रयाधिक्यप्रसङ्ग इति महद्गौरवम्, अतो गुणत्वप्रवेशो युक्त इति एतादृशकार्यतावच्छेदकतया गुणत्वजातिसिद्धिः। अत्र द्वित्वादिसङ्ख्याद्यपृथक्त्वक्रियाजन्यसंयोगविभाग-पाकजरूपादिषु स्वसमवायिसमवेतत्वसम्बन्धेन कारणगुणजन्यत्वाव्यवहारात् अपेक्षाबुद्ध्यजन्यत्व—क्रियाऽ जन्यत्व—पाकाजन्यत्वानां कार्यतावच्छेदककोटौ प्रवेश आवश्यक इति केचित्। तत्तु न सम्यक्। 'वि-भूनां तु ये स्युर्वैशेषिका गुणाः। अकारणगुणोत्पन्ना एते—' इत्यादिना विभुगुणानामेवाऽकार-णगुणोत्पन्नत्वकथनेन जन्यवृत्तिद्वित्वादीनां कारणगुणपूर्वकत्वे क्षतिविरहस्य सूचनादिति ध्येयम्। कारणतावच्छेदकं च गुणत्वं जातिरूपमुपाधिरूपं वेत्यन्यदेतत्। नन्वेतादृशरीत्या सिद्ध्यन्ती जाति-र्जन्यवृत्ति—जन्यगुण एव स्वीक्रियतां, तथा च तादृशजातेः शब्दे नित्यवृत्तिद्वित्वादिषु नित्येषु चाऽसि-द्ध्याऽर्थान्तरमिति चेन्न । नित्यसजातीयजन्येषु वर्तमानायास्तस्या नित्यादावनङ्गीकारे प्रत्येकं रूपत्वा-दिना साङ्कर्यापत्त्या तस्या रूप—रस—गन्ध—स्पर्श—सङ्ख्या—परिमाण—पृथक्त्वा—संयोग—विभाग—परत्वा-परत्व—गुरुत्व—द्रवत्व—स्नेह—संस्कारेषु स्वीकारस्याऽऽवश्यकत्वे पञ्चदशसु गुणत्वसिद्धौ, बुद्धि—सुख—दुःखे—च्छा—द्वेष—प्रयत्न—धर्माधर्मेषु आत्ममनःसंयोगस्य आत्मवृत्तिविशेषगुणत्वावच्छिन्नं प्रति जनक-त्वात् तत्कार्यतावच्छेदकतया तत्सिद्धेः। घटात्मगतसंयोग—द्वित्वादीनां मनःसंयोगकार्यत्वापत्त्या व्यभि-चारवारणाय विशेषगुणत्वस्य कार्यतावच्छेदककोटौ निवेशः, आत्मवृत्तित्वस्य च रूपादौ व्यभिचारवा-रणाय निवेश इति ध्येयम्। अथाऽऽत्ममनःसंयोगकार्यतावच्छेदकतया बुद्ध्यादिष्वेवैषा जातिः सिद्ध्ये-

त्यनुगतं किञ्चिद्वु वाच्यं तदेव गुणत्वमिति सिद्धम् । इति गुणत्वजातिसाधनम् ।

दिनकरी ।

स्याऽप्यतिप्रसक्तयाऽनवच्छेदकत्वाच्चेत्यन्यत्र विस्तरः ॥ इति गुणत्वजातिसाधनम् ॥

रामरुद्री ।

दिति जातिद्वयसिद्ध्याऽर्थान्तरं दुर्वारमिति चेन्न । तथा सति मनःसंयोगजन्यतावच्छेदिकाया जातेः संस्कारत्वेन सह सांकर्यापत्त्या यावत्संस्कारवृत्तित्वावश्यकत्वे साधितजातिद्वयस्य परस्परं सांकर्यापत्त्या तयोः समनियतत्वस्याऽप्यावश्यकत्वे तुल्यव्यक्तिवृत्तित्वेनाऽभेदानुमानात् रूपादि—बुद्ध्यादिसाधारण-जातिसिद्धेरप्रत्यूढत्वात् । अथैवमेषा जातिः शब्दे कथं सिद्ध्येदिति चेत्— स्वोत्तरवर्तिगुणनाश्यतावच्छेदकत्वस्य योग्यस्य -विभुसमवेतत्वविशिष्ट—विशेषगुणत्वरूपयोग्यविभुविशेषगुणत्व एव स्वीकारात् शब्दस्य च स्वोत्तरवर्तिगुणनाश्यतया तत्र तत्स्वीकारस्याऽऽवश्यकत्वात् तत्र तत्सिद्धिरिति गृहाण । विशेषगुणत्वस्य च वक्ष्यमाणस्य गुणत्वघटितत्वान्न विशेषत्वमात्रनिवेशेन गुणत्ववैयर्थ्यं वक्तुं शक्यमिति मन्तव्यम् । यदि च क्रियान्योगोक्तकार्यकारणभावः स्वीक्रियते, तदाऽऽद्यकार्यकारणभावे घटाकाशसंयोगादौ व्यभिचारवारकस्य जन्यवृत्तित्वापेक्षया गुरुभूतस्य जन्यमात्रवृत्तित्वस्य प्रवेशो न करणीय एव । नन्वेवं द्वितीयकार्यकारणभावेऽपि आत्मघटसंयोगवारकस्य विशेषगुणपदस्य निष्प्रयोजकतया तदनिवेशे बुद्ध्यादिषु गुणत्वजातिरनयाऽपि रीत्या न सिद्ध्येदिति चेन्न । आत्ममनःसंयोग एव व्यभिचारवारणाय विशेषगुणत्वस्य तत्राऽवश्यनिवेश्यत्वादिति ध्येयम् ।

यद्वा द्वित्वादीनामपि कारणगुणपूर्वकत्वं न स्वीक्रियत एव, अतः स्वसमवायिसमवेतत्वसम्बन्धेन गुणजन्यतावच्छेदककोटौ अपेक्षाबुद्धि—क्रिया—पाकैतत्त्रितयाजन्यत्वनिवेश आवश्यक एव । अथैवमनया रीत्या सिद्ध्यन्ती जातिः परत्वापरत्वयोर्न सिद्ध्येदिति चेन्न । परत्वापरत्वयोः कारणगुणाग्निसंयोगकर्मजन्यमूर्तगुणत्वावच्छिन्नं प्रति अपेक्षाबुद्धेः कारणतयाऽपेक्षाबुद्धिजन्यतया गुणत्वजातिसिद्धेः । तत्र च गुणत्वाप्रवेशे क्रियाया अपि धीजन्यत्वापत्तिरतस्तत्प्रवेश आवश्यकः । अत एव त्रिक्षणवृत्तित्वावच्छिन्न प्रतीत्यपि न कार्यकारणभावः सम्भवति, त्रिक्षणावस्थायिरूपादीनामपि तत्कार्यत्वापत्तेरिति । तथा च परत्वापरत्वयोरपि गुणत्वजातिसिद्धिरबाधितैव । नन्वेतादृशकार्यकारणभावेषु मानाभावः । अन्यथा रूपभिन्नगुणत्वावच्छिन्न प्रति स्वसमवायिसमवेतत्वसम्बन्धेन तद्भिन्नगुणत्वादिनाऽपि कारणत्वापातादिति चेन्न । यतो हि अनन्यथासिद्धत्वे सति कार्यनियतपूर्ववर्तित्वमेव कारणत्वं, तथा च निरुक्तरूपविशिष्टेषु नियतपूर्ववर्तित्वस्याऽवश्यकल्पनयाऽनन्यथासिद्धत्वमात्रस्यैव कल्पनीयतया तस्य च प्रामाणिकव्यवहाराधीनत्वेन, निरुक्तकार्यकारणभावानां च मध्ये 'कारणगुणाः कार्यगुणानारभन्ते' इतिप्राचीनव्यवहारमूलकस्याऽऽद्यस्य, 'आत्मगुणानां मनःसंयोगासमवायिकारणकत्वम्' इतिव्यवहारमूलकस्य द्वितीयस्य, 'योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वम्' इतिव्यवहारमूलकस्य तृतीयस्य, 'परत्वापरत्वद्वित्वद्विपृथक्त्वादयो बुद्ध्यपेक्षाः'इतिभाष्यमूलकस्य चतुर्थस्य चाऽवश्याङ्गीकरणीयत्वात्। रूपभिन्नादेश्च रूपभिन्नादिकारणत्वमप्रामाणिकमिति न तादृशकार्यकारणभावसिद्धिः। ननु द्वित्वद्विपृथक्त्वपरत्वादिगतं वैजात्यं स्वीकृत्य तस्यैव कार्यतावच्छेदकत्वं वाच्यम्, न तु निरुक्तधर्मस्य, गौरवादिति चेन्न । तादृशधर्मस्यैकत्वादिसाधारण्ये गुणत्वजात्या सांकर्यापातात्, गुणत्वं विहाय तस्य परत्वादौ, तद्विहाय गुणत्वस्य रूपादौ वर्तमानस्यैकत्वैकत्वे समावेशात् । यदि चैकत्वाद्यवृत्त्येव तदङ्गीक्रियत इत्युच्यते, तथाऽपि सङ्ख्यात्वादिना सांकर्यं दुर्वारमेव, तस्माद्गुणत्वमेव निरुक्तोपाधिविशिष्टं कार्यतावच्छेदकमभ्युपेतव्यमिति परत्वादौ गुणत्वसिद्धिः । न च कार्यतावच्छेदककुक्षिप्रविष्टापेक्षाबुद्ध्यादिषु कस्याऽप्यनुगतत्वाभावेन तत्तदजन्यत्वकूट-प्रवेशेन गौरवं दुर्वारमिति वाच्यम् । तादृशकूटप्रवेशेऽपि अपाकजरूपत्वाद्यनन्तधर्मावच्छिन्नजनकतावच्छेदकीभूतानन्तधर्मावच्छिन्नाभावानां क्रियाऽजन्यजन्यगुणानुत्पत्तिप्रयोजकत्वाकल्पनेन लाघवस्याऽस्मन्मतेऽबाधितत्वादिति । तदेवमुभयमतेऽपि चतुर्विंशत्यनुगतगुणत्वजातिसिद्धिरित्येष परैरपरिशीलितः पन्थाः ॥

॥ इति गुणत्वजातिसाधनम् ॥

द्रव्याश्रिता इति । **यद्यपि द्रव्याश्रितत्वं न लक्षणम् कर्मादावतिव्याप्तेस्तथापि द्रव्यत्वव्यापकतावच्छेकसत्ताभिन्नजातिमत्त्वं तदर्थः । भवति हि गुणत्वं**

दिनकरी ।

कर्मादावतिव्याप्तेरिति । आदिना सामान्यपरिग्रहः । लक्ष्ये लक्षणसत्त्वं प्रतिपादयति । **भवति होति** । द्रव्यत्वव्यापकतावच्छेदकेत्यस्य फलमाह ।

रामरुद्री।

मूले—**द्रव्यत्वव्यापकतावच्छेदकेति** । द्रव्यत्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकसत्ताभिन्नजातिमत्त्वं पर्यवसितार्थः । अत्र द्रव्यत्वसामानाधिकरण्यमभावे निरवच्छिन्नस्वरूपेण बोध्यम् । तेनाऽऽद्यक्षणावच्छेदेन घटे गुणाभावसत्त्वेऽपि न क्षतिरिति ध्येयम् । अत्र यद्यपि **'अथ द्रव्याश्रिताः-'** इति मूले द्रव्येष्वेव आश्रिता एवेति व्युत्पत्त्या द्रव्येतरावृत्तित्वे सति द्रव्यत्वव्यापकत्वमर्थो लभ्यते, द्रव्येतरनिरूपितवृत्तितानवच्छेदकद्रव्यत्वव्यापकतावच्छेदकजातिमत्त्वमिति तु पर्यवसितोऽर्थः । तथा च गुणत्वस्य तथात्वात्तमादाय लक्षणसमन्वयः सम्भवति, तथाऽपि द्रव्येतरवृत्तितानवच्छेदकत्वापेक्षया सत्ताभेदप्रवेशे लाघवमनुसृत्यैव निरुक्तलक्षणमनुसृतमिति मन्तव्यम् ।

अत्रेदं चिन्त्यम् । एतादृशलक्षणस्याऽसम्भव एव, सर्वेषामेव गुणानामुत्पन्नविनष्टघटवृत्त्यभावप्रतियोगित्वात् । न चोत्पन्नविनष्टे घटे मानाभावान्नैष दोष इति वाच्यम् । यत्र प्रथमं घटारम्भककपालयोर्मध्ये एकस्य क्रिया, ततो विभागः, ततः पूर्वदेशसंयोगनाशः कपालान्तरे क्रिया च, तत उत्तरकपालद्वयसंयोगः कपालान्तरे विभागश्च, ततो घटोत्पत्तिः, कपालद्वयसंयोगनाशश्च, ततो घटनाशावश्यकतया तस्यैव घटस्य क्षणमात्रावस्थायित्वावश्यकत्वात् । न चाऽसमवायिकारणस्य कार्यसहभावेन हेतुत्वोपगमान्नैवमिति वाच्यम् । घटोत्पत्तिक्षणे यत्र कपालनाशः, तत्र स्वसमवायिसमवेतत्वसम्बन्धेन कपालरूपस्य घटेऽसिद्धेस्तत्र्यघटरूपाद्यनुत्पादप्रसङ्गात् । न च समवायिकारणस्याऽपि कार्यसहभावेनैव हेतुत्वमभ्युपगन्तव्यमिति नैष दोष इति वाच्यम् । एवमपि यत्र घटोत्पत्तिद्वितीयक्षणे कपालनाशस्तत्रैव घटे निर्गुणत्वसम्भवात्, तत्पूर्वक्षणे स्वसमवायिसमवेतत्वसम्बन्धेन कारणे गुणसत्त्वेऽपि तत्काले तदसम्भवात्, असमवायिकारणस्य च कार्यसहभावेन हेतुत्वोपगमात्, तस्य चाऽसमवायिकारणत्वादिति चेत्,—

अत्र केचित्,—द्रव्यत्वपदेन संयोग एव विवक्षितः, तद्व्यापकतावच्छेदकत्वं च गुणत्वेऽक्षतमिति नैष दोषः । न च संयोगव्यापकतायाः क्रियायामपि सत्त्वेन तत्राऽतिव्याप्तिरिति वाच्यम् । संयोगाधिकरणविभुवृत्त्यभावप्रतियोगित्वेन क्रियायास्तदव्यापकत्वादिति वदन्ति ।

वस्तुतस्तु द्रव्यत्वव्यापकत्वमत्र न समवायसम्बन्धमात्रेण, अपि तु समवाय—स्वसमवायिसमवेतत्वान्यतरसम्बन्धेन । तथा चोत्पन्नविनष्टद्रव्येऽपि स्वसमवायिसमवेतत्वसम्बन्धेन कपालगतगुणसत्त्वान्न कश्चिद्दोषः । एवं च द्रव्यवृत्तित्वस्याऽभावे निरवच्छिन्नस्वरूपसम्बन्धेनाऽनिवेशेऽपि न क्षतिः, आद्यक्षणावच्छेदेनाऽपि घटादौ कपालरूपस्यैव निरुक्तसम्बन्धेन सत्त्वात् तत्राऽव्याप्तिविरहात् । एतेन द्रव्यत्वपदस्य पारिभाषिकत्वापत्तिशङ्काऽपि निरस्ता वेदितव्या । अथैवमपि समवायसम्बन्धावच्छिन्नप्रतियोगिताकगुणाभावस्यैव यः कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्तस्य यः स्वरूपेणाऽभावः, यश्च नित्यवृत्तित्वविशिष्टस्य समवायसम्बन्धावच्छिन्नप्रतियोगिताकगुणाभावस्य स्वरूपेणाऽभावाभावः, तयोः समवायसम्बन्धावच्छिन्नप्रतियोगिताकगुणाभावानतिरिक्ततया यथाक्रमं जन्यद्रव्यनित्यद्रव्योभयवृत्तितया गुणत्वस्य च तत्प्रतियोगितावच्छेदकत्वादसम्भवः । प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरण्यस्य व्यापकताघटकाभावे निवेशेन गुणाभावस्य कथञ्चिद्वारणेऽपि तादृशाभावासिद्धिनिबन्धनासम्भवो दुर्वार एव, सर्वस्यैवाऽभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात् । न च यादृशप्रतियोगितावच्छेदकसम्बन्धेन यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणं द्रव्यं, तादृशप्रतियोगितानवच्छेदकत्वमेव जातौ वाच्यम् । तथा च पूर्वक्षणवृत्तित्वविशिष्टस्वाभावनिष्ठाया गुणत्वावच्छिन्नायाः प्रतियोगितायाः यादृशप्रतियोगितापदेन ग्रहणासम्भवान्न कश्चिद्दोषः । प्रतियोगितावि[शि-]

रामरुद्री।

ष्टप्रतियोगितानवच्छेदकत्वमिति तु निष्कृष्टोऽर्थः। वैशिष्ट्यं च स्वतादात्म्य-स्वावच्छेदकसम्बन्धावच्छिन्न-स्वावच्छेदकावच्छिन्नाधेयतानिरूपिताधिकरणत्वाभाववद्द्रव्यनिष्ठाभावीयत्वोभयसम्बन्धेनेति वाच्यम्। एवं सति आत्मत्व-मनस्त्वादिजातेरपि व्यापकतावच्छेदकत्वापत्त्या तद्वोरात्ममनसोर्गुणलक्षणस्याऽतिव्याप्त्यापत्तेः, आत्मत्वाद्यवच्छिन्नप्रतियोगिताया यादृशपदेन ग्रहणे तदवच्छेदकावच्छिन्नाधिकरणाप्रसिद्ध्यापत्तेर्यादृशपदेन घटत्वाद्यवच्छिन्नप्रतियोगिताया एव धर्तव्यतया तदनवच्छेदकत्वस्याऽऽत्मत्वे सत्त्वात्। एतेन सर्वस्यैवाऽभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनमादाय प्रतियोगिवैयधिकरण्याप्रसिद्धिः समवायेन स्वप्रतियोगिवैयधिकरण्यं निवेश्यैव वारणीया, पूर्वक्षणवृत्तित्वविशिष्टस्वाभावादिरूपप्रतियोगिनः समवायेनाऽधिकरणत्वाप्रसिद्धयैव च न प्रतियोग्यधिकरणतापदेन तदधिकरणतापरिग्रहसम्भवः, किन्तु शुद्धघटत्वाद्यधिकरणता एव धर्तव्या इति नाऽप्रसिद्धिरित्यपि निरस्तम्। तथाऽप्यात्ममनसोरतिव्याप्तेरनुद्धारात्। न च सम्बन्धसामान्यावच्छिन्नैव व्यापकताघटकाभावीयप्रतियोगिता निवेश्यताम्, तथा चाऽऽत्मभेदमादायैवाऽऽत्मत्वादेः प्रतियोगितावच्छेदकत्वसम्भव इति वाच्यम्। तथा सति तुल्ययुक्त्या गुणभेदमादायाऽसम्भवस्य दुर्वारत्वाद्व्यापकताघटकाभावीयप्रतियोगितायां समवायसम्बन्धावच्छिन्नत्वस्य प्रतियोगिवैयधिकरण्यघटकयादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वस्य वा समवायेन विवक्षाया आवश्यकत्वे आत्मत्वस्य व्यापकतावच्छेदकत्वानतिवृत्तेः। यदि च द्रव्यत्वसमानाधिकरणवृत्तित्वे सति द्रव्यत्वव्यापकतावच्छेदकत्वं जातौ निवेशनीयमिति आत्मत्वमनस्त्वादेर्द्रव्यत्वसमानाधिकरणवृत्तित्वाभावादेव वारणसम्भव इत्युच्यते, तदाऽप्यग्रे ज्ञानिपदस्य समवायसम्बन्धेन वृत्तितालाभमात्रपरतायां वक्ष्यमाणतया गुरुशरीरजातित्वस्य लक्षणे प्रवेशानौचित्यात्तदप्रवेशे आत्मघटोभयत्वस्य व्यापकतावच्छेदकत्वं दुर्वारम्, उभयत्वावच्छिन्नाधिकरणाप्रसिद्ध्या तदवच्छिन्नप्रतियोगिताया यादृशपदेन ग्रहणासम्भवात् घटादिनिष्ठायास्तस्या ग्रहणे तदनवच्छेदकत्वस्य, द्रव्यत्वसमानाधिकरणघटवृत्तित्वस्य च तादृशोभयत्वे सत्त्वात्। यादृशप्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यस्थाने यादृशप्रतियोगिताश्रयवैयधिकरण्यस्य निवेशेनाऽऽत्मघटोभयत्वस्य वारणसम्भवेऽपि तुल्ययुक्त्याऽसम्भवप्रसङ्गः, प्रतियोगितायाः प्रतिव्यक्ति भिन्नत्वमते गुणाभावस्यापि ग्रहणसम्भवात्, यादृशप्रतियोगितापदेन तत्तद्गुणनिष्ठप्रतियोगिताव्यक्तीरादाय प्रातिस्विकरूपेण तत्तदाश्रयानधिकरणत्वस्य द्रव्ये सत्त्वाद् गुणत्वस्य च तदवच्छेदकत्वात्। यत्तु द्रव्यत्वसमानाधिकरणवृत्तित्वमित्यत्र वृत्तित्वं पर्याप्त्याख्यसम्बन्धेन वाच्यम्, तथा च आत्मघटोभयत्वस्य द्रव्यत्वसमानाधिकरणपर्याप्तत्ववैरहान्नैष दोष इति। तन्न, प्रत्येकावृत्तेः समुदायावृत्तित्वनियमादुभयत्वस्याऽपि प्रत्येकवृत्तित्वावश्यकत्वात् तद्वारणायोगात्। न च द्रव्यनिरूपितवृत्तितायाः पर्याप्तिसम्बन्धेनाऽवच्छेदकत्वमेव तत्समानाधिकरणवृत्तित्वम्, तथा चाऽऽत्मघटोभयत्वस्य तादृशवृत्तितावच्छेदकत्ववैरहान्नाऽतिव्याप्तिरिति वाच्यम्। एवमप्यव्याप्यवृत्तिधर्मस्य पर्याप्तौ मानाभावेन गुणत्वादेस्तादृशवृत्तितानवच्छेदकत्वेनाऽसम्भवस्य दुर्वारत्वात्। न च तत्स्थाने व्याप्यवृत्तिभिन्नत्वमेव तत्र निवेश्यमिति वाच्यम्। एवमपि ज्ञानादिकमादायाऽऽत्मन्यतिव्याप्तेर्वज्रलेपत्वात्। न च द्रव्यत्वसमानाधिकरणवृत्तित्वमपि निवेश्यतामिति नैष दोष इति वाच्यम्। ज्ञानादेरपि प्रमेयत्वादिना द्रव्यत्वसमानाधिकरणवृत्तित्वेनाऽतिव्याप्तेः स्थिरत्वात्। न च जातिमात्रवृत्तिधर्मपुरस्कारेण द्रव्यत्वसमानाधिकरणवृत्तित्वं निविष्टमिति नैष दोष इति वाच्यम्। एवमप्यात्मत्वादेर्जातित्वेन रूपेण तत्सत्त्वादतिव्याप्तेर्दुर्वारत्वात्। न चोभयावृत्तिरूपेणैव वृत्तित्वं वक्तव्यमिति नैष दोष इति वाच्यम्। एतादृशनिवेशे स्वप्रतियोगिवृत्तित्व-स्वसामानाधिकरण्योभयसम्बन्धेन भेदविशिष्टान्यत्वरूपस्योभयावृत्तित्वस्य गुरुभूतस्य प्रवेशेन महागौरवापत्तेः। किञ्च स्वप्रतियोगिवृत्तित्व—स्वसामानाधिकरण्ययोः स्वरूपसम्बन्धेन वाच्यतया सत्तादेर्निरुक्तोभयावृत्तित्वेन तत्पुरस्कारेण द्रव्यत्वसमानाधिकरणवृत्तित्वं ज्ञानादावव्याहृतमेवेत्यतिव्याप्तिरपि तदवस्थैव। तस्मात् द्रव्यत्वव्यापकतावच्छेदकेत्यादिपरिष्कारस्य कथञ्चिदप्यसम्भवाल्लक्षणमेतदसङ्गतमेवेति चेत्,—

द्रव्यत्वव्यापकतावच्छेदकं तद्धत्ता च गुणानामिति। कर्म्मत्वं द्रव्यत्वं वा न द्रव्यत्वव्यापकतावच्छेदकं गगनादौ द्रव्यकर्मणोरभावात्। द्रव्यत्वत्वं सामान्यत्वादिकं वा न जातिरिति तदुव्युदासः।

दिनकरी।

द्रव्यत्वमिति। जातिपदस्य कृत्यमाह। **द्रव्यत्वत्वमिति।** सत्तारूपजातिमादाय द्रव्यादावतिव्याप्तिवारणाय **सत्ताभिन्नेति।**

रामरुद्री।

नैवम्, यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरण द्रव्यमित्यादिनिरुक्तेरेव करणीयत्वात्। प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्व तु प्रतियोगितावच्छेदकावच्छिन्नाधेयतानिरूपिताधिकरणत्वाभावः। आधेयता च समवायानवच्छिन्नत्व-समवेतनिष्ठत्वोभयाभाववती ग्राह्या। तथा च आत्मत्वावच्छिन्नतादात्म्यसम्बन्धावच्छिन्नाधेयताया अपि ग्रहणसम्भवात्तन्निरुपिताधिकरणत्वाभावस्य च गगनादौ सत्त्वान्न आत्मत्वादेस्तादृशप्रतियोगितानवच्छेदकत्वमिति न कश्चिद्दोषः। तस्मादीदृशनिवेश एव युक्तः। न चाऽऽत्मघटोभयत्वस्यैवमपि व्यापकतावच्छेदकत्वापत्तिर्दुर्वारैवेति वाच्यम्। समवेतनिष्ठत्वस्थाने असमवेतावृत्तित्वघटितोभयाभावस्यैवाऽऽधेयत्वे निवेशनीयतया कालिकसम्बन्धावच्छिन्नतादृशोभयत्वावच्छिन्नानधिकरणताया द्रव्ये सत्त्वादतिव्याप्तिविरहादिति कृतं पल्लवितेन।

केचित्तु स्वावच्छेदकावच्छिन्नप्रतियोगिताश्रयानधिकरणद्रव्यनिष्ठाभावप्रतियोगितानवच्छेदकद्रव्यत्वसमानाधिकरणवृत्तितादृशजातिमत्त्वमेव द्रव्यत्वव्यापकतावच्छेदकत्वम्। एवं चाऽऽत्मत्वस्याऽऽत्मघटोभयत्वस्य च यथाक्रमं द्रव्यत्वसमानाधिकरणवृत्तित्व-स्वावच्छेदकावच्छिन्नप्रतियोगिताश्रयानधिकरणद्रव्यनिष्ठाभावप्रतियोगितानवच्छेदकत्वयोर्विरहादेव व्युदासः। गुणाभावीयप्रतियोगितायाश्च न स्वपदेन ग्रहणसम्भवः, स्वावच्छेदकीभूतगुणत्वावच्छिन्नप्रतियोगिताश्रयानधिकरणत्वस्य कुत्राऽपि द्रव्येऽसत्त्वात्। तेन प्रतियोगितायाः प्रतिव्यक्ति भेदेऽपि न क्षतिः, सर्वासामेव प्रतियोगितानामेकधर्मावच्छिन्नत्वेनाऽनुगमसम्भवात्। न चाऽऽत्मनिष्ठप्रमेयत्वावच्छिन्नानधिकरणत्वस्य द्रव्येऽसत्त्वादेवमप्यतिव्याप्तिस्तदवस्थैवेति वाच्यम्। स्वावच्छेदकावच्छिन्नप्रतियोगित्वावच्छिन्नाधिकरणताया एव निवेशनीयत्वात्। गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वावदधिकरणत्वस्याऽप्यनवच्छेदकत्वे तु स्वावच्छेदकमपेक्ष्य तदवच्छिन्नप्रतियोगिताया गुरुतयाऽनवच्छेदकत्वात्तदवच्छिन्नाधिकरणत्वाप्रसिद्धिनिबन्धनाऽव्याप्तिः तदव्याप्यनिरूपकतानिवेशेन वारणीयेत्याहुः।

तत्तु व्याप्यत्वघटितत्वेन गुरुतया न समीचीनमिव प्रतिभाति।

वस्तुतस्तु द्रव्यनिरूपितवृत्तितावच्छेदकीभूतानुयोगितानिरूपितप्रतियोगितानवच्छेदकत्वस्य तादृशजातौ विवक्षणे न कश्चिद्दोषः। गुणाभावत्वस्य द्रव्यनिरूपितवृत्तितानवच्छेदकत्वादेव व्युदाससम्भवादित्यवधेयम्।

सत्ताभिन्नजातिमत्त्वमिति। ननु तादृशजातेर्व्यापकतावच्छेदकत्वं समवायेनैव वाच्यम्। अन्यथा कर्मत्वादेरपि कालिकादिना द्रव्यत्वव्यापकतावच्छेदकतया कर्मादावतिव्याप्तेः। तथा च जातिपदमनर्थकम्, जातिपदव्यावर्त्यसामान्यत्वादेः समवायेन व्यापकतावच्छेदकत्वविरहेणैव वारणादिति चेन्न। **व्यापकतावच्छेदकत्वपर्याप्तार्थस्य** तत्समानाधिकरणाभावीयसमवायसम्बन्धावच्छिन्नप्रतियोगितानिरूपितसमवायसम्बन्धावच्छिन्नावच्छेदकत्वाभावरूपतया तस्य सामान्यत्वादावपि सत्त्वेन तादृशधर्मवति सामान्यादावतिव्याप्तिवारणाय जातिपदस्याऽऽवश्यकत्वात्। यद्यपि तादृशधर्मवत्त्वस्य समवायसम्बन्धेन विवक्षणेनैवैतद्दोषवारणसम्भवान्नित्यत्वे सत्यनेकसमवेतत्वरूपगुरुशरीरजातित्वप्रवेशोऽनुचितः, तथाऽपि एतादृशार्थलाभायैव जातिपदमुपात्तमिति न कश्चिद्दोषः। अत एव 'समवायसम्बन्धेन धर्मवत्त्वबोधनाय जातीति' इति दीधितिकृद्भिरपि गुणप्रकाशदीधितौ 'अगुणवत्त्वम्' इतिसाधर्म्यव्याख्यानावसरेऽभिहितमिति विभा-

निर्गुणा इति । **यद्यपि निर्गुणत्वं कर्मादावपि, तथापि सामान्यवत्त्वे सति रामरुद्री ।**

वनीयम् । अत्र यद्यपि घटत्वादिव्यापकतावच्छेदकतादृशजातिमत्त्वमपि गुणलक्षणं वक्तुं शक्यम्, तथाऽपि घटत्व—द्रव्यत्वयोः प्रवेशे विनिगमनाविरहात्, लक्षणस्य पारिभाषिकत्वापत्तेश्च तथा नोक्तमिति ध्येयम् ।

निर्गुणत्वमिति । अथात्र यथाश्रुतार्थानुसरणे आद्यक्षणावच्छिन्ने घटे उत्पन्नविनष्टे वा तस्मिन् गुणसामान्याभावस्य विद्यमानत्वादतिव्याप्तिः । अत एव निरवच्छिन्नस्वरूपसम्बन्धेन गुणाभाववत्त्वस्य विवक्षणेऽपि न निस्तारः । न च समवाय—स्वसमवायिसमवेतत्वान्यतरसम्बन्धावच्छिन्नप्रतियोगिताक-गुणसामान्याभाव एव निर्गुणत्वपदार्थोऽस्तु, तथा च तादृशेऽपि घटे कपालगुणानामेव स्वसमवायिसमवेतत्वसम्बन्धेन सत्त्वान्नाऽतिव्याप्तिरिति वाच्यम् । तथा सति गुण एवाऽसम्भवप्रसङ्गात् । सर्वेष्वेव गुणेषु स्वसमवायिसमवेतत्वसम्बन्धेन गुणान्तरस्य, अन्ततः स्वस्यैव वा सत्त्वेन कुत्राऽपि गुणे तादृशान्यतरसम्बन्धेन गुणाभावविरहात् । न च स्वसमवायिसमवेतद्रव्यत्वसम्बन्धावच्छिन्नप्रतियोगिताकाभाव एव निवेशनीय इति न कश्चिद्दोष इति वाच्यम् । स्वसमवायिसमवेतत्व-द्रव्यत्वयोः परस्परं विशेषणविशेष्यभावे विनिगमनाविरहेण लक्षणद्वयापत्तेः । न चेष्टापत्तिरिति वाच्यम् । तथाऽपि तादृशसम्बन्धेन वस्तुसामान्याभावस्यैव लक्षणत्वसम्भवे गुणपदवैयर्थ्यापत्तेः । न चाऽखण्डाभावघटकतयात्स्यार्थक्यमिति वाच्यम् । एतादृशपरम्पराया संसर्गत्वे मानाभावेन तथाऽपि लक्षणपरिष्कारासम्भवादिति चेदत्र केचित् । **'निर्गुणाः'** इति मूले गुणवद्वृत्तिपदार्थविभाजकोपाधिशून्यत्वस्यैव विवक्षिततया न कुत्र चिद्दोषः । आद्यक्षणावच्छिन्नोत्पन्नविनष्टघटादौ च तादृशस्योपाधेर्द्रव्यत्वस्य विद्यमानत्वात्तत्राऽतिव्याप्त्यसम्भवात् । न च गुणवति कालिकेन गुणत्वादेरपि वृत्त्या तच्छून्यत्वस्य गुणेऽभावादसम्भवः, अनेनैव दलेन कर्मादिवारणसम्भवे तद्वारककर्मान्यत्व—सामान्यवत्त्वदलयोर्वैयर्थ्यप्रसङ्गश्चेति वाच्यम् । गुणव्यापकपदार्थविभाजकोपाधिशून्यत्वस्यैव विवक्षणीयत्वात् । गुणत्वादेश्च न कालिकादिनाऽपि गुणव्यापकत्वसम्भवः, नित्यद्रव्ये व्यभिचारादतो नाऽसम्भवः । स्वाश्रयाश्रयत्वादिरूपपरम्परासम्बन्धानभ्युपगमाच्च न तेन सम्बन्धेन गुणत्वस्य गुणव्यापकतायाः पुनः प्रसक्तिः । तादृशोपाध्यभावश्च व्यापकतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः । तेन गुणव्यापकतावच्छेदकस्याऽपि द्रव्यत्वस्य संयोगेनाऽभावमादाय द्रव्येनाऽतिव्याप्तिः । सम्बन्धविशिष्टप्रतियोगिताकाभाववत्त्वं निर्गुणत्वमिति फलितार्थः । वैशिष्ट्यं च स्वावच्छिन्नगुणवन्निष्ठाभावीयप्रतियोगितानवच्छेदकपदार्थविभाजकतावच्छेदकोपाध्यवच्छिन्नत्व-स्वावच्छिन्नत्वोभयसम्बन्धेनेति । पदार्थविभाजकोपाधित्वं च न पदार्थत्वव्याप्याव्याप्यत्वे सति तदन्याप्यत्वम् । द्रव्यत्वादेरपि पदार्थत्वव्याप्यसत्ताव्याप्यतया पदार्थविभाजकतावारणेऽसङ्ग्रात् । न च सत्त्वेन पदार्थविभाजकोपाधिप्रवेशे धर्तव्येति नैषोऽप्रसिद्धिदोष इति वाच्यम् । सत्तायाऽपि पदार्थत्वव्याप्यसामान्यभेदव्याप्यत्वेन पदार्थविभाजकोपाधित्वासम्भवात् । समवायसम्बन्धेन यत् पदार्थत्वव्याप्यं तदव्याप्यत्वविवक्षणे कथञ्चित्तद्ग्रहणसम्भवेऽपि च तच्छून्यत्वस्य गुणेऽसत्त्वादसम्भवस्तदवस्थ एव स्यात् । न च पदार्थविभाजकोपाधिप्रवेशो न करणीय एव, गुणव्यापकयत्किञ्चिद्रूपत्वभाव एव निवेश्यः, तादृशद्रव्यत्वाभावमादाय लक्षणसमन्वयसम्भवादिति वाच्यम् । तादृशसंयोगाभावमादाय द्रव्येऽतिव्याप्त्यापत्तेः । निरवच्छिन्नस्वरूपसम्बन्धेन तादृशाभाववत्त्वनिवेशेऽपि न निस्तारः, उत्पन्नविनष्टद्रव्ये एवमप्यतिव्याप्तेरनिरासात् । अतः पदार्थविभाजकोपाधिप्रवेश आवश्यकः । द्रव्यत्वाद्यन्यतमत्वमेव च पदार्थविभाजकोपाधित्वमिति न कश्चिद्दोष इत्याहुः ।

तत्र समीचीनम् । एतादृशार्थस्य **'निर्गुण'** शब्दार्थत्वाभावेन पारिभाषिकत्वापत्तेः, तद्घटकतया द्रव्यत्वाद्यन्यतमत्वनिवेशेनैतादृशार्थेऽतिगौरवाच्च ।

किन्तु गुणसमवायिकारणत्वाभाव एवाऽत्र **'निर्गुण'** शब्दार्थः । तस्याश्च गुणसमवायिकारणतायाः समवायसम्बन्धावच्छिन्नगुणत्वावच्छिन्नजन्यतानिरूपितताद्रूप्यसम्बन्धावच्छिन्नजनकतारूपाया अन-

कर्मान्यत्वे च सति निर्गुणत्वं बोध्यम्। जात्यादीनां न सामान्यवत्त्वं कर्मणो न कर्मान्यत्वं द्रव्यस्य न निर्गुणत्वमिति तत्र नातिव्याप्तिः।

निष्क्रिया इति **स्वरूपकथनं न तु लक्षणं गगनादावतिव्याप्तेः।**

इति गुणसामान्यलक्षणकथनम्।

दिनकरी।

तथाऽपि सामान्यवत्त्वे सति कर्मान्यत्वे सतीति। सत्यन्तयोर्विशेष्यस्य च फलमाह। **जात्यादीनामिति**। तत्र-तेषु।

गगनादावतिव्याप्तेरिति। आदिना कालादिपरिग्रहः। यथाश्रुते चैतत्, सामान्यवत्त्वे सति कर्मान्यत्वे च सति कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वेऽतिव्याप्तेरभावात्।

॥ इति गुणसामान्यलक्षणकथनम् ॥

रामरुद्री।

न्यथासिद्धनियतपूर्ववर्तितावच्छेदकधर्मस्वरूपत्वेन तस्य च प्रकृते द्रव्यत्वरूपस्योत्पन्नविनष्टघटेऽपि सत्त्वान्नाऽतिव्याप्तिः। गुणत्वस्य चाऽनथात्वान्नाऽसम्भवः। एतादृशार्थपरता च **'निर्गुण'** पदस्य **'आयुर्घृतम्'** इत्यादिवाक्यगतायुःपदस्य तत्साधने निरूढलाक्षणिकत्ववत् तात्पर्यानुपपत्तिरूपलक्षणाबीजसत्त्वेन गुणसमवायिकारणत्वाभाववति निरूढलाक्षणिकत्वादुपपन्नेति मन्तव्यम्।

यत्तु गुणवदवृत्तिपदार्थविभाजकोपाधिमत्त्वमेव निर्गुणत्वमिति नोत्पन्नविनष्टघटादावतिव्याप्तिरिति मतम्,

तत्तुच्छम्। यथाश्रुते गुणवदवृत्तिगुणत्वादिरूपपदार्थविभाजकोपाधेरपि कालिकादिना द्रव्ये सत्त्वादतिव्याप्तिरतः समवायेनैव तद्वत्त्वं वाच्यम्। तथा च तत एव सामान्यादेरपि वारणसम्भवे पृथक् तद्वारक **'सामान्यवत्त्वे सति'** इतिविशेषणानर्थक्यप्रसङ्गादिति ध्येयम्।

अस्मदुक्तार्थपरत्वादेव-**'निष्क्रियाः' इति स्वरूपकथनं, न तु लक्षणं, गगनादावतिव्याप्तेः-'** इत्यार्षग्रन्थोऽपि स्वारस्येन सङ्गच्छते। अन्यथा तत्राऽपि कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वघटितलक्षणस्य कर्तुं शक्यतया **'निष्क्रियाः'** इत्यस्य लक्षणपरतया व्याख्यानं परित्यज्य तस्य स्वरूपप्रदर्शनपरताकथनस्य सन्दर्भविरोधापत्तेः। अस्मन्मते तु **'निर्गुणाः'** इत्यत्र गुणसमवायिकारणत्वाभावप्रतिपादनवत् **'निष्क्रियाः'** इत्यनेनाऽपि क्रियासमवायिकारणत्वाभावप्रतिपादनसम्भवेऽपि मूर्तत्वेनैव क्रियां प्रति समवायिकारणतया गगनादौ तदभावोऽतिप्रसञ्जक इति मत्वैव तस्य स्वरूपप्रदर्शनपरत्वकथनसङ्गतेः। **'निष्क्रियाः'** इत्यस्य परिष्कारेण गुणलक्षणत्वस्याऽपि सम्भवात् तस्य लक्षणत्वमुपवर्णितं टीकायाम्। सोऽपि टीकाग्रन्थो न विरुद्धः, तत्र **'यथाश्रुते चैतत्'** इत्युक्तयैव **'निष्क्रियाः'** इत्यस्य स्वरूपकथनपरताया यथाश्रुत उपपादनात् अत एव च गुणव्यापकपदार्थविभाजकोपाधिशून्यत्वं निर्गुणत्वमित्यादिप्रथमपक्षोऽपि परास्तः। तथा सति तादृशार्थोपवर्णनस्य **'निष्क्रियाः'** इत्यत्राऽपि कर्तुं शक्यत्वेन तस्य स्वरूपप्रदर्शनपरत्वकथनासाङ्गत्यस्य दुर्वारत्वात्।

एतेन गुणव्यापकयत्किञ्चिज्जातिशून्यत्वे सति गुणत्वमित्युक्तिरपि परास्ता। दर्शितरीत्याऽग्रिममूलासाङ्गत्यस्य तन्मतेऽपि दुर्वारत्वादिति।

अत एव गुणवदवृत्तिपदार्थविभाजकोपाधिमत्त्वस्य समवायेन लाभार्थमेव सामान्यवत्त्वस्योपादाने बाधकाभावः, **'निष्क्रियाः'** इत्यस्याऽपि कर्मवदवृत्तिपदार्थविभाजकोपाधिमत्त्वरूपार्थकरणेन लक्षणत्वं सम्भवति, मूले तु एकेनैवोपपत्तौ लक्षणान्तरकरणं निष्प्रयोजनमिति मत्वा स्वरूपकथनमित्युक्तं, **गगनादावतिव्याप्तेरिति** तु यथाश्रुताभिप्रायकमितिपक्षोपि परास्तः, तथा सति द्रव्याश्रितत्वलक्षणकरणेनैवोपपत्तौ निर्गुणत्वलक्षणकरणस्याऽपि सन्दर्भविरुद्धत्वापत्तेरिति विभावनीयम्।

अथ गुणादीनां निर्गुणत्वे 'एकं रूपं रसात् पृथक्' इति व्यवहारः कथमुपपद्येतेति चेत्,

रामरुद्री ।

अत्र केचित्, स्वाश्रयगतैकत्वादेरेव सामानाधिकरण्यसम्बन्धेन रूपादौ भानाभ्युपगमेन तन्निर्वाहः। न चैवमवयविमात्रे परमाणुगतैकत्वादिद्वारेणवैकत्वप्रत्ययोपपत्तेरेकत्वादिकं न सिद्ध्येदिति वाच्यम्। परमाण्वेकत्वादेरयोग्यत्वेनाऽवयविनि तद्भानासम्भवात्तन्निर्वाहाय द्व्यणुकाद्यवयविनि तत्स्वीकारस्याऽऽवश्यकत्वात्। यद्यपि त्रसरेणुमात्रे एकत्वादिकमभ्युपेत्यैवैतादृशापत्तिवारणसम्भवात् चतुरणुकादिषु तत्स्वीकारोऽनावश्यक इति वक्तुं शक्यम्, न च द्व्यणुकमारभ्य महावयविपर्यन्तमनेकेष्ववयविषु एकत्वादिप्रत्ययप्रयोजकमेकविधं सामानाधिकरण्यं न वक्तुं शक्यं, केवलं चतुरणुक एव तत्प्रत्ययोपपादकं सामानाधिकरण्यं, तज्जन्यादौ तु सामानाधिकरण्यसामानाधिकरण्यमिति वैरूप्यप्रसङ्गादतो लाघवानवकाश इति वाच्यम्। कपाले घटोत्पादेऽपि कपालावयवेषु न घट इतिप्रत्ययानुत्पादात् कपाल इव तदवयवेष्वपि सर्वत्र घटस्वीकारावश्यकत्वात् सामानाधिकरण्येनैवैकत्वभाननिर्वाहात्। अत एव सहस्रतन्तुकपटस्थले मध्यवर्तितन्तुसंयोगनाशेऽपि तन्नाशनिर्वाहः। अन्यथा बहूनां तन्तुसंयोगानां तत्र हेतुत्वकल्पने गौरवात्तन्तुसंयोगत्वेन तत्र हेतुत्वकल्पने च तन्तुद्वयसंयोगतोऽपि तदुत्पादप्रसङ्गात् चरमसंयोगव्यक्तेरेव तद्धेतुत्वावश्यकत्वात् निरुक्तस्थले च मध्यसंयोगस्यैव नष्टत्वात्तद्विनाशानुपपत्तिः, अस्मन्मते तु आद्यतन्तुमारभ्य मध्यवर्तितन्तुपर्यन्तसमवेतस्य खण्डावयविनोऽपि तत्रोत्पत्तिस्वीकारात् तस्याऽपि च महापटावयवत्वेन मध्यतन्तुसंयोगनाशे खण्डपटनाशान्महापटनाश उपपन्नः। अत एव पाषाणादिषु सतीनामेव देवताप्रतिमानां आवरकभागापसारणेनाऽऽविर्भावो जायते इति व्यवह्रियते लोकैः, न हि तत्र तादृशप्रतिमानुकूलसंयोगादयो जाता इति। तथाऽपि द्व्यणुके गुणोत्पादान्यथानुपपत्त्या कल्पितहेतुभावस्य तत्तद्गुणस्य स्वसमवायिसमवेतत्वसम्बन्धेन चतुरणुकादावपि सत्त्वेन तत्र तदुत्पत्तेरव्याहतत्वात्तत्र तत्कल्प्यते। न चैवं तेन सम्बन्धेन तत्तद्गुणस्य गुणेऽपि सत्त्वात्तत्राऽपि गुणोत्पादापत्तिरिति वाच्यम्। तत्र द्रव्यात्मकसमवायिकारणविरहादेव तद्वारणसम्भवात्। न च स्वसमवाय्यतीन्द्रियसमवेतत्वसम्बन्धेन तत्तद्गुणस्यैव हेतुत्वं कल्प्यताम्, तेन द्व्यणुकत्रसरेण्वोरेव तदुत्पत्तिसम्भवः, अनन्तद्रव्येषु गुणकल्पनायां गौरवस्यैव विनिगमकत्वादतीन्द्रियत्वस्य सम्बन्धघटकतया निवेशे बाधकाभाव इति वाच्यम्। एवमपि द्व्यणुकैकत्वादेरस्वगयोग्यतया प्रकृष्टमहत्त्ववत्यवयविनि स्वचैकत्वादिग्रहणानुपपत्तेः, प्रकृष्टमहत्त्ववत्यवयविनि स्वग्योग्यैकत्वाभावात्, भवता द्व्यणुक एवैकत्वादिस्वीकारात्, प्रकृष्टमहत्त्ववत्यवयविनि स्वसमवाय्यतीन्द्रियसमवेतत्वसम्बन्धेन एकत्वाद्यभावेन तत्र तदुत्पत्त्यसम्भवात्। न च स्वसमवायित्वगयोग्यसमवेतत्वस्यैव कारणताघटकसंसर्गत्वोपगमान्नैवम्, प्रकृष्टमहत्त्ववदवयविनोऽवयवानां स्वगयोग्यतया तादृशावयविनि निरुक्तसम्बन्धेनैकत्वादेर्वर्तमानतया तत्रैकत्वाद्युत्पत्तिसम्भवादिति वाच्यम्। स्वसमवायित्व-स्वगयोग्यत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण गुरुशरीरत्वगयोग्यत्वघटितकार्यकारणभावद्वयापत्तेरेतादृशकार्यकारणभावद्वयस्याऽनङ्गीकरणीयत्वात्। एव स्थिते सामानाधिकरण्यसम्बन्धेनैवैकत्वादिकं रूपादिषु विषय इति न 'एकं रूपं-' इत्यादिप्रतीत्यनुपपत्तिः। न चैव रूपावधिकस्य पृथक्त्वस्य घटे वर्तमानस्य सामानाधिकरण्यप्रत्यासत्त्या रूपेऽपि सत्त्वात् 'रूपं रूपात् पृथक्' इतिव्यवहारापत्तिरिति वाच्यम्। गुणगुणिनोरभेदाङ्गीकर्तृमत इवाऽस्मन्मतेऽपि रूपावधिकस्य पृथक्त्वस्य घटेऽनङ्गीकारमात्रेणैव निर्वाहसम्भवादिति वदन्ति।

तन्मन्दम्। सामानाधिकरण्यसम्बन्धेन घटगतैकत्ववत् तद्गतबहुत्वादेरपि रूपे सत्त्वेन तत्र तत्प्रतीत्यापत्तेः। न च द्वित्वादेः स्वपर्याप्त्यनुयोगिनिरूपितवृत्तित्वमेव सम्बन्धः, तथा च रूपादेरेकमात्रवृत्तित्वेन द्वित्वपर्याप्त्यधिकरणोभयवृत्तित्वविरहादेव तत्र द्वित्वप्रत्ययापत्तिवारणसम्भव इति वाच्यम्। एवं सति 'शब्दाः' इतिप्रत्ययानुपपत्तेः। गगनस्यैकत्वेन शब्दे निरुक्तसम्बन्धेन बहुत्वाभावात्। न च घटगतैकत्ववत् बहुत्वमपि रूपादिष्वनुभूयत एव, अत एव रूपाणीति शब्द इव बहुत्वप्रत्ययः सार्वलौकिकः सङ्गच्छत इति वाच्यम्। तथा सति तद्रूपाणीतिप्रत्ययप्रसङ्गात्, प्रकारतावच्छेदकावच्छेदेन स्वपर्याप्त्यनुयोगिवृत्तित्वस्य संसर्गत्वोपगमेन तद्वारणे च शब्दा इति प्रत्ययस्याऽप्यनुपपत्तेः।

रामरुद्री।

अपरे पुनरेवमाहुः, 'एकं रूपं–' इत्यादिप्रतीतिर्भ्रान्तिरेव। भ्रान्तिजनको दोषश्च तत्तत्सामानाधिकरण्यम्। एवञ्च यस्य गुणस्य गुणे प्रतीतिस्तत्तत्सामानाधिकरण्यस्यैव दोषत्वं कल्प्यते। तेन रूपे एकत्वप्रतीत्यनुपपत्तिः, न वा बहुत्वप्रत्ययापत्तिः, नाऽपि शब्दे बहुत्वप्रत्ययानुपपत्तिरपीति।

तदसत्। 'एकं रूपं–' इत्यादिप्रतीतेः सर्वलोकानुभवसिद्धाया भ्रान्तित्वकथनस्य सर्वथाऽयुक्तत्वात् तत्तत्सामानाधिकरण्यानां दोषत्वकल्पने गौरवाच्चेति।

अत्र ब्रूमः। गुणादौ 'एकम्–' इत्यादिप्रतीतिविषयो द्रव्यगुणादिषु मध्ये कतरदिति प्रथमतो विवेक्तव्यम्। तत्र न तावत्तत् द्रव्यम्, गुणः, कर्म वा, समवायेन जन्यसत्त्वावच्छिन्न प्रति नादात्म्येन कारणीभूतस्य द्रव्यस्य गुणादौ विरहेण तत्र द्रव्यगुणकर्मणामसम्भवात्। अत एव 'गुणेषु गुणयोगे च समवायिकारणत्वप्रसक्तौ द्रव्यत्वापत्तर्गुणत्वव्याघात एव–' इति किरणावल्यामाचार्यैरप्युक्तम्। न च तस्य द्रव्यत्वे का हानिरिति वाच्यम्। तथा सति द्रव्यत्वगुणत्वयोः साङ्कर्यप्रसङ्गात् न च द्रव्यत्वगुणत्वयोरभेदोपगमान्नैवमिति वाच्यम्। तथा सति तुल्ययुक्त्या क्रियादावप्येकत्वादिप्रतीत्या द्रव्यत्वावश्यकत्वे द्रव्यत्वसत्त्वयोस्तुल्यव्यक्तिकत्वापत्त्या तयोरप्यभेदाङ्गीकारावश्यकत्वे सत्त्वेनैव कार्यकारणभावप्रसक्तौ क्रियाजन्यस्य संयोगस्याऽपि द्रव्यत्वेन तज्जनिकायाः क्रियाया नाशेन नाशापत्तेः, निरुक्तरीत्या कार्यत्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुत्वमङ्गीकृत्य वारणीयाया नीले नीलोत्पत्तेर्वारणासम्भवाच्च। न चैतज्जातिरूपं, नित्यत्वे सत्यनेकसमवेतत्वाविरहात्। विशेषसमवायावपि न, परतो व्यावृत्तेः, सम्बन्धत्वाभावाच्च। ध्वंसप्रागभावरूपमित्यपि न, गुणादिषु ध्वंसप्रागभावयोरभावात्। अतो धीविशेषविषयत्वरूपमेव तद्वाच्यम्। एवं सति विषयत्वरूपत्वे तस्य गुणत्वं कथं सम्भवेत्? तस्माद्गुणे गुणानङ्गीकार एवोचितः। अनयैव च रीत्या 'रूपं रसात् पृथक्' इति प्रत्ययोऽपि भेदविषयकत्वं कल्पयित्वोपपादनीय इति सर्वमवदातम्। **तत्र–तेष्विति।** गुणभिन्नेष्वित्यर्थः।

मूले–**'निष्क्रियाः' इति स्वरूपकथनम्, गगनादावतिव्याप्तेः'** इत्युक्तम्, तत्राऽऽदिपदग्राह्यं स्पष्टयति टीकायाम्–आदिनेत्यादि। **'गगनादौ'** इति मूल निष्क्रियद्रव्यमात्रपरमिति भावः। तेनोत्पन्नविनष्टद्रव्ये, यत्र च कदाचिदपि क्रिया न जाता, तादृशे च घटादावप्यतिव्याप्त्यनभिधानान्मूलस्य न न्यूनत्वम्, तेषामप्यादिपदग्राह्यत्वादिति ध्येयम्। ननु द्रव्यमात्रस्यैव प्रथमक्षणावच्छेदेन क्रियारहितक्षणान्तरावच्छेदेन च क्रियारहितत्वात् कर्मादेश्च सर्वदैव क्रियारहितत्वादलक्ष्यमात्रेऽतिव्याप्तिदानं विहाय निष्क्रियद्रव्यमात्रेऽतिव्याप्तिकथनमनुचितमिति चेन्न। निरवच्छिन्नस्वरूपेण क्रियासामान्याभावस्यैव **'निष्क्रिय'** पदार्थत्वेन तस्य सर्वत्र द्रव्येऽभावात् द्रव्यमात्रे, पूर्ववत्सामान्यवत्त्वे सति कर्मान्यत्वे च सतीतिविशेषणद्वयप्रक्षेपेण कर्मादौ चाऽतिव्याप्तिवारणमनुसन्धायैव निष्क्रियद्रव्यमात्रसूचनाय **'गगनादौ'** इत्युक्तेरिति विभावनीयम्।

वस्तुतस्तु **'निर्गुणाः'** इतिवत् **'निष्क्रियाः'** इत्यत्राऽपि क्रियासमवायिकारणतारहितत्वस्यैव शब्दार्थतया स्वरसलभ्यतया तस्य च लक्षणस्य न द्रव्यमात्रेऽतिव्याप्तिः सम्भवति, क्रियां प्रति मूर्तमात्रस्य समवायिकारणत्वेन तादृशसमवायिकारणताविरहस्य कुत्राऽपि मूर्तेऽसम्भवात्, अतो विभुमात्रग्रहणसूचनायैव **'गगनादौ'** इति मूलेऽभिहितमिति मूलार्थः स्वारस्येन सङ्गच्छते, अन्यथा 'तादृशघटादौ' इति विहाय **'गगन'** ग्रहणे विनिगमकासम्प्रतिपत्तेः। न च तादृशसमवायिकारणताराहित्यस्य कर्मादावपि सत्त्वेनाऽतिव्याप्तिस्तत्राऽपि सम्भवतीति तत्परित्यागोऽयुक्त इति वाच्यम्। पूर्ववदत्राऽपि **सामान्यवत्त्वे सति कर्मान्यत्वस्याऽपि 'निष्क्रिय'** पदार्थघटकतामिप्रायेण तदनुक्तिसङ्गमनसम्भवात्, **'गगनादौ'** इत्यनेन कर्मसमवायिकारणतारहितस्य बोधनेन गगनादिवत् कर्मादावपि लक्षणातिव्याप्तेरिष्टत्वे बाधकाभावाच्च। अत एव **'यथाश्रुते–'** इत्याद्यभिमटीकाग्रन्थोऽपि सङ्गच्छते। एतत्तत्त्वं प्रागेव निरूपितमित्यवधेयम्।

यत्तु समवाय–स्वसमवायिसमवेतत्वान्यतरसम्बन्धेन क्रियासामान्याभाव एवाऽत्र **निष्क्रिय'** पदेन

रूपं रसः स्पर्शगन्धौ परत्वमपरत्वकम् ॥ ८६ ॥

रामरुद्री ।

विवक्षितः । तादृशाभाववत्त्वमपि निरवच्छिन्नस्वरूपेण विवक्षितम् । एवं च न मूर्तद्रव्ये कुत्राऽप्यतिव्याप्तिः सम्भवति, तदन्तर्गतेषु परमाणुषु समवायेन, अवयविषु च सर्वेष्वपि अवयवद्वयसंयोगं विनाऽवयव्यनुत्पत्तेस्तस्य च क्रियाधीनतया तदवयवेषु क्रियास्वीकारावश्यकत्वे स्वसमवायिसमवेतत्वसम्बन्धेन क्रियाया विद्यमानत्वात्तदभावासम्भवात्, क्रियाशून्यकालावच्छेदेन तदभावसत्त्वेऽपि तस्य निरवच्छिन्नस्वरूपेण तत्राऽसम्भवात् । क्रियादावपि स्वसमवायिसमवेतत्वसम्बन्धेन क्रियायाः सत्त्वेन तत्राऽप्यतिव्याप्तिर्न सम्भवति, इति परिचिन्त्यैव गगनादावतिव्याप्तिकथनं सङ्गच्छते । तत्र समवाय—स्वसमवायिसमवेतत्वरूपसम्बन्धद्वयेनाऽपि क्रियाविरहादिति नाऽसङ्गतिरिति ।

तत्तुच्छम् । एवं सति गुणेष्वपि स्वसमवायिसमवेतत्वसम्बन्धेन क्रियासत्त्वेन तत्रैव लक्षणागमनादव्याप्तिसम्भवेऽतिव्याप्तिदानस्य सन्दर्भविरुद्धत्वापत्तेरिति विभावनीयम् ।

यथाश्रुते चैतदिति । यथाश्रुते—उक्तवाक्यात् शक्तिभ्रमाजन्यनिरूढलक्षणेतरलक्षणाग्रहाजन्यशाब्दबोधाङ्गीकारे । **एतत्**—स्वरूपकीर्तनपरत्वकथनम् । **सामान्यवत्त्वे सतीत्यादि** । अत्र सामान्यादावतिव्याप्तिवारणाय **सामान्यवत्त्वे सतीत्युक्तम्** । कर्मण्यतिव्याप्तिवारणाय **कर्मान्यत्वे सतीत्युक्तम्** । द्रव्येऽतिव्याप्तिवारणाय च **कर्मवद्वृत्तिपदार्थविभाजकोपाधिमत्त्व**मित्युक्तम् । कर्मवद्वृत्तिधर्मशून्यत्वं, कर्मवद्वृत्तिजातिशून्यत्वमिति वा लक्षणकरणे तादृशसत्ताजातिमादाय तच्छून्यत्वस्य गुणेऽसत्त्वादसम्भवस्य वारणार्थं **पदार्थविभाजकोपाधिनिवेशः** । अथ कर्मवद्वृत्तिजातिप्रतियोगिकाभावनिवेशेनैवोपपत्तौ पदार्थविभाजकोपाधिपर्यन्तनिवेशोऽनुचितः । न च सत्तारूपायाः कर्मवद्वृत्तिजातेरभावस्य गुणेऽसत्त्वादसम्भववारणाय तदुपादानमावश्यकमित्युक्तमेवेति वाच्यम् । तादृशयत्किञ्चिज्जात्यभावस्यैव लक्षणे निविष्टतया तादृशस्य द्रव्यत्वाभावस्य गुणे सत्त्वादेव लक्षणसमन्वयसम्भवादिति चेन्न । तादृशघटत्वादिजातिमादाय तच्छून्ये गगनादावतिव्याप्तेरीदृशनिवेशासम्भवात् । पदार्थविभाजकोपाधित्वं चैतल्लक्षणघटकं विभागवाक्यबोधित—पदार्थत्वव्याप्यकसङ्ख्यावत्त्वम् । व्यापकत्वं च स्वाश्रयाश्रयत्वसम्बन्धेन । न तु पदार्थत्वव्याप्याव्याप्यत्वे सति पदार्थत्वव्याप्यत्वं तत्, गुणत्वादेरपि पदार्थत्वव्याप्यसत्ताव्याप्यत्वेन पदार्थविभाजकोपाधित्वानुपपत्त्याऽसम्भवापत्तेः । एवं च तादृशी सङ्ख्या द्रव्यत्वादिगतं सप्तत्वम् । अत्र च 'पदार्थाः' इति विभागवाक्यघटकपदबोध्यबहुत्वसङ्ख्यावतो गगनत्वादेरपि विभाजकत्वप्रसक्त्या गगनेऽतिव्याप्तिवारणाय सङ्ख्यायां पदार्थत्वव्यापकत्वप्रवेशः । आत्मत्वतद्भिन्नत्वगतद्वित्वस्याऽपि तथाविधतया तयोः पदार्थविभाजकोपाधित्वे तादृशात्मत्वमादायाऽऽत्मन्यतिव्याप्तिर्लक्षणस्य स्यात्, सा माभूदिति सङ्ख्यायां विभागवाक्यबोधितत्वनिवेशः । विभागवाक्यमपि एतच्छास्त्रीयमेव ग्राह्यम् । तेनाऽन्यैः 'पदार्थौ द्विविधः, चेतनाचेतनभेदात्' इत्यादिविभागकरणेऽपि न क्षतिः । एवं च पदार्थविभाजकोपाधौ कर्मवद्वृत्तित्वं तादृशी सङ्ख्या विभागवाक्यजन्यबोधीयतादृशप्रकारतावच्छेदिका तादृशप्रकारतावच्छेदकसम्बन्धेन विवक्षणीयम् । तेन गुणत्वादेरपि कालिकादिना कर्मवद्वृत्तित्वेऽपि नाऽसम्भवः । तथा च विभागवाक्यजन्यबोधीयप्रकारताविशिष्टप्रतियोगिताकाभाववत्त्वं गुणलक्षणघटक—**'कर्मवदवृत्तित्व'** दलार्थः । प्रकारतावैशिष्ट्यं च स्वविशिष्टकर्मवन्निरूपितवृत्तित्वनिष्ठत्वसम्बन्धेन । स्ववैशिष्ट्यं च कर्मवन्निरूपितवृत्तितायां स्वावच्छेदकसम्बन्धावच्छिन्नत्व—स्वसामानाधिकरण्योभयसम्बन्धेनेति विभावनीयम् ।

॥ इति गुणसामान्यलक्षणकथनम् ॥

(१)द्रवो गुरुत्वं स्नेहश्च वेगो मूर्तगुणा अमी ।

(वेगा इति । वेगेन स्थितिस्थापकोऽप्युपलक्षणीयः)(२) ।

मूर्तगुणा इति । अमूर्तेषु न वर्तन्त इत्यर्थः । (लक्षणं तु तावदन्यान्यत्वम् ।

दिनकरी ।

'वेगेन स्थितिस्थापकोऽप्युपलक्षणीयः' इति पाठः । वेगपदस्य भावनान्यसंस्कारपरत्वादिति भावः इदमुपलक्षणं 'वेगाश्च' इत्यत्र चकारेणाऽनुक्तसमुच्चायकेन गुरुत्वस्यापि सङ्ग्रहात् । ननु मूर्तगुणत्व मूर्तवृत्तिगुणत्वं, तच्च सङ्ख्यादावतिव्याप्तमत आह। अमूर्त्तेष्विति ।

रामरुद्री ।

इति पाठ इति । प्राचीनपुस्तकेषु-'वेगा इति । वेगेन स्थितिस्थापकोऽप्युपलक्षणीयः-'इति पाठो नाऽस्त्येव । अयं च क्वचित्कोऽपि अन्वर्थत्वाद्ग्राह्यः, अन्यथा वेगस्य मूर्तगुणत्वमभिधाय स्थितिस्थापकस्य तदनुक्तौ मूलस्य न्यूनतापत्तेरिति भावः । भावनान्यसंस्कारपरत्वादितीति । भावनान्यसंस्कारत्वावच्छिन्ने वेगपदस्याऽजहत्स्वार्थलक्षणाबलादिति भावः । ननु 'रूप-रस-गन्ध-स्पर्श-परत्वापरत्व-गुरुत्व-द्रवत्व-स्नेह-वेगा मूर्तगुणाः-* इति भाष्ये गुरुत्वमपि सङ्गृहीतं, तस्य च मूलेऽसङ्ग्रहान्न्यूनत्वमित्यतः स्वयं पूरयति । इदमुपलक्षणमिति । इदं तु 'द्रवत्वं स्नेहवेगाश्च मता मूर्तगुणा अमी-' इति कारिकावलीपाठमनसृत्योक्तम् । वस्तुतस्तु द्रवो गुरुत्वं स्नेहश्च वेगो मूतगुणा अमी-' इति पाठ एव साधुरिति मन्तव्यम् ।

इद विह चिन्त्यते । अणुत्वादेरपि मूर्तगुणत्वसम्भवे तद्व्यतिरेकेण मूर्तगुणत्वकथने किं बीजम् ? न चैवं सङ्ख्यादीनामपि मूर्तवृत्तीनां मूर्तगुणत्वापत्तिरतोऽमूर्तवृत्तितानवच्छेदकगुणत्वसाक्षाद्व्याप्यजातिमत्त्वस्यैव मूर्तगुणत्वपदार्थत्वेन तस्याऽणुत्वेऽभावान्न तस्य मूर्तगुणेषु परिगणनमिति वाच्यम् । एवं सति वेगादेरपि तथात्वविरहेण तस्याऽपि मूर्तगुणत्वानुपपत्तेरमूर्तवृत्तितानवच्छेदकजातिमद्गुणत्वस्यैव मूर्तगुणत्वपदार्थतया अभिधातुमुचितत्वेनाऽणुत्वादेर्मूर्तगुणत्वानतिवृत्तेः ।

मैवम् । अस्याः कारिकाया 'रूप-रस-' इत्यादुदाहृतभाष्यानुसारित्वेन भाष्यार्थानुयायितया दूषणानवकाशात् । किमर्थं तर्हि भाष्यकार एवाऽणुत्वादीन् मूर्तगुणमध्ये न पर्यजीगणत् ? उच्यते । गुणविभाजकजातिमद्विभाजकावच्छिन्नमूर्तामूर्तनिरूपितवृत्तित्वसमानाधिकरणगुणविभाजकजातिमत्त्वमेवोभयगुणत्वमभिमन्यमानो भगवान् भाष्यकृदणुत्वादीन् गुणान् मूर्तगुणमध्ये न पर्यजीगणत्, अणुत्वमपि हि तादृशमहत्त्वत्वरूपजात्यवच्छिन्नमूर्तामूर्तनिरूपितवृत्तित्वसमानाधिकरणपरिमाणत्वरूपगुणविभाजकजातिमत्त्वादुभयगुणोदर एव निविशत, वेगस्थितिस्थापकभावनासु च न कोऽपि मूर्तामूर्तवृत्तिरिति वेगस्थितिस्थापको मूर्तगुणेषु, भावना चाऽमूर्तगुणेषु पर्यवसिताः, न हि मूर्तगुणामूर्तगुणशब्दौ मूर्तगुणतद्भिन्नगुणौ बोधयत इति वक्तुं शक्यम्, तथात्वे प्रत्येकं मूर्तामूर्तमात्रवर्तिसङ्ख्यादिगुणानामपि मूर्तगुणामूर्तगुणमध्ये परिगणनप्रसङ्गात् । यतस्तु भाष्यकारः पृथक् सङ्ख्यादीनुभयगुणत्वेन व्यवस्थापयाम्बभूव, तत एवैतज्ज्ञातुं शक्यं यत् उभयगुणत्वेन निरुक्तपरिष्कृतरूपविशिष्टाः, तद्भिन्नत्वेन च मूर्तगुणामूर्तगुणावभिप्रेतावितीति विभावनीयम् ।

मूलोक्तं मूर्तगुणत्वरूपसाधर्म्यमाक्षिपति-नन्विस्यादिना । मूले-अमूर्तेषु न वर्तन्त इत्यर्थं इति । अयं चार्थो मूर्तानामेव गुणा इति व्युत्पत्त्या लभ्य इत्यनुशयेनेदमुक्तम् । अनया व्युत्पत्त्या मूर्तवृत्तित्वे सत्यमूर्तावृत्तित्वमर्थो लभ्यते, तत्र च मूर्तवृत्तित्वांशो विफलः, अमूर्तावृत्तित्वस्यैव सम्यक्त्वादतस्तत्परि-

---

(१) अयमेव पाठः प्राचीनपुस्तके उपलभ्यते । समीचीनश्च । आधुनिकपुस्तके तु—"द्रवत्वं स्नेहवेगाश्च मता मूर्त्तगुणा अमी ॥" इति वर्त्तते ।

(२) अयं पाठ प्राचीनपुस्तके नास्ति । असत्त्वमेवोचितम् ।

* प्रशस्तपादभाष्यम् । गुणनिरूपणम् ।

एवमग्रेऽपि(१)।) ॥ इति मूर्तगुणकथनम् ॥

दिनकरी ।

तथा चाऽमूर्तावृत्तिगुणत्वं प्रदर्शितगुणानां साधर्म्यमित्यर्थः । न चैतदपि मूर्तमात्रवृत्तिसङ्ख्यायामतिव्याप्तमिति वाच्यम् । अमूर्तगुणवृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिशून्यगुणत्वस्य, मूर्तत्वव्याप्यतावच्छेदकगुणवृत्तिजातिमत्त्वस्य वा विवक्षितत्वात् ।

रामरुद्री ।

स्यागेन निष्कृष्टमर्थमाह टीकायाम्–**तथा चेत्यादिना । प्रदर्शितेति** । मूलेत्यादिः । **एतदपीति । इदानीं** निरुक्तं साधर्म्यमपीत्यर्थः । **मूर्तमात्रवृत्तिसङ्ख्यायामिति** । घटगतैकत्वादावित्यर्थः । मूर्तानामेव गुणा इति व्युत्पत्त्या गुणविभाजकवद्विभाजकरूपेण मूर्तमात्रवर्तित्वं द्योत्यते, एवं च सङ्ख्यादौ नाऽतिव्याप्तिः । एवंरूप **'मूर्तगुण'** परिष्कृतार्थस्य लक्षणत्वे सकलदोषवारणेऽपि अस्य गुरुभूतत्वं स्वयमाह । **अमूर्तगुणवृत्तीत्यादि** । अत्र तादृशजातिशून्यत्वं सामान्यादावव्याप्तीत्यतस्तद्वारणाय विशेष्यीभूतस्य गुणत्वस्य प्रवेशः । **'अमूर्तगुणवृत्ति'** इत्यत्र **'गुण'** पदं, **'गुणत्वव्याप्यजातिशून्य'** इत्यत्र **'जाति'** पदं च समवायसम्बन्धावच्छिन्नवृत्तितायाः, गुणवृत्तिभेदप्रतियोगितानिरूपितताद्दशसम्बन्धावच्छिन्नावच्छेदकतायाश्च लाभायैवोपात्तम् । तेन न कालिकसम्बन्धेनाऽमूर्तवर्तिनि रूपादौ रूपत्वादेर्वर्तमानत्वेन, सत्ताया अमूर्तगुणवृत्तेः कालिकादिसम्बन्धेन गुणवृत्तिभेदप्रतियोगितावच्छेदिकाया वा वर्तमानतया तदभावस्य क्वाऽपि मूर्तगुणेऽसम्भवेऽप्यसम्भवः । न च समवायसम्बन्धावच्छिन्नत्वमनुक्त्वाऽनया भङ्ग्या तत्सूचने किं प्रयोजनमिति वाच्यम् । **'अमूर्तगुणवृत्ति'** इत्युक्तया अमूर्तनिरूपितसमवायसम्बन्धावच्छिन्नाधेयतानिरूपितनिरवच्छिन्नावच्छेदकतावतः, **'गुणत्वव्याप्यजातिशून्य'** इत्यनेन च गुणवृत्तिभेदीयप्रतियोगितानिरूपितसमवायसम्बन्धावच्छिन्नावच्छेदकतावैशिष्ट्यप्रतियोगिताकाभाववतश्च लाभेन तत्र समवायसम्बन्धावच्छिन्नत्ववत् निरवच्छिन्नत्वादेरपि प्रवेशावश्यकतया तादृशविलक्षणार्थबोधनायैव तन्निवेशात् । अमूर्तनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तितानिरूपितसमवायसम्बन्धावच्छिन्ननिरवच्छिन्नावच्छेदकतावैशिष्ट्या या गुणवृत्तिभेदप्रतियोगितानिरूपितावच्छेदकता, तद्वैशिष्ट्यप्रतियोगिताकाभाववद्गुणत्वं मूर्तगुणत्वमिति तु निष्कृष्टार्थः । आद्यवैशिष्ट्यं स्वाभाववदवृत्तित्व–स्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन । द्वितीयं च स्वावच्छेदकसम्बन्धावच्छिन्नत्व–स्वसामानाधिकरण्योभयसम्बन्धेन । अमूर्तनिरूपितताद्दशवृत्तितावच्छेदकता खलु प्रत्येकं सङ्ख्यात्वादावेव प्रसिद्धा, तद्वैशिष्ट्यं च तत्तन्निष्ठैव गुणवृत्तिभेदप्रतियोगितावच्छेदकता, तस्याः स्वाभाववदवृत्तित्वात्, स्वावच्छेदकभूतसमवायसम्बन्धावच्छिन्नत्वाच्च, तादृशावच्छेदकताविशिष्टा च सङ्ख्यात्वत्वाद्यवच्छिन्ना सङ्ख्यात्वादिनिष्ठा समवायावच्छिन्ना प्रतियोगितेति तन्निरूपकाभावो रूपादौ वर्तत एवेति लक्षणसमन्वयः । अयं च निवेशः करणीय एव । अन्यथा अमूर्तनिरूपितरूपत्वमसङ्ख्यात्वान्यतरत्वाद्यवच्छिन्नावच्छेदकतावृत्तितावच्छेदकतायां रूपत्वादावपि सत्त्वात्तच्छून्यत्वस्य रूपादौ विरहेणाऽसम्भवापत्तेः । तादृशाभावकूटत्वं चाऽत्र विवक्षितम् । तेन न विशिष्टाभावादिकमादायाऽतिव्याप्तिरित्यवधेयम् ।

लाघवमभिप्रेत्य लक्षणान्तरमाह । **मूर्तत्वव्याप्यतावच्छेदकेत्यादि** । अमूर्तनिरूपितवृत्तितानवच्छेदकगुणवृत्तिजातिमत्त्वस्येति यथाश्रुतार्थः । अथाऽत्राऽमूर्तनिरूपितवृत्तितानवच्छेदकगुणवृत्त्यणुत्वत्वादिजातिमति परिमाणादावतिव्याप्तिः । न च तत्राऽतिव्याप्तिवारणाय परिमाणवृत्तित्वमेव निवेश्यतामिति वाच्यम् । एवमपि शब्दजनकतावच्छेदकवैजात्यावच्छिन्नसंयोगविभागादावतिव्याप्तेरनुद्धारात् । न च तादृशगुणत्वसाक्षाद्व्याप्यजातिमत्त्वमेव विवक्षितं, तथा चाऽणुत्वत्वादेर्गुणत्वसाक्षाद्व्याप्यत्वविरहादेव नाऽतिव्याप्तिः । गुणत्वसाक्षाद्व्याप्यत्वं च गुणत्वव्याप्यजात्यव्याप्यत्वे सति गुणत्वव्याप्यत्वमेव व्याप्यत्वं च तत्समानाधिकरणभेदप्रतियोगितावच्छेदकत्वमिति वाच्यम् । रूपत्वादेरपि गुणत्वव्याप्यं यद्रसत्वादि

(१) अयमपि पाठो नाऽस्ति । असत्त्वमेवोचितम् ।

दिनकरी ।

अत्र चाऽऽद्ये शून्यान्तेन सङ्ख्यादेर्बुद्ध्यादेश्च व्युदासः । वेगस्थितिस्थापकोपग्रहाय संस्कारत्वान्येति । द्वितीयेऽवच्छेदकान्तेन सङ्ख्यात्वादेः, वृत्तित्वान्तेन कर्मत्वादेर्व्युदासः ।

॥ इति मूर्तगुणकथनम् ॥

रामरुद्री ।

तत्समानाधिकरणभेदप्रतियोगितावच्छेदकत्वविरहेण निरुक्तगुणत्वसाक्षाद्व्याप्यत्वपदार्थस्यैवाऽप्रसिद्ध्यापत्तेः । न च गुणत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकं यद्गुणत्वसमानाधिकरणं तदन्तर्गतयत्किञ्चिद्व्यक्तिसमानाधिकरणभेदप्रतियोगितानवच्छेदकत्वमेव तदिति वाच्यम् । तथा सत्यगुणत्वत्वादेरपि गुणत्वसमानाधिकरणत्वे सति तत्समानाधिकरणभेदप्रतियोगितावच्छेदकं यत्स्वात्मकं यत्किञ्चिद्वस्तु, तत्समानाधिकरणभेदप्रतियोगितानवच्छेदकत्वेन गुणत्वसाक्षाद्व्याप्यतया ईदृशनिवेशस्य 'भक्ष्याशयाऽहिमजूर्षा–'इत्यादिकथनगोचरतापत्तेः । न च गुणत्वविशिष्टविशिष्टान्यत्वे सति गुणत्वविशिष्टत्वमेव तत्, प्रथमवैशिष्ट्यं स्वसामानाधिकरण्य–स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वोभयसम्बन्धेन, द्वितीयवैशिष्ट्यं च स्वसामानाधिकरण्य–स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वोभयसम्बन्धेन, तृतीयवैशिष्ट्यं च स्वसामानाधिकरण्य—स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वोभयसम्बन्धेनेति वाच्यम् । शान्तिकर्मणि वैतालावेशवत् लाघवानुसन्धानेन ईदृशलक्षणानुसरणे महागौरवापत्तेः, वेगत्वादेरतथात्वेन वेगेऽव्याप्त्यापत्तेश्च । न च गुणत्वसाक्षाद्व्याप्यत्वस्थाने रूपत्वाद्यन्यतमत्वमेव निवेश्यम्, एवं चाऽन्यतमत्वघटकभेदप्रतियोगितावच्छेदककोटौ संस्कारत्वाप्रवेशाल्लाघवमपीति वाच्यम् । तथा सति तत्कोटौ सङ्ख्यात्वाद्यनिष्टधर्माप्रवेशस्याऽप्यनतिप्रयोजनकत्वेन तन्निवेशस्याऽयुक्ततया तदघटितरूपत्वाद्यन्यतमत्वनिवेशे च अमूर्तनिरूपितवृत्तितानवच्छेदकत्वांशवैयर्थ्यप्रसक्त्या लक्षणपरिष्कारस्य कथञ्चिदप्यसम्भवादिति । न चाऽमूर्तनिरूपितवृत्तितावच्छेदकीभूतगुणत्वव्याप्यसंस्कारत्वान्यजातिशून्यगुणत्वमेव तत्त्वम्, तत्र चैकस्य गुणपदस्याऽप्रवेशात्पूर्वलक्षणतो लाघवमपीति वाच्यम् । पूर्वपरिष्कारेऽपि गुणत्वनिवेशस्य तथाविधपरिष्कारौपयिकताया एवाऽभिहितत्वेनाऽस्य पूर्वलक्षणाभेदादिति चेत्,

मैवम् । व्याप्यत्वपदेन न्यूनवृत्तित्वस्यैवाऽत्राऽभिहितत्वात् । तथा च मूर्तवृत्तिभेदप्रतियोगितावच्छेदकत्वे सति मूर्तवृत्तिर्यस्तद्वृत्तिगुणवृत्तिजातिमत्त्व निर्गलितार्थः । रूपादीनां च तादृशमनःप्रभृतिमूर्तवृत्तिभेदप्रतियोगितावच्छेदकतया पृथिव्यादिरूपमूर्तवृत्तित्वेन च तद्वृत्तिरूपत्वादिरूपगुणवृत्तिजातिमादाय लक्षणसमन्वयः । बुद्ध्यादीनां मूर्तवृत्तिभेदप्रतियोगितावच्छेदकत्वेऽपि मूर्तवृत्तित्वविरहेण, सङ्ख्यादीनां मूर्तवृत्तित्वेऽपि मूर्तवृत्तिभेदप्रतियोगितावच्छेदकत्वविरहेण च तत्र नाऽतिव्याप्तिः । न चाऽत्र परत्वापरत्वयोरव्याप्तिः, तयोर्मूर्तवृत्तिभेदप्रतियोगितावच्छेदकत्वविरहादिति वाच्यम् । यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तद्वृत्तिभेदमादायैव तत्र लक्षणसमन्वयात् । अथैवमणुत्वादेरपि तथात्वेन तत्राऽतिव्याप्तिरिति चेन्न । मूर्तवृत्तिभेदप्रतियोगितावच्छेदकतावच्छेदकत्वे सती मूर्तवृत्तितावच्छेदको यो गुणविभाजकोपाधिस्तद्वत्त्वस्यैव निवेशितत्वेन तत्राऽतिव्याप्त्यभावात् । सङ्ख्यापरिमाणादिमद्भेदस्य कुत्राऽपि मूर्तेऽसम्भवात् । गुणविभाजकोपाधित्वं चाऽस्माभिः प्राङ्निरूपित पदार्थविभाजकोपाधित्वमिवाऽवगन्तव्यं तत एव अवच्छेदकतावच्छेदकसम्बन्धविशेषाश्च यथायथं समवायादयो निवेशनीयाः । मूर्तत्वं पुनरिह परिच्छिन्नपरिमाणवत्त्वमेव, न तु क्रियाजनकतावच्छेदकतया सिद्धो जातिविशेषः, तथा सति तस्योत्पन्नविनष्टघटादावपि सत्त्वेन तत्र च सङ्ख्यादिमद्भेदस्याऽपि सत्त्वेन सङ्ख्यादावतिव्याप्त्यापत्तेरित्यादिकं बहुतरमूहनीयम् । **आद्ये**–आद्यपरिष्कारे । **सङ्ख्यादेर्बुद्ध्यादेश्चेति** । मूर्तामूर्तगुणत्वाऽमूर्तगुणत्वरूपविशेषापेक्षया द्विधा सङ्कीर्तनम् । **द्वितीये**–द्वितीयपरिष्कारे । इति मूर्तगुणकथनम् ॥

धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोऽपि च ॥ ८७ ॥
एतेऽमूर्तगुणाः सर्वे विद्वद्भिः परिकीर्तिताः।
सङ्ख्यादयो विभागान्ता उभयेषां गुणा मताः ॥ ८८ ॥

अमूर्तगुणा इति। **मूर्तेषु न वर्तन्ते इत्यर्थः**। इत्यमूर्तगुणकथनम्।

दिनकरी।

मूले 'एतेऽमूर्तगुणाः' इत्यत्राऽकारप्रश्लेषो बोध्यः। ननु 'धर्म–' इत्यादिमूलेनैतेषाममूर्तवृत्तिगुणत्वं साधर्म्यमुक्तम्, तत्सङ्ख्यादावतिव्याप्तमत आह। **मूर्तेष्विति**। मूर्तावृत्तिगुणत्वमेव तेषां साधर्म्यमित्यर्थः। न च तथाऽप्यमूर्त्तमात्रवृत्तिसङ्ख्यादावतिव्याप्तिरिति वाच्यम्। मूर्त्तगुणवृत्तिसंस्कारत्वान्यगुणत्वव्याप्यजातिशून्यगुणत्वस्य, मूर्तत्वाभावव्याप्यतावच्छेदकपरिमाणावृत्तिजातिमत्त्वस्य वा विवक्षितत्वात्। आद्ये शून्यान्तेन सङ्ख्यादिरूपादिव्युदासः। सत्तामादायाऽसम्भववारणाय **गुणत्वव्याप्येति**। कर्मण्यतिव्याप्तिवारणाय विशेष्यीभूतगुणत्वस्य निवेशः। द्वितीये **परममहत्त्वत्वजातिमादायाऽतिव्याप्तिवारणाय परिमाणावृत्तीति**। इत्यमूर्तगुणकथनम्।

ननु 'उभयेषां गुणाः–' इति मूलेन सङ्ख्यादिपञ्चानामुभयवृत्तिगुणत्वं साधर्म्यमुक्तम्, तच्च रूपादावतिव्याप्तमत 'उभय' पदं मूर्त्तामूर्त्तपरतया व्याचष्टे। **मूर्तामूर्तेति**। न च

रामरुद्री।

अकारप्रश्लेष इति। अन्यथा मूर्तगुणा इति भ्रमः स्यादिति भावः। मूले-**मूर्तेषु न वर्तन्त इति**। अत्राऽपि अमूर्तानामेव गुणा इति व्युत्पत्त्या एतादृशेऽर्थे मूलाशयो निष्कर्षणीयः। मूलोक्तं साधर्म्यमाक्षिपति-**न चेत्यादिना**। **अमूर्तमात्रवृत्तिसङ्ख्यादाविति**। गगनगतैकत्वादावित्यर्थः। **मूर्तगुणवृत्तीत्यादि**। अत्राऽपि गुणपद पूर्ववदेव सार्थकतां नेयम्। शेषं पूर्ववत्। **मूर्तत्वाभावव्याप्यतावच्छेदकेत्यादि**। अस्याऽपि परिष्कारः **'मूर्तत्वव्याप्यतावच्छेदक–'** इत्यादिपूर्वसाधर्म्यव्याख्यानावसरोक्तदिशाऽवसेयः। अत्र च पूर्ववदेवाऽमूर्तवृत्तिभेदप्रतियोगितावच्छेदकत्वे सति अमूर्तवृत्तिर्यस्तद्वृत्तिजातिमत्त्वमेव निर्गलितार्थो वक्तव्यः। तत्र च तादृशपरमहत्त्वमादाय परिमाणेऽतिव्याप्तिवारणाय **परिमाणावृत्तित्वमेव जातौ** विशेषणं देयम्, न तु गुणविभाजकत्वं, गौरवात्। अत्र परिमाणान्यस्य तथाविधस्य व्यावर्त्यस्याऽभावेन तन्निवेशस्याऽकिञ्चित्करत्वात्। अत एव मूर्तगुणत्वसाधर्म्यव्याख्यानावसरे जातौ गुणवृत्तित्वमात्रमुपात्तम्, न तु परिमाणावृत्तित्वम्, इह तु परिमाणावृत्तित्वमेवेत्युक्त एवाऽर्थो दृढ इति मन्तव्यम्। गुणवृत्तित्वं स्वत्र न निवेश्यम्, कर्मादेर्व्यावर्त्यस्याऽत्राऽसम्भवादिति ध्येयम्। अमूर्तत्वं तु परममहत्परिमाणवत्त्वमेव, न तु परिच्छिन्नपरिमाणवत्त्वाभावः, तथा सति घटादेरप्युत्पत्तिक्षणावच्छेदेन तच्छून्यतया तद्वृत्तीना रूपादीनामप्यमूर्तगुणत्वापत्तेः। वस्तुतस्तु तादृशद्रव्यत्वव्याप्यतावच्छेदकत्वमेव विवक्षितम्। उत्पन्नविनष्टानङ्गीकाराच्च न तमादाय रूपादावतिव्याप्तिः। तेन कण्ठतो मूर्तत्वाभावव्याप्यत्वोक्तावपि न क्षतिः। भेदस्य व्याप्यवृत्तित्वादेव च नोत्पत्तिक्षणावच्छिन्नघटादिकमादाय रूपादावतिव्याप्तिः। उत्पन्नविनष्टाङ्गीकारे तु अमूर्तत्वं परममहत्परिमाणरूपमेव ग्राह्यमिति न दोषः। शेषमन्यत्सुगमम्। इत्यमूर्तगुणकथनम्॥

---

(१) अत्र **'मूर्तवृत्तित्वत्यमूर्तवृत्तिवृत्तिगुणत्वव्याप्य(व्याप्य)जातिमत्त्वं तत्त्वम्। (सङ्ख्या)(द्वित्व)त्वादिकमादाय लक्षणसमन्वयः।'** इत्यधिकः पाठः प्राचीनपुस्तके दृश्यते। परं तु टिप्पणीस्थ इवाऽयं प्रतिभाति।

उभयेषामिति । मूर्तामूर्तगुणा इत्यर्थः(१) ॥८६॥८७॥८८॥

इति मूर्तामूर्तगुणकथनम् ।

दिनकरी ।

मूर्तमात्रवृत्तिसङ्ख्यादावव्याप्तमिति वाच्यम्। कालवृत्तिधृत्तिगुणत्वव्यप्यजातिमत्त्वस्य, द्रव्यत्वसमव्यापकतावच्छेदकजातिमत्त्वस्य वा विवक्षितत्वात् ॥ ८६ ॥ ८७ ॥ ८८ ॥

॥ इति मूर्तामूर्तगुणकथनम् ॥

रामरुद्री ।

'उभयेषां गुणा मताः' इति मूलम् । तत्रोभयवृत्तिगुणत्वं उभयनिरूपितवृत्तित्वमित्युक्ते परिमाणादावव्याप्तिरत उभयनिरूपितगुणनिष्ठवृत्तितावच्छेदकधर्मवत्त्वमुभयगुणत्वमिति वक्तव्यम्, तदाह्निपति—**नन्वित्यादिना । रूपादावतिव्याप्तमिति** । तेषामपि रूपत्वादिनोभयवृत्तित्वादिति भावः । **मूर्तमात्रेत्यादि** । घटगतैकत्वादावित्यर्थः । तस्या उभयवृत्तित्वविरहादिति भावः । **कालवृत्तिवृत्तीत्यादि** । कालवृत्तयः सङ्ख्यादयः पञ्च, तद्वृत्तिर्या गुणत्वव्याप्या जातिस्तद्वत्त्वं तेषामिति लक्षणसमन्वय इति भावः। सत्ताजातिमादायाऽतिव्याप्तिवारणाय **गुणत्वव्याप्येति** । तत्त्वं च गुणवृत्तिभेदप्रतियोगितावच्छेदकत्वम् । आद्यं वृत्तित्व समवायेन बोध्यम् । तेन रूपादेरपि कालिकविशेषणतादिना कालवृत्तित्वेऽपि न क्षतिः । द्वितीयवृत्तित्वं धर्मवत्त्व च समवायेन बोध्यमिति सूचनाय **जातिपदम्** । तेन कालवृत्तिद्रव्यत्वादिनिरूपितताद्रूप्यसम्बन्धावच्छिन्नवृत्तितावद्द्रव्यत्ववति द्रव्यादौ, कालिकेन तादृशसङ्ख्यात्वादिमति रूपादौ च नाऽतिव्याप्तिः ।

ननु एतादृशस्य उभयगुणत्वस्य पारिभाषिकत्वमित्यत आह—**द्रव्यत्वेत्यादि** ।

केचित्तु नव्यमते कालादेरीश्वरानतिरिक्ततया ज्ञानादावतिव्याप्तिरतो लक्षणान्तरमित्याहुः । तन्न । तन्मते सङ्ख्यादेर्गुणत्वानङ्गीकारेण तद्घटितस्य परिष्कारस्य नव्यमतानभिप्रायकत्वानौचित्यात् ।

द्रव्यत्वसमव्यापकतावच्छेदकेत्यादि । ननु तादृशजातिपदेन गुणत्वस्याऽपि सङ्ग्रहात् तद्वति रूपादावतिव्याप्तिः । न च गुणत्वव्याप्यतादृशजातिमत्त्वमेव विवक्षितमतो नाऽतिव्याप्तिरिति वाच्यम् । तथा सति द्रव्यत्वव्यापकतावच्छेदकतादृशजातिमत्त्वमित्युक्तावेव सामञ्जस्ये द्रव्यत्वसमव्यापकतावच्छेदकत्वपर्यन्तनिवेशवैयर्थ्यापत्तेः । न च व्यापकत्वमत्र येन केनाऽपि सम्बन्धेन विवक्षितम्, तथा च विषयतया ज्ञानादेरपि व्यापकत्वात्तद्वारणायैव द्रव्यत्वव्याप्यतावच्छेदकत्वसङ्ग्राहकसमव्यापकतावच्छेदकत्वप्रवेशः, ज्ञानादेर्निरुक्तसम्बन्धेन गुणादावपि सत्त्वेन च द्रव्यत्वव्याप्यत्वविरहान्नाऽतिव्याप्तिरिति तत्प्रवेशः सफल एवेति वाच्यम् । तथा सति सङ्ख्यादीनामपि तादात्म्येन स्वनिष्ठानां द्रव्यत्वव्याप्यत्वविरहेणाऽसम्भवप्रसङ्गात्, यत्किञ्चित्सम्बन्धेन व्याप्यत्वव्यापकत्वयोः प्रवेशे तादात्म्येन द्रव्यस्याऽपि द्रव्यत्वव्याप्यत्वेन तव्यापकत्वेन च द्रव्यादावतिप्रसङ्गादिति चेन्न । अत्र द्रव्यत्वव्यापकतावच्छेदकत्वं द्रव्यवृत्तिभेदप्रतियोगितावच्छेदकतानवच्छेदकत्वम्, न तु द्रव्यवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकत्वम्, तथा सति सर्वत्रैव जन्यद्रव्य उत्पत्तिक्षणावच्छेदेन सङ्ख्यात्वावच्छिन्नाभावसत्त्वेनाऽसम्भवप्रसङ्गात् । भेदघटितव्यापकत्वनिवेशे तु भेदस्य व्याप्यवृत्तितया आद्यक्षणावच्छेदेन तदसम्भवान्न दोषः । एवञ्च निरुक्तव्यापकतावच्छेदिका या गुणत्वव्याप्या जातिस्तद्वत्त्वमेव वाच्यम् । अन्यथा तादृशसत्तागुणत्वादिजातिमादाय रूपादावतिव्याप्त्यापत्तेः । गुणत्वव्याप्यत्वं तु गुणवृत्तिभेदप्रतियोगितावच्छेदकत्वमात्रम्, न तु गुणत्वसमानाधिकरणत्वमपि तत्र निवेश्य, वैयर्थ्यात् । तथा च आत्मवान्नेति भेदाप्रसिद्ध्याऽऽत्मत्वस्याऽपि द्रव्यवृत्तिभेदप्रतियोगितावच्छेदकतानवच्छेदकत्वेन गुणवृत्तिभेदप्रतियोगितावच्छेदकत्वरूपगुणत्वव्याप्यत्ववत्त्वेन च तदत्यात्मादावतिव्याप्तिवारणाय समव्यापकतावच्छेदकत्वनिवेशः । न च द्रव्यत्वसमव्यापकतावच्छेदकत्वनिवेशोऽपि न सङ्गच्छते, उत्पन्नविनष्टद्रव्ये सङ्ख्यात्वावच्छिन्नाभावसत्त्वात्, समवायत्वसमवायिसमवेतत्वान्यतरसम्बन्धेन व्याप्यत्वनिवेशे च भेदगर्भव्यापकत्वानुसरणं निर्युक्तिकमिति वाच्यम् । उत्पन्नविनष्टद्रव्यानभ्युपगन्तृमत एवैतल्लक्षणकरणात्, द्रव्यत्वपदेन संयोगस्य, गुणवत्त्वस्य

संयोगश्च विभागश्च सङ्ख्या द्वित्वादिकास्तथा।
द्विपृथक्त्वादयस्तद्वदेतेऽनेकाश्रिता गुणाः॥ ८९॥
अत शेषगुणाः सर्वे मता एकैकवृत्तयः।

अनेकाश्रिता इति। **संयोगविभागद्वित्वादीनि द्विवृत्तीनि; त्रित्वचतुष्ट्वादिकं त्रिचतुरादिवृत्तीति बोध्यम्॥ ८६॥** इत्यनेकाश्रितगुणकथनम्।

अत इति। **रूप-रस-गन्ध स्पर्शैकत्व-परिमाणैकपृथक्त्व-परत्वापरत्व-**

दिनकरी।

नन्वनेकाश्रितत्वं संयोगादावव्याप्तम्, अनेकपदस्य बहुत्वविशिष्टे शक्तत्वादत आह। संयोगेति। तथा चैकत्वभिन्नसङ्ख्याविशिष्टवाचकत्वमनेकपदस्येति न तत्राऽव्याप्तिरिति, भावः। स्वाश्रयप्रतियोगिकान्योन्याभावसमानाधिकरणगुणत्वस्य विवक्षितत्वान्न तत्राऽव्याप्तिरित्यपि केचित्॥ ८९॥ इत्यनेकाश्रितगुणकथनम्।

'एकैकवृत्तयः-' इति मूलस्य **स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकैकरामरुद्री।**

वा विवक्षिततया तादृशद्रव्यस्य निरुक्तद्रव्यत्वविरहाच्च। वस्तुतस्तु द्रव्यवृत्तिप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वरूपमेव व्यापकतावच्छेदकत्वमिहाऽभिप्रेतम्। प्रतियोगित्व च समवायस्वसमवायिसमवेतत्वान्यतरसम्बन्धावच्छिन्नं ग्राह्यम्। अन्यथोत्पन्नविनष्टद्रव्यमादायाऽसम्भवप्रसङ्गात्। व्यापकत्वस्य प्रतियोगिवैयधिकरण्याघटितस्य विवक्षणे संयोगादेरव्याप्यवृत्तेरनधिकरणदेशावच्छेदेनाभावस्य द्रव्ये सत्त्वाद्व्याप्त्यापत्तेः। तथा चाऽऽत्मत्वादेः प्रतियोगिव्यधिकरणतादृशाभावप्रतियोगितानवच्छेदकतया आत्मादावतिव्याप्तिवारणाय समव्यापकतावच्छेदकत्वनिवेशः। अत्र व्यापकत्वतदवच्छेदकतयोर्व्याप्यत्वतदवच्छेदकतयोश्च समवायावच्छिन्नत्वलाभाय जातिपदमिति विभावनीयम्॥ ८६॥८७॥८८॥

॥ इति मूर्तामूर्तगुणकथनम्॥

संयोगादावव्याप्तमिति। तेषां द्विनिष्ठत्वादिति भावः। **अनेकपदस्येति।** पदत्वोक्त्या वक्ष्यमाणशक्ते रूढिरूपत्व सूचितम्। अन्यथा तस्य वाक्यत्वेन पदत्वानुपपत्त्या तदुक्त्यनुपपत्तेः। तेनाऽनेकपदस्य योगेन वस्तुद्वयवाचकत्वेऽपि न क्षतिः, योगाद्ढेर्बलीयस्त्वादिति ध्येयम्। **बहुत्वविशिष्ट इति।** बहुत्वावच्छिन्न इत्यर्थः। **एकत्वभिन्नसङ्ख्याविशिष्टवाचकत्वमिति।** एकत्वाभिन्नसङ्ख्यावच्छिन्नबोधकत्वमित्यर्थः। **अनेकपदस्येति।** तादृशानुपूर्वीघटकपदद्वयस्येत्यर्थः तेन नाऽसङ्गतिः। इदं त्ववधेयम्। एतादृशलक्षणस्य द्रव्ये सामान्ये चाऽतिव्याप्तिः न चैकत्वभिन्नसङ्ख्यावच्छिन्नपर्याप्तिकत्वमेव विवक्षितमिति वाच्यम्। तथा सति संयोगादेरेकत्वभिन्नसङ्ख्याविशिष्टनिष्ठत्वेऽपि तादृशसङ्ख्यावच्छिन्नपर्याप्तिकत्वविरहेणाऽव्याप्त्यापत्तेः। मैवम्। अनेकाश्रितगुणत्वस्यैव साधर्म्यतया दोषवारणसम्भवादिति। **स्वाश्रयप्रतियोगिकेत्यादि।** सामान्यादावतिव्याप्तिवारणाय गुणत्वप्रवेशो बोध्यः। **केचिदित्यस्वरससूचनाय,** तद्बीजं तु उभयभेदमादाय रूपादावतिव्याप्तिः, तद्वारणाय व्यासज्यवृत्तिधर्मावच्छिन्नत्वस्य प्रतियोगितायां निवेशे तु एकत्वानवच्छिन्नपर्याप्तिकत्वरूपव्यासज्यवृत्तित्वनिवेशाद्गौरवमित्यवधेयम्॥ ८९॥ इत्यनेकाश्रितगुणकथनम्॥

स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकैकत्वका इति। यत्किञ्चिदेकत्ववृत्त्यभावप्रतियोग्यवच्छेदकतानिरूपकप्रतियोगितानिरूपकभेदवद्वृत्तय इत्यर्थः। तेन नाऽननुगमः। अत्र एकत्ववृत्तिः स्वसामानाधिकरण्यभेदप्रतियोगितावच्छेदकत्वं नाऽस्तीत्याकारकोऽभावो विवक्षितः। भेदश्चाऽत्र प्रतियोग्यवृत्तिरूपेण विशेषणीयः। तेन तत्तद्रूपाधिकरणनिष्ठैकत्वादेरपि तादृशोभयभेदप्रतियोगितावच्छेदकत्वेऽपि नाऽसम्भवः। अत्राऽपि पूर्ववदेव गुणत्वे सतीति विशेषणं देयम्। तेन कर्मादौ नाऽतिव्याप्तिः

बुद्ध्यादिषट्कं स्पर्शान्ताः स्नेहः सांसिद्धिको द्रवः ॥ ९० ॥

बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-गुरुत्व-द्रवत्व-स्नेह-संस्कारादृष्ट-शब्दा इत्यर्थः । इत्येकैकवृत्तिगुणकथनम् ।

दिनकरी ।

कत्वका इत्यर्थः । यद्वा स्वाश्रयान्योन्याभावव्यापकात्यन्ताभावप्रतियोगिन इत्यर्थः ।

॥ इत्येकैकवृत्तिगुणकथनम् ॥

रामरुद्री ।

यद्यपि सर्वेषामेवैकत्ववद्भेदानां पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिवृत्तित्वेन लक्षणघटकत्वासम्भवाद्घटभिन्नभेदस्यैव तादृशस्य ग्रहीतुं शक्यतया सर्वत्रोभयवृत्तिगुणेऽतिव्याप्तिः । न च तादात्म्यसम्बन्धावच्छिन्नस्वनिरूपितप्रतियोगिताश्रयावृत्तित्वनिवेशादेव निरुक्तदोषवारणं सम्भवतीति वाच्यम् । एवमपि संयोगादावतिव्याप्तेर्दुर्वारत्वात् । तत्र तत्समानाधिकरणैकत्ववद्भेदस्याऽपि कालिकेन स्ववद्भिन्नभेदस्वरूपतया तादृशत्ववद्भिन्ने गगनादौ वृत्तेः प्रतियोग्यवृत्तित्वविरहेण लक्षणाघटकत्वात् । न च तर्हि भेदे प्रतियोग्यवृत्तित्वं विहाय व्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वं निवेश्यमिति वाच्यम् । उभयभेदगगनाभावयोरैक्येन गगननिष्ठतादृशप्रतियोगितामादायोभयभेदस्याऽपि लक्षणघटकत्वापत्त्याऽसम्भवापत्तेः । न च व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगित्वानिरूपकत्वमेव तत्र निवेश्यमिति वाच्यम् । एवं सति तत्तदैकत्ववद्भेदस्याऽपि तत्तदैकत्ववाच्यत्वोभयाभावरूपतया व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगित्वानिरूपकत्वविरहेण लक्षणाघटकतयाऽभावाप्रसिद्ध्याऽसम्भवापातादिति दोषः सम्भवति, तथाऽपि तादृशाभावीयप्रतियोगितायां व्यासज्यवृत्तिधर्मानवच्छिन्नत्वनिवेशान्न कोऽपि दोष इति विभावनीयम् । नन्विदं लक्षणं भेदस्याऽव्याप्यवृत्तित्वाङ्गीकारेऽसम्भवप्रसञ्जकम्, एकत्वादेरपि उत्पत्तिकालावच्छेदेन स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकैकत्वकत्वादित्यस्वरसतो लक्षणान्तरमाह **यद्वेति** । स्वाश्रयान्योन्याभावसमानाधिकरणाभावप्रतियोगितानवच्छेदकं यद्धर्मावच्छिन्नाभावत्वं, तद्धर्मवन्त इत्यर्थः । **स्वं-तत्तद्गुणः** । तेन न व्यापकत्वाप्रसिद्धिः, न वा एकत्वादावव्याप्तिप्रसक्तिः । एकत्वाभावस्य एकत्वादिमद्भेदसमानाधिकरणाभावप्रतियोगित्वादित्यवधेयम् । अथ स्वाश्रयस्य व्यासज्यवृत्तिधर्मावच्छिन्नभेदमादायाऽव्याप्तिवारणाय व्यासज्यवृत्तिधर्मानवच्छिन्नत्वस्य स्वाश्रयान्योन्याभावीयप्रतियोगितायां निवेशावश्यकत्वे संयोगादिगुणानामपि तथात्वापत्तिर्दुर्वारा, तेषामपि स्वाश्रयभेदव्यापकाभावप्रतियोगित्वात् । भेदस्याऽव्याप्यवृत्तित्वेनाऽव्याप्तेर्वारणाय स्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्य लक्षणे निवेशे च एकवृत्तित्वपरिष्कारे तत्पर्यायस्योभयावृत्तित्वस्य प्रवेशेनाऽऽत्माश्रयः । कथञ्चित्तन्निवेशेऽपि च स्वाश्रयभेदव्यापकव्यासज्यवृत्तिधर्मावच्छिन्नाभावमादायाऽतिव्याप्तिः संयोगादौ । न च व्यासज्यवृत्तिधर्मावच्छिन्नाभावस्य न व्यापकत्वसम्भवः, तदभावस्य तादृशोभयस्वरूपत्वेन तदन्तर्गतस्य संयोगादेःस्वाश्रयभेदसामानाधिकरण्यनियमादिति वाच्यम् । सर्वेषामेवाऽभावानां पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकाभावप्रतियोगिनां तादृशभेदसमानाधिकरणतादृशाभावप्रतियोगित्वमादायाऽसम्भवापत्तेरेवमपि दुर्वारत्वादिति चेन्मैवम् । स्वनिष्ठावच्छेदकतानिरूपकव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकभेदसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकाभावत्वनिरूपितप्रतियोगितावच्छेदकधर्मवत्त्वस्यैव निरुक्तलक्षणपरिष्कारार्थत्वेनाऽनुपपत्त्यभावात् । सामानाधिकरण्यघटकमधिकरणत्वं च निरवच्छिन्नस्वरूपेण बोध्यम् । अथाऽत्र कीदृशसम्बन्धेन स्वावच्छिन्नभेदसामानाधिकरण्यं निवेश्यते । न तावत्स्वेनकेनाऽपि, तथा सति एकत्वाद्यभावस्याऽपि एकत्वादिमद्भेदवति कालिकेन वृत्तित्वाऽभावस्तत्प्रतियोगित्वेनाऽव्याप्यकत्वप्रसक्तादिति चेन्मैवम् । समवायेनैव तस्य निविष्टत्वादिति निर्व्यलीकः पन्थाः । ॥ इत्येकैकवृत्तिगुणकथनम् ॥

अदृष्टभावनाशब्दा अमी वैशेषिका गुणाः।

बुद्ध्यादीति। बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्ना इत्यर्थः। स्पर्शान्ताः-रूप-रस-गन्ध-स्पर्शा इत्यर्थः। द्रवः-**द्रवत्वम्। वैशेषिकाः-विशेषा एव वैशेषिकाः, स्वार्थे ठक्, विशेषगुणा इत्यर्थः।** इति विशेषगुणकथनम्।

दिनकरी।

स्वार्थे ठगिति। विनयादिभ्यः स्वार्थे ठञ्विधानात्, विशेषशब्दस्य तदन्तर्गतत्वात्, विनयादेराकृतिगणत्वादिति भावः। **विशेषगुणा इत्यर्थ इति।** विशेष·

रामरुद्री।

विनयादिभ्य इति। 'विनयादिभ्यष्ठक् (५। ४। ३)' इति सूत्रेणेति शेषः। ननु विनयादिभ्यष्ठञ्विधानेऽपि विशेषशब्दात्तदविधानादनुपपत्तिस्तदवस्थैवेत्यत आह। **विशेषशब्दस्येति।** ननु विनयादिगणे विशेषशब्दस्य कण्ठतोऽपठनात् तस्य कथं तदन्तर्गतत्वमित्यत आह। **विनयादेराकृतिगणत्वादिति। आकृत्या**—पठितगणविषयकशास्त्रविहितकार्यसदृशकार्यकत्वेन **गण्यन्ते**-ज्ञायन्ते तद्गणेऽपठिता अपि तत्तच्छास्त्रविहिततत्तद्गणान्तर्गतत्वप्रयुक्तकार्यकत्वतयेति शेषः, ते आकृतिगणाः, तथाविधत्वादित्यर्थः। तथा च विशेषशब्दस्य विनयादावपठनेऽपि विनयादित्वप्रयुक्तठयुपकार्याश्रयतया विनयान्तर्गतत्वमक्षुण्णमेवेति मन्तव्यम्। **इति भाव इति।** तथा च 'ठस्येकः (७। ३। ५०)' इत्यनुशासनबलेन इकादेशे 'किति च (७। २। ११८)' इत्यनेन आद्यस्याऽचो वृद्धौ वैशेषिक इति सिद्धमिति भावः। इदं त्ववधेयम्। वैशेषिकशब्दस्य स्वार्थे ठञ्विधानेन निष्पन्नत्वे इतरव्यवच्छेदरूपविशेषपदार्थ-एव तदर्थो वक्तव्यः, तथा च वैशेषिकस्य गुणा इति तत्पुरुषाश्रयणेनैव वैशेषिकगुणा इति रूपं निष्पादनीयम्, एवं च मूले स्वार्थे ठकोऽभिप्रेतत्वे वैशेषिकगुणा इत्येव वक्तव्यमापतति, न तु **'वैशेषिका गुणाः'** इति, तथाऽपि विशेषशब्दस्यैवाऽत्र व्यवच्छेदके लाक्षणिकत्वेन करणसाधनत्वेन वा कथञ्चिन्मूलं सङ्गमनीयम्। वस्तुतस्तु विशेषो व्यवच्छेदः प्रयोजनं येषां ते वैशेषिका इत्येव रूपं साधनीयम्, तत्र ठकोऽसम्भवेऽपि 'प्रयोजनम् (५। १। १०९)' इत्यनुशासनबलेन **ठञ्**ः प्राप्तौ तत्रेकादेशे 'तद्धितेष्वचामादेः (७।२।११७)' इत्यनेनाऽऽद्यस्याऽचो वृद्धिसम्भवादित्यवधेयम्।

तच्च विशेषगुणत्वं न स्वाश्रयव्यवच्छेदानुमितियोग्यव्याप्यतावच्छेदकगुणत्वव्याप्यजातिमत्त्वम्, संयोगादेरपि तथात्वेनाऽतिव्याप्तेरिति चेत्—

अत्र वर्धमानोपाध्यायाः—पृथिवीवृत्तिवृत्तिजलवृत्तिवृत्तीतर-संयोगावृत्तिगुणत्वव्याप्यजातिमत्त्वमेव विशेषगुणत्वम्। पृथिवीवृत्तिवृत्तित्वं जलवृत्तिवृत्तावन्वितम्, न तु स्वातन्त्र्येणेतरपदार्थतावच्छेदके भेदे, तथा सति गन्धत्व-स्नेहत्वादेरपि यथाक्रमं पृथिवीजलवृत्तिवृत्तित्वेन तदितरत्वविरहेणाऽव्याप्त्यापत्तेः। न च पृथिवीगुरुत्वव्यावृत्तौ जलगुरुत्वनिष्ठौ, जलगुरुत्वव्यावृत्तौ पृथिवीगुरुत्वनिष्ठौ च तादृशजातिमादाय गुरुत्वेऽतिव्याप्तिरिति वाच्यम्। पृथिवीजलगुरुत्वयोः परस्परव्यावृत्तवैजात्यसत्त्वे मानाभावात्। अत्र च पृथिवीसंयोगमात्रवृत्तिनिबिडत्वरूपजातिं, तेजःसंयोगमात्रवृत्तिकाञ्चनघटारम्भकतावच्छेदकजातिं चाऽऽदाय संयोगेऽतिव्याप्तिवारणाय संयोगावृत्तीति जातौ विशेषणमुपात्तम्। कठिनावयवद्वयविभागव्यावृत्तशब्दविशेषजनकतावच्छेदकजातेः, तेजोवेगातिशयस्य, अत्यन्तानिसयोगोच्छेद्यतावच्छेदकद्रवत्वगतवैजात्यस्य च वारणाय जातौ विभागवेगाजलद्रवत्वावृत्तीत्यपि वक्तव्यम्। न च तथाऽपि तादृशपरममहत्त्वत्वरूपजातिमादाय परिमाणेऽतिव्याप्तिरिति वाच्यम्। तादृशजातौ मानाभावात्, अपकर्षानाश्रयपरिमाणत्वस्यैव परममहत्त्वरूपत्वादित्याहुः।

तत्तु विशेषगुणशब्दस्य पारिभाषिकनिर्वचनरूपतामाश्रयदिव प्रतिभाति।

वस्तुतस्तु स्वाश्रयसमानाधिकरणयत्किञ्चिज्जातिव्यापकतावच्छेदिका या स्वाश्रयसमानाधिकरणद्रव्यविभाजकोपाधिमदितरभेदव्याप्यतावच्छेदिका गुणत्वव्याप्या जातिरतद्द्रवत्वमेव विशेषगुणत्वं बोध्यम्। तथा

रामरुद्री।

च स्वाश्रयसमानाधिकरणीभूता या रजतोपष्टम्भकपार्थिवभागवृत्तिवैजात्यरूपा, लोहोपष्टम्भकपार्थिवभागवृत्तिवैजात्यरूपा, सुवर्णोपष्टम्भकपार्थिवभागवृत्तिवैजात्यरूपा, मरकतोपष्टम्भकपार्थिवभागवृत्तिवैजात्यरूपा, माणिक्योपष्टम्भकपार्थिवभागवृत्तिवैजात्यरूपा, कपिशमात्रवर्णविजातीयवस्तुमात्रवृत्तिवैजात्यरूपा, केवलचित्रवर्णविजातीयवस्तुमात्रनिष्ठवैजात्यरूपा वा या जातिस्तद्व्यावर्तकतावच्छेदकीभूताः स्वाश्रयसमानाधिकरणपृथिवीत्वरूपद्रव्यविभाजकोपाधिमदितरभेदव्याप्यतावच्छेदिकाः पार्थिवशुक्लगतवैजात्य-नीलत्व-पीतत्व-हरितत्व-रक्तत्व-कपिशत्व-चित्रत्वरूपा जातयस्तद्गतस्य पार्थिवरूपेषु, जलीयादौ च तादृशविलक्षणाभावस्वरशुक्लत्वभास्वरशुक्लत्वरूपजातिमादाय, रसे निरुक्तदिशैव, गन्धत्वमादाय गन्धे, पार्थिवमात्रवृत्तिवृत्त्यनुष्णाशीतस्व-जलतेजोवृत्तिवृत्तिशीतत्वोष्णत्व-वायुवृत्तिवृत्तिविजातीयानुष्णाशीतत्वरूपजातीरादाय पार्थिव-जलीय-तैजस-वायवीयस्पर्शेषु अनयैव च दिशाऽन्यत्राऽपि लक्षणसमन्वयात्। पार्थिवभागवृत्तिशुक्लरूप-मधुररसयोर्जलव्यावृत्तवैजात्यं तु प्रत्यक्षेणैव सिद्धयतीति न दोषः। न हि जले यादृशमुत्कृष्टं शौक्ल्यं, तादृशमेव पृथिव्यामनुभूयते, मधुररस एव वेति। न च तथाऽपि वायवीयपार्थिवस्पर्शयोर्वैजात्यसत्त्वे किं मानमिति वाच्यम्। निमीलितचक्षुषो वायुपृथिव्योरन्यतरस्पर्शोपलम्भे 'वायुर्वाति', 'घटोऽयम्' इत्याद्यव्यभिचरितोपलम्भस्यैव तत्र प्रमाणत्वात्। ननु तथाऽपि अग्निसंयोगनाश्यतावच्छेदकं यत्पार्थिवद्रवत्वमात्रवृत्ति वैजात्यं, तत्स्वाश्रयसमानाधिकरणयत्किञ्चिद्घृतत्वादिरूपजातिव्यापकतावच्छेदकं, स्वाश्रयसमानाधिकरणपृथिवीत्वरूपद्रव्यविभाजकोपाधिमदितरभेदव्याप्यतावच्छेदकमपि, तद्गतस्य च नैमित्तिकद्रवत्वे सत्त्वादतिव्याप्तिरिति चेन्न। पार्थिवनैमित्तिकद्रवत्वतारतम्येन केषाञ्चिरस्वल्पाग्निसंयोगनाश्यतया, केषाञ्चिच्चाऽधिकाग्निसंयोगनाश्यतया विजातीयाग्निसंयोगत्वेनैव तत्तद्विजातीयद्रवत्वनाशं प्रति कारणताया आवश्यकत्वेन अग्निसंयोगनाश्यतावच्छेदकतयाऽपि पार्थिवद्रवत्वमात्रसाधारणजात्यसिद्धेः पार्थिवद्रवत्वनाशं प्रति अग्निसंयोगत्वेन हेतुताया अङ्गीकर्तुमशक्यत्वात्। न च तत्तद्वैजात्यमादायाऽव्यतिव्याप्तिस्तदवस्थैवेति वाच्यम्। एकघृतत्वजात्यवच्छिन्नस्याऽपि तदन्तर्गतजलतारतम्यप्रयुक्तस्वल्पाधिकाग्निसंयोगनाश्यद्रवत्वतायाः प्रत्यक्षसिद्धत्वात् कस्या अपि जातेः स्वाश्रयसमानाधिकरणजातिव्यापकतावच्छेदकत्वासम्भवेनाऽतिव्याप्तिविरहात्। न च जलतारतम्यादिप्रयुक्तघृतत्वावान्तरजातिव्यापकतावच्छेदकत्वं तत्रैवमपि सुघटमेवेति वाच्यम्। तादृशघृतत्वावान्तरजातीनां मानाभावेनाऽनङ्गीकारात्। न च जलादिघटितघृतावयवसंयोगजन्यतावच्छेदकतयैव तत्सिद्धिरिति वाच्यम्। एवमप्येकैकेनैव विलक्षणाग्निसंयोगेन घृतादिद्रवत्वोच्छेदवत् जलादिनाशस्याऽप्यानुभविकत्वेन तत्तदग्निसंयोगाव्यवहितोत्तरनाशत्वावच्छिन्नं प्रत्येव तादृशाग्निसंयोगत्वेन लाघवतः कार्यकारणभावकल्पनेन निरुक्तवैजात्यस्यैवाऽसिद्धया तत्राऽतिव्याप्तेर्वारयितुं शक्यत्वात्। वस्तुतस्तु अग्निसंयोगेऽपि वैजात्याङ्गीकारोऽप्रामाणिक एव, तथा सत्यभिघातत्वादिना साङ्कर्यप्रसङ्गात्। किन्तु तत्तत्तरतमभावापन्नविजातीयविलक्षणोष्णस्पर्शवदग्निसंयोगाव्यवहितोत्तरद्रवत्वनाशं प्रत्येव तादृशविलक्षणस्पर्शवदग्निसंयोगस्य हेतुत्वम्। उष्णस्पर्शवैजात्यं च प्रत्यक्षेणैव सिद्धयतीति विभावनीयम्। अथैवमपि शब्देऽव्याप्तिः, तत्र शब्दत्वजातेर्ग्रहीतुमशक्यत्वात्, तस्याः स्वाश्रयसमानाधिकरणजातिव्यापकतावच्छेदकत्वविरहादिति चेन्न। स्वाश्रयसमानाधिकरणजातिद्रव्यविभाजकोपाधन्यतरघटकयत्किञ्चिद्व्यापकताया एव निविष्टत्वात्। न च तथापि द्वेषादावव्याप्तिः स्थिरैव, तत्र द्वेषत्वजातेः स्वाश्रयसमानाधिकरणजातिद्रव्यविभाजकोपाधिव्यापकतावच्छेदकत्वविरहादिति वाच्यम्। तादृशजाति-द्रव्यविभाजकोपाधि-तादृशोपाधिमद्विभाजकोपाध्यन्यतमव्यापकतायाः एव निविष्टत्वात्। तथा च जीवत्वादिकमादाय लक्षणसमन्वयः। न च तेजोवेगगतिशयमादाय वेगेऽतिव्याप्तिरिति वाच्यम्। तादृशवेगगतिशयस्य प्रकृष्टाभिघातादिघटितनाऽन्यत्राऽपि सम्भवेन तरत्वघटकत्वस्वसमानाधिकरणजातिव्यापकत्वासम्भवात्। न च स्थितिस्थापके तथाऽप्यतिव्याप्तिरिति वाच्यम्। तस्य पृथिव्यादिचतुष्टयवृत्तित्वाङ्गीकारेणाऽतिव्याप्तिवारणात्। कथमन्यथा तेजसोर्वह्न्यादेरूर्ध्वगमनं, वायोस्तिर्यग्गमनं च? न च स्थितिस्थापकगतातिशयानाधायाऽतिव्याप्तिः सम्भवतीति वाच्यम्। तादृशातिशयानाश्रयो विरुद्धजातीयद्रव्यवृत्तित्वस्याऽप्यानुभविकत्वेनाऽदोषात्। न हि जलादेर्यादृशः स्थिति-

दिनकरी।

गुणत्वंच भावनान्यो यो वायुवृत्तिवृत्तिस्पर्शवृत्तिधर्मसमवायी, तदन्यत्वे सति गुरुत्वाजलद्रवत्वान्य(१)गुणत्वम्। अत्र जात्यादावतिव्याप्तिवारणाय विशेष्यम्। गुरुत्वनैमित्तिकद्रवत्वयोर्वारणाय गुरुत्वेत्यादि। सांसिद्धिकद्रवत्वसङ्ग्रहायाऽजलेति(२)। संयोगादिवारणाय सत्यन्तम्। भावनायामव्याप्तिवारणायाऽऽद्यमन्यान्तं सत्यन्तषटकसमवायिविशेषणम्। सत्तारामरुद्री।

स्थापकेऽतिशयः, स तादृशे घृतादौ नेति वक्तुं शक्यम्, प्रपञ्चयिष्यते चैतत्संस्कारनिरूपण इत्यवधेयम्। न चैतादृशार्थस्याऽपि 'विशेषगुण' शब्दार्थत्वं कथमिति शङ्क्यम्। यत्किञ्चिज्जात्यवच्छेदेन यत्किञ्चिद्द्रव्यविभाजकोपाध्यवच्छेदेन तादृशोपाधिमद्विभाजकोपाध्यवच्छेदेन वा यत्किञ्चिद्द्रव्यविभाजकोपाधिमदितर भेदानुमितियोग्यगुण एव विशेषगुणघटकविशेषशब्दस्य तात्पर्यात्प्रयत्नेन निरुक्तानुमितौ तद्योग्यतायास्तज्जनकज्ञानविषयत्वरूपायाः निरुक्तपरिष्कारेणाऽभिलाषात्। तथा हि अवच्छेदकावच्छेदेनाऽनुमितौ अवच्छेदकावच्छेदेन हेतुमत्त्वमावश्यकमेव, अयमंशः यत्किञ्चिज्जातिप्रभृत्यन्यतमव्यापकतावच्छेदकत्वनिवेशनेन प्राप्तः, व्याप्यतावच्छेदकधर्मवत्त्वमपि तथैवेति सर्वमवदातम्।

अत्र च परिष्कारे तादृशघटत्वादिजातिमादाय घटादावतिव्याप्तिवारणाय गुणत्वव्याप्यत्वस्य जातौ निवेशः। तदर्थश्च गुणवृत्तित्वमात्रमेव, आधिक्ये प्रयोजनविरहात्। जातिपदं समवायेन तद्वत्ताला-भायेत्यवधेयम्।

इदानीं निरुक्तस्य विशेषगुणलक्षणस्य सम्भवेऽपि ततो लाघवेन पारिभाषिकमेव तत्परिष्कारं स्वयमाह—**विशेषगुणत्वं चेत्यादिना**। वस्तुतस्तु पार्थिवजलीयरूपयोर्वैलक्षण्यस्याऽनङ्गीकर्त्तुर्नैमित्तिकद्रवत्वेऽत्यन्ताग्निसंयोगनाश्यतावच्छेदकवैजात्यस्याङ्गीकर्तुश्च मतसाधारण्येनाऽऽह—**विशेषगुणत्वं चेत्यादीति** सम्यक्। तेनाऽग्रे सामान्यगुणनिर्वचने स्वयं तन्मताङ्गीकारेऽपि न क्षतिरित्यवधेयम्। ननु भावनान्यो यो मनोवृत्तिवृत्तिधर्मसमवायी, तदन्यत्वे सति गुरुत्वाजलद्रवत्वान्यगुणत्वमेव कुतो लक्षणं न कृतम्? अत्र स्पर्शवृत्तित्वनिवेशेन लाघवस्याऽपि सम्भवादिति चेन्न। तादृशगुणत्वादिजातिमादायाऽसम्भवस्य वारणार्थमेव तदुपादानस्याऽवश्यकत्वे मनोवृत्तित्ववायुवृत्तित्वयोर्निवेशे विनिगमकाभावात्। कालिकदैशिकपरत्वापरत्वसाधारणजातिद्वयानुपगमे मनसि कालिकपरत्वापरत्वाभावेन कालिकपरत्वापरत्वयोरतिव्याप्त्यापत्तेश्चेति विभावनीयम्। **जात्यादाविति**। **आदिना** विशेषसमवायाभावानां परिग्रहः। **विशेष्यमिति**। गुणत्वं लक्षणे निविष्टमिति भावः। **अजलेतीति**। जलावृत्तीत्यर्थः। तैजसपार्थिवसाधारणनैमित्तिकद्रवत्वस्वरूपजात्यनभ्युपगमाभिप्रायेणेदम्। अन्यथा नैमित्तिकद्रवत्वान्यत्वमेव ब्रूयादिति। न चाऽग्निसंयोगकार्यतावच्छेदकतयैव तत्सिद्धिरिति वाच्यम्। अग्निसंयोगमात्रस्य द्रवत्वाजनकतया तत्तद्विजातीयाग्निसंयोगस्य तत्तद्विजातीयद्रवत्व एव कारणतया उपगन्तव्यतया सकलनैमित्तिकद्रवत्वसाधारणजात्यसिद्धेः। विस्तरस्तु पूर्वमेव प्रपञ्चितः। **संयोगादीति**। **आदिना** विभागवेगपरत्वापरत्वसङ्ख्यापरिमाणपृथक्त्वानां परिग्रहः। **सत्यन्तमिति**। तदन्यत्वे सतीत्यन्तमित्यर्थः। **भावनायामव्याप्तिवारणायेति**। अन्यथा तस्यास्तादृशसंस्कारत्वरूपधर्मसमवायित्वेन तदन्यत्व विरहेणाऽव्याप्तिः स्यादेवेति भावः। ननु भावनान्यत्वस्य सामानाधिकरण्येन धर्मविशेषणत्वे भावनान्यत्वविशिष्टस्याऽपि संस्कारत्वस्य वायुवृत्तिवृत्तित्वसम्भवात्संस्कारत्वावच्छिन्नभेदस्य च भावनाव्याम-भावेनाऽव्याप्तिस्तदवस्थैव। न च भावनान्यत्वविशिष्टसंस्कारत्वस्य वायुवृत्तिवृत्तित्वेऽपि तादृशविशिष्ट-संस्कारत्वावच्छिन्नप्रतियोगिताकभेदो भावनायां वर्तत एवेति नाऽव्याप्तिरिति वाच्यम्। तादृशधर्मावच्छिन्नस्योभयभेदादिकमादायाऽलक्ष्येऽतिव्याप्तिवारणायाऽत्र तादृशधर्मनिष्ठप्रतियोगितावच्छेदकताया निरव-

(१) 'गुरुत्वनैमित्तिकद्रवत्वान्यः' इति पाठः।
(२) 'सांसिद्धिकद्रवत्वसङ्ग्रहायाऽन्येति' इति पाठः।

सङ्ख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा ॥ ९१ ॥
गुरुत्ववेगौ सामान्यगुणा एते प्रकीर्तिताः ।
सङ्ख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ॥ ९२ ॥

सङ्ख्यादिरिति । सङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वानीत्यर्थः ॥ ९२ ॥ इति सामान्यगुणनिरूपणम् ।

दिनकरी ।

दिक्कमादायाऽसम्भववारणाय स्पर्शसङ्ग्रहाय च स्पर्शावृत्तीति । ॥ इति विशेषगुणकथनम्॥

सङ्ख्या आदिर्यस्य, अपरत्वमन्ते यस्येति व्युत्पत्त्या परिमाणपरत्वयोरेव ग्रहणमितिभ्रमवारणायाऽऽदिपदग्राह्यगुणान् विशिष्य दर्शयति—**सङ्ख्यापरिमाणेत्यादिना । 'गुरु-**

रामरुद्री ।

च्छिन्नाया एव विवक्षणीयतया तादृशविशिष्टधर्मावच्छिन्नभेदमादाय लक्षणसमन्वयासम्भवात् । न च वायुवृत्तिवृत्तित्वं यादृशयादृशधर्मावच्छिन्नं भावनान्यत्वविशिष्टतादृशतादृशधर्मावच्छिन्नावच्छेदकतामात्रनिरूपकप्रतियोगिताकभेदकूटवत्त्वमेव विवक्षितमिति वाच्यम् । तथा सति जातित्वादिरूपेणाऽपि वायुवृत्तिवृत्तिताया अवच्छेदात् भावनान्यत्वविशिष्टजातित्वावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदस्य रूपादावसत्त्वेनाऽव्याप्त्यापत्तेः । न चोभयावृत्तित्वं यादृशरूपे निवेशनीयमिति न दोष इति वाच्यम् । एवमपि सङ्ख्यात्वत्वादिना वायुवृत्तिवृत्तेः सङ्ख्यात्वस्य स्वरूपतो भेदप्रतियोगितावच्छेदकत्वे लांघवेन तादृशरूपावच्छिन्नाऽवच्छेदकत्वाप्रसिद्धेः । न च भावनान्यत्वतादृशरूपैतदतिरिक्तधर्मानवच्छिन्नत्वं अवच्छेदकतायां निवेश्यमिति न दोष इति वाच्यम् । अत्र हि तादृशभेदकूटवत्त्वमेव लक्षणे निवेशनीयम्, अन्यथा तादृशयत्किञ्चिद्भेदस्य सङ्ख्यादौ सत्त्वेनाऽतिव्याप्त्यापत्तेः, तथा च स्वदुक्तरीत्या संस्कारत्वावच्छिन्नभेदस्याऽपि लक्षणघटकतया तस्य भावनायामभावादव्याप्तेर्दुर्वारत्वापातात् । न च वायुवृत्तिवृत्तितावच्छेदका यावन्त उभयावृत्तयो धर्मास्तत्प्रत्येकातिरिक्तभावनान्यत्वातिरिक्तधर्मानवच्छिन्नावच्छेदकताकप्रतियोगिताकयत्किञ्चिद्भेदवत्त्वस्य लक्षणत्वे न कश्चित् दोषः, भावनायां तादृशभावनान्यत्वविशिष्टसंस्कारत्वावच्छिन्नभेदस्य सत्त्वादेव लक्षणसमन्वयादिति वाच्यम् । एतादृशनिवेशेमहागौरवापत्तेरित्यत आह । **आद्यमन्यान्तमिति** । पदमिति शेषः । **विशेषणं** अभेदान्वयसाकाङ्क्षम् । तेन पदस्य विशेषणत्वाभावेऽपि न क्षतिः । एवमग्रेऽपि । ननु भावनाऽवृत्तित्वमेव धर्मे कुतो नोक्तमिति चेन्न । तथा सति वायौ स्थितिस्थापकानङ्गीकर्तृमते तत्राऽनिव्याप्त्यापत्तेः । संस्कारत्वस्य भावनाऽवृत्तित्वविरहेण लक्षणाघटकतया स्थितिस्थापकस्य संस्कारत्वमादाय वारणायोगादिति ध्येयम् । **असम्भववारणायेति** । ननु तद्वारणाय रूपावृत्तित्वमेव निवेश्यतां, किं स्पर्शावृत्तित्वपर्यन्तानुधावनेनेत्यत आह । **स्पर्शसङ्ग्रहाय चेति** । अन्यथा तादृशस्पर्शत्वरूपजातेः स्पर्शेऽपि सत्त्वेनाऽव्याप्तिप्रसङ्गादिति भावः । असम्भवस्य गुरुतरदोषत्वादत्र प्रथममुपादानमिति मन्तव्यम् ।

॥ इति विशेषगुणकथनम् ॥

सङ्ख्या आदिर्यस्येत्यादि । यत्पदेन विभागवाक्यघटकपदपरामर्शाभिप्रायेणेदम् । **सङ्ख्या**—सङ्ख्यापदम् । **आदिः**—अव्यवहितपूर्वोच्चारणविषयः । तथा च **'सङ्ख्यादयः' इति बहुव्रीहौ 'आरूढवानरः'** इत्यादिस्थले इवोत्तरस्याऽऽदिपदस्य सङ्ख्यापदाव्यवहितोच्चारणविषयपदार्थे लक्षणया परिमाणस्य निरुक्तवाक्याच्छाब्दबोधः, बहुव्रीहिस्थले विग्रहवाक्याद्यादृशविशेष्यविशेषणभावापन्नपदार्थबोधो जायते तद्विपरीतस्यैव समासवाक्यतो जननस्य सर्वसम्मतत्वात् । एवमेवाऽग्रेऽपि **'अपरत्वमन्ते यस्य—'** इत्यत्राऽपि उत्तरपदस्य अपरत्वपदाव्यवहितपूर्वोच्चारणविषयपदार्थे लक्षणामुपगम्य परत्वस्यैव बोध इति ग्रन्थतात्पर्यमुन्नेयम् । **आदिपदग्राह्यगुणानिति** । **आदिपदजन्यबोधविषयत्वप्रकारकस्वीयेच्छाविषयगुण-**

दिनकरी।

त्ववेगौ' इत्यत्र मूले 'वेग' पदं भावनातिरिक्तसंस्कारपरं, तेन स्थितिस्थापकस्याऽपि परिग्रहः। मूले-सामान्यगुणा इति। तत्त्वं च रूपस्पर्शान्यत्वे सति द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकसंयोगविभागवेगद्रवत्वावृत्तिजातिशून्यगुणत्वम्। द्रव्यविभाजकतावच्छेदकं पृथिवीत्वादि, तद्व्याप्यतावच्छेदकं च गन्धत्वादि, तच्छून्यत्वस्य सङ्ख्यादौ सत्त्वाल्लक्षणसमन्वयः। अत्र जलीयशुक्लरूपे वायोरनुष्णाशीतस्पर्शे च पृथिव्यादिशुक्लरूपस्पर्शव्यावृत्तजातिविशेषे मानाभावाच्छुक्लरूपानुष्णाशीतस्पर्शयोरतिव्याप्तिवारणाय सत्य-

रामरुद्री।

नित्यर्थः। तेन नाऽसङ्गतिः। विशिष्य-यादृशधर्मावच्छिन्नविषयकबोधो निरुक्तवाक्यादिष्टः, तादृशधर्मावान्तरधर्मपुरस्कारेणेत्यर्थः। मूले-सङ्ख्येत्यादि। तथा च सङ्ख्या आदौ यस्य, अपरत्वमन्ते यस्येति व्युत्पत्त्या यादृशानुपूर्वीघटकपदप्रथमोच्चारितं सङ्ख्यापदं तदर्थस्य, यादृशानुपूर्वीघटकपदचरमोच्चारणविषयः अपरत्वपदं तदर्थस्य च लाभान्नाऽसङ्गतिरिति भावः। तदर्थत्वं च न तच्छब्दत्वम्, आनुपूर्व्या अवाचकत्वात्। किन्तु तज्ज्ञानजन्यबोधविषयत्वम्। आद्योच्चारणविषयत्वचरमोच्चारणविषयत्वे तु यथाक्रमं स्वघटकपदोच्चारणध्वंसासमानकालीनोच्चारणविषयस्वघटकपदत्वम्, स्वघटकपदोच्चारणप्रागभावासमानकालीनोच्चारणविषयत्वे सति स्वघटकत्वमित्यनुसन्धेयम्। मूले-इत्यर्थं इति। इति तात्पर्यमित्यर्थः। तेन निरुक्तवाक्यद्वयात् तादृशविषयत्वप्रकारेण बोधाजननेऽपि न क्षतिः। कारिकावल्याम्-सामान्यगुणा इति। अत्र सामान्यं नामाऽनुगतो धर्मः, तादृशा एव गुणा इत्यवधारणेन विशेषभिन्ना इत्यर्थो लभ्यते, तथा च पूर्वनिरुक्तविशेषगुणान्यत्वमेव सामान्यगुणानां लक्षणं बोध्यम्। तत्राऽस्मत्परिष्कृतविशेषगुणत्वस्य मतविशेषसाधारण्यासम्भवात् स्वयमुक्तस्य विशेषगुणत्वस्य च पारिभाषिकत्वान्न तदन्यत्वं सामान्यगुणशब्दार्थः सम्भवतीत्यतः स्वयं सामान्यगुणत्वं परिष्करोति-तत्त्वं चेत्यादिना।

अतिव्याप्तिवारणाय सत्यन्तमिति। रूपस्पर्शान्यत्वे सतीत्यन्तमित्यर्थः। ननु जलीयशुक्लरूपपार्थिवशुक्लरूपयोर्वैजात्यं प्रत्यक्षत एव सिद्धयति। न च स्फटिकादिशौक्ल्यसदृशस्यैव जलीयशौक्ल्यस्याऽनुभवेन न तादृशवैजात्यसिद्धिसम्भव इति वाच्यम्। तत्र स्फटिकादौ अस्वच्छशौक्ल्यस्य जलादौ च स्वच्छशौक्ल्यस्याऽऽनुभविकत्वात्। न च किसलयवर्तिनामुदबिन्दूनां स्फटिकादिसदृश्येव रूपप्रतिपत्तिरिति वाच्यम्। तत्र तैजसभागस्याऽपि प्रवेशेन तेजोरूपभानस्यैव जले उपगमात्। न च पार्थिवरूपस्य जलरूपतो विजातीयत्वे चित्रपटादौ गङ्गाप्रवाहादिरूपलेखनं कथं सम्भवेत्? तत्र शिल्पिसमर्पितानां गङ्गाप्रवाहव्यञ्जकरञ्जकद्रव्याणां पार्थिवत्वेन जलतुल्यरूपत्वासम्भवादिति वाच्यम्। एवमपि पृथिवीजन्यतावच्छेदकतया जलजन्यतावच्छेदकतया च वैजात्यद्वयस्य शुक्लरूपेऽवश्याङ्गीकरणीयत्वात्। अन्यथा शुक्लरूपत्वावच्छिन्नं प्रति जनकतावच्छेदकतया पृथिवीजलसाधारणवैजात्यकल्पनप्रसक्तात्। न च नैमित्तिकद्रवत्वजनकतावच्छेदकतया तुल्ययुक्तया पृथिवीतेजःसाधारणजातिसिद्धौ तया सह साङ्कर्यभयादेव न तत्सिद्धिरिति वाच्यम्। द्रवत्वत्वावच्छिन्नं प्रति जनकतावच्छेदकतयाऽवश्यकल्प्यपृथिवीजलतेजोऽनुगतजात्यैवोपपत्तौ नैमित्तिकद्रवत्वादिकं प्रति कारणतायाः अप्रामाणिकतयाऽकल्पनात्। न च नैमित्तिकद्रवत्वत्वावच्छिन्नस्य जले उत्पादवारणाय तथा कारणत्वमपि कल्प्यमेवेति वाच्यम्। अग्निसंयोगाभावेनैव तत्र तदापत्तिवारणसम्भवात्—

इति चेन्न। जलीयपार्थिवरूपयोर्वैजात्यानुमापकनिरुक्तकार्यकारणभावस्यैवाऽप्रामाणिकत्वात्। न च तर्हि अभास्वरशुक्लरूपत्वावच्छिन्नजनकतावच्छेदकतया पृथिवीजलसाधारणवैजात्यकल्पनापत्तिरिति वाच्यम्। तत्कारणीभूतस्य अभास्वरशुक्लरूपस्य स्वसमवायिसमवेतत्वसम्बन्धेन तेज आदौ घटादौ च विरहेणैव तादृशरूपोत्पादवारणसम्भवेनैतादृशकार्यकारणभावस्यैवाऽकल्पनीयत्वात्। अन्यथा तादृशजातेः

रामरुद्री ।

पृथिवीत्वेन सह साङ्कर्यवारणाय सकलपृथिव्यनुगतत्वस्याऽऽवश्यकत्वे घटादौ तादृशरूपोत्पादापत्तेः । तथा च जलीयपार्थिवरूपयोर्वैजात्यासिद्धया तोयबिन्दुषु स्फटिकसादृश्यस्य चित्रपटवर्तिरजकद्रव्येषु गङ्गाप्रवाहसादृश्यस्याप्यनुभवेन च न जलीयपार्थिवरूपयोरतिव्याप्तिवारणं कथञ्चिदपि सुशकमिति ध्येयम् । एवैव रीतिरुष्णाशीतस्पर्शेऽपि पार्थिवायवीयभेदेन वैजात्यानुपगमे बोध्या ।

वस्तुवृत्तेन पार्थिवजलीयरूपयोर्वैजात्यं मानाभावेनाप्रामाणिकमेव । स्फटिकादिसदृशो जलरूपे वैलक्षण्यस्याऽऽसन्तर्निर्मलत्वरूपत्वाऽऽपलपितुमशक्यत्वात् । तोयबिन्दुषु स्फटिकसाम्यप्रतीतिस्तु भ्रमिमात्रकतोज्जीवनपवशादेव । चित्रपटे उपरञ्जकद्रव्येषु जलसादृश्यप्रतीतिरपि भ्रान्तिरेव, तत्र तत्तद्द्रव्योत्कर्षापकर्षविशिष्टविशिष्टसंस्थानस्य रञ्जकद्रव्यनिष्ठस्य दोषत्वात् । कथमन्यथा गर्तादिप्रदर्शनाय तत्र समर्पितेषु नीलद्रव्येषु गर्तत्वप्रतीतिर्वास्तवशुक्ले गर्तादौ च नीलत्वबुद्धिः ? एवमेव वायवीयपार्थिवरूपस्पर्शयोरपि 'वायुर्वाति' इति प्रतीत्या कठिनत्वमृदुत्वादिप्रतीत्या च वैजात्यसिद्धिरिति व्यर्थमेव रूपस्पर्शाभ्यत्वदलम् । न हि वायौ मृदुत्वकठिनत्वादिप्रतीतिरनुभवसिद्धेति मन्तव्यम् ।

अथाऽत्र तिक्तत्वाम्लत्वादेः पृथिवीत्वादिव्याप्यतावच्छेदकत्वेऽपि जलवृत्तिमाधुर्यपार्थिवमाधुर्ययोर्वैजात्ये मानाभावेन मधुररसस्य द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकजातिमत्त्वविरहादतिव्याप्तिः । न च जलजन्यतावच्छेदकतया पृथिवीजन्यतावच्छेदकतया च तादृशवैजात्यसिद्धिः सम्भवतीति वाच्यम् । मधुररसजनकतायाः स्वसमवायिसमवेतत्वसम्बन्धावच्छिन्नाया मधुररसे स्वीकरणेनैवोपपत्तेः । अन्यथा पृथिव्यादिजन्यतावच्छेदकतया शुक्लरूपेऽपि वैजात्यद्वयसिद्धिप्रसङ्गात् । न च विजातीयमधुरसाक्षात्कारत्वावच्छिन्नं प्रति हरीतक्यादिभक्षणस्य हेतुत्वेन जलीयरसे वैजात्यसिद्धिरिति वाच्यम् । हरीतक्यीभक्षणस्य जलरसाभिव्यञ्जकतायाः पूर्वमेव निरस्तत्वात्, एवमपि पार्थिवमधुररसे वैजात्यासिद्धया तत्राऽतिव्याप्तिर्वारणायोगाच्चेति चेत्,

अत्र केचित् । पार्थिवमाधुर्यजलमाधुर्ययोर्वैजात्यस्य प्रत्यक्षसिद्धत्वेन तत्र नाऽतिव्याप्तिरित्याहुः ।

तन्न । प्रत्यक्षेण महज्जलरसे वैजात्यसिद्धिसम्भवेऽपि जलपरमाणुरसे तादृशवैजात्यसिद्धयसम्भवेन तत्राऽतिव्याप्तेर्दुर्वारत्वात् ।

वस्तुतस्तु मधुरत्वव्याप्या अनेका जातयः प्रत्यक्षेणैवोपलभ्यन्ते, न हि यादृशं माधुर्यं शर्करायामनुभूयते, तदेव द्राक्षादावपि । तथा च जलवृत्तिमाधुर्यवैजात्यस्य सिद्धौ तादृशवैजात्यस्य जलजन्यतावच्छेदकतया जन्यजलमात्रवृत्तिरससाधारण्ये सिद्धे स्वसमवायिसमवेतत्वसम्बन्धेन तद्रससजातीयरसत्वेन तज्जनकतया परमाणुरसेऽपि सिद्ध्या जलत्वव्याप्यतावच्छेदकतादृशवैजात्यमादाय जलीयमधुररसेऽतिव्याप्तिर्वारणीया । न च स्वसमवायिसमवेतत्वसम्बन्धेन तादृशरसस्य कारणत्वेनैवोपपत्तौ जलस्य तत्र समवायिकारणत्वे मानाभाव इति वाच्यम् । विनिगमनाविरहेण कारणतात्रयस्याऽपि स्वीकरणीयत्वात्, जलस्य तत्र समवायिकारणत्वविरहेऽपि स्वसमवायिसमवेतत्वसम्बन्धेन विलक्षणरसजन्यतावच्छेदकतया जलीयरससमान्यसाधारण्यवैजात्यसिद्धिसम्भवेनैवाऽस्मन्मतसिद्धौ तादृशकार्यकारणभावासिद्धौ चात्यभावाच्च । न च तथाऽपि पार्थिवमधुररसेऽतिव्याप्तिस्तदवस्थैवेति वाच्यम् । तत्राऽपि शर्करादिमधुररसवृत्तिविलक्षणतत्तद्वैजात्यमादायैवाऽतिव्याप्तिवारणात् । अत एव 'घृतक्षीरद्राक्षामधुमधुरिमा कैरपि पदैः' इत्यादिप्राचीनमपि साधु सङ्गच्छत इति विभावनीयम् ।

अथैवमपि स्थितिस्थापकस्य पृथिवीमात्रवर्तित्वात् तत्राऽतिव्याप्तिस्तदवस्थैवेति चेन्न । तस्य चतुष्टयवृत्तिजातीयकर्तृमन्नाभिप्रायेणैवैतल्लक्षणकरणात् ।

यत्तु एवमेव च गुरुत्वादावप्यव्याप्तिर्वारणीया । अन्यथा जलगुरुत्वस्य पार्थिवगुरुत्वविजातीयतया तादृशवैजात्यमादायैवाऽतिव्याप्त्यापत्तेः । न च तयोर्गुरुत्ववैलक्षण्ये किं मानमिति वाच्यम् । तैलादेर्लघुत्वेन जलेऽवर्तमानत्वम्, पाषाणादीनां च गुरुत्वेन जलावगाहनस्यैवाऽत्र प्रमाणत्वात् । न च तथाऽपि कथमव्याप्तिवारणसम्भव इति वाच्यम् । जलगुरुत्वस्य काठिन्यविशेषगुरुत्वादिसजातीयत्वेन गुरुत्वस्य द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकवैजात्यानादिति ।

विष्णकरी।

न्तम्। शब्दविशेषजनकतावच्छेदकजात्यवच्छिन्नकठिनावयवद्रव्यविभागे, तेजोवेगातिशये, अत्यन्ताग्निसंयोगनाश्यतावच्छेदकवैजात्यावच्छिन्नघृतादिवृत्तिद्रवत्वे चाऽव्याप्तिवारणायाऽवृत्त्यन्तं जातिविशेषणम्। कर्मादौ तद्वारणाय विशेष्यम्। पृथिवीत्वादिव्याप्यतावच्छे-

रामरुद्री।

तन्मन्दम्। पाषाणगुरुत्वादवव्याप्तेः स्थिरत्वात्, तस्य जलादाक्सम्भवादतो जलीयपार्थिवगुरुत्वयोर्वैजात्याभावस्यैव स्वीकरणीत्वात्। विस्तरस्तु गुरुत्वनिरूपणे वक्ष्यते।

कठिनावयवद्रव्यविभाग इति। तादृशसंयोग इत्यपि मन्तव्यम्। तेन अवृत्त्यन्तघटकस्य संयोगावृत्तित्वस्य कण्ठतः प्रयोजनाप्रदर्शनेऽपि न क्षतिः। ननु कीदृशसंयोगेऽव्याप्तिवारणाय संयोगावृत्तित्वं प्रवेशनीयम्? शब्दजनकतावच्छेदकवैजात्यस्य चतुष्टयसंयोगसाधारणतया द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकत्वविरहात्, आत्मवृत्तिगुणत्वावच्छिन्नजनकतावच्छेदकमनःसंयोगवृत्तिवैजात्यविशिष्टस्य आत्ममनउभयवृत्तित्वेन द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकत्वविरहेण तमादायाऽप्यतिव्याप्त्यसम्भवात्। पाकजनकसंयोगस्यापि पृथिवीतेजउभयवृत्तित्वेन तत्राऽप्यव्याप्त्यसम्भवादिति चेत्,

अत्र, कैश्चित्, वर्णजनकतावच्छेदकवैजात्यमादायाऽव्याप्तिरिष्टेत्याहुः।

तत्तुच्छम्। कण्ठवाद्यवाभिघातस्यैव ककारादिजनकतया तद्वृत्तिवैजात्यस्य द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकत्वविरहेणैव तत्राऽव्याप्तिवारणसम्भवात्। न च वकारजनकत्वं लाघवात्वाऽभिघातजन्यदन्तौष्ठसंयोग एव स्वीकरणीयमिति वकारादिस्थानद्वयोद्भववर्णजनकतावच्छेदकवैजात्यावच्छिन्नसंयोगेऽव्याप्तिः सम्भवत्येव, तादृशवैजात्यस्य पृथिवीत्वरूपद्रव्यविभाजकोपाधिव्याप्यतावच्छेदकत्वादिति वाच्यम्। आत्मप्रयत्नजन्यदन्तौष्ठसंयोगावच्छिन्नवायुसंयोगादेव शब्दोत्पादस्याऽऽनुभविकतया वायुसंयोग एव शब्दजनकतावच्छेदकवैजात्यसिद्धेः। अन्यथा केवलदन्तौष्ठसंयोगसत्त्वेऽपि शब्दोत्पादापत्तेरिति।

अत्र ब्रूमः। पार्थिवसंयोगमात्रवृत्तिनिखिलस्वजातिमादाय तत्राऽव्याप्तिवारणायैव संयोगावृत्तित्वदलसार्थक्यात्।

यत्तु घटारम्भकतावच्छेदकवैजात्यावच्छिन्नकपालद्वयसंयोगादावव्याप्तिवारणाय तदिति। तन्मन्दम्। घटारम्भकतावच्छेदकवैजात्यस्य सौवर्णमृण्मयकपालसंयोगसाधारणतया द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकत्वाभावात्।

घटारम्भकतावच्छेदकसंयोगनिष्ठवैजात्यमादायाऽव्याप्तिवारणायाऽपि तन्निवेशः सम्भवति। घटत्वस्याऽपि पृथिवीत्वतेजस्त्वादिना साङ्कर्यभयेन नानात्वस्यैवाऽङ्गीकरणीयत्वात्, उपष्टम्भकपार्थिवभाग एव सौवर्णघटत्वस्याऽपि स्वीकरणीयत्वेन घटत्वभेदस्याऽनङ्गीकरणीयत्वाच्च, मृत्तिकात्वपाषाणत्वादिना साङ्कर्यान्मृण्मयपाषाणमययोरभिन्नमेव घटत्वमङ्गीकार्यमित्यन्यदेतदिति तु सम्प्रदायः।

कपालद्वयसंयोग एव घट इति नव्यमते तु तादृशघटत्वजातिमादायैवाऽव्याप्तिर्बोद्धव्या।

तेजोवेगातिशय इति। विलक्षणतेजोवेग इत्यर्थः। ननु कथमस्य द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकत्वमिति चेन्न। तेजोलाघवातिशयस्याऽत्र क्षुत्राऽप्यनुभवेन तद्वैजात्यस्य द्रव्यविभाजकोपाधिव्याप्यतावच्छेदकत्वस्याऽक्षतत्वात्। वस्तुतस्तु गरुत्वादीनां प्रकृष्टबलशालिनां तादृशो वेगातिशयः श्रूयत इति तस्या जातेः प्रकृष्टबलप्रयोज्यतया द्रव्यविभाजकोपाधिद्वयवद्वृत्तित्वेन न तथात्वमित्यवधेयम्।

अत्यन्ताग्निसंयोगनाश्यतावच्छेदकेत्यादि। तस्य पृथिवीत्वव्याप्यत्वादिति भावः। इदमपि तत्तदुष्णस्पर्शवदग्निसंयोगाव्यवहितोत्तरनाश्यत्वावच्छिन्न प्रति तस्य हेतुत्वोपगमे तादृशजातिर्नैव निवेश्यतीति यथाश्रुताभिप्रायकमित्यवधेयम्।

अवृत्त्यन्तमिति। संयोगविभागयोगद्रवत्वावृत्तीत्यन्तमित्यर्थः। **तद्वारणायेति।** अतिव्याप्तिवारणायेत्यर्थः। **विशेष्यमिति।** गुणत्वमित्यर्थः। **असत्कल्पत्वादिति।** सर्वेषामेव स्वसमानाधिक-

एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः ।
बाह्यैकैकेन्द्रियग्राह्याः गुरुत्वादृष्टभावनाः ॥ ९३ ॥

द्वीन्द्रियेति । **चक्षुषा त्वचापि ग्रहणयोग्यत्वात् ॥**

इति द्वीन्द्रियग्राह्यगुणनिरूपणम् ।

बाह्येति । **रूपादीनां चक्षुरादिग्राह्यत्वात् ॥ ९३ ॥**

इति एकैकेन्द्रियग्राह्यगुणनिरूपणम् ।

दिनकरी ।

दकतत्तत्सङ्ख्यात्वादिशून्यत्वस्य तत्तत्सङ्ख्यायामभावादव्याप्तिवारणाय जातिपदम् । द्रव्यविभाजकतावच्छेदकरूपोपाधेश्च व्यापकत्वं तत्तद्व्यक्तित्वेन विवक्षितं, न तु तादृशोपाधित्वेन, अन्यथा सङ्ख्यात्वादेरपि तादृशजातित्वादसम्भवापत्तेरिति ।

इति सामान्यगुणकथनम् ॥

'सङ्ख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च'इत्यत्र मूले 'स्नेह'पदं वेगस्याऽप्युपलक्षकम् । स्थितिस्थापकस्य त्वतीन्द्रियत्वं वक्ष्यते । ननु द्वीन्द्रियग्राह्यत्वं रूपादावतिव्याप्तं, तेषां मनसाऽपि ग्रहणात् , बाह्येन्द्रियद्वयग्राह्यत्वमपि तत्रैवाऽतिव्याप्तम् , रूपादीनां चक्षुर्द्वयादिना ग्रहणात् , अतीन्द्रियसङ्ख्यादावव्याप्तं च, तत्रेन्द्रियग्राह्यत्वस्यैवाऽभावादत आह । **चक्षुषा त्वचाऽपीति** । चक्षुस्त्वगुभयग्रहणयोग्यत्वं तदर्थः । चक्षुस्त्वगुभयग्राह्यभावनावृत्त्यन्यधर्मसमवायिगुणत्वमिति तु निष्कर्षः । संस्कारत्वादिकमादाय भावनायामतिव्याप्तिवारणाय भावनावृत्त्यन्येति । कर्मादौ तद्वारणाय गुणत्वस्य निवेशः ।

इति द्वीन्द्रियग्राह्यगुणकथनम् ॥

ननु बाह्यैकैकेन्द्रियग्राह्यत्वं सङ्ख्यादावतिव्याप्तं, तेषामुभयग्राह्यत्वेऽप्येकग्राह्यत्वानपायात् , अव्याप्तं चाऽतीन्द्रियरूपादौ, तेषामिन्द्रियग्राह्यत्वस्यैवाऽभावादत आह । **रूपादीनामिति । चक्षुरादीति** । चक्षुरादिनैवेत्यर्थः । तथा चैकैकमात्रग्राह्यत्वस्य विवक्षितत्वात् सङ्ख्यादौ नाऽतिव्याप्तिः । **ग्राह्यत्वात्**-ग्रहणयोग्यत्वात् । तेन नाऽतीन्द्रियरूपादावव्याप्तिः । तथा च चक्षुस्त्वगुभयाग्राह्यबहिरिन्द्रियग्राह्यगुणसमवेतजातिमत्त्वमेतेषां लक्षणमिति भावः । न च **अणुरेणुपरिमाणनिष्ठापकर्षस्य** चक्षुरिन्द्रियेणैव ग्रहणात् तत्राऽतिव्याप्तिरिति वाच्यम् । परिमाणान्यत्वेनाऽपि गुणस्य विशेषणीयत्वात् । ॥

इति बाह्यैकैकेन्द्रियग्राह्यगुणकथनम् ॥

मूले-'गुरुत्वादृष्टभावनाः' इत्यत्र 'भावना' पदं वेगभिन्नसंस्कारपरम् , तेन स्थितिस्थापकस्याऽपि सङ्ग्रहः । न चाऽतीन्द्रियत्वं-इन्द्रियजन्यप्रत्यक्षाविषयत्वं यदि, तदा

रामरुद्री ।

रणात्यन्ताभावप्रतियोगितानवच्छेदकद्रव्यविभाजकोपाधित्वकत्वादिति भावः । अत्र द्रव्यविभाजकोपाधिमदन्यवृत्तितानवच्छेदकत्वस्यैव तद्व्याप्यतावच्छेदकत्वपदार्थत्वेन तदृशोपाधिनिष्ठावच्छेदकतायां निरवच्छिन्नत्वनिवेशादपि निरुक्तासम्भवव्युदासः सम्भवतीत्यवधेयम् ।

॥ इति सामान्यगुणकथनम् ॥

ननु इन्द्रियद्वयजन्यप्रत्यक्षाविषयत्वमेव तद्वक्तव्यमतो नैष दोष इत्यत आह । **अव्याप्तं चेति** ।

॥ इति बाह्यैकैकेन्द्रियग्राह्यगुणकथनम् ॥

विभूनां तु ये स्युर्वैशेषिका गुणाः ।
अकारणगुणोत्पन्ना एते तु परिकीर्तिताः ॥ ९४ ॥

विभूनामिति । बुद्धि सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्माधर्म-भावना-शब्दा इत्यर्थः । कारणगुणेन कार्ये ये गुणा उत्पाद्यन्ते ते कारणगुणपूर्वका रूपादयो वक्ष्यन्ते, बुद्ध्यादयस्तु न तादृशाः, आत्मादेः कारणाभावात् ॥८६॥९०॥ ९१॥९२॥९३॥९४॥ इत्यकारणगुणोत्पन्नगुणकथनम् ॥

दिनकरी ।

गुरुत्वादावसम्भवः, तेषामलौकिकप्रत्यक्षविषयत्वात्, लौकिकप्रत्यक्षाविषयत्वविवक्षणे चाऽतीन्द्रियरूपादावतिव्याप्तिरिति वाच्यम् । लौकिकसाक्षात्कारविषयगुणत्वन्यूनवृत्तिसंस्कारत्वान्यधर्मसमवाय्यन्यगुणत्वस्य विवक्षितत्वात् । सत्तादिकमादायाऽसम्भववारणाय गुणत्वन्यूनवृत्तीति । जात्यादावतिव्याप्तिवारणाय गुणपदम् ॥ इत्यतीन्द्रियगुणकथनम् ॥

मूले—'अकारणगुणोत्पन्नाः' इत्यत्र न कारणमकारणं,तस्य गुणा इतिभ्रमनिराकरणायाऽऽह मुक्तावल्याम्–**कारणगुणेनेति** । समवायिकारणसमवेतगुणेनेत्यर्थः । अत्र कारणत्वमविवक्षितं, समवायित्वमात्रं बोध्यम् । **न तादृशा इति** । तथा च कारणगुणैरुत्पन्नाः कारणगुणोत्पन्नाः, न कारणगुणोत्पन्ना अकारणगुणोत्पन्ना इति विग्रहेण स्वाश्रयसमवायिसमवेतगुणजन्यत्वं कारणगुणोत्पन्नत्वं, तादृशगुणाजन्यत्वमकारणगुणपूर्वकत्वमिति भावः । यद्यपीदं नित्यरूपे जन्येऽपि च पाकजादौ अवयवावयविनोर्द्वित्वद्विपृथक्त्वातिरिक्तद्वित्वद्विपृथक्त्वादौ कर्मजन्यसंयोगविभागेषु पाकजद्रवत्वे चाऽतिव्याप्तं, तथाऽप्यकारणगुणोत्पन्नमात्रवृत्तिगुणत्वसाक्षाद्द्रव्याप्यजातिमत्त्वं विवक्षितमित्यदोषः। अकारणगुणोत्पन्नमात्रवृत्तित्वं च निरुक्तकारणगुणोत्पन्नावृत्तित्वम् । रूपनिष्ठपाकजन्यतावच्छेदकवैजात्यं, संयोगविभागवेगनिष्ठकर्मजन्यतावच्छेदकवैजात्यं, अणुपरिमाणनिष्ठवैजात्यं, परममहत्त्वत्वं चाऽऽदायाऽतिव्याप्तिवारणाय गुणत्वसाक्षाद्द्रव्याप्येति। संस्कारत्वान्यगुणत्वव्याप्याव्याप्यत्वे सति गुणत्वव्याप्यत्वं तदर्थः। अन्यथा भावनात्वस्य गुणत्वसाक्षाद्द्रव्याप्यत्वाभावाद्भावनायामव्याप्तिप्रसङ्गात् । इत्थमपि परत्वापरत्वयोरतिव्याप्तिरवशिष्यते, साऽपि परत्वापरत्ववृत्तित्वेन जातेर्विशेषणीयत्वान्निरसनीयेति ध्येयम् ॥ ८६ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥९४ ॥

॥ इत्यकारणगुणोत्पन्नगुणकथनम् ॥

रामरुद्री ।

लौकिकप्रत्यक्षाविषयत्वविवक्षणे चेति । प्रत्यक्षीयलौकिकविषयत्वाभावविवक्षणे चेत्यर्थः । वस्तुतस्तु विषयतासम्बन्धावच्छिन्नप्रत्यक्षत्वावच्छिन्नप्रतिबद्धयतानिरूपितादात्म्यसम्बन्धावच्छिन्नप्रतिबन्धकतावद्गुणत्वमेवैतेषां साधर्म्यमिति ध्येयम् । इत्यतीन्द्रियगुणकथनम् ॥

'विभूनां तु–' इत्यादि मूलम् । अथाऽत्र नित्यगुणा रूपादयः कथमकारणगुणोत्पन्नमध्ये न परिगणिताः ? न चाऽकारणगुणोत्पन्नत्वे सति जन्यगुणत्वमेवाऽत्र विवक्षितमिति वाच्यम् । तथा सति नित्यज्ञानादावव्याप्त्यापत्तेरिति चेन्न । स्वसमवेतगुणविभाजकजात्यवच्छेदेन कारणगुणपूर्वकत्वाभावस्य विवक्षितत्वात् । तदेव स्पष्टयति टीकायाम्–**तथाऽपीत्यादिना । रूपनिष्ठपाकजन्यतावच्छेदकवैजात्यमिति** । ननु तत्तद्विलक्षणोष्णस्पर्शवदग्निसंयोगाव्यवहितोत्तरनाशत्वावच्छिन्न प्रति तत्तदग्निसंयोगस्य हेतुतया निरुक्तवैजात्ये मानाभाव इत्यत आह । संयोगविभागवेगनिष्ठकर्मजन्यतावच्छेदकवैजात्यमिति ।

अपाकजास्तु स्पर्शान्ता द्रवत्वं च तथाविधम् ।
स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम् ॥ ९५ ॥
स्थितिस्थापक इत्येते स्युः कारणगुणोद्भवाः ।

अपाकजास्त्विति । पाकजरूपादीनां कारणगुणपूर्वकत्वाभावादपाकजा इत्युक्तम् । तथाविधं-अपाकजम् । तथैकत्वमपि बोध्यम् । स्पष्टम् (१) ।

॥ इति कारणगुणोत्पन्नगुणकथनम् ॥

दिनकरी ।

मूले—**स्युः कारणगुणोद्भवा इति** । कारणगुणोत्पन्नत्वं च न पूर्वोक्तं स्वाश्रयसमवायिसमवेतगुणजन्यत्वं, हस्तपुस्तकसंयोगविभागादिजन्यकायपुस्तकसंयोगविभागादावतिव्याप्तेः । न च स्वाश्रयसमवायिमात्रसमवेतगुणजन्यत्वं तत्, हस्तपुस्तकसंयोगादिश्च न स्वाश्रयसमवायिमात्रसमवेत इति वाच्यम् । तथाऽप्यवयवावयविनोरेकत्वाभ्यां जनितेऽवयवावयविद्वित्वादावतिव्याप्तेः, तथाऽपि स्वाश्रयसमवायिमात्रसमवेतस्वसजातीयगुण-

रामरुद्री ।

'संयोग' इति सम्पातायातम्, तेन अभिघातत्वादिना साङ्कर्यभयेन तादृशवैजात्यासिद्धावपि न क्षतिः । यद्वा कर्मजन्यतावच्छेदकेत्यनेनाऽभिघातत्वादिकमेव प्रदर्शितम्, तस्य विलक्षणकर्मजन्यतावच्छेदकत्वादित्यवधेयम् । वस्तुतस्तु कारणगुणोत्पन्नवृत्तिभावनाऽवृत्तिजातिशून्यगुणत्वमेव सम्यगिति वयं प्रतीमः ॥ ८९ ॥ ९० ॥ ९१ ॥ ९२ ॥ ९३ ॥ ९४ ॥

॥ इत्यकारणगुणोत्पन्नगुणकथनम् ॥

मूले—अपाकजास्त्वित्यादि । पाकमनपेक्ष्य जाता इत्यर्थः । अपाके सति जायन्त इति विग्रहात् । **'सप्तम्यां जनेर्डः (३ । २ । ९७)'** इति डप्रत्ययविधानात् । इदं च सर्वत्रैव गुणेष्वन्वितम् । तथा च स्पर्शान्तेषु द्रवत्वे च विशेषणतया स्नेहादिषु चोपलक्षणविधयैव जन्मनि पाकाभावकालावच्छिन्नत्वस्य निवेशो बोध्यः । तेन नित्यगुणेषु कारणगुणपूर्वकत्वविरहेऽपि न क्षतिः । वस्तुतस्तु नित्यगुणानां लक्ष्यत्वेऽपि न क्षतिः, लक्षणस्य टीकाकृता वक्ष्यमाणस्य तत्राऽपि सम्भवादित्यवधेयम् ।

स्वसमवायिसमवेतत्वसम्बन्धावच्छिन्नगुणनिष्ठकारणतानिरूपितकार्यतावत्त्वे सति समवायसम्बन्धावच्छिन्नगुणनिष्ठजनकतानिरूपितजन्यताशून्यत्वस्य निवेशे तु हस्तपुस्तकसंयोगविभागादिजन्यकायपुस्तकसंयोगविभागादौ न वक्ष्यमाणातिव्याप्तिः, संयोगादेः स्वसमवायिसमवेतत्वसम्बन्धेन कायपुस्तकसंयोगादौ कारणत्ववत् समवायेनाऽपि कारणत्वादित्यवधेयम् । गुणत्वसाधनग्रन्थे पूर्वमुक्तां अपेक्षाबुद्धिपाकक्रियैतत्त्रितयाजन्यविभक्तवृत्तिगुणत्वावच्छिन्नां जन्यतामादायाऽतिव्याप्तिवारणाय गुणत्वव्याप्यजात्यवच्छिन्नत्वं जनकतायां जन्यतायां च निवेशनीयमिति न दोषः । रूपादीनां च रूपादिषु असमवायिकारणतया तादृशजन्यतामादाय तत्र लक्षणसमन्वयः । मूलस्थं वेगपदं तु कर्मजन्यसंस्कारपरम् । तेन कर्मजन्यवेगे नाव्याप्तिरिति सिद्धान्तानुसारी पन्थाः ।

इदानीमेतादृश्या व्याख्यायाः सम्भवेऽपि मूलस्वरससिद्धेषु नित्यरूपादिगुणेषु लक्ष्यत्वाभिमतेषु निरुक्तलक्षणस्याऽगतत्वमालोच्य स्वयं भङ्ग्यन्तरेण परिष्कारमारचयितुमाह टीकायाम्-कारणगुणोत्पन्नत्वं चेत्यादि । पूर्वोक्तमिति । अकारणगुणोत्पन्नत्वसाधर्म्यव्याख्यानावसरोक्तमित्यर्थः । दित्वादावतिव्याप्तेरिति । न च स्वाश्रयसमवाय्यसमवेतगुणाजन्यत्वे सति स्वाश्रयसमवायिमात्रसमवेतगुणजन्यत्वमेव विवक्षि-

---

(१) 'स्पष्टम्' इति क्वचिन्नास्ति ।

दिनकरी ।

जन्यत्वं तत्, अवयवैकत्वादेरवयवावयविद्वित्वसजातीयत्वाभावेन तत्राऽतिव्याप्त्यभावात् । न च सङ्ख्यात्वेन तयोः साजात्यमस्तीति तद्दोषतादवस्थ्यम्,गुणत्वव्याप्यव्याप्यजात्या साजात्यस्य विवक्षितत्वात्, अवयवावयविरूपादीना नीलत्वादिना साजात्यरूपत्वान्नाऽसम्भवः ।

रामरुद्री ।

तम्, अवयवावयविनिष्ठद्वित्वस्य तु स्वाश्रयसमवाय्यसमवेतावयव्येकत्वारब्धत्वादेव च नाऽतिव्याप्तिरिति वाच्यम् । सर्वेषामेव गुणानां स्वाश्रयसमवाय्यसमवेतेश्वरेच्छादिजनितत्वेनाऽसम्भवापत्तेः । न च स्वाश्रयसमवाय्यसमवेतस्वसमानाधिकरणगुणाजन्यत्वे सति स्वाश्रयसमवायिमात्रसमवेतगुणजन्यत्वं विवक्षितम्, ईश्वरेच्छादेश्च स्वसामानाधिकरण्यविरहादेव न सङ्ग्रह इति वाच्यम । रूपादीनामपि स्वाश्रयसमवाय्यसमवेतो यः स्वसमानाधिकरणः स्वात्मक एव गुणस्तन्निष्ठरूपत्वावच्छिन्नजनकतानिरूपितजन्यतावत्त्वेनाऽसम्भवापत्तेः । न च स्वभिन्नत्वमपि निवेशनीयमिति नैष दोष इति वाच्यम् । तथाऽपि वेगे स्वसमानाधिकरणस्वभिन्नकालान्तरीणवेगव्यक्तिमादायाऽव्याप्तिसम्भवात् । न च स्वाश्रयसमवायिसमवेतावृत्तिस्वसमानाधिकरणवृत्तिजनकतानिरूपितजन्यताशून्यत्वमेव विवक्षणीयम्, रूपत्वावच्छिन्नायाश्च स्वसमानाधिकरणवृत्तेर्जनकतायाः स्वाश्रयसमवायिसमवेतावृत्तित्वविरहादेव नाऽसम्भव इति वाच्यम् । तथा सत्यवयवावयविद्वित्व एवाऽतिव्याप्त्यापत्तेः । तत्र द्वित्वत्वावच्छिन्नं प्रति एकत्वस्य कारणतया एकत्वनिष्ठजनकताया अवयवैकत्वसाधारणतया तस्याः स्वाश्रयसमवायिसमवेतावृत्तित्वविरहात् लक्षणघटकतया तन्निरूपितजन्यतायास्तादृशद्वित्वे सत्त्वेऽपि क्षत्यभावात् । न च तत्तद्व्यक्तित्वावच्छिन्नजनकतामादायैव नाऽतिव्याप्तिरिति वाच्यम् । तद्द्वित्वव्यक्तिं प्रति तद्द्रव्यव्यक्तेः कारणत्वेनैवोपपत्तौ एकत्वद्वयस्य हेतुतासम्पादनाय गुरुतरकार्यकारणभावद्वयाकल्पनात् । न चाऽव्यवहितोत्तरत्वसम्बन्धेन स्वाश्रयसमवाय्यसमवेतगुणशून्यत्वमेव विवक्षितमिति वाच्यम् । वेगादेस्तादृशस्य पूर्वोत्पन्नरूपाद्युत्तरोत्पत्तिसम्भवेन तत्राऽव्याप्त्यापत्तेरिति ध्येयम् । उत्तरयति–**तथाऽपीत्यादि । स्वाश्रयेत्यादि ।** स्ववृत्तिजातिमत्स्वाश्रयसमवायिमात्रसमवेतगुणजन्यत्वमित्यर्थः । **मात्रपदोपादानात्** हस्तपुस्तकसंयोगजन्यकायपुस्तकसंयोगे नाऽतिव्याप्तिः । शङ्कते– **न चेत्यादि । साजात्यमस्तीतीति ।** सङ्ख्यात्वरूपस्ववृत्तिजातिमत्त्वमन्यत्राऽस्तीत्यत इत्यर्थः । उत्तरयति-**गुणत्वव्याप्यव्याप्येत्यादि ।** गुणवृत्तिभेदप्रतियोगितावच्छेदिका या स्ववृत्तिर्जातिस्तत्समानाधिकरणभेदप्रतियोगितावच्छेदिका या स्ववृत्तिर्जातिस्तयेत्यर्थः । अथाऽत्र स्नेहेऽव्याप्तिः, तत्र गुणत्वव्याप्यव्याप्यजात्यप्रसिद्धेः । न च स्नेहोत्कर्षापकर्षरूपवैजात्यमादायैव तत्र लक्षणसमन्वयः सम्भवतीति वाच्यम् । एवमपि गुरुत्वेऽव्याप्तेरवारणात्, तत्र तादृशजात्यप्रसिद्धेः । न च तत्राऽपि गुरुत्वनिष्ठोत्कर्षापकर्षरूपे एव तादृशजाती प्रसिद्धे इति वाच्यम् । तथाऽपि द्वित्वादावतिव्याप्त्यापत्तेः, तेषां स्वसजातीयं यत्स्वाश्रयसमवायिसमवेतं द्वित्वान्तरं, तन्निष्ठसङ्ख्यात्वावच्छिन्नजनकतानिरूपितजन्यतावत्त्वात् । न च सङ्ख्यात्वावच्छिन्नं प्रति सङ्ख्यात्वेन सामान्यकार्यकारणभावानभ्युपगमान्नैष दोष इति वाच्यम् । तथाऽपि गुरुत्वस्य स्वोत्कृष्टगुरुत्वजनकत्वनियमेन कस्याऽपि गुरुत्वस्य स्वसजातीयगुरुत्वजन्यत्वविरहात् । न च गुरुत्वत्वावच्छिन्नं प्रति गुरुत्वमात्रस्याऽपि कारणतया स्वसजातीयवृत्तिगुरुत्वत्वावच्छिन्नजनकतामादाय लक्षणसमन्वयः करणीय इति वाच्यम् । तर्हि स्वसजातीयगुरुत्वस्य स्वाश्रयसमवायिसमवेतत्वासम्भवेन पुनस्तद्दोषतादवस्थ्यात् । ननु मृण्मयघटादौ पक्वे सति गुरुत्वन्यूनीभावदर्शनात् गुरुत्वस्याऽपि पाकजन्यतास्युपगमावश्यकतया तादृशघटमादाय लक्षणसमन्वयः सम्भवति, स्वपदेन पाकजनितन्यूनगुरुत्वस्य ग्रहणे तत्सजातीयं यत्तदाश्रयसमवायिमात्रसमवेतं प्राक्तन घटारम्भकखण्डद्रव्यनिष्ठं गुरुत्वं तन्निष्ठगुरुत्वत्वावच्छिन्नजनकतानिरूपितजन्यतायास्तत्र सत्त्वात् । न च तत्र लक्षणसम्भवेऽपि प्राक्तनगुरुत्वे कथं लक्षणसम्भवः? तस्य स्वसजातीयस्वाश्रयसमवायिमात्रसमवेतगुरुत्वाप्रसिद्धेरिति वाच्यम् । अग्रे जातिघटितस्यैव लक्षणस्य करणीयत्वेनोत्तरगुरुत्वस्य कारणगुणोत्पन्नत्वसिद्धौ तद्वृत्तिजातिमादायैव प्राक्तनगुरुत्वे लक्षणसम्भवात् । न च गुरुत्वस्य पाकजन्यत्वेऽपसिद्धान्तः, लीलावतीकुक्षिः भस्मनि गुरुत्वा-

दिनकरी।

ननु तथाऽपि नित्यरूपे, सङ्ख्याप्रचयजन्यपरिमाणे, कर्मजवेगे चाऽव्याप्तिरिति चेन्न। स्वाश्रयसमवायिमात्रसमवेतत्वसजातीयगुणजन्यवृत्तिजातिमत्त्वस्य विवक्षितत्वात्, नित्यरूपादौ तादृशरूपत्वादिकमादाय लक्षणसमन्वयात्। अत्र च सङ्ख्यात्वपृथक्त्वत्वातिरिक्तत्वेन भावनावृत्त्यन्यत्वेन च तादृशजातिर्विशेषणीया, तेन तादृशसङ्ख्यात्वं पृथक्त्वत्वं चाऽऽदाय द्वित्व-द्विपृथक्त्वादौ नाऽतिव्याप्तिः, न वाऽवयववेगजन्यावयविवेगवृत्ति सत्ता-गुणत्व-सत्कारत्वान्यादाय भावनायामतिव्याप्तिः। न चैवं जातिघटितलक्षणे तादृशरूपत्वादिजातिमादाय पाकजरूपादावतिव्याप्तिरिति वाच्यम्। तादृशजातिमत्त्वे सत्यपाकजत्वस्य विवक्षितत्वादिति

रामरुद्री।

पकर्षनिर्वाहाय गुरुत्वे पाकजन्यत्वस्य स्वीकृतत्वादिति चेन्न। गुरुत्वस्य पाकजन्यतायां ग्रन्थकारानुमतत्वात्। अन्यथा द्रवत्वे स्वातन्त्र्येण पाकजत्वोक्तिवत् गुरुत्वेऽपि तथाकथनप्रसङ्गात्। नच कथं तर्हि भस्मनि गुरुत्वन्यूनीभाव इति वाच्यम्। तत्र काष्ठनिष्ठस्निग्धजलभागापसरणेनैव गुरुत्वापकर्षस्योपगन्तव्यत्वात्। विवेचयिष्यते चेदमुपरिष्टादिति चेत्—,

अत्र ब्रूमः। सुवर्णादिषु यादृशं गुरुत्वमनुभूयते, न तादृशं तूलकादावतिपिण्डितेष्वपि क्वचिददृष्टचरं, अतो गुरुत्वानि नानाविधान्यभ्युपगन्तव्यान्येव। तादृशवैजात्यानां च विलक्षणविलक्षणतुलाकोटिनमनरूपपतनजनकतावच्छेदकतयैव सिद्धिः। कारणगुरुत्वेन च कार्ये सजातीयमेव गुरुत्वमारभ्यते, अन्यथा तोलकतोलकपरिमितकपालद्वयारब्धस्य घटस्य द्वितोलकपरिमितत्वापत्तौ तादृशद्रव्यसमूहस्य चतुस्तोलकपरिमितत्वापत्त्यातत्र तत्कार्यपतनप्रसक्तेः। न च भवन्मते त्रितोलकपरिमितत्वापत्तिस्तस्य दुर्वारैवेति वाच्यम्। सामानाधिकरण्य-स्वसमवायिसमवेतसमवेतत्वोभयस्वसमवायिसंयुक्तसमवेतत्व-स्वसमवायिसंयुक्तसंयुक्तसमवेतत्वादिसम्बन्धैस्तत्र गुरुत्वविशिष्टगुरुत्वस्यैव विलक्षणपतनजनकतया कार्यकारणगुरुत्वयोर्वैजात्याभावेऽपि पतननियमोपपत्तेः। तथा च गुरुत्वेषु गुणत्वव्याप्यव्याप्या जातिः सुवर्णगुरुत्वत्वादिकं, तादृशजातिमत्स्वाश्रयसमवायिसमवेतगुरुत्वारब्धत्वं तत्राऽव्याहतमेवेति लक्षणसमन्वय इत्यवधेयम्

वस्तुतस्तु गुरुत्वेषु वैजात्याभ्युपगमे गुरुत्वस्योत्कृष्टगुरुत्वजनकत्वमेव सम्यगिति वयमुपरिष्टाद्वक्ष्यामः। तथा चाऽस्मदीय एव कारणगुणोत्पन्नत्वपरिष्कारः सम्यक्। न च भवन्मते नित्यगुणेष्वव्याप्तिरिति वाच्यम्। **'अपाकजाः'** इत्यस्य सर्वत्राऽन्विततायाः प्रागेवाऽस्माभिरभिहितत्वात्। न च तर्हि **'द्रवत्वं च तथाविधम्'** इत्युक्तिर्भवन्मते विरुध्यत इति वाच्यम्। **'अपाकजास्तु स्पर्शान्ता द्रवत्वं च'** इति च्छेदेन द्रवत्वे 'च'कारबलेनैव, **'तथाविधम्, स्नेहवेगगुरुत्वैकपृथक्त्वपरिमाणकम्, स्थितिस्थापकः'** इतिच्छेदकरणेन चाऽन्यत्राऽव्याप्त्यपाकजताया ग्रन्थत एव लाभसम्भवादित्यवधेयम्।

नित्यरूप इति। तस्य जन्यत्वाभावे स्वाश्रयसमवायिसमवेतगुणजन्यत्वस्याऽव्याप्यभावादिति भावः। इदमुपलक्षणम्। नित्यरसादावित्यपि बोध्यम्। निरयेष्वव्याप्तिमुक्त्वा जन्येष्वपि तामाह—**सङ्ख्याप्रचयेत्यादिना**। सङ्ख्याप्रचयमात्रजन्यपरिमाण इति तदर्थः। तेन सङ्ख्यापरिमाणप्रचयेतरत्रितयजन्यपरिमाणव्युदासः। उत्तरयति—**स्वाश्रयेत्यादि। जातिमत्त्वस्येति**। इदं तु बोध्यम्। विषयतया स्वाचप्रत्यक्षत्वावच्छिन्नं प्रति तादात्म्येन प्रतिबन्धकतावच्छेदकतया रूपरसगन्धशब्देषु वैजात्यसिद्धेरावश्यकतया तादृशवैजात्यमादाय शब्दे निरुक्तलक्षणस्याऽतिव्याप्तिरवशिष्यत एव, तथाऽपि गुणवृत्तिपदेन गुणविभाजकत्वस्य विवक्षितत्वान्नाऽसङ्गतिरिति। **जातिमत्त्वे सत्यपाकजत्वस्येति**। ननु पाकजावृत्तित्वमेव जातौ किमिति विशेषणं नोपात्तम्? तावतैव स्वाचप्रत्यक्षप्रतिबन्धकतावच्छेदकजातेरपि वारणसम्भवादिति चेन्न। रूपरसादौ तादृशजात्यप्रसिद्ध्याऽव्याप्त्यापत्तेरिति भावः। ननु मूले—**'अपाकजास्तु स्पर्शान्ताः'** इत्युक्तिरसङ्गता, तद्वाक्यतः स्पर्शान्तेषु अपाकजत्वस्य 'तु'शब्दस्वारस्येन साधर्म्यतया लाभात्, तादृशस्य चाऽर्थस्याऽव्याप्त्यतिव्याप्तिग्रस्तत्वेनाऽयुक्तत्वादित्याशङ्कां निराकर्तुम-

संयोगश्च विभागश्च वेगश्चैते तु कर्मजाः ॥ ९६ ॥

संयोगश्चेति। **कर्मजन्यत्वं यद्यपि न साधर्म्यं, घटादावतिव्याप्तेः, संयोगज-संयोगेऽव्याप्तेश्च, तथाऽपि कर्मजन्यवृत्तिगुणत्वव्याप्यजातिमत्त्वं बोध्यम्।**

दिनकरी।

सर्वं चतुरस्रम्। लक्ष्यतावच्छेदकेऽपाकजत्वविशेषणस्य प्रयोजनमाह **मुक्तावल्याम्—पाकजरूपादीनामिति। कारणगुणपूर्वकत्वाभावात्**—कारणगुणपूर्वकत्वव्यवहाराभावात्। अत्र पाकजरूपरसगन्धस्पर्शपाकजद्रवत्वद्वित्वादिद्विपथकत्वादिसंयोगविभागपरत्वापरत्वानां न कारणगुणपूर्वकत्वं न वा अकारणगुणपूर्वकत्व साधर्म्यमिति ध्येयम्।

॥ इति कारणगुणोत्पन्नगुणकथनम् ॥

रामरुद्री।

वतरणिकामारचयति—**लक्ष्यतावच्छेदक इत्यादिना**। तथा च लक्ष्यनिरूपणायैव मूलेऽपाकजत्वविशेषणं दत्तं, न तु लक्षणत्वेनेति न दोष इति भावः। ननु पाकजरूपादीना कारणगुणपूर्वकत्वं नाऽस्तीत्युपगम्य तस्याऽलक्ष्यत्वमुक्त्वा स्वाश्रयसमवायिमात्रसमवेतत्वमिति लक्षणस्य पाकजेऽतिव्याप्तिमालोच्य लक्षणे पुनरपाकजत्वस्य घटकतया प्रवेशः शिरोवेष्टनेन नासिकास्पर्शनमनुधावतीत्यतः '**कारणगुणपूर्वकत्वाभावात्**' इति मूलस्य भावमाह। **कारणगुणपूर्वकत्वव्यवहाराभावादिति**। भाष्य इति शेषः। तथा च 'अपाकजरूपरसगन्धस्पर्शपरिमाणैकत्वैकपृथक्त्वगुरुत्वद्रवत्वस्नेहवेगाः कारणगुणपूर्वकाः—(१) इति भाष्ये अपाकजानामेव कारणगुणपूर्वकत्वाभिधानादस्माभिरपि तथैवोक्तमिति भावः। **'कारणगुणपूर्वकत्वव्यवहाराभावात्'** इत्यस्य लोके इत्यादिरिति कैचन व्याचक्षते। तन्न। जातिघटितस्य कारणगुणपूर्वकत्वस्य लोके पाकजेऽपि व्यवहारात्। जात्यघटितस्य तु चित्ररूपादावव्याप्तिभिया प्रकृतग्रन्थानभिमतत्वस्यैवोररीकरणीयत्वादिति ध्येयम्। वस्तुतस्त्वस्मदुक्तकारणगुणपूर्वकत्वस्य लक्षणत्व एवाऽपाकजत्वविशेषण सङ्गच्छते, अन्यथा शिरोवेष्टनेनेत्यादिशङ्कया एतद्ग्रन्थावतारणे भाष्योक्तत्वादेवमुक्तमित्युत्तरदानेन तत्परिहारसम्भवेपि भाष्ये एव किमिति इदं विशेषणमुपात्तमिति शङ्काया अनिवृत्तेरिति विभावनीयम्। ननु वस्तुन एककोटिमत्तानियमेन पाकजरूपादीनां कारणगुणपूर्वकत्वमकारणगुणपूर्वकत्वं वाऽऽवश्यकमिति तदुभयमध्येऽन्यतरस्याऽप्यभ्युपगमे तत्र तल्लक्षणस्याऽव्याप्तिरित्यभिमानमपनेतुमाह। **अत्र पाकजेत्यादि**। तथा च पूर्वनिरुक्तयोः कारणगुणोत्पन्नत्व.कारणगुणोत्पन्नत्वयोः परस्पराभावरूपत्वविरहेण नेयं शङ्का सम्भवतीति भावः। इति कारणगुणोत्पन्नगुणकथनम्॥

मूले-घटादावतिव्याप्तेरिति। तस्य कुलालचेष्टाजन्यत्वात्, दण्डजन्यभ्रमिजन्यत्वाच्च, दण्डस्य स्वजन्यभ्रमिजन्यभ्रमिमत्तासम्बन्धेनैव घटे हेतुतया तस्या,व्यापारविधया घटकारणत्वानापायादिति भावः कर्मासमवायिकारणकत्वमित्युक्तौ घटादावतिव्याप्तिर्न सम्भवति, तत्र कपालद्वयसंयोगस्यैवाऽसमवायिकारणत्वादित्याशयेनाऽऽह। **संयोगजसंयोग इति**। इदमुपलक्षणम्। विभागजविभागे इत्यपि बोद्धव्यम्। **कर्मजन्येत्यादि**। अत्र कर्मजन्यवृत्तिजातिमत्त्वमित्येवोक्ते तादृशी सत्तामादायाऽतिव्याप्तिवारणाय जातौ गुणत्वव्याप्यत्वनिवेशः। वस्तुतस्तु **'संयोगश्च-'** इत्यादिमूलस्य संयोगविशेषादितात्पर्यकतया संयोगाद्यजन्यसंयोगादेरेव तदर्थतया कर्मजन्यगुणत्वमात्रमेव साधर्म्यं सम्यगित्यवधेयम्। **एवमन्यत्रेत्यादि**। नन्वयमतिदेशः कुत्र क्रियते? न तावदग्रिमेऽसमवायिकारणत्वसाधर्म्ये, तत्राऽसमवायिकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वलक्षणस्याऽनुपदमेव निराकरणीयत्वादित्यतो ग्रन्थं सङ्गमयितुमाह टीकायाम्—

---

(१) प्रशस्तपादभाष्यम्। गुणनिरूपणम्।

स्पर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके ।
भवेदसमवायित्वं, अथ वैशेषिके गुणे ॥ ९७ ॥

एवमन्यत्राऽप्यूह्यम् ॥ ९५ ॥ ९६ ॥ इति कर्मजगुणकथनम् ॥

(१)(स्पर्शान्तेति । स्पर्शोऽत्राऽनुष्णो ग्राह्यः।'पृथक्त्व'इत्यत्र त्वप्रत्ययस्य प्रत्येकमन्वयादेकत्वं पृथक्त्वं च ग्राह्यम् । पृथक्त्वपदेन चैकपृथक्त्वम् ।)

भवेदसमवायित्वमिति । घटादिरूपरसगन्धस्पर्शाः कपालादिरूपरसगन्धस्पर्शेभ्यो भवन्ति,एवं कपालादिपरिमाणादीनां घटादिपरिमाणाद्यसमवायिकारणत्वं, शब्दस्याऽपि द्वितीयशब्दं प्रति,एवंस्थितिस्थापकैकपृथक्त्वयोरपि ज्ञेयम्।

॥ इत्यसमवायिकारणगुणकथनम् ॥

दिनकरी ।

एवमन्यत्राऽपीति । 'अथ प्रादेशिकः–'इत्यादिमूलेन संयोगादिद्वयविभुविशेषगुणानामव्याप्यवृत्तित्वं साधर्म्य प्रदर्शनीयं, तत्राऽपि यथाश्रुते कर्मादावतिव्याप्तेरीश्वरज्ञानादावव्याप्तेश्चाऽव्याप्यवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्त्वं बोध्यमित्यर्थः ॥ ९५ ॥ ९६ ॥

॥ इति कर्मजगुणकथनम् ॥

मूले–'एकपृथक्त्वस्नेहशब्दके' इत्यत्रैकत्वमेकपृथक्त्वं चेत्यर्थो बोध्यः ।

॥ इत्यसमवायिकारणगुणकथनम् ॥

रामरुद्री ।

अथेत्यादि । यथाश्रुत इति। स्वसामानाधिकरण्य–स्वप्रतियोगित्वोभयसम्बन्धेनाऽभावविशिष्टत्वरूपाव्याप्यवृत्तित्वपदार्थस्य लक्षणत्वोक्तावित्यर्थः । कर्मादाविति । न च अवयविकर्मणो यावदवयवकर्मनियततयाऽवयविनि कर्मणो व्याप्यवृत्तित्वात् कथमतिव्याप्तिरिति वाच्यम् । कर्मशून्यकालावच्छेदेन कर्मणोऽपि स्वाभावाधिकरणे स्वकालावच्छेदेन वृत्तित्वसम्भवात् । ननु 'प्रादेशिकः–' इति मूलेन दैशिकाव्याप्यवृत्तित्वमेव साधर्म्यतया प्रतिपाद्यते, तथा च न पूर्वोक्तमव्याप्यवृत्तित्वं मूलकारानुमत, अपि तु कालानवच्छिन्नसम्बन्धघटितस्वसामानाधिकरण्यघटितसम्बन्धद्वयेनैवेति नैष दोषः, कर्मणः कालिकाव्याप्यवृत्तित्वादित्यतो दोषान्तरमाह । ईश्वरज्ञानादाविति । आदिना तादृशेच्छादिपरिग्रहः ॥ ९५ ॥ ९६ ॥ इति कर्मजगुणकथनम् ॥

इत्यर्थो बोध्य इति । इदं च 'पृथक्त्वेत्यत्र त्वप्रत्ययस्य प्रत्येकमन्वयादेकत्वं पृथक्त्वं च बोध्यम् , पृथक्त्वपदेन चैकपृक्त्वम्' इतिमूलपाठासत्त्वमालोच्यैव लिखितम्, तेन न पौनरुक्त्यम् । युक्तं चैतत्, अन्यथा पृथक्पदस्यैकपृथक्त्वपरत्वनिर्वाहाय कारिकास्थैकपृथक्पदस्यैकपृथक्त्वरूपशब्दपरत्वावश्यकत्वे तदुत्तरभावप्रत्ययस्य तादृशशब्दार्थवृत्त्यसाधारणधर्मार्थकत्वापत्त्या प्रकृतग्रन्थार्थालाभात् , टीकाकारमते तु 'एकपृथक्त्व' इत्यस्यैव तादृशधर्मद्वयावच्छिन्ने लक्षणोपगमान्नाऽनुपपत्तिरिति ध्येयम्।

अत्रेदं चिन्त्यम् । यथोक्तस्याऽसमवायिकारणत्वलक्षणस्य कर्मण्यतिव्याप्तिः, तस्या असमवायिकारणगुणत्वविवक्षया कथञ्चित्प्रतीकारेऽपि अणुपरिमाणस्य आत्मातिरिक्तपरममहत्परिमाणस्य च क्वाऽप्यकारणतायाः प्रागेवाऽभिधानात्तत्राऽव्याप्तेः, द्विविधकारणगुणेष्वऽतिव्याप्तेश्च दुर्वारता तदवस्थैव । न च निमित्तकारणभिन्नं यदसमवायिकारणं तद्वृत्तिगुणत्वव्याप्यजातिमत्त्वस्य विवक्षणान्नैवमिति वाच्यम् । सर्वेषामेव गुणानामन्ततः शब्दमात्रस्य स्वध्वंसप्रत्यक्षयोर्निमित्तकारणतया तत्र असमवायिकारणमात्रवर्त्ति-

(१) एतच्चिह्नान्तर्गतः पाठः क्वाचित्कः ।

रामरुद्री।

व्याः कस्या अपि गुणत्वव्याप्यजातेर्विरहेणाऽसम्भवस्याऽव्याप्तेर्वा प्रसङ्गात्। अथ स्वाचप्रत्यक्षप्रतिबन्धकतावच्छेदकतया रूपरसगन्धशब्दसाधारणैकवैजात्यसिद्धेरावश्यकतया तादृशजातेरेव निरुक्तनिमित्तकारणतारहितानित्यरूपात्मकासमवायिकारणवृत्तिगुणत्वव्याप्यजातित्वेन तामादायाऽपि शब्दे लक्षणसमन्वयः सम्भवतीति चेत्, एवमपि उष्णस्पर्शे निमित्तकारणभिन्नं यदसमवायिकारणं अनुष्णस्पर्शः, तद्वृत्तिस्पर्शत्वरूपगुणत्वव्याप्यजातेर्भवदुक्तत्वाचप्रत्यक्षप्रतिबन्धकतावच्छेदकजातेश्च सत्त्वेनाऽतिव्याप्तिः, स्नेहस्य सङ्ग्रहनिमित्ततया निमित्तकारणभिन्नासमवायिकारणस्नेहाप्रसिद्धया तत्राऽव्याप्तिश्च दुरपह्नवैव। अतएव निमित्तकारणावृत्तिर्याऽसमवायिकारणवृत्तिर्गुणत्वव्याप्या जातिस्तद्वत्त्वं विवक्षितम्, रूपरसगन्धेषु प्रत्येकं तथाविधं रूपत्वादिकमादाय, स्पर्शेच शीतत्वानुष्णाशीतत्वे तथाविधे आदाय लक्षणसमन्वयः। न च रूपस्याऽपि 'अरुणया पिङ्गाक्ष्यैकहायन्या गवा-'इत्यादि—'वायव्यं श्वेतमालभेत'इत्यादिश्रुतिबलेन, रसस्य जीवनपुष्टिबलारोग्यनिमित्ततया च निमित्तकारणत्वेन कथं लक्षणसमन्वयसम्भव इति वाच्यम्। स्वसमानाधिकरणकार्यनिमित्तकारणावृत्तित्वस्य विवक्षितत्वे निरुक्तदोषवारणसम्भवादिति परास्तम्। तथात्वेऽपि उष्णस्पर्शस्य स्वसमानाधिकरणकार्यनिमित्तत्वाभावेन तत्राऽतिव्याप्तेर्दुर्वारत्वापत्तेः। न च सोऽपि लक्ष्य एव 'स्पर्शान्त-' इत्यादिमूले तथैव प्रतिपादनादिति वाच्यम्। तथासति 'रूपरसगन्धानुष्णस्पर्शसङ्ख्यापरिमाणैकत्वैकपृथक्त्वस्नेहशब्दानामसमवायित्वम्-(१) इतिभाष्यासङ्गत्यप्रसङ्गात्। अथ समवायसम्बन्धावच्छिन्नकार्यतानिरूपितसमवायसम्बन्धावच्छिन्ननिमित्तकारणतावच्छेदकनापर्याप्यधिकरणधर्मावच्छिन्नविषयित्वसमानाधिकरणभेदप्रतियोगितानवच्छेदकविषयितावच्छेदकावृत्तिः असमवायिकारणतावच्छेदिका या जातिस्तद्वत्त्वं तत्त्वम्, रूपरसगन्धानुष्णस्पर्शपरिमाणैकत्वैकपृथक्त्वस्नेहशब्दानां क्वचिदपि समवायेन कार्ये समवायेनाऽकारणत्वान्नाऽव्याप्तिः। उष्णस्पर्शस्य तु उष्णस्पर्शवदग्निसंयोगस्य समवायेन पाकजनकतया उष्णस्पर्शत्वजातेस्तादृशकारणतावच्छेदककोटिप्रविष्टवृत्तितया तत्र नाऽतिप्रसङ्गः। स्नेहेऽपि तस्य स्वाश्रयसंयोगसम्बन्धेन सङ्ग्रहनिमित्ततया न समवायसम्बन्धेन तत्र कारणतेति नाऽप्रसङ्ग इति चेन्न। स्नेहवज्जलसंयोगस्याऽपि कारणतया तदवच्छेदककोटिप्रविष्टतया स्नेहस्य तद्दोषाऽदवस्थ्यात्। न च जले पिण्डीभावानुत्पत्त्या तत्र व्यभिचारवारणाय स्वाश्रयसंयोगसम्बन्धेनैव तस्य हेतुत्वमावश्यकमिति वाच्यम्। एवं सत्युष्णस्पर्शस्याऽपि स्वाश्रयसंयोगेनैव पाकजरूपाद्युत्पत्तौ कारणत्वस्य तेजसि व्यभिचारवारणायाऽवश्योपगन्तव्यतया तत्राऽतिव्याप्तेर्दुर्वारत्वापत्तेः, ईदृशार्थस्य मूलस्वरसासिद्धत्वाभावाच्चेति।

अत्र वदन्ति। कारणतावच्छेदकसम्बन्धेन स्वाधिकरणे एव कार्यतावच्छेदकसम्बन्धेन वर्तमानं यत् कार्यं तन्निरूपितनिमित्तकारणताशून्यत्वे सति तस्याऽसमवायिकारणत्वं तत्त्वम्। कार्यतावैशिष्ट्यमिति तु फलितार्थः। वैशिष्ट्यञ्च स्वविशिष्टनिमित्तकारणताशून्यत्व——स्वनिरूपितासमवायिकारणतावत्त्वोभयसम्बन्धेन। वैशिष्ट्यं च स्वनिरूपितत्व—स्ववृत्तित्वोभयसम्बन्धेन। स्ववृत्तित्वं च स्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नस्वावच्छेदकसम्बन्धावच्छिन्नाधेयताकूटविशिष्टत्वसम्बन्धेन। वैशिष्ट्यं च स्वानिरूपकाधिकरणनिरूपिताधेयतावत्त्वसम्बन्धेन। आधेयतावत्ता च स्वावच्छेदकधर्मसामानाधिकरण्यस्वावच्छेदकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन। तद्वृत्तिगुणत्वव्याप्यजातिमत्त्वं असमवायिकारणत्वम्। तथा हि रूपरसगन्धानुष्णस्पर्शेषु प्रत्येकं रूपत्वरसत्वाद्यवच्छिन्नकार्यतां आदाय लक्षणसमन्वयः। न च तर्हि उष्णस्पर्शेऽतिव्याप्तिः, तस्याऽपि स्पर्शत्वावच्छिन्नकार्यतावैशिष्ट्यो योऽनुष्णस्पर्शस्तन्निष्ठगुणत्वव्याप्यजातिमत्त्वादिति वाच्यम्। कार्यतावैशिष्ट्यस्य गुणत्वव्याप्यजातावेव विवक्षणीयत्वात्। वैशिष्ट्यं च स्वविशिष्टनिमित्तकारणतावद्वृत्तित्व-स्वनिरूपितासमवायिकारणतावद्वृत्तित्वोभयसम्बन्धेन। अन्यत्सर्वं पूर्ववत्। उष्णत्वजातिस्तु न ग्रहीतुं शक्यते, पाकजस्पर्शत्वावच्छिन्नकार्यतावैशिष्ट्याभावात्। न च स्पर्शत्वावच्छिन्नकार्यतामादायैव तत्राऽतिप्रसङ्गो दुर्वार इति वाच्यम्। स्वविशिष्टनिमित्तकारणताशून्यत्वघटक

(१) प्रशस्तपादभाष्यम्। गुणनिरूपणम्।

रामरुद्री।

वैशिष्ट्यस्य स्वसमानाधिकरणकार्यतावैशिष्ट्यरूपस्यैव विवक्षणेनोष्णस्पर्शस्य तादृशपाकजनिमित्ततया निरुक्तातिव्याप्तिर्व्युदासस्सम्भवात्। न च स्वसमानाधिकरणकार्यत्वावच्छिन्नकार्यतानिरूपितकालत्वावच्छिन्ननिमित्तकारणतामादाय जन्यरूपादावव्याप्तिरिति वाच्यम्। तदर्थमेव स्वविशिष्टनिमित्तकारणतेत्यत्र वैशिष्ट्यघटकतायास्वबृत्तित्वसम्बन्धनिवेशात्। तस्य च कालत्वावच्छिन्नकारणतायां विरहात्। कालिकसम्बन्धेन कार्यत्वावच्छिन्नं प्रति तादात्म्येन कालस्य हेतुतया कस्या अपि कालव्यक्तेराधेयतायास्तादात्म्यसम्बन्धावच्छिन्नाया वैशिष्ट्यस्य कार्यतायामसम्भवात्। अत एव पूर्वदिशि स्वावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशोऽपि। अन्यथा कालिकादिसम्बन्धावच्छिन्नतादृशाधेयतावैशिष्ट्यस्य तत्र सम्भवेन तद्दोषतादवस्थ्यात्। उत्तरत्रापि च स्वावच्छेदकसम्बन्धावच्छिन्नत्वनिवेश आवश्यकः। अन्यथा तादृशतादात्म्यसम्बन्धावच्छिन्नाधेयतावैशिष्ट्यस्य कार्यतायां सम्भवेन तद्दोषापतेः। कूटेति तु स्वरूपकथनमात्रम्, न तु लक्षणे निवेशनीयं, प्रयोजनविरहात्। एवं चोष्णस्पर्शे नातिव्याप्तिः, तस्य पाकजनिमित्तत्वेन स्पर्शनिष्ठकार्यतावैशिष्ट्यासम्भवात्। अथ पाकजस्पर्शे व्यभिचारवारणायाऽपाकजस्पर्शत्वस्य स्पर्शजन्यतावच्छेदकत्वेनाऽभ्युपगन्तव्यतया तादृशकार्यतावैशिष्ट्यं उष्णत्वजातावप्यस्त्येवेति तत्राऽतिप्रसङ्गो दुर्वार इति चेन्न। स्वसामानाधिकरण्यस्थाने स्वावच्छेदकसमानाधिकरणत्वस्यैव निवेशनीयत्वात्। रूपादेरदृष्टादिनिमित्ततया तत्राऽव्याप्तिवारणाय च तस्य निवेशो बोध्यः। परिमाणेषु च तादृशपरिमाणत्वावच्छिन्नकार्यतामादाय लक्षणसमन्वयः। अन्यथा शत्रुपीवरतादिरूपस्य तस्य स्वदुःखं प्रति निमित्तकारणतयाऽव्याप्त्यापत्तेः। एकत्वैकपृथक्त्वयोरपि एकत्वैकपृथक्त्वत्वावच्छिन्नकार्यतामादाय लक्षणसमन्वयः। द्वित्वद्विपृथक्त्वादौ तु नातिव्याप्तिः, द्वित्वत्वद्विपृथक्त्वत्वावच्छिन्नकार्यतानिरूपितकारणताया एव द्वित्वादावभावात्। सङ्ख्यात्वावच्छिन्नायाः कारणतायाः अप्रामाणिकतया च न तामादाय तत्राऽतिव्याप्तिः। न च तथाऽपि द्व्यणुकपरिमाणादिकं प्रति द्वित्वादेरसमवायिकारणत्वात् कुत्रचिन्निमित्तकारणत्वाभावाच्च तत्राऽतिव्याप्तिरिति वाच्यम्। स्वनिरूपितासमवायिकारणतावद्वृत्तित्वस्थाने स्वनिरूपितासमवायिकारणत्वाभावदवृत्तित्वस्यैव सम्बन्धघटकतया निवेशनीयत्वेन तद्दोषवारणात्। यत्किञ्चिद्द्वित्वव्यक्तेरसमवायित्वेऽपि घटगगनादिद्वित्वव्यक्तेरनथात्वात्। वस्तुतस्तु स्पर्शान्ताश्च स्पर्शान्ताश्च स्पर्शान्ता इत्येकशेषबलेन सङ्ख्याया असमवायिकारणत्वलक्षणलक्ष्यत्वं मूलकारानुमतमिति सूपपादम्, स्पर्शोऽन्ते येषामिति व्युत्पत्त्या रूपादीनां, स्पर्शस्यान्तः—अन्तवर्तीति व्युत्पत्त्या सङ्ख्याया अपि लाभसम्भवात्। अत एव 'रूपरसगन्धानुष्णस्पर्शसङ्ख्यापरिमाणैकपृथक्त्वस्नेहशब्दानामसमवायिकारणत्वम्(१)-'इति भाष्यान्तराण्यपि सङ्गच्छन्ते। एतदेव च मूलकारस्याऽप्यभिमतम्। अन्यथा 'रूपर्शान्तपरिमाणैकपृथक्त्वस्नेहशब्दके-त्यत्र सङ्ख्याया अकथनेन न्यूनतापत्तेः। 'पृथक्त्व' इत्यत्र त्वप्रत्ययस्य प्रत्येकमन्वयादेकत्वं पृथक्त्वं च ग्राह्यम्, पृथक्त्वपदेन चैकपृथक्त्वम्-'इति मूलग्रन्थस्य प्रक्षिप्तत्वं तु निरूपितमधस्तात्। न चैवं 'परत्वापरत्वद्वित्वद्विपृथक्त्वादीनामकारणत्वम्(२)-'इत्यग्रिमभाष्यग्रन्थविरोध इति वाच्यम्। तत्र तद्धर्मावच्छिन्नजन्यतानिरूपिततद्धर्मावच्छिन्नासमवायिनिमित्तकारणत्वान्यतराभावस्यैव साधर्म्यतया विवक्षितत्वात् तस्य द्वित्वसाधारण्ये क्षतिविरहात्। न चैवमत्राऽपीदृशमेवाऽसमवायिकारणत्वं परिक्ल्प्यतां, किं गुरुतरनिवेशेनेति वाच्यम्। अत्र तद्धर्मावच्छिन्नत्वं किं तन्मात्रावच्छिन्नत्वं तदवच्छिन्नत्वमेव वा? आद्ये रूपादावव्याप्तिः, तेषामपाकजरूपत्वावच्छिन्नं प्रति रूपत्वादिना कारणत्वात्। द्वितीये संयोगजसंयोगत्वावच्छिन्नं प्रति संयोगत्वेन हेतुतया तत्राऽतिव्याप्तिरिति। स्नेहस्य स्नेहत्वावच्छिन्नकार्यतावैशिष्ट्यस्नेहत्वरूपजातिमत्त्वाल्लक्षणसमन्वयः। अथ संयोगविभागगुरुत्वद्रवत्ववेगस्थितिस्थापकेष्वतिव्याप्तिः, तेषामपि संयोगजसंयोगत्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतादृशजातिमत्त्वादिति चेन्न। असमवायिकारणत्वपदेन गुणमात्रासमवायिकारणत्वस्य विवक्षितत्वेन गुणेतरासमवायिकारणत्वाभावस्याऽपि प्राप्त्या संयोगगुरुत्वद्रवत्ववेगस्थितिस्थापके

(१) प्रशस्तपादभाष्यम्। गुणनिरूपणम्। (२) प्रशस्तपादभाष्यम्। गुणनिरूपणम्।

आत्मनः स्थान्निमित्तत्वं, उष्णास्पर्शगुरुत्वयोः ।
निमित्तत्वमिति । बुद्ध्यादीनामिच्छादिनिमित्तत्वादिति भावः ।
॥ इति निमित्तकारणगुणकथनम् ॥

रामरुद्री ।

तिव्याप्तिवारणात् । विभागजविभागेऽतिव्याप्तेस्तु वारणाय स्वनिरूपितासमवायिकारणतावद्वृत्तित्वस्थाने स्वविशिष्टासमवायिकारणतावद्वृत्तित्वं विवक्षणीयम् । वैशिष्ट्यं च निमित्तकारणतायामिव पूर्वोक्तमनुसंधेयम् । एवं च विभागादौ नाऽतिव्याप्तिः, तदन्तर्गतकिञ्चिद्द्रव्यशक्तिनिष्ठाधेयतावैशिष्ट्यस्याऽपि विभागजविभागत्वावच्छिन्नकार्यतायामसम्भवात् । तथा च न कोऽपि दोष इति केचित् ।

अपरे तु उभयावृत्तिकार्यनिरूपितनिमित्तकारणत्वरहितत्वे सति उभयावृत्तिकार्यनिरूपितासमवायिकारणत्वमेव तत्, एवं च स्नेहस्योभयावृत्तिकार्यनिरूपितनिमित्तकारणत्वविरहाल्लक्षणसमन्वयः । विभागादेश्च विभागादिकं प्रति हेतुत्वेऽपि उभयावृत्तिकार्यं प्रत्यसमवायिकारणत्वविरहान्नाऽतिव्याप्तिः । द्रवत्वेऽतिव्याप्तिस्तु तस्य नौकादिगमनविशेषे हेतुत्वाद्वारणीयेत्याहुः । तदुभयमपि चिन्त्यम् । एतादृशार्थे महागौरवात् ।

वयन्तु ब्रूमः । यत्किञ्चित्कार्यतावच्छेदकावच्छिन्नाधिकरणनिष्ठाभावीयकारणतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकनिमित्तकारणतावच्छेदकरहितत्वे सति तादृशयत्किञ्चिदसमवायिकारणतावच्छेदकधर्मवत्त्वमेव तत् । कारणत्वस्य व्यापकतागर्भत्वेनेदृशस्यैव तस्याऽत्राऽपि प्रविष्टत्वात् । एवं च स्नेहस्य मङ्क्षूद्धे निमित्तत्वेऽपि नाऽव्याप्तिः । यत्र जलसंयुक्तैकसक्तुत्वयवेन जलासंयुक्तसक्तुत्वयवयवान्तरस्य संयोगस्तत्र स्नेहस्य स्वाश्रयजलसंयुक्तत्वसम्बन्धेनाऽभावस्य जलासंयुक्तसक्तुत्वयवनिष्ठस्य प्रतियोगितया स्नेहत्वस्य तत्प्रतियोगितानवच्छेदकत्वविरहात् । संयोगविभागयोरपि नाऽतिव्याप्तिः, यत्र हस्तपुस्तकसंयोगाद्धस्तपुस्तकविभागाच्च हस्तपुस्तकसंयोगविभागौ, तत्र तादृशविभागजविभागे संयोगजसंयोगे च प्राथमिकविभागसंयोगयोः समवायेन स्वसमवायिसमवेतत्वसम्बन्धेन च प्रत्येकं द्विविधहेतुतया तदन्यतरावच्छेदकसम्बन्धमध्यवर्तिना केनाऽपि सम्बन्धेन तयोः कार्याव्यापकत्वात् । गुरुत्वेऽतिव्याप्तिस्तु तस्याऽभिघातजनिकायां क्रियायामसमवायिकारणत्वेऽपि अभिघातजन्यायां क्रियायां निमित्तकारणतया वारणीया । एषा रीतिर्वेगस्थितिस्थापकयोरपि समाना । अथैवमपि द्रवत्वेऽतिव्याप्तिर्दुर्वारा । न च तस्य नौकागमनविशेषे निमित्तत्वान्नाऽतिव्याप्तिरिति शङ्क्यम् । नौकागमनादेः कठिनद्रव्ये तस्य प्रतिबन्धकत्वादेवाऽसम्भवोपपत्तौ तत्र द्रवत्वस्य हेतुत्वे मानाभावादिति चेन्न । प्रचितद्रव्यस्य तूलादेरूर्ध्वावलम्बितस्याऽधोदेशावच्छेदेन जलसंयोगे सति जलस्य सकलतत्पिण्डव्याप्तिनियमाय तादृशगमनविशेषे द्रवत्वस्य समवायेन हेतुत्वं वक्तव्यम्, न च सा क्रिया स्नेहकार्या, द्रवत्वप्रकर्षात्तादृशक्रियातिशयस्यैव स्नेहप्रकर्षात्तदनुपलब्धेः, तन्निरूपितनिमित्तकारणत्वस्य च द्रवत्वे सत्त्वादतिव्याप्तिविरहात् । न चैवं 'तथाऽपि एकाश्रितकार्यापेक्षया एतद्दूषणम्' इति किरणावलीग्रन्थविरोध इति वाच्यम् । तद्ग्रन्थस्य क्रियासंयोगोक्तकार्यकारणभावरीत्या कारणत्वमिह न परिष्करणीयं, किन्तु यथाश्रुतमेव निवेशनीयमित्यभिप्रायकत्वादिति । न च तथाऽपि भवन्मते स्थितिस्थापकस्याऽनित्यत्वान्मूले च तस्य नित्यत्वाभ्युपगमान्मूलविरोध इति वाच्यम् । 'एवं स्थितिस्थापकैकपृथक्त्वयोरपि ज्ञेयम्' इति ग्रन्थस्य किरणावल्यादिस्वारस्येन प्रामादिकत्वावधारणात्, 'सङ्ख्यैकपृथक्त्वयोः' इत्येव वक्तव्यत्वादिति सर्वमवदातमिति सङ्क्षेपः । ॥ इत्यसमवायिकारणगुणकथनम् ॥

ननु 'अथ वैशेषिके गुणे, आत्मनः स्यान्निमित्तत्वम्' इति मूलेन विशेषगुणेषु आत्मनो निमित्तत्वं प्रतिपाद्यते, तदसङ्गतं, सन्दर्भविरुद्धं च, रूपादिषु विशेषगुणेषु आत्मनो निमित्तकारणत्वाभावात्, गुणसाधर्म्यकथनप्रकरणे आत्मनः कारणत्वविचारस्याऽप्रकृतत्वाच्चेत्याशङ्कामपनेतुं कारिकायामन्वयमाह—

दिनकरी।

मूले 'वैशेषिके गुणे' इत्यत्र 'आत्मनः' इत्यस्याऽन्वयः। इति निमित्तकारणगुणकथनम्॥

रामरुद्री।

वैशेषिके गुण इत्यादिना। तथा चाऽऽत्मगुणानां निमित्तकारणत्वरूपसाधर्म्यकथनपरत्वेन तद्ग्रन्थस्य नाऽसङ्गतिरिति भावः। अथाऽत्र यथाश्रुतस्य निमित्तकारणत्वस्य द्रव्ये रूपादावितरत्र चाऽतिव्याप्तिः, तेषामपि स्वध्वंसप्रत्यक्षयोर्निमित्तकारणत्वात्। न च समवायसम्बन्धावच्छिन्नकार्यतानिरूपितसमवायसम्बन्धावच्छिन्ननिमित्तकारणत्वमेव विवक्षितमिति नैष दोष इति वाच्यम्। तथा सति सुखदुःखयोर्भावद्विशेषगुणेषु चाऽव्याप्तेः। तेषां कुत्राऽपि समवायेन कार्ये समवायेनाऽकारणत्वात् न चाऽसमवायिकारणताशून्यत्वमेव विवक्षितमिति नैष दोष इति वाच्यम्। पारिमाण्डल्येऽतिव्याप्तेः। न चाऽसमवायिकारणताशून्यत्वे सति निमित्तकारणत्वं वक्तव्यमिति वाच्यम्। तथा सति जागराद्यक्षणोत्पन्नोपेक्षात्मकघटादिज्ञानेष्वतिव्याप्त्यापत्तेः, तेषां कुत्राऽपि निमित्तकारणत्वाभावात्। मैवम्। यत्किञ्चित्कार्यतानिरूपितसमवायसम्बन्धावच्छिन्ननिमित्तकारणतावत्त्वस्यैव तदर्थत्वात्। स्वध्वंसप्रत्यक्षयोः स्वस्य तादात्म्येनैव कारणतया नाऽतिप्रसङ्गः। ईश्वरगुणानामपि तत्समानाधिकरणसंयोगविभागादिषु समवायेन निमित्तकारणतया लक्षणसङ्गतिः। कारणतायां समवायविषयित्वान्यतरसम्बन्धावच्छिन्नत्वं वा वक्तव्यमिति न दोषः। असमवायिकारणताशून्यत्वे सति निरुक्तसम्बन्धावच्छिन्नकारणतावत्त्वमिति तु फलितार्थः। तेन द्विविधकारणे नाऽतिप्रसङ्गः। एवञ्च योग्यविभुविशेषगुणानां स्वोत्तरवर्त्तिगुणनाश्यतया तन्नाशकतामादायैव सर्वत्र लक्षणं नेयम्। न च योग्यविभुविशेषगुणानां प्रतियोगितासम्बन्धेन योग्यविभुविशेषगुणनाशं प्रति स्वसामानाधिकरण्य—स्वाव्यवहितपूर्वत्वोभयसम्बन्धेनाऽनुगतकारणत्वात् सुखादौ योग्यविभुविशेषगुणनाशकतायाः समवायादिसम्बन्धावच्छिन्नत्वविरहेण तामादाय लक्षणसमन्वयासम्भव इति वाच्यम्। अपेक्षाबुद्धेरिक्षणावस्थायित्वानुरोधेनैतादृशकार्यकारणभावानभ्युपगमात्। कार्यतावच्छेदकघटकयोग्यविभुविशेषगुणकोटौ अपेक्षाबुद्धिभिन्नत्वस्य निवेशे चाऽपेक्षाबुद्धित्वस्याऽनुगतस्य विरहेण तत्तद्व्यक्तिभेदकूटस्य निवेशापत्त्या तेषां परस्परं विशेष्यविशेषणभावे विनिगमनाविरहेणाऽनन्तकार्यकारणभावापत्त्या गौरवं, योग्यविभुविशेषगुणत्वस्याऽनुगतस्य निर्वक्तुमशक्यतयैतादृशकार्यकारणभावानुपपत्तिः, स्वरूपसम्बन्धेन योग्यविभुविशेषगुणनाशं प्रति समवायेनैव विभुविशेषगुणः कारणमिति कार्यकारणभावस्यैव लाघवेन स्वीकरणीयतया भवदुक्तदोषासङ्गतिश्च। न चैवमपेक्षाबुद्धेरिक्षणावस्थायित्वानुपपत्तिरिति वाच्यम्। तद्भेदकूटस्य कार्यप्रतियोगिकुक्षौ भवतैव मयाऽपि निवेशनीयत्वात्। अथैवमपेक्षाबुद्धिरूपकारणबलात्तदुत्तरक्षणे योग्यविभुविशेषगुणात्मकस्वनाशापत्तिर्दुर्वारैवेति चेन्न। तत्तदपेक्षाबुद्धिव्यक्तिभेदकूटस्य कारणतावच्छेदककुक्षावपि निवेशनीयत्वात्। न च यत्र जागराद्यक्षणे किञ्चिज्ज्ञानं जातं, तत्र निरुक्तलक्षणविरहादव्याप्तिरिति वाच्यम्। तत्क्षणे यदि प्रत्यक्षादिसामग्री समवहिता स्यात् तर्हि तज्ज्ञाननिष्ठविशिष्टप्रत्यक्षादिजनकत्वमादायैव तत्र लक्षणं नेयम्, नो चेन्मानसप्रत्यक्षजनकतामादायेति। न च यत्राऽऽद्यक्षणे घटज्ञानं, ततः इन्द्रियसन्निकर्षः पटेन, ततः पटस्य प्रत्यक्षं, तत्र घटज्ञानस्य कुत्राऽप्यकारणतयाऽव्याप्तिः, घटविषयकलौकिकप्रत्यक्षसामग्र्या प्रतिरुद्धत्वेन मानसस्य तत्र स्वीकर्तुमशक्यत्वादिति वाच्यम्। तत्र घटज्ञानस्य तद्विशिष्टबुद्धौ कारणतामादायैव लक्षणगमन सम्भवात्। न च यत्र घटोऽवृत्तिरिति बाधनिश्चयोऽपि, तत्र नैतादृशरीत्याऽपि लक्षणसमन्वयसम्भव इति वाच्यम्। तस्य तदानीं प्रतिबन्धकसमवधानवशात्कार्यानुपधायकत्वेऽपि स्वरूपयोग्यतारूपकारणत्वानपायात्। सर्वथा पण्डज्ञानादिव्यक्तेः प्रामाणिकत्वे तु तादृशनिमित्तकारणवृत्त्यसमवायिकारणावृत्तिजातिमत्त्वस्य विवक्षितत्वान्नाव्याप्तिरिति। अत एवेश्वरज्ञानादावपि लक्षणसमन्वयसम्भवात्कारणतायां निरुक्तान्यतरसम्बन्धावच्छिन्नत्वमपि न निवेशनीयम्। न चैवमसमवायिकारणावृत्तित्वदलस्य किं फलमिति वाच्यम्। शब्दस्य स्वोत्तरशब्दनाशे निरुक्तयोग्यविभुविशेषगुणविधया कारणतामादाय तत्राऽतिव्याप्तिवारणायैव तस्य निवेशनीयत्वात्। पतेन ज्ञायमानलिङ्गस्याऽनुमितिहेतुतया लक्षणमिदं धूमा-

वेगेऽपि च द्रवत्वे च संयोगादिद्वये तथा ॥ ६८ ॥
द्विधैव (१) कारणत्वं स्यात्, अथ प्रादेशिको भवेत् ।
वैशेषिको विभुगुणः संयोगादिद्वयं तथा ॥ ६९ ॥

द्विधैवेति । असमवायिकारणत्वं निमित्तकारणत्वं च । तथा हि—उष्णस्पर्श उष्णस्पर्शस्याऽसमवायिकारणं, पाकजे निमित्तम् । गुरुत्वं गुरुत्वपतनयोरसमवायिकारणं, अभिघाते(२) निमित्तम् । वेगो वेगस्पन्द्योरसमवायी, अभिघाते निमित्तम् । द्रवत्वं द्रवत्वस्पन्द्योरसमवायि, सङ्ग्रहे निमित्तम् । मेरीदण्डसंयोगः शब्दे निमित्तं, मेर्याकाशसंयोगोऽसमवायी । वंशदलद्वयविभागः शब्दे निमित्तं, वंशदलाकाशविभागोऽसमवायीति ।

॥ इति द्विविधकारणगुणकथनम् ॥

दिनकरी ।

मुक्तावल्याम्—उष्णस्पर्श इति । अवयवगत उष्णस्पर्श इत्यर्थः । उष्णस्पर्शस्य—अवयविगतोष्णस्पर्शस्य । एवमग्रेऽपि । कारणैकार्थप्रत्यासत्त्या कार्यैकार्थप्रत्यासत्त्या च गुरुत्वस्याऽसमवायिकारणत्वमिति प्रदर्शनाय 'गुरुत्वपतनयोः' इत्युभयमुक्तम् । एवमग्रेऽपि । सङ्ग्रहे-सक्त्वादिसंयोगविशेषे (३) । 'मेर्याकाशसंयोगोऽसमवायी' इति प्रथमान्तसंयोगपदघटितः पाठः । भावकार्यस्याऽसमवायिकारणजन्यत्वनियमाद्मेर्याकाशसंयोगस्य शब्दं प्रत्यसमवायिकारणत्वमावश्यकमिति भावः । यद्यपि मेरीदण्डसंयोगस्य शब्दे निमित्तत्वं, न तु तत्र तस्याऽसमवायिकारणत्वं, भेर्याकाशसंयोगस्याऽसमवायिकारणत्वं, न तत्र तस्य निमित्तत्वमित्येकव्यक्तेर्न द्विविधहेतुत्वं, तथापि संयोगजातीयस्य द्विविधहेतुत्वमस्त्येवेति भावः । एवमग्रेऽपि । मूले 'संयोगादिद्वये तथा' इत्यनन्तरं 'द्विधैव' इत्यस्य प्राक् —

रामरुद्री ।

द्विद्रव्यावृत्तिव्याप्त, ज्ञायमानसामान्यस्य प्रत्यासत्तित्वेऽपि तथा, ज्ञायमानपदस्य शाब्दबोधकारणत्वे चैवमित्यादिः केषांचित् प्रलापोऽपि निरस्तः । ज्ञायमानपदलिङ्गयोः कालिकसम्बन्धेनैवाऽनुमितिशाब्दबोधौ प्रति कारणतया निरुक्ताव्याप्त्यभावात् । ज्ञायमानसामान्यस्य च सखण्डाखण्डभेदेन द्विविधतया तत्र चाऽखण्डस्य लक्षणघटकजातिमत्त्वविरहादेव वारणसम्भवात् । सखण्डसामान्यस्थलेऽप्यखण्डस्यैव परम्परया प्रत्यासत्तस्य हेतुतायास्तत्र तत्र व्यवस्थापितत्वात्, कार्यतायां समवायस्वरूपान्यतरसम्बन्धावच्छिन्नत्वं निवेश्यैव वा तस्या वारणीयत्वादिति सर्वं चतुरस्रम् । अन्यैः परिष्कृतं निमित्तकारणत्वमल्पसारत्वात्, विस्तरभयाच्च नेह प्रदर्शितमिति बोध्यम् । ॥ इति निमित्तकारणगुणकथनम् ॥

मूले-अभिघाते निमित्तमिति । कचित्पुस्तके 'अभिघाते' इत्यस्य स्थाने 'प्रतिघाते' इत्यपि पाठः । तत्र च प्रथम एव पाठः सम्यक् । प्रतिघातस्य वाय्वादिष्वपि तुल्यत्वात् । अभिघातविशेषस्तु गुरुत्वादेरानुभविक इति ।

संयोगजातीयस्येति । तथा चाऽसमवायिकारणवृत्तिनिमित्तकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वं लक्षणं फलितमिति भावः । पूर्वनिरुक्तासमवायिकारणत्वलक्षणानुसारेण चाऽत्राऽपि द्विविधकारणत्वलक्षणं परिष्करणीयम् ।

---

(१) 'द्विविधम्' इति पुस्तकान्तरे पाठः । (२) 'प्रतिघाते' इति पाठान्तरम् ।
(३) 'संयोगविभागविशेषे' इति पाठान्तरम् ।

दिनकरी।

'परापरत्वद्वित्वादिद्वित्पृथक्त्वादिके पुनः–'

इति पाठः क्वचित्पुस्तके प्रमादादायातः। परत्वादीनामकारणत्वेन द्विविधकारणत्वस्य तत्राऽभावात्। न च परत्वादीनामपि स्वध्वंसप्रत्यक्षे प्रति हेतुत्वात् कथमकारणत्वमिति

रामरुद्री।

इदं त्ववधेयम्। यद्यपि पूर्वनिरुक्तलक्षणानुसारेण प्रकृतलक्षणपरिष्करणेऽनुष्णस्पर्शादावतिव्याप्तिर्दुर्वारा। न चाऽसमवायिकारणवृत्तिनिमित्तकारणवृत्तिगुणत्वव्याप्यजातिमत्त्वं विवक्षितमिति नैव दोष इति वाच्यम्। एवमपि गुरुत्वादौ लक्षणसमन्वयासम्भवात्। पूर्वनिरुक्तयनुसारेण विवक्षणे कार्यतावि-शिष्टगुणत्वव्याप्यजातिमत्त्वस्यैव फलिततया तस्य गुरुत्वादावभावात्। वैशिष्ट्यं हि स्वविशिष्टनिमित्त-कारणतावद्वृत्तित्व-स्वनिरूपितासमवायिकारणतावद्वृत्तित्वोभयसम्बन्धेन। स्ववैशिष्ट्यं च स्वावच्छेद-कसमानाधिकरणकार्यतावत्त्वसम्बन्धेन। कार्यतावत्ता च स्वनिरूपितत्व–स्ववृत्तित्वोभयसम्बन्धेन। स्ववृत्तित्वं च स्वसमानाधिकरणोभयावृत्तिधर्मवत्त्वसम्बन्धेन। धर्मवत्ता च स्वावच्छिन्नाधेयतावत्त्वसम्ब-न्धेन। आधेयतावत्ता च स्वानिरूपकाधिकरणनिरूपिताधेयतावच्छेदकधर्मवत्त्वसम्बन्धेन। धर्मवत्ता च सामानाधिकरण्यसम्बन्धेनेति। तच्च गुरुत्वादौ नोपपादयितुं शक्यते, तथा हि गुरुत्वं गुरुत्वपतनयो-रसमवायि, अभिघाते निमित्तमित्यन्यधर्मावच्छिन्नासमवायिकारणत्वमितरधर्मावच्छिन्ननिमित्तकारणत्वं च द्योत्यते, एवं वेगो वेगस्पन्दयोरसमवायि, अभिघाते निमित्तमिति, द्रवत्वं द्रवत्वस्पन्दयोरसमवायि, सङ्ग्रहे निमित्तमिति। तथाऽपि समवायसम्बन्धावच्छिन्नकार्यतावैशिष्ट्यमत्र गुणत्वव्याप्यव्याप्यजातौ विवक्षितम्। वैशिष्ट्यं च स्वनिरूपितनिमित्तकारणतावद्वृत्तित्व–स्वकालीनकार्यतानिरूपितासमवा-यिकारणतावद्वृत्तित्वोभयसम्बन्धेन। तथा च सर्वत्र लक्षणसमन्वयः। रूपादेश्च स्वध्वंसप्रत्यक्षयोर्नि मित्तकारणत्वेऽपि तत्र प्रतियोगित्वविषयत्व एव कार्यतावच्छेदकः सम्बन्धः, धर्मादिजन्यत्वेऽपि च तत्र कालिक एव तथेति नाऽतिव्याप्तिरिति ध्येयम्। अथैव स्नेहेऽतिव्याप्तिर्दुर्वारा, तस्य पिण्डीभावे निमित्त-कारणत्वात्, स्नेहेऽसमवायिकारणत्वाच्च। न च गुणेतरनिरूपितनिमित्तकारणतावद्वृत्तित्वमपि जातौ विशेषणं देयम्, तथा च स्नेहस्य दहनानुकूलतया द्रव्यनिमित्तकारणत्वान्नाऽतिव्याप्तिरिति वाच्यम्। एवं सति तुरीतन्तुसंयोगादेरपि पटं प्रति निमित्तकारणतया तत्राऽव्याप्तिप्रसङ्गादिति चेन्न। गुणेतरासम-वायिकारणभिन्नं यद्गुणेतरनिष्ठसमवायसम्बन्धावच्छिन्नकार्यतानिरूपितनिमित्तकारणतावत्तदवृत्तित्व स्यैव जातौ स्वातन्त्र्येण निवेशनीयत्वात्। स्नेहस्य तथाविधनिमित्तकारणतया च नाऽतिप्रसङ्गः। गुणे-तरासमवायिकारणभिन्नत्वं च गुणेतरासमवायिकारणजातीयभिन्नत्वं, सा जातिश्च गुणत्वव्याप्यजात्या बोध्यं, नाऽतस्तुरीतन्तुसंयोगस्य कुत्राऽपि गुणभिन्नेऽसमवायिकारणत्वाभावेनाऽव्याप्तिरिति केचित्। अन्ये तु कार्ये एकाश्रितत्वं विशेषयन्ति।

वस्तुतस्तु पूर्वोक्तयुक्तया स्नेहे द्विविधकारणत्वमेव न प्रसज्यते, द्रवत्वादौ वा न न प्रसज्यत इति नाऽतिव्याप्त्यव्याप्ती। न चैवं **'अभिघाते निमित्तं' 'सङ्ग्रहे निमित्तम्'** इत्यादिगुरुत्वाद्यनिष्ठव्याप्ति-कारणपरग्रन्थविरोधः, भवदुक्तरीत्या तत्राऽभिघातादिनिमित्तकारणत्वस्यैवाऽप्रसक्तेरिति वाच्यम्। तद्ग्र न्थस्योल्लिखितप्रथमपक्षाभिप्रायवता केनाऽपि कल्पितत्वात्। अस्मन्मते तु **'अभिघातादौ'** इति रीत्याऽऽ-देपदघटित एव पाठः। तेन च बहुव्रीहिबलादभिघातजन्यक्रियालाभः। **'सङ्ग्रहे'** इत्यत्राऽप्यादिपद-घटितस्यैव पाठस्यास्मदनुमतत्वेन तत्राऽप्यतद्गुणस्य वज्ञानबहुव्रीहिबलात्पूर्वापदर्शितप्रचिततूलपिण्डा-भेदव्याप्तिसम्पादकजलक्रियालाभः। यद्वा तत्पाठप्रामाण्येऽपि नाऽस्मदुक्तार्थक्षतिः। अभिघातसङ्ग्रहशब्द योरेव **'अभितो घातः–प्रचलनं यस्मात्' 'सम्यक् ग्रहोऽभिव्याप्तिर्यस्मात्'** इति व्युत्पत्तिबलेन तूलपिण्डा-भेदव्याप्तिजनकक्रियाऽभिघातजन्यक्रिययोर्लाभ इति विभावनीयम्।

युवमग्रेऽपीति। प्रादेशिकगुणत्वं संयोगादीनां साधर्म्यमुक्तं, तत्राऽपि प्रादेशिकसजातीयत्वरूपमेव लक्षणं निर्वक्तव्यम्। तेन विभुविशेषगुणान्तर्गतानां भगवद्विशेषगुणानां मूलोक्तानां प्रादेशिकत्वविर-

चक्षुर्ग्राह्यं भवेद्रूपं, द्रव्यादेरुपलम्भकम् ।

प्रादेशिकः—अव्याप्यवृत्तिः ॥९७॥९८॥९९॥ इत्यव्याप्यवृत्तिगुणकथनम् ॥

चक्षुरिति । रूपत्वजातिस्तु प्रत्यक्षसिद्धा । रूपशब्दोल्लेखिनी प्रतीतिर्नाऽस्तीति चेन्माऽस्तु रूपशब्दप्रयोगः, तथाऽपि नीलपीतादिष्वनुगतजातिविशेषोऽनुभवसिद्ध एव, रूपशब्दाप्रयोगेऽपि नीलो वर्णः पीतो वर्ण इति वर्णविशे-

दिनकरी ।

वाच्यम् । ध्वंसप्रत्यक्षातिरिक्तं प्रत्यकारणत्वस्योक्तत्वात् ।

विस्तरस्त्वन्यत्राऽनुसन्धेयः । इति द्विविधकारणगुणकथनम् ॥

मुक्तावल्यां 'अव्याप्यवृत्तिः' इत्यस्य दैशिकेत्यादिः, तेन रूपादौ नाऽतिव्याप्तिः ॥ ९७ ॥ ९८ ॥ ९९ ॥ इत्यव्याप्यवृत्तिगुणकथनम् ॥

रामरुद्री ।

हेऽपि न क्षतिरिति भावः । **उक्तत्वादिति** । अन्यथा द्विविधकारणत्वस्य कर्मण्यपि सम्भवेन तत्राऽतिव्याप्त्यापत्तेः । 'परत्वापरत्वबुद्धित्वबुद्धिपृथक्त्वादीनामकारणत्वम्*' इति भाष्यविरोधापत्तेश्चेति भावः । इदमुलक्षणम् । स्वध्वंसप्रत्यक्षयोः कारणत्वेऽपि तयोः कुत्राऽप्यसमवायिकारणत्वविरहेणैवमपि तत्राऽव्याप्तेर्दुर्वारत्वापत्तेश्चेति । एतदेवाऽभिसन्धायाऽऽह । **विस्तरस्त्विति** । **अन्यत्र**—आकरे । वस्तुतस्तु—

परापरत्वबुद्धित्वादिपृथक्त्वादिके पुनः । अकारणत्व साधर्म्यं विद्वद्भिः परिकीर्तितम्—'

इत्यंशपूरणेन साधर्म्यान्तरव्यवस्थापनसम्भवादुत्तरभागस्य लुप्तत्वसम्भावनैव गरीयसीति विभावनीयम् । ॥ इति द्विविधकारणगुणकथनम् ॥

दैशिकेतीति । कालानवच्छिन्नसम्बन्धेनेत्यर्थः । स्वप्रतियोगितावच्छेदकसम्बन्धेन स्वप्रतियोगिमत्ताबुद्धिविरोधितावच्छेदकविषयितावच्छेदकीभूतकालानवच्छिन्नसम्बन्धेन स्वप्रतियोग्यधिकरणे वर्तमानत्वमित्यर्थः पर्यवसितः । **रूपादाविति** । **आदिना** कर्मादेः परिग्रहः ॥२९॥ ॥ इत्यव्याप्यवृत्तिगुणकथनम् ॥

इति श्रीरामरुद्रभट्टाचार्यविरचितायां राजेश्वरशास्त्रिप्रपूरितायां महामहोपाध्यायजटाशंकरपाठकसूनुश्रीलक्ष्मणशास्त्रिसंशोधितायां मुक्तावलीप्रकाशनरश्मिव्याख्यायां गुणसाधर्म्यवैधर्म्यनिरूपणाख्यो नवमस्तरङ्गः ।

साधर्म्यवैधर्म्ये निरूप्याऽवसरः प्रत्येकं लक्षयिष्यन्नादौ निर्वक्तव्यस्य रूपत्वस्य लक्ष्यतावच्छेदकं निर्वक्ति मुक्तावल्याम्—**रूपत्वजातिस्त्विति । प्रत्यक्षेति** । सर्वेषु रूपेषु रूपपदशक्तिग्रहायाऽवश्यकल्पनीयायाः सकलरूपोपस्थितेर्निर्वाहायाऽवश्यकल्प्यसामान्यलक्षणाजन्यप्रत्यक्षेत्यर्थः । तथा च सकलरूपेषु एकस्या जातेः सत्त्व एव तज्ज्ञानरूपसामान्यलक्षणया सकलरूपप्रत्यक्षसम्भवात् तन्निर्वाहाय रूपत्वजातिरवश्यमेव कल्पनीयेति भावः । अत्र रूपनिष्ठविशेष्यतासम्बन्धेन रूपत्वप्रकारकप्रत्यक्षं प्रति स्वविषयसामान्यवत्त्वसम्बन्धेन रूपत्वज्ञानं कारणमिति तादृशकारणतायां विषयविधयाऽवच्छेदकतया तत्सिद्धिरिति ध्येयम् । ननु रूपशब्देन सर्वरूपोपस्थितिर्यदि भवेत्तर्हि तदर्थं रूपपदशक्तिज्ञाननिर्वाहाय रूपत्वसामान्यकल्पनमावश्यकं युक्त्यनपेतं च स्यात्, तदेव तु नेति कथं रूपत्वजातिसिद्धिमम्भव इत्याशङ्क्यते । **रूपशब्देति** । रूपशब्दप्रतिपाद्यत्वोल्लेखिनी प्रतीतिर्नाऽस्तीति वाक्यार्थः । प्रमेति शेषः । उत्तरयति । **माऽस्त्विति** । ननु तर्हि कथं रूपत्वजातिः सेत्स्यति ? तत्साधकव्यवहाराभावादित्यत आह । **तथाऽपीति** । तथा च व्यवहारस्याऽभावेऽपि प्रत्यक्षेणैव तत्सिद्धिर्निर्वहतीति भावः । प्रत्यक्षे प्रमाणाभावमाकलय्य शब्दविशेष्यव्यवहारमपि प्रदर्शयति । **रूपेत्यादि** । तथा च प्रत्यक्षे वर्णशब्दप्रयोगः प्रमाणमस्त्येवेति भावः । इदं च रूपशब्दव्यवहारस्य स्वरूपादावतिप्रसङ्गमाकलय्योक्तम् । वर्णशब्दस्तु चातुर्वर्ण्यादिप्रतिपादकोऽपि रूढया न तथेति नाऽतिप्रसङ्ग इति मन्तव्यम् । प्रसङ्गादग्रे निरूपणीयानां नील-

* प्रशस्तपादभाष्यम् । गुणनिरूपणम् ।

बोल्लेखिनी प्रतीतिरस्त्येव । एवं नीलत्वादिकमपि प्रत्यक्षसिद्धम् ।

॥ इति रूपत्वजातिसाधनम् ॥

न चैकैका एव नीलाद्यणादि(१)व्यक्तय इत्येकव्यक्तिवृत्तित्वान्नीलत्वादिकं न जातिरिति वाच्यम् । नीलो नष्टो रक्त उत्पन्न इत्यादिप्रतीतेर्नीलादे-

दिनकरी ।

'नीलत्वादिकं' इत्यादिना रक्तत्वादिपरिग्रहः । इति रूपत्वजातिसाधनम् ॥

रामरुद्री ।

त्वादीनामपि सत्त्वे प्रमाणमाह—**एवमित्यादिना** । ननु अत्राऽऽदिपदेन रसत्वादिपरिग्रहे 'एतेन रसत्वादिकमपि व्याख्यातम्-'इत्यग्रिममूलासङ्गतिरित्यत आदिपदग्राह्यं स्फुटयति टीकायाम्—**नीलत्वादीत्यादिना । इदं तु बोध्यम् ।** सकलानुगतस्य प्रत्यक्षस्याऽनुद्भूतरूपादौ विवादग्रस्ततया नैतादृशयुक्त्या रूपत्वादिजातिसाधनसम्भवः, किन्तु रासनत्राणजस्पार्शनप्रतिबन्धकतावच्छेदकतया रूपत्वजातिसिद्धिः । अन्यथा रसनादिसयुक्तसमवायस्य रूपेऽप्यत्वतत्वेन तत्राऽपि तत्कार्यस्य विषयतासम्बन्धेन रासनस्याऽऽपत्तेः । इदानीं तु लौकिकविषयतासम्बन्धेन रासनादिकं प्रति रूपत्वादिना प्रतिबन्धकत्वान्नैष दोषः । न च रासनत्वावच्छिन्नं प्रति रूपगन्धस्पर्शानुगतजातिविशेषावच्छिन्नस्य प्रतिबन्धकत्वकल्पने लाघवान्न निरुक्तप्रतिबध्यप्रतिबन्धकभावबलेन रूपत्वजातिसिद्धिसम्भव इति वाच्यम् । एवं सति त्राणजप्रतिबन्धकतावच्छेदकतया रूपरसस्पर्शानुगतजातिविशेषस्याऽपि कल्पनीयत्वापत्त्या तादृशजात्या सहैतज्जातेः साङ्कर्यप्रसङ्गात् । चाक्षुषत्वावच्छिन्नं प्रत्युद्भूतरूपत्वेन कारणतया वा तत्सिद्धिः । न च तस्याऽनुद्भूतरूपसाधारण्ये किं मानमिति वाच्यम् । समानाग्निसंयोगजनितत्वस्यैव मानत्वात् । न चैवमपि नीलत्वादिजातौ किं प्रमाणमिति वाच्यम् । अयसा हरीतकीसारादेः संमेलनाद्विलक्षणतेजःसंयोगबलेन कृष्णादिरूपोत्पत्तेरनुभवसिद्धत्वेन तज्जन्यतावच्छेदकतयैव तत्सिद्धेः । न चैवमपि तस्याऽनुद्भूतसाधारण्ये किं मानमिति वाच्यम् । पाकवशात्कृष्णादिरूपोत्पत्तेरनुभवसिद्धत्वेन पाकस्य च विलक्षणोष्णस्पर्शवदग्निसंयोगरूपतया तस्याऽनुद्भूतरूपवद्वस्तुष्वप्युत्पत्तौ बाधकाभावेन तत्राऽपि तत्सिद्धेः । न चैवमपि पाकजनील एव तादृशी जातिः सिद्धयति, नाऽपाकज इति वाच्यम् । समवायेन नीलत्वावच्छिन्नं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन नीलस्य कारणतया तत्सिद्धेरावश्यकत्वात् । न च नीलत्वस्यैवाऽसिद्धौ तादृशकार्यकारणभावेऽपि मानाभाव इति वाच्यम् । न हि सामान्यतो नीलत्वमसिद्धं येनैवं स्यात्, किन्तु क्वचिद्व्यक्तौ, प्रत्यक्षयोग्ये तु सिद्धयत्येव, तथा च न कार्यकारणभावोऽसिद्धः । इयमेव रीतिरग्रेऽप्यनुसर्तव्या । विवेचयिष्यते चेदमुपरिष्टात् ।

प्राञ्चस्तु रूपं रूपमिति प्रत्यक्षविषयतया रूपत्वजातिसिद्धिः, न हि तत्र चक्षुर्ग्राह्यत्वं विषय इति वक्तुं शक्यम्, रूपत्वादिसिद्धावेव तद्ग्राह्यजकतया चक्षुरादीन्द्रियस्याऽपि साधनीयत्वादित्याहुः ।

चक्षुर्ग्राह्यत्वं सकलरूपानुगतमनुगतं वा ? आद्येऽनुगतप्रतीत्यनुपपत्तिः, द्वितीये त्विष्टापत्तिरिति कन्दलीकाराः । विषयताया विषयतावच्छेदकरूपत्वे इष्टापत्तिः, विषयरूपत्वे त्वननुगमः, इति च तदभिप्रायो बोध्यः । इति रूपत्वजातिसाधनम् ॥

सामान्यलक्षणाजन्यप्रत्यक्षनिर्वाहाय कल्प्यमानो धर्मो बाधकाभावाज्जातिरिति वक्तव्यम्, बाधकाभाव एव तु नेत्याशङ्कते मूल—**न चेत्यादिना । एकैका इति ।** स्वाश्रयत्व-स्वाश्रयप्रतियोगिकभेदवत्त्वोभयसम्बन्धेन नीलत्वादिशून्या इत्यर्थः । **आदिना** पीतादिपरिग्रहः । **नीलो नष्ट इति ।** तथा च घटनीलः पटनीलाद्भिद्यते, पटनीलध्वंसाधिकरणकालवृत्तित्वादितिरीत्या नीलरूपाणां नानात्वं साधनीयमिति भावः । नीलो नष्ट इत्यादिप्रतीतेस्तत्समवायध्वंसविषयकतया नीलध्वंसादेरप्रामाणिकत्वान्निरुक्ता-

---

(१) 'नीलरूपादि' इति पाठान्तरम् ।

त्पादविनाशशालितया नानात्वात्, अन्यथा एकनीलनाशे जगदनीलता(१)मापद्येत । न च नीलसमवायरक्तसमवाययोरेवोत्पादविनाशविषयकोऽसौ प्रत्यय इति वाच्यम् । प्रतीत्या समवायानुल्लेखात् । न च स एवाऽयं नील इति प्रत्यभिज्ञाबला(२)ल्लाघवाच्चैक्यमिति वाच्यम् । प्रत्यक्षस्य तज्जातीय(३)विषयत्वात्, सैवेयं गुर्जरीतिवत्, लाघवं तु प्रत्यक्षबाधितं, अन्यथा घटादीनामप्यैक्यप्रसङ्गात्, उत्पादविनाशबुद्धेः समवायालम्बन(४)त्वापत्तेरिति । एतेन रसादिनकरी ।

अन्यथा–नीलादी(५)नामेकव्यक्तित्वे । ननु लाघवादेव नीलारुणादिव्यक्तयैक्यं सेत्स्यतीत्यत आह । लाघवं त्विति । प्रत्यक्षबाधितमिति । नीलो नष्टो रक्त उत्पन्न इत्यादिप्रत्यक्षबाधितमित्यर्थः । अन्यथेति । लाघवमात्रेण नीलारुणादीनामैक्याभ्युपगमे इत्यर्थः । ननूत्पन्नो घटो विनष्टो घट इत्यादिप्रतीतेर्न घटादेरैक्यमित्यत आह । उत्पादेति ।

एतेन ईदृशजातिसाधकप्रमाणेन । रसादिकं—रसत्वादिकम् । आदिना गन्धत्वादि रामरुद्री ।

नुमाने हेत्वसिद्धिरित्याशङ्कते । न चेति । उत्तरयति । प्रतीत्येति । नील नष्ट इति प्रतीत्या ध्वंसप्रतियोगितया समवायस्याऽविषयीकरणादित्यर्थः । यत्र भूतलादौ घटादिकमपसारितं पुनरानेतं च, तत्र घटानयनसमये घटाभावो नष्ट इति प्रतीतेः सम्बन्धानुल्लेखित्वेन सम्बन्धध्वंसाग्रहगाहित्वस्य कल्पयितुमशक्यत्वेऽपि यथा तत्र नशधात्वर्थः केवलाभाव एवाऽऽश्रीयते, भूतले घटाभावो नष्ट इति प्रतीतिश्च घटाभावे भूतलनिष्ठाभावप्रतियोगित्वावगाहितयोपपद्यते, अन्यथा घटाभावस्य ध्वंसोत्पादयोरवगाहनासम्भवात्, घटाभावस्य चैक्यं लाघवात्प्रत्यभिज्ञाबलाच्चाऽभ्युपेयते, तथेहाऽपि नीलो नष्ट इति प्रतीतिरपि नीलादौ केवलात्यन्ताभावप्रतियोगित्वावगाहितयैव चरितार्था स्यात्, लाघवेन प्रत्यभिज्ञानश्च सिद्धस्य नीलादेरैक्यस्य प्रतिक्षेप्तुमशक्यत्वादित्यभिप्रायवान् शङ्कते । न च स एवाऽयमिति । ननु स एवाऽयं नील इति प्रतीत्या न तन्नीलैक्यन्नीलयोरभेदो विषयीक्रियते, अन्यथा नीलनीलतरादिव्यवहारविरोधप्रसङ्गात्, किं तु तत्सजातीयत्वमेवेति न नीलव्यक्तीनामैक्यसिद्धिरित्याशङ्कानिरासाय हेत्वन्तरमाह । लाघवाच्चेति । घटाभावादेरिवेति शेषः । नीलनीलतरादिप्रतीतिश्च रूपान्तरासम्भेदविषयकतयैवोपपादनीयेति भावः । क्रमेणोत्तरयति । प्रत्यक्षस्येति । अन्यथा नानात्वव्यवहारविरोधप्रसङ्गादिति भावः । द्वितीयं हेतुमपि निरस्यति । लाघवं त्विति । टीकायाम्–नीलो नष्ट इत्यादि । ध्वंसविषयकेत्यादिः । तथा च निरुक्तप्रतीतेर्ध्वंसविषयकतायाः सर्वाभ्युपेतत्वेन नाऽत्र घटाभावो नष्ट इत्यत्रेवाऽभावविषयकत्वकल्पनं युक्तमिति भावः । अन्यथेतीति । ऐक्याभ्युपगमे इति । तत एव च कारणात् नीलो नष्ट इति प्रतीतेरभावमात्रविषयकत्वस्य कल्पने चेति शेषः । मूले–ऐक्यप्रसङ्गादिति । तथा च लाघवादेव घटादीनामप्यैक्यसिद्धौ घटो नष्ट इत्यादिप्रतीतेरपि अभावमात्रविषयकत्वस्यैव कल्पनीयत्वप्रसक्त्या ध्वंसप्रागभावादेरेवाऽपलापापत्तिरिति भावः । ननु न वयं नष्ट इति प्रतीतेरभावमात्रविषयकत्वं कल्पयित्वा नीलादीनामैक्यमुपपादयामः, येन ध्वंसप्रागभावयोरेव जगत्यकल्पनीयत्वापत्तिः सम्भाव्येत, किं तु नष्ट इत्यस्य नाशप्रतियोगिसम्बन्धप्रतियोगित्वमर्थं कल्पयाम इति न दोषः, प्रत्ययार्थस्यैतादृशस्य कल्पने बाधकाभावात् । एवं च अभावस्थलेऽपि वैशिष्ट्याख्यसम्बन्धस्य तथाविधस्य स्वीकरणान्नष्ट इति प्रत्ययोपपत्तिरित्याशङ्क्याऽऽह । उत्पादेति । समवायालम्बनत्वापत्तेरिति । यद्यप्यत्र वादिनेष्टापत्तिः कर्तुं शक्या,

(१) 'दनीलं' इति पाठान्तरम् । (२) 'प्रत्यक्षा' इति पाठान्तरम् ।
(३) 'तज्जातीयत्व' इति पाठान्तरम् । (४) 'समवायावलम्बन' इति पाठान्तरम् ।
(५) 'नीलत्वादौ, इति पाठान्तरम् ।

दिकमपि व्याख्यातम् । ॥ इति नीलादिरूपाणामैक्यखण्डनम् ॥

दिनकरी ।

परिग्रहः । ॥ इति नीलादिरूपाणामैक्यखण्डनम् ॥

रामरुद्र ।

तथाऽपि समवायस्यैकत्वग्राहकप्रमाणविरोध एवाऽत्र दोषोऽभिप्रेत इति न दोषः ।

इदमत्र बोद्धव्यम् । वादिना खलु रूपाणामैक्यं नाऽऽशङ्क्यते, तत एतज्ज्ञातुं शक्यं यदस्य भेदगोचरा प्रतीतिर्नीलपीतयोर्भेदसाधकत्वेनेष्टेति । तर्हि नीलादिव्यक्तयैक्यमपि कथमाशङ्क्तुमयं पारयेत् ? दृश्यते हि तरतमभावापन्नानां नीलव्यक्तीनामप्यनेकता । न च रूपान्तरासम्भेदविषयिण्येव सा प्रतीतिरिति वाच्यम् । नीलतमव्यवहारस्य तथोपपादनसम्भवेऽपि नीलनीलतरादिव्यवहाराणां विजातीयरूपमनभ्युपगम्य सङ्गमयितुमशक्यत्वात् । किं तर्हि ? अवयवरूपतोऽवयविरूपस्याऽभेद एव सिषाधयिषितः । अवयवरूपस्याऽवयविरूपतो भेदस्तु परमते नाऽनुभवसिद्ध इति तदाशङ्कनं न सन्दर्भविरुद्धम् । यत्र तु नीलरूपव्यक्तीनामत्यन्तसजातीयानां भिन्नभिन्नावयविव्यक्तिवर्तिनीनामपि ऐक्यमनुभूयते, तत्र तयोरैक्यमिष्यत एव, अन्यत्र पुनर्विभिन्नावयवकव्यक्तीनां रूपवैलक्षण्यमानुभविकमेवेति । अत्र च मते नीलव्यक्तीनां नित्यत्वं स्वीक्रियते, ततश्च तेषां नित्यत्वे सत्यनेकसमवेतत्वरूपजातिलक्षणवत्त्वात् जातित्वम् । तत्सिद्धिश्च घटतदवयवयोर्नीलो नील इत्यनुगतप्रतीतेरेव । तथा च नीलत्वावच्छिन्नं प्रति नीलादेर्न स्वसमवायिसमवेतस्वसम्बन्धेन हेतुता, किं तु नीलावच्छिन्नं प्रति तादात्म्येन नीलस्य । पाकस्थले च वह्निना नीलपरमाणुव्यक्तीरपसार्य रक्तपरमाणव उपचीयन्त इत्येवाऽङ्गीकारः । न चाऽनया रीत्या घटादीनामप्यैक्यप्रसक्तौ ध्वंसप्रागभावोच्छेदापत्तिरिति वाच्यम् । इष्टत्वात् । न चैवं नीलादिजात्या घटत्वादीनां सङ्करप्रसङ्ग इति वाच्यम् । नीलादिव्याप्यस्य घटत्वादेर्घटत्वादिव्याप्यस्य नीलादेश्चाऽङ्गीकरणीयत्वात् । न च नीलत्वघटत्वादीनां बाहुल्ये तत्तद्घटत्वावच्छिन्नं प्रति तत्तत्कपालत्वेन तत्तन्नीलावच्छिन्नं प्रति तत्तन्नीलत्वेन हेतुहेतुमद्भावापत्तावनन्तकार्यकारणभावापत्तिरिति वाच्यम् । समनियतजात्योः परस्परं भेदे मानाभावात् तादृशविलक्षणघटत्वनीलयोरभेदात् । न चैवमपि तादृशविलक्षणनीलघटत्वावच्छिन्नं प्रति विलक्षणनीलकपालत्वादिना हेतुत्वकल्पने एव गौरवम् । यतो हि अस्मन्मते नीलत्वावच्छिन्नं प्रति नीलत्वेन कारणत्वमेकं, घटत्वावच्छिन्नं प्रति कपालत्वेन चैकमिति द्वयमेव कल्पनीयम् । भवन्मते तु नीलघटत्वावच्छिन्नं प्रति नीलकपालत्वादिना बहुविधकार्यकारणभावकल्पनाया आवश्यकत्वादिति वाच्यम् । अस्मन्मत एव विपरीतलाघवात् । तत्तद्वैलक्षण्यस्य रूपनिष्ठस्य भवतामप्यनुमतत्वेन तत्तद्विलक्षणनीलपीतादिरूपं प्रति तत्तद्विलक्षणनीलपीतादीनां हेतुत्वं भवद्भिः कल्पनीयम्, घटत्वाद्यवच्छिन्नं प्रति कपालत्वादिना कार्यकारणभावान्तरं चेति गौरवम् । अस्मन्मते तु तत्तद्विलक्षणनीलपीताद्यवच्छिन्नं प्रति तत्तद्विलक्षणनीलपीताद्यवच्छिन्नस्य हेतुत्वकल्पनयैव निर्वाहः, घटत्वस्यैकस्य सकलघटसाधारण्याभावेन तत्तद्विलक्षणनीलादिस्वरूपताया एव स्वीकृतत्वात् । तथा च घटत्वाद्यवच्छिन्नं प्रति कपालत्वादिना कार्यकारणभावान्तराकल्पनप्रयुक्त लाघवमबाधितमेव । न च स्वन्मते स्वाऽस्मन्मतेऽपि तत्तद्विजातीयकपालादिसयोगव्यक्तीनां घटादिषु हेतुत्वमावश्यकम् । तथा च तेनैव घटोत्पादनियमोपपत्तौ न घटत्वाद्यवच्छिन्नं प्रति कपालत्वादिना कार्यकारणभावोऽस्माभिरभ्युपेयत इति वाच्यम् । घटादौ कपालादीनां हेतुत्वस्य प्रामाणिकव्यवहारसिद्धत्वात् । अथ वा घटत्वादिव्याप्या नीलादिजातय एव नानाऽभ्युपेयन्ते । न तु नीलादिव्याप्यं घटत्वमपि, सर्वेषु घटेषु समानाकारप्रतीत्यनुपपत्त्या तथा स्वीकारस्याऽशक्यत्वात् । एवमपि भवन्मतापेक्षया लाघव दुर्वारमेव, भवन्मतेऽपि तत्तदवयविरूपेषु इतरावयविनिष्ठरूपवैलक्षण्यप्रतीतेस्तत्तदवयव्यवयवरूपतोऽवैलक्षण्यप्रतीतेश्चोपपादनाय प्रत्येकमवयवावयविसमूहे यद्रूपं, तस्येतरावयविसमूहतो वैलक्षण्यस्याऽवश्याभ्युपेयत्वेन तत्तद्वैलक्षण्यावच्छिन्ननीलादिव्यक्तिं प्रति तत्तद्वैलक्षण्यावच्छिन्ननीलादिव्यक्तेः स्वसमवायिसमवेतत्वसम्बन्धेन, घटत्वावच्छिन्नं प्रति कपालस्य तादात्म्येन हेतुत्वं च स्वीकर्तव्यम् । तदपेक्षयाऽस्मन्मते तत्तद्विलक्षणरूपावच्छिन्नं प्रति तत्तद्विलक्षणरूपावच्छिन्नस्य

चक्षुषः सहकारि स्यात्, शुक्लादिकमनेकधा ॥ १०० ॥

चक्षुर्ग्राह्यमिति । चक्षुर्ग्राह्यविशेषगुण इ(१)त्यर्थः । एवमग्रेऽपि । द्रव्यादेरिति । उपलम्भकं—उपलब्धिकारणम् ।

दिनकरी ।

संयोगादावतिव्याप्तिमाशङ्क्याऽऽह—चक्षुर्ग्राह्यमितीति । चक्षुर्ग्राह्यमित्यस्येत्यर्थः । तेन 'चक्षुरिति' इति प्राक् प्रतीकधारणेऽपि न पौनरुक्त्यम् । विशेषगुणत्वमिति । विलक्षणगुणत्वमित्यर्थः । वैलक्षण्यं च चक्षुर्भिन्नाग्राह्यत्वम् । न च तथाऽपि प्रभाभित्तिसंयोगेऽतिव्याप्तिरिति वाच्यम् । चक्षुर्मात्रग्राह्यत्वस्य चक्षुर्मात्रगृहीतस्नेहविशेषेऽतिव्याप्त्यापत्त्या चक्षुर्मात्रग्राह्यत्वस्य जातिविशेषणत्वं स्वीकृत्य चक्षुर्मात्रग्राह्यजातिमद्गुणत्वविवक्षणस्याऽऽव-

रामरुद्री ।

तादात्म्येन, कपालस्य च घटत्वावच्छिन्नं प्रति तादात्म्येन हेतुतेति तादात्म्यसम्बन्धावच्छिन्नैव कारणतार्द्वयी कल्पनीयेति लाघवानपायात् । किं च नीलव्यक्तिकल्पनाधिक्येन कार्यकारणभावकल्पनाधिक्यमपि भवन्मते गौरवाय, अन्यथा एकरूपव्यक्तेरपररूपोत्पादापत्तेरपरिहार्यत्वात्, अस्मन्मते तु कपालादिरूपव्यक्तेर्घटीयरूपव्यक्तितोऽभिन्नतया तादृशविशेषकार्यकारणभावकल्पनाऽभावाल्लाघवमबाधितमेव । न च स्वया घटत्वव्याप्याया नीलादिजातेर्घटादावेवाऽभ्युपगमेन तस्यास्तदवयवेष्वप्रसक्त्या तद्गतस्य तद्गटावयवतुल्यरूपत्वं न सम्भवतीति वाच्यम् । घटत्वस्य कपालादिष्वभ्युपगमेन तादृशविलक्षणनीलरूपस्य तत्र सत्त्वे बाधकाभावात् । न च घटत्वस्य कपालेऽभ्युपगमे कपालसंयोगविरहदशायां कपाले घटप्रत्यक्षापत्तिरिति वाच्यम् । कपालसंयोगादेर्घटत्वव्यञ्जकत्वोपगमात् । वस्तुतस्तु नीलादेर्जातित्वं न शङ्कास्पदम्, तेषां नित्यत्वे सत्यनेकसमवेतत्वेऽपि अनुगतव्यञ्जकव्यङ्ग्यत्वरूपतन्मतसिद्धजातिलक्षणघटकविशेषणशून्यत्वात्, तथात्वेऽपि वा साङ्कर्यभयबाधकमेव जाताविति न घटत्वादिव्याप्यनीलत्वानङ्गीकारेऽपि दोष इति ।

मैवम् । नीलनीलतरादिभेदेन यावत्यो जातयः सन्ति तावतीनां सर्वासामग्निसंयोगप्रयोज्यतावच्छेदकत्वमपि स्वीकरणीयम् । एवं चोद्भूतरूपवद्द्रव्यस्थलेऽपि तत्तन्नीलावच्छिन्नानां परमाणूनां भवदुक्तपाकजप्रक्रियया पचयोऽवश्यं स्वीकरणीयः, तथा चाऽनुद्भूतस्य घ्राणादे रूपप्रत्यक्षापत्तिः, तत्र चक्षुःसन्निकर्षानपायात् । न च चाक्षुषं प्रति तत्तन्नीलव्यक्तीनां प्रतिबन्धकत्वकल्पनान्नैवमिति वाच्यम् । तथासति घटादिरूपस्याऽपि प्रत्यक्षानुपपत्तेः, घटादिरूपस्याऽनुद्भूतरूपवत्त्वरूपतोऽवैलक्षण्यात् । न च घ्राणादिषु रूपमेव नाऽङ्गीक्रियते, रूपावच्छिन्नं प्रति घ्राणारम्भकावयवानां तत्तद्व्यक्तित्वेन प्रतिबन्धकत्वोपगमाच्च न अग्निसंयोगवशात्तत्र रूपवद्द्रव्योत्पादापत्तिरिति वाच्यम् । घ्राणावयवेषु तादृशद्रव्यानारम्भात्, अग्निसंयोगवशाद्घटादिपाकजस्थल इव नासिकाग्रेऽपि रूपवत्परमाणुपचयद्वारा रूपवद्द्रव्यविशेषोत्पादापत्तेरेव दीयमानत्वात् । किं च भवन्मते घ्राणाद्यवयवानां निरुक्तरीत्याऽनन्तप्रतिबध्यप्रतिबन्धकभावकल्पने गौरवमिति ध्येयम् ॥ इति नीलादिरूपाणामैक्यखण्डनम् ।

टीकायाम्—वैलक्षण्यं चेति । ननु विशेषगुणत्वमत्र पूर्वनिरुक्तमेव निवेशनीयम्, न तु चक्षुर्भिन्नाग्राह्यत्वरूपम्, तद्विशेषणनिवारणीयायाः संयोगातिव्याप्तेस्तथा सत्यवारणादित्याशङ्क्याह: पूर्वनिरुक्तविशेषगुणत्वनिवेशेऽपि यादृशस्थलेऽतिव्याप्तिस्तत्प्रदर्शनं तद्वारकतयाऽवश्यनिवेशनीयस्य चक्षुर्भिन्नाग्राह्यत्वस्य निवेशादरे च पूर्वनिरुक्तविशेषगुणत्वस्य लक्षणे प्रवेशनमफलम्, संयोगातिव्याप्तेस्तदनुपपत्तेऽपि वारणसम्भवादित्याशयवानाह—न चेत्यादिना । स्नेहविशेष इति । पूर्वोक्तविशेषगुणत्वनिवेशकरणेऽपीति शेषः । तथा च वास्तवविशेषगुणत्वस्येह प्रवेशेऽपि स्नेहेऽतिव्याप्तेर्दुर्वारतया तद्वारकनि-

(१) 'विशेषगुणत्वमि' इति पाठान्तरम् ।

दिनकरी ।

रयकतया तेनैव प्रभाभित्तिसंयोगेऽतिव्याप्तिवारणादिति । प्रभात्वमादाय प्रभायामतिव्याप्ति-वारणाय गुणपदम् । एवमग्रेऽपि-(१) स्पर्शलक्षणेऽप्येषा रीतिर्बोध्येत्यर्थः ।

रामरुद्री ।

शेषणान्तरदाने च तेनैव प्रकृतातिव्याप्तेरपि वारणसम्भवाद्विशेषगुणत्वस्य पूर्वनिरुक्तस्य निवेशो व्यर्थ इति भावः । यद्यपि अनुद्भूतरूपादावव्याप्तिरूपगुरुतरदोषवारणायैव जातिघटितलक्षणानुसरणसार्थक्य-मुपपादयितुं शक्यमिति जातिघटितलक्षणस्य कर्तव्यतोपपादनाय स्नेहेऽतिव्याप्तिप्रदर्शनमनुचितं, तथाऽपि त्वगग्राह्यत्वं धर्मिविशेषणीकृत्य चक्षुर्ग्राह्यजातिमत्त्वगग्राह्यगुणत्वमिति लक्षणपरिष्करणेनाऽपि अनुद्भूत-रूपादावव्याप्तिवारणं सम्भवति, प्रकृते च त्वगग्राह्यत्वमपि जातिविशेषणं यदा भवेत्, तदैव प्रभाभि-त्तिसंयोगातिव्याप्तिवारणं सुशकमिति कारणात् त्वगग्राह्यत्वस्य जातावविशेषणत्वे यादृशो दोषः कथञ्चि-दपि वारयितुं न शक्यस्तथाविधस्यैव प्रदर्शनीयत्वानुसन्धानेन स्नेहविशेषेऽतिव्याप्तिकथनमिति बोध्यम् । नन्वेवं विशेषशब्दस्य विलक्षणवाचकत्वाङ्गीकारे चक्षुर्ग्राह्यजातिमद्गुणत्वमिति लक्षणस्य पर्यवसि-ततया तत्र गुणत्वप्रवेशवैयर्थ्यं दुर्वारम्, तद्व्यावर्तनीयस्य रूपत्वरूपाभावादेर्जातिमत्त्वघटनयैव वार-णसम्भवादित्याशङ्क्याऽऽह-प्रभात्वमिति । अनयैव रीत्या स्पर्शलक्षणेऽपि पदकृत्यमनुसन्धेयमित्याह-एवमग्रेऽपीति । वायुत्वमादाय वायावुष्मत्वमादायोष्मणि वाऽतिव्याप्तिवारणाय तत्र लक्षणे गुणपद-मिति भावः ।

अथैवं त्रसरेणुपरिमाणविशेषेऽतिव्याप्तिः, तस्य त्वगग्राह्यचक्षुर्ग्राह्यस्वनिष्ठापकर्षाख्यवैजात्यविशि-ष्टगुणत्वेन लक्षणवत्त्वात् । न च तादृशविशेषगुणत्वमेव लक्षणमिति न दोष इति वाच्यम् । प्रकृतल-क्षणे विशेषगुणत्वप्रवेशे टीकाकाराननुमतेः प्रागेव व्यवस्थापितत्वादिति चेत् ।

न, अत्र हि त्वगग्राह्यत्वं न त्वाचप्रत्यक्षविषयत्वाभावमात्रम्, तथा सति विषयताया ज्ञानसमान-कालीनत्वेन त्वाचप्रत्यक्षविरहकाले स्नेहत्वादेरपि त्वगग्राह्यत्वप्रसङ्गात्, उक्तरीत्या त्रसरेणुपरिमाणेऽति-व्याप्तेश्च, किन्तु विषयतासम्बन्धावच्छिन्नत्वाचप्रत्यक्षनिष्ठप्रतिबद्ध्यतानिरूपितत्वादात्म्यसम्बन्धावच्छिन्न-प्रतिबन्धकतावत्त्वं, रूपत्वादेर्नीलत्वादेश्च त्वक्संयुक्तसमवेतसमवायवशात्त्वाचप्रत्यक्षवारणाय विषयता-सम्बन्धेन त्वाचप्रत्यक्षं प्रति रूपत्वादेस्तादात्म्यसम्बन्धेन तत्तद्व्यक्तित्वेन प्रतिबन्धकत्वात् तादृशी रूप-त्वादिजातिरेव लक्षणघटिकेति न दोषः । स्नेहत्वादीनां च तादृशं प्रतिबन्धकत्वमप्रामाणिकमिति नाऽति-व्याप्तिः । न च त्रसरेणुपरिमाणनिष्ठापकर्षस्याऽपि त्वक्संयुक्तसमवेतसमवायबलात्त्वाचप्रत्यक्षवारणाय तादृशप्रत्यक्षं प्रति तद्व्यक्तित्वेन प्रतिबन्धकत्वमावश्यकमिति तमादायाऽतिव्याप्तिर्दुर्वारेति वाच्यम् । स्पर्शावृत्तिद्रव्यसमवेतसमवेतस्पार्शनं प्रति त्वक्संयुक्तस्पार्शनवद्द्रव्यसमवेतसमवायस्याऽनुगतहेतुता-यामत्रसरेणुस्नेहादिगतवैजात्यान्तरप्रत्यक्षापत्तेरपि वारणाय लाघवेन स्वीकरणीयतया तादृशहेत्वभावा-देव त्रसरेणुपरिमाणनिष्ठापकर्षस्पार्शनवारणसम्भवे स्पार्शनं प्रति तस्य तद्व्यक्तित्वादिना प्रतिबन्धक त्वासिद्ध्या तस्य त्वाचप्रत्यक्षप्रतिबन्धकपदेन ग्रहीतुमशक्यत्वादतिव्याप्तिविरहात् । एवं च त्वगिन्द्रि-यजन्यप्रत्यक्षप्रतिबन्धकचक्षुर्जन्यप्रत्यक्षविषयजातिमद्गुणत्वमिति लक्षणं पर्यवसितम् । अत्र गुण-त्वानुपादाने न प्रभात्वमादाय प्रभायामतिव्याप्तिः, प्रभायामुद्भूतस्पर्शविरहादेव तत्स्पार्शनस्य तद्वृ-त्तिजातिस्पार्शनस्य च वारणसम्भवेन प्रभात्वादेस्तप्रतिबन्धकत्वाकल्पनेन त्वाचप्रत्यक्षप्रतिबन्धक-तादृशजातिपदेन प्रभात्वस्य धर्तुमशक्यत्वात्, किं तु द्व्यणुकत्वरूपवैजात्यस्य त्वाचप्रत्यक्षेऽप्रतिबन्ध-कत्वे त्वक्संयुक्तसमवायबलात्स्पार्शनापत्त्या तद्वारणायाऽवश्यकल्प्यप्रतिबन्धकताकतया तदादाय द्व्यणु-केऽतिव्याप्तिवारणाय गुणपदोपादानं बोध्यम् । यद्यपि द्रव्यान्यद्रव्यसमवेतस्पार्शनं प्रति त्वक्संयुक्तस्पा-र्शनवद्द्रव्यसमवायस्यैव हेतुत्वोपगमादेव द्व्यणुकत्वादेः स्पार्शनवारणोपपत्त्या तेषां स्पार्शनप्रतिबन्धक-त्वमप्रामाणिकमिति न तदादाय द्व्यणुकेऽव्याप्तिवारकतया गुणत्वोपादानं सार्थकयितुं शक्यते, तथा

(१) 'रसस्पर्शलक्षणे' इति क्वचित् पाठः ।

रामरुद्री ।

ऽपि प्रकृतलक्षणे जातिपदस्य समवायसम्बन्धेन धर्मवत्त्वमात्रबोधकतया नित्यत्वे सत्यनेकसमवेतत्वरूप-जातित्वस्य प्रकृतेऽविवक्षितत्वेन समवेतमात्रग्रहणप्राप्तौ त्वाचप्रतिबन्धकचक्षुर्विषयपदेन द्व्यणुकमेवो-पादीयते, तद्वति द्वयणुकादावतिव्याप्तिवारणाय च गुणपदं बोध्यम् । न हि द्व्यणुकस्य स्पार्शने प्रति-बन्धकत्वमकल्पयित्वा काचिद्गतिरस्ति, त्रसरेणुस्पार्शनापत्तेरितरथा दुर्वारत्वात् । न च द्रव्यस्पार्शने प्रकृष्टमहत्त्वस्य कारणत्वान्न त्रसरेणुप्रत्यक्षप्रसङ्ग इति वाच्यम् । गौरवात्, द्रव्यप्रत्यक्षमात्रे महत्त्वस्य सामान्यतो महत्त्वत्वेनैव रूपेण कारणतयेदृशकार्यकारणभावकल्पनाऽसम्भवादिति सारः । विस्तरस्त्व-न्यत्राऽनुसन्धेयः । केवलप्रत्यक्षप्रतिबन्धकचक्षुर्ग्राह्यजातिमद्गुणत्वमित्युक्तौ सङ्ख्यात्वादिजातिविशेषस्य घ्राणजप्रत्यक्षप्रतिबन्धकत्वेन चक्षुर्ग्राह्यत्वेन च तादृशजातिमद्गुणेऽतिव्याप्तिवारणाय स्पार्शनोपादानम् । न च सङ्ख्यात्वादीनां घ्राणजप्रतिबन्धकत्वे मानाभाव इति वाच्यम् । गन्धसमवेतवृत्तिलौकिकविषयता-सम्बन्धेन घ्राणजत्वावच्छिन्नं प्रति घ्राणसंयुक्तसमवायस्य हेतुतया तस्य सङ्ख्यात्वादावपि सत्त्वेन तत्प्र-त्यक्षवारणाय तेषां प्रतिबन्धकत्वावश्यकत्वात् । सङ्ख्यात्वादीनां च गन्धावृत्तित्वेन गन्धसमवेतवृत्तिलौ-किकविषयतासम्बन्धेन घ्राणजं प्रति प्रतिबन्धकत्वमिति नाऽनन्तप्रतिबध्यप्रतिबन्धकभावकल्पनागौरवम् । न चैवमपि यादृशजातिविशेषस्य स्पार्शनं प्रति प्रतिबन्धकता चक्षुर्ग्राह्यता च, तमादायातिव्याप्तिरिति वाच्यम् । तथाविधस्य त्रसरेणुपरिमाणादिनिष्ठापकर्षस्य प्रागुदाहृतकारणान्तरविरहादेव प्रत्यक्षवारण-सम्भवे तस्य स्पार्शनप्रतिबन्धकत्वाकल्पनात् । न च स्पर्शावृत्तिद्रव्यसमवेतसमवेतस्पार्शनं प्रति स्वर्क्स-युक्तस्पार्शनवद्द्रव्यसमवेतसमवायः कारणमित्यत्र स्पार्शनवत्त्वं न विषयतया स्पार्शनविशिष्टत्वं, तथा सति यादृशावयविन्यक्तीनां कदाचिदपि प्रत्यक्षं न जातं तद्वृत्तिगुणवृत्तिवैजात्यविशेषस्पार्शने व्यभिचा-रापत्तेरिति वाच्यम् । द्रव्यस्पार्शनरहितद्रव्यसमवेतसमवेतस्पर्शावृत्तिधर्मस्पार्शनस्याऽनुभवविरुद्धतया-ऽनुपगमेन व्यभिचाराभावात्, उपलक्षणविषयैव स्पार्शनस्य निवेशे क्षतिविरहाच्च । न च तथाऽपि चतुरणुकपञ्चाणुकादिस्पार्शने व्यभिचारस्तदवस्थ एव, तेषामपि स्पर्शावृत्तिद्रव्यसमवेतसमवेतत्वेन तत्प्र-त्यक्षस्य कार्यतावच्छेदकाक्रान्तत्वाच्छेदकतुभूतस्पार्शनवद्द्रव्यसमवेतसमवायस्य च तत्राऽभावादिति वाच्यम् । स्पर्शावृत्तित्वस्यैव द्रव्यभिन्नत्वस्याऽपि द्रव्यसमवेतसमवेतविशेषणत्वोपगमात् । एवं च चतुर-णुकस्पर्शादिस्पार्शनोपपादनाय द्रव्यसमवेतेत्यत्राऽपि द्रव्यान्यत्वंविशेषणं देयमिति दिक् । अथ वा द्रव्य-समवेतसमवेतस्पर्शावृत्तिधर्मस्पार्शनं प्रति स्वर्कसयुक्तस्पार्शनवद्द्रव्यसमवेतसमवायत्वादिना हेतुत्वं नाऽ-भ्युपेयत एव, त्रसरेणुपरिमाणादिगतवैजात्यप्रत्यक्षस्याऽलीकतयैवाऽऽपादनासम्भवात् । न च स्वर्क्स-युक्तसमवेतसमवायबलाद्घटादिगतपरिमाणादिवृत्तिवैजात्ये जायमानस्य तस्याऽत्राऽऽपत्तिः सम्भवतीति वाच्यम् । परिमाणादिगतवैजात्यप्रभृतिस्पार्शनस्य परिमाणतदाश्रयद्रव्याविषयकस्याऽनुभवविरुद्धतया तदधापकधर्मभूतद्रव्यविषयकस्पार्शनत्वावच्छिन्नजनकसामग्रीविरहादेव प्रकृते तदापादनासम्भवात् । विषयतया स्पार्शनं प्रति द्व्यणुकस्य प्रतिबन्धत्वयाऽत्र स्वाश्रयाश्रयद्रव्ये स्पार्शनसामग्रीविरहात् । न चैवं रीत्या त्रसरेणुपरिमाणवृत्तिवैजात्यस्पार्शनं न भवतु नाम, तथाऽपि त्रसरेणुघटितसन्निकर्षदशायां परि-माणत्वादिस्पार्शनवारणमशक्यमेव, तदाश्रयाश्रये घटे उक्तप्रतिबन्धकविरहादेव सामग्रीसम्भवात् । अतः स्पर्शावृत्तीत्यादिकार्यकारणभावोऽभ्युपगन्तव्य इति वाच्यम् । द्रव्यप्रत्यक्षे प्रतिबन्धकाभावमात्रस्य सामग्रीत्वाभावात्, स्वकसन्निकर्षादेरपि तत्रमानाधिकरणस्याऽऽवश्यकत्वात्, तद्विरहादेव प्रकृते परिमा-णत्वस्पार्शनापत्तिवारणसम्भवात्, तत्सत्त्वस्थले तु परिमाणत्वादिस्पार्शनमप्यभ्युपेयत एव । न च द्रव्याविषयकपरिमाणत्वादिस्पार्शनानुपगमेऽपसिद्धान्त इति वाच्यम् । प्राथमिकनिर्विकल्पकाले तस्य स्वर्कसंयोगादिबलात् द्रव्य तद्गतगुणतदुभयगतवैजात्यादिविषयकस्यैवाऽभ्युपेयतया तदुत्तरं सर्वत्र तादृ-शसकलपदार्थगोचरविशिष्टप्रत्यक्षोत्पत्तौ बाधकाभावेनाऽवश्यमभ्युपगन्तव्यत्वात् । नन्वेवं रूपत्वादेरपि स्पार्शनप्रतिबन्धकत्वे मानाभावः । न च घटान्तर्घटितस्वर्कसंयुक्तसमवेतसमवायबलात् तस्य स्पर्शत्व इव रूपत्वादावप्यापत्तिः सम्भवतीत्यतस्तादृशप्रतिबध्यप्रतिबन्धकभावकल्पनमावश्यकमिति वाच्यम् । एकस-न्निकर्षव्यक्तिदशायां अपरसन्निकर्षदशोत्पन्नप्रत्यक्षव्यक्तेरापत्तिवारणासम्भवेनेदृशकार्यकारणभावस्यैवाऽऽस-

इदमेव विवृणोति। चक्षुष इति। द्रव्यगुणकर्मसामान्यानां चाक्षुषप्रत्यक्षं प्रति उद्भूतरूपं कारणम्। इति रूपलक्षणग्रन्थः।

रामरुद्री।

म्भवादिति चेन्न। एकसन्निकर्षदशायामपरसन्निकर्षजप्रत्यक्षापत्तेर्वारणाय तत्तत्संयोगघटितसंयुक्तसमवायादीनां तदुत्तरप्रत्यक्षे हेतुत्वमभ्युपेयम्। तत एव तद्दोषवारणसम्भवात्। तथा च तत्तत्संयोगघटितसंयुक्तसमवायादे रूपत्वादावपि सत्त्वात्तत्स्पार्शनवारणाय प्रोक्तप्रतिबध्यप्रतिबन्धकभावस्याऽवश्याभ्युपगन्तव्यत्वात्। न च तदर्थसंयुक्तसमवायादेरेव तत्तद्व्यक्तित्वेन हेतुत्वमभ्युपगम्यतामिति वाच्यम्। समवायस्यैकत्वेन तस्य रूपत्वादावपि सत्त्वेनाऽऽपत्तिवारणासम्भवात्। न चैवमेकसंयोगघटितसंयुक्तसमवायादिदशायामेव यत्र प्रत्यक्षचतुष्टयमुत्पन्नं, तत्र प्रथमक्षणे तदितरक्षणोत्पन्नप्रत्यक्षव्यक्त्यापत्तिर्भवन्मते दुर्वारेति वाच्यम्। द्वितीयक्षणोत्पन्नप्रत्यक्षव्यक्तौ प्रथमक्षणोत्पन्नबुद्धेरपि हेतुत्वात्। न चैवमपसिद्धान्त इति वाच्यम्। प्रथमक्षणोत्पन्नविशेषणज्ञानात्मककारणबलादुत्तरक्षणोत्पन्नबुद्धेर्विशिष्टविषयिण्या उत्पादे बाधकासम्भवेन तथैव तत्स्वीकारावश्यकत्वे विशेषणज्ञानविधया प्रथमबुद्धेर्द्वितीयबुद्धौ हेतुत्वस्याभ्युपगन्तव्यत्वात् द्वितीयक्षणोत्पन्नत-द्व्यक्तित्वव्यापकतादृशविलक्षणविशिष्टबुद्धित्वावच्छिन्नजनकविशेषणज्ञानविरहादेव प्रथमक्षणे तदापादनासम्भवादिति। वस्तुतस्तु प्रतिबन्धकत्वस्य कारणीभूताभावप्रतियोगित्वरूपतया कारणत्वस्य कार्यं विना वक्तुमशक्यत्वात्प्रकृतेऽपि स्पार्शनोपादानम्। प्रतिबन्धकत्वं च दोषव्यावृत्तं* ग्राह्यम्। तेन चक्षुर्ग्राह्यवैजात्यस्यापि क्वचित्स्पार्शने दोषविधया प्रतिबन्धकत्वेऽपि न क्षतिः। चक्षुःपदानुक्तौ तादृशजातिमति रसादावतिव्याप्तिरतस्तदुपादानम्। जातिपदानुक्तौ कालिकादिना तादृशधर्मवत्त्वमादायाऽतिप्रसङ्गः स्यादतः समवायेन धर्मवत्त्वनिवेशसूचनाय तदुपादानम्। न च तादृशरूपाभाववति गुणादावतिव्याप्तिवारकतया सार्थक्य किमिति नोच्यत इति वाच्यम्। रूपाभावादेस्त्वगयोग्यत्वेनैव स्पार्शनवारणसम्भवे तेषां त्वाचप्रत्यक्षेऽप्रतिबन्धकत्वेन लक्षणाघटकत्वात्। यद्वा समवायस्य नानात्वे रूपवृत्तित्वविशिष्टगुणत्वप्रतियोगिकसमवायस्य चक्षुर्मात्रग्राह्यत्वेन त्वाचप्रतिबन्धकत्वेन च तदात्मकस्वरूपसम्बन्धरूपसमवायसम्बन्धेन तद्वति रसेऽतिव्याप्तिवारणाय तदुपादानमिति मन्तव्यम्। त्वाचप्रतिबन्धकत्वं धर्मिविशेषणीकृत्य चक्षुर्ग्राह्यधर्मवत्त्वाचप्रत्यक्षप्रतिबन्धकगुणत्वमिति लक्षणकरणे च तादृशगुणत्वजातिमति त्वाचप्रतिबन्धके रसेऽतिव्याप्तिरतस्त्वगग्राह्यत्वस्याऽपि धर्मविशेषणत्वं बोध्यम्।

मूलस्थचक्षुर्ग्राह्यपदार्थश्चक्षुरजन्यप्रत्यक्षाविषयत्वे सति चक्षुर्जन्यप्रत्यक्षविषयजातिमान्। सङ्ख्यादीनां च चक्षुरजन्यत्वाचप्रत्यक्षविषयतया नाऽतिप्रसङ्गः। त्रसरेणुपरिमाणेऽनुद्भूतरूपादौ प्रभायां चाऽतिव्याप्त्यव्याप्त्योर्वारणाय चक्षुरजन्यप्रत्यक्षप्रतिबन्धकचक्षुर्जन्यप्रत्यक्षविषयजातिमद्गुणत्वमिति वक्तव्यम्। न च चक्षुरजन्येश्वरीययोगजादिप्रत्यक्षाप्रतिबन्धकरूपत्ववति रूपेऽसम्भव इति वाच्यम्। चक्षुर्जन्यावश्यप्रत्यक्षप्रतिबन्धकत्वस्य लक्षणघटकतयाऽनभिमतत्वात्, यत्किञ्चित्त्वादिप्रतिबन्धकत्वमादायैव लक्षणगमनसम्भवात्। एतेन चक्षुरितरेन्द्रियग्राह्यचक्षुर्ग्राह्यगुणत्वकथने अभावप्रतियोगितावच्छेदककुक्ष्यादिन्द्रियत्वप्रवेशेन गौरवम्, त्वगग्राह्यत्वोक्तौ च मूलोक्तिवैरूप्यप्रसङ्ग इति शङ्का परास्तेत्यपि वदन्ति।

**मूले—इदमेव विवृणोतीति। अथ 'द्रव्यादेरुपलम्भकम्—' इत्यनेनोद्भूतरूपत्वादिना कारणत्वरूपलक्षणस्य, 'चक्षुषः सहकारि स्यात्—' इति मूलेन च उद्भूतानभिभूतरूपवत्तेजोरूपालोकनिष्ठचाक्षुषकारणतावच्छेदकत्वरूपलक्षणान्तरस्य च व्यवस्थापनं क्रियते इति वक्तुं शक्यतया 'चक्षुष सहकारि स्यात्—' इत्यादिमूलस्य पूर्वमूलविवरणात्मकताभिधानमनुचितम्। अत एव पूर्वमूले सामान्यतः प्रत्यक्षमात्रकारणतावोधकं 'उपलम्भक'पदं, अग्रिममूले चाक्षुषमात्रसहकारितावोधक 'चक्षुषः' इति पदं च स्वारस्येन सङ्गच्छते। न चाऽलोकनिष्ठकारणतावच्छेदकत्वमालोकरूपस्यैव, न पृथिवीरूपादेरिति तत्राऽव्याप्तिभिया मूलकारैणोक्तपङ्क्तिद्वयस्य तादृशार्थो नोपवर्णित इति वाच्यम् चक्षुषः सहकारीत्यस्य सहकारितावच्छेदकधर्मवत्पर्यन्तार्थतया तादृशजनकतावच्छेदकतावच्छेदकजाति

* तादात्म्यसम्बन्धावच्छिन्नमित्यर्थः।

रामरुद्री।

मत्वपर्यन्तस्यैव लक्षणत्वाङ्गीकारेण तादृशरूपत्वजातिमादाय तत्र लक्षणसमन्वयोपपादनसम्भवात्। न चैवं चाक्षुषत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्वं लक्षणं पर्यवस्यति। तच्चाऽनुद्भूतत्वाभावकूटस्योद्भूतत्वं बलवद्रूपान्तरसम्बन्धाभावरूपमनभिभूतत्वं च तादृशं जनकतावच्छेदकतावच्छेदकमादाय घटादावतिव्याप्तम्, अतस्तद्वारणाय चाक्षुषत्वावच्छिन्नजन्यतानिरूपितयत्किञ्चिज्जनकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणधर्मवत्त्वपर्यन्तानुसरणे चोनुद्भूताभिभूतरूपयोरव्याप्तमिति वाच्यम्। समवायेन तादृशधर्मवत्त्वविवक्षणादेव सामञ्जस्ये पर्याप्तिपर्यन्तानिवेशात्। ननु सर्वमिदमालोकस्य चाक्षुषहेतुत्वे सम्भवति, तदेव तु न, तथा हि द्रव्यवृत्तिलौकिकविषयतासम्बन्धेन चाक्षुषत्वावच्छिन्नं प्रति, विषयतासम्बन्धेन, द्रव्यलौकिकचाक्षुषत्वावच्छिन्न प्रति वा संयोगेनाऽऽलोको हेतुरिति वक्तव्यम्, तच्चाऽऽलोकप्रत्यक्षे व्यभिचारान्न सम्भवति। न चाऽऽलोकेऽप्यालोकान्तरसंयोगसत्त्वान्न दोष इति वाच्यम्। एवमप्यन्धकारे तेजस्यणुकस्य तेजोन्तरासंयुक्तस्य ग्रहानुपपत्तेः, तत्राऽऽलोकान्तराभावात्, किं तु आलोकसंयोग एव समवायसम्बन्धेन तादृशचाक्षुषं प्रति हेतुर्वाच्यः। इत्थं च तत्र्यणुकरूपालोकचक्षुःसंयोगस्यैव तत्र तथाविधस्य सम्भवान्न व्यभिचारः। तथा चाऽऽलोकसंयोगस्य कारणत्वे कारणतावच्छेदकं न रूपमिति कथं तत्र लक्षणसमन्वयसम्भव इति चेन्न। चाक्षुषकारणतावच्छेदकतावच्छेदकतावच्छेदकत्वस्यैव विवक्षितत्वेनैकमपि दोषविरहात्। न च महत्त्वावच्छिन्नचक्षुःसंयुक्तसमवायादेरपि चाक्षुषं प्रति हेतुतया तत्र जनकतावच्छेदकतावच्छेदकतावच्छेदक यन्महत्त्वं तद्वति द्रव्येऽतिव्याप्तिः, जनकतावच्छेदकतावच्छेदकतावच्छेदकजातिमत्त्वोपादानेऽपि तादृशसंयोगत्वजातिमादाय संयोगेऽतिव्याप्तिर्दुर्वारैवेति वाच्यम्। चक्षुःसहकारितावच्छेदकत्वस्य महत्त्वादावुपगमेऽपि क्षत्यभावात्। अतिव्याप्तिस्तु तादृशजातिभिन्नद्वित्वविवक्षया चाक्षुषमात्रसहकारितावच्छेदकेन वा वारणीया। न चोद्भूतरूपमहत्त्वालोकसंयोगावच्छिन्नचक्षुःसंयोगादेरेव हेतुत्वोपगमेन सामञ्जस्ये पृथगालोकसंयोगादीनां कारणत्व एव मानाभावः, मूलस्थसहकारिपदस्य यथाश्रुते जनकतावच्छेदकपर्यन्तार्थत्वोपगमेन चक्षुःसंयोगनिष्ठजनकतायामवच्छेदकतया तत्र कथञ्चिल्लक्षणसमन्वयोपपादनेऽपि तुल्ययुक्त्योद्भूतरूपस्याऽपि पृथक्कारणतानिरासेन चक्षुःसंयोगगतकारणतावच्छेदकत्वस्यैवोपगन्तव्यतया भवदभिमतं मूलोक्तपक्षद्वयस्य लक्षणद्वयन्यवस्थापनपरत्वमप्यसम्भवदुक्तिकमेवेति वाच्यम्। उद्भूतरूपमहत्त्वालोकसंयोगावच्छिन्नचक्षुःसंयोग एव कारणम्, चक्षुःसंयोगावच्छिन्नोद्भूतरूपमहत्त्वालोकसंयोगादिरेव वा कारणमित्यत्र विनिगमनाविरहेण कार्यकारणभावत्रयस्यैव कल्पनीयत्वात्। यद्वा सहकारित्वं जनकतावच्छेदकतावच्छेदकधर्मवत्त्वमेव, न तु जनकतावच्छेदकतावच्छेदकतावच्छेदकधर्मवत्त्वम्, सहकारित्वशब्दार्थत्वाभावात्, आलोकचक्षुरादिसंयोगमहत्त्वादिनिष्ठजनकतायामपि उद्भूतरूपत्वाऽवच्छेदकतासम्बन्धेनावच्छेदकत्वस्योक्तयुक्त्या सङ्गमेन तादृशजनकतामादायैव लक्षणसमन्वयोपपादनसम्भवात्। 'द्रव्यादेरुपलम्भकमिति पक्षस्तु उद्भूतरूपस्य कारणतामादायैव सङ्गमनीयः। न च तन्निष्ठफलोपधायकत्वाभावप्रयोजकाभावप्रतियोगित्वमेव सहकारिपदप्रवृत्तिनिमित्तं, तच्च चक्षुषः उद्भूतरूपाभावप्रयुक्तफलानुपधायकत्वादुपपादनीयम्, तच्चोद्भूतरूपस्य चाक्षुषं प्रति कारणत्व एव घटत इति प्रकृतग्रन्थस्य कारणतावच्छेदकत्वपरतोपवर्णनमसङ्गतमिति वाच्यम्। क्वचित्कारणतावच्छेदकाभावस्यापि कारणनिष्ठफलोपधायकत्वाभावप्रयोजकत्वाभ्युपगमे क्षतिविरहात्। प्रयोजकत्वं हि व्याप्यत्वं, तच्च विशिष्टाभाव इव विशेषणाभावेऽपि स्वीकर्तुं शक्यते, विशिष्टाभावस्य व्याप्यत्वे तदव्याप्यस्य विशेषणाभावस्य फलोपधायकत्वाभावव्याप्यत्वस्य सुतरां प्रतिक्षेप्तुमशक्यत्वात्। यदि च प्रयोजकत्वं स्वरूपसम्बन्धविशेष एवेत्याग्रहः, स च विशिष्टाभाव एव कल्प्यते, विशेषणाभावविशेष्याभावयोस्तत्कल्पने प्रयोजकतावच्छेदकशरीरलाघवसम्भवेऽपि प्रयोजकतावच्छेदकल्पनापेक्षया एकस्मिन् विशिष्टाभावे तत्कल्पनेऽतिलाघवसम्भवात्। न च तत्राऽपि चक्षुःसंयोगावच्छिन्नत्वविशिष्टालोकसंयोगत्वावच्छिन्नप्रतियोगिताकाभाव आलोकसंयोगत्वविशिष्टचक्षुःसंयोगावच्छिन्नत्वावच्छिन्नप्रतियोगिताकाभावो वा प्रयोजक इत्यत्र विनिगमकाभावात्प्रयोजकताद्वयकल्पनं दुर्वारमेव, तदपेक्षया प्रत्येकधर्मावच्छिन्नाभावस्यैव लाघवेन तत्प्रयोजकत्वकल्पनं युक्तमिति वाच्यम्।

रामरुद्री।

तादृशाभावद्वयस्याऽपि समनियततयाऽभेदेन समनियतधर्मद्वयावच्छिन्नप्रयोजकतयोरप्यभेदाभ्युपगमे जातिविरहादित्युच्यते, तथाऽपि विशिष्टाभावे विशेषणाभावविशेष्याभावातिरिक्ते मानाभावाल्लक्षणसमन्वयः सूपपाद एव, स्वरूपसम्बन्धविशेषरूपस्य व्याप्यत्वातिरिक्तस्य प्रयोजकत्वस्य मानाभावेनाऽनङ्गीकाराच्च। अथ द्रव्यचाक्षुषं प्रति विजातीयचक्षुःसंयोगत्वादिना कारणत्वाभ्युपगमेनैव सामञ्जस्य उद्भूतरूपस्य महत्त्वादेर्वा चाक्षुषहेतुत्वे मानाभावात् चक्षुःसंयोगनिष्ठजनकतायामुद्भूतरूपस्याऽवच्छेदकत्वमप्यप्रामाणिकमेवेति तत्राऽप्यापत्तिर्दुर्वारा, अत आलोकसंयोगनिष्ठजनकतावच्छेदकतामादायैव लक्षणं नेयमिति जनकतावच्छेदकत्वरूपं सहकारित्वं न मूलेऽभिप्रेतमिति स्वीकरणीयम्। न च विजातीयचक्षुःसंयोगत्वेन हेतुत्वे आलोकसंयोगस्याऽपि हेतुत्वमप्रामाणिकमेव, अन्धकारे घटवदक्षुःसंयोगे तादृशवैजात्यानभ्युपगमादेव चाक्षुषापत्तिवारणसम्भवादिति वाच्यम्। यत्र स्थिरे धर्मिणि आलोकापसारणतदानयनदशयोरेक एव चक्षुःसंयोगस्तत्राऽऽलोकानयनकालोत्पन्नचाक्षुषान्यथानुपपत्त्या तत्संयोगस्यैव प्रत्यक्षप्रयोजकवैजात्यकल्पनस्याऽऽवश्यकत्वे तत एवाऽऽलोकापसारणदशायामपि चाक्षुषापत्तिवारणायाऽऽलोकसंयोगस्य हेतुत्वावश्यकत्वात्। न च तत्र चक्षुःसंयोगभेदकल्पनयैवोपपत्तौ न तादृशकार्यकारणभावान्तरं कल्प्यत इति वाच्यम्। तथा सत्यपि विजातीयचक्षुःसंयोग एव कारणं, विजातीयालोकसयोग एव वा कारणमित्यत्र विनिगमनाविरहेणोभयहेतुत्वस्वीकारावश्यकत्वात्। न च यत्र स्थिरे धर्मिणि एक एव चक्षुःसन्निकर्षासन्निकर्षदशयोरालोकसंयोग उत्पन्नस्तत्र चक्षुःसनिकर्षदशायामिव तदसन्निकर्षदशायामपि चाक्षुषापत्तिवारणाय चक्षुःसयोगत्वेन हेतुताया अवश्यकल्प्यतया तत एवोपपत्तावालोकसयोगत्वादिना कारणतान्तरं न कल्प्यते, अन्यथा विजातीयवायुसंयोगत्वादिनाऽपि कारणतान्तरकल्पनाप्रसङ्गादिति चक्षुरालोकादिसंयोगसाधारणैकवैजात्यपुरस्कारेणैव कार्यकारणभावस्याऽङ्गीकरणीयत्वेन तत्र च तादृशवैजात्यस्यैवाऽवच्छेदकतया उद्भूतरूपस्य कारणतावच्छेदकतावच्छेदकतावच्छेदकत्वाभावान्न भवदुक्तिसङ्गतिरिति वाच्यम्। ईदृशरीत्या भवदुक्तलक्षणद्वयस्याऽप्यसम्भवप्रसङ्गेन मूलासाङ्गत्यस्य तथाऽपि दुष्परिहरत्वादिति चेन्न। विजातीयसयोगत्वेन हेतुत्वे तस्य सयोगस्य घट इव चक्षुष्यपि सत्त्वस्याऽवश्याङ्गीकरणीयतया चक्षुषश्चाक्षुषवारणायैवोद्भूतरूपस्य हेतुत्व वक्तव्यम्। न च चक्षुषा पिञ्जाचादिवदयोग्यत्वादेव चक्षुर्न गृह्यत इति वाच्यम्। तस्याऽयोग्यत्वेन चाक्षुषप्रतिबन्धकत्वकल्पनापेक्षया उद्भूतरूपस्य चाक्षुषकारणत्वोपगमस्यैव युक्तत्वात्। न च विजातीयसंयोगसम्बन्धेन चक्षुषश्चाक्षुषकारणत्वोपगमान्न दोषः, चक्षुषि तस्याऽभावादेव तच्चाक्षुषवारणसम्भवादिति वाच्यम्। एवमपि संयोगनिष्ठतादृशवैजात्यं किंप्रयोज्यमिति प्रथमतो वक्तव्यम्, उद्भूतरूपमहत्त्वालोकसंयोगादिनिबन्धनत्वे तादृशवैजात्यावच्छिन्नं प्रति तेषां कारणत्वोपगमापेक्षया द्रव्यचाक्षुषत्वावच्छिन्न प्रत्येव हेतुत्वस्य युक्तत्वात्। तथा च **'चक्षुषः सहकारि स्यात्—'** इति मूलस्य चाक्षुषजनकतावच्छेदकत्वरूपसहकारित्वात्मकलक्षणान्तरव्यवस्थापनपरतया व्याख्यानसम्भवे **'द्रव्यादेरुपलम्भकम्—'** इति पङ्क्तिविवरणपरतया तद्व्याख्यानमनुचितम्। नन्वनुद्भूतरूपादौ लक्षणसमन्वयोपपादनाय चाक्षुषजनकतावच्छेदकतावच्छेदकधर्मत्वं लक्षणं विवक्षणीयम्, एवमप्यनुद्भूतरूपाव्याप्तिः सुदूरदेव, उद्भूतरूपत्वस्य सकलोद्भूतरूपसाधारण्यैकस्य जातिरूपस्याऽङ्गीकारेण तस्यैव चाक्षुषजनकतावच्छेदकतायामप्यवच्छेदकत्वात् तद्धस्वस्याऽनुद्भूतरूपे विरहादिति वाच्यम्। शुक्लत्वादिना साङ्कर्यादुद्भूतत्वं न जातिः, किं तु शुक्लत्वादिव्याप्यमनुद्भूतत्वमेव जातिः, तदभावकूटश्चोद्भूतत्वमित्यङ्गीकारात्। न चोद्भूतत्वं शुक्लत्वादिव्यापकमेवाऽङ्गीक्रियताम्, अनुद्भूते शुक्लादौ मानाभावात्, तथा च क्व साङ्कर्यमिति वाच्यम्। यादृशोष्णस्पर्शवदग्निसंयोगवशाच्छ्यामादिरूपोत्पत्तिरनुभवसिद्धा, तादृशविलक्षणाग्निसंयोगस्याऽनुद्भूतवस्तुष्वपि सम्भवेन तद्बलादेव तत्र श्यामादिरूपोत्पत्त्यभ्युपगमावश्यकतया तादृशश्यामादिरूपाणामप्रत्यक्षतोपपादनाय च तदनुगतस्याऽनुद्भूतत्वरूपवैजात्यस्याऽपि प्रत्यक्षप्रतिबन्धकतया कल्पनीयत्वेनाऽनुद्भूतश्यामादिरूपसिद्धेर्दुर्वारत्वात्। न च समवायेन श्यामत्वावच्छिन्नं प्रति निरवच्छिन्नविशेषणतावि शेषसम्बन्धेन श्यामाभावस्य प्रतिबन्धकत्वादेव तत्र रूपोत्पादवारणसम्भव इति नाऽनुद्भूतरूपकल्पनावश्यकतेति वाच्यम्। एवं सति तुल्यन्यायेन

रामरुद्री ।

समवायेन गन्धत्वावच्छिन्नं प्रति निरवच्छिन्नविशेषणतावच्छेदकसम्बन्धेन गन्धाभावस्य प्रतिबन्धकत्वकल्पनायाः प्राप्ततया तस्याश्च पाषाणारम्भकपरमाणौ भस्मतादशायां तदारब्धावयविनि गन्धोपलब्ध्यन्यथानुपपत्त्या गन्धाभावस्य निरवच्छिन्नविशेषणतया प्रतिबन्धकत्वस्य कल्पयितुमशक्यतया तत्र पाषाणतादशायां तादृशविलक्षणाग्निसंयोगसत्त्वे गन्धोत्पत्तेरवश्याभ्युपगन्तव्यत्वात् तत्प्रत्यक्षवारणाय तद्गन्धस्याऽनुद्भूतत्वस्याऽवश्यं कल्पनीयत्वप्रसक्त्या अनुद्भूतगुणमात्रनिरासानुपपत्तेः । ननु गन्धस्थले एकस्मिन्नेव परमाणौ तदुद्भावानुद्भवयोः प्रामाणिकत्वेऽपि रूपस्थले तथात्वे मानाभावः, न हि तादृशं किञ्चिद्वस्तु प्रसिद्ध्यति, यत्रैकस्मिन्नेव रूपस्योद्भवानुद्भवौ स्याताम्, यथा पाषाणारम्भकपरमाणौ गन्धस्योद्भवानुद्भवौ दृष्टचरौ, अत एव अतितप्ततैलादौ चक्षुर्भूतरूपस्य तेजसः प्रवेशादेव प्रत्यक्षमिति ग्रन्थकृतामुक्तिरपि स्वारस्येन सङ्कुच्छते इति चेन्न । विलक्षणद्रव्यमिश्रणेन साधितायामदृश्यमस्यामादौ रूपानुपलम्भेऽपि अग्निसंयोगाग्नीलादिरूपोत्पत्तेरनुभवसिद्धतया एकस्मिन्नपि वस्तुनि रूपस्योद्भवानुद्भवयोर्दृष्टत्वात् । तथा च अनुद्भूतरूपानुपगमे तत्र मस्यां मन्दस्याग्नेः संयोगकाले इयामादिरूपोत्पत्त्यापत्ती रूपाभावस्य प्रतिबन्धकत्वमभ्युपगम्य न वारयितुं शक्यते, अतस्तत्र रूपोत्पत्तिरवश्यमभ्युपगन्तव्या, तथा च तत्काले प्रत्यक्षापत्तिवारणायाऽनुद्भूतत्वेन तस्य प्रतिबन्धकत्व कल्पनीयम् । एवमेव लवणस्य जलादौ प्रक्षेपेऽग्निसंयोगवशाद्विलीनस्य तस्य पूर्वरूपनाशः पुनर्जलशोषणेनाऽग्निसंयोगकाले पूर्वरूपसजातीयरूपान्तरोत्पत्तिरभ्युपपद्यते, जलावच्छिन्नस्याऽग्निसंयोगस्य लवणरूपनाशकत्वात् । न च लवणस्य जले प्रक्षेपे सर्वत्र नाऽग्निसंयोगनियम इति वाच्यम् । जलस्य तरलतादशायां तेजःसंयोगस्य तत्राऽवश्यमभ्युपेयत्वात्, अन्यथा हिमकरकाद्यापत्तिप्रसङ्गात्, हिमकरकादौ च लवणस्याऽविलयनमनुभवसिद्धमेव । इत्थमेव जलशोषणकालेऽपि अग्निसंयोगः सर्वत्र दृष्टः । न च लवणे विलीने जलात्मकदोषवशाद्रूपं नोपलभ्यते, न तु अनुद्भूतत्वादिति वाच्यम् । तादृशदोषस्य प्रत्यक्षप्रतिबन्धकत्वकल्पनापेक्षया तद्गतरूपस्यैवैकवैजात्यपुरस्कारेण तादात्म्येन तत्प्रतिबन्धकत्वौचित्यात्, हिमात्मकजलसंयोगकालेऽपि लवणरूपोपलम्भेन जलमात्रस्य प्रतिबन्धकत्वानौचित्यात्, अग्निसंयोगतारतम्यवशाच्छवणरूपनाशशैघ्र्यस्याऽतितप्तजलादावनुभवसिद्धत्वाच्च । न च तत्र लवणमेव नश्यतीति कल्पयितुं शक्यम्, लवणाप्रतीतावपि तद्रसप्रतीतेरबाधितत्वात् । न च जलरूपेणाऽभिभवादेव तत्र न रूपोपलब्धिरिति वाच्यम् । एवमपि यत्र भाण्डविशेषे विलीनलवणं जलं शोषितं, पुनरुद्धरितश्च सर्वोऽपि लवणांशस्ततो निष्कासितः, अनन्तरं तत्राऽग्निसंयोगे कृष्णरूपोत्पत्तिरनुभवसिद्धा, सा तावन्न भाण्डे सञ्जायते, भाण्डान्तरेऽनुपलब्धेः, किं तु लवणेऽनुद्भूते, न हि तत्र जलरूपमभिभावकमिति कल्पयितुं शक्यम्, तस्य पूर्वमेव विनष्टत्वात् । न च भाण्ड एव तत् कृष्णरूपमुत्पद्यते, लवणसंयोगस्य नियामकत्वाच्च नाऽतिप्रसङ्ग इति वाच्यम् । भाण्डसहिते कृष्णद्रव्ये तत्र भाण्डपरिमितगुरुत्वाधिकगुरुत्वादर्शनात् लवणेऽपि पाकानुमानात् । इत्थमेव च जलपतितस्याऽयसो विकारस्तेजःसंयोगेनाऽऽसभागापसारणादवशिष्टस्य च वायूपनीतादृश्यभागसंपृक्तस्य पाकजाद्रूपान्तरोत्पादोऽप्युपपादनीय इति । नन्वेवमनुद्भूतरूपमात्रं सिद्ध्यति, न तु तत्र शुक्लत्वादिकमिति चेदुच्यते । लवणाग्निसंयोगस्य शुक्लरूपोत्पादकत्व भवतैवेष्यते, अन्यथा जलशोषणानन्तरं पुनर्लवणभावापत्तौ नियमतः शुक्लोत्पादानुपपतेः, जलप्रक्षेपकाले च रूपनाशो भवताभिष्टः, जलमध्यप्रविष्टेऽपि लवणेऽग्निसंयोगस्याऽबाधितत्वाद्रूपोत्पत्तिरपि स्वीकृता, तर्हि तत्काले शुक्लोत्पत्तिरप्यभ्युपगन्तव्या, केवललवणाग्निसयोगस्य शुक्लरूपोत्पादकताया एवाऽनुभवसिद्धत्वात्, तस्य च शुक्लरूपस्याऽनुद्भूतत्वमङ्गीकर्तव्यम्, अन्यथा प्रत्यक्षप्रसङ्गात्, तच्च तद्गतानुगतवैजात्यपुरस्कारेण प्रत्यक्षे तेषां प्रतिबन्धकत्व एव सम्भवति, तद्वैजात्यस्य प्रत्यक्षप्रतिबन्धकतावच्छेदकतयैव सिद्धेः, तदधीनस्य अनन्तानामननुगतानां तादृशविलक्षणजलसंयोगादीनां तत्तद्वैजात्यावच्छिन्न प्रति जनकत्वकल्पनागौरवस्य च फलमुखत्वेनाऽऽवश्यत्वात्, तथा च शुक्लत्वादिना साङ्कर्यादुद्भूतत्वं जातिरिति कथं कल्प्येत ? तस्मादुद्भूतत्वस्याऽनुद्भूतत्वाभावकूटरूपत्वे सिद्धे तद्विशिष्टरूपत्वेनैव चाक्षुषप्रयोजकतया नाऽनुद्भूतरूपादावव्याप्तिसम्भवः । किं चाऽनुद्भूतरूपे शुक्लत्वाद्यनभ्युपगमे उद्भूतत्वस्य वैजात्यरूपत्वमापाद्य तादृशवैजात्या-

रामरुद्री ।

भावादनुद्भूतरूपेऽव्याप्तिप्रदर्शनेन सहकारित्वस्य लक्षणान्तरत्वखण्डने तुल्ययुक्त्या द्रव्यादयुपलम्भकत्व-रूपमूलाभिमतलक्षणस्याऽपि तत्राऽव्याप्तिर्दुष्परिहरैव प्रसज्यत इति मूलमिदं रूपस्याऽनुद्भूतत्वानभ्युपगन्तृमताभिप्रायेणाऽनुभूतरूपे शुक्लत्वाधनभ्युपगन्तृमताभिप्रायेण वा सङ्गपनीयमिति रीत्या निरुक्तलक्षणस्य परिष्कारसम्भवेन पूर्वोक्तमूलद्वयस्य साधर्म्यद्वयव्यवस्थापनपरत्वे सम्भवति मुक्तावलीकृतामीदृशाभिप्रायवर्णनमनुचितमिति चेत्—

अत्र केचित्, आलोकत्वं जातिविशेष एव प्रत्यक्षसिद्धः । तथा च आलोकस्य चक्षुःसहकारित्वेऽपि तादृशसहकारितावच्छेदकत्वरूपं सहकारित्वमालोकस्यैव, न तु रूपस्य, अत एवेहाऽन्धकार इति प्रत्यक्षमप्युपपद्यते, अन्यथोद्भूतानभिभूततेजःसामान्याभावरूपत्वे तस्याऽनुद्भूतत्वाभावात्मकायोग्यवस्तुघटितमूर्तिकतया प्रत्यक्षत्वानुपपत्तेः, आलोकत्वात्मकवैजात्यावच्छिन्नाभावरूपत्वे च न तदनुपपत्तिरितीति नव्यमते मूलोक्तपङ्क्तिद्वयस्य भवदुक्तलक्षणद्वयाभिप्रायकतायाः कल्पयितुमशक्यतया तन्मतानुसारेणैव द्वितीयमूलस्य पूर्वमूलविवरणरूपताया ग्रन्थकृताऽभिधानादिति वदन्ति ।

प्राञ्चस्तु चक्षुरादीन्द्रिय स्वनिष्ठरूपादिसहकृतमेव रूपादिप्रतिनियतविषयग्राहकमिति रीत्या चक्षुषः सहकारि रूपं भवतीत्याहुः ।

तदसत्, चक्षुष्टादिजातिपुरस्कारेणैव चाक्षुषहेतुत्वोपपत्तावीदृशरीत्या रूपस्य तत्सहकारित्वे मानाभावादिति दीधितिकृत्प्रभृतयः ।

अत्र मते घ्राणादीनां पार्थिवत्वादिकं न सिद्ध्येत् । न च घ्राणेन्द्रियं पार्थिवं, रूपादिषु मध्ये गन्धस्यैवाऽभिव्यञ्जकत्वात्, कुङ्कुमगन्धाभिव्यञ्जकघृतवदित्यनेन घ्राणस्य, रसन जलीयमित्यादिना च रसनाऽक्षेरपि पार्थिवत्वजलीयत्वादिकं साधनीयमिति वाच्यम् । उक्तहेतूनामप्रयोजकत्वात्, प्रथमानुमाने कुङ्कुमसन्धाभिव्यञ्जक आतपे, रसनस्य जलीयत्वानुमाने च जलरसाभिव्यञ्जिकायां हरीतक्यां, चक्षुस्तैजसमित्यानुमाने च घर्षणादिना भाण्डादिरूपाभिव्यञ्जिकायां मृत्तिकायां, त्वचो वायवीयत्वानुमाने च वृत्तिकामार्दवव्यञ्जिकास्वप्सु च व्यभिचाराच्च । न चाऽत्राऽभिव्यञ्जकत्वमभिव्यक्तिहेतुत्वम्, अभिव्यक्तिश्च साक्षात्कारमात्रम्, तथा च कुङ्कुमगतगन्धाभिभावकजलापसरणकारित्वमेव तेजस आतपस्य,न तु तत्साक्षात्कारहेतुत्वमपि, इत्थमेव हरीतक्या अपि भक्षणं जिह्वावृत्तिमलापसारणेन रसनाभिभावकापकर्षणद्वारैवोपयुज्यते, मृत्तिकादिकं च भाण्डोपरिभागवृत्तिमलापसरणे, जलमपि मृदवयवेषु प्रचयोत्पादन इति वाच्यम् । एवं सति तत्तदनुमाने घृतादिदृष्टान्तकथनस्याऽप्यसङ्गतत्वापातात्। तथा हि—दूरे स्थितस्य घृतादेरनुद्भूतं गन्धोपलब्ध्युपपत्तये तादृशतघृतो विशीर्यमाणानामुरुतिष्णूनामवयवानां कल्पनमावश्यकम्, तथा च कुङ्कुमादिष्वितरजद्रव्यजलादिप्रवेशे कुङ्कुमान्तर्गतसुरभिभागस्याऽभिभूततया तस्याऽनुभवितृनासिकापर्यन्तगमनासम्भवेन जलादिप्रचुरदेशविशेषस्थापितकुङ्कुमगन्धः प्रत्यक्षतो नाऽभिव्यज्यते। घृतादिना च तस्य संयोजने कुङ्कुमदलानां सच्छिद्रतया तन्मार्गेणाऽन्तःप्रविष्टा उत्पतिष्णवो घृतावयवाः स्वयमुत्पतन्तो गन्धवतः कुङ्कुमावयवानपि वेगबलादुद्भावयन्तीति स्थितिः । तथा चाऽनया रीत्या कुङ्कुमगन्धाभिव्यक्तिप्रयोजकत्वमेव तत्राऽऽयाति, न तु हेतुत्वमपि, एवमेव रसनस्य जलीयत्वानुमाने सक्तुरसाभिव्यञ्जकोदकदृष्टान्तोक्तिरप्ययुक्ता, तस्य लुप्ताक्षरमसीनीलरूपादिव्यञ्जकत्वेन रूपाद्यव्यञ्जकत्वासम्भवात्, चतुर्थानुमाने अङ्गसङ्गसलिलशैत्याभिव्यञ्जकव्यजनपवनदृष्टान्तोऽप्ययुक्तः, तस्य स्वेदगततेजःपरमाण्वपसारणद्वारैव तदीयस्पर्शाभिव्यक्त्युपयोगित्वादिति । तस्मादेतन्मते न कथञ्चिदपि घ्राणादीनां पार्थिवत्वादिसाधनं सम्भवति ।

अस्मन्मते तु घ्राणेन्द्रिय पार्थिवं, रूपाद्यभिव्यक्त्यप्रयोजकत्वे सति गन्धसाक्षात्कारप्रयोजकविशेषगुणवत्त्वात्, वायूपनीतसुरभिघृतभागवदित्यनुमानेन घ्राणस्य पार्थिवत्वसिद्धिः । तथा हि घृतादिगतानामप्युत्कटगन्धानामवयवानामेव कुङ्कुमगन्धाभिव्यञ्जकत्वं वक्तव्यम्, अन्यथा मृदादिसंमेलनेनाऽभिभूतगन्धस्याऽपि घृतस्य कुङ्कुमगन्धाभिव्यञ्जकत्वापत्तेः। न च मृदवयवैरभिभवाद्घृतावयवानामुत्पतनासम्भवादेव न तत्र गन्धाभिव्यक्तिरिति गन्धस्याऽभिव्यक्तिप्रयोजकत्वकथनमनावश्यकमिति वाच्यम्। गन्धोत्कर्षेण

रामरुद्री।

कुङ्कुमगन्धाभिव्यञ्जने पाटवातिशयस्य घृतादौ प्रत्यक्षत्वात्। तथा चाऽनुमानेनाऽनेन घ्राणस्य पार्थिवत्वसिद्धिः। न चेदमप्रयोजकम्। घ्राणजत्वावच्छिन्नं प्रति घ्राणत्वेन जनकत्वाभ्युपगन्तृनयेऽपि घ्राणत्वावच्छिन्नं प्रति अनभिभूतगन्धवतामवयवानां हेतुत्वस्याऽऽवश्यकत्वात्। अन्यथा प्रतिहतायां गन्धोपलम्भापत्तिः। अस्मन्मते तु प्रतिहतायां हेतुज्वलावयवानां घ्राणावयवप्रवेशेन तदवयवगन्धस्याऽभिभवे सति घ्राणस्यैवोत्पत्तेरसम्भवान्न तदानीं सौरभादिप्रत्यक्षमिति कल्पयितुं शक्यते। न चाऽनभिभूतत्वं तावत् बलवद्विजातीयसम्बन्ध एव, तथा चाऽनभिभूतगन्धवत्त्वेन घ्राणजनकतापेक्षया बलवद्विजातीयसंयोगाभावविशिष्टानां तदवयवानामेव तदारम्भकत्वं युक्तमिति वाच्यम्। केषांचित्तीक्ष्णघ्राणता, केषांचिच्च मन्दघ्राणता, यथा गवां, अस्मदादीनां च। तन्निर्वाहाय यावदपकृष्टगन्धग्रहणसामर्थ्यं यस्य घ्राणस्य, तावदपकृष्टगन्धवतामेव पार्थिवावयवानां घ्राणविशेषोत्पादकत्वं लाघवात् कल्पनीयम्, तन्निर्वाहायाऽनन्तघ्राणावयवगतवैजात्यविशेषकल्पनस्याऽयुक्तत्वात्। न च त्वन्मतेऽपि तादृशविजातीयगन्धवदवयवजन्यतावच्छेदकतया घ्राणे वैजात्यभेदः कल्पनीय एवेति न गौरवमिति वाच्यम्। अनन्तावच्छेदैतादृशजातिविशेषकल्पनापेक्षयाऽस्मन्मते घ्राणविशेषभेदनिर्वाहाय तत्तदपकृष्टगन्धवत्तायाः घ्राणेऽभ्युपगमात्तत्पुरस्कारेणैव तेषां विशेषतो गन्धसाक्षात्कारं प्रति हेतुतायाः कल्पनीयत्वात्। न चैवं घ्राणत्वजात्यसिद्धिप्रसङ्ग इति वाच्यम्। घ्राणजसामान्यं प्रति कारणतावच्छेदकतयैव तत्सिद्धेः। न च तत्राऽपि गन्धवत्त्वेनैव हेतुत्वमस्तु, घ्राणत्वजातिकल्पने गौरवादिति वाच्यम्। चर्ममनःसंयोगादेर्दर्शनहेतुतामते चर्मणोऽपि विषयसंयुक्तात् गन्धप्रत्यक्षापत्तिवारणायैव वैजात्यकल्पनस्याऽऽवश्यकत्वात्। न च तत्राऽपकृष्टगन्धवदिन्द्रियसंयोगाख्यविशेषकारणाभावादेव घ्राणजप्रत्यक्षाभावोपपादनसम्भवे घ्राणस्य वैजात्यपुरस्कारेण गन्धसाक्षात्कारहेतुत्वकल्पनमयुक्तमिति वाच्यम्। विशेषकारणाभावकूटस्य घ्राणजसामान्याभावप्रयोजकत्वकल्पने गौरवमनुसन्धायैव घ्राणजत्वावच्छिन्नं प्रति घ्राणत्वेन हेतुतायाः कल्पनीयतया विशेषकार्यकारणभावबलाबलम्बनेन सामान्यकार्यकारणभावापह्नवस्याऽपसिद्धान्तत्वात्। किं च चर्मसंयुक्ते वस्तुनि विशेषकारणविरहोऽप्यसिद्धः, तस्य घ्राणेनाऽपि संयोगसम्भवात्। न च तर्हि प्रत्यक्षमपि तत्रोत्पद्यत एवेति वाच्यम्। नर्तकीदर्शनादिव्यापृते चक्षुषि चर्ममनःसंयोगस्य भवदभिमतघ्राणविशेषविषयसंयोगस्य चाऽबाधिततया तत्र घ्राणजोत्पादापत्तेर्दुर्वारत्वात्। न च तादृशघ्राणविशेषमनःसंयोगोऽपि घ्राणजे कारणमिति नैतदापत्तिसम्भव इति वाच्यम्। एतादृशशरीरत्वाऽनन्तकार्यकारणभावकल्पनापेक्षया घ्राणसामान्यमनःसंयोगस्य घ्राणजत्वावच्छिन्नं प्रति हेतुत्वकल्पनाया एवोचितत्वादिति दिक्। अनयैव च रीत्या रसनादीनामपि जलीयत्वादिकं साधनीयम्। तत्राऽपि तीक्ष्णरसननयनत्वगिन्द्रियताया उपपादनाय यत्पुरुषीययद्रसननयनत्वगादिग्राह्यरसरूपस्पर्शेषु यत्सर्वतोऽपकृष्टं तद्रसादिमत्त्वस्य तत्तद्रिन्द्रियेषु प्रागुक्तयुक्त्या स्वीकरणीयत्वात्। श्रोत्रेन्द्रियस्याऽऽकाशत्वमप्यनयैव रीत्या साधनीयम्। तादृशशब्दयुक्तत्वेन तस्य तद्ग्राहकत्वाभ्युपगमादिति विवेचनीयम्। न चैवंक्रमेण रसनस्य जलीयत्वं न सिद्धयेत्, रसस्य पृथिव्यादिसाधारणतया जलीयत्वासाधकत्वादिति वाच्यम्। गन्धाभाववत्त्वे सति रसवत्त्वेनैव जलीयत्वस्य साधनीयत्वात्। न च गन्धसामानाधिकरण्यमेव तत्र निश्चेतुमशक्यमिति वाच्यम्। गन्धवत्त्वे रसनयाऽपि गन्धोपलब्ध्यापत्तेरेव बाधकत्वात्। ननु यत्पुरुषीयघ्राणग्राह्यगन्धमध्ये यो गन्धः सर्वतोऽप्यपकृष्टस्तद्गन्धसजातीयगन्धवत्त्वेन घ्राणस्य विशेषकार्यकारणभावसम्भवेऽपि रसनादेर्जलीयत्वमभ्युपगम्य तादृशविशेषकार्यकारणभावाः कल्पयितुं न शक्यन्ते, त्वदुक्तरीत्या अपकृष्टतिक्तादिग्राहकस्येन्द्रियस्य तद्रसवत्ताया अप्यावश्यकत्वात्, तस्य च जलेऽसम्भवात्। एवमेव कृष्णरूपादिग्राहिणस्तेजसोऽपि तद्रूपवत्त्वासम्भव इति कथं रसनादीनां जलीयत्वादिसिद्धिसम्भव इति चेन्न। कस्याऽपि रसनस्य जलरसाग्राहित्वानभ्युपगमेन भवदुक्तापत्तेरसम्भवात्, जलरसस्य च सर्वापेक्षयाऽप्रकृष्टत्वात्। एवमेव तेजोरूपाग्राहिणो नयनस्याऽनभ्युपगमात्तेजोरूपविशेषस्य च सकलेतररूपापेक्षयाऽप्रकृष्टत्वाभ्युपगमेन नयनादीनां रूपवत्त्वेन ग्राहकत्वमुपपन्नम्। न च तर्हि येषांचित्तीक्ष्णरसनता केषांचिन्मन्दरसनतेत्यादिनियमो न स्यादिति वाच्यम्। जलादावपि रसादितारतम्याभ्युपगमात्तदुपपत्तेरिति। तदेतदभिसन्धायोक्तम्। मूले—चक्षुषः

शुक्लादिकमनेकमेति। तच्च रूपं शुक्ल-नील-पीत-रक्त-हरित-कपिश-कर्बुरादिभेदादनेकप्रकारकं भवति। इति रूपविभागः।

ननु कथं कर्बुरमतिरिक्तं रूपं भवति? इत्थम्-नीलपीताद्यवयवारब्धोऽवयवी न तावन्नीरूपः, अप्रत्यक्षत्वप्रसङ्गात्। नाऽपि व्याप्यवृत्ति नीलादिरूप-

दिनकरी।

अप्रत्यक्षत्वप्रसङ्गादिति। द्रव्यचाक्षुषं प्रति समवायसम्बन्धेनोद्भूतरूपस्य हेतुत्वा-

रामरुद्री।

सहकारीतीत्येव सम्यक्। अत एव रसनिरूपणे 'सहकारी रसज्ञायाः—'इत्याद्युक्तिरपि सङ्गच्छते, अन्यथा मुक्तावलीकृदुक्तदिशा अस्याः पूर्वविवरणरूपत्वाङ्गीकारवत् तस्यास्तथाकल्पनासम्भवेन तन्मूलस्याऽसाङ्गत्यापत्तेर्ब्रह्मणाऽपि वारयितुमशक्यत्वात्। उद्भूतरूपस्य चाक्षुषं प्रति हेतुत्ववत् रसादीनां रासनादिहेतुत्वस्य केनचिदपि व्यवस्थापयितुमशक्यत्वादिति। विवेचयिष्यते चैतद्रसादिनिरूपणे।

वस्तुतस्तु घ्राणादीनामिन्द्रियाणां प्रत्येकं भिन्नभिन्नप्रमाणबलादेव पार्थिवत्वादिसिद्धिः। तत्र घ्राणस्य पार्थिवत्वं तावत् प्रागुक्तदिशैव। रसनस्य तु जलीयत्वे मुखशोषिणां रसानभिज्ञत्वम् प्रमाणम्। मुखशोषिणां हि पित्तवशाज्जिह्वाग्रवर्तिलालाद्रव्यापगमे रसज्ञानं न भवतीति प्रत्यक्षसिद्धम्, तदपि रसनं जलीयं न स्यात् तर्हि तत् मुखशोषिणामप्यबाधितमिति तेषां रसप्रत्यक्षाभावोऽनुपपन्नः स्यात्, जलीयत्वे तु पित्तनाश्यत्वं सम्भवति, तस्माज्जलीयं रसनम्। नयनस्य च तैजसत्वं तेजःसदृशपृथ्वम्-सूक्ष्ममूलतापन्नप्रसरणविशेषेण तेजःस्वभावेन सिद्धम्। त्वचस्तु कुष्ठादितो वाय्वशुद्धिनिबन्धनतत्त्वगिन्द्रियनाशपुरुषान्तरीयत्वगिन्द्रियनाशादिना वायवीयत्वमनुमेयम्।

मूले-उद्भूतरूपं कारणमिति। नन्वनुद्भूतरूपे मानाभावाज्जनकतावच्छेदकोटावुद्भूतत्वप्रवेशो व्यर्थः। न च चक्षुरादावपि तेजस्त्वादिना रूपमनुमीयत इति वाच्यम्। अप्रयोजकत्वादिति चेन्न। यत्र कपालेऽग्निसंयोगतो नीरूपे नीलरूपवता कपालान्तरेण तस्य संयोगाद्घटोत्पत्तिरित्येकः कालः, तत्र तदुत्तरक्षणे घटे नीलोत्पादापत्तिः। न चेष्टापत्तिः सम्भवति, तदुत्तरक्षणे तत्र कपाले पीतरूपोत्पत्तौ तदनन्तरं चित्रोत्पादानुपपत्तेर्नीलोपलब्धिप्रसङ्गाच्च, अतो रूपं प्रति समवायसम्बन्धावच्छिन्नप्रतियोगिताकरूपाभावः सामानाधिकरण्यसम्बन्धेन प्रतिबन्धको वक्तव्यः। तथा च चम्पकाद्यारम्भकावयवान्तःपातिवायूपनीतसुरभिभागानामरूपत्वे चम्पके रूपोत्पादानुपपत्तिः, अतोऽनुद्भूतरूपकल्पनायास्तत्राऽऽवश्यकत्वात्। न चैवं भवन्मतेऽपि चम्पकादौ पीताद्युत्पादानुपपत्तिर्दुष्परिहरैव, पीतादिकं प्रति पीतान्यरूपस्य प्रतिबन्धकतया भवदभिमतानुद्भूतरूपप्रतिबन्धेन तदुत्पादासम्भवादिति वाच्यम्। इष्टापत्तेः, तत्र चित्ररूपोत्पादस्यैवाऽभ्युपगमात्। न चैवं तत्र चित्रप्रत्यक्षापत्तिरिति वाच्यम्। चित्रत्वप्रकारकप्रत्यक्षेऽवयवगतनानारूपप्रत्यक्षस्य हेतुतया तदभावेनैवाऽत्र तदसम्भवात्। न च तत्र पीतत्वप्रकारकप्रत्यक्षानुपपत्तिरिति वाच्यम्। तस्या इतरचित्रस्थलेऽपि विजातीयरूपद्वयाग्रहणकालजायमाननीलादिप्रतीतिवद्भ्रमत्वस्येष्टत्वात्।

वस्तुतस्तु चम्पकादौ पीतत्वादिप्रकारकप्रत्यक्षस्य भ्रमत्वमनुभवविरुद्धमेव। तस्मात् तत्र पीतमेवोत्पद्यते इति वक्तव्यम्। न चाऽनुद्भूतरूपस्य प्रतिबन्धकत्वात् कथं तदुत्पादसम्भव इति वाच्यम्। अत एव कारणात् चम्पकारम्भकावयवगतानुद्भूतरूपे पीतत्वस्याऽपि कल्पनीयत्वात्, तथा च न तत्र पीतानुपपत्तिरिति परैरलक्षितः पन्थाः। इति रूपलक्षणग्रन्थः॥

मूले—ननु कथमित्यादि। अत्र रूपत्वं नीलाद्यन्यवृत्ति न वेति विप्रतिपत्तिः, तत्र विधिकोटिश्चित्ररूपवादिनाम्, निषेधकोटिरितरेषामिति बोध्यम्। **अप्रत्यक्षत्वप्रसङ्गादिति।** इदमत्र चिन्तनीयम्-द्रव्यचाक्षुषं प्रत्युद्भूतरूपत्वेन हेतुत्व एव मानाभावः। न च घ्राणादीनां प्रत्यक्षवारणाय तदभ्युपगम आवश्यक इति वाच्यम्। तद्वारणायोद्भूतैकत्वादिनाऽपि हेतुत्वसम्भवात्, यत्रैकस्मिन्नेव वस्तुनि पाकवशादुद्भूतरूपतदभावौ तत्र प्रत्यक्षाप्रत्यक्षोपपादनं व्यभिचाराच्च सम्भवतीत्यपि नम्-

मुत्पद्यते, पीतावच्छेदेनाऽपि नीलोपलब्धिप्रसङ्गात्। नाऽव्यव्याप्यवृत्ति रामरुद्री।

वचम्, तादृशस्थलस्य विवादास्पदत्वादिति। अथैतन्मते अद्भूतैकत्वादेरपि न चाक्षुषे हेतुता, वैयर्थ्यात्, अनुद्भूतरूपे ग्रीष्मोष्मादौ प्रत्यक्षानुत्पादस्य रूपविषयकत्वात्मकद्रव्यप्रत्यक्षत्वव्यापकधर्मावच्छिन्नसामग्रीविरहप्रयोज्यत्वात्। कथं तर्हि 'गृह्णाति चक्षुःसम्बन्धादालोकोद्भूतरूपयोः (५५)—'इति पूर्वकारिका सङ्गमनीयेति चेत्, उद्भूतरूपप्रयोज्यतामादायैव, व्यापकधर्मावच्छिन्नसामग्रीमध्यपतितस्य व्याप्यधर्मावच्छिन्नप्रयोजकत्वाच्चतेः। नन्वेवमालोकसंयोगस्याऽपि द्रव्यचाक्षुषहेतुत्वानुपपत्तिः, अन्धकारे द्रव्यचाक्षुषापत्ते रूपचाक्षुषहेतुसामग्रीघटकालोकसंयोगविरहादेव वारणीयत्वादिति चेन्न, अन्धकारे रूपचाक्षुषसामग्र्यभावो नाऽस्ति, नीलरूपभ्रान्तिहेतोर्दोषस्य विद्यमानत्वात्, द्रव्यप्रत्यक्षं च न भक्स्येव, अत आलोकसंयोगस्य हेतुत्वमावश्यकमिति चेन्न। रूपभ्रमहेतुदोषसत्त्वे वाय्वादीनामपि चाक्षुषापत्तेः, बहिरिन्द्रियाणां स्वायोग्यमुख्यविशेष्यकज्ञानजनकत्वायोगादिष्टापत्तेरसम्भवादिति, प्रकृते तु निरुक्तरीत्या चाक्षुषप्रत्यक्षस्य रूपाविषयकस्य कथञ्चिदप्यसम्भवेन रूपभ्रमहेतुदोषविरहदशायां रूपचाक्षुषत्वरूपव्यापकधर्मावच्छिन्नसामग्रीविरहादेव घटप्रत्यक्षानुपपत्तिश्चित्ररूप समर्थयतीति बोध्यम्। **मूले—नाऽपि व्याप्यवृत्ति नीलादिकमिति।** निरवच्छिन्नवृत्तिकमित्यर्थः। **पीतावच्छेदेनाऽपि नीलोपलब्धिप्रसङ्गादिति। पीतावच्छेदेनाऽपि**—पीतावच्छेदेनोत्पन्नचक्षुःसंयोगघटितचक्षुःसंयुक्तसमवायरूपसन्निकर्षेणाऽपि। तेन व्याप्यवृत्तित्वस्य नीलादिनिष्ठस्य पीतावच्छेदेनोपलब्ध्यापादकत्वं न सम्भवति, व्याप्यवृत्तित्वस्य निरवच्छिन्नवृत्तित्वात्मकतया किञ्चिदवच्छेदेनोपलब्धिविरोधित्वादिति प्रयुक्तम्(१)।

नाऽव्यव्याप्यवृत्तेति। सावच्छिन्नवृत्तिकमित्यर्थः। अथैवमपि पीतावच्छेदेन चक्षुःसंयोगकाले नीलरूपप्रत्यक्षापत्तिर्दुर्वारैव, तदानीमपि चक्षुःसंयुक्तसमवायरूपसन्निकर्षस्याऽबाधितत्वात्। न च चक्षुःसंयोगावच्छेदकावच्छिन्नसमवायत्वादिना स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन चक्षुःसंयोगविशिष्टसमवायत्वादिना वा सन्निकर्षत्वोपगमान्नोक्तदोषः, तत्काले तादृशसन्निकर्षविरहादेव प्रत्यक्षापत्तिवारणसम्भवादिति वाच्यम्। आद्ये व्याप्यवृत्तिनीलादिप्रत्यक्षानुपपत्तेः, तत्र चक्षुःसंयोगावच्छेदकावच्छिन्नसमवायस्याऽसम्भवात्। द्वितीये व्यक्त्यन्तरे चक्षुःसंयोगदशायां घटनीलप्रत्यक्षापत्तेः, तदानीमपि स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धेन तत्समवायस्य तत्र सत्त्वात्, तस्य किञ्चिदनवच्छिन्नत्वेन सर्वदैव स्वानवच्छेदकानवच्छिन्नत्वादिति चेन्न। स्वसमानाधिकरणनिष्ठत्व-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेन

---

(१) ननु स्वप्रतियोगित्व-स्वसामानाधिकरण्योभयसम्बन्धेनाऽभावविशिष्टान्यत्वरूपमेव व्याप्यवृत्तित्वमिह विवक्षितम्, तच्च न सावच्छिन्नवृत्तिमत्त्वेन विरुध्यते। न च रूपस्याऽपि कालिकादिघटितसामानाधिकरण्यघटितोक्तसम्बन्धद्वयेन स्वाभावविशिष्टत्वात् व्याप्यवृत्तित्वासम्भव इति वाच्यम्। प्रतियोगितावैशिष्ट्यप्रतियोगिताश्रयत्वस्यैव तथात्वात्। वैशिष्ट्यं च स्वतादात्म्य-स्वविशिष्टाधेयतानिरूपिताधिकरणतावन्निरूपिताधेयतावैशिष्ट्योभयसम्बन्धेन। आधेयतायां स्ववैशिष्ट्यं च स्वनिरूपकाभावत्वावच्छिन्नत्व-स्वावच्छेदकसम्बन्धावच्छिन्नत्वावच्छेदकावच्छिन्नवत्ताग्रहविरोधिताघटकसम्बन्धावच्छिन्नत्वोभयसम्बन्धेन। आधेयतावैशिष्ट्यं च प्रतियोगितायां स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वावच्छेदकावच्छिन्नत्वोभयसम्बन्धेनेति चेन्न। एवं सति सावच्छिन्नत्वं तत्र रूपे नीलावच्छिन्नत्वप्रयुक्तमेव, न तु पीतावच्छिन्नत्वप्रयुक्तमित्यभ्युपगमेऽपि भवदुक्तव्याप्यवृत्तित्वस्याऽक्षततया पीतावच्छेदेनोपलब्धौ निरुक्तव्याप्यवृत्तित्वस्याऽऽपादकत्वासम्भवात्। न च तस्य रूपस्य सर्वावयवावच्छिन्नत्वमेव स्वीकरणीयम्, अन्यथा पीतावच्छेदेन तदभावसत्त्वाद्व्याप्यवृत्तित्वभङ्गप्रसङ्गादिति वाच्यम्। यो यद्धर्मस्याऽनवच्छेदकः स तदभावावच्छेदक इति व्याप्तेरेव पीतावयवावच्छेदेन नीलाभावस्य साधनीयतया गुणाधनवच्छेदकप्रमेयत्वादौ व्यभिचारेण तादृशव्याप्यसम्भवे पीतावच्छेदेन नीलाभावासिद्धेः। स्पष्टं चैतत् सिद्धान्तलक्षणादीधितौ जागदीशीगादाधर्यांश्च। व्याप्यवृत्तेः सर्वावयवावच्छिन्नत्वस्वीकारेऽपि प्रमाणाभावाच्चेति बोध्यम्।

नीलादिकमुत्पद्यते, व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वे विरोधात्, तस्मान्नानाजातीयरूपैरवयविनि विजातीयं चित्रं रूपमारभ्यते। अत एवैकं चित्ररूपमित्यनुभवोऽपि नानारूपकल्पने गौरवात्।

इत्थं च नीलादीनां पीताद्यारम्भे प्रतिबन्धकत्वकल्पनादवयविनि न पीताद्युत्पत्तिः।

दिनकरी।

दिति भावः। **व्याप्यवृत्तिजातीयेति।** व्याप्यवृत्तिवृत्तिजातिश्च सविषयावृत्तिर्बोध्या। तेन व्याप्यवृत्तीश्वरज्ञानजातीयस्याऽस्मदादिज्ञानस्याऽव्याप्यवृत्तित्वेऽपि न क्षतिः। ननु वृक्षाणां बहुत्वेऽप्येकं वनमितिवद्रूपसमुदायगतमेकत्वमादायैकं चित्रमित्यनुभवोपपत्तिरत आह। **नानेति। गौरवादिति।** चित्रमितिप्रतीतिविषयताया अनेकत्र कल्पने गौरवादित्यर्थः।

ननु चित्ररूपाधिकरणे घटादौ स्वाश्रयसमवेतत्वसम्बन्धेन कपालनीलादीनां कारणानां सत्त्वात् कथं तत्र न नीलाद्युत्पत्तिरित्यत आह। **इत्थं चेति।** उक्तलाघवेन चित्ररूपसिद्धौ चेत्यर्थः। प्रतिबन्धकत्वकल्पनादिति। समवायेन नीलं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन

रामरुद्री।

चक्षुःसंयोगविशिष्टसमवायस्य सन्निकर्षत्वाभ्युपगमात्। **व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वे**—व्याप्यवृत्तितावच्छेदकगुणत्वव्याप्यजातेरवच्छेदकत्वसम्बन्धावच्छिन्नकार्यतावच्छेदकत्वे। **विरोधात्**—उपजीव्यविरोधप्रसङ्गात्। कपालनीलादितो घटनीलाद्युत्पत्तिमुपजीव्य हि नीलत्वादेर्नीलादिजन्यतावच्छेदकत्वं स्वीक्रियते, कार्यतायामवच्छेदकतासम्बन्धस्याऽवच्छेदकविधया निवेशे तद्विरोधप्रसङ्गः, केवलनीलकपालजन्यघटनीलस्य व्याप्यवृत्तितया तस्याऽवच्छेदकतासम्बन्धेनोत्पत्त्ययोगात्, नानारूपवदवयवारब्धघटस्थले च नीलोत्पत्तिः सन्दिग्धैव, अतो न तामुपजीव्याऽवच्छेदकत्वसम्बन्धावच्छिन्ना नीलादेः कार्यताऽभ्युपगन्तुं शक्येत्यत्र तात्पर्यम्। एतेन व्याप्यवृत्तिभगवज्ज्ञानेच्छादिजातीयस्य ज्ञानेच्छादेरव्याप्यवृत्तित्वात्, उक्तनियमस्याऽप्रयोजकत्वाच्चेदमयुक्तम्, कर्मत्वे व्यभिचाराच्च, चलति शाखासमूहे निश्चले मूले महीरुहश्चलतीति प्रतीतेः क्वचित् कर्मणोऽप्यव्याप्यवृत्तित्वात्। न च तत्राऽवयवक्रियैव परम्परयाऽवयविनि भासते, अवयवी तु निश्चल एवेति वाच्यम्। साक्षात्सम्बन्धे बाधकाभावात्, अन्यथा कर्मणः प्रायेणाऽवयविगतत्वमेव विलीयेत, सामग्रीसत्त्वेन सिद्धिस्तुल्यैव। सामग्र्येव नाऽस्ति, अभिघातादेरवयवगतत्वात्, अवयविनि तत्प्रत्ययस्य परम्परयैव उपपत्तेरित्यपि तुल्यम्। न चैवमवयविनि पूर्वदेशविभागादिर्न स्यादिति वाच्यम्। किं तेन? अवयव एव स इति स्वीकारादिति केशाञ्चिच्छङ्का परास्ता। टीकाकृता तु प्रौढयैव यथाश्रुतार्थमादाय व्याख्यानं कृतम्। न च नीलादेः समवायावच्छेदकत्वार्थं प्रत्येकमवच्छिन्ना कार्यतादयमभ्युपगम्यत इति न दोष इति वाच्यम्। गौरवात्। अथ भवन्मतेऽपि चित्रत्वावच्छिन्नं प्रति कारणतान्तरं कल्प्यमिति कार्यकारणभावद्वयकल्पनं भवतोऽपि दुष्परिहरमेवेति चेन्न। भवन्मतेऽवच्छेदकतासम्बन्धेन नीलं प्रति समवायेनैव नीलस्य हेतुत्वं वाच्यमिति केवलनीलकपालस्थलेऽपि कपालेऽवच्छेदकतासम्बन्धेन नीलोत्पादापत्तेरेव दोषत्वादिति प्रघट्टकार्थः। टीकायाम्—**नन्विन्द्रियादि। अनुभवोपपत्तिरिति।** वृक्षेषु तदेकत्वबोधस्य तत्राऽसम्भवात् यथा तत्र विशेषणीभूतसमुदायत्वगतमेवैकत्वं प्रतीयत इत्यभ्युपगम्यते तथेत्यर्थः।

ननु पीतादिकं प्रति नीलादीनां प्रतिबन्धकत्व मूलोक्तं न सङ्गच्छते, तथा हि पीतं प्रति न नीलत्वादिना प्रत्येकं षड्वा बहूनि वा प्रतिबन्धकत्वानि कल्पयितुं युक्तानि, महागौरवादित्यत आह। **समवायेनेति।** इदं ध्येयम्। यत्रैककपाले पाकाद्विनश्यदवस्थः पीतः कपालान्तरे चाऽविनश्यदवस्थो नीलः, तत्र द्वितीयक्षणे पीतनाशे सति तृतीयक्षणे नीलोत्पादापत्तिः, तत्र नीलान्यरूपस्य प्रतिबन्धकस्य तदानीं

रामरुद्री।

मभावात्। न चेष्टापत्तिः, अग्रे तेजःसंयोगवशात्पीतरूपोपलक्षितकपाले रक्तोत्पत्तौ घटे तत्काले नीलोपलब्ध्यापत्तेः, चित्ररूपोत्पादानुपपत्तेश्च, समवायेन रूपं प्रति समवायेन रूपस्य प्रतिबन्धकत्वात्। ननु एककपालानीलतादशायां कपालान्तरे नीलसत्त्वे च घटे कीदृशनीलव्यक्तिरापाद्यत इति वक्तव्यम्, न तावत्पूर्वनीलव्यक्तिरापादयितुं शक्या, तत्कारणत्वस्य विनष्टनीलव्यक्तावपि स्वीकरणीयतया तदभावादेवाऽऽपत्तिवारणात्। नाऽपि अग्रे पुनर्जातेन पाकेन तत्काले नीलान्तरोत्पत्तौ भविष्यन्ती नीलव्यक्तिरापादयितुं शक्या, तत्कारणस्य भविष्यन्नीलव्यक्तेरभावात्। तस्मात् कस्याश्चिदपि नीलव्यक्तेरापादनासम्भवात् न कश्चिद्दोष इति। न चैवं नीलेतररूपत्वादिना प्रतिबन्धकत्वाभ्युपगमोऽप्यनुचितः, तत्राऽपि विशेषकारणविरहादेव नीलोत्पादापत्तेर्वारयितुं शक्यत्वात्। यद्यपि यत्र नीलेन कपालद्वयेन पूर्वमेको घट उत्पादितस्ततः कुतश्चित् कारणात्तद्घटविनाशे ताभ्यामेव कपालाभ्यां पीतकपालान्तरसंयुक्ताभ्यां घटान्तरमुत्पादित, तत्र घटान्तरे पूर्वनीलापत्तिः सम्भवति, तथाऽपि तेनैव कपालद्वयेन कपालान्तरासहकृतेनाचेत घटान्तरमुत्पादितं, तत्र पूर्वघटेऽपरघटनीलोत्पादापत्तेर्वारणाय समवायिकारणस्याऽपि तत्तद्व्यक्तित्वेन हेतुत्वस्याऽऽवश्यकतया तदभावादेव घटान्तरे नीलोत्पादवारणसम्भवादीदृशप्रतिबध्यप्रतिबन्धकभावो निर्युक्तिक एवेति वाच्यम्। यादृशनीलकपालाभ्यां पीतकपालासम्पृक्ताभ्यां घटद्वयं न जनितं, तादृशानन्तस्थलेऽनन्तानां समवायिकारणव्यक्तीनां तत्तद्व्यक्तित्वेन हेतुत्वमपेक्ष्येदृशप्रतिबध्यप्रतिबन्धकभावकल्पनस्य युक्ततया तत्स्वीकारादिति चेन्न। तथा सति लाघवात् नीलादिकं प्रति सामानाधिकरण्यसम्बन्धेन नीलाद्यभावत्वेन घट्प्रतिबन्धकत्वकल्पनाया एवोचितत्वात्, नीलान्यरूपत्वादिना षण्णां रूपाभावत्वेन च सप्तमस्य प्रतिबन्धकत्वस्य कल्पनानौचित्यात्। ननु पाकजस्थले व्यभिचारान्न नीलाभावत्वादिनाऽपि प्रतिबन्धकत्व कल्पयितुं शक्यम्, अपाकजत्वस्य प्रतिबध्यतावच्छेदककोटावुपादाने च तस्याऽनन्वगतत्वादनन्तप्रतिबध्यप्रतिबन्धकभावकल्पनाप्रसङ्गः, यत्रैकस्मिन् कपाले नीलरूपसत्त्वदशायामपरत्र नीलजनकाग्निसंयोगस्तदुत्तरं नीलरूपानुत्पादप्रसङ्गश्च, तत्र कथञ्चिदिष्टापत्तिसम्भवेऽपि* नीलपीतरक्तकपालानां यत्र प्रथमक्षणे घटोत्पत्तिः, ततस्तेषां रूपोत्पत्तिः, रक्तरूपविनाशकतेजःसंयोगः, परस्परं च संयोगो घटारम्भकः, ततो रक्तनाशो घटोत्पत्तिश्चेत्येकः कालः, तदुत्तरक्षणे चित्ररूपानुत्पादप्रसङ्गो दुर्वार एव। न चेष्टापत्तिः, तत्क्षणे चक्षुःसंनिकर्षादुत्तरक्षणे चित्ररूपप्रत्यक्षानुपपत्तेः। न च न प्रत्यक्षानुपपत्तिः, घटोत्पत्तिकाले रक्तनाशेऽपि तदुत्तरक्षणे तत्रैव कपाले पाकवशाद्रूपान्तरस्योत्पन्नतया बाधकाभावाद्घटेऽपि रूपोत्पादे तृतीयक्षणे चित्ररूपसमर्थनात्, द्वितीयक्षणे प्रथमक्षणे वा प्रत्यक्ष तु भवद्भिरपि नाऽभ्युपगन्तुं शक्यम्, तत्कारणस्य चक्षुःसन्निकर्षस्याऽसम्भवादिति वाच्यम्। प्रत्यक्षकारणीभूतस्य विषयस्य सन्निकर्षस्य च पूर्वं विरहेण तदुक्तयुक्त्यैव तदा तदसम्भवात्। यावदवयवगतरूपप्रत्यक्षस्याऽपि चित्रप्रत्यक्षहेतुत्वमावश्यकम्, अन्यथा नीलपीतकपालद्वयारब्धघटे अन्यतररूपाग्रहदशायां चित्रप्रत्यक्षापत्तेः, तथा च एकावयवनीरूपतादशायां यावदवयवरूपप्रत्यक्षात्मककारणविरहात्तत्काले चित्रप्रत्यक्षासम्भव इति चेन्न, तत्र चतुर्थक्षण एव चित्रप्रत्यक्षोपगमेन तृतीयक्षणे तदसम्भवेऽपि क्षत्यभावात्, क्षणविलम्बस्य शपथनिर्णेतव्यत्वात्, यावदवयवत्वस्याऽनुगतस्य निर्वक्तुमशक्यतयेदृशकार्यकारणभावस्य कथञ्चिदप्यसम्भवात्, अन्यथा पुष्पादिषु अनुद्भूतरूपाणामप्यवयवानां स्वीकृततया तत्र चित्रप्रत्यक्षानुपपत्तेः। न च तेषां संयोगिद्रव्यत्वमेव, न त्वारम्भकत्वमिति न तत्र चित्ररूपप्रत्यक्षानुपपत्तिरिति वाच्यम्। तेषां संयोगिद्रव्यत्वे पुष्पे सौरभारम्भकावयवान्तराभावेन पुष्पं सुरभीति प्रतीतेर्भ्रमत्वापत्तेः, पुष्पम्लानौ तादृशानुद्भूतरूपावयवापसरणप्रयुक्तस्यैव गन्धविनाशस्य कल्पनीयत्वात्, अन्यथा पुष्पघटकप्रत्यक्षभागानां यथापूर्वमवस्थिततया तत्र गन्धस्वीकारे तत्कालेऽपि तत्प्रत्यक्षापत्तेः। न च तत्र तेजःसंयोगवशादेवोद्भूतावयवानामपि गन्धो नश्यतीति कल्प्यते इति वाच्यम्। तेजःसंयोगसम्भावनारहितदेशस्थापितेऽपि पुष्पादौ

---

*तत्र तदुत्तरक्षणेऽवयविनि नीलरूपं नोत्पद्यत एव, किन्तु अवयवे पाकाद्रूपोत्पत्तौ कारणगुरुत्वपूर्वक एव नीलादिर्घटे उत्पद्यते, क्षणविलम्बस्य शपथनिर्णेतव्यत्वादिति रीत्येत्यर्थः।

दिनकरी।

नीलातिरिक्तरूपत्वेन, पीतरूपं प्रति पीतातिरिक्तरूपत्वेन प्रतीबन्धकत्वमिति रीत्या प्रतिबध्यप्रतिबन्धकभावकल्पनात्, अन्यथा नानाजातीयरूपवत्कपालारब्धे घटे नीलकपालावयवच्छेदेन पीतोत्पादापत्तेर्दुर्वारत्वादिति भावः।

रामरुद्री।

किञ्चित्कालं तादृशानुद्भूतावयवापगमे गन्धन्यूनीभावानुभवेन गन्धान्तरोत्पादस्याऽऽवश्यकतया तस्य पूर्वगन्धनिवृत्तिनान्तरीयकतया तत्स्वीकारस्याऽऽवश्यकत्वात्, अनुद्भूतावयवापगमस्य च तत्स्थले बाधौ सौरभानुभवान्यथानुपपत्त्याऽऽवश्यकल्प्यत्वात्। नीलपीतारब्धस्थले तदेकतरविधानदशायां चित्रप्रत्यक्षापत्तिवारणाय तु विषयतया चित्रप्रत्यक्षं प्रति नीलेतररूपवदवयवावच्छिन्नचक्षुःसंयुक्तसमवायत्व—पीतेतररूपवदवयवावच्छिन्नचक्षुःसंयुक्तसमवायत्वादिना बद्ध्वा बहवो वा कार्यकारणभावाः कल्पनीयाः, केवलनीलावच्छिन्नसन्निकर्षकाले रक्तरूपादिग्रहसत्त्वे तदवयवावच्छिन्नचक्षुःसंयोगविरहदशायामपि यदि चित्रप्रत्यक्षमनुभवसिद्धं, तदा नीलमात्रारब्धे नानाजातीयरूपवदवयवारब्धत्वभ्रमकालोपाजयमानं चित्रप्रत्यक्षमिवोपनीतभानात्मकमेव तदभ्युपेयम्, न तु लौकिकसन्निकर्षजन्यमतो न व्यभिचारः। रक्तशुक्लावारब्धघटे शुक्ले रक्तत्वभ्रमदशायां तथाविधसन्निकर्षसत्त्वेऽपि दोषेण प्रतिबन्धादेव न चित्रप्रत्यक्षमिति सिद्धान्तस्यैव स्वहस्तितत्त्वादिति निगर्वः।

परे तु चित्रेतररूपत्वावच्छिन्ने चित्रं कार्यकालवृत्तितया प्रतिबन्धकम्। न चैकावयवे नीलसत्त्वेऽपरत्र पीतजनकाग्निसंयोगसत्त्वे नीलापत्तिः, तदानीं चित्राभावसत्त्वादिति वाच्यम्। जन्यरूपत्वावच्छिन्नं प्रति सामानाधिकरण्यसम्बन्धेन रूपाभावस्य प्रतिबन्धकत्वादेव तद्वारणात्। न च पाकजरूपे व्यभिचार इति वाच्यम्। रूपसामानाधिकरण्यविशिष्टरूपाभावस्यैव प्रतिबन्धकत्वोपगमात्। न च घटादेर्यस्मिन्नवयवपाकस्थले घटे चित्ररूपानुत्पादप्रसङ्गः, तत्र रूपसामानाधिकरण्यविशिष्टरूपाभावसत्त्वादिति वाच्यम्। इष्टापत्तेः, तादृशावयवे रूपोत्पादानन्तरमेव चित्रोत्पादस्य स्वीकरणीयत्वादिति प्राहुः।

वैशेषिकैकदेशिनस्तु नीलादिकं प्रति नीलप्रागभावत्वेनैव हेतुना, अतो न चित्रघटस्थले तदापत्तिः। न च परमाणौ रक्ततादशायां भाविनीलव्यक्तेरुत्पादापत्तिः, तत्प्रागभावस्य सत्त्वादिति वाच्यम्। अपाकजनीलव्यक्तेः प्रागभावविरहेणाऽऽपादयितुमशक्यत्वात्, पाकजन्यायाश्चाऽग्निसंयोगविरहादेवाऽनापादनीयत्वात्। अथ नीलादिकं प्रति नीलादेर्हेतुत्वे मानाभाव इति चेन्न। प्रागभावस्य प्रतियोगिसमवायिनीव देशकालाधिकरणादावपि भविष्यतीतिप्रत्ययानुरोधेन स्वीकरणीयतया देशकालादौ तदापत्तिवारणाय तत्स्वीकारावश्यकत्वादित्याहुः।

ननु समवायेन नीलादिकं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन हेतुत्वस्वीकारेऽपि भवन्मते समवायेन नीलादिकं प्रति नीलान्यरूपत्वादिना प्रतिबन्धकताकल्पनगौरवमधिकम्। न च स्वसमवायिसमवेतत्वसम्बन्धेन नीलादेर्हेतुत्वे नीलपीतारब्धस्थले नीलावच्छेदेनैव पीतावच्छेदेनाऽपि नीलापत्तिवारणायैव पूर्वोक्तः प्रतिबध्यप्रतिबन्धकभावः स्वीक्रियत इति वाच्यम्। पीतावच्छेदेन नीलापत्तिर्न सम्भवति, आपादकाभावात्। न च पीतकपालावच्छिन्नचक्षुः सन्निकर्षादिकाले नीलोपलब्ध्यापत्तिरेव दोष इति वाच्यम्। चित्ररूपवादिमतेऽपि केवलनीलकपालावच्छेदेन सन्निकर्षकाले नीलो घट इति प्रत्यक्षमुपपादनीयम्, न तावत्तत् सामानाधिकरण्येन नीलावगाहीति वक्तुं शक्यम्, अनुगताकारत्वव्याघातप्रसङ्गात्। किं तु सामानाधिकरण्यात्मकदोषवशात् घटे नीलभ्रमो जायत इत्यभ्युपगन्तव्यम्। तथा च स्वाव्यवहितोत्तरघटधर्मिकनीलादिभ्रमं प्रति नीलरूपवदवयवावच्छिन्नचक्षुःसंयुक्तसमवेतत्वं कारणमिति पर्यवसितम्। तत्र कार्यतावच्छेदककोटौ भ्रमत्वस्थाने लाघवात् ज्ञानत्वमेव निवेश्यते। तथा च पीतावच्छेदेन सन्निकर्षकाले न नीलादिप्रत्यक्षापत्तिरिति। न च यत्र पीतावच्छेदेनाऽपि चक्षुःसन्निकर्षः, तत्र नीलप्रत्यक्षापत्तिरिति वाच्यम्। इष्टापत्तेः, विशेषादर्शिनां तथा भ्रमसम्भवात्, विशेषदर्शनाभावविशिष्टस्य प्रतिबन्धकतावच्छेदककोटौ स्वयैव मयाऽपि निवेशनीयत्वात्, नीलाभावावदवयवावच्छिन्नचक्षुःसंयोगासमानकालीनत्व-

दिनकरी।

अत्र नव्याः, नानाजातीयरूपवत्कपालारब्धे घटे पीतकपालावच्छेदेन नीलापत्तिवारणाय न पूर्वोक्तः प्रतिबध्यप्रतिबन्धकभावः कल्प्यते, किं त्ववच्छेदकतासम्बन्धेन नीलादिकं प्रति समवायेन नीलादेः कारणत्वं कल्प्यते, चित्ररूपाङ्गीकारे तु समवायेन नीलादिकं प्रति स्वाश्रयसमवेतत्वसम्बन्धेन नीलत्वादिना हेतुत्वस्य पूर्वोक्तप्रतिबध्य प्रतिबन्धकभावस्य च कल्पनात् गौरवमित्याहुः,

तन्न, अवच्छेदकतासम्बन्धघटितोक्तकार्यकारणभावाङ्गीकारेऽप्यवच्छेदकतासम्बन्धेन कपालादौ जायमानस्य नीलादेः समवायेन घटादाविव गगनादावप्युत्पत्तिवारणाय समवायेन नीलादिकं प्रति स्वाश्रयसमवेतत्वसम्बन्धेन नीलादेर्हेतुत्वस्य तवाऽप्यावश्यकत्वात्। किं च चित्रमितिप्रतीतिविषयताया अनेकत्र कल्पने गौरवम्, एकत्र कल्पने लाघवमिति लाघवानुरोधेनाऽतिरिक्तचित्ररूपसिद्धौ पूर्वोक्तप्रतिबध्यप्रतिबन्धकभावकल्पनागौरवस्य न दोषत्वं, फलमुखत्वादित्यन्यत्र विस्तरः।

रामरुद्री।

स्याऽपि वा जनकतावच्छेदककोटौ निवेशनीयत्वादित्यत आह। किं चेति। किं च यत्र नीलपीतारब्धघटस्थले रक्तजनकोऽग्निसंयोगः संवृत्तः, तत्र घटे रक्तोत्पादवारणाय सामानाधिकरण्येन नीलान्यरूपस्य नीलादिकं प्रति प्रतिबन्धकत्वमभ्युपेयम्। न च तत्र घटेऽपि नीलपीतयोरुत्पादस्वीकारेण समवायेन तस्यैव प्रतिबन्धकत्वात्तत्र न रक्तापत्तिः सम्भवतीति वाच्यम्। नीलपीते हित्वया तत्राऽवच्छेदकतासम्बन्धेन नीलादिकं प्रति तेनैव सम्बन्धेन प्रतिबन्धके वक्तव्ये, रक्तरूपापत्तिस्तु समवायसम्बन्धेन दीयत इति केन किं वार्यते? न च पूर्वोक्तदिशा नीलपीतयोर्व्याप्यवृत्त्योरेव तत्रोत्पत्तिः स्वीक्रियते, तद्घटमिकनीलादिप्रत्यक्षे तादृशनीलरूपावयवावच्छिन्नचक्षुःसंयोगघटितसन्निकर्षस्य कारणत्वं च कल्पनीयमिति वाच्यम्। विशेषादर्शिनां भवतां नीलपीतोभयावच्छेदेन सन्निकर्षकालेऽपि रूपप्रत्यक्षस्यैवाऽनुत्पादप्रसङ्गात्, चित्ररूपाभावेन तत्प्रत्यक्षस्येतररूपवदवयवावच्छिन्नचक्षुःसंयोगसत्त्वेन नीलपीतयोरपि प्रत्यक्षासम्भवादित्यापि नीलादौ नीलान्यरूपाणां प्रतिबन्धकत्वे साधकं भविष्यतीति सूचयति। अन्यत्र विस्तर इति। शेषं स्पष्टम्। वस्तुतस्तु नीलपीतयोर्व्याप्यवृत्त्योरेव तत्रोपगमे नीलावच्छेदेन सन्निकर्षकाले पीतप्रत्यक्षापत्तिर्न सम्भवति, तस्य पीतप्रत्यक्षाहेतुत्वात्। नाऽपि पीतावच्छिन्नसन्निकर्षसमकालीनत्वान्नीलप्रत्यक्षानुपपत्तिः, तादृशसमानकालीनत्वाभावस्य जनकतावच्छेदककुक्षिप्रवेशवैयर्थ्यात्। नीलपीतोभयावच्छेदेन सन्निकर्षकालेऽपि विशेषादर्शिनां तदुभयसमूहालम्बनसम्भवात्। किं तु पीतावयवावच्छिन्नचक्षुःसन्निकर्षादिकाले दोषवशाज्जातस्य नीलज्ञानस्य भ्रमत्वानुपपत्तेरेव व्याप्यवृत्तिनीलपीतयोरेकत्र स्वीकारासम्भव इति दिक्।

श्रीरामतर्कवागीशास्तु—नन्वस्तु तत्र नीलादिकं, प्रतीतेर्दुर्वारत्वात्, चित्रमपि दुर्वारम्, अनुगतचित्रप्रत्ययस्यान्यथोपपादयितुमशक्यत्वात्। न च विजातीयनानारूपावगाहित्वेन तदुपपादनम्, वैजात्यं हि न नीलत्वपीतत्वादिकं सर्वम्, नीलत्वपीतत्वे एव वा, नीलपीतोभयमात्रवृत्ति इवेतरक्तोभयमात्रवृत्ति च चित्रप्रत्ययानुपपत्तेः। स्वसमानाधिकरणत्वे सति स्ववृत्तिजातिमत्त्वं विजातीयत्वम्, इत्थं च नानात्वं न वाच्यमित्यपि न युक्तम्, स्वत्वस्यानुगतत्वेनऽनुगतप्रत्ययानुपपत्तेस्तादवस्थ्यात्। न च नीलेतररूपीतेतररूपादिसमुदायत्वरूपेण तदुपपादनम्, नीलपीतमात्रवृत्ति रक्तापप्रतिसन्धानेन तदप्रतीतावपि चित्रप्रत्ययात्, इतरथा तत्तत्पीतादिभेदकूटवद्रूपत्वादिना नीलादिप्रतीत्युपपत्तौ नीलत्वादिविलोपापत्तेः। अस्तु तर्हि नीलादिसमानाधिकरणपीतादिषु चित्रत्वं जातिरिति चेन्न, नीलत्वादिना सङ्करप्रसङ्गात्। न च नीलत्वादि नाना, नीलानुगतमित्यनापत्तेरिति नीलत्वादिविरुद्धमेव चित्रत्वमिति तदाश्रयोऽप्यधिक इत्यधिकचित्ररूपरसगन्धस्पर्शाः केन वार्यणीयाः? सिद्धे चाऽतिरिक्ते चित्रे तत्राऽसमवायिकारणभावोऽ-

एतेन स्पर्शोऽपि व्याख्यातः ।

रसादिकमपि नाऽव्याप्यवृत्ति, किं तु नानाजातीयरसवदवयवैरारब्धेऽवयविनि रसाभावेऽपि न क्षतिः, तत्र रसनयाऽवयवरस एव गृह्यते, रसनेन्द्रियादीनां द्रव्यग्रहे सामर्थ्याभावात् अवयविनो नीरसत्वेऽपि क्षतेरभावात् ।

नव्यास्तु तत्राऽव्याप्यवृत्त्येव नानारूपं, नीलादेः पीतादिप्रतिबन्धकत्वकल्पने गौरवात् । अत एव—

"लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते—"

इत्यादिशास्त्रमप्युपपद्यते । न च व्याप्याव्याप्यवृत्तिजातीयद्वयोर्विरोधः, मानाभावात् । न च लाघवादेकं रूपं, अनुभवविरोधात्, अन्यथा घटादेरपि लाघवादैक्यं स्यात् । एतेन स्पर्शादिकमपि व्याख्यातमिति वदन्ति ॥ १०० ॥ इति चित्ररूपनिरूपणम् ।

दिनकरी ।

स्पर्शोऽपि व्याख्यात इति । कोमलकठिनस्पर्शवदवयवाभ्यामारब्धे घटादौ स्पर्शानङ्गीकारे घटस्य स्पार्शनानापत्तिरित्यादिरीत्या चित्रस्पर्शोऽप्यावश्यक इति भावः ।

अवयविनो नीरसत्वेऽपि क्षतेरभावादिति । न च चित्रो रस इतिप्रतीतिविषयतयाऽतिरिक्तचित्रसिद्धिरिति वाच्यम् । तादृशप्रतीतेरवयवगतनानारसैरुपपत्तेरतिरिक्तचित्ररसतत्प्रागभावध्वंसादिकल्पने गौरवात् । न चैवं द्व्यणुकगतरसस्याऽयोग्यतया मधुरादिरसप्रतीतिनियामकत्वासम्भवेनाऽस्तु त्र्यणुके मधुरादिरसः, चतुरणुकादित्यावयविपर्यन्तं मधुरादिरसवत्त्वे मानाभावः, त्र्यणुकगतमधुररसेनैव मधुरादिप्रत्ययोपपत्तेरिति वाच्यम् । समवायेन मधुररसं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन मधुररसत्वेन हेतुतायास्त्र्यणुकगतमधुररसान्यथानुपपत्त्या कल्पितया तादृशकारणबलाच्चतुरणुकादौ मधुरादिरसोत्पत्तेर्दुर्वारत्वात् ॥ १०० ॥ इति चित्ररूपनिरूपणम् ॥

रामरुद्री ।

स्ततोऽनुगत एव कल्पनीयः । वस्तुतो नीलपीतमात्रारब्धनीलरक्तपीतत्रितयमात्रारब्धेषु चित्रेषु विविधवैचित्र्यानुभवाच्चित्रत्वव्याप्या नानाजातयो दुर्वाराः । तथा च तत्तज्जात्यवच्छिन्नं प्रति नीलत्वपीतत्वाभ्यां नीलत्वरक्तत्वाभ्यां नीलत्वपीतत्वरक्तत्वैरेवमन्यान्यजातिभिरप्यसमवायिकारणत्वमावश्यकम् । इत्थं च नीलपीतरक्तारब्धे चित्रत्रयम्, एकं व्याप्यवृत्ति, द्वयमव्याप्यवृत्तीत्याहुः ।

वस्तुतस्तु रूपत्वावच्छिन्नं प्रति रूपत्वेनाऽप्यसमवायिकारणताया आवश्यकतया नीलादिभिन्नं रूपमात्रं यत् तत्रोत्पद्यते तदेव चित्रमितिव्यवहियत इत्यवधेयम् ।

नव्यास्त्विति । अव्याप्यवृत्त्येवेति । तत्तदवयवावच्छेदेन वर्तमानमित्यर्थः । नन्ववच्छेदकतासम्बन्धेन नीलादिकं प्रति समवायेन नीलादेर्हेतुत्वमङ्गीकृत्यैव भवन्मते पीतावच्छेदेन नीलोत्पत्तिर्वारणीया, तथा च भवदुक्तकार्यकारणभावो वाऽङ्गीकर्तव्यः, पीतादीनां प्रतिबन्धकत्वं वाऽङ्गीकर्त्तव्यमित्यत्र विनिगमनाविरह इत्यत आह । अत एवेति । नीलादेः पीताद्यप्रतिबन्धकत्वादेवेत्यर्थः । अन्यथा वृषस्य नानारूपवत्त्वबोधकं तच्छास्त्रं व्याहन्येतेति भावः । वहन्तीत्यस्वरसोद्भावनम् । तद्बीजं तु नवीनमतरीत्याऽपि प्रागुदाहृतशास्त्रं न पुच्छावच्छेदेन नीलरूपवत्त्वं वृषस्य बोधयितुं शक्नोति, तन्मतेऽपि वृषे

जलादिपरमाणौ तन्नित्यमन्यत् सहेतुकम् ।

जलादीति । जलपरमाणौ तेजःपरमाणौ च रूपं नित्यं, पृथिवीपरमाणुरूपं तु न नित्यं, तत्र पाकेन रूपान्तरोत्पत्तेः, न हि घटस्य पाकानन्तरं तदवयवोऽपक्व उपलभ्यते, न हि रक्तकपालस्य कपालिका नीलावयवा भवति, एवंक्रमेण परमाणावपि पाकसिद्धेः । अन्यत्—जलतेजःपरमाणुरूपभिन्नं रूपं, सहेतुकम्—जन्यम् । इति रूपग्रन्थः ।

दिनकरी ।

ननु घटादावेवाऽऽस्यात् पाकः,न तु परमाणावत आह । न हि रक्तेति । ॥इति रूपग्रन्थः॥

रामरुद्री ।

श्वेत्यादेर्जनकस्यैवाऽभावात् । न हि वृषारम्भकावयवेषु मुखपुच्छादिषु श्वेत्यं वर्तते, मुखस्य चर्मास्थिमांसाद्यारब्धत्वेन श्वेतरूपवत्त्वासम्भवात्, मुखवर्तिलोम्नः श्वेत्येऽपि तस्य वृषानारम्भकतया तद्गतरूपवत्त्वेन वृषे रूपोत्पादस्य वक्तुमशक्यत्वात् । खुरविषाणलोमादीनां शरीरसंयोगिद्रव्यत्वस्यैव सर्वैः स्वीकृतत्वात् । अन्यथा शरीरोत्पत्त्यनन्तरं लोमाद्युत्पादबोधकं वैद्यकशास्त्रं व्याहन्येत । तस्मात् नेदं शास्त्रं नञ्युक्तरीत्याऽपि मुखाद्यवच्छेदेन तत्तद्रूपवत्त्वं बोधयति, अपि तु श्वेतसम्बन्धित्वमेव मुखाद्यवच्छेदेन बोधयतीति स्वीकरणीयम् । तथा च न वृषेऽव्याप्यवृत्तिरूपबोधकत्वमुक्तशास्त्रस्य युक्तमिति बोध्यम् । एतत्तत्त्वं प्रागेव निरूपितम् । इति चित्ररूपनिरूपणम् ॥

एवंक्रमेणेति । तद्घटारम्भकत्रसरेणोरपक्वस्याऽनुपलब्ध्या तत्र पाकाङ्गीकारावश्यकत्वे तदवयवे द्व्यणुकेऽपि पाकाङ्गीकार आवश्यकः, अन्यथा द्व्यणुकनिष्ठस्य पूर्वरूपस्य श्यामादेरविनष्टस्य त्रसरेणौ पाकजरक्तोत्पत्तिप्रतिबन्धकस्य सत्त्वात्त्रसरेणावपि रक्तं रूपं नोत्पद्येत, समवायेन रक्तरूपं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन रक्तान्यरूपत्वादिना प्रतिबध्यप्रतिबन्धकभावस्य नीलपीतावयवारब्धे घटे नीलाद्युत्पत्तिवारणार्थमवश्याङ्गीकरणीयत्वात्, तथा च त्रसरेणौ रक्तरूपोत्पादान्यथानुपपत्त्या द्व्यणुकगतश्यामादेर्नाशोऽवश्यमभ्युपेयः, स च निमित्तान्तरासम्भवेनाऽग्निसंयोगज एवेति कल्प्यते, इत्थं च प्राक्तनद्व्यणुकगतश्यामविनाशेऽपि परमाणुगतश्यामरूपबलात् पुनस्तत्र श्यामरूपोत्पादस्य दुर्वारतया पुनस्त्रसरेणौ रक्तरूपोत्पादानुपपत्तिरतः परमाणावपि प्राक्तनरूपनाशः सिद्ध्यतीति भावः । न च व्यणुकद्व्यणुकयोरग्निसंयोगावित्येकः कालः, ततोऽग्निसंयोगवशात्तयो रूपनाशः, रक्तरूपोत्पादकाग्न्यन्तरसंयोगश्चेत्येकः कालः, तदुत्तरक्षणे त्रसरेणौ रक्तरूपोत्पादे बाधकाभावः, तत्पूर्वक्षणे श्यामरूपस्य नष्टत्वेन तेन प्रतिबन्धासम्भवादिति परमाणौ प्राक्तनरूपनाशानभ्युपगमेऽपि न क्षतिरिति वाच्यम् । एवं सति व्यणुके रक्तोत्पादक्षणे द्व्यणुके परमाणुश्यामरूपात्मककारणबलाच्छ्यामरूपोत्पत्तौ बाधकाभावेन तस्य कार्यकालवृत्तितया त्रसरेणौ रक्तोत्पादप्रतिबन्धकत्वस्य दुर्वारत्वात् । न चाऽस्त्वनया रीत्या परमाणुश्यामरूपस्यापि नाशस्तथाऽपि तत्र रूपान्तरोत्पादे मानाभाव इति वाच्यम् । श्यामरूपनाशानन्तरमुत्पन्नरक्तरूपारम्भानेव द्व्यणुकपर्यन्तान्विनाश्य पुनस्तैरेव परमाणुभिः कार्यान्तरारम्भे पुनरवयविषु रक्तरूपोत्पादनिर्वाहाय तत्र रूपान्तरोत्पादकल्पनाया अप्यावश्यकत्वात्, अन्यथा तत्र रक्तरूपकारणीभूतस्याऽग्निसंयोगस्य रक्तरूपस्य वा विरहेण तादृशावयविसमूहस्य नीरूपत्वेनोत्पादप्रसङ्गात्, तादृशद्रव्येषु रक्तरूपकारणीभूतस्य विलक्षणोष्मस्पर्शवदग्निसंयोगस्याऽबाधितत्वेन तेषु रक्तरूपोत्पादे बाधकाभावाच्च । न च केवलं विलक्षणोष्मस्पर्शवदग्निसंयोगत्वेन रक्तरूपं प्रति कारणत्वमसम्भवि, अग्निसामान्येन संयोगेऽपि काष्ठादौ तत्प्राङ्गारतापादकरक्तरूपोत्पाददर्शनात्, मृदादौ च तीव्रतराग्निसंयोगस्यैव रक्तरूपजनकत्वात्, तथा च विलक्षणोष्मस्पर्शवदग्निप्रतियोगिककाष्ठानुयोगिकसंयोगस्य तज्जन्यरक्तरूपं प्रति, तदपेक्षया विलक्षणोष्मस्पर्शवदग्निप्रतियोगिकमृदाद्यनुयोगिकसंयोगस्य च तज्जन्यरूपं प्रतीत्यादिरीत्या विशेषतः कार्यकारणभावो वाच्यः । मृत्व—काष्ठत्वादिद्रव्यत्वव्याप्यव्याप्यजातीनां च परमाणावभावादग्निसंयोगस्य परमाणौ रक्ताद्युत्पादकतानुपपत्तिरिति वाच्यम् । मृदाद्यनुयोगित्वस्थाने समवायता-

रसस्तु रसनाग्राह्यो मधुरादिरनेकधा ॥ १०१ ॥
सहकारी रसज्ञाया नित्यतादि च पूर्ववत् ।
घ्राणग्राह्यो भवेद्गन्धो घ्राणस्यैवोपकारकः ॥ १०२ ॥

रसं निरूपयति । रसस्त्विति । सहकारीति । **रासनज्ञाने रसः कारणमित्यर्थः** । पूर्ववदिति । **जलपरमाणौ रसो नित्यः, अन्यः सर्वोऽपि रसोऽनित्य इत्यर्थः** । इति रसग्रन्थः ॥

गन्धं निरूपयति । घ्राणग्राह्य इति । उपकारक इति । **घ्राणजन्यज्ञाने सहकारी**

रामरुद्री ।

दारम्ब्यान्यतरसम्बन्धेन मृद्विशिष्टानुयोगिकत्वस्यैव निवेशेन परमाणुद्व्यणुकादिरूपसाधारणकार्यकारणभावसम्भवात् । यद्वा मृदनुयोगिकतादृशसंयोगत्वादिना कारणत्वं नाऽभ्युपगम्यते, काष्ठरूपपरावृत्त्यनुकूलोष्णवदग्निसंयोगदशायां मृदादौ रक्तरूपानुत्पादस्य काष्ठगतरूपविशेषकारणस्य तत्तदग्निसंयोगस्य विरहेणैव निर्वाहात् । तेन मृद्विशिष्टानुयोगिकत्वमित्यत्र वैशिष्ट्यमुपलक्षणविषयैव प्रवेश्यम्, अन्यथा द्व्यणुकात्मकमृच्छून्यतादशायां पीलुपाकवादिमते च परमाणौ रूपान्तरानुत्पादप्रसङ्गात्, तदानीं मृद्विशिष्टानुयोगिकस्याऽग्निसंयोगस्याऽसम्भवात् । मृदुपलक्षितानुयोगिकसंयोगत्वेन कारणत्वे च येन परमाणुना प्रथमं काष्ठानुगुणरूपादिमता काष्ठमुत्पाद्य चिरेण कालेन पाकवशान्मृदनुगुणरूपादिमता मृदुत्पादिता, तत्र काष्ठदशायामग्निसंयोगस्याऽपि मृदुपलक्षितानुयोगिकत्वेन तत्कालेऽपि मृद्रूपोत्पादापत्तिः । न च मृदुपलक्षितानुयोगिकाग्निसंयोगस्य स्वाव्यवहितोत्तररूपत्वावच्छिन्नं प्रत्येव जनकत्वं, न तु मृद्रूपं प्रतीति तत्काले मृद्रूपानुत्पादेऽपि न क्षतिः, काष्ठरूपोत्पादनेनैव निर्वाहादिति वाच्यम् । एवमपि यत्रैकेन परमाणुना मृन्मुत्पाद्य पश्चात्पाषाणं उत्पादितस्तत्र पाषाणारम्भदशायां मृद्रूपपरावर्तनमात्रसमर्थोष्णस्पर्शवदग्निसयोगवशाद्रूपसामान्योत्पादापत्तेर्दुर्वारत्वात्, तत्काले च रूपान्तरानुत्पादस्य सर्वानुभवसिद्धत्वात् । किं च तत्तद्व्यक्तिं प्रत्यावश्यकेन तत्तदग्निसंयोगस्य कारणत्वेनैव सकलातिप्रसङ्गादिभङ्गे ईदृशकार्यकारणभावे मानाभाव एवेति निरस्तम् । इष्टत्वात् , इति समासः ।

ऋजवस्तु अवयविषु पच्यमानेषु अवयवानामपक्वानामनुपलब्ध्याऽवयवेषु पाकाङ्गीकारस्याऽऽवश्यकतया परमाणुषु पाकसिद्धिरिति व्याकुर्वते, तन्मन्दम् । परमाणूनामतीन्द्रियतया तद्गतस्य पाकस्य प्रत्यक्षेण प्रतिपत्तुमशक्यत्वादिति ध्येयम् । ॥ इति रूपग्रन्थः ॥

मूले-रसः कारणमित्यर्थ इति । विषयविधयेति शेषः । अनयैव रीत्या गन्धादिनिरूपणेऽपि सहकारित्वं बोध्यम् ।

वस्तुतस्तु चक्षुरादिकरणानां स्वनिष्ठगुणादिसहकारेणैव कारणत्वात् तादृशसहकारित्वमेवाऽत्र विवक्षितमिति प्राञ्चः ।

केचित्तु रूपादे रासनवारणाय द्रव्यसमवेतनिष्ठलौकिकविषयतासम्बन्धेन रासनं प्रति तादात्म्येन रसः कारणमित्यादिरीत्या रसगन्धयोः कारणत्वं वक्तव्यम् । चाक्षुषे तु रसादिगुणानां प्रतिबन्धकत्वमेव, न तु रूपस्य तादात्म्येन हेतुत्वम्, सङ्ख्यादीनामचाक्षुषतापत्तेः । अत एव रूपनिरूपणे 'चक्षुषः सहकारि स्यात्—'इति कारिका चाक्षुषं प्रत्युद्भूतरूपत्वेन कारणत्वपरतया व्याख्यातेति वदन्ति । तन्न, एवं सति द्रव्यसमवेतसमवेतरसत्वादिनिष्ठलौकिकविषयतया रासनापत्तौ रूपत्वादावबाधितैवेति त्वया तादृशसम्बन्धेन रासने रसवृत्तिजातेर्हेतुत्वं वाच्यमिति कार्यतावच्छेदकसम्बन्धद्वयगौरवात् । अस्माकं तु विषयतया रासनं प्रति तादात्म्येन रूपस्य तद्वृत्तिजातेश्च प्रतिबन्धकत्वमिति लाघवम् । न च स्वनिष्ठ एव स्पर्शादीनामप्येतादृशप्रतिबन्धकत्वान्तरं कल्प्यमिति गौरवमिति वाच्यम् । विषयतासम्बन्धेन रासने रसतद्वृत्तिजात्योस्तद्व्यधिकरण्यत्वेन प्रतिबन्धकत्वस्यैकस्य विशकलितरसान्यत्व—तद्वृत्तिजात्यन्यत्वादिना वा प्रतिबन्धकत्वद्वयस्य कल्पनेन लाघवादिति । ॥ इति रसग्रन्थः ॥

सौरभं चाऽसौरभं च (१) स द्वेधा परिकीर्तितः ।
स्पर्शस्त्वगिन्द्रियग्राह्यस्त्वचः स्यादुपकारकः ॥ १०३ ॥
अनुष्णाशीतशीतोष्णभेदात् स त्रिविधो मतः ।
काठिन्यादि क्षितावेव नित्यतादि च पूर्ववत् ॥ १०४ ॥

स इत्यर्थः : सर्वोऽपि गन्धोऽनित्य एव । इति गन्धप्रन्थः ॥

स्पर्शं निरूपयति । स्पर्श इति । उपकारक इति । **स्पार्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः** । अनुष्णाशीतेति । **पृथिव्यां वायौ च स्पर्शोऽनुष्णाशीतः, जले शीतः, तेजस्युष्णः, कठिनसुकुमारस्पर्शौ पृथिव्यामेवेत्यर्थः, । कठिनत्वादिकं तु न संसंयोगगतो जातिविशेषः, चक्षुर्ग्राह्यत्वापत्तेः** । पूर्ववदिति । **जलतेजोवायुपरमाणुस्पर्शा नित्याः, तद्भिन्नास्त्वनित्या इत्यर्थः** ॥ १०१-१०४ ॥ इति स्पर्शप्रन्थः ॥

एतेषां—रूपरसगन्धस्पर्शानाम् । नाऽन्यत्रेति । **पृथिव्यां हि रूपरसगन्धस्पर्शपरावृत्तिरग्निसंयोगादुपलभ्यते, न हि शतधाऽपि ध्मायमाने जले रूपादिकं परिवर्तते, नीरे सौरभमौष्ण्यं चाऽन्वयव्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते, पवनपृथिव्योः शीतस्पर्शादिवत्** ।

तत्राऽपि—पृथिवीष्वपि मध्ये, परमाणावेव रूपादीनां पाक इति वैशेषिका वदन्ति । तेषामयमाशयः—अवयविनाऽवष्टब्धेष्ववयवेषु पाको न सम्भवति,

दिनकरी ।

न संयोगगत इति । कठिनः संयोग इति प्रतीतिस्तु कठिनस्पर्शवद्द्रव्यप्रतियोगिकत्वमवगाहत इति भावः ॥ १०१-१०४ ॥ इति स्पर्शप्रन्थः ॥

रूपादीनां पाक इति । रूपादीनां परावृत्तिरित्यर्थः । पाको न सम्भवतीति । रूपादिपरावृत्तिफलकस्तेजःसंयोगो न सम्भवतीत्यर्थः । रूपादिपरावृत्तिर्न सम्भवतीति

रामरुद्री ।

अनुष्णाशीत इति । **ननु** प्रत्यक्षतस्तावत् शीतमुष्णश्च स्पर्शो गृह्यते, न तु तदुभयविलक्षण इति अनुष्णाशीतस्पर्शे मानाभाव इति चेन्न, वृश्चिकादिस्पर्शस्य शीतोष्णभिन्नस्य प्रत्यक्षसिद्धत्वादिति व्यक्तमाकरे । **चक्षुर्ग्राह्यत्वापत्तेरिति** । यद्यपि चक्षुर्ग्राह्यत्वस्य न संयोगनिष्ठत्वमापादकं, आत्ममनः संयोगगतज्ञानादिजनकतावच्छेदकवैजात्ये व्यभिचारात् । योग्यसन्निकर्षादिसहित तत्तु न सम्भवति, आपाद्यापादकयोर्व्याप्तिनिश्चयस्याऽप्रयोजकत्वशङ्कया प्रतिरुद्धत्वादिति, तथाऽपि सयोगगतत्वे चक्षुषा तत्प्रत्यक्षवारणमशक्यमतः स्पर्शनिष्ठत्वमावश्यकम् । यद्य न विषयतया चाक्षुषं प्रति कोमलत्वकाठिनत्वादेस्तादात्म्येन प्रतिबन्धकताया भवताऽपि कल्पनीयतया तत एव तच्चाक्षुषवारणसम्भवे तस्य वारणाय कोमलत्वादेः स्पर्शनिष्ठत्वाभ्युपगमो निर्युक्तिकः, तथाऽपि कोमलत्वादेः संयोगनिष्ठत्वे तेषां तत्तद्व्यक्तित्वेन चाक्षुषेऽनन्तप्रतिबध्यप्रतिबन्धकभावकल्पनमावश्यकम्, स्पर्शनिष्ठत्वे तु स्पर्शत्वादिचाक्षुषवारणाय विषयतया चाक्षुषं प्रति स्पर्शमात्रवृत्तित्वेन प्रतिबन्धकताया आवश्यकतया तत एव तच्चाक्षुषस्याऽपि वारणसम्भवात्तादृशतत्तद्व्यक्तित्वावच्छिन्नप्रतिबन्धकत्वाकल्पनेन लाघवमिति लाघवानुसन्धानेन तस्य स्पर्शे स्वीकार इति निष्कर्षः ॥ १०१—१०४ ॥ इति स्पर्शप्रन्थः ॥

मूले—अवष्टब्धेष्वितिं । स्वकारणीभूतसंयोगाश्रयत्वसम्बन्धेनाऽऽश्रितेष्वित्यर्थः । यत्तु कारणत्व-

(१) सौरभश्चासौरभश्च इति पाठान्तरम्

रामरुद्री।

मिह प्रयोजकत्वम्। संयोगाश्रयत्वमपि प्रयोज्यत्व-समवायान्यतरसम्बन्धेन। तेन कपालसंयोगस्यैव घटजनकतया तस्य च यत्किञ्चित्कापालिकावयवावच्छेदेनैवोत्पत्तेः कापालिकावयवान्तरावच्छेदेन कपाले घटावष्टब्धत्वविरहेऽपि न तदवच्छेदेन पाकोत्पादापत्तिः। तदवच्छेदेन प्रयोजकीभूतकापालिकावयवसंयोगस्यैव कपाले सम्भवात्। प्रयोजकत्वं च कारण-तत्कारणादिसाधारणमेव बोध्यमिति कैश्चिदुक्तम्, तत्तुच्छम्। कापालिकावयवे कपालावष्टब्धत्वस्यैवैव पाकाभावे कपाले पाकस्य कथञ्चिदप्यसम्भवात्। टीकायां वक्ष्यमाणस्य रूपनाशकारणस्य साक्षात्परम्परासाधारण-सर्वावयवावच्छेदेन तेजःसंयोगस्य विरहादिति यथाश्रुतटीकातन्मतानुसारिणः।

स्वतन्त्रास्तु—**अवयविनाऽवष्टब्धेष्विति**। अवयविकारणीभूतसंयोगाश्रयेष्वित्यर्थः। तादृशसंयोगावच्छेदकावच्छेदेनेति परमार्थः। पाकः--रूपान्तरोत्पादकस्तेजःसंयोगः। **न सम्भवतीति**। स्पर्शवद्द्रव्यसंयोगं प्रति समानावच्छेदकत्वप्रत्यासत्त्या स्पर्शवत्संयोगस्य प्रतिबन्धकत्वात् अवयवसंयोगावच्छेदकावच्छेदेन तेजःसंयोगस्याऽसम्भवे तदवच्छेदीभूतकपालिकावयवगतश्यामरूपानाशात् तदाश्रितश्यामरूपेणाऽवयविनोऽवयवे कपालादौ रूपान्तरप्रतिबन्धेन तदुत्पादासम्भवात्तदारम्भककारणबलाच्च श्यामरूपोत्पादे तेन प्रतिबन्धादवयविन्यपि घटादौ रूपान्तरोत्पादासम्भवादिति भावः*। नन्ववयविनोऽवयवे पूर्वरूपनाशकालेऽवयविनि रूपान्तरोत्पादो दुर्वारः। न च श्यामनाशकाल एवाऽवयविनोऽवयवे तदवयववर्तिश्यामरूपात्मककारणबलाच्छ्यामान्तरोत्पादे बाधकाभावात्तत एव प्रतिबन्धादवयविन्यपि रूपान्तरोत्पादसम्भव इति वाच्यम्। एकैकस्यैवाऽवयवावयवरूपस्याऽवयविनिष्ठद्वित्वविधरूपहेतुत्वाङ्गीकारे तद्बलात् प्रथमरूपसत्त्वदशायामेव रूपान्तरोत्पादापत्तेर्वारणाय पूर्वरूपनाशस्य तदुत्तररूपव्यक्तौ खण्डपट-न्यायेन*हेतुत्वस्य, श्यामरूपादिसत्त्व एवाऽग्निसंयोगवशाद्रूपान्तरोत्पादवारणाय रूपं प्रति रूपत्वादिना च प्रतिबध्यप्रतिबन्धकभावस्याऽवश्यं स्वीकरणीयतया पूर्वं प्राक्तनश्यामरूपात्मकप्रतिबन्धकसत्त्वेन श्यामनाशक्षणे उदीच्यश्यामरूपोत्पादासम्भवादिति चेन्न, इत्थं सति अवयविनि रक्तरूपोत्पादसमये कपाले पुनः श्यामरूपोत्पत्तिप्रसङ्गस्याऽबाधिततया घटे रक्तरूपोत्पादानन्तरं कपाले श्यामरूपप्रत्यक्षापत्तेर्दुर्वारत्वात्। तद्वारणाय च श्यामादिरूपस्य स्वसमवायिसमवेतत्वसम्बन्धेन समवायेन रक्तादिकं प्रति प्रतिबन्धकत्वस्याऽऽश्येयतया तद्बलादेवाऽवयविनि रक्तरूपोत्पादासम्भवस्याऽबाधितत्वात्। न चैवं यत्र घटतदारम्भकावयवादिषु बहिरग्निसंयोगस्तत्र युगपदेव कपालतदवयवादीनामपि घटरूपनाशकाल एव रूपनाशात्तदुत्तरक्षणे तदारम्भकद्व्यणुकेषु परमाणुगतरूपवशात् पुनः पूर्वरूपसजातीयरूपान्तरोत्पादवारणेऽपि घटे तत्काले विजातीयरूपोत्पादापत्तिर्न वारयितुं शक्या, तत्पूर्वं तदारम्भके कपाले पूर्वरूपविरहेण तत्क्षणे पूर्वरूपसजातीयरूपोत्पादकविरहादिति वाच्यम्। यतः कपाले उत्पद्यमानस्य घटस्य कपालावयवतदवयवादिष्वपि समवायसम्बन्धेन सत्त्वमावश्यकम्, अन्यथा कपाल इव तदवयवेष्वपि घट इति प्रत्ययस्य सर्वानुभवसिद्धस्याऽपलापापत्तेः, यत्र कपालद्वयारम्भकाले यावदवयवानां युगपदेव परस्परं संयो-

---

* इदमत्र तत्त्वम्-अवयविषु रूपान्तरोत्पाद एव न सम्भवति, रूपनाशः परं जायतां, का नाम नो हानिः? पीलुपाकवादिभिरवयविनि रूपान्तरोत्पादस्यैव मुख्यतया प्रतिक्षेप्तव्यत्वात्, प्रकृते च यत्र घटादौ कपालबहिर्देशावच्छेदेनाऽग्निसंयोगस्तत्र कपालेऽपि तादृशाग्निसंयोगस्याऽबाधितत्वात् कपालघटयोस्तद्बलात् पूर्वं श्यामरूपं तत्क्षणे निवर्तताम्, तथाऽपि तद्द्वितीयक्षणे नाऽग्निसंयोगवशात्तत्र रक्तादुत्पादसम्भवः, तत्पूर्वश्यामरूपबलात्कपालेऽपि श्यामरूपोत्पादस्याऽबाधितत्वादिति।

@ महापटारम्भकतन्त्वन्तर्गतकिञ्चित्तन्त्वपसारणे खण्डपटव्यक्तिरुत्पद्यते, तत्र पूर्वसिद्धस्याऽवशिष्टतन्तुसंयोगस्यैव हेतुत्वं वाच्यम्। तस्य च महापटारम्भप्राक्क्षणेऽपि सत्त्वात्तत्क्षणे भाविताद्दशखण्डपटव्यक्तेरापत्तिवारणाय महापटनाशस्याऽपि ताद्दशखण्डपटव्यक्तौ हेतुत्वं यथा तत्र कल्प्यते, तन्न्यायेनेत्यभिप्रायः। स्पष्टश्चाऽयमर्थः सामान्यलक्षणाजागदीश्याम्

परन्तु वह्निसंयोगेनाऽवयविषु विनष्टेषु स्वतन्त्रेषु परमाणुषु पाकः, पुनर्दिनकरी।

यावत्। रूपादिनाशं प्रति साक्षात्परम्परासाधारणसर्वावयवावच्छेदेन तेजःसंयोगस्य हेतुतयाऽवयविनाऽवष्टब्धेष्ववयवेषु सत्सु अवयविनि रूपादिनाशो न सम्भवति, तद्धेतोः सर्वावयवावच्छेदेन तेजःसंयोगस्याऽभावादिति भावः। न च विद्यमानेऽपि घटादौ सर्वावयवावच्छेदेन तेजःसंयोगः कुतो नोत्पद्यत इति वाच्यम्। तथा सत्यारम्भकसंयोगावच्छेदेनाऽवयविनि तेजःसंयोगोत्पादकाले तदवच्छेदेनाऽवयवेष्वपि नोदनाभिघातयोरन्यतरस्योत्पादात्।

रामरुद्री।

गस्तत्र क्षणविलम्बेन घटोत्पत्तेः शपथनिर्णेतव्यत्वात्, कपालस्तदवयवा वा घटकारणमित्यत्र विनिगमनाविरहेण च सर्वेषामेव तद्धेतुत्वस्याऽऽवश्यकत्वात्, तथा च प्रकृते तादृशघटस्य परमाणावपि सत्त्वेन तन्निष्ठरूपवलादेव घटेऽपि पूर्वरूपसजातीयरूपोत्पादेन पाकासम्भवादिति। न च तत्राऽग्निसंयोगस्याऽव्यनपायात् तत्काले कुतो न विजातीयरूपोत्पत्तिरिति वाच्यम्। पूर्वरूपस्य प्रतिबन्धकत्वात्। न च तर्हि श्यामरूपमपि न स्यात्, पूर्वरूपस्य प्रतिबन्धकत्वादिति वाच्यम्। नीलपीतारब्धघट इव विजातीयरूपेण प्रतिबन्धादेव तत्र रक्तोत्पादाभ्युपगमादिति। नन्वेवं कपालादौ पूर्वरूपस्याऽग्निसंयोगवशान्नाशसम्भवेऽपि तदवयवनिष्ठरूपेण प्रतिबन्धाद्विजातीयं रूपं नोत्पद्यत इत्येव सिद्धयति, एवं चेत् परमाणौ बहिर्देशावच्छेदेनाऽग्निसंयोगस्याऽबाधिततया तद्वल्लात्तत्रैव श्यामरूपं कुतो न नश्यति? इष्टापत्तौ च तात्कालिकद्व्यणुकादिरूपनाशस्याऽप्युत्पादेन पुनरग्निसंयोगबलात् पाकोत्पादापत्तिर्दुर्वारैव। न च तदवच्छिन्नरूपनाश प्रति तदवच्छिन्नाग्निसंयोगस्य हेतुत्वकल्पनात् बहिर्देशावच्छिन्नरूपनाशत्वव्यापकीभूतान्तर्देशावच्छिन्नरूपनाशत्वावच्छिन्नसामग्रीघटकस्याऽन्तर्देशावच्छिन्नाग्निसंयोगस्य विरहादेव न बहिर्देशावच्छिन्नरूपनाशोत्पादसम्भव इति वाच्यम्। ईदृशः कार्यकारणभावो न सम्भवति, यत्र घटनाशाद्रूपनाशः, तस्याऽपि तत्तद्देशावच्छेदेनैवोत्पत्त्या तत्र तत्तदवच्छिन्नाग्निसंयोगस्य विरहेण व्यभिचारात्। न च अभावीयविशेषणतावच्छेदकत्वाभ्युपगमान्न तदानीं दोषः, तादृशरूपनाशस्य तादृशसम्बन्धेन कुत्राऽप्यनुत्पत्त्या व्यभिचारवारणादिति वाच्यम्। तादृशकार्यकारणभावे मानाभावात्। तदभ्युपगमे तु निरुक्तरीत्या घटेऽपि पाकवारणसम्भवात् साक्षादवयविन्येव पाको न सम्भवति, निरुक्तहेतोरित्यनुक्त्वा **'अवयविनाऽवष्टब्धेष्ववयवेषु पाको न सम्भवति'** इति ग्रन्थकृदुक्तेः शिरोवेष्टनेन नासिकास्पर्शतुल्यत्वापातादिति चेन्न। तद्ग्रन्थस्य परितोऽवष्टब्धावयवविषयकतया कपालारम्भकबाह्यपरमाणुषु बहिर्देशावच्छेदेन रूपनाशसम्भवेऽपि आन्तरपरमाण्ववच्छेदेन रूपनाशासम्भवप्रतिपादकत्वात्, प्रकृते च तादृशान्तरपरमाणौ परितोऽवष्टब्धे किञ्चिदवच्छेदेनाऽपि तेजःसंयोगासम्भवेन पाकासम्भवादिति निष्कर्षः। **वह्निसंयोगेनाऽवयविषु विनष्टेष्विति।** वह्न्यभिघातादिना परमाणौ क्रियाविभागादिक्रमेण जातात्पूर्वसंयोगनाशादित्यादिः। **'वह्निसंयोगेन'** इत्यत्र तृतीयार्थः प्रयोज्यत्वम्, तेन वह्निसंयोगस्य साक्षादवयव्यनाशकत्वेऽपि न क्षतिः। **स्वतन्त्रेष्विति।** तेजःसंयोगप्रतिबन्धकरहितेष्वित्यर्थः। **पाक इति। रूपनाशरूपान्तरोत्पादावित्यर्थः।** तेजःसंयोगादिति शेषः। नन्वेवं पाकानन्तरं घटप्रत्यक्षानुपपत्तिरिति शङ्कां निरस्यति। **पुनरिति।** अनन्तरमित्यर्थ इति प्राहुः।

टीकायां— **रूपादिनाशं प्रतीति।** स्वरूपसम्बन्धेन तद्घटीयरूपनाशं प्रति तत्तदवयवनिष्ठावच्छेदकतासम्बन्धेन तद्घटवृत्त्यग्निसयोगः कारणमिति भावः। तेन सर्वावयवावच्छिन्नैकाग्निसयोगाऽप्रसिद्धावपि न क्षतिः। न च सर्वावयवावच्छेदेनैकस्याऽग्निसयोगस्योत्पत्त्यभ्युपगमे किं बाधकमिति वाच्यम्। शाखाभिमुखक्रियया मूलावच्छेदेन संयोगोत्पत्त्यापत्तिः, तत्कारणीभूतस्य कर्मणो वृक्षस्य च सत्त्वात्, अतः शाखादितत्तदवयवावच्छिन्नवृत्तिकसंयोगं प्रति तत्तदवयवत्वेन हेतुत्वस्याऽऽवश्यकतया वृक्ष इवाऽन्यावयविष्वपि सर्वावयवावच्छिन्नवृत्तिकैकविलक्षणसंयोगासम्भवात्। न च कीदृशी संयोगव्यक्तिर्मूले आपाद्यते? न तावन्मूलावच्छिन्ना, तत्कारणक्रियाविशेषाभावेन तदारणात्, तादृशक्रियाविशेषसत्त्वे

रामरुद्री ।

चेष्टापत्तिसम्भवात् । नाऽप्यग्रावच्छिन्ना, आपादकाभावात् । यो यद्धर्माश्रयनिष्ठजन्यतानिरूपितजनकतावच्छेदकावच्छिन्नसमुदायजन्यः, स तद्धर्मवानिति व्याप्तिबलेन मूलावच्छिन्ने संयोगे शाखावच्छिन्नत्वापत्तिरित्यपि न, शाखावच्छिन्नत्वाश्रयसंयोगनिष्ठतत्तद्व्यक्तित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकावच्छिन्नजन्यत्वविरहादेव मूलावच्छिन्नसंयोगे शाखावच्छिन्नत्वापादनासम्भवात् । न च तत्तद्व्यक्तिं प्रति तत्तत्क्रियात्वादिना कारणत्वं नाऽभ्युपगम्यते, एकव्यक्तेरपरव्यक्त्युत्पादापत्तिवारणं च मूलावच्छिन्नसंयोगे शाखावच्छिन्नत्वापत्तिवारणायाऽवश्यकल्प्येनाऽवच्छेदकतासम्बन्धेन तत्तत्संयोगव्यक्तिं प्रति अवच्छेदकतासम्बन्धेन तत्तत्संयोगविशिष्टस्य तादात्म्येन हेतुत्वेनैव सम्भवति, एकक्रियाजन्यसंयोगे तत्क्षणास्याऽप्यवच्छेदकतया तद्विरहादेव अपरक्रियातस्तदापत्तिवारणसम्भवादिति वाच्यम् । एतादृशकार्यकारणभावाङ्गीकारेऽपि एकक्रियातोऽपरसंयोगोत्पादवारणासम्भवात्, यत्रैकैकक्षणावच्छेदेनोत्पन्नाभ्यां व्यधिकरणाभ्यां कर्मभ्यां समानाधिकरणौ संयोगौ जनितौ, तत्रैकसंयोगेऽपरसंयोगनिष्ठतद्व्यक्तित्वापादनस्य दुष्परिहरत्वात् । यदि च तत्र समवायिकारणभेदाभेदौ इष्येते, अव्यधिकरणाभ्यामेककालोत्पन्नाभ्यां क्रियाभ्यामारब्धस्य च संयोगस्यैक्यमिष्यत एवेत्युच्यते, तदाऽपि समवायिकारणभेदात् भेदो वा असमवायिकारणव्यक्तिभेदाभेदौ वेत्यत्र विनिगमनाविरहेण क्रियाया अपि तत्तद्व्यक्तित्वेन कारणत्वमावश्यकम् । इत्थञ्च क्रियायास्तत्तद्व्यक्तित्वेन हेतुत्वेनैव निर्वाहे ईदृशगुरुतरकार्यकारणभावाभ्युपगमोऽसम्भवी । न चैकस्मात् कर्मणः शाखायां वृक्षे विभुषु वाय्वादिषु च तद्देशावच्छिन्नेषु नानासंयोगोत्पत्तिदर्शनात् प्रत्येकं तत्तत्संयोगव्यक्तौ तत्क्रियाया अनन्तकार्यकारणभावकल्पनमपेक्ष्य तत्क्रियाजन्यसंयोगमात्रं प्रति तत्क्रियात्वेन कार्यकारणभावोऽङ्गीकर्तव्यः, तत्तद्द्रव्यव्यक्तीनां च तत्तद्द्रव्यवृत्तिसंयोगत्वावच्छिन्नं प्रति, तथा चैकस्मादेव कर्मणो यत्र कपिहस्तावच्छेदेन शाखावच्छेदेनैकः, चरणावच्छेदेन मूलावच्छेदेनैक इति च संयोगद्वयं जनितम्, तत्र मूलावच्छिन्नसंयोगस्य शाखावच्छिन्नत्वापत्तिरिति वाच्यम् । सर्वावयवावच्छेदेनैकसंयोगाङ्गीकर्तृणामीदृशस्थलेऽप्येकसंयोगोत्पत्तेरिष्टत्वादिति चेन्न । यत्र शाखामूलाभिमुख्येन कपिक्रियया कपेः संयोगः क्रमेण शाखावच्छिन्नो मूलावच्छिन्नश्च वृक्षे हस्तचरणावच्छेदेनोत्पद्यते, तदानीं मध्येऽवकाशत्वे शाखावच्छिन्नमूलावच्छिन्नयोरैक्यं न सर्वावयवावच्छेदेन संयोगैक्यवादिनामपि इष्टम्, सर्वावयवावच्छिन्नसंयोगे तु ऐक्यव्यवहारस्तावत् सन्दिग्धः, तथा च तत्र मूलावच्छिन्नसंयोगे शाखावच्छिन्नत्वापादनसम्भवात्तदवच्छेदकस्याऽपि तत्संयोगव्यक्तौ हेतुत्वमास्थेयम् । अन्यथा तत्स्थले पुनः कपेर्हस्तोत्पन्नक्रियया हस्तावच्छिन्नसंयोगस्यैव चरणावच्छिन्नसंयोगस्याऽपि विनाशप्रसङ्गात्, इष्टापत्तौ च तदानीं शाखायां कपिवृक्षसंयोगो नाऽस्तीतिवत् मूले कपिवृक्षसंयोगो नाऽस्तीतिप्रत्ययापत्तेः । ननु तत्र शाखामूलावच्छिन्नसंयोगशाखावच्छिन्नसंयोगयोर्विनाशेऽपि पूर्वं शाखामूलयोः कपिसंयोगकाले शाखाकपिसंयोगमूलकपिसंयोगयोरप्युत्पन्नत्वेन तत्र तद्वलान्मूलावच्छिन्नवृक्षकपिसंयोगान्तरस्याऽप्यावश्यकतया तत्कालोत्पन्नकर्मणा शाखावच्छिन्नतादृशसंयोगद्वयविनाशेऽपि मूलावच्छिन्नतद्द्वयस्यविनाशान्न तथा प्रत्यय इति कल्प्यते । न च क्रियाजन्यमूलशाखावच्छिन्नप्रथमसंयोगस्यैव प्रतिबन्धकस्य सत्त्वेन तादृशसंयोगजसंयोगोत्पत्त्यसम्भवः । अन्यथा यत्र घटक्रियया तदवयवक्रियया च घटावयवघटयोर्गगनेन संयोगः, तत्र घटावयवसंयोगवशाद्घटगगनयोः संयोगान्तरोत्पादापत्तेः । संयोगजसंयोगे कर्मजन्यसंयोगस्याऽप्रतिबन्धकत्वेऽपि समानावच्छेदकत्वप्रत्यासत्त्या स्पर्शवत्संयोगस्य तादृशसंयोगे प्रतिबन्धकतया कपौ पूर्वकालीनसंयोगदशायां संयोगान्तरोत्पत्तिर्न सम्भवत्येव । ईदृशप्रतिबध्यप्रतिबन्धकभावानुपगमे मूर्तयोः समानदेशतायां विरुद्धत्वस्य दुरुपपादत्वापत्तिरिति वाच्यम् । एवं सति घटादिसंयोगकाले कपालसंयोगानुपपत्तेः । अन्यथा मूर्तयोः समानदेशताप्रसङ्गात् । न च स्पर्शवत्संयोगस्य स्पर्शवत्संयोगे कार्यपूर्वकालवृत्तितयैव प्रतिबन्धकत्वं, तथा च कपालघटयोरेकदैकस्मिन् देशे संयोगसम्भव इति वाच्यम् । तथा सति घटपटयोरपि समानदेशाभिमुखक्रियावतोरेकदेशसंयोगापत्तेः, मूर्तयोः समानदेशताविरोधस्य चैतद्रीत्या दुरुपपादत्वात् । न च नैष विरोधो दुरुपपादः, घटस्य कपालावच्छेदेन

रामरुद्री।

कपालस्य च कपालिकावच्छेदेनैव संयोगोत्पत्तेरभ्युपगन्तव्यतया तयोर्विभिन्नावच्छेदकत्वेन विरोधाभावादिति वाच्यम्। इत्थं सति घटान्तरारम्भककपालेनाऽपि घटान्तरस्य समानदेशत्वापत्तेः। न च घटसंयोगे घटारम्भकावयवान्यस्पर्शवत्संयोगस्य प्रतिबन्धकत्वमित्यादिरीत्या प्रतिबध्यप्रतिबन्धकभावस्य विशेषत एव वक्तव्यत्वान्नैष दोष इति वाच्यम्। स्पर्शवत्संयोगे स्पर्शवत्संयोगस्याऽप्रतिबन्धकत्वात्, मूर्तयोः समानदेशतायाश्च वक्ष्यमाणरीत्या वारयितुं शक्यत्व इति चेन्न। तथाऽपि कपेश्चरणइस्तयोः शाखामूलावच्छिन्नसंयोगैक्याभ्युपगमे हस्ताग्रयोः शाखावच्छिन्नः संयोगो विनष्ट इतिवत् चरणेऽपि विनष्ट इति प्रतीत्यापत्तेरेव तत्र दोषत्वात्तद्वारणस्य तत्र संयोगभेदकल्पनाया आवश्यकत्वात्। न चाऽवयविकर्मणो यावदवयवकर्मनियततया शाखावच्छेदेन संयोगनाशकर्मोत्पत्तिकाले चरणावच्छिन्नसंयोगनाशकं कर्म कपौ कल्प्यमेव, अन्यथा शाखावच्छिन्नसंयोगस्याऽविनाशापत्तेरिति वाच्यम्। एवमपि यत्र कपिक्रियया शाखामूलावच्छिन्न एकः संयोगः, ततः शाखायाश्चलनं, तत्र शाखामूलावच्छिन्नसंयोगस्य विनाशाय शाखावच्छेदेन वृक्षेऽपि कर्मोत्पत्तिमङ्गीकृत्य शाखावच्छिन्नसंयोगविनाशस्योपपादनीयतया कर्मणो व्याप्यवृत्तित्वासम्भवात्। तस्मादेकक्रियोत्पन्नतादृशसंयोगभेदस्थले अवच्छेदकभेदेन संयोगभेद आवश्यकः। तादृशस्थले शाखायां वृक्षे कपिश्चरणे संयुक्त इतिप्रत्ययापत्तिवारणायाऽपि ईदृशकार्यकारणभाव आवश्यकः। एवं च मूलावच्छिन्नसंयोगे शाखावच्छिन्नतदापत्तिवारणाय अवच्छेदकतासम्बन्धेन शाखावच्छिन्नतदुपलक्षितसंयोग प्रति तादात्म्येन शाखादीनां कारणत्वमुपगन्तव्यम्, तथा च तद्विरहादेव न मूले शाखावच्छिन्नसंयोगोत्पादापत्तिरिति* सर्वावयवावच्छिन्नैकसंयोगाप्रसिद्धिर्दुर्वारा। अथैतादृशः कार्यकारणभावो न स्वीकर्तुं शक्यः, शाखावच्छेदेन जायमानस्य कपिसंयोगस्य कपिचरणेऽप्यवच्छेदकतासम्बन्धेनोत्पद्यमानतया तत्र च शाखात्मकहेतोर्विरहाद्व्यभिचारात्। न च शाखावच्छिन्नत्वविशिष्टसंयोगत्वमेव कार्यतावच्छेदकं वाच्यमिति नैष दोषः, कपिचरणे विशिष्टाधिकरणतावि-रहेणैवाऽतिप्रसङ्गवारणसम्भवादिति वाच्यम्। तथा सति शाखावच्छिन्नत्वोपलक्षितसंयोगस्य शाखायामिव मूलेऽप्युत्पत्तौ बाधकाभावेन सर्वावयवावच्छिन्नैकसंयोगखण्डनानुपपत्तेः, ईदृशकार्यकारणभावबलेन वारणीयस्य मूले शाखावच्छिन्नसंयोगोत्पादस्याऽपि दुर्वारत्वाच्च। न चानुयोगितावच्छेदकतासम्बन्धेन शाखावच्छिन्नानुयोगिताकसंयोगं प्रति शाखायाः कारणत्वान्नोक्तातिप्रसङ्गः, कपिचरणस्य तादृसंयोगप्रतियोगितावच्छेदकत्वात्। यत्र कप्यनुयोगिकः शाखावच्छिन्नप्रतियोगिताक एव वृक्षस्य संयोगो जातस्तस्य मूलावच्छेदेनोत्पत्तिवारणाय च प्रतियोगितावच्छेदकतासम्बन्धेनाऽपि शाखावच्छिन्नप्रतियोगितासंयोगं प्रति शाखाया हेतुत्वमावश्यकमिति वाच्यम्। एवमप्यनुयोगितावच्छेदकतायां अपि कालादिगादिसाधारणतया तत्र व्यभिचारस्य दुर्वारत्वात्, तयोरपि प्रतीतिबलेन तत्कल्पनस्याऽऽवश्यकत्वात्। न च शाखावृत्त्यनुयोगितावच्छेदकतासम्बन्ध एव कार्यतावच्छेदको वाच्य इत्येष दोषो दुर्घट इति वाच्यम्। तथा सति मूलावच्छिन्नावच्छेदकतासम्बन्धेन तदापत्तेस्तत्र दुर्वारत्वात्—इति चेन्न, तत्र कीदृशी आपत्तिः? न तावन्मूलं मूलनिष्ठानुयोगितावच्छेदकतासम्बन्धेन शाखावच्छिन्नसंयोगवत् स्यादिति, आपादकाभावात्। नाऽपि शाखावृत्तितादृशावच्छेदकतासम्बन्धेन शाखावच्छिन्नसंयोगवत् स्यादिति, तथाऽप्यापादकाभावात्। नाऽपि मूलावच्छिन्नसंयोगः शाखावच्छिन्नत्ववान्, शाखावच्छिन्नत्वसमानाधिकरणजन्यतानिरूपितजनकतावच्छेदकावच्छिन्नसमुदायजन्यत्वादिति, तस्य तादृशशाखात्वावच्छिन्नजन्यत्वविरहादेव तदापत्तिवारणसम्भवादित्यापाद्याप्रसिद्धयैवाऽऽवश्ययोगादित्यन्यत्र विस्तरः।

अत्राऽवयवपदं प्रदेशानामेवाग्राहकम्। तथा च सर्वप्रदेशावच्छिन्नसंयोगः कारणमिति फलितोऽर्थः। तेन सर्वावयवावच्छिन्नतेजःसंयोगस्य पाकहेतुत्व पिठरपाकवादिभिरभ्युपगतमिति न वक्तुं शक्यते,

---

*ईदृशकार्यकारणभावः 'अतिप्रसङ्गभङ्गाय शाखादितत्तदवयवावच्छिन्नवृत्तिकसंयोगं प्रति तत्तदवयवत्वेन हेतुत्वस्याऽऽवश्यकतया वृक्षे व्याप्यवृत्तिगगनसंयोगस्याऽसम्भवात्-' इत्यादिना सिद्धान्तलक्षणजागदीश्यामुक्तः।

दिनकरी।

द्रनियमेनाऽवयवेषु विभागहेतुक्रियोत्पादेनाऽऽरम्भकसंयोगनाशादवयविनाशापत्तेः। न चाऽवयवेषु तेजोभिघातानन्तरं पञ्चमक्षण एवाऽवयविनाशसम्भवेन तत्पूर्वमवयविनि रूपादिनाशोत्पादाभ्युपगमे बाधकाभाव इति वाच्यम्। तत्र पूर्वावयविनाशावयव्यन्तरोत्पादयोरावश्यकत्वात् पूर्वावयविनि रूपादिपरावृत्तिजनकविजातीयतेजःसंयोगस्य मानाभावेना-

रामरुद्री।

तन्मते स्वव्याघातप्रसङ्गात्। नाऽपि पीलुपाकवादिभिः, प्रमाणाभावादिति टीकोक्तिरेषाऽयुक्तेति केषाञ्चिद्दाक्षेपः परास्तः। एतादृशकार्यकारणभावश्चाऽनुभवबलादेवाऽभ्युपगन्तव्यः। स्पर्शवत्संयोगस्य स्पर्शवत्संयोगे प्रतिबन्धकत्वमभ्युपगम्य पूर्वोक्तरीत्या अवयविनि पाकवारणोपपादनसम्भवेऽपि द्व्यणुकादौ तद्वारणं न सम्भवति। तत्र सत्यप्यवयविन्यग्निना यावदवयवसंयोगसम्भवादित्यत एतावान् प्रयासः। पूर्वमतं तु द्व्यणुकादौ तादृशाग्निसंयोगमनङ्गीकृत्योपपादनीयम्। न हि प्रत्यक्षं तत्र मानमस्ति, अवयव्युपष्टब्धद्व्यणुकमन्तराऽन्यत्राऽग्निसंयोगे मानाभावात्। व्यणुकादावितरानुपष्टब्धेऽनेः संयोगस्य प्रत्यक्षतः प्रतिपत्तिसम्भवेऽपि तत्राऽऽभ्यन्तरपरमाणावग्निसंयोगाभावो निर्वहति। प्रत्युत पूर्वोक्तरीत्या घटस्थले पाकजनकस्याऽग्नेर्द्रव्यविनाशकत्वसिद्धौ सर्वत्र द्रव्यविनाशावश्यकतया तत्र रूपाद्युत्पादकल्पनमनुचितमित्यतः पार्थिवपरमाण्वग्निसंयोगस्यैव पाकजनकत्वमाश्रीयत इत्यदोषः। तेन 'न च कार्यद्रव्येष्वेव रूपाद्युत्पत्तिर्विनाशो वा सम्भवति-' इतिभाष्यविरोधोऽपि परिहृतः। रूपाद्युत्पादासम्भवं प्रदर्श्य रूपविनाशापत्तिवारणस्यैवाऽस्मद्रीत्या भाष्याभिमतत्वं तत्र पूर्वरूपनाशरूपान्तरोत्पत्त्योः क्रमविपर्ययेण ज्ञायते।

वस्तुतस्त्वेतादृशानन्तकार्यकारणभावापेक्षया रूपनाशं प्रति अग्निसंयोगसामान्याभाव एव प्रतिबन्धको लाघवात्। एतादृशश्च पक्षः द्रव्ये तत्तदवयवावच्छेदेन संयोगसामान्याभावे बाधकाभाव इति प्राचीनमतमनुसृत्यैव टीकाकृता परित्यक्तः। अन्यथा तेजःसंयोगस्यावयवावच्छेदेन सत्त्वेऽपि द्रव्यत्वावच्छेदेन तदभावस्याऽबाधितत्वं पीलुपाकवादस्य कथञ्चिदपि समर्थनानुपपत्तेरिति ध्येयम्।

विजातीयतेजःसंयोगस्येति। नन्वभिघातत्वादिना साङ्कर्यात् तेजःसंयोगे वैजात्यं नोपेयते, किं तु विलक्षणविलक्षणोष्णस्पर्शवत्तेजःसंयोगत्वेनैव हेतुत्वं कल्प्यत इति मते नैष दोष इत्यत आह। **अत्र यदीत्यादि।** नन्ववयविनाशरूपनाशयोः कथं कार्यकारणभावः? न तावत् स्वरूपसम्बन्धेनाऽवयविरूपनाशं प्रति स्वरूपसम्बन्धेन अवयविनाशस्य हेतुत्वम्, वैयधिकरण्यप्रसङ्गात्। नाऽपि स्वरूपसम्बन्धेनाऽवयविरूपनाशं प्रति सामानाधिकरण्यसम्बन्धेनाऽवयविनाशः कारणम्, अवयविरूपनाशकालेऽवयविनो विनष्टतया तत्र अवयविरूपनाशस्याऽनाश्रयत्वात्। नाऽपि स्वप्रतियोगिसमवायिसमवायित्वसम्बन्धेन रूपनाशं प्रति अवयविनाशः स्वरूपेण हेतुः, यत्र स्थिरे कपालद्वये धर्मिणि पूर्वमेको घटो विनष्टः, अपरश्चोत्पन्नः, तत्र द्वितीयघटस्य द्वितीयक्षणे स्वनाशापत्तेः, अवयविनाशरूपस्य प्रागुत्पन्नघटनाशस्य हेतोस्तत्र सत्त्वात्। नाऽपि स्वप्रतियोगिसमवायिसमवायित्वसम्बन्धेन रूपनाशं प्रति स्वसामानाधिकरण्यस्वप्रागभावाधिकरणत्वोभयसम्बन्धेन ध्वंसविशिष्टान्यध्वंसत्वेन हेतुता, प्रकृते च द्वितीयध्वंसमादाय तादृशप्रागुत्पन्नध्वंसस्य ध्वंसविशिष्टतया न दोष इति युक्तम्, प्रागुक्तस्थल एव प्रथमघटनाशाद्रूपनाशानापत्तेः, प्रथमनाशस्य स्वदुक्तसम्बन्धेनाऽवयविनाशविशिष्टान्यत्वविरहात्। न च प्रतियोगितासम्बन्धेनाऽवयविरूपनाशं प्रति स्वप्रतियोगिसमवेतत्वसम्बन्धेन नाशो हेतुः, तथा सति पाकजरूपनाशेऽपि व्यभिचाराप्रसक्तेः, तत्राऽपि भाविनोऽवयविनाशस्य स्वप्रतियोगिसमवेतत्वसम्बन्धेन सत्त्वात्। किं च स्वप्रतियोगिसमवेतत्वसम्बन्धेन नाशस्य हेतुत्वं न वक्तुं शक्यम्, अवयविनाशसमये तस्य रूपादेरसमवेततया स्वप्रतियोगिसमवेतत्वसम्बन्धेन नाशस्य कुत्राऽप्यसम्भवादिति चेन्न। स्वप्रतियोगिसमवेतानुयोगिकालिक-कालिकोभयसम्बन्धेन नाशः प्रतियोगितासम्बन्धेन नाशे हेतुरिति वक्तव्यम्, अवयविनाशात्तद्रूपनाशस्थले अवयविनाशस्य स्वप्रतियोगिसमवायिसमवेतनिष्ठकालिककालिकोभयसम्बन्धेन तद्रूपे विद्यमानत्वान्न व्यभिचारः। पाकजनाशस्थले च व्यभिचारः सम्भवति, तत्र स्वप्रतियोगिसमवेतानुयो-

दिनकरी।

।करूपनात्, अवयविरूपनाशे आश्रयनाशस्य हेतुत्वात् पाकाजन्यत्वस्य कार्यतावच्छेदक-रामरुद्री।

ोककालिकसम्बन्धेन भाविनोऽवयविनाशस्य सत्त्वेऽपि कालिकसम्बन्धेनाऽसत्त्वात्, अवयविनाशकाले ाकजनाशप्रतियोगिनो रूपस्याऽसत्त्वात्। एतेन द्रव्यत्वादौ स्वप्रतियोगिसमवेतत्वसम्बन्धेन नाशस्य त्त्वान्नाशापत्तिरित्यपि निरस्तम्। न च सम्बन्धमध्ये पुनः कालिकोपादानं व्यर्थमिति वाच्यम्। एव ति सर्वनाऽवयविरूपस्य स्वोत्पत्तिद्वितीयक्षण एव नाशापत्तेः, तत्र स्वप्रतियोगिसमवेतनिष्ठकालिकस-म्बन्धेन भाविनाशस्य सत्त्वेन सामग्रीसत्त्वात्। कालिकनिवेशे च भाविनाशस्य कालिकसम्बन्धेन तत्राऽ भावान्न तत्क्षणे नाशापत्तिरिति। ननु एतादृशकार्यकारणभावस्य शब्दनाश एव व्यभिचारः। तत्र स्वप्र-तियोगिसमवेतत्वसम्बन्धेन शब्दे नाशाभावात्, जन्यवृत्तिप्रतियोगिकत्वस्य कार्यतावच्छेदककोटौ निवे-शेन कथञ्चित्तद्वारणेऽपि आश्रयनाशानुत्तरघटगतसंयोगनाशादौ व्यभिचारो दुर्वारः। न चाऽऽश्रयनाशा-जन्यस्य संयोगनाशस्य विभागजन्यत्वमसमवायिकारणनाशजन्यत्वं वाऽऽवश्यकम्, तथा च कार्यताव-च्छेदककोटौ असमवायिकारणनाशाजन्यत्वमपि निवेश्यत इति न व्यभिचारः। इत्थमेवाऽन्यत्राऽप्याश्र-यनाशाजन्यनाशस्थले तादृशनाशो यादृशहेतुप्रयुक्तस्तादृशहेतुजन्यत्वं कार्यतावच्छेदककोटौ निवेश्यते, गत्यन्तरविरहात्। अवयविनि पाकजन्यरूपनाशस्य च विवादग्रस्ततया तत्र व्यभिचारसन्देहे पाकाजन्य-त्वस्य कार्यतावच्छेदकत्वं गौरवादेव त्यज्यत इति वाच्यम्। संयोगादिनाशे व्यभिचारवारणाय स्वसा-मानाधिकरण्यस्वप्रतियोगिकत्वोभयसम्बन्धेन वस्तुविशिष्टान्यत्वस्यैकस्यानुगतस्य कार्यतावच्छेदकत्वेन प्रवेश एव तत्तज्जन्यत्वाभावानामनन्तानां निवेशापेक्षया लाघवात् तथाप्रवेशाभ्युपगमे पिठरपाकस्याऽव-र्जितत्वात्। तत्र पाकजन्यरूपनाशस्य निरुक्तोभयसम्बन्धेन वस्तुविशिष्टान्यत्वविरहेण आश्रयनाशकार्य-तावच्छेदकानाक्रान्तत्वेन व्यभिचाराप्रसक्तेरित्यतो दूषणान्तरमाह। **अवयविनीलादावित्यादि।** अथैवं पाकेनाऽवयविनि नीलाद्युत्पादासम्भवेऽपि तत्र पूर्वरूपनाशो दुर्वार इति चेन्न। पाकजन्यरूपादेरेवाऽव-यविनि वैशेषिकैरनभ्युपगमेन रूपनाशोत्पादानुत्पादविचारस्याऽप्रकृतत्वात्।

यद्वा **'अवयविरूपनाशे आश्रयनाशस्य हेतुत्वात्'**—इत्यादिग्रन्थस्य नाऽऽश्रयनाशरूपनाश-योर्हेतुहेतुमद्भावे व्यभिचार इत्यपाकेनाऽवयविनि रूप न नश्यतीत्यर्थेऽभिप्रायः। किं तु पाकस्य अवयविनि रूपनाशहेतुत्वे व्यभिचारोद्धारेणैव तदभिप्रेतम्। स्वरूपसम्बन्धेन रूपनाशं प्रति हि तेजःसंयोगस्य समवायेन हेतुत्वं वक्तव्यम्, तच्च न सम्भवति, विनश्यदवस्थावयविनि जातात्तेजःसंयोगादपि रूपनाशापत्तेः। न चेष्टापत्तिः, तदुत्तरक्षणेऽवयविनाशेऽनन्तरमवयविरूपनाशस्याऽपि वैशेषिकैरभ्युपगन्तव्यतया तस्यैकक्षणमात्रं प्रागभ्युपगमे क्षतिविरहादिति वाच्यम्। तदुत्तरक्षणे रूपनाशोत्पस्यनुमतावपि स्वरूपसम्बन्धेन रूपनाशोत्पस्यभ्युपगमासम्भवात्। न च स्वरूपसम्बन्धेन नाशत्वावच्छिन्नं प्रति तादा-त्म्येन द्रव्यं कार्यकालवृत्तितया हेतुरभ्युपगम्यते, प्रकृते च विनश्यदवस्थद्रव्योत्पन्नतेजःसंयोगादूर्ध्वं नाशा-पादनकाले द्रव्याभावादेव नाऽऽपत्तिसम्भव इति वाच्यम्। तस्माश्रयनाशजन्यनाशस्य समूलमुच्छेदा-पत्तेः, तत्राऽपि नाशोत्पत्तिकाले तादात्म्येन द्रव्याभावस्य तुल्यत्वात्। न चाऽऽश्रयनाशाजन्यत्वमपि कार्यतावच्छेदककोटौ निवेश्यत इति न दोष इति वाच्यम्। महागौरवात्। किं तु प्रतियोगितासम्बन्धेन-रूपनाशं प्रति सामानाधिकरण्यसम्बन्धेन तेजःसंयोगस्य हेतुत्वं वक्तव्यम्। तथा च विनश्यदवस्थोत्प-न्नतेजःसंयोगादपि रूपनाशोपपत्तिः। रूपनाशहेतुतेजःसंयोगस्य सामानाधिकरण्यसम्बन्धेन स्पर्शादावपि सत्त्वात्तन्नाशापत्तिवारणाय रूपप्रतियोगिकत्वं कार्यतावच्छेदककोटौ निवेशितम्। न चैवमपि रूपप्रतियो-गिकनाशापत्तिस्तत्र दुर्वारैवेति वाच्यम्। रूपनाशत्वावच्छिन्नं प्रति रूपस्याऽपि तादात्म्येन हेतुतया तद्विरहादेव स्पर्शे रूपनाशापत्त्यसम्भवात्। इत्थं च आश्रयनाशजन्यरूपनाशे व्यभिचारो दुर्वारः, अतः कार्यतावच्छेदककोटौ आश्रयनाशाजन्यत्वं निवेशनीयमिति गौरवं पिठरपाकवादिनाम्। वैशेषिकैस्तु तेजःप्रतियोगिकासमवेतपृथिव्यनुयोगिकसंयोगस्यैव स्वरूपसम्बन्धेन रूपनाशहेतुत्वमभ्युपगम्यते, तन्मते

रामरुद्री।

च नैयायिकमत इव प्रागुक्तविनश्यदवस्थघटाद्युत्पन्नतेजःसंयोगाद्रूपनाशसम्भवप्रयुक्तोऽन्वयव्यभिचारो न सम्भवति, तन्मते विनश्यदवस्थवस्तूत्पन्नतेजःसंयोगस्य पण्डतया तत्र रूपनाशासम्भवेऽपि क्षत्यभावात्। परमाणुतेजःसंयोगस्य च विनश्यदवस्थे वस्तुनि कथञ्चिद्व्यसम्भवेन तत्र तदापत्त्यसम्भवात्। परमाणूनां नित्यतया विनश्यदवस्थत्वायोगादिति। एतन्मते **'पाकजन्यत्वस्य कार्यतावच्छेदककोटिप्रवेशे गौरवात्'** इत्येव पाठः। आश्रयनाशाजन्यत्वस्य कार्यतावच्छेदककोटिप्रवेशे गौरवादिति च तदर्थः।

वस्तुतस्तु प्रतियोगितासम्बन्धेन रूपनाशं प्रत्येव तेजःसंयोगाश्रयनाशयोर्द्वयोरपि हेतुत्वस्य नैयायिकमते वक्तव्यतयाऽऽश्रयनाशजन्यनाशस्थल एव तेजःसंयोगाभावाद्व्यभिचारापत्तिरतस्तेजःसंयोगकार्यतावच्छेदककोटौ स्वजन्यत्वमपि निवेशनीयम्। ततश्च गौरवापत्तिः। वैशेषिकमते तथाविधकार्यकारणभावाकल्पनाल्लाघवम्। **अत एव 'पाकजन्यत्वस्य कार्यतावच्छेदककोटिप्रवेशे गौरवात्'** इति टीकाग्रन्थोऽपि सङ्गच्छते। **'पाकजन्यत्वस्य'** इत्येव पाठः। **'पाकाजन्यत्वस्य'** इति तु प्रामादिक एवेति वदन्ति।

'पाकाजन्यत्वस्य' इति पाठ आश्रयनाशस्य हेतुतायां व्यभिचारवारणाय पाकाजन्यत्वं कार्यतावच्छेदककोटौ निवेशनीयमिति च तदर्थः। अन्यथाऽऽश्रयनाशतेजःसंयोगयोर्द्वयोरपि कार्यतावच्छेदकस्य प्रतियोगितासम्बन्धस्याऽविशिष्टत्वेन तेजःसंयोगजन्यपरमाणुरूपनाशे आश्रयनाशस्य व्यभिचार इत्यतः पाकाजन्यत्वमाश्रयनाशजन्यतावच्छेदककुक्षौ निवेशनीयमिति। न चैवं वैशेषिकैरपि पाकाजन्यत्वमाश्रयनाशजन्यतावच्छेदककोटौ निवेशनीयमिति पाकाजन्यत्वस्य कार्यतावच्छेदककोटिनिवेशप्रयुक्तं गौरवमुभयोरपि समानमिति वाच्यम्। वैशेषिकैः स्वरूपसम्बन्धेन रूपनाशं प्रति समवायेन पृथिवीपरमाणुतेजःसंयोगस्य हेतुत्वाभ्युपगमेनेदृशरीत्या व्यभिचारस्याऽसम्भवात्। न च तथाऽपि आश्रयनाशस्य कार्यकारणभावे व्यभिचारो दुर्वार एवेति वाच्यम्। आश्रयनाशजन्यतावच्छेदककोटौ रूपप्रतियोगिकत्वनिवेशे स्पर्शनाशादेरप्यनया रीत्या कार्यकारणभावकल्पनापत्तिभिया वैयर्थ्येन च तस्याऽनिवेशात् लाघवेन पाकाजन्यत्वस्यैव निवेशात्। न च नाशत्वावच्छिन्नं प्रत्येव तस्य स्वप्रतियोगिसमवेतत्वसम्बन्धेन हेतुतया तत्र घटगतसंयोगादिनाशे व्यभिचारवारणाय कार्यतावच्छेदककोटाववश्यनिवेशनीयेन प्रतियोगित्वसामानाधिकरण्योभयसम्बन्धेन वस्तुविशिष्टान्यत्वेनैव सकलातिप्रसङ्गभङ्गः, स च कार्यकारणभावो नैयायिकानामप्यनुमत एवेति नैतद्दूषणात् पिठरपाकवादनिरासासम्भव इति वाच्यम्। पूर्वोक्तयुक्त्या परमाणुतेजःसंयोगस्यैव रूपनाशहेतुत्वावश्यकतयैवमपि पिठरपाकानुपपत्तेः। न च तथा सति स्वन्मते प्रतियोगितासम्बन्धेन वस्तुविशिष्टान्यनाशत्वावच्छिन्नं प्रति स्वप्रतियोगिसमवेतत्वसम्बन्धेन नाशत्वेन हेतुत्वमिति फलितम्, तत्र च नाशस्य स्वप्रतियोगिसमवेतत्वसम्बन्धेन घटगतसंयोगादावपि सत्त्वात्तत्र वस्तुविशिष्टान्यनाशापत्तिर्दुर्वारेति वाच्यम्। नाशं प्रति प्रतियोगिनोऽपि कारणतया वस्तुविशिष्टान्यनाशप्रतियोगिनस्तत्र तादात्म्येनाऽभावादेव तादृशव्यभिचारवारणादित्यादिकं बहुतरमूहनीयम्।

नन्वनया युक्त्याऽवयविनि रूपनाश एव प्रतिषिद्धो भवति, न तु पाकज रूपम्। न चाऽवयविनि रूपनाशप्रतिषेधेनैव पाकजरूपोत्पत्तिप्रतिषेधोऽपि सम्भवत्येव, न हि पूर्वं रूपमविनाश्य रूपान्तरमग्निसंयोगेन जनयितुं शक्यम्, समवायेन रूपं प्रति समवायेन रूपस्य प्रतिबन्धकत्वात्, ईदृशप्रतिबध्यप्रतिबन्धकभावस्य च घटादौ सति रूपे पुनस्तदुत्पादवारणायाऽवश्यमभ्युपगन्तव्यत्वादिति वाच्यम्। यत्र कपालद्वयसंयोगाद्घटोत्पत्तिः, कपालरूपनाशकोऽग्निसंयोगो घटाग्निसंयोगश्चैकः कालः, ततः कपालरूपनाशः, तत्र तत्क्षणे पाकवशाद्रूपोत्पादापत्तेरपरिहार्यत्वात्, न ह्यत्र रूपं प्रतिबन्धकमिति कल्पयितुं शक्यम्, घटोत्पत्तिद्वितीयक्षण एव रूपोत्पादस्याऽभ्युपगन्तव्यतया तस्य च तत्क्षण एव कपालरूपासमवायिकारणविनाशेनाऽभ्युपगन्तुमशक्यत्वात्। असमवायिकारणस्य कार्यसहभावेन हेतुत्वात्। न चैवं पीलुपाकवादिभिरवयविनाऽवष्टब्धेष्ववयवेषु पाकानभ्युपगमात्तन्मते समवायेन द्रव्यस्य द्रव्यारम्भकसंयोगस्य वा रूपनाशे प्रतिबन्धकत्वमभ्युपेयते, तथा च निरुक्तस्थले घटोत्पत्तिद्वितीयक्षणे कपाले रूपनाशो न सम्भवत्येवेति वाच्यम्। ईदृशप्रतिबध्यप्रतिबन्धकभावकल्पने प्रमाणाभावात्। न च

दिनकरी।

कोटिप्रवेशे गौरवादवयविनाशं विना पाकेनाऽवयविरूपनाशासम्भवात्, अवयविनीलादावयवनीलादेर्हेतुतायां व्यभिचारापत्त्या पाकेनाऽवयविनि नीलाद्युत्पादासम्भवाच्चेत्यभिमानः। **अवयविषु विनष्टेष्विति।** घटाद्यारम्भककपालादिपरमाणुपर्यन्तेष्वग्निसंयोगेन पूर्वोक्तरीत्या घटादिद्व्यणुकपर्यन्तं नाशसम्भवादिति भावः। **स्वतन्त्रेषु—कार्यद्रव्यध्वंस.**

रामरुद्री।

नीलपीतारब्धघटे नीलाद्युत्पादवारणाय नीलादिक प्रति नीलाद्यभावानां सामानाधिकरण्येन प्रतिबन्धकतया कपाले रूपनाशानन्तरं घटे रूपोत्पत्तिर्न सम्भवतीति वाच्यम्। एवमपि कपालरूपनाशकाल एव पाकज.रूपापत्तेरवारणात्। तत्पूर्वं सामानाधिकरण्येन रूपाभावविरहात्, रूपस्य चैतावत्पर्यन्तमनुदयात्। न च रूपाभावस्य सामानाधिकरण्यसम्बन्धेन कार्यकालवृत्तितया प्रतिबन्धकत्वमभ्युपेयत इति न तदापत्तिस्तन्नाशकाले सम्भवति, अन्यथा यत्र विनश्यन्नीलरूपेणैकेन कपालेन पीतकपालसंयुक्तेन घट आरब्धः, तत्र तदुत्तरक्षणे नीलरूपविनाशसमये चित्रोत्पादापत्तेरिति वाच्यम्। सामानाधिकरण्येन रूपाभावस्य कार्यकालवृत्तितया प्रतिबन्धकत्वे मानाभावात्, निरुक्तस्थले च नीलान्यरूपपीतान्यरूपात्मकघटकारणानां विरहादेव चित्रोत्पादवारणसम्भवादीदृशप्रतिबन्धकाभावस्याऽहेतुत्वात्। तेषामसमवायिकारणतया कार्यकाले हेतुत्वात्। न च विनिगमनाविरहादुभयोरपि कार्यकाले हेतुत्वमावश्यकमिति वाच्यम्। असमवायिकारणस्य कार्यसहभावेन हेतुत्वस्य कल्पत्वा*दित्यतो दूषणान्तरमाह। **अवयविनीलादावित्यादि।** अयमभिप्रायः, समवायेन नीलादिकं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन नीलादेर्हेतुतया कपाले रूपविरहदशायां घटे रूपोत्पादासम्भवः, तत्कालेऽसमवायिकारणस्य कपालरूपस्य विरहात्, असमवायिकारणस्य च कार्यसहभाविनो हेतुत्वात्। अन्यथा यत्र कपालद्वये घटोत्पत्तौ रूपनाशकाग्निसंयोगश्चैत्रैकः कालः, ततः सामग्रीसम्पत्त्याऽग्निनाशः, तदुत्तरमग्निसंयोगविनाशः कपालरूपनाशः, तत्क्षणे घटे रूपोत्पादापत्तेः, इष्टापत्तौ च घटे तद्रूपनाशहेतुविरहादुत्तरक्षणे तद्रूपोपजम्भापत्तेस्तत्तदुत्तरक्षणोत्पन्नरूपान्तरेण कपालेन तदुत्तरक्षणे घटे रूपान्तरोत्पादानुपपत्तेश्च, रूपे रूपस्य प्रतिबन्धकत्वात्। न च तत्र विनश्यदवस्थेन कपालाग्निसंयोगेन घटेऽपि अग्निसंयोग उत्पद्यते, तद्वदेव घटे तद्रूपनाशादनन्तरं रूपान्तरोत्पत्तिरपि सम्भवति, क्षणविलम्बस्य शपथनिर्णेतव्यत्वादिति वाच्यम्। तत्क्षणेऽग्निनाशेन तदुत्पादासम्भवात्, समवायिकारणस्य कार्यसहभावेन हेतुत्वात्। अन्यथा तदुत्तरक्षणे तस्यैवाऽग्निसंयोगस्याऽनुवृत्तिप्रसङ्गात्। न चाऽऽश्रयनाशादेव सोऽपि नश्यतीति वाच्यम्। प्रतियोगितासम्बन्धेन नाशं प्रति स्वप्रतियोगिसमवेतानुयोगिककालिक-कालिकोभयसम्बन्धेन नाशत्वे नाऽऽश्रयनाशस्य हेतुतया निरुक्तस्थले च समवायिकारणनाशकाले संयोगोत्पत्त्युपगमेऽग्निनाशस्य स्वप्रतियोगिसमवेतानुयोगिककालिकघटितोक्तसम्बन्धद्वयेन संयोगेऽसत्त्वात्तन्नाशानर्जकत्वात्। न च तत्राऽपीष्टापत्तिः, अग्निनाशे सति कपालाग्निसंयोगस्याऽपि नाशावश्यकतया तत एव घटाग्निसंयोगस्याऽपि नाशसम्भवादिति वाच्यम्। असमवायिकारणनाशस्य कार्यगुणनाशानर्जकत्वात्, तुल्ययुक्त्या यत्र कपालद्वयं विनश्यदवस्थमेव संयुज्यते, ततो घटोत्पत्तेरपि सम्भवेन कपालनाशेऽपि तद्घटनाशानुपपत्तेश्च, इष्टापत्तौ च कपालनाशानन्तर तृतीयक्षणे घटोपलम्भप्रसङ्गात्, कपालसंयोगनाशादपि तन्नाशोपपादनं न प्रकृतापत्तिं वारयति। न च तत्राऽपीष्टापत्तिः, तदुत्तरं कपालद्वयसंयोगनाशाद्घटनाशोपपत्तेरिति वाच्यम्। स्वरूपेण घटनाशं प्रति स्वरूपेणैव कपालद्वयसंयोगनाशस्य कारणतया वक्तव्यतया तदसम्भवात्। अथ प्रतियोगितासम्बन्धेन नाश प्रति स्वप्रतियोगिनिष्ठ—स्वसमवायिसमवेतत्वसमवा.

---

*लाघवेनेत्यादिः। तथा च रूपाभावस्य नीलाद्यभावषट्कस्य च सामानाधिकरण्यसम्बन्धेन कार्यकालवृत्तितया रूपप्रतिबन्धकत्वं नाऽभ्युपगम्यत इति भावः। अत एव चित्ररूपनिरूपणग्रन्थेऽपि टीकायां नीलान्यरूपत्वादिनैव हेतुत्वमुक्तम्।

अत्र एकपरमाणुसंयोगात् द्व्यणुकादिप्रक्रमेण पुनर्महावयविपर्यन्तमुत्पत्तिः, तेजसामतिशयिततवेगवशात् पूर्वव्यूहनाशो (१) झटिति व्यूहान्तरोत्पत्तिश्चेति ।

दिनकरी।

विशिष्टेषु । ननु तत्र संस्थानभेदादिः कथं न प्रतीयत इत्यत आह तेजसामिति । व्यूहः—संस्थानम् ।

रामरुद्री ।

यान्यन्तरसम्बन्धावच्छिन्नजनकतानिरूपितजन्यतावत्त्व—कालिकोभयसम्बन्धेन नाशो हेतुरित्यनयैव रीत्याऽसमवायिकारणनाशस्य नाशकत्वं वक्तव्यम्, अत एवाऽसमवायिकारणत्वनिरूपणग्रन्थे पूर्वं तुरीतन्तुसंयोगादीनामसमवायिकारणत्वप्रतिषेधोऽपि सङ्गच्छते, अन्यथा तुरीतन्तुसंयोगनाशादपि पटनाशापत्तेः । ननु संयोगासमवायिकारणस्य कर्मणो नाशेऽपि संयोगनाशानुत्पादात्तत्र व्यभिचारवारणाय संयोगनाशान्यत्वं कार्यतावच्छेदककोटौ निवेशनीयं, तेन न संयोगनाशात्संयोगनाशापत्तिः, अत एव रूपनाशान्यत्वमपि कार्यतावच्छेदककोटौ निवेशनीयम्, अन्यथात्र समवायिकारणाग्निसंयोगविनाशादपि तन्नाशापत्तेः । तथासत्यन्यग्निसंयोगनाशादपि तदारब्धाग्निसंयोगनाशानुपपत्तिः । किं चैतादृशरीत्याऽनन्तभेदानां कार्यतावच्छेदककोटिनिवेशापेक्षया लाघवाद्गुणकर्मनाशान्यत्वमेव निवेश्यतामिति न गुणकर्मणोरसमवायिकारणनाशनाश्यत्वप्रसङ्गः । द्रव्यनाशस्य चाऽऽवश्यकतया तदन्यत्वं न निवेश्यते । इत्थं च स्वसमवायिसमवेतत्वसम्बन्धस्य कारणतावच्छेदककोटावुपादानवैयर्थ्यम् । असमवायिकारणत्वनिरूपणग्रन्थे तु तुरीतन्तुसंयोगादिभिन्नत्वोपादानं नैतादृशकार्यकारणभावघटकतया तदुपादानाभिप्रायकम्, किं तु असमवायिकारणत्वशब्दस्य तैर्थिकाभिमतपरिभाषाविशेषनिमित्ततया तदतिप्रसङ्गवारणार्थमेव, अन्यथा आत्मविशेषगुणान्यत्वं सामान्यलक्षणे देयम्, विशेषलक्षणे तु यथा यथं तत्तद्भिन्नत्वं देयमित्यभिप्रायकस्तत्रत्यग्रन्थो विरुद्ध्येत, सामान्यलक्षणे देयमित्यनेन सामान्यकार्यकारणभावघटककारणतावच्छेदककुक्षावुपादेयमित्यर्थस्यैव भवता वक्तव्यतया सामान्यकार्यकारणभावे तुरीतन्तुसंयोगादिभेदानामनिवेशेन तुरीतन्तुसंयोगादिनाशात्मकसामान्यकारणबलात् पटनाशप्रसक्तेः । न च असमवायिकारणनाशाद्गुणनाशोऽपि क्वचिदिष्यत एव । अन्यथा परत्वापरत्वनैमित्तिकद्रवत्वादीनां यथायथं क्वचित्सर्वथा चाऽनाशप्रसङ्गात् । कर्मनाशस्थले क्वचिदसमवायिकारणनाशविरहा*द्व्यभिचारवारणाय कर्मनाशान्यत्वं कार्यतावच्छेदककुक्षौ निवेश्यते, न तु कारणतावच्छेदके वेगनाशद्रवत्वनाशाद्यन्यत्वं, तथा सत्यपि व्यभिचारानुद्धारात् । तुरीतन्तुसंयोगनाशाद्यन्यनाशत्वेन पटनाशं प्रति विशेषकार्यकारणभावस्याऽपि स्वीकरणीयत्वान्नाऽन्वयव्यभिचारः, तुरीतन्तुसंयोगनाशस्थले तदन्यनाशात्मकविशेषकारणविरहादेव पटनाशापत्तिवारणसम्भवात् । सामान्यकार्यकारणभावघटककारणतावच्छेदककोटौ तु तुरीतन्तुसंयोगनाशात्तुरीपटसंयोगनाशोपपादनार्थं तुरीतन्तुसंयोगनाशान्यत्वं न निवेश्यते, अन्यथा तुरीतन्तुसंयोगनाशान्यत्वेन सामान्यतः कारणत्वे तत्स्थले तादृशसामान्यकारणविरहेण नाशासम्भवादिति वाच्यम् । एवं सति कर्मणः संयोगासमवायिकारणस्य नाशादपि संयोगनाशप्रसङ्गेन कर्मनाशान्यत्वस्याऽपि कारणतावच्छेदककुक्षौ प्रवेशावश्यकत्वेन कर्मान्यत्वमप्यसमवायिकारणलक्षणे देयमितिकथनप्रसङ्गात् । न च नैवाऽनुपपत्तिः, कर्मनाशान्यत्वं हि कुत्र कार्यकारणभावे कारणतावच्छेदककोटौ निवेश्यते ? न तावत् सामान्यतः, वैयर्थ्यात्, सत्यां हि तादृशकारणवशात् कस्यचिन्नाशप्रसक्तौ तद्वारणाय कारणतावच्छेदकं विशेषणीयम्, प्रकृते च न तादृशी

---

(१) 'व्यूहनाशे' इति पाठः ।

*प्रयत्नवदात्मसंयोगजन्यकर्मस्थले इत्यभिप्रायः । तत्राऽऽत्मसंयोगसत्त्वेऽपि कर्मणः पञ्चमक्षणे नाशादिति । तत्राऽऽत्मसंयोगनाशाभ्युपगमेऽपि वेगवद्द्रव्यसंयोगजन्यकर्मस्थले तादृशद्रव्यसंयोगसत्त्ववद्दशायां जाते कर्मनाशे व्यभिचारो बोध्यः । न ह्येतयोः स्थलयोः प्रयत्नस्य वेगस्य वा नाशात्तन्नाश उपपादयितुं शक्यः, तयोर्व्यधिकरणत्वेनाऽसमवायिकरणत्वाभावात् ।

अत्र द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पत्त्या रूपादिमद्द्रव्यतीति शिष्यबुद्धिवैशद्यार्थं क्षणप्रक्रिया १)।

दिनकरी

वैशद्यम्—क्षणोत्पत्तिः। प्रक्रिया—द्व्यणुकनाशादिरूपाद्युत्पत्तिक्षणनिरूपणम्। क्रियत इति शेषः।

रामरुद्री।

क्वचिदापत्तिः, कर्मनाशोत्तरसमवायिकारणकसंयोगविभागादिनाशप्रसक्तेर्विशेषकारणविरहादेव वारणीयत्वात्, संयोगनाशादौ विभागादेर्हेतुत्वादिति वाच्यम्। एवं सत्यात्मविशेषगुणान्यत्वस्य सामान्यकारणतावच्छेदककुक्षौ निवेशवैयर्थ्यात्। तत्रापि ज्ञानादिनाशादेच्छादिनाशप्रसक्तेर्योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वनियमावलम्बनेन वारयितुं शक्यत्वात्। न च ज्ञानादिनाशोऽपि चेदसमवायिकारणनाशजन्यतावच्छेदकाक्रान्तः स्वीक्रियते, तर्हि अपेक्षाबुद्धेर्द्वितीयक्षण एव नाशप्रसङ्गः, तत्पूर्वक्षणे तदुत्पादकविशेषगुणज्ञानादिनाशसम्भवात्, अत आत्मविशेषगुणान्यत्वं कारणतावच्छेदककुक्षावुपादेयमेवेति वाच्यम्। अपेक्षाबुद्धिनाशे स्वातन्त्र्येण तत्तृतीयक्षणोत्पन्नज्ञानव्यक्तीनामेव विशिष्य हेतुतया तेनैव सकलातिप्रसङ्गादिभङ्गे आत्मविशेषगुणान्यत्वस्य निरुक्तनाशकतावच्छेदककुक्षौ स्वातन्त्र्येणोपादानायोगात्। न च यत्रेष्टसाधनताज्ञानेच्छाप्रवृत्तयः क्रमेण जातास्तादृशस्थले प्रवृत्तिविषयसाधनताज्ञानस्यासमवायिकारणत्वापातात् तन्नाशरूपसामग्रीवशात्तदुत्तरक्षणे प्रवृत्तिनाशापत्त्या प्रवृत्यादेः क्षणिकत्वापत्तिरित्यत आत्मविशेषगुणान्यत्वं कारणतावच्छेदककुक्षौ निवेशितम्, शब्दस्थले च स्वपूर्वपूर्वशब्दस्य स्वस्मिन्नकारणत्वान्न स्वस्य क्षणिकत्वप्रसङ्ग इति न शब्दान्यत्वं निवेशितमिति वाच्यम्। एवं सति ज्ञानादेः स्वतृतीयक्षणेऽपि नाशानुपपत्तेः। तत्राऽऽत्मविशेषगुणान्यप्रतियोगिकनाशविरहेण व्यतिरेकव्यभिचारात्, कार्यतावच्छेदककोटावप्यात्मविशेषगुणान्यत्वनिवेशे च व्यर्थमेव कारणतावच्छेदककोटौ तदुपादानमिति। न च आदिमज्ञानधर्माधर्मादिनाशस्थलेऽसमवायिकारणनाशविरहाद्व्यतिरेकव्यभिचारवारणायाऽऽत्मविशेषगुणनाशान्यत्वं स्वाव्यवहितोत्तरत्वं वा कार्यतावच्छेदककोटाववश्यं निवेशनीयम्, इत्थं च कारणतावच्छेदककोटावप्यात्मविशेषगुणान्यत्वं निवेश्यमेव, अन्यथा ज्ञानाद्युत्पत्तिक्षणे तन्नाशाभावप्रयोजकालाभात्, तत्तदुत्तरात्मविशेषगुणाभावकूटस्याऽऽत्मविशेषगुणान्यनाशाभावे तथात्वाभावात्। कर्मनाशस्थले तु सर्वत्रैव तदसमवायिकारणनाशः स्वीक्रियत एवेति न व्यभिचारः। आद्यशब्दनाशस्थलेऽपि वाय्वादिसंयोगात्मकासमवायिकारणविनाशो वायुनाशाधीनः स्वीक्रियत इति न तत्राऽपि व्यभिचारः। न चानयैव रीत्याऽऽद्यज्ञाननाशस्थले मनःसंयोगनाशः स्वीकर्तुं शक्य इति। एवं च शब्दानामसमवायिकारणविनाशनाश्यत्वमिष्यत एव, इतरत्राऽन्वयव्यभिचाराच्च विशेषसामग्रीविरहादेव वारणीया इति वाच्यम्। एवं सति हि यत्किञ्चित्कार्यनाशजनकनाशप्रतियोगित्वं सामान्यतोऽसमवायिकारणत्वं तत्तत्कार्यनाशजनकनाशप्रतियोगिकारणत्वं च विशेषतस्तत्तत्कार्यासमवायिकारणत्वमिति फलति, इत्थं च सति आत्ममनःसंयोगादेर्ज्ञानाद्यसमवायिकारणत्वं कथमित्यपि वर्णनीयम्। अभिघाते वेगस्याऽसमवायिकारणत्वापत्तिश्चेद्दृशरीत्या वारयितुं न शक्यते। वेगनाशादभिघातनाशप्रसक्तेर्भवदुपदर्शितदिशा विशेषसामग्रीविरहबलादेव वारणीयत्वात्। तस्मादसमवायिकारणत्वसंज्ञा वैशेषिकेष्वर्थशब्दवत् न्याये प्रमेयशब्दवच्च परिभाषाविशेषेण क्वचिदेव कारणतासु प्रवर्तत इत्येव तत्त्वं वाच्यमिति चेन्न, तथाऽपि गुणकर्मादिनाशसाधारण्येन पूर्वोक्तकार्यकारणभावस्वीकारे बाधकाभावात्, व्यतिरेकव्यभिचारस्याऽव्यवहितोत्तरत्वकार्यतावच्छेदकीकरणेनाऽन्वयव्यभिचारस्य च विशेषसामग्रीविरहेण वारणीयत्वादिति,

मैवम्, समवायिकारणविनाशकाले कार्योत्पत्तेरसम्भवादेवाग्निनाशकाले तत्संयोगासम्भवात्। समवायेन कार्यं प्रति तादात्म्येन द्रव्यस्य कारणतया तादृशकार्यस्य चाऽसमवेततया समवायिकारणज-

(१) 'वैशद्याय प्रक्रिया' इति पाठः।

तत्र विभागजविभागानङ्गीकारे नवक्षणा ।

तदङ्गीकारे तु विभागः किञ्चित्सापेक्षो विभागं जनयेत्, निरपेक्षस्य तत्त्वे कर्मत्वं स्यात्, 'संयोगविभागयोरनपेक्षं कारणं कर्म(१)-'इति हि वैशेषिकसूत्रम् । स्वोत्तरोत्पन्नभावानपेक्षत्वं तस्याऽर्थः । अन्यथा कर्मणोऽप्युत्तरसंयोगोत्पत्तौ पूर्वसंयोगनाशापेक्षणाद्व्याप्तिः स्यादिति । तत्र यदि द्रव्यारम्भ-

दिनकरी ।

विभागजविभागानङ्गीकार इति । कारणाकारणविभागात् कार्याकार्यविभागवत् कारणमात्रविभागात्कारणाकारणविभागानङ्गीकार इत्यर्थः । द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागजनककक्रियायास्तदनारम्भकसंयोगप्रतिद्वन्द्विविभागाजनकत्वनियमे मानाभावादिति भावः ।

अत्र च विभागग्रन्थे वक्ष्यमाणविकसत्कमलभङ्गप्रसङ्गभिया उक्तनियमाङ्गीकार आवश्यकः, एव च द्व्यणुकारम्भकपरमाणुक्रियया यत्र द्व्यणुकारम्भकसंयोगप्रतिद्वन्द्विविभागो जनितस्तत्र तया तत्परमाणुक्रियया तत्परमाण्वाकाशादिसंयोगप्रतिद्वन्द्विविभागोत्पत्तिर्न सम्भवति । न च माऽस्तु तत्र परमाण्वाकाशविभागः, का क्षतिरिति वाच्यम् । तथा सति नाशकविभागाभावेन परमाण्वाकाशसंयोगस्य नित्यत्वापत्तेः । एवं परमाण्वाकाशसंयोगरूपस्य पूर्वदेशसंयोगस्य प्रतिबन्धकस्य सत्त्वात् परमाणावुत्तरदेशसंयोगानुत्पत्त्या परमाणुगतक्रियानाशानुपपत्तेश्च, अतस्तादृशपरमाण्वाकाशविभागजनकः परमाण्वोर्विभागो वाच्य इत्यभिप्रायवानाह । **तदङ्गीकारे त्विति ।** अनयोः पक्षयोः प्रथमपक्ष एव सम्यक्, यदवच्छेदेन कमलारम्भकसंयोगस्तदवच्छेदेन क्रियानुत्पत्त्या च न विकसत्कमलभङ्गप्रसङ्ग इति ध्येयम् । **तत्त्वे-विभागजनकत्वे । कर्मत्वं**-कर्मलक्षणस्याऽतिव्याप्तिः । 'संयोगविभागयोरनपेक्षं कारणं कर्म' इति सूत्रस्य संयोगस्य विभागस्य वाऽनपेक्षं कारणं कर्मेति लक्षणद्वये तात्पर्यमित्यभिप्रायेण द्वितीयलक्षणस्य तत्राऽतिव्याप्त्यभिधानमिदम् ।

रामरुद्री ।

व्यत्वासम्भवात् । असमवेतभावकार्योत्पादस्य चाऽनिष्टत्वादिति* । **अभिमान इति ।** अप्रामाण्यज्ञानानास्कन्दितो भ्रम इत्यर्थः । तद्बीजं तु वक्ष्यते । **कार्यद्रव्यध्वंसविशिष्टेष्विति ।** स्वसमानाधिकरणद्रव्यासमानकालीनेत्यादिः । तेन परमाणूनां सर्वदैव कार्यद्रव्यध्वंसविशिष्टत्वेऽपि न क्षतिः । एतत्परिचयायैव कार्यपदम् । द्रव्यानाधारेष्विति परमार्थः ।

पूर्वं पीलुपाकवादिना मते युक्तिद्वयं प्रदर्शितम्, एकं टीकाकाराननुरोधि, अन्यत् तदनुरोधि, तत्र प्रथमे स्पर्शवत्संयोगं प्रति समानावच्छेदकत्वप्रत्यासत्त्या स्पर्शवत्संयोगस्य प्रतिबन्धकत्वात्परितः परमाण्वन्तरावष्टब्धे आभ्यन्तरपरमाणावबष्टम्भकपरमाणुसंयोगनिवृत्तिमन्तरेण तेजःसंयोगासम्भवात्, तत्र रूपविनाशासम्भवे तादृशरूपबलादेवाऽवयविन्यपि पुनः पूर्वरूपसजातीयरूपान्तरोत्पादे पाकायोग इति रूपान्तरोत्पादाय तत्राऽऽभ्यन्तरपरमाणुना सह कथञ्चिदग्निसंयोग उपपादयितव्यः, स च नाऽवष्टम्भकसंयोगनिवृत्तिमन्तरेणेति तन्निवृत्त्यनुज्ञाने द्व्यणुकमपि विनश्यतीति क्वाऽवयविनि पाकसम्भावनेत्यङ्गीकृतम्, तदनुसारेणेदानीं क्षणप्रक्रिया व्याख्यायते । **'विभागजविभागानङ्गीकारे'** इत्यादिग्रन्थभावार्थोऽग्रे व्याख्यास्यते । कर्मसूत्रमपि विभागग्रन्थे व्याख्यास्यते ।

---

(१) वैशेषिकसूत्रम् । अ० १ सू० १७

*अय भावः । कार्याधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकधर्मघटितमेव खलु कारणत्वम्, कार्यस्य चाऽसमवेतत्वे तदधिकरणाप्रसिद्धया तद्घटितनिरुक्तकारणत्वस्वरूपपरिचितियुक्तैवेति ।

कसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात्, तदा दशक्षणा।

अथ द्रव्यनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात्, तदैकादशक्षणा। तथा हि-

अथ नवक्षणा—

बहिसंयोगात् परमाणौ कर्म, ततः परमाण्वन्तरेण विभागः, तत आरम्भकसंयोगनाशः, ततो द्व्यणुकनाशः १, ततः परमाणौ श्यामादिनाशः २, ततो रक्ताद्युत्पत्तिः ३, ततो द्रव्यारम्भानुगुणा क्रिया ४, ततो विभागः ५, ततः पूर्वसंयोगनाशः ६, ततः आरम्भकसंयोगः ७, ततो द्व्यणुकोत्पत्तिः ८, ततो रूपाद्युत्पत्तिः ९। इति नवक्षणा।

दिनकरी।

वस्तुतस्तु 'संयोगविभागयोरनपेक्षं कारणं कर्म' इति सूत्रम्। तत्र संयोगस्यानपेक्षं कारणमित्युक्तौ कारणाकारणसंयोगेऽतिव्याप्तिः, तस्य कार्याकार्यसंयोगे किञ्चिदनपेक्ष्य कारणत्वात्, एवं विभागस्याऽनपेक्षत्वियुक्तौ कारणाकारणविभागेऽतिव्याप्तिरत उक्तं संयोगविभागयोरिति। अनपेक्षत्वं च स्वोत्तरोत्पन्नभावानपेक्षत्वम्। अन्यथा कर्मणोऽपि संयोगजनने द्रव्यस्य पूर्वसंयोगनाशस्य चापेक्षणादसम्भवापत्तेः। विभागासमवायिकारणत्वे सति संयोगहेतुत्वं वा तत्। पूर्वदेशविभागस्तु नोत्तरदेशसंयोगे कारणम्, व्यवहाराभावेनाऽन्यथासिद्धेः। संयोगस्य विभागं प्रति कारणत्वाभावादेव नाऽसमवायिकारणत्वमिति न तत्राऽतिव्याप्तिः। इत्थं च कारणमात्रविभागस्य पूर्वसंयोगनाशं द्रव्यनाशं चाऽनपेक्ष्य कारणाकारणविभागजनकत्वेऽपि नाऽतिव्याप्तिः, तस्य विभागजनकत्वेऽपि संयोगविभागोभयजनकत्वाभावादिति ध्येयम्। **द्रव्यारम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्येति**। द्रव्यारम्भकसंयोगनाशोत्पत्त्यधिकरणक्षणोत्तरक्षण इत्यर्थः। कारणता तु द्रव्यारम्भकसंयोगनाशत्वेनैव, लाघवादिति ध्येयम्। एवमग्रेऽपि। नवदशैकादशक्षणाः प्रक्रियाः क्रमेणोपपादयति-**तथा हीत्यादिना**।

परमाणौ कर्म-द्व्यणुकारम्भकपरमाणोर्मध्ये एकस्मिन् परमाणौ कर्म। **परमाण्वन्तरेण** द्व्यणुकारम्भकपरमाण्वन्तरेण। **आरम्भकेति**। द्व्यणुकारम्भकेत्यर्थः। **ततः परा**

रामरुद्री।

इति नवक्षणेति। यत्राऽग्निक्रिया, घटारम्भकबाह्याभ्यन्तरपरमाण्वोरारम्भकसंयोगविरोधिन्यौ क्रिये चेत्येकः कालः, ततोऽग्निपूर्वदेशविभागो घटारम्भकतादृशपरमाणुद्वयपूर्वदेशविभागश्च, ततोऽग्निपूर्वदेशसंयोगनाशो घटारम्भकतादृशपरमाणुद्वयपूर्वदेशसंयोगनाशश्च, ततोऽग्निबाह्यपरमाण्वोरेव संयोगः, ततस्तयोः क्रियानाशः, ततश्चोभयोरपि कर्मणी, ततश्च विभागः, ततः पूर्वसंयोगनाशः द्व्यणुकारम्भकबाह्याभ्यन्तरपरमाणुद्वयसंयोगनाशश्च, ततो बाह्यपरमाणोरुत्तरदेशेनाग्नेश्च तदुत्तरदेशेनाऽऽभ्यन्तरपरमाणुना संयोगौ, द्व्यणुकनाशश्च १, ततस्तयोः क्रियानाशः, आभ्यन्तरपरमाणौ श्यामरूपनाशश्च २, तत आभ्यन्तरपरमाणौ रक्तोत्पत्तिरग्नौ क्रिया च ३, ततोऽग्नौ आभ्यन्तरपरमाणुविभागः, आभ्यन्तरपरमाणौ च क्रियोत्पत्तिः ४, ततः अग्नितत्परमाणुसंयोगनाशः, परमाणुपूर्वदेशविभागश्च ५, ततोऽग्नेराभ्यन्तरपरमाणौ संयोगः, परमाणुपूर्वदेशसंयोगनाशश्च ६, तत आभ्यन्तरबाह्यपरमाणुसंयोगः ७, ततो द्व्यणुकोत्पत्तिः ८, ततो रूपोत्पत्तिः ९, तादृशस्थल इत्यर्थः। एतेन तावत्कालमग्निसंयोगो नाऽनुवर्तितुमीष्टे, तथा हि प्रथमं बाह्यपरमाणावग्निसंयोगः, ततो बाह्यपरमाणौ कर्म, अग्नौ कर्मनाशश्च, ततः परमाणुद्वयविभागः, अग्नौ

ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा परमाणौ द्रव्यारम्भानुगुणा क्रियाऽस्त्विति चेन्न। अग्निसंयुक्ते परमाणौ यत् कर्म, तद्विनाशमन्तरेण,

दिनकरी।

माणौ श्यामादिनाश इति। परमाणुगतरूपनाशं प्रति द्व्यणुकात्मकद्रव्यस्य प्रतिबन्धकतया तत्पूर्वं श्यामनाशासम्भवादिति भावः। **द्रव्यारम्भकेति।** द्व्यणुकारम्भकेत्यर्थः। **आरम्भकेति।** द्व्यणुकारम्भकेत्यर्थः।

तद्विनाशमन्तरेणेति। द्व्यणुकनाशोत्पत्तिक्षणोत्पत्तिकोत्तरसंयोगेन श्यामनाशक्षण

रामरुद्री।

कर्मान्तरं च, ततः परमाणुद्वयसंयोगनाशः, अग्नौ कर्मजन्यो विभागश्च, ततो द्व्यणुकनाशपरमाणूत्तरसंयोगौ, अग्निसंयोगनाशश्चेति क्रमेण द्व्यणुकनाशसमये परमाणुकर्मजनकसंयोगनाशात्। न चैकेनाऽग्निसंयोगेन पाकोऽनेन न प्रतिपाद्यते येनोक्तदोषः स्यात्, अपि त्वग्निसंयोगान्तरेण, तच्चाऽग्निसंयोगान्तरं द्व्यणुकनाशसमय एव सम्भवति। तथा हि-प्राक्पश्चिमपरमाणुद्वयारब्धद्व्यणुकस्थले प्राग्देशस्थवह्निना प्राग्देशस्थस्य प्रत्यग्देशस्थस्य च पश्चिमेन परमाणुना संयोगौ, ततस्तयोः क्रियानाशः, ततः परमाणुद्वये क्रिया, ततः परमाणुद्वयस्य परस्परं विभागः, अग्नितश्च विभागः, ततः पूर्वसंयोगनाशः, तत उत्तराग्निसंयोगद्व्यणुकनाशौ, ततः श्यामनाश इतीति वाच्यम्। एतादृशस्थले श्यामनाशार्थमेतावद्दूरपर्यन्तापेक्षानौचित्यात्, प्राक्प्रतीचोः परमाण्वोरुभयोरपि अग्निसंयोगेन तदुत्तरमेव रूपनाशरूपान्तरोत्पादयोः सम्भवेन तत्र द्व्यणुकनाशस्यैतन्मते व्यर्थत्वादिति निरस्तम्।* अत्राऽग्निक्रियाया द्वितीयतृतीयचतुर्थक्षणेषूत्पत्तिमुपगम्य तस्याऽप्रस्तत्पूर्वं स्वकर्मणा बाह्यपरमाणुसंयुक्तत्वाभ्युपगमे एतावत्कालपर्यन्तमारम्भकसंयोगप्रतिद्वन्द्विविभागानुगुणकर्मण उत्पादो दुर्वारः। ततश्च द्व्यणुकनाशसमये प्रागुक्तरीत्याऽग्निसंयोगविनाशप्रसङ्गः। बाह्यपरमाण्वसंयुक्तत्वाभ्युपगमे च परमाणुक्रियायैवेतश्चतुर्थक्षणेऽग्निसंयोगो वाच्यः,, ततश्च परमाणुकर्मनाशानन्तरमेतदग्निसंयोगात्मकारणबलादेव बाह्याभ्यन्तरपरमाण्वोरारम्भकसंयोगविरोधिविभागजनकक्रियोत्पत्तौ अग्नौ बाह्यपरमाणुसंयोगानन्तरं प्रागुत्पन्नक्रियानाशादुत्तरक्षणे पुनरुत्पन्नेन क्रियान्तरेणाऽभ्यन्तरपरमाणुसंयोगस्य च सम्भवेऽपि क्रियानाशं प्रत्यात्मसंयोगस्य हेतुत्वाभ्युपगन्तृनव्यमते तादृशस्थलेऽग्निपरमाणुसंयोगोत्तरमग्नावात्मसंयोगान्तरस्याऽनिष्पन्नतया नाशासम्भवात्तदुत्तरक्षणेऽग्नौ कर्मान्तरोत्पत्त्यसम्भवे तस्याऽऽभ्यन्तरपरमाणुसंयोगो द्व्यणुकनाशकाले न निर्वहतीत्यतः प्रथमक्षण एवाऽग्नौ कर्म स्वीकृतम्। न च यत्र प्रथममग्निसंयोगः परमाणुक्रिया चेत्येकः कालः, यद्वा प्रथमं परमाणुक्रिया, तदुत्तरक्षणेऽग्निपरमाणुसंयोगः, तदुत्तरक्षणयोर्वा, तादृशस्थले भवदुक्तापत्तिर्न सम्भवति, परमाणौ कर्मोत्पत्तेः पूर्वमग्निसंयोगविरहादेव तत्रारम्भकसंयोगविरोधिविभागजनकक्रियापादनासम्भवात्, तदुत्तरक्षणेषु च कर्मणः प्रथमोत्पन्नस्य प्रतिबन्धकत्वात्तद्वारणसम्भवादिति वाच्यम्। परमाण्वग्निसंयोगस्तावत्परमाणुक्रियाजन्य उताऽग्निक्रियाजन्य इति संशये तस्य परमाणुक्रियाजन्यत्वाभ्युपगमेऽग्निसंयोगपरमाणुकर्मान्तरयोर्युगपदुत्पादासम्भवः, परमाणोः सक्रियत्वात्। क्षणविलम्बाभ्युपगमे च तत्राऽऽरम्भकसंयोगविरोधिक्रियोत्पादो दुर्निवारः। इष्टापत्तौ च परमाणुकर्मणः पूर्वमेवाऽग्निक्रियान्तरस्य प्राप्ततया द्व्यणुकनाशसमये आन्तरपरमाणावग्निसंयोगानुपपत्तिः। बाह्यपरमाणावग्निसंयोगकाले आन्तरपरमाणावपि बलवद्वेगवद्द्रव्यपरम्परासंयोगस्य सम्पत्तेरुत्तरक्षणे आन्तरेऽपि क्रियान्तरमभ्युपगम्य तद्बलादाभ्यन्तरपरमाण्वग्निसंयोगोपपादनमपि न सुघटम्, आभ्यन्तरबाह्य

---

*यद्यपि तादृशस्थले प्रथमं प्राचीनपरमाणूत्पन्नेनाऽग्निसंयोगेन क्रियाविभागादिक्रमेण द्व्यणुकनाशसमये पश्चिमपरमाणावग्निसंयोगान्तरं स्वीकृत्य नवक्षणप्रक्रियोपपादयितुं शक्यते, तथाऽपि निरुक्तरीत्या तदुपपादने ततोऽप्यर्वाक् प्रतीच्या परमाणुना दहनसंयोगमङ्गीकृत्य नवक्षणातो न्यूनक्षणप्रक्रियाप्रसङ्ग एव दोषो बोध्यः।

रामरुद्री।

परमाण्वोरारम्भकसंयोगविरोधिकर्मणोरेवाऽभ्युपगन्तव्यतया तदुपपादनाय तयोः परमाण्वोर्विरुद्धदिगभिमुखकर्मोत्पत्तेरेव स्वीकर्तव्यतया बाह्यदिक्स्थेनाऽग्निना तद्विरुद्धदिगभिमुखोत्पन्नकर्मबलादाभ्यन्तरपरमाणोः संयोगासम्भवात्। आरम्भकसंयोगविरोधिकर्मणो विरुद्धदिक्त्वनियमस्य सर्वसम्प्रतिपन्नत्वात्। परमाणुकर्मसमकालतदुत्तरकालयोरग्निसंयोगो दहनकर्मणैव जायत इत्यपि न साधु तथा सति प्रथमं परमाणुकर्म, दहनक्रियाजनितो दहनसंयोगश्चेत्येकः क्षणः, ततः परमाणुपूर्वदेशविभागः, दहनकर्मणाशश्च, ततः परमाणुपूर्वदेशसंयोगनाशो दहने स्वाभाविकाद्वेगात् क्रियान्तरं च, ततः परमाणूत्तरदेशसंयोगस्य दहनेन सह सम्भवेऽपि न ततो द्व्यणुकनाशसमये आभ्यन्तरपरमाणुदहनसंयोग उपपद्यते, तत्कालं दहनपूर्वदेशविभागस्य तदुत्तरक्षणे परमाणुक्रियानाशदहनपूर्वदेशसंयोगनाशयोस्तदुत्तरं परमाणुकर्मदहनदेशान्तर(१)संयोगयोस्ततः परमाणुद्वयविभागदहनक्रियानाशयोस्ततः परमाणुद्वयसंयोगनाशदहनक्रियान्तरयोरुपगन्तव्यतया द्व्यणुकनाशसमये आभ्यन्तरपरमाणौ दहनसंयोगासम्भवात्। परमाणुक्रियोत्तरक्षणे दहनक्रियाजन्यदहनसंयोगाभ्युपगमेऽपि न निस्तारः, तथा हि प्रथमं परमाणुक्रिया, ततः परमाणुपूर्वदेशविभागः, दहनक्रियाजन्यदहनसंयोगश्च, ततः परमाणुपूर्वदेशसंयोगनाशः, दहनक्रियानाशश्च ततः परमाणूत्तरदेशसंयोगः, दहनक्रियान्तरं च, ततः परमाणुकर्म, दहनपूर्वदेशविभागः, ततः परमाणुद्वयविभागः, दहनपूर्वदेशसंयोगनाशः, ततः परमाणुद्वयसंयोगनाशः, दहनोत्तरदेशसंयोगश्चेत्येव प्रक्रियाया वक्तव्यतया तथाऽपि द्व्यणुकनाशकाले आभ्यन्तरपरमाणुदहनसंयोगासम्भवस्य प्रागुक्तस्याऽवारणात्(२)। परमाणुकर्मतृतीयक्षणेऽपि दहनकर्मजनितदहनसंयोगो न सम्भवति, तथा सति प्रथमं परमाणुकर्म, ततः परमाणुपूर्वदेशविभागः, ततः परमाणुपूर्वदेशसंयोगनाशो दहनकर्मजो दहनसंयोगश्च, ततः परमाणूत्तरदेशसंयोगो दहनक्रियानाशश्च, ततः परमाणुक्रियानाशः दहनक्रियान्तरं च, ततः परमाणुक्रिया दहनपूर्वदेशविभागश्च, ततः परमाणुद्वयविभागः दहनपूर्वदेशसंयोगविनाशश्च, ततः परमाणुद्वयसंयोगविनाशः, दहनोत्तरसंयोगश्चेत्येव वक्तव्यतया तथाऽपि आभ्यन्तरपरमाणुसंयोगस्य दहनेऽसम्भवात्। न च परमाणुद्वयसंयोगनाशकाल एवाग्निक्रियया ऽग्नेराभ्यन्तरपरमाणुसयोगः कुतो न जायते ? इष्टापत्तौ च द्व्यणुकनाशसमय एव श्यामनाशात् अष्टक्षणाया एव प्रक्रियायाः प्रसङ्गान्मूलविरोधापत्तिरिति वाच्यम्। स्पर्शवत्संयोगस्य स्पर्शवत्सयोगे प्रतिबन्धकत्वादेव आरम्भकसंयोगनाशकालेऽग्निसंयोगासम्भवात्। परमाणूत्तरसंयोगकालेऽग्निक्रियाजन्याग्निसयोगाभ्युपगमे चाऽस्मदीयैव रीतिरनुसृतेति न किञ्चिन्नवीनमिव। परमाणुक्रियामात्रात् परमाणुदहनसंयोगाभ्युपगमोऽपि न युक्तः, स हि निष्क्रिये क्रियावति तज्जन्यविभागवति तज्जन्यपूर्वसयोगनाशवति वा वक्तव्यः, उत्तरसयोगवति तदभ्युपगमेऽस्मन्मतानुप्रवेशात्। स च न सम्भवति। तथाहि—नाऽऽद्यः, परमाण्वग्निसयोगस्य दहनकर्मान्तरस्य, ततः परमाणुकर्मान्तरस्य, दहनपूर्वदेशविभागस्य चोपगन्तव्यतया क्रमेण परमाणुसयोगनाशकाल एव दहनस्योत्तरदेशसंयोगात्। अत एव न द्वितीयतृतीयचतुर्थो अपि पक्षाः सम्भवन्ति, दहनसंयोगस्याऽपि द्व्यणुकनाशपूर्वतृतीयचतुर्थपञ्चमक्षणेषु प्रसक्त्या नवक्षणाविधानप्रसङ्गात्। एवं परमाणोर्निष्क्रियत्वेऽग्निक्रिययैव परमाणावग्निसंयोगो वक्तव्यः, तथा च सति प्रथममग्नेः क्रियाविभागादिक्रमेण बाह्यपरमाणुना सह संयोगः, ततो बाह्यपरमाणावारम्भकसंयोगविरोधिनी क्रिया, अग्निक्रियानाशश्च, ततः परमाणुद्वयविभागः, अग्निक्रियान्तरं चेति प्रक्रियया द्व्यणुकनाशानन्तरं दहनस्याऽऽभ्यन्तरपरमाणुना सह संयोगः स्यात्, तथा च दशक्षणैव प्रक्रिया, न नवक्षणेति दहनक्रियाकाल एव परमाणावपि क्रिया स्वीकृता। एकस्य परमाणोरक्रियत्वेऽपरस्य परमाणोः क्रिया नियतं द्व्यणुकारम्भकसंयोगविरोधिन्येव भवेदिति बाह्यपरमाण्वग्निसंयोगकाल एव द्व्यणुकनाशो माभूदिति तत्काल आभ्यन्तरपरमाणावपि क्रिया स्वीकृता।

---

(१) परमाणुकर्मनाशकाले तु न क्रियान्तरं सम्भवति, पूर्वक्षणे तत्र कर्मणः सत्त्वेन तत्क्षणे तदसम्भवात्, कर्मणः कर्मप्रतिबन्धकत्वात्।

(२) अत्र क्षणे आभ्यन्तरपरमाणुदहनसंयोगस्तु नोपपद्यते, परितः परमाणुभिरवष्टम्भात्।

गुणोत्पत्तिमन्तरेण च परमाणौ क्रियान्तराभावात्, कर्मवति कर्मान्तरानुत्पत्तेः,

दिनकरी।

एव पूर्वक्रियानाश इति भावः। परमाणौ क्रियान्तराभावादिति। तस्मिन् परमाणौ क्रियान्तराभावादित्यर्थः। अत्र हेतुमाह। **कर्मवतीति। कर्मवति कर्मान्तरानुदयेन कर्मो-**

रामरुद्री।

यद्यपि अग्निक्रियासमकालमारम्भकसंयोगविरोधिनः कर्मणः परमाणावुत्पस्यभ्यनुज्ञानेऽपि न क्षतिः, तत्र द्व्यणुकनाशसमये तस्याऽग्नेर्बाह्याभ्यन्तरपरमाण्वोर्युगपत्संयोगद्वयोपगमात्, तथाऽपि अग्निसंयोगात् पूर्वं बाह्यपरमाणौ द्व्यणुकारम्भकसंयोगविरोधिक्रियोत्पत्तिर्न सम्भवत्येव, कारणाभावात्। अविरोधि तु कर्म घटस्याऽग्नौ प्रक्षेपत एव सम्भवति, अवयविकर्मणो यावदवयवकर्मनियतत्वात्, घटादिकर्मणः प्रक्षेपोत्तरकालभाविनो यावदवयवकर्मनियतत्वस्य सर्वसम्प्रतिपन्नत्वाच्च। तेनाऽवयविकर्मणो यावदवयवकर्मनियतत्वास्वीकारेऽपि न क्षतिः। द्व्यणुकनाशसमयेऽग्नेराभ्यन्तरमाणुना सह संयोगानभ्युपगमे तदुत्तरक्षणे तत्र श्यामनाशानिर्वाह इति तत्क्षणे स स्वीकृतः। इदं स्ववधेयम्। क्षणनवकाभिधानमेतन्मते एकस्मिन् परमाणौ कर्मचिन्तने इतो न्यूनक्षणा प्रक्रिया न सम्भवतीति द्योतनाय। अधिकक्षणा तु स्यात्। तथा हि यत्र निश्चल एव घटादौ तदारम्भकबाह्यपरमाणुना सहाऽग्निक्रियया ऽग्निसंयोगः, ततो बाह्यपरमाणुक्रिया, अग्निक्रियानाशश्च, ततोऽग्नौ क्रियान्तरम्, बाह्याभ्यन्तरपरमाण्वोर्विभागश्च ततोऽग्निविभागः, बाह्याभ्यन्तरपरमाणुसंयोगनाशश्च, ततोऽग्निपूर्वसंयोगनाशः, बाह्याभ्यन्तरपरमाण्वोः संयोगनाशो द्व्यणुकनाशश्च, ततोऽग्नेरुत्तरदेशात्मकाभ्यन्तरपरमाणौ संयोगः, ततः श्यामनाशः—इत्यादिर्दशक्षणः। एकादशक्षणाऽपि सम्भवति, तथाहि—कुतश्चित् कारणात् परमाणुकर्म, ततो विभाग आभ्यन्तरबाह्यपरमाण्वोः, अग्नौ क्रिया च, ततः परमाणुद्वयसंयोगनाशः, ततो द्व्यणुकनाशः, अग्निविभागश्च ततोऽग्निपूर्वसंयोगनाशः, ततोऽग्निपरमाणुसंयोगः तत्रैकादशक्षणा। परमाणुसंयोगनाशकाल एवाऽग्नौ कर्मचिन्तनाद्द्वादशक्षणाऽपि, द्व्यणुकनाशसमयेऽग्नौ कर्मचिन्तने त्रयोदशक्षणाऽपि, एवमुत्तरोत्तरम्। नवक्षणातो न्यूनक्षणा तु न सम्भवति, सा हि द्व्यणुकनाशाव्यवहितप्राक्क्षणेऽग्नेः परमाणौ संयोगोत्पत्तौ स्यात्, सा च न सम्भवति, परमाणुद्वयसंयोगस्य प्रतिबन्धकत्वादिति।

कर्मवतीति। उत्पन्नस्य कर्मणः पुनरुत्पादवारणाय क्रियां प्रति क्रियायाः प्रतिबन्धकत्वावश्यकत्वादिति भावः। ननु निरुक्तस्थले आभ्यन्तरपरमाणौ श्यामनाशकाले कर्मोत्पत्तौ का क्षतिः? आभ्यन्तरपरमाणोर्निष्क्रियत्वेन पूर्वश्यामरूपसत्त्वेन च तत्र क्रियोत्पत्तौ बाधकाभावादिति चेन्न, श्यामनाशकाल आभ्यन्तरपरमाणौ क्रियाभ्यनुज्ञानेऽपि सा द्व्यारम्भानुगुणा न सम्भवति, तथा हि—तादृशशैत्याऽऽभ्यन्तरपरमाणावग्निक्रियाजन्यः संयोगः प्रथमम्, तत आभ्यन्तरपरमाणौ कर्म, अग्नौ क्रियानाशः, परमाणौ श्यामनाशश्च, तत आभ्यन्तरपरमाणोः पूर्वदेशतदाभ्यन्तरपरमाण्वोर्विभागः, अग्नौ क्रियान्तरं च, तत आभ्यन्तरपरमाणौ पूर्वदेशादिसंयोगनाशः, अग्नेर्विभागश्च, तदुत्तरं भवताऽऽभ्यन्तरपरमाणोर्बाह्यपरमाणुना संयोगो वक्तव्यः, स च न सम्भवति, परमाणौ तदग्निसंयोगरूपप्रतिबन्धकस्य पूर्वं सत्त्वात्। न च परमाणुक्रियैव तन्नाशं इति वाच्यम्। परमाणुक्रियया बाह्याभिमुख्येन संयोगमुत्पादयितुं जातया नाऽग्निसंयोगो विनाशयितुं शक्यते, अभिमुखसंयोगे क्रियामात्रस्यैवाऽनाशकत्वात्, अन्यथा शराग्रसंयुक्तस्य पत्रादेः शरक्रियया विनाशप्रसङ्गात्। पत्रक्रियया तु तत्र स्यात्, तथा च प्रकृतेऽपि नाऽऽभ्यन्तरपरमाणुकर्मणाऽग्निसंयोगविनाशसम्भवः, तस्य तत्राऽऽभिमुख्यात्, अग्निकर्मणा तु स्यात्, स च तथा सति तदुत्तरक्षण एव जायत इति कथं परमाण्वोः संयोगः सम्पद्येतेति। अत एव कार्यद्रव्यारम्भदशायामारम्भकपरमाणुद्वयमध्यस्थतेजोभागस्य बहिरपसरणेन तत्र तत्र तत्तद्द्रव्यमग्निमग्नसमये बहिस्तेजउपचयादौष्ण्यातिशयः प्रत्यक्षमुपलभ्यते, यथा पाषाणभस्मातितप्ततैलादौ जलप्रक्षेपे। विभाग-

---

आभ्यन्तरपरमाणोर्निष्क्रियत्वाभ्युपगम इयमाशङ्का।

निर्गुणे द्रव्ये द्रव्यारम्भानुगुणक्रियानुपपत्तेश्च। तथाऽपि परमाणौ श्यामादिनिवृत्तिसमकालं रक्ताद्युत्पत्तिः स्यादिति चेन्न। पूर्वरूपादिध्वंसस्याऽपि रूपान्तरे हेतुत्वादिति।

दिनकरी।

त्पत्तौ कर्मणः प्रतिबन्धकत्वकल्पनादिति भावः। गुणोत्पत्तिमन्तरेण कर्मानुत्पत्तौ हेतुमाह। **निर्गुण इति।**

रामरुद्री।

समये च बाह्यस्य तेजसस्तन्मध्यरन्ध्रप्रवेशेनेन्द्रियसन्निकर्षांगोचरतापत्तौ औष्ण्यस्पर्शानुभवोपलब्धेः, यथा जलावसिक्तेऽङ्गे व्यजनादिना वीज्यमाने सति प्रविभज्यमानजलावयवमध्यरन्ध्रप्रवेशिनस्तेजसः सन्निकर्षांगोचरतया जलीयशैत्यानिशयविशेष उपलभ्यते। तदिमे तेजोवमनतच्छोषणे वस्त्रादिनिष्पीडनकालीनमलिनप्रवृत्तिशुष्कवस्त्रप्रक्षेपकालीनसलिलावशोषममानयोगक्षेमे ऊष्मे इति वैद्यानिकसमयोऽपि साधु सङ्गच्छते। वस्तुतस्तु द्वयणुकनाशानुगुणं कर्म बाह्ये परमाणावारभताऽग्निसंयोगेनाऽऽस्यन्तरेऽपि तदारम्भणोर्यामित्यभ्युपगमे तादृशस्थलविशेष एव नवक्षणप्रक्रियाभिधानम्। तदभिधानस्य तदपेक्षया न्यूनक्षणप्रक्रियाऽसम्भवद्योतनैकपरतया सर्वत्र नवक्षणासम्भवस्याऽदूषणत्वात्। ग्रन्थस्त्वित्थं व्याख्येयः— **अग्निसंयुक्ते**—निरुक्तरीत्याऽग्निक्रियाजन्याग्निसंयोगवति, **परमाणौ**—आभ्यन्तरपरमाणौ, **यत् कर्म**—अग्निदिगभिमुखं बाह्यपरमाणावग्निसयोगकाल एव परम्परया तन्नोदनात्मककारणसहकाराज्जायमानमिति शेषः। **तद्विनाशमन्तरेण**—तादृशाभ्यन्तरपरमाणुकर्मनाशं विनेत्यर्थः। ननु माऽस्तु श्यामनाशकाले परमाणौ द्रव्यारम्भानुगुणा क्रिया, तदुत्तरक्षणे तु स्यात्, तदानीमप्यग्नावपि तदीयवेगजनितस्य कर्मान्तरस्याऽवश्यं स्वीकरणीयतया तद्बलात् परमाणुद्वयसंयोगे प्राक्षणाऽग्निसंयोगनिवृत्तेः सम्भवेन प्रागुक्तदोषानवकाशादित्यत आह। **निर्गुण इति**। द्रव्यारम्भानुगुणक्रियायां तत्तद्रूपरसादिविशेषस्यैव हेतुताया वाच्यत्वात् तदुत्पत्तिमन्तरेण तत्र द्रव्यारम्भानुगुणक्रियोत्पत्तेरसम्भवादित्यर्थः। ननु द्रव्यारम्भानुगुणक्रियायां गुणविशेषस्य हेतुत्वे मानाभावः। न च द्रव्यत्वव्याप्यव्याप्यजातेः परमाणावनङ्गीकर्तृमते दुग्धदध्यादिप्रतिनियतद्रव्योत्पादाय रूपरसादिविशेषस्यैव तत्तद्द्रव्यारम्भे नियामकत्वं वक्तव्यमिति परमाणुक्रियायां गुणस्य हेतुत्वसिद्धिः। तथा चोक्तं कुसुमाञ्जलौ 'संस्कारः पुस पवेष्टः—'इत्यादिकारिकाव्याख्यायामुदयनाचार्यैः—'अत एव बीजविशेषस्याऽऽपरमाण्वन्तभङ्गेऽपि परमाणूनामवान्तरजात्यभावेऽपि प्राचीनपाकजविशेषादेव विशिष्टाः परमाणवस्त त कार्यविशेषमारभन्ते। यथा हि कलमबीजं वानरादेर्गोडीरं माहिषादेर्जात्या व्यावर्तते तथा तत्परमाणवोऽपि—'इत्यादि। न चैवं सर्गान्तरीयद्वयणुकादिरूपाद्युत्पादनिर्वाहाय परमाणुषु प्रलयकालेऽपि रूपाद्यभ्युपगमो न सम्भवति, तथा सति तादृशरूपाद्यात्मककारणबलादेव प्रलयकाल एव परमाणुद्वयक्रियया ऽऽरम्भकसयोगप्रसङ्गेन तत्कालस्य कार्यद्रव्यानधिकरणकालत्वरूपखण्डप्रलयत्वव्याघातादिति वाच्यम्। कल्पान्ताग्न्यात्मकमहत्तमतेजोवेगातिशयेनैव प्रलयानुगुणपरमाणुकर्मसम्भवात् तद्बलात्तदुत्तरमपि विलक्षणवेगं स्वीकृत्य तद्बलादागमप्रसिद्धप्रलयकालावधि क्रियासन्ततिमभ्युपगम्य पुनः सर्गादिसमये परमाण्वन्तरेण सह संयोगमारभ्यैव तस्य तस्य वेगस्य तत एव विनाशाभ्युपगात्, स्पर्शवत्संयोगस्य वेगनाशकतायाः सर्वसम्प्रतिपन्नत्वात्। एतावत्कालावधि च गगनादिभिरेव परमाणुषु संयोगाभ्युपगमान्न कर्मसन्तानानुवृत्तावपि किञ्चिद्बाधकम्। तादृशकर्मसन्ततिश्च विधुविधुन्तुदयोरिवाऽऽरम्भे विरुद्धदिगाभिमुख्येन जातापि मण्डलभ्रमिरूपपर्यवसायितया कालान्तरेण तयोः संयोगानुगुणैव पर्यवसितुमर्हतीति नाऽत्राऽनुभवविरोधोऽपि शङ्क्यः। **पूर्वरूपादिध्वंसस्येति**। रूपाद्यभावस्येत्यर्थः। तेन यत्किञ्चित्पूर्वरूपध्वंसस्य परमाणुषु सर्वदैव सत्त्वेऽपि न पूर्वोक्तापत्तिः। एतादृशश्च कार्यकारणभाव उत्पन्नस्य पुनरुत्पादवारणाय स्वीकरणीय इत्यभिप्राय इति बोध्यम्।

कुसुमाञ्जलिः। प्रथमस्तवकः; ११ कारिका।

अथ दशक्षणा—

सा चाऽऽरम्भकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागजननने सति स्यात्। तथा हि–वह्निसंयोगात् द्व्यणुकारम्भके परमाणौ कर्म, ततो विभागः, ततः आरम्भकसंयोगनाशः, ततो द्व्यणुकनाश–विभागजवि-

दिनकरी।

कारणमात्रविभागस्य कारणाकारणविभागजनकत्वाभावपक्ष एव परमाण्वन्तरे कर्मचिन्तनं विनैव ग्रन्थान्तरेऽष्टक्षणा प्रक्रियोक्ता, सा च निर्गुणे द्रव्यारम्भानुगुणक्रियोत्पत्तौ बाधकाभावेन रक्तोत्पत्तिक्षण एव द्रव्यारम्भानुगुणक्रियोत्पत्तिः सम्भवतीत्यभिप्रायेण समर्थनीया।

विभागेन विभागजनन इति। कारणमात्रविभागेन कारणाकारणविभागजनने सतीत्यर्थः।

विभागजविभागाविति। आरम्भकसंयोगनाशस्य तृतीयक्षण एवोत्पन्नतया चतु-

रामरुद्री।

अथ दशक्षणेति। यत्राऽग्निक्रिया, बाह्यपरमाणुक्रिया च, ततोऽग्निपूर्वदेशविभागो बाह्याभ्यन्तरपरमाण्वोर्द्व्यारम्भकसंयोगाप्रतिद्वन्द्विपूर्वदेशविभागश्च, ततोऽग्निपूर्वदेशसंयोगनाशः, बाह्याभ्यन्तरपरमाणुपूर्वदेशसंयोगनाशश्च, ततोऽग्निबाह्यपरमाणुसंयोगः, ततस्तयोः क्रियानाशः, ततोऽग्नौ स्ववेगात् तादृशवेगवदग्निसयोगाद्बाह्यपरमाणौ तत्सयोगादाभ्यन्तरपरमाणौ च कर्माणि, ततोऽग्निपूर्वदेशविभागः, बाह्याभ्यन्तरपरमाण्वोश्च विभागः, ततोऽग्नौ पूर्वदेशसयोगनाशः, बाह्याभ्यन्तरपरमाण्वोरारम्भकसयोगनाशः, ततोऽन्याभ्यन्तरपरमाणुसंयोगो बाह्याभ्यन्तरपरमाण्वोर्विभागजविभागौ द्व्यणुकनाशश्चेत्येकः कालः १, तत आभ्यन्तरपरमाणौ श्यामनाशः, अग्नौ क्रियानाशः, बाह्याभ्यन्तरपरमाण्वोर्गगनादिसंयोगनिवृत्तिः २, तत आभ्यन्तरपरमाणौ रक्तोत्पत्तिः, अग्न्याभ्यन्तरपरमाणुविभागानुगुणाऽग्निक्रिया, बाह्याभ्यन्तरपरमाण्वोर्गगनादिनोत्तरदेशेन सयोगश्च ३, ततोऽन्याभ्यन्तरपरमाणुसंयोगविनाशको विभागः, बाह्याभ्यन्तरपरमाण्वोः क्रियानाशश्च ४, तत आभ्यन्तरपरमाणौ क्रियान्तरम्, अग्नेराभ्यन्तरपरमाणुसंयोगनाशः ५, ततः परमाणुद्वयस्य पूर्वदेशविभागः, अग्नेरुत्तरदेशसंयोगश्च ६, ततः पूर्वदेशसंयोगनाशः ७, ततः परस्पर सयोगः ८, ततो द्व्यणुकोत्पत्तिः ९, ततो रूपोत्पत्तिः १०, तत्र दशक्षणा प्रक्रियेत्यर्थः। नन्वत्र बाह्यपरमाणावग्निसयोगक्षण एव कुतो नाऽऽभ्यन्तरपरमाणौ क्रिया जायत इति चेन्न। बाह्यपरमाणावग्निसंयोगो ह्युभयक्रियाजन्य एव स्वीकृतः, अन्यथा केवलाग्निक्रियाजन्यत्वे नवक्षणोक्तदोषप्रसङ्गात्, तथा च बाह्यपरमाणुकर्मणोऽवयविकर्मकालसमुत्पन्नस्य स्वीकारावश्यकतया तस्य चाऽऽभ्यन्तरसंयोगाविरोधिन एव सिद्धये आभ्यन्तरेऽपि तत्काले क्रियायाः स्वीकर्तव्यत्वात्(१) तस्याश्च बाह्ये वह्निसंयोगकालेऽपि सत्त्वात् तदुत्तरं तत्र क्रियानाश एव क्रियान्तरोदयसम्भवात्। अग्नेरन्तराले प्रवेशावश्यकतया तदानीमुत्पन्नयाऽपि तया चतुर्थक्षणे बाह्येन परमाणुना संयोगजननासम्भवाद्वारम्भानुगुणत्वस्यैवाऽङ्गीकारानौचित्यात्, अङ्गीकारेऽपि वाऽग्निसंयोगस्य तादृशस्थले आरम्भकसंयोगविरोधित्वं स्वीकृत्य तस्या अनारम्भकसंयोगोत्पादनेनैव चरितार्थतया वक्तव्याच्च न दोष इत्यपि वदन्ति। अथाग्निक्रियाजन्याग्निसंयोगाभ्युपगमे पूर्वोक्तो दोषोऽत्र न दोषाय, तथा हि निश्चले बाह्ये परमाणावग्निक्रियया ऽग्निसयोगः, ततो बाह्यपरमाणौ कर्म, अग्निक्रियानाशश्च, ततो बाह्याभ्यन्तरपरमाण्वोर्विभागः, अग्नौ क्रियान्तरं च, ततो बाह्याभ्यन्तरपरमाणुसंयोगनाशः, अग्निबाह्य

(१) क्रियाया निष्क्रियसयुक्तद्रव्यमात्रेण सह विभागजनकत्वात्, विभागमात्रं प्रति जनकत्वे सक्रियेण शरसंयुक्तजत्वादिनाऽपि सह विभागप्रसङ्गादिति भावः। विवेचयिष्यते चैतदुपरिष्टात्।

भागौ १, ततः श्यामनाश-पूर्वसंयोगनाशौ २, ततो रक्तोत्पत्युत्तरसंयोगौ ३, ततो वह्निनोदनजन्यपरमाणुकर्मणो नाशः ४, ततोऽदृष्टवदात्मसंयोगाद् द्रव्यारम्भानुगुणा क्रिया ५, ततो विभागः ६, ततश्च पूर्वसंयोगनाशः ७, तत आरम्भकसंयोगः ८, ततो द्व्यणुकोत्पत्तिः ९, ततो रक्तोत्पत्तिः १०। –इति दशक्षणा।

अथैकादशक्षणा—

वह्निसंयोगात् परमाणौ कर्म, ततो विभागः, ततो द्रव्यारम्भकसंयोग-

दिनकरी।

र्यक्षणे परमाण्वाकाशविभागः सम्भवतीति भावः। ततः श्यामनाशपूर्वसंयोगनाशाविति। परमाणुश्यामनाशपरमाण्वाकाशसंयोगनाशावित्यर्थः। परमाणुश्यामनाशं प्रति द्व्यणुकनाशस्य हेतुत्वात् पूर्वं परमाणुश्यामनाशासम्भवादिति भावः। रक्तोत्पत्युत्तरसंयोगाविति। उत्तरसंयोगं विना पूर्वकर्मणो नाशासम्भवेन द्रव्यारम्भानुगुणक्रियाहुत्पत्तिरिति भावः। एवमग्रेऽपि।

रामरुद्री।

परमाणुविभागश्च, ततो द्व्यणुकनाशः, बाह्याभ्यन्तरयोर्विभागजविभागः, अग्निबाह्यपरमाणुसंयोगनाशश्च, तदुत्तरं श्यामनाशो न स्यात्, आभ्यन्तरपरमाणौ तत्रैतावदवध्यग्निसंयोगविरहादित्येव हि दूषणमुक्तं प्राक्, तच्च प्रकृते न सम्भवति, एवमपीह दशक्षणाया अक्षतत्वात्, तदुत्तरकालोत्पन्नाग्निसंयोगेन श्यामनाशसम्भवादिति। न चेष्टापत्तिः, तथा सति मूलोक्तप्रक्रियाविरोधप्रसङ्गादिति चेन्न। तथा सति विभागजविभागाङ्गीकाराद्दशक्षणात्वस्य तत्र निर्देष्टुमशक्यत्वात्, विभागजविभागानङ्गीकारेऽपि पूर्वोक्तरीत्या दशक्षणप्रक्रियासम्भवादिति यादृशस्थलविशेषे विभागजविभागमङ्गीकृत्यैव सोपपाद्यते तस्यैव ग्रन्थकृताऽभिहितत्वात्।

अथैकादशक्षणेति। यत्राऽग्निक्रिया, बाह्यपरमाणोरारम्भकसंयोगाविरोधिनी क्रिया, ततस्तयोः पूर्वदेशविभागः, ततः पूर्वं संयोगनाशः, ततो बाह्यपरमाण्वग्निसंयोगः, ततोऽग्निबाह्यपरमाण्वोः क्रियानाशः, ततो बाह्यपरमाणावाभ्यन्तरपरमाणौ चाऽऽरम्भकसंयोगप्रतिद्वन्द्विविभागानुगुणक्रिया, अग्नौ च क्रियान्तरं, ततो बाह्याभ्यन्तरपरमाण्वोर्विभागः, अग्निबाह्यपरमाण्वोर्विभागश्च, ततो बाह्याभ्यन्तरपरमाण्वोरारम्भकसंयोगनाशः, अग्नौ च बाह्यपरमाण्वादिसंयोगनाशः, ततो द्व्यणुकनाशः, आभ्यन्तरपरमाण्वग्निसंयोगश्च १, ततोऽऽग्निक्रियानाशः, आभ्यन्तरपरमाणौ श्यामरूपनाशः, बाह्याभ्यन्तरपरमाण्वोर्विभागजविभागश्च २, ततोऽग्नौ क्रियान्तरम्, आभ्यन्तरपरमाणौ रक्तोत्पत्तिः, बाह्याभ्यन्तरपरमाण्वोः पूर्वदेशसंयोगनाशौ ३, ततोऽन्याभ्यन्तरपरमाणुविभागः, बाह्याभ्यन्तरपरमाण्वोरुत्तरदेशसंयोगौ च ४, ततोऽन्याभ्यन्तरपरमाणुसंयोगविनाशः, बाह्याभ्यन्तरपरमाण्वोः क्रियानाशश्च ५, ततोऽग्निबहिर्देशसंयोगः, बाह्याभ्यन्तरपरमाण्वोर्द्रव्यारम्भानुगुणा क्रिया च ६, ततः पूर्वदेशविभागः ७, ततः पूर्वदेशसंयोगविनाशः ८, ततः परस्परं संयोगः ९, ततो द्व्यणुकोत्पत्तिः १०, ततो रूपोत्पत्तिः ११, तत्रैकादशक्षणा प्रक्रिया बोध्येति भावः। नन्वत्र बाह्यपरमाणावुभयक्रियाजन्यबह्निसंयोगाभ्युपगमो निर्युक्तिकः, अत्र दशक्षणप्रक्रियोक्तदूषणानवतारात्, तथा हि तत्र विभागजविभागस्य क्षणद्वितयवर्तित्वानुपपत्तिरेव दूषणं दत्तम्। अत्र तु न तत्। अत्र विभागजविभागमनङ्गीकृत्यैकादशक्षणप्रक्रियोपपादनासम्भवात्, तदनङ्गीकारे दशक्षणायामेव विश्रामादिति चेन्न। अत्र तथाविधस्थलानभ्युपगमे एकादशक्षणप्रक्रियाया एवोच्छेदापत्तेः। तथा हि अग्निसंयोगाद्बाह्यपरमाणौ कर्म, अग्निकर्मनाशश्चेत्येकः कालः, अथ बाह्याभ्यन्तरपरमाण्वोर्विभागः, अग्नौ कर्मान्तरं च, अथ बाह्याभ्यन्तरपरमाणुसंयोगविनाशः, अग्नेर्विभागश्च, अथ द्व्यणुकनाशः, अग्नेः पूर्वसंयोगनाशश्च, अथाऽऽभ्यन्तरपरमाण्वग्निसंयोगः, बाह्यरमाणौ विभागजविभागश्च, अथाऽऽभ्यन्तरपरमाणौ श्यामनाशः, बाह्यपरमाणौ पूर्वदेशसंयोगविनाशः, अथाऽऽभ्यन्तरपरमाणौ रक्तोत्पत्तिः, बाह्यपरमाणावु-

नाशः, ततो द्व्यणुकनाशः १, ततो द्व्यणुकनाशविशिष्टं कालमपेक्ष्य विभागजविभाग-श्यामनाशौ २, ततः पूर्वसंयोगनाश-रक्तोत्पत्ती ३, तत उत्तरदेशसंयोगः ४, ततो वह्निनोदनजन्यपरमाणुकर्मनाशः ५, ततोऽदृष्टवदात्मसंयोगाद्द्रव्यारम्भानुगुणा क्रिया ६, ततो विभागः ७, ततः पूर्वसंयोगनाशः ८, ततो द्रव्यारम्भकोत्तरसंयोगः ९, ततो द्व्यणुकोत्पत्तिः १०, ततो रक्तद्व्यणुकोत्पत्तिः ११। इत्येकादशक्षणा।

मध्यमशब्दवदेकस्मादग्निसंयोगान्न रूपनाशोत्पादौ, तावत्कालमेकस्याऽ-

दिनकरी।

अत्र य एवाग्निसंयोगो द्व्यणुकनाशकः स एव श्यामनाशे रक्तोत्पादे च हेतुरिति केषाञ्चिन्मतं 'पुनरन्यन्तरसंयोगात्*-'इति भाष्यविरुद्धं नाऽऽदरणीयमित्यभिप्रेत्याह। मध्यमशब्दवदिति। एकस्मादिति। द्व्यणुकनाशकादेकस्मादित्यर्थः। यथा मध्यमशब्दात् पूर्वशब्दनाशोत्तरशब्दोत्पादौ भवतस्तथैकस्मात् द्व्यणुकनाशकादग्निसंयोगाच्छ्यामनाशरक्तोत्पादौ न भवत इति व्यतिरेके दृष्टान्तः। तावत्कालमिति। श्यामनाशोत्पत्त्यव्यवहितपूर्वक्षणपर्यन्तमित्यर्थः। अग्नेः—द्व्यणुकनाशकाग्निसंयोगस्य। एवमग्रेऽपि।

रामरुद्री।

त्तरदेशसंयोगश्च, अथाऽऽभ्यन्तरपरमाणौ द्रव्यारम्भानुगुणं कर्म स्यात्, बाधकाभावात्, एवं तत्क्षण एव बाह्यपरमाणौ क्रियानाशश्च, अथाऽऽभ्यन्तरपरमाणौ पूर्वदेशविभागः, बाह्यपरमाणौ कर्मान्तरं च, अथाऽऽभ्यन्तरपरमाणौ पूर्वदेशसंयोगविनाशः, बाह्यपरमाणौ पूर्वदेशविभागश्च, अथ बाह्यपरमाणुनाऽऽभ्यन्तरपरमाणोः संयोगः, बाह्यपरमाणोश्च पूर्वदेशसंयोगनाशः, अथ द्व्यणुकोत्पत्तिः, आभ्यन्तरपरमाणौ क्रियानाशः, बाह्यपरमाणोरुत्तरदेशसंयोगश्च, अथ रक्तोत्पत्तिः, बाह्यपरमाणुक्रियानाशश्चेति दशक्षणानामेव पर्यवसानात्, अस्मन्मते तु बाह्याभ्यन्तरयोरुभयोरपि परमाण्वोः, सक्रियतया वह्निसंयोगाव्यवहितोत्तरक्षणे बाह्यपरमाणौ न कर्मसम्भवः, पूर्वं प्रतिबन्धकस्य कर्मणः सत्त्वात्, तन्नाशे तु स्यादित्यस्मन्मते न काचिद्धानिः।

ननु अग्निबाह्यपरमाण्वोः पूर्वोक्तरीत्या संयोगानन्तरं क्रियानाशश्यामविनाशौ, ततोऽग्निबाह्यपरमाण्वोः क्रियान्तरम्, बाह्यपरमाणौ रक्तोत्पादश्च, ततो बाह्यपरमाणोराभ्यन्तरपरमाणुनाऽग्निना च विभागः, ततो बाह्याभ्यन्तरपरमाणुसंयोगनाशः, अग्नेश्च पूर्वसंयोगनाशः, ततो द्व्यणुकनाशः, अन्याभ्यन्तरपरमाणुसंयोगः, बाह्यपरमाणूत्तरदेशसंयोगः, तत आभ्यन्तरपरमाणौ श्यामादिविनाशः, बाह्यपरमाणावप्यौ च क्रियानाश इति नः समानमेवाऽऽस्ताम्, तथा च तदुत्तरक्षणे बाह्यपरमाणौ द्व्यणुकारम्भिका क्रिया किमिति त्वया नोपेयते? तत्कारणस्य पाकजरूपादेस्तत्र सत्त्वात्, दृष्टापत्तौ च तदनन्तरं क्रियाविभागादिक्रमेण द्व्यणुकतद्रूपयोरुत्पादादृष्टक्षणैव प्रक्रिया स्यादित्यत आह। मध्यमेत्यादि। इत्थञ्च यादृशस्थले आन्तरपरमाणौ रूपान्तरोत्पत्तिसमकालमेव बाह्यपरमाणावपि रूपान्तरोत्पत्तिः, तादृशस्थल एव नवक्षणा प्रक्रिया। न चाऽग्निसंयोगासमकालहेतोः सत्त्वात्तादृशस्थले तत्तृतीयक्षणे रूपान्तरोत्पादोऽवर्जित इति वाच्यम्। बाह्यपरमाणुसंयोगसमकालमुत्तरकालमेव वा(१)ऽग्नेर्नाशाभ्युपगमे तदुत्तरं रक्तोत्पादकहेतुविघटनादेव तदारम्भसम्भवादिति। नन्वेवमाभ्यन्तरपरमाणौ बाह्यस्याऽग्नेः संयोगो द्व्यणुकनाशसमये न स्यात्, बाह्यस्या-

---

* प्रशस्तपादभाष्यम्। गुणप्रन्थे पाकजविधिनिरूपणम्।

(१) श्यामनाशक्षणेऽप्यग्नेर्नाशाभ्युपगमे तत्काले सहकार्यन्तरात्मकस्योष्णस्पर्शस्य स्वाश्रयसंयुक्तत्वरूपपरम्परया कार्याधिकरणेऽवस्थानायोगादेव रक्तोत्पादापत्तेः परिहर्तुं शक्यत्वादिति भावः।

ग्नेरस्थिरत्वात्। किं च नाशक एव यद्युत्पादकस्तदा नष्टे रूपादावग्निनाशे नीरूपश्चिरं परमाणुः स्यात्,

दिनकरी।

अस्थिरत्वादिति। यदा परमाणावग्निसंयोगात् द्व्यणुकासमवायिकारणसंयोगविनाशकं परमाणौ कर्म तदैव नोदनाभिघातान्यतरात्मकस्याऽग्निपरमाणुसंयोगस्य जनकं यदग्निकर्म तस्य विनाशः, कर्मणः स्वजन्यसंयोगविनाश्यत्वात्, तदुत्तरक्षणे पुनरग्नौ कर्म, कारणीभूतवेगाभिघातादेः स्वसमानाधिकरणकर्मध्वंसरूपस्य कारणस्य सत्त्वात्, ततो विभागः, ततो द्व्यणुकनाशसमकालमग्निपरमाणुसंयोगस्य नाशेन श्यामरूपोत्पत्त्यव्यवहितपूर्वक्षणपर्यन्तं तस्याऽस्थिरत्वादिति भावः। ननु मास्तु द्व्यणुकनाशसमकालमग्निसंयोगस्य परमाणुश्यामनाशकत्वं रक्तोत्पादकत्वं च, परं तु द्व्यणुकनाशसमकालोत्पन्नाग्न्यन्तरसंयोगस्य परमाणौ श्यामनाशकत्वं रक्तोत्पादकत्वं चाऽस्तु। न च श्यामनाशकतावच्छेदकरक्तोत्पादकतावच्छेदकजात्योः साङ्कर्यापत्तिरिति वाच्यम्। उत्पादकतावच्छेदकजातेर्नाशकतावच्छेदकजातिव्याप्यत्वोपगमादत आह। किं चेति। नाशक एव यद्युत्पादक इति। एवकारेण नाशकतावच्छेदकवद्भिन्नावृत्तित्वरूपा व्याप्तिरुत्पादकतावच्छेदके लभ्यते, तथा च यद्युत्पादकतावच्छेदकं नाशकतावच्छेदकव्याप्यं तदेत्यर्थः। नष्टे रूपादौ-रूपपरम्परायां नष्टायाम्। अग्निनाशे—चरमाग्निसंयोगनाशे। परमाणौ पाकेन रूपोत्पत्तिस्थले प्रथमाग्नि-

रामरुद्री।

ऽग्नेर्विनष्टत्वात्, बाह्यपरमाणौ तत्कालानन्तरोत्पन्नाग्न्यन्तरसंयोगमभ्युपगम्य तदग्नेः क्रियाविभागादिक्रमेण संयोगाभ्युपगमे क्षणविलम्बादिति वाच्यम्। अग्न्यन्तरक्रियाधीनस्यैव तत्स्थलीयद्व्यणुकनाशसमकालीनाभ्यन्तरपरमाण्वग्निसंयोगस्य स्वीकारात्। नन्वेतादृशस्थलेऽग्निसंयोगनाशो नाऽभ्युपगन्तुं शक्यः, अन्यथा बाह्यपरमाणौ पुना रक्तोत्पादानुपपत्तेः, श्यामनाशकस्यैवाऽग्निसंयोगस्य रक्तोत्पादकत्वावधारणादित्यत आह। किं चेति। क्वचित् श्यामनाशकस्य तेजःसंयोगस्य पाकहेतुत्वावधारणेऽपि न तस्य श्यामनाशकतेजःसंयोगत्वेन रक्तादिकं प्रति हेतुत्वं, येनोक्तापत्तिः स्यात्, अपि तु विलक्षणोष्णस्पर्शवदग्निसंयोगत्वेन, निरुक्तस्थले च तत्सम्भवान्न रक्तरूपोत्पादानिर्वाहः। अन्यथा विलक्षणोष्णस्पर्शवदग्निसंयोगस्य विलक्षणोष्णस्पर्शस्य च पाकहेतुत्वावश्यकतया यत्र श्यामनाशकत्व एवाऽग्निर्नाशस्तादृशस्थले रक्तरूपोत्पादानुपपत्तिः, तत्पूर्वक्षणेऽग्निर्विनाशेन तद्वर्तिन सामानाधिकरण्यसम्बन्धेनोष्णस्पर्शवत्त्वस्याऽग्निसंयोगेऽसम्भवेन हेतुभूतस्य विलक्षणोष्णस्पर्शतदग्निसंयोगस्य तथाविधेनैव परम्परासम्बन्धेनोष्णस्पर्शस्याऽपि च कार्याधिकरणेऽसम्भवात्। यद्यपि विजातीयतेजःसंयोगत्वेनैव पाके हेतुत्वं, विजातीयसंयोगं प्रत्येव चोष्णस्पर्शादेः कार्यकालीनतयाऽग्निसंयोगस्य च हेतुत्वमभ्युपगम्यते इत्युपगमे न प्रकृतदोषसम्भावना, तथापि 'प्रक्षालनाद्धि—' इति न्यायेन विजातीयतेजःसंयोगत्वेन हेतुत्वस्वीकार एवाऽनुचितः, प्रकृतस्थले नाशोपहितस्योत्पादहेतुत्वाकल्पनमात्रेणैव सर्वसामञ्जस्यादिति न कोऽपि दोष इति भावः। एतेन नष्टे रूपादावग्निनाशे नीरूपतापादनमयुक्तम्, असमवायिकारणीभूतस्याऽग्निसंयोगस्य कार्यसमकालं रूपान्तरोत्पत्तिहेतुत्वं स्वीकृत्यैव प्रकृते तदसम्भवस्य वक्तव्यतया तदनङ्गीकारमात्रेणैव निरुक्तदोषवारणादिति प्रत्युक्तम्। नाशक एवेति। नाशोत्पत्त्युपलक्षित इत्यर्थः। चिरमिति। श्यामनाशकालादारभ्य क्षणत्रयमित्यर्थः। तृतीयक्षणभाव्यन्तरसंयोगादेव चतुर्थे रूपान्तरोत्पत्तिमुत्तरकालं तन्नाशे रूपान्तरोत्पत्तिं च स्वीकृत्य परमाणौ रूपसम्पत्तेरिति भावः। ननु रूपोत्पादकस्यैव तेजःसंयोगस्य रूपनाशकत्वमित्येव नियम आस्ताम्, इत्थं च निरुक्तस्थले रूपानुत्पादे श्यामनाशोऽपि न सम्भवतीति तादृशरूपारम्भकारणबलादेव बाह्यपरमाणावारम्भकसंयोगानुगुणक्रियोत्पत्त्या नवक्षणप्रक्रि-

उत्पादकश्चेन्नाशकः, तदा रक्तोत्पत्तौ तद्वह्नेर्नाशे रक्ततरता न स्यात् ।

दिनकरी ।

संयोगादिना रूपोत्पत्तिस्तेनैव रूपनाशः पुनरग्निसंयोगानन्तरं पुना रूपोत्पत्तिसम्भवेऽपि चरमाग्निसंयोगोत्तरं तेन रूपोत्पादेन तद्द्रव्यस्य तेनैवाग्निसंयोगेन नाशसम्भवात् तदग्निसंयोगस्यापि नाशे रूपान्तरोत्पादासम्भवेन नीरूपश्चिरं परमाणुः स्यादित्यर्थः । न च चरमाग्निसंयोगेन विनश्यदवस्थेनैव रूपोत्पत्तिस्तदुत्तरक्षणे च न तद्रूपनाशः, पूर्वक्षणेऽग्निसंयोगाभावादिति वाच्यम् । असमवायिकारणस्य कार्यसहभावेनैव हेतुताया न्यायवैशेषिकसिद्धतया विनश्यदवस्थेन रूपोत्पादासम्भवादिति । परमाणुरिति वैशेषिकमताभिप्रायेण, न्यायनये पूर्वोक्तरीत्या घटादेरपि नीरूपत्वप्रसङ्गो बोध्यः । ननु रक्तोत्पादकतावच्छेदकवैजात्यं श्यामनाशकतावच्छेदकवैजात्यव्याप्यमिति न ब्रूमः, परं तु वैजात्ययोरभेदं, तेन न साङ्कर्यमत आह । **उत्पादकश्चेदिति ।** चेन्नाशक उत्पादक इति योजना । नाशकतावच्छेदकमेव यद्युत्पादकतावच्छेदकं, तदेत्यर्थः । **रक्ततरता न स्यादिति ।**

रामरुद्री ।

याहानिरित्थमपि दुर्वारैव । यद्यपि तादृशस्थलेऽपि द्व्यणुकनाशसमकालमेव बाह्यपरमाणावपि दहनसंयोगान्तरं स्वीकृत्य तदुत्तरमेव श्यामनाशरक्तोत्पत्त्योः क्रमेण स्वीकारे पूर्वोक्तापत्तिर्न सम्भवति, तथाऽपि बाह्याभ्यन्तरयोरारम्भकसंयोगविरोधिविभागारम्भानुगुणकर्मजनके दहनसंयोगे श्यामनाशरक्तोत्पादस्वरूपयोग्यतायास्तादृशविलक्षणोष्णस्पर्शवदग्निप्रतियोगिकसंयोगत्वेनाऽनपेतत्वात् तादृशकर्मारम्भार्थं तत्स्वीकारे तदुत्तरक्षणे श्यामनाश एवाऽनुभवसिद्धः, क्षणिकस्य चाग्निसंयोगस्य न कल्पनसम्भवः, कार्योत्पत्तिसमकालं समवायिकारणविनाशाङ्गीकारेण क्षणिकत्वोपपादने प्रागुक्तयुक्तया कार्योत्पत्तेस्तद्विनाशस्य चाऽसम्भवात्, विरोधिगुणान्तरस्य च कल्पयितुमशक्यतया न ततोऽपि तस्य क्षणिकत्वं सम्भावयितुं शक्यम् । न चैवमग्निसंयोगस्याक्षणिकत्वे तद्वलात्तृतीयक्षणे रक्तोत्पादोऽप्यवर्जित इति नवक्षणप्रक्रियाव्याहतिर्दुरुद्धरेवेति वाच्यम् । तत्तृतीयक्षणेऽग्निनाशेनाऽसमवायिकारणस्य कार्यकाले विरहेण तदसम्भवात् । नचैवं द्वितीयक्षणे तदभ्युपगमे श्यामनाशोऽपि मा भवत्विति वाच्यम् । तथा सति श्यामरूपवलादेव द्व्यणुकनाशतृतीयक्षणे क्रियोत्पादप्रसङ्गात् । न च द्व्यणुकनाशसमये श्यामनाशकाग्निसंयोगान्तरस्याऽपि तत्र कल्पनीयतया न पूर्वोक्तापत्तिसम्भव इति वाच्यम् । तथा सति बाह्यपरमाणावग्निसंयोगद्वयस्वीकारे महागौरवप्रसङ्गात् । न च सिद्धान्तेऽपि बाह्यपरमाणौ रक्तोत्पादायाऽग्निसंयोगान्तरं स्वीकर्तव्यमेवेत्येतादृशं गौरवमुभयोरपि समानमेवेति वाच्यम् । उक्तफक्किकयैकस्मादग्निसंयोगात् परमाणुकर्मश्यामनाशरक्तोत्पादरूपकार्यद्वितयोत्पत्तेरेव मुख्यतया प्रतिषेद्धव्यत्वेन परमाणुकर्मजनकश्यामनाशकयोरग्निसंयोगयोर्भेदोपगमेऽप्यरमन्मतप्रवेशसम्भवात् । अत एव प्राचीनग्रन्थेषु एकस्मादग्निसंयोगान्न परमाणुकर्मश्यामनाशरक्तोत्पादाः, किन्तु भिन्नभिन्नैवेति लिखितम् । इत्थमपि उत्पादकस्यैव नाशकत्वमिति मते निरुक्तरीत्या श्यामनाशवारणं न सम्भवति, तन्मते श्यामादिनाशं प्रति रूपोत्पत्त्युपलक्षिताग्निसंयोगेनाऽऽरम्भकसंयोगविरोधिविभागजनककर्मारम्भेऽपि तथाविधस्यैवाऽग्निसंयोगस्य हेतुत्वमभ्युपगम्यते, लाघवात्, युक्तेस्तौल्याच्च, न तु विलक्षणोष्णस्पर्शवदग्निसंयोगत्वादिना तथा, कार्यकारणभावत्रयकल्पने गौरवप्रसङ्गात्, इत्थं च तन्मते बह्निसंयोगात् परमाणौ कर्मैव नोत्पत्तुमर्हतीत्यभिप्रायो बोध्यः । न च विनिगमनाविरहात् रूपनाशं प्रत्येव विलक्षणोष्णस्पर्शवदग्निसंयोगत्वादिना हेतुत्वस्वीकारावश्यकत्वे तादृशकार्यकारणभावत्रयस्याऽवश्यमङ्गीकार्यत्वे रूपोत्पादकत्वादिना हेतुत्वमेवाऽऽधिक्येन कल्पनीयतया गौरवावहमिति खण्डितं भविष्यतीति वाच्यम् । तादृशहेतुत्वस्याऽऽपाततः शङ्काविषयतां स्वीकृत्यैवोक्तग्रन्थस्याऽवतारणीयत्वादित्यत आह । **उत्पादकश्चेदिति । रक्ततरता न स्यादिति ।** यादृशस्थलविशेषे क्षणिकेनाऽग्निसंयोगेन रक्तरूपं विनाश्य तदनन्तरोत्पन्नेनाऽग्निसंयोगान्तरेण रक्ततररूपमुत्पादितम्,

रामरुद्री ।

तत्र रक्तरूपविनाशानुपपत्तिः, रक्तोत्पादकस्याऽग्निसयोगस्य विरहादित्येव परमार्थः । क्षणिकेनाऽग्निस योगेन श्यामनाशोत्तरमग्निसंयोगान्तरेण रक्तरूपोत्पादमुपजीव्य तादृशस्थले प्रथमस्याऽग्निसंयोगस्य रक्तोत्पत्त्यनुपलक्षिततया ततः श्यामनाशानुपपत्तौ रक्तिमानुपपत्तेरेव प्रदर्शनीयत्वावश्यकत्वेऽपि तादृशापत्तिर्द्रव्यारम्भकसंयोगप्रतिद्वन्द्विविभागानुगुणकर्मवति परमाणौ पूर्वोक्तरीत्या प्रदर्शयितुं न शक्यते, प्रागुक्तरीत्या तादृशविभागानुगुणक्रियां प्रत्यपि रूपोत्पत्त्युपलक्षिताग्निसंयोगस्य हेतुत्वावधारणात् तत्स्थले प्रथमाग्निसयोगतो रक्तिमानुत्पादे तदुपलक्षिताग्निसंयोगात्मककारणविरहात्तत्र द्रव्यारम्भकसंयोगविरोधिविभागानुगुण कर्माऽपि न स्यात्, कारणाभावादिति तत्राऽग्निसयोगस्यैकस्यैव स्वीकारावश्यकत्वे श्यामनाशस्योक्तस्थलेऽबाधितत्वात्, तादृक्कर्मरहितेऽपि च परमाणौ रक्तानुपपत्तिर्न प्रदर्शयितुं शक्या,उक्तस्थलस्य केवलपरमाणुपाकस्थलात्मकत्वे तत्र प्रथमक्षणे श्यामनाशोत्पादानुत्पादयोः प्रत्यक्षागोचरतया तदनुत्पत्ताविष्टापत्तेः कर्तुं शक्यत्वात्, अवयविपाकस्थलात्मकत्वेऽपि च प्रथमरूपात्मकश्यामनाशोत्तरं रक्तरूपानुपपत्तेरिष्टतयोक्तदोषासम्भवात्, रक्तोत्पादकाग्निसंयोगत्वादिना श्यामनाशस्थानापन्नप्रथमरूपनाश प्रति हेतुत्वाभ्युपगन्तृनये तुल्ययुक्त्या परमाणुक्रियाविशेषोत्पादकाग्निसंयोगत्वादिना तद्रूपनाशकताया अपि विनिगमकाभावेन प्रतिक्षेप्तुमशक्यत्वादित्यतो 'रक्तता न स्यात्'–इत्यनुक्त्वा **'रक्ततरता न स्यात्'** इत्युक्तम् । श्यामादिविनाशस्थानापन्नप्रथमरूपनाश प्रति तादृशक्रियोत्पादकाग्निसंयोगस्यैव हेतुत्वस्वीकारसम्भवेऽपि रक्तविनाशस्योदीक्ष्यतया तत्र तादृशाग्निसंयोगत्वेन हेतुत्वं न स्वीक्रियते, अस्वतन्त्रेष्वेव परमाणुषु पाकोत्पादस्य पीलुपाकवादिनामननुमततया तद्भञ्जनाय प्रथमरूपनाशादर्वाक् तत्संयोगविरोधिकर्मोत्पादस्य ऽऽवश्यकत्वेऽपि सकृत् स्वतन्त्रतामापन्नेषु तेषु रूपान्तरविनाशारम्भे क्रियान्तरारम्भकत्वेनाऽग्निसंयोगस्य हेतुनाकल्पनाया युक्तिविरुद्धत्वात्, प्रथमाग्निसंयोगजन्यक्रियावति परमाणौ अग्निसंयोगपरिवृत्तावपि श्यामनाश–रक्तोत्पाद–रक्तनाश–रक्ततरोत्पत्तीनामनुभवसिद्धानां तादृशकर्मारम्भकाग्निसंयोगत्वादिना हेतुत्वस्वीकारेऽपलापप्रसङ्गाच्चेति द्वितीयरूपस्थानापन्नरक्ततररूपानुपपत्त्याशङ्कनं न सन्दर्भं विरुणद्धीति । तत्राऽपि पूर्वोक्तरीत्या रक्तविनाशानुपपत्तेरेव प्रदर्शनीयत्वेऽपि तामतिक्रम्य रक्ततररूपानुपपत्तिप्रदर्शनमिष्टापत्तिशङ्काव्युदासार्थम्, रक्तरूपनाशानुपपत्तेरिष्टापत्त्या स्वीकारेऽनुभवसिद्धरक्ततररूपानुपपत्तेरेव प्रदर्शनीयत्वादिति विभावनीयम् । इदमुपलक्षणम् । विलक्षणोष्णस्पर्शवदग्निसंयोगत्वेन रक्तरूपं प्रति हेतुत्वस्य त्वयाऽपि वाच्यतया प्रागुक्तयुक्त्या विनिगमनाविरहेण कार्यकारणभावत्रयस्य परमाणुकर्मश्यामनाशरक्तादिनिरूपितस्याऽप्यवश्यकल्पनीयत्वे रक्तोत्पत्त्युपलक्षिताग्निसयोगत्वादिना परमाणुकर्मश्यामनाशादिकं प्रति हेतुत्वे मानाभाव एवेति न त्वदुक्तो दोषः सम्भवति, अन्यथा तुल्ययुक्त्या परमाणुकर्मारम्भकत्वश्यामादिनाशकत्वादिधर्मपुरस्कारेण कार्यकारणभावान्तरकल्पनाप्रसङ्गादिति दूषणान्तराण्यप्युन्नेयानि ।

एतेन एकस्यैवाऽग्निसंयोगस्य द्व्यणुकनाशानुगुणक्रियायाः श्यामादिविनाशस्य रक्तादेस्तद्विनाशस्य रक्तान्तरस्य च हेतुत्वमस्तु, विरोधविरहात् । तथा हि–अग्निसंयोगाश्रया परमाणौ क्रिया तदैवाग्निक्रियानाशश्यामनाशौ, अथाऽग्निक्रियान्तरपरमाणुद्वयविभागरक्तोत्पादाः, अथाऽग्निपरमाणुविभागपरमाणुद्वयसंयोगनाशरक्तनाशाः, अथाऽग्निपरमाणुत्रयसंयोगनाशद्वयणुकनाशौ रक्तान्तर च । पूर्वस्त्वग्निसंयोगो न तन्नाशकः, नष्टत्वात्, अस्तु चान्त्यशब्दानामिव रूपादीनामपि केषाञ्चित् क्षणिकत्वम्, कार्याव्यवहितपूर्ववर्तितामात्रेण सम्भवत्कारणभावस्याऽसमवायिकारणस्य नियमेन कार्यकालसत्त्वं नोपेयते, उपेयते तु समवायित्वान्यथानुपपत्त्या समवायिकारणस्य। न चैवमविनश्यदवस्थावयविरूपादीनामवयवरूपादिकालमात्रवृत्तितानियमभङ्गप्रसङ्गः, तादृशनियमे मानाभावात्, एकपरमाणुपाके पुनरजागलस्तनायमानो दैववशसम्पन्नः कार्यद्रव्यावष्टम्भविरहो न रूपविनाशोत्पादप्रयोजकः, मानाभावात् । न च सर्वदिगवच्छेदेनाऽग्निसयोग एव पाकनिमित्तम्, परमाण्वन्तरावष्टब्धे च परमाणौ न तत्सम्भवः, मूर्तयोः समानदेशतावि रोधादिति वाच्यम् । मानाभावात्, निबिडयोरेव तथा विरोधात्, हस्तसयुक्ते शिलातलादौ शीतस्पोष्णत्वयोरुपलम्भेन तोयतेजसोः सस्वोपगमात् । अस्तु वा एकस्मादग्निसंयोगात्

दिनकरी।

अयं भावः, रूपनाशकतावच्छेदकं विलक्षणाग्निसंयोगत्वं, तदेव यद्युत्पादकतावच्छेदकं, तदा कार्यतावच्छेदकमपि सामान्यतः पृथिवीपरमाणुरूपत्वं त्वया वाच्यं, तथा सति क्वचिद्रक्ततरता क्वचिच्च रक्ततमता परमाणौ न स्यात्, कार्यवैचित्र्यस्य कारणतावच्छेदकभेदाधीनत्वादिति भावः। इदं च पूर्वरूपनाशकाग्निसंयोगमात्रस्योत्तररूपहेतुत्वमित्यभिप्रायेण 'पुनरन्यस्मादग्निसंयोगात्'इतिभाष्यानुरोधेन चोक्तम्। वस्तुतो रक्ततारतम्यस्य पूर्वरूपविशेषध्वंसकृतत्वाद्भाष्यस्य द्व्यणुकनाशकाग्निसयोगापेक्षयाऽन्यपरत्वादुत्पादकविनाशकयोरग्निसंयोगयोरेकत्वानेकत्वेऽनियम एवेति ध्येयम्।

रामरुद्री।

परम्परया द्व्यणुकविनाशः, अन्यस्माच्च श्यामादिविनाशादिकम्, अस्तु वा वह्निसंयोगस्य पूर्ववर्तिनां स्वाजन्यानां रूपादीनां नाशकत्वम्, द्वितीयादेरिव शब्दस्य शब्दान्तराणाम्, अन्यथा तृतीयादिशब्दानां क्षणिकत्वप्रसङ्गात्, अन्त्यस्तु शब्दो नोपान्त्यस्य नाश्यः, अपि तु तन्नाशस्य। अधिकमभिहितं प्राक्। एवं च न कस्याऽपि क्षणिकत्वमिति। यस्य चाऽसमवायिकारणस्य नाशात् कार्यस्य नाशः, प्रतिबन्धकाभावविशेषस्येव तस्यापि कार्यकालसत एव कार्योत्पादकत्वम्, तेन नैकस्याऽपि द्रव्यस्य परत्वस्य वा क्षणिकत्वमिति(१)–'इति दीधितिकुदुक्तिः परास्ता। तथा हि–प्रथमं तावत् तत्र एकस्यैवाऽग्निसंयोगस्य तत्त्रितयहेतुत्वाशङ्काऽभ्युपगमवादेनैव 'पुनरन्यस्मादग्निसंयोगात्(२)–'इत्यादिभाष्यकक्किकोपरि कर्तव्या, एकस्मादप्यग्निसयोगात् प्रक्रियोपपादनसम्भवे किमिति अनपेक्षितं 'पुनरन्यस्मात्–'इत्यादिकं व्यलिखद्भाष्यकार इत्येव तदभिप्रायोऽपि वर्णनीयः, न त्वेकस्मादग्निसयोगाच्छ्यामनाशरक्तोत्पादादिकं वस्तुतः सिद्धान्तिनामनुमतमिति वक्तुं शक्यम्, तथा सति रूपोत्पादकाग्निसंयोगत्वेन रूपनाशे रूपनाशकत्वेन च रूपोत्पादे हेतुत्वस्य वक्तव्यतया रक्तरूपोत्पत्तौ सत्यामुत्तरक्षणेऽग्निनाशाधीनतत्संयोगनाशस्थले तस्य परमाणोश्चिरकालं नीरूपतापत्तेः तदनन्तररूपान्तरोत्पादानुपपत्तेश्च ग्रन्थकृदभिहितदोषस्य दुरुद्धरत्वात्, किं तु अग्निसयोगवैलक्षण्य तत्र तत्र स्वीकरणीयमेव, द्व्यणुकनाशश्यामनाशानुगुणतेजःसंयोगयोर्भेदस्त्वत्यावश्यक इत्यस्माभिरपि नानुमन्यते, भाष्यकारेणाऽपि श्यामनाशकथनानन्तरमग्निसयोगान्तरं ब्रुवता स्वीकृत इवाऽयमर्थ इत्यपि स्फुटमेव। तथा च अस्मदुक्तदिशाऽऽद्यन्तरपरमाणौ रक्तोत्पत्तिसमये बाह्यपरमाणावारम्भकक्रियोत्पत्तिमाशङ्क्यैव **'मध्यम–'**इत्यादिग्रन्थोत्थितिसम्भवात्तदसङ्गतिप्रदर्शनं युक्तिविरुद्धमेव। 'सर्वादिगवच्छेदेन–'इत्याद्याशङ्काऽपि न सङ्गच्छते, अस्माभिरग्निसंयोगमात्रस्यैव पाकहेतुत्वस्योक्तत्वात्, परमाण्वन्तरावष्टम्भात्मकप्रतिबन्धकवशादेवाऽऽन्तरे तदसम्भवस्याऽभिहितत्वात्। 'निबिडयोः–'इत्यादिसमाधानमपि न सङ्गच्छते, मूर्तान्तरोपष्टम्भे सति तेजसोऽपि प्रतिबन्धस्य 'अन्तरालेन प्रविशति पावके कथ्यमानाः क्षीरनीरादयो नोर्द्ध क्वमापयेरन्, मृदुसंयोगात् तथेति चेन्न, तण्डुलादीनामपि तथा दर्शनात्, अतिदृढानामुपलमणिवज्रादीनामग्निदग्धानां स्फुटनात (३)–'इत्यादिनाऽवयविनां सान्तरालत्व निराकुर्वद्भिराचार्यैर्व्यवस्थापितप्रायत्वात्, पाषाणादिषु अन्त्यादिप्रवेशे तेषामपि प्रचयविशेषस्याऽऽधुनिकवैज्ञानिकसमयसिद्धत्वाच्चेति। यत्तु निबिडयोरेव समानदेशताविरोधः, तेजसश्च विसरालुत्वान्न तथा, कथमन्यथा बाह्यालोकादिसंयुक्ते तदवच्छेदेन चक्षुरादिसंयोग उपपद्यतामिति सिद्धान्तरहस्यग्रन्थे मथुरानाथेनोक्तम्, तदपि न, पूर्वोक्तक्षीराध्मानाद्युपपादनाय तेजोविशेषे प्रतिबन्धस्याऽपि कल्पनीयत्वात्, बाह्यालोकसहकृतेनैव चक्षुरवयवेन महाचक्षुरारम्भस्य स्वीकर्तव्यतयाऽऽलोकसंयोगावच्छेदेन चक्षुःसंयोगसम्भवाच्च, अन्यथा चन्द्रमण्डलादिपर्यन्तयायिचक्षुरारम्भकावयवानामतिरिक्तानां सर्वेषां नयनगोलकाभ्यन्तरवर्तित्वाङ्गीकारे युक्तिविरोधापत्तेः, बहिस्तत्सत्त्वाङ्गीकारे

---

(१) गुणप्रकाशदीधितिः। (२) प्रशस्तपादभाष्यम् गुणग्रन्थः। (३) किरणावली। गुणनिरूपणम्।

अथ परमाण्वन्तरे कर्मचिन्तनात् पञ्चमादिक्षणेऽपि गुणोत्पत्तिः। तथाहि— एकत्र परमाणौ कर्म, ततो विभागः, तत आरम्भ*संयोगनाश—परमाण्वन्तरकर्मणो, ततो द्व्यणुकनाशः, परमाण्वन्तरकर्मजन्यविभाग इत्येकः कालः १, ततः श्यामादिनाशो विभागाच्च पूर्वसंयोगनाशश्चत्येकः कालः २, ततो रक्तोत्पत्तिर्द्रव्यारम्भकसंयोग इत्येकः कालः ३, अथ द्व्यणुकोत्पत्तिः ४, ततो रक्तोत्पत्तिः ५। —इति पञ्चक्षणा।

द्रव्यनाशसमकालं परमाण्वन्तरे कर्मचिन्तनात् षष्ठे गुणोत्पत्तिः। तथाहि—

दिनकरी।

परमाण्वन्तरेति। द्व्यणुकनाशककक्रियावत्परमाणुभिन्नद्व्यणुकान्तरारम्भकपरमाणावित्यर्थः। **कर्मचिन्तनादिति।** द्व्यणुकारम्भकसंयोगनाशाद्युत्पत्त्यादिक्षणे द्व्यणुकान्तरारम्भककर्मचिन्तनादित्यर्थः। पञ्चमादीत्यत्रादिना षष्ठसप्तमाष्टमक्षणानां परिग्रहः।

रामरुद्री।

च कदाचिन्निमीलितनयनस्याऽपि चाक्षुषापत्तेः, काचाद्यन्तःप्रवेशस्तु तेजसस्तस्य स्वच्छतयोपपादनीयः, स्वच्छान्यस्पर्शवत्संयोगस्यैव तेजःसंयोगे प्रतिबन्धकत्वात्, बाह्यालोकसहकृतेन चक्षुरवयवेन चक्षुरारम्भे पृष्ठभागस्थितपदार्थग्रहणप्रसङ्गोऽपि न सम्भवति, चक्षुरारम्भकगोलकान्तःस्थावयवविशेषसंयुक्तेनैव बाह्यालोकेन चक्षुरारम्भस्य स्वीकरणीयतया तादृशस्य बाह्यालोकस्य पृष्ठभागेऽभावादेव तत्रस्थपदार्थग्रहणप्रसङ्गस्य वारणीयत्वात्। तेजसः प्रतिनियतदिग्गमनशीलत्वेन चक्षुःसंयुक्तस्य तादृशस्य तदभिमुखव्यापितायाः एवाङ्गीकरणीयत्वात्, कथमन्यथा च्छायाचित्रादौ पृष्ठभागस्थपदार्थचित्रणं न भवति? अत एव च शाखाचन्द्रमसोस्तुल्यकालग्रहणमप्यागोपालाविपालानुभवसिद्धं सङ्गच्छते, चन्द्रमण्डलशाखादिसंयुक्तस्य बाह्यतेजसश्चक्षुरुन्मेषसमकालमेव आन्तरतेजसा संयोगेन चक्षुरुत्पादकत्वौचित्यात्, बाह्येनैव तेजसाऽऽन्तरावयवनिरपेक्षेण चक्षुरारम्भ इति शालिकामतमेव तु प्राग्दूषितम्। यन्त्रविशेषसहकारात् चक्षुःसंयुक्ततेजसः परावृत्तौ सत्यां पृष्ठस्थपदार्थपर्यवेक्षणमप्यत्रैवोपोद्बलकमिति युक्तमुत्पश्यामः।

प्रक्रियान्तराण्यप्युपपादयितुमाह—**एवं परमाण्वन्तर इत्यादि।**

इति पञ्चक्षणेति। यादृशस्थलविशेषे पूर्वोक्तरीत्या बाह्यपरमाणुदहनयोरुभयक्रियाजन्यः आभ्यन्तरपरमाणुमात्र एवाऽऽरम्भकसंयोगविरोधिक्रियानुगुणश्च संयोगः, ततस्तयोः क्रियानाशौ, बाह्यश्यामनाशश्च, ततो बाह्ये रक्तोत्पत्तिः, आभ्यन्तरपरमाणौ दहननोदनविशेषात् दहने च नैसर्गिकाद्वेगात् कर्मणी, ततो बाह्याभ्यन्तरपरमाण्वोर्विभागः, ततो बाह्याभ्यन्तरसंयोगविनाशः, बाह्यपरमाणावारम्भानुगुणक्रियोत्पत्तिश्च, ततोऽग्निबाह्यपरमाणुसंयोगविनाशः, बाह्यपरमाणुपूर्वदेशविभागः, द्व्यणुकनाशश्च, ततोऽन्याभ्यन्तरपरमाणुसंयोगः, बाह्यपरमाणुपूर्वदेशसंयोगनाशश्च २, तत आभ्यन्तरपरमाणौ श्यामरूपनाशः, अग्निक्रियाविनाशः, बाह्याभ्यन्तरपरमाणुसंयोगश्च ३, आभ्यन्तरपरमाणौ रक्तोत्पत्तिः, अग्निक्रियान्तरं, द्व्यणुकोत्पत्तिश्च ४, ततोऽन्याभ्यन्तरविभागः, द्व्यणुके रूपोत्पत्तिश्च ५, तादृशस्थल इत्यर्थः। एतच्चाऽन्तरालेऽग्निसंयोगमनङ्गीकृत्योक्तम्, अतोऽग्निसंयोगसत्त्वसमये बाह्यपरमाणोराभ्यन्तरेण संयोगासम्भवेऽपि न क्षतिरिति ज्ञेयम्। अत्र च बाह्यपरमाणावग्निसंयोगाभ्यवहितोत्तरक्षणद्वये श्यामनाशरक्तोत्पत्तिकथनं तत्र कर्मानुत्पादकथनं च तदुत्तरक्षणे आरम्भकक्रियोपपादनायाऽभिप्रेतम्।

नन्वारम्भकसंयोगस्य द्व्यारम्भानुगुणक्रियां प्रति प्रतिबन्धकत्वमावश्यकम्, अन्यथा द्व्यारम्भानन्तरमपि तदवयवगतरूपविशेषाद्यात्मककारणबलात्पुनरप्यारम्भानुगुणक्रियोत्पादापत्तेरिति पूर्वकल्पे आरम्भकसंयोगनिवृत्तिकाले न द्व्यारम्भानुगुणक्रियोत्पादसम्भव इति पञ्चक्षणा प्रक्रिया न सम्भवतीत्यस्वरसात् षट्क्षणप्रक्रियामुपपादयितुमाह—**द्रव्यनाशसमकालमित्यादि।** अत्राऽपि पञ्चक्षणप्रक्रियोपदर्शितदिशा द्व्यनाशकाल एवाऽऽरम्भानुगुणक्रियोत्पत्तिमुपजीव्य क्षणाः परिगणनीयाः।

परमाणुकर्मणा परमाण्वन्तरविभागः, तत आरम्भकसंयोगनाशः। ततो द्व्यणुनाश-परमाणवन्तरकर्मणी १, अथ श्यामादिनाशः, परमाण्वन्तरे कर्मजो विभागश्च २, ततो रक्तोत्पत्तिः, परमाण्वन्तरे पूर्वसंयोगनाशश्च ३, ततः परमाण्वन्तरसंयोगः ४, ततो द्व्यणुकोत्पत्तिः ५, अथ रक्तोत्पत्तिः ६-। इति।

एवं श्यामनाशक्षणे परमाणवन्तरे कर्मचिन्तनात् सप्तक्षणा। तथाहि—

परमाणौ कर्म, ततः परमाण्वन्तरेण विभागः, ततः आरम्भकसंयोगनाशः, ततो द्व्यणुकनाशः १, ततः श्यामादिनाश-परमाण्वन्तरकर्मणी २, ततो रक्तोत्पत्तिः, परमाण्वन्तरकर्मजविभागश्च ३, ततः परमाणवन्तरेण पूर्वसंयोगनाशः ४, ततः परमाण्वन्तरेण संयोगः ५, ततो द्व्यणुकोत्पत्तिः ६, ततो रक्तोत्पत्तिः ७। इति।

एवं रक्तोत्पत्तिसमकालं परमाण्वन्तरे कर्मचिन्तनादष्टक्षणा। तथाहि—

रामरुद्री।

ननु आरम्भकसंयोगत्व नाऽखण्डधर्म इति तत्पुरस्कारेण षट्क्षणप्रक्रियावादिसम्मतमारम्भानुगुणक्रियाविरोधित्वमनुपपन्नम्, द्रव्यस्यैव तत्प्रतिबन्धकत्वे लाघवादिति द्रव्यनाशसमये द्रव्यारम्भानुगुणक्रियानुपपत्त्या षट्क्षणाऽपि प्रक्रिया नोपपद्यत इत्यस्वरसाद्द्रव्यनाशोत्तरक्षण एव तदुत्पत्तिमुपजीव्य सप्तक्षणां प्रक्रियामाह। **एवं श्यामनाशक्षण इति**। व्याख्यानं पूर्ववत्।

ननु मतत्रयेऽपि बाह्यपरमाणौ निष्क्रिये सत्येवाऽऽभ्यन्तरपरमाणौ कर्मोत्पत्तिरनुमन्तव्येत्युपपादितम्। तच्च युक्तिविरुद्धम्, अग्निना साक्षात्सयुक्त बाह्यपरमाणुमतिक्रम्याऽऽभ्यन्तरपरमाणौ परम्परया दहनोदनात्मककारणबलात्क्रियोत्पादस्यानुभवविरुद्धत्वादित्युभयत्र क्रियाभ्युपगमे पूर्वोक्तास्तिस्रोऽपि प्रक्रिया न सम्भवन्तीत्यस्वरसादष्टक्षणप्रक्रियामुपपादयति। **रक्तोत्पत्तिसमकालमिति**। व्युत्पादितमिदमितः प्रागेवेति ध्येयम्।

मथुरानाथतर्कवागीशास्तु 'यत्परमाणुक्रियया द्व्यणुकनाशस्तत्परमाणुक्रिययोत्तरद्व्यणुकोत्पत्तौ एकादशभिर्दशभिर्नवभिरष्टाभिर्वा'इत्यादि वदन्तः विभागजविभागं स्वीकृत्य 'इत्थं च यदि द्रव्यनाशापेक्षस्तदैकादशक्षणा। तथाहि द्व्यणुकनाशः, ततो गगनादिपरमाणुविभागः, श्यामादिनाशश्च, अनन्तरं रक्ताद्युत्पत्तिर्गगनादिसयोगनाशः, अथ परमाणोस्तत्तद्देशसंयोगः, ततः परमाणुक्रियानिवृत्तिः, उत्तरकालं परमाणौ क्रियान्तरोत्पत्तिः, अथ विभागः, ततः पूर्वसंयोगनाशः, ततः परमाणुद्वयसंयोगः, ततो द्व्यणुकोत्पत्तिः, अथ द्व्यणुके रक्ताद्युत्पत्तिः। यदि च संयोगनाशापेक्षस्तदा द्व्यणुकनाशोत्पत्तिक्षणे विभागजविभागोत्पत्त्येकक्षणह्रास इति दशक्षणा। यदि च निरपेक्षस्तदा क्षणद्वयह्रासेन नवक्षणा प्रक्रिया-' इत्याद्युक्त्वा विभागजविभागानभ्युपगमे 'तदाऽष्टक्षणा, द्व्यणुकनाशोत्पत्तिसमय एवोत्तरसंयोगोत्पत्तेः-' इत्यूचुः। तथा 'परमाण्वन्तरक्रियया द्व्यणुकोत्पत्तावन्यथाऽपि प्रक्रिया सम्भवति,तथाहि द्रव्यनाशमपेक्ष्य कारणमात्रविभागाभ्युपगमे द्व्यणुकनाशात् पञ्चमक्षणे परमाण्वन्तरे कर्मचिन्तनाद्दशक्षणा, चतुर्थक्षणे तच्चिन्तनान्नवक्षणा, तृतीयक्षणे तदुत्पत्तावष्टक्षणा, द्वितीयक्षणे तदुत्पत्त्या सप्तक्षणा, द्व्यणुकनाशोत्पत्तिक्षणे तच्चिन्तनात् षट्क्षणा, द्व्यणुकनाशकपरमाणुसयोगध्वंसोत्पत्तिसमये तच्चिन्तनात् पञ्चक्षणा, संयोगनाशकविभागोत्पत्तिसमये तच्चिन्तनाच्चतुःक्षणा, परमाणुरक्ताद्युत्पत्तिसमय एव द्व्यणुकोत्पत्तेः। न च स्पर्शवत्त्वेन द्रव्यारम्भकत्वात् कथं रक्ताद्युत्पत्तिसमय एव द्व्यणुकोत्पत्तिरिति वाच्यम्। कारणतावच्छेदकं विना कार्योत्पत्तावविरोधात्, स्पर्शस्य यदा कदाचित्कारणे सत्त्वेनैवाऽवच्छेदकत्वोपपत्तेः। वस्तुतस्तु द्रव्यारम्भकतावच्छेदकतया भूतचतुष्टयवृत्तिरेकैव जातिः सिद्धयति, लाघवात्, क्रियासमवायिकारणतावच्छेदकतया सिद्धेन मूर्तत्वेनैव वा द्रव्यारम्भकतावच्छेद इति वक्ष्यत इति नाऽनुपपत्तिसम्भावनाऽपि। न चैवं विनश्यदवस्थापाकेन श्यामादिविनाशे पाकान्तरस्याऽप्यभावात् रक्तानुत्पादो येषु परमाणुषु तेषां परस्पर-

परमाणौ कर्म, तत आरम्भकसंयोगनाशः, ततो द्व्यणुकनाशः १, ततः श्यामनाशः २, ततो रक्तोत्पत्ति-परमाण्वन्तरकर्मणी ३, ततः परमाण्वन्तर-कर्मजविभागः ४, ततः पूर्वसंयोगनाशः ५, ततः परमाण्वन्तरसंयोगः ६, ततो द्व्यणुकोत्पत्तिः७,अथ रक्तोत्पत्तिः८।-इत्यष्टक्षणा॥ १०५॥ इति पीलुपाकवादनिरूपणम्

दिनकरी।

इत्यष्टक्षणा इति। ननु यत्रैकस्मिन् परमाणावग्निसंयोगसमकालं परमाण्वन्तरे कर्मोत्पत्तिस्तदुत्तरक्षणेषु क्रमेणैकत्र क्रियाविभागपूर्वसंयोगनाशद्व्यणुकनाशाः, अपरत्र विभागपूर्वसंयोगनाशोत्तरसंयोगोत्पत्तिरूपोत्पत्तयस्तत्र द्विक्षणा। एवं यत्रैकस्मिन् परमाणौ कर्मोत्पत्तिसमकालं परमाण्वन्तरे कर्मोत्पत्तिस्तत्र त्रिक्षणा। एवं यत्रैकस्मिन् परमाणौ विभागसमकालं परमाण्वन्तरे कर्मोत्पत्तिस्तत्र चतुःक्षणाऽपि सम्भवति प्रक्रियेति चेन्न। द्व्यणुकनाशमन्तरेण परमाणौ श्यामादिनिवृत्तिस्तामन्तरेण च रक्तोत्पत्तिर्न सम्भवतीत्युक्त-प्रायम्। इत्थं च द्व्यणुकनाशक्षणे परमाणुश्यामनाशक्षणे रक्तोत्पत्तिक्षणे वा द्व्यणुकान्त रोत्पत्तौ द्वित्रिचतुःक्षणाः प्रक्रिया वाच्याः, न चैतेषु क्षणेषु द्व्यणुकान्तरोत्पत्तिः सम्भवति, तथा सति तत्पूर्वक्षणेषु परमाणोररक्तत्वेन तदारब्धद्व्यणुकस्याऽप्यरक्तत्वप्रसङ्गादित्यन्यत्र विस्तरः॥ १०५॥ इति पीलुपाकवादनिरूपणम्॥

रामरुद्री।

संयोगाद्रूपादिशून्यद्व्यणुकादिलक्षणकार्योत्पत्तिप्रसङ्ग इति साम्प्रतम्, इष्टत्वात्, घ्राणादीनां पिशाचादीनां च तदवयवादीनां च तथात्वात्। द्रव्यत्वादेरिव पृथिवीत्वादेरपि स्पर्शाद्यननुमापकत्वात्, अनुद्भूतेषु स्पर्शादिषु मानाभावात्। कल्प्यतां वा रक्तादिसामग्रीप्रारम्भक्षण एव श्यामादिनाशकाग्निसंयोगसमवधा-नम्, कार्योन्नेयधर्माणां यथाकार्यमुन्नयनात्। न हि विनश्यदवस्थस्तेजः संयोगो रक्ताद्युत्पादकाग्निसंयो-गान्यवहितपूर्वक्षणेऽवर्तमानस्तेजःसंयोगो वा श्यामादि न नाशयतीत्यत्र प्रमाणमीक्षामहे। अभिधीयतां वा कार्यसहभावेन श्यामादिनाशकता, पूर्ववर्तितामात्रेण रक्ताद्युत्पादकत्वमेकस्यैवाऽग्निसंयोगस्येति न किञ्चिदेतत्। अस्तु वा द्व्यारम्भ्यव्यवहितपूर्वक्षणे स्पर्शवत्त्वनियमः, न च तावताऽपि हीयते चतुःक्षण प्रक्रिया, तथाहि-द्व्यणुकनाशद्व्यणुकान्तरोत्पत्त्यनुगुण परमाणुक्रिययोर्युगपदुत्पत्त्या युगपदेव द्व्यणुकना-शद्व्यणुकान्तरारम्भकसंयोगाद्युत्पत्तिः, अथाणुश्यामादिनाशद्व्यणुकान्तरोत्पत्तौ, अनन्तरं रक्ताद्युत्पत्तिर्द्व्य-णुकपरिमाणाद्युत्पत्तिः, अथ द्व्यणुके रक्ताद्युत्पत्तिः। क्षणद्वय नीरूपादिकमेव तत् द्व्यणुकम्। यदा च द्व्यणुकनाशोत्पत्तिसमये रक्तादिमता परमाण्वन्तरेण समं श्यामादिमत्परमाणोरारम्भकसंयोगोत्पत्तिस्तदा द्वितीयक्षणे श्यामादिनाशद्व्यणुकोत्पत्तौ, तृतीये चैकत्र परमाणौ रक्ताद्युत्पत्तिः, परमाण्वन्तररक्तादिना तदवच्छेदेन द्व्यणुके रक्ताद्युत्पत्तिश्चेति त्रिक्षणा प्रक्रिया। न चाऽवयवान्तररक्तादिसहकारेणैवाऽवयवर-क्तादेरवयविरक्तादिजनकत्वम्, मानाभावात्, गौरवाच्च। वस्तुतो द्व्यणुकनाशानुगुणतेजःसंयोगादेव तदनुगुणक्रियाविभागोत्पत्तिक्षणयोः श्यामादिनाशरक्ताद्युत्पत्तौ तेजःसंयोगान्तरकल्पनायां गौरवात् बाधकाभावाच्च न द्व्यणुकस्य श्यामादिनाशप्रतिबन्धकत्वम्, मानाभावात्, उक्तनियमस्याऽनुकूलतर्कवि-रहेणाऽसरत्वात्। रक्तोत्पत्तिसमये तदुत्तरं चाऽऽश्रयनाशाधीनतेजःसंयोगनाशोत्पत्तेन ततो रक्तादिनाशः। असमवायिनः कार्यसहभावेन हेतुत्वमते रूपादिनाशकताया अपि तथैवाऽभ्युपगमात्। एवञ्च यदा द्व्यणुकनाशानुगुणक्रियाविभागोत्पत्तिक्षणयोः परमाण्वन्तरकर्मोत्पत्त्या द्व्यणुकनाशोत्पत्तिस्तदव्यवहि-तोत्तरक्षणे द्व्यणुकान्तरारम्भकसंयोगनिष्पत्तिस्तदा त्रिचतुःक्षणा प्रक्रिया ब्रह्मणोऽपि दुर्वारा। रूपानाश-कतेजःसंयोगस्य रूपोत्पादकत्वपक्षेऽपि त्रिक्षणा प्रक्रिया सम्भवति, द्व्यणुकनाशानुगुणतेजःसंयोगेन परमाणुक्रियोत्पत्तिसमकालं श्यामादिनाशात् द्व्यणुकनाशसमये तत्पूर्वसमये वोत्पन्नेन तेजःसंयोगेन

नैयायिकानां तु नये द्व्यणुकादावपीष्यते ।

दिनकरी ।

नैयायिकानामिति । **नैयायिकानां मते द्व्यणुकादाववयविन्यपि पाको भवति ।**

रामरुद्री ।

स्वोत्तरकाले रक्ताद्युत्पादात् द्व्यणुकनाशादनन्तरक्षण एव द्व्यणुकान्तरोत्पादात् अनन्तरं रक्ताद्युत्पादाच्च । एतेन द्वित्रिचतुःक्षणा प्रक्रिया न सम्भवतीत्याचार्योक्तमनादेयम् । सम्भवति द्वित्रिक्षणाऽपि प्रक्रिया, तथाहि—द्व्यणुकनाशानुगुणतेजःसंयोगोत्पत्तिक्षणे परमाण्वन्तरकर्मोत्पत्त्या द्व्यणुकनाशकपरमाणुसंयोगनाशोत्पत्तिक्षणे द्व्यणुकान्तरारम्भकपरमाणुसंयोगोत्पत्तेर्युगपदेव द्व्यणुकनाशद्व्यणुकान्तरोत्पत्ती, अथ द्व्यणुकनाशपूर्वोत्पन्नपरमाणुरक्तादिना द्व्यणुके रक्ताद्युत्पत्तिरिति । न चैकपरमाणुसंयोगावष्टब्धे परमाणौ न परमाण्वन्तरसंयोग उत्पत्तुमर्हति, अवच्छेदकान्तरेणाऽपि तदुत्पत्तिसम्भवात् । न च द्रव्यं प्रति द्रव्यस्य प्रतिबन्धकत्वादेकत्र परमाणौ युगपद्द्व्यणुकनाशद्व्यणुकान्तरोत्पत्ती न सम्भवत इति साम्प्रतम्, तादृशप्रतिबन्धकतायां मानाभावात्, सत्यप्यवयवसंयोगे तद्द्रव्यद्वितीयादिक्षणेषु तद्द्रव्यानुत्पत्तेस्तद्द्रव्यप्रागभावविरहेणैवोपपत्तेः । तद्द्रव्यसमानाधिकरणभावितद्द्रव्यान्तरानुत्पत्तिश्च तत्तद्द्रव्यं प्रति विशिष्याऽसमवायिकारणस्य तत्तत्संयोगस्याऽभावात् । अन्यथा तद्द्रव्योत्पत्तिक्षणे तदुत्पत्त्यापत्तेः । महापटनाशोत्तर महापटारम्भकावस्थितसंयोगाऽजायमानस्य खण्डपटस्य महापटद्वितीयादिक्षणेऽनुत्पादश्च तत्पटं प्रति महापटनाशस्य हेतुत्वात् । इतरथा महापटोत्पत्तिक्षणे तदुत्पत्तेर्दुर्वारतापत्तेः । एतेन रूपादौ रूपादेरप्रतिबन्धकत्वमिति वदन्ति । प्रागभावतद्धेतुतयोर्निराकर्तव्यतया द्रव्यत्वादिनैव द्रव्यं प्रति विरोधित्वमिति वस्तुगतिः । वस्तुतः सर्वत्र त्रिक्षणैव प्रक्रिया । तथा हि—द्व्यणुकनाशानुगुणतेजःसंयोगात् परमाणुक्रियोत्पत्तिसमय एव श्यामादिनाशः, रक्ताद्युत्पादस्तदनन्तरं परमाणुविभागसमये तस्मादेवाऽग्निसंयोगात् द्व्यणुकनाशोत्पत्त्यादिसमये चाऽग्निसंयोगान्तराद्धेत्येव तावत् प्रमाणसिद्धम्, द्व्यणुकनाशानुगुणपरमाणुक्रिया द्व्यणुकनाशोत्पत्तिसमयेऽवश्यं संयोगं जनयतीति तु सर्वसिद्धमेव, एवञ्च स संयोगः परमाण्वन्तरे द्व्यणुकारम्भक एव कल्प्यते, लाघवात्, दृष्टं च द्व्यणुकनाशद्वितीयक्षणे द्व्यणुकान्तरोत्पत्तिरिति । इदं तु कारणमात्रविभागजविभागानभ्युपगमे । तदभ्युपगमे तु यथायथं षट्क्षणा पञ्चक्षणा चतुःक्षणैव वा प्रक्रियेति दिक् —*'इत्यप्युक्तवन्तः, तत्सर्वं तर्ककर्कशविचारचातुरीधुरीणैरेव विभावनीयमित्यलम् ॥ १०५ ॥ ॥ इति पीलुपाकवादनिरूपणम् ॥

इत्थं पीलुपाकवादिमतं निरूप्य तत्प्रतिद्वन्द्विनां पिठरपाकवादिनां नैयायिकानां मतमाह । **नैयायिकानां मत इत्यादि ।** ननु स्पर्शवत्संयोगे समानावच्छेदकत्वप्रत्यासत्त्या स्पर्शवत्संयोगस्य प्रतिबन्धकत्वात् परितः परमाण्वन्तरावष्टब्धे आभ्यन्तरपरमाणौ पाको न सम्भवति, परमाणुसंयोगात्मकप्रतिबन्धकनिवृत्तिमन्तरेण तत्र दहनसंयोगानिष्पत्त्या कारणसमवधानविरहादित्यतो दहनेन सहाऽऽभ्यन्तरपरमाणोः संयोगो बाह्यपरमाणुसंयोगनिवृत्तिमङ्गीकृत्यैवोपपादनीयः, तथा च कार्यद्रव्यविनाशस्य परमावश्यकतया पिठरपाकसम्भावनैव कुत इत्याशङ्कां निराकरोति । **द्व्यणुकादाविति ।** द्व्यणुकमात्रपाकस्थले तदारम्भकपरमाणुद्वयस्य वह्निना सममारम्भकसंयोगनिवृत्तिमन्तरेणाऽपि संयोगसम्भवात् तदात्मककारणसम्पत्तेरुभयोः परमाण्वोर्द्व्यणुकमविनाश्यैव पूर्वरूपनाशतद्विजातीयरूपोत्पादौ सम्भवत इति प्रागुक्तवैशेषिकप्रक्रियया घटादिमहावयविस्थलेऽवयविनि पाकासम्भवेऽपि अवयविमात्र एव पाको न सम्भवतीति पीलुपाकवादुक्तेरयुक्ततया पिठरपाकोऽपि सम्भवत्येवेति भावः । 'घटादौ' इत्यनुक्त्वा **'द्व्यणुकादौ'** इत्युक्तिर्घटादिस्थले आन्तरपरमाणौ कार्यद्रव्यनिवृत्तिमन्तरेण पाकोत्पादस्योपपादयितुमशक्यतामालोच्यैव, द्व्यणुकस्थले तु पूर्वोक्तदिशा तत्र कार्यद्रव्यनिवृत्तिमन्तरेणाऽपि पाकः सम्भवतीत्यभिप्रायः । **आदि**पदोक्तिस्तु परितः परमाण्वन्तरानवष्टब्धत्रसरेण्वादिपरिग्रहार्था । तथा च यादृशस्यलविशेषे त्रसरेणोरारम्भवः सर्व एवाऽवयवाः किञ्चिदेशावच्छेदेन परमाण्वन्तरानवष्टब्धाः, यथा प्रचितावयवारब्धत्रसरेणुस्थले, द्विसरमाला-

* सिद्धान्तरहस्यग्रन्थे ।

**तेषामयमाशयः, अवयविनां सच्छिद्रत्वाद्रूक्षैः सूक्ष्मावयवैरन्तःप्रविष्टैरवयवेष्वव-
वृष्टब्धेष्वपि पाको न विरुद्ध्यते। अनन्तावयवितन्नाशकल्पने गौरवम्। इत्थं
च सोऽयं घट इत्यादिप्रत्यभिज्ञाऽपि सङ्गच्छते। यत्र तु न प्रत्यभिज्ञा, तत्रा-
ऽवयविनाशोऽपि स्वीक्रियत इति।** इति पिठरपाकवादनिरूपणम्॥

दिनकरी

अवयविन्यपीत्यपिना परमाणुपरिग्रहः। **तेषाम्**-नैयायिकानाम्। **अयं**-वक्ष्य-
माणः। **अवयवेष्वपीति**। अवयविनाऽवयवेष्वपीत्यर्थः। **पाकः**-रूपादिपरावृत्तिः।
न विरुद्ध्यत इति। साक्षात्परम्परासाधारणसकलावयवावच्छेदेन तेजःसंयोगस्य रूपादि-
नाशहेतुत्वे मानाभावेनाऽऽरम्भकसंयोगावच्छेदेन विजातीयतेजःसंयोगादेव रूपादिनाश-
सम्भवेऽप्यारम्भकसंयोगावच्छेदेन तेजःसंयोगस्याऽभिघातादेस्तदानीं तत्र सद्भावे माना-
भावेन पूर्वोक्तरीत्याऽवयविनाशस्याऽप्रसक्तेः; सर्वावयवावच्छेदेन तेजःसंयोगस्य रूपादिना-
शकत्वेऽपि नाशकतावच्छेदकवैजात्यस्य नोदनत्वाभिघातत्वादिविरुद्धस्यैवाऽङ्गीकरणीयतया
नोदनाभिघातभिन्नतेजःसंयोगाद्रूपादिनाशेऽपि तेनावयविनाशस्यासम्भवात्; अस्तु वा रूपा-
दिनाशकतावच्छेदकवैजात्यस्य नोदनाभिघातत्वव्याप्यत्वं, तथाऽप्यवयव्यभिघातादिकालेऽ-
वयवाभिघाताद्युत्पादनियमे मानाभावः; आस्तां वा तथा नियमः, तथाप्यवयवाभिघातादे-
र्नियमतो द्रव्यारम्भकसंयोगविरोधिविभागहेतुक्रियाजनकत्वे मानाभाव एव, विभागं प्रति
क्रियायास्तत्तद्व्यक्तित्वेनैव हेतुतया तत्तत्क्रियाधीनविभागं प्रति तत्तत्पूर्वदेशस्य विशिष्य
हेतुतया च तज्जन्यक्रियायास्तादृशविभागहेतुत्वासिद्धेरिति भावः। यदप्युक्तं वैशेषिकैः-
अवयविरूपं प्रत्यवयवरूपहेतुताया व्यभिचारापत्त्या नावयविनि पाकेन रूपोत्पाद इति, तदपि
न, अवयवरूपादेर्विजातीयरूपादिकं प्रत्येव हेतुतया व्यभिचाराप्रसक्तेः। एतेनाऽवयविरू-
पनाश आश्रयनाशहेतुतायां व्यभिचारापत्त्या पाकेनावयविरूपनाशासम्भव इत्यप्यपास्तम्।
आश्रयनाशजन्यतावच्छेदककोटौ वैजात्यस्य निवेशनीयत्वादिति। अवयविपाकानभ्युपगमे
बाधकाभावमुक्त्वा तत्र बाधकमप्याह। **अनन्तेति**। **इत्थं च**-अवयविनाशानङ्गीकारे च।
प्रत्यभिज्ञाऽपि सङ्गच्छत इति। पूर्वावयविनाशे तूत्पन्नावयविपूर्वावयविनोरभेदाभावेना-
ऽभेदावगाहिनी प्रत्यभिज्ञा न स्यादिति भावः॥ इति पिठरपाकवादनिरूपणम्॥

रामरुद्री।

कारसंयुक्तद्व्यणुकत्रयारब्धत्रसरेणुस्थले च, तत्राऽपि कार्यद्रव्यविनाशमन्तरेणाऽपि पूर्वरूपपरावृत्तिरूपा-
न्तरोत्पत्ती सम्भवत इति पीलव एव पच्यन्त इति सिद्धान्तो न युक्तिसह इति भावः। एतदभिप्रायेणैव
'अवयविनां सच्छिद्रत्वात्'-इत्यादि वक्ष्यति। यादृशस्थलविशेषेऽवयविषु पाको नैयायिकैरभ्युपगम्यते
तादृशस्थल इति च तत्र पूरणीयम्। तथा च पिठरपाकस्थले **सच्छिद्रत्वात्**-किञ्चिद्देशावच्छेदेन द्रव्या-
न्तरावष्टम्भशून्यत्वात् **अवयविनि पाको न विरुध्यते**-अवयवित्वव्याप्यपाकाभावप्रतियोगी न भवतीत्यर्थः,
न तु अवयविमात्रस्यैव सच्छिद्रत्वादिति तदर्थो युक्तः, परितः परमाण्वन्तरावष्टब्धपरमाण्वारब्धद्व्यणु-
कादिस्थले कार्यद्रव्यविनाशस्याऽवश्यमभ्युपगन्तव्यतया तद्विरोधापत्तेः, निरुक्तरीत्याऽवयविमात्र एव
सच्छिद्रत्वमुपगम्य पाकोपपादने क्वचित् कार्यद्रव्यस्याऽच्छिद्रावयवस्य विनाशमन्तरेण पाकानुपपत्तिप्रद-
र्शनेदम्पर्येण संलापनीयेन **'यत्र तु न प्रत्यभिज्ञा तत्राऽवयविनाशोऽपि स्वीक्रियते—'** इत्याद्यभि
मग्रन्थेन विरोधापत्तेश्चेति ध्येयम्। यद्यपि परितः परमाण्वन्तरावष्टब्धपरमाण्वारब्धघटादिस्थले प्राग्यु-
क्तदिशाऽवयविनाशावश्यकतया तत्र श्यामनाशस्य पाकजन्यत्वाङ्गीकारे पुनरारम्भकान्तरावयवरूपबलात्पू-
र्वरूपसजातीयरूपान्तरकल्पनमनुचितमिति परमाण्वग्निसंयोगस्यैव श्यामनाशकत्वाङ्गीकारे पिठरपाको न

रामरुद्री ।

सम्भवति, तथाऽपि गौरवात् श्यामादिनाशकतावच्छेदककुक्षौ परमाणुसमवेतत्वोपादानमनुचितम्, अग्निसयोगादवयविश्यामादिनाशस्थलेऽग्निसंयोगरहिताभ्यन्तरावयवरूपवशादवयविनि रूपान्तरोत्पत्ति-स्वीकारेऽनेकरूपकल्पनागौरवस्य फलमुखत्वेनाऽदोषत्वादिति पिठरपाक: सम्भवत्येवेति ग्रन्थकृतो निगर्व: ।

ननु पीलुकवादिभिर्यथा पीलव एव पच्यन्त इत्यङ्गीकृतम्, तथा पिठरपाकवादिभिरवयविन एव पच्यन्त इति स्वीकर्तव्यम्, तच्च परमाणुषु पाकविरोधिनो दुरुपपादतयाऽयुक्तम्, परमाणूनामपाके तद्गतपूर्वरूपवशात्तत्सजातीयरूपोत्पादस्याऽवयविन्यपरिहरणीयतया स्वव्याघातावहं चेति भ्रमं निरसितुमाह टीकायाम्-'अवयविन्यपीत्यपिनेत्यादि । तथा च पिठरपाकवादिनां मते पाकस्य परमाणुनिष्ठ-तरवृत्तित्वमिष्टमिति न दोष इति भाव: । अन्यत्सर्वं सुगमम् ।

वैशेषिकसिद्धान्तरहस्यवेदिनस्तु द्रव्यारम्भकसंयोगस्तावत् कीदृश: ? मध्ये सान्तराल:, उत निरन्तराल इति, यदि निरन्तराल:, तर्हि मृद्घटादौ जलादिपूरणे बहि: शैत्यानुपलब्धिप्रसङ्ग:, अत: प्रथमपक्ष एव स्वीकर्तव्य:, सान्तरालत्वे तु तन्मार्गेण जलीयसूक्ष्मावयवानां बहिर्निःसरणसम्भवात् तेनेन्द्रियसंनिकर्षसम्भवे तदीयशैत्योपलब्धिरुपपद्यते । अत एव मार्तिकघटादौ पूरितस्य सलिलस्य पात्रान्तरे निःसारणे न्यूनीभाव: प्रत्यक्षमुपलभ्यते, भूयसामेव तदीयसूक्ष्मावयवानां घटमध्यरन्ध्रप्रवेशात् । न च द्वयोरवयवयो: सान्तरालत्वे तयो: संयोग एव कथं सम्भवतीति वाच्यम् । सान्तरालयोरपि पदार्थयोर्द्वित्वादेरिव संयोगस्याऽपि स्वीकर्तुं शक्यत्वात् । तादृशस्थले द्रव्योत्पत्त्या च तदनुमानात्, एकदेशाकर्षणे सकलस्यैवाऽवयवसमूहस्याऽऽकर्षणनिर्वाहाय एकदेशोत्क्षेपणे सकलतदवयवसमूहोत्क्षेपणादिनिर्वाहाय च सावकाशतया स्थितेष्वपि तेषु संयोगस्याऽवश्यस्वीकर्तव्यत्वात् । अत एव जलस्य द्रवावस्थायां तदवयवानां सावकाशावस्थितानां तेजोऽपकर्षणेऽन्तरालतस्तेजस्यपसृते निबिडसंयोगोत्पत्तिदशायां जलस्य घनीभावापत्तौ हिमकरकादिरुत्पद्यते । यथा यथा च तेजसो मध्ये प्रवेशस्तथा तथा तरलीभावे समुत्पन्नेक्रमेण सलिलबाष्पावस्थापन्नानि द्रव्याण्युत्पद्यन्ते । न चैवं 'दिव्येन तेजसा सयुक्तानामाप्यानां परमाणूनां परस्परं सयोगो द्रव्यारम्भक: सङ्घाताख्य:, तेन परमाणुद्रवत्वप्रतिबन्धात् कार्ये हिमकरकादौ द्रवत्वानुत्पत्ति:-'इति भाष्यं 'अपां सङ्घातो विलयन च तेज:संयोगात्(१)-' इति सूत्रं च विरुध्यते, तत्र सङ्घाताख्यस्य संयोगस्य तेज:सयोगजन्यत्वोक्तेरिति वाच्यम् । भाष्ये 'तेजसाऽसंयुक्तानाम्-' इति रीत्याऽकारप्रश्लेषस्य स्वीकर्तव्यतया सूत्रे च विलयनहेतोरेव तेज:संयोगस्य कथनस्वीकारेणाऽविरोधात् । अन्यथा तादृशदिव्यतेज:संयोगस्यैव द्रवत्वप्रतिरोधकत्वे सम्भवति सङ्घाताख्यसंयोगविशेषस्य तत्प्रतिरोधकत्वकथनस्याऽसाङ्गत्यापत्ते: । विवेचनीयं चैतदग्रे । तथा च अशतोऽपि तेज:संयोगस्थले परस्परसंयुक्तानां परमाणूनां पूर्वापेक्षया विप्रकृष्टतरान्तरालत्वमापद्यते सर्वत्रैव अत एव घनीभावदशायां न्यूनपरिमाणस्याऽपि जलादेर्द्रवीभावदशायामधिकपरिमाणताऽऽपद्यत इति युज्यते । तथा च प्रकृतेऽपि क्वचिदप्यन्तरालेन प्रविशति तेजसि पूर्वसंयोगनिवृत्तिरावश्यकीवेति क्व पिठरपाकसम्भावना ? अत एव भाष्ये 'न तु कार्यद्रव्य एव रूपाद्युत्पत्तिर्विनाशो वा सम्भवति, सर्वावयवेष्वन्तर्बहिश्च वर्तमानस्याऽग्निना व्याप्त्यभावात्, अणुप्रवेशादपि च व्याप्तिर्न सम्भवति, कार्यद्रव्यविनाशात्-' इत्युक्तम् । किं च केवलमग्निसंयोगादेव श्यामनाशो रक्तोत्पत्तिर्वा न सम्भवति, विगतद्रव्यान्तरसंपर्के निर्वाते काचभाण्डादावस्थापिताया मृदो यावज्जीवमग्निसंयोजनेऽपि पूर्वरूपविनाशरूपान्तरोत्पादयोरनुपलब्धे: । अत: श्यामनाशाय मृद्गतस्य द्रव्यविशेषस्याऽपसरणं रक्तोत्पादाय च द्रव्यान्तरसम्मिश्रणं च हेतुरिति वैज्ञानिकदर्शनसिद्धमङ्गीकरणीयमेव । इत्थं च न क्वचिदपि द्रव्यविनाशं विना पाक इति सिद्धमिति प्राहु: ।

इति विमतमनल्पं सम्यगालोच्य यत्नाद्यथरचि रुचिरमूर्ति: प्रक्रिया पाकजानाम् ।
तदिह निहितचित्ता: सन्मतद्वेषशून्या वितथमथितथं वा पण्डिताश्चिन्तयन्तु ॥ १ ॥

॥ इति पिठरपाकवादनिरूपणम् ॥

---

(१) वैशेषिकसूत्रम् । अ० ५ आ० २ सू० ८

गणनाव्यवहारे तु हेतुः सङ्ख्याऽभिधीयते ॥ १०६ ॥

सङ्ख्यां निरूपयितुमाह । गणनेति । **गणनाव्यवहारासाधारणं कारणं सङ्ख्येत्यर्थः ॥ १०६ ॥**

नित्येषु नित्यमेकत्वमनित्येऽनित्यमिष्यते ।

नित्येष्विति । **नित्येषु-परमाण्वादिषु एकत्वं नित्यम्। अनित्ये-घटादावेकत्वमनित्यमित्यर्थः ।**

दिनकरी ।

कालादावतिव्याप्तिमाशङ्क्याऽऽह । **असाधारणमिति ।** वस्तुतो गणनं सङ्ख्यात्वम्, तत्प्रकारको व्यवहारः—तत्प्रकारकं प्रमात्मकं ज्ञानम्, तद्धेतुः—तद्विषय इत्यर्थान्न कालादावतिव्याप्तिः । तत्रापि सङ्ख्यात्वजातिरेव लक्षणम्, इतरत्तु सङ्ख्यात्वजातौ प्रमाणतयोक्तम्। एवमग्रेऽपीति ध्येयम् ॥ १०६ ॥

रामरुद्री ।

तत्प्रकारकं प्रमात्मकं ज्ञानमिति । व्यवह्रियते—ज्ञानोपादानादि क्रियतेऽनेनेति व्युत्पत्त्या व्यवहारपदस्य प्रवृत्तिजननसमर्थज्ञानवचनत्वादिति भावः । **तद्धेतुः—तद्विषय इति ।** कालादावतिव्याप्तिवारणाय विषयविधया तद्धेतुत्वविवक्षणस्याऽवश्यापेक्षितत्वे वरं तदपेक्षया लघुभूतस्य विषयत्वस्यैव विवक्षणमिति भावः । **प्रमाणतयेति ।** कति भवतः पुत्रा इत्यादि प्रश्ने एको द्वौ त्रयो वेत्याद्युत्तरादपि सङ्ख्यात्वसिद्धिः, सामान्यरूपं विना प्रश्नोत्तरयोरयोगादित्यपि मन्तव्यम् ॥ १०६ ॥

मूले—एकत्वमनित्यमित्यर्थं इति । नन्वेकत्वं सत्तावज्जातिरेवाऽस्तु, एकमेकमित्यनुगतमतेर्जातिविषयकत्वात्, गुणविषयकत्वे तु परम्परासम्बद्धैकत्ववृत्तिजातिस्तन्निमित्तं वाच्यम्, तदरं जातिविषयैव सा भवतु। न च सत्तया सहाऽन्यूनानतिरिक्तविषयकत्वं तत्र बाधकम्, एकत्वमेव जातिः, सत्ता गुण इति वैपरीत्यस्याऽपि सम्भवात्। न च, द्वित्वाद्यसमवायिकारणत्वेनैकत्वगुणसिद्धिः, एकपृथक्त्वेनाऽन्यथासिद्धेः। न चैवं द्वित्वद्विपृथक्त्वयोः सामग्र्यभेदाद्विशेषापत्तिरिति वाच्यम्। अवच्छिन्नस्याऽधिकस्य द्विपृथक्त्वकारणत्वादिति चेत्, अत्र प्रकाशानुयायिनः, एकत्वान्यगुणाविषयः शाब्द एकप्रत्ययो गुणविषयकः, एकप्रत्ययत्वात्, चाक्षुषैकप्रत्ययवत्, तस्य रूपादिगुणविषयकत्वात्, शाब्दस्य च तस्य तद्विषयकत्वात्। यद्वा द्वित्वमेकवृत्तिवृत्तिगुणत्वव्याप्यजातिमत्, अपेक्षाबुद्धिजत्वात्, द्विपृथक्त्ववत्। न चाऽप्रयोजकत्वम्, एकत्वस्य जातित्वे द्वयमेतत् सदितिवत् द्वयमेतदेकमिति प्रत्ययापत्तेरित्याहुः, तन्न, एकत्वस्य गुणत्वेऽपि द्वयमिदं नीलमित्यादिवत् तथा प्रतीतेर्दुर्वारत्वात्, एकशब्दस्याऽभिन्नार्थकत्वाभिप्रायोपगमेनैव तस्य वारणीयत्वात्।

वस्तुतस्तु द्वित्वासमवायिवारणतयैवैकत्वगुणसिद्धिः, एकपृथक्त्वमादायाऽन्यथासिद्धिस्तु न सम्भवति, तथा सति द्विपृथक्त्वयोः सामग्र्यविशेषेणाऽविशेषापत्तेः। न चाऽवच्छिन्नस्याऽधिकस्य द्विपृथक्त्वे हेतुत्वान्नोक्तापत्तिरिति वाच्यम्। अधिकापेक्षित्वेन द्वित्वसामग्रीजन्यत्वेन च द्विपृथक्त्वस्य द्वित्वविशेषतापत्तेः, ज्ञानत्वावच्छिन्नसामग्रीजन्यस्य परामर्शाधिकापेक्षस्याऽनुमित्यादेर्ज्ञानविशेषरूपतायादृष्टत्वात्, तत्तद्धर्मस्य तत्तद्धर्मावच्छिन्नसामग्रीप्रयोज्यतावच्छेदकतया तादृशद्वित्वद्विपृथक्त्वत्वावच्छिन्नसामग्र्या द्वयोरपि धर्मयोः प्रयोज्यतावच्छेदकत्वावश्यकत्वे द्विपृथक्त्वत्वस्य द्वित्वत्वाव्याप्यकतया विशेषधर्मत्वाङ्गीकारावश्यकत्वात्। द्वित्वत्वावच्छिन्नजनकसामग्रीकुक्षौ अवधिज्ञानाभावस्य निवेशे तु सत्यवधिज्ञानेद्वित्वप्रत्ययानुपपत्तिरीश्वरापेक्षाबुद्धितो द्वित्वानुत्पत्तिप्रसङ्गश्चेति दूषणं द्रष्टव्यमिति दीधितिकृत्प्रभृतयः।

नव्यास्तु समवाय—स्वसमवायिसमवेतत्वान्यतरसम्बन्धेनाऽऽत्मविशेषगुणाद्यन्यत् किंचित् कार्यमात्रं प्रति कारणमित्येतादृशकार्यकारणभावे मानाभावान्नैकत्वस्य द्वित्वासमवायिकारणत्वसम्भवः,

रामरुद्री।

यद्धर्मवन्तमन्तरेण यद्धर्मवतो नोत्पत्तिस्तद्धर्मवानेव हि तद्धर्मवतः कारणं कल्प्यते, न च सत्यामपेक्षाबुद्धौ स्वाश्रयेषु द्वित्वादीनामेकत्वमन्तरेणाऽनुत्पत्तौ किञ्चित्प्रमाणमस्ति, अतो नैकत्वगुणसिद्धिसम्भव इत्याहुः।

तन्न, एकत्वस्य जातिरूपत्वे एकत्वद्वयावगाहिज्ञानत्वादिनाऽपेक्षाबुद्धेर्द्वित्वहेतुत्वानुपपत्त्यैवैकत्वरूपगुणसिद्धेः। एकत्वावगाहिज्ञानत्वेन तस्या हेतुत्वाभ्युपगमे च द्वित्वादीनामविशेषापत्तेः, एकमात्रे तज्ज्ञानाद् द्वित्वाद्युत्पादापत्तेश्च, तद्व्यक्तिसमवेतानेकसङ्ख्यासामान्यं प्रति एकत्वप्रकारकतत्तद्व्यक्तिविशेष्यकज्ञानत्वादिना हेतुत्वमभ्युपगम्य निरुक्तदोषवारणसम्भवेऽपि घटो घटवृत्त्येकत्ववान् पटो घटवृत्त्येकत्ववानिति ज्ञानादपि घटपटयोर्द्वित्वोत्पादापत्तुर्दुर्वारित्वेकत्वस्य गुणत्वस्वीकार आवश्यकः।

एकत्वस्य गुणत्वपक्षे द्वित्वासमवायिकारणत्वमपि तस्याऽऽवश्यकम्, तन्मते अपेक्षाबुद्धेर्हि द्वित्वहेतुत्वं केन रूपेण? न तावदेकत्वद्वयावगाहिज्ञानत्वेन द्वित्वत्वावच्छिन्नं प्रति जनकत्वम्, तथा सति द्वित्वाधिकरणे घटादावपेक्षाबुद्धिविरहेण व्यभिचारप्रसङ्गात्, किन्तु स्वविषयैकत्ववत्त्वसम्बन्धेनैकत्वद्वयावगाहिज्ञान समवायेन द्वित्वं प्रति हेतुरिति वक्तव्यम्, इत्थञ्च विनिगमनाविरहेण एकैकत्वावगाहिनो ज्ञानात्पागुक्तरीत्यैकत्वोत्पादवारणाय च ज्ञानविषयंभूतैकत्वद्वयस्याऽपि समवायसम्बन्धेन हेतुत्वस्याऽऽवश्यकत्वात्। अत्र चैकत्वांशे ज्ञायमानत्वविशेषणमपि सङ्गच्छते। न च विशेष्यतासम्बन्धेनैकत्वद्वयावगाहिज्ञानात्मकापेक्षाबुद्धेर्हेतुत्वमस्त्विति वाच्यम्। तथा सत्येकत्रैकत्वद्वयावगाहिभ्रमादप्येकमात्रवृत्तिद्वित्वोत्पादापत्तेः, तादृशप्रमात्वेन द्वित्वादिजनकत्वाभ्युपगमे च महागौरवप्रसङ्गात्, एकत्र द्वयमिति रीत्या अयमेकत्वावगाहिज्ञानवानित्येकैकत्वावगाहिनो द्वयोरेकमिति रीत्या च घटपटयोरेकत्वमित्येकत्वान्तरावगाहिनो ज्ञानस्य घटेतरपदार्थयोर्द्वित्वानुत्पादकत्वप्रसङ्गेन व्यभिचारभयेन च भ्रमत्वानिरूपकविशेष्यतासम्बन्धेन तदनिरूपकप्रकारतानिरूपितविशेष्यतासम्बन्धेन च हेतुत्वकल्पनस्याऽप्यसम्भवात्, गौरवाच्च। ज्ञानस्यैकत्वद्वयानवगाहित्वे द्वित्वोत्पादवत् एकत्वद्वयाभावेऽपि तदुत्पादस्याऽनिष्टत्वात्। अन्यथा एकमात्रवृत्तेरपि द्वित्वादेरभ्युपगमे आकाशादिति वाक्यस्य प्रमाणत्वापत्त्या सुबादीनामुद्देश्यतावच्छेदकव्याप्यपर्याप्तसम्बन्धेन सङ्ख्याबोधकत्वव्युत्पत्तिस्वीकारविरोधप्रसङ्गात्। अथ तादृशस्थले एकमात्रवृत्तिद्वित्वादेः पर्याप्त्यभ्युपगम एव मानाभावः, तथा च तादृशपर्याप्तिसम्बन्धेन तादृशद्वित्वादेराकाशत्वावच्छिन्नैऽन्वयासम्भवादेव नोक्तवाक्यप्रामाण्यापत्तिः। न च सङ्ख्यामात्रस्यैव पर्याप्तिसम्बन्धः स्वीक्रियत इति वाच्यम्। मानाभावात्, प्रत्येक द्वित्वादिप्रतीतिवारणायैव पर्याप्तेः सिद्धान्ते स्वीकारणीयत्वात्, प्रकृते चैकमात्रवृत्तिद्वित्वावगाहितादृशप्रत्ययाभावेन तथा स्वीकारे मानाभावात्। अत एव 'धूमस्यैकस्मिन्नेव धूमे पर्याप्तमित्यादिप्रतीतेः प्रत्येकवृत्तिधर्मावच्छिन्नाधिकरणत्वावगाहितयैवोपपत्तौ धूमत्वादेः पर्याप्तिसम्बन्धत्वे मानाभावः*—' इति जगदीशभट्टाचार्यैरभ्युक्तमिति चेन्न। यादृशस्थलविशेषे प्रथममेकत्वद्वयावगाही एकमात्रविशेष्यकोऽपेक्षाभ्रमः, द्वितीयक्षणे तृतीयक्षणे वा पूर्वज्ञानधर्मिकमप्रमाण्यज्ञानम्, तादृशस्थलविशेषे द्वित्वोत्पादाभ्युपगमे चतुर्थक्षणे द्वित्वप्रत्यक्षापत्तेरेव दोषत्वात्। तत्स्थले द्वित्वेन्द्रियसन्निकर्षादीनां तत्र सत्त्वेन तत्प्रत्यक्षानुत्पादकारणस्य वक्तुमशक्यत्वात्। तादृशाप्रामाण्यज्ञानानास्कन्दितैकत्वभ्रमवतश्च द्वित्वप्रत्यक्षं दोषबाज्जायमानं भ्रमात्मकमेवाऽभ्युपेयत इति न क्षतिः। अत एव तादृशस्थले पुरुषस्य भ्रान्तत्वव्यवहारोऽपि सङ्गच्छते, अन्यथा तत्प्रत्यक्षस्य वास्तविकद्वित्वावगाहित्वेन भ्रमत्वानुपपत्तेरिति। एतेनाऽप्रामाण्यज्ञानाभावविशिष्टाया एवाऽपेक्षाबुद्धेर्द्वित्वादिहेतुत्वाभ्युपगमेनैवोक्तदोषवारणसम्भव इत्यपास्तम्। अथ कीदृशद्वित्वव्यक्तिस्तत्राऽऽपाद्यते? न तावत् प्रसिद्धद्वित्वव्यक्तिः, तासामेकत्रैकत्वद्वयावगाहिज्ञानजन्यत्वस्य त्वया मया चाऽनभ्युपगमेन तादृशज्ञानकाले आपादनासम्भवात्, तत्तद्द्वित्वव्यक्तिं प्रति विशिष्य तत्तज्ज्ञानव्यक्तीनां कारणत्वात्, प्राक्तनापेक्षाबुद्धिनाशादिनोत्तनद्वित्वनाशवारणाय विशेषतस्तत्तदपेक्षाबुद्धिजन्यद्वित्वनाशं प्रति तत्तदपेक्षाबुद्धिनाशस्य हेतुतायां वक्त-

---

* अवच्छेदकत्वनिरुक्तिजागदीशी।

रामरुद्री।

व्यतया तस्या एतादृशविशेषकार्यकारणभावं विना वक्तुमशक्यत्वात्, नाप्यतावच्छेदककोटौ तत्तद्व्यक्तिस्वावच्छिन्नजन्यतया एव प्रवेशनीयत्वात्, काला-तरीणापेक्षाबुद्धेरपि अनेकैकत्वावगाहिज्ञानत्वेन स्वरूपयोग्यतया तज्जन्यताया वर्तमानद्वित्वेऽपि सत्त्वेन तन्नाशाधीनप्रकृतद्वित्वनाशापत्तेरपरिहरणीयत्वात्, यत्र तद्व्यक्तिद्वये पूर्वमेकस्या अपेक्षबुद्धेरेकं द्वित्वमुत्पन्नं, परस्ताच्चाऽपेक्षबुद्धेर्द्वित्वान्तरमपि, तादृशस्थलविशेषे भावितद्व्यक्तेः प्रथमद्वित्वोत्पादकाले उत्पत्तिवारणायाऽपि निरुक्तरीत्या विशिष्य कार्यकारणभावस्वीकारावश्यकत्वाच्च। तथा च विशेषकारणविरहादेव भ्रमात्मकापेक्षबुद्धिस्थले न द्वित्वोत्पादसम्भव इत्येकत्वद्वयादेर्द्वित्वादिहेतुत्वे मानाभावः। न च यत्र प्रथमं भाविज्ञानधर्मिकमिदं ज्ञानं एकत्वशून्ये घट एकत्वावगाहीत्याकारकमप्रामाण्यज्ञानम्, ततो घट एकत्ववान्, पट एकत्ववान्, पटश्चैकत्ववद्व्यवानिति समूहालम्बनात्मिकाऽपेक्षाबुद्धिः, तदुत्तरक्षणे च तदप्रामाण्यज्ञानविनाशः, ततो घटपटयोर्द्वित्वोत्पत्तिः, तत्र तादृशद्वित्वव्यक्तेस्तद्व्यवहितपूर्वक्षणे पटे आपत्तिर्दुर्वारा, हेतुभूतज्ञानव्यक्तेः पूर्वं सत्त्वात्। तद्व्यक्तेः पूर्वक्षण एवोत्पत्तावितिापत्तिस्तु न सम्भवति यदेकत्वांशे अप्रामाण्यज्ञानात्स्कन्दितमपेक्षाज्ञानम्, तदन्यैकत्वज्ञानस्यैव हेतुत्वस्य अप्रामाण्यज्ञानात्स्कन्दितैकत्वद्वयावगाहिज्ञानस्थले 'द्वित्वोत्पादापत्तिवारणाय घटपटैकत्वांशे अप्रामाण्यज्ञानात्स्कन्दितायां गवाश्वयोश्चैकत्वावगाहिन्या अपेक्षाबुद्धेर्गवाश्वद्वित्वोत्पत्त्युपपादनाय च स्वीकारावश्यकत्वात्, प्रकृते तादृशपटांशे भासमानैकत्वद्वयावगाहितामादायैव तस्यापपादनीयत्वेनैकमात्रवृत्तिद्वित्वोत्पादप्रसङ्गात्। अप्रामाण्यज्ञानाभाव विशिष्टतद्व्यक्तेरेव तद्व्यक्ति प्रति हेतुत्वमभ्युपगम्योक्तस्थले प्रथमक्षणे तादृशद्वित्वोत्पादवारणसम्भवेऽपि यादृशस्थलविशेषे घटैकत्वांशेऽप्रामाण्यज्ञानाभिमकैव पूर्वोक्तरीत्याऽपेक्षा धीः, ततस्तद्द्वितीयक्षणेऽप्रामाण्यज्ञानधर्मिकमप्रामाण्यज्ञानं, तत्र द्वित्वोत्पादापत्तिरुपपद्यत एव, अप्रामाण्यज्ञानाभावविशिष्टतद्व्यक्तेस्तद्व्यक्तौ हेतुत्वस्य प्रकृतस्थले वक्तुमशक्यत्वात्, अप्रामाण्यज्ञानाभावविशिष्टाप्रामाण्यज्ञानाभावविशिष्टतद्व्यक्तेस्तत्र विशिष्य हेतुत्वाभ्युपगमे चोक्तरीत्या अप्रामाण्यज्ञान, तद्धर्मिकमप्रामाण्यज्ञानं तद्धर्मिकाप्रामाण्यज्ञानात्मक प्राथमिकमपेक्षाज्ञानं, तदुत्तरं च तद्धर्मिकमप्रामाण्यज्ञानं यत्र समवहितं तत्र तादृशाप्रामाण्यज्ञानचतुष्टयाभावघटनया तद्व्यक्तेः कारणत्वकल्पने गौरवादेकत्वस्यैव द्वित्वहेतुत्वकल्पनं युक्तम्। अप्रामाण्यज्ञानात्स्कन्दिताया अपि तद्व्यक्तेः यज्ज्ञानव्यक्तिसमवधानकाल एव द्वित्वहेतुत्वमुपपन्नं भवति, तद्व्यक्तस्यभावविशिष्टाप्रामाण्यज्ञानाभावविशिष्ट तद्व्यक्तित्वेन तद्द्वित्वव्यक्तिं प्रति हेतुत्वाभ्युपगमेऽभावचतुष्टयाघटितकार्यकारणभावसम्भवेऽपि गौरवस्य दुरुद्धरत्वात्। विनश्यदवस्थज्ञानाद्द्वित्वाद्युत्पत्तिरेव न सम्भवति, तथा सति द्वित्वस्य क्षणिकत्वप्रसङ्गेन प्रत्यक्षाविषयत्वापत्तेरिति तु नाऽऽशङ्कनीयम्, स्वरूपयोग्यकारणसत्त्वेन तादृशस्थले द्वित्वोत्पादस्यावर्जितया प्रत्यक्षासम्भवेऽपि क्षत्यभावात्, तज्ज्ञानव्यक्तेर्विशिष्य कारणत्वमेव न कल्प्यत इति शेषकारणाभावकूट एव तत्र द्वित्वत्वावच्छिन्नानुत्पत्तिप्रयोजकोऽस्त्वेव यपि न साम्प्रतम्, कूटस्य तत्र प्रयोजकत्वकल्पने बलवत्तरप्रमाणाभावेन तत्कल्पनाया अन्याय्यत्वादिति वाच्यम्। तादृशद्वित्वक्षणिकत्वस्य स्वयैवोक्तत्वेन तदुत्पत्तिस्वीकारेऽपि क्षत्यभावात्, तादृशस्थले तस्य प्रथमक्षण उत्पत्त्यङ्गीकारेऽपि तस्य द्वितीयक्षणावस्थायितया तृतीयक्षणे सविकल्पकप्रत्यक्षविषयत्वापादनासम्भवात्, सविकल्पकविषयत्वस्यैवाऽभावे तदधीनसिद्धिकस्य निर्विकल्पकविषयत्वस्याऽप्यापादनायोगाच्च। मैवम्। द्वित्वत्वस्मरणसत्त्वे तत्र द्वित्वद्वितीयक्षण एव तत्प्रत्यक्षापत्तेरापादयितुं शक्यत्वात्। न च स्वन्मतेऽपि एकत्वद्वयस्य कारणत्वं न सम्भवति, तस्यैकत्वद्वयत्वेन कार्योत्पत्तिप्रयोजकतायां एकत्वासत्त्वेन कल्पनायोगादिति वाच्यम्। कालनिष्ठप्रत्यासत्त्यैकत्वद्वयस्य प्रयोजकतया समवायेन तस्य हेतुत्वस्वीकारेऽविरोधादिति ध्येयम्*।

---

* अयं भावः। एकत्वद्वयस्य प्रत्येकं समवायेनैव हेतुत्वम्, सामग्र्याः कार्योत्पत्तिव्याप्यत्वं तु कालनिष्ठप्रत्यासत्त्या कल्प्यत इति।

द्वित्वादयः परार्धान्ता अपेक्षाबुद्धिजा मता ॥ १०७ ॥

द्वित्वादय इति । द्वित्वादयो व्यासज्यवृत्तिसङ्ख्या अपेक्षाबुद्धिजन्याः ॥१०७

दिनकरी ।

द्वित्वादय इति । एकत्वान्यसङ्ख्यामात्रमपेक्षाबुद्धिरूपनिमित्तकारणजन्यमित्यर्थः ।

रामरुद्री ।

मूले—**द्वित्वादय इति ।** नन्वादिशब्दस्तावत् प्राथम्यवाची । तच्च प्रकृते 'विषयो द्व्यणुकादिश्च-' इत्यादिस्थल इव नोत्पत्तिनिरूप्यम्, त्रित्वाद्यपेक्षया द्वित्वस्य प्राथमिकोत्पत्तिमत्त्वस्य क्वचित्संभवेऽपि विनिगमनाविरहेण त्रित्वादेरपि द्वित्वाद्यपेक्षया क्वाचित्कं प्राथम्यमादाय त्रित्वादीति प्रयोगे द्वित्वादेरपि संग्रहप्रसङ्गात् । न च तत्तदपेक्षाबुद्धिजन्यसङ्ख्यावान्नरापेक्षयैव प्राथम्यमुक्तादिपदेन बोध्यते, इत्थञ्च त्रित्वादिसमकालमेव द्वित्वाद्युत्पत्तेरभ्युपगमात् न त्रित्वादेर्द्वित्वप्राथम्यप्रसङ्ग इति वाच्यम् । तथा सति द्वित्वस्याऽपि त्रित्वप्राथम्याभावेन 'द्वित्वादि'इत्युक्तेरप्यसङ्गतत्वापातात् । न चाऽऽदिपदाभिलप्यं प्राथम्यमिह 'बुद्ध्यादिषट्कं-'इत्यादिवत् पाठनिरूप्यमेवाऽस्त्विति वाच्यम् । बुद्ध्यादीनां पाठक्रमनिरूपितस्य पौर्वापर्यस्य सम्भवेऽपि प्रकृते द्वित्वत्रित्वादेः क्रमशः पठनस्याऽभावेन तन्निरूपितपौर्वापर्यस्य विवक्षितुमशक्यत्वात् । एकं द्वे इत्यादिलौकिकपाठमादाय तन्निरूप्यप्राथम्यस्य विवक्षणे च द्वे एकं चत्वारि त्रीणि पञ्चेत्यादि वाक्यमादाय तदीयपाठक्रमस्याऽपि ग्रहीतुं शक्यतया त्रित्वादय इत्यपि प्रयोगापत्तिस्तदवस्थैव स्यादित्यतो 'द्वित्वादयः—' इत्यस्य समुदितमर्थमाह टीकायाम्— **एकत्वान्यसङ्ख्यामात्रमिति । 'आदि'** शब्दस्य प्राथम्यवाचित्ववत् प्रकारवाचित्वस्याऽपि स्वीकृततया **'द्वित्वादयः'** इत्यनेनाऽनेकसङ्ख्यात्वप्रकारेण द्वित्वतदितरसङ्ख्यासामान्यबोधनान्न दोषः । आदिशब्दस्य प्रकारवाचित्वं च 'भूवादयो धातवः-'इत्यादिपाणिनीयसूत्रे स्पष्टम् । तत्र हि भूश्च वाश्च भूवौ, आदिश्चाऽऽदिश्चाऽऽदी, भूवौ आदी येषां ते भूवादय इति व्युत्पत्तिमाश्रित्य क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युरिति सूत्रार्थो वैयाकरणैर्वर्ण्यते, स चाऽऽदिशब्दस्य प्रकारवाचित्वं विनाऽनुपपन्नः' तत्र भूशब्दसङ्गतेनाऽऽदिपदेन प्राथम्यस्यैव वासङ्गतेन तेन क्रियावाचित्वबोधनस्य तैरङ्गीकारादिति ध्येयम् । यद्यप्येवं सति आदिपदादेवाऽनेकसङ्ख्यात्वावच्छिन्नबोधनसम्भवात् तदुपसंहितस्य द्वित्वपदस्य वैयर्थ्यम्, तथाऽपि टावदिमानयेत्यादावादिशब्दस्य द्रव्यत्वादिप्रकारवचनताया अपि स्वीकर्तव्यतया प्रकृतेऽनेकसङ्ख्यास्वरूपप्रकारे तात्पर्यग्रहायैव द्वित्वपदोपसन्दानमित्यवधेयम् । अनयैव च रीत्या कारिकायामपि **द्वित्वादयः** इति शब्दार्थो व्याख्येयः । **'परार्धान्ताः-'** इत्यत्र परार्धस्याऽन्तत्वं तु स्वविजातीयसङ्ख्याव्याप्यत्वाभाव इति बोध्यम् । सम्प्रदायविदस्तु **'आदि'**शब्दोऽत्र प्राथम्यवाची, प्राथम्यं च स्वव्याप्यानेकवृत्तिसङ्ख्यासामान्यव्याप्यत्वम् । स्वसमानाधिकरणेत्युक्ते घटपटद्वित्वस्य तादृशपटमठद्वित्वाव्याप्यत्वादसंग्रहः स्यादतः स्वव्याप्येत्युक्तम् । सामान्यपदानुक्तौ त्रित्वादेरपि स्वव्याप्यत्वात्मकसङ्ख्याव्याप्यत्वादादिशब्दाभिलप्यप्राथम्यवत्त्वापत्तिरित्यतस्तदुपात्तम् । सामान्यपदमनुक्त्वा स्वभिन्नत्व-व्याप्यत्वोभयसम्बन्धेन स्वव्याप्यसङ्ख्याविशिष्टत्वस्य तथात्वविवक्षणेऽपि नैतद्दोषोद्धारः सम्भवति, घटपटमठत्रित्वस्य तादृशस्वव्याप्यत्रित्वान्तरव्याप्यत्वादित्यतस्तदुपेक्ष्य सामान्यपदमेवोपात्तम् । स्वव्याप्यसङ्ख्यासामान्यव्याप्यत्वस्थाने तत्सामानाधिकरण्यमात्रोपादाने त्रित्वादेः संग्रहो दुर्वारः, तस्यापि स्वव्याप्यावयवसङ्ख्यासमानाधिकरणत्वादित्यतो व्याप्यत्वपर्यन्तमनुसृतम् । तथा च त्रित्वादेः स्वव्याप्यद्वित्वादिव्याप्यत्वाभावान्न प्राथम्यम् । परार्द्धस्याऽन्तत्वमपि स्वव्यापकयावत्सङ्ख्याव्यापकत्वम् । तथाऽपि स्वसमानाधिकरणेत्युक्तौ प्रतिक्षणं किञ्चिद्द्रव्यस्य विनाशात् तत्क्षणवृत्तियावद्द्रव्यगतस्य परार्धत्वस्य तत्पूर्वक्षणवृत्तियावद्द्रव्यवृत्तिपरार्धत्वस्य च परस्परभावसमानाधिकरणत्वेऽपि नित्यगगनाद्यन्तर्भावेन सामानाधिकरण्यात्तदादाय परस्परव्यापकत्वादसंग्रहवारणाय स्वव्यापकेत्युक्तम् । स्वव्यापकत्वस्थाने स्वाधिकरणक्षणवृत्तीत्युक्तावपि न निस्तारः, तत्क्षणाव्यवहितप्राक्क्षणगतयावद्द्रव्यसमवेतपरार्धत्वस्य तदुत्तरक्षण एव तत्क्षणोत्पन्नतदव्यवहितप्राक्क्षणीयस्किञ्चिद्द्रव्यनाशाधीनत्वात्

दामञ्जरी ।

प्रतियोगित्वेन सङ्ख्यघटितस्वसमानाधिकरण्यस्याऽवाप्ततया पुनस्तद्घोषतात्पर्यस्थात् । स्वोत्पत्तिस्वयोत्पत्तिक्षणेष्वेव च न किञ्चिल्लाघवमवशिष्यते । प्रतिक्षणं किञ्चिद्द्रव्यं विनश्यतीत्यनभ्युपगमेऽपि न क्षतिः, यत्र क्षणद्वये परम्परावृत्तिद्रव्याश्रयत्वं प्रसिद्धम्, तत्रैव तत्तत्क्षणोत्पन्नयावद्द्रव्यगतपरार्धत्वासंग्रहभियैव स्वव्यापकत्वस्य निवेशनीयत्वात् । स्वसमानकालीनयावत्सङ्ख्यासामानाधिकरण्यस्याऽपि च न तथात्वसम्भवः, द्रव्यनाशाधीनसङ्ख्यानाशस्थले एव द्रव्यनाशकालोत्पन्नपरार्धत्वे तादृशयावत्सङ्ख्यासामानाधिकरण्यस्य समवायघटितस्याऽसम्भवात्, कालिकघटितसामानाधिकरण्यविवक्षणे तु एकत्वद्वित्वादेरपि अन्तत्वप्रसङ्गो दुर्वार इति । यावत्पदानुक्तौ स्वव्यापकीभूतस्वात्मकसङ्ख्याव्यापकत्वमादायैकत्वादावतिप्रसङ्गः प्रसज्यत इत्यतस्तथाऽनुक्तिः । स्वभिन्नत्व—स्वव्यापकत्वोभयसम्बन्धेन तादृशसङ्ख्यावैशिष्ट्योक्तावपि पूर्वोक्तरीत्या दोषो बोध्यः । स्वव्यापकयावत्सङ्ख्यासामानाधिकरण्यस्य न्यूनवृत्तिसङ्ख्यादावपि सत्त्वादतिप्रसङ्गवारणाय व्यापकत्वं द्वितीयमुपात्तमित्याहुः, तन्न, तथा सति द्वित्वादय इत्यनेन द्वित्वस्य **परार्धान्ता** इत्यनेन परार्धत्वस्य च बोधनेऽपि त्रित्वादेरलाभेन न्यूनतापत्तेः, द्वित्वमादिर्येषामित्यादिरीत्या समासमाश्रित्याऽऽद्यत्वाश्रयद्वित्वकालीनत्वादिप्रकारेण त्रित्वाद्युपग्रहे चैकत्वस्याऽपि संग्रहप्रसङ्गो दुर्निवारः, एवं **पराधान्ता** इत्यत्राऽपीत्यवधेयम् ।

वस्तुतस्तु 'आदि'शब्दोऽत्र लक्षणया व्यापकत्ववाची परिगृह्यते, तथा च यत्किञ्चिद्द्वित्वव्यापिका इत्यर्थः, 'परार्धान्ताः' इत्युक्तिश्च सङ्ख्यायाः परार्धपर्यन्तत्वरूपव्यवच्छेदबोधनाय, तदन्तत्वं च तद्व्यापकत्वम् । तथा च परार्धत्वव्याप्या इति पर्यवसितोऽर्थः ।

अत्र च परार्धपर्यन्तैव सङ्ख्येत्यागमप्रामाण्यादभ्युपगम्यत इत्याचार्याः ।

वस्तुतस्तु स्वोत्पत्तिकालोत्पत्तिकयावत्सङ्ख्यासमानाधिकरणसङ्ख्यात्वमेव परार्धत्वम् । विद्यमानयावद्द्रव्यगतत्वं च परार्धत्वस्य स्वीक्रियते, तद्यथ क्तसमवेतैकत्वान्यसङ्ख्यासामान्यं प्रति तद्व्यक्तिगतैकत्वज्ञानत्वेनाऽपेक्षाबुद्धेर्द्वित्वादिजनकतायां वक्ष्यमाणतया एककालीनद्रव्यगतयावदेकत्वविषयिण्या भगवदपेक्षाबुद्धेः सत्त्वेन कार्योत्पत्तेरावश्यकत्वे तादृशकार्यस्य युगपदुत्पन्नयावद्द्रव्यगतस्यैकस्य कल्पनीयत्वावश्यकतया परार्धत्वसङ्ख्योपपत्तेः । अत एव परार्धत्वसङ्ख्याऽतीन्द्रियैवेति प्राचीनसिद्धान्तः सङ्गच्छते । अन्यथाऽतीन्द्रियायास्तस्या मानाभावेन साधनानर्हतापत्तेः, परार्धत्वसङ्ख्यायां लक्षत्वादेः शतसहस्रैकत्वादिज्ञानजन्यत्ववत् प्रतिनियतकतिपयैकत्वज्ञानजन्यत्वे योग्यपदार्थमात्रघटितैकत्वज्ञानवतः पुंसः परार्धत्वे चक्षुरादिसन्निकर्षात् तत्प्रत्यक्षवारणाय विषयतासम्बन्धेन प्रत्यक्षं प्रति तादात्म्येन परार्धत्वस्य प्रतिबन्धकत्वकल्पनमसक्तो महागौरवापत्तेश्च । अस्मन्मते तु वक्ष्यमाणयुक्त्या न युगपदुत्पन्नयावद्द्रव्यैकत्वप्रत्यक्षविरहिणः पुंसस्तत्प्रत्यक्षापत्तिरिति निरूपयिष्यते । नन्वेवमपि सङ्ख्यायाः परार्धपर्यन्तत्वमनुपपन्नम्, भगवदपेक्षाबुद्धेरविद्यमानद्रव्यगतैकत्वविषयकतायाः अपि स्वीकरणीयतया यावद्द्रव्यगतस्य सङ्ख्यान्तरस्याऽपि स्वीकरणीयत्वात् । न च तर्हि तदेव परार्धत्वमस्तु, यावद्द्रव्यगतसङ्ख्यात्वस्यैव तल्लक्षणत्वसम्भवात्, तत्र परात्वमुपेक्ष्य परार्धत्वव्यवहारस्तु पदार्थमात्रवृत्त्यपेक्षाबुद्धिविशेषविषयत्वरूपसङ्ख्यापेक्षया न्यूनवृत्तित्वेनोपपाद्यतामिति वाच्यम् । सिद्धान्ते सङ्ख्यासामान्यस्य सङ्ख्यासमानाधिकरणाभावप्रतियोगित्वनियमाङ्गीकारविरोधादिति चेन्न । समवायिकारणस्य द्रव्यस्य विशेषतस्तत्तद्व्यक्तिसमवेतसत्सामान्यं प्रति तद्व्यक्तित्वेन हेतुतायां रूपरसादिभेदेनाऽनन्तकार्यकारणभावकल्पनागौरवभिया स्वीकर्तव्यत्वेन यावद्द्रव्यात्मकविशेषकारणकूटस्यैककालमसम्भवादेव सङ्ख्याया यावद्द्रव्येषूत्पादासम्भवात् । अथैवमीश्वरीयापेक्षाबुद्धितो द्व्यणुकपरिमाणारम्भकसङ्ख्याविशेषोत्पादोपगमविरोधप्रसङ्गः । न च तत्र परार्धत्वसङ्ख्ययैव परिमाणोत्पादोपगमान्न तद्विरोधः, द्वित्वाभ्यामेव तदुत्पत्तेः इत्यत्र तु न किञ्चित्साधकमस्तीति वाच्यम् । तथा सति कपालद्वयारब्धे घटे घटान्तरारम्भककपालान्तरसंयोगेन त्रित्वसङ्ख्यामादाय कपालजन्यारब्धघटपरिमाणोत्पादवारणाय परिमाणप्रत्यये वक्ष्यमाणकार्यतावच्छेदकतावच्छेदकविशेषस्य स्वीकर्तव्यतया परार्धत्वसङ्ख्याया अनारम्भकद्रव्यवर्तिन्याः परिमाणजनकत्वायोगात्, परमाणुसमानयोगक्षेमे द्व्यणुकेऽपि अवश्यंपरिमा-

दिनकरी ।

असमवायिकारणं तु द्वित्वं प्रति समवायिकारणगतयावदेकत्वमिति बोध्यम् । ननु योग्यद्वित्वादावपेक्षाबुद्धेर्हेतुत्वेऽप्ययोग्यद्वित्वादौ तद्धेतुत्वे मानाभाव इति चेन्न, योग्यद्वित्वा-

रामरुद्रो ।

णारम्भिकायाः सङ्ख्याया भगवदपेक्षाधीजन्यत्वेन तस्या अपि परार्धत्वरूपत्वाङ्गीकारे द्व्यणुके महत्त्वस्य त्रसरेणौ चाऽणुत्वस्योत्पादापत्तेः । यद्यपि परमाणुभिर्द्व्यणुकारम्भोत्तरमेव त्रसरेणोरारब्धव्यतया द्व्यणुकोत्पाददर्वाक् नित्यमात्रसमवेतमेव परार्धत्वं स्वीकरणीयम्, द्व्यणुकारम्भे च सामग्रीसम्पत्त्या तद्घटितं परार्धत्वमन्यदेवेति त्रसरेणुपरिमाणद्व्यणुकपरिमाणारम्भकयोः परार्धत्वयोर्भेदान्न द्व्यणुकद्व्य-णुकयोः परस्परपरिमाणोत्पादापत्तिरिति वक्तुं शक्यम्, तथाऽपि यावद्द्व्यणुकारम्भोत्तरमेव त्रसरेणुरुत्प-द्यत इति नियमे मानाभावेन समकालीनपरमाणुसमूहद्वयारब्धद्व्यणुकद्व्यणुकयोस्तुल्यपरिमाणतापत्तिर्न वारयितुं शक्यते, तत्र तद्धेतुभूतायाः परार्धत्वसङ्ख्याया अवश्यादिति चेन्न, अधिकदेशवृत्तिस-ङ्ख्याया उत्पादकाले न्यूनदेशवृत्तिसङ्ख्याया अप्युत्पादाभ्युपगमेन भगवदपेक्षाबुद्ध्या परार्धत्वसङ्ख्यो-त्पादवेलायां न्यूनवृत्तिद्वित्वत्रित्वाद्युत्पादसम्भवेन द्व्यणुकद्व्यणुकपरिमाणयोः परमाणुद्व्यणुकगतद्वित्व-त्रित्वसङ्ख्ययोः कारणत्वोपपत्तेः । न चैवं घटादावपि भगवदपेक्षाबुद्धिजन्यद्वित्वाद्युत्पादप्रसङ्ग इति वाच्यम् । इष्टत्वात्, कपाले स्वोत्पत्तितृतीयक्षणे कपालान्तरसंयोगबलाद्घटोत्पत्तौ स्वीयपरिमाणसहकृतये-श्वरीयत्रित्वसङ्ख्यया घटपरिमाणजननानुभवात् । अन्यथा कपालैकत्वोत्पत्युत्तरमेव तद्गतैकत्वज्ञान-सम्भवेन तत्क्षणे तत्पूर्वक्षणोत्पन्नकपालान्तरसंयोगेन घटोत्पत्त्या तदुत्तरक्षणे एव पौरुषापेक्षाबुद्धिजन्य-द्वित्वोत्पत्त्या तत्काले घटपरिमाणोत्पादासम्भवप्रसङ्गात् । अस्मन्मते तु भगवदपेक्षाबुद्धेर्नित्यतया घटगतैकत्वोत्पादसमकालमेव द्वित्वसामग्रीसम्पत्त्या घटगतपरिमाणविशेषोत्पत्तिः समर्थयितुं शक्यत एवेति न प्रागुक्तदोषशङ्काऽपि । न चैवं परार्धसङ्ख्यायाः प्रतिनियतैकत्वज्ञानजन्यत्वाभावेन परार्धत्व-रूपजातौ मानाभावः, अन्यथा प्रतिक्षणं तुल्यसङ्ख्यद्रव्योत्पत्तौ मानाभावेन विजातीयसङ्ख्याद्वयस्य तत्रोत्पादाभ्युपगमावश्यकत्वेन तदन्तर्गतस्यैकस्य परार्धत्वाश्रयत्वेऽपरस्याऽऽधिक्यापत्तेरिति वाच्यम् । स्वसमानकालीनोत्पत्तिकयावत्सङ्ख्यासमानाधिकरणत्वस्यैव परार्धत्वरूपतया तयोः परस्परवैजात्येऽपि निरुक्तोपाधिपुरस्कारेण विभागविषयतयाऽऽधिक्यशङ्काऽनवकाशादिति युक्तमुत्पश्यामः ।

अन्ये तु परार्धत्वं जातिविशेष एव, तदुत्तरसङ्ख्यानामेकाधिकपरार्धत्वादिपद*प्रतिपाद्यतया मूलस्थ 'परार्ध'पदस्य चैकशेषरूपेण संग्रह इत्याहुः, तच्चिन्त्यम् ।

अपेक्षाबुद्धिरूपनिमित्तकारणजन्यमित्यर्थं इति । तथा च **'अपेक्षाबुद्धिजाः'**—इत्यादिमूलेन अपेक्षाबुद्धेर्द्वित्वोत्पत्तिहेतुत्वमेव विवक्षितम्, न स्वभिन्नजन्यत्वरूपं मीमांसकमतसिद्धं हेतुत्वमिति भावः । द्वित्वादौ अपेक्षाबुद्धिरेव कारणमिति भ्रमं निराकर्तुमाह टीकायाम्—**असमवायिकारणं त्विति ।** अत्रेदं चिन्त्यम् । द्वित्वं प्रति एकत्वं चेदसमवायिकारणं, तदा तुल्ययुक्तस्याऽवयवगतद्वित्वादेरपि तत्राऽसमवायितया तस्य कारणगुणोत्पन्नत्वमेवाऽऽयातमिति प्राक्कारणगुणोत्पन्नगुणमध्ये द्वित्वं कथं न परि-गणितम् ? न च स्वसमवायिसमवेतत्वसम्बन्धेनाऽवयवद्वित्वस्य द्वित्वहेतुत्वे मानाभाव इति तत्र परि-कृतं कारणगुणोत्पन्नत्वं तत्र न सम्भवतीति वाच्यम् । तथा सत्येकत्वस्य समवायेनाऽपि कारणत्वे मानाभावेन तस्याऽसमवायिकारणत्वकथनानौचित्यादिति चेत्, अत्राऽऽचार्याः, कार्यद्वित्वे कारण-गतैकत्वजनितद्वित्वस्य कारणत्वाङ्गीकारे समवायेन द्वित्वं प्रत्येकत्वद्वयजनितं द्वित्वं स्वसमवायिसमवे-तत्वसम्बन्धेन कारणमिति वक्तव्यम्, इत्थं च कारणाधिकरण एव कार्योत्पत्तिसम्भवेन तादृशैकत्वद्वय-

---

* तदुक्तं लीलावत्याम्—

'एकदशशतसहस्रायुतलक्षप्रयुतकोटयः क्रमशः ।
अर्बुदमब्जं खर्वनिखर्वमहापद्मशङ्कवस्तस्मात् ।
जलधिश्चान्त्यं मध्यं परार्धमिति दशगुणोत्तराः सञ्ज्ञाः—' इति ।

दिनकरी।

देरपेक्षाबुद्धिजन्यत्वेऽतीन्द्रियद्वित्वादावप्यनेकसङ्ख्यात्वादिना तदनुमानात्।

रामरुद्री।

जन्यद्वित्ववति एकस्मिन्नेव द्व्यणुके रूपादिवद्द्वित्वमप्युत्पद्येत, एकत्वद्वयस्य तु न कार्यगतद्वित्वादिजनकत्वसम्भवः, विजातीयत्वात्, विजातीयस्य हेतुत्वेऽपि कार्याकार्यद्वित्वोत्पादानुपपत्तेश्च, तत्र कारणाकारणैकत्वद्वयस्यैव स्वसमवायिसमवेतत्वसम्बन्धेन हेतुतायास्त्वया वाच्यत्वेनाऽकारणगतैकत्वस्य प्रत्यासत्तिविरहेण कार्याधिकरणे विरहेणैकत्वद्वयात्मकहेतुविरहाद्व्यभिचारात्, कारणाकारणसंयोगात् कार्याकार्यसंयोगवत् कारणाकारणद्वित्वात् कार्याकार्यद्वित्वोत्पादसम्भवेऽपि कारणाकारणकार्यगतत्रित्वसङ्ख्योत्पत्तिनैव समर्थयितुं शक्यते, कारणाकारणगतद्वित्वेन तयोर्द्वित्वोत्पादनसम्भवेऽपि सजातीयस्यैव हेतुतया ततस्त्रित्वोत्पत्त्यसम्भवात्। कारणाकारणोदासीनपदार्थान्तरसाधारणत्रित्वमादाय च न कार्यकारणाकारणसाधारणत्रित्वोत्पत्तिरुपपादयितुं शक्यते, तथा सति तादृशोदासीनपदार्थान्तरद्वयसाधारणचतुष्ट्वादिकमादाय कार्यकारणाकारणसाधारणचतुष्ट्वाद्युत्पादप्रसङ्गात् तस्य तादृशद्वित्वत्रित्वादावहेतुत्वस्य कल्पनीयत्वात्। अन्यथा तद्द्व्यणुकारम्भकपरमाणुद्वयोदासीनपदार्थद्वयतद्द्व्यणुकात्मकपञ्चद्रव्यसाधारण्यस्यैकस्य चतुष्ट्वस्योत्पादापत्तेः। तस्मात्कारणाकारणसंयोगाज्जायमानस्य संयोगस्याऽकारण इव कारणेऽप्युत्पादवारणाय तद्व्यक्तिद्वयवृत्तिसंयोगं प्रति तत्तद्वृत्तिसंयोगत्वेन प्रतिबन्धकतया(१) इवाऽत्राऽपि द्वित्वत्रित्वादिप्रतिबन्धकतायाः कल्पनीयतया कारणाकारणकार्यसाधारणचतुष्ट्वाद्यनुत्पादापत्तेः, कारणकार्यमात्रसमवेतत्रित्वानुपपत्तेश्च, कारणयोस्त्रित्वविरहात्, अकारणसाधारणत्रित्वस्य कार्यादिसाधारणत्रित्वजनकत्वे उक्तयुक्त्या तस्य चतुष्टयवृत्तित्वापत्तेः। यदि च कारणमात्रसमवेत द्वित्वं कार्यकारणसाधारणत्रित्व एव कारणम्, कार्यकारणभावस्याऽन्वयव्यतिरेकैकमूलकत्वेन कारणद्वित्वाभ्यां कार्यमात्रद्वित्वोत्पादस्य क्वचिदप्यदृष्टतया तथा हेतुत्वे मानाभावादिति नोक्तानुपपत्तिरित्युच्यते, तथाऽपि कारणकार्यद्वित्वस्याऽनुत्पादप्रसङ्गो दुर्वारः, कारणद्वित्वस्य त्रित्वजनकताया एव भवताऽभ्युपगमात्, कार्यकारणद्वित्वस्य चैतावदवध्यनिष्पन्नतया जनकत्वायोगात्। यदि च कारणद्वित्वं कार्यसाधारणद्वित्वे त्रित्वे च हेतुरित्यभ्युपगम्यते, तथाऽपि नाऽस्ति निर्मोचः, एवं सति तादृशद्वित्वस्य कार्यकारणात्मकत्रितयसाधारण्यापत्तेर्दुर्वारत्वात्। यदि च निरुक्तदोषभिया एकत्वस्यैव कार्यकारणनिष्ठस्य त्रित्वादिजनकत्वं स्वीक्रियते, एकत्वद्वयस्य द्वित्वं प्रति त्रयस्य च त्रित्वादिकं प्रति हेतुत्वमित्यभ्युपगम्यते, तदाऽस्मन्मतप्रवेशः सम्पन्न इति कुतः कारणगुणपूर्वकत्वं द्वित्वादेरित्याहुः।

वस्तुतस्तु परमाणुमात्रसमवेतद्वित्वोत्पत्तिसमर्थनायैकत्वस्य समवायसम्बन्धेन हेतुत्वावश्यकतया तेनैव निर्वाहे स्वसमवायिसमवेतत्वसम्बन्धेन तस्य वा द्वित्वादेर्वा हेतुत्वान्तरे मानाभाव एव। एकत्वस्य समवायेन द्वित्वादिहेतुत्वे मानाभावशङ्का तु न कर्तव्या, पुरस्तादेव दत्तोत्तरत्वादित्यवधेयम्।(२)

तदनुमानादिति। वस्तुतस्तु योग्यद्वित्वादिस्थलेऽपि द्वित्वत्वावच्छिन्नं प्रत्यपेक्षाबुद्धित्वेनैव हेतुत्वस्य कल्पनीयत्वात्तादृशकार्यतावच्छेदकद्वित्वत्वस्वरूपधर्मावच्छिन्नस्याऽतीन्द्रियद्वित्वादेरप्यपेक्षाबुद्धिजन्यत्वमावश्यकम्, अन्यथा तत्रैव व्यभिचारप्रसङ्गात्, अनन्ततादृशस्थलेषु तादृशानन्तापेक्षाबुद्धिकल्पनागौरवस्य च फलमुखत्वेनाऽदोषत्वादिति ध्येयम्।

---

(१) इत्थं च तादृशस्थले कारणकारणसंयोगव्यक्तिर्नाऽऽपादयितुं शक्या, प्रतिबन्धकस्य विद्यमानत्वात्, कार्याकार्यसंयोगव्यक्तिरपि नाऽऽपादयितुं शक्या, समवायिकारणविरहात्, त्रितयसाधारणसंयोगव्यक्तिरप्यापादयितुं न शक्या, अप्रसिद्धत्वादिति ध्येयम्।

(२) इदमुपलक्षणम्। द्वित्वादेर्द्वित्वादिकं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन हेतुत्वमेव दुर्वचम्, परमाणुद्वित्वे व्यभिचारात्, कार्यतावच्छेदककोटावव्यवहितोत्तरत्वादिनिवेशे च महागौरवादिति।

दिनकरी।

अथाऽपेक्षाबुद्धेर्द्वित्वहेतुत्वे कथमविरलक्रमेण यावदपेक्षाबुद्धिसत्त्वं न द्वित्वोत्पत्तिः ?

अत्र केचित्, अपेक्षाबुद्धेरुत्पत्तिसम्बन्धेन हेतुत्वान्न यावदपेक्षाबुद्धिसत्त्वं द्वित्वोत्पत्तिरिति,

तन्न, धारावाहिकापेक्षाबुद्धिभिः सर्वत्र धारावाहिकाद्वित्वोत्पत्तेर्दुर्वारत्वात्, भगवदपेक्षाबुद्ध्या धारावाहिकद्वित्वोत्पत्तेर्दुर्वारत्वाच्च, तद्बुद्धेर्नित्यत्वेनोत्पत्तिसम्बन्धेन तद्धेतुत्वस्य दुर्वचत्वात्।

वस्तुतस्तु तत्तत्पुरुषीयापेक्षाबुद्धिजन्यानेकसङ्ख्यात्वावच्छिन्नं प्रति तत्तत्पुरुषीयापेक्षाबुद्धिजन्यानेकसङ्ख्यादेः प्रतिबन्धकत्वाभ्युपगमान्न यावदपेक्षाबुद्धिसत्त्वं द्वित्वोत्पत्तिरिति ॥१०७॥

रामरुद्री।

अथाऽपेक्षाबुद्धेरित्यादि। यद्यपीयमाशङ्का रूपादिष्वपि समाना, तत्राऽपि कारणीभूतस्याऽवयवगतरूपादेः स्वसमवायिसमवेतत्वसम्बन्धेन घटरूपोत्पत्तिक्षणेऽपि कार्याधिकरणसमवहिततया तदुत्तरं रूपोत्पादस्याऽऽपादयितुं शक्यत्वात्। न च तत्तद्रूपव्यक्ति प्रति तत्तद्रूपविशेषप्रागभावस्य तत्तदसमवायिकारणव्यक्तीनां समवायिकारणव्यक्तीनां च विशिष्य हेतुत्वकल्पनादेव नोक्तापत्तिसम्भवः, तन्नोत्पन्नस्य प्रागभावविरहेण पिठरपाकोपगमे एककपालपाके भाविचित्ररूपस्य तदसमवायिकारणव्यक्तिविशेषविरहेण प्राक्तनकपालमात्रारब्धघटान्तरीयरूपस्य च प्राक्तने तत्समवायिकारणीभूतव्यक्तिविशेषविरहेण नाऽऽपत्तिसम्भावनेति वाच्यम्। इत्थं सति प्रकृतेऽपि प्रागभावादीनां तत्तद्द्वित्वादौ तत्तद्व्यक्तित्वादिना विशिष्य हेतुत्वं स्वीकृत्यैव द्वित्वधारावारणसम्भवे तादृशरीत्या प्रयासवैफल्यादिति चेन्न। एकरूपोत्पत्त्यनन्तरं रूपत्वावच्छिन्नानुत्पादप्रयोजकत्वं भवता तत्तत्प्रागभावाद्यभावकूटे वक्तव्यमिति महागौरवमिया तत्परिहाराय सामान्यतो रूपत्वावच्छिन्नं प्रति रूपत्वेनाऽपि प्रतिबन्धकत्वं स्वीकर्तव्यम्। द्वित्वादिस्थले च न द्वित्वादेः प्रतिबन्धकत्वसम्भवः, एकपुरुषीयापेक्षाबुद्धिजन्यद्वित्वसत्त्वेऽपि पुरुषान्तरीयापेक्षाबुद्धितो द्वित्वोत्पत्तेरिति तदाशङ्कनस्य युक्तत्वात्। अत एव 'वस्तुतस्तु'—इत्यादिना वक्ष्यमाणे द्वित्वादिकं प्रति द्वित्वादेः प्रतिबध्यप्रतिबन्धकभावे प्रतिबध्यप्रतिबन्धकतावच्छेदककुक्ष्योस्तत्तत्पुरुषीयापेक्षाबुद्धिजन्यत्वप्रवेशोऽपि सार्थक इति ध्येयम्।

धारावाहिकेति। यत्र प्रथममपेक्षाबुद्धिः, ततो द्वित्वोत्पत्तिः, अपेक्षाबुद्ध्यनन्तरं च, ततो द्वित्वानन्तरोत्पादापत्तेरिति भावः। ननु अपेक्षाबुद्धेर्धारावाहिकत्वे धारावाहिकद्वित्वाद्युत्पत्तिरपीष्यत एव, तत्स्थले द्वित्वप्रत्यक्षधारायां, अपीष्टत्वादित्यतो दूषणान्तरमाह। **भगवदपेक्षेति।** नन्वपेक्षाबुद्धेरुत्पत्तिसम्बन्धेन हेतुत्वे भगवदपेक्षाबुद्धितो धारावाहिकद्वित्वोत्पादापत्तिर्न सम्भवति, तस्या उत्पत्तिसम्बन्धेन क्वाऽप्यवर्तमानतयाऽऽपादकत्वायोगादित्यतः स्वाभिप्रायं स्फोरयितुमाह। **तद्बुद्धेरित्यादि।** अयं भावः, ईश्वरीयापेक्षाबुद्धेर्हि द्वित्वादिहेतुत्वं द्व्यणुकादिपरिमाणान्यथानुपपत्त्याऽऽवश्यकम्, तच्च नोत्पत्तिसम्बन्धावच्छिन्नमिति कल्पयितुं शक्यते, तथा सति तद्बुद्धेः क्वाऽप्यवर्तमानत्वेन हेतुत्वस्यैवाऽनुपपत्तेः; किं तु सम्बन्धान्तरेणैव तद्धाक्ष्यम्, तथा च तेन सम्बन्धेन तद्बुद्धेः सर्वदैव कार्याधिकरणसमवहिततया धारावाहिकद्वित्वोत्पादप्रसङ्गो युज्यत इति। यद्यपीश्वरबुद्ध्यादेर्द्वित्वादेर्जनने सहकारितया क्षणविशेषस्याऽपेक्षायां स्वयमेव स्वीकर्तव्यतया नेयमापत्तिः सम्भवति, तत्सहकारिक्षणविशेषविरहादेव तदापत्तिवारणसम्भवात्। न च उपाधिमात्रस्यैव क्षणद्वयावस्थायित्वावश्यकतया सहकारिविशेषस्यैवाऽविरललभद्वित्वद्व्यापत्तिरेवास्तु दोषः, क्षणिकोपाधिमभ्युपगम्य ततः एव द्वित्वोत्पादाभ्युपगमेन तत्राप्यादेः द्वित्वनाशस्याऽप्यग्रे स्वयमङ्गीकरणीयतया द्वित्वस्य क्षणिकत्वप्रसङ्ग इति वाच्यम्। प्रकृते द्व्यणुकादौ परिमाणोत्पादमात्रनिर्वाहायैव द्वित्वस्येश्वरीयापेक्षाबुद्धिजन्यस्य स्वीकरणीयतया जन्यमात्रत्वेन तत्रिष्ठे तादृशद्वित्वस्य सद्योविनाशित्वाङ्गीकारे लाघवाभावात्, तथाऽपि तत्तत्सकलविशेषाभावकूटस्य द्वित्वानुत्पादप्रयोजकत्वाभ्युपगमे तत्तत्प्रागभावाद्यभावकूटस्य तत्प्रयोजकत्वकल्पनसमानयोगक्षेमतया लाघवाभावेनैकस्य प्रयोजकत्वासम्भवप्रयुक्तं गौरवमेव शङ्काविषयतया दुष्परिहरमिति ध्येयम् ॥ १०७ ॥

अनेकाश्रयपर्याप्ता एते तु परिकीर्तिताः ।

अनेकेति । **यद्यपि द्वित्वादिसमवायः प्रत्येकं घटादावपि वर्तते, तथाऽपि एको द्वाविति प्रत्ययाभावात् एको न द्वाविति प्रत्ययसद्भावाच्च द्वित्वादीनां पर्याप्तिलक्षणः कश्चित् सम्बन्धोऽनेकाश्रयोऽभ्युपेयते ।**

दिनकरी ।

प्रत्येकं घटादाविति । तथा च 'अनेकाश्रयपर्याप्ताः'इति मूलमसङ्गतमिति भावः । नन्वेकत्वस्य न्यूनवृत्तितया द्वित्वाधारतानवच्छेदकत्वान्न तथा प्रत्यय इत्यत आह । **एको न द्वाविति ।** एकत्वावच्छेदेन द्वित्ववद्भेदाभावादेकत्वादेर्न्यूनवृत्तितया द्वित्ववद्भेदानवच्छेदकत्वादिति भावः । **अनेकाश्रय इति ।** उभयाद्याश्रय इत्यर्थः । तथा च तादृशप्रतीतेर्न द्वित्ववद्भेदाधारतावच्छेदकत्वमेकत्वे विषयः, किं तु पर्याप्तिसम्बन्धेन द्वित्वं तद्भेदो वा एकत्वावच्छिन्ने प्रकारः, इत्थं च पर्याप्तिसम्बन्धेन द्वित्वस्य प्रत्येकमभावादेको द्वावित्यप्रत्ययस्यैको न द्वाविति प्रत्ययस्य चोपपत्तिरिति भावः ।

अत्र बहवः, उभयादेः प्रत्येकानतिरिक्ततया प्रत्येकमपि पर्याप्तिसम्बन्धेन द्वित्वमस्त्येवेति पर्याप्त्यङ्गीकारेऽप्येको द्वावित्यप्रत्ययस्यैको न द्वाविति प्रत्ययस्य च कथमुपपत्तिः ? यदि चैको न द्वावितिप्रतीतिबलात् द्वित्ववद्भेदावच्छेदकत्वं स्वरूपसम्बन्धविशेषरूपमेकत्वे स्वीक्रियते, न तु द्वित्वावच्छेदकत्वम्, एको द्वावित्यप्रत्ययादिति विभाव्यते, तदा समवायपक्षेऽपि तुल्यमिति पर्याप्त्यङ्गीकारो निरर्थक इति चेत्, अत्राऽऽहुः, आकाशावितिवाक्यस्य प्रामाण्यापत्त्या पर्याप्त्यङ्गीकार आवश्यकः । न च समवायेनैव पर्याप्तिसम्बन्धेनापि द्वित्वस्याऽऽकाशे सत्त्वात् पर्याप्त्यङ्गीकारेऽपि तद्वाक्यप्रामाण्यं दुर्वारमिति वाच्यम् । उद्देश्यतावच्छेदकामरुद्री ।

द्वित्वमिति । इदं चैको द्वाविति प्रतीत्यभिप्रायेणोक्तम्। एको न द्वाविति प्रतीतौ त्वाह—**तद्भेदो वेति ।** पर्याप्तिसम्बन्धेन यो द्वित्ववांस्तद्भेद इत्यर्थः । **प्रत्येकमभावादिति ।** तादृशसम्बन्धेन द्वित्ववद्भेदस्य प्रत्येकं सत्त्वाच्चेति शेषः । **उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तेरिति ।** द्वित्वादिशाब्दबोधे पर्याप्तिनिष्ठायाः ससर्गतायाः उद्देश्यतावच्छेदकव्याप्तिविषयतानिरूपितत्वोपगमादित्यर्थः । तेन भ्रमात्मके आकाशावितिवाक्यजन्यबोधे आकाशत्वव्याप्यत्वविशिष्टपर्याप्तेरलौकतया संसर्गमुद्रया भानासम्भवेऽपि न क्षतिः, संसर्गप्रकारसाधारणविशेषणविशेष्यभावस्यैव भ्रमत्वघटकतया विवक्षितत्वात् । अथ कीदृशं संसर्गप्रकारसाधारणं भ्रमत्वं परिष्क्रियते ? न तावत् विशेषणतानिरूपितविशेष्यताकत्वमेव तत्, वैशिष्ट्यं च स्वनिरूपितत्व-स्वविशिष्टनिरूपकताकाधिकरणत्वाभाववद्वृत्तित्वोभयसम्बन्धेन । स्ववैशिष्ट्यं च स्वावच्छेदकसम्बन्धावच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वोभयसम्बन्धेनेति केश्चिदुक्तं युक्तम्, संसर्गतावच्छेदककोटौ ससर्गाभानेनोक्तभ्रमत्वस्य संसर्गांशे भ्रमात्मकज्ञानाव्यापकत्वात्, द्रव्यत्वेन पर्वतजलोभयावगाहि-द्रव्यं वह्निमदित्याद्याज्ञानेऽतिप्रसङ्गाच्च, तादृशज्ञानस्य भ्रमत्वे वह्नित्वेन पर्वतीयवह्निमहानसीयवह्न्युभयप्रकारकपर्वतीयवह्निमानिति ज्ञानस्याऽपि भ्रमत्वं दुर्वारम्, तत्रेष्टापत्तिस्तु न सम्भवति, त्वदुक्तभ्रमलक्षणस्य तत्रैवाऽव्याप्त्यापत्तेरिति । नाऽपि विशेष्यतावच्छिन्नविशेष्यताकत्वरूपं तत्, वैशिष्ट्यं च स्वतादात्म्य-स्वाश्रयनिष्ठाधिकरणतानिरूपितनिरूपकतावदन्यविशेषणतानिरूपकत्वोभयसम्बन्धेन । निरूपकतावत्त्वं च स्वानवच्छेदकसम्बन्धानवच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धावच्छिन्नस्ववृत्तित्व-स्वसामानाधिकरण्येतच्चतुष्टयसम्बन्धेनेति* युक्तम्,

---

* शुक्ताविदं रजतमितिज्ञानीयरजतत्वनिष्ठप्रकारतायाः स्वाश्रयशुक्तिनिष्ठाधिकरणतानि-

दिनकरी।

कव्याप्यत्वविशिष्टपर्याप्तेरेव द्वित्वसम्बन्धत्वोपगमात्, आकाशत्वव्याप्यद्वित्वपर्याप्तेरप्रसिद्ध-

रामरुद्री।

संसर्गांशे भ्रममात्रस्यैवाऽनङ्गीकारापत्तेः, सांसर्गिकविषयतायाः किञ्चित्सम्बन्धानवच्छिन्नत्वेन तादृशस्य-लीयविशेषणतायाम् अपि स्वाश्रयनिष्ठाधिकरणतानिरूपितकालिकादिसम्बन्धावच्छिन्ननिरूपकतावदन्य-त्वासम्भवादिति चेन्न, संसर्गांशे भ्रमत्वाङ्गीकर्तृणां मते विशेषणविशेष्यभावो न भ्रमत्वलक्षणघटकतया निवेश्यते, अपि तु तत्प्रयुक्तं भ्रमत्वं तैरङ्गीक्रियत इत्येव तन्मतानुसारिणां सिद्धान्तः। तथा च तन्मते-ऽपि विशेष्यताविशिष्टविशेष्यताकत्वमेव भ्रमत्वम्। वैशिष्ट्यं तु स्वतादात्म्य—स्वाश्रयनिष्ठाधिकरणता-निरूपितनिरूपकतावदन्यप्रकारताकत्वोभयसम्बन्धेन। प्रकारतायां निरूपकतावदन्यत्वं स्वावच्छेदकसंस-र्गतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धावच्छिन्नप्रतियोगिताकस्वाभा-ववद्वृत्तित्व—स्वसामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्व—स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धाव-च्छिन्नस्ववृत्तित्वैतच्चतुष्टयसम्बन्धेन। तादृशरूपावृत्तित्वं च स्वावच्छेदकसंसर्गतावच्छेदकतात्वावच्छिन्न-प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसम्बन्धेन। तथा चाऽऽकाशवित्यादिवाक्यजन्यभ्रमस्थले तादृ-शद्वित्वादिप्रकारतामादायैव भ्रमत्वमुपपादनीयम्। तत्स्थले स्वाश्रयनिष्ठाधिकरणतानिरूपितायाः कस्या अपि निरूपकतायाः आकाशत्वव्याप्यपर्याप्तिरूपसम्बन्धघटकसकलपदार्थवृत्तिविलक्षणसमुदायत्वावच्छिन्ना-नुयोगिताकपर्याप्तिकावच्छेदकताकत्वाभावेन तत्र प्रकारतायास्तादृशरूपावृत्तित्वोपपत्तेः। एकसंसर्गतावच्छेदकप्रकारेण तादृशससर्गतावच्छेदकाश्रयतदनाश्रयोभयनिष्ठैकससर्गताकबुद्धिस्थले तादृशसंसर्गतानिरूपितप्रकारतायां विशेष्यताश्रयनिष्ठाधिकरणतानिरूपितनिरूपकतावदन्यत्वविरहेऽपि न क्षतिः, द्रव्यत्वेन पर्वतजलोभयावगाहि—द्रव्यं वह्निमदित्याद्यज्ञानस्येव तादृशज्ञानस्याऽपि यथार्थताया इष्टत्वात्।

वस्तुतस्तु संसर्गकोटौ संसर्गस्य संसर्गान्तराभानेऽपि संसर्गतावच्छेदके तद्भाने बाधकाभाव इति यथाश्रुतेऽपि भ्रमत्वमुपपद्यत एव। न चैवं संसर्गतावच्छेदककोटौ संसर्गभानाभ्युपगमे तद्विषय-तायाः संसर्गावच्छिन्नत्वेन प्रकारतात्वापत्तिरिति वाच्यम्। अवच्छेदकत्वनिष्ठसंसर्गतानिरूपित-त्वशून्यसंसर्गावच्छिन्नविषयताया एव प्रकारतात्वेन तस्याः प्रकारतात्वासम्भवात्। इत्थं च संसर्गप्रकारसाधारणभ्रमत्वनिर्वचने विषयत्वांशे तादृशसंसर्गत्वानिरूपितत्वात्मकप्रकारतात्वप्रयोजक-रूपाप्रवेशाल्लाघवमपि स्फुटम्। संसर्गतावच्छेदकस्य संसर्गभानं च प्रामाणिकमेव, संसर्गतावच्छेदक-घटकतया वैशिष्ट्यादिनिवेश्यस्य सर्वसम्मतत्वात्। इत्थं सति सर्वत्र ससर्गतावच्छेदकांशे संसर्गान्तरभाना-भ्युपगमप्रयुक्तानवस्थायाश्चरमसंसर्गतावच्छेदकतावच्छेदकसंसर्गनिष्ठसंसर्गताया निरवच्छिन्नत्वोपगमेन वारणात्। ज्ञानानां संसर्गांशे भ्रमत्वस्वीकारोऽप्यावश्यक एव, प्रमेयं नाऽस्तीत्यादिवाक्यजन्यशाब्दबोध-स्य प्रतियोगितासम्बन्धेनाऽभावांशे प्रमेयाद्यवगाहित्वे भ्रमत्वानुपपत्तेः प्रमेयत्वावच्छिन्नप्रतियोगित्वस्य चाऽखण्डस्याऽलीकतया संसर्गत्वानुपपत्तेः प्रमेयत्वावच्छिन्नत्वप्रतियोगित्वानां त्रयाणामेव परस्परं विशेष्य-विशेषणभावापन्नानां संसर्गतामुपगम्य तादृशबोधस्य भ्रमरूपताया व्याप्तिपञ्चकजागदीश्यादिषु स्फुटतया प्रतिपादितत्वादित्यलमप्रकृतचिन्तया। आकाशत्वव्याप्यद्वित्वपर्याप्तेरप्रसिद्धत्वादिति। अथैवमाकाशो न द्वावित्यादिवाक्यज्ञानवत् आकाशावित्यादिवाक्यश्रवणे शाब्दबोधापत्तिः, तत्र आकाशत्वव्याप्यपर्याप्ति-सम्बन्धेन द्वित्वादिमद्भेदस्य तादृशसम्बन्धेन द्वित्वविशिष्टाप्रसिद्धया केवलपर्याप्तिसम्बन्धेन च तद्वद्भे

रूपितकालिकसम्बन्धावच्छिन्नरजतत्वनिष्ठनिरूपकतावत्त्वेन भ्रमत्वानुपपत्तिरतः स्वानवच्छे-दकसम्बन्धानवच्छिन्नत्वनिवेशः। गुणो विशिष्टसत्तावानिति ज्ञानस्य तादृशगुणनिष्ठाधिकरण-तानिरूपितसत्तात्वावच्छिन्ननिरूपकताविशिष्टत्वाद् द्वितीयसम्बन्धनिवेशः। महानसीयवह्नि-विषयकं ज्ञानं विषयितासम्बन्धेन वह्निमदितिज्ञानसंग्रहाय तृतीयसम्बन्धनिवेशः। शुक्ताविदं रजतमितिज्ञानीयरजतत्वनिष्ठनिरवच्छिन्नविशेषणतायास्तादृशशुक्तित्वनिष्ठनिरवच्छिन्ननिरूप-कताविशिष्टत्वात्तत्सङ्ग्रहाय चतुर्थसम्बन्धनिवेश इति बोध्यम्।

अपेक्षाबुद्धिनाशाच्च नाशस्तेषां निरूपितः ॥ १०८ ॥

प्रथममपेक्षाबुद्धिः, ततो द्वित्वोत्पत्तिः, ततो विशेषणज्ञानं द्वित्वत्वनिर्विकल्पात्मकं, ततो द्वित्वत्वविशिष्टप्रत्यक्षमपेक्षाबुद्धिनाशश्च, ततो द्वित्वनाश इति।

यद्यपि ज्ञानानां द्विक्षणमात्रस्थायित्वम्, योग्यविभुविशेषगुणानां स्वोत्तरवृत्तिगुणनाश्यत्वात्, तथाऽप्यपेक्षाबुद्धेस्त्रिक्षणावस्थायित्वं कल्प्यते। अन्यथा निर्विकल्पककालेऽपेक्षाबुद्धिनाशानन्तरं द्वित्वस्यैव नाशः स्यात्, न तु द्वित्वप्रत्यक्षं, तदानीं विषयाभावात्, विद्यमानस्यैव चक्षुरादिना ज्ञानजननो-

दिनकरी।

त्वात्, द्वित्वपर्याप्तेर्द्वित्वस्वरूपतया तस्य घटादावपि सत्त्वात्। न चोद्देश्यतावच्छेदकव्याप्यत्वविशिष्टसमवायस्य द्वित्वससर्गतां स्वीकृत्याऽऽकाशादिति प्रयोगवारणसम्भवादलं पर्याप्त्येति वाच्यम्। तथा सति घटादिति प्रयोगस्य प्रामाण्यानुपपत्तेः, समवायस्यैकत्वेन घटत्वव्याप्यसमवायस्याऽप्रसिद्धेरित्यन्यत्र विस्तरः।

अपेक्षाबुद्धिनाशाच्च तेषां नाश इति मूलस्य तृतीयक्षणे अपेक्षाबुद्धिनाशाच्चतुर्थक्षणे द्वित्वादीनां नाश इति नाऽर्थः, परं तु चतुर्थक्षणेऽपेक्षाबुद्धिनाशात् पञ्चमक्षणे इत्यर्थ इति ज्ञापनाय वैशेषिकप्रक्रियां प्रदर्शयति—**प्रथममित्यादिना**। द्वित्वत्वविशिष्टप्रत्यक्षं—द्वित्वत्वविशिष्टलौकिकप्रत्यक्षम्।

अन्यथा—अपेक्षाबुद्धेर्द्विक्षणमात्रावस्थायित्वे। **द्वित्वस्यैव नाश इति**। द्वित्वस्य नाश एवेत्यर्थः। ननु तदानीं द्वित्वाभावेऽपि तत्पूर्वक्षणे द्वित्वसत्त्वान्न द्वित्वप्रत्यक्षानुपपत्तिरत आह। **विद्यमानस्यैवेति**। 'सम्बद्धं वर्तमानं च गृह्यते चक्षुरादिना—' इत्यनुरोधाल्लौ-

रामरुद्री।

दस्याऽऽकाशे द्वित्वसत्त्वेन प्रत्याययितुमशक्यत्वादिति चेन्न। केवलपर्याप्तिसम्बन्धेनाऽऽकाशे द्वित्वस्य सत्त्वेऽपि आकाशत्वावच्छेदेनाऽवर्तमानतया तदवच्छेदेन तद्बुद्भेदबोधने बाधकाभावात्। व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्यो हेश्यतावच्छेदकावच्छेदेनैव नञो बोधकतया घटौ न द्वावित्यादिप्रयोगवारणाय स्वीकरणीयत्वादिति। **द्वित्वस्वरूपतयेति**। एतच्च प्रत्येकमधिकरणे पर्याप्तिभेदसत्त्वमाश्रित्योक्तम्। **घटत्वव्याप्यसमवायस्याऽप्रसिद्धेरिति**। न चोद्देश्यतावच्छेदकव्याप्यद्वित्वादिसमवायादिना द्वित्वादेरेव प्रकारत्वमस्तु, तथा च समवायस्य समवायत्वेनोद्देश्यतावच्छेदकाव्याप्यत्वेऽपि तादृशसमवायत्वेन व्याप्यत्वमुपपद्यत इति वाच्यम्। तथा सत्युद्देश्यतावच्छेदकव्याप्यद्वित्वादेरेव लाघवेन तत्सम्बन्धतौचित्यात्। न चेष्टापत्तिः, एवमपि पर्याप्तेः संसर्गतावच्छेदकत्वे गौरवात्। तादृशद्वित्वादेरेव द्वित्वादिपर्याप्त्यात्मकत्वस्य पूर्वमेवोक्ततया तन्निरासासम्भवात्। न चैवमपसिद्धान्तः, 'पर्याप्तिश्चाऽयमेको घट इमौ द्वावितिप्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः—'इत्यवच्छेदकत्वनिरुक्तिदीधितौ तस्या द्वित्वादिस्वरूपत्वकथनादिति। नन्वेवं धवखदिरौ छिन्धीत्यादौ उद्देश्यतावच्छेदकव्याप्यपर्याप्तिसम्बन्धेन तादृशधवखदिरवृत्तिद्वित्वस्याऽन्वयानम्भवात्तादृशवाक्याच्छाब्दबोधानुपपत्तिः, तादृशस्थले धवखदिरवृत्तिसाहित्यस्योद्देश्यतावच्छेदकत्वाभ्युपगमे च द्वन्द्वे लक्षणावश्यकतया मीमांसकमतप्रवेशप्रसङ्ग इत्यत आह। **अन्यत्र विस्तर इति**। तथा च तादृशस्थले विभक्त्यर्थद्वित्वप्रकारकत्वेनैव धवखदिरबोधस्य पूर्वं स्वीकृततया तत्रोक्तदूषणानवकाश इति भावः। अधिकमेतत्तत्त्वं व्युत्पत्तिवादे द्रष्टव्यमित्यास्तां विस्तरः।

दिनकरी

किंकप्रत्यक्षं प्रति द्वित्वादेर्विषयस्य कार्यसहभावेन हेतुत्वादिति भावः। ननु योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरवर्तिविशेषगुणत्वेन हेतुतयाऽपेक्षाबुद्ध्युत्तरक्षणोत्पन्नस्मृत्या संस्कारेण वाऽपेक्षाबुद्धिनाशः केन वारणीय इत्याशङ्कामुपसंहारव्याजेन परिहरति। **तस्मादिति।**

रामरुद्री।

कार्यसहभावेन हेतुत्वादिति। लौकिकविषयतासम्बन्धेनैव प्रत्यक्षं प्रति इन्द्रियसन्निकर्षस्य हेतुतया कार्याधिकरणवृत्त्यत्यन्ताभावप्रतियोगितानवच्छेदकधर्मावच्छिन्नस्वरूपकारणत्वनिर्वाहाय विषयस्य कार्यकालावस्थायितायाः आवश्यकत्वात्। अन्यथा तादृशकार्यतावच्छेदकसम्बन्धेन कार्याधिकरणाप्रसिद्धया तद्घटितकार्यकारणभावस्यैवोच्छेदापत्तेरिति भावः। अथाऽत्र तादृशसम्बन्धेन कार्यासमानकालीनप्रत्यक्षव्यक्तिविशेषाधिकरणाप्रसिद्धावपि कार्यतावच्छेदकावच्छिन्नतादृशप्रत्यक्षव्यक्त्यन्तराधिकरणप्रसिद्धया न कार्यकारणभावासम्भव इत्यलं विषयस्य कार्यसमानकालीनत्वनियमाङ्गीकारेण। न चैवं समवायिकारणस्यापि कार्यकालीनतया कारणत्वमुच्छिन्नं भविष्यति, तत्राऽपि तुल्ययुक्त्या प्रकृतकार्याधिकरणाप्रसिद्धावपि तादृशकार्यतावच्छेदकावच्छिन्नव्यक्त्यन्तराधिकरणस्य प्रसिद्धतया कार्यकारणभावस्योपपादयितुं शक्यत्वादिति वाच्यम्। तत्र समवायिकारणनाशस्य प्रतियोगितासम्बन्धेन कार्यनाशं प्रति स्वप्रतियोगिसमवेतत्व-कालिकोभयसम्बन्धेन नाशत्वेन हेतुत्वस्योपपादनाय तथात्वस्वीकारावश्यकत्वात्, प्रकृते च विषयनाशस्य प्रत्यक्षनाशकत्वविरहेण तथात्वाङ्गीकारे मानाभावादिति चेन्न। असमानकालीनवस्तुनि लौकिकप्रत्यक्षविषयतायाः असम्भवेन निरधिकरणकार्योत्पत्तिप्रसङ्गवारणायैव विषयस्य कार्यकालीनतया प्रत्यक्षहेतुत्वावश्यकत्वात्, तदभिप्रायेणैव 'सम्बद्धं वर्तमानं च-' इत्याद्यभियुक्तोक्तेः सङ्गमनीयत्वादिति।

उत्तरक्षणोत्पन्नस्मृत्येति। यादृशस्थलविशेषे नियतोद्बोधकसम्बन्धिग्रहाद्यात्मिकैवाऽपेक्षाबुद्धिस्तत्र तदुत्तरोत्पन्नयाऽपरसम्बन्धिस्मृत्येत्यर्थः। तेन सर्वत्र अपेक्षाबुद्ध्युत्तरं नियमेन स्मृत्युत्पादे मानाभावेऽपि न क्षतिः। ननु न कल्प्यत एव तादृशस्थलेऽपेक्षाबुद्धेः क्षणत्रयावस्थायित्वं, तृतीयक्षणे तन्नाशाच्चतुर्थक्षणे द्वित्वादिविनाशोऽपि आश्रयनाशमात्रार्धानद्वित्वनाशवदगत्या क्वचिदिष्यत एवेति न दोष इत्यत आह। **संस्कारेण वेति।** अपेक्षाबुद्धेः प्रायशः अपेक्षात्मकत्वे मानाभावेन सर्वत्रैव तादृशस्थले संस्कारोत्पादावश्यकत्वादिति भावः। इदमुपलक्षणम्। अपेक्षाबुद्धयनुव्यवसायेनाऽपि तन्नाशसम्भवादिति। अत्रेदमवधेयम्। अपेक्षाबुद्धेर्निर्विकल्पकात्मिकायाः स्वीकारे ततः संस्कारस्याऽनुव्यवसायस्य चाऽसम्भवान्न द्वितीयक्षणे तन्नाशः समर्थयितुं शक्यते। तद्विशेष्यकतत्प्रकारकसंस्कार प्रति तद्विशेष्यकतत्प्रकारकानुभवस्यैव हेतुतया निर्विकल्पकस्य प्रकारतादिरहितत्वेन ततः संस्कारस्योत्पादासम्भवात्। न च यादृशस्थलविशेषे घटार्थांशे विशेषणज्ञानादिसम्पत्त्या सविकल्पात्मिका तत्तदेकत्वांशे च निर्विकल्पकात्मिकैवाऽपेक्षाधीस्तत्र संस्कारानुव्यवसायादेरुत्पादावश्यकतया तादृशस्थले तस्यास्त्रिक्षणावस्थायित्वानुपपत्तिर्दुर्वारेति वाच्यम्। इष्टापत्तेः, तादृशयत्किञ्चित्स्थलविशेषे तथा स्वीकारे बाधकाभावात्। न च निर्विकल्पकात्मकापेक्षाबुद्धीनां द्वित्वादिहेतुत्वेऽपसिद्धान्तः, अपेक्षाबुद्धेरेकत्वादिप्रकारकद्रव्यविशेष्यकज्ञानत्वेनैव हेतुत्वादिति वाच्यम्। 'ननु बध्यघातकपक्षेऽपि तथा ज्ञानानुत्पत्तिप्रसङ्गः। कथम्? द्वित्वसामान्यबुद्धिसमकालं संस्कारादपेक्षाबुद्धिनाशादिति। न। समूहज्ञानस्य संस्कारहेतुत्वात्, समूहज्ञानमेव संस्कारकारणम्, नाऽऽलोचनज्ञानमित्यदोषः-'इत्यादिभाष्ये एव निर्विकल्पकात्मकापेक्षाबुद्धेर्हेतुत्वोक्त्या नानैकत्वविषयकज्ञानत्वेन निर्विकल्पकसाधारणेनैव रूपेणाऽपेक्षाबुद्धेर्द्वित्वादिहेतुत्वाङ्गीकारावश्यकत्वात्। यत्तु तत्तदेकत्वविशिष्टद्रव्यज्ञानात्मिकाया एवाऽपेक्षाबुद्धेः संस्कारहेतुत्वादुक्तस्थले च तत्तदेकत्वविशेष्यकज्ञानमात्रादेव द्वित्वोत्पादाभ्युपगमान्न तत्क्षणे संस्कारादपेक्षाबुद्धिनाशसम्भव इत्युक्तभाष्याभिप्राय इति केश्चिदुक्तम्, तत्तुच्छम्, आलोचनज्ञानत्वस्य निर्विकल्पकत्वरूपतायाः अविप्रतिपन्नतयोक्तार्थकल्पनानुपपत्तेः, निरुक्तरीत्या सर्वत्रैकत्वविशेष्यकस्मरणानभ्युपगमे सुबादिभ्यो

रामरुद्री।

जायमानस्य तत्तदैकत्वस्मरणस्योच्छेदापत्तेरिति। न च निर्विकल्पात्मकापेक्षाधीतोऽपि द्वित्वोत्पत्तिः सर्वत्र न समर्थयितुं शक्यते, निर्विकल्पकस्यैकत्वसविकल्पकहेतुतया सर्वत्र सविकल्पकोत्पादावश्यकत्वे तत एव तद्विनाशस्य तत्तृतीयक्षणे आवश्यकत्वादिति वाच्यम्। एवमपि प्रथमं निर्विकल्पकात्मिकाऽपेक्षाबुद्धिः, ततो द्वित्वोत्पत्तिः, एकत्वसविकल्पात्मकापेक्षाबुद्धयन्तरं च, ततो निर्विकल्पकात्मकापेक्षाबुद्धिविनाशः, द्वित्वत्वसामान्यज्ञानम्, द्वित्वान्तरोत्पत्तिश्च, ततः प्रथमद्वित्वविनाशः, द्वितीयद्वित्वसविकल्पकं च, ततो द्वितीयद्वित्वजनकापेक्षाबुद्धिनाशः, द्वे द्रव्ये इति ज्ञानं च, ततो द्वितीयद्वित्वविनाश इत्यभ्युपगमादेवाऽपेक्षाबुद्धेः क्षणत्रयानवस्थायित्वेऽपि क्षत्यभावात्। प्रत्यक्षात्मिकाया एव चाऽपेक्षाबुद्धेः सर्वत्र द्वित्वादिजनकत्वोपगमेन सर्वत्रैकत्वनिर्विकल्पकस्याऽवश्यकल्पनीयत्वात्, स्मृत्याद्यात्मकापेक्षाबुद्धेरपि द्वित्वादिजनकत्वस्वीकारेऽपि तदुत्तरमेकत्वविशिष्टवैशिष्ट्यावगाहितदनुव्यवसायात्मकापेक्षाबुद्ध्यन्तरात् द्वित्वान्तरोत्पादसम्भवाच्च। न च प्रथमद्वित्वस्य कस्यचित्प्रत्यक्षाविषयस्योत्पादस्वीकारोऽयुक्त इति वाच्यम्। परमाणुद्वित्वादिवदीश्वरादिप्रत्यक्षविषयतायास्तत्र सत्त्वेनोक्तदोषायोगात्, द्वित्वत्वसामान्यज्ञानात्मकनिर्विकल्पकविषयताया अपि तत्र सत्त्वाच्च, आश्रयनाशजन्यनाशस्थले व्यभिचारेण तदीयापेक्षाबुद्धिजन्यं द्वित्वं तेन गृह्यत एवेति नियमे मानाभावाच्च। न चैवमपि निरुक्तप्रक्रिययाऽपेक्षाबुद्धेः क्षणत्रयानवस्थायित्वेऽपि द्वित्वप्रत्यक्षोपपादनं न सम्भवति, तत्स्थले प्रथमापेक्षाबुद्धिनाशात् प्रथमद्वित्वस्यैव द्वितीयद्वित्वस्याऽपि नाशावश्यकत्वादिति वाच्यम्। अतीतापेक्षाबुद्धिनाशाद्वर्तमानापेक्षाबुद्धिजन्यद्वित्वनाशापत्त्युदासाय तत्तदपेक्षाबुद्धेर्नाशकतायास्तत्तदपेक्षाबुद्धिजन्यद्वित्वनिरूपितत्वस्वीकारावश्यकत्वेन विशिष्यैव विश्रामात्, अत एवैकस्या एवाऽपेक्षाबुद्धेर्व्यक्तेर्द्वित्वद्वयं तत्र न स्वीकृतम्, अन्यथा प्रथमापेक्षाबुद्धिनाशादेव द्वितीयद्वित्वविनाशापत्तेः। न च तथाऽप्युक्तनिर्विकल्पकात्मकापेक्षाबुद्धिस्थले सविकल्पकात्मकापेक्षाबुद्धिजन्यद्वितीयद्वित्वस्याऽपि विनाश आस्ताम्, नैतावता द्वित्वप्रत्यक्षमनुपपन्नं, प्रथममपेक्षाबुद्धेस्ततो द्वित्वस्य सविकल्पकस्य च ततोऽपेक्षाबुद्धिनाशाद्वित्वनिर्विकल्पकद्वित्वान्तराणामुत्तरक्षणे तादृशसविकल्पकवशाद्द्वित्वान्तरद्वित्वप्रत्यक्षप्रथमद्वित्वद्वयनाशयोरनन्तरमेव तृतीयद्वित्वनाशस्वीकारात्। द्वित्वप्रत्यक्षस्य च तृतीयद्वित्वविषयकत्वस्वीकारात्, नाशं प्रति प्रतियोगिनः कारणत्वेन द्वितीयद्वित्वद्वितीयक्षणे तन्नाशासम्भवात्, द्वे द्रव्ये इति प्रत्यक्षस्य च द्वित्वविनाशकालभाविन उपनीतभानात्मकत्वमपेक्षाबुद्धेरिक्षणावस्थायित्वादिभिरभ्युपगम्यत एवेति तदभ्युपगमे नाऽस्माकमपसिद्धान्तदोषप्रसङ्गोऽपि। अन्यथा तन्मते चतुर्थक्षणेऽपेक्षाबुद्धिनाशात् पञ्चमक्षणे निरुक्तप्रत्यक्षोत्पादकाले तन्नाशावश्यकतया तस्य लौकिकविषयताश्रयत्वायोगादिति वाच्यम्। तृतीयद्वित्वस्य तत्प्रत्यक्षात्पूर्वमभावेन प्रत्यक्षविषयत्वायोगात्, तैर्द्वित्वनिर्विकल्पकस्याऽवश्यापेक्षिततया ततोऽपेक्षाबुद्धिविनाशस्याऽनायत्याऽङ्गीकरणीयत्वेन गत्यन्तराभावात्तादृशप्रत्यक्षस्य द्वित्वांशेऽलौकिकत्वस्वीकारावश्यकत्वेऽपि निरुक्तरीत्योपपत्तौ लौकिकत्वस्वीकारे क्षत्यभावाच्च। अथ वा मतद्वयेऽपि द्वित्वगुणज्ञानकाले द्वे द्रव्ये इति ज्ञानस्याऽसम्भवात् पञ्चमक्षणे तस्यस्वीकृतं लौकिकमेव। तस्य द्वित्वत्वविशिष्टवैशिष्ट्यावगाहितया द्वित्वत्वप्रकारकज्ञानस्य तद्धेतुभूतस्य पूर्वं विरहेणाऽसम्भवात्। न चैवं 'यदा बोद्धुश्चक्षुषा समानासमानजातीययोर्द्रव्ययोः सन्निकर्षे सति तत्संयुक्तसमवेतसमवेतैकत्वसामान्यज्ञानोत्पत्तावेकत्वसामान्यतत्सम्बन्धज्ञानेभ्य एकगुणयोरनेकविषयिण्येका बुद्धिरुत्पद्यते, तदा तामपेक्ष्यैकत्वाभ्यां स्वाश्रययोर्द्वित्वमारभ्यते, ततः पुनस्तस्मिन् द्वित्वसामान्यज्ञानमुत्पद्यते, तस्माद् द्वित्वसामान्यज्ञानादपेक्षाबुद्धेर्विनश्यत्ता, द्वित्वसामान्यतत्सम्बन्धतज्ज्ञानेभ्यो द्वित्वगुणबुद्धेरुत्पद्यमानतेत्येकः कालः, तत इदानीमपेक्षाबुद्धिविनाशाद् द्वित्वगुणस्य विनश्यत्ता, द्वित्वगुणज्ञानं द्वित्वसामान्यज्ञानस्य विनाशकारणम्, द्वित्वगुणतज्ज्ञानतत्सम्बन्धेभ्यो द्वे द्रव्ये इति द्रव्यबुद्धेरुत्पद्यमानतेत्येकः कालः, तदनन्तरं द्वे द्रव्ये इति द्रव्यज्ञानस्योत्पादः, द्वित्वस्य विनाशः, द्वित्वगुणबुद्धेर्विनश्यत्ता, द्रव्यज्ञानात् संस्कारस्योत्पद्यमानतेत्येकः कालः, तदनन्तरं द्रव्यज्ञानात् द्वित्वगुणबुद्धेर्विनाशो द्रव्यबुद्धेरपि संस्कारात्-'इतिभाष्यग्रन्थविरोधः, तत्र द्वित्वनाशकाल एव तद्विशिष्टद्रव्यज्ञानोत्पादोपगमेन द्वित्वांशेऽ-

रामरुद्री।

लौकिकत्वस्यैव तज्ज्ञानेऽवश्यमङ्गीकार्यत्वादिति वाच्यम्। स्वदुक्तरीत्योक्तभाष्यस्य द्रव्यज्ञाने द्वित्वांशेऽलौकिकत्वमभिप्रेतमित्यभ्युपगमे 'शोभनमेतद्विधानं वध्यघातकपक्षे, सहानवस्थानलक्षणे तु विरोधे द्रव्यज्ञानस्याऽनुत्पत्तिप्रसङ्गः। कथम् ? गुणबुद्धिसमकालमपेक्षाबुद्धिविनाशाद्द्वित्वविनाशे तदपेक्षस्य द्वे द्रव्ये इति द्रव्यज्ञानस्याऽनुत्पत्तिप्रसङ्ग इति। लैङ्गिकवज्ज्ञानमात्रादिति चेत्,—स्यान्मतम्, यथाऽभूतं भूतस्येत्यत्र लिङ्गाभावेऽपि ज्ञानमात्रादनुमानं, तथा गुणविनाशेऽपि गुणबुद्धिमात्राद्द्रव्यप्रत्ययः स्यादिति। न। विशेष्यज्ञानत्वात्, न हि विशेष्यज्ञानं सारूप्यादिविशेषणसम्बन्धमन्तरेण भवितुमर्हति। तथा चाऽऽह सूत्रकारः-'समवायिनः स्वैरेत्याच्छ्वेत्यबुद्धेः श्वेते बुद्धिस्ते कार्यकारणभूते-'इति। न तु लैङ्गिकं ज्ञानमभेदेनोत्पद्यते, तस्माद्विषमोऽयमुपन्यासः। न। आशुत्पत्तेः, यथा शब्दवदाकाशमित्यत्र त्रीणि ज्ञानान्याशूत्पद्यन्ते, तथा द्वित्वादिज्ञानोत्पत्तावित्यदोषः-' इत्याद्यग्रिमभाष्यग्रन्थविरोधापत्तेः, तत्र लैङ्गिकवज्ज्ञानमात्राधीनत्वस्य द्रव्यप्रत्यये निराकृतत्वात्। अतो 'विशेष्यज्ञानत्वात्' इत्यनेन द्वे द्रव्ये इति ज्ञानस्य द्रव्यविशिष्टद्वित्वलौकिकसाक्षात्कारत्वस्य प्रतिपादनाद् उपनीतस्य विशेषणतया भानस्यैव सर्वसम्मतत्वेन द्वित्वविशेष्यकं द्रव्यप्रकारकं प्रत्यक्षं न स्यादित्येव तदर्थो बोध्यः। अविषमानेऽपि लौकिकविषयत्वं भाष्यकुद्भिरभ्युपेयत एवेति(१) न पूर्वापरसन्दर्भविरोधप्रसङ्गोऽपि। न चैवं द्रव्ययोर्द्वित्वमित्याकारकमेव ज्ञानमुदाहर्तव्यम्, न तु द्वे द्रव्ये इत्याकारकमिति वाच्यम्। द्वे द्रव्ये इत्याकारस्य तुल्यवित्तितया चतुर्थक्षणे तदसम्भवद्योतनैकपरतयोपपत्तेः, अन्यथा द्वित्वं द्रव्ययोरिति ज्ञानस्याऽपेक्षाबुद्ध्यात्मकविशेषणतावच्छेदकप्रकारकज्ञानस्य च पूर्वं सत्त्वेन चतुर्थक्षण एव तत्किमिति नाऽङ्गीक्रियत इति शङ्कायां अनिवृत्तिप्रसङ्गात्। 'सम्बद्धं वर्तमानं च-'इत्यादिप्रवादस्तु प्राक्क्षणे वर्तमानतापरः। अत एवाऽऽशुविनाशिसुखादिप्रकारकलौकिकप्रत्यक्षस्य सुखाद्युत्पादतृतीयक्षणे निर्वाहः, विशेषणज्ञानस्य हेतुतयोत्पत्तिक्षणे तादृशहेतु द्वितीयक्षणे तद्विशिष्टबुद्धयसम्भवात्।

यद्वेन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं सामान्यं प्रत्यासत्तिरित्यभ्युपगमे द्वित्वसामान्यलक्षणया तद्द्वित्वाश्रयसकलविषयकमेकं सामान्यलक्षणाजन्यज्ञानं पञ्चमक्षण एवोपगन्तव्यम्, तस्य च विशेष्यज्ञानत्वात् ज्ञानलक्षणाजन्यत्वं न सम्भवति, द्वित्वस्य चतुर्थक्षणे नाशाभ्युपगमे च प्रत्यासत्तिविरहेण तस्य पञ्चमक्षणेऽसम्भवप्रसङ्ग इत्येवं भाष्यकृतां निगर्वोऽवसेयः।

वस्तुतस्तु भाष्यकुन्मते विशेषणत्वं विशेष्यत्वं वा न विषयतारूपं, किं तु भासमानवैशिष्ट्यप्रतियोगित्वानुयोगित्वरूपमेव तत्। इत्थं च तन्मतेऽविषयस्याऽपि विशेषणत्वमिष्यत एव। अत एव सञ्ज्ञाविशिष्टसञ्ज्ञ्यादिप्रत्यक्षे सञ्ज्ञाया अविषयत्वेऽपि तटस्थज्ञानविषयतयैव विशेषणत्वमिति जरन्नैयायिकानां प्राभाकराणां च मतमपि सङ्गच्छते। तदुक्तम्—

'सञ्ज्ञा हि स्मर्यमाणाऽपि प्रत्यक्षत्वं न बाधते। सञ्ज्ञिनः सा तटस्था हि न रूपाच्छादनक्षमा—'

इति। स्पष्टं चैतदुत्सन्नप्रच्छन्नवादमाथुर्यादिषु। विशिष्टबुद्धौ च सम्बन्धसम्बन्धस्याऽपि प्रतियोगित्वानुयोगित्वादेर्भानमिष्यत एव। इत्थं च सम्बन्धसम्बन्धावगाहिज्ञानस्य विशिष्टबुद्धित्वे तथाविधसमूहालम्बनस्याऽपि तथात्वापत्तिवारणाय विशेषणज्ञानस्य तज्ज्ञाने कारणत्वं स्वीक्रियते। विशेषणविरहदशायां तद्विशिष्टत्वावगाहिबुद्धेरेतन्मतेऽसम्भवेन तदर्थं विशिष्टबुद्धौ विशेषणस्य विशेषणसम्बन्धस्य च द्वयोरपि हेतुत्वं स्वीक्रियते। यद्यपि इन्द्रियसन्निकर्षस्य प्रत्यक्षहेतुतयाऽविद्यमानस्य तदभावादेव न विशिष्टबुद्धिम-

---

(१) नन्वेवं घटादेर्यदाकदाचिदपि लौकिकविषयत्वापत्तिरिति चेन्न, लौकिकविषयतासम्बन्धेन प्रत्यक्षं प्रति इन्द्रियसन्निकर्षस्य हेतुतया तदसत्त्वदशायां तदसम्भवात्। कार्यतावच्छेदकसम्बन्धेन कार्याधिकरणे कार्यविरहप्राक्क्षणावच्छेदेन वृत्तिर्योऽभावस्तत्प्रतियोगितानवच्छेदकधर्मवत्त्वरूपायाः कारणताया लौकिकप्रत्यक्षप्राक्क्षणे तदधिकरणे इन्द्रियसन्निकर्षसत्त्वेनैवोपपत्तेः। कार्याधिकरणत्वमात्रनिर्वाह्यायैव चाऽसमानकालीनेऽपि लौकिकविषयतास्वीकारादिति॥

रामरुद्री ।

म्भवः, तथाऽपि शब्दविशिष्टप्रत्यक्षे शब्दादेर्भावितत्पुरुषीयप्रत्यक्षे च तद्गोचरस्य भाविघटादेरहेतुत्वेऽनागतादिशब्दानां घटादीनामपि विशिष्टबुद्धिप्रसङ्गो दुर्वारः, तत्रेन्द्रियसन्निकर्षस्य सत्त्वात् । विशेषणस्याऽपि हेतुत्वे तु तस्येदानीमभावादेव न तद्विशिष्टबुद्धिप्रसङ्गः । अत एव भाष्यकृता 'यथा शब्दवदाकाशमित्यत्र—'इत्यादिना शब्दविशिष्टबुद्धिरेवोदाहृता । इन्द्रियसन्निकर्षस्य च न कार्यान्यवहितपूर्वक्षणवृत्तित्वविशिष्टत्वेन कार्योत्पत्तिप्रयोजकत्वं, सामान्यलक्षणातोऽतीतादिविषयकप्रत्यक्षोदयादित्येव भाष्यकृताभिप्रायः । विवेच्यमेतदग्रे एतन्मतस्य च विषयतास्वरूपविशेषणतादिवादिनव्यानभिप्रेततया तद्विरोधो न दोषायेति ध्येयम् ।

प्राचीनास्तु द्वित्वनाशकाले द्वित्वविशिष्टबुद्धिर्ज्ञानलक्षणासन्निकर्षजन्यैव भाष्यकृतोऽभिप्रेता, अपेक्षाबुद्धेस्त्रिक्षणानवस्थायित्वेन तदनुपपत्तिरेव च तैरुद्भाव्यते । न च ज्ञानलक्षणासन्निकर्षतस्तादृशज्ञानोत्पत्तिसम्भवान्न वस्तुसत्ता तत्राऽऽवश्यकी, अन्यथा घटध्वंसादिप्रत्यक्षानुपपत्तिरिति वाच्यम् । न हि ज्ञानलक्षणासन्निकर्षजन्यत्वेनाऽस्य विशेषणमात्रजन्यत्वं भाष्यकृताऽभिधीयते, येनोक्तापत्तिः, अपि तु विशेष्यज्ञानत्वेन हेतुना तत्र भाष्यकृता विशेषणजन्यत्वं व्यवस्थाप्यत इति त्वदुक्तदोषस्याऽसम्भवात् । अथ विशेष्यज्ञानत्वेनाऽपि हेतुना तत्र विशेषणजन्यत्वं न साधयितुं शक्यम्, तत्प्रकारकविशेष्यज्ञाने तद्धेतुत्वस्यैव त्वया वाच्यतया घटध्वंसादिप्रत्यक्षस्थले एवमपि व्यभिचारानुद्धारात्, तत्राऽपि घटनिष्ठप्रकारतानिरूपितविशेष्यताशालित्वस्य तादृशप्रत्यक्षे सर्वसम्प्रतिपन्नत्वात् । न चाऽतद्व्यावृत्तिबोधकं विशेषणं(१), यत्र च सा बुध्यते तद्विशेष्यमिति प्राचीनैरभ्युपगम्यते, प्रकारत्वविशेष्यत्वयोरेव विशेषणत्वविशेष्यत्वात्मकत्वे उपलक्षणविशेषणव्यवस्थाया एवाऽसम्भवेन जटाभिस्तापस इत्यादिप्रयोगवन्नीलेन घट इत्यादि प्रयोगस्याऽपि प्रसङ्गात् । अतद्व्यावृत्त्यादिबोधकत्वं विशेषणत्वमित्युक्तौ च न तथा प्रसङ्गः, अतद्व्यावृत्तिबोधहेतोरेव विशेषणत्वेन जटादेरसतस्तद्धेतुत्वासम्भवेन विशेषणत्वायोगात्, नीलो घट इत्यादौ च घटे नीलान्यव्यावृत्तेरपि बोध इष्यते, तद्धेतुश्च नीलादिरेव, जटाभिस्तापस इत्यादौ तु न सा प्रतीयते, कारणाभावादित्यतद्व्यावृत्तिबोधकत्वमेव विशेषणत्वमिति स्थितम् । इत्थञ्च 'विशेष्यज्ञानत्वात्' इति भाष्यग्रन्थस्याऽपि अतद्व्यावृत्तज्ञानत्वादित्येवार्थः, तथा च द्वे द्रव्ये इति ज्ञानस्य पञ्चमक्षणोत्पन्नस्याऽतद्व्यावृत्त्यवगाहितया तद्धेतोर्द्वित्वरूपविशेषणस्य तत्पूर्वसत्त्वमावश्यकमित्येव भाष्यकृतोक्तमिति नाऽसङ्गतिरिति वाच्यम् । द्वे द्रव्ये इति ज्ञाने द्वित्वविशिष्टस्य द्रव्यस्यैव बोधानुभवेनाऽतद्व्यावृत्तिबोधस्याऽनुभवविरुद्धतया तत्प्रतीतेरतद्व्यावृत्तिविषयकत्वहेतुना द्वित्वस्य पूर्वमावश्यकत्वकथनस्याऽन्याय्यत्वात् । न चाऽतद्व्यावृत्तिरभेद एव, तथा च नीलो घट इत्यादौ नीलादेरभेदसम्बन्धेन घटादावन्वयबोधः सर्वानुभवसिद्ध एव, भाष्यकारेणाऽपि द्रव्ये द्वित्वावच्छिन्नस्याऽभेदसम्बन्धावगाहिज्ञानमेव द्वे द्रव्ये इत्याकारकतयाऽभिप्रेतम्, न तु द्वित्वप्रकारकं, तस्य द्वित्वप्रत्यक्षकाल एव सम्भवेन तस्य चतुर्थक्षणं विहाय पञ्चमक्षणे उक्त्यनौचित्यात्, तज्जनकविशेषणज्ञानस्य च निर्विकल्पकात्मकस्य तत्पूर्वं सत्त्वेन चतुर्थक्षणे तदुत्पादाभ्युपगमे बाधकाभावात् । द्वित्वत्वविशिष्टवैशिष्ट्यावगाहिनो द्वे द्रव्ये इति ज्ञानस्य तत्पूर्वं विशेषणतावच्छेदकप्रकारकज्ञानविरहेणाऽसम्भवेऽपि विशेष्ये विशेषणमिति रीत्या तज्ज्ञानस्य दुरपन्हवत्वात् । इत्थं च अभेदसम्बन्धेन द्वित्वविशिष्टप्रकारकज्ञाने द्वित्वस्य हेतुत्वं वाच्यम्, द्वित्वविशिष्टस्य तादात्म्येन हेतुत्वे तस्य यावदाश्रयमवस्थानेन उपलक्षणस्थलेऽपि द्वे द्रव्ये इत्यादिवाक्याच्छाब्दबोधापत्तेः, द्वित्वस्य हेतुत्वे तु तत्सत्त्वदशायामेव द्वे द्रव्ये इत्यादितो बोधसम्भव इत्युपपद्यते । तथा च जटावांस्तापस इत्यादिवाक्यजन्यबोधेऽपि जटावतोऽभेदसम्बन्धेन प्रकारतया तच्छालिशाब्दबोधे जटाया अपि हेतुत्वेन तदभावादेव तत्काले तादृशशाब्दबोधासम्भवान्न तथा प्रयोगः, जटासत्त्वे तु जटावांस्तापस इति प्रयोग इष्यत एव । प्रकारत्वमात्रस्य विशेषणत्वरूपत्वे तु नैतादृशव्यवस्थासम्भवः, जटाभि-

(१) तद्भाववन्नेदबोधकं विशेषणमित्यर्थः । तेन न रक्तताद्दशायां घटादौ श्यामादेर्विशेषणत्वम् ।

रामरुद्री।

स्तापस इत्यत्राऽपि जटायाः प्रकारत्वेन विशेषणत्वप्रसङ्गात्, इष्टापत्तौ च तत्र जटावानित्यपि प्रयोगप्रसङ्गात्। तथा चोक्तयुक्त्या विशेष्यज्ञाने विशेषणस्य हेतुत्वावश्यकतया द्वित्वविशिष्टबुद्धौ द्वित्वस्य पूर्वकालसत्त्वमावश्यकमिति भाष्यसन्दर्भः सङ्गच्छत एव। अत एव 'इत्यक्षेन्द्रियविषयसामर्थ्याद्विशेषणं विशिष्टप्रतीतौ क्वचिदाश्रयानावेऽपि, न तु विशेषणतायां तदुपयोगः-'इत्याचार्यैरप्युक्तम्, प्रकारस्यैव विशेषणरूपत्वे तदसङ्गतेरिति वाच्यम्। घट इत्यादिप्रतीतेर्विशिष्टबुद्धित्वोच्छेदप्रसङ्गात्, तत्राऽभेदसम्बन्धेन घटान्वयबोधस्य दुर्वचतया घटत्वादेर्विशेषणत्वासम्भवात्, प्रकारस्यैव विशेषणत्वे च पूर्वोक्तसकलदोषवारणासम्भवादिति। यत्तु व्यावृत्यधिकरणतावच्छेदकत्वं विशेषणत्वम्, तदनवच्छेदकं चोपलक्षणम्। घटो नील इति बुद्ध्यनन्तरं नीलत्वावच्छेदेनाऽनीलव्यावृत्तिर्बुद्ध्यत इति तद्विशेषणम्, जटाभिस्तापस इत्यादौ तु न तथा, जटाया अधिकरणतानवच्छेदकत्वादिति मणिकृतोक्तम्। तन्न, एवं सति प्रकृते द्वे द्रव्ये इति ज्ञानस्य विशेष्यज्ञानत्वकथनानौचित्यात्। तत्कालेऽसतोऽधिकरणतावच्छेदकत्वस्वीकारस्याऽनुभवविरुद्धत्वप्रसङ्गाच्चेति चेत्, अत्र वदन्ति, विशेषणविशेष्यपदे हि अवयवशक्त्याऽभेदसम्बन्धावच्छिन्नप्रकारताकबोधजनकतन्निरूपितविषयतायाश्रयौ बोध्यतः, समुदायशक्त्या च प्रकारत्वविशेष्यत्वाख्यविषयतावद्विशिष्टम्, तथा च घट इति ज्ञाने घटत्वादेर्विशेषणत्वव्यवहारः प्रकारताख्यविशेषणत्वमादायैव। अभेदान्वयबोधहेतोरपि विशेषणपदेन लब्धुं शक्यतयोक्तकार्यकारणभावमवलम्ब्यैव भाष्यकृता द्वित्वस्य पूर्ववर्त्तितामात्रेण विशेषणत्वसम्भवोऽभिहित इति वक्तुं शक्यतया दोषाभावात्। तथा च द्वित्वाभावेऽपि द्वित्वस्य तदानीं विशेषणत्वमुपपन्नमेवेति।

तन्न, इत्थं सति जटाऽभावकाले भ्रान्तपुरुषस्य जटावांस्तापसः, लोहितः स्फटिक इत्यादिवाक्यजन्यबोधानुपपत्तेः। तत्र तदानीं जटादिरूपविशेषणविरहेण प्राचीनाभिप्रेतविशिष्टबुद्ध्युत्पादकसामग्र्यसम्पत्तेः। तस्मान्मणिकारोक्तदिशैव विशेषणोपलक्षणयोर्निर्वक्तव्यतया तन्मतानुसारेण विशेषणज्ञानस्य विशिष्टबुद्धिहेतुत्वसम्भवेऽपि विशेषणहेतुत्वस्याऽसिद्धेर्भवदुक्तदिशा भाष्यासङ्गत्यस्य दुरुद्धरत्वात्।

प्राचीनैकदेशिनस्तु विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्वं हि तत्प्रकारकज्ञानं प्रति तद्विषयकज्ञानत्वेनैव वक्तव्यम्, इत्थं च दोषराहित्यदशायामपि रजतत्वादेररजतेऽपि प्रकारतया भानप्रसङ्गः, विशेषणज्ञानसत्त्वादित्यतो रजतनिष्ठविशेष्यतासम्बन्धेन रजतत्वादिप्रकारकज्ञानं प्रति रजतत्वादेरपि स्वातन्त्र्येण हेतुत्वमावश्यकम्, इत्थञ्च रजतनिष्ठविशेष्यतासम्बन्धेन रजतत्वप्रकारकज्ञानस्य नाऽरजते आपत्तिः सम्भवति, कारणीभूतरजतत्वविरहात्। अरजतनिष्ठविशेष्यतासम्बन्धेनाऽपि रजतत्वप्रकारकं ज्ञानं नाऽऽपादयितुं शक्यम्, अरजतनिष्ठविशेष्यतासम्बन्धेन रजतत्वप्रकारकज्ञानजनकस्य दोषविशेषस्याऽभावादितिरीत्या पूर्वोक्तो दोषो वारयितुं शक्यते। इत्थ च विशेषणमात्रस्यैव पूर्वोक्तरीत्या विशिष्टबुद्धिहेतुत्वमावश्यकमिति द्वित्वादेः पूर्ववर्तितामात्रेणैव द्वे द्रव्ये इत्याकारकद्वित्वविशिष्टबुद्ध्युपपादनपरभाष्यसङ्गतिः। उपलक्षणत्वविरोधिविशेषणत्वं चेह पूर्वोक्तरीत्या नाऽभिप्रेतमिति न प्रागुक्तप्राचीनमतोद्भावितदोषलेशप्रसङ्गोऽपि। न चैव रक्तदण्डनिष्ठविशेष्यतासम्बन्धेन रक्तत्वप्रकारकप्रत्यक्षं प्रति रक्तत्वादेरपि हेतुत्वस्य तुल्ययुक्त्या वाच्यतया उपलक्षणविधया रक्तत्ववानहं रक्तदण्डवानिति प्रत्ययस्थले व्यभिचारो दुर्वार एव, तत्र तदानीं रक्तत्वाभावात्, रक्तत्वविशिष्टदण्डो नाऽस्ति, रक्तत्वोपलक्षितदण्डो नाऽस्ति, दण्डो नाऽस्तीत्यादिप्रतीतिसिद्धानामभावानां परस्परवैलक्षण्यस्य सर्वानुभवसिद्धतया उपलक्षणं रक्तत्वादिकं प्रकारतया भासत एव नेत्यपि वक्तुमशक्यत्वादिति वाच्यम्। तद्वन्निष्ठविशेष्यतासम्बन्धेन उपलक्षणीभूततत्प्रकारकज्ञानं प्रति हि तद्वन्निष्ठोभयावृत्तिधर्मवत्त्वसम्बन्धेन तद्धर्मस्य हेतुत्वमिष्यते, तथा चोपलक्षणस्थले ईदृशसम्बन्धेनोपलक्षणस्य कार्याधिकरणे सत्त्वानपायान्न दोष इति। अथैवं सामान्यलक्षणादिजन्यं निखिलघटविषयकमपि ज्ञानं न स्यात्, विनष्टघटेषु कार्याव्यवहितप्रागवच्छेदेनोक्तसम्बन्धेन सामान्यस्य विरहेण तस्य कार्याधिकरणवृत्तित्वघटितकारणत्वव्याघातात्। न च कार्याव्यवहितप्रागवच्छिन्नत्वस्य कार्याधिकरणनिरूपितवृत्तितायाश्चाभावनिष्ठायां विवक्षणीयतया तदवच्छेदेन

रामरुद्री।

विनष्टघटादिनिरूपितवृत्तित्वस्यैवाऽसिद्धया तन्निरूपितवृत्तितावदभावानां ग्रहीतुमशक्यतया वर्त्तमानघटादिनिरूपितवृत्तितानामेव धर्तव्यतया तस्या घटत्वाभावेऽसत्त्वान्न कार्याधिकरणवृत्त्यभावाप्रतियोगित्वरूपकारणत्वभङ्गसम्भव इति वाच्यम्। तथाऽपि यद्घटाश्रयव्यक्तीनां सर्वासां नाशानन्तरमेव तद्घटप्रकारकमनुमित्याद्यात्मकं ज्ञानमुत्पन्नं, तत्रोक्तकारणत्वभङ्गस्य दुरुद्धरत्वात्, तस्थले कार्याव्यवहितप्राक्क्षणावच्छिन्नकार्याधिकरणनिरूपितवृत्तितावदभावस्यैवाऽप्रसिद्धेः। न चोक्तरीत्या कारणत्वभङ्गवारणाय कार्यतावच्छेदकोटौ प्रत्यक्षत्वं निवेश्यत इति नाऽयं दोषः, सामान्यलक्षणाजन्यस्य प्रत्यक्षस्य यत्किञ्चिद्व्यव्यकार्यंशे लौकिकत्वनियमेन व्यापकधर्मावच्छिन्नसामग्रीघटकलौकिकसामग्रीविरहादेव यत्किञ्चिद्घटव्यक्त्याश्रयसकलपदार्थनाशोत्तरं प्रत्यक्षस्याऽसम्भवेन तत्र कार्यकारणभावस्यैवाऽकल्पनीयतयोक्तदोषाद्धारादिति वाच्यम्। एवं सत्यनुमित्यादिस्थले विशेष्यभाननियामकाभावादिति चेन्न। प्रत्यक्षस्थले विशेषणस्येवाऽनुमित्यादिस्थले परामर्शादेरेव नियामकतयोक्तदोषासम्भवात्। अत एव पर्वतीयवन्हेः परामर्शे पूर्वमभातत्वे पर्वतीयवह्न्यनुमितिर्न स्यादित्यतस्तत्र तद्भाननिर्वाहाय सामान्यलक्षणाप्रत्यासत्तिव्यवस्थापनमपि ग्रन्थकृतां युज्यते। न चैवं सामान्यलक्षणाप्रत्यासत्त्या सकलवन्हीनामेव परामर्शे भानतया सकलवन्हिविषयिण्येवाऽनुमितिः सर्वत्र भवेदिति वाच्यम्। यादृशस्थले दोषवशात्परामर्शकाले सकलवन्हिभानं न जातं तज्जन्यानुमितेरेव न्यूनविषयकत्वसम्भवात्। इत्थञ्च द्वित्वस्य द्वे द्रव्ये इति प्रत्यक्षार्थमव्यवहितपूर्ववर्त्तित्वमावश्यकमेवेति भाष्यग्रन्थसङ्गतिरित्याहुः,

तदपि तुच्छम्, यत्र पर्वतत्वेन पर्वतघटोभयावगाहि—पर्वतो वह्निमानिति ज्ञानं जातम्, तत्र पर्वतत्वावच्छिन्नविशेष्यताया एकस्या एव पर्वतघटोभयसाधारणतया वन्हिप्रकारकज्ञानस्य वन्हिमन्निष्ठविशेष्यतासम्बन्धेन घटेऽपि जायमानतया तत्र वन्हिविरहेण व्यभिचारप्रसङ्गात्, दोषविशेषबलेन निरवच्छिन्नविशेष्यकभ्रमस्याऽपि सम्भवेन तदनङ्गीकारासम्भवात्, तदनभ्युपगमेऽपि द्रव्यं वन्हिमदित्याकारकद्रव्यत्वावच्छेदेन वन्हिमत्त्वावगाहिज्ञानस्थले व्यभिचारो दुर्वार एव, तत्र वन्हिमन्निष्ठविशेष्यताया अवन्हिमत्साधारण्यात्। विशेष्यतादीनां विशेष्यभेदेन भेदमुपगम्य पर्वतनिष्ठविशेष्यतायां जलादावसत्त्वेन तादृशव्यभिचारवारणेऽपि प्रागुक्तभाष्यग्रन्थासङ्गतिर्दुष्परिहरैव, भवदुक्तरीत्योपलक्षणस्य कार्यपूर्वकालमसत्त्वेऽपि हेतुत्वसम्भवेन द्वे द्रव्ये इति विशेष्यज्ञाननिर्वाहाय द्वित्वस्याऽव्यवहितपूर्ववर्त्तित्वावश्यकताकथनस्याऽनौचित्यादिति निपुणतरमालोकनीयम्।

उच्छङ्कुलास्तु विशिष्टस्य शुद्धादतिरिक्ततया विशिष्टविषयकज्ञाने विशेषणस्य हेतुत्वमावश्यकमिति द्वे द्रव्ये इति ज्ञानस्य विशिष्टज्ञानतया तत्पूर्वं द्वित्वसत्त्वमावश्यकमित्यभिप्रायकतयोक्तभाष्यग्रन्थं सङ्गमयन्ति, तत्तु विशिष्टस्य शुद्धातिरिक्तत्वे प्रमाणविरहेण दूरमपोदितमिति।

इत्थञ्चोक्तभाष्यस्य दर्शितसकलप्राचीनमतानुसारेणाऽसंलग्नकतापरत्याऽस्मदुक्तार्थ एवाऽऽदर्तव्यः। तथा च प्रागुक्तरीत्याऽपेक्षाबुद्धेर्लक्षणानवस्थायित्वेऽपि सकलकार्योपपादनसम्भवात् तस्या लक्षणावस्थायित्वोपपादनाय नानाविधः प्रयासो ग्रन्थकृतां विफल एवेति।

अत्र ब्रूमः। यादृशस्थलविशेषे प्रथममपेक्षाबुद्धिः, लौकिकसामग्र्यपगमश्च, ततो द्वित्वोत्पत्तिः, कारणान्तरसम्पत्त्या पुनर्लौकिकप्रत्यक्षसामग्रीसम्पत्तिश्च, ततो द्वित्वस्य ज्ञानं, ततो द्वित्वाश्रययत्किञ्चिद्व्यक्तिविनाशः, तत्क्षणे द्वित्वप्रत्यक्षमनुभवसिद्धमपेक्षाबुद्धेर्लक्षणानवस्थायित्वे नोपपद्यते, अपेक्षाबुद्ध्यन्तरजातेन बुद्ध्यन्तरेण द्वित्वस्य ज्ञानकालेऽपेक्षाबुद्धिविनाशेन द्वित्वगुणज्ञानकाले द्वित्वविनाशप्रसक्त्या द्वित्वप्रत्यक्षस्य तत्कालेऽसम्भवात्। अपेक्षाबुद्ध्यन्तरेण सामान्यज्ञानकाले द्वित्वान्तरोत्पत्तिसमर्थनमपि न सम्भवति, तत्पूर्वक्षणे लौकिकसन्निकर्षविरहेण द्वित्वजननसमर्थापेक्षाबुद्धेस्तत्पूर्वक्षणेऽसम्भवात्, अपेक्षाबुद्धेश्च प्रत्यक्षात्मिकाया एव द्वित्वोत्पादकत्वस्योक्तत्वात्। तत्र चतुर्थक्षणे द्वित्वप्रत्यक्षं तु भवत्येव, अपेक्षाबुद्ध्यात्मकस्य यावदाश्रयप्रत्यक्षस्याऽसम्मते अपेक्षाबुद्ध्यधीनविशिष्टबुद्धेश्चाऽवगाहिबुद्ध्यन्तरात्मकस्य तस्य युष्मन्मते च सिद्धतया यावदाश्रयप्रत्यक्षरूपकारणाभावस्य तत्राऽऽशङ्कितुमशक्यत्वादित्यपेक्षाबुद्धेर्लक्षणावस्थायित्वमगत्या स्वीकरणीयमेवेत्यास्तां विस्तरेण।

पगमात्। तस्मात् द्वित्वप्रत्यक्षादिकमपेक्षाबुद्धेर्नाशकं कल्प्यते।

दिनकरी।

द्वित्वप्रत्यक्षादिकमिति। द्वित्वद्वित्वत्वनिर्विकल्पकमित्यर्थः। आदिना त्रित्वद्विपृथक्त्वादिप्रत्यक्षपरिग्रहः। योग्यविभुविशेषगुणत्वस्य स्वत्वस्य चानुगतस्याऽभावेन स्वोत्तरोत्पन्नगुणत्वस्याऽनुगतस्याऽभावात्तत्तद्व्यक्तित्वेनैव नाश्यनाशकभावस्य वाच्यतया 'द्वित्वत्वविशिष्टप्रत्यक्षरूपकार्यानुरोधेन द्वित्वद्वित्वत्वनिर्विकल्पकस्यैव तद्व्यक्तित्वेनापेक्षाबुद्धिनाशकत्वं कल्प्यते, न तु द्वितीयक्षणोत्पन्नस्मरणादेरिति भावः।

रामरुद्री।

ननु योग्यविभुविशेषगुणनाश प्रति स्वोत्तरोत्पन्नगुणस्य कारणत्वात् तादृशसामान्यधर्मावच्छिन्नसामग्रीसत्त्वेऽपेक्षाबुद्धिविनाशः केन वारणीयः? न च सामान्यतस्तादृशनाश्यनाशकभाववत् अपेक्षाबुद्धिव्यक्तिविशेषनाश प्रति तत्तृतीयक्षणोत्पन्नज्ञानविशेषस्याऽपि हेतुत्वोपगमेनैव तादृशापत्तिर्वारयितुं शक्यते, सामान्यसामग्र्या विशेषसामग्र्यसहकारेण फलोत्पत्तिष्याप्यतायाः सकलतान्त्रिकसम्प्रतिपन्नत्वादिति वाच्यम्। उक्तरीत्या पूर्वोक्तदोषवारणसम्भवेऽपि तादृशानन्तस्थलेऽनन्तहेतुहेतूद्भावकल्पनप्रयुक्तगौरवस्य दुष्परिहरत्वात्। न चोक्तरीत्या विशेषतो नाश्यनाशकभावानुपगमे द्वित्वविशिष्टप्रत्यक्षकालेऽपेक्षाबुद्धिनाशाद् द्वित्वनाशप्रयुक्तस्य तत्प्रत्यक्षासम्भवस्य दुष्परिहरणीयत्वापत्तिप्रसङ्ग इत्यत एव तादृशनाश्यनाशकभावोऽपि स्वीकरणीय एवेति वाच्यम्। चतुर्थक्षणे द्वित्वविशिष्टप्रत्यक्षोपपादनाय द्वित्वनाशं प्रति द्वित्वविशिष्टप्रत्यक्षत्वस्य हेतुतायाः अपि विनिगमनाविरहेण स्वीकारप्रसङ्गात्, अपेक्षाबुद्धिनाशस्य द्वित्वादिनाशकतायाः क्वाऽप्यकल्पनतया द्वित्वविशिष्टप्रत्यक्षत्वस्याऽपि तन्नाशकत्वकल्पने क्षतिविरहात्। न चैवं विनिगमनाविरहेण चतुर्थक्षणध्वंसीनामपि नाशकत्वापत्तिरिति वाच्यम्। इष्टत्वात्, अपेक्षाबुद्धौ द्वित्वनिर्विकल्पकादेर्नाशकत्वाभ्युपगन्तॄनयेऽपि तत्तत्क्षणविशेषस्य नाशकत्वप्रसङ्गस्य तुल्यत्वादित्याशङ्क्य परिजिहीर्षुराह। **योग्येविशेषगुणत्वस्यैवेत्यादि। अनुगतस्येति।** नाशकतावच्छेदककोटौ विशेषणतापन्नस्येति शेषः। **अनुगतस्याऽभावादिति।** सकलनाशकसाधारणस्याऽसम्भवादित्यर्थः। अयं भावः, योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरोत्पन्नगुणानां कारणत्वमित्यत्र स्वपदं योग्यविभुविशेषगुणत्वावच्छिन्नपरं, सकलयोग्यविशेषगुणसाधारणैकधर्मविशेषावच्छिन्नपरम्, तत्तद्व्यक्तित्वावच्छिन्नपरं वा? तत्र नाऽऽद्यः, योग्यविभुविशेषगुणमात्रस्यैवयत्किञ्चिद्योग्यविभुविशेषगुणोत्तरगुणत्वे न क्षणिकत्वापत्तेः, नाऽपि द्वितीयः, तादृशैकधर्मविशेषालाभात्, लाभेऽपि वा पूर्वोक्तदोषानुद्धारात्। अतस्तृतीयकल्पस्यैवाऽऽदरणीयत्वे योग्यविभुविशेषगुणनाशत्वावच्छिन्नं प्रति सामान्यतः स्वोत्तरोत्पन्नगुणत्वेन नाशकत्वं नोपपद्यत इति। तथा च विशेषत एव कार्यकारणभावस्य कल्पनीयत्वे अपेक्षाबुद्धिनाशं प्रति द्वित्वनिर्विकल्पकव्यक्तीनामेव तत्त्वं कल्प्यत इति न पूर्वोक्तरीत्या विनिगमकाभावेन द्वित्वादिनाशं प्रति तादृशबहुतरकार्यकारणभावप्रसङ्गः। विनिगमनाविरहेणाऽपेक्षाबुद्धिं प्रति तत्तत्कालोत्पन्नपवनसंयोगत्वादिना च नाशकत्वमिष्यते, गत्यन्तराविरहादिति।

अथैवं स्वोत्तरोत्पन्नानां स्वसमानाधिकरणानामनन्तानां व्यक्तीनां तत्तद्व्यक्तित्वेन हेतुता प्रसज्येतेति तेषां तद्व्यक्तौ तद्व्यक्त्युत्तरक्षणोत्पन्नत्वेनैव नाशकत्वं युक्तम्। न चैवमपि तत्तद्व्यक्तिप्रतियोगिकनाशे तत्तद्व्यक्त्युत्तरोत्पन्नव्यक्तीनां तद्व्यक्त्युत्तरोत्पन्नत्वेन हेतुत्वं तत्तद्व्यक्तित्वेनैव वेत्यत्र विनिगमनालोचने तत्तद्व्यक्तित्वेनैव लाघवाद्धेतुत्वमङ्गीकरणीयम्, न तु स्वोत्तरोत्पन्नत्वेन, स्वोत्तरोत्पन्नव्यक्तिमध्ये केषाञ्चिदन्यथासिद्धकुक्षिनिवेशावश्यकत्वे च तद्व्यक्तित्वेन हेतुहेतुमद्भावे आनन्त्यमपि नाऽस्त्येव। उत्पन्नत्वस्य स्वाधिकरणसमयध्वंसानधिकरणक्षमयसम्बन्धरूपतया प्रतिव्यक्ति भिन्नत्वेन स्वोत्तरोत्पन्नव्यक्तीनां तादृशधर्मपुरस्कारेणाऽनुगमासम्भवाच्च। किं चैवं वस्तुतः स्वोत्तरोत्पन्नो यः क्षणस्तदुत्पन्नत्वेन जनकत्वमस्तु, लाघवात्, किं स्वोत्तरत्वस्य कारणतावच्छेदककुक्षिप्रवेशेन? इत्थं च द्वित्वत्वादिनिर्विकल्पकस्य तद्विशिष्टज्ञानस्य द्वे द्रव्ये इत्यादि साक्षात्कारस्य वा तत्त्वेन तत्क्षणोत्पन्नत्वेन वाऽपेक्षाधीनाशकत्वादपेक्षा-

रामरुद्री।

बुद्धेस्त्रिचतुःपञ्चक्षणावस्थायित्वमुपपद्यत एव। अत एवाऽनुमितिद्वयादीच्छातः क्रमेणाऽनुमितिद्वयादिकमपि सहजत एवोत्पद्यते, तादृशसिषाधयिषाव्यास्तत्परामर्शस्य च त्रिचतुःक्षणावस्थायित्वात्। अत एव सिषाधयिषानन्तरं त्रिचतुःपञ्चक्षणविलम्बेन विनाऽपि सिषाधयिषान्तरं सिद्धौ सत्यामनुमितिरप्युपपद्यते। अत एव लक्षवर्षावच्छिन्नस्वर्गादिकं बोधयन्नागमोऽपि यथाश्रुत एवोपपद्यते, उपपद्यते चैकस्यैव सुखदुःखादेः शब्दस्य च धारावाहिकोऽनुभवो घटादिपदानुभवश्चेति वाच्यम्। न हि वयं स्वोत्तरोत्पन्नत्वेन ज्ञानादिनाशकत्वं ब्रूमः, येनोक्तदोषाः प्रसज्येरन्, किन्त्वेतत्क्षणोत्पन्नज्ञानादिनाशत्वावच्छिन्नं प्रति वस्तुतो य एतत्क्षणोत्तरक्षणस्तदुत्पन्नत्वेन तत्त्वेन वा कालघटितसामानाधिकरण्यप्रत्यासत्त्या हेतुत्वम्। एतत्क्षणोत्पन्नत्वं चैतत्क्षणप्रागभावाधिकरणक्षणावृत्तित्वे सति एतत्क्षणवृत्तिध्वंसप्रतियोग्यवृत्तित्वे सति वा एतत्क्षणवृत्तित्वरूपं विवक्षितमिति नाऽननुगमः। विशेष्यदलं विहाय एतत्क्षणप्रागभावाधिकरणक्षणावृत्तित्वमात्रं एतत्क्षणवृत्तिध्वंसप्रतियोग्यवृत्तित्वमात्रमेव वा तन्निरुक्तनाश्यतावच्छेदककोटिघटकमुत्पन्नत्वमास्ताम्। वस्तुतस्त्वेतत्क्षणाव्यवहितपूर्ववर्तितया निश्चितो यः क्षणस्तद्वृत्तित्वमात्रमेव विवक्षणीयम्, इतरांशस्याऽनतिप्रयोजनकत्वात्। इत्थं चाऽपेक्षाबुद्धेः क्षणत्रयावस्थायित्वं न सम्भवत्येवेति टीकोक्तस्यासङ्गत्यस्य दुरुद्धरत्वम्। न च विनश्यदवस्थत्वोपलक्षितानन्तक्रियादिरूपाणां क्षणानां विनिगमकाभावेनैकैकघटितधर्मावच्छिन्नं प्रति सर्वेषां कारणतावच्छेदकतायां वक्तव्यत्वेन गुरुतरानन्तहेतुहेतुमद्भावापत्त्यैवत्तद्व्यक्तित्वेनैव नाश्यनाशकभावाङ्गीकारो युक्त इति वाच्यम्। तत्तत्क्षणवृत्तित्वावच्छिन्नप्रतियोगिताकानां सर्वेषां भेदानां समनियतत्वेनैकनाश्यनाशकभावानुपपत्तेः। न च तथाऽपि अवच्छेदकतावच्छेदककोटौ तत्क्षणवृत्तित्वावच्छिन्नत्वप्रवेशस्य विनिगमनाविरहेणाऽऽवश्यकतया गौरवं दुष्परिहरमेवेति वाच्यम्। तादृशभेदस्य स्वरूपतस्तद्व्यक्तित्वेनैव वाऽवच्छेदकत्वोपगमेनोक्तदोषविरहात्। तथा च तत्क्षणवृत्तित्वावच्छिन्नप्रतियोगिताकत्वोपलक्षितभेदावच्छिन्ननाशं प्रति वस्तुतो यस्तद्द्वितीयक्षणस्तत्क्षणवृत्तित्वावच्छिन्नप्रतियोगिताकत्वोपलक्षितभेदवत्त्वेनैव कारणत्वम्। इत्थं च तज्ज्ञानव्यक्त्यव्यवहितपूर्वक्षणस्य तत्क्षणपदेनोपादाने तत्क्षणवृत्तित्वावच्छिन्नप्रतियोगिताकत्वोपलक्षितभेदवन्नाशरूपतज्ज्ञानव्यक्तिनाशे तज्ज्ञानव्यक्त्याद्यक्षणात्मकतद्द्वितीयक्षणवृत्तित्वावच्छिन्नप्रतियोगिताकत्वोपलक्षितभेदवतस्तज्ज्ञानद्वितीयक्षणोत्पन्नगुणान्तरस्य हेतुत्वाज्ज्ञानादेर्द्वित्वादेश्च क्षणिकत्वापत्तिः। न चैवं तत्क्षणतृतीयक्षणोत्पन्नस्य ज्ञानादेः क्षणिकत्वापत्तिः, तस्याऽपि स्वदुक्तनाश्यतावच्छेदकनाशकतावच्छेदकोभयाक्रान्तत्वादिति वाच्यम्। तत्तत्क्षणभेदेनैतादृशकार्यकारणभावभेदस्याऽऽवश्यकतया तृतीयक्षणोत्पन्नव्यक्तेः प्रथमक्षणघटितनाश्यतावच्छेदकाक्रान्तत्ववत् द्वितीयक्षणघटितनाश्यतावच्छेदकाक्रान्तताया अप्यावश्यकत्वेन तद्द्वितीयक्षणात्मकप्राथमिकक्षणतृतीयक्षणवृत्तित्वावच्छिन्नप्रतियोगिताकत्वोपलक्षितभेदवतस्तत्तृतीयक्षणात्मकप्राथमिकक्षणचतुर्थक्षणोत्पन्नव्यक्त्यन्तरस्य तत्पूर्वं विरहादेव तन्नाशासम्भवेन क्षणिकत्वायोगात्। तथा चाऽपेक्षाबुद्धेरपि निरुक्तनाश्यतावच्छेदकाक्रान्ततया तृतीयक्षणे नाश्यत्वाऽऽवश्यकतया कथं त्रिक्षणावस्थायित्वसम्भवः? न चेतरज्ञानादिक्षणोत्पन्नव्यक्तिनाश्यनाशकभावस्त्वदुक्तरीत्यैवाऽस्ताम्, अपेक्षाबुद्ध्यधिकरणक्षणोत्पन्नव्यक्तिनाश्यनाशकभावस्तु तत्क्षणवृत्तित्वावच्छिन्नप्रतियोगिताकत्वोपलक्षितभेदवत्प्रतियोगिकनाशं प्रति वस्तुगत्या यस्तस्य तृतीयश्चतुर्थः पञ्चमो वा क्षणस्तद्वृत्तित्वावच्छिन्नप्रतियोगिताकत्वोपलक्षितभेदवत्त्वेन कारणत्वमिति रीत्यैव यथानुभवं स्वीकरणीयः, तथा चाऽपेक्षाबुद्धेस्त्रिचतुःपञ्चक्षणावस्थायित्वमुपपद्यत एवेति वाच्यम्। एवं सत्यपेक्षाबुद्धिसमकालोत्पन्नशब्दबुद्ध्यन्तरादीनामपि स्वदुक्तनाश्यतावच्छेदकाक्रान्तत्वेन त्रिचतुःपञ्चक्षणावस्थायितापत्तेः। न चैवमपि तत्तत्क्षणवृत्तित्वावच्छिन्नप्रतियोगिताकभेदस्य तादृशभेदवन्निष्ठतत्तद्व्यक्तित्वानां वा नाश्यनाशकतयोरवच्छेदकत्वमित्यत्र विनिगमनाविरहेण तत्तद्व्यक्तित्वेनैव हेतुत्वमास्तामिति वाच्यम्। एवमपि तादृशभेदस्याऽपि तथात्वस्याऽऽवश्यकत्वेनोक्तनाश्यनाशकभावस्याऽक्षतत्वात्। स्वन्मते द्वित्वादिनाशार्थमपेक्षाबुद्ध्यादिनाश्यस्याधिकः कार्यकारणभावोऽपि स्वीकरणीयः, स च नाऽस्मन्मत इत्यपि विनिगमकस्य सम्भवाच्च। न चैवमपि तत्क्षणद्वितीयक्षणे यत्क्रियादिकं विनश्यति, समनियतकाला-

रामरुद्री ।

त्मकतत्तत्क्षणवृत्तित्वावच्छिन्नप्रतियोगिताकभेदस्यैकत्वेऽपि ये तथा न नश्यन्ति, असमनियतकालात्मक-तत्तत्क्षणवृत्तित्वावच्छिन्नप्रतियोगिताकभेदानां विभिन्नतयाऽवच्छेदकानन्त्यं दुष्परिहरमेवेति वाच्यम् । तत्तत्क्षणनिष्ठतत्क्षणत्वावच्छिन्नाधिकरणतानिरूपिताधेयतावच्छिन्नप्रतियोगिताकभेदस्याऽखण्डस्यैकयैव तस्यैवाऽवच्छेदकत्वौचित्यात् । न च विनिगमनाविरहेण तत्तत्क्षणनिष्ठाधिकरणतानिरूपिताधेयत्वावच्छिन्न-प्रतियोगिताकत्वोपलक्षितभेदानामपि तथात्वमावश्यकमित्यानन्त्य दुर्वारमेवेति वाच्यम् । तत्तत्क्षणत्वावच्छिन्नाधिकरणतानिरूपिताधेयत्वावच्छिन्नप्रतियोगिताकत्वोपलक्षितभेदस्यैकाऽवच्छेदकत्वमावश्यकम् । अन्यथा यत्क्रियाव्यक्तेरुत्तरतृतीयक्षणे नाशः, तत्क्रियाव्यक्तरयात्मकप्राथमिकतत्क्षणवृत्तित्वावच्छिन्न-प्रतियोगिताकत्वोपलक्षितभेदवत्प्रतियोगिकनाशं प्रति तत्क्रियाव्यक्तिद्वितीयक्षणात्मकतत्तृतीयक्षणानवस्थायिव्यक्तयन्तरवृत्तित्वावच्छिन्नप्रतियोगिताकत्वोपलक्षितभेदवतो हेतुत्वे प्राथमिकक्षणोत्पन्नज्ञानादि-व्यक्तितृतीयक्षणे हेतोः सत्त्वेऽपि तत्क्षणवृत्तित्वावच्छिन्नप्रतियोगिताकत्वोपलक्षितभेदवत्प्रतियोगिकनाशानुपपत्त्याऽन्वयव्यभिचारापत्तेः । तथा चाऽपेक्षाबुद्धेः क्षणत्रयावस्थायित्वोक्तिविरुद्धेति चेत्,—

अत्र ब्रूमः । एवं सति निरुक्तान्वयव्यभिचारभयेन तादृशस्थले तत्क्रियाव्यक्तिद्वितीयक्षणात्मक-तत्तृतीयक्षणानवस्थायिव्यक्त्यन्तरवृत्तित्वावच्छिन्नप्रतियोगिताकत्वोपलक्षितभेदवतो हेतुत्वासम्भवेऽपि तत्क्रियाव्यक्तितृतीयक्षणपर्यन्तस्थायिव्यक्त्यन्तरात्मकक्षणवृत्तित्वावच्छिन्नप्रतियोगिताकत्वोपलक्षितभेदवतो हेतुत्वसम्भवेनाऽनन्तहेतुहेतुमद्भावापत्तेरप्रक्षणोऽपि दुष्परिहरतया निरुक्तरीत्या कारणत्वानामन्यथा-सिद्धत्वकल्पनयैव वारणीयत्वात् । अन्यथा तत्तद्दिनादिवृत्तित्वावच्छिन्नप्रतियोगिताकत्वोपलक्षितभेदवत्प्र-तियोगिकनाशं प्रति तत्तद्दिनाव्यवहितोत्तरक्षणवृत्तित्वावच्छिन्नप्रतियोगिताकत्वोपलक्षितभेदवत्त्वादिना जनकत्वापत्तेः, तुल्ययुक्त्या तत्क्षणावृत्तिनाशं प्रति तत्क्षणद्वितीयक्षणावृत्तेर्हेतुत्वप्रयुक्त्या नाशमात्रं प्रत्ये-वैककारणपरिशेषापत्तेश्च, समवायिकारणादिनाशस्याऽप्यनयैव रीत्या कारणत्वस्य वक्तुं शक्यत्वादि-त्यलं प्रसक्तानुप्रसक्त्या ।

सम्प्रदायानुसारिणस्तु प्रतियोगितासम्बन्धेन योग्यविभुविशेषगुणनाशं प्रति कालिक–स्वाव्यवहि-तपूर्वत्वोभयसम्बन्धेन गुणः कारणमिति रीत्या योग्यविभुविशेषगुणनाशे स्वोत्तरोत्पन्नगुणस्याऽनुगतहे-तुत्वं सम्भवत्येव, तथा च कथमपेक्षाबुद्धौ द्वित्वनिर्विकल्पकादेः स्वोत्तरोत्पन्नगुणविधया विनाशकत्वं सम्भवेत् ? तस्मात्सामान्यतो योग्यविभुविशेषगुणनाशत्वावच्छिन्नं प्रति स्वोत्तरोत्पन्नगुणस्य हेतुत्वेऽपि अपेक्षाबुद्धिविनाशत्वरूपविशेषधर्मावच्छिन्न प्रति द्वित्वनिर्विकल्पकादेरेव हेतुत्वमावश्यकमिति तदभावे नाऽपेक्षाबुद्धिविनाशप्रसङ्ग इत्यपेक्षाबुद्धेः क्षणत्रयावस्थायित्वमुपपन्नमित्येव मूलतात्पर्यमवगन्तव्यम् । अपेक्षाबुद्धिविनाशत्वावच्छिन्नं प्रति द्वित्वनिर्विकल्पकत्वादिना पृथग्धेतुत्वं चाऽगत्या द्वित्वशिष्टप्रत्यक्षा-न्यथानुपपत्त्या कल्प्यते । अत एव यागादिविनाशं प्रति चरमसुखव्यक्तेरेव कारणत्वमस्तु, किमपूर्वेणेति केषाञ्चिच्छङ्काऽपि परास्ता । योग्यविभुविशेषगुणात्मकस्य यागस्य तृतीयक्षणे नाशावश्यकत्वेन तस्य फलपर्यन्तावस्थानानुपपत्तेः । टीकाकारमते तु योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरगुणत्वेन सामान्य-कार्यकारणभावस्य विरहेण तत्तद्व्यक्तिविनाशं प्रति तत्तद्व्यक्तित्वेनैव कारणतायाः स्वीकृततया चरमफलात्मकव्यक्तिविशेषाणामेव यागध्वंसकत्वकल्पनसम्भवेनाऽदृष्टमात्रोच्छेदापत्तेरिति वदन्ति ।

वस्तुतस्तु द्वित्वाद्युत्पत्तिस्थलेऽपेक्षाबुद्धेः क्षणत्रयावस्थायित्वं न निर्विकल्पकसामग्र्याः प्रतिबन्धक-त्वमुपगम्योपपादनीयम् । तथा सति अपेक्षाबुद्धिनाशे द्वित्वनिर्विकल्पकसामग्र्याः प्रतिबन्धकत्वम्, उत द्वित्वनिर्विकल्पकस्य हेतुत्वम्, द्वित्वविनाश एव वा द्वित्वविशिष्टप्रत्यक्षस्य हेतुत्वं कल्पनीयमित्यत्र विनि-गमनाविरहेण बहुतरकार्यकारणभावप्रतिबध्यप्रतिबन्धकभावकल्पनप्रसङ्गेन विपरीतगौरवापत्तेः, किन्तु सर्वत्र द्वित्वप्रत्यक्षनिर्वाहाय विनश्यदवस्थमनःसंयोगकाल एवाऽपेक्षाबुद्धेरुत्पत्तिरुपगन्तव्या, तथा च तदुत्तरक्षणे विशेषगुणस्योत्पत्त्यसम्भवेन नाऽपेक्षाबुद्धेस्तृतीयक्षणे विनाशप्रसङ्गः । योग्यविभुविशेषगुण-नाशं प्रति स्वोत्तरोत्पन्नयोग्यविशेषगुणानामेव हेतुत्वस्योपगन्तव्यत्वात् । अन्यथा योग्यविभुविशेष-गुणनाश प्रति स्वोत्तरोत्पन्नगुणमात्रस्य हेतुत्वे पवनसंयोगादितोऽपि ज्ञानादिविनाशव्यवहारप्रसङ्गात्

दिनकरी।

ननु द्वित्वत्वविशिष्टद्वित्वप्रत्यक्षमुपनीतभानात्मकमेवास्तु, अलं तदुपपत्तये त्रिक्षणावस्थायित्वकल्पनेनाऽपेक्षाबुद्धेः। न च द्वित्वत्वांशे उपनीतभानसम्भवेऽपि द्वित्वांशे नोपनीतभानत्वम्, उपनीतं च विशेषणतयेति नियमादिति वाच्यम्। यतो द्वित्वत्वविशिष्टद्वित्वप्रत्यक्षं हि जायमानं द्रव्यांशे द्वित्वप्रकारकमेव भवति द्वे द्रव्ये इत्याकारकम्। निर्विकल्पकोत्तरक्षणे द्वे द्रव्ये इत्याकारकं द्वित्वत्वविशिष्टद्वित्वप्रकारकं प्रत्यक्षं न सम्भवति, तत्पूर्वं विशेषणतावरामरुद्री।

रत्थं चाऽपेक्षाबुद्धेस्तृतीयक्षणोत्पन्नद्वित्वनिर्विकल्पकादेव विनाशस्याऽगत्याऽभ्युपगन्तव्यतया तस्याः क्षणत्रयावस्थायित्वमुपपद्यत एव। न च चरमज्ञानादिव्यक्तीनां स्वोत्तरवर्तिना स्वेनैव नाशाभ्युपगमवत् अपेक्षाबुद्धेरपि तृतीयक्षणे नाश आवश्यक इति वाच्यम्। स्वोत्तरवर्तिनः स्वस्य प्रथममपि सत्त्वेन ज्ञानमात्रस्यैव क्षणिकत्वप्रसङ्गभिया स्वप्रागभावाधिकरणत्व—कालिकोभयसम्बन्धेनैव योग्यविशेषगुणस्य कारणतया वक्तव्यतयोक्तदोषानवकाशात्। न चैवं चरमज्ञाननाशस्थले व्यभिचारप्रसङ्गः, तत्रोक्तोभयसम्बन्धेन योग्यविशेषगुणाभावादिति वाच्यम्। अगत्या चरमज्ञानादिभिन्नत्वस्य नाश्यतावच्छेदककोटौ निवेशेन व्यभिचाराभावात्। युक्तं चैतत्। कथमन्यथाऽपेक्षाबुद्धेरिव सुखदुःखादीनामपि विशिष्टबुद्ध्यर्थं क्षणत्रयावस्थायित्वं न स्वीकृतमिति। शेषमशेषं विस्तरेण ऽन्यत्राऽऽलोकनीयम्।

उत्तानास्तु विशिष्टवैशिष्ट्यावगाहिबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानस्य विशिष्टबुद्धौ विशेषणज्ञानस्य च हेतुत्वे मानाभावेन द्वित्वादेः क्षणद्वयमात्रावस्थायित्वेऽपि न द्वित्वविशिष्टप्रत्यक्षानुपपत्तिरित्याहुः। तच्चिन्त्यम्।

इति नियमादिति। तत्प्रकारकानुभवं प्रति तद्विषयकज्ञानत्वेन रूपेणैव ज्ञानलक्षणासन्निकर्षस्य हेतुतया तदुपनीतस्य विशेष्यतया भानासम्भवादिति शेषः। यद्यप्येवमपि तद्धर्माश्रयनिष्ठविशेष्यतासम्बन्धेन तद्धर्मप्रकारकप्रत्यक्षं प्रति तद्धर्मज्ञानत्वेन रूपेण सामान्यलक्षणाया हेतुतया द्वित्वत्वरूपधर्मज्ञानात्मकद्वित्वनिर्विकल्पकात्मकसामान्यलक्षणासत्त्वेन तदुत्तरं द्वित्वविशिष्टप्रत्यक्षे द्वित्वस्य विशेष्यतयाऽपि भानं सम्भवति। न चैवं सौरभत्वादिज्ञानात्मकज्ञानलक्षणासन्निकर्षजन्यस्य सुरभि चन्दनमित्यादिज्ञानस्याऽपि पूर्वोक्तरीत्या सौरभत्वादिज्ञानात्मकसामान्यलक्षणाबलाद्यावत्सौरभमुख्यविशेष्यकत्वापत्तिर्दुर्वारा, बहिरिन्द्रियाणां स्वायोग्यमुख्यविशेष्यकज्ञानाजनकत्वनियमेन तादृशचाक्षुषस्य सौरभादिमुख्यविशेष्यकत्वे इष्टापत्त्ययोगादिति वाच्यम्। सौरभादिमुख्यविशेष्यकप्रत्यक्षत्वस्य सौरभादिलौकिकविषयकत्वव्याप्यतया व्यापकधर्मात्मकसौरभादिलौकिकविषयकत्वावच्छिन्ननियामकसामग्रीविरहादेव तादृशज्ञानस्य सौरभादिमुख्यविशेष्यकत्वस्य वारणोपपत्तेः। द्वित्वमुख्यविशेष्यकप्रत्यक्षत्वस्य द्वित्वलौकिकप्रत्यक्षत्वव्याप्यत्वेऽपि प्रकृते तदवच्छिन्नजनकसामग्र्यांश्चक्षुःसन्निकर्षादेः सत्त्वेन तत्प्रत्यक्षस्य द्वित्वमुख्यविशेष्यकत्वं न विरुद्धम्। न च प्रत्यक्षे विषयस्य कार्यकालीनतया हेतुत्वमावश्यकम्, सम्बद्धं वर्तमानं चेत्याद्यनुरोधात्, इत्थं च द्वित्वलौकिकसामग्र्यन्तर्गतस्य विषयस्य कार्यकालमसत्त्वादेव नोक्तरीत्या द्वित्वमुख्यविशेष्यकप्रत्यक्षोत्पत्तिसम्भव इति वाच्यम्। सामान्यलक्षणया स्वाश्रयमुख्यविशेष्यकज्ञानजनने यत्किञ्चित्स्वाश्रयलौकिकप्रत्यक्षजनकसामग्र्या एवाऽपेक्षणीयत्वेन निर्विकल्पकापेक्षाबुद्ध्युत्तरोत्पन्नसविकल्पकापेक्षाबुद्धिजन्यद्वित्वान्तरलौकिकप्रत्यक्षसामग्रीसहकारमात्रेणैव प्राथमिकद्वित्वमुख्यविशेष्यकप्रत्यक्षोत्पत्तिसम्भवात्, तत्स्थले तादृशद्वित्वान्तरप्रत्यक्षस्य प्राथमिकद्वित्वनिर्विकल्पकसहकारेण सविकल्पकात्मकस्यैवोपगन्तव्यतया द्वित्वत्वप्रकारकतलौकिकप्रत्यक्षसामग्र्या अपि सुवचत्वात्सामान्यलक्षणया तद्धर्माश्रयविशेष्यकप्रत्यक्षजनने तद्धर्मकारकलौकिकप्रत्यक्षसामग्रीहेतुत्वोक्तावप्यदोषात्। न चोपनीतं विशेषणतयैवेत्याद्यनुरोधात् मुख्यविशेष्यतया चाक्षुषत्वाद्यवच्छिन्नं प्रति चक्षुरादिलौकिकसन्निकर्षाभावविशिष्टज्ञानत्वेन विषयतया प्रतिबध्यप्रतिबन्धकभावः स्वीक्रियते, तत्र च चक्षुरादिसंयोगसत्त्वेऽपि

---

* स्पष्टञ्चाऽयमर्थः सामान्यलक्षणाजागदीश्याम्।

दिनकरी ।

च्छेदकद्वित्वत्वप्रकारकद्वित्वज्ञानासम्भवादिति तु न, विशेष्ये विशेषणमिति रीत्यैव द्वे द्रव्ये

रामरुद्री ।

सहकार्यन्तराभावे जायमानस्य तद्धर्मोपनीतभानात्मकत्वाच्चक्षुरादेस्तद्धर्ममुख्यविशेष्यकत्वापत्तिवारणार्थं लौकिकसन्निकर्षस्थाने लौकिकसामग्र्या एव प्रतिबन्धकतावच्छेदककोटौ निवेशनीयत्वात् उक्तस्थले तादृशप्रतिबन्धकसद्भावादेव न द्वित्वमुख्यविशेष्यकप्रत्यक्षोपपत्तिः सम्भवतीति वाच्यम् । लौकिकसामग्र्यभावो हि समानाधिकरणविषयत्वानिरूपितप्रकारत्वानिरूपितविषयत्वसम्बन्धावच्छिन्नप्रतियोगिताको ग्राह्यः, तेन सामान्यलक्षणजन्यप्रत्यक्षस्थलेऽसन्निकृष्टधर्मिण्यपि लौकिकसामग्र्यभावविशिष्टज्ञानस्य सत्त्वेऽपि यत्किञ्चिद्धर्मिणि लौकिकसामग्रीदशायां न तद्विशेष्यकप्रत्यक्षधारानुपपत्तिः । इत्थं च प्रकृते द्वित्वान्तरनिष्ठलौकिकसामग्रीवैशिष्ट्यस्यैव ज्ञाने सत्त्वेन तस्य प्रतिबन्धकत्वं नोपपद्यत इति वक्तुं शक्यम्, तथाऽप्युपनीतं विशेषणतयैवेत्यादिनियमस्यात्रैव भङ्गप्रसङ्गभियोक्तरीत्येन्द्रियसन्निकर्षाभावविशिष्टस्य ज्ञानस्य प्रतिबन्धकत्वं न वक्तव्यम्, किन्तु लौकिकसन्निकर्षादेः कारणतावच्छेदको यः सम्बन्धस्तत्सम्बन्धेन तदधिकरणे विषयतासम्बन्धेन वृत्तित्वरूपसामानाधिकरण्यसम्बन्धेन लौकिकसन्निकर्षादिशून्यत्वरूपमेव तदभावविशिष्टत्वं ज्ञानविशेषणतया प्रतिबन्धकतावच्छेदकघटकम्, तथा च न पूर्वोक्तदोषः । इत्थं च द्वित्वनिर्विकल्पकोत्तरं विनश्यदवस्थस्य द्वित्वस्योपनीतभाने न विशेष्यतया भानसम्भवः, निर्विकल्पकात्मकस्यैवोक्तप्रतिबन्धकतावच्छेदकाक्रान्तस्य ज्ञानस्य सत्त्वादिति नाऽसङ्गतिः । न चैव लौकिकसामग्रीसत्त्वे मुख्यविशेष्यतयोपनीतस्याऽपि भानप्रसङ्ग इति वाच्यम् । इष्टत्वात्, उपनीतं विशेषणतयैव भासत इत्यत्र विशेषणतयैवेत्यस्याऽलौकिकमुख्यविशेष्यत्वासमानाधिकरणविषतयेत्यर्थस्य वक्तव्यत्वात् । लौकिकसंनिकर्षसत्त्वे चोपनीतस्याऽपि मुख्यविशेष्यतया भानस्य 'तत्राऽप्यसति बाधके घटाद्यंशे घटत्वादेः प्रकारत्वबन्मुख्यविशेष्यत्वस्याऽपीष्टत्वात्-'इत्यादिना मथुरानाथेन स्वीकृतत्वात् । न चैवमुक्तरीत्या प्रतिबध्यप्रतिबन्धकभावोपगमे सामान्यलक्षणया सकलघटादिविषयकप्रत्यक्षोत्तरं यत्किञ्चिद्घटव्यक्तौ लौकिकसन्निकर्षसत्त्वे सन्निकृष्टघटवदसन्निकृष्टघटादेरपि मुख्यविशेष्यत्वापत्तिः, तत्र तज्ज्ञानस्य लौकिकसामग्रीविशिष्टत्वेनोक्तप्रतिबन्धकतावच्छेदकानाक्रान्तत्वेन तद्बलात् तदसम्भवस्य वक्तुमशक्यत्वादिति वाच्यम् । लौकिकसामग्रीविशिष्टान्यविषयतासम्बन्धेन ज्ञानस्यैव प्रतिबन्धकताया उपगन्तव्यत्वादिति दिक् । **ज्ञानासम्भवादिति** । विशिष्टवैशिष्ट्यावगाहिबुद्धौ च विशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वेन तदभावे तदुत्पादस्योपगन्तुमशक्यत्वादिति पूरणीयम् । **विशेष्ये विशेषणमिति रीत्यैवेति** । यादृशविशेषणविशिष्टस्य विशेष्यस्य विशेषणस्य वा शब्दादुपस्थितिस्तादृशेनैव विशिष्टेन विशेष्यस्य विशेषणान्तरस्य वाऽन्वयबोधोऽनुभवसिद्धः । यत्र च युगपदेवैकस्मिन् धर्मिणि समूहालम्बनोपस्थितानां विशेषणानां तुल्यतया भानं, नाऽसावेकविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यबोधः, अतो न तत्र विशेषणविशिष्टविशेष्योपस्थितेरपेक्षा । एकविशेषणविशिष्टे विशिष्टान्तरवैशिष्ट्यं विशेष्ये वा यत्र विशेषणान्तरविशिष्टस्य वैशिष्ट्यं भासते स बोधो विशिष्टविषयकबोधादेवोपपद्यते, न तु विश्रृङ्खलसमूहालम्बनात् । इत्थं च विशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रति विशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वेऽपि विशेष्ये विशेषणमित्यादिरीत्या ज्ञाने न तद्धेतुत्वमित्युक्तस्थले द्वे द्रव्ये इत्याकारकं प्रत्यक्षमुपपन्नमेवेति भावः । अथ किमिदं विशिष्टवैशिष्ट्यावगाहित्वं नाम ? न तावद्विशिष्टप्रतियोगिकं यद्विशिष्टत्वं तदवगाहित्वम्, व्यधिकरणसम्बन्धावगाहिविशिष्टभ्रमे व्यभिचारात् । नाऽपि विशिष्टप्रकारकत्वम्, काञ्चनमयवह्निमानित्यादिभ्रमप्रकारीभूतविशिष्टाप्रसिद्धेः । नाऽपि विशेषणान्तरप्रकारेण भासमानप्रकारकत्वं, रक्तो दण्डो दण्डवान् पुरुष इति समूहालम्बनस्याऽपि तथात्वप्रसङ्गात् । नाऽपि विशेषणान्तरप्रकारतानिरूपितविशेष्यत्वावच्छिन्नप्रकारताकत्वम्, विशेष्ये विशेषणमिति रीत्योपपद्यमानज्ञानस्यैवमपि तथात्वप्रसङ्गात् । न चेष्टापत्तिः तथा सति एकत्वविशिष्टकर्तुः पूर्वमज्ञानेऽपि क्षितिरकर्तृकेत्यनुमितेरिष्टतया तत्र विशेषणतावच्छेदकप्रकारकज्ञानविरहेण व्यभिचारप्रसङ्गादिति चेत्, अत्र वदन्ति, रक्तत्वादिविशेष्यतापन्नदण्डादिप्रकारकं ज्ञानं द्विविधम्, रक्तत्वाद्यवच्छिन्नप्रतियोगिताकत्वेन दण्डादिवैशिष्ट्यावगाहि,

दिनकरी।

इत्याकारकप्रत्यक्षसम्भवादिति चेन्न। निर्विकल्पकस्याऽप्रत्यासत्तितया द्वे द्रव्ये इत्युपनीतभा-

रामरुद्री।

तद्रूपानवच्छिन्नतद्वैशिष्ट्यावगाहि च। तादृशविशिष्टप्रतियोगिकत्वं च दण्डादिप्रकारतानिरूपकसंसर्गतायामवच्छेदकविधया भासते, तद्विशिष्टसंयोगादेरेव दण्डादिसंसर्गतया भानात्। दण्डादिविशेषणतापन्नरक्तत्वादेरेव वा स्वावच्छिन्नप्रतियोगिताकसंयोगात्मकपरम्परासम्बन्धेन पुरुषादौ प्रकारता। तादृशी विशिष्टवैशिष्ट्यबोध एव विशेषणतावच्छेदकप्रकारकधीः कारणम्, न तु विशिष्टविशेषणावगाहित्वेऽपि रक्तत्वादिकं वैशिष्ट्यप्रतियोगित्युपलक्षणतयाऽवगाहमाने द्वितीयबोधे। दण्डो नाऽस्ति रक्तोनाऽस्तीत्यादिज्ञानदशायां नियमतो रक्तदण्डो नाऽस्तीत्यादिज्ञानोत्पादविरहप्रयोक्तविशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकविशेषणधीहेतुत्वकल्पक इत्याद्यनुमितिगादाधर्या स्पष्टम्। तद्धर्मप्रकारेण तद्धर्मविशिष्टवैशिष्ट्यावगाहिबुद्धिसामान्ये तद्धर्मप्रकारेण तद्धर्मज्ञानस्य शब्दाज्जायमान-विशेष्ये विशेषणमित्यादिरीत्या बोधानुरोधेन कारणत्वानङ्गीकारेऽपि तथाविधप्रत्यक्षं प्रति तद्धेतुत्वाभ्युपगन्तुर्मतमनुसृत्य समाधत्ते। **निर्विकल्पकस्याऽप्रत्यासत्तितयेति।** सखण्डवस्तुनो द्वित्वादेः प्रकारविषया भान इत्यादिः। द्रव्यत्वादिप्रकारेण घटादेरुपनयसत्त्वेऽपि घटत्वादिप्रकारेण तस्योपनीतप्रत्यक्षानुदयेन घटत्वादिना तत्तद्घटादिप्रकारकप्रत्यक्षं प्रति घटत्वादिप्रकारेणैव तत्तद्घटाद्युपनयस्य हेतुत्वम्। अतो घटघटत्वयोर्निर्विकल्पकोत्तरं घटे घटत्वस्येव घटत्वेऽपि घटस्य वैशिष्ट्यावगाहि प्रत्यक्षं यथा न भवति तद्वदेव द्वित्वनिर्विकल्पकोत्तरमपि न द्वित्वविशिष्टप्रत्यक्षं सम्भवति। सखण्डवस्तुमात्रस्य किञ्चिद्धर्मप्रकारेणैव विशिष्टबुद्धेः पारमार्थिकतया तद्धेतुभूतस्य तत्तद्धर्मप्रकारेण तत्तद्वस्तुज्ञानस्य तदानीमसत्त्वात्। न चैवं निर्विकल्पकोत्तरं विशेष्ये विशेषणमित्यादिकक्रमेणाऽपि घटत्वादित्याकारकप्रत्यक्षं न स्यात्, इष्टत्वादिति भावः। निर्विकल्पकस्य प्रत्यासत्तित्वमेव नाऽस्तीति तु भ्रमो न कर्तव्यः, स्वरूपतो घटत्वादिप्रकारकज्ञाने घटत्वादिनिष्ठनिरवच्छिन्नविषयताशालिज्ञानत्वेन निर्विकल्पकसाधारणेनैव रूपेण ज्ञानलक्षणायाः कारणत्वात्। अत एव प्राथमिकस्य घटत्वचैत्रत्वादिप्रकारकप्रत्यक्षस्य घटत्वचैत्रत्वादिनिर्विकल्पकं विनाऽनुपपत्तेस्तत्सिद्धिरप्यावश्यकी। न चैवं जन्यसविकल्पकस्यैव प्रत्यासत्तित्वमिति प्राचीनगाथाविरोधः, तस्याऽकिञ्चित्करत्वेन सखण्डघटादेरुपनीतभानस्थल एव तादृशनियमस्योपगन्तव्यत्वात्। न च निर्विकल्पकस्य प्रत्यासत्तित्वे स्वविषयीभूतघटत्वाद्युपधानेन तस्य प्रत्यक्षापत्तिः, विषयानुपधानेन ज्ञानादिप्रत्यक्षस्याऽलोकतया विषयोपनायकविरहादेव मनःसन्निकृष्टस्याऽपि तस्याऽतीन्द्रियत्वोपगमादिति वाच्यम्। सत्यपि सन्निकर्षे विषयतया घटत्वादिप्रकारकप्रत्यक्षं प्रति तादात्म्यसम्बन्धेन घटत्वादिनिर्विकल्पकस्य प्रतिबन्धकत्वात्। अन्यथा सुखत्वादिनिर्विकल्पकस्य स्वविषयीभूतसुखत्वाद्युपधानेन प्रत्यक्षस्य दुर्वारतापत्तेः। सुखत्वस्य निर्विकल्पकइव सुखत्वेऽपि लौकिकस्यैव मनःसन्निकर्षस्य सत्त्वात् तदुपधानेन तन्निर्विकल्पकस्य प्रत्यक्षे बाधकाभावादिति सामान्यलक्षणाजागदीश्यां स्पष्टम्। ननूक्तस्थले द्वित्वनिर्विकल्पकाव्यवहितोत्तरकाले द्वित्वविशिष्टद्रव्यप्रत्यक्षासम्भवेऽपि तृतीयक्षणे तत्सम्भवः, द्वितीयक्षणे द्वित्वविशेष्यकद्वित्वत्वप्रकारकप्रत्यक्षस्योक्तनिर्विकल्पकबलादभ्युपगमे बाधकाभावात्। न च तत्र द्वित्वभासकमेव किञ्चिन्नाऽस्ति, उपनयस्य विशेषणतया भासकत्वेन पूर्वमेव निरासात्, सामान्यलक्षणायाः सम्भवेऽपि तस्या यत्किञ्चित्स्वाश्रयलौकिकसामग्रीसहकृताया एव फलोपधायकतया प्रकृते तदसम्भवात्, द्वित्वस्य तत्काले विनाशेन लौकिकसामग्र्यसम्भवादिति वाच्यम्। तत्काले द्वित्वान्तरे लौकिकसामग्रीस्वीकारसम्भवेन तत्सहकृतया द्वित्वत्वनिर्विकल्पकात्मकसामान्यलक्षणाप्रत्यासत्त्यैव सकलद्वित्वविशेष्यकप्रत्यक्षसम्भवात्, तदुत्तरमुपनयमर्यादया विनष्टद्वित्वावगाहिद्रव्यप्रत्यक्षस्य सम्भवात्। न च निर्विकल्पकस्य न प्रत्यासत्तित्वमिति वाच्यम्। स्वप्रकारीभूतसामान्याश्रयनिष्ठविशेष्यतासम्बन्धेन प्रत्यक्षप्रत्येव स्वविषयीभूतसामान्याश्रयनिष्ठविशेष्यतासम्बन्धेन सामान्यविषयकज्ञानत्वादिना निर्विकल्पकसाधारणरूपेण सामान्यलक्षणाया हेतुत्वेन तदनङ्गीकारासम्भवात्। न च स्वप्रकारीभूतसामान्यवत्त्वसम्बन्धेनैव सामान्यज्ञानस्य

दिनकरी ।

नासम्भवात्, तस्योपनीतभानरूपत्वे तदुत्तरं द्वित्वं साक्षात्करोमीत्यनुव्यवसायानुपपत्तेश्च, तस्मात् त्रिक्षणावस्थायित्वमपेक्षाबुद्धेरिति वैशेषिकाणामाशयः ।

नव्यास्तु—उत्पत्स्यमानद्वित्वस्य द्वित्वत्वसामान्यलक्षणया पूर्वमनुभवात् द्वित्वोत्पत्तिसमय एव द्वित्वत्वप्रकारकमुत्पद्यमानद्वित्वस्मरणम्, तेन तदुत्तरक्षणे इदानीं द्वे द्रव्ये इतिविशिष्टवैशिष्ट्यावगाहिलौकिकप्रत्यक्षसम्भवादलमपेक्षाबुद्धेस्त्रिक्षणावस्थायित्वेन । अन्यथा सुखाद्युत्पादद्वितीयक्षणे सुखत्वनिर्विकल्पकम्, अनन्तरक्षणे च सुखनाशादहं सुखीति लौकिकप्रत्यक्षं न सम्भवतीति सुखशब्दादेरपि त्रिक्षणावस्थानप्रसङ्गादिति प्राहुः ।

रामरुद्री ।

हेतुत्वमस्त्विति वाच्यम् । प्राथमिकसविकल्पकप्रत्यक्षे व्यभिचारप्रसङ्गात् । न च स्वप्रकारीभूतसामान्याश्रयनिष्ठालौकिकमुख्यविशेष्यतासम्बन्ध एव कार्यतावच्छेदकोऽस्तिति वाच्यम् । गौरवभयादेवोक्तरीत्या कार्यकारणभावस्य परित्यक्तव्यत्वात् । न चैव तृतीयक्षणे जायमानं द्वित्वविशिष्टप्रत्यक्षं विनष्टद्वित्वमुख्यविशेष्यकमपि स्यात्, सामान्यलक्षणायाः सत्त्वादिति वाच्यम् । प्रागुक्तप्रतिबन्धकसद्भावादेव तदसम्भवात् । तथा चैकक्षणविलम्बेन द्वित्वविशिष्टद्वयप्रत्यक्षसम्भवादपेक्षाबुद्धेस्त्रिक्षणावस्थायित्वाभ्युपगमोऽनर्थक इत्याशङ्क्य निरसितुं दूषणान्तरमाह । **तस्येत्यादि । अनुपपत्तेश्चेति ।** तादृशद्वित्वान्तरस्य द्विविधविषयताश्रयत्वेन तस्य लौकिकविषयत्वमादाय तथाऽनुव्यवसायोपपत्तावपि विनष्टत्वेन प्रतिपन्नस्य प्रथमापेक्षाबुद्धिजनितस्य द्वित्वस्य लौकिकविषयतानाश्रयत्वेन तथाविधानुव्यवसायविषयत्वायोगादिति भावः ।

पूर्वमनुभवादिति । यादृशस्थलविशेषेऽविरलक्रमेण द्वित्वद्वयं प्रागुक्तरीत्योत्पन्नं, तादृशस्थले प्रथमद्वित्वनिर्विकल्पकात्मकसामान्यलक्षणया द्वितीयद्वित्वलौकिकप्रत्यक्षसामग्रीसहकृतया समुत्पन्नादित्यादिः । तेन क्वचिदपि तादृशानुभवो न सम्भवति, द्वित्वादेः क्षणद्वयावस्थायित्वादिति शङ्का परास्ता । **अन्यथेत्यादि । सुखशब्दादेरपीति ।** ज्ञानेच्छाकृतिद्वेषाणां तु सविषयकतया तदुत्तरक्षणे ज्ञानस्य स्वात्मकविशेषणतावच्छेदकप्रकारकज्ञानसङ्कारात्प्रत्यक्षम्, इतरेषामपि विषयोपरागेणैव मानसप्रत्यक्षविषयतया तथाविधविषयोपनायकसत्त्वे विशेषणतावच्छेदकप्रकारकज्ञानसम्पत्त्या प्रत्यक्षमिष्यते, अन्यत्र तु नेष्यत एव तत्प्रत्यक्षमिति स्वीकारात् ज्ञानादिषु तादृशापत्तिर्न प्रदर्शिता । यद्यप्येवमपि ज्ञानत्वादिप्रकारेण ज्ञानादिप्रत्यक्षं नोपपादयितुं शक्यम् । न च ज्ञानजनके प्राथमिकनिर्विकल्पकादावेव मनःसन्निकर्षस्याऽबाधिततया तत एव द्वितीयज्ञानाद्युत्पादकाले नरसिंहाकारकं ज्ञानत्वादिनिर्विकल्पकं सम्भवतीति नैष दोष इति वाच्यम् । एवमप्यनुमिनोमीच्छामीत्याद्यनुमितित्वेच्छात्वादिप्रकारेणाऽनुमितीच्छादिप्रत्यक्षासम्भवस्य दुरुद्धरत्वात् । तत्राऽनुमितेः पूर्वं अनुमितित्वादिना सह मनःसन्निकर्षसम्पत्त्या तदुत्पत्तिकाले तन्निर्विकल्पकस्याऽभ्युपगन्तुमशक्यत्वात् । न चाऽनुमितित्वादिप्रकारकप्रत्यक्षं प्रति अनुमितित्वादिरूपविशेषणज्ञानस्य हेतुत्वं न स्वीक्रियते सिद्धान्तेऽपीति नैषाऽनुपपत्तिरिति वाच्यम् । तथा सति सुखशब्दादिस्थलेऽपि विशेषणज्ञानस्य हेतुताया अनङ्गीकारमात्रेणैव प्रागुक्तसकलदोषवारणसम्भवेन तदर्थं सुखादेः क्षणत्रयावस्थायितापादनस्य सन्दर्भविरुद्धापत्तेः, तथापि उक्तरीत्या ज्ञानत्वाद्यनुपधानेन केवलविषयोपरागेणाऽपि ज्ञानादिप्रत्यक्षं सम्भवति, सुखादेस्तु कथञ्चिदपि नेति विशेषमादृत्यैव ज्ञानाद्युपेक्ष्य सुखानुधावनम् । सुखत्वादिप्रकारकप्रत्यक्षे विशेषणीभवतोऽपि सुखत्वादेर्ज्ञानं न कारणम्, अनुमितित्वादिप्रकारकप्रत्यक्षतुल्ययोगक्षेमत्वादित्यङ्गीकारे च सुखस्य त्रिक्षणावस्थायितापादनं न सम्भवतीत्यत एव च शब्दानुधावनमपि कृतम् । शब्दस्थले शब्दत्वादिप्रकारकप्रत्यक्षोत्तरं शब्दं साक्षात्करोमीति मानसानुव्यवसाये शब्दत्वाद्युपनायकस्य ज्ञानाद्यतिरिक्तस्य सन्निकर्षस्य दुर्वचत्वात्, शब्दत्वाद्यवगाहितादृशमानसानुव्यवसायस्यैवाऽन्यथानुपपत्तेः । ज्ञानत्वादिप्रकारकप्रत्यक्षे ज्ञानत्वादिज्ञानस्य हेतुत्वानङ्गीकारेऽपि न तादृशप्रत्यक्षानुपपत्तिः, तत्र मनसा समं लौकिकसन्निकर्षस्यैवाऽबाधितत्वात् ।

न चाऽपेक्षाबुद्धिनाशात् कथं द्वित्वनाश इति वाच्यम्। कालान्तरे द्वित्वप्रत्यक्षाभावात् अपेक्षाबुद्धिस्तदुत्पादिका. तन्नाशात्तन्नाश इति कल्पनात्। अत

दिनकरी।

नन्वपेक्षाबुद्धेर्द्वित्वोत्पादकत्वे चैत्रीयापेक्षाबुद्धिजन्यद्वित्वस्याऽपेक्षाबुद्धिशून्येन मैत्रेण ग्रहणापत्तिः, सन्निकर्षादिघटितसामग्र्याः सत्त्वात्, तद्वारणाय विषयतासम्बन्धेन तत्पुरुषीयप्रत्यक्षे तद्भिन्नपुरुषीयापेक्षाबुद्धिजन्यद्वित्वादेस्तादात्म्येन प्रतिबन्धकत्वकल्पने च गौरवमत आह। **अत एवेति**। पूर्वोक्तयुक्त्याऽपेक्षाबुद्धेर्द्वित्वोत्पादकत्वस्याऽऽवश्यकत्वादेव।

रामरुद्री।

अथैवं सुखत्वादेरुपनयमर्यादयाऽपि भानं न स्यात्, सन्निकर्षासम्भवात्। न च ज्ञानलक्षणाप्रत्यासत्त्यैव तत्सम्भवः; ज्ञानलक्षणायाश्च न तत्प्रकारकप्रत्यक्षत्वं कार्यतावच्छेदकम्, मानस उपनीतस्याऽपि विशेष्यतया भानेन तत्प्रयोजकालाभात्। किं तु सुखत्वादिनिष्ठालौकिकविषयताशालिज्ञानत्वमेव। तथा सति निर्विकल्पकानन्तरं घटत्वादेरपि विशेष्यतया भानप्रसङ्गस्तु न, विशेष्यतया प्रत्यक्षं प्रति प्रागुक्तरीत्या लौकिकसन्निकर्षाभावविशिष्टज्ञानस्य प्रतिबन्धकत्वादेव तदभावोपपत्तेरिति वाच्यम्। एवमपि प्रमेयत्वादिसामान्यलक्षणया जायमानसुखत्वादिप्रत्यक्षे व्यभिचारस्य दुर्वारत्वादिति चेन्न। निरवच्छिन्नत्वस्य स्वयेव मयाऽपि कार्यतावच्छेदककोटौ निवेशनीयत्वादिति परमरहस्यमनुसन्धेयम्। सुखादिविशिष्टप्रत्यक्षोत्पत्त्यर्थं सर्वत्र तदव्यवहितपक्षणे सामान्यलक्षणाजन्यानुभवाधीनस्मरणकल्पनसम्भवेऽपि प्राथमिकतदनुभवस्थले तदनुपपत्तिः, तत्पूर्वं सुखादेरेतज्जन्मन्यननुभवात्। प्रागुक्तरीत्या द्वित्वस्थल इवाऽविरललग्नसुखादिद्वयोत्पत्तिमुपजीव्य सुखत्वादिविशिष्टप्रत्यक्षोपपादने च तत्स्थले प्राथमिकसुखव्यक्तेः सविकल्पकागोचरत्वं दुष्परिहरम्। तत्रेष्टापत्तौ च सर्वत्रैव सुखादिस्थले प्रथमोत्पन्नव्यक्तिपरिहारेणैव सुखादीनां सविकल्पकादिविषयत्वं किं न कल्प्यते? न कल्प्यते चाऽविद्यमानस्याऽपि लौकिकविषयत्वम्। न च निर्विकल्पकात्मकसामान्यलक्षणया मानस एव विनाऽपि व्यक्तिद्वयं सकलसुखव्यक्तिभानसम्भवः, मानसे जननीये सामान्यलक्षणया लौकिकसामग्र्यनपेक्षणा(१)दिति वाच्यम्। एवमपि सुखादिप्रत्यक्षानुव्यवसाययोः नियमतः सुखं स्मरामीत्याकारकतापत्तेः, अन्यथोक्तरीत्या घटादिप्रत्यक्षस्थलेऽपि सामान्यप्रत्यासत्त्यधीनस्मरणकल्पनयैव सर्वत्र विशिष्टप्रत्यक्षसम्भवेन निर्विकल्पकमात्रोच्छेदापत्तेः, सामान्यलक्षणाजन्यप्राथमिकानुभवस्य तथाविधस्मरणानन्तरत एवोपपत्तेः, तस्य च तथाविधसामान्यप्रत्यासत्त्यधीनानुभवान्तरजन्यत्वसम्भवात्। तत्प्रयुक्तानवस्थायाश्च बीजाङ्कुरन्यायेनाऽदोषत्वादित्यनुपपत्तिरुक्तनव्यमते चिन्त्या।

अपेक्षाबुद्धेर्लक्षणावस्थायित्वं हि तन्नाशस्य द्वित्वादिनाशकत्वे चतुर्थक्षणे द्वित्वसविकल्पकानुपपत्त्या कल्पनीयम्, तदेव तु न सम्भवति, द्वित्वादीनां नित्यतया तद्विनाशहेतुविचारस्याऽसङ्गतत्वात्। न च द्वित्वादीनां नित्यत्वं न स्वीकर्तुं शक्यम्, आश्रयनाशस्य स्वप्रतियोगिसमवेतत्वकालिकोभयसम्बन्धेनैव प्रतियोगितया नाशं प्रति हेतुत्वेन यत्किञ्चिदाश्रयनाशेऽपि तन्नाशस्याऽवश्यकल्प्यत्वादिति वाच्यम्। घटत्वादेरिव तस्याऽपि नित्यत्वेन कालिकसम्बन्धेन निरुक्तहेतुरहिततया विनाशायोगादित्याशयेन शङ्कते मूले—**न चेति। कथ द्वित्वनाश इति**। द्वित्वादेर्नित्यत्वे तन्नाशहेतुविचारस्याऽयुक्तत्वादिति भावः। द्वित्वादेर्नित्यत्वे कालिकसम्बन्धेनोक्तविनाशहेतुरहितत्वेन तद्विनाशापादनासम्भवेऽपि तस्योत्पत्तिमत्त्वे तत्सम्भवत्येव, ततश्च तद्विनाशहेतुचिन्तनं युक्तमित्याशयेन समाधिमुत्तरार्धो द्वित्वादेरपेक्षाबुद्धिजन्यतां साधयति—**कालान्तर इत्यादिना**। **कालान्तरे**—अपेक्षाबुद्धिशून्यकाले। **तद्-**

---

(१) न चैवं प्रकृतेऽपि द्वितीयक्षणे सामान्यलक्षणयैव भानमस्त्विति वाच्यम्। तथा सति लौकिकविषयत्वानुपपत्तेः।

एव तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिकं तेनैव गृह्यत इति कल्प्यते। न चाऽपेक्षाबुद्धेर्द्वित्वप्रत्यक्षे कारणत्वमस्त्विति वाच्यम्। लाघवेन द्वित्वं प्रत्येव कारणत्वस्योचितत्वात्।

दिनकरी।

तेनैव गृह्यत इति कल्प्यत इति। तद्भिन्नेन न गृह्यत इति कल्प्यत इत्यर्थः। तथ चाऽन्यथानुपपत्त्या पूर्वोक्तप्रतिबध्यप्रतिबन्धकभावकल्पनागौरवं न दोषायेति भावः। ननु कालान्तरे द्वित्वप्रत्यक्षवारणाय द्वित्वप्रत्यक्षं प्रत्येवाऽपेक्षाबुद्धेर्हेतुत्वमस्तु, न तु द्वित्वं प्रतीत्याशङ्कते। **न चेति। लाघवेनेति** द्वित्वत्वस्य कार्यतावच्छेदकस्य लघुत्वादिति भावः।

ननु द्वित्वप्रत्यक्षनिष्ठं लौकिकविषयितया द्वित्वत्वमेव कार्यतावच्छेदकमिति न गौरवम्, न चाऽन्तरेणाऽप्यपेक्षाबुद्धिं द्वित्वप्रत्यक्षापत्तिरेतावताऽप्यवारितैवेति वाच्यम्। द्वित्वत्वाविषयकद्वित्वप्रत्यक्षस्याऽलीकतया व्यापकीभूतद्वित्वत्वावच्छिन्नजनकसामग्रीविरहादेव तद्वा-

रामरुद्री।

त्यादिकेति। अत्रैव हेत्वन्तरमाह— अत एवेति। यत एव अपेक्षाबुद्धेर्द्वित्वादिकं प्रति हेतुत्वं स्वीकृत तत एवेत्यर्थः। **कल्प्यत इति।** कल्पयितुं शक्यत इत्यर्थः। अन्यथा तूक्तरीत्या तत्पुरुषीयापेक्षाबुद्धिजन्यं द्वित्वं तेन गृह्यत इति नियमः कल्पयितुमेव न शक्यः, अपेक्षाबुद्धिजन्यत्वस्यैव द्वित्वादावसिद्धेः। प्रतिपुरुषमेकैकं द्वित्वादिकमुपगम्य तदेव तेन पुरुषेण गृह्यत इत्युपगमेऽपि अपेक्षाबुद्धिशून्यकाले तत्प्रत्यक्षप्रसङ्गो दुर्वारः। ननु अपेक्षाबुद्धेरेव द्वित्वादिप्रत्यक्षे हेतुत्वाभ्युपगमादेवोक्तसकलदोषवारणसम्भवादलमपेक्षाबुद्धेर्द्वित्वादिहेतुत्वेनेत्याशङ्क्ते। **न चेति। उचितत्वादिति।** यद्यप्येवमप्यपेक्षाबुद्धिविरहिणः पुरुषस्याऽपेक्षाबुद्धिमत्पुरुषान्तरीयप्रत्यक्षविषयद्वित्वप्रत्यक्षापत्तिर्दुरुद्धरैव। न च तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वप्रत्यक्षे तत्पुरुषीयद्वित्वघटितचक्षुःसंयुक्तसमवायस्यैव तत्तदात्ममनःसंयुक्तसमवायादेरिव तत्तदात्मसमवेतप्रत्यक्षे योग्यत्वं कल्प्यत इति नोक्तापत्तिसम्भव इति वाच्यम्। तत्तदात्ममनःसंयोगघटितसमवायादेर्विजातीयमनःसंयुक्तसमवायत्वादिना हेतुत्वोपगमात्, प्रकृते तद्वदेव तत्तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिप्रत्यक्षं प्रति तत्तत्पुरुषीयापेक्षाबुद्धिजन्यद्वित्वादिघटितचक्षुःसंयुक्तसमवायादेर्हेतुत्वोपगमे चाऽनन्तकार्यकारणभावप्रसक्त्या महागौरवप्रसङ्गादिति चेन्न। स्वविषयकप्रत्यक्षोपलक्षितत्वसम्बन्धेन द्वित्वादिक प्रत्येवाऽपेक्षाबुद्धेर्हेतुत्वं लाघवात्स्वीकर्तव्यमित्युपरितनमूलग्रन्थस्याऽऽशयः। अन्यथा द्वित्वादेर्यथाश्रुते विषयनिष्ठस्याऽपेक्षाबुद्ध्यधिकरणतया द्वित्वत्वादेरपेक्षाबुद्धिकार्यतावच्छेदकत्वोक्तीर्तनासङ्गतेः। इत्थं चैतादृशकार्यकारणभावविरहेऽपेक्षाबुद्धिशून्यस्य स्वविषयकप्रत्यक्षोपलक्षितत्वसम्बन्धेन द्वित्वाद्यापत्तिर्दुर्वारित्येतादृशकार्यकारणभावः स्वीकरणीय एव। न चैतादृशकार्यकारणभावे न किमपि विनिगमकं द्वित्वप्रत्यक्षं प्रत्येवाऽपेक्षाबुद्धेः कारणत्वमास्तामिति स्वीकारसम्भवादिति वाच्यम्। स्वविषयकत्वप्रत्यक्षत्वादीनां संसर्गघटकत्वे लाघवानपायात्, द्वित्वप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वे तस्य नित्यप्रत्यक्षसाधारणतया तदनवच्छेदकत्वप्रसङ्ग इयतो जन्यत्वस्याऽपि कार्यतावच्छेदककोटिनिवेशावश्यकतया महागौरवाच्च। इत्थं चेश्वरीयापेक्षाबुद्धितो द्व्यणुकादिष्वपि द्वित्वाद्युत्पत्तिः सम्भवति, ईश्वरप्रत्यक्षस्य नित्यत्वेऽपि तस्य समवायादेरिव द्वित्वादिसंसर्गतासम्भवेन तादृशप्रत्यक्षसम्बन्धेन ईश्वरीयापेक्षाबुद्धिजन्यादीश्वर एव तादृशद्वित्वोत्पत्तिसम्भवात्। न चैवमेकत्वादेर्द्वित्वासमवायिकारणत्वं व्याहन्येत, तस्याऽपेक्षाबुद्धेः स्वविषयैकत्ववत्त्वसम्बन्धेन हेतुतया विनिगमनाविरहेणैव व्यवस्थापितत्वात्, तथाविधयुक्तेश्चेदानीमपेक्षाबुद्धेरात्मनिष्ठप्रत्यासत्त्यैव हेतुत्वाभ्युपगमेनाऽसम्भवादिति वाच्यम्। अपेक्षाबुद्धेर्द्वित्वादिकं प्रत्यात्मनिष्ठप्रत्यासत्त्या हेतुत्वेऽपि तस्य यत्किञ्चिद्विषयनियमाय विषयनिष्ठप्रत्यासत्त्याऽपि हेतुत्वावश्यकतया तत्सिद्धेः, एतादृशकारणत्वान्तरकल्पनाधीनगौरवस्य च फलमुखत्वेनाऽदोषत्वादिति सुधियो विदाङ्कुर्वन्तु।

टीकायाम्—**अलीकतयेत्यादि।** नन्वेवमपि चैत्रीयापेक्षाबुद्धिभ्यन्नयद्वित्वस्याऽपेक्षाबुद्धिमता मैत्रेण

दिनकरी।

रणादिति चेन्न। उत्पादकसामग्र्या व्यञ्जकत्ववाङ्गीकारे घटाद्युत्पादकसामग्र्या अपि घटादिव्यञ्जकत्वापत्त्या सत्कार्यवादापत्तेरिति।

रामरुद्री।

ग्रहणापत्तिरित्यमपि दुर्वारेवेति वाच्यम्। द्वित्वादीनामपेक्षाबुद्ध्यभिव्यङ्ग्यतामते द्वित्वादेरेकैकव्यक्तितया तत्तत्पुरुषभेदेन भेदरहितत्वेन चैत्रज्ञेयं द्वित्वं मैत्रेण न ज्ञायत इत्यस्याऽनभ्युपगमेनोक्तापत्त्याविष्टापत्तेः कर्तुं शक्यत्वात्, तत्तद्द्वित्वादिप्रत्यक्षं प्रत्येव वा तत्तदपेक्षाबुद्धीनां हेतुत्वादेव चोक्तापत्तिवारणसम्भवाच्च। न चैवमपेक्षाबुद्धिरहितस्य द्वित्वत्वादिप्रत्यक्षप्रसङ्गः, सामग्रीसत्त्वादिति वाच्यम्। द्वित्वादिविषयकस्य द्वित्वत्वप्रत्यक्षस्याऽनीकृतया व्यापकीभूतद्वित्वविषयकप्रत्यक्षत्वावच्छिन्नजनकसामग्रीविरहादेव तदापत्तिवारणसम्भवात्। **उत्पादकसामग्र्या व्यञ्जकत्वाङ्गीकार इति**। प्रत्यक्षविषयत्वाभावविशिष्टद्वित्वादिरूपजन्यत्वनियतजन्यसमवेतत्ववद्गुणनिष्ठकालिकसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतामात्रस्य कालनिष्ठस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताकतत्तद्द्वित्वाभावान्यमात्रप्रयुक्तत्वे। लाघवात्तत्तद्घटादिकसामग्र्यश्रयाश्रयभावस्यैव तत्तद्व्यञ्जकत्व इति तात्पर्यम्। **घटाद्युत्पादकसामग्र्या अपि घटादिव्यञ्जकत्वापत्तेति**। प्रत्यक्षविषयत्वाभावविशिष्टतत्तज्जन्यमात्राधिकरणतायाः अपि कालनिष्ठायाः कालिकसम्बन्धावच्छिन्नतदभावान्यमात्रप्रयुक्तत्वापत्त्येत्यर्थः। तादृशमात्रप्रयुक्तत्वस्याऽवश्यं स्वीकरणीयत्वे इति तु निर्गलितम्। तुल्ययुक्त्येत्यादिः। **सत्कार्यवादापत्तेरिति**। कालनिरूपितनिरवच्छिन्नवृत्तिमदभावप्रतियोगितासामान्यस्य कालिकसम्बन्धानवच्छिन्नत्वापत्तेरित्यर्थः। तथा चैतत्क्षणवृत्तिरेतद्घटप्रत्यक्षजनकतावच्छेदककोटिप्रविष्टधर्मावच्छिन्नकालिकसम्बन्धावच्छिन्नप्रतियोगिताक एतद्घटाभावो यदि निरवच्छिन्नवृत्तित्वेतद्घटविषयकप्रत्यक्षजनकतावच्छेदकावच्छिन्नकालिकसम्बन्धावच्छिन्नप्रतियोगिताकत्वेतदुभयवान् स्यात् प्रत्यक्षविषयत्वाभावविशिष्टेतद्घटाधिकरणताप्रयोजकः स्यादित्यापत्तिः। न्यायसङ्ग्रहमतसाधारण्यचक्षुरादिसन्निकर्षघटितलौकिकसामग्र्याः कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावो दृष्टान्तः। तस्योभयमतेऽपि निरवच्छिन्नवृत्तित्वघटिततादृशोभयत्वस्य प्रत्यक्षविषयत्वाभावविशिष्टेतद्घटाधिकरणताप्रयोजकत्वस्य च सम्प्रतिपन्नत्वात्। सत्कार्यवादिमते च घटादेः सर्वकालवृत्तित्वाङ्गीकारेण निरवच्छिन्नवृत्तेः कालिकसम्बन्धावच्छिन्नाभावस्याऽसत्त्वेऽपि घटानधिकरणदेशावच्छेदेन वर्तमानः सुप्रसिद्धः। न च सत्कार्यवादिमते सर्वस्यैव वस्तुनः सर्वकालवृत्तित्वाङ्गीकारेण सामग्र्या अपि तथात्वादुक्तापाद्यापादकयोर्व्याप्तिनिश्चय एव दुर्घटः, सामग्र्यभावस्याऽपि सामग्र्यनधिकरणदेशावच्छेदेनैव प्रसाधनीयतया तत्र निरवच्छिन्नवृत्तित्वघटितोक्तापादकाभावेन दृष्टान्तासिद्धेरिति वाच्यम्। सामग्री हि तत्तत्कारणतावच्छेदकसम्बन्धेन कारणाधिकरणे तत्तत्कारणतावच्छेदकसम्बन्धेनैकक्षणावच्छिन्नवृत्तित्वरूपसामानाधिकरण्यसम्बन्धेनैककारणविशिष्टपरकारणविशिष्टपरकारणादिरूपा, तद्घटकस्य प्रत्येककारणस्य सत्कार्यवादिभिः सर्वकालवृत्तित्वस्वीकारेऽपि तादृशविशिष्टधर्मावच्छिन्नाधिकरणत्वस्य तत्तत्कारणेषु तत्तत्कारणवैशिष्ट्यदशायामेव स्वीकरणीयत्वेन तदन्यकाले तादृशविशिष्टाभावस्य निरवच्छिन्नवृत्तेरपि प्रसिद्धिः सम्भवत्येव। न च सत्कार्यवादिमते घटादेः सर्वस्यैव वस्तुनः सार्वदिकत्वस्वीकारेण घटाद्यधिकरणत्वमपि सार्वदिकमेवेति निरुक्तसामग्रीकुक्षिप्रविष्टसकलकारणसत्त्वमपि सार्वदिकमेवाऽभ्युपगन्तव्यम्, तथा च तादृशविशिष्टाधिकरणतायाः अपि सार्वकालिकत्वेन निरवच्छिन्नवृत्तिविशिष्टाभावाप्रसिद्धिर्दुरुद्धरेवेति। वाच्यम्। सत्कार्यमते सर्वस्यैव वस्तुजातस्य सार्वदिकत्वेऽपि तार्किकमते घटाभावतत्सम्बन्धभूतलानां भूतले घटानयनदशायां सत्त्वेऽपि भूतलस्य घटाभावाधिकरणत्वाभाववत् घटकपालतत्सम्बन्धादीनां नित्यत्वेऽपि मुद्गरादिपातोत्तरं कपालादौ घटाधिकरणताविरहस्य स्वीकारेणाऽविरोधात्। तद्घटाधिकरणतायाः सार्वदिकत्वं व्याहतमित्यापत्तिस्तु अधिकरणतायां अधिकरणरूपत्ववादितार्किकमते भूतलसत्त्वदशायां घटाभावाधिकरणतासत्त्वासत्त्वविकल्पप्रयुक्तदूषणगणनिरासाय तदङ्गीकृतयुक्तिभिरेव निरसनीया*।

* अधिकरणत्वादीनामधिकरणरूपत्वेऽपि घटानयनदशायां घटाभावाद्यधिकरणतायां अधिकरणतात्वेनाऽसत्त्वेऽपि भूतलादिरूपेण सत्त्वमिष्यत इत्यादियुक्तिभिर्निरसनीयेति भावः।

अतोन्द्रिये द्व्यणुकादावपेक्षाबुद्धिर्योगिनां, सर्गादिकालीनपरमाण्वादावीश्वरीयापेक्षाबुद्धिः, ब्रह्माण्डान्तरवर्तियोगिनामपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति ॥ १०८ ॥

दिनकरी ।

नन्वपेक्षाबुद्धेर्द्वित्वाद्युत्पादकत्वं न सम्भवति, द्व्यणुकस्याऽस्मदीयप्रत्यक्षागोचरतया तत्राऽपेक्षाबुद्धयसम्भवेन तत्र त्रित्वानुत्पत्त्यापत्तेः । न चेष्टापत्तिः, भावकार्यस्याऽसमवायिकारणजन्यत्वनियमेन द्व्यणुकगतत्रित्वं विना त्र्यणुकपरिमाणानुत्पत्तेः, परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमेन द्व्यणुकपरिमाणस्य तत्राऽसमवायिकारणत्वासम्भवादत आह । **अतोन्द्रिये द्व्यणुकादाविति ।** आदिना परमाणुपरिग्रहः । सर्गादौ योगिनामभावादाह । **ईश्वरीयेति ।** न चेश्वरीयापेक्षाबुद्धेर्द्वित्वोत्पादकत्वे तद्द्वित्वस्य नित्यत्वप्रसङ्गः, ईश्वरीयापेक्षाबुद्धेर्नित्यत्वेन तन्नाशनाश्यत्वस्य तादृशद्वित्वे वक्तुमशक्यत्वादिति वाच्यम् । तद्द्वित्वस्येश्वरीयापेक्षाबुद्धिसहकारिविशेषस्य क्षणविशेषस्य नाशादेव नाशोपपत्तेः, क्षणविशेषस्येश्वरीयापेक्षाबुद्धिसहकारित्वानङ्गीकारे सर्गाद्यकालीनपरमाणुद्वित्वो-

रामरुद्री ।

एतादृशरीत्या मुद्गराभिघातोत्तर कपालादौ घटादिवैशिष्ट्याभावश्चाऽयं कालो न घटविशिष्टकपालवानिति प्रतीत्युपपत्तय एव स्वीक्रियत इत्यदोषात् । इत्थं च **सत्कार्यवादापत्ते**रित्यस्य कालनिरूपितनिरवच्छिन्नवृत्तित्वदभावनिरूपितवैशिष्ट्यव्याप्यज्यवृत्तिधर्मानवच्छिन्नप्रतियोगितामात्रस्य कालिकसम्बन्धानवच्छिन्नत्वापत्तेरित्यर्थो वक्तव्यः । अन्ययोक्तसामग्र्यभावप्रतियोगित्वायामेवोक्तरीत्या कालिकसम्बन्धावच्छिन्नत्वस्वीकारेण तदन्तर्भावेणैव निरुक्तापाद्यापादकयोर्व्याप्तिभङ्गापत्तेः । तद्घटप्रत्यक्षजनकतावच्छेदकत्वं च तद्घटप्रत्यक्षाभावप्रयोजकाभावप्रतियोगितावच्छेदकत्वम् । तेन सामग्रीत्वस्य जनकतानवच्छेदकत्वेऽपि न क्षतिः । तद्घटान्यस्मिन् विषयतासम्बन्धेन तद्घटप्रत्यक्षाभावस्य तादात्म्यसम्बन्धावच्छिन्नतद्घटाभावप्रयुक्तत्वमस्त्येवेति तद्घटत्वादेरुक्तरीत्या प्रत्यक्षाभावप्रयोजकाभावप्रतियोगितावच्छेदकत्वोपपत्तिः । वैशिष्ट्यव्याप्यज्यवृत्तिधर्मानवच्छिन्नत्वमित्यत्र व्याप्यज्यवृत्तिधर्मावच्छिन्नत्वं पर्याप्तिसम्बन्धावच्छिन्नावच्छेदकताकत्वम् । वैशिष्ट्यानवच्छिन्नत्वं तु न सम्बन्धानवच्छिन्नत्वम्, अप्रसिद्धेः । नाऽपि वैशिष्ट्यनिष्ठसांसर्गिकावच्छेदकताभिन्नावच्छेदकताकत्वम्, रक्तदण्डो नाऽस्तीत्याद्यभावानां रक्तत्वदण्डत्वरूपधर्मद्वयावच्छिन्नत्वे वैशिष्ट्यरूपधर्मेणाऽपि अवच्छिन्नत्वात् । विशिष्टाभावान्तरानुपपत्तेः । नाऽपि धर्मद्वयावच्छिन्नत्वं स्वनिरूपकत्व—स्वभिन्नावच्छेदकतानिरूपकत्वोभयसम्बन्धेनाऽवच्छेदकताविशिष्टान्यस्वरूपं वा तत्, रक्तत्वोपलक्षितदण्डाभावरक्तदण्डाभावयोरवैलक्षण्यापत्तेः । अत्राऽस्मद्गुरुचरणाः । संसर्गताख्यावच्छेदकत्वावच्छिन्नधर्मविषयाऽवच्छेदकताकत्वमेव तत् । विशिष्टाभावस्थले हि रक्तत्वादाविव प्रतियोगितावच्छेदकीभूतसंसर्गस्य धर्मविषयाऽप्यवच्छेदकत्वान्तरं प्रतियोगितानिरूपितं स्वीक्रियत एव, अन्यथा रक्तत्वविशिष्टदण्डाभावरक्तत्वोपलक्षितदण्डाभावयोरवैलक्षण्यापत्तेरिति प्राहुः ।

उच्छङ्खलास्तु अपेक्षाबुद्धेर्द्वित्वादिव्यञ्जकत्वमेव नाऽस्ति, मानाभावात् । यावदाश्रयसन्निकर्षे सत्येकत्वबुद्ध्यादिप्रतिबन्धकोत्पत्तिसमय एव द्वित्वादिप्रतिबन्धकोत्पत्तेः, व्यञ्जकत्वबादिनाऽपि तदव्यवहितोत्तरक्षणे तदुपगमात्, क्षणविलम्बे प्रमाणस्य भवदीयशपथमन्तरेणाऽन्यस्याऽभावात् । अन्यथाऽपेक्षाबुद्धेस्तृतीयक्षण एव तदनुभवस्य नैयायिकादिशपथसिद्धस्योपपत्तये द्वित्वादेरपेक्षाबुद्धिजन्यत्वस्याऽप्यङ्गीकारापत्तेः, तस्मात्तुल्यसामग्रीकत्वादपेक्षाबुद्धेर्द्वित्वादिविषयकत्वनियमकृत एव द्वित्वादेरपेक्षाबोध्यत्वव्यवहार इत्याहुः, तच्चिन्त्यम् ।

नित्यत्वप्रसङ्ग इति । विनाशाप्रतियोगित्वप्रसङ्ग इत्यर्थः । **सहकारिविशेषस्येति ।** अथैवंरीत्या क्षणविशेषाणामीश्वरबुद्धिसहकारित्वोपगमेऽनन्तक्षणध्वंसीनां सहकारित्वावश्यकतया महद्गौरवम् ।

दिनकरी ।

त्पत्तेः पूर्वं तद्द्वित्वोत्पादापत्तेः । 'अपेक्षाबुद्धिनाशाच्च—'इति मूलस्थाऽऽश्रयनाशोपलक्षकत्ववदीश्वरीयापेक्षाबुद्धिसहकारिक्षणविशेषनाशोपलक्षकत्वस्वीकाराच्च न तद्विरोधः । एतेन घटाद्युत्पत्तिद्वितीयक्षणे भगवदपेक्षाबुद्धया तत्र द्वित्वादिकं जन्यत इति परास्तम् । इदानीं सहकारिक्षणविशेषस्याऽभावेन भगवदपेक्षाबुद्धया द्वित्वादेरजननात्, तदानीं तत्र द्वित्वो-

रामरुद्री ।

ननु सर्वविषयकत्वेनेश्वरीयापेक्षाबुद्धेः यत्काले तया परमाण्वोर्द्वित्वमारभ्यते, तत्काल एव यावत्तत्कालीनद्रव्यवृत्तिः परार्धत्वरूपा सङ्ख्याऽपीत्यविवादम्, कारणसत्त्वे कार्योत्पत्त्यभावस्योपपादयितुमशक्यत्वात् । इत्थं च यथा व्यापकधर्मावच्छिन्नसामग्र्या व्याप्यधर्मावच्छिन्नजनकत्वेऽपि तदवच्छिन्नजनकसामग्रीव्याप्यतावच्छेदककोटौ निवेशः सकलतान्त्रिकैरभ्युपगम्यते, तथैव व्यापकधर्मजनकसामग्र्या अपि व्याप्यधर्मजनकसामग्रीव्याप्यतावच्छेदककोटौ निवेशोऽसति बाधके उपगन्तव्य एव, व्यभिचारप्रशमं विना व्याप्यव्यापकभावस्य तद्घटकविशेषणावैयर्थ्ये खण्डयितुमशक्यत्वात्, इत्थं च परमाणुद्वित्वादेस्तत्समकालीनयावद्द्रव्यगतपरार्धत्वसङ्ख्याव्याप्यतया व्यापकधर्मात्मकपरार्धत्वजनकसामग्र्याः परमाणुद्वित्वाद्युत्पादकसामग्रीव्याप्यतावच्छेदककोटावनिवेशे तस्यास्तादृशभगवदिच्छादिरूपायास्तत्पूर्वमपि सत्त्वेन तद्द्वित्वस्य ततः प्रागप्युत्पादापत्तेस्तस्यास्तद्घटकत्वमावश्यकम् । तथा च परार्धत्वस्य विद्यमानयावद्द्रव्यगतत्वस्वीकारात् प्रतिक्षणं कस्यचिद्द्रव्यस्योत्पत्तेर्विनाशस्य चेष्टतया यद्द्रव्यस्यैतत्प्रथमक्षणे उत्पादः प्रामाणिकस्तद्द्रव्यस्याऽपि तादृशैतत्कालीनपरार्धत्वे समवायिकारणविधया कारणत्वेन तज्जनकसामग्रीघटकतया तस्य तत्पूर्वमभावादेव न परमाणौ द्वित्वोत्पादप्रसङ्गः । इत्थं च यद्द्रव्यव्यक्तेरग्रिमक्षण एव नाशो भविष्यति तस्या अपि तादृशसामग्रीघटकतया तन्नाशस्य तादृशपरार्धत्वनाशवत् तद्द्वित्वनाशेऽपि सामग्रीघटकत्वमावश्यकम्, व्यापकधर्मजनकसामग्र्या व्याप्यधर्मजनकत्वस्येष्टत्वात् । न च तादृशद्रव्यव्यक्तीनां कार्यानुत्पादप्रयोजकत्वे मानाभावात् कार्यानुत्पादप्रयोजकस्यैव कारणव्यवहारविषयत्वसम्भवात्तस्य कारणत्वासम्भव इति वाच्यम् । व्यापकाभावस्य व्याप्याभावप्रयोजकताया अपलपितुमशक्यत्वात् । यद्यपि तत्तद्द्रव्यनाशः स्वप्रतियोगिसमवेतत्व—कालिकोभयसम्बन्धेन प्रतियोगितासम्बन्धेन तत्तत्परार्धत्वप्रतियोगिकनाश एव जनक इति प्रतियोगितासम्बन्धेन तादृशनाशे तस्य व्यापकत्वेन तत्सम्बन्धावच्छिन्नतदभावे तदभावस्य प्रयोजकत्वसम्भवेऽपि स्वरूपसम्बन्धावच्छिन्नतदभावप्रयोजकत्वमनुपपन्नमेव, स्वरूपसम्बन्धावच्छिन्नतदभावप्रयोजकत्व एव च द्वित्वादिनाशाभावप्रयोजकत्वं तदभावस्योपपद्यते, तथाऽपि तत्तत्परार्धत्वनाशादेर्यावत्प्रतियोगिसमवायिनिष्ठत्वोपपादनाय स्वरूपेण तत्तद्व्यक्तिप्रतियोगिकनाशं प्रति तत्तद्व्यक्तेरपि समवायेन हेतुत्वमङ्गीकरणीयमेवेति उक्तकारणतावच्छेदकसम्बन्धेन आश्रयनाशविशिष्टस्य प्रतियोगिन एव तादृशविशिष्टरूपेण क्षणव्यवहारनियामकस्य व्यापकधर्मसामग्र्येण व्याप्यधर्माभावप्रयोजकाभावप्रतियोगित्वेन तत्तद्द्वित्वनाशं प्रति जनकत्वमुपपन्नमेवेति चेन्न । एवं हि परमाणुद्वित्ववद् घटादिद्वित्वमपि तृतीयक्षणे नश्येत, तस्याऽपि तादृशव्याप्यतया तादृशव्यापकधर्मविनाशकसामग्र्यास्तद्द्वितीयक्षणे सत्त्वेन तद्विनाशावश्यकत्वात्, न चेष्टापत्तिः, तृतीयक्षणे द्वित्वविशिष्टप्रत्ययासम्भवात्, कारणाभावस्यैव कार्याभावप्रयोजकत्वेन तत्तद्द्रव्यनाशस्य द्वित्वनाशासमानाधिकरणतया तदभावे तदभावप्रयुक्तत्वासम्भवादिति चेत्, मैवम्, युगपदुत्पन्नविनष्टयोर्नाशस्यैकेन तादृशपरार्धत्वादिप्रतियोगिकस्यैव नाशस्य द्वित्वादिप्रतियोगिकतया तत एव तत्सम्भवात् । इत्थं चाऽऽश्रयनाशमात्रोपलक्षकत्वेऽपि **'अपेक्षाबुद्धिनाशाच्च—'** इत्यादिमूलस्य न क्षतिः । यद्यप्येवमपि द्वित्वादावीश्वरीयापेक्षाबुद्धेर्हेतुत्वे तस्याः सार्वदिकतया सर्गात प्राक् परमाण्वादिषु द्वित्वोत्पादापत्तिर्दुरुद्धरैव, तथाऽपि तद्वारणायाऽनन्तक्षणविशेषाणां हेतुत्वं कल्प्यत एवेति नोक्तदोषः । एतावता प्रबन्धेन परार्धत्वारम्भकयत्किञ्चिद्द्रव्यनाशस्य क्षणविशेषनाशरूपस्यापि भिन्नक्रमेण द्वित्वादिनाशकत्वप्रकीर्तनं तु तस्य ऽऽश्रयनाशविधयैव तत्कारणत्वस्फोरणायेति ध्येयम् ।

दिनकरी।

त्पादे मानाभावाच्च । एतदस्वरसादाऽऽह । ब्रह्माण्डान्तरेति ॥ १०८ ॥

रामरुद्री।

वस्तुतस्तु अपेक्षाबुद्धेः प्रागुक्तदिशा स्वविषयकप्रत्यक्षोपलक्षितत्वसम्बन्धेन समवायेन वा द्वित्वादिकं प्रति समवायेन स्वविषयैकत्ववत्त्वसम्बन्धेन च हेतुतया एकापेक्षाबुद्धित एकद्वित्वोत्पादानन्तरं द्वित्वान्तरोत्पादापत्तिर्दुर्वारेत्यतो द्वित्वादिजननेऽपेक्षाबुद्धेः क्षणविशेषसहकार्यत्वं द्वित्वादेरीश्वरीयापेक्षाबुद्धयजन्यत्वत्वादिभिरपि स्वीकरणीयमिति न भगवदपेक्षाबुद्धितो द्वित्वधारापत्तिः। द्वित्वविनाशव्यवस्था तु प्रागुक्तदिशैवेति रमणीयम्।

नन्वेवं खण्डप्रलयस्य जन्यद्रव्यानधिकरणकालत्वेन प्राक्तनसृष्टिकालोत्पन्नपरमाणुद्वित्वस्य तद्व्यापकपरार्धत्वनाशकतदधिकरणजन्यद्रव्यनाशेनैव नाशात् इदानीन्तनद्व्यणुकाद्युत्पत्तौ तत्रैकत्वोत्पत्त्यनन्तरं तत्समवायिकारणपरार्धत्वोत्पादकाल एव परमाणौ द्वित्वोत्पादसम्भवादाद्यद्व्यणुकानां क्षणद्वय निष्परिमाणत्वमेवाऽऽस्मिन् मते प्रसज्यते, तच्चाऽयुक्तम्, परिमाणस्याऽपि तत्र द्वितीयक्षण एवोत्पादस्य सर्वत्र स्वोत्पत्तिद्रव्यत्वादित्याशङ्क्य कल्पान्तरमारचयति **मूले-ब्रह्माण्डान्तरेत्यादि**। यद्वा ननु युगपदुत्पन्नविनष्टानामपि नाशस्य नानाविधत्वे नैतादृशयुक्तिसम्भव इत्यत आह—**ब्रह्माण्डे**त्यपि कश्चित्। तथा चैतन्मते तादृशपरार्धत्वादिनाशकस्योक्तरीत्या द्वित्वनाशं प्रति हेतुत्वानभ्युपगमेऽपि न क्षतिः, तादृशयोगिबुद्धिनाशादेव तन्नाशावश्यकत्वात्। न चेश्वरीयापेक्षाबुद्धेरपि स्वरूपयोग्यतया तज्जन्यद्वित्वस्याऽविनाशापत्तिस्तदवस्थैवेति वाच्यम्। ईश्वरीयापेक्षाबुद्धियोग्यापेक्षाबुद्धिजनितद्वित्वयोर्भेदे मानाभावेन तत्रैव योग्यापेक्षाबुद्धेरपि हेतुत्वेन तन्नाशेन तन्नाशसम्भवात्। न च व्यभिचारादेव न तत्सम्भव इति वाच्यम्। स्वविषयकप्रत्यक्षोपलक्षितत्वसम्बन्धेन द्वित्वं प्रत्येवाऽपेक्षाबुद्धेर्हेतुत्वस्योक्तत्वेन व्यभिचारायोगात्। न चैवं चैत्रमैत्रयोरेककालीनापेक्षाबुद्धिजन्ययोः समनियतयोर्द्वित्वयोर्भेदो न स्यादिति वाच्यम्। इष्टत्वात्। अत एव लाघवादपेक्षाबुद्धिजनितस्य द्वित्वस्याऽऽश्रयमात्रनिष्ठत्वमास्ताम्, विषयतया च विषयनिष्ठत्वम्। तथा च समवायसम्बन्धेन द्वित्वं प्रत्येवाऽपेक्षाबुद्धेः कारणत्वादेव न पुरुषान्तरीयद्वित्वस्य पुरुषान्तरेण ग्रहणप्रसङ्ग इत्यपि निरस्तम्। उक्तस्थले तैर्द्वित्वद्वयस्य कल्पनीयतयाऽस्माकं च व्यक्त्यैक्येन लाघवादिति पुनरभिनववैशेषिकसिद्धान्तसरणिः ॥१०८॥

ननु द्वित्वं प्रत्यपेक्षाबुद्धेर्वैजात्यपुरस्कारेणैव हेतुत्वं, अनेकैकत्वावगाहिज्ञानत्वादिना तत्कल्पने प्रमाणाभावात्, तादृशवैजात्यस्य द्वित्वादिजनकतावच्छेदकतयैव सिद्धिसम्भवात्। न च साङ्कर्यभयेन चाक्षुषत्वादिव्याप्यस्य तस्य नानात्वाभ्युपगमावश्यकत्वात् परस्परव्यभिचारेण कथं जनकतावच्छेदकत्वमिति वाच्यम्। द्वित्वादिष्वपि नानावैजात्यस्य कार्यतावच्छेदकतायाः सुवचत्वात्। अस्तु वाऽपेक्षाबुद्धित्वं मानसत्वव्याप्यमेव द्वित्वत्वाद्यवच्छिन्नजनकतावच्छेदकम्, सर्वत्र मानसापेक्षाबुद्धित एव द्वित्वाद्युत्पत्तेरिष्टत्वात्, क्षणविलम्बस्याऽदोषत्वात्। न च चाक्षुषत्वादिव्याप्यत्वमादाय विनिगमनाविरह इति वाच्यम्। अन्धकुष्ठयादेरपेक्षाबुद्धितोऽपि द्वित्वोत्पत्त्या चाक्षुषत्वादिव्याप्यत्वासम्भवात्। अथ तथाऽपि स्मृतित्वव्याप्यत्वमादाय विनिगमनाविरहः। न च कल्पनीयतत्तत्स्मृतिव्यक्तिं प्रति तत्तदुद्बोधकव्यक्तेः कारणत्वकल्पने गौरवमेव बाधकमिति वाच्यम्। तवाऽपि कल्पनीयतत्तन्मानसव्यक्तिं प्रति तत्तद्विशेषणज्ञानादेर्विशिष्य हेतुत्वावश्यकत्वेन तुल्यत्वात्। न च यत्र मानसापेक्षाबुद्धिरेव प्रथममुभयवादिसिद्धा, तत्र तव क्षणद्वयापलापापत्तिः, संस्कारस्याऽपेक्षितत्वेन तृतीयक्षणे एव स्मृतिसम्भवादिति वाच्यम्। तवाऽपि यत्र परामर्शात्मिका चाक्षुषापेक्षाबुद्धिस्तत्र क्षणद्वयापलापात्, अनुभित्याद्युत्पत्त्यनन्तरमेव मानसज्ञानसम्भवादिति चेन्न। यत्रोपेक्षात्मकापेक्षाबुद्धितो द्वित्वाद्युत्पत्तिस्तत्र संस्कारव्यक्तिकल्पनागौरवस्यैव विनिगमकत्वात्। चाक्षुषापेक्षाबुद्धिस्थले मानसव्यक्तिजन्यसंस्कारादिव्यक्तिकल्पनापाप्तस्मृतितज्जन्यसंस्कारादिव्यक्तिकल्पनासमानत्वात्। न चैवमपि द्वित्वादिजनकतावच्छेदकापेक्षाबुद्धित्वानां त्रित्वादिजनकतावच्छेदकापेक्षाबुद्धित्वैः साङ्कर्यप्रसङ्गः, द्वित्वाद्युत्पादकाले नियमतस्त्रित्वाद्युत्पादवारणाय तेषां भेदस्याऽऽवश्यकत्वादिति वाच्यम्। त्रित्वाद्यधिकसङ्ख्याजनकतावच्छेदका-

अनेकैकत्वबुद्धिर्या साऽपेक्षाबुद्धिरिष्यते ।

अपेक्षाबुद्धिः केत्यत आह अनेकैकत्वेति । **अयमेकोऽयमेक इत्याकारिकेत्यर्थः । इदं तु बोध्यम् । यत्राऽनियतैकत्वज्ञानं, तत्र त्रित्वादिभिन्ना बहुत्व·**

दिनकरी ।

इत्यतः—इत्याकारकज्ञातः ।

नन्वेकत्वांशे निर्धर्मितावच्छेदकैकत्वज्ञानात् द्वित्वाद्युत्पत्त्यापत्तिरतो व्याचष्टे । अयमेक इति । तत्तद्व्यक्तिमात्रनिष्ठेदन्त्वावच्छिन्नविशेष्यतानिरूपितैकत्वप्रकारताशालिनी बुद्धिरपेक्षाबुद्धिपदार्थ इति भावः । क्वचित्पुस्तके 'इदं तु बोध्यम्—' इत्यादिः 'अवधेयम्–' इत्यन्तः पाठः, स चैवं व्याख्येयः–यत्राऽनियतैकत्वेति । एकत्वविशेष्यकसङ्ख्यात्वनियत

रामरुद्री ।

पेक्षाबुद्धित्वानां द्वित्वादिन्यूनसङ्ख्याजनकतावच्छेदकैकत्वेत्यव्याप्त्यभ्युपगमेनाऽदोषात् । तथा चेश्वरीयापेक्षाबुद्धितो न द्वित्वाद्युत्पादसम्भवः, तत्र मानसत्वाद्यभावेन तद्व्याप्यजातीनामप्यभावादिति केषाञ्चिन्मतं प्रतिक्षेप्तुमादौ द्वित्वादिजनिकाया अपेक्षाबुद्धेः कीदृशं स्वरूपमिति प्रश्नमुखेनापेक्षाबुद्धेर्द्वित्वादिजनने कारणतावच्छेदकं रूपं निर्वक्तुमुपक्रमते मूले–**अपेक्षाबुद्धिरित्यादिना** । तथा च परत्वापरत्वद्वित्वद्विपृथक्त्वादीनां जनकतायां विनिगमनाविरहेण वैजात्यविशेषावच्छिन्नत्वस्वीकारावश्यकत्वे तेषां परस्परं साङ्कर्यप्रसङ्गभयेनैवाऽपेक्षाबुद्धेर्वैजात्यपुरस्कारेण कारणत्वकल्पनमशक्यम्, अयमेकोऽयमेको द्रव्याणि चैकत्ववन्तीति समूहालम्बनात्मकापेक्षाबुद्धितो द्रव्यमात्रवर्तिसङ्ख्योत्पादवारणाय तत्तद्वृत्त्येकत्वज्ञानत्वादिना तत्तद्वृत्तिसङ्ख्याजनकत्वस्याऽवर्जितत्वे वैजात्यपुरस्कारेण तद्धेतुत्वकल्पनमनावश्यकं चेति नेश्वरीयापेक्षाबुद्धितो द्वित्वोत्पादे किञ्चिद् बाधकम् । अत एव त्रित्वाद्यवच्छिन्नसत्त्वे नियमतो द्वित्वाद्यवच्छिन्नमपि तत्र तिष्ठतीति गाणितिकानां समयोऽपि सङ्गच्छते, त्रित्वस्य नियमतो द्वित्वोत्पादकसामग्रीजन्यत्वादिति मूलकृतामाशयः ।

अथाऽपेक्षाबुद्धेः केन रूपेण द्वित्वादिजनकत्वमिति चेत्, तत्तद्व्यक्तिवृत्त्येकत्वान्यसङ्ख्यासामान्यं प्रति तत्तद्वृत्त्येकत्वज्ञानत्वेनेति गृहाण । न चैवमेकमात्रधर्मिकैकत्वज्ञानदशायां द्वित्वाद्युत्पादप्रसङ्ग इति वाच्यम् । तस्याऽपरव्यक्तिवृत्तित्वावश्यकत्वेन तद्वृत्त्येकत्वज्ञानविरहादेव तदुत्पादासम्भवात् । न चैवमपि चैत्रस्यैकैकत्वज्ञानकाले मैत्रस्य च तथाविधापरैकत्वज्ञानसत्त्वे द्वित्वोत्पादापत्तिरिति वाच्यम् । स्वविषयकप्रत्यक्षोपलक्षितत्वसम्बन्धं कार्यतावच्छेदकीकृत्य तथाविधकार्यकारणभावान्तरस्याऽपि कल्पनीयत्वात् । न चैकत्वादेर्गुणत्वादिप्रकारेण ज्ञानदशायां द्वित्वाद्युत्पादापत्तिरिति वाच्यम् । एकत्वत्वानवच्छिन्नसावच्छिन्नविषयतान्यत्वस्याऽपि एकत्वनिष्ठविषयतायां निवेशनीयत्वात् । इत्थं च निर्विकल्पकात्मकापेक्षाबुद्धितोऽपि द्वित्वाद्युत्पादः सम्भवति । शेषं पूर्वोक्तदिशाऽवसेयम् ।

केचित्तु अयमेक इमौ द्वावित्यादिज्ञानोत्तरं लिङ्गाद्युत्पत्तेरानुभविकतया तत्तद्व्यक्तिवृत्त्येकत्वान्यसङ्ख्यासामान्यं प्रति तत्तद्व्यक्तिवृत्तिसङ्ख्याज्ञानत्वेनैव हेतुत्वम् । न चैवमयमेक इमौ द्वावित्याकारकज्ञानदशायां द्वित्वाद्युत्पादप्रसङ्गः, पूर्वमत इवैतन्मतेऽपि तस्येष्टत्वात्, अधिकसङ्ख्यासामग्र्याः प्रतिबन्धकत्वमुपगम्याऽपि तद्वारणसम्भवाच्च । न चैवमपि गुणत्वादिनैकत्वद्वयावगाहिज्ञानादपि द्वित्वाद्युत्पादप्रसङ्गो दुर्वारः, सङ्ख्यानिष्ठविषयतायामेकत्वत्वानवच्छिन्नसावच्छिन्नविषयत्वान्यत्वस्य पूर्वमत इवैतन्मते द्वित्वत्वादिप्रकारकज्ञानादपि सङ्ख्योत्पत्त्यभ्युपगमेन निवेशयितुमशक्यत्वादिति वाच्यम् । एकत्वत्वानवच्छिन्नैकत्वनिष्ठसावच्छिन्नविषयत्वद्वित्वत्वानवच्छिन्नद्वित्वनिष्ठसावच्छिन्नविषयत्वादिभेदस्यैव कारणतावच्छेदकघटकत्वेनाऽदोषादित्यप्याहुरित्यन्यत्र विस्तरः ।

अनियतैकत्वज्ञानमिति । एकत्वे अनियतत्वस्य–प्रसङ्ख्यत्वस्य भानं तत्रेत्यर्थः । तथा च त्रित्वत्वादिव्यापिका बहुत्वत्वरूपाऽपि काचिज्जातिः स्वीक्रियते, तदवच्छिन्नस्य त्रित्वत्वाद्यवच्छिन्नोत्पत्तिवेला-

सङ्ख्योत्पद्यते, यथा सेनावनादाविति कन्दलीकारः।

आचार्यास्तु त्रित्वादिकमेव बहुत्वं मन्यन्ते, तथा च त्रित्वत्वादिव्यापिका बहुत्वत्वजातिर्नाऽतिरिच्यते। सेनावनादावुत्पन्नेऽपि त्रित्वादौ त्रित्वत्वाद्यग्रहो दोषात्। इत्थं चेतो बहुतरेयं सेनेति प्रतीतिरुपपद्यते, बहुत्वस्य सङ्ख्यान्तरत्वे तु तत्तारतम्याभावान्नोपपद्येतेत्यवधेयम्। इति सङ्ख्यानिरूपणम्।

दिनकरी।

त्रित्वादिप्रकारकज्ञानशून्यकालीनमनेकैकत्वज्ञानमित्यर्थः। यद्वा एकत्वांशे निर्धर्मितावच्छेदककमेकत्वसङ्ख्यायोगिन इत्याकारकज्ञानमित्यर्थः। **सेनावनादाविति**। तत्र नियतैकत्वज्ञानाभावात्, तस्यैव सहस्रत्वादिसङ्ख्योत्पादकत्वादिति भावः। **उत्पन्नेऽपीति**। अनियतैकत्वज्ञानस्याऽपि त्रित्वाद्युत्पादकत्वादिति भावः। दोषात्-नियतानेकैकत्वज्ञानाभावात्। अनियतानेकैकत्वज्ञानस्य त्रित्वोत्पत्तिकारणत्वेऽपि त्रित्वांशे त्रित्वत्वप्रकारकप्रत्यक्षे नियतानेकैकत्वज्ञानस्यैव हेतुतया तं विना न त्रित्वत्वादिप्रकारकं प्रत्यक्षमिति भावः। **उपपद्यत इति**। इतो बहुतरेत्यत्र बहुत्वे स्वसजातीयनिरूपितोत्कर्षः प्रतीयते। तथा च चतुष्ट्वादिरूपे बहुत्वे त्रित्वादिरूपस्वसजातीयनिरूपितोत्कर्षस्य सत्त्वात्तादृशप्रतीतिरुपपद्यत इति भावः। **सङ्ख्यान्तरत्वे**-त्रित्वाद्यतिरिक्तसंख्यात्वे। **तत्तारतम्याभावादिति**। बहुत्वे स्वसजातीयोत्कर्षाभावात्, तव मते तस्यैकरूपत्वादिति भावः। न च बहुत्वस्य त्रित्वादिरूपत्वे बहुत्वनिश्चये कथं त्रित्वादिसंशय इति वाच्यम्। **समानप्रकारकनिश्चयस्यैव संशयविरोधितया** बहुत्वत्वप्रकारकनिश्चयस्य त्रित्वत्वादिप्रकारकसंशयाविरोधित्वात्॥ इति सङ्ख्यानिरूपणम्॥

रामरुद्री।

यामप्युत्पत्तिः स्वीक्रियत एव, परं तु यत्रैकत्वांशेऽनियतत्वज्ञानं तत्र केवलबहुत्वत्वावच्छिन्नस्यैवोत्पत्तिः स्वीक्रियते, त्रित्वत्वाद्यवच्छिन्नस्य चाऽनियतैकत्वज्ञानस्य प्रतिबन्धकस्य विद्यमानत्वान्नोत्पत्तिसम्भवनेत्यर्थः। बहुत्वत्वान्यसङ्ख्यात्वव्याप्यधर्मावच्छिन्नं प्रति अनियतैकत्वज्ञानस्य विरोधित्वं कल्प्यते। बहुत्वत्वं चोक्तप्रतिबध्यतावच्छेदकतावच्छेदकतावच्छेदकतयैव सिद्ध्यति। न च द्वित्वान्यानेकधृत्ति सङ्ख्यात्वं तत्, गौरवात्। यत्तु अनियतैकत्वज्ञानमित्यस्य नियतत्वज्ञानाभावकालीनैकत्वज्ञानमित्यर्थं कृत्वा तादृशस्थल एव बहुत्वाख्याऽतिरिक्तसङ्ख्योत्पद्यते, न तु त्रित्वादिक, न वा त्रित्वादिस्थले बहुत्वमेवोत्पद्यत इति व्याख्यानम्, तदसत्, '**त्रित्वत्वादिव्यापिका बहुत्वत्वजातिर्नाऽतिरिच्यते**-इत्याद्यग्रिमग्रन्थविरोधापत्तेः। **नाऽतिरिच्यत इति**। तथा चोक्तप्रतिबध्यतावच्छेदकतया तादृशजातिसिद्धिर्न सम्भवति, तादृशप्रतिबध्यप्रतिबन्धकभाव एव मानाभावादित्यर्थः। नन्वेतादृशप्रतिबध्यप्रतिबन्धकभावानुपगमेऽनियतैकत्वज्ञानस्थलेऽपि त्रित्वाद्युत्पत्तौ बाधकाभावात्तत्र त्रित्वत्वादिप्रत्ययोऽपि स्यादित्यत आह। **सेनावनादावित्यादि**। तथा च तादृशस्थले त्रित्वत्वादिग्रहं प्रत्येव दोषविधयाऽनियतैकत्वज्ञानस्य प्रतिबन्धकत्वात्तादृशजातौ त्रित्वादिभिन्ने तादृशजातिमति च मानाभाव एवेत्यर्थः। नन्वेवमपि त्रित्वादिप्रकारकप्रत्यक्षं प्रति तादृशज्ञानस्य दोषविधयाऽनन्तप्रतिबध्यप्रतिबन्धकभावकल्पनामपेक्ष्य तादृशबहुत्वत्वातिरिक्तसङ्ख्यात्वावच्छिन्नं प्रत्येवाऽनियतैकत्वज्ञानस्य प्रतिबन्धकत्वं युक्तम्। तदनभ्युपगमेऽपि बहुत्वत्वजात्यतिरिक्तसङ्ख्यात्वव्याप्यधर्मप्रकारकग्रहत्वावच्छिन्न प्रत्येव दोषविधया तज्ज्ञानस्य प्रतिबन्धकत्वे लाघवाद्बहुत्वत्वजातिसिद्धिर्निष्प्रत्यूहैवेत्यत आह। **इत्थं चेत्यादि**। तथा च बहुतरत्वत्वादिना चतुष्ट्वत्वाद्यनुभवस्य तत्राऽनुभवसिद्धतया बहुत्वत्वातिरिक्तजात्यवच्छिन्न तद्ग्रहे वा तादृशज्ञानस्य प्रतिबन्धकत्वं कल्पयितुमशक्यमेव, किं तु स्वरूपतस्त्रित्वादिप्रकारकत्रित्वत्वादिना त्रित्वादिप्रकारकग्रहत्वादिनाऽनन्तप्रतिबध्यप्रतिबन्धकभावस्याऽऽवश्यकत्वाद्बहुत्वत्रित्वत्वाद्यतिरिक्ते बहुत्वे बहुत्वत्वजातौ वा मानाभावोऽसिद्ध इत्याचार्याणामाशयोऽवसेयः॥ इति सङ्ख्याग्रन्थः॥

परिमाणं भवेन्मानव्यवहारस्य कारणम् ॥ १०६ ॥
अणु दीर्घं महद्ह्रस्वमिति तद्भेद ईरितः ।

परिमाणं निरूपयति । परिमाणमिति । **परिमितिव्यवहारासाधारणं कारणं परिमाणमित्यर्थः । तच्चतुर्विधम् अणु, महत्, दीर्घं, ह्रस्वं चेति ।**

दिनकरी ।

अणु महदित्यादि । यद्यप्यणुत्वमेव ह्रस्वत्वमस्तु, महत्त्वमेव दीर्घत्वमस्त्विति कुतश्चातुर्विध्यं ? तथापि तदवधिकाणुतया प्रतीयमानेऽपि तदवधिकह्रस्वत्वाव्यवहारात्तदवधिकमहत्त्ववत्तया प्रतीयमानेऽपि तदवधिकदीर्घत्वाव्यवहाराच्च ह्रस्वत्वदीर्घत्वयोरतिरिक्तपरिमाणतया तच्चातुर्विध्यं बोध्यम् ।

रामरुद्री ।

इत्थमङ्कगणितव्यवहारोपयोगिनीं सङ्ख्यामभिधाय रेखागणितव्यवहारोपयोगिनं परिमाणात्मकं गुणं निर्वक्तुमुपक्रमते मूले—**परिमाणमित्यादि । परिमितीति** । अयमेतावत्परिमित इत्यादिव्यवहारस्तत्राऽसाधारणं कारणं परिमाणमित्यर्थः । न हि स व्यवहारः पदार्थस्वरूपमात्रनिबन्धन इति वक्तुं शक्यम्, स्वरूपस्याऽननुगतत्वात्, द्रव्यत्वादिनिबन्धनत्वे तत्प्रकर्षभावाभावव्यवस्थानुपपत्तेः । नाऽप्यसाववयवसंयोगविशेषमात्रनिबन्धनः, परिमाणान्तरकर्तृभिरपि परिमाणविशेषोत्पादनिर्वाह्यतद्व्यवहारस्याऽवश्यमङ्गीकार्यत्वादिति वक्तुं युक्तम्, परमाणावपि परिमाणदर्शनात् । नाऽस्त्येव तत्र परिमाणं, मानाभावात्, एवं गगनदिक्कालात्ममनःस्वपीत्येकदेशिनः, तत्तुच्छम् । परिमितत्वं हि देशवृत्तितायामवच्छेदकसापेक्षत्वम्, तदतिरिक्तस्य तस्य दुर्वचत्वात्, तथा च प्रादेशपरिमिते देशे घटोऽस्तीत्यादौ प्रादेशपरिमाणोवच्छिन्नस्य देशस्य घटादिनिष्ठदिग्वृत्तितायामवच्छेदकत्वं भासते, स्पर्शादिमत्त्वेन तदवच्छेदकत्वं तु न सम्भवति, अननुगमात् । तादृशस्य च परमाणुपरिमिते देशे परमाणुरस्तीत्यादिव्यवहारस्य परमाणोर्देशवृत्तिताया उपपादनाय च परमाण्वादिपरिमाणादीनामवच्छेदकत्वमङ्गीकर्तव्यमेव, अन्यथा परमाण्वादिनिष्ठदिग्वृत्तिताया निरवच्छिन्नत्वे मूर्तयोः समानदेशताविरोधस्य दुरुपपादत्वात्, परमाणुस्वरूपस्य तद्गतसंयोगादेश्च तदवच्छेदकत्वं निरस्तप्रायमेवेति परमाणावपि तत्सिद्धेरावश्यकत्वात् । गगनादीनां तु सर्वमूर्तद्रव्यसंयोगितया तत्सिद्धिः । तत्तद्द्रव्यसंयोगे तदनुगुणदेशतायाः प्रयोजकत्वेन गगनादौ सर्वसंयोगिसमानदेशतायाः स्वीकारावश्यकतया तत्तद्देशतायास्तत्तद्देशावच्छिन्नपरिमाणान्यूनपरिमाणरूपत्वेन तेषामपरिच्छिन्नपरिमाणसिद्धेः । तेषां सर्वसंयोगित्वं तु सर्वत्र तत्कार्योपलब्धेरेवाऽनुमातव्यम् । परिमाणविशेषाणां तत्तद्देशविशेषवृत्तितायामवच्छेदकत्वादेव च दशहस्तदीर्घस्य पटादेरारम्भकसंयोगाविरोधेन मूलप्रदेशैः सह सङ्कोचनाख्ये संयोगे कृते तस्य पटस्य पूर्वापेक्षयाऽल्पाकारताप्रतीतावपि तत्र पटपरिमाणभेदो नाऽङ्गीक्रियते, सङ्कोचदशायामपि तत्र तादृशपटावच्छिन्नदिशस्तुल्यत्वात्, न हि तत्र तत्पटतुल्यपरिमाणं वस्तु तादृशपटाकारेण सङ्कोचित सन्नाऽवतिष्ठेत । इयांस्तु विशेषः, पूर्वं यद्देशावच्छिन्नः स पट आसीत् सङ्कोचावस्थायां तदन्यदेशेन संयोगाद्देशान्तरितः स भवेत् । नैतावता तत्र परिमाणभेदः कल्पयितुं शक्यः । प्रचितावयवारब्धतूलपिण्डपरिमाणतोऽप्रचितावयवारब्धतूलपिण्डपरिमाणस्य भेदस्तु स्वीकर्तुमुचितः । तदशायां द्रव्यभेदस्याऽऽवश्यकतया तदवच्छिन्नदिशो न्यूनाधिकभावसम्भवात् ।

चातुर्विध्यं बोध्यमिति । वस्तुतस्तु नियतहस्तपरिमाणादीर्घनलिकादावेकतः प्रतिरुद्धमुखेऽपनीतमरुति मुखान्तरावच्छेदेन अधःस्थजलसंयोगे सति तावन्नलिकाव्यापि जलं समुत्तोल्यते, तावन्नलिकाव्यापिसमपरिमाणस्यैव पुनरदीर्घाकारस्य बृहद्भाण्डादावस्थापितस्य जलस्य न बाह्यजलान्तरप्रवेशप्रतिबन्धकतेति विलक्षणदीर्घपरिमाणावच्छिन्नस्यैव जलस्य तत्त्वमावश्यकमिति तत्सिद्धिः । न चैवं दीर्घत्व-

अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ॥ ११० ॥
सङ्ख्यातः परिमाणाच्च प्रचयादपि जायते ।
अनित्यं, द्व्यणुकादौ तु संख्याजन्यमुदाहृतम् ॥ १११ ॥

तत्-परिमाणम् । 'नित्यं' इत्यत्र परिमाणमित्यनुषज्यते ।

'जायते' इत्यत्राऽपि परिमाणमित्यनुवर्तते । अनित्यमिति पूर्णेणान्वितम् । तथा चाऽनित्यपरिमाणं सङ्ख्याजन्यं, परिमाणजन्यं, प्रचयजन्यं चेत्यर्थः ।

तत्र सङ्ख्याजन्यमुदाहरति । द्व्यणुकादाविति । द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुकपरिमाणं वा न कारणम्, परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमात्, द्व्यणुकस्याऽणुपरिमाणं तु परमाणवणुत्वापेक्षया नोत्कृष्टम्, त्रसरेणुपरिमाणं तु न सजातीयं, अतः पर-

दिनकरी ।

सङ्ख्याजन्यमुदाहरतीति । सङ्ख्यामात्रजन्यमुदाहरतीत्यर्थः । न सजातीयमित्य-

रामरुद्री ।

ह्रस्वत्वयोरेकजातीयत्वमेव कुतो न स्वीकृतम् ? इष्टापत्तौ च परिमाणचातुर्विध्यभङ्गप्रसङ्गो दुर्वार इति वाच्यम् । प्रत्यक्षजनकतावच्छेदकतया सिद्धस्य जातिविशेषस्य महत्त्व इव दीर्घत्वेऽपि विनिगमनाविरहेण स्वीकारावश्यकतयोक्तजातिविशेषस्य तादृशजातिशून्याणुपरिमाणसाधारण्याभ्युपगमे साङ्कर्यप्रसङ्गभयादेव तथा स्वीकारस्य कर्तुमशक्यत्वेन ह्रस्वत्वदीर्घत्वरूपद्वैविध्यस्याऽऽवश्यकत्वात् । न चैवं दीर्घत्वमपि महत्त्व एवाऽन्तर्भूतम्, प्रत्यक्षजनकत्वात्, तथा च परिमाणचातुर्विध्यमित्थमप्यनुपपन्नमेवेति वाच्यम् । न ह्यत्रत्यं महत्त्वं प्रत्यक्षजनकतावच्छेदकवैजात्यावच्छिन्नपरिमाणरूपं ग्रन्थकर्तुर्विवक्षितम्, अपि तु द्रव्यगतवृत्तितावच्छेदकरूपमिति तच्चातुर्विध्यस्य युक्तत्वात् । वर्तुलत्वचतुरस्रत्वादयश्चोक्तपरिमाणभेदा एव, नाऽतिरिक्ता इति न तेषां पृथग्गणनापत्तिरपि । एतेन तदवधिकमहत्परिमाणवत्त्वेऽपि तदवधिकदीर्घत्वाव्यवहारोपपादनाय परिमाणद्वयाभ्युपगमोऽनुचितः, एकस्मिन्नेव परिमाणौ वैजात्यद्वयमभ्युपगम्याऽपि तदुपपादनसम्भवादिति पूर्वपक्षः परास्तः ।

दीधितिकृतस्तु महन्महत्तरमितिवद्दीर्घदीर्घतरादिव्यवहारस्य दूरात्संयोगविशेषाग्रहणे जायमानतया तदवधिकमहत्त्ववति तदवधिकदीर्घत्वाव्यवहारेण तदवधिकदीर्घत्ववत्त्वेऽपि तदवधिकमहत्त्वाव्यवहारेण च परिमाणचातुर्विध्यमुपपन्नम् । चतुरस्रादयस्तु संयोगविशेषा एव, संयोगानुपलम्भे तदव्यवहारादित्याहुः ।

भाट्टास्तु त्रुटावेव विश्रामाद्द्व्यणुकादिकमेव नाऽस्ति, दूरे तद्गतानुत्वह्रस्वत्वे, निराकृतं चाऽनेकद्रव्यवत्त्वस्य प्रत्यक्षत्वप्रयोजकत्वम्, नित्यस्य गगनादिमहत्त्वस्य महत्त्वाजनकत्वं स्पर्शासमानाधिकरणत्वात्, समवायिकारणविरहाच्च, अस्तु वा त्रसरेणुगता बहुत्वसङ्ख्यैव परिमाणजनिकेति वदन्ति, तच्च, द्व्यणुके दधित्वदुग्धत्वादेः । प्रत्यक्षसिद्धत्वेन तत्रैव विश्रामस्वीकारे दुग्धारम्भकावयवैर्दध्यारम्भायोगादेव त्रसरेणोर्जन्यत्वावश्यकत्वात् । मध्यादेः कासीसामलकीसारादिजन्यतया त्रसरेणोर्मध्यारम्भकस्याऽपि तज्जन्यत्वेन कासीसत्वामलकीसारत्वादेस्तदवयवे कल्पनीयत्वावश्यकतया कासीसामलक्यादेरपि रूपविशेषादिमज्जन्यतया परमाणुसिद्धिरूहनीयेत्यलं पल्लवितेन ।

स्वसमानजातीयेत्यादि । कपालादिपरिमाणापेक्षया घटादिपरिमाणस्योत्कृष्टतया तदन्यथानुपपत्त्योत्कृष्टपरिमाणानामेव परिमाणैर्जननस्य कल्पितयाऽणुत्वस्य हेतुत्वान्तरे मानाभावात् परमाणुद्व्यणुकादिगतेनाऽणुपरिमाणेन कार्यद्रव्ये परिमाणोत्पादायोगादिति भावः । अत्र तत्तज्जातीयपरिमाणानां तत्तज्जातीयपरिमाणावधिकोत्कर्षविशिष्टपरिमाणत्वावच्छिन्नं प्रति हेतुता न सम्भवति, तत्तज्जातीयोत्कृष्टपरि-

माणौ द्वित्वसङ्ख्या द्व्यणुकपरिमाणस्य, द्व्यणुके त्रित्वसङ्ख्या च त्रसरेणुपरिमाणस्याऽसमवायिकारणमित्यर्थः ॥ १०६ ॥ ११० ॥ १११ ॥

दिनकरी।

नन्तरं विजातीयसंयोगरूपः प्रचयस्तु न द्व्यणुकादौ, तत्सत्त्वेपि वा तस्याकिञ्चित्करत्वादिति पूरणीयम् । द्वित्वसंख्या—द्वित्वसङ्ख्यामात्रम् । एवमग्रेऽपि ॥ १०९ ॥ ११० ॥ १११ ॥

रामरुद्री ।

माणवदवयवारब्धावयविद्रव्यपरिमाणे व्यभिचारात् । नाऽपि तत्तज्जातीयपरिमाणं प्रति तत्तज्जातीयापकृष्टपरिमाणत्वेन, तज्जातीयपरिमाणवदवयवसंयुक्तदपकृष्टपरिमाणवदवयवारब्धावयविद्रव्ये तज्जातीयपरिमाणोत्पादापत्तेरेवमप्यवारणात् । तज्जातीयपरिमाणं प्रति तज्जातीयतदुत्कृष्टजातीयपरिमाणत्वादिना प्रतिबन्धकत्वेन कथञ्चित्तद्वारणसम्भवेऽपि क्षुद्रावयवद्वयारब्धद्रव्यपरिमाणस्य क्षुद्रैस्त्रिभिरारब्धे तदुत्पादापत्तेरेवमपि दुरुद्धरत्वादित्याकलय्य परिमाणस्य स्वसमानजातीयस्वोत्कृष्टपरिमाणहेतुतामुपेक्ष्य **जननियम** एवोपदर्शितः । परिमाणजनकपरिमाणत्वं तथाविधजनकत्वव्याप्यमित्यत्र च तात्पर्यमवसेयम् । अथैवमपि परमाणुगतपरिमाणस्य कार्यद्रव्यपरिमाणारम्भकत्वं कल्प्यमुत सङ्ख्याया इत्यत्र विनिगमनाविरहेण द्वयोरेव तत्र हेतुत्वप्रसक्तिर्न वारयितुं शक्या । ननु तथाऽपि कार्यद्रव्ये तदुपजायमानस्य परिमाणस्य महत्त्वदीर्घत्वरूपभेदभिन्नस्य कारणगतमहत्त्वदीर्घत्वादिवैचित्र्यात् परिमाणत्वेन सामान्यतः कार्यकारणभावो नाऽभ्युपगन्तुं शक्यते, सङ्ख्यायास्तु द्वित्वत्रित्वादिरूपाया उभयत्रैव कारणगतायास्तुल्यतया परिमाणत्वावच्छिन्ने प्रत्येकहेतुहेतुमद्भावस्वीकारेणोपपत्तेस्तथैव हेतुत्वस्य कल्पनीयतया तद्वलादेव कार्ये द्व्यणुकत्रसरेण्वादावपि परिमाणोत्पत्तिसम्भवः । न चैवं द्व्यणुकेऽणुपरिमाणस्य त्रसरेणौ च महत्त्वस्योत्पत्तिनियमो नोपपद्यते, परिमाणत्वस्यैव द्वित्वत्रित्वयोः कार्यतावच्छेदकतया द्व्यणुकेऽपि महत्त्वोत्पत्तौ बाधकाभावादिति वाच्यम् । द्वित्वसङ्ख्यायाः परिमाणत्वावच्छिन्नं प्रति जनकत्वेऽपि त्रित्वसङ्ख्याया महत्त्वत्वावच्छिन्नं प्रत्येव हेतुत्वेन द्व्यणुके महत्त्वोत्पादासम्भवात् । न च विनिगमनाविरहः, परिमाणत्वावच्छिन्नं प्रति त्रित्वस्य हेतुत्वे द्व्यणुक एव व्यभिचारप्रसङ्गेन तथा हेतुत्वकल्पनासम्भवात् । न च तथाऽपि परमाणुत्रयारब्धे महत्त्वापत्तिर्दुरुद्धरेवेति वाच्यम् । अत एव परमाणुत्रयस्याऽनारम्भकत्वात् । द्व्यणुकत्रयारब्धत्रसरेणुपरिमाणापेक्षया न्यूनदेशव्याप्तिकस्य महत्त्वदीर्घत्वादेः प्रत्यक्षाविषयतया परमाणुत्रयारब्धकार्यस्वीकारे तत्र तादृशमहत्त्वस्यैवोत्पादप्रसङ्गेनाऽनुभवविरोधप्रसङ्गात् । इत्थं च त्रित्वबलादुत्पद्यमानस्य त्रसरेणुपरिमाणस्याऽप्युत्कृष्टमहत्त्वरूपतापत्तिर्न सम्भवति, तादृशमहत्त्वं प्रति त्रसरेण्वादिपरिमाणस्यैव कारणतया तद्विरहादेव तदापत्त्यसम्भवात् । न च तथाऽपि समानपरिमाणकपालद्वयारब्धात्तादृशकपालत्रयारब्धघटस्य परिमाणोत्कर्षनिर्वाहाय त्रित्वसङ्ख्यायाः कारणत्वावश्यकत्वेऽपि द्वित्वसङ्ख्यायास्तथात्वे मानाभाव एव, एकतन्तुकपटाद्यभ्युपगमे तु ततो द्वितन्तुकपरिमाणस्योत्कर्षनिर्वाहाय द्वित्वस्याऽपि हेतुत्वावश्यकत्वेऽपि उक्तग्रन्थविरोधो दुर्वार एव, तथा सति द्वित्वस्य परिमाणत्वावच्छिन्न प्रति जनकत्वस्यैवैकतन्तुके व्यभिचारप्रसङ्गेन स्वीकर्तुमशक्यत्वापत्तेरिति वाच्यम् । न हि द्वित्वादेरुत्कृष्टपरिमाणादिनिर्वाहकतया कल्पं हेतुत्वमादाय द्व्यणुकादौ परिमाणोत्पत्तिः समर्थ्यते, अपि तु सामान्यतः परिमाणत्वावच्छिन्नं प्रति द्वित्वस्य महत्त्वं प्रति त्रित्वस्य च हेतुत्वमादायैवेत्युक्तदोषासम्भवात्, एकतन्तुकपटादिकं तु न स्वीक्रियते । उक्तरीत्या सामान्यकार्यकारणभावस्तु स्वीकरणीय एव । अन्यथा महत्त्वत्वावच्छिन्नस्य द्व्यणुकादावनुत्पत्तिप्रयोजकस्य दुर्वचत्वापत्तेः, कारणमहत्त्वाभावस्य प्रयोजकत्वे तु त्रसरेणावपि तदनुत्पादप्रसङ्गात्, परिमाणत्वावच्छिन्नं प्रति द्वित्वस्य हेतुत्वमप्यावश्यकम्, परिमाणत्वेन तस्याऽपि विनिगमनाविरहेण हेतुत्वावश्यकत्वादिति चेन्न, कपालद्वयारब्धावयविमहत्त्वे व्यभिचारेण महत्त्वं प्रति त्रित्वहेतुताया एवमप्यसम्भवादिति ।

मैवम् । स्वसमवायिसमवेतत्वसम्बन्धेन परिमाणत्वावच्छिन्नं प्रति द्वित्वस्य तथाविधसम्बन्धेनैव त्रित्वादिविशिष्टपरिमाणत्वावच्छिन्नं प्रति त्रित्वादीनां च सामान्यत एव कार्यकारणभावस्याऽवश्यकल्प-

परिमाणं घटादौ तु परिमाणजमुच्यते ।

परिमाणजन्यं परिमाणमुदाहरति । परिमाणं घटादाविति । **घटादिपरिमाणं कपालादिपरिमाणजन्यम् ।**

दिनकरी ।

परिमाणजन्यं—परिमाणमात्रजन्यम् । कपालादिपरिमाणजन्यम्—कपालादिपरिमाणमात्रजन्यमित्यर्थः । अप्रचितमहत्कपालद्वयारब्धे घटे यन्महत्परिमाणं तत्र कपालगतद्वित्वसङ्ख्या न कारणम्, द्वित्वसङ्ख्याया महत्त्वाजनकत्वात् । अन्यथा द्व्यणुकेऽपि महत्त्वोत्पादापत्तेः । न चोक्तापत्त्या द्वित्वत्वेन परिमाणाजनकत्वेऽपि घटगतमहत्त्वं प्रति कपालगतमहत्त्वस्य कपालगतद्वित्वस्य वा हेतुत्वमित्यत्र विनिगमाविरह इति वाच्यम् । कपालगतमहत्त्वोत्कर्षेण घटगतमहत्त्वोत्कर्षस्याऽनुभविकतया कपालमहत्त्वस्य तत्राऽवश्यं हेतुताया वाच्यत्वात् । यत्र कपाले न प्रचयस्तत्र प्रचयस्याऽपि हेतुत्वासम्भवात्, तत्र घटपरिमाणं कपालपरिमाणमात्रजन्यमिति भावः ।

रामरुद्री ।

नीयतया तत एव त्रसरेणुद्वयणुकयोः परिमाणोत्पादानिर्वाहेणाऽणुपरिमाणस्य पृथग्धेतुत्वान्तराकल्पनात् । न चैवं त्रसरेणुचतुरणुकादावपि त्रित्वादेरविशेषान्न्यूनपरिमाणोत्पादप्रसङ्ग इति वाच्यम् । चतुरणुकादिपरिमाणान्यपरिमाणत्वाद्यवच्छिन्नं प्रति तत्सामग्र्याः प्रतिबन्धकत्वस्याऽवश्यकतया तत एव चतुरणुकादौ तद्वारणात् । अत एव द्वयोरेव परमाण्वोस्त्र्यणां च द्व्यणुकानामारम्भकत्वनियमोऽपि स्वीक्रियते । अन्यथा कदाचित् परस्परमेव परस्परपरिमाणोत्पादापत्तेः । न च वैपरीत्यमेव कुतो नेति वाच्यम् । परमाणुत्रयस्याऽरम्भकत्वे सयोगत्रयस्याऽपि यावत्परमाण्वव्यापकतया कार्यद्रव्ये व्यभिचारेण समवायेनैव कालिकेनाऽपि हेतुत्वस्याऽसम्भवात्, परमाणूनां नित्यत्वात् । नित्येषु च कालिकायोगात् । स्वसमानाधिकरणत्रित्वादिरूपपरम्पराणां च ससर्गत्वमेव नास्तीति केषांचिदभिनवः पन्थाः । अधिकं व्यक्तमाकरे ।

मूले—असमवायिकारणमित्यर्थं इति । ननु द्वित्वत्रित्वादेस्तादृशपरिमाणविशेषेऽसमवायिकारणत्वे कारणाकारणसाधारणत्रित्वस्याऽपि द्व्यणुकादौ स्वसमवायिसमवेतत्वसम्बन्धेन सत्त्वान्महत्त्वोत्पादापत्तिर्दुर्वारैव । न च त्रित्वादेः स्वपर्याप्तयवच्छेदकधर्मावच्छिन्नवृत्तित्वसम्बन्धेन कारणत्वोपगमान्नैवमिति वाच्यम् । तथा सति त्रित्वादेरसमवायिकारणत्वानुपपत्तेः, समवाय—स्वसमवायिसमवेतत्वान्यतरसम्बन्धेन कारणस्यैवाऽसमवायिकारणपदवाच्यत्वात्, निरुक्तसम्बन्धेन द्वित्वस्य त्रसरेणावपि सत्त्वेन तत्राऽणुत्वोत्पादापत्तेर्दुर्वारत्वाच्च । न च स्वसामानाधिकरण्य—स्वाभावसामानाधिकरण्य—स्वसमानाधिकरणाभावप्रतियोगित्वैतत्त्रितयसम्बन्धेन द्रव्यविशिष्टान्यस्यैव त्रित्व—द्वित्वादेः परिमाणासमवायिकारणत्वोपगमाञ्चैष दोष इति वाच्यम् । तथा सति चतुःपञ्चाद्यवयवारब्धे उक्तविशेषणविशिष्टत्रित्वादेरसत्त्वेन व्यभिचारप्रसङ्गेनोक्तकार्यकारणभावस्यैवोच्छेदापत्तेरिति चेन्न, स्वाश्रययावत्समवेतत्वसम्बन्धेनैव द्वित्वत्रित्वादेर्हेतुत्वात्, व्यणुकेऽणुत्वापत्तिस्तु महत्त्वसामग्र्या विरोधित्वादेव वारणीयेति ध्येयम् ।

टीकायाम्- **परिमाणमात्रजन्यमिति ।** अत्रेदं चिन्त्यम् । द्वित्वस्य महत्त्वाजनकत्वे द्व्यणुकपरिमाणं प्रत्यपि द्वित्वस्य हेतुत्वमप्रामाणिकमेव भवेत् । लाघवादेव तस्य पूर्वमुपगमादिति । किन्तु यादृशपरिमाणविशेषस्य द्वित्वाघटितसामग्रीव्यापकत्वं निर्वहति, तस्य परिमाणमात्रजन्यत्वव्यपदेशः, यथा द्विहस्तपरिमितस्य परिमाणस्यैकहस्तावच्छिन्नपरिमाणे विजातीयपरिमाणाभावविशिष्टे व्यापकत्वं सम्भवति । तत्तद्विजातीयपरिमाणविशेषाणां स्वाव्यवहितोत्तरत्वसम्बन्धेन तत्तत्परिमाणविशिष्टपरिमाणस्वावच्छिन्नं प्रत्येव हेतुतया क्षुद्राभ्यामारब्धस्य परिमाणस्य क्षुद्रेण महता चाऽऽरब्धे उत्पादप्रसङ्गवारणाय क्षुद्रसहकृतमहदारब्धपरिमाणसामग्र्यास्तदन्यपरिमाणत्वावच्छिन्नं प्रत्येव प्रतिबन्धकत्वमावश्यक-

प्रचयः शिथिलाख्यो यः संयोगस्तेन जन्यते ॥ ११२ ॥

प्रचयजन्यमुदाहर्तुं प्रचयं निर्वक्ति । प्रचय इति ।

दिनकरी ।

प्रचय इतीति मूले-शिथिलाख्य इति । किञ्चिदवयवावच्छेदेनाऽवयवान्तरासंयोगिनि **महत्यवयवे** वर्त्तमानः संयोगः प्रचय इत्येके । अत्र **महत्**पदं न देयं, परमाणुसंयोगस्य प्रचयत्वे क्षतिविरहादित्यन्ये ।

भूयोवयवावच्छेदेनाऽवयवान्तरासंयोगिन्यवयवे वर्तमानः संयोगः प्रचयः, तेन परमाणुसंयोगो द्व्यणुकसंयोगो वा न प्रचय इत्यपरे । अत्र प्रचयरहितैस्त्रिभिर्महावयवैरारब्धस्य यन्महत्परिमाण तत्सङ्ख्याकारणमाणोभयजन्यम् , महद्वयवद्वयारब्धमहत्त्वादतिशयित्वात्, अल्पावयवारब्धमहत्त्वादतिशयितत्वाच्च । प्रचिताभ्यां महावयवाभ्यामारब्धं यन्महत्परिमाणमतिशयितं तत्परिमाणप्रचयोभयजन्यम्, अप्रचितमहावयवारब्धात् द्व्यणुकमहत्त्वाच्च तादृशारामरुद्री ।

मिति तदभावसहकृतक्षुद्रपरिमाणस्य क्षुद्रद्वयारब्धपरिमाणव्याप्यत्वमव्याहतमेव । न च क्षुद्रेण महता चाऽऽरब्धे न क्षुद्रद्वयारब्धपरिमाणापत्तिः, क्षुद्रपरिमाणद्वयस्य हेतुत्वादिति वाच्यम् । क्षुद्राभ्यां महता चारब्धे तदापत्तेरेवमपि दुर्वारत्वात् । तथा च सङ्ख्याऽघटितायाऽपि सामग्र्यास्तादृशस्थले व्याप्यत्वं निर्वहतीति तत्परिमाणमात्रं जन्यमुच्यते। न चैवं द्वित्वस्य हेतुत्व एव मानाभावापत्तिरिति वाच्यम् । जन्यपरिमाणं प्रत्यनेकावयवकत्वस्य प्रयोजकत्वस्वीकारस्यैव तत्र प्रमाणत्वादिति ।

किञ्चिदवयवेत्यादि । किञ्चिदवयवावच्छिन्नो योऽवयवान्तरसंयोगसामान्याभावस्तद्वतीत्यर्थः । तेन संयोगमात्रस्यैव किञ्चिदवयवावच्छिन्नतया तच्छून्यत्वस्य तदुत्पत्तिपूर्वक्षणावच्छेदेन तदाश्रयेऽपि सत्त्वान्न निबिडसंयोगस्याऽपि प्रचयत्वप्रसङ्गः । अत एवाऽवयवपदमपि । अन्यथा तथाविधकालवारणासम्भवात् । **किञ्चिदिति** स्वरूपकथनम्, तदवच्छेदेन संयोगिन्यपि तदतदुभयावच्छेदेन संयोगाभावस्वीकारे निबिडसंयोगवतोऽपि तादृशावयवद्वयावच्छेदेन तथात्वानपायादतिव्याप्तिवारणायाऽवयवनिष्ठावच्छेदकतायां व्याप्यवृत्तिधर्मानवच्छिन्नत्वलाभायैव वा तदुपादानम् । न चैवमप्युत्पत्तिकालीनत्वविशिष्टतत्तदवयवावच्छेदेन निबिडसंयोगवतोऽपि तथाविधसंयोगस्यादितस्त्वस्याऽक्षततया तत्राऽतिव्याप्तिर्दुर्वारेति वाच्यम् । तादृशसंयोगाभावकालावच्छेदेनैव तद्वृत्तित्वस्याऽग्रे वाच्यतयाऽदोषात् । इत्थं च निबिडकपालद्वयारब्धघटस्थले कपालस्य बहिर्देशावच्छेदेन तादृशसंयोगसामान्याभित्यादितिव्याप्तिवारणायैवाऽवयवपदोपादानम् । गगनादिसंयोगस्याऽपि तत्तदवयवावच्छेदेन सत्त्वात्किञ्चिदवयवावच्छेदेनाऽपि संयोगसामान्याभावो न सम्भवतीत्यतोऽवयवान्तरपदम् । **अन्तर**पदानुपादानेऽपि स्वस्मिन् स्वानुयोगिकगगनादिसंयोगानपायात्पुनस्तद्दोषतादवस्थ्यमतस्तदुपादानम् । तत्त्वं च स्ववृत्तित्व–स्ववृत्तिद्रव्यसमवेतेतरवृत्तित्वोभयसम्बन्धेन वस्तुविशिष्टत्वम् । इत्थं चोक्तोभयसम्बन्धेन वस्तुविशिष्टस्य द्रव्यत्वादेः प्रचयाधिकरणे किञ्चिदवच्छेदेनाऽप्यभावासम्भवादसम्भववारणाय **'अवयवान्तरासंयोगिनि'** इत्यत्र **संयोग**पदम् । **अवयवावच्छिन्नत्वं** चाऽवयवावच्छिन्नप्रदेशावच्छिन्नत्वम् । तेनाऽतिदूरस्थावयवान्तरस्य प्रचयाधिकरणस्वनिष्ठसंयोगसामान्याभावावच्छेदकत्वेऽपि न क्षतिः, न वा निबिडसंयुक्तकपालद्वयस्य सौरालोकाद्यवच्छिन्नबाह्यप्रदेशावच्छेदेनाऽवयवान्तरासंयोगित्वे ऽव्याप्तिः । इत्थञ्च परमाणावपि यत्किञ्चित्परमाण्वन्तरावच्छिन्नप्रदेशावच्छेदेन तादृशसंयोगाभावसत्त्वात्तादृशसंयोगस्याऽपि प्रचयत्वापत्तिरतो **महत्यवयव इति** । घटाद्यन्त्यावयविवृत्तिसंयोगवारणाय चाऽवयवे **वर्तमान** इति । अग्रिमपक्षद्वयमप्युक्तदिशैव व्याख्येयम् ।

अत्रेदमवधेयम् । प्रचयस्तावन्न यत्किञ्चिदवयवावच्छेदेनाऽवयवान्तरासंयोगिन्यवयवे वर्तमानः संयोगः, तथा सति प्रचयतारतम्यस्याऽनुपपत्तेः । किं तु संयोगविशेष एव, स चाऽवयवयोः सान्तरा-

परिमाणं तूलकादौ, नाशस्त्वाश्रयनाशतः ।

परिमाणं चाऽऽश्रयनाशादेव नश्यतीत्याह । नाश इति । अर्थात् परिमाणस्यैव । न चाऽवयविनाशः कथं परिमाणनाशकः ? सत्यप्यवयविनि त्रिचतुरादिपरमाणुविश्लेषे तदुपचये चाऽवयविनः प्रत्यभिज्ञानेऽपि परिमाणान्तरस्य प्रत्यक्षसिद्धत्वादिति वाच्यम् । परमाणुविश्लेषे हि द्व्यणुकस्य नाशोऽवश्यमभ्युपेयः, तन्नाशे च त्र्यणुकनाशः । एवं क्रमेण महावयविनो नाशस्याऽऽवश्यकत्वात्, सति च नाशकेऽनभ्युपगममात्रेण नाशस्याऽपलपितुमशक्यत्वात्, शरीरादाववयवोपचयेऽसमवायिकारणनाशस्याऽऽवश्यकत्वादवयविनाश आवश्यकः । न च पटाद्यनाशेऽपि तन्त्वन्तरसंयोगात् परिमाणाधिक्यं न स्यादिति वाच्यम् । तत्राऽपि वेमाद्यभिघातेनाऽसमवायिकारणतन्तुसंयोगनाशात् पटनाशस्याऽऽवश्यकत्वात् । किं च तन्त्वन्तरस्य तत्पटावयवत्वे पूर्वं तत्पट एव न स्यात्, तन्त्वन्तररूपकारणाभावात्, तन्त्वन्तरस्याऽवयवत्वाभावे च न तेन परिमाणाधिक्यं, संयुक्तद्रव्यान्तरवत्, तस्मात्तत्र तन्त्व-

दिनकरी ।

तिशयदर्शनात् । प्रचितैर्महद्भिरारब्धस्य महत्परिमाणं सङ्ख्यापरिमाणप्रचयजन्यम् , प्रचितमहावयवद्वयारब्धमहत्त्वादपि तस्योत्कृष्टत्वादिति ध्येयम् । दिङ्मात्रस्य मूले प्रदर्शितत्वादित्यन्यत्र विस्तरः ।

केचित्तु दीर्घमिति प्रतीतेरवयवसंयोगविशेषेणैवोपपत्तेः दीर्घत्वं न परिमाणम् , अन्यथा वर्तुलत्वचतुरस्रत्वादीनां परिमाणान्तरत्वापत्तेरित्याहुः ॥

अर्थादिति । प्रकरणादित्यर्थः । यद्वाऽर्थात्-परिशेषादित्यर्थः । न च परिशेषोऽसिद्धः, रूपादेरप्याश्रयनाशनाश्यत्वादिति वाच्यम् । 'आश्रयनाशतः-'इति मूलस्याऽऽश्रयनाशमा-

रामरुद्री ।

त्रयोरभ्युपगम्यते, तादृशस्थले एकदेशाकर्षणे सर्वाकर्षणस्य संयोगव्यवहारस्य च सिद्धेः । तथा हि काष्ठारम्भकैरवयवैरेव धूम आरभ्यते, हिमारम्भकैश्च जलमित्यादि सिद्धम् । धूमादीनां किञ्चिदारभ्यत्वानुमितौ लाघवज्ञानसहकारेण काष्ठाद्यारम्भकावयवानामेव भानात् । यत्तु द्रव्यग्रन्थे यत् द्रव्यं यद्द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्तेरेव पाषाणभस्मजलादौ पाषाणहिमाद्युपादानोपादेयत्वसिद्धिरिति मूलकृतोक्तम् , तत्तुच्छम् , पाषाणभस्मादिद्रव्यस्य पाषाणध्वंसजन्यत्वे मानाभावात् , यैरेव तन्तुसंयोगैः पूर्वं महापट आरभ्यते, तदन्तर्वर्तिनियत्किञ्चित्तन्तुविनाशे तैरेव संयोगैरुत्पद्यमानस्य खण्डपटस्य महापटोत्पत्तिदशायामुत्पत्त्यापत्तिवारणाय महापटध्वंसस्य खण्डपटहेतुतायाः सामान्यलक्षणादिग्रन्थेषूक्तत्वात्, तादृशयुक्तेश्चोक्तस्थलेऽसम्भवात् । इत्थं चोक्तस्थले सान्तरालानामवयवानां यः संयोगः समुत्पद्यते, स एव प्रचयपदेन व्यवह्रियते । ननु सान्तरालानामवयवानां दृष्टविरुद्धस्य संयोगस्य स्वीकारे प्रमाणाभाव इति चेन्न । जलाद्यवयवानां नियतविप्रकृष्टदेशता तावदेकदेशस्य स्वाभाविक्यां क्रियायां जायमानायां दृश्या स्यन्दनकाले, तथा धूमाद्यवयवानामपि धूमोद्गमनकाले, तस्यास्तादृशावयवसंयोगमन्तरेणाऽसम्भवात् । न चाऽवयवयोः सान्तरालत्वं मध्ये द्रव्यान्तरसंयुक्तत्व एव सम्भवतीति तेनैवाऽवयवान्तराकर्षणं सम्भवतीति सान्तरालयोः सयोगाङ्गीकारे प्रमाणाभावः स्थिर एवेति वाच्यम् । तथाविधद्रव्यस्य तेजोजलादिरूपस्यैवाऽस्माभिरभ्युपगमेन तस्य च विजातीयद्रव्यतया तत्संयोगतस्तेषां द्रव्यारम्भकतानुपपत्तेरित्येतादृशविलक्षणसंयोग एव प्रचय इति सिद्धम् ।

संख्यावत्तु पृथक्त्वं स्यात् पृथक्प्रत्ययकारणम् ॥ ११३ ॥
अन्योन्याभावतो नाऽस्य चरितार्थत्वमिष्यते ।

न्तरसंयोगे सति पूर्वं पटनाशस्ततः पटान्तरोत्पत्तिरित्यवश्यं स्वीकार्यम् । अवयविनः प्रत्यभिज्ञानं तु साजात्येन, दीपकलिकादिवत् । न च पूर्वतन्तव एव तन्त्वन्तरसहकारात् पूर्वपटे सत्येव पटान्तरमारभन्तामिति वाच्यम् । मूर्तयोः समानदेशताविरोधात् तत्र पटद्वयासम्भवात्, एकदा नानाद्रव्यस्य तत्रोपलम्भस्य बाधितत्वाच्च । तस्मात् पूर्वस्य द्रव्यस्य प्रतिबन्धकस्य विनाशे द्रव्यान्तरोत्पत्तिरित्यस्याऽवश्यमभ्युपेयत्वात् ॥ इति परिमाणनिरूपणम् ॥

पृथक्त्वं निरूपयति । सङ्ख्यावदिति । पृथक्प्रत्ययासाधारणकारणं पृथक्त्वम् । तन्नित्यतादिकं सङ्ख्यावत् । तथा हि नित्येष्वेकत्वं नित्यमनित्येष्वनित्यम् । अनित्यमेकत्वं तु आश्रयद्वितीयक्षणे चोत्पद्यते, आश्रयनाशान्नश्यति, तथैकपृथक्त्वमपि, द्वित्वादिवच्च द्विपृथक्त्वादिकमपीत्यर्थः ।

नन्वयमस्मात् पृथगित्यादावन्योन्याभावो भासते, तत् कथं पृथक्त्वं गुणान्तरं स्वीक्रियते ? न चाऽस्तु पृथक्त्वं, न त्वन्योन्याभाव इति वाच्यम् ।

दिनकरी ।

त्रादित्यर्थकतया रूपादेराश्रयनाशमात्रनाश्यत्वाभावेन परिशेषसम्भवात् । न च मूलस्य तादृशार्थकत्वे प्रयोजनाभाव इति वाच्यम् । क्रियाविभागादिक्रमेण यत्किञ्चिदवयवनाशेऽपि शरीरादिनाशस्य मीमांसकैरनभ्युपगमात्, तत्र परिमाणनाशस्याऽऽनुभविकत्वाच्चाऽऽश्रयमात्रनाशनाश्यत्वस्य परिमाणे तैरनङ्गीकारात्, तन्मतनिराकरणाय मूलस्य तादृशार्थकत्वादिति ध्येयम् । ॥ इति परिमाणनिरूपणम् ॥

द्वितीयक्षणे चोत्पद्यत इत्यनन्तरं स्वाश्रयावयवगतैकत्वासमवायिकारणकं चेति पूरणीयम् । एकपृथक्त्वम्–एकसमवेतपृथक्त्वम् । द्वित्वादिवच्चेति । तथा च द्विपृथक्त्वादौ समानाधिकरणानेकपृथक्त्वान्यसमवायिकारणानि, इदमेकं पृथगिदमेकं पृथगिति नानैकपृथक्त्वविषयिण्यपेक्षाबुद्धिर्निमित्तकारणं, तादृशबुद्धिनाशात् क्वचिदाश्रयनाशात् क्वचिदुभाभ्यां द्विपृथक्त्वं नश्यतीति भावः । अत्रोभयसमवेतं पृथक्त्वं द्विपृथक्त्वं त्रितयसमवेतं पृथक्त्वं त्रिपृथक्त्वमिति रीत्या बोध्यम् । ननु घटौ पटात् पृथगित्यादिप्रतीतेः पटावधिकैकपृथक्त्वद्वयादिनाप्युपपत्तेरुभयसमवेतपृथक्त्वादौ मानाभाव इति चेन्न, घटौ पटात् पृथगिति

रामरुद्री ।

टीकायाम्— आहुरिति । अस्वरसबीजं तु पूर्वोपदर्शितदीर्घतिकृन्मतानुसारेणाऽविज्ञातसंयोगस्याऽपि दीर्घव्यवहारो भवतीति दीर्घत्वमतिरिच्यते, वर्तुलत्वादीनां च न तथात्वसम्भवः, तेषां संयोगविशेषपरिचेयरूपत्वात्, तथा हि वर्तुलत्वं मध्यबिन्दुवधिकसमविप्रकृष्टबाह्यावद्रवयवकत्वं, चतुरस्रत्वं च सरलरेखाचतुष्टयारब्धत्वमित्यादिरीत्या तेषां संयोगनिरूप्यत्वमेवेति ॥ ॥ इति परिमाणग्रन्थः ॥

टीकायाम्—द्विपृथक्त्वादाविति । द्विपृथक्त्वत्वादिकं तु न जातिः, द्वित्वादिसमानाधिकरणपृथक्त्वादिनैवोपपत्तेरित्यवधेयम् । उभयमङ्गीकार्यमिति । घटद्वयत्वस्य घर्मितावच्छेदकत्वे तदवच्छेदेनैकपृथक्त्वद्वयभानाङ्गीकार एवोचितः, अन्यथा घटौ पटात् परौ घटौ रूपवन्तावित्यादिप्रतीतिबलाद्विद्रव्यत्वद्विरूपादेरपि कल्पनापत्तेरिति तु तत्त्वम् । अन्ये तु एकद्रव्यावधिकत्वमेवैकद्वित्रिपृथक्त्वादि-

अस्मात् पृथगिदं नेति प्रतीतिर्हि विलक्षणा ॥ ११४ ॥

रूपं न घट इति प्रतीत्यनापत्तेः। न हि रूपे घटावधिकं पृथक्त्वं गुणान्तरमस्ति, न वा घटे घटावधिकं पृथक्त्वमस्ति, येन परम्परासम्बन्धः कल्प्यत इत्यत आह। अस्मादिति। ननु शब्दवैलक्षण्यमेव, न त्वर्थवैलक्षण्यमिति चेन्न। विनाऽर्थभेदं घटात् पृथगितिवद्घटो न पट इत्यत्राऽपि पञ्चमीप्रसङ्गात्,

दिनकरी।

प्रतीत्योभयसमवेतपृथक्त्वे सिद्धे तेनैव घटः पटात् पृथगिति प्रतीत्युपपत्तेरेकपृथक्त्वे प्रमाणाभाव इत्यपि वक्तुं शक्यत्वात्, तस्माद्विनिगमनाविरहादुभयमङ्गीकार्यम्।

परम्परासम्बन्धः कल्प्यत इति। सामानाधिकरण्यरूपपरम्परासम्बन्धविषयकत्वमुक्तप्रतीतेः कल्प्यमित्यर्थः। इदमुपलक्षणम्। सामानाधिकरण्यरूपपरम्परासम्बन्धविषयकत्वमङ्गीकृत्याऽन्योन्याभावानङ्गीकारे एतद्घटरूपमेतद्घटात् पृथगितिप्रतीत्यनुपपत्तेः, एतद्रूपमेतद्रूपात् पृथगितिप्रतीत्यापत्तेश्च। अन्योन्याभावस्याऽतिरिक्तस्याऽभ्युपगमे तु पृथक्त्वपदस्याऽन्योन्याभावलक्षणया सर्वमुपपादनीयमिति। **पञ्चमीप्रसङ्गादिति।** अन्योन्याभावार्थकपदयोगस्य पञ्चमीप्रयोजकस्य तत्र सत्त्वादिति भावः।

रामरुद्री।

त्वम्, घटः पटात् पटघटाभ्यां घटपटमठेभ्यश्च पृथगित्यत्राऽवधिभेदस्याऽऽवश्यकत्वात्, तत्राऽपि तत्तदवधिकपृथक्त्वसमुदायस्य विषयत्वे बाधापत्तेः। अन्योन्याभावेन तदुपपादने च पञ्चमीविरोध एव दोष इत्याहुः।

प्रतीत्यापत्तेश्चेति। स्वनिरूपितावधित्वसम्बन्धेन पृथक्त्वादेरन्वयोपगमे नैषाऽऽपत्तिरनुपपत्तिर्वेत्यवधातव्यम्। **मूले—पञ्चमीप्रसङ्गादिति।** 'अन्यारादितरर्ते—'इति सूत्रेणाऽन्यार्थकपदयोगे पञ्चमी अनुशिष्यते, अन्यथा घटात् पृथगित्यादौ पञ्चम्यनुपपत्तेः। तत्र चाऽन्यत्वं यदि भेदरूपमेव विवक्ष्यते, तदा तदर्थकनञ्जादिपदयोगेऽपि पञ्चम्यापत्तिरिति तस्य पृथक्त्वरूपगुणवदर्थकत्वमावश्यकम्। न चैवमितरपदोपादानमफलम्, तदुपादानादेवाऽन्यादिपदस्याऽन्यार्थकादिपरत्वलाभसम्भवात्। गोवृषन्यायेन वा तदुपादानम्। यद्वाऽन्यपदमत्र पृथक्त्ववदर्थकपरमास्ताम्। तेन घटः पटात् पृथगित्यत्र पञ्चम्युपपत्तावपि घटे पटात् पृथक्त्वमित्यत्र कुतस्तत्सिद्धिरित्येतदर्थं पृथक्त्वार्थपरेणेतरपदोपादानं कृतम्। वस्तुतस्तु पृथक्त्वस्य विशेषणविधयाऽन्यार्थत्वसम्भवेनेतरपदोपादानं न तद्वाचकपदसङ्ग्रहाय। न वाऽन्यपदोपादानमपि पृथक्त्वरूपगुणवदर्थकपदोपादानाभिप्रायेण, पृथक्त्वादेः सावधिकत्वेनाऽवधिसूत्रादेव तद्योगे पञ्चमी सिद्धेः पृथक् तत्सूत्रणवैफल्यात्, किं तु अन्योन्याभाववदर्थकपदयोगे पञ्चम्यनुशासनायैव तदुपात्तम्। अन्यथाऽन्योन्याभावार्थके घटाद्भिन्न इत्यादौ पञ्चम्यनुपपत्तेः। न चाऽन्यादिपदस्य भेदवदाद्यर्थकत्वमसिद्धमिति वाच्यम्। घटाद्भिन्न इत्युक्ते घटो न वेति संशयानुपपत्तेरेवाऽन्न प्रमाणत्वात्, साध्यवदन्यावृत्तित्वमित्यादिप्रामाणिकप्रयोगे तदर्थकताया दृष्टत्वाच्च। न चैवं नञ्जादिपदयोगेऽपि पञ्चमी प्रसज्यते इति वाच्यम्। अन्योन्याभावार्थकपदयोगो हि स्वार्थान्योन्याभावान्वयिप्रतियोगित्वान्वयित्वम्। घटो नेत्यादौ तु प्रतियोगितासंसर्गेणैव तदन्वयोपगमान्न तद्योग इत्युक्तापत्तिवारणादिति सर्वमवदातम्।

इदं त्ववधातव्यम्। कपालक्रियया कपालघटयोः संयोगस्य कपालसंयोगेन कपालघटसंयोगस्य च वारणाय तत्तद्वृत्तिसंयोगे तयोः परस्परावधिकपृथक्त्वस्य कारणत्वस्योपेयतयाऽतिरिक्तगुणसिद्धिः। न चात्राऽन्योन्याभावेनैव चरितार्थता, तस्य कपालघटयोरुभयोरपि सत्त्वेन तदभावेन संयोगानुत्पादस्य कथञ्चिदप्युपपादयितुमशक्यत्वादित्यस्मत्पितृचरणाः। न च संयोगे पृथक्त्वस्य हेतुत्वमप्रामाणिकमिति

अप्राप्तयोस्तु या प्राप्तिः सैव संयोग ईरितः।
कीर्तितस्त्रिविधस्त्वेष आद्योऽन्यतरकर्मजः॥ ११५॥

तस्माद्यदर्थयोगे पञ्चमी सोऽर्थो नञर्थान्योन्याभावतो भिन्नो गुणान्तरं कल्प्यत इति॥ ११२॥ ११३॥ ११४॥ इति पृथक्त्वनिरूपणम्॥

संयोगं निरूपयति। अप्राप्तयोरिति।

तं विभजते। कीर्तित इति। **एषः—संयोगः॥ ११५॥**

दिनकरी।

अत्र नव्याः अन्योन्याभाव एव पृथक्त्वम् न तु गुणान्तरम्। न च घटो नेत्यत्र षष्ठ्यापत्तिरन्योन्याभावविशिष्टार्थकपदयोग एव 'अन्यारादितरर्ते' इत्यादिसूत्रेण पञ्चमीविधानात्। नञस्तु नाऽन्योन्याभावविशिष्टार्थकत्वम्, परं त्वन्योन्याभावार्थकत्वमित्यस्मान्यत्र सिद्धान्तितत्त्वात्। यदि च घटाद्भेद इत्यादौ पञ्चम्यनुपपत्त्या भेदार्थकपदयोगः पञ्चमीप्रयोजकतया 'अन्याराद्-'इति सूत्रेण बोध्यत इति घटो न पट इत्यत्र पञ्चम्यापत्तिर्दुर्वारेति विभाव्यते, तथापि निपातातिरिक्तान्योन्याभावार्थकपदयोगस्यैव पञ्चमीप्रयोजकत्वं कल्प्यते, अनुशासनस्य प्रयोगानुरोधित्वादित्याहुः॥ ११२॥ ११३॥ ११४॥ इति पृथक्त्वनिरूपणम्॥

मूले—अप्राप्तयोरित्यादिना संयोगस्वरूपमुक्तं, तत्र प्राप्तिः सम्बन्धः, स च समवायोऽपीत्यत उक्तमप्राप्तयोरिति। लक्षणं तु संयोगत्वं जातिरिति।

मूले—**आद्योऽन्यतरकर्मज इति।** ननु संयोगत्वं नान्यतरकर्मणः कार्यतावच्छेदकमुभयकर्मजसंयोगे संयोगजसंयोगे च व्यभिचारादिति चेन्न। विजातीयकर्मत्वेन विजातीयसंयोगत्वेन समवायेन हेतुहेतुमद्भावात्। उभयकर्मजसंयोगादौ च तादृशवैजात्याभावेन व्यभिचाराभावात्। एवमुभयकर्मणः संयोगस्यापि च संयोगं प्रति हेतुत्वं बोध्यम्॥११५॥

रामरुद्री।

वाच्यम्। युतसिद्धेः संयोगविभागप्रयोजकत्वमभ्युपगच्छतां भाष्यकृतामपि तस्य सम्मतत्वात्। तथा हि भाष्ये युतसिद्धिर्द्विधा निरुक्ता, एका नित्यानामन्या चाऽनित्यानाम्। तत्राऽऽद्या पृथग्गतिमत्त्वम्, अपरा तु पृथगाश्रयाश्रयित्वम्। तदेतद्भाष्यं व्याचक्षाणैर्दीधितिकृद्भिरपि पृथग्गतिमत्त्वस्य संयोगजनकक्रियात्मकत्वं, पृथगाश्रयाश्रयित्वमित्यस्य च कारणाकारणसंयोगवत्त्वं कार्यत्वेत्यर्थोऽपि प्रदर्शितः। अत एवैका नित्यानामपरा त्वनित्यानामपीति विभागः सङ्गच्छते। कर्मजन्यसंयोगे पृथक्त्वाविशिष्टं कर्म, संयोगजन्ये च तादृशः संयोगः प्रयोजक इति पर्यवसितार्थः। पृथक्त्वस्य स्वातन्त्र्येण हेतुत्व एव लाघवात् क्रियादिशरीरान्तर्भावित्वेन कारणत्वमप्रामाणिकमित्यालोच्यैवोक्तयुतसिद्धयोः प्रयोजकत्वमुक्तं भाष्ये, न हेतुत्वमित्यवधेयम्॥ ११२॥ ११३॥ ११४॥॥ इति पृथक्त्वनिरूपणम्॥

मूले—**अप्राप्तयोरिति।** युतसिद्धयोरित्यर्थः। अयुतसिद्धिश्च द्वित्वविशिष्टद्वित्वम्। वैशिष्ट्यं च स्वनादाहृत्य—स्वावच्छिन्नाधिकरणकालत्वव्यापकाधिकरणतावत्त्वोभयसम्बन्धेन। व्यापकत्वं चाऽवच्छेदकत्वसम्बन्धेन। अधिकरणतावत्त्वं तु स्वावच्छेदकीभूतोभयावृत्तिधर्मसामानाधिकरण्य—स्वनिरूपिताधेयतावच्छेदकोभयावृत्तिधर्मसामानाधिकरण्योभयसम्बन्धेन। कालिकादिसम्बन्धवारणाय च तादृशतादृशसम्बन्धानवच्छिन्नत्वमधिकरणताविशेषणं देयम्। इत्थं च तादृशकालत्वव्यापकाधिकरणतावदन्यत्वमेव युतसिद्धत्वमिति केचिदाहुः। तदसत्। एतादृश्या युतसिद्धेर्घटाभावभूतलादिष्वपि सम्भवेन तत्सम्बन्धस्याऽपि संयोगत्वापत्तेः।

वस्तुतस्तु **अप्राप्तयोरित्यस्य** पृथग्भूतयोरित्यर्थः। इत्थं च द्रव्यगुणयोः परस्परं पृथग्भावविरहात्

तयोभयस्पन्दजन्यो भवेत् संयोगजोऽपरः ।
आदिमः श्येनशैलादिसंयोगः परिकीर्तितः ॥ ११६ ॥
मेषयोः सन्निपातो यः स द्वितीय उदाहृतः ।
कपालतरुसंयोगात् संयोगस्तरुकुम्भयोः ॥ ११७ ॥

सन्निपातः—संयोगः । द्वितीयः-उभयकर्मजः ।

दिनकरी

मूले—भवेत् संयोगजोऽपर इति । ननु संयोगजसंयोगे मानाभावः, यत्र कपालक्रियया कपालतरुसंयोगस्ततः कुम्भतरुसंयोगस्तत्र कपालक्रियाया एव कुम्भतरुसंयोगं प्रति कारणत्वं, न तु कपालतरुसंयोगस्येति चेन्न, समवायेन संयोगं प्रति समवायेन क्रियायाः कारणत्वात्, कुम्भे समवायेन क्रियाया अभावेन कुम्भे तरुसंयोगानुपपत्तेः क्रियायाः सामानाधिकरण्यसम्बन्धेन हेतुत्वान्तरकल्पनापेक्षया समवायेन संयोगस्यैव हेतुत्वकल्पनौचित्यात् । वस्तुतो यत्र कपालक्रियया कपालान्तरेण तरुणा चैकस्मिन् क्षणे संयोगस्तदुत्तरक्षणे घटोत्पत्तिः कपालक्रियानाशश्च, नाशकस्योत्तरसंयोगस्य पूर्वं सत्त्वात्, तदुत्तरक्षणे कुम्भतरुसंयोगानुपपत्तेः, पूर्वक्षणे कपालक्रियाया नाशात्तस्मात् कपालसंयोग एव तत्र कारणमिति संयोगजसंयोगसिद्धिर्निराबाधैवेति ।

अत्र केचित्, कथं सयोगस्य त्रैविध्यमन्यतरकर्मजन्यसंयोगस्याप्रसिद्धेः, यत्रेषुक्रियये-षुवृक्षयोः संयोगस्तत्र संयोगाधिकरणे वृक्षे क्रियाविरहेण व्यभिचारादन्यतरकर्मणः संयोगं प्रति कारणत्वस्य वक्तुमशक्यत्वादित्याहुः, तन्न, कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्यतावच्छेदकावच्छिन्नयत्किञ्चिद्व्यक्त्यधिकरणभूतयावद्व्यक्तिवृत्तिकाभावप्रतियोगितानवच्छेदकधर्मवत्त्वमेव कारणताघटकम् । एवं च कार्याव्यवहितपूर्वक्षणावच्छेदेन कार्यतावच्छेदकाव-

रामरुद्री ।

तयोः सम्बन्धो न संयोगः । नचैवं घटपटयोः कालिकसम्बन्धोऽपि तथा स्यात् पार्थक्यस्याऽनपायादिति वाच्यम् । पृथक्त्वजन्यत्वस्य सम्बन्धे विवक्षितत्वेन तदव्युदासात् । न च संयोगस्य पृथक्त्वजन्यत्वे मानाभाव इति वाच्यम् । घटादिक्रियया घटमात्रवृत्ति संयोगस्योत्पत्तिवारणायैव तत्स्वीकारावश्यकत्वात् । विवेचितं चैतद्विस्तरेणाऽस्माभिः पृथक्त्वग्रन्थे ।

टीकायाम्-**हेतुत्वं बोध्यमिति** । तादृशजातौ मानाभावादेकतरकर्मप्रयुक्तत्वोभयकर्मप्रयुक्तत्वरूपोपाधिद्वैविध्यादेव तद्वैविध्यमिति तु तत्त्वम् । भेदेनोपादानं तु कर्मणः समवायेनैव वक्ष्यमाणदिशा सम्बन्धान्तरेणापि हेतुत्वं स्वीकर्तव्यमिति द्योतयितुमेवेति सर्वमनाकुलम् ।

हेतुत्वकल्पनौचित्यादिति । नन्वेतादृशदोषवारणाय कर्मणः समवायेनैव संयोगत्वावच्छिन्नं प्रति हेतुत्वमास्ताम्, एकैव च संयोगव्यक्तिर्घटकपालतरुवर्तिनी सम्भवतीति न घटतरुसंयोगस्याऽकारणत्वप्रसक्तिः, घटे क्रियाया अभावाद्व्यभिचारापत्तिश्चाऽन्यतरकर्मजन्यस्थलेऽपि तथाविधव्यभिचारापत्तेरपरिहार्यतया तद्वारणप्रकारानुसारेणैव वारणीयेत्यतो युक्त्यन्तरमवलम्ब्यते । **वस्तुत इति** । इदमुपलक्षणम् । संयोगजसंयोगानभ्युपगमे यत्र पाणिक्रियया पाणिशाखा हस्तशाखाशरीरशाखासंयोगास्तदुत्तरं हस्तनाशश्च, तादृशानन्तस्थलेऽनन्तकर्मजसंयोगकल्पनागौरवं च बोध्यम् ।

कार्याव्यवहितप्राक्क्षणावच्छेदेनेत्यादि । अत्र कार्यतावच्छेदकावच्छिन्ने यत्किञ्चिद्व्यक्तित्वानुपादाने रासभेऽतिव्याप्तिः, तस्याऽपि तादृशकार्यतावच्छेदकावच्छिन्नाधिकरणयत्किञ्चिद्व्यक्तिवृत्तितया

तृतीयः स्यात् कर्मजोऽपि द्विधैव परिकीर्तितः।
अभिघातो नोदनं च शब्दहेतुरिहादिमः॥ ११८॥

तृतीय इति। संयोगजसंयोग इत्यर्थः' तृतीयः स्यात्'इति पूर्वेणाऽन्वितम्।

दिनकरी।

च्छिन्नयत्किञ्चिद्द्रव्यकत्र्यधिकरणयावद्द्रव्यवृत्तिषु कारणाभाववत्त्वमेव व्यभिचारः। नन्वेवंविधो व्यभिचारः प्रकृते, इषोरपि तादृशयावदन्तर्गततया तत्र क्रियाभावात्तत्वादिति दिक्।

नन्वेवं यत्र हस्तक्रिया, ततो द्वितीयक्षणे शरीरक्रिया, तत्र चतुर्थक्षणे हस्ततरुसंयोगस्तस्मिन्नेव क्षणे शरीरक्रियाजन्यशरीरपूर्वदेशसंयोगनाशस्तदुत्तरक्षणे शरीरतरुसंयोगो जायते, तस्य च हस्ततरुसंयोगजन्यत्वं शरीरक्रियाजन्यत्वं वेत्यत्र विनिगमनाविरहः। न चोभयमेव तत्र हेतुः जातिसङ्करप्रसङ्गादिति चेन्न, तत्र संयोगद्वयस्यैवोपगमात्, द्वित्वाग्रहस्तु सादृश्यदोषादित्येके।

तत्र चित्रसंयोग एवोत्पद्यते, कारणत्वं तु तत्र संयोगकर्मोभयत्वेनेति चित्रसंयोगो विरामरुद्री।

कार्यतावच्छेदकावच्छिन्नाधिकरणयावद्द्रव्यवृत्तिनिष्ठगगनाद्यभावप्रतियोगितानवच्छेदकरासभत्ववत्त्वात्। तदुपादाने तु तादृशद्रव्यत्वान्तरवद्यावद्द्रव्यवृत्तिनिष्ठाभावप्रतियोगित्वात्तस्य नाऽतव्यावृत्तिः। अन्यतरकर्मणः संयोगहेतुत्वनिर्वाहाय चाऽधिकरणे यावत्त्वविशेषणम्। अन्यथा तादृशद्रव्यत्वेनाऽधिकरणनिष्ठाभावप्रतियोगितावच्छेदकत्वस्यैव कर्मत्वे सत्त्वेनाऽनिष्टापत्तेर्दुरुद्धरत्वापत्तेः। कार्यतावच्छेदकावच्छिन्नविशिष्टान्यधर्मवत्त्वमिति तु निष्कर्षः। वैशिष्ट्यञ्च स्वाधिकरणयावन्निष्ठाभावप्रतियोगितावच्छेदकत्वसम्बन्धेनेति। कार्यतावच्छेदकावच्छिन्ना यावत्यो व्यक्तयस्तत्प्रत्येकाधिकरणयत्किञ्चिद्व्यक्तिनिष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वमेव तत्। कार्यतावच्छेदकावच्छिन्नसमुदायवत्त्वमिति तु निष्कर्षः, समुदायत्वं च स्वाधिकरणवत्त्वसम्बन्धेन। अधिकरणवत्ता च स्ववृत्त्यभावप्रतियोगितानवच्छेदकत्वसम्बन्धेनेति तु न सत्, व्यभिचारज्ञानाप्रतिबध्यनिश्चयविषयस्य कारणत्वरूपत्वेऽपसिद्धान्तात्, वक्ष्यमाणव्यभिचारनिश्चयस्य च भिन्नविषयत्वेनेदृशकारणत्वबुद्ध्यविरोधित्वादिति ध्येयम्।

इत्येक इति। उदयनाचार्यानुयायिन इत्यर्थः। एके इत्यनेन व्यक्तिद्वयकल्पनागौरवमेतन्मतेऽस्वरसः सूचितः। अपर इति। एतन्मते तु चित्ररूपस्थले नीलत्वाद्यवच्छिन्नं प्रति नीलान्यरूपत्वादिनेव कर्मजादिसंयोगत्वावच्छिन्न प्रति सयोगत्वादिना बहुविधप्रतिबन्धकत्वस्य चित्ररूपत्वावच्छिन्नं प्रति नीलान्यपीतान्यरूपत्वादिनेव चित्रसंयोगत्वावच्छिन्नं प्रति कर्मसयोगादिभेदेन बहुविधकार्यकारणभावस्य कल्पनावश्यकताऽप्रामाणिकचित्रत्वरूपवैजात्यकल्पनाधीनगौरवपरम्पराप्रस्तत्वेनाऽत्यन्तहेयत्वं च सूचितम्। स्वमतं सूचयितुमाह। अन्यत्र विस्तर इति। इत्थं च कर्मसंयोगयोः कार्यतावच्छेदककोटावव्यवहितोत्तरत्वस्यैव निवेशनीयत्वान्निरुक्तस्थले चोभयजन्यैकसंयोगव्यक्तेरेवाऽभ्युपगमान्न कश्चिद्दोष इति भावः।

कारिकायाम्—अभिघातो नोदनं चेति। केचित्तु अभिघातनोदनतदन्यसंयोगभेदात्त्रैविध्यमाहुः, तन्मतनिराकरणायैव पुनरित्थं विभजनम्। विवेचनीयं चैतदग्र इति।

इदन्त्विह विचार्यते। कर्मणः सयोगस्य चोपदर्शितरीत्या पारिभाषिकं कारणत्वमुपपद्यतां नाम, अन्यतरकर्मजन्यस्य संयोगस्य प्रतिनियतापरवस्तुमात्रनिष्ठत्वं तु कुतः? कर्मणस्तादृशवस्त्वन्तरेऽपि विरहेण तदभावात्तदनुत्पादस्योपपादयितुमशक्यत्वात्। न चेतरावत्कारणसामग्रीसहितस्य कर्मादेः कार्यव्याप्यत्वमात्रमेवाऽभ्युपगन्तव्यं, न तु तद्व्यापकत्वमपीति नोक्तदोष इति वाच्यम्। तथा सति तादृशापर-

आदिमः—अभिघातः । द्वितीयो नोदनाख्यः इति ॥इति संयोगनिरूपणम् ।

दिनकरी ।

जातीय एवेति न साङ्कर्यमित्यपरे, इत्यन्यत्र विस्तरः ॥ इति संयोगनिरूपणम् ॥

रामरुद्री ।

वस्तुनि निष्क्रिये संयोगोत्पादस्याऽऽकस्मिकत्वापत्तेः । इष्टापत्तौ चोक्तरीत्या प्रत्यक्षत्वावच्छिन्नं प्रत्येव लाघवादुद्भूतरूपादेर्हेतुत्वसम्भवेन बहिरिन्द्रियजन्यत्वस्य कार्यतावच्छेदककोटावनन्तर्भावापत्तेः । तस्मात् कर्मणः सयोगं प्रत्याभिमुख्याख्येन सम्बन्धेनाऽपि हेतुत्वान्तरमभ्युपेयम् । तच्च दैशिकविशेषणतायामेव नोक्तदोषसम्भव इत्यन्यत्र विस्तरः ॥

॥ इति सयोगग्रन्थः ॥

अथ विभागनिरूपणे आवश्यकत्वात्कर्म निरूप्यते । तत्र 'संयोगविभागयोरनपेक्षं कारणं कर्म—' इति वैशेषिकसूत्रम् । अत्राऽयं सम्प्रदायः । अनपेक्षत्वं स्वाधिकरणकालध्वंसाधिकरणक्षणोत्पत्तिकभावानपेक्षत्वम् । तेन कर्मणाऽपि विभागजनने पूर्वसंयोगद्रव्ययोः संयोगजनने च पूर्वसंयोगनाशद्रव्ययोश्चाऽपेक्षणेऽपि न क्षतिः, द्रव्यसंयोगयोः स्वोत्तरोत्पत्तिकत्वाविरहात् संयोगनाशस्य भावत्वविरहात्तदपेक्षत्वस्याऽकिञ्चित्करत्वात् । अत्र स्वाधिकरणकालध्वंसाधिकरणक्षणवृत्तीत्युक्तावसम्भवः, कर्मणा तादृशस्य संयोगस्य विभागजननेऽपेक्षणादतस्तदुत्पत्तिरिति । तादृशकालध्वंसाधिकरणकालोत्पत्तिकत्वेत्युक्तावपि स एव दोषः, द्रव्यादेरपि कर्माधिकरणकालध्वंसाधिकरणीभूतमहाकालस्थूलकालाद्युत्पत्तिकत्वादतः क्षणपदम् । स्वाधिकरणक्षणोत्पत्तिकभावानपेक्षत्वमित्युक्तावपि स्वाधिकरणक्षणोत्पत्तिकस्य स्वस्यैव कर्मणाऽपेक्षणात्पुनस्तद्दोषतादवस्थ्यमतः स्वाधिकरणकालध्वंसाधिकरणकालोत्पत्तिकेत्युक्तम् । ननु स्वाधिकरणक्षणोत्पत्तिकस्वभिन्नभावानपेक्षत्वमेवोच्यताम् । न च यत्कर्मव्यक्त्या स्वाधिकरणोत्पन्नोत्तरदेशव्यक्त्या संयोगो जनितस्तत्कर्मण्यव्याप्तिः, तेन स्वाधिकरणक्षणोत्पत्तिकस्य स्वभिन्नस्य तथाविधद्रव्यस्यैव तादृशसंयोगजननेऽपेक्षणादिति वाच्यम् । स्वोत्तरोत्पन्नोत्तरदेशसंयोगजनिकायां क्रियायामुत्तरसंयोगविभागोभयजनिकायां च क्रियायामव्याप्तिभिया लक्षणस्य जातिघटितत्वावश्यकत्वेन स्वदुक्तस्थलीयकर्मव्यक्तेरतथात्वेऽपि तादृशव्यक्त्यन्तरवृत्तिसत्ताभिन्नजातिमत्स्वरूपलक्षणस्य तत्राऽपि सम्भवेनाऽव्याप्तेरसम्भवादिति चेन्न । तस्याऽपि लक्षणान्तरत्वात् । अत एव स्ववृत्तिप्रागभावप्रतियोग्यनपेक्षेत्येवाऽस्तु, किमुत्पत्त्यादिनिवेशेन ? प्रागभावश्च भावभिन्नो ग्राह्यः, तेन सयोगनाशापेक्षत्वेऽपि न क्षतिरिति कस्यचित्प्रलपितमप्यपास्तम्, तस्याऽपि लक्षणान्तरत्वेन प्रकृते दोषाभावादिति । तादृशक्षणोत्पत्तिकभावानपेक्षसंयोगजनकत्वमात्रोक्तौ तादृशविभागजनकत्वमात्रोक्तौ च संयोगजसंयोगविभागजविभागावादाय यथाक्रमं संयोगविभागयोरतिव्याप्तिरत उभयोपादानम् । कारणाकारणसंयोगस्य कार्याकार्यसंयोगं प्रति स्वोत्तरोत्पन्नकर्मसहकारेण विभागं प्रति च जनकतया तत्राऽतिव्याप्तिवारणाय विभागेऽपि स्वोत्तरोत्पन्नभावानपेक्षत्वमुपात्तम् । यत्राऽङ्गुलीशाखासंयोगः शाखायां च कर्मैत्येकः कालः, ततोऽङ्गुलीशाखाविभागो हस्तोत्पत्तिश्च, ततोऽङ्गुलीशाखासंयोगनाशो विनश्यदवस्थाङ्गुलीशाखासंयोगाद्धस्तशाखासंयोगश्च, तत्राङ्गुलीशाखासंयोगेऽतिव्याप्तिवारणाय सयोगेऽपि तदुपादानम् । यद्यप्येवमपि यत्राऽङ्गुलीशाखासंयोगः शाखायां च कर्मैत्येकः कालः, ततोऽङ्गुलीशाखासंयोगाद्धस्तशाखासंयोगोऽङ्गुलीशाखाविभागश्च, तत्राङ्गुलीशाखासंयोगे संयोगविभागोभयजनकेऽतिव्याप्तिर्दुर्वारा, तथाऽपि स्वपश्चाद्भाव्यजन्यो यः स्वजन्यविभागस्तदधीनसंयोगजनकत्वं विवक्षितमिति नाऽतिप्रसङ्गः । अत्र द्रव्येऽतिव्याप्तिवारणायाऽजन्यान्तं विभागविशेषणम् । संयोगविशेषणत्वे स्वपश्चाद्भाविपूर्वसंयोगनाशाधीनस्यैव संयोगस्य जनकतया क्रियामात्रेऽसम्भवापत्तेः । स्वपश्चाद्भाव्यजन्यत्वं तु स्वाधिकरणसमयध्वंसाधिकरणसमयध्वंसानधिकरणसमयवृत्तित्वमेव, लाघवात् । यत्राऽऽदौ घटक्रिया, ततो घटपूर्वदेशविभागः, पटोत्पत्तिश्च, ततो घटपूर्वदेशसंयोगनाशः, ततो घटपटयोः सयोगस्तत्र पटेऽतिव्याप्तिः, तस्याऽपि स्वोत्तरोत्पन्नानपेक्षो यो घटपूर्वदेशविभागस्तदधीनघटसंयोगजनकत्वादतः स्वजन्येति विभागविशेषणम् । विभागजविभागेऽतिव्याप्तिवारणा-

रामरुद्री ।

यैव च तादृशविभागजनकत्वं विहाय तदधीनसंयोगजनकत्वपर्यन्तमनुसृतम् । विभागाधीनत्वं च न विभागजन्यत्वम् । विभागस्य पूर्वसंयोगनाशेनाऽन्यथासिद्धतयोत्तरदेशसंयोगाहेतुत्वात् । अपि तु विभागोत्तरोत्पत्तिकत्वम् । न चैवं यत्राऽङ्गुलीकर्मजनितशाखाङ्गुलीसंयोगः शाखायां च कर्मेत्येकः कालः, ततः शाखाकर्मणा शाखाङ्गुलीविभागो हस्तोत्पत्तिश्च, ततो हस्तशाखासंयोगे शाखाङ्गुलीसंयोगजन्येऽतिव्याप्तिरिति वाच्यम् । असमवायिकारणस्य कार्यमहभावेन हेतुतयोक्तस्थले हस्तशाखासंयोगस्यैवोत्पादात्तस्मम्भवात् । उक्तनियमानङ्गीकारे तु विभागाधीनत्वं विभागप्रयोज्यत्वमेव जन्यतज्जन्यसाधारणं विवक्षणीयमिति न कश्चिद्दोषः । यत्र प्रथमं घटोत्पत्तिः, ततस्तत्र गुरुत्वोत्पत्तिः, गुरुत्वापतनम्, ततश्च घटभूतलसंयोगस्तत्र स्वपश्चाद्भाव्यजन्यस्वजन्यगुरुत्वाधीनं भूतलसंयोगमादाय घटे, यत्राऽङ्गुलीतन्तुसंयोगपटोत्पत्ती, ततः पटाङ्गुलीसंयोगः, ततः पटहस्तसंयोगः, ततः पटशरीरसंयोगश्च, तत्राऽङ्गुलीतन्तुसंयोगेऽपि स्वपश्चाद्भाव्यजन्यस्वजन्यपटहस्तसंयोगाधीनपटशरीरसंयोगजनकत्वमादायाऽतिव्याप्तिरतो विभागपदम् । यत्राऽङ्गुलीकर्मजनिताङ्गुलीशाखासंयोगः शाखायां च कर्म, ततोऽङ्गुलीशाखाविभागः, ततोऽङ्गुलीशाखासंयोगनाशस्तत्राऽङ्गुलीशाखासंयोगे स्वपश्चाद्भाव्यजन्यस्वजन्यविभागाधीनं स्वनाशं प्रति प्रतियोगिविषया जनकत्वमादायाऽतिव्याप्तिवारणाय च संयोगपदमिति ध्येयम् । यद्वा संयोगविभागोभयासमवायिकारणतावच्छेदकरूपवत्त्वं संयोगजनकविभागासमवायिकारणजातीयत्वं वा तत्, अनपेक्षकारणत्वस्याऽसमवाय्यन्तरानिरपेक्षकारणत्वरूपस्याऽसमवायिकारणत्वे पर्यवसानात् । संयोगस्तु विभागस्य निमित्त, नाऽसमवायी । तेन कारणाकारणसंयोगे कार्याकार्यसंयोगासमवायिकारणत्वं कारणाकारणविभागजनकत्वं चाऽऽदाय नाऽतिव्याप्तिः । प्रतिबन्धकपूर्वसंयोगापगमेनाऽन्यथासिद्धो विभागो नोत्तरसंयोगे जनक इति मतेनेदम् । तेन कारणाकारणविभागे कार्याकार्यविभागं स्वजन्यपूर्वसंयोगनाशद्वारा कारणाकारणसंयोगं च प्रत्यसमवायिकारणत्वमादाय नाऽतिव्याप्तिः । संयोगस्य विभागासमवायिकारणत्वाभ्युपगमे तु प्रयोज्यप्रयोजकभावापन्नसंयोगविभागोभयासमवायिकारणत्वं वक्तव्यम् । उत्तरसंयोगस्य विभागप्रयोज्यत्वात्प्रयोज्यप्रयोजकभावः कर्मजन्यसंयोगविभागयोर्नानुपपन्नः । अत्र द्रव्यवारणायाऽसमवायीत्यन्त्र विस्तरः । केचित्तु संयोगविभागपदयोर्विशेषपरतया संयोगाजन्यसंयोगासमवायिकारणत्वविभागाजन्यविभागासमवायिकारणत्वयोरेकैकेन पृथगेव लक्षणत्वमभिमतमित्याहुः । वैशेषिकैकदेशिनस्तु कर्मत्वजातिमत्त्वमेव कर्मणो लक्षणम् । तत्र च प्रमाणप्रदर्शनपरतयोक्तसूत्राऽऽवतारः । सामान्यतः संयोगकारणत्वादेः संयोगादावपि गतत्वेन तदवच्छेदकतया कल्प्यमानाया जातेः संयोगादिसाधारण्यप्रसङ्गेन तद्व्यावृत्तकारणतावच्छेदकतयैव तस्याः प्रसाधनीयतया तदुपदर्शनस्याऽऽवश्यकत्वात् । इत्थं च संयोगविभागयोर्यत्सापेक्षं कारणं तदवृत्तिकारणतायाः एव विवक्षितत्वान्नाऽतिप्रसङ्गः । स्वाधिकरणसमयध्वंसाधिकरणक्षणोत्पत्तिकभावजन्यसंयोगविभागोभयकारणवृत्तिर्या कारणता तदन्यत्वं समुदितार्थः । संयोगजसंयोगस्य विभागजविभागस्य च तथाविधं कारणत्वमादाय क्रमेण संयोगविभागयोरतिव्याप्तिवारणाय संयोगविभागयोर्लक्षणे प्रवेशः । अन्यत् सर्वं पूर्ववदुक्तमित्याहुः ।

आदौ क्रिया, ततो विभागः, ततः पूर्वसंयोगनाशः, तत उत्तरसंयोगोत्पत्तिः, ततः क्रियानाश इति कर्मणश्चतुःक्षणावस्थायित्वमौत्सर्गिकम् । कारणमात्रविभागात् कारणाकारणविभागाङ्गीकारे च पाकजप्रक्रियोपदर्शितदिशा षट्पञ्चक्षणावस्थायित्वं च । तत्र क्रियात एवोत्तरसंयोगस्याऽव्यवहितोत्तरक्षणे उत्पत्स्युपगमे सत्येव पूर्वसंयोगे उत्तरसंयोगापत्तितः पूर्वसंयोगस्योत्तरसंयोगे प्रतिबन्धकत्वमावश्यकम् । इत्थञ्च पूर्वसंयोगात्मकप्रतिबन्धकवशादेवोत्तरसंयोगस्य न पूर्वमुत्पादापत्तिः । अथ पूर्वसंयोगोत्तरसंयोगयोः केन रूपेण प्रतिबध्यप्रतिबन्धकभावः ? न च संयोगत्वावच्छिन्नं प्रति संयोगत्वेन प्रतिबन्धकत्वम्, समानावच्छेदकत्वं च प्रत्यासत्तिः, तेन सत्यपि पृथादौ वस्त्रसंयोगे शरे च पुङ्खजत्वादिसंयोगे शरीरशरादिकर्मणा न संयोगानुपपत्तिरिति वाच्यम् । कारणाकारणसंयोगजन्ये कार्याकार्यसंयोगे व्यभिचारात् । शाखादौ यदवच्छेदेनाऽङ्गुल्यादिसंयोगस्तदवच्छेदेनैव हस्तादिसंयोगोदयात् । एवमङ्गु-

रामरुद्री ।

ल्यादौ यत्सूक्ष्मभागावच्छेदेन शाखादिसंयोगस्तदवच्छेदेनैव हस्तादावपि शाखादिसंयोगोदयाच्च । अव-यवस्येवावयवावयवादेरपि अवयविनिष्ठसंयोगावच्छेदकत्वात् । अथ कर्मजन्यसंयोगत्वावच्छिन्न प्रति उक्तप्रत्यासत्त्या संयोगत्वेन प्रतिबन्धकत्वम् । न चेवं मूलावच्छेदेन स्तम्भादिसम्बद्धदण्डादेः सत्यपि स्तम्भादिसंयोगेऽग्रावच्छेदेन संयोगापत्तिरिति वाच्यम् । इष्टत्वात् । मूलावच्छेदेनैव तत्र देशान्तरसंयो-गानभ्युपगमात्, अग्रावच्छेदेन देशान्तरसंयोगस्य सर्वसिद्धत्वादिति चेन्न । यत्र दण्डादेः पूर्वसंयोगवि-नाशकाले उत्तरदेशारम्भकावयवकर्मणा तदारम्भकावयवेन सम संयोगोत्पत्तिरुत्तरदेशोत्पत्तिश्च, ततस्त-दवयवसंयोगावच्छेदेनैव दण्डादेरुत्तरदेशसंयोगः तत्र व्यभिचारात् । न च तत्राऽवयवसंयोगज एवोत्तर-संयोगः, न तु कर्मज इति वाच्यम् । स्वजन्यसंयोगस्यैव कर्मनाशकतया तत्कर्मणो यावदाश्रयमवस्था-नप्रसङ्गात् । किञ्च भूतलाद्युत्तरदेशे सत्यपि गगनादिसंयोगे निष्क्रियतैजोवाय्वादिघृतादि संयोगे च घटादिकर्मणा घटादिसंयोगोदयाद्व्यभिचारः । अथ तदीयकर्मजनितसंयोगत्वावच्छिन्न प्रत्युक्तप्रत्यास-त्त्या तन्निष्ठसंयोगत्वेन प्रतिबन्धकत्वम् । न चैवमुत्तरदेशनिष्ठावरकभित्त्यादिसंयोगस्य प्रतिबन्धकत्वाना-पत्तिरिति वाच्यम् । तत्र तत्तत्कर्मजानतसंयोगव्यक्ति प्रति तत्तद्भित्त्यादिसंयोगव्यक्तेर्विशिष्य पृथगेव प्रतिबन्धकत्वात् । न च तथाऽपि यत्र मूलावच्छेदेनैव दण्डादिः स्तम्भादिसम्बद्धोऽग्रावच्छेदेन न कुत्रा-ऽपि संयुक्तः तत्राऽग्रावच्छेदेन कर्मोत्पत्तौ द्वितीयक्षण एवाऽग्रावच्छेदेन संयोगोत्पत्तिप्रसङ्ग इति वाच्य-म् । तत्राऽग्रावच्छेदेनाऽप्यन्ततः प्रभामण्डलादिसंयोगस्य गगनादिसंयोगस्य च सत्त्वादिति चेन्न । स्तिमितवस्त्रादौ सत्यप्यभिमुखावच्छेदेन जलघृतादिसंयोगे शरीरसंयोगोदयात् पृष्ठलग्नवस्त्रे आभिमुख्या-वच्छेदेन शरीरसंयोगे सत्यपि शरीरवस्त्रयोरन्तरे जलालोकगगनादिसंयोगोदयाच्च । न च तत्राऽपि विभागात्तत्तत्संयोगनाशः कल्प्यते, अतिसान्निध्यबलाच्च नोपलभ्यत इति वाच्यम् । तथा सति संयुक्त-द्रव्यमात्रस्य देशान्तरगमने बाधापत्त्याऽनुभवविरोधप्रसङ्गात्, तथा तन्तूनां सत्यारम्भकसंयोगे आरम्भक-संयोगाविरोधिकर्मणाऽनारम्भकसंयोगानुपपत्तिश्च, तत्राऽऽरम्भकसंयोगनाशोपगमे द्रव्यनाशप्रसङ्गात् । आरम्भकसंयोगातिरिक्तत्वावशेषणेऽपि पूर्वोक्तानुभवविरोधस्य दुर्वारत्वात् । न च तत्कर्मव्यक्तिजन्यविभाग-नाश्यसंयोग एव प्रतिबन्धक इति वाच्यम् । तथा सत्यारम्भकसंयोगप्रतिद्वन्द्विविभागजनकक्रियायोत्त-रदेशसंयोगे जनयितव्ये आकाशादिसंयोगस्याऽप्रतिबन्धकतया तदपसारणाय कारणमात्रे विभागजविभा-गकल्पनावैयर्थ्यप्रसङ्गात् । अथ तत्तत्कर्मव्यक्तिजन्यसंयोगे तत्तत्कर्मप्रयोज्यविभाग एव प्रतिबन्धकः । प्रयोज्यत्वकरणाच्चाऽऽरम्भकसंयोगाविरोधिविभागजनकक्रियाजन्यसंयोगेऽप्याकाशादिदेशसंयोगस्य प्रति-बन्धकत्वम्, तत्तत्क्रियाव्यक्तेस्तत्तद्विभाग प्रति विशिष्य हेतुत्वात्तत्संयोगव्यक्तस्तत्तद्विभागव्यक्तिप्रतिब-न्धकतया वा सत्यपि कर्मणि कुतश्चिदेव विभागो न तु सर्वस्मादितिनियमसम्भवादिति चेन्न । दण्डा-दावुत्तरदेशे सत्यपि गगनादिसंयोगे निष्क्रियजलतैजोवाय्वादिघृतादिसंयोगे स्वाधिकरणसंयोगे च हस्ता-दिकर्मणा हस्ताभिघातोदयात्, अभिघाताधीनकर्मोत्पत्तिद्वारा तत्रापि हस्तादिकर्मप्रयोज्यविभागना-श्यत्वात् । न च जन्यत्वजन्यजन्यत्वोभयमात्रसाधारणप्रयोज्यत्वस्यैवाऽत्र प्रवेशान्नाऽयं दोष इति वा-च्यम् । तथाऽपि तत्तत्क्रियाव्यक्तिभेदेनाऽनन्तप्रतिबध्यप्रतिबन्धकभावापत्तिः । यत्र पूर्वदेशसंयुक्ताङ्गु-ल्यां क्रिया, ततोऽङ्गुलीपूर्वदेशविभागो हस्तोत्पत्तिः ततोऽङ्गुलीपूर्वदेशसंयोगनाशो हस्तपूर्वदेशसंयो-गश्च, ततोऽङ्गुल्यास्तस्मिन्नेव पूर्वदेशेऽवच्छेदकान्तरे पुनः संयोगोऽङ्गुलीपूर्वदेशविभागाद्धस्तपूर्वदेशवि-भागश्च, तत्राङ्गुल्याः पुनः पूर्वदेशसंयोगं प्रति हस्तपूर्वदेशसंयोगस्याऽङ्गुल्यां यत्सूक्ष्मभागावच्छेदेन पुनः पूर्वदेशसंयोगस्तत्सूक्ष्मभागच्छेदेनैव वर्तमानस्य प्रतिबन्धकत्वापत्तेश्च । इष्टापत्तौ च क्षणद्वयापलापापत्तेरिति चेन्न, तदीयकर्मजनितसंयोगत्वावच्छिन्नं प्रति क्रियाविरहविशिष्टतन्निष्ठसंयोगत्वेन प्रतिबन्धक-त्वम् । उत्तरदेशोपरि निष्क्रियजलालोकादिसंयोगेऽपि अन्यदीयकर्मणा संयोगोत्पादाच्छाखायामङ्गुली-संयोगसत्त्वेऽप्यङ्गुलीसंयोगजन्यहस्तसंयोगोत्पादाच्च व्यभिचारवारणाय तदीयकर्मजनितेति । संयो-गस्य क्रियाविरहविशिष्टत्वं चाऽवच्छेदकतावटितसामानाधिकरण्यसम्बन्धेन । स्तिमितवस्त्रादौ जलादि-संयोगः पृष्ठलग्नवस्त्रजलादौ शरीरशरादिसंयोगश्च न क्रियाविरहविशिष्टः, वस्त्रजलादिक्रियोत्पत्तिदशायां

शब्दाहेतुर्द्वितीयः स्यात् विभागोऽपि त्रिधा भवेत्।
एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः॥ ११९॥
विभागजस्तृतीयः स्यात् तृतीयोऽपि द्विधा भवेत्।
हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः॥ १२०॥

विभक्तप्रत्ययासाधारणकारणं विभागं निरूपयति। विभाग इति।

एककर्मेति। तदुदाहरणं तु श्येनशैलविभागादिकं पूर्ववद्वोध्यम।

तृतीयोऽपि—विभागजविभागः कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्चेति द्विविधः, आद्यस्तावद्यत्रैककपाले कर्म, ततः कपालद्वयविभागः, ततो घटारम्भकसंयोगनाशः, ततो घटनाशः, ततस्तेनैव कपालविभागेन सकर्मणः कपालस्याऽऽकाशविभागो जन्यते, तत आकाशसंयोगनाशः, तत उत्तरदेशसंयोगः, ततः कर्मनाश इति। न च तेन कर्मणैव कथं देशान्तरविभागो न जन्यत इति वाच्यम्। एकस्य कर्मणः आरम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्याऽनारम्भकसंयोगप्रतिद्वन्द्विविभागजनकत्वस्य च विरोधात्। अन्यथा विकसत्कमलकुड्मलभङ्गप्रसङ्गात्, तस्माद्योद्मनारम्भकसंयोगप्रतिद्वन्द्वि-

दिनकरी।

पूर्ववदिति। संयोगवदित्यर्थः। तेनैव कपालविभागेनेति। तेन कपालविभागेनैवेत्यर्थः। एवकारेण कर्मणो व्युदासः। कपालस्याकाशविभागो जन्यत इति। अन्यथा कपालाकाशसंयोगस्य नाशकाभावेन नित्यत्वापत्तिरेव, कपालाकाशसंयोगस्य प्रतिबन्धकस्य

रामरुद्री।

तत्संयुक्तमलादिशरीरशरादेरपि सक्रियत्वात्। न हि निश्चलं पूर्वदेशतो न विभज्यैवोत्तरदेशेन संयुज्यत इति कश्चिदुपैति। क्रियाविरहविशिष्टतदवच्छिन्नसंयोगो विरोधीति तु पर्यवसितार्थः। तेन मूलावच्छेदेन निश्चलनत्वाद्यन्तरेण सयुक्तेऽपि तत्त्वन्तरेऽग्रावच्छेदेन क्रियातो विनाऽप्यारम्भकसंयोगनाशं नाऽग्रावच्छेदेन संयोगानुपपत्तिरिति गुणप्रकाशदीधितिरहस्ये मथुरानाथतर्कवागीशैरुक्तम्। तत्रेदं चिन्त्यते। एवं सति विरुद्धदिक्क्रिययोर्द्रव्ययोरुत्तरसंयोगस्य तयोर्विभागमन्तरेणाऽप्युत्पादापत्तिः, पूर्वसंयोगस्य क्वचिदप्याश्रये क्रियाविरहवैशिष्ट्यविरहेणाऽप्रतिबन्धकत्वात्। न च तत्र क्रियावद्द्रव्यान्तरनिष्ठसंयोगानामप्रतिबन्धकत्वेऽपि तत्समशीलगगनादिसंयोगानामेव प्रतिबन्धकत्वमस्त्विति वाच्यम्। एवं सति गगनादिसंयोगस्यैव साक्षात्प्रतिबन्धकत्वसम्भवेनोक्तगुरुतरधर्मपुरस्कारेण पूर्वसंयोगस्य प्रतिबन्धकत्वकल्पनानौचित्यात्। आत्मसंयोगत्वेन तथात्वे बहुतरलाघवसम्भवाच्च। न चाऽविरुद्धदिक्क्रियाविरहवैशिष्ट्यमेव प्रतिबन्धकतावच्छेदककुक्षौ निवेशनीयमिति नैष दोष इति वाच्यम्। एवमप्युभयकर्मजसंयोगस्थले उत्तरसंयोगानन्तरमुत्तरोत्तरसंयोगापत्तेर्दुर्वारत्वात्, द्वयोरपि संयोगयोः क्रियासमानाधिकरणतयाऽप्रतिबन्धकत्वात्। तस्मात् कथा रीत्या पूर्वसंयोगस्य प्रतिबन्धकत्वमिति। तथाऽपि तत्तत्संयोगविशेषाणां प्रातिस्विकरूपेण केनचिदनुगतरूपेण वा प्रतिबन्धकत्वं सूक्ष्मधियामेव विषयीकरणीयम्।

इत्थं च पूर्वसंयोगस्योत्तरसंयोगप्रतिबन्धकत्वे सिद्धे तदपसारणाय, तन्नाशकस्य विभागस्योत्पत्तिः प्रथममपेक्ष्यते। ननु तथाऽपि विभागपूर्वसंयोगयोः केन रूपेण नाश्यनाशकभाव इति चेन्न द्रव्यनाशजन्यसंयोगनाशत्वेन कार्यता, विभागत्वेन कारणता, संयोगत्वविशिष्टफलोपधायकत्वं च प्रत्यासत्तिः कारणस्य, कार्यस्य प्रतियोगित्वमिति गृहाण, इत्थमेव विभागं प्रति पूर्वसंयोगस्य हेतुत्वान्न विभागोपधायकत्वं सर्वेषामापद्यत इति संक्षेपः। विस्तरस्त्वाकरेष्ववसेयः।

विभागं जनयेत्, तदाऽऽरम्भकसंयोगप्रतिद्वन्द्विविभागं न जनयेत्। न च कारणविभागेनैव द्रव्यनाशात् पूर्वं कुतो देशान्तरविभागो न जन्यत इति वाच्यम्। आरम्भकसंयोगप्रतिद्वन्द्विविभागवतोऽवयवस्य सति द्रव्ये देशान्तरविभागासम्भवात्। द्वितीयस्तावद्यत्र हस्तक्रियया हस्ततरुविभागस्ततः शरीरेऽपि विभक्तप्रत्ययो भवति, तत्र शरीरतरुविभागे हस्तक्रिया नकारणं, व्यधिकरणत्वात्, शरीरे तु क्रिया नास्त्येव, अवयविकर्मणो यावद्द्रव्यावयवकर्मनियतत्वात्, अतस्तत्र कारणाकारणविभागेन कार्याकार्यविभागो जन्यत इति। अत एव विभागो गुणान्तरं, अन्यथा शरीरे विभक्तप्रत्ययो न स्या-

दिनकरी।

सत्त्वेनोत्तरसंयोगानुत्पत्त्या कर्मणोऽपि नित्यत्वापत्तिः, उत्तरसंयोगस्यैव स्वजनककर्मनिवर्तकत्वादिति भावः। अमुमर्थं हृदि निधायोक्त-तत उत्तरदेशसंयोगस्ततः कर्मनाश इति। **तेन कर्मणेवेति**। कपालद्वयविभागजनककर्मणेवेत्यर्थः। **देशान्तरविभागः**-कपालाकाशादिविभागः। **आरम्भकेत्यादि**। आरम्भकसंयोगः-कपालद्वयसंयोगादिस्तत्प्रतिद्वन्द्वी तद्विरोधी तन्नाशक इति यावत्। एवमग्रेऽपि। **अनारम्भकसंयोगः**-कपालाकाशसंयोगादिः। **अन्यथेति**। आरम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मणोऽनारम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मणश्चैक्य इत्यर्थः। **विकसदिति**। तत्राऽप्यवच्छेदेनाऽनारम्भकसंयोगप्रतिद्वन्द्विविभागजनककर्मणः सत्त्वात्तेन कर्मणा मूलावच्छिन्नारम्भकसंयोगविरोधिविभागोत्पत्तिस्तेन चारम्भकसंयोगनाशस्तेन कमलनाशः स्यादिति भावः। **कारणविभागेनैव**-कारणमात्रविभागेनैव, कपालद्वयविभागादिनेति यावत्। पूर्वं-घटाद्यात्मकद्रव्यनाशात् पूर्वम्। तथा च पूर्वोक्तं 'ततो घटनाशस्ततः कपालस्याकाशविभागो जन्यते' इत्यसङ्गतमिति भावः। सति द्रव्ये-द्रव्यनाशं विना। **देशान्तरविभागासम्भवादिति**। अन्यथा कारणमात्रविभागे कर्मलक्षणस्याऽतिव्याप्त्यापत्तेरिति भावः। वस्तुतः कर्मलक्षणस्य तत्र नाऽतिव्याप्तिः, तत्प्रकारस्तु पाकजप्रक्रियायां सप्रपञ्चं प्रदर्शितोऽस्माभिः। **द्वितीय इति**। कारणाकारणविभागजन्य इत्यर्थः। **यावद्द्रव्यावयवकर्मनियतत्वादिति**। क्रियाया व्याप्यवृत्तित्वनियमादिति भावः। **अत एव** वक्ष्यमाणयुक्तेरेव। **शरीरे विभक्तप्रत्ययो न स्यादिति**। यत्र हस्तक्रियया हस्ततरुविभागस्तत्र शरीरे विभागप्रत्ययः सर्वानुभवसिद्धः, स च विभागं विना नोपपद्यते। न च शरीरतरुसंयोगनाश एव तद्विषय इति वाच्यम्। विभागानङ्गीकारे शरीरतरुसंयोगनाशस्यैवासम्भवात्। न हि तत्र हस्तक्रिया शरीरतरुसंयोगनाशिका, व्यधिकरणत्वात्, अतस्तत्र हस्ततरुविभागेन शरीरतरुविभागो जन्यते, तेन च शरीरतरुसंयोगनाशो जन्यत इत्युपेयत इति विभागसिद्धिः। ननु हस्ततरुसंयोगनाश एव शरीरतरुसंयोगनाशकोऽस्तु, तरौ तदुभयसामानाधिकरण्यसत्त्वात्। मास्तु विभागजविभागः, हस्ततरु-

रामरुद्री।

मूले-विभागं न जनयेदिति। अनारम्भकसंयोगप्रतिद्वन्द्विविभागजनकतावच्छेदकरूपस्याऽऽरम्भकसंयोगप्रतिद्वन्द्विविभागजनकतावच्छेदकरूपव्यापकत्वे का क्षतिरिति तु चिन्तनीयम्। तन्त्वाकर्षणे तन्तुहस्तसंयोगविरोधिविभागानुदयात्कर्मणः संयोगविरोधिविभागविशेषान् प्रति विशिष्यैव हेतुत्वस्याऽऽवश्यकतयोक्तवैजात्यकल्पनमेवाऽप्रामाणिकमिति तु तत्त्वम्॥

परत्वं चाऽपरत्वं च द्विविधं परिकीर्तितम् ।
दैशिकं कालिकं चाऽपि मूर्त एव तु दैशिकम् ॥ १२१ ॥
परत्वं मूर्तसंयोगभूयस्त्वज्ञानतो भवेत् ।

त्, अतः संयोगनाशेन विभागो नाऽन्यथासिद्धो भवति ॥ ११६ ॥ ॥ ११७ ॥ ॥ ११८ ॥ ॥ ११९ ॥ ॥ १२० ॥ ॥ इति विभागनिरूपणम् ॥

परापरव्यवहारनिमित्ते परत्वापरत्वे निरूपयति । परत्वञ्चापरत्वं चेति । दैशिकमिति । दैशिकपरत्वं बहुतरमूर्तसंयोगान्तरितत्वज्ञानादुत्पद्यते, एवं तदल्पीयस्त्वज्ञानादपरत्वमुत्पद्यते, अत्राऽवधित्वार्थं पञ्चम्यपेक्षा, यथा 'पाटलिपुत्रात् काशीमपेक्ष्य प्रयागः परः' 'पाटलिपुत्रात् कुरुक्षेत्रमपेक्ष्य प्रयागोऽपर इति ॥ १२१ ॥ १२२ ॥

दिनकरी ।

विभागस्तु कर्मजन्यशरीरतरुसंयोगनाशकतया सिद्ध्यतीत्यप्यत एवापास्तम् । हस्ततरुसंयोगनाशेनैव तदुपपत्तेः । किं च हस्तक्रियैव स्वसमवायिसमवेतत्वसम्बन्धेन शरीरनिष्ठा शरीरतरुसंयोगनाशे हेतुरस्तु, वैयधिकरण्याभावादिति चेन्न, आश्रयनाशाजन्यगुणनाशस्य विरोधिगुणजन्यत्वनियमेन शरीरकर्मजन्यशरीरतरुसंयोगं प्रति हस्ततरुसंयोगस्याऽकारणत्वेन च शरीरतरुसंयोगनाशे हस्ततरुसंयोगनाशस्याजनकत्वात् । यच्चोक्तं हस्तक्रियैव स्वसमवायिसमवेतत्वसम्बन्धेन तत्र कारणमिति, तदपि न, साक्षात्सम्बन्धेन जनकत्वनियमस्याऽसति बाधके सङ्कोचकल्पनानुपपत्तेः । वस्तुतस्तु संयोगाभावो विभागो विभागाभावो वा संयोग इत्यत्र विनिगमनाविरहेणोभयोरप्यतिरिक्तत्वम् । अत एव घटात् पटो विभक्त इति प्रत्यय उपपद्यते । संयोगनाशात्मकत्वे नाशस्य सावधिकत्वाभावेन तथाप्रत्ययानुपपत्तेरिति । तदिदमभिप्रेत्योक्तम्—अतः संयोगेत्यादि ॥ ११६ ॥ ११७ ॥ ११८ ॥ ११९ ॥ १२० ॥

॥ इति विभागग्रन्थः ॥

मूले—मूर्त एव तु दैशिकमिति । विभुद्रव्ये विप्रकृष्टदेशमात्रवृत्तित्वसन्निकृष्टदेशमात्रवृत्तित्वबुद्धेर्निमित्तकारणस्य, दिक्संयोगस्यासमवायिकारणस्य चाऽभावादिति भावः । दैशिकपरत्वस्य निमित्तकारणमाह । बहुतरेति । बहुतरसंयोगान्तरितत्वं तदेव विप्रकृष्टत्वं तद्वि-

रामरुद्री ।

टीकायाम्—आश्रयनाशेति । कारणनाशेत्यर्थः तेन परत्वापरत्वादीनामसमवायिकारणसंयोगनाशनाद्यत्वेऽपि न क्षतिः ॥ इति विभागग्रन्थः ॥

विभुद्रव्ये विप्रकृष्टदेशमात्रवृत्तित्वेति । विप्रकृष्टमात्रदेशसंयोगस्येत्यर्थः । एवमग्रेऽपि । सन्निकृष्टदेशाऽसंयुक्तत्वं मात्रपदार्थः । सन्निकृष्टविप्रकृष्टोभयसंयुक्ते तयोरुत्पादवारणाय कारणतावच्छेदककुक्षौ तस्याऽन्तर्भावनीयत्वादिति भावः । ननु विजातीयदिक्संयोगस्य परत्वाऽपरत्वासमवायिकारणत्वं वाच्यम् । अन्यथा बकदेशस्थस्याऽपि तदपेक्षया, तदपेक्षया योऽपरः परो वा तदपेक्षया च परापरत्वापत्तेः । तथा च निरुक्तज्ञाननिष्ठकारणतावच्छेदककुक्षौ मात्रार्थान्तर्भावो व्यर्थः, विजातीयसंयोगाभावादेव परापरत्वोत्पादस्य उभयसंयुक्ते वारणसम्भवात् । विप्रकृष्टदेशसंयुक्तत्वसन्निकृष्टदेशसंयुक्तत्वे च विभुनोऽपि गगनादेर्नाऽनुपपन्ने इत्यत आह । दिक्संयोगस्येति । तथा च तादृशवैजात्यव्यापकीभूतदिक्संयोगत्वावच्छिन्न-

अपरत्वं तदल्पत्वबुद्धितः स्यादितीरितम् ॥ १२२ ॥
तयोरसमवायी तु दिक्संयोगस्तदाश्रये ।
दिवाकरपरिस्पन्दभूयस्त्वज्ञानतो भवेत् ॥ १२३ ॥
परत्वमपरत्वं तु तदीयाल्पत्वबुद्धितः ।
अत्र त्वसमवायी स्यात् संयोगः कालपिण्डयोः ॥ १२४ ॥
अपेक्षाबुद्धिनाशेन नाशस्तेषां निरूपितः ।
बुद्धः प्रपञ्चः प्रागेव प्रायशो विनिरूपितः ॥ १२५ ॥
अथाऽवशिष्टोऽप्यपरः प्रकारः परिदर्श्यते ।

तयोः—दैशिकपरत्वापरत्वयोः । असमवायी-असमवायिकारणम् । तदाश्रये दैशिकपरत्वापरत्वाश्रये । दिवाकरेति । अत्र परत्वापरत्वं कालिकं ग्राह्यम् । यस्य सूर्यपरिस्पन्दापेक्षया यस्य सूर्यपरिस्पन्दोऽधिकः, स ज्येष्ठः यस्य न्यूनः स कनिष्ठः । कालिकपरत्वापरत्वे जन्यद्रव्ये(१) एव । अत्र-कालिकपरत्वापरत्वयोः । तेषां-कालिकदैशिकपरत्वापरत्वानाम् ॥ १२३ ॥ १२४ ॥

॥ इति परत्वापरत्वनिरूपणम् ॥

क्रमप्राप्तां बुद्धिं निरूपयति । बुद्धेरिति ।

दिनकरी ।

वयिण्यपेक्षाबुद्धिर्दैशिकपरत्वं प्रति निमित्तकारणमित्यर्थः । तदल्पीयस्त्वेति । अल्पसंयोगान्तरितत्वरूपसन्निकृष्टत्वविषयिण्यपेक्षाबुद्धिर्दैशिकापरत्वं प्रति निमित्तकारणमित्यर्थः ॥ १२१ ॥ १२२ ॥

कालिकपरत्वापरत्वे जन्ये एवेत्यत्र जन्यपदं सप्तम्यन्तम् । नित्ये तत्पूर्वोत्पन्नत्वरूपज्येष्ठत्वबुद्धेस्तदनन्तरोत्पन्नत्वरूपकनिष्ठत्वबुद्धेर्निमित्तकारणस्य कालसंयोगरूपासमवायिकारणस्य चाभावादिति भावः ॥ १२३ ॥ १२४ ॥

मूले-अपेक्षाबुद्धिनाशेनेति । स्वनिमित्तकारणविप्रकृष्टत्वादिबुद्धीनां नाशेनेत्यर्थः ।

नव्याः पुनर्बहुतरसंयोगान्तरितत्वरूपविप्रकृष्टत्वाल्पसंयोगान्तरितत्वरूपसन्निकृष्टत्वाभ्यां दैशिकपरत्वापरत्वादिव्यवहारस्य बहुतरस्पन्दान्तरितजन्यत्वरूपज्येष्ठत्वाल्पतरस्पन्दान्तरितजन्यत्वरूपकनिष्ठत्वाभ्यां च कालिकपरत्वादिव्यवहारस्योपपत्तेर्न तयोर्गुणान्तरत्वम् । अत्र च यत्काले ज्येष्ठत्वबुद्धिरुत्पद्यते तत्कालमादाय स्पन्दानां न्यूनाधिकताऽवसेया । अतो न कनिष्ठेऽधिकजीविनि परत्वव्यवहारापत्तिरिति वदन्ति ॥ इति परत्वापरत्वनिरूपणम् ॥

रामरुद्री ।

प्रतियोगिताकाभावस्यैव गगनादौ सिद्धतया न तत्र विजातीयसंयोगकल्पनसम्भव इति भावः । एवमग्रेऽपि बोध्यम् ॥ १२१ ॥ १२२ ॥ १२३ ॥ १२४ ॥

नव्याः पुनरिति । वदन्तीत्यत्रत्यलोद्भावनम् । तद्बीजं तु दिक्संयोगनिष्ठवैजात्यस्य क्वोऽप्यवृत्तितया केन लिङ्गेन सिद्धिः ? परत्वापरत्वप्रतीत्येति चेत् सिद्धे तर्हि परत्वापरत्वे इति ।

॥ इति परत्वापरत्वनिरूपणम् ॥

अप्रमा च प्रमा चेति ज्ञानं द्विविधमिष्यते ॥ १२६ ॥
तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता।

तत्र अप्रमां निरूपयति। तच्छून्य इति तदभाववति तत्प्रकारकं ज्ञानं भ्रम

दिनकरी।

तदभाववतीति। इदं च प्रमायामतिव्याप्तिवारणाय। तदभाववद्विशेष्यकतदभावप्र-

रामरुद्री।

मूले—प्रमेति। (१) तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्ववदनुभवत्वं प्रमात्वमित्यर्थः। नन्वत्र पृथिवीजलोभयं गन्धवदिति भ्रमेऽतिव्याप्तिः, तत्राऽपि गन्धवद्विशेष्यकत्वावच्छिन्नगन्धप्रकारकत्वस्य सत्त्वात्। न च व्यासज्यवृत्तिधर्मावच्छिन्नतद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्वं विवक्षितमिति वाच्यम्। तथासति पृथिवीजलोभयं द्रव्यमिति प्रमायामव्याप्त्यापत्तेः, तत्र विशेष्यताया व्यासज्यवृत्तिधर्मावच्छिन्नत्वात्। ननु विशेष्यतायां तदधिकरणतावच्छेदकधर्मावच्छिन्नत्वमेव विशेष्यते। पृथिवीजलोभयत्वस्य गन्धाधिकरणतानवच्छेदकत्वात् नातिव्याप्तिरिति। न च पृथिवीजलोभयत्वस्य गन्धाधिकरणसम्बद्धत्वात्तदधिकरणतावच्छेदकत्वं कुतो नास्तीति वाच्यम्। गन्धाधिकरणे तस्य समवायसम्बन्धेन सम्बन्धित्वेऽपि पर्याप्त्याख्यसम्बन्धेन असम्बद्धत्वात्, रङ्ग रजतत्ववदितिज्ञानीयविशेष्यतानिरूपितसमवायसम्बन्धावच्छिन्नावच्छेदकतावतो रङ्गत्वस्य रजतत्वाधिकरणतानिरूपितकालिकसम्बन्धावच्छिन्नावच्छेदकतावत्त्वादतिव्याप्तिवारणाय तदधिकरणतावच्छेदकताघटकसम्बन्धावच्छिन्नतदधिकरणतावच्छेदकतावद्धर्मनिष्ठावच्छेदकताकत्वस्य निवेशनीयतया विशेष्यतावच्छेदकतावच्छेदकीभूतपर्याप्तिसम्बन्धावच्छिन्नतदधिकरणतावच्छेदकतायाः उभयत्वे अभावात्। न चोभयत्वस्य प्रत्येकवृत्तितया उभयस्य गन्धाधिकरणत्वमस्त्येवेति तत्सम्बन्धावच्छिन्नाधिकरणत्वावच्छेदकत्वं कुतो नास्तीति वाच्यम्। पृथिवीजलोभयं गन्धवदित्यभानेन स्वव्यापकगन्धाधिकरणतानिरूपितस्वरूपसम्बन्धरूपावच्छेदकत्वस्य उभयत्वेऽनङ्गीकारादिति चेन्न। निरवच्छिन्नविशेष्यताक—घट इत्यादिप्रमायामव्याप्तेः। न च तदधिकरणतावच्छेदकावच्छिन्नत्वं तदधिकरणतावच्छेदकव्यापकत्वमिति वाच्यम्, तथा सति घटपटोभयं घट इति भ्रमेऽतिव्याप्तेर्दुर्वारत्वात्। घटपटोभयत्वावच्छिन्नविशेष्यतायां घटाधिकरणतावच्छेदकतदुभयवृत्तित्वव्यापकत्वात्। न च तदधिकरणतावच्छेदकसमनियतत्वनिवेशात् न दोषः, तादृशविशेष्यतायां घटत्वाधिकरणतावच्छेदकाव्याप्यत्वादिति वाच्यम्। घटो द्रव्यमिति प्रमायामव्याप्तेः, घटत्वावच्छिन्नविशेष्यतायां द्रव्यत्वाधिकरणतावच्छेदकाव्यापकत्वात्। न च तदधिकरणतावच्छेदकयत्किञ्चिद्धर्मसमनियतत्वं विवक्षितम्, घटत्वावच्छिन्नविशेष्यतायां द्रव्यत्वाधिकरणतावच्छेदकीभूतघटत्वरूपयत्किञ्चिद्धर्मसमनियतत्वात् नाव्याप्तिरिति वाच्यम्। तथापि घटपटोभयं घट इति भ्रमेऽतिव्याप्तेर्दुर्वारत्वात्। घटपटान्यतरस्मिन् घट इति प्रतीत्या घटपटान्यतरत्वस्य घटत्वाधिकरणत्वावच्छेदकतया तत्समनियतत्वस्य घटपटोभयत्वावच्छिन्नविशेष्यतायामव्याहतत्वात्। नापि तदधिकरणतानवच्छेदकानवच्छिन्नत्व विशेषणम्, अतो न कोऽपि दोष इत्यपि युक्तम्। निरवच्छिन्नरजतविशेष्यतानिरूपितरङ्गत्वप्रकारताशालिज्ञानस्य प्रमात्वापत्तेरिति चेन्न। तदधिकरणतानवच्छेदकानवच्छिन्नतद्वन्निष्ठविशेष्यतानिरूपितत्वनिष्ठप्रकारताशालित्वविवक्षणेन सर्वानुपपत्तिपरिहारम्भवात्। नन्वत्र तद्वत्त्वं तत्प्रतियोगिकसम्बन्धानुयोगित्वमवश्यं वक्तव्यम्। अन्यथा वृत्त्यनियामकसम्बन्धावगाहिप्रमायामव्याप्तेः। तथा च वायु रूपवानिति भ्रमेऽतिव्याप्तिरिति चेन्न। रूपनिरूपितत्वविशिष्टसमवायाधिकरणतायाः एव रूपसम्बन्धत्वेन महादेवेनाऽभ्युपगतत्वादिति। ॥ इति प्रमानिरूपणम् ॥

---

(१) प्रमात्वादिपरिष्कारस्याऽतिविस्तृतत्वेन दुर्बोधत्वेन बहुस्थले कृतप्रपञ्चतया चोक्तग्रन्थोपरि टीकाप्रणयनमनतिप्रयोजनकमिति मत्वा प्राचीना काऽपि टिप्पनी बुभुत्सूनामामोदाय समुद्दिश्य।

तत्प्रपञ्चो विपर्यासः संशयोऽपि प्रकीर्तितः ॥ १२७ ॥

इत्यर्थः । तत्प्रपञ्चः—अप्रमाप्रपञ्चः ॥ १२५ ॥ १२६ ॥ १२७ ॥

दिनकरी ।

कारकप्रमायामतिव्याप्तिवारणाय तत्प्रकारकमिति । इच्छायामतिव्याप्तिवारणाय

रामरुद्री ।

तद्भाववति तत्प्रकारकं ज्ञानं भ्रम इति मूलम् । तदभाववद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वं तन्मूलत्वमित्यर्थः । नन्वेवं रजते रजतत्वज्ञानस्यापि भ्रमत्वापत्तिः, वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्न-प्रतियोगिताकरजतत्वाभावस्य रजते सत्त्वात् । न च प्रकारतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकतदभावो विवक्षित इति न दोष इति वाच्यम् । तथा सति स्वरूपतो रजतत्वप्रकारकरङ्गविशेष्यकज्ञानस्य भ्रमत्वानुपपत्तेः, तत्र प्रकारतावच्छेदकधर्माप्रसिद्धेः । न च स्वीयप्रकारतानवच्छेदकधर्मानवच्छिन्नप्रतियोगिताकाभावो विवक्ष्यते, व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावश्च न तथेति वाच्यम् । तावताऽप्यव्याप्तेरनुद्धरत्वात्, स्वरूपतो रजतत्वप्रकारकभ्रमीयप्रकारतानवच्छेदकधर्मानवच्छिन्नप्रतियोगिताकरजतत्वाभावाप्रसिद्धेः । किञ्च स्वीयप्रकारतानवच्छेदकत्वं स्वीयप्रकारतानिरूपितविलक्षणावच्छेदकत्वाभावः, तथा च तत्राऽप्रसिद्धिः, तदीयप्रकारतानिरूपितविलक्षणावच्छेदकत्वाऽप्रसिद्धेः । न च वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकतदभाववत्त्वविवक्षणात् न कोऽपि दोष इति वाच्यम् । गुणकर्मान्यत्व-विशिष्टसत्तावान् गुण इत्यादिभ्रमेऽव्याप्तेः, वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नसत्तानिष्ठप्रतियोगिताकाभावस्य गुणेऽसत्त्वात् । न च प्रकारतावच्छेदकातिरिक्तवैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नप्रतियोगिताकाभावो विवक्षितः, उक्तस्थले च गुणकर्मान्यत्वविशिष्टसत्तात्वावच्छिन्नप्रतियोगिताकाभाव एव तादृश इति नाव्याप्तिरिति वाच्यम् । तथा सति स्वरूपतो रजतत्वप्रकारकभ्रमेऽव्याप्तेर्वज्रलेपायमानत्वात्, तत्र प्रकारतावच्छेदकाप्रसिद्धेः । यदि च प्रकारतावच्छेदकत्वं न प्रकारतानिरूपितप्रकारतारूपविलक्षणावच्छेदकतात्वेन निवेश्यते, किन्तु प्रकारांशे प्रकारतारूपावच्छेदकत्व—प्रकारतावच्छेदकसम्बन्धनिष्ठसांसर्गिकविषयत्वोभयसाधारण्यावच्छेदकतात्वेन प्रकारतानिरूपितविशेष्यताभिन्नविषयतात्वेन वा, निवेश्यते । तथा च स्वरूपतो रजतत्वप्रकारकज्ञानीयप्रकारतावच्छेदकत्वं समवाय एव प्रसिद्धमिति नाव्याप्तिरित्युच्यते, तथापि प्रमेयत्वेन रूपेण यावत्प्रमेयप्रकारकसंयोगसंसर्गकगुणविशेष्यकप्रमेयत्वान् गुण इत्याकारकभ्रमेऽव्याप्तिः, तत्र प्रमेयमात्रस्यैव तादृशप्रकारतावच्छेदकत्वेन तदतिरिक्ताप्रसिद्धेः । किञ्च संयोगेन दण्डप्रकारकप्रमायामतिव्याप्तिः, तद्दण्डावृत्तिसंयोगावच्छिन्नतद्दण्डनिष्ठप्रतियोगिताकाभावस्य तद्दण्डवति सत्त्वात् । न च स्वीयप्रकारतानिरूपितविशेष्यतानिरूपितविषयतानवच्छेदकधर्मानवच्छिन्नावच्छेदकतात्वनिष्ठप्रतियोगिताकाभावो निवेश्यते, प्रकृते च तादृशसांसर्गिकविषयतावच्छेदकं संयोगत्वं, न तत्प्रतियोगितावच्छेदकतावच्छेदकं, तदवृत्तित्वस्यैव तथात्वादिति नातिव्याप्तिः । प्रमेयत्वान् गुण इत्यत्राऽपि तादृशविषयतावच्छेदकप्रमेयत्वातिरिक्तत्वस्य प्रसिद्धत्वात् तदनवच्छिन्नप्रतियोगितावच्छेदकतातादृशाभावो गुणे वर्त्तते एवेति नाव्याप्तिरिति वाच्यम् । रजतमित्यादिज्ञाने स्वरूपत एव समवायस्य संसर्गतास्वीकारात् रङ्गविशेष्यकरजतत्वप्रकारकभ्रमेऽव्याप्तितादवस्थ्यात्, तत्र तादृशविषयतावच्छेदकाप्रसिद्धेः । अथ वृक्षः संयोगीति प्रमायामतिव्याप्तिवारणाय प्रतियोग्यनधिकरणतदभाधिकरणनिष्ठविशेष्यतेति निवेशनीयम् । तथा च वैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नाभावमादाय न दोषः । तदधिकरणीभूतस्य विशेष्यस्य प्रतियोग्यनधिकरणत्वाभावात्, तथा च सर्वत्र तेनैव लक्षणसमन्वय इति चेन्न । तथासति गुणकर्मान्यत्वविशिष्टसत्तावान् गुण इति भ्रमेऽव्याप्तिः, गुणस्य सत्तारूपप्रतियोग्यधिकरणत्वात् । न च प्रतियोगितावच्छेदकविशिष्टानधिकरणत्वं वक्तव्यमिति वाच्यम् । तथा सति रजतत्वप्रकारकप्रमायामतिव्याप्तेस्तदवस्थ्यात्, रजतस्य तादृशवैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नानधिकरण्यात् । अथ प्रकारताविशिष्टव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावो निवेश्यते । वैशिष्ट्या-

रामरुद्री।

देश्च रजतत्वव्यापकतानवच्छेदकत्वात् न दोषः। एतेन घ्राणग्राह्यगुणवानितिभ्रमप्रकारतावच्छेदकीभूत-घ्राणग्राह्यगुणत्वस्याभावप्रतियोगितानवच्छेदकत्वेऽपि न दोषः, तत्र गन्धत्वस्यैव तथात्वात्। तथा च स्वीयतन्निष्ठप्रकारतावच्छेदकसम्बन्धावच्छिन्नतादृशप्रकारत्वावच्छिन्नव्याप्यतानिरूपितव्यापकतावच्छेदक-रूपावच्छिन्नव्यापकतावटकसम्बन्धावच्छिन्नप्रतियोगिताकाभाववन्निष्ठविशेष्यतानिरूपितन्निष्ठप्रकारताशा-लित्वमिति निष्कर्षः। व्यधिकरणसम्बन्धावच्छिन्नप्रतियोगिताकाभावमादाय प्रमायामतिव्याप्तिवारणाय व्यापकतावटकसम्बन्धावच्छिन्नत्वं प्रतियोगितायां विशेषणम्। न च प्रकारतावच्छेदकसम्बन्धावच्छिन्न-त्वमेव निवेश्यतामिति वाच्यम्। तथा सति रजतत्वव्यापकतावच्छेदकरजतत्वप्रकारकप्रमाविशेष्यता-त्वावच्छिन्नसमवायसम्बन्धावच्छिन्नाभावमादायातिव्याप्तेरित्यन्यदेतत्। तथा च न कोऽपि दोष इति चेन्न। गगनवान् घट इति भ्रमेऽव्याप्तेः, गगनस्यावृत्तितया गगनाधिकरणत्वघटितगगनव्यापकत्वाप्रसिद्धेः, विशिष्टसत्तावान् गुण इति भ्रमेऽव्याप्तेश्च, तत्र विशिष्टसत्तात्वस्य निरुक्तव्यापकतावच्छेदकत्वासम्भ-वात्, तादृशप्रकारत्वावच्छिन्नस्य गुणेऽपि सत्त्वात्। ननु प्रकारताव्यापकधर्मावच्छिन्नाभावो निवेश्यते, तथा च गगनत्वावच्छिन्नाभाव एव उक्तस्थले लक्षणघटकः। न चैवं सत्तावान् गुण इति प्रमायामति-व्याप्तिः, विशिष्टसत्तात्वावच्छिन्नाभावस्य तादृशधर्मावच्छिन्नप्रतियोगिताकस्य गुणे सत्त्वादिति वाच्यम्। प्रकारताव्यापकधर्मावच्छिन्नाभावकूटत्वस्य विवक्षणीयत्वात्। गुणस्य च सत्तात्वावच्छिन्नाभावघटित-तादृशकूटानधिकरणत्वात्। न चैवं रङ्गविशेष्यकरजतत्वप्रकारकभ्रमेऽव्याप्तिः, रङ्गस्य रजतत्वनिष्ठप्रकार-ताव्यापकजातित्वावच्छिन्नाभावघटितकूटानधिकरणत्वादिति वाच्यम्। प्रकारतासमनियतधर्मावच्छिन्ना-भावकूटाधिकरणत्वस्य विवक्षणीयत्वात्, जातित्वस्य प्रकारताव्याप्यत्वाभावेनादोषादिति चेन्न। तथा सति गुणकर्मान्यत्वविशिष्टसत्तावान् गुण इति भ्रमेऽव्याप्तेः, गुणस्य सत्तात्वावच्छिन्नाभावघटितता-दृशकूटानधिकरणत्वात्।

अत्राहुः। तत्प्रकारताघटकधर्ममादाय भ्रमे लक्षणसमन्वयः। सत्ताप्रकारताघटकधर्मश्च सत्तात्वमे-वेति नातिव्याप्तिः। गुणकर्मान्यत्वविशिष्टसत्ताप्रकारताघटकधर्म एव च गुणकर्मान्यत्वविशिष्टसत्तात्व-मिति नातिव्याप्तिः। न च स्वाविषयकप्रतीत्यविषयगुणकर्मान्यत्वविशिष्टसत्ताप्रकारकत्वरूपं विशिष्टस-त्ताप्रकारकताघटकत्वं विशिष्टसत्तात्वस्य न सम्भवति, विशिष्टसत्तात्वावच्छिन्नप्रकारतामेव सत्ताप्रकारता-त्वेन प्रकारतात्वेन चावगाहमानायां प्रतीतौ विशिष्टसत्तात्वस्याऽविषयत्वादिति वाच्यम्। स्वनिरूपक-तावच्छेदकघटकधर्मावच्छिन्नप्रतियोगिताकाभाववन्निष्ठविशेष्यतानिवेशेनानुपपत्त्यभावात्। स्वं विशे-ष्यता। सत्ताप्रकारतात्वादिकञ्च नोक्तभ्रमीयविशेष्यतानिरूपकत्वस्यावच्छेदकम्, किन्तु गुणकर्मान्य-त्वविशिष्टसत्तात्वावच्छिन्नप्रकारतात्वमेवेति लक्षणसमन्वयात्। न च प्रकारतात्वस्यापि विशेष्यतानिरूप-कतावच्छेदकघटकत्वात् तदवच्छिन्नप्रतियोगिताकाभावमादाय प्रमायामतिव्याप्तिरिति वाच्यम्। तन्नि-ष्ठत्वस्यापि प्रतियोगितायां विशेषणत्वात्, उक्तप्रतियोगितायाः प्रकारतानिष्ठत्वेन अनुपपत्त्यभावादिति केचित्, तन्न, घ्राणग्राह्यगुणवज्जलमिति भ्रमेऽव्याप्तेः, तत्र जलत्वावच्छिन्नविशेष्यतानिरूपकतावच्छेद-कघटकघ्राणग्राह्यगुणत्वस्याभावप्रतियोगितानवच्छेदकत्वेन तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेः।

अन्ये तु स्वसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नप्रकारतान्या या स्वसमानाधिकर-णाभावप्रतियोगितानवच्छेदकव्यापिका प्रकारता तदन्यतन्निष्ठप्रकारतानिरूपितविशेष्यताकत्वं समुदितल-क्षणार्थः। स्वपदं विशेष्यतापरम्। स्वरूपतो रजतत्वप्रकारकभ्रमे रजतत्वप्रकारतायाः स्वसमानाधिकर-णाभावप्रतियोगितावच्छेदकावच्छिन्नान्यत्वेऽपि स्वसमानाधिकरणाभावीयप्रतियोगितानवच्छेदकरङ्ग-त्वस्वव्यापकत्वाभावेन तदन्यत्वान्नाव्याप्तिः। गुणकर्मान्यत्वविशिष्टसत्तावान् गुण इति भ्रमे प्रकारतायां गुणनिष्ठाभावप्रतियोगितानवच्छेदकसत्तात्वव्यापकत्वेऽपि स्वसमानाधिकरणाभावप्रतियोगितावच्छेद-कावच्छिन्नान्यत्वाभावेन तादृशान्यत्वसत्त्वान्नाऽव्याप्तिः। सत्तात्वेन स्वरूपतो वा सत्ताप्रकारकप्रमायां तु सत्ताप्रकारतायास्तादृशावच्छेदकावच्छिन्नान्यत्वात् तादृशावच्छेदकसत्तात्वादिव्यापकत्वाच्च तदन्यत्वा-भावान्नातिव्याप्तिः। गगनवान् घट इत्यत्र तु गगनत्वावच्छिन्नप्रकारतायाः निरुक्तावच्छेदकावच्छिन्न-

रामरुद्री ।

त्वात् निरुक्तानवच्छेदकव्यापकत्वाभावात् नाव्याप्तिः । घ्राणग्राह्यगुणवज्जलमिति भ्रमे घ्राणग्राह्यगुणत्वावच्छिन्नप्रकारतायाः निरुक्तप्रतियोगितावच्छेदकगन्धत्वावच्छिन्नान्यत्वेऽपि निरुक्तानवच्छेदकव्यापकत्वाभावात् तदन्यत्वसत्त्वात् लक्षणसमन्वयः । घ्राणग्राह्यगुणवती पृथिवीत्यत्र तादृशानवच्छेदकव्यापकत्वात् नातिव्याप्तिः । ननु प्रतियोगितावच्छेदकावच्छिन्नत्वं प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मपर्याप्तावच्छेदकतात्वम् । तथा च प्रमेयत्वविशिष्टगुणकर्मान्यत्वविशिष्टसत्तावान् गुण इति भ्रमेऽव्याप्तिः, तत्र प्रकारतावच्छेदकतापर्याप्त्यधिकरणीभूतप्रमेयत्वघटितगुरुधर्मस्याभावप्रतियोगितानवच्छेदकतया तदवच्छिन्नप्रकारतायाः निरुक्तावच्छिन्नान्यत्वात् स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्य सत्त्वस्य व्यापकत्वाच्च तदन्यत्वाभावादिति चेन्न । स्वसमानाधिकरणाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणनिष्ठावच्छेदकतानिवेशनेनैवोपपत्तौ तत्रापि पर्याप्तिनिवेशे प्रयोजनविरहादिति वदन्ति, तदपि चिन्त्यम्, यत्र स्वरूपतो रजतत्वप्रकारकरङ्गविशेष्यकभ्रमः तत्राव्याप्तेः, रजतत्वत्वस्यापि रङ्गनिष्ठाभावीयकालिकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वात् । न च प्रकारतावच्छेदकसम्बन्धावच्छिन्नत्वेन प्रतियोगितावैशिष्ट्यान्नायं दोष इति वाच्यम् । घटप्रकारकसंयोगसंसर्गकगुणविशेष्यकभ्रमेऽव्याप्तेः, सर्वस्यैव गुणनिष्ठाभावीयसंयोगसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वेन तदनवच्छेदकत्वस्याप्रसिद्धेः । अथ प्रकारतावच्छेदकसम्बन्धातिरिक्तप्रकारप्रतियोगिकसम्बन्धभिन्नयरिक्षित्सम्बन्धावच्छिन्नत्वेन प्रतियोगिता विशेषणीया । तथा च संयोगेन घटवान् गुण इत्यत्र स्वरूपसम्बन्धावच्छिन्नप्रतियोगितैव तादृशी, तदवच्छेदकञ्च घटत्वं, भ्रमवच्छेदकं गुणत्वप्रकारकप्रमाविशेष्यत्वत्वादिकमेवेति नाव्याप्तिरिति चेन्न । तथापि संयोगसम्बन्धेन प्रमेयप्रकारकगुणविशेष्यकभ्रमेऽव्याप्तेर्दुर्वारत्वात्, तत्र प्रकारतावच्छेदकीभूतसंयोगातिरिक्तसम्बन्धमात्रस्यैव प्रकारीभवत्प्रमेयप्रतियोगिकतया संयोगस्यैव तदतिरिक्तत्वेन तदवच्छिन्नप्रतियोगितावच्छेदकत्वाभावाप्रसिद्धेस्तदवस्थत्वात् । यदि च प्रकारतावच्छेदकसम्बन्धातिरिक्तो यः प्रकारतावच्छेदकसम्बन्धप्रतियोगिप्रकारप्रतियोगिकसम्बन्धस्तदतिरिक्तसम्बन्धावच्छिन्नत्वं प्रतियोगितावैशिष्ट्यम् । एवं च संयोगेन प्रमेयवान् गुण इत्यत्र संयोगातिरिक्तो यः संयोगप्रतियोगिघटपटादिरूपप्रमेयप्रतियोगिकसम्बन्धः समवायादिः, तदतिरिक्तः स्वरूपादिसम्बन्धः, तदवच्छिन्नप्रतियोगितावच्छेदकत्वाभावश्च गुणत्वप्रकारकप्रमाविशेष्यत्वादौ प्रसिद्धः । न च प्रमेयत्वस्यापि गुणनिष्ठाभावीयतादृशप्रतियोगितानवच्छेदकत्वात् तद्व्यापकत्वादव्याप्तिरिति वाच्यम् । स्वसमानाधिकरणाभावप्रतियोगितावच्छेदकप्रमेयत्वावच्छिन्नत्वेन तदन्यत्वविशिष्टतादृशान्यत्वसत्त्वाददोषादित्युच्यते, तदा विषयतया प्रमेयवान् घट इति भ्रमेऽव्याप्तिः, तत्र प्रमेयमात्रस्यैव विषयतारूपप्रकारतावच्छेदकसम्बन्धप्रतियोगितया विषयतायाः तदतिरिक्तस्वप्रतियोगिकसम्बन्धभिन्नसम्बन्धतया तत्सम्बन्धावच्छिन्नघटनिष्ठाभावीयप्रतियोगितानवच्छेदकाप्रसिद्धेः । एतेन स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकव्यापकत्वं स्वसमानाधिकरणाभावीयप्रकारतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकं यत्प्रकारतावच्छेदकसम्बन्धप्रतियोगिवृत्ति तदतिरिक्तधर्मव्यापकत्वम् । घटप्रकारकसंयोगसंसर्गकगुणविशेष्यकभ्रमे गुणनिष्ठाभावीयसंयोगसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकं यत्संयोगप्रतियोगिवृत्ति घटत्वादि तदतिरिक्तत्वं गुणत्वादौ प्रसिद्धम्, तद्व्यापकत्वाभावात् प्रकारताया न दोषः । गुणकर्मान्यत्ववविशिष्टसत्तावान् गुण इत्यत्र प्रकारतायास्तादृशसत्तात्वव्यापकत्वेऽपि तादृशप्रतियोगितावच्छेदकगुणकर्मान्यत्ववविशिष्टसत्तात्वावच्छिन्नत्वान्न दोषः । संयोगेन प्रमेयवान् गुण इत्यत्रापि गुणनिष्ठाभावीयसंयोगसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकं यत्संयोगसम्बन्धप्रतियोगिवृत्ति तदतिरिक्तत्वं गुणत्वादौ प्रसिद्धमिति न दोषः । न चैवमपि स्वरूपतो रजतत्वप्रकारकसंयोगसंसर्गकभ्रमेऽव्याप्तिः, तत्र रजतत्वनिष्ठप्रकारतायाः विशेष्यतासमानाधिकरणाभावीयसंयोगसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकानवच्छिन्नत्वात् तादृशसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकं यत्संयोगप्रतियोगिवृत्ति तदतिरिक्तरजतत्वत्वव्यापकत्वाच्च तदन्यत्वाभावादिति वाच्यम् । समवायातिरिक्तेन सम्बन्धेन जातेः स्वरूपतो भाने मानाभावेन स्वरूपतो रजतत्वप्रकारकसंयोगसंसर्गभ्रमस्यैवाऽसिद्धेरित्यपि निरस्तम् । विषयतया प्रमेयवान् घट इति भ्रमेऽव्याप्तेर्दुर्वारत्वात् ।

आद्यो देहेष्वात्मबुद्धिः शङ्खादौ पीततामतिः ।
भवेन्निश्चयरूपा या संशयोऽथ प्रदर्श्यते ॥ १२८ ॥
किंस्विन्नरो वा स्थाणुर्वेत्यादिबुद्धिस्तु संशयः ।
तदभावाप्रकारा धास्तत्प्रकारा तु निश्चयः ॥ १२९ ॥

आद्य इति । विपर्यास इत्यर्थः । शरीरादौ निश्चयरूपं यदात्मत्वप्रकारकं ज्ञानं गौरोऽहमित्याकारकम्, एवं शङ्खादौ पीतः शङ्ख इत्याकारकं यद् ज्ञानं निश्चयरूपं तद्भ्रम इति । किंस्विदिति वितर्के । ॥ इति भ्रमप्रमानिरूपणम् ॥

निश्चयस्य लक्षणमाह । तदभावेति । तदभावाप्रकारकं तत्प्रकारक ज्ञानं निश्चयः ॥ १२८ ॥ १२९ ॥ इति निश्चयनिरूपणम् ॥

दिनकरी ।

ज्ञानमिति ॥ १२५ ॥ १२६ ॥ १२७ ॥ इति भ्रमप्रमानिरूपणम् ॥

संशयेऽतिव्याप्तिवारणाय तदभावाप्रकारकमिति । अत्र च तद्विशेष्यकत्वावच्छिन्नतदभावप्रकारताशून्यतद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्ववज्ज्ञानत्वं यत्र तत्र तन्निश्चयत्वमवसेयं, न तु यथाश्रुतम् । महानसोऽयं वन्हिमान्न वा पर्वतो वन्हिमानित्यस्य पर्वते वन्हिनिश्चयत्वानापत्तेः । ज्ञानपदं चेच्छायामतिव्याप्तिवारणाय ॥ १२८ ॥ १२९ ॥ इति निश्चयनिरूपणम् ॥

रामरुद्री ।

तत्र वृत्तिमन्मात्रस्यैव घटनिष्ठाभावीयविषयतासम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वात्तत्सम्बन्धप्रतियोगिवृत्तित्वाच्च तदतिरिक्ताप्रसिद्धेः । न चाकाशादिरेव तादृशः प्रसिद्ध इति वाच्यम् । तथापि तद्व्यापकत्वस्य प्रकारतायामसिद्धत्वादिति । तस्माद्भ्रमत्वं कथंचिदपि निर्वक्तुमशक्यमिति चेत्—

अत्र ब्रूमः । स्वसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नभिन्ना स्वसमानाधिकरणाभावीययत्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकधर्मव्यापिका सती तत्तत्सम्बन्धावच्छिन्ना या या प्रकारता तदन्यतन्निष्ठप्रकारताशालित्वमिति निष्कर्षः । संयोगेन घटवान् गुण इत्यत्र गुणनिष्ठाभावीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वं प्रमेयत्वादौ प्रसिद्धम् । तद्व्यापकतत्तत्सम्बन्धावच्छिन्नप्रकारतामेदस्य तदीयप्रकारतायां सत्त्वाल्लक्षणसमन्वयः । गुणकर्मान्यत्ववैशिष्टसत्तावान् गुण इत्यत्र गुणकर्मान्यत्ववैशिष्टसत्तात्वावच्छिन्नप्रकारतायाः स्वसमानाधिकरणाभावीयसमवायसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकसत्तात्वव्यापकत्वात् समवायसम्बन्धावच्छिन्नत्वाच्चाव्याप्तिवारणाय स्वसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नान्यत्वं द्वितीयान्यत्वप्रतियोगिप्रकारताविशेषणम् । स्वरूपतो रजतत्वप्रकारकभ्रमेऽव्याप्तिवारणाय व्यापकान्तम् । रजतत्वत्वस्यापि रङ्गनिष्ठाभावीयकालिकसम्बन्धावच्छिन्नाप्रतियोगितानवच्छेदकत्वात्तद्दोषतादवस्थ्यमतस्तत्तत्सम्बन्धावच्छिन्नत्वं विशेषणम् । तथा च स्वसमानाधिकरणाभावीययत्सम्बन्धावच्छिन्नप्रतियोगितानिरूपितयत्सम्बन्धावच्छिन्नावच्छेदकतावान् यो धर्मस्तत्सम्बन्धावच्छिन्नतन्निष्ठावच्छेदकताकतत्सम्बन्धावच्छिन्नप्रकारतान्वा स्वसमानाधिकरणाभावीययत्सम्बन्धावच्छिन्नप्रतियोगितानिरूपितयत्सम्बन्धावच्छिन्नावच्छेदकताशून्यो यो धर्मः तत्सम्बन्धावच्छिन्नतन्निष्ठव्याप्यतानिरूपितस्वरूपसम्बन्धावच्छिन्नव्यापकताश्रयीभूततत्सम्बन्धावच्छिन्ना या या प्रकारता तदन्यतन्निष्ठप्रकारताशालित्वमिति निष्कर्षः। तेन रजतत्वत्वेन रजतत्वप्रकारकप्रमायां प्रकारतावच्छेदकीभूतरजतत्वत्वस्य रजतनिष्ठाभावीयसमवायसम्बन्धावच्छिन्नप्रतियोगितानिरूपितविषयितासम्बन्धावच्छिन्नावच्छेदकताश्रयत्वेऽपि नाऽतिव्याप्तिः, न वा रङ्गविशेष्यकरजतत्वप्रकारकभ्रमे वस्तुमात्रस्यैव रङ्गनिष्ठाभावप्रतियोगितानिरूपितविषयितासम्बन्धावच्छिन्नावच्छेदकताश्रयतया तदनवच्छेदकाप्रसिद्धयाऽव्याप्तिरिति सकलं समञ्जसम् ।

॥ इति भ्रमनिरूपणम् ॥

स संशयो मतिर्या स्यादेकत्राऽभावभावयोः ।

संशयं लक्षयति । स संशय इति । **एकधर्मिकविरुद्धभावाभावप्रकारकं ज्ञानं संशय इत्यर्थः ।**

दिनकरी ।

एकधर्मिकेति । ह्रदपर्वतौ वह्नितदभाववन्ताविति ज्ञानेऽतिव्याप्तिवारणायैकधर्मिकेति । एकधर्मितावच्छेदकविशिष्टविशेष्यकत्वावच्छिन्नेत्यर्थः । तेन पर्वतो वह्निमान् द्रव्यं वह्नयभाववदितिज्ञानव्युदासः । वृक्षः संयोगवान् तदभाववांश्चेतिसमुच्चयवारणाय विरुद्धेति । विरोधावगाहित्वं तदर्थः । घटोऽद्रव्यं पृथिवी चेतिज्ञानवारणाय भावाभावेति । इच्छाव्युदासार्थं विशेष्यभागः । वस्तुतस्तु एकधर्मावच्छिन्नविशेष्यकत्वनिवेशे विभिन्नरूपेणैकधर्मितावच्छेदककज्ञानस्य संशयत्वापत्तिः, एकधर्मावच्छिन्नविशेष्यतावच्छेदकताकत्वनिवेशे च निरवच्छिन्नविशेष्यतावच्छेदकताकसंशयासङ्ग्रहप्रसङ्गः, विभिन्नरूपेण धर्मितावच्छेदकतावच्छेदकावगाहिज्ञानस्य संशयत्वप्रसङ्गश्चेति स्वीयैककोटिप्रकारतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकीभूतापरकोटिप्रकारताशालिज्ञानत्वं संशयत्वमिति ध्येयम् ।

यत्त संशयत्वं जातिविशेष इति, तन्न, चातुष्टयत्वादिना सङ्करप्रसङ्गात् ।

रामरुद्री ।

समुच्चयेति । न च समुच्चयस्य निश्चयरूपत्वे तदुत्पत्तिरेव कथं स्यात्; तदभावनिश्चयतन्निश्चययोः कार्यसहभावेन तत्तदभावविशिष्टबुद्धिप्रतिबन्धकत्वादिति वाच्यम् । 'घटतदभावादेरप्यन्याप्यवृत्तित्वग्रहदशायामेव समुच्चयसम्भवात्, अन्याप्यवृत्तित्वग्रहाभावविशिष्टस्यैव तदभावादिनिश्चयस्य तद्विशिष्टबुद्ध्यादौ प्रतिबन्धकत्वात्, विशेष्यतावच्छेदकसामानाधिकरण्येन तत्तदभावविशिष्टबुद्धयोः परस्परविरोधितया सम्भवाच्चेति । **विरोधावगाहित्वमिति । विरोधश्च** तदधिकरणावृत्तित्वम् । तच्च कोटिद्वयांश एव परस्परमेककोट्यंश एव वा भासत इत्यन्यदेतत् । अत एव च संशये विरोधसूचक वापदं प्रयुज्यत इति भावः ।

टीकायाम्-**संशयत्वप्रसङ्गश्चेति ।** अत्र च कस्यापि दूषणस्य नावकाशः । यतः एकधर्मिकत्वं एकविशेष्यताकत्वम् । तथा च तत्प्रकारताकतदभावप्रकारताकैकविशेष्यकताकेत्यर्थकरणेन तत्रातिव्याप्तिवारणं युक्तम् । न च निर्वह्निः पर्वतो वह्निमान्नित्याकारकार्यज्ञानेऽतिव्याप्तिः । तत्र वह्नयभावप्रकारतानिरूपितविशेष्यतायाः वह्निप्रकारतानिरूपितविशेष्यतायाश्च एकत्वादिति वाच्यम् । एकधर्मिकेत्यस्य एकधर्मितावच्छेदकताकेत्यर्थः । तथाच तन्निष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकताकविशेष्यतानिरूपिततद्विरुद्धतदभावनिष्ठप्रकारताकत्वमिति निष्कर्षः । निरुक्तज्ञानीयवह्नयभावीयप्रकारतानिरूपितविशेष्यतावच्छेदकता शुद्धपर्वतत्वे पर्याप्ता, वह्निप्रकारतानिरूपितविशेष्यतावच्छेदकता तु वह्नयभावपर्वतत्वोभयपर्याप्तेति तयोर्भेदान्न दोषः । एवं च विभिन्नरूपेण एकधर्मिकज्ञाने विभिन्नरूपेण एकधर्मितावच्छेदककज्ञाने च नातिव्याप्तिः, तत्र विशेष्यतावच्छेदकतयोर्भेदात्, न वा निरवच्छिन्नविशेष्यतावच्छेदकताकसंशयासङ्ग्रहप्रसङ्ग इति । अत्र वदन्ति । विशेष्यतावच्छेदकावच्छेदेन अन्यतरकोट्यवगाहित्वविशेष्यतावच्छेदकसमानाधिकरण्येन उभयकोट्यवगाहिताभ्यां विरोधावगाहित्वानवगाहित्वाभ्यां च संशयसमुच्चययोर्वैलक्षण्योपपत्तौ संशये भावाभावप्रकारतानिरूपितविशेष्यतयोः तदवच्छेदकतयोश्च भेद एवेति स्वीकर्तुंनयेऽसम्भवापत्त्या तथा परिष्कारासम्भवात् ।

सङ्करप्रसङ्गादिति । ननु मानसत्वव्याप्यत्वमेवाऽस्तु संशयत्वस्य । न च विनिगमनाविरहाच्चातुष्टयत्वादिव्याप्यत्वमपि स्यादिति वाच्यम् । अन्धादेरपि संशयोदयेन चातुष्टयत्वादिव्याप्यत्वायोगात् । न च तथापि स्मृतित्वव्याप्यत्वमादाय विनिगमनाविरहस्तदवस्थ एवेति वाच्यम् । स्मृतेः पूर्वा-

साधारणादिधर्मस्य ज्ञानं संशयकारणम् ॥ १३० ॥

साधारणेति। **उभयसाधारणो यो धर्मस्तज्ज्ञानं संशयकारणम्। यथा उच्चैस्तरत्वं स्थाणुपुरुषसाधारणं ज्ञात्वाऽयं स्थाणुर्न वेति सन्दिग्धे। एवमसाधारणधर्मज्ञानं कारणम्। यथा शब्दत्वस्य नित्यानित्यव्यावृत्तत्वेन शब्दे गृहीतत्वाच्छब्दो नित्यो न वेति सन्दिग्धे। विप्रतिपत्तिस्तु शब्दो नित्यो न वेत्यादिशब्दात्मिका न संशयकारणं, शब्दव्याप्तिज्ञानादीनां निश्चयमात्रजनकत्वस्वभावात्, किं तु तत्र शब्देन कोटिद्वयज्ञानं जन्यते, संशयस्तु मानस एवेति। एवं ज्ञाने प्रामाण्यसंशयाद्विषयसंशय इति। एवं व्याप्यसंशयादपि व्यापक-**

दिनकरी।

सन्दिग्ध इति क्रियापदम्। सन्देहवान् भवतीत्यर्थः। एवमग्रेऽपि। 'समानानेकधर्मोपपत्तेर्विप्रतिपत्तेः—' इत्यादिसूत्रे विप्रतिपत्तिवाक्यजन्यशाब्दसंशयस्योक्तत्वात् साधारणधर्मासाधारणधर्मज्ञानजन्यसंशयवद्विप्रतिपत्तिवाक्यजन्यस्तृतीयोऽपि सशय इति मतनिरासायाऽऽह—**विप्रतिपत्तिस्त्विति। व्याप्तिज्ञानादीनामिति।** आदिनाऽतिदेशवाक्यार्थज्ञानपरिग्रहः। ननु तर्हि सूत्रस्थपञ्चम्यनुपपत्तिरित्यत आह। **किं त्विति।** तथा च सूत्रस्थपञ्चमी प्रयोजकतायामिति भावः। **एवं ज्ञाने प्रामाण्यसंशयाद्विषयसंशय इतीति।** अत्र प्रामाण्यपदमप्रामाण्यस्याऽप्युपलक्षकं, तेन प्रामाण्यसंशयस्याप्रामाण्यसंशयस्य च विषयसन्देहे स्वातन्त्र्येण हेतुत्वमिति भावः। **एवं व्याप्येति।** अथ व्याप्यसंशयस्य व्यापकसंशयहेतुत्वे किं मानं, कोटिस्मरणादित एव तत्सम्भवात्, क्वचित्तदनुविधानस्य तु व्याप्यतदभावयोर्व्याप्यतदभावसाहचर्यस्य गृहीतत्वेन तत्स्मरण एवोपक्षीणत्वात्, तदग्रहे तु व्याप्यसंशयाद्व्यापकसंशयस्याप्यभावादिति चेत्, अत्राहुः। महानसे हुताशनो न जलह्रद इति स्मरतां पर्वतादिकमपि पश्यतां धूमादिसंशयभावाभावाभ्यां हुताशनसंशयभावाभावदर्शनात्तस्यापि तद्धेतुत्वम्। अत एवोत्कटकोटिकव्याप्यसंशयाद् व्यापकस्याप्युत्कटकोटिकः संशयः, कारणोत्कर्षेणैव कार्य्योत्कर्षात्। **न चैतद्भगवत्सूत्रकृदनभिमतमिति वाच्यम्।** सूत्रस्थ'च'कारस्याप्यनुक्तसमुच्चायकत्वात्। तथाहि "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः—" इति सूत्रम्, तस्य चाऽर्थमाहुर्भाष्यकृत्प्रमुखाः, -समानधर्मः-कोटिद्वयसहचरितधर्मः, अनेकस्मात्सपक्षविपक्षाद्व्यावृत्तो धर्मः अनेकधर्मः, तयोरुपपत्तिः-ज्ञानं तस्मात्, विप्रतिपत्तिः=विरुद्धकोटिप्रतिपादकं वाक्यं तस्मात्। **अत्र पञ्चम्याः प्रयोजकत्वमर्थो न हेतुत्वम्। उपलब्धिः-प्रामाण्यम्, अनुपलब्धिः-प्रामाण्यविरोधि भ्रमत्वं, तयोरव्यवस्थातश्च संशयः। एवं च प्रामाण्यसंशयजन्यो भ्रमत्वसंशयजन्यश्च**

रामरुद्री।

नुभवादिसापेक्षत्वेन तस्य निश्चयात्मकत्वे स्मृतेरपि सन्देहात्मकत्वापत्तेरिति चेन्न, संशयत्वस्य जातित्वे एकस्यैव ज्ञानस्य धर्म्यंशेऽपि संशयत्वापत्तेरिति ध्येयम्।

इतिमतनिरासायेति। यद्यपि मूले विप्रतिपत्तिवाक्यजन्यशाब्दसंशयस्यैव निराकृतत्वेन संशयस्य त्रिविधत्वं न निराकर्तुं शक्यते। कोटिद्वयोपस्थापनद्वारा विप्रतिपत्तिप्रयोज्यस्य सशयस्य एवमप्यनिराकरणात्। तथापि संशये विप्रतिपत्तिवाक्यजन्यत्वमिव कोट्युपस्थापनद्वारा तत्प्रयोज्यत्वमपि निराचिकीर्षितम्। साधारणधर्मदर्शनादिजन्यकोट्युपस्थितेरेव तत्र हेतुत्वादित्याशयः। **अथ विप्रतिपत्तिवाक्यतः कुतः संशयो न भवति ? न च संशयत्वस्य प्रत्यक्षत्वेनाप्यतया शाब्दसामग्रीकाले**

दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ।

संशय इत्यादिकं बोध्यम् । किं तु संशये धर्मिज्ञानं धर्मीन्द्रियसन्निकर्षो वा कारणमिति ॥ १३० ॥॥ इति संशयनिरूपणम् ॥

दोष इति । **अप्रमां प्रति दोषः कारणं, प्रमां प्रति गुणः कारणम् । तत्राऽपि पित्तादिरूपा दोषा अननुगताः, तेषां कारणत्वमन्वयव्यतिरेकाभ्यां सिद्धम् । गुणस्य प्रमाजनकत्वं स्वनुमानात् सिद्धम् । यथा प्रमा ज्ञानसामान्यकारणभिन्नकारणजन्या, जन्यज्ञानत्वात्, अप्रमावत् । न च दोषाभाव एव कारणमस्त्विति**

दिनकरी ।

विषयसंशयः । 'च'कारो व्याप्यसन्देहादिजन्यव्यापकसन्देहादेः सङ्ग्राहकः । विशेषापेक्षो विमर्श इति तु लक्षणम् । एकधर्मिकभावाभावप्रकारकत्वरूपविशेषवान् विमर्शो ज्ञानमिति तदर्थः । **इत्यादिकमिति** । आदिना साधनाव्यापकव्याप्यत्वसन्देहादितः साध्यव्यापकत्वसन्देहो बोध्यः । साधारणज्ञानादेः कार्यतावच्छेदके चाव्यहितोत्तरत्वं देयम् । तेन परस्परं न व्यभिचारः । ननु साधारणधर्मज्ञानादेरिव धर्मिज्ञानस्यापि संशयहेतुत्वात्तत्कृतः संशयविभागः कथं न प्रदर्शित इत्यत आह । **संशये धर्मिज्ञानमिति** । संशये-संशयमात्रे । तथा च धर्मिज्ञानजन्यतावच्छेदकस्य संशयत्वसमव्याप्यत्वान्न तद्विभाजकतावच्छेदकमिति भावः । ननु धर्मिज्ञानस्य संशयहेतुत्वे मानाभावः । न च धर्मिज्ञानमन्तरेण संशयः स्यादिति वाच्यम् । सति धर्मीन्द्रियसन्निकर्षे इष्टत्वादत आह । **धर्मीन्द्रियेति** ॥ १३० ॥

॥ इति संशयनिश्चयनिरूपणम् ॥

पित्तादीति । आदिना मण्डूकवसाञ्जनादेः परिग्रहः । अनुमानसिद्धत्वमेव प्रदर्शयति । **यथेति** । भगवज्ज्ञाने व्यभिचारवारणाय हेतौ **जन्येति** । अर्थान्तरं निराकुरुते । **न चेति** ।

रामरुद्री ।

प्रत्यक्षसामग्रीविरहेण न तत्सम्भव इति वाच्यम् । तादृशस्थले शाब्दबोधानुत्पादेन शाब्दसामग्र्याः कल्पयितुमशक्यत्वादिति चेन्न, तादृशस्थले मानससामग्र्या एव सत्त्वेन शाब्दसामग्र्या अभावादेव शाब्दानुत्पादनिर्वाहात् । अन्ततस्तादृशप्रत्यक्षसामग्र्या एव समानविषयकप्रत्यक्षसामग्रीविधया शाब्दबोधप्रतिबन्धिकायाः शाब्दसामग्रीविघटनसम्भवादिति ध्येयम् ।

मूले-**धर्मिज्ञानमिति** । अन्यथा तुरगादिकमारुह्य वेगेन गच्छतोऽनन्तधर्मीन्द्रियसन्निकर्षेऽपि यस्यैव धर्मिणो ज्ञान तस्यैव सशयो विपर्ययो वा यस्य तु न ज्ञान न तत्रेति नियमो न स्यादिति भावः । **संशय** इति प्रकृताभिप्रायम् । आरोपमात्र एव तद्धेतुत्वमिति सिद्धान्तात् । कार्यकारणभावस्तु तद्धर्मितावच्छेदककतद्धर्मिकसंयोगसंसर्गकतद्धर्म्यसयुक्तधर्मप्रकारकज्ञानत्वावच्छिन्नं प्रति तद्धर्मितावच्छेदकप्रकारकतद्धर्मिज्ञानत्वेनेति । न चैवं वृक्षः संयोगी न वेत्यादौ यत्र कोटिद्वयांशे नारोपः, किन्तु विरोधांश एव, तत्र संशये वृक्षादिरूपधर्मिविषयो हेतुर्वं न स्यादिति वाच्यम् । तत्राऽभावरूपधर्मिज्ञानस्य हेतुत्वेन वृक्षादिरूपधर्मिज्ञानस्याऽहेतुत्वे इष्टापत्तेरिति ध्येयम् । ननु तत्र येषां धर्मिणां न ज्ञानं तेषामिन्द्रियसन्निकृष्टत्वेऽपि मानाभावः, किं च तद्धर्म्यन्तरेन्द्रियसन्निकर्षे सति तत्तद्धर्मिणां ज्ञानमेव कुतो न जायते ? दोषविशेष एव तद्धर्मिज्ञानप्रतिबन्धक इति चेत्तर्हि तत्तद्धर्मिज्ञानरूपतत्तद्धर्मिकसंशयं प्रत्यपि स एव प्रतिबन्धक इति किं धर्मिज्ञानस्य पृथग्धेतुत्वेनेत्यरुचेराह—**धर्मीन्द्रियसन्निकर्षो वेति** । टीकायां—**संशयत्वसमव्याप्यत्वादिति** । एतच्चापाततः, उक्तरीत्या संशयत्वासमनियतस्यैव धर्मिज्ञानकार्यतावच्छेदकत्वात् । किन्तु संशयत्वव्यापकत्वान्न संशयविभाजकमित्यवधेयम् ॥ इति संशयनिरूपणम् ॥

पित्तदूरत्वादिरूपो दोषो नानाविधो मतः ॥ १३१ ॥
प्रत्यक्षे तु विशेष्येण विशेषणवता समम्।

वाच्यम्। पीतः शङ्ख इतिज्ञानस्थलेऽपि पित्तरूपदोषसत्त्वाच्छङ्खत्वप्रमानुत्पत्तिप्रसङ्गात्, विनिगमनाविरहादनन्तदोषाभावकारणत्वमपेक्ष्य गुणस्य कारणतायाऽन्याय्यत्वात्। न च गुणसत्त्वेऽपि पित्तेन प्रतिबन्धाच्छङ्खे न श्वैत्यज्ञानं, अतः पित्तादिदोषाभावानां कारणत्वमवश्यं वाच्यम्, तथा च किं गुणस्य हेतुत्वकल्पनेनेति वाच्यम्। तथाऽप्यन्वयव्यतिरेकाभ्यां गुणस्याऽपि हेतुत्वसिद्धेः। एवं भ्रमं प्रति गुणाभावः कारणमित्यस्यापि सुवचत्वम्।

तत्र दोषाः क इत्याकाङ्क्षायामाह। पित्तेति। क्वचित् पीतादिभ्रमे पित्तं दोषः, क्वचिच्चन्द्रादेः स्वल्पपरिमाणभ्रमे दूरत्वं दोषः, क्वचिच्च वंशोरगभ्रमे मण्डूकवसाञ्जनमित्येवंरूपा दोषा अननुगता एव भ्रान्तिजनका इत्यर्थः ॥१३१॥

अथ के गुणा इत्याकाङ्क्षायां प्रत्यक्षादौ क्रमेण गुणान् दर्शयति। प्रत्यक्षे त्विति। **प्रत्यक्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः।**

दिनकरी।

ननु पित्तात्मकदोषाभावः श्वैत्यप्रमायामेव कारणं, न शङ्खत्वप्रमायामत आह। **विनिगमनाविरहादिति**। प्रमायां दोषाभावः कारणं गुणो वा कारणमित्यत्र विनिगमनाविरहादिति भावः। वस्तुतो गुणहेतुतायामेव लाघवं विनिगमकमस्तीत्याह। **अनन्तेति। न्याय्यत्वादिति।** अनुगतगुणत्वस्याऽग्रे वक्ष्यमाणत्वान्न तद्धेतुत्वमतेऽयं दोष इति भावः। **तथा च**—दोषाभावानां हेतुत्वस्याऽऽवश्यकत्वे च। **गुणस्याऽपीति**। तथा च पित्तादिदोषाभावसत्त्वेऽपि विशेषणवद्विशेष्यसन्निकर्षरूपगुणाभावान्न शङ्खे पीतत्वप्रमेति दोषाभावेन न गुणस्यान्यथासिद्धिरिति भावः। **एवं**—एवं सति। अन्वयव्यतिरेकसत्त्वेऽपि **यद्यन्यथासिद्धत्वं** तदेत्यर्थः। **गुणाभावः**—गुणाभाव एव, न तु दोषः कारणं स्यादिति भावः ॥ १३१ ॥

रामरुद्री।

इदानीं प्रमाया भ्रमस्य चोत्पत्तिं निरूपयितुमुपक्रमते कारिकायाम्-**दोष इत्यादिना**। प्रमाया गुणजन्यत्वसाधकमाचार्यानुमानमाह मूले—**प्रमेत्यादि**। एतच्चाऽऽपाततः। तथाहि-अत्र ज्ञानहेत्वतिरिक्तत्वं सामान्याभावो वा विशेषाभावो यावत्त्वावच्छिन्नाभावो वा विवक्षितः। आद्ये प्रमाया अप्रमाया अपि ज्ञानत्वेन तद्धेतुजन्यतया बाधः, दृष्टान्तासिद्धिश्च, द्वितीयतृतीययोश्च तत्तदिन्द्रियादिव्यक्तीनां तादृशव्यक्त्यन्तरभिन्नत्वात्तादृशयावद्भिन्नत्वाच्च सिद्धसाधनमित्यतो **ज्ञानसामान्येत्युक्तम्**। तथा च ज्ञानत्वावच्छिन्नकार्यतान्यकार्यतानिरूपितकारणताश्रयत्वं पर्यवसितमिति नोक्तदोष इति ध्येयम्। **शङ्खत्वप्रमानुत्पत्तिप्रसङ्गादिति**। ननु यो दोषो यादृशप्रमायां प्रतिबन्धकस्तदभाव एव तद्धेतुः, अन्वयव्यतिरेकात्, अन्यथा भवन्मतेऽपि सति सन्निकर्षे श्वैत्यप्रमानुत्पत्तिप्रयोजकस्य दुर्वचत्वापत्तेरित्यत आह। **विनिगमनाविरहादिति**। तथा च तत्तद्दोषाभावानामिव तत्तत्सन्निकर्षादीनामपि तद्धेतुत्वं वाच्यमित्याशयः, अन्यथा दोषाभावे सन्निकर्षासत्त्वेऽपि तत्प्रत्यक्षापत्तेरिति ध्येयम्। तदेवाऽऽह। **तथाऽप्यन्वयव्यतिरेकाभ्यामिति**। तथा च दोषाभावस्य गुणस्योभयस्याऽपि हेतुत्वं विनिगमनाविरहात्सिद्धमिति भावः। एतेन तद्धर्मिनिष्ठविशेष्यतासम्बन्धेन तत्प्रकारकज्ञानं प्रति तद्धर्मिनिष्ठविशेष्यतासम्बन्धेन नित्यज्ञानस्य ज्ञानसामान्यस्य वा **हेतुत्वेनैवोपपत्तौ विशेषणवद्विशेष्यसन्निकर्षादीनां** प्रायक्षिकप्रमादौ कारणत्वकल्पनमयुक्तमिति निरस्तम्। तस्येवाऽस्याऽपि विनिगमनाविरहादेव कारणत्वावश्यकत्वादिति ध्येयम्।

विशेषणवद्विशेष्यसन्निकर्षं इति। तद्धर्मिनिष्ठविशेष्यतासम्बन्धेन तद्धर्मप्रकारकप्रत्यक्ष प्रति

सन्निकर्षो गुणस्तु स्यात्, अथ त्वनुमितौ पुनः ॥ १३२ ॥
पक्षे साध्यविशिष्टे तु परामर्शो गुणो भवेत् ।
शक्ये सादृश्यबुद्धिस्तु भवेदुपमितौ गुणः ॥ १३३ ॥
शाब्दबोधे योग्यतायास्तात्पर्यस्याऽथ वा प्रमा ।
गुणः स्यात् , भ्रमभिन्नं तु ज्ञानमत्रोच्यते प्रमा ॥ १३४ ॥
अथ वा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम् ।
तत्प्रमा, न प्रमा नाऽपि भ्रमः स्यान्निर्विकल्पकम् ॥ १३५ ॥

अनुमितौ साध्यवति साध्यव्याप्यवैशिष्ट्यज्ञानं गुणः । एवमग्रेऽपि ज्ञेयम्।

॥ इति प्रामाण्यवाद उत्पत्तिवादः ॥

प्रमां निरूपयति । भ्रमभिन्नमिति ।

ननु यत्र शुक्तिरजतयोरिमे रजते इति ज्ञानं जातं, तत्र रजतांशेऽपि प्रमा न स्यात् । तज्ज्ञानस्य भ्रमभिन्नत्वाभावादत आह । अथ वेति । तद्वद्विशेष्यकत्वे सति तत्प्रकारकं ज्ञानं प्रमेत्यर्थः । अथैवं स्मृतेरपि प्रमात्वं स्यात् । ततः किमिति चेत्, तथा सति तत्करणस्याऽपि प्रमाणान्तरत्वं स्यादिति चेन्न । यथार्थानुभवकरणस्यैव प्रमाणत्वेन विवक्षितत्वात् ।

इदं तु बोध्यम् । येन सम्बन्धेन यद्वत्ता तेन सम्बन्धेन तद्वद्विशेष्यकत्वं तेन सम्बन्धेन तत्प्रकारकत्वं च वाच्यं, तेन कपालादौ संयोगादिना घटादिज्ञाने नाऽतिव्याप्तिः ।

एवं सति निर्विकल्पकं प्रमा न स्यात्, तस्य सप्रकारकत्वाभावादत आह । न प्रमेति । ननु वृत्ते कपिसंयोगज्ञानं भ्रमः प्रमा च स्यादिति चेन्न । प्रतियोगिव्यधिकरणकपिसंयोगाभाववति संयोगज्ञानस्य भ्रमत्वात् । न च वृत्ते कपिसंयोगाभावावच्छेदेन संयोगज्ञानं भ्रमो न स्यात्, तत्र संयोगाभावस्य प्रतियोगिसमानाधिकरणत्वादिति वाच्यम् । तत्र संयोगाभावावच्छेदेन संयोगज्ञानस्य भ्रमत्वात् । लक्ष्यस्याऽननुगमाल्लक्षणस्याऽननुगमेऽपि नक्षतिः ।

॥ इति प्रमालक्षणम् ॥

दिनकरी ।

एवमग्रेऽपि ज्ञेयमिति । उपमितौ शक्ये सादृश्यज्ञानम्, शाब्दबोधे योग्यतायाः तात्पर्यस्य वा प्रमैव गुण इति भावः । ॥ इति प्रामाण्यवाद उत्पत्तिवादः ॥

नन्वेवं रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञानेऽतिव्याप्तिरत आह **तद्वद्विशेष्यकत्वे सतीति** । तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारत्ववज्ज्ञानमित्यर्थः । सतिसप्तम्या अवच्छिन्नत्वार्थकत्वात् । तत्प्रकारकभ्रमेऽतिव्याप्तेस्तद्वद्विशेष्यकेति । रजत एव द्रव्यमिति ज्ञाने रजतत्वप्रमात्वापत्तेरतस्तत्प्रकारकेति । ज्ञानपदं च तथाविधेच्छायामतिव्याप्तिवारणाय ।

एवं सति तत्प्रकारकत्वस्य प्रमात्वघटकत्वे सति । **भ्रमः प्रमा च स्यादिति** । लक्षणद्वयस्य तत्र सत्त्वादिति भावः । नन्वेवं लक्षणाननुगम इत्यत आह । **लक्ष्यस्येति** । **अथ**

रामरुद्री ।

तत्तद्धर्मवत्सन्निकर्षो हेतुरित्याशयः । न चैवं शुक्तौ रजतमिति भ्रमकाले शुक्ताविन्द्रियसन्निकर्षसत्त्वाच्चु

प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत्।
प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तितः॥ १३६॥

प्रमात्वमिति। **मीमांसका हि प्रमात्वं स्वतोग्राह्यमिति वदन्ति। तत्र गुरूणां मते ज्ञानस्य स्वप्रकाशत्वात्तज्ज्ञानप्रामाण्यं तेनैव गृह्यते। भट्टानां मते ज्ञानमतीन्द्रियं, ज्ञानजन्यज्ञातता प्रत्यक्षा, तया च ज्ञानमनुमीयते। मुरारिमिश्राणां मतेऽनुव्यवसायेन ज्ञानं गृह्यते। सर्वेषामपि मते तज्ज्ञानविषयकज्ञानेन तज्ज्ञानप्रामाण्यं गृह्यते, विषयनिरूप्यं हि ज्ञानमतो ज्ञानवित्तिवेद्यो विषयः, तन्मतं दूषयति।** न स्वतो ग्राह्यमिति। संशयेति। **यदि ज्ञानस्य प्रामाण्यं स्वतो ग्राह्यं**

दिनकरी।

पाकरक्ते घटे श्यामरूपवत्ताप्रतीतेः प्रमात्व स्यादिति चेदिष्टमेव तत्, घटस्य कदाचिच्छ्यामत्वात् वर्तमानत्वस्य प्रमात्वाघटकत्वात्। अत्र यद्यपि स्मृत्यन्यज्ञानत्वरूपाऽनुभवत्वस्य निवेशे वैयर्थ्यात् ज्ञानत्वघटितमेव प्रमात्वं, तथापि तस्य स्मृतिसाधारणतया तत्करणस्य प्रमाणान्तरतापत्त्या शास्त्रे प्रमाणव्यवहारौपयिकरूपमनुभवत्वघटितमेवानुमन्यन्ते तान्त्रिकाः। वस्तुतस्तु विशिष्टवैशिष्ट्यानुभवे विशेषणतावच्छेदकप्रकारकनिर्णयस्य कारणतया तज्जन्यतावच्छेदककोटिप्रविष्टतयाऽनुभवत्वस्य जातिविशेषत्वे सिद्धे ज्ञानत्वस्यानुभवत्वाघटकत्वाज्ञानुभवत्वस्य वैयर्थ्यमिति कृत पल्लवितेन। ॥ इति प्रमालक्षणम् ॥

प्रामाण्यं न स्वतोग्राह्यमिति मूलेन स्वतोग्राह्यत्वं निषिध्यते, तत्र स्वतस्त्ववादिनः के इत्याकाङ्क्षायामाह। **मीमांसका हीति। स्वप्रकाशत्वादिति।** स्वविषयकत्वादित्यर्थः। **तेनैव गृह्यत इति।** ज्ञाने गृह्यमाणे तन्निष्ठज्ञानत्वादिधर्मवत्तन्निष्ठप्रामाण्यस्यापि ग्रहे बाधकाभावात्तन्मते सर्वं ज्ञानमयं घटो घटमह जानामीत्याद्याकारकमिति भावः। **तया चेति।** अयमत्रानुमानप्रकारः-इय ज्ञातता घटविशेष्यकघटत्वप्रकारकज्ञानजन्या, घटवृत्तिघटत्वप्रकारकज्ञाततात्वात्, या यद्वृत्तिर्यत्प्रकारिका ज्ञातता सा तद्विशेष्यकतत्प्रकारकज्ञानसाध्या, यथा पटे पटत्वप्रकारिका ज्ञाततेति। **अनुव्यवसायेनेति।** ननु ज्ञानज्ञानस्य विषयाविषयकत्वात् कथं विषयघटितप्रामाण्यं तस्य विषय इत्यतो ज्ञानज्ञानस्य विषयविषयकत्वे प्रमाणमाह। **विषयनिरूप्यमिति।** विषयाविषयकप्रत्यक्षाविषय इत्यर्थः। **ज्ञानवित्तिवेद्यो विषय इति।** विषयविषयकतानियतस्वविषयताकप्रत्यक्षकं ज्ञानमित्यर्थः। अतो न साध्यहेत्वोर्वैयधिकरण्यम्। तथा च ज्ञानं विषयविषयकतानियतस्वविषयकताकप्रत्यक्षकं, विषयविषयकप्रत्यक्षाविषयत्वे सति प्रत्यक्षविषयत्वादित्यनुमान ज्ञानप्रत्यक्षस्य विषयविषयकत्वे प्रमाणमिति भावः। भट्टमते च प्रत्यक्षस्थानाभिषिक्ता ज्ञाततालिङ्गकानुमितिरेव बोध्येत्यन्यत्र

रामरुद्री।

क्तित्वेन तत्प्रत्यक्षापत्तिरिति वाच्यम्। दोषविशेषस्य प्रतिबन्धकत्वात्तदनुपपत्तेः॥ इति प्रमालक्षणम्॥

स्वतोग्राह्यमित्यस्य तज्ज्ञानविषयकतदप्रामाण्याविषयकज्ञानसमुदायग्राह्यमित्यर्थोऽग्रे वक्तव्यः। तत्र गुरूणां मते प्रामाण्याश्रयज्ञानविषयकत्वस्य व्यवसाये भट्टनये ज्ञाततालिङ्गकानुमितौ मिश्राणां च तदनुव्यवसायेऽनुमततया यथाक्रमं स्वविषयकव्यवसायं ज्ञानानुमितिं स्वविषयकानुव्यवसायं च तादृशज्ञानग्राहकयावद्ग्रहान्तर्गतमादाय प्रामाण्ये तद्विषयत्वबाधाद्बाध इति भ्रम निराकर्तुं तत्तन्मते उपदर्शितत्तद्ग्रहाणामेव प्रामाण्यविषयकत्व व्यवस्थापयितुं तन्मतमाह मूले—**तत्रेति।** टीकायाम्-**अन्नाऽभ्यनुमानप्रकार इति।** अत्रेदमवधेयम्। आदावयं घट इति प्रत्यक्षम्, अथ ज्ञाततोत्पत्तिः, घटवि-

स्यात्, तदाऽनभ्यासदशापन्नज्ञाने प्रामाण्यसंशयो न स्यात्, तत्र हि यदि ज्ञानं ज्ञातं, तदा स्वन्मते प्रामाण्यं ज्ञातमेवेति कथं संशयः? यदि तु ज्ञानं न ज्ञातं, तर्हि धर्मिज्ञानाभावात् कथं संशयः? तस्मात् ज्ञाने प्रामाण्यमनुमेयं, तथा हि इदं ज्ञानं प्रमा, संवादिप्रवृत्तिजनकत्वात्, यन्नैवं तन्नैवं, यथाऽप्रमा। इदं पृथिवीत्वप्रकारकं ज्ञानं प्रमा, गन्धवति पृथिवीत्वप्रकारकज्ञानत्वात्, एवमिदं जलत्वप्रकारकं ज्ञानं प्रमा, स्नेहवति जलत्वप्रकारकज्ञानत्वात्। न च हेतुज्ञानं कथं जातमिति वाच्यम्। पृथिवीत्वप्रकारकत्वस्य स्वतोग्राह्यत्वात्, तत्र गन्धग्रहेण गन्धवद्विशेष्यकत्वस्याऽपि सुग्रहत्वात्, तत्प्रकारकत्वावच्छिन्नतद्विशेष्यकत्वं परं न गृह्यते, संशयानुरोधात्॥ इति प्रामाण्यवादे शशिवादः॥

दिनकरी।

विस्तरः। **अनभ्यासदशापन्नेति।** अनवधृतप्रामाण्यसजातीयेत्यर्थः। ज्ञातमेव-निश्चितमेव। गन्धवतीति व्याप्यवति व्यापकप्रकारकत्वस्य व्यापकवति व्यापकप्रकारकत्वव्याप्यत्वादिति भावः। ननु कथं तर्हि प्रामाण्यस्यानुमेयता, गन्धवति पृथिवीत्वप्रकारकत्वस्येव पृथिवीत्ववति पृथिवीत्वप्रकारकत्वादेरपि प्रत्यक्षसम्भवादत आह। **तत्प्रकारकत्वेति। संशयानुरोधादिति।** यद्यपि ज्ञाने प्रामाण्यनिश्चयो धर्मितावच्छेदकसामानाधिकरण्येन प्रामाण्याभावावगाही धर्मितावच्छेदकावच्छेदेन प्रामाण्यावगाहीति कथं संशयानुपपत्तिः? तथापि प्रवृत्त्युपयुक्तस्य धर्मितावच्छेदकावच्छेदेन प्रामाण्यग्रहस्य स्वतस्त्वे संशयानुपपत्तिर्दूषणमिति ध्येयम्। न च प्रामाण्यग्राहकसामग्रीसत्त्वात् कथमग्रिमसंशयानुरोधेन प्रामाण्याग्रह इति वाच्यम्। तत्राग्रिमसंशयानुरोधेन संशयजनकदोषस्य प्रामाण्यनिश्चयप्रतिबन्धकत्वकल्पनादित्याशयात्। ननु यदि प्रामाण्यमनुमेयं तदा प्रमाण्यग्रहवैयर्थ्यम्। तथा हि अयं पुरुष इति निश्चये प्रामाण्यसन्देहेनार्थसन्देहस्यायं पुरुषो न वेत्याकारकस्योत्पत्त्या पुरुषार्थिनः प्रवृत्तिर्न सम्भवति, तत्र प्रामाण्यनिश्चये च न तत्संशयाधीनोऽर्थसन्देह इति प्रामाण्यग्रहस्य प्रवृत्तावुपयोगः, प्रामाण्यग्रहस्यानुमित्यात्मकत्वे च प्रामाण्यानुमापककरादिमति पुरुषत्वप्रकारकत्वादिरूपहेतुग्रहे तद्घटकतया पुरोवर्तिनि पुरुषत्वव्याप्यकरादिग्रहस्याऽऽवश्यकतया तेनैवायं पुरुषो न वेति सन्देहप्रतिबन्धसम्भवादलं प्रामाण्यानुमानेनेति चेन्न, करादौ पुरुषत्वव्याप्यत्वग्रहं विनापि करादिमति पुरुषत्वप्रकारकत्वहेतोः पुरुषत्वघटितप्रामाण्यव्याप्यत्वग्रहसम्भवेन प्रामाण्यानुमानसम्भवात्। एवं न्यायमतेऽनुमितेरिव द्वितीयानुव्यवसायस्यापि प्रामाण्यग्राहकत्वमित्यन्यत्र विस्तरः॥ इति प्रामाण्यवादे शशिवादः॥

रामरुद्री।

शेष्यकघटत्वप्रकारकज्ञानजन्यत्वव्याप्या ज्ञाततेति व्याप्तिस्मरणं चेत्येकः कालः, फलबलेन सर्वत्र तथैव कल्पनात्। तत इन्द्रियसम्बद्धविशेषणतात्मकज्ञाततेन्द्रियसन्निकर्षव्याप्तिस्मरणाभ्यां तादृशज्ञानजन्यत्वव्याप्यघटविशेष्यकघटत्वप्रकारकज्ञाततावतीयमिति तादात्म्यसम्बन्धेन व्याप्यवत्तापरामर्शः, तद्रिन्द्रिययोग्यवृत्तिज्ञाततायास्तदिन्द्रियायोग्यत्वात्, अन्यथाख्यातिवादिना भट्टेनोपनीतभानाभ्युपगमात्, तदनन्तरमुक्ताकारानुमितिरिति। वस्तुतो गुरुमते ज्ञानस्येव भट्टमते ज्ञाततायाः स्वतोग्राह्यत्वमेव, तेनाऽतीन्द्रियासन्निकृष्टस्थले न ज्ञाततालिङ्गकानुमित्यनिर्वाह इत्यन्यत्र विस्तरः। मूले-**अनभ्यासदशापन्नेति।** प्रामाण्यव्याप्यवत्तानिश्चयासमानकालीनेत्यर्थः। **प्रामाण्यं ज्ञातमेवेति।** ज्ञानग्राहकसामग्र्या एव प्रामाण्यग्राहकत्वादित्याशयः। **तस्मादिति।** इदमुपलक्षणम्। अनुव्यवसायानन्तरं प्रामाण्यसंशयानुपपत्तेश्चेत्यपि बोध्यम्॥ इति प्रामाण्यवादे शशिवादः॥

ननु सर्वेषां ज्ञानानां यथार्थत्वात् प्रमालक्षणे तद्वद्विशेष्यकत्वं विशेषणं व्यर्थम् । न च रङ्गे रजतार्थिनः प्रवृत्तिर्भ्रमजन्या न स्यात्, तव मते भ्रमस्याऽभावादिति वाच्यम् । तत्र हि दोषाधीनस्य पुरोवर्त्तिनि स्वतन्त्रोपस्थितरजतभेदाग्रहस्य हेतुत्वात् । सत्यरजतस्थले तु विशिष्टज्ञानस्य सत्त्वात्तदेव कारणं, अस्तु वा तत्राऽपि रजतभेदाग्रहः, स एव कारणमिति । न चाऽन्यथा-

दिनकरी।

गुरुः शङ्कते नन्विति । व्यर्थमिति । व्यावर्त्याया अन्यथाख्यातेरभावादिति भावः । भ्रमजन्येति । न्यायनये भ्रमजन्या प्रवृत्तिस्तव मते न स्यादित्यर्थः । भ्रमस्य—अन्यथाख्यातेः । तत्र—रङ्गगोचरविसंवादिरजतार्थिप्रवृत्तौ । रजते इदं रजतमितिज्ञानकाले रजतभेदाग्रहसत्त्वाद्विसंवादिप्रवृत्त्यापत्तिवारणाय दोषाधीनस्येत्युक्तम् । न्यायनये दोषाधीनो यो रजतभ्रमस्तत्स्थानाभिधिक्तरजतभेदाग्रहस्यैव तन्मते दोषाधीनतया रजते रजतभेदाग्रहस्य दोषानधीनत्वादिति भावः । यत्र रङ्गगोचरमेतद्रजतवद्भूतलमितिज्ञानं तत्र विसंवादितादृशप्रवृत्तिवारणाय स्वतन्त्रोपस्थितेति रजतविशेषणम् । मुख्यविशेष्यतयोपस्थितत्वं तदर्थः । वस्तुतो रङ्गगोचरादेतद्रजतवद्भूतलमिति ज्ञानादपि प्रवृत्तिरिष्टैवेति स्वतन्त्रोपस्थितत्वं न देयमिति ध्येयम् । हेतुत्वादिति । न्यायनयेऽपीदं रजतमिति भ्रमे हेतुतया रजतभेदाग्रहस्य तत्रावश्यकतया तस्यैव हेतुत्वं युक्तं, तद्धेतोरिति न्यायादिति भावः । कार्यकारणभावद्वयकल्पनापेक्षया लाघवादाह । अस्तु वेति । तत्रापि—सत्यरजतगोचरप्रवृत्तावपि । अपिना रङ्गगोचरप्रवृत्तिपरिग्रहः । रजतभेदाग्रहः—रजतभेदासंसर्गाग्रहाभावः । यथाश्रुते रजते नेदं रजतमिति ग्रहेऽपि प्रवृत्त्यापत्तेः, प्राभाकरमते तत्र रजतभेदग्रहाभावस्य सत्त्वादन्यथाऽन्यथाख्यात्यापत्तेरिति । यद्यपि पुरोवर्तिविशेष्यकस्य रजतभेदासंसर्गग्रहस्य समवायेनाभावो विशेषणतयात्मनिष्ठः प्रतिबन्धकस्तदभावः कारणमिति फलितम् । तथा च रङ्गे इदं न रजतमिति ग्रहेऽपि प्रवृत्त्यापत्तिः, रङ्गविशेष्यकरजतभेदासंसर्गग्रहस्यान्यथाख्यात्यनङ्गीकर्तृमतेऽप्रसिद्धत्वेन तदभावस्य प्रतिबन्धकत्वासम्भवात्, तथापि विषयतासम्बन्धेन प्रवृत्तिं प्रति रजतभेदासंसर्गग्रहस्य विशेष्यतासम्बन्धावच्छिन्नप्रतियोगिताको योऽभावः स विशेषणतासम्बन्धेन प्रतिबन्धक इति विषयनिष्ठतया प्रतिबध्यप्रतिबन्धकभावकल्पनाङ्गीकृतदोषः । एवं च तत्पुरुषीयत्वं प्रतिबध्यप्रतिबन्धकत्वयोरवच्छेदककोटौ निवेशनीयमतो न पुरुषभेदमादाय दोषः । न चैवं रङ्गे इदं रजतमितिभ्रमानन्तरं तत्र प्रवृत्तिर्न स्यात्, रजतभेदासंसर्गग्रहस्यान्यथाख्यात्यापत्त्या तत्रानङ्गीकारेण तदभावरूपस्य प्रतिबन्धकस्य सत्त्वादिति वाच्यम् । रजतभेदोपस्थितिविशिष्टस्यैव रजतभेदासंसर्गग्रहाभावस्य प्रतिबन्धकत्वोपगमात् । न चैवमपि रङ्गे इदं रजतं घटो न रजतमिति ज्ञानानन्तरमप्रवृत्त्यापत्तिरिति वाच्यम् । रजतभेदग्रहप्रतिबन्धकदोषस्योत्तेजकत्वकल्पनात्, तत्र रङ्गे रजतभेद-

रामरुद्री ।

प्रमालक्षणोपोद्घातसङ्गत्याऽन्यथाख्यातिविचारमवतारयति मूले— नन्वित्यादिना । सर्वज्ञानानां—तत्प्रकारकसर्वज्ञानानां, यथार्थत्वात्—तत्तद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वादित्यर्थः । तेनाधिकप्रमात्वमादाय न सिद्धसाधनम् । भेदाग्रहस्य हेतुत्वादिति । वस्तुतस्तु गुरुमतेऽपि रजतत्वप्रकारकप्रवृत्तिं प्रत्येकहेतुत्वानुरोधेन रजतत्वनिष्ठप्रकारतानिरूपितत्वमिदन्त्वाश्रयावच्छिन्नविशेष्यतायां प्रमास्थल इव भ्रम

ख्यातिः सम्भवति, रजतप्रत्यक्षकारणस्य रजतेन्द्रियसन्निकर्षस्याऽभावात्। रङ्गे रजतबुद्धेरनुपपत्तेरिति चेन्न। सत्यरजतस्थले प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुतायाः कल्पितत्वात् अन्यत्राऽपि तत्कल्पनात्। न च संवादिप्रवृत्तौ तत्कारणं, विसंवादिप्रवृत्तौ च भेदाग्रहः कारणमिति वाच्यम्। लाघवेन प्रवृत्तिमात्रे तस्य हेतुत्वकल्पनात्। इत्थं च रङ्गे रजतत्व विशिष्टबुद्ध्यनुरोधेन ज्ञानलक्षणप्रत्यासत्तिकल्पनेऽपि न क्षतिः, फलमुखगौरवस्यादोषत्वात्। किं च रङ्गरजतयोरिमे रजते रङ्गे वेति ज्ञानं यत्र जातं तत्र न कारणबाधोऽपि।

दिनकरी।

प्रहानुत्पत्त्या तत्प्रतिबन्धकदोषस्य स्वीकरणीयत्वात्। न च रङ्गे रजतभ्रमजनकदोष एवोत्तेजकोऽस्तु, किं रजतभेदग्रहप्रतिबन्धकदोषस्योत्तेजकत्वस्वीकारेण? एवं च रजतभेदोपस्थितिर्वैशिष्टयमपि प्रतिबन्धके विशेषणं न देयं, रजतभेदानुपस्थितिकाले रङ्गे इदं रजतमिति ज्ञानादप्रवृत्तिप्रसंगाभावात्, तत्र रजतभेदासंसर्गाग्रहस्य प्रतिबन्धकस्य रङ्गे रजतभ्रमजनकदोषरूपोत्तेजक वशिष्टत्वादिति वाच्यम्। रङ्गे इदं रजतमिति भ्रमस्य न्यायमतसिद्धस्य तन्मतेऽभावेन तत्र तादृशदोषस्यानङ्गीकारात्। सम्भवतीत्यनन्तरं येन विसंवादिप्रवृत्तौ तद्धेतुत्वं स्यादिति पूरणीयम्। **सन्निकर्षस्याभावादिति**। ज्ञानलक्षणायाः प्रत्यासत्त्यन्तरस्यकल्पनं तु गौरवदोषदुष्टमित्यभिमानः। हेतुतायाः इत्यस्यान्वयव्यतिरेकाभ्यामिति शेषः। अन्यत्रापि-रङ्गगोचररजतार्थिप्रवृत्तावपि। तत्कल्पनात्-विशिष्टज्ञानहेतुत्वकल्पनात्। न चात्र मानाभाव इति वाच्यम्। रङ्गे रजतार्थिप्रवृत्तिरिष्टप्रवृत्तिविषयविशिष्टज्ञानसाध्या, प्रवृत्तित्वात्, रजते रजतत्वप्रकारकप्रवृत्तिवदित्यनुमानस्यैव तत्र मानत्वात्, अत्राप्रयोजकत्वमाशङ्कते। **न चेति**। **लाघवेनेति**। संवादिविसंवादिभेदेन कार्यकारणभावद्वयमपेक्ष्य प्रवृत्तिमात्रे विशिष्टज्ञानस्यैव हेतुत्वकल्पनालाघवेनेत्यर्थः। तथा च लाघवज्ञानरूपानुकूलतर्कस्य सत्त्वान्नाप्रयोजकत्वमिति भावः। रजतांशेऽपि सन्निकर्षाभावान्नान्याख्यातिः सम्भवतीति प्राभाकरोक्तं दूषणमुद्धरति। **इत्थं चेति**। प्रवृत्तिमात्रे विशिष्टबुद्धेर्हेतुत्वसिद्धौ चेत्यर्थः। **फलमुखेति**। कार्यकारणभावग्रहात्मकफलात् पूर्वं गौरवस्यानिर्णयात् गौरवसन्देहस्य चाऽप्रतिबन्धकत्वादिति। भावः। नन्वस्तु संवादिविसंवादिप्रवृत्तिसाधारणप्रवृत्तित्वावच्छिन्नं प्रत्येव भेदाग्रहः कारणमिति न कार्यकारणभावद्वयकल्पनागौरवम्। न च विशिष्टज्ञानत्वापेक्षयेष्टभेदग्रहाभावत्वस्य कारणतावच्छेदकत्वे गौरवमिति वाच्यम, रजतत्वविशिष्टानुमित्यादौ रजतभेदाग्रहत्वेन कारणत्वे तस्यैव प्रवृत्तिसाधारणरजतत्वविशिष्टविषयकत्वस्यैव कार्यतावच्छेदकत्वकल्पनेनैव निर्वाहात्। न्यायमते तु प्रवृत्तित्वावच्छिन्नं प्रति विशिष्टज्ञानत्वेन हेतुत्वान्तरकल्पने गौरवमिति न तदनुरोधेन कल्पनीयभ्रमात्मकरजतज्ञानार्थं ज्ञानलक्षणा प्रत्यासत्त्यादर इति कारणबाधाद्बाधितमेव मिथ्याज्ञानमिन्याशङ्कां मनसि निधाय स्थलविशेषे कारणबाधाभावादनिवार्यमेव मिथ्याज्ञानमित्याह—**किञ्चेत्यादिना**। यत्र रजते न रजतभेदग्रहो न वा रङ्गे रजतभेदग्रहप्रस्तत्र सति युगपदिन्द्रियसन्निकर्षे रजतरङ्गयोरिमे रजते इति ज्ञाने न किमपि बाधकम् रजतत्वेन समं संयुक्तसमवायस्य सत्त्वात्, तादृशं च ज्ञानं

रामरुद्री।

स्थलेऽपि स्वीक्रियत एव, स्वावच्छेदकावच्छिन्नाभाववन्निष्ठस्वनिरूपितविशेष्यतानिरूपकज्ञानस्यैतन्मतेऽभ्रमपदार्थत्वात्। ज्ञाने स्वनिरूपकत्व—स्वावच्छेदकावच्छिन्नाभाववन्निष्ठस्वनिरूपितविशेष्यतानिरूपकत्वो-

अपि च यत्र रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञानं तत्रोभयत्र युगपत्प्रवृत्ति-निवृत्ती स्याताम् । रङ्गे रङ्गभेदाग्रहे रजते रजतभेदाग्रहे चान्यथाख्यातिभयात्, त्वन्मते दोषादेव रङ्गे रजतभेदाग्रहस्य रजते रङ्गभेदाग्रहस्य च सत्त्वात् । किं चानुमितिं प्रति भेदाग्रहस्य हेतुत्वे जलह्रदे वन्हिव्याप्यधूमवद्भेदाग्रहादनुमिति-र्निराबाधा । यदि च विशिष्टज्ञानं कारणं तदाऽयोगोलके वन्हिव्याप्यधू-मज्ञानमनुमित्यनुरोधादापतितम्, (सेयमुभयतःपाशा रज्जुः) । इत्थञ्चा-न्यथाख्यातौ प्रत्यक्षमेव प्रमाणं, रङ्गं रजततया जानामीत्यनुभवादिति संक्षेपः ॥ १३६ ॥ ॥ इत्यन्यथाख्यातिवादः ॥

दिनकरी ।

रङ्गांशेन प्रमात्मकं, विशेषणवद्विशेष्यसन्निकर्षरूपप्रमासामग्र्यभावात्, किन्त्वन्यथाख्यातिरेवेति भावः । ननु तत्तद्विशेष्यकतत्तद्विशिष्टबुद्धिं प्रति तत्तद्विशेषणे तत्तद्विशेष्यघटितसन्निकर्षो हेतुः, अन्यथाऽतिप्रसङ्गात् । तथा च कथ रजतघटितसंयुक्तसमवायेन रङ्गे रजतत्वग्रह इत्यत आह । **अपि चेति** । अन्यथाख्यातिभयादित्यनन्तरं रङ्गे रङ्गभेदाग्रहस्य रजते रजतभेदाग्रहस्येति पूरितस्य सत्त्वादित्यनेनान्वयः । अनेन रङ्गेऽनिष्टभेदाग्रहरूपा निवृत्तिसामग्री रजते इष्टभेदा-ग्रहरूपा प्रवृत्तिसामग्री च प्रदर्शिता । रङ्गे रजतभेदाग्रहस्येत्यादिना च रङ्गे इष्टभेदाग्रहरूपा प्रवृत्तिसामग्री रजतेऽनिष्टभेदाग्रहरूपा निवृत्तिसामग्री च प्रदर्शिता । **दोषादेवेति** । त्वन्मते न्यायाभिमतभ्रमस्थलाभिमिक्त भेदाग्रहं प्रति दोषस्य हेतुत्वादिति भावः । इदं चेष्ट-भेदाग्रहः प्रवृत्तिकारणमनिष्टभेदाग्रहो निवृत्तिकारणमिति यथाश्रुताभिप्रायेण । इष्टभेदोपस्थि-तिविशिष्टेष्टभेदासंसर्गाग्रहः प्रतिबन्धकस्तदभावः कारणमिति दर्शितनिष्कर्षे तु रजतभेदोप-स्थितिविशिष्टरजतभेदासंसर्गाग्रहस्य प्रतिबन्धकस्य रङ्गेऽभावादिति रीत्या सामग्री बोध्या । ननु रङ्गे रजतभेदाग्रहप्रयोजकदोषस्य प्रतिबन्धकत्वान्न रजते प्रवृत्तिरिति कथं युगपत्प्रवृत्ति-निवृत्त्योरापादनमित्यत आह । **किं चेति** । भेदाग्रहस्य-व्याप्यवद्भेदाग्रहस्य । **अनुमिति-र्निराबाधेति** । सति बाधाभावेऽन्यथाख्यातिरूपानुमितिर्निराबाधेत्यर्थः । **आपतितमिति** । **अन्यथाख्यातिरूपमापतितमित्यर्थः** । ननु ह्रदे वह्निव्याप्यधूमवद्भेदाग्रहान्न ह्रदो वह्निमानित्य-न्यथाख्यातिरूपानुमितिः, परन्त्वगृहीतासंसर्गकं ज्ञानद्वयमेवात्रोत्पद्यते । न च तत्र विशिष्ट-ज्ञानोत्पत्तौ बाधकाभावः, व्याप्यवद्भेदाग्रहस्य ह्रदो वह्निमानित्यन्यथाख्यातिरूपानुमितिका-रणस्य सत्त्वादिति वाच्यम् । अन्यथाख्यातौ प्रमाणाभावेन तादृशकार्यकारणभावस्याकल्पनात्, अतस्तत्र प्रमाणं प्रदर्शयति । **इत्थं चेति** । यद्वा नन्वनुमिति प्रति विशिष्टज्ञानस्यैव हेतुत्वं, यत्र च न तादृशविशिष्टबोधस्य सामग्री तत्र लिङ्गासंसर्गाग्रहाख्यैरुपगमाम्नायःपिण्डे वह्न्यनुमित्यनुरोधादन्यथाख्यातिरित्यत **आह** । **इत्थं चेति** । चकारोऽप्यर्थः । ननु तादृशानुव्यवसायो नेदंविशेष्यकज्ञाने रजतत्वप्रकारकत्वविशिष्टबुद्धिरूपः, परन्तु रजतत्व-प्रकारकत्वासंसर्गाग्रहरूप एवेत्यत आह । **संक्षेप इति** । विद्यमानेपि भेदग्रहे आहार्यप्रत्य-क्षोत्पादादिच्छाया उत्तेजकत्वं वाच्यम्, इच्छानामुत्तेजकत्वानुरोधेन चानुमितित्वादीनामेव कार्यतावच्छेदकत्वात् प्रवृत्तित्वावच्छिन्नं प्रति भेदग्रहाभावत्वेन पृथक्कारणत्वे गौरवापत्त्या वि-रामरुद्री ।

भयसम्बन्धेन प्रकारतावैशिष्ट्यमेव नोपगम्यत इति न काऽपि क्षतिरिति ध्येयम् ॥ इत्यन्यथाख्यातिवादः ॥

व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा ।
हेतुर्व्याप्तिग्रहे, तर्कः क्वचिच्छङ्कानिवर्तकः ॥ १३७ ॥

पूर्वं व्याप्तिरुक्ता तद्ग्रहोपायस्तु न दर्शित इत्यतस्तं दर्शयति । व्यभिचारस्येति । व्यभिचाराग्रहः सहचारग्रहश्च व्याप्तिग्रहे कारणमित्यर्थः । व्यभिचारग्रहस्य व्याप्तिग्रहे प्रतिबन्धकत्वात् तदभावः कारणम् । एवमन्वयव्यतिरेकाभ्यां सहचारग्रहस्यापि हेतुता । भूयोदर्शनं तु न कारणं, व्यभिचारास्फूर्त्तौ सकृ-

दिनकरी

शिष्टज्ञानत्वेनैव तत्र हेतुता कल्पनीयेति विसंवादिप्रवृत्त्यनुरोधेनान्यथाख्यातिर्दुर्वारैवेति भावः ॥ १३६ ॥ इत्यन्यथाख्यातिवादः ॥

ननु प्रामाण्यमनुमानगम्यं तदा भवेद्यदनुमानं प्रमाणं भवेत्तदेव न सम्भवति व्याप्तेर्ग्राहकाभावेनाज्ञानादित्यतः प्रामाण्यानुमितिप्रयोजकतया 'व्यभिचारस्याग्रहोऽथ सहचारग्रहस्तथा' इति मूलेन व्याप्तिग्रहोपायो दर्श्यते, स चायुक्तः, स्वकरणीभूतव्याप्तिस्वरूपज्ञानाभावादित्यत आह । पूर्वं व्याप्तिरुक्तेति । व्यभिचाराग्रहस्य व्याप्तिग्राहकतामुपपादयति । व्यभिचारग्रहस्येति । सहचारग्रहस्य तामुपपादयति । एवमिति । भूयोदर्शनस्य कारणत्वं खण्डयति । भूयोदर्शनं त्विति । व्यतिरेकव्यभिचारमाह । सकृद्दर्शनेपीति । भूयोदर्शन-

रामरुद्री ।

प्रामाण्यनिरूपणानन्तरं व्याप्तिग्रहोपायनिरूपणौपयिकीं सङ्गतिमादर्शयति टीकायाम्-**नन्वित्यादिना ।** तथा च व्याप्तिग्रहोपायस्य प्रामाण्यज्ञानजनकव्याप्तिज्ञानजनकत्वात्मकस्मरणप्रयोजकसम्बन्धरूपप्रसङ्गसङ्गतिमत्त्वेनैव निरूपणमिति भावः । व्याप्तिग्रहोपायनिरूपणप्रस्तावे **'पूर्वं व्याप्तिरुक्ता'**—इत्यादिकथनस्याऽसङ्गतिमाशङ्क्य व्याप्तिग्रहोपायनिरूपणविरोधिनद्धटकव्याप्तिजिज्ञासानिवर्तनौपयिकतां तस्य व्यवस्थापयितुमाह । **स चाऽयुक्त इति ।** मूले-**व्याप्तिग्रहे प्रतिबन्धकत्वादिति ।** व्याप्तिघटकीभूतव्यापकत्वांशग्रहे प्रतिबन्धकत्वादिति भावः । नन्वेवमपि सहचारग्रहस्य व्याप्तिग्रहजनकत्वे मानाभावः, न च विशेषणज्ञानमर्यादया तस्य हेतुत्वमावश्यकमिति वाच्यम् । तथा सति व्याप्तिशरीरे व्यभिचारादेरपि निविष्टतया तज्ज्ञानानामपि कारणत्वस्य वक्तव्यतापत्तेरित्यतः सहचारदर्शनस्य व्याप्तिग्रहत्वावच्छिन्नं प्रत्येव पृथक्कारणतां व्यवस्थापयति । **एवमिति ।** व्याप्तिग्रहत्वावच्छिन्नं प्रतीति शेषः । तेन न सहचारवैशिष्ट्यबुद्धित्वावच्छिन्नं प्रति जनकतामादायाऽन्यथासिद्धिः । इत्थं च साध्याभाववदवृत्तित्वहेतुव्यापकसाध्यसामानाधिकरण्यादिरूपव्याप्तिविषयकग्रहत्वावच्छिन्नं प्रत्येव तस्य हेतुत्वं पर्यवसितम्, तथा च व्यापकसामानाधिकरण्यरूप-व्याप्तिविशेष्यकज्ञानस्य तद्वैशिष्ट्यानवगाहित्वेऽपि सहचारग्रहजन्यत्वं सिद्धयतीत्यवधेयम् । इदं च प्राचीनमताभिप्रायेण ।

नव्यास्तु धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्वादिकमेव व्याप्तिः, सामानाधिकरण्यमात्रस्य रासभादिसाधारण्येन धूमव्यापकवह्निसमानाधिकरणरासभवान् पर्वत इति ज्ञानाऽप्यनुमित्यापत्तेरन्यथा दुर्वारत्वात् । तादृशव्याप्तिशरीरे च साध्यसहचारस्य विशेषणविधया निवेशाद्विशेषणज्ञानविधयैव तद्ग्रहस्य हेतुता, अन्यविधहेतुताग्राहकत्वेनाऽभिमतान्वयव्यतिरेकादीनामसिद्धेः । विशेषणत्वस्य तुल्यत्वेऽपि व्यभिचारज्ञानादीनां कारणत्वाकथनं पुनः स्वतन्त्रेच्छस्य नियोगपर्यनुयोगानर्हत्वात् न क्षतिकरमिति प्राहुः ।

भूयोदर्शनमिति । भूयांसि दर्शनानीत्यर्थः । साध्यहेत्वोरिति शेषः । कारणत्वं तु स्वजन्यसंस्कारसम्बन्धेन बोध्यम् । तेनैकदा भूयसां दर्शनानामसमवधानेऽपि न क्षतिः । प्रथमगृहीतादिधूमस्थाऽपि पुरुषस्य व्याप्तिग्रहसम्भवान्न भूयसां दर्शनानां कारणत्वं सम्भवतीति परिहरति—**सकृ-**

दर्शनेऽपि क्वचिद् व्याप्तिग्रहात्, क्वचिद्व्यभिचारशङ्काविधूननद्वारा भूयोदर्शनमुपयुज्यते ॥ इति व्याप्तिग्रहोपायनिरूपणम् ॥

यत्र तु भूयोदर्शनादपि शङ्का नापैति तत्र विपक्षे बाधकस्तर्कोऽपेक्षितः। तथाहि वह्विरहितेऽपि धूमः स्यादिति यद्याशङ्का भवति तदा सा वह्निधूमयोः कार्य्यकारणभावस्य प्रतिसन्धानान्निवर्त्तते। यद्ययं वह्निमान् न स्यात्तदा धूमवान् न स्यात्, कारणं विना कार्य्यानुत्पत्तेः। यदि क्वचित् कारणं विनापि भविष्यत्यहेतुक एव भविष्यतीति तत्राप्याशङ्का भवेत् तदा सा व्याघातादपसारणीया। यदि हि कारणं विना कार्य्यं स्यात् तदा धूमार्थं वह्नेस्तृप्त्यर्थं

दिनकरी ।

स्याहेतुत्वेपि क्वचित्प्रयोजकतया तदादर इत्याह । क्वचिदिति ।

॥ इति व्याप्तिग्रहोपायनिरूपणम् ॥

तर्कोऽपेक्षित इति । शङ्कापनयनार्थं तर्कोऽपेक्षित इत्यर्थः । तदर्शयति—तथा हीत्यादिना । यद्ययमिति । अयं—धूमवान् पर्वतः । कारणं विनेति । तथा च धूमो वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादिति तर्काकारो बोध्यः । यथाश्रुते वह्निमान्न स्याद् धूमवान्न स्यादिति तर्कस्य विषयपरिशोधकस्य व्याप्तिग्रहानौपयिकतयाऽसङ्गतेः । तत्रापि—तादृशतर्ककारणीभूतकार्यकारणभावग्रहेपि । आशङ्का भवेत्—आशङ्का प्रतिबन्धिका भवेत् । व्याघातमेव दर्शयति—यदि हीत्यादिना । ननु तर्कं प्रत्यापाद्याव्याप्यापादकवत्तज्ञानं कारण, तत्र व्याप्ति-

रामरुद्री ।

दिति । भूयोदर्शनस्यैव हेतुत्वासिद्धौ तदनुरोधेन जन्मान्तरीयभूयोदर्शनकल्पनं सुदूरपराहतमिति भावः । ननु भूयोदर्शनं न भूयांसि दर्शनानि । किं तु भूयःसु स्थानेषु दर्शनम्, तच्चाऽऽवश्यकम्, अन्यथा साध्यसाधनयोर्महानसे ग्रहणकाले महानसत्वादौ साध्यव्यापकत्वसाधनाव्यापकत्वसन्देहसम्भवेनोपाधिसन्देहस्य तन्निश्चयस्य वा सम्भवात्, तदपेक्षणे तु साध्याधिकरणवत्त्वरादिग्रहस्याप्यावश्यकत्वे तत्रैव महानसत्वादेरभावग्रहसम्भवेन तत्र साध्याव्यापकत्वनिश्चयसम्भवेनोपाधिज्ञानविधूननसम्भवादित्याशङ्क्य निराचष्टे—क्वचिदिति । व्यभिचारशङ्काविधूननद्वारेति । उपाधिसन्देहाहितेत्यादिः । उपयुज्यत इति । तथाच भूयोदर्शनानामुपयुक्तत्वेऽप्यन्यथासिद्धत्वं दुष्परिहरमेव । अत एव पार्थिवत्वलोहलेख्यत्वयोः शतशः सहचारग्रहेऽपि वज्राभिन्नत्वरूपोपाधिसन्देहो न निराक्रियते, भूयसां च दर्शनानां सङ्ख्याऽनियमोऽपीति सङ्क्षिप्तम् इति भावः । इति व्याप्तिग्रहोपायनिरूपणम् ॥

टीकायाम्—विषयपरिशोधकस्येति । व्यभिचारशङ्काऽप्रतिबन्धकस्येत्यर्थः । तद्धर्मावच्छिन्नाभावाप्रतियोगित्वेनैव तद्धर्मावच्छिन्नवत्ताबुद्धिं प्रति विरोधितया वह्न्यभाववह्निमद्भेदाग्रहापादकत्वे तद्बुद्ध्यात्मकतत्संशयप्रतिबन्धस्यैव सम्भवेन तद्द्वारा वह्निनिश्चयोपयोगिनाया एवोक्ततर्के सम्भवात्तस्य व्याप्तिनिश्चयोपयोगित्वकथनं यथाश्रुते न सम्भवतीति भावः । प्रतिबन्धिका भवेदिति । तर्कस्य कार्यकारणभावरूपबाधनिश्चयकालीनेच्छाजन्यज्ञानतया मानसत्वविरोधिधर्मधर्मितावच्छेदकसम्बन्धप्रकारकज्ञानरूपे तस्मिन् कार्यकारणभावशङ्काया धर्मितावच्छेदकावगाहिताप्रतिरोधकत्वसम्भवात् बाधनिश्चयरूपतत्सामग्रीविघटकत्वाच्चेति भावः । भवेदित्यत्र सम्भावनायां लिङ् । तथा च तादृशशङ्काव्याघातात्—प्रतिबन्धकात् तर्कात् अपसारणीया—निवर्तनीयेत्यर्थः । तत्र कीदृशस्तर्क इत्याशङ्क्यां तर्काकार विवृणोतीत्याह । व्याघातमेवेति । मूले—यदि हीत्यादि । अय पुरुषो यदि वह्निधूमकार्यकारणभावाशङ्कावान् स्यात् वह्न्युत्पादानवान्न स्यादित्यर्थः । वह्न्युपादानस्य वह्निधूमयोः कार्यकारणभावशङ्काविरोधि-

साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा ।
स उपाधिर्भवेत् तस्य निष्कर्षोऽयं प्रदर्श्यते ॥ १३८ ॥

भोजनस्य वा नियमत उपादानं तवैव न स्यादिति । यत्र स्वत एव शङ्का नाधतरति तत्र न तर्कापेक्षापीति । तदिदमुक्तम्–तर्कः क्वचिदिति ॥ १३७ ॥

इतितर्कनिरूपणम् ॥

इदानीं (परकीय) व्याप्तिग्रहप्रतिबन्धार्थमुपाधिं निरूपयति । साध्यस्येति ।

दिनकरी ।

ज्ञानप्रतिबन्धकव्यभिचारशङ्कानिवर्त्तकस्तर्कोऽपेक्षितः, एवमग्रेपीत्यनवस्थेत्यत आह । **यत्रेति । स्वत एव**–शङ्कासामग्रीविरहादेव । न तर्कापेक्षेत्यनन्तरमतो नाऽनवस्थेति **शेषः** । ननु तर्कस्य न व्यभिचारशङ्कानिवर्त्तकत्वं, तर्ककारणीभूतव्याप्तिज्ञानेनैव तन्निवृत्तेः सम्भवादिति चेत्, अत्र केचित् । अनाहार्यशङ्कायास्तर्ककारणीभूतव्याप्तिज्ञानेन निराससम्भवेऽप्याहार्यशङ्कायास्ततो निवृत्तिर्न सम्भवति, आहार्यज्ञानस्य तदप्रतिबध्यत्वात्, किन्तु तर्केणैव । तथा हि अनिष्टप्रसञ्जनात्मकेन तर्केणापादकज्ञाने आपाद्यज्ञानरूपानिष्टसाधनत्वज्ञानजननद्वारा आपादकज्ञाने द्वेषो जन्यते । तेन चापादकज्ञाने इच्छाप्रतिबन्धः क्रियते । एवं चेच्छारूपकारणविरहादेव नाहार्यशङ्कोत्पत्तिरित्यर्थवशसम्पन्नमेव तर्के तन्निवर्तकत्वमिति । केचित्तु तर्कस्य शङ्कानिवर्तकत्वं व्याप्तिज्ञानकारणीभूतो यो व्यभिचारशङ्काविरहस्तत्सम्पादकत्वम् । एवं च व्यभिचारशङ्काप्रतिबन्धकतायां तर्कस्योत्तेजकतयोत्तेजकाभावविशिष्टव्यभिचारशङ्काविरहसम्पादकत्वमक्षुण्णमेव तर्कस्येत्याहुः । परे तु तदापादकापत्तित्वेनाहार्यानाहार्यसाधारणतद्विशिष्टबुद्धित्वावच्छिन्नं प्रति प्रतिबन्धकतया तर्कस्य व्यभिचारशङ्कानिवर्तकत्वमित्याहुः । तर्कस्याहार्यारोपविशेषः । तत्त्वं च मानसत्वव्याप्या जातिविशेषस्तर्कतायामीश्यनुभवाज्जिज्ञासाविशेषनिवर्त्तकतया वा सिद्ध इति । तर्कश्च द्विविधो विषयपरिशोधको व्याप्तिग्राहकश्चेति । तत्र विषयपरिशोधको निर्वह्निः स्यान्निर्धूमः स्यादित्यादिः । धूमो यदि वह्निव्यभिचारी स्याद्वह्निजन्यो न स्यादित्यादिश्च व्याप्तिग्राहकः । विस्तरस्त्वन्यत्रानुसन्धेयः ॥ १३७ ॥

॥ इति तर्कनिरूपणम् ॥

इदानीं—व्याप्तिग्रहोपायनिरूपणोत्तरं व्याप्तिनिश्चयाभावप्रयोजकव्यभिचारशङ्काकारणज्ञानविषयत्वेनोपाधेः स्मरणे सति । तथा च प्रसङ्गसङ्गत्योपाधिनिरूपणमिति भावः ।

रामरुद्री ।

त्वादिति भावः । **उपादानं** च यद्यपि तद्विषयिणी प्रवृत्तिस्तथाऽप्यावश्यकत्वादिह तत्प्रयोजकं वह्नेः धूमसाधनताज्ञानमेव विवक्षितम् । तेन प्रवृत्तेः स्वात्तन्त्र्येण कार्यकारणभावशङ्काविरोधिरसाभावेऽपि न क्षतिः । टीकायाम्—**तर्ककारणीभूतेति** । धूमो यदि वह्निव्यभिचारी स्यादित्यादितर्कस्य धूमितावच्छेदकप्रकारकनिश्चयमुद्रया वह्निव्यभिचाराभावात्मकव्याप्तिनिश्चयजन्यत्वादिति **शेषः** । तथा च सर्वत्रैव तदभावनिश्चयस्याऽपेक्षणीयतया तेनैव तद्वत्ताबुद्धिप्रतिरोधसम्भव इति भावः । आपत्तिमात्रस्याऽनिष्टविषयत्वे मानाभावेऽपि यस्या आपत्तेरनिष्टविषयकत्वं तस्या एव शङ्कानिवर्तकत्वम् । अत एवेष्टापत्तेर्न विरोधित्वमित्याशयः । एतन्मते तर्कोत्पत्त्यव्यवहितोत्तरमाहार्यशङ्कोत्पत्तिसम्भवो न विरुद्ध्यत इत्यतो मतान्तरमाह—**केचित्विति** । गौरवमेतन्मतेऽप्रामाणिकत्वं चाऽस्वरसबीजम् ॥ १३७ ॥ इति तर्कनिरूपणम् ॥

व्याप्तिग्रहोपायनिरूपणानन्तरमुपाधिनिरूपणे मूलकारेण सङ्गत्यप्रदर्शनात्तन्न्यूनतामाकलय्य स्वयं

साध्यत्वाभिमतव्यापकत्वे सति साधनत्वाभिमताव्यापक इत्यर्थः॥

ननु स श्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वं नोपाधिः स्यात्, तस्य साध्यव्यापकत्वाभावात्, श्यामत्वस्य घटादावपि सत्त्वात्, एवं वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूतरूपवत्त्वं नोपाधिः स्यात्, प्रत्यक्षत्वस्यात्मादावपि सत्त्वात् तत्र च रूपाभावात्, एवं ध्वंसो विनाशी जन्यत्वादित्यत्र भावत्वं नोपाधिः स्यात्, विनाशित्वस्य प्रागभावेऽपि सत्त्वात् तत्र च भावत्वाभावादिति चेन्न। यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वमित्यर्थे तात्पर्य्यात्। मित्रातनयत्वावच्छिन्नश्यामत्वस्य व्यापकं शाकपाकजत्वं, तदवच्छिन्नसाधनाव्यापकं च। एवं पक्षधर्मबहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य व्यापकमुद्भूतरूपवत्त्वं बहिर्द्रव्यत्वावच्छिन्नसाधनस्याव्यापकं च। एवं ध्वंसो विनाशी जन्यत्वादित्यत्र जन्यत्वावच्छिन्नसाध्य-

दिनकरी।

विषयत्वरूपसाध्यत्वस्य सिद्धिजनकत्वरूपसाधनत्वस्य च सोपाधावभावादभिमतेति। यो यदवच्छिन्नव्यापकत्वे सति यदवच्छिन्नाव्यापकः स तदवच्छिन्नसाध्यकतदवच्छिन्नहेतावुपाधिरित्यर्थः। यथाश्रुतेऽभिमतत्वस्य विशेषणत्वे यत्र न तदभिमानस्तत्राव्याप्तिः स्यात्। यदवच्छिन्नत्वविवक्षणाद् गुणकर्मान्यत्वविशिष्टसत्तावाञ्जातिमत्त्वादित्यादौ संयोगी गुणकर्मान्यत्वविशिष्टसत्त्वादित्यादौ च नाव्याप्त्यतिव्याप्ती। व्यापकत्वाव्यापकत्वे एकप्रकारेणैकसम्बन्धेन च विवक्षिते। तेन द्रव्यत्वत्वेन समवायसम्बन्धेन च वह्निं प्रति व्यापकस्य द्रव्यत्वस्य द्वित्वादिना संयोगादिसम्बन्धेन च धूमं प्रत्यव्यापकत्वेऽपि वह्निमान् धूमादित्यत्र द्रव्यत्वादौ नातिव्याप्तिः॥

श्याम इति। काकः श्यामो मित्रातनयत्वादित्यादावित्यर्थः। तेन वक्ष्यमाणेन ध्वंसो विनाशी जन्यत्वादित्यनेन न पौनरुक्तम्, अस्य साधनावच्छिन्नसाध्यव्यापकत्वादप्रिमस्य साधनरूपपक्षधर्मावच्छिन्नसाध्यव्यापकत्वात्। साध्याव्यापकत्वमुपपादयति। **श्यामत्वस्येति।** ननु साधनावच्छिन्नसाध्यव्यापकत्वं विवक्षणीयमतो नोक्ताव्याप्तिरतः पक्षधर्मावच्छिन्नसाध्यव्यापकोपाधावव्याप्तिमाह। **एवं वायुरिति।** अत्र प्रत्यक्षं प्रत्युद्भूतरूपस्याव्यापकत्वे रूपस्य सुतरामव्यापकत्वमित्युद्भूतपदं व्यर्थं, तथाप्युपाधेः साध्यव्यापकत्वे कार्यकारणभावलक्षणानुकूलतर्कदर्शनार्थं तदिति ध्येयम्। पक्षधर्मावच्छिन्नसाध्यव्यापकत्वोक्तौ तु पूर्वोक्तशाकपाकजत्वादावव्याप्तिरिति भावः। अव्याप्तीः परिहरति—**मित्रातनयत्वेत्यादिना।**

रामरुद्री।

सङ्गतिं प्रदर्शयति—**इदानीं व्याप्तिग्रहेत्यादि। सिद्धिविषयत्वरूपेति।** स्वनिष्ठप्रकृतहेतुव्यापकत्वविषयताप्रयुक्तानुमितिविषयत्वस्येत्यर्थः। **सिद्धिजनकत्वरूपसाधनत्वस्येति।** यत्किञ्चिद्वस्तुनिष्ठविधेयताश्रयत्वानुमितिजनकतावच्छेदकीभूतप्रकारतावच्छेदकधर्मवत इत्यर्थः। व्याप्यव्यापकयोरिति पर्यवसितार्थः। मूले—**अभिमतेति।** तथा च निरूप्यनिरूपकभावापन्नव्याप्यत्वव्यापकत्वविषयतानिरूपितविषयताश्रयेत्यर्थः पर्यवसितः। **नाऽव्याप्त्यतिव्याप्ती इति।** द्रव्यत्वादावित्यादिः। टीकायाम्—**न पौनरुक्त्यमिति।** काके मित्रातनयत्वाभावाच्च न तस्य पक्षधर्मत्वमिति भावः। मूले—**प्रत्यक्षस्पर्शाश्रयत्वादिति। प्रत्यक्षस्य यः स्पर्शः**—विषयता, **तदाश्रयत्वादित्यर्थः**। तेन न साधनावच्छिन्नसाध्यव्यापकत्वमादायाऽस्योपाधेः पौनरुक्त्यम्। आत्मनोऽपि निरुक्तरीत्या प्रत्यक्षस्पर्शाश्रयतया तत्रो-

सर्वे साध्यसमानाधिकरणाः स्युरुपाधयः ।
हेतोरेकाश्रये येषां स्वसाध्यव्यभिचारिता ॥ १३६ ॥

व्यापकं भावत्वं बोध्यम् । सद्धेतोस्त्वेतादृशो धर्म्मो नास्ति यदवच्छिन्नस्य साध्यस्य व्यापकं तदवच्छिन्नस्य साधनस्य चाव्यापकं किञ्चित् स्यात् । व्यभिचारिणि त्वन्तत उपाध्यधिकरणं यत्साध्याधिकरणं यच्चोपाधिशून्यं साध्यव्यभिचारनिरूपकमधिकरणं तदन्यतरत्वावच्छिन्नस्य साध्यस्य व्यापकत्वं साधनस्य चाव्यापकत्वमुपाधेः सम्भवतीति ॥ १३८ ॥

अत एव लक्ष्यमपि उपाधिरूपमेतदनुसारेण दर्शयति । सर्व्व इति । स्वसाध्येति । **स्वमुपाधिः, स्वं च साध्यं च स्वसाध्ये, तयोर्व्यभिचारितेत्यर्थः ॥१३६॥**

दिनकरी ।

व्यभिचारिणि त्वित्यादि । वायुः प्रत्यक्षो द्रव्यत्वादित्यादौ प्रत्यक्षत्वरूपसाध्याधिकरणमात्मा उद्भूतरूपात्मकोपाधिशून्यं साध्यव्यभिचाराधिकरणं गगनं तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वस्योद्भूतरूपेऽभावादुक्तमुपाध्यधिकरणमिति । उद्भूतरूपाधिकरणपरमाण्वाकाशान्यतरत्वावच्छिन्नसाध्याप्रसिध्या तद्दोषतादवस्थ्यमतः साध्याधिकरणमिति । उद्भूतरूपाधिकरणं यत्प्रत्यक्षत्वाधिकरणं घटादिस्तद्वृत्तिद्रव्यत्वात्मकधर्मावच्छिन्नसाध्यव्यापकत्वाभावादुक्तं यच्चेत्यादि । तत्रापि साध्यव्यभिचाराधिकरणपरमाणुघटान्यतरत्वावच्छिन्नद्रव्यत्वात्मकसाधनव्यापकत्वादुपाधिशून्यमिति । तत्रैवोपाध्यधिकरणं साध्याधिकरणं घट उपाधिशून्यमधिकरणमात्मा तदन्यतरत्वावच्छिन्नसाध्यव्यापकत्वाभावात् साध्यव्यभिचाराधिकरणमिति । उद्भूतरूपाधिकरणं यत्प्रत्यक्षत्वाधिकरणं घटः यच्चोद्भूतरूपशून्यं प्रत्यक्षत्वाभावाधिकरणमतीन्द्रियरूपादि तदन्यतरत्वावच्छिन्नद्रव्यत्वरूपसाधनाव्यापकत्वस्योद्भूतरूपेऽभावात् साध्याभावाधिकरणमिति परित्यज्य साध्यव्यभिचाराधिकरणमित्युक्तं । तदर्थश्च साधननिष्ठसाध्यव्यभिचारनिरूपकाधिकरणत्वम् । **अन्तत इति ।** तादृशधर्मान्तरस्यास्फूर्तावित्यर्थः । न च साध्यव्यापकत्वं साध्यनिष्ठव्याप्तिनिरूपकत्वं, तथा च शुद्धसाध्यव्यापके धूमादिनिष्ठव्याप्तेः केवलधूमत्वावच्छिन्नत्वात् कथं तादृशधर्मान्तरावच्छिन्नधूमादिनिष्ठव्याप्तिनिरूपकत्वमार्द्रेन्धनादीनामिति वाच्यम् । तद्धर्माधिकरणीभूतसाध्याधिकरणनिष्ठाभावाप्रतियोगित्वरूपस्यैव तद्धर्मावच्छिन्नसाध्यव्यापकत्वस्य लक्षणे प्रवेशो न तु यद्धर्मावच्छिन्नसाध्यनिष्ठव्याप्तिनिरूपकत्वस्येत्याशयात् । धूमवान् वह्नेरित्यादावयःपिण्डमहानसान्यतरत्वावच्छिन्नसाध्यव्यापकं व्यजनवत्त्वादिकं सङ्ग्राह्यमेवेति ध्येयम् ॥ १३८ ॥

अत एव—यद्धर्मावच्छिन्नत्वघटितनिरुक्तलक्षणस्य तात्पर्यविषयत्वादेव । तदनुसारेण—निरुक्तलक्षणानुसारेण । स्वस्य साध्यमितिषष्ठीतत्पुरुषभ्रमं व्यावर्तयितुमाह । **स्वं चेति ।** नव्यास्तु यदभावेन यद्वदन्यत्वेन वा साधनवति साध्याभाव उन्नीयते स उपाधिर्लाघवात् । अत एव जलत्वतेजस्त्वयोस्तदुभयत्वेन रूपेण न क्वचिदप्युपाधित्वमित्याहुः ॥ १३९ ॥

रामरुद्री ।

द्भूतरूपवत्त्वाभावात् । टीकाकारस्तु द्रव्यत्वादिति हेतु मन्वानोऽन्यथैव ग्रन्थं संयुयुजे ॥ १३८ ॥

मूले—तयोर्व्यभिचारितेत्यर्थ इति । तथा च साध्याभावाधिकरणीभूतसाधनाधिकरणनिष्ठाभाव-

व्यभिचारस्यानुमानमुपाधेस्तु प्रयोजनम्।

उपाधेर्दूषकताबीजमाह। व्यभिचारस्येति। **उपाधिव्यभिचारेण साध्यव्यभिचारानुमानमुपाधेः प्रयोजनमित्यर्थः। तथा हि यत्र शुद्धसाध्यव्यापक उपाधिस्तत्र शुद्धेनोपाधिव्यभिचारेण साध्यव्यभिचारानुमानम्। यथा धूमवान् वह्नेरित्यादौ वह्निर्धूमव्यभिचारी, आर्द्रेन्धनव्यभिचारित्वादिति। व्यापकव्यभिचारिणो व्याप्यव्यभिचारावश्यकत्वात्। यत्र तु किञ्चिद्धर्म्मावच्छिन्नसाध्यव्यापक उपाधिस्तत्र तद्धर्म्मवत्युपाधिव्यभिचारेण साध्यव्यभिचारानुमानम्। यथा स श्यामो मित्रातनयत्वादित्यत्र मित्रातनयत्वं श्यामत्वव्यभिचारि, मित्रातनये शाकपाकजत्वव्यभिचारित्वादिति। बाधानुन्नीतपक्षेतरस्तु साध्यव्यापकताग्राहकप्रमाणाभावात् स्वव्याघातकत्वाच्च नोपाधिः। बाधोन्नीतस्तु पक्षेतर उपाधिर्भवत्येव, यथा वह्निरनुष्णः कृतकत्वादित्यादौ प्रत्यक्षेण वह्नेरुष्णत्वग्रहे वह्नीतरत्वमुपाधिः। यस्य तूपाधेः साध्यव्यापकत्वादिकं सन्दिह्यते स सन्दिग्धोपाधिः। पक्षेतरस्तु सन्दिग्धोपाधिरपि नोद्भावनीयः, कथकसम्प्रदायानुरोधादिति।**

दिनकरी।

तद्धर्मवत्युपाधिव्यभिचारेण—तद्धर्माधिकरणीभूतं यदुपाध्यभावाधिकरणं तद्वृत्तित्वेन। वायुः प्रत्यक्षः प्रमेयत्वादित्यादौ तु प्रमेयत्वं प्रत्यक्षत्वव्यभिचारि वह्निद्रव्ये उद्भूतरूपव्यभिचारित्वादित्यादि द्रष्टव्यम्।

ननु पक्षेतरत्वेऽतिव्याप्तिः। न च तस्य लक्ष्यत्वमेव, **एकाश्रये येषामित्यादिमूलेन** प्रदर्शितस्य लक्ष्यतावच्छेदकस्य तत्राभावात्। तत्र हेतौ पक्षेतरत्वव्यभिचारस्य पक्षमादायैव सम्भवात् **साध्यव्यभिचारस्य** तमादायासम्भवादत आह। बाधानुन्नीतेति। **स्वव्याघातकत्वादिति।** उपाधिमात्रस्य दूषकत्वव्याघातकत्वादित्यर्थः। पक्षेतरत्वस्योपाधित्वे सर्वत्रानुमाने पक्षेतरत्वस्योपाधेः सम्भवादनुमानमात्रोच्छेदापत्त्या व्यभिचारानुमानाधीनस्योपाधेर्दूषकत्वस्यासम्भवादिति भावः। ननु तथापि यत्र साध्यव्यापकताग्राहकं प्रमाणमस्ति तत्र पक्षेतरत्वे लक्षणातिव्याप्तिर्दुर्वारेत्यत आह। बाधोन्नीतस्त्विति। बाधेन—पक्षे **साध्याभाववत्तया उन्नीतः**—साध्यव्यापकत्वेन निश्चित इत्यर्थः। **सन्दिग्धोपाधिरपीति।** पक्षे साध्यसन्देहेन साध्यव्यापकतासन्देहस्य पक्षेतरत्वे सम्भवादिति भावः। न च स्वव्याघातकत्वेऽनानुपाधित्वादेवाऽनुद्भावनसम्भवे सम्प्रदायमात्रे तद्धेतुत्वकथनमसङ्गतमिति वाच्यम्। यत्र साध्यव्यापकताग्राहकतर्कावतारस्तत्र व्यापकव्यभिचारिणो व्याप्यव्यभिचारावश्यम्भावेन व्यभिचारानुमापकत्वरूपस्य दूषकत्वस्य व्याघातासम्भवात्।

रामरुद्री।

प्रतियोगित्वे सति साध्यसमानाधिकरणा इत्यर्थः। अत्र साधनाधिकरणे साध्याभावाधिकरणत्वस्याऽनिवेशे वह्निमान् धूमादित्यादौ महानसत्वादावतिव्याप्तिः। प्रतियोगित्वान्तमात्रविवक्षणे च तत्रैव गगनादेरप्युपाधित्वापत्तिर्बोध्या। इष्टापत्तिस्तु न सम्भवति, प्रागुक्तलक्षणविरहेणाऽव्याप्तिप्रसङ्गादिति ध्येयम्॥१३९॥

मूले—पक्षेतर इति। नोपाधिरिति। नोपाधित्वेन कथासूद्भाव्य इत्यर्थः। एतदेव चाऽग्रे 'पक्षेतरस्तु सन्दिग्धोपाधिरपि नोद्भावनीयः' इत्यादिना वक्ष्यति। प्रमाणवत्त्वे सति स्वव्याघातकत्वमप्युपाधिलक्षणप्रविष्टं मन्वानः शङ्कते टीकायाम्—**न चेत्यादिना। दूषकत्वस्य व्याघातासम्भवादिति।**

शब्दोपमानयोर्नैव पृथक्प्रामाण्यमिष्यते ॥ १४० ॥
अनुमानगतार्थत्वादिति वैशेषिकं मतम् ॥

केचित्तु सत्प्रतिपक्षोत्थापनमुपाधिफलम्। तथाहि अयोगोलकं धूमवद्वह्नेरित्यादावयोगोलकं धूमाभाववत्, आर्द्रेन्धनाभावादिति सत्प्रतिपक्षसम्भवात्। इत्थं च साधनव्यापकोऽपि क्वचिदुपाधिः। यथा करका पृथिवी, कठिनसंयोगवत्त्वादित्यादावनुष्णाशीतस्पर्शवत्त्वम्। न चात्र स्वरूपासिद्धिरेव दूषणमिति वाच्यम्। सर्व्वत्रोपाधेर्दूषणान्तरसाङ्कर्यात् अत्र च साध्यव्यापकः पक्षावृत्तिरुपाधिरिति वदन्ति। इत्युपाधिनिरूपणम्॥

शब्दोपमानयोरिति। **वैशेषिकाणां मते प्रत्यक्षमनुमानं च प्रमाणम्, शब्दोपमानयोस्त्वनुमानविधयैव प्रामाण्यम्। तथाहि दण्डेन गामभ्याजेत्यादिपदानि वैदिकपदानि वा तात्पर्य्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्व्वकाणि, आकांक्षादिमत्प-**

दिनकरी।

सत्प्रतिपक्षोद्धायकत्वेनोपाधेर्दूषकतावादिनां मतमाह। **केचित्त्विति। इत्थंञ्चेति।** सत्प्रतिपक्षोत्थापकतया दूषकत्वे चेत्यर्थः। **अत्र च—सत्प्रतिपक्षोत्थापकत्वपक्षे च। पक्षावृत्तिरिति।** पक्षवृत्तित्वे तु पक्षे तदभावेन साध्याभावासाधनादिति भावः ॥ इत्युपाधिनिरूपणम् ॥

गुरुमते लौकिकः शब्दोऽनुवादकः वैदिक एव प्रमाणं, तन्मतनिराकरणायाऽऽह। **वैदिकेति।** अत्र स्वर्गकामो यजेतेत्यादिपदत्वेन पक्षता, तेन विशेषतः संसर्गसिद्धिरिति द्रष्टव्यम्। **तात्पर्यविषयेति।** अत्र ब्राह्मणो विद्येत्यादौ यदाधिकरणत्वसंसर्गे ता-

रामरुद्री।

तथा च व्यभिचारोद्धायकस्यैव नवीनैरुपाधित्वलक्षणलक्ष्यतयाऽभ्युपगतत्वेन पक्षेतरस्याऽपि बहुत्र तथात्वसम्भवात्तत्र निरुक्तलक्षणासत्त्वेनाऽव्याप्तिरेव स्यात्, अतः पक्षेतरावृत्तित्वपर्यवसन्ने प्रमाणवत्त्वस्वाव्याघातकत्वे लक्षणे न प्रवेशनीये। तथा च तेषामुपाधित्वसम्भवेऽपि तदुद्भावनं कथकसम्प्रदायानुरोधान्न कर्तव्यमित्यत्रैव पर्यवसानमिति भावः। इदमुपलक्षणम्। मूलोक्तस्योपाधिलक्षणलक्ष्यरूपस्याऽपि पक्षेतरत्वे सम्भवो बोध्यः ॥ इत्युपाधिनिरूपणम् ॥

तन्मतनिराकरणायेति। अन्यथा लौकिकपदानामेव प्रमाणान्तरत्वखण्डनसम्भवेन तन्मतानिरासादिति भावः। **इत्यादिपदत्वेनेति।** आदिपदेन घटमानयेत्यादिलौकिकवाक्यपरिग्रहः। **पक्षतेति।** तथा च घटपदोत्तराम्पदत्वेन अम्पदोत्तरानयनपदत्वादिना च पक्षत्वं पर्यवसितम्, समूहालम्बनात्मिका चाऽनुमितिः। अन्यथाऽस्मारितपदार्थसंसर्गज्ञानपूर्वकत्वमादायाऽर्थान्तरापत्तिवारणायाऽग्रे विवक्षणीयस्य पदार्थे स्मारितत्वविशेषणस्याऽव्यावर्तकतापत्तेः। सर्वेषामेव यथाकथञ्चित्पदस्मारितत्वाविशेषात्, प्रकृतपदस्मारितत्वविवक्षणे चाऽस्मदनुमतेरित्याशयः। **ब्राह्मणे विद्येत्यादाविति।** संसर्गे तात्पर्यविषयत्वनिवेशेऽपि यदा घटमानयेति वाक्यप्रयोक्तुः समानकालीनत्वनिष्ठत्वरूपसंसर्गद्वय एव तात्पर्यमस्ति, तत्र तात्पर्यविषयसंसर्गपदेन समानकालीनत्वसंसर्गमादाय तत्सिद्धावर्थान्तरं दुर्वारम्। न चेष्टापत्तिः, तत्र निष्ठत्वसंसर्गस्याऽपि तात्पर्यविषयत्वेन तज्ज्ञानपूर्वकत्वसिद्धयैवोद्देश्यपर्यवसानात्, समानकालीनत्वादिसंसर्गज्ञानपूर्वकत्वस्याऽधिकस्य सिद्धावप्यधिकन्वित्यादिन्यायेन तत्सिद्धेः प्रकृताविरोधित्वात्। यत्र समानकालीनत्वसंसर्गमात्र एव च तात्पर्यं तत्र निरुक्तव्याप्तिज्ञानादिघटितानुमितिसामग्रीसत्त्वे तत्संसर्गप्रमापूर्वकत्वानुमानं नैयायिकानामपि दुरपह्नवमेव। नैयायिकमतसिद्धशाब्दसामग्रीस्थलमात्रनियतत्वमेव च तादृशशाब्दबोधसमानाका-

दकदम्बत्वात्, घटमानयेति पदकदम्बवत् ।

दिनकरी ।

त्पर्यं तदा विषयत्वादिसंसर्गेणार्थान्तरवारणाय तात्पर्यविषयत्वं संसर्गे विशेषणम् । तात्पर्यज्ञाने इतरपदार्थत्वेनेतरपदार्थस्य प्रवेशात् घटत्वादिना स्मृतस्य संसर्गो न सिद्धयेदतः स्मारितेति । स्मारितत्वं च वृत्त्या बोध्यम् । तेन वस्तुपदात् समवायेनाकाशत्वादिनोपस्थापितेन रूपेण संसर्गसिद्धयभावेऽपि न क्षतिः । हेतौ चाऽयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ राज्ञः पुरुष इत्यादिभागे राजपुरुषयोर्योग्यार्थयोः संसर्गे तात्पर्याभावेन साध्याभावाद्व्यभिचार इत्याकङ्क्षाविशेषणम् । तच्चेदं पदमनेन पदेन सहामुकसंसर्गेणैतदर्थान्वितस्वार्थबोधं जनयत्विति पदतात्पर्यार्थकम् । तेन नाऽऽकाङ्क्षाया इतरांशवैयर्थ्यप्रसङ्गः ।

रामरुद्री ।

कारानुमितिसामग्र्या वैशेषिकाभिमतं विवादास्पदमिति शाब्दबोधानुपधायकतरसामग्रीदशायां नैयायिकाभिमतायामनुमितिसामग्र्यनियमो वैशेषिकाणां न कामपि क्षतिमावहतीति वाच्यम् । घटमानयेत्यादिवाक्यतः समानकालीनत्वाद्यविषयक एव शाब्दबोधो नैयायिकानामनुभवसिद्धः, युक्तानुमानाच्च तथा वृत्तमिति तादृशानुभवसिद्धबोधनिर्वाहाय शब्दस्य प्रमाणान्तरत्वस्वीकारप्रसङ्गात् । तथा च तादृशापत्तिवारणायाऽऽकाङ्क्षानिरूपकत्वं संसर्गे विशेषणमवश्यमुपादेयमेव, तथा च संसर्गे तात्पर्यविषयत्वानुपादाने घटमानयेत्यादौ समानकालीनत्वादिसंसर्गभानस्य संसर्गे आकाङ्क्षानिरूपकत्वनिवेशेनैव सम्भवात्तादृशप्रसिद्धस्थलं परित्यज्य ब्राह्मणे विद्येत्याद्यप्रसिद्धस्थलानुधावनम् । न च वैशेषिकाणां मते शाब्दबोधस्याऽनुपपत्तात् संसर्गे आकाङ्क्षानिरूपकत्वनिवेशनं न सम्भवति, शाब्दबोधजनकतावच्छेदकानुपूर्वीरूपायास्तस्यास्तादृप्येणाऽनभिमतत्वात् । यथाकथञ्चित्तन्निवेशने चाऽतिप्रसङ्गो दुर्वार इति वाच्यम् । आकाङ्क्षानिरूपकत्वस्याऽऽकाङ्क्षाऽनिरूपकतत्तत्सम्बन्धविशेषभिन्नत्वार्थकतयाऽदोषात् । न चैवमपि ब्राह्मणे विद्येत्यादौ तात्पर्यविषयत्वोपादानव्यावृत्तिकथनमसङ्गतमेव, सप्तम्या विषयत्वार्थकत्वेऽपि तत्संसर्गेण विद्याया ब्राह्मणान्वयस्य काऽप्यसम्भवेन तस्य निरुक्तस्थले आकाङ्क्षानिरूपकत्वासम्भवादिति वाच्यम् । विद्याशब्दस्य ज्ञानार्थतया तत्समभिव्याहृतायाः सप्तम्या विषयत्वातात्पर्यकत्वस्याऽपि सम्भवादिति । इदमुपलक्षणम् । स्मारितपदार्थेऽपि तात्पर्यविषयत्वं विशेषणं देयम् । अन्यथा हरिरयमित्यादौ विष्णवादितात्पर्योच्चरितहर्यादिपदघटितस्थले तात्पर्यविषयीभूतस्याऽभेदसंसर्गस्य विष्णवादिनिरूपितस्यैव वानरादिनिरूपितस्याऽपि सिद्ध्यापत्तेः । इत्थं च तात्पर्यविषयीभूतः स्मारितपदार्थसंसर्गो यत्रेति व्युत्पत्त्या लब्धे स्मारितपदार्थससर्गवत्यपि तात्पर्यविषयत्वमुपादेयम् । तेन शोभनो हरिरित्यादौ विष्णवादितात्पर्येण प्रयुक्ते सति न वानरादौ शोभनाभेदसंसर्गबोधप्रसङ्गः । इतरपदार्थत्वेनेति । इतरेति सम्पातायातम् । घटत्वादिना स्मृतस्य—घटत्वादिना स्मृतिविषयस्य घटादेः संसर्गो न सिद्धयेत्—तदितरस्यापि ससर्गः सिद्धयेदित्यर्थः । तथा चाऽऽकाशघटोभयबोधतात्पर्येण प्रयुक्ताद्घटपदाद्घटमात्रोपस्थितौ सत्यामपि घटादेरिव गगनादेरपि घटोऽयमित्यादिवाक्याच्छाब्दबोधः स्यादिति पर्यवसितम् । एतेन स्मारितत्वोपादानेऽपि स्मारितत्वादिनैव तदनुमित्याऽवगाहनाद्घटत्वादिना शाब्दबोधोपपादनाय शब्दस्य प्रमाणान्तरत्वं दुरपह्नवम्, घटादिसंसर्गप्रमापूर्वकत्वस्य साध्यता च दुर्वचा, तथासति घटादिसंसर्गप्रमापूर्वकत्वस्य दृष्टान्ते सत्त्वेऽपि पक्षे गामानयेत्यादिवाक्येऽभावात् गवादिससर्गप्रमापूर्वकत्वस्य च दृष्टान्ते घटमानयेत्यादिवाक्येऽभावात् बाधदृष्टान्तासिद्धयोरन्यतरप्रसक्तस्याऽपरिहार्यत्वापत्तेरिति परास्तम् । स्मारितत्वादेरेव व्यापकतावच्छेदकत्वेऽपि प्रकृतानुमितौ पक्षधर्मतावलाद्घटत्वादेरधिकस्य स्मारितत्वावच्छिन्ने भानसम्भवेनाऽदोषादिति ध्येयम् । हेतौ चेति । आकाङ्क्षादिमत्पदकदम्बत्वादित्यादिरूप इत्यर्थः । इतिपदतात्पर्यार्थकमिति । इतिसमभिव्याहारार्थकमित्यर्थः । समभिव्याहृततत्तत्पदोत्तरत्वस्यैव तत्तत्पदे तत्तत्पदाकाङ्क्षारूपतायाः प्राङ्निर्णीतत्वादिति

यद्वैते पदार्था मिथः संसर्गवन्तः, योग्यतादिमत्पदोपस्थापितत्वात्, तादृ-

दिनकरी ।

वह्निना सिञ्चतीत्यादिवाक्ये संसर्गप्रमापूर्वकत्वसाध्याभावेन व्यभिचारवारणाय हेतौ योग्यता-पदम् । नीलो घटो द्रव्यं पटइत्यादौ नीलः पट इत्यादिभागे नीलपटयोराकाङ्क्षायोग्यतासत्त्वेन हेतुसत्त्वाद्व्यभिचारवारणायाऽऽसत्तिपदम् । कदम्बपदं चाऽऽकाङ्क्षादीनां परस्परप्रतियोगित्व-लाभाय । अन्यथा साध्यस्य परस्परार्थघटितत्वेन व्यभिचारप्रसङ्गात् । नन्विदृशतावच्छेद-कप्रकारकप्रवृत्तिविशेष्यकज्ञानस्य प्रवर्तकतया संसर्गज्ञानपूर्वकत्वानुमितेरतादृशतया कथं प्रवर्तकत्वम् ? अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेन प्रमापूर्वकत्वत्वेन प्रमापूर्वकत्व-सिद्धावपि पुरोवर्तिविशेष्यकरजतत्वादिप्रकारकज्ञानस्य तस्मादनुत्पत्तेस्तदर्थं शब्दप्रामाण्य-स्वीकार इत्यत आह । **यद्वैति । मिथः संसर्गेति ।** तात्पर्याविषयपरस्परसंसर्गवन्त

रामरुद्री ।

भावः । इदं च प्राचां मतमनुसृत्य । तात्पर्यज्ञानस्य स्वातन्त्र्येण हेतुतावादिनव्यमते तु तात्पर्यज्ञानरूप कारणाभावादेव अयमिति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ राजपुरुषयोः संसर्गाविवक्षास्थले तादृश-संसर्गबोधापत्तिवारणसम्भवादाकाङ्क्षास्वरूपे तात्पर्यस्याऽनिवेशादिति ध्येयम् । **योग्यतापदमिति ।** योग्यतासंग्राहकं मूलस्थमादिपदमित्यर्थः । तेन मूले योग्यतेत्यानुपूर्वीकपदाभावेऽपि न क्षतिः । इदमुप-लक्षणम् । तात्पर्यस्यऽऽकाङ्क्षास्वरूपावटकत्ववादिनव्यमते तात्पर्यमपि हेतुशरीरे प्रवेशनीयमिति ध्येयम् । **आसत्तिपदमिति ।** पूर्ववदिहाऽपि रीतिरनुसन्धेया । एतच्च घटपदाद्युत्तरत्वमेवाऽम्पदादेरा-काङ्क्षा, तयोरव्यवधानं स्वासत्तिरिति मताभिप्रायेणेति बोध्यम् । नन्वेतादृशरीत्या पदविशेष्यकसंसर्ग-प्रमापूर्वकत्वानुमित्या न शाब्दबोधापलापसम्भवः, तस्य पदार्थविषयकस्यैव नैयायिकानुभवसिद्धस्य निरुक्तानुमित्या चारितार्थ्यसम्भवादिति चेन्न । लिङ्गोपहितलैङ्गिकभानवत्पदादिविषयकत्वमपि शाब्द-बोधस्य नैयायिकैकदेशिमतसिद्धमिति तन्मतमालम्ब्यैवोक्तानुमानकथनात् । तत्तल्लिङ्गकपरामर्शस्य तत्तल्लिङ्गधर्मितावच्छेदककानुमिति प्रति हेतुत्वस्य तत्तल्लिङ्गकपरामर्शत्वावहितोत्तरत्वादेर्जन्यतावच्छेद-ककोटिप्रवेशापेक्षया लाघवेन समीचीनतया इव तत्तत्पदज्ञानाव्यवहितोत्तरत्वादेर्जन्यतावच्छेदककोटिनि-वेशापेक्षया तत्तत्पदविषयकत्वादेस्तथात्वस्य तुल्ययुक्त्यैव सम्भवादिति । एतादृशमतस्यैकदेशिकत्वेन सिद्धान्तपक्षमवलम्ब्य पदार्थविषयकस्याऽपि शाब्दबोधस्याऽनुमित्या चारितार्थ्यं व्यवस्थापयितुमनुमा-नान्तरमाह **मूले-यद्वेति ।** टीकाकृत्तु निरुक्तानुमितेस्तादृशप्रमापूर्वकत्वविषयकत्वेऽपि इदं रजतमि-त्यादिवाक्यजन्यशाब्दबोधममानाकारत्वं दुरुपपादम्, इदमादिविशेष्यकरजतार्थिप्रवृत्तिं प्रति इदमा-दिविशेष्यकरजतत्वादिप्रकारकज्ञानस्यैव हेतुतायास्तथाविधप्रत्यक्षादिस्थले फलप्रतया निरुक्तवाक्य-जन्यशाब्दबोधोत्तरं च तादृशप्रवृत्तेरन्यथानुपपत्त्या तादृशशाब्दबोधस्यापि तथाविधाकारकतया अवश्याभ्युपेतव्यकत्वेन तस्य निरुक्तानुमित्याऽनिर्वाहादित्यतोऽनुमानान्तरमाह—**यद्वेतीत्याहुः ।** तच्च सपीवनम् । निरुक्तानुमितेरपि तथाविधाकारकताया वैशेषिकैरभ्युपगमेन उक्तदोषासम्भवात् । न चाऽनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेन रजतत्वत्वादेर्व्यापकतावच्छेदकत्वे तादृश्येण रजत-त्वानुमितिर्नोत्पत्तुमर्हतीति वाच्यम् । तद्धर्मावच्छिन्नविधेयताकानुमितिं प्रति तद्धर्मकप्रकृतहेतु-व्यापकतावच्छेदकत्वज्ञानस्य हेतुताया इव रजतत्वादिप्रकारकेदमादिविशेष्यशाब्दबोधं प्रति तादृशाका-ङ्क्षादिज्ञानानां हेतुतायास्त्वयैव मयाऽपि स्वीकारात् । शाब्दत्वरूपजातेरपि वैशेषिकाणामिष्टत्वात्, शा-ब्दसामग्रीसमवधानकाले नियमतोऽनुमितिसामग्रीसमवधानस्यैव शाब्दबोधमात्रस्य यत्किञ्चित्संसर्ग-प्रमापूर्वकत्वानुमितिरूपताप्रयोजकस्य नैयायिकानभिमतस्य तैरुपगमात्, तत एव शब्दस्य प्रमाणान्त-रत्वखण्डनसम्भवात् । शाब्दत्वजातिश्च शाब्दयामीतिप्रत्यक्षसिद्धेवेति न काऽप्यनुपपत्तिः । वैशेषिक-मते शाब्दत्वजात्यसत्त्वेऽपि न क्षतिः । तथाविधानुमितिं प्रत्येव निरुक्ताकाङ्क्षादिज्ञानहेतुतायास्तन्मते

तन्न सम्यग्विना व्याप्तिबोधं शाब्दादिबोधतः ॥ १४१ ॥

शपदार्थवत् । दृष्टान्तेऽपि दृष्टान्तान्तरेण साध्यसिद्धिरिति । एवं गवयव्यक्तिप्रत्यक्षानन्तरं गवयपदं गवयत्वप्रवृत्तिनिमित्तकम्, असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वात् । असति च वृत्त्यन्तरे यद्यत्र वृद्धैः प्रयुज्यते तत्तत्प्रवृत्तिनिमित्तकं, यथा गोपदं गोत्वप्रवृत्तिनिमित्तकम् । यद्वा गवयपदं सप्रवृत्तिनिमित्तकं, साधुपदत्वादित्यनुमानेन पक्षधर्मताबलाद् गवयत्वप्रवृत्तिनिमित्तकत्वं भासते । तन्मतं दूषयति । तन्न सम्यगिति । व्याप्तिज्ञानं विनापि शाब्दबोधस्यानुभवसिद्धत्वात् । न हि सर्वत्र शब्दश्रवणाद्यनन्तरं व्याप्तिज्ञाने मानम-

दिनकरी ।

इत्यर्थः । तेन नाऽतात्पर्यविषयसंसर्गमादायाऽर्थान्तरम् । ननु दृष्टान्ते साध्यसिद्धयभावात् कथं व्याप्तिग्रह इत्यत आह । **दृष्टान्तेऽपीति** । ननु सर्वत्र शब्दश्रवणानन्तरमनुमिति-

रामरुद्री ।

सुबत्वात् । न चैवं रजतत्वादिव्याप्यवत्तापरामर्शादनुमितिर्न स्यात्, तस्याऽनुमिति प्रत्यहेतुत्वात्, आकाङ्क्षादिज्ञानस्यैव तन्मते तथात्वादित्यनुमितिमात्रोच्छेदः, शाब्दबोधाख्यप्रमाणान्तरस्वीकारप्रसङ्गश्चेति वाच्यम् । साधनभेदेन परामर्शानुमित्योः कार्यकारणभावस्य जन्यतावच्छेदककोटौ तत्तल्लिङ्गकपरामर्शीयव्यवहितोत्तरत्वमनिवेश्य दुर्वचतया तथात्वावश्यकत्वे निरुक्ताकाङ्क्षादिज्ञानस्याऽपि स्वाव्यवहितोत्तरतादृशानुमिति प्रत्येव हेतुतायां आवश्यकतया तादृशाकाङ्क्षादिज्ञानविरहस्थलोत्पन्नतादृशानुमित्यनुरोधादेव तथाविधपरामर्शानामपि हेतुत्वस्याऽवश्यकतयाऽनुमितिमात्रोच्छेदासम्भवात्, शब्दस्य प्रमाणान्तरत्वाऽसम्भवाच्च । न चैवमुक्तानुमानाकारप्रदर्शनं मूलकृन्नामफलम्, आकाङ्क्षादिज्ञानानां निरुक्तानुमितावेव हेतुत्वकथनेनैवाऽभीष्टसिद्धिसम्भवादिति वाच्यम् । तादृशाकाङ्क्षादिज्ञानजन्यज्ञानस्याऽनुमितिरूपतायां विप्रतिपन्नं प्रति तस्याऽनुमितिरूपताव्यवस्थापनोपयिकतया तदभिधानात् । निरुक्तानुमितिसामग्रीसंवलितशब्दसामग्रीस्थले शाब्दबोधानुमित्योरन्यतरानुदयायैकतरसामग्र्या अन्यतरप्रतिबन्धकत्वस्य नैयायिकैः कल्पनीयस्याऽनुपगमेन तादृशशाब्दबोधस्याऽनुमितिरूपताव्यवस्थितेरिति मूलाशयात् । न चैव घटाद्यनुमितिसामग्रीसम्बलनप्रदर्शनेनाऽपि निरुक्तानुमितिसम्भवादेतावद्दूरानुसरणमयुक्तमिति वाच्यम् । स्वतन्त्रेच्छस्येत्यादिन्यायेनोक्तानुमितिसामग्र्याः प्रायिकत्वाभिप्रायेण न तत्र व्यभिचारस्य दोषानावहत्वादिति नव्यवैशेषिकाः **मिथः ससर्गवन्त इति** । घटमानयेत्यादौ कर्मत्वं निष्ठत्वसम्बन्धेन घटवदित्यादिसमूहालम्बनानुमितिपरम् । तेन न शाब्दबोधानुमित्योरसमानाकारताप्रसङ्गः । अत्राऽपि स्मरितपदार्थत्वादिनैव व्याप्यकता पूर्ववद्बोध्या । स्मारितपदार्थे घटत्वादिभान तु पक्षधर्मतावलादेवेति न पूर्ववद्दृष्टान्तासिद्धिबाधयोरन्यतरप्रसङ्ग इति बोध्यम् । **गवयत्वप्रवृत्तिनिमित्तकमिति** । गवयत्वावच्छिन्नशक्तीत्यर्थः । **असतीत्यादि** । शक्तिभ्रमाजन्यलक्षणाग्रहजन्यगवयत्वावच्छिन्नविषयकशाब्दबोधनिरूपितोपस्थितिनिष्ठजनकतानिरूपितजन्यत्वसम्बन्धावच्छिन्नावच्छेदकतानिरूपितविषयित्वसम्बन्धावच्छिन्नावच्छेदकतावद्वृत्तिमत्त्वादित्यर्थः । तद्विषयकशाब्दबोधं प्रति वृत्तिज्ञानजन्यतदुपस्थितेर्हेतुत्वं च सर्वानुमतमेव । सामान्यमुखी व्याप्तिः, पक्षधर्मतावलाच्च विशेषभानम् । नाऽतो दृष्टान्तासिद्धिबाधयोरन्यतरत् । इदं च यत्तदर्थयोरनुगतत्वमभ्युपगम्य । तयोस्तथात्वे त्वाह । **यद्वेति । साधुपदत्वादिति ।** किञ्चिद्विषयकबोधजनकत्वप्रकारतानिरूपितेश्वरेच्छीयविशेष्यतावत्पदत्वादित्यर्थः । वस्तुतस्तु पदत्वादित्येव वक्तव्यम् । वर्णत्वादिति च तदर्थः । साधुपदं तु वर्णमात्रस्य किञ्चिद्भावच्छिन्नशक्तत्वद्योतनायेति ध्येयम । **व्याप्तिज्ञानं विनाऽपि**—व्याप्तिज्ञान विनैव । तथा च क्वचिदपि शाब्दबोधानुमितिसामग्र्योः सम्बलनस्याऽभावात्तस्याऽनुमितिरूपत्वमसम्भवदुक्तिमेवेति भावः । **न हीत्यादि** । शब्दश्रवणानन्तरं सर्वत्र व्याप्तिज्ञाने प्रमाण नाऽस्तीति योजना । **सर्वत्र**—क्वचिदपि । नन्वेवंरीत्याऽऽकाङ्क्षा-

त्रैविध्यमनुमानस्य केवलान्वयिभेदतः ।
द्वैविध्यं तु भवेद् व्याप्तेरन्वयव्यतिरेकतः ॥ १४२ ॥

स्तीति । किं च सर्वत्र शाब्दस्थले यदि व्याप्तिज्ञानं कल्प्यते तदा सर्वत्रानुमितिस्थले पदज्ञानं कल्पयित्वा शाब्दबोध एव किं न स्वीक्रियत इति ध्येयम् ॥ १४०-१४१ ॥

इति शब्दोपमानयोः पृथक्प्रामाण्यनिरूपणम् ॥

त्रैविध्यमिति । अनुमानं हि त्रिविधं-केवलान्वयिकेवलव्यतिरेक्यन्वयव्य-

दिनकरी ।

रूपकार्यान्यथानुपपत्त्या व्याप्तिज्ञानं कल्पनीयमित्यत आह । किं चेति । पदज्ञानं कल्पयित्वेति । पदस्मरणं कल्पयित्वेत्यर्थः । वन्ह्यादिशब्देनाऽर्थस्यैव वन्ह्यादिरूपेणाऽर्थेनाऽपि वह्न्यादिपदस्मरणसम्भवात्, वाच्यत्वादिवद्वाचकत्वादिसम्बन्धस्यापि स्मारकत्वादिति भावः । इदमुपलक्षणम्, आकाङ्क्षादिज्ञानं कल्पयित्वेत्यपि बोद्धव्यम् ।

मणिकृतस्त्वेते पदार्थाः परस्परसंसर्गवन्तः, योग्यतादिमत्पदोपस्थापितत्वादित्यनुमाने योग्यता न लिङ्गविशेषणम्, लिङ्गस्य निश्चितस्यैव निश्चायकतया योग्यतायाश्च संशयेऽपि शाब्दबोधदर्शनात्, अतः पृथगेव शब्दो भानमिति वदन्ति ।

मिश्रास्त्वनुमानमुद्रया शब्दस्य बोधकत्वे घटमानयेति स्वरूपयोग्यम्, घटः कर्मत्वमानयनं कृतिरिति स्वरूपायोग्यमिति न स्यात्, अनुमानस्योभयत्रापि सम्भवात् । न चाऽऽकाङ्क्षाघटितहेत्वभावाज्ञाऽनुमितिस्तत्रेति वाच्यम् । आकाङ्क्षाभ्रमेणाऽनुमितिसम्भवात्, विषयाबाधाच्च तस्याः प्रमात्वात्, शब्दप्रामाण्ये च स्वभावाज्ञ तादृशशब्दस्य बोधकत्वमित्याहुः।

परे तु घटात् पृथगित्यादौ घटावधिकपृथक्त्वप्रकारेण निरवच्छिन्नविशेष्यताकः पृथक्त्वाश्रयस्य शाब्दबोधः सर्वानुभवसिद्धः, स चाऽस्माकं तादृशानुपूर्वीकपदज्ञानत्वेन तादृशशाब्दबोधं प्रति हेतुत्वादुपपद्यते । वैशेषिकाणां तु पृथक्त्वं घटावधिकं, घटपदसाकाङ्क्षपृथक्पदस्मारितत्वादित्यनुमानेन न तन्निर्वाहः, पक्षविधया तदाश्रयस्याऽभानात् । न चैवं पटं पक्षीकृत्य पटो घटावधिकपृथक्त्ववानित्यनुमित्या तन्निर्वाह इति वाच्यम् । पटादिनिष्ठविशेष्यतायास्तत्र पक्षतावच्छेदकीभूतपटत्वावच्छिन्नतया निरवच्छिन्नविशेष्यताकतादृशशाब्दबोधसमानाकारकत्वस्य तथाप्यनिर्वाहादित्याहुरिति दिक् ॥ १४० ॥ १४१ ॥ इति शब्दोपमानयोः पृथक्प्रामाण्यनिरूपणम् ॥

रामरुद्री ।

ज्ञानजन्यस्य बोधस्यैवाऽनुमितिरूपत्वं माऽस्तु, तथाऽपि आकाङ्क्षादिज्ञानस्य स्वातन्त्र्येण हेतुत्वानभ्युपगन्तृचिरन्तनवैशेषिकमतानुसारेणैव सर्वत्र शाब्दबोधानामनुमितित्वमस्वित्यारुह्य तत्र पूर्वोक्तदोषाणां सत्त्वेऽपि सुगमतया समाधानान्तरमाह । किञ्चेति ।

टीकायाम्—मिश्रास्त्विति । आहुरित्यस्वरसोद्भावनम् । तद्बीजं तु स्वरूपयोग्यताधीः प्रकृते कारणत्वरूपत्वं न सम्भवति, स्वरूपसतः शब्दस्य शाब्दबोधं प्रत्यकारणत्वात्, किन्तु कारणतावच्छेदकानुपूर्वीमत्त्वमेव, तच्च घटः कर्मत्वमित्यादौ नाऽस्तीति, मिश्राणामुक्तिस्तु ज्ञायमानपदस्य स्वरूपसदाकाङ्क्षादेश्च हेतुत्वमभिप्रेत्यैवेति ध्येयम् । इति दिगिति । शाब्दबोधस्याऽनुमितिरूपत्वे सिद्धसत्त्वेऽनुपपत्तिरित्यादिकमप्युह्यमित्याशयः ॥ १४१ ॥ इति शब्दोपमानयोः पृथक्प्रामाण्यनिरूपणम् ॥

अन्वयव्याप्तिरुक्तैव व्यतिरेकादिहोच्यते ।
साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत् ॥ १४३ ॥

तिरेकिभेदात् । तत्रासद्विपक्षः केवलान्वयी । यथा ज्ञेयमभिधेयत्वादित्यादौ । तत्र हि सर्वस्यैव ज्ञेयत्वाद् विपक्षासत्त्वम् । (ननु सर्वेषां धर्म्माणां व्यावृत्तत्वात् केवलान्वय्यसिद्धिरिति चेन्न । व्यावृत्तत्वस्य सर्व्वसाधारण्ये तस्यैव केवलान्वयित्वात् । किं च वृत्तिमदत्यन्ताभावाप्रतियोगित्वं केवलान्वयित्वम् । तच्च गगनाभावादौ प्रसिद्धम्) (१) । असत्सपक्षः केवलव्यतिरेकी । यथा पृथिवीतरेभ्यो भिद्यते, गन्धवत्त्वादित्यादौ । तत्र हि जलादित्रयोदशभेदस्य पूर्वमसिद्धतया निश्चितसाध्यवतः सपक्षस्याभाव इति । सत्सपक्षविपक्षोऽन्वयव्यतिरेकी, यथा वह्निमान् धूमादित्यादौ । तत्र सपक्षस्य महानसादेर्विपक्षस्य जलह्रदादेश्च सत्त्वादिति ॥ १४२ ॥

॥ इत्यनुमानत्रैविध्यनिरूपणम् ॥

तत्र व्यतिरेकिणि व्यतिरेकव्याप्तिज्ञानं कारणं, तदर्थं व्यतिरेकव्याप्तिं निर्वक्ति । साध्याभावव्यापकत्वमिति । साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः । अत्रेदं बोध्यम् । यत्सम्बन्धेन यदवच्छिन्नं प्रति येन सम्बन्धेन येन

दिनकरी ।

तत्र—तेषु मध्ये । असद्विपक्ष इति । अत्यन्ताभावाप्रतियोगिसाध्यक इत्यर्थः । यथाश्रुते सिद्धयसिद्धिव्याघातात् । अत्यन्ताभावाप्रतियोगित्वस्य च प्रमेयत्वादौ सत्त्वाल्लक्षणसमन्वयः । न चैतन्न सम्भवति, प्रमाविषयत्वरूपस्य तस्य नानात्वेनाऽननुगमादिति वाच्यम् । प्रमात्वस्यैव परम्परासम्बन्धेनानुगतत्वात् । इत्थं च प्रमेयत्वादेर्व्यतिरेकित्वभ्रमेपि केवलान्वयित्वमेवेति मन्तव्यम् । असत्सपक्ष इति । सिद्धयसिद्धिव्याघातादत्राप्यगृहीतहेतुसहचारं यद्व्यतिरेकिसाध्यं तत्कत्वमर्थो बोध्यः । सत्सपक्षेति । गृहीतान्वयव्यतिरेकिसाध्यकमित्यर्थः ॥ १४२ ॥ इत्यनुमानत्रैविध्यनिरूपणम् ॥

यत्सम्बन्धेन यदवच्छिन्नं प्रतीति । यत्सम्बन्धावच्छिन्नयद्रूपावच्छिन्नव्याप्यतारामरुद्री ।

अत्यन्ताभावेति । निरवच्छिन्नवृत्तिमदत्यन्ताभावेत्यर्थः । तेनाऽऽकाशाभावकपिसंयोगाभावादेरभावप्रतियोगित्वेऽपि नाऽव्याप्तिः । अगृहीतहेतुसहचारमिति । अन्वयव्यतिरेकव्यभिचारव्याप्तिवारणायाऽगृहीतेत्यादि । केवलान्वयिनि व्यतिरेकित्वभ्रमदशायामतिव्याप्तिवारणाय व्यतिरेकीति । गृहीतेत्यादि । गृहीतान्वय यद्व्यतिरेकिसाध्यम्, तत्कमित्यर्थः । यद्यपि केवलान्वयित्वमत्यन्ताभावाप्रतियोगित्वम्, अगृहीतान्वयत्वे सति व्यतिरेकित्वं केवलव्यतिरेकित्वम्, गृहीतान्वयत्वे सति व्यतिरेकित्वमन्वयव्यतिरेकित्वमित्यपि हेतुनिष्ठमेव यथाश्रुते वक्तुं शक्यम्, तथापि केवलान्वयित्वादीनामुक्तरूपत्वे 'सर्वस्यैवाऽभिधेयत्वाद्विपक्षासत्त्वम्' इति वक्ष्यमाणग्रन्थालग्नकत्वापत्तेरीदृशानरुक्तिरादृता, अन्यथा सर्वत्र साध्यसत्त्वेन विपक्षासत्त्वोत्कीर्तनस्य सन्दर्भविरोधापत्तेरिति ध्येयम् । प्रकृतहेतुसहचारग्रहाधीन व्यतिरेकिसाध्यकानुमित्युपधायकत्वमन्वयव्यतिरेकित्वं, प्रकृतहेतुसहचारग्रहाधीनव्यतिरेकिसाध्यकानुमित्युपधायकत्वं केवलव्यतिरेकित्वं बोध्यम् । तेन सहचारग्रहविरहदशायां नातिव्याप्तिः ॥ १४२ ॥

॥ इत्यनुमानत्रैविध्यनिरूपणम् ॥

---

(१) अयं पाठो न लिखितपुस्तके दृश्यते ।

रूपेण व्यापकता गृह्यते तत्संबन्धावच्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभाव-वत्ताज्ञानात् तत्सम्बन्धावच्छिन्नप्रतियोगिताक तद्धर्मावच्छिन्नाभावस्य सिद्धिः (१) । इत्थं च यत्र विशेषणतादिसम्बन्धेनेतरत्वव्यापकत्वं गन्धाभावे गृह्यते तत्र गन्धाभावाभावेनेतरत्वात्यन्ताभावः सिद्ध्यति । यत्र तु तादात्म्य-सम्बन्धेनेतरव्यापकता गृह्यते तत्र तादात्म्यसम्बन्धेनेतरस्याभावः सिद्ध्यति। स एवान्योन्याभावः(२)। एवं यत्र संयोगसम्बन्धेन धूमं प्रति संयोगसम्बन्धेन वह्नेर्व्यापकता गृह्यते तत्र संयोगसम्बन्धावच्छिन्नप्रतियोगिताकवह्नयभावेन जलह्रदे संयोगसम्बन्धावच्छिन्नप्रतियोगिताकधूमाभावः सिद्ध्यति ।

अत्र च व्यतिरेकव्याप्तिग्रहे व्यतिरेकसहचारज्ञानं कारणम् ।

दिनकरी

निरूपितव्यापकता गृह्यते इत्यर्थः । इतरव्याप्यतेति । इतरस्य व्याप्यतेत्यर्थः । तादात्म्ये-नेतरव्यापकतेति पाठे तादात्म्यसम्बन्धावच्छिन्ना या इतरनिष्ठा व्याप्यता तन्निरूपितव्यापक-तेत्यर्थः । तादात्म्यसम्बन्धेनेति । तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावः सिद्ध्य-तीत्यर्थः । येन सम्बन्धेन व्याप्यता गृह्यतें इत्यनुक्तौ तु तादात्म्येनेतरस्य व्याप्यता यत्र गृहीता तत्रेतरात्यन्ताभावस्य सिद्धिः स्यादिति भावः । संयोगसम्बन्धावच्छिन्नप्रतियोगिता-कवन्ह्यभावेनेति सावधारणम् , तेन सम्बन्धान्तरावच्छिन्नप्रतियोगिताकेन न तत्सिद्धिरि-त्यर्थः । अनेन च येन सम्बन्धेन व्यापकता गृह्यते इत्यस्य फलं सूचितम् । प्रदर्शितरीत्यैव येन रूपेण यदवच्छिन्नेत्यनयोरपि प्रयोजनमूह्यम् । ननु साध्यसाधनसहचारज्ञानाभावात् कथं व्यतिरेकव्याप्तिज्ञानमित्यत आह । अत्र चेति । तथा च व्यतिरेकसहचारेणैव व्यतिरेक-व्याप्तिग्रहाच्चान्वयसहचारग्रहापेक्षेति भावः । ननु साध्यप्रसिद्धिं विना तदभावाज्ञाने व्यति-रेकव्याप्तेर्दुर्ग्रहत्वं स्यात्, साध्यसिद्धौ च सिद्धसाधनमिति चेन्न । साध्यस्य घटादाविव प्रत्यक्षसिद्धत्वात् , पृथिवीतरभिन्नेत्युद्देश्यप्रतीतेरसिद्धत्वान्न सिद्धसाधनम् । पक्षतावच्छेदक-नानात्व एवांशतः सिद्धसाधनस्य दोषत्वात् । अत एवानित्ये वाङ्मनसी इत्यत्र वागिति-बुद्धेरुद्देश्याया अनित्यत्वस्य सिद्धत्वेनांशतः सिद्धसाधनमिति । ननु तथापि घटः कथं पक्षः ? साध्यस्य निश्चयेन तत्सन्देहविषाधयिषयोरभावादिति चेन्न । यतः सर्वा पृथिवीतरभिन्ना न वेति संशयस्य तत्प्रकारकविषाधयिषायाश्च घटविषयत्वात् , घटत्वेन विशेषदर्शने सिद्धौ वा तेन रूपेण संशयविषाधयिषे न भवतः, पृथिवीत्वेन तु भवत एवेति । ननु पृथिवीत्वात् घटवदित्यन्वयिनैवेतरभेदसिद्धौ व्यतिरेकिवैयर्थ्यमिति चेन्न । अन्वयव्याप्तेरग्रहे व्यतिरेक-व्याप्तिस्फूर्तिदशायां व्यतिरेक्यनुमानप्रवृत्तेर्निष्प्रत्यूहत्वात् ।

रामरुद्री ।

निष्प्रत्यूहत्वादिति । एतच्च सर्वमाघातनः । तद्व्यापकीभूताभावप्रतियोगिताज्ञानस्य तदभावा-

---

(१) येन रूपेण येन सम्बन्धेन यत्र व्यापकता गृह्यते तेन रूपेण तत्सम्बन्धावच्छिन्न-प्रतियोगिताकतदभाववत्ताज्ञानात् यत्सम्बन्धेन यं प्रति यस्य व्याप्यता गृह्यते तत्सम्बन्धाव-च्छिन्नप्रतियोगिताकतद्धर्मावच्छिन्नाभावस्य सिद्धिरिति पाठान्तरं क्वचित्पुस्तके ।

(२) न चात्र साध्याप्रसिद्ध्या पृथिवीतरभेदवतीत्यनुमितिर्न स्यात् विशेषणज्ञानाभावा-दिति वाच्यम् । इष्टापत्तेः, पृथिव्यामितरभेद इति प्रथममनुमितिश्चरमं पृथिवीतरभेदवतीति भावः ।

अर्थापत्तिस्तु नैवेह प्रमाणान्तरमिष्यते ।
व्यतिरेकव्याप्तिबुद्ध्या चरितार्था हि सा यतः ॥ १४४ ॥

केचित्तु व्यतिरेकसहचारेणान्वयव्याप्तिरेव गृह्यते. न तु व्यतिरेकव्याप्तिज्ञानमपि कारणम् । यत्र व्यतिरेकसहचाराद्याप्तिग्रहस्तत्र व्यतिरेकीत्युच्यते । साध्यप्रसिद्धिस्तु घटादावेव जाता, पश्चात् पृथिवीत्वावच्छेदेन साध्यत इति वदन्ति ॥ १४३ ॥

॥ इति व्यतिरेकव्याप्तिनिरूपणम् ॥

अर्थापत्तिस्त्विति । अर्थापत्तिं प्रमाणान्तरं केचन मन्यन्ते। तथाहि यत्र देवदत्तस्य शतवर्षजीवित्वं ज्योतिःशास्त्रादवगतं जीविनो गृहासत्त्वं च प्रत्यक्षादवगतं तत्र शतवर्षजीवित्वान्यथानुपपत्त्या बहिःसत्त्वं कल्प्यते। तदप्यनुमानेनगतार्थत्वान्नेष्यते । तथाहि यत्र जीवित्वस्य बहिःसत्त्वगृहसत्त्वान्यतरव्याप्यत्वं गृहीतं तत्रान्यतरसिद्धौ जायमानायां गृहसत्त्वबाधाद्बहिसत्त्वमनुमितौ भासते । एवं पीनो

दिनकरी ।

आचार्यमतमाह । केचित्त्विति । व्यतिरेकसहचारेण—अन्वयसहचारनिरपेक्षव्यतिरेकसहचारेण । अन्वयव्याप्तिरेवेत्येवकारेण व्यतिरेकव्याप्तेर्व्युदासः । नन्वेवं व्यतिरेकव्याप्तिज्ञानरूपकारणाभावात् कथं व्यरेक्यनुमितिरत आह । नात्विति । व्यतिरेकव्याप्तिज्ञानमित्यस्यानुमितावित्यादिः । नन्वन्वयव्याप्तिज्ञानस्यैव हेतुत्वे कथं व्यतिरेकीति व्यवहार इत्यत आह । यत्रेति । ननु पृथिवीतरेभ्यो भिद्यते पृथिवीत्वादित्यादौ साध्यस्येतरभेदादेरप्रसिद्धत्वात् कथं व्यतिरेकसहचारग्रह इत्यत आह । साध्यप्रसिद्धिस्त्विति । ननु घटादौ साध्ये निर्णीते कथं तत्रेतरभेदानुमितिरत आह । पश्चादिति । अवच्छेदकावच्छेदेनानुमितौ सामानाधिकरण्येन साध्यसिद्धेरप्रतिबन्धकत्वादिति भावः । अत्र चान्वयव्याप्तिघटकतावत्पदार्थज्ञानादेवान्वयव्याप्तिज्ञानोत्पत्तौ व्यतिरेकसहचारज्ञानस्य तद्धेतुत्वे मानाभावः । न च व्यतिरेकसहचारेणेत्यत्र प्रयोजकत्वं तृतीयार्थः, तच्च नानुपपन्नम्, अन्वयव्याप्तिज्ञानप्रतिबन्धकव्यभिचारशङ्कानिरासद्वारा व्यतिरेकसहचारज्ञानस्य तत्र प्रयोजकत्वादिति वाच्यम् । व्यतिरेकसहचारग्रहेऽप्यधिकरणान्तरे व्यभिचारशङ्कातादवस्थ्यात् । तदधिकरणीयव्यभिचारशङ्कानिरासद्वारा तत्र तस्योपयोगित्वमित्यपि न, तदधिकरणे साधनाभावग्रहमात्रेणैव तदधिकरणीयव्यभिचारशङ्कानिवृत्तेरित्यस्वरसो वदन्तीत्यनेन सूचितः ॥ १४३ ॥

इति व्यतिरेकव्याप्तिनिरूपणम् ॥

रामरुद्री ।

नुमितौ हेतुत्वस्यैव मूलकृतोक्ततयोक्तरीत्याऽऽक्षेपायोगात् । साध्यासिद्धावपि साध्यविशेष्यकानुमितेरिष्टत्वादिति । आचार्यमतमुपन्यस्यति मूले-केचित्त्विति नन्वेतन्मतेऽप्रसिद्धसाध्यकानुमितिर्न स्यात्, अन्वयव्याप्तेः साध्यघटितमूर्तिकत्वादित्यत आह । साध्यसिद्धिस्त्विति । घटादावेवेति । अभावप्रत्यक्षस्याऽनुयोगिविषयकत्वनियमो न बाधक इति द्योतनाय ॥ १४३ ॥

॥ इति व्यतिरेकव्याप्तिनिरूपणम् ॥

सुखं तु जगतामेव काम्यं धर्मेण जायते।
अधर्मजन्यं दुःखं स्यात् प्रतिकूलं सचेतसाम् ॥ १४५ ॥

देवदत्तो दिवा न भुङ्क्ते इत्यादौ पीनत्वस्य भोजनव्याप्यत्वावगमाद्भोजनं सिद्ध्यति। दिवाभोजनबाधे च रात्रिभोजनं सिद्ध्यति।

अभावप्रत्यक्षस्याऽऽनुभविकत्वादनुपलम्भोऽपि न प्रमाणान्तरम्। किं चानुपलम्भस्याज्ञातस्य हेतुत्वे ज्ञानाकरणकत्वात् प्रत्यक्षत्वं, ज्ञातस्य हेतुत्वे तु तत्राप्यनुपलम्भान्तरापेक्षेत्यनवस्था।

एवं चेष्टापि न प्रमाणान्तरम्। तस्याः सङ्केतग्राहकशब्दस्मारकत्वेन लिप्यादिसमशीलत्वाच्छब्द एवान्तर्भावात्। यत्र तु व्याप्त्यादिग्रहस्तत्रानुमितिरेवेति ॥ १४४ ॥ इत्यर्थापत्त्यादिनिराकरणम्।

सुखं निरूपयति। सुखं तु जगतामेवेति। **काम्यम्**-अभिलाषविषयः। धर्मेणेति। **धर्मत्वेन सुखत्वेन कार्य्यकारणभाव इत्यर्थः** ॥ इति सुखनिरूपणम् ॥

दुःखं निरूपयति। अधर्मेति। **अधर्मत्वेन दुःखत्वेन कार्य्यकारणभाव इत्यर्थः**। प्रतिकूलमिति। **दुःखत्वज्ञानादेव सर्व्वेषां स्वाभाविकद्वेषविषय इत्यर्थः** ॥ १४५ ॥

॥ इति दुःखनिरूपणम् ॥

दिनकरी।

केचन-मीमांसकाः। **तदपि**-अर्थापत्तेः प्रमाणान्तरत्वमपि। **दिवा न भुङ्क्ते इत्यादाविति** आदिना मयूरः पर्वतेतरस्मिन् न नृत्ययि नृत्यति **चेत्यस्य** सग्रहः। नन्वेतद्वाक्यान्मयूरः पर्वते नृत्यतीति ज्ञानमुत्पद्यते, न त्वेतद्व्यतिरेकिणः सम्भवति, पर्वतनृत्यस्य साध्यस्याप्रसिद्धौ व्यतिरेकव्याप्त्यनिरूपणादिति कथं नार्थापत्तिः प्रमाणान्तरमिति चेन्न। मयूरनृत्यं पर्वताधिकरणकं, पर्वतेतरानधिकरणत्वे सति साधिकरणत्वात्, पर्वतत्ववदित्यन्वयव्यतिरेकिणैव पर्वताधिकरणकमयूरनृत्यज्ञानसम्भवात् ॥ १४४ ॥ इत्यर्थापत्त्यादिनिराकरणम् ॥

धर्मत्वेनेति। इदं च प्राचां मतेनोक्तम्। नवीनमते तु नित्यं विज्ञानमानन्दं ब्रह्मेति श्रुत्या भगवति नित्यसुखसिद्धौ धर्मस्य कार्यतावच्छेदकं जन्यसुखत्वं सुखत्वावान्तरजातिर्वेति बोद्धव्यम् ॥ १४५ ॥ इति सुखदुःखनिरूपणम् ॥

रामरुद्री।

कारिकायाम्—**अर्थापत्तिस्त्विति**। **व्यतिरेकव्याप्तिबुद्धयेति**। मीमांसकानामर्थापत्तिसामग्रीकाले नैयायिकाभिमततत्स्थानाभिषिक्तानुमितिसामग्र्या नियमतः सत्त्वेऽविवादसूचनाय **व्यतिरेकेत्युक्तम्**। तथा हि मीमांसकैरर्थापत्तिरापत्तिरूपैव प्रमाणान्तरतया स्वीक्रियते, आपत्तिं प्रति चाऽऽपाद्यव्याप्यापादकवत्ताज्ञानं कारणम्। तथा च चैत्रो यदि गृहसत्त्वबहिः सत्त्वान्यतराभाववान् स्यात् जीवित्वाभाववान् स्यादित्याकारिकाया आपत्तेर्गृहसत्त्वबाधसहकृताया बहिःसत्त्वकल्पकत्वं तदैव स्यात्, यदि एतादृशापत्तेः पूर्वं आपाद्यापादकयोर्व्याप्तिनिश्चयः स्यात्, तादृशव्याप्तिनिश्चयस्य च जीवित्वगृहसत्त्वबहिःसत्त्वयोर्व्यतिरेकनिश्चयरूपताया आवश्यकत्वमिति अनुमानेनैव चरितार्थ्यं सम्भवदुक्तिकमेवेति ॥ १४४ ॥

इत्यर्थापत्त्यादिनिराकरणम् ॥

मूले—**अभिलाषविषय इति**। अन्येच्छानधीनेच्छाविषय इत्यर्थः। यद्यप्येवं सति दुःखाभावसाधनस्याऽपि एवंविधेच्छाविषयत्वोक्त्याऽतिव्याप्तिर्दुर्वारा, तथाऽपि अन्यद्वेषानधीनत्वमपीच्छायां विशेषणं देयमिति न क्षतिः ॥ इति सुखदुःखनिरूपणम् ॥

निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते।
इच्छा तु तदुपाये स्यादिष्टोपायत्वधार्यदि ॥ १४६ ॥

इच्छां निरूपयति। निर्दुःखत्व इति। इच्छा हि फलविषयिणी उपायविषयिणी च। फलं तु सुखं दुःखाभावश्च। तत्र फलेच्छां प्रति फलज्ञानं कारणम्। अत एव पुरुषार्थः सम्भवति यज्ज्ञातं सत् स्ववृत्तितयेष्यते स पुरुषार्थ इति तल्लक्षणात्। इतरेच्छानधीनेच्छाविषयत्वं फलितोऽर्थः।

उपायेच्छां प्रतीष्टसाधनताज्ञानं कारणम्।

दिनकरी।

तत्र—तयोर्मध्ये। अत एव—फलज्ञानस्य फलेच्छां प्रति हेतुत्वादेव। पुरुषार्थः सम्भवतीति। सुखं दुःखाभावश्च पुरुषार्थः सम्भवतीत्यर्थः। ननु यज्ज्ञातमित्यादेः स्वविषयकज्ञानजन्येच्छाविषयत्वमित्यर्थः। तथा चोपायाऽतिव्याप्तिः, तस्यापि स्वविषयकेष्टसाधनताज्ञानजन्येच्छाविषयत्वादत आह—इतरेच्छेति।

रामरुद्री।

मूले—उपायेच्छां प्रतीति। सुखत्वप्रकारत्वानिरूपितोद्देश्यतासम्बन्धेनेच्छां प्रतीत्यर्थः। तेन सुखत्वभ्रमेण पाकादाविच्छोत्पादेन तत्रेष्टसाधनताज्ञानाभावेऽपि न क्षतिः। न चैतादृशकार्यकारणभावे किं प्रमाणमिति वाच्यम्। निष्फले चैत्यवन्दनादौ प्रवृत्त्यभावस्यैव प्रमाणत्वात्। ननु स्वरूपसदिच्छाविषयसाधनताज्ञानस्य कारणत्वमावश्यकम्, इच्छाविषयकभ्रमस्मरणादिसत्त्वे इच्छाविरहे तत्साधनताज्ञानस्येच्छानुपधायकत्वात्। एवं च यत्रौदनस्यौदनत्वेनेच्छाविषयता, द्रव्यत्वेन तत्साधनता च पाके गृहीता, तत्रेच्छोत्पादापत्तिर्दुर्वारा। किञ्च तत्स्थले ओदनादिविषयकेच्छाविरहकालेऽपि कालान्तरीणतद्विषयतायास्तत्राऽबाधितत्वादिदानीन्तनतत्साधनताज्ञानसत्त्वेऽपि पाकादाविच्छोत्पादापत्तिर्दुर्वारैव। न च स्वरूपसदिच्छाविषयतावच्छेदकावच्छिन्नसाधनताज्ञानस्यैवेच्छां प्रति हेतुत्वोपगमान्नैष दोषः। ओदनत्वादिनेच्छाविषयतादशायां तादृप्येण तत्साधनताज्ञानस्येवोत्करीयेच्छाजनकत्वसम्भवेन प्रागुक्तस्थले तादृशसाधनताज्ञानविरहादेवेच्छोत्पादापत्तिवारणसम्भवात्। कारणतावच्छेदकविशिष्टकारणसत्त्वस्यैव कार्योत्पादप्रयोजकत्वोपगमेन च कालान्तरीणेच्छाविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नसाधनताज्ञानस्वाऽपि फलानुपधायकत्वसम्भवादिति वाच्यम्। एवमप्योदनत्वादिनेच्छाविषयतादशायां प्रमेयत्वेनौदनत्वाद्यवगाहि ओदनत्वादिना तत्साधनताज्ञानादपि इच्छोत्पादापत्तेर्दुर्वारत्वात्। कारणतावच्छेदकघटकफलादीनामिच्छापूर्वमसत्त्वेन कारणतावच्छेदकविशिष्टकारणसत्त्वस्याऽपि प्रकृते फलोत्पादप्रयोजकत्वकल्पनासम्भवादिति चेन्न। साधनतावच्छेदकादिभेदभिन्नाया व्याप्तेरनुगमेन तद्घटितपरामर्शनिष्ठानुमितिकारणतावच्छेदकस्याऽननुगतत्वेऽपि अगत्याऽव्यवहितोत्तरत्वं कार्यतावच्छेदककोटौ निवेश्याऽनन्तधर्मप्रकारेणैवाऽनुमितौ कार्यकारणभावः स्वीक्रियते, तथाऽत्राप्यगत्योदनत्वादिप्रकारकेच्छाऽव्यवहितोत्तरपाकत्वादिप्रकारकेच्छां प्रति तादृशेच्छायाः ओदनादिसाधनताज्ञानाऽव्यवहितोत्तरपाकादिगोचरेच्छां प्रति ओदनादिसाधनताज्ञानस्य चेत्यादिक्रमेणाऽनेकविधा एव कार्यकारणभावाः स्वीक्रियन्ते। अत एवोपायेच्छां प्रति फलेच्छा कारणमिति प्राक्तनमूलसङ्गतिः। तथा च न कोऽपि दोषः। न चैवमोदनसाधनताज्ञानतैमनेच्छयोः सत्त्वे इच्छोत्पादापत्तिर्दुर्वारेति वाच्यम्। तद्धर्मावच्छिन्नसाधनताज्ञानतद्धर्मप्रकारकेच्छयोः परस्परसहकारेण फलोत्पादप्रयोजकत्वाभ्युपगमादेवोक्तदोषवारणसम्भवात्। फलेच्छाजन्यतावच्छेदकफलसाधनताज्ञानजन्यतावच्छेदकयोर्व्याप्यव्यापकभावविरहेऽपि तयोः परस्परसहकारित्वमविरुद्धम्, कार्यतावच्छेदकयोः सामानाधिकरण्यमात्रस्यैव तत्र प्रयोजकत्वात्। इदमेवाऽर्थसमाजाधीना कार्योत्पत्तिरिति गीयते॥ नचैवमप्युपायेच्छायामुपायधर्मिकमिष्टसाधनताज्ञानमिष्टधर्मिकमुपायसाध्यत्वज्ञानं

चिकीर्षा कृतिसाध्यत्वप्रकारेच्छा तु या भवेत् ।

चिकीर्षेति । कृतिसाध्यत्वप्रकारिका कृतिसाध्यविषयिणीच्छा चिकीर्षा । पाकं कृत्या साधयामीति तदनुभवात् । चिकीर्षां प्रति कृतिसाध्यताज्ञानमि-

दिनकरी ।

कृतिसाध्यताज्ञानमिति । ननु कृतिसाध्यताज्ञानस्य स्वातन्त्र्येण चिकीर्षां प्रति हेतुत्वे मानाभावः, तद्धर्मावच्छिन्नविशेष्यकेष्टसाधनताज्ञानस्य तद्धर्मप्रकारकेच्छां प्रति हेतुतायाः क्लृप्तत्वात् कृतिसाध्यपाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानादेव चिकीर्षायाः सम्भवादिति चेन्न । यत्र कृतिसाध्यपाकत्वेनेष्टसाधनत्वं न गृहीतम्, अपि तु शुद्धपाकत्वेन कृतिसाध्यत्वं शुद्धपाकत्वेन चेष्टसाधनत्वं गृहीतं, तत्रापि पाकगोचरप्रवृत्तेरानुभविकतया

रामरुद्री ।

वा हेतुरित्यत्र किं विनिगमकमिति वाच्यम् । स्वर्गकामो यजेतेत्यादेस्तथा सति प्रवृत्तिजनकज्ञानजनकत्वापत्तेरेव दोषत्वात्, तत्र साध्ये यागादेरन्वये स्वर्गकामानन्वयप्रसङ्गात् । मन्मते तु इष्टसाधनकृतिसाध्ययागानुकूलकृतिमान् स्वर्गकाम इति बोधः सम्भवति । न च मन्मतेऽपि यागसाध्यमिष्टं स्वर्गकामकृतिसाध्यमिति बोधः सम्भवत्येवेति वाच्यम् । प्रथमान्तमुख्यविशेष्यकबोधस्याऽनुभवसिद्धस्य परित्यागायोगादिति केचित् । मिश्रास्तु पाकत्वावच्छिन्नविषयतानिरूपितसाधनत्वविषयतानिरूपितौदनत्वावच्छिन्नविषयताशालित्वेनेष्टसाधनत्वेष्टधर्मिकसाध्यताज्ञानद्वयसाधारणरूपेणैवेच्छां प्रति जनकत्वं स्वीक्रियत इति न दोष इत्याहुः ।

मूले—चिकीर्षा चेति । प्रवृत्तिजनकीभूता चिकीर्षा चेत्यर्थः । तेन फलचिकीर्षायामतिव्याप्तिवारकस्य कृतिसाध्यविषयित्वस्य न वैयर्थ्यम् । टीकायाम्—**नन्वित्यादि ।** न चैवं पाकः कृतिसाध्य इष्टसाधनं चेत्याकारकज्ञानात्तद्गोचरचिकीर्षा न स्यादिति वाच्यम् । घट इष्टसाधनं नीलश्चेत्यादिज्ञानकाले नीलघटत्वप्रकारिकाया इव प्रकृतेऽपि कृतिसाध्यत्वप्रकारकेच्छाया अनुत्पादस्येष्टत्वात् । अथैवमपि पाकत्वादिप्रकारकेच्छां प्रति पाकत्वावच्छिन्नविशेष्यताकेष्टसाधनत्वप्रकारकज्ञानस्य हेतुताया आवश्यकतया तेनैव कृतिसाध्यत्वप्रकारकपाकत्वावच्छिन्नविशेष्यकेच्छोत्पत्तिसम्भवे कृतिसाध्यपाकत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानस्य हेतुत्वमप्रामाणिकमेवेति तादृशगुरुरूपेण कार्यकारणभावस्वीकारापेक्षया पाकत्वावच्छिन्नविशेष्यककृतिसाध्यताज्ञानत्वेन हेतुत्वकल्पनं युक्तम् । न च तत्तद्धर्मावच्छिन्नविशेष्यकेष्टसाधनताज्ञानस्य तत्तद्धर्मप्रकारकेच्छाहेतुत्वेऽनन्तकार्यकारणभावप्रसङ्गात् प्रकारतासम्बन्धेनेच्छां प्रति धर्मितावच्छेदकतासम्बन्धेनेष्टसाधनताज्ञानस्य स्वीयेष्टसाधनत्वप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन ज्ञानस्यैव वा हेतुताया आवश्यकत्वात् तेनैव पाकत्वावच्छिन्नधर्मिककृतिसाध्यत्वप्रकारकेच्छाया अपि कृतिसाध्यत्वप्रकारकज्ञानसाध्यत्वोपपत्तावेतादृशकार्यकारणभावाङ्गीकारो निर्युक्तिक एवेति वाच्यम् । पाक इष्टसाधनं कृतिसाध्य इष्टसाधनमिति समूहालम्बनस्थले पाकधर्मिकचिकीर्षाया ईदृशकार्यकारणभावबादिभिर्निवारयितुमशक्यतया तद्वारणाय स्वीयकृतिसाध्यत्वप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेनेच्छां प्रति स्वीयकृतिसाध्यत्वप्रकारतानिरूपितविशेष्यतावच्छेदकत्वाभिन्नेष्टसाधनत्वप्रकारतानिरूपितविशेष्यतावच्छेदकतासम्बन्धेन ज्ञानस्य हेतुतायास्त्वया वाच्यतया तदपेक्षया लाघवेन कृतिसाध्यत्वप्रकारकपाकविषयकेच्छां प्रति कृतिसाध्यत्वप्रकारकपाकविशेष्यकज्ञानस्य हेतुताया एव स्वीकरणीयत्वात् कारणतावच्छेदककोटाविष्टसाधनताज्ञानान्तर्भावस्याऽनावश्यकत्वात् । न चैवमपि यत्र चिकीर्षासामग्री प्रतिबन्धिका तत्र पाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानविशिष्टतादृशकृतिसाध्यताज्ञानत्वेन प्रतिबन्धकत्वकल्पनापेक्षया कृतिसाध्यपाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानत्वेन प्रतिबन्धकताकल्पने लाघवात्तेन रूपेणैव हेतुत्वमुचितमिति वाच्यम् । तादृशस्थले चिकीर्षासामग्यनात्मकेच्छासामग्त्या एव प्रतिबन्धिकायाः सम्भवेनेदृशकार्यकारणभावप्रतिबध्यप्रतिबन्धकभावयोरनुपगमादिति चेन्न ।

तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत् ॥ १४७ ॥
बलवद्द्विष्टहेतुत्वमतिः स्यात्प्रतिबन्धिका ।

साधनताज्ञानं च कारणम् । तद्धेतुरिति । **अत एव वृष्ट्यादौ कृतिसाध्यताज्ञानाभावान्न चिकीर्षा ॥ १४७ ॥**

बलवदिति । **बलवद्द्विष्टसाधनताज्ञानं तत्र प्रतिबन्धकमतो मधुविषसम्पृक्तादिनकरी ।**

तदनुरोधेन चिकीर्षाया अप्यावश्यकत्वेन तन्निर्वाहाय कृतिसाध्यताज्ञानस्य स्वातन्त्र्येण हेतुताया आवश्यकत्वात् । अथ कृत्यसाध्यताज्ञानस्य प्रतिबन्धकत्वादेव वृष्ट्यादौ चिकीर्षानुत्पादात् कृतिसाध्यताज्ञानस्य चिकीर्षां प्रति हेतुत्वे मानाभाव इति चेन्न । कृतिसाध्यत्वाभावतद्व्याप्यतदवच्छेदकधर्मज्ञानानां प्रतिबन्धकत्वकल्पनापेक्षया कृतिसाध्यताज्ञानस्य हेतुत्वे लाघवात् । **इष्टसाधनताज्ञानमिति ।** अन्यथा निष्फलत्वज्ञानेऽपि चैत्यवन्दनादौ चिकीर्षापत्तिरिति भावः । अत्रेदं बोद्धव्यम् । पाकविशेष्यकेष्टसाधनताज्ञानस्य कार्यतावच्छेदकं न पाकादिगोचरचिकीर्षात्वं, कृतिसाध्यत्वप्रकारकत्वनिवेशे प्रयोजनविरहात्, पाको जायतामितीच्छाया असङ्ग्रहापत्तेश्च । किन्तु पाकत्वावच्छिन्नमुख्यविशेष्यकेच्छात्वम् । पाकसाध्यं सुखं जायतामितीच्छायां व्यभिचारवारणाय—**मुख्येति ।** इष्टसाधनतेरयत्नेच्छा स्वरूपसती विशेषणम् । तेनेच्छाज्ञानशून्यकालेऽपि चिकीर्षानिर्वाहः ।

अत एव—कृतिसाध्यताज्ञानस्य हेतुत्वादेव ॥ १४६ ॥ १४७ ॥

बलवद्द्विष्टेति । द्विष्टं=द्वेषविषयीभूतम् । द्वेषश्च दुःखे तादृष्येण ज्ञानात्, सर्पादौ तत्साधनताज्ञानात् । द्वेषे बलवत्त्वं जातिविशेषः । **प्रतिबन्धकमिति ।** ननु बलवद्द्वेषविष-

रामरुद्री ।

यथा शुद्धघटत्वावच्छिन्नधर्मिकसिद्धत्वप्रहदशायां चीलघटत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानान्नीलघटत्वप्रकारकेच्छा जायते तथा शुद्धपाकत्वावच्छिन्नधर्मिकसिद्धत्वप्रहदशायामपि कृतिसाध्यपाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानाच्चिकीर्षा जायत इति सर्वानुभवसिद्धम् । एवं च शुद्धपाकत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानकृतिसाध्यताज्ञानयोरेव तादृशचिकीर्षाहेतुत्वे शुद्धपाकत्वावच्छिन्नधर्मिकेष्टसाधनत्वकृतिसाध्यत्वयोर्ग्रहे तद्धर्मिकसिद्धताग्रहदशायामपि चिकीर्षोत्पादापत्तिर्दुर्वारा । अतः कृतिसाध्यपाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानस्य हेतुत्वमङ्गीकार्यम् । न च तत्र कृतिसाध्यताज्ञानसत्त्वे इच्छोत्पत्तिरिष्यत एवेति वाच्यम् । अनुभवविरोधात्, तत्र फलत्वीकारे नादृशसिद्धत्वज्ञानानास्कन्दितेच्छासामान्यसामग्र्यात्मकेष्टसाधनताज्ञानविरहेणोक्तस्थले ज्ञानोत्पादापत्तेर्दुर्वारत्वात्, कृतिसाध्यपाकत्वावच्छिन्नधर्मिकसिद्धत्वज्ञानस्योत्तेजकत्वमभ्युपगम्य तदभावविशिष्टेष्टसाधनताज्ञानविशिष्टकृतिसाध्यताज्ञानस्य प्रतिबन्धकत्वाभ्युपगमे गौरवात् । मन्मते तु कारणद्वयघटिताया एव चिकीर्षासामग्र्याः प्रतिबन्धकत्वस्य वक्तव्यतया लाघवादिति निगवः । **स्वातन्त्र्येण हेतुताया आवश्यकत्वादिति ।** केचित्तु स्वकृतिसाध्यत्वप्रकारिकेच्छैव प्रवृत्तिहेतुः । स्वकृत्यसाध्यतया ज्ञाते पुरुषान्तरीयकृतिसाध्यतां ज्ञातवतस्तत्प्रकारकेच्छासम्भवेऽप्यप्रवृत्तेः । साध्यत्वमपि फलोपधानात्मकसाधनतावटितमेव ग्राह्यम् । तेनाऽस्मदादिकृतेः कृतित्वेन मेरुलङ्घनादावपि स्वरूपयोग्यतया तत्साध्यताज्ञानान्न मेरुलङ्घनादौ प्रवृत्त्यापत्तिः । ईदृशसाध्यत्वस्य फलोत्पत्तेः पूर्वं सर्वत्र निश्चयासम्भवेन संशयनिश्चयसाधारणज्ञानत्वरूपेणैव कृतिसाध्यताज्ञानस्य प्रवृत्तिकारणचिकीर्षाहेतुत्वं वक्तव्यम् । इत्थं च कृतिसाध्यत्वसंशयेऽपि चिकी-

ऽभोजने न चिकीर्षा। बलवद्द्वेषः प्रतिबन्धक इत्यन्ये।

दिनकरी।

यत्साधनत्वज्ञानस्य प्रतिबन्धकत्वे चैत्रस्याऽगम्यामगमनजन्यनरके यदा बलवान् द्वेषस्तदा मैत्रस्य तादृशद्वेषशून्यस्याऽगम्यागमने तादृशनरकसाधनत्वज्ञानवत इच्छाप्रवृत्त्योरनुपपत्तिः। एवं चैत्रस्यैव कालान्तरे तादृशद्वेषसत्त्वेऽपि। न च तत्कालीनतत्पुरुषीयेच्छां प्रति प्रवृत्तिं प्रति च तत्कालीनतत्पुरुषीयबलवद्द्विष्टजनकत्वज्ञानस्य प्रतिबन्धकत्वं कल्प्यते, यत्पुरुषस्य यदा न क्वाऽपि द्वेषस्तत्कालतत्पुरुषान्तर्भावेण तादृशज्ञानप्रतिबन्धकत्वस्याऽकल्पनाच्च तत्र तादृशप्रतिबन्धकाप्रसिद्ध्या तदभावरूपकारणस्याऽभावात्प्रवृत्त्यनुपपत्तिरिति वाच्यम्। यत्पुरुषस्य यदाऽगम्यागमनजन्यनरके बलवान् द्वेषस्तदा तत्पुरुषस्य तत्रेच्छानुत्पादादगम्यागमनगोचरतत्पुरुषीयतत्कालीनेच्छाया अप्रसिद्ध्या तत्पुरुषतत्कालान्तर्भावेण तादृशकार्यकारणभावस्याऽभावेन तत्र तत्पुरुषीयागम्यागमनगोचरेच्छानुत्पादप्रयोजकस्य दुर्भिक्षापत्तेरिति चेन्न। तद्धर्मप्रकारकद्वेषविशिष्टस्य तद्धर्मावच्छिन्नजनकत्वज्ञानस्य तत्र प्रतिबन्धकत्वकल्पनेनोक्तापत्त्यभावात्। तद्धर्मप्रकारकद्वेषानुत्तरतादृशेच्छायां तादृशद्वेषाभावस्तादृशद्वेषोत्तरतद्गोचरेच्छायां तद्धर्मावच्छिन्नजनकत्वज्ञानाभावः कारणम्। **बलवद्द्वेष इति।** पाकादिगोचरेच्छायां बलवद्द्वेषविषयसाधनत्वज्ञानजन्यः पाकगोचरो द्वेषः प्रतिबन्धकः, पूर्वोक्तप्रतिबन्धकद्वयकल्पनापेक्षया लाघवादिति भावः। यत्र चोत्कटसुखोत्कटदुःखजनकत्वमेकस्मिन् कर्मणि गृहीतं तत्र सत्प्रतिपक्षस्थल इवेच्छाद्वेषयोरनुत्पत्तेस्तन्मते तत्र कार्यकाले द्वेषाभावस्य सत्त्वेनेच्छोत्पादापत्तिः। न च यत्र बलवद्द्विष्टसाधनत्वज्ञानेन तृतीयक्षणे द्वेषो जनितस्तदुत्तरक्षणे इच्छोत्पादापत्तिस्तवाऽपीति वाच्यम्। तत्रेच्छोत्पादस्येष्टत्वात्। क्षणविलम्बस्य शपथनिर्णेयत्वादित्यन्य इत्यनेनाऽस्वरसः सूचितः।

रामरुद्री।

धीत्पादस्याऽऽनुभविकतया पाकादिविशेष्यककृतिसाध्यत्वज्ञानस्यैव हेतुत्वमुपेयम्, न तु कृतिसाध्यपाकत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानत्वेन, धर्मितावच्छेदकांशे संशयस्याऽनुभवविरुद्धतया तादृशेष्टसाधनताज्ञानस्य कृतिसाध्यत्वांशे सशयत्वायोगात्। अत एव कृत्यसाध्यतानिश्चयस्य प्रतिबन्धकत्वे निश्चयत्वप्रवेशेन गौरवमपि ग्रन्थकृतोपदर्शयिष्यत इति प्राहुः।

इदं स्ववधेयम्। शुद्धपाकत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानजन्यायां चिकीर्षायां पाको भवत्वित्याकारकेच्छासाधारणी शुद्धपाकत्वादिप्रकारतानिरूपिताऽपि विशेष्यता स्वीक्रियते, तादृशविशेष्यता नियामकसामग्यास्तत्पूर्वभवश्यसत्त्वेन तत्कल्पने बाधकाभावात्। कृतिसाध्यपाकत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानजन्यायां तु न सोपेयते, मानाभावात्। तथा च शुद्धपाकत्वावच्छिन्नधर्मिकसिद्धत्वग्रहदशायां तद्धर्मिकेष्टसाधनत्वकृतिसाध्यत्वप्रकारकज्ञानकाले न पाके चिकीर्षापत्तिः, शुद्धपाकत्वप्रकारतानिरूपितविशेष्यताज्ञानिन्यास्तादृशेच्छायास्तादृशसिद्धत्वग्रहप्रतिबध्यत्वात्, तदनारम्भकायाश्च तस्याः कृतिसाध्यपाकत्वावच्छिन्नधर्मिकेष्टसाधनताज्ञानजन्यायास्तथाविधविशेषकारणारम्भकतज्ज्ञानव्यत्वभावादेवाऽभावासिद्धिरिति सर्वमवदातम्।

टीकायाम्— **तृतीयक्षणे द्वेषो जनित इति।** साधनत्वाधंशे तद्धर्मिकप्रामाण्यज्ञानम्, ततो बलवद्द्विष्टसाधनताज्ञानारम्भकतदुत्पत्तिस्तदुत्तर द्वेष इत्यर्थः। इष्टापत्तिस्तु न सम्भवति, द्वेषेच्छयोः समानकालीनत्वापत्तेरिति भावः। समाधत्ते। **क्षणविलम्बस्येति।** तत्र तदुत्तरक्षणे इच्छोत्पादस्य

तदहेतुत्वबुद्धेस्तु हेतुत्वं कस्यचिन्मते ॥ १४८ ॥
द्विष्टसाधनताबुद्धिर्भवेद् द्वेषस्य कारणम् ।

तदहेतुत्वेति । **बलवदनिष्टाजनकत्वज्ञानं तत्र कारणमित्यर्थः । (कृतिसाध्यताज्ञानादिमतो बलवदनिष्टसाधनताज्ञानशून्यस्य बलवदनिष्टाजनकत्वज्ञानं विनापि चिकीर्षायां विलम्बाभावात् कस्यचिन्मत इत्यस्वरसोदर्शितः) ॥१४८॥**

॥ इतीच्छानिरूपणम् ॥

द्वेषं निरूपयति । द्विष्टसाधनतेति । **दुःखोपायविषयकं द्वेषं प्रति द्विष्टसाध-**

दिनकरी ।

बलवदनिष्टाजनकत्वज्ञानमिति । अत्रापि तद्धर्मप्रकारकद्वेषोत्तरेच्छायां तद्धर्मावच्छिन्नाजनकत्वज्ञानं कारणम् , तादृशद्वेषानुत्तरेच्छायां तु तद्धर्मप्रकारद्वेषाभावः कारणमिति निष्कर्षो बोध्यः । मूले—कस्यचिन्मत इत्यनेनास्वरसः सूचितः । स च बलवदनिष्टाननुबन्धित्वज्ञानत्वस्य हेतुतावच्छेदकत्वे बलवदनिष्टजनकत्वप्रकारतानिरूपिताभावविशेष्यताशालित्वादेस्तादृशनिरूप्यनिरूपकभावघटितत्वेन गौरवात् , तदघटितबलवदनिष्टसाधनत्वज्ञानाभावत्वेनैव हेतुत्वं युक्तम् । न चाप्रामाण्यज्ञानानास्कन्दितबलवदनिष्टाननुबन्धित्वज्ञानत्वापेक्षयाऽप्रामाण्यनिश्चयानास्कन्दिततदनुबन्धित्वज्ञानत्वस्य प्रतिबन्धकतावच्छेदकत्वे गौरवमिति वाच्यम् । युद्धादौ बलवदनिष्टसाधनत्वसन्देहेऽपीच्छाप्रवृत्त्योरुदयाद्बलवदनिष्टानुबन्धित्वनिश्चयस्यैवेच्छाप्रतिबन्धकतायास्तदननुबन्धित्वसंशयस्यापि च कारणतायाश्च वाच्यतया च विपरीतगौरवादिति । न च बलवदनिष्टाननुबन्धित्वज्ञानस्याऽप्रवर्त्तकत्वे तद्विषयस्य विध्यर्थत्वाभावाच्च कलञ्जं भक्षयेदित्यादिवाक्यानामप्रामाण्यापत्तिरिति वाच्यम् । तज्ज्ञानस्य प्रवृत्तिजनकत्वाभावेऽपि प्रवृत्तिप्रतिबन्धकबलवदनिष्टसाधनत्वज्ञानविघटकत्वेन प्रवृत्तिप्रयोजकत्वात् प्रवृत्तिप्रयोजकज्ञानविषयस्य विध्यर्थत्वानपायात् । अत्र यद्यपि यत्र प्रथमक्षणे द्वेषः, द्वितीयक्षणे फलेच्छा, तृतीयक्षणे फलसाधनताज्ञानं, तत्र तृतीयक्षणे द्वेषनाशाद्भवत्येव चतुर्थक्षणे उपायेच्छा, यत्र फलेच्छादिव्रिमेणैषामुत्पत्तिस्तत्र फलेच्छारूपकारणाभावादेव नोपायेच्छा, एवमन्यत्रापि, आत्मविशेषगुणानां यौगपद्यानङ्गीकारादिति बलवदनिष्टानुबन्धित्वज्ञानस्य द्वेषस्य वा प्रतिबन्धकत्वं न युक्तम् , न युक्तं च बलवदनिष्टाननुबन्धित्वज्ञानस्य हेतुत्वम् , तथापि द्विस्त्रिक्षणान्तरितेऽपि द्वेषे इच्छाप्रवृत्त्योरनुदयस्याऽऽनुभविकतया ज्ञानयोरेव न यौगपद्यमित्यभ्युपगमाद्वा पूर्वोक्तप्रतिबन्धकत्वस्य हेतुत्वस्य वाऽऽवश्यकत्वमिति ध्येयम् ॥ १४८ ॥ इतीच्छानिरूपणम् ॥

रामरुद्री ।

द्वेषप्रतिबन्धकत्ववादिभिरपि दुर्वारत्वादिति भावः ॥ **अस्वरस इति । न च बलवदित्यादि ।** नन्वेत्यस्य **हेतुतावच्छेदकत्वमित्यग्रेतनेनाऽन्वयः ।** तत्र **हेतुकथन गौरवा**दित्यन्तम् । निगमयति । **तदघटितेति । द्विस्त्रिक्षणान्तरितेऽपीति ।** एतन्मते द्वेषस्य स्वाधिकरणकृतिमत्त्वसम्बन्धेन प्रतिबन्धकत्वं बोध्यम् । लाघवादाह । **ज्ञानयोरेवेत्यादि ।** एतन्मते च समवायेनैव प्रतिबन्धकत्वमित्यन्यत्र विस्तरः ॥ १४८ ॥

॥ इतीच्छानिरूपणम् ॥

प्रवृत्तिश्च निवृत्तिश्च तथा जीवनकारणम् ॥ १४९ ॥
एवं प्रयत्नत्रैविध्यं तान्त्रिकैः परिकीर्तितम् ।
चिकीर्षाकृतिसाध्येष्टसाधनत्वमतिस्तथा ॥ १५० ॥

नताज्ञानं कारणमित्यर्थः । बलवदिष्टसाधनताज्ञानं च प्रतिबन्धकं, तेन नाम्तरीयकदुःखजनके पाकादौ न द्वेषः ॥ इति द्वेषनिरूपणम् ॥

यत्नं निरूपयति । प्रवृत्तिश्चेति । प्रवृत्तिनिवृत्तिजीवनयोनियत्नभेदाद् प्रयत्नस्त्रिविध इत्यर्थः ॥ १४९ ॥

चिकीर्षेत्यादि । मधुविषसम्पृक्तान्नभोजनादौ बलवदनिष्टानुबन्धित्वेन चिकीर्षाभावान्न प्रवृत्तिरिति भावः । कृतिसाध्यताज्ञानादिवद् बलवदनिष्टानुबन्धित्वज्ञानमपि स्वतन्त्रान्वयव्यतिरेकाभ्यां प्रवृत्तौ कारणमित्यपि वदन्ति ।

कार्यताज्ञानं प्रवर्त्तकमिति गुरवः । तथाहि—ज्ञानस्य प्रवृत्तौ जननीयायां चिकीर्षातिरिक्तं नाऽपेक्षितमस्ति, सा च कृतिसाध्यताज्ञानसाध्या, इच्छायाः स्वप्रकारप्रकारकधीसाध्यत्वनियमात्। चिकीर्षा हि कृतिसाध्यत्वप्रकारकेच्छा तत्र कृतिसाध्यत्वं प्रकारः, तत्प्रकारकज्ञानं चिकीर्षायां कारणं, तद्द्वारा प्रवृत्तौ च हेतुः, न त्विष्टसाधनताज्ञानं तत्र हेतुः, नित्ये तदभावात्, कृत्य-

दिनकरी ।

तेन—द्वेषे बलवत्त्वविशेषणेन ॥ इति द्वेषनिरूपणम् ॥

प्रवृत्तिरित्यादि । प्रवृत्तित्वं च रागजन्यतावच्छेदकतया सिद्धो जातिविशेषः । निवृत्तित्वं च द्वेषजन्यतावच्छेदकतया सिद्धो जातिविशेषः । जीवनयोनियत्नत्वं च साहजिकप्राणसञ्चारविषयकयत्नत्वम् ॥ १४९ ॥

ननु बलवदनिष्टानुबन्धित्वज्ञानाभावस्य प्रवृत्त्यहेतुत्वे मधुविषसम्पृक्तान्नभोजने प्रवृत्त्यापत्तिरित आह । मध्विति । चिकीर्षाभावादिति । चिकीर्षां प्रति बलवदनिष्टानुबन्धित्वज्ञानाभावस्य हेतुत्वादिति भावः । कृतिसाध्यताज्ञानादिवदिति । अन्यथा कृतिसाध्यताज्ञानादेरपि चिकिर्षायामेव हेतुत्वं स्यात्, न तु प्रवृत्तौ, व्यापारेण व्यापारिणो नान्यथासिद्धत्वमिति तु प्रकृतेऽपि समानमिति भावः ।

प्राभाकरमतमाह। कार्यताज्ञानमिति । सा च-चिकीर्षा च । तद्द्वारा—कृतिसाध्य-

रामरुद्री ।

मूले—कार्यताज्ञानमिति । कृतिसाध्यताज्ञानमित्यर्थः । साध्यत्वपदार्थश्चोपरिष्टाद्विवेचयिष्यते । ज्ञानस्येति । प्रवृत्तिं प्रति साक्षादसाधनीभूतस्य ज्ञानस्येत्यर्थः । उपादानप्रत्यक्षं च साक्षात्तत्साधनमेव, उपायेच्छायास्तद्द्वारतामतेऽपि तदपगमे प्रवृत्त्यनुदयेन तस्त्वीकारावश्यकत्वात्, अतस्तस्य चिकीर्षातिरिक्तकृतिसाध्यताज्ञानापेक्षित्वेऽपि न क्षतिः । तत्प्रकारकज्ञानमिति । कृतिसाध्यत्वप्रकारकज्ञानमित्यर्थः । इदं चाऽऽपाततः । वस्तुतो लाघवात् साध्यतासंसर्गेण कृतिप्रकारिका पाको मत्कृतिमान् भवत्वित्याकारिकेच्छैव व्यापारः, न तु कृतिसाध्यत्वप्रकारिका, गौरवात् । अत एव ज्ञानमपि साध्यतासंसर्गेण कृतिप्रकारकमेव हेतुरिति तत्त्वम् । विशेषस्तूपरिष्टाद्वक्ष्यते । न त्विष्टसाधनताज्ञानमिति । तत्र—चिकीर्षासामान्ये । तेन विशेषतो हेतुत्वेऽपि न क्षतिः । हेतुरिति । एतदुत्तर 'ननु कृत्यसाध्येऽपि प्रवृत्त्यापत्तेः कृत्यसाध्यताज्ञानं प्रतिबन्धकमिति चेन्न इति' पाठस्त्वपपाठ एव । ग्रन्थश्चेत्थं व्याख्येयः-हेतुमाह । कृत्यसाध्य इति । स्वकृत्यसाध्यत्वेन ज्ञान इत्यर्थः । तादृशं च चन्द्रमण्डलानयनादि प्रसिद्धमेव । ननु कृत्यसाध्यतानिश्चयाभाव उभयमतेऽपि सर्वत्र चिकीर्षोत्पत्तिपूर्वं सिद्धः, कृतिसाध्यताज्ञानं तु न तथा,

साध्येऽपि प्रवृत्त्यापत्तेः। कृत्यसाध्यताज्ञानं प्रतिबन्धकमिति चेन्न। तदभावापक्षया कृतिसाध्यताज्ञानस्य लघुत्वात्। न च द्वयोरेव हेतुत्वम्, गौरवात्। ननु त्वन्मतेऽपि मधुविषसम्पृक्तान्नभोजने चैत्यवन्दने च प्रवृत्त्यापत्तिः, कार्य्यताज्ञानसत्त्वादिति चेन्न। स्वविशेषणवत्ताप्रतिसन्धानजन्यकार्य्यताज्ञानस्य

दिनकरी।

त्वप्रकारकेच्छाद्वारा। द्वयोरेवेति। एवकारोऽप्ययं। स्वविशेषणेति। स्वं-प्रवर्तमानः पुरुषः, तद्विशेषणं-काम्ये कामना नित्ये कालशौचादि, तद्वत्ता पक्षे तत्सम्बन्धः, तस्य प्रतिसन्धानं ज्ञानमित्यर्थः। तस्य कार्यताज्ञानहेतुता लिङ्गज्ञानविधया। तथाहि पाको मत्कृतिसाध्यः, मत्कृति विनाऽसत्त्वे सति मदिष्टसाधनत्वादित्यनुमानम्। अत्र मदिष्टसाधनत्वमात्रोपादाने वृष्ट्यादौ व्यभिचार इति सत्यन्तम्। मदिष्टसाधने परकृतपाकादौ व्यभिचारवारणाय मत्कृतिं विनेत्यत्र मत्पदम्। श्रमे व्यभिचारवारणाय मदिष्टसाधनत्वादिति। मदीयश्रमस्य

रामरुद्री।

तथा च कृतिसाध्यताज्ञानत्वस्य सदपि लाघव कारणतावच्छेदकतायां न निगमकम्, तत्र नियतपूर्ववर्तितावच्छेदकत्वकल्पनगौरवस्य दुर्वारत्वात्, तदसाध्यताज्ञानाभावत्वे चाऽन्यथासिद्धिनिरूपकतानवच्छेदकत्वस्यैव कल्प्यतया तत्राऽपि लाघवगौरवयोस्तौल्यात् तथा च कारणतावच्छेदकगौरवमकिञ्चित्करमेवेति विनिगमनाविरहादुभयोरेव हेतुत्वमावश्यकमित्याशङ्कते। न चेति। हेतुत्वमित्यग्रेऽन्वयः। तत्र हेतुमाह। गौरवादिति। तथा च कथायामुभयवाद्यनुभवापेक्षणेऽपि स्वकीयतत्त्वनिर्णये परकीयानुभवस्याऽनपेक्षिततया स्वयं च कृतिसाध्यताज्ञानत्वस्य फलनियतपूर्ववर्तितावच्छेदकताघटितकारणतावच्छेदकतायाः कल्पनवेलायां कृतिसाध्यताज्ञानत्वे तत्कल्पने लाघवज्ञानस्य हेतुत्वात्कृत्यसाध्यतानिश्चयाभावत्वे गौरवज्ञानस्य प्रतिबन्धकत्वादेव चाऽस्मदभीष्टसिद्धेः। एतादृशकारणत्वग्रहाधीनस्य च यावत्फलपूर्वं कृतिसाध्यताज्ञानकल्पनागौरवस्य फलमुखत्वेनाऽदोषत्वात्। वस्तुतस्तु इच्छायाः स्वप्रकारप्रकारकधीसाध्यत्वनियमस्य प्रागेवोपदर्शिततया स्वयं नियतपूर्ववर्तित्वस्य कृतिसाध्यताज्ञानेऽकल्पनीयत्वादेव तादृशगौरवस्याऽपि स्वमतेऽभाव एवेति हृदयम्। नैयायिकः शङ्कते। नन्विति। प्रवृत्त्यापत्तिरिति। सञ्जातबाधतादशायामित्यादिः। तेन नेष्टापत्तिसम्भवः। सञ्जातबाधता च बलवदनिष्टानुबन्धित्वादिबाधनिश्चयवत्त्वम्। इदमुपलक्षणम्। पाकादावपि सञ्जातबाधदशायामपि तथा प्रसङ्गो बोध्यः। न च फलेच्छाविरहादेव तादृशस्थलेषु न प्रवृत्त्यापत्तिसम्भव इति वाच्यम्। नित्यस्थले व्यभिचारेण तस्या जनकत्वासम्भवादिति भावः। कार्यताज्ञानसत्त्वादिति। बलवदनिष्टानुबन्धित्वेष्टसाधनत्वभ्रमोत्तरं तादृशस्थले प्रवृत्तेरानुभविकत्वेन कृतिसाध्यताया विषभक्षणादौ सत्त्वेन तज्ज्ञानस्य स्मरणात्मकस्य सञ्जातबाधतादशायामपि सत्त्वादित्यर्थः। एतेन गुरुभिर्भ्रमस्थले ज्ञानद्वयोपगमेन विषभक्षणादौ प्रवृत्तेरसत्त्वे कार्यताया अप्यसत्त्वात्तत्र कार्यताज्ञानात्मककारणविरहादेव प्रवृत्त्यभावोपपत्तेरेतदाशङ्कनमनुचितम्। न चाऽन्यथाख्यातिग्रन्थोक्तदिशा ज्ञानद्वयीयविषयतयोरपि निरूप्यनिरूपकभावस्य तैरुपगमात् कार्यत्वप्रकारतानिरूपितविषभक्षणादिनिष्ठविशेष्यतानिरूपकज्ञानस्य तत्र सत्त्वात्प्रवृत्त्यापत्तिः सम्भवत्येवेति वाच्यम्। एवं सति तद्वारणाय कार्यत्वप्रकारतानिरूपितविशेष्यतायां कृतिसाध्यनिष्ठत्वनिवेशेन स्वनिरूपितकृतिसाध्यत्वनिष्ठप्रकारतानिरूपितनिष्ठविशेष्यताकज्ञानत्वेन वा कारणत्वोपगमेनैव सर्वातिप्रसङ्गभङ्गे गुरूणामग्रिमसमाधानान्तरानुसरणस्य सन्दर्भविरोधापत्तेः, कृतिसाध्यविषयिण्या एवंविधिकीर्षायाः फले प्रवृत्तिवारणाय द्वारतायां नैयायिकाभिमतत्वेन पूर्वमुक्तायाः स्वीकारेणैव च तादृशातिप्रसङ्गवारणासम्भवाच्चेति पूर्वपक्षः परास्तः। इत्थञ्च बलवदनिष्टाननुबन्धित्वेष्टसाधनत्वभ्रमाधीनकृतिसाध्यत्वसम्पादनाय मूले मधुविषसम्पृक्तान्नभोजनचैत्यवन्दनरूपोदाहरणद्वयोपन्यासोऽपि सङ्गच्छते। इष्टसाधनताज्ञानसम्पादनायैव चाऽऽद्योदाहरणे मधुपदोपादानम्। यद्यपि चैत्यवन्दनस्य निष्फलत्वेन न कुर्यात्निष्फलं कर्मेत्यनेन निषिद्धतया तत्र बलवदनिष्टाननुबन्धित्वबुद्धिः भ्रमरूपात्र सम्भवत्येव, तथाऽपि चैत्यवन्दने तदनुबन्धि-

दिनकरी।

मच्छत्रोरिष्टसाधनत्वात्तद्दोषतादवस्थ्यमतस्तत्रापि मदिति। न च स्वेच्छाधीनकृतिसाध्यताज्ञानमेव प्रवर्तकमन्यथा नान्तरीयकश्रमे प्रवृत्त्यापत्तेः, तच्चोक्तानुमानान्न सिद्धमिति वाच्यम्। स्वेच्छाधीनकृतिसाध्यत्वस्यैव साध्यत्वात्। एवं च हेतावपि मत्कृतिं विनेत्यत्र स्वेच्छाधीनत्वं

रामरुद्री।

त्वज्ञानस्य नास्तिकादिसाधारण्याभावेनाऽऽद्योदाहरणोपन्यासासङ्गतिः। इदं त्ववधेयम्। यद्यपि सञ्जातबाधस्य स्वकृतिसाध्यतास्मरणात् कथं प्रवृत्त्यापादनम्? भाविराजैश्वर्ये प्रवृत्त्यतिप्रसङ्गवारणायेदानीन्तनस्वकृतिसाध्यताज्ञानस्यैव प्रवर्तकत्वेन तदभावात्, इदानीन्तनत्वप्रकारेण कृतेः प्राग्ननुभवेन स्मरणायोगात्। न च तन्मते अतीतत्वाद्यगोचरज्ञानस्य विषयनिष्ठवर्तमानत्वविषयतानियमादनुभवागोचरस्याऽपि वर्तमानत्वस्य प्रमुष्टतत्ताकतादृशस्मृतौ कृत्यंशे भानमविरुद्धमिति वाच्यम्। पूर्वानुभूतकृताविदानीन्तनत्वभानाभ्युपगमेऽन्यथाख्यात्यापत्तेः, तथापि कृतिसाध्यताज्ञानहेतुतायाः तत्तद्धर्मप्रकारकप्रवृत्ति प्रति कालविशिष्टज्ञानत्वेनैव कारणत्वस्य व्यवस्थापयिष्यमाणत्वेन कृतीदानीन्तनत्वयोर्विशेषणविशेष्यभावमर्यादयैकज्ञानविषयत्वायोगेऽपि ज्ञानद्वयीयविषयतयोर्निरूप्यनिरूपकभावस्य तन्मतसिद्धतया न तादृशस्थले प्रवृत्त्यापादनानिर्वाहः। अत्र ज्ञानस्य स्वीयतद्धर्मावच्छिन्नविशेष्यतानिरूपितसाध्यत्वप्रकारतानिरूपितकृतिप्रकारतानिरूपिताधेयत्वसम्बन्धावच्छिन्नप्रकारताविशिष्टसमवायः कारणतावच्छेदकप्रत्यासत्तिः। समवाये प्रकारतावैशिष्ट्यं चैकक्षणावच्छिन्नैकात्मवृत्तित्वसम्बन्धेन। ज्ञाने कालवैशिष्ट्यं च स्वनिष्ठावच्छिन्नत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितकृतिप्रकारतानिरूपितसाध्यत्वप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यतानिरूपकत्व-स्वान्यवहितपूर्वक्षणवृत्तित्वोभयसम्बन्धेन। तथा च प्रमुष्टतत्ताकतादृशकृतिधर्मिकेदानीन्तनत्वप्रकारकानुभवात्मकज्ञानद्वयसत्त्वे प्रवृत्त्यापत्तिर्विषभक्षणादौ सम्भवत्येव, तादृशस्मरणस्य निरुक्तसम्बन्धेनेदानीन्तनकालवैशिष्ट्यानपायेन कारणतावच्छेदकविशिष्टकारणसमवधानसम्भवात्। इदानीन्तनश्च प्रकृतज्ञानाधिकरणक्षणाव्यवहितोत्तर एव कालो ग्राह्य इति नाऽसङ्गतिः। न च तथाऽपि कालवैशिष्ट्यघटकप्रथमसम्बन्धे स्वनिष्ठावच्छिन्नत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितकृतिप्रकारतानिरूपितसाध्यत्वप्रकारतानिरूपिततद्धर्मावच्छिन्नविशेष्यतायां स्वावच्छिन्नकृतिसाध्यनिष्ठत्वस्याऽपि निवेशनैव सञ्जातबाधदशायां प्रवृत्तिवारणसम्भवेन **स्वविशेषणवत्तेत्यादिना** गुरुणाग्रिमसमाधानान्तरानुसरणमनुचितमिति वाच्यम्। स्वकृतिसाध्यतास्मरणादेवाऽऽद्यस्तन्यपानप्रवृत्त्यनुरोधात् कृतावुपस्थितेदानीन्तनत्वासंसर्गाग्रहसहकृतस्वकृतिसाध्यताज्ञानमेव तन्मते प्रवर्तकं वाच्यमिति तादृशप्रवृत्त्यनिर्वाहभयेनैव स्वावच्छिन्नकृतिसाध्यनिष्ठत्वस्य तद्धर्मावच्छिन्नविशेष्यतायां निवेशयितुमशक्यत्वादिति। वस्तुतस्तु स्वावच्छिन्नकृतिसाध्यनिष्ठत्वस्य तद्धर्मावच्छिन्नविशेष्यतायां निवेशेऽपि न क्षतिः, पुरुषान्तरीयेदानीन्तनकृतिसाध्यतामादायैवेदानीन्तनकृतिसाध्यत्वस्य विषभक्षणादौ सम्भवात्, पुरुषान्तरीयकृत्यंशेऽगृहीतासंसर्गकस्वकीयत्वभ्रमात्मकज्ञानद्वयादेव प्रवृत्त्यापादनसम्भवात्, तत्र कृतिसाध्यताज्ञानस्य स्वीयतद्धर्मावच्छिन्नविशेष्यतानिरूपितसाध्यत्वप्रकारतानिरूपितकृतिप्रकारतानिरूपितज्ञानान्तरीयप्रकारताविशिष्टसमवायस्य तत्पुरुषे रूपेण प्रत्यासत्तिसत्त्वेन विषभक्षणे प्रवृत्त्यापादनसम्भवात्। न चाऽत्राऽपि समवाये तद्धर्मावच्छिन्नसाध्यककृतिवैशिष्ट्यमध्येकक्षणावच्छिन्नैकात्मवृत्तित्वसम्बन्धेन निवेशनीयमित्युक्तापत्तिर्वारयितुं शक्यत एवेति वाच्यम्। निगडनिश्चलदेहस्य स्वकृत्यसाध्ये गुरुतरभारोत्तोलनादौ प्रवृत्त्यसम्भवेन समवाये तथाविधवैशिष्ट्यस्य कथञ्चिदपि निवेशयितुमशक्यत्वादिति। एतेनाऽऽद्यस्तन्यपानादिस्थले स्वतन्त्रोपस्थितेदानीन्तनत्व कृतिसाध्यत्वस्तन्यपानानां विशेषणविशेष्यभावागाहिनो मानसबोधादेव प्रवृत्तिसम्भवेन तदनिर्वाहभयेन स्वावच्छिन्नकृतिसाध्यनिष्ठत्वस्य विशेष्यतायां निवेशनिराकरणमसङ्गतमित्यपि परास्तमिति किमास्तां विस्तरः।

मूले– **स्वविशेषणवत्ताप्रतिसन्धानजन्येति।** अत्र जन्यत्वमव्यवहितोत्तरत्वम्। तथा च काम्य-

प्रवर्त्तकत्वात्। काम्ये हि यागपाकादौ कामना स्वविशेषणम्, ततश्च बल-

दिनकरी।

मत्कृतिविशेषणं देयम्। अन्यथाऽन्येच्छाधीनमत्कृतिसाध्यमदिष्टसाधने नान्तरीयकजलसंयोगादौ व्यभिचारापत्तेः। एवं सति स्वेच्छाधीनमत्कृतिघटितहेत्वभावादेव श्रमे व्यभिचारवारणसम्भवात् विशेष्यदलप्रयोजनं यद्यपि न सम्भवति, तथापि नीलधूमादिवद्धेत्वन्तरत्वाद दोषः। एवमद्यमिदानीन्तनकृतिसाध्यसन्ध्यावन्दनः, द्विजातित्वे सति विहितसन्ध्याकालीनशौचादिमत्त्वादित्यनुमानम्। यो द्विजातित्वे सति विहितसान्ध्याकालीनशौचादिमान् स तत्कालीनकृतिसाध्यसन्ध्यावन्दन इति समान्यतो व्याप्तिरिति। न चैवंरीत्येष्टसाधनत्वहेतुकानुमानसम्भवेऽपि पक्षे स्वविशेषणवत्ताप्रतिसन्धानजन्यकार्यताज्ञानं न सम्भवति, इष्टसाधनत्वस्य यागनिष्टत्वेन पुरुषविशेषगतत्वाभावात्, इच्छायाश्च पुरुषविशेषणत्वेऽपि तस्या लिङ्गघटकत्वेपि पक्षे तद्वत्ताज्ञानानिर्वाहकत्वादिति वाच्यम्, काम्यसाधनताज्ञानस्यापि पक्षे यागादौ(१) स्वविषयसाधनत्वरूपकामनासम्बन्धज्ञानात्मकत्वात्। वस्तुतस्तद्वत्ताज्ञानं तत्सम्बन्धज्ञानं तज्ज्ञानमेव वा, न तु पक्षोऽपि तत्राऽन्तर्भूत इति काम्यसाधनताज्ञानस्याऽपि कामनासम्बन्धज्ञानात्मकतया कामनाज्ञानात्मकतया चानुपपत्त्यभावात्। ननु स्वविशेषणवत्ताप्रतिसन्धानजन्यकार्यताज्ञानस्य प्रवर्तकत्वे इष्टसाधनताज्ञानशून्यकालेऽपि पाके स्वविशेषणकृत्याघटितहेत्वन्तराद्यत्र कार्यतानुमितिः, यथा पाकः स्वेच्छाधीनमत्कृतिसाध्यः, श्रमादिभिन्नत्वे सति मत्कृतिव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वात्, यद्वा स्वेच्छाधीनमत्कृति विनाऽसत्त्वादिति, तत्राऽपि प्रवृत्त्यापत्तिरत आह। **काम्ये ह्येति।** कामना—यागपाकादिगोचरकामना। क्वचित्तथैव पाठः। तथा च स्वविशेषणेत्यत्र विशिष्य तादृशकामनारूपमेव स्वविशेषणं वाच्यम्, एवं विशेषणवत्त्वमपि स्वविषयसाधनत्वरूपं वाच्यम्, तेन न स्वेच्छाधीनेत्यादिद्वितीयहेतुज्ञानजन्यकार्यतानुमितिस्थले प्रवृत्त्यापत्तिरिति भावः। ननु काम्यसाधनताज्ञानजन्यकार्यताज्ञानस्य प्रवर्तकत्वे मधुविषसम्पृक्तान्नभोजने प्रवृत्त्यापत्तिरित्यत आह। **ततश्च बलवदनिष्टेति।** तथा च स्वविशेषणवत्ताप्रतिसन्धाने बलवदनिष्टाननुबन्धित्वविषयकत्वं

रामरुद्री

गोचरप्रवृत्ताविष्टसाधनताज्ञानाव्यवहितोत्तरकार्यताज्ञानस्य नित्यविषयकप्रवृत्तौ शुचितत्कालजीवित्वज्ञानाव्यवहितोत्तरकार्यताज्ञानस्य च हेतुत्व पर्यवसितम्। तेन क्वचिदिष्टसाधनतास्मरणानन्तरं कृतिसाध्यत्वस्य हेत्वन्तराधीनज्ञानविषयत्वेऽपि न प्रवृत्त्यनुपपत्तिः। टीकायामनुमानाकारप्रदर्शनं तु सम्भवस्थलाभिप्रायकमेव। काम्यगोचरत्वं च फलोद्देश्यकत्वम्। तद्देश्यताख्यविषयता चोपरिष्टाद्विवेचयिष्यते। तेनाऽकाम्ये काम्यत्वभ्रमदशायां काम्ये नित्यत्वभ्रमदशायां वा नेष्टसाधनत्वज्ञानवत्त्वच्छून्ययोः प्रवृत्त्यनुपपत्तिः। इत्थं च नित्यगोचरत्वमपि फलानुद्देश्यकत्वमेव। इदं तु बोध्यम्। नित्यस्थलीयप्रवृत्तौ शुचितत्कालजीवित्वज्ञानस्य कारणतावच्छेदकता नाङ्गीकार्या, अशुचेः सन्ध्यावन्दनाद्यकरणमपि प्रत्यवायहेतुरिति भ्राम्यतः स्वस्य शौचादिमत्त्वमप्रतिसन्दधानस्याऽपि सन्ध्यावन्दनादौ प्रवृत्तेः। न चैवं शुचेरेव सन्ध्यावन्दनाद्यकरणं प्रत्यवायहेतुरिति जानतः स्वस्याऽशौचं च प्रतिसन्दधानस्य तत्र कार्यताज्ञानसत्त्वे प्रवृत्त्यापत्तिरिति वाच्यम्। तत्कालावच्छिन्नतदकरणधर्मिकप्रत्यवायोपधायकत्वज्ञानस्य प्रत्यवायविषयकविद्वेषस्य च नित्यगोचरप्रवृत्तौ जननीयायां कार्यताज्ञानसहकारित्वोपगमात्, तत्काले च स्वस्य शौचाप्रतिसन्धानेनाऽकरणस्य प्रत्यवायोपधायकत्वज्ञानासम्भवादेवाऽतिप्रसङ्गानवका-

(१) 'पाकादौ' इति पाठो युक्तः। प्रक्रान्तानुगुण्यात्।

वदनिष्टाननुबन्धिकाम्यसाधनताज्ञानेन कार्य्यताज्ञानम्, ततः प्रवृत्तिः। तृप्तश्च भोजने न प्रवर्त्तते, तदानीं कामनायाः पुरुषविशेषणत्वाभावात्। नित्ये शौचादिकं पुरुषविशेषणं, तेन शौचादिज्ञानाधीनकृतिसाध्यताज्ञानात्तत्र प्रवृत्तिः।

ननु तदपेक्षया लाघवेन बलवदनिष्टाननुबन्ध्येष्टसाधनताज्ञानविशिष्टकार्य्यताज्ञानमेव हेतुरस्तु, बलवदनिष्टाननुबन्धित्वं चेष्टोत्पत्तिनान्तरीयकदुःखाधिकदुःखाजनकत्वम्, बलवद्द्वेषविषयदुःखाजनकत्वं वेति चेन्न। इष्ट-

दिनकरी।

विशेषणं देयमिति भावः। ननु तृप्तस्याऽपि भोजने प्रवृत्त्यापत्तिः, तस्याऽप्यतीतभोजनकामनाघटितलिङ्गजन्यकार्यताज्ञानसत्त्वादत आह। तृप्तश्चेति। तदानीमिति। कामनायास्तदानीं पुरुषविशेषणत्वाभावादित्यर्थः। तथा च स्वविशेषणेत्यत्र तदादीन्तनत्वं विशेषणं देयमिति भावः। ननु स्वेच्छाधीनमत्कृतिव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वादिलिङ्गज्ञानजन्यकार्यताज्ञानात् सन्ध्यावन्दने प्रवृत्त्यापत्तिः, कृतेरपि स्वविशेषणत्वादत आह। नित्ये शौचादिकमिति। आदिना विहिततत्कर्मकालस्य परिग्रहः। न च कालस्य कथं पुरुषविशेषणत्वमिति वाच्यम्। स्ववृत्तिजीवनवत्त्वसम्बन्धेन तस्य पुरुषविशेषणत्वात्, विहितकालजीवित्वादेर्वाऽऽदिपदेन ग्रहणात्। तथा च नित्यगोचरप्रवृत्तिस्थले स्वविशेषणपदेन विशिष्य तत्कालीनशुचित्वादिरूपविशेषणमेव ग्राह्यमिति न पूर्वोक्तातिप्रसङ्ग इति भावः। नैयायिकः शङ्कते। नन्विति। तदपेक्षया—बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनताज्ञानजन्यकृतिसाध्यताज्ञानापेक्षया। लाघवेनेति। नियमादिघटितजन्यत्वापेक्षया विषयित्वस्य लघुत्वादिति भावः। ननु बलवदनिष्टजनकत्वज्ञानं न हेतुः, क्वचिद्बहुायाससाध्ये बहुतरस्याऽपि दुःखस्याऽबलवत्त्वात् क्वचिदल्पस्य दुःखस्य बलवत्त्वादनुगतस्य बलवत्त्वस्य दुर्वचत्वादित्यत आह। बलवदनिष्टाननुबन्धित्वं चेति। इष्टोत्पत्तीति। इष्टोत्पत्तिनान्तरीयकं

रामरुद्री

शात्। इत्थं चाऽभावगोचरबलवद्द्वेषसामग्र्यासमवहितस्यैव कार्यताज्ञानस्य प्रतियोगिगोचरप्रवृत्तौ कारणतायाः पर्यवसिततया लाघवादभावगोचरबलवद्द्वेषसहकृतस्यैव तज्ज्ञानस्य हेतुत्वं कल्पनाद्यभिप्रायेणैव कार्यताज्ञानपूर्वं स्वविशेषणशुचितत्कालजीवित्वज्ञानाद्यात्मकतत्कालावच्छिन्नतदकरणधर्मिकप्रत्यवायोपधायकत्वज्ञानात्मकतदभावगोचरबलवद्द्वेषसामग्र्याः सत्त्वनिर्वाहक स्वविशेषणवत्ताप्रतिसन्धानजन्यत्वं तदन्यवहितोत्तरत्वपर्यवसित मूलकृतोपदर्शितमितिरीत्या गुरुमतं परिष्करणीयम्। इत्थं च प्रवृत्तिकालादच्छिन्नतदकरणस्याऽप्रसिद्धया कार्यताज्ञानसहकारिणो निरुक्तज्ञानस्य विसंवादनैयत्येन विशेषदर्शिनां नित्यगोचरप्रवृत्त्यनुपपत्तिरिति केषाञ्चिदाक्षेपोऽपि निरवकाशः। तत्राऽप्यकरणगोचरबलवद्द्वेषसम्भवादेव प्रवृत्त्युपपत्तेः, तदभावे प्रवृत्त्यनुदयस्याऽपीष्टत्वात्। न चैवं भोजनाभावादिगोचरबलवद्द्वेषसहकृतकार्यताज्ञानादेव भोजनादिगोचरप्रवृत्तिनिर्वाहात्तत्रेष्टसाधनताज्ञानाव्यवहितोत्तरकार्यताज्ञानस्य हेतुत्वकल्पनमयुक्तमिति वाच्यम्। यत्र भोजनाभावस्य दिष्टफलान्तरजनकत्वं न ज्ञातम्, तत्र भोजनाभावे बलवद्द्वेषासम्भवेन तत्सहकृतकार्यताज्ञानाद्भोजनविषयकप्रवृत्तेरुपपादयितुमशक्यतया तत्र भोजनधर्मिकेष्टसाधनताज्ञानसहकृतकार्यताज्ञानस्यैव हेतुत्वकल्पनाऽऽवश्यकत्वात्। अत एवेष्टसाधनताज्ञानसहकृतकार्यताज्ञानादेव प्रवृत्तिसम्भवेऽभावगोचरबलवद्द्वेषसहकृतकार्यताज्ञानस्य प्रतियोगिगोचरप्रवृत्तौ हेतुत्वकल्पनमनुचितमित्यपि निरस्तम्। नित्ये सन्ध्यावन्दनादाविष्टसाधनत्वज्ञानासम्भवेन तद्गोचरप्रवृत्तिनिर्वाहाय तथाविधहेतुताया आवश्यकत्वात्। न च तत्र प्रत्यवायाभावरूपेष्टसाधनताज्ञा-

साधनत्वकृतिसाध्यत्वयोर्युगपज्ज्ञातुमशक्यत्वात्, साध्यत्वसाधनत्वयोर्विरोधात्। असिद्धस्य हि साध्यत्वं सिद्धस्य च साधनत्वम्। न चैकमेकेनैकदा

दिनकरी।

यद्दुःखं तदक्षपेयाऽतिरिक्तं यद्दुःखं तदजनकत्वमित्यर्थः। एतेन मधुविषसम्पृक्ताऽभोजने प्रवृत्यापत्तिरपास्ता, इष्टोत्पत्तिनान्तरीयकदुःखातिरिक्तस्य मरणदुःखस्य तेन जननात्। अत्र केचित्। सुखमात्रजनके कर्मणीष्टोत्पत्तिनान्तरीयकदुःखमप्रसिद्धमिति तत्र प्रवृत्त्यभावप्रसङ्ग इति। तदयुक्तम्। कष्टं कर्मेति न्यायेन सुखजनके कर्मणि दुःखजनकत्वनियमेनाऽप्रसिद्धयभावात्।

मिश्रास्त्विष्टोत्पत्त्यनान्तरीयक(नरक)दुःखाजनकत्वमुक्तस्याऽर्थ इति नाप्रसिद्धिरित्याहुः।

नन्वेवं सति नरकसाधनत्वेन प्रमिते परदाराभिगमनादौ रागोत्कटयाऽपि प्रवर्तेत, इष्टोत्पत्त्यनान्तरीयकनरकदुःखजनकत्वेन तस्य निश्चयादित्यत आह। **बलवद्द्वेषेति।** द्वेषे च बलवत्त्वं जातिविशेषः। अत एव रागान्धस्य यदाऽगम्यागमनादिजन्यदुःखे न तादृशो द्वेषस्तदा तद्धेतावपि प्रवृत्तिः। साध्यत्वसाधनत्वयोर्विरोधमुपपादयति। **असिद्धस्य हीति।** आयक्षणवृत्तित्वविशिष्टस्य पाकादेरित्यर्थः। सिद्धस्य-अनायक्षणवृत्तित्वविशिष्टस्य। कृत्यव्यवहितोत्तरक्षणसम्बन्धित्वघटितस्य कृतिसाध्यत्वस्य पाकोत्पत्तिक्षण एव पाकवृत्तित्वात् कालान्तरभाव्योदनादिफलसाधनत्वस्यौदनाव्यवहितपूर्वक्षणसम्बन्धित्वघटितस्य चोत्पत्तिक्षणे पाकावृत्तित्वात् तयोरेकक्षणावच्छेदेनैकत्राऽवृत्तित्वरूपविरोधादिति भावः। यद्यपि कालान्तरभाव्योदनाव्यवहितपूर्वक्षणवृत्तितावच्छेदकधर्मवत्त्वरूपमोदनसाधनत्वमायक्षणवृत्तित्वविशिष्टेऽपि पाके सम्भवतीति कथं विरोधः? तथापि स्वरूपयोग्यमिदं न फलोपधायकमिति ज्ञानात् प्रवृत्त्यनुदयेन फलोपधायकत्वरूपेष्टसाधनताऽज्ञानस्यैव संशयसाधारणस्य प्रवृत्तिकारणत्वं वाच्यम्, पूर्वोक्तं फलोपधायकत्वं चाऽऽद्यक्षणविशिष्टे यागादौ न सम्भवतीति भावः। साध्यत्वसाधनत्वयोर्विरोधं व्युत्पाद्य तयोरेकज्ञानविषयत्वं न सम्भवतीत्याह। **न चैकमेकेनैकदेति।** अन्यान्यवृत्ति-

रामरुद्री

नमस्तीति शङ्क्यम्, प्रत्यवायाभावस्य स्वत इच्छाविषयत्वासम्भवेन तत्साधनताज्ञानस्येष्टसाधनताज्ञानरूपत्वासम्भवात्। कथञ्चिद्दुःखाभावरूपेष्टसाधनत्वज्ञानेन तस्येष्टत्वसम्भवेऽपि प्रत्यवायगोचरबलवद्द्वेषस्थलेऽपि सन्ध्यावन्दनादौ प्रवृत्त्युदयेनाऽसार्वत्रिकतया तथाविधहेतुहेतुमद्भावस्याऽऽदरयुक्तताया निष्प्रत्यूहत्वात्। प्रत्यवाये बलवद्द्वेषस्य च तज्जन्यफलगोचरबलवद्द्वेषतः सम्भवात्। न च तथाऽपि नित्यगोचरप्रवृत्तिस्थलेऽभावगोचरबलवद्द्वेषस्य कार्यताज्ञानसहकारितया तादृशप्रवृत्तिनिर्वाहकस्य कार्यताज्ञानस्य तत्सहकारिबलवद्द्वेषनिर्वाहकसामग्र्यात्मकत्वविशेषणवत्तासंप्रतिसन्धानोत्तरत्वस्याऽऽवश्यकत्वेऽपि काम्यगोचरप्रवृत्तिजनकस्य तस्येष्टसाधनताज्ञानात्मकस्य तत्समकालीनस्यैव वा तथात्वसम्भवेन तत्रेष्टसाधनताज्ञानात्मकत्वविशेषणवत्तासंप्रतिसन्धानोत्तरत्वाभिधानमयुक्तमिति वाच्यम्। इष्टसाधनताज्ञानस्य चिकीर्षाहेतुत्वे स्वतन्त्रेष्टसाधनताज्ञानकृतिसाध्यताज्ञानफलेच्छानां युगपदवस्थानासम्भवेनेष्टसाधनत्वकृतिसाध्यत्वोभयविषयकसमूहालम्बनमेव फलोपधायकं वाच्यम्। तच्च न सम्भवति, कृतिसाध्यत्वस्य असिद्धधर्मस्य सिद्धधर्मेण साधनत्वेन समभेव ज्ञानेन विषयीकरणासम्भवात्। साधनत्वसाध्यत्वे चाऽग्रे विवेचयिष्येते समूहालम्बनज्ञानानपेक्षणात्। अथैवमिष्टसाधनताज्ञानं विनाऽपि प्रवृत्त्यङ्गीकारे विश्वजितो निष्फलत्वापत्तिः। न चेष्टसाधनताज्ञानाधीनप्रवृत्तौ प्रत्यवायजनकीभूताभावप्रतियोगित्वज्ञानस्य कार्यताज्ञानसहकारितया तस्य च विहितत्यजिघांगेऽसम्भवात्तत्र प्रवृत्त्युपपत्तये फलकल्पनमावश्यकमिति

सिद्धमसिद्धं च ज्ञायते, तस्मात् कालभेदादुभयं ज्ञायत इति।

मैवम्। लाघवेन बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यताज्ञानस्य हेतुत्वात्। न च साध्यत्वसाधनत्वयोर्विरोधः, यदा कदाचित् साध्य-

दिनकरी।

पदार्थस्य स्वस्वावच्छेदकानवगाहिज्ञानं न सम्भवति, मूले वृक्षः संयोगीत्येव प्रतीतेः। तथा च साध्यत्वसाधनत्वयोरपि स्वस्वावच्छेदकासिद्धत्वसिद्धत्वविषयकमसिद्धः पाकः कृतिसाध्यः सिद्धश्च पाक इष्टसाधनमिति ज्ञानं समूहालम्बनरूपं वाच्यम्। तच्च न सम्भवति, सिद्धत्वासिद्धत्वज्ञानयोः परस्परं विरोधित्वादित्यभिमानः। **तस्मात् कालभेदादिति।** न चेदानीमसिद्धः पाकः कृतिसाध्यः, अग्रे च सिद्धः पाक इष्टसाधनमिति ज्ञानादेव प्रवृत्तिरस्त्विति वाच्यम्। इदानीन्तनाग्रेतनकालयोरननुगमात्।

प्राणित्वस्याऽपि पुरुषविशेषणत्वेनाऽहमिदानीन्तनकृतिसाध्यविषभक्षणः, प्राणित्वादित्यानुमितिसम्भवाद्विषभक्षणसाधारणं स्वविशेषणवत्ताप्रतिसन्धानजन्यकार्यताज्ञानमिति बलवदनिष्टाननुबन्धीष्टसाधनताशौचाद्यन्यतरलिङ्गप्रतिसन्धानजन्यकार्यताज्ञानं प्रवर्तकं वाच्यम्, तदपेक्षया बलवदनिष्टानुबन्धीष्टसाधनताविषयककार्यताज्ञानमतिलघ्विति तदेव काम्यनित्यसाधारणकारणत्वेन कल्प्यत इत्यभिप्रायेण प्राभाकरमतं दूषयति। **मैवमिति।** साध्यत्वसाधनत्वयोर्विरोधं दूषयति। **न चेति।** न हीत्यर्थः। **यदा कदाचिदिति।** यस्किञ्चित्काली-

रामरुद्रो

वाच्यम्। तदुपपत्तये तत्र स्वर्गसाधनत्वं नित्यत्व वा कल्पनीयमित्यत्र विनिगमनाविरहस्य दुर्वारत्वादिति चेन्न। विश्वजिद्यागस्य स्वर्गसाधनत्वकल्पनापेक्षया तदभावस्य प्रत्यवायाजनकत्वकल्पनाया गौरवेणाऽसम्भवात्। न चैतादृशलाघवानुरोधेन सन्ध्यावन्दनादीनामपि काम्यतापत्तिरिति वाच्यम्। सन्ध्यावन्दनाद्यकरणस्य प्रत्यवायजनकतायां **'अकुर्वन् विहितं कर्म, 'नाऽनुतिष्ठति यः पूर्वां नोपास्ते यश्च पश्चिमाम्'** इत्यादि निन्दार्थवादस्य प्रायश्चित्तोपदेशस्य च प्रमाणत्वेन कल्पनागौरवस्याऽकिञ्चित्करत्वादिति सुधीभिर्विभावनीयम्। अथैतादृशकार्यत्वस्यैव विध्यर्थतामते चैत्यं वन्देतेत्यादेरपि प्रामाण्यापत्तिः, तत्र लिङर्थस्य कृतिसाध्यत्वस्याऽबाधितत्वादिति चेन्न। इष्टत्वात्, चैत्यवन्दनादिजन्यतदूर्ध्वंसरूपफलेऽपि कदाचित्कस्यचिदिष्टसाधनताभ्रमेणेच्छोत्पत्त्या चैत्यवन्दनादावपीष्टसाधनत्वाबाधेनेष्टसाधनत्वविध्यर्थतामतेऽपि तद्वाक्यप्रामाण्यस्याऽऽवश्यकत्वात्, स्वर्गकामश्चैत्यं वन्देतेत्यादिवाक्यजन्यबोधे च स्वर्गकामनायाश्चैत्यवन्दनकर्तव्यत्वप्रयोजकत्वभानेन तद्बाधादप्रामाण्योपपत्तेः। इत्थं च स्वर्गकामो यजतेत्यादिविधितः स्वर्गकामनियोज्यकं यागविषयकं कार्यमिति प्राथमिकान्वयबोधोत्पत्त्यनन्तर स्वर्गसाधनं न स्वर्गकामनाधीनकृतिसाध्यमित्यनुपपत्तिज्ञानसहकृतेन तेनैव शब्देनाऽर्थापत्तिरूपपञ्चमप्रमाणतामापन्नेन यागस्य स्वर्गसाधनत्वमाक्षिप्यत इति न यागविषयककार्यताज्ञानसहकारिणस्तद्धर्मिककाम्यसाधनताज्ञानस्य दुर्भिक्षम्। अहरहः सन्ध्यामुपासीतेत्यादिनित्यविधिस्थले तु अकरणे निन्दार्थवादेनैव सन्ध्यावन्दनादेर्नित्यत्वबोध इति सर्वं सुस्थम्।

टीकायाम्—**अभिमान इति।** वस्तुतस्तु सिद्धत्वसाध्यत्वे कर्मप्रत्ययक्रियापदादिरूपशब्दविशेषप्रतिपाद्याखण्डधर्मस्वरूपे एव तन्मते स्वीक्रियेते। साध्यत्वप्रकारकबोधजनने साधनाकाङ्क्षानैयत्यात् परस्पराकाङ्क्षोत्थापकतावच्छेदकतया तस्सिद्धिः। अत एव यजेतेत्यादौ धात्वर्थस्य करणत्वेनाऽन्वये कर्मणः स्वर्गादेर्भाव्यस्याऽऽकाङ्क्षानैयत्येन तादृशबोधविषयत्वं कर्मत्वेन धात्वर्थस्याऽन्वये तु करणाकाङ्क्षापूरणाय गुणस्याऽन्वयो मीमांसकैः स्वीक्रियते। तयोश्चैकबोधविषयत्वमेकस्मिन् धर्मिणि न स्वीक्रियते। तथा हि वाजपेयेन स्वाराज्यकामो यजेतेत्यादौ वाजपेयपदस्य वाजमन्नं पेयमिति व्युत्पत्त्या द्रव्यवाचितया तत्क-

त्वसाधनत्वयोरविरोधात्, एकदा साध्यत्वसाधनत्वयश्चाज्ञानात्।

नव्यास्तु ममेदं कृतिसाध्यमिति ज्ञानं न प्रवर्त्तकम, अनागते तस्य ज्ञातुमशक्यत्वात्। किन्तु यादृशस्य पुंसः कृतिसाध्यं यद्दृष्टं तादृशत्वं स्वस्य प्रतिसन्धाय तत्र प्रवर्त्तते, तेनौदनकामस्य तत्साधनताज्ञानवतस्तदुपकरणवतः पाकः कृतिसाध्यस्तादृशश्चाहमिति प्रतिसन्धाय पाके प्रवृत्तिरित्याहुः।

तन्न, स्वकल्पितलिप्यादिप्रवृत्तौ यौवने कामोद्भेदादिना सम्भोगादौ च प्रवृत्तौ तदभावात्।

इदं तु बोध्यम्। इदानीन्तनेष्टसाधनत्वादिज्ञानं प्रवर्त्तकं, तेन भावि-

दिनकरी।

नस्य साध्यत्वस्य यत्किञ्चित्कालीनेन साधनेन साधनत्वेन विरोधाभावादित्यर्थः। तथा चैककालीनकृतिसाध्यत्वेष्टसाधनत्वयोर्विरोधेऽपि न क्षतिः, तथा ज्ञानस्याऽस्माभिः कारणत्वानङ्गीकारात्, किन्तु निविशेषितयोः सामान्यतः कृतिसाध्यत्वेष्टसाधनत्वयोर्ज्ञानस्यैव हेतुत्वाङ्गीकारादिति भावः। तादृशं च ज्ञानं सम्भवतीत्याह। **एकदेति**। इदं च ज्ञानान्वयि। **अज्ञानात्**—ज्ञानासम्भवात्। मूलाग्रनवगाहिनोऽपि वृक्षः संयोगीति ज्ञानस्याऽऽनुभविकतया अव्याप्यवृत्तेर्ज्ञानं स्वावच्छेदकविषयकमेवेति नियमे मानाभावान्न पूर्वोक्तदोष इति ध्येयम्।

प्राभाकरानुयायिनवीनमतमाह। **नव्यास्त्विति**। **ज्ञातुमशक्यत्वादिति**। सामान्यलक्षणप्रत्यासत्त्यनङ्गीकारेण प्रत्यक्षस्य, पक्षज्ञानाभावेनाऽनुमितेश्चासम्भवादिति भावः।

तदभावात्—यादृशस्य पुंसः कृतिसाध्यं यद् दृष्टं तादृशत्वज्ञानाभावात्।

नन्विष्टसाधनताज्ञानस्य प्रवृत्तिजनकत्वे भावियौवराज्ये प्रवृत्त्यापत्तिरत आह। **इदं तु बोध्यमिति**। इष्टसाधनत्वादीत्यत्रादिपदोपगृहीतस्येदानीन्तनकृतिसाध्यत्वघटककृतावि-दानीन्तनत्वविशेषणस्य प्रयोजनमाह। **तेन भावीति**। इष्टसाधनत्वघटकेच्छायां तद्विशेषणस्य

रामरुद्री।

रणकत्वस्य भावनायामन्वये धात्वर्थस्यैव तत्कर्मताऽवश्यम्भावेन तत्र कर्मत्वबोधकालेऽसिद्धावस्थस्यैव भाव्यतया तत्र सिद्धावस्थधर्मस्य फलसाधनत्वस्य बोधो न सम्भवतीति वाजपेयपदस्य यागनामधेयत्वमाश्रित्य लक्ष्यार्थस्य वाजपेयपदवाच्यस्याऽभेदेन यागेऽन्वयमभ्युपगम्य तस्य फलं प्रति करणत्वमेव शाब्दबोधे भासत इत्युपपादितं तैः। तयोः प्रत्येकमेकैकबोधविषयत्वमेकधर्मिनिष्ठत्वं च न विरुध्यते। अत एव अग्निहोत्रं जुहुयात्स्वर्गकाम इत्यनेन होमस्य करणत्वेन भावनायामन्वयं वो दध्ना जुहोतीत्यत्र च होमस्य कर्मत्वेनाऽन्वयबोधश्च भवतीति तैरुक्तम्। कर्मत्वकरणत्वयोर्विरोधवाक्यजन्यैकबोधविषयत्वं पुनर्वाजपेयन्यायेन निराकृतम्। तच्च तयोः सिद्धत्वसाध्यत्वरूपत्वादेव। वेदन्यशाब्दबोधे कर्मत्वकरणत्वयोर्युगपद्भानस्योक्तरीत्याऽसम्भवेऽपि तत्प्रत्येकावगाहिशाब्दबोधद्वयोत्तरकालीनमानसादौ युगपत्तयोर्भानमेवमपि न विरुध्यत इति तादृशमानसादेव प्रवृत्तिर्निर्वाहसम्भवादिष्टसाधनत्वकृतिसाध्यत्वयोरेकज्ञानाविषयत्वेन तद्गोचरसमूहालम्बनस्य प्रवृत्तिहेतुत्वखण्डनं न सङ्गच्छते इति तु न सङ्गच्छते, तयोः शब्दैकभास्यतया मानसादिविषयत्वायोगात्। सिद्धान्ते च **साध्यत्वसाधनत्वयोरविरोधित्वादि**त्यादिरीत्याऽप्रामाणिकप्राभाकरमतमिदं निराकरिष्यत इति ध्येयम्।

मूले—**इदानीन्तनेष्टसाधनत्वादिज्ञानमिति**। एकक्षणावच्छिन्नैककृतिवृत्तित्वसम्बन्धेन तद्विषयकेच्छाविशिष्टं तत्साधनताज्ञानमित्यर्थः। तथाचेच्छायाः स्वरूपसत्या एव विशेषणत्वं लभ्यते। तेनेच्छाया ज्ञातानुपयोगित्वेऽपि न क्षतिः। एवं बलवदनिष्टाननुबन्धित्वज्ञानमपि प्रागुक्तटीकाकाररीत्या

यौवराज्ये बालस्य न प्रवृत्तिः, तदानीं कृतिसाध्यत्वाज्ञानात् । एवं तृप्तो भोजने न प्रवर्त्तते, तदानीमिष्टसाधनत्वाज्ञानात् । प्रवर्त्तते च रोषदूषितचित्तो

दिनकरी ।

प्रयोजनमाह । एवं तृप्त इति । बलवदनिष्टस्यत्र बलवद्द्वेषे तद्विशेषणप्रयोजनमाह । प्रव-

रामरुद्री ।

परिष्करणीयम् । कृतिसाध्यताज्ञानं तु इदानीन्तनकृतिसाध्यताज्ञानरूपमेव ग्राह्यमिति विवेकः । वस्तु तस्तु विशिष्टस्य कारणत्वे विशेषणविशेष्यभावे विनिगमनाविरहेण गुरुभूतकार्यकारणभावद्वयापत्त्या तद्विषयकेच्छातत्साधनताज्ञानयोस्तद्विषयकबलवद्द्वेषतदननुबन्धिरज्ञानयोश्च टीकाकारोक्तरीत्या तत्कालीनकृतिसाध्यताज्ञानस्य चेति रीत्या पञ्चविधाः पृथगेव कार्यकारणभावाः स्वीकर्त्तव्याः । वस्तुतस्तु तत्कालीनकृतिसाध्यताज्ञानेत्यत्राऽपि तत्तत्कालकृतिसाध्यताज्ञानयोरेव कारणत्वं स्वीक्रियते । अथैवंरीत्या कालस्य विशिष्य हेतुत्वे अलं चिकीर्षाया उपादानप्रत्यक्षादीनां च हेतुत्वेन । तत्तत्कालहेतुत्वेनैव तद्विरहकाले प्रवृत्तिवारणसम्भवात् । न च यत्काले चैत्रस्य तदानीन्तनकृतिसाध्यताज्ञानादिघटितसामग्रीविशारपाके प्रवृत्तिस्तत्काले मैत्रस्याऽपि तादृशज्ञानशून्यस्य प्रवृत्तिवारणाय कृतिसाध्यताज्ञानादीनां हेतुत्वमावश्यकमिति वाच्यम् । तत्तत्कालीनस्वीयकृतिसाध्यताज्ञानस्यैव हेतुतायां वाच्यतया तत्र च तत्तत्पुरुषप्रवेशावश्यकतया तथाविधगुरुतरकार्यकारणभाव परित्यज्य तत्तत्पुरुषीयप्रवृत्तिं प्रति तादात्म्येन तत्तत्पुरुषस्याऽपि हेतुतायां वाच्यतया तेनैव मैत्रस्य प्रवृत्तिवारणसम्भवात् । मैत्रप्रवृत्तिव्यक्तीनां कालान्तरीणतया तद्धेतुकालाभावादेव तदभावस्य चैत्रप्रवृत्तिव्यक्तेश्च तत्कालीनायां अपि तादात्म्येन चैत्रस्य मैत्रेऽभावेनैवाऽभावस्य सम्भवात् । आवश्यकश्च कृतौ स्वीयत्वान्तर्भावः । पुरुषान्तरीयतदानीन्तनकृतिसाध्यतां ज्ञानवतोऽपि प्रवृत्त्यनुदयात् । अत्र वदन्ति । समवायेन तद्धर्मप्रकारकप्रवृत्तित्वावच्छिन्नं प्रति पुरुषविशेषमनन्तर्भाव्येच्छात्वेन कारणता कल्प्यते । कारणतावच्छेदकप्रत्यासत्तिश्च स्वीयतद्धर्मावच्छिन्नविशेष्यतानिरूपितसाध्यत्वप्रकारतानिरूपितकृतिप्रकारतानिरूपितसमवेतत्वसंसर्गावच्छिन्नप्रकारतावि-शिष्टसमवायः । अन्यपुरुषीयत्वेन कृतिविषयिण्याः अन्यचिकीर्षायास्तादृशी प्रकारता यत्र तत्र न तस्याः समवायः, यत्र चाऽसौ तत्र नैतादृशी प्रकारतेति न सा क्वचिदप्यात्मनि विशिष्टसमवायेन प्रत्यासीदतीति नाऽतिप्रसङ्गः । तत्तत्कालीनप्रवृत्तौ च तत्तत्कालानां विशिष्य हेतुतेति न कालान्तरीयकृतिसाध्यत्वप्रकारकेच्छाबलात्कालान्तरे तत्कालीनप्रवृत्त्यापत्तिः । तादृशी च प्रकारतैकमात्रवृत्तिधर्मावच्छिन्ना ग्राह्या । अतश्च पुरुषादिना स्वविषयकपुरुषीयकृतिसाध्यताज्ञानदशायां मदीयकृतिसाध्यः पाक इत्यादिनिश्चयासत्त्वे न प्रवृत्त्यापत्तिः । ईदृशं च पुरुषाणां विशिष्य हेतुताकल्पनस्याऽनावश्यकत्वाच्च कालपुरुषकारणतया चिकीर्षादीनामन्यथासिद्धिः । तदहेतुत्वे यदैकस्य पुंसः पाकत्वादिप्रकारकचिकीर्षादिकं, तदा तच्छून्यस्याऽपि पुंसः पाकत्वादिप्रकारकप्रवृत्त्यापत्तेः । वस्तुतस्तु तत्तद्धर्मप्रकारकप्रवृत्तिं प्रति सामान्यतः कालविशिष्टेच्छात्वेनैव कारणत्वं वाच्यम् । कारणतावच्छेदकप्रत्यासत्तिः पूर्ववद्विशिष्टसमवाय एव । कालवैशिष्ट्यं च स्वावच्छिन्नकृतिप्रकारतानिरूपितसाध्यताप्रकारतानिरूपिततत्तद्धर्मावच्छिन्नविशेष्यतात्वं—स्वाश्रयहितपूर्वक्षणवृत्तित्वोभयसम्बन्धेन यौवनकालीनत्वेन कृतिविषयिण्या अन्यकालीनचिकीर्षायास्तादृशोभयसम्बन्धेन नैनाऽपि कालेन वैशिष्ट्यमस्तीति नाऽतिप्रसङ्गः । एवं च कालस्य विशिष्य हेतुत्वान्तरमपि न कल्पनीयम् । विषयभेदेन कार्यकारणभावभेदाभावप्रयुक्तलाघवानुरोधे तु प्रकारतासम्बन्धेन तत्तत्पुरुषीयप्रवृत्तिं प्रति कालविशिष्टविशेष्यतावच्छेदकतासम्बन्धेन तत्तत्पुरुषीयेच्छात्वेन हेतुता वाच्या । विशेष्यतायां कालवैशिष्ट्यं च स्वाश्रयवर्त्तितपूर्वक्षणवृत्तीच्छाप्रतियोगिकत्व—स्वावच्छिन्नकृतिसाध्यत्वप्रकारतानिरूपितत्वोभयसम्बन्धेन । स्वाश्रयवर्त्तितोत्तरक्षणावच्छिन्नकृतिसाध्यत्वप्रकारतानिरूपितत्वनिरूपितविशेष्यतावच्छेदकता वा कारणतावच्छेदकसम्बन्धो वाच्यः । कालस्य विषयतावच्छेदकत्वं चैकमात्रवृत्तिधर्मावच्छिन्नं वाच्यम् । अतो न पूर्वोक्तरीत्याऽतिप्रसङ्गः । कृतिसाध्यताज्ञानस्य च सामान्यतः प्रवृत्तित्वावच्छिन्नं प्रति कृतिसाध्यताज्ञानत्वेन ज्ञानत्वेनैव वा हेतुता । अतिप्रसङ्गवारणस्य चिकी-

विषादिभक्षणे तदानीं बलवदनिष्टाननुबन्धित्वज्ञानात् । न चाऽऽस्तिकस्याऽगम्यागमने शत्रुवधादिप्रवृत्तौ च कथं बलवदनिष्टाननुबन्धित्वबुद्धिः ? नरकसाधनत्वज्ञानादिति वाच्यम् । उत्कटरागादिना नरकसाधनताधीतिरोधानात् । वृष्ट्यादौ तु कृतिसाध्यताज्ञानाभावान्न चिकीर्षाप्रवृत्ती, किन्त्विष्टसाधनताज्ञानादिच्छामात्रम् । कृतिश्च प्रवृत्तिरूपा बोध्या । तेन जीवनयोनियत्नसाध्ये प्राणपञ्चकसञ्चारे न प्रवृत्तिः ।

दिनकरी ।

र्तते चेति । प्रवृत्तौ–प्रवृत्तेः पूर्वं । **नरकसाधनत्वज्ञानादिति** । नरकरूपबलवदनिष्टसाधनत्वज्ञानादित्यर्थः । **उत्कटरागादिनेति** । अगम्यागमनादिसुखे उत्कटरागादिनेत्यर्थः । **नरकेति** । बलवदनिष्टेत्यर्थः । निरोधात्–अनुत्पादनात् । तादृशसुखे उत्कटरागसत्त्वेऽगम्यागमनजन्यनरके बलवद्द्वेषानुदयादिति भावः । **प्रवृत्तिरूपेति** । कृतिसाध्यताज्ञानमित्यत्र प्रवृत्तित्वेन कृतेः प्रवेश इत्यर्थः । स्वेच्छाधीनकृतिसाध्यताज्ञानस्य हेतुत्ववादिमणिकृन्मतेऽपि स्वेच्छाधीनत्वं कृतिविशेषणं प्रवृत्तिरूपकृतिलाभार्थमेवेति भावः । इत्थं च तद्व्यापारीभूतेच्छापि प्रवृत्तिसाध्यत्वप्रकारिका बोध्या, ज्ञानेच्छयोः समानप्रकारकत्वेन हेतुहेतुमद्भावादिति । **तेन**–प्रवृत्तिप्रवेशेन । **प्राणपञ्चकसञ्चारे न प्रवृत्तिरिति** । न च प्राणानामतीन्द्रियतयोपादानप्रत्यक्षाभावादेव न प्राणोपादानकसञ्चारसाध्यकप्रवृत्त्यापत्तिरिति वाच्यम् । प्राणवहनाडयुपादानकप्राणसञ्चारसाध्यकप्रवृत्त्यापत्तिवारणायैव प्रवृत्तिसाध्यताज्ञानहेतुत्वाङ्गीकारात् । यद्यपि प्राणसञ्चारावृत्तिविशेष्यतासम्बन्धेन कृतिसाध्यताज्ञानहेतुत्वाङ्गीकारादेव तथा प्रवृत्तिवारणं सम्भवति, तथापि घटादौ जीवनयोनियत्नसाध्यत्वभ्रमात् प्रवृत्त्यापत्तिवारणाय प्रवृत्तिसाध्यत्वज्ञानत्वेन हेतुत्वमावश्यकमिति ध्येयम् । एतेन प्राणसञ्चारे प्रवृत्तिवारणाय प्रवृत्तिसाध्यताज्ञानस्य हेतुत्वेऽपि प्रवृत्तिसाध्यत्वभ्रमात्प्राणसंचारे प्रवृत्त्यापत्तिर्दुर्वारेत्यपास्तम् । न च प्रवृत्तिसाध्यताज्ञानहेतुत्वेऽपि भोजनानन्तरीयके श्रमे साध्यतया प्रवृत्त्यापत्तिर्दुर्वारेति वाच्यम् । तादृशश्रमे चिकीर्षाविरहादेव प्रवृत्त्यनुत्पत्तेः, तत्र चिकीर्षाविरहश्च श्रमस्य दुःखरूपतया दुःखत्वज्ञानस्येच्छाप्रतिबन्धकतयेच्छासामान्यसामग्रीविरहादेव । एतेन नान्तरीयकश्रमे प्रवृत्त्यापत्तिवारणाय स्वेच्छाधीनकृतिसाध्यताज्ञानस्य हेतुत्वं वाच्यमिति मणिकृन्मतमपास्तम् । न च प्रवृत्तिसाध्यताज्ञानस्य

रामरुद्री ।

र्षाहेतुत्वेनैव सम्भवात् । व्यापारेण व्यापारिणो नाऽन्यथासिद्धिरिति तस्य नियतपूर्ववर्त्तिनः कारणत्वं स्वीक्रियते । अन्यथा तु नाऽस्त्येव तस्य कारणत्वम् । अथैवमिष्टसाधनताज्ञानमपि प्रवृत्तौ चिकीर्षयाऽन्यथासिद्धं भवतीति चेन्न । तस्य प्रवृत्तावहेतुत्वे प्रवृत्तौ फलविषयतानियमानुपपत्तेः । चिकीर्षाया उपायविषयिण्याः फलाविषयकतया तन्नियामकत्वासम्भवात् । इष्टसाधनताज्ञानहेतुत्वे च तत्तद्रूपावच्छिन्नफलनिष्ठोद्देश्यतानिरूपिततत्तद्धर्मावच्छिन्नसाध्यत्वाख्यविषयताशालिप्रवृत्तित्वावच्छिन्नं प्रति तत्तद्धर्मावच्छिन्नविशेष्यतानिरूपिततत्तद्रूपावच्छिन्नसाधनत्वप्रकारताशालिज्ञानत्वेन हेतुतया फलभाननियमसम्भवात् । इत्थं च कृतिसाध्यत्वप्रकारिकेच्छा चिकीर्षा सैवादेव प्रवृत्तिहेतुः, तत्र च समानविशेष्यककृतिसाध्यताज्ञानसहकृतं फलसाधनताज्ञानं फलेच्छा च हेतुः, तद्द्वारा च प्रवृत्तावपि, फलेच्छाकृतिसाध्यतेष्टसाधनताज्ञानचिकीर्षाणां युगपदवस्थानासम्भवादिति न्यायसिद्धान्तः । मूले – **यौवराज्य इति** । राजसिंहासनारोहणविशेष इत्यर्थः । टीकायाम्—**प्राणवहनाडयुपादानकेति** । प्राणवहनाडीनां च स्पार्शनप्रत्यक्ष-

इत्थं च प्रवर्त्तकत्वानुरोधाद्विधेरपीष्टसाधनत्वादिकमेवार्थः ।

दिनकरी ।

हेतुत्वेऽपि सुखे प्रवृत्तिसाध्यताज्ञानेच्छयोः सत्त्वात् तत्र साध्यताख्यविषयतासम्बन्धेन प्रवृत्त्यापत्तिरिति वाच्यम् । साध्यतया प्रवृत्ति प्रति फलत्वज्ञानस्य प्रतिबन्धकत्वात् । वस्तुतस्तु तत्तद्धर्मान्यवृत्तिविषयतासम्बन्धेन ज्ञानं प्रति तत्तद्धर्मभेदस्य हेतुतायास्तत्र व्यवस्थापितत्वात् तत्र च कार्यतावच्छेदककोटौ ज्ञानत्वस्थाने गुणत्वमेव निवेशनीयम् । एवं च सुखत्वान्यवृत्तिविषयतासम्बन्धेन गुणत्वस्य कृतिसाध्यताज्ञानजन्यतावच्छेदकीभूतं यत्साध्यताख्यविषयतासम्बन्धेन प्रवृत्तित्वं तद्व्यापकतया तदवच्छिन्नजनकसुखत्वभेदस्य सुखत्वेऽभावादेव न तत्र साध्यताख्यविषयतावच्छेदकतया प्रवृत्त्यापत्तिः, व्याप्यधर्मावच्छिन्नजनकसामग्र्या फलजननने व्यापकधर्मावच्छिन्नजनकसामग्र्या अपेक्षितत्वात् । अनयैव च रीत्या प्राणसञ्चारत्वे श्रमत्वे च साध्यताख्यविषयतावच्छेदकतासम्बन्धेन प्रवृत्तिवारण बोध्यम् । एतदेव हृदि निधाय प्राणसञ्चारस्य प्रवृत्त्ययोग्यत्वादेव न तत्र प्रवृत्तिरिति मिश्रैरभिहितमिति दिक् ।

इत्थं चेति । प्रवृत्ति प्रतीष्टसाधनत्वादिधियो हेतुत्वे चेत्यर्थः । **इष्टसाधनत्वा-**

रामरुद्री ।

विषयत्वमस्त्येवेति भावः । **तत्र तत्र व्यवस्थापितत्वादिति** । अनुमितिपरामर्शशाब्दबोधयोग्यताज्ञानानां धर्मितावच्छेदकनिष्ठप्रत्यासत्त्या कार्यकारणभावमते तत्तद्धर्मे धर्मितावच्छेदकतासम्बन्धेन तदत्यन्ताभावतद्भेदादिव्याप्यवत्तापरामर्शतदत्यन्ताभावादिमत्तावगाह्याद्यार्योग्यताज्ञानादिबलात्तादृशसम्बन्धेन तदत्यन्ताभावतद्भेदादेरनुमितिशाब्दबोधवारणाय तद्धर्मान्यवृत्तिविषयतासम्बन्धेन ज्ञानं प्रति तद्धर्मभेदस्य हेतुतायाश्चाकारग्रन्थेषु विधिवादादिषु गदाधरभट्टाचार्यैर्व्यवस्थापितत्वादित्यर्थः । **प्रवृत्त्ययोग्यत्वादेवेति** । तथा च मणिकृतां तद्वारणाय कृतौ स्वेच्छाधीनत्वविशेषणदानमनुचितमिति भावः । तेषामपि तत्र चिकीर्षाऽयोग्यत्वस्य विषयतासम्बन्धेनेच्छां प्रति तादात्म्येन प्रतिबन्धकस्वरूपस्याऽवश्यकल्प्यत्वात् । अन्यथा तत्र चिकीर्षोत्पादापत्त्या स्वेच्छाधीनत्वविशेषणदानेऽपि तद्वारणासम्भवादिति । न च बलोपायव्यायामादिश्रमे मलादेरिच्छाप्रवृत्तिदर्शनात् कथ तस्येच्छां प्रत्ययोग्यतेति वाच्यम् । तत्र श्रमहेतुक्रियायामेवेच्छाप्रवृत्त्यारनुभवसिद्धत्वात् । भोजनादिकृतित इव तादृशक्रियाविशेषगोचरकृतितोऽपि नान्तरीयकविधयैव श्रमोत्पत्त्यभ्युपगमादिति निगर्वः । **मिश्रैरभिहितमिति** । शब्दमण्यालोके मणिकृतां कृतौ स्वेच्छाधीनत्वविशेषणदूषणावसर इति शेषः

मूले—इष्टसाधनत्वादिकमेवार्थ इति । नन्वेव प्रवर्तकज्ञानविषयस्येष्टस्य स्वर्गपश्वादिभेदेन नानाविधतया तत्साधनत्वशक्तेरप्यविधप्रत्ययस्थापि नानार्थतापसङ्गः । न च इच्छाविषयतावच्छेदकत्वविशिष्टधर्मावच्छिन्नसाधनत्व एव विधिशक्तेरभ्युपगमान्न नानार्थतापसङ्ग इति वाच्यम् । एवमपि ज्ञानविषयतावच्छेदकत्वकृतिविषयतावच्छेदकत्वादिकमादाय विनिगमनाविरहेण इष्टसाधनत्वज्ञेयसाधनत्वकृतिविषयसाधनत्वादीनां शक्यतापसङ्गात्, इच्छाविषयतायाः कारणसामग्र्यधीनतया इष्टसाधनत्वस्यैतादृशस्य केवलान्वयिनया चैत्यं न वन्देत जलं न ताडयेदित्यादौ नञर्थान्वयप्रसङ्गाच्च । न च तत्र स्वर्गसाधनत्वादौ लक्षणेति वाच्यम् । स्वर्गसाधनत्वादौ शक्तिः, इष्टसाधनत्वादौ च लक्षणेत्यस्यापि सुवचत्वात्, स्वर्गसाधनत्वादौ लाघवसम्भवाच्च । वक्तृबुद्धिविषयतावच्छेदकत्वादेस्तदादिपदशक्यतावच्छेदकानुगमकत्वविच्छाविषयतावच्छेदकत्वस्योपलक्षणविधया विधिपदशक्यतावच्छेदकानुगमकत्वस्याऽपि चैत्यं वन्देतेत्यादेः प्रामाण्यभिया स्वीकर्तुमशक्यत्वात्, चैत्यवन्दनादेरपि कस्यचिदिच्छाविषयतावच्छेदकीभूतस्वर्गाद्यवच्छिन्नजनकत्वानपायादिति चेदत्र केचित्, स्वसमभिव्याहृतपदोपस्थापितकामनाविषयतावच्छेदकत्वोपलक्षितधर्मावच्छिन्न एव विधिशक्तेरभ्युपगमात् । विश्वजिता यजेतेत्यत्र च स्वर्गकामपदमध्याहा-

दिनकरी।

दिति। आदिना बलवदनिष्टाननुबन्धित्वकृतिसाध्यत्वयोः परिग्रहः। अत्र च निष्फले प्रवृत्त्यभावादिष्टसाधनत्वस्येष्टसाधनेऽपि मधुविषसम्पृक्तान्नभोजनेऽप्रवृत्तेर्बलवदनिष्टाननुबन्धित्वस्य कृत्यसाध्ये सुमेरुशृंगाहरणादावप्रवृत्तेः कृतिसाध्यत्वस्य च ज्ञान प्रवृत्तिहेतुः, तच्च विधित इतीष्टसाधनत्वादिकं विध्यर्थ इति भावः। ननु भावियौवराज्यादौ प्रवृत्तेर्वारणाये-दानीन्तनकृतिसाध्यताज्ञानादेः प्रवर्तकत्वं वाच्यं, तच्च न विधिवाक्यात्, ततः शक्यकृति-साध्यत्वेष्टसाधनत्वप्रकारकज्ञानस्यैवोत्पत्तेरिति कथं प्रवर्तकज्ञानं विधित इति। अत्र वदन्ति। न विधिः साक्षात् प्रवर्तकं ज्ञानमुत्पादयति, किं तु विधिवाक्यादिष्टसाधनत्वे कृतिसाध्यत्वे चाऽवगते किमिष्टमित्याकाङ्क्षायां स्वर्गकामादिपदसमभिव्याहारात् स्वर्गसाधनमिति ज्ञानमानुमानिकं मानसं वोत्पद्यते, अन्यथा विशेषरूपेण फलज्ञानाभावात् प्रवृत्त्यनुपपत्तेः,

रामरुद्री।

र्यम्, लक्षणयैव वा तत्र स्वर्गसाधनत्वादेर्बोध इत्यभ्युपगमात्। स स्वर्गः सर्वान् प्रत्यविशिष्टत्वादित्या-दिजैमिनीयन्यायस्याऽप्येनादृशनिरूढलाक्षणिकार्थे तात्पर्यग्राहकताया एवोपगन्तव्यत्वेनाऽदोषात्। स्वप-दप्रवेशेनाऽननुगमस्तु न, शक्तिवादोक्तरीत्या स्वजन्यत्व—स्वसमभिव्याहृतपदोपस्थापितकामनाविषयता-वच्छेदकत्वोपलक्षितधर्मावच्छिन्नसाधनत्वावगाहिस्वोभयसम्बन्धेन विधिपदविशिष्टो बोधो भवत्वित्याका-रस्यैव भगवत्सङ्केतस्योपगन्तव्यत्वात्। न चैवं चैत्यवंदनध्वंसकामश्चैत्यं वन्देतेति वाक्यस्य प्रामाण्याप-त्तिरिति वाच्यम्। इष्टत्वादिति वदन्ति, तन्न, समभिव्याहृतकामनाविषयतावच्छेदकत्वस्याऽनुगमकत्वे चैत्यं न वन्देतेत्यादेरननुभावकत्वापत्तेः। तत्रैतादृशविध्यर्थाप्रसिद्धया तदभावस्य नञा बोधयितुमशक्य-त्वात्। कामनाविषयतावच्छेदकत्वमात्रमेवाऽनुगमकम्, स्वसमभिव्याहृतकामनाविषयतावच्छेदकत्वं तु तात्पर्यग्राहकम्, निषेधविधिस्थले तु प्रकरणादिरेव तात्पर्यग्राहक इत्युक्तौ तु न निस्तारः, विनिगमना-विरहेण ज्ञानविषयतावच्छेदकत्वादेरपि शक्यतावच्छेदकानुगमकत्वसम्भवेनाऽनन्तशक्तिकल्पनाप्रौढ्यात्। वस्तुतस्तु स्वर्गत्वादिपुरस्कारेणेष्टं साधनत्वघटकीभूततावत्पदार्थश्च प्रत्येकमेव खण्डशो विध्यर्थः, स्वर्गसा-धनत्वपशुसाधनत्वादौ प्रत्येकमखण्डशक्तिकल्पने गौरवात्, स्वसमभिव्याहृतकामनाविषयतावच्छेदकत्वा-दिकं प्रकारणादिकं च तात्पर्यग्राहकं, तथा च स्वर्गकामो यजेतेत्यादौ यागः स्वर्गसाधनमित्याकारकस्तृ-प्तिकामः पचेतेत्यादिविधिस्थले च तृप्त्यादिसाधनं पाक इत्याकारक एव बोध इति न कोऽपि दोषः, तात्प-र्यस्य नियामकत्वादेव सकलातिप्रसङ्गभङ्गात्। इत्थं च विश्वजिता यजेतेत्यादौ तात्पर्यविषयीभूतफलप्रतिप-रयर्थमेव विश्वजिन्न्यायावतारः, तत्र दर्शितरीत्या समभिव्याहृतस्य पदस्य कामनाऽवाचितया तात्पर्यग्रह-णासम्भवादिति सर्वमवदातम्। टीकायाम्—अत्र चेत्यादि। बलवदनिष्टाननुबन्धित्वस्येति। साङ्ख्या-स्तु बलवदनिष्टाननुबन्धित्वं न विध्यर्थः। न चैवं न कलञ्जं भक्षयेदित्यादेरप्रामाण्यापत्तिरिति वाच्यम्। तत्र नञ एव बलवदनिष्टानुबन्धित्वे निरूढलक्षणाया उपगन्तव्यत्वादिति वदन्ति, तन्न, हुतायां वपायां दीक्षितस्याऽन्नमश्नीयात्, विवाहार्थेऽनृतं ब्रूयादित्यादिविधिप्रामाण्योपपत्तय एव बलवदनिष्टाननुबन्धि-त्वस्य विध्यर्थताया उपगन्तव्यत्वादिति। साङ्ख्यादिति। इदमापाततः। दर्शितरीत्या साक्षात्प्रवर्तकस्यैव ज्ञानस्योत्पादसम्भवेन विशेषरूपेण फलज्ञानाभावरूपबाधकासम्भवात्। किं तु इदानीन्तनत्वमपि विधि जन्यज्ञाने भासत एव। न चैवं तत्तत्कालभेदेनाऽनन्तशक्तिकल्पनापत्तिः, आख्यातसामान्यस्यैव कल्पना-या शक्त्यैव निर्वाहेऽतिरिक्तायास्तस्या अनभ्युपगमात्। स्पष्टं चेदं शब्दशक्तिप्रकाशिकाटीकादौ। इत्थं च कृतिसाध्यत्वादिकमपि विधेरर्थः, कृतेराख्यातसामान्यार्थतया विधिवाक्यजन्यबोधे तस्या धात्वर्थे साध्य-तासंसर्गेणाऽन्वयोपगमादेव निर्वाहात्। न चैतादृशरीत्या कृतिसाध्यत्वबोधानुपगमे का क्षतिरिति वाच्यम्। पङ्गुः समुद्रं न तरेन्नैकः पर्वतमारोहेदित्यादिनिषेधविधीनां प्रामाण्योपपत्तय एव तत्स्वीकारा

दिनकरी।

एवमिदानीन्तनत्वान्तर्भावेण कृतिसाध्यत्वादिज्ञानमनुमानादिति। अत एवोक्तं मणिकृताऽपि "एवं विधिजन्यज्ञानजन्यं ज्ञानं प्रवर्तकम्" इति।

अत्र भट्टादाः। लोके प्रवृत्तिर्द्वेधा, स्वेच्छाधीना परप्रेरणाजन्या च। तत्राऽद्यायां प्रवर्तनाया अनुपयोगेऽपि द्वितीयप्रवृत्तौ सा प्रयोजिका, आचार्यप्रेरणयेदं करोमीति व्यवहारात्। प्रवर्तना च प्रवर्तयितुः प्रवृत्त्यनुकूलव्यापारविशेषः, स च चेतनस्याऽभिप्राय एव, अचेतनस्य तु वेदस्याऽभिधानामकः कश्चिच्छब्दसमवेतः। तथा चाऽऽचार्याभिप्रायज्ञानाद्यथा शिष्यः प्रवर्तते तथाऽभिधाज्ञानाद्विधिस्थले प्रवृत्तिरिति सैव लिङर्थः। सैव च शाब्दी भावना लिङ्त्वांशेनोच्यते। अर्थभावना त्वाख्यातत्वांशेन। तदुक्तम्—

रामरुद्री।

वश्यकत्वात्। तत्र कृत्यसाध्यत्वे नञो लक्षणेति न शङ्क्यम्, कल्पनैवोपपत्तावतिरिक्तकल्पनाया अन्याय्यत्वात्, हनूमान् समुद्रं तरेदेवेत्यादिवाक्यानामेवमपि प्रामाण्यानुपपत्तेर्दुर्वारत्वाच्चेति।

लोके प्रवृत्तिर्द्वेधेति। अत्राऽयं भट्टपादानामाशयः। न तावदिष्टसाधनत्वादिकं लिङोऽर्थः, तथात्वे इष्टसाधनताज्ञानादेव प्रवृत्तेराचार्यप्रेरितोऽहं गामानयामीत्यादावाचार्यादेः प्रवर्तकत्वव्यवहारानुपपत्तेः। न च प्रवृत्तिजनकेष्टसाधनताबोधकलिङुच्चारयितृत्वात्तस्य प्रवर्तकत्वव्यवहारः, तथात्वे राजप्रेरितपदातेस्तादृशलिङुच्चारयितृत्वेन प्रवर्तकत्वापत्तौ पदातिप्रेरितोऽहं न गामानयामि, किन्तु राजप्रेरित इति पदातौ प्रवर्तकत्वाभावव्यवहारानुपपत्तेः। अथाऽन्याप्रेरितत्वे सति तादृशलिङुच्चारयितृत्वं प्रवर्तकत्वम्। तथात्वे पितृप्रेरिते राज्ञि प्रवर्तकत्वानापत्तेः। अतश्चैतादृशव्यवहारबलात् प्रवृत्तिकारणीभूतज्ञानविषयीभूतेच्छाश्रयत्वेनैव प्रवर्तकत्वं वाच्यम्। न चेच्छाया लिङादिवाच्यत्वाभावे ज्ञानं सम्भवति, विषयविशेषस्येष्टसाधनत्वेऽपि परेच्छाविषयत्वाभावेनेष्टसाधनत्वस्य व्यभिचारितया परेच्छानुमापकत्वानुपपत्तेः। अतः परिशेषाल्लिङादिवाच्यैव सा, तथा च प्रवृत्तिविषये यागादाविष्टसाधनत्वादेरनुमानेनैव बोधोपपत्तेर्न पुनर्वाच्यत्वकल्पनावसरः। भवति ह्ययमत्र प्रवर्तध्वमित्याकारकेच्छाविषयत्वमिष्टसाधनत्वव्याप्यम्, अतस्तेन तदनुमानम्। तादृशेच्छाविषयत्वं च तादृशज्ञानेच्छाविषयीभूतप्रवृत्तिविषयत्वं बोध्यम्। तेन प्रतारकेच्छामादाय न व्यभिचारः, न वा प्रवृत्तौ तदाश्रये पुरुषे वा इच्छाविषये इष्टसाधनत्वाभावेऽपि व्यभिचारः। 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रहणप्रार्थनेषु लिङ्' 'लोट् च' 'छन्दसि लिङर्थे लेट्' इत्यादिपाणिन्यनुशासनादयमेवाऽर्थो विज्ञायते। विधिः—निकृष्टस्य प्रेरणम्। निमन्त्रणम्—आनिष्टजनकीभूताकरणप्रतियोगित्वानुमापकप्रवर्तकेच्छा। यथा श्राद्धादौ दौहित्रादेः प्रवर्तनम्। तत्र प्रमाणान्तरेणाऽभोजने प्रत्यवायावगमात्। अत एव विधिस्थल इवाग्निमयोरपि लाघवादिष्टसाधनत्वानुमापकत्वमेव कृतिसाध्यत्वानुमापकत्वन्तु सर्वत्रैव, माऽस्तु वा तत्। आमन्त्रणम्—कामचारानुज्ञा। तत्र प्रेरकस्याऽऽग्रहाभावमात्रम्, अन्यत्र सर्वत्राऽऽग्रहोऽप्यधिको भासते। अथेष्टम्—उत्तमं प्रति सत्कारपूर्वकप्रेरणम्। एतेषु चतुर्षु प्रवर्तनात्वस्यैकस्याऽनुगतत्वात्तेन रूपेणैकैव शक्तिः। अन्यांशस्य तु प्रमाणान्तरलभ्यत्वान्न शक्यत्वमिति। **द्वितीयप्रवृत्तौ सा प्रयोजिकेति।** प्रयोजकत्वं चेच्छायाः प्रवृत्तिं प्रति न स्वरूपेण कारणत्वम्, तदभावेऽपि तद्भ्रमेण प्रवृत्त्युदयात्, स्वरूपेण कारणत्वे लिङुक्तिवैयर्थ्याच्च। नापि प्रवृत्तिकारणीभूतज्ञानविषयत्वम्, इष्टसाधनत्वाद्यनुमापकतया प्रवृत्तिविशेषं प्रति प्रयोजकतयैवाऽन्वयव्यतिरेकसिद्धौ तज्ज्ञानस्य प्रवृत्तिं प्रति कारणत्वकल्पने मानाभावात्, अपि तु प्रवृत्तिजनकज्ञानविषयेष्टसाधनत्वाद्यनुमापकत्वमेव तत्। तदेव च प्रवर्तनात्वप्रेरणात्वादिपदेन निर्दिश्यते। तदपि न लिङादिपदशक्यतावच्छेदकम्, गौरवात्, अन्यलभ्यत्वाच्च। प्रवृत्तिर्हि आख्यातादेव लभ्यते, प्रयोजकत्वं तु संसर्गबलेनेति न शक्यतावच्छेदकम्। अपि तु लोकवेदसाधारणं व्यापारत्वमेव तथा। अस्ति हि लौकिके लिङादिशब्दोपस्थाप्यपुरुषाशये प्रवृत्तिसाधनीभूतेष्टसाधनत्वाद्यनुमापकतया प्रवृत्तिप्रयोजकव्यापारत्वम्। वैदे-

दिनकरी।

'अभिधाभावनामाहुरन्यामेव लिङादयः। अर्थात्मभावना त्वन्या सर्वाख्यातस्य गोचरः॥' इति

अभिधा-शब्दः, तन्निष्ठा भावनाऽभिधाभावना, अर्थः यागादिरात्मा वा, अर्थात्मकत्वं रामरुद्री।

ऽपि शब्दश्रवणोत्तरकालमनुमायैव तत्कार्यदर्शनादिच्छाथाश्राऽपौरुषेये वेदे बाधात्कार्यानुमेयमलौकिकं धर्मं लिङादिनिष्ठं लिङादिवाच्यं परिकल्प्य तस्य तदनुमापकत्वकल्पनात्तत्राऽपि प्रवृत्तिप्रयोजकव्यापारत्वम्। अत उभयसाधारण्येन व्यापारत्वमेव शक्यतावच्छेदकम्। तदयमत्र क्रमः, प्रथमं लिङादिपदाद्व्यापारत्वेन सामान्यरूपेणैव व्यापारोपस्थितिः, पश्चादाख्यातोपस्थितकृतौ तस्य स्वविषयकज्ञानविशेषजन्यानुमितिप्रयोज्यत्वसम्बन्धेनाऽनुपस्थितेनैवाऽन्वयः। शाब्दबोधश्च व्यापारवती यागादिकृतिरिति। न च लिङर्थविशेष्यक एव शाब्दबोध इति भ्रमितव्यम्, लकारार्थप्रकारकशाब्दबोधत्वावच्छिन्नं प्रत्येव आर्थभावनानिष्ठविशेष्यतासम्बन्धेनाऽऽख्यातपदजन्योपस्थितिः कारणमिति कालादिसाधारण्येनैककार्यकारणभावकल्पनालाघवानुरोधेनाऽऽख्यातार्थकृतेरेव मीमांसकैर्मुख्यविशेष्यत्वाभ्युपगमात्। अन्यथा 'भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते—' इति द्वितीयाधिकरणसिद्धान्तेन।

'भावनैव हि वाक्यार्थः सर्वत्राऽऽख्यातवत्तया—'

इति वार्तिकेन च विरोधः। सूत्रे भावार्था इति, भावः—भावना कृतिरिति यावत्। तदर्थाः—तन्मुख्यविशेष्यकबोधजनकाः। वार्तिकेऽपि भावना—कृतिरेव, वाक्यार्थः—वाक्यजन्यबोधमुख्यविशेष्यः। एवकारेणाऽन्ययोगो व्यवच्छेद्यः। आख्यातवत्तया—आख्यातप्रतिपाद्यतयेत्यर्थः। तेन कृतेः शाब्दभावनातिरिक्तमकलकारकान्वये विशेष्यत्वनियमेऽपि कृतेरन्वये शाब्दभावना मुख्यविशेष्यतया भासत इति भावार्थाधिकरणसङ्गतिरिति चिरन्तनमतमपास्तम्। एव च देवदत्तः पचेदित्यादौ लोके तथाविधशाब्दबोधोत्तरं चैत्रप्रेरितोऽहं पचामीत्यादिव्यवहारदर्शनेन पुरुषनिष्ठत्वाद्व्यापारस्येच्छारूपस्य पाकविषयकृतिसम्बन्धात् पाकेऽयं प्रवर्तनाभित्याकारस्वस्य च तस्याः सिद्धौ तदाश्रयस्य प्रयोजकवृद्धस्य प्रमाणान्तरेणाऽऽप्तत्वावगमे समानसवित्सवेद्यतया पाकेऽस्य प्रवर्तनाभित्याकारकाप्तनिष्ठेच्छाविषयकृतिविषयत्वरूपहेतुज्ञानं मानसं जायते, ततश्च तस्मिन् हेतौ क्रियान्तरदृष्टान्तावगतेष्टसाधनत्वकृतिसाध्यत्वयोर्व्याप्तिस्मरणादुभयविषयिण्यनुमितिरुत्पद्यते, क्वचिच्चाऽनिष्टसाधनीभूतकारणप्रतियोगित्वादेरपि, सामग्रीवशात्। तत्सामग्री चाऽयमत्र प्रवर्तनाभित्याकारकस्वभङ्गनिमित्तकानिष्टप्रयोजनकेच्छाविषयत्वरूपहेतुपरामर्शादिरूपा। स्वपदमिच्छापरम्। वेदेऽपि लिङादिशब्दश्रवणोत्तरकाल व्यापाररूपपदार्थोपस्थित्या निरुक्तसम्बन्धेन व्यापारवती यागादिकृतिरिति शाब्दबोधे जाते वेदस्थलिङादिप्रेरितोऽहं यागादि करोमीत्यादिव्यवहाराद्यागविषयककृतिसम्बन्धाच्च तस्य लिङादिनिष्ठत्व यागेऽयं प्रवर्तनाभित्याद्याकारकत्वं चाऽवगम्यते। अत एव वर्णात्मकलिङादेर्नित्यत्वात्तद्वृत्त्यलौकिकधर्मस्याऽपि नित्यत्वम्। न च भ्रमप्रमासाधारण्येन तज्ज्ञानस्यैवाऽनुमितिजनकत्वाल्लाघवादेव तत्सिद्धौ प्रमाणाभावः, वेदेऽर्थज्ञानस्य भ्रमत्वानुपपत्त्या तत्सिद्धेः। तस्य यागविषयककृतिविषयता च न ज्ञानादिसाधारणी अतिरिक्ता वा, अपि तु पाकेऽयं प्रवर्तनाभित्यादिलौकिकेच्छाविषयतासाधारणी तदभिन्ना वेच्छासामान्यनिरूपितविषयताभिन्ना, अनुगतप्रतीतेरेव तत्र प्रमाणत्वात्। अतश्च लिङादिर्निर्दोषत्वेनाऽऽप्ताभिन्नत्वेऽवधारिते समानसवित्सम्वेद्यतयैव प्रतारणाद्यजन्यहिताहितोपदेशजनकनिष्ठनिरुक्ताकारकव्यापारविषयाभूतकृतिविषयत्वरूपहेतुज्ञानं तथैव मानसं जायते। अतश्च तेनेष्टसाधनत्वाद्यनुमितिर्लोकवदेव नाऽनुपपन्ना। वस्तुतस्त्विच्छात्वं जातिरेव लिङादिपदशक्यतावच्छेदिका लाघवात्, वेदस्थले तु लक्षणा, ईश्वरेच्छैव वा तत्राऽप्यर्थ इति बोद्धव्यम्। इत्थं च यत्र प्रमाणान्तरेण यागादाविष्टसाधनता न बुध्यते तत्रेष्टसाधनत्वस्यैव प्रवर्तनाज्ञानादनुमितिः। यत्र तु तत्प्रमाणान्तरेणाऽवगतम्, निषेधेन च तस्याऽनिष्टसाधनत्वमपि, यथा दीक्षितान्नभोजनस्य 'न दीक्षितान्नमश्नीयात्' इति निषेधात्, तत्र 'हुतायां वषायां दीक्षितस्याऽन्नमश्नीयात्' इति पुनर्विधिरनिष्टसाधनत्वाभावस्यैवाऽनुमापको न त्विष्टसाधनत्वस्य, तस्य प्रमाणान्तरसिद्धत्वेन सिषाधयिषाभावेऽनुमित्यनुत्पत्तेरित्यादिकं बहुतरमूहनीयम्। अर्थो यागादिरिति। अर्थपदेन श्रेयःसाधनस्य

दिनकरी ।

चाऽर्थगोचरत्वमर्थाश्रितत्वं वा । तथा च यागादिगोचराऽऽख्यमाश्रिता प्रवृत्तिरर्थभावना । अत्र च शब्दभावनाया अर्थभावनैव भाव्या, अर्थभावनायाश्च फलं स्वर्गादीति बोध्यम् । तदुक्तम्--

'लिङोऽभिधा सैव च शब्दभावना भाव्या च तस्याः पुरुषप्रवृत्तिः ।
सम्बन्धबोधः करणं तदीयं प्ररोचना चाङ्गतयोपयुज्यते ॥' इति ।

अस्यार्थः । लिङोऽभिधा वाच्या । तस्याः किं भाव्यमित्याकाङ्क्षायामुक्तम्-भाव्या च तस्या इति । केन भाव्या इत्याकाङ्क्षायां—**सम्बन्धेति** । सम्बन्धबोधः--लिङादिपदशक्तिज्ञानम् । तत्राऽऽलस्येन निवर्तमानं पुरुषं स्तुतिरुत्तेजयतीति सा **सहकारिणी** त्याह—प्ररोचनेतीति वदन्ति ।

तच्च । लोके स्वेच्छाधीनप्रवृत्तौ इष्टसाधनताज्ञानस्य हेतुत्वेन क्लृप्तत्वादन्यत्रापि प्रवृत्तौ-तदेव **हेतुरस्तु**, किमतिरिक्त(प्रवर्तनाज्ञानस्यातिरिक्त)हेतुत्वेन । अत एव वेदेऽपि न

रामरुद्री ।

विवक्षितत्वात् । 'चोदनालक्षणोऽर्थो धर्म' इति सूत्रे तथाविधार्थकतायां मीमांसकसम्मतत्वादिति भावः । यागादिरूपस्याऽर्थस्याऽननुगतत्वात्समवायिकारणत्वरूपभेदयःसाधनत्वविशेषाभिप्रायेणाऽऽह । **आत्मा वेति । भाव्येति** । उत्पाद्येत्यर्थः । तत्त्वं च प्रयोज्यत्वमेवेति बोध्यम् । **सम्बन्धबोध इति** । स्वविषयकज्ञानविशेषजन्यानुमितिप्रयोज्यत्वरूपसंसर्गबोधः इत्यर्थः सम्भवतीति ध्येयम् । **करणमिति** । करणं—स्वजन्यफलजनकम् । न त्वसाधारणकारणम्, बाधितत्वात् । इच्छात्मकत्वेन करणादिनिरपेक्षाया अपि शाब्दभावनायाः यत्नत्वेन रूपेणोपस्थितार्थभावनानित्यसाकाङ्क्षयोः करणेतिकर्तव्यतयोरभिधानं च वस्तुस्वरूपप्रदर्शनमात्रायैव, नतु तयोः शाब्दबोधेऽपि प्रवेशः, तथात्वे मानाभावादिति ध्येयम् । **तत्राऽऽलस्येन निवर्तमानमिति । आलस्येन**—बलवदनिष्टजनकत्वज्ञानेन । **निवर्तमानं**—प्रवृत्त्यभाववन्तम् । **उत्तेजयति**—तादृशज्ञाने अप्रमाण्यज्ञानसम्पादनेन प्रतिबन्धकापसरणवन्तं करोतीत्यर्थः । अयं भावः—प्रवृत्तिं प्रति अप्रामाण्यज्ञानानास्कन्दितबलवदनिष्टानुबन्धित्वज्ञानस्य प्रतिबन्धकतया यावच्चिकीर्षितस्य कर्मणस्तदननुबन्धित्वं न ज्ञायते तावत्पर्यन्तं कष्टं कर्मेति न्यायेन तत्समवधाने सति प्रवृत्त्यनुपपत्तेरर्थवादाः प्राशस्त्यात्मकं स्वार्थे बलवदनिष्टसाधनत्वाभावं प्रतिपाद्य प्रतिबन्धकीभूतज्ञानेऽप्रामाण्यज्ञापनेन तद्विघटयन्तः प्रवृत्त्युत्पत्तौ साहाय्यमाचरन्तीति । क्वचिदभ्यनुज्ञाविध्यादौ विधित एव तदवगम इत्यप्युक्तमेव प्राक् । इदन्त्वबधेयम् । अर्थवादलक्ष्यप्राशस्त्यस्योक्तरूपत्वे यागादिजन्यश्रमादेरपि कदाचिद्बलवद्वेषविषयत्वसम्भवेन तदजनकत्वबोधने विधेरप्रामाण्यप्रसङ्गः, किन्तु योग्यतया तत्र तत्र नरकाद्यजनकत्वमेव तदिति ।

अतिरिक्तहेतुत्वेनेति । इदमापाततः । वस्तुतस्तु तादृशेच्छाया विधिवाच्यत्वे एव मानाभावः, आचार्यप्रेरितोऽहं गामानयामीत्यादिव्यवहारस्याऽऽचार्यादीनां प्रवृत्तिप्रयोजकीभूतविध्यर्थबुबोधयिषावत्त्वेनैव प्रवर्तकत्वोपपत्तौ विधेः प्रवर्तनावाचित्वे मानाभावात्, बुबोधयिषाया अवगमस्य च प्रकरणादिना सम्भवेन तदुपपत्तये विधिप्रत्ययस्य तद्वाचकत्वकल्पनाया अन्याय्यत्वात्, अन्यथा घटादिबुबोधयिषाया अपि घटादिपदवाच्यत्वापत्तेः ।

यत्तु प्रवर्तनाया विध्यर्थत्वानुपगमे यत्र केनचित् स्वत एव पाकादाविष्टसाधनत्वादि बुद्ध्वा प्रवृत्तं तस्य पाकवर्तमानतादशायां चैत्रः पचेदिति प्रयोगापत्तिः, इष्टसाधनत्वादिविशिष्टपाकानुकूलकृतिमत्त्वस्य चैत्रेऽबाधितत्वात्, चैत्रः पचतीतिवद्वर्तमानत्वाबोधेऽपि क्षतिविरहात् । इष्टापत्तौ च तादृशवाक्यप्रयोक्तुरुपहासानुपपत्तिः । मन्मते तु तादृशप्रवृत्तेः प्रेरणाप्रयोज्यत्वाभावाद्विषयबाधेनाऽप्रामाण्योपपत्तिस्तादृशप्रयोगस्येति वैषम्यम् । ननु भवन्मतेऽपि यत्राऽन्यप्रेरणया चैत्रस्य प्रवृत्तिस्तत्र पाकवर्तमानतादशायां चैत्रः पचेदिति प्रयोगस्य प्रामाण्यापत्तिः, पाकानुकूलायाश्चैत्रनिष्ठप्रवृत्तेः प्रेरणाप्रयोज्यत्वस्याऽ-

इत्थं च विश्वजिता यजेतेत्यादौ यत्र फलं न श्रूयते, तत्रापि स्वर्गः फलं कल्प्यते नन्वरहः सन्ध्यामुपासीतेत्यादौ इष्टानुपपत्तेः कथं प्रवृत्तिः ? न चाऽऽर्थवादिकं ब्रह्मलोकावाप्तेः प्रत्यवायाभावो वा फलमिति वाच्यम्। तथा सति काम्यत्वे नित्यत्वहान्यापत्तेः, कामनाभावेऽकरणापत्तेः, इत्थं च यत्र फल-

दिनकरी।

प्रवर्तनाज्ञानं हेतुः, शब्दशक्तिभिन्नायामभिधायां मानाभावाच्च। अत एव मण्डनमिश्राः—

'पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्त्तकः। प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम्॥'

इत्यादिना प्रवृत्त्यनुकूलत्वेनेष्टसाधनत्वमेव प्रवर्त्तनेत्युक्तवन्तः।

नन्वेवं विश्वजिता यजेतेत्यादौ फलाश्रवणेनेष्टसाधनताज्ञानाभावात् प्रवृत्तिर्न स्यादत आह—**इत्थं चेति**। इष्टसाधनत्वादेर्विध्यर्थत्वे चेत्यर्थः।

ननु नित्ये सन्ध्योपासनादौ फलाभावान्नेष्टसाधनत्वज्ञानं प्रवर्त्तकं, न वा तद्विषयो विध्यर्थ इत्याभिप्रायेण शङ्कते। **नन्विति। न चाऽऽर्थवादिकमिति।**

'सन्ध्यामुपासते ये तु सततं शंसितव्रताः। विधूतपापास्ते यान्ति ब्रह्मलोकं सनातनम्॥'

इत्यर्थवादबोधितमित्यर्थः। **नित्यत्वहान्यापत्तेरिति।** नित्यत्वकाम्यत्वयोर्विरोध

रामरुद्री।

बाधादिति चेन्न, नाऽस्माभिः प्रेरणाया विषयतासम्बन्धेनैव प्रवृत्तावन्वय इष्यते, न वा प्रेरणा-विषयीभूतप्रवृत्तिविषयत्वेन यागादौ, येनोक्तप्रयोगापत्तिः शङ्क्येत, किन्तु स्वज्ञानजन्यानुमितिप्रयोज्यत्व-संसर्गेणाऽऽख्यातार्थप्रवृत्तौ प्रेरणायाः प्रकारत्वम्, तच्च प्रेरणाज्ञानं स्वप्राक्कालीनस्वज्ञानोपधेयमेव स्वरूपेण तद्वृत्तिरूपेण वा संसर्गमध्ये निविशते। प्रथमस्वपदं तत्तत्प्रवृत्तिव्यक्तिपरम्, द्वितीयस्वपदं तत्तल्लिङादिपदव्यक्तिपरम्। तेन तत्तत्प्रवृत्तिप्रागभावकाले यल्लिङादिपदज्ञानम्, तेनोत्पादितं यत्प्रेरणाज्ञानं, तज्जन्येष्टसाधनत्वानुमितिप्रयोज्यत्वं संसर्ग इति फलितम्। अतश्च प्रवृत्तिवर्तमानतादशायां अनेन संसर्गेण प्रेरणावत्त्वस्य प्रवृत्तौ बाधादस्मन्मते तादृशप्रयोगापत्तेरनवकाशादिति नव्यमीमांसक-मतम्,

तन्न, वाक्यप्रयोगे वाक्यार्थबुबोधयिषाया अपि हेतुत्वेन स्वत इष्टसाधनतादिज्ञानवत्पुरुषविषयक तादृशबुबोधयिषाया इष्टसाधनत्वादिज्ञानसिद्धत्वग्रहप्रतिरुद्धतया तदभावादेव तादृशप्रयोगवारणसम्भ-वात्। तदसिद्धत्वभ्रान्त्या तत्सिद्धत्वाज्ञानेन वा प्रयुक्तात्तादृशवाक्याच्चेष्टसाधनत्वादिविषयकशाब्दस्य नैयायिकानामिष्टत्वात्, इष्टसाधनत्वादिग्रहासिद्धत्वभ्रान्त्या तत्सिद्धत्वाज्ञानेनैव च दोषेण तादृशवाक्य-प्रयोक्तुरुपहासोपपत्तेरिति भवदीयकुसृष्टिकल्पनाया व्यर्थत्वादिति दिक्। अतिरिक्तप्रवर्तनावादिनां मतं पुनरपि खण्डयति। **अत एवेति।** प्रवर्त्तनाज्ञानस्याऽहेतुत्वादेवेत्यर्थः। **अत एवेति।** प्रवर्तनाया अभिधातिरिक्तत्वादेवेत्यर्थः।

इष्टसाधनताज्ञानाभावादिति। स्वसमभिव्याहृतपदोपस्थापितकामनाविषयतावच्छेदकत्वस्य विधिपदशक्यतावच्छेदकोपलक्षणतया कामादिपदसमभिव्याहारमन्तरेणेष्टसाधनताज्ञानासम्भवादित्यर्थः। मूले—**स्वर्गः फलमिति।** तथा च स्वर्गकामपदमध्याहर्तव्यमिति भावः।

मूले—**काम्यत्व इति।** फलकामनाधीनकृतिसाध्यत्व इत्यर्थः। **नित्यत्वहान्यापत्तेरिति।** शौचतत्कालजीवित्वादिविशिष्टसकलद्विजकृतिसाध्यतारूपाया नित्यताया भङ्गप्रसङ्गादित्यर्थः। तथा च तद्बोधिकाया **अहरहः** श्रुतेरप्रामाण्यप्रसङ्ग इत्यर्थः। अहरहः सन्ध्यामुपासीतेति श्रुत्या हि शौचत-त्कालजीवित्वविशिष्टद्विजमात्रप्रत्येककृतिसाध्यत्व सन्ध्यावन्दनत्वावच्छेदेनाऽवगतम्, शौचतत्कालजी-वित्वादेरधिकारिविशेषणतायाः पदाध्याहारादर्थाध्याहाराद्वाक्यैकवाक्यतया वा लाभात्, वीप्सायामा-

श्रुतिस्तत्राऽर्थवादमात्रमिति चेन्न । ग्रहणश्राद्धादौ नित्यत्वनैमित्तिकत्वयोरिव नित्यत्वकाम्यत्वयोरप्यविरोधात् । न च कामनाभावेऽकरणापत्तिः, त्रिकालस्तवपाठादाविव कामनासद्भावस्यैव कल्पनात् ।

दिनकरी ।

इत्यभिमानः । ननु तयोर्विरोधित्वे मानाभावः, 'अहरहः सन्ध्यामुपासीत इत्यादिश्रुति 'सन्ध्यामुपासते—' इत्यर्थवादयोरेकवाक्यतावलेन तत्कालजीविफलकामस्य सवलिताधिकारः कल्प्यत इत्यत आह । **कामनाभाव इति । अकरणापत्तेरिति ।** अकरणे प्रत्यवायानुत्पत्त्यापत्तेरित्यर्थः । कामनारूपाधिकाराभावादनधिकृताकरणस्य प्रत्यवायजनकत्वाभावादिति भावः । ननु तथाऽपि नित्यस्थलीयफलश्रुतेर्वैयर्थ्यमित्याशङ्क्याऽर्थवादतया स्तुतिमात्रे तात्पर्यं कल्प्यत इत्याह । **इत्थं चेति । कल्पनादिति ।** इदमुपलक्षणम् । **अर्थवादोपस्थितकामनाया**

रामरुद्री ।

वच्छेदावच्छेदेनाऽन्वयतात्पर्यग्राहकत्वात्, इत्थं च सन्ध्यावन्दनादेः फलकामनाधीनकृतिसाध्यत्वरूपकाम्यत्वं न सम्भवति, तादृशफलकामनाशून्यपुरुषीयकृतिसाध्यसन्ध्यावन्दनव्यक्तिषु कामनाधीनकृतिसाध्यत्वस्य बाधादहरहः श्रुत्यर्थवादयोरेकवाक्यताप्रामाण्यस्य दुर्वारत्वादिति भावः । न च सन्ध्यावन्दनत्वावच्छेदेन न तादृशकृतिसाध्यत्वान्वयसम्भवः, बाधात्, एकपुरुषीयकृतिसाध्यत्वस्याऽपरपुरुषीयसन्ध्यावन्दनेऽभावात्, भाविसन्ध्याकालजीवित्वविशिष्टभाविद्विजकृतिसाध्यत्वस्याऽतीतसन्ध्यावन्दनादावभावाच्चेति वाच्यम् । तत्सन्ध्याकालजीवित्वविशिष्टकृतिसाध्यत्वस्य तत्सन्ध्याकालीनसन्ध्यावन्दन एव सम्भवेन सन्ध्यावन्दनत्वसामानाधिकरण्येन तादृशकृतिसाध्यत्वावगमेऽपि फलतः सन्ध्यावन्दनमात्रस्य कृतिसाध्यतावगमात्, सर्वेषामेव सन्ध्याकालानां प्रातिस्विकरूपेण जीवित्वविशेषणतया प्रवेशादिति । न च सन्ध्यावन्दनत्वसामानाधिकरण्येनैवान्वयबोधोपगमान्नैष दोष इति वाच्यम् । असति बाधके वेदजन्यशाब्दबोधेऽवच्छेदावच्छेदेनैवाऽन्वयनियमस्योपगन्तव्यत्वात् । अन्यथा स्वकृतयागादिव्यक्तौ फलसाधनत्वसन्देहेन प्रवृत्त्यनुपपत्तेरिति भावः । अनया रीत्याऽहरहः श्रुतेः सन्ध्यावन्दने कामनाभाववत्पुरुषकृतिसाध्यत्वग्राहिदृष्टप्रमाणविरोधेनाऽप्रामाण्यमापादितम्, श्रुतिप्रामाण्यमभ्युपेत्य तादृशदृष्टप्रमाणस्यैदानीमप्रामाण्यमापादयति । **कामनाभाव इति । अकरणापत्तेः**—कृतिसाध्यत्वाभावापत्तेरित्यर्थः । तथा च कृतिसाध्यत्वग्राहिदृष्टप्रमाणस्याऽप्रामाण्यापत्तिरिति भावः । टीकायम्—**विरोधित्वे मानाभाव इति ।** तत्र हेतुमाह । **अहरहरिति ।** यतो श्रुत्यादेः । तथा च यतः संवलिताधिकारः कल्प्यते, अनयोर्विरोधे मानाभाव इति योजना । **संवलिताधिकार इति । संवलितः**—समुदितः, **अधिकारः**—फलहेतुप्रवृत्तिप्रयोजकः । तेन शुचितत्कालजीवित्वं फलकामना च द्वयमेव नित्याक्रियाजन्यफलहेतुः, य द्वृशिष्टेनैव क्रियमाणस्य धर्मणः फलजनकत्वं तस्यैव प्रवृत्तिप्रयोजकधर्मस्याऽधिकारत्वात् । इत्थं च विध्यर्थवादयोरेकवाक्यतावलेन तत्कालजीविफलकामाद्विजमात्रप्रत्येककृतिसाध्यत्वस्यैव प्रत्येकं सन्ध्यावन्दनेषु बाधोपगमान्नैष दोष इति भावः । **अनधिकृताकरणस्येति ।** वस्तुतस्तु—

'निद्रया कलहैर्नृत्यैरनाश्वासैश्च साम्प्रतम् । त्यक्तवैदिककर्माणो घोरं नरकमाप्नुयुः—'

इत्यादिस्मृतिबलात् फलकामनातिरिक्तयावदधिकारवत एव नित्यनैमित्तिकाकरणे प्रत्यवायः कल्प्यत इति सन्ध्यावन्दनदशायां फलकामनाविरहेऽपि शौचादिमतस्तदकरणे प्रत्यवायः सम्भवत्येव । अन्यथा सन्ध्यादशायां पतितस्पर्शनिबन्धनादप्यकरणात् प्रत्यवायो न स्यात्, अतः स्वज्ञाननिष्पाद्यभिज्ञेनैवाऽधिकारेण विशिष्टस्याऽकरणे प्रत्यवायस्य वाच्यत्वात् । यदि च फलकामना नाऽधिकारः, प्रमाणाभावात्, अन्यथाऽनुषङ्गात् फलसिद्धिः क्वापि न स्यात्, यद्विशिष्टेनैव क्रियमाणस्य फलजनकत्वं तस्यैव शौचब्राह्मणत्वादेरधिकारत्वात्, 'अकामकृतात् कामकृतं पापं पुण्यं च द्विगुणं—'इत्यापस्तम्बवच-

ननु वेदबोधितकार्य्यताज्ञानात् प्रवृत्तिः सम्भवत्येवेति चेन्न । इष्टसाधनत्वमविज्ञाय तादृशकार्य्यताज्ञानसहस्रेणाऽपि प्रवृत्तेरसम्भवात् ।

यदपि पण्डापूर्व(१) फलमिति, तदपि न । कामनाऽभावेऽकरणापत्तेस्तौल्यात् । कामनाकल्पने त्वार्थवादिकफलमेव रात्रिसत्रन्यायात् कल्प्यते, अन्यथा प्रवृत्त्यनुपपत्तेः ।

दिनकरी ।

अधिकारत्वेऽपि 'अकुर्वन् विहितं कर्म' इत्यादिना शौचे सति विहिताननुष्ठानस्य प्रत्यवायजनकत्वबोधनात् कामनासंवलितस्य शुचित्वादेर्नाधिकारत्वं, किन्तु नित्यस्थले फलकामनाशुचित्वाद्योरधिकारयोः संवलनं, तथा च कामनाविरहेऽपि शुचित्वादिरूपाधिकारसत्त्वात् तदा सन्ध्याद्यकरणस्य प्रत्यवायजनकत्वमेव । कामनाया अधिकारत्वेऽपि तदधिकारवतः शौचादिविरहिणः सन्ध्याद्यकरणस्य प्रत्यवायजनकत्वं न कल्प्यते, शुचित्वकालजीवित्वरूपाधिकारैकदेशवतोऽप्यकरणे प्रत्यवायजकत्वकल्पनेन संवलिताधिकारत्वेऽपि क्षतिविरहाच्चेत्यपि द्रष्टव्यम् । एतेन तत्र नियमेन फलकामनासत्त्वे मानाभावेऽपि न क्षतिरिति सूचितम् ।

ननु नित्यगोचरप्रवृत्ताविष्टसाधनताज्ञानं कारणमेव नेत्यनेनैवोपपत्तौ किमर्थं नित्यस्यापि काम्यत्वं कल्पनीयमत आह । **नन्विति । इष्टसाधनत्वमिति ।** अन्वयव्यतिरेकाभ्यां प्रवृत्तित्वावच्छिन्नं प्रतीष्टसाधनताज्ञानस्य हेतुत्वादिति भावः । अत एव कुसुमाञ्जलौ सन्ध्योपासनमफलमपि क्रियते वेदबोधितत्वादित्याशङ्क्य गुरुमतमेतन्न गुरोर्मतमित्यभिधायैवोपेक्षितमाचार्यैः ।

यच्च पण्डाप० स्वतः प्रयोजनं नित्यस्य कर्मण इति प्राभाकरमतं तदपि दूषयति । **यदपीति ।** कामनाऽभावे-पण्डापूर्वात्मकफलकामनाभावे । **रात्रिसत्रन्यायादिति ।** तथा हि रात्रिसत्रशब्दवाच्यानां ज्योतिर्गौरित्यादिवाक्योत्पन्नकर्मणां फलजिज्ञासायामत्यन्ताश्रुतस्वर्गादिकल्पने गौरवाद्विश्वजिन्न्यायापवादेन "प्रतितिष्ठन्ति ह वा य एता रात्रीरुप

रामरुद्री ।

नात् कामनाया द्विगुणफलं प्रत्येव प्रयोजकत्वावगतेरित्युच्यते, तदाऽनुपपत्तिगन्धोऽपि नाऽस्तीति युक्तमुत्पश्यामः । न चैवं रीत्यैवोपपत्तौ सर्वत्र कामनासद्भावकल्पनेन नित्यत्वकाम्यत्वयोर्विरोधापादकाग्निममूलावतारानुपपत्तिरिति वाच्यम् । विधिवाक्यार्थवादवाक्ययोरुक्तरीत्यैकवाक्यताया अर्थवादवाक्यस्य ब्रह्मलोकादिसाधनत्वबोधे विधिवाक्यस्य तात्पर्यग्राहकत्व विनाऽसम्भवेन तत्कल्पने गौरवभियैव तादृशग्रन्थावतारमङ्गतेरिति । **स्तुतिमात्र इति ।** स्तुतिर्हेतुत्व इत्यर्थः । **तात्पर्य**—वक्तुरभिप्रेतत्वम् । सुखहेतुपदार्थमात्रोपस्थितिः स्तुतिः । तथा च तादृशशब्दप्रयोगमात्र एव वक्तुरभिप्रेतत्वम्, न तु ततोऽर्थबोधोऽपि विवक्षित इति भावः । न चैवमेतादृशार्थवादस्य शाब्दबोधाजनकत्वेनाऽप्रामाण्यापत्तिरिति वाच्यम् । विधिवाक्याङ्गलवदनिष्टाननुबन्धित्वरूपप्राशस्त्यबोधनिर्वाहार्थं तादृशार्थे तात्पर्यग्राहकत्वेन परम्परया शाब्दबोधोपयोगित्वेन परम्परया प्रामाण्यसम्भवादिति ध्येयम् । **कल्पनादितीति ।** अननुभूयमानाया अपि फलकामनायाः कल्पनादित्यर्थः । टीकायाम्—**शौचे सतीति ।** तेनाऽशुचेः सन्ध्यावन्दनाद्यकरणे न प्रत्यवायानुत्पत्तिप्रसङ्गः । इदमुपलक्षणम् । यत्र प्रत्यवायपरिहारस्याऽनुपस्थितिस्तत्राऽन्ततः स्वविशिष्टताप्रतिपत्त्यर्थं लोकावगानिवृत्त्यर्थमेव वा नित्यस्थले प्रवृत्तिर्भविता, कल्पकारणं विना कार्यानुत्पादादिति ध्येयम् ।

---

(१) निष्फला पूर्वमित्यर्थः ।

तेनानुत्पत्तिभेवाऽन्ये प्रत्यवायस्य मन्वते। एवं—
'सन्ध्यामुपासते ये तु सततं शंसितव्रताः।
विधूतपापास्ते यान्ति ब्रह्मलोकमनामयम्॥'
एवं—
'दद्यादहरहः श्राद्धं पितृभ्यः प्रीतिमावहन्।—'

इत्यादिवचनप्रतिपादितब्रह्मलोकादिकमेव फलमस्तु। न च पितृप्रीतिः कथं फलं? व्यधिकरणत्वादिति वाच्यम्। गयाश्राद्धादाविवोद्देश्यत्वसम्बन्धेनैव फलजनकत्वस्य क्वचित्कल्पनात्, अत एवोक्तं शास्त्रदर्शितं फलमनुष्ठानकर्तरीत्युत्सर्ग इति। पितॄणां मुक्तत्वे तु स्वस्य स्वर्गादिफलम्, यावन्नित्यनैमित्तिकानुष्ठानस्य सामान्यतः स्वर्गफलकल्पनात्। पण्डापूर्व्वार्थं प्रवृत्तिश्च न सम्भवति। न हि तत् सुखं, तस्य स्वतः पुरुषार्थत्वाभावेन फलत्वाभावात्, न वा तत्साधनम्। प्रत्यवायानुत्पत्तौ कथं प्रवृत्तिरिति चेत्, इत्थम्—तथा हि नित्ये कृते प्रत्यवायाभावस्तिष्ठति तदभावे तदभावः, एवं प्रत्यवायाभावस्य सत्त्वे दुःखप्रागभावसत्त्वं तदभावे तदभाव इति योगक्षेमसाधारणकारणताया दुःखप्रागभावं प्रत्यपि सुवचत्वात्।

दिनकरी।

यन्ति" इत्यर्थवादश्रुतौ प्रतिष्ठैव फलमिति सिद्धान्तितम्, तथाऽत्राप्यार्थवादिकं ब्रह्मलोक एव फलं लाघवादित्यर्थः। अन्यथा—फलाभावे।

तेन—आर्थवादिकफलकल्पने लाघवेन। तत्र तत्रार्थवादिकं फलं दर्शयति—**अनुत्पत्तिमित्यादिना।**

अत एव—पितृप्रीतेः श्राद्धफलत्वादेव। **उत्सर्ग इतीति।** श्राद्धादिफलस्य कर्तृमात्रगतत्वे तु व्यभिचाराभावान्नियम एव स्यादिति भावः। पण्डापूर्वस्वीकारेऽपि तत्साधनताज्ञानस्य प्रवर्त्तकत्वं न सम्भवतीत्याह। **पण्डापूर्वार्थमिति।** तथा चेच्छाविषयत्वाभावेन फलत्वाभावान्न तत्साधनताज्ञानं प्रवर्त्तकमिति भावः। ननु स्वन्मतेऽपि प्रत्यवायानुत्पत्तेः कथं फलत्वं? स्वतः पुरुषार्थत्वाभावात्, न वा दुःखानुत्पत्तिरूपपुरुषार्थसाधनत्वेन तत्रेच्छाविषयत्वं, दुःखानुत्पत्तेः प्रागभावरूपायास्तदजन्यत्वादित्याशङ्क्य परिहरति—**प्रत्यवायेत्यादिना।** अनुत्पत्तावित्युद्देश्यत्वं सप्तम्यर्थः। **कथं प्रवृत्तिरिति।** पूर्वोक्तरीत्या प्रत्यवायानुत्पत्तेः फलत्वाभावेन तत्साधनताज्ञानस्य प्रवृत्त्यहेतुत्वात् सन्ध्यावन्दनादौ कथं प्रवृत्तिरित्यर्थः। प्रत्यवायाभावः—प्रत्यवायप्रागभावः। तदभावे—सन्ध्यावन्दनादिनित्याभावे। तदभावः—प्रत्यवायाभावस्याभावः। तदभावे—प्रत्यवायाभावस्याभावे। तदभावः—दुःखप्रागभावाभावो दुःखरूपः। **योगक्षेमसाधारणेति।** योगः—अप्राप्तस्य प्राप्तिः। क्षेमः—सिद्धस्य संरक्षणम्। प्रवृत्तिं प्रतीष्टसाधनताज्ञानस्य हेतुतायां साधनतायाः क्षेमसाधारण्या एव प्रविष्टत्वादिति भावः।

प्रागभावस्य प्रतियोगिविकल्पग्रासेन फलत्वासम्भवात् प्रत्यवायात्यन्ताभाव एव नित्यस्य

रामरुद्री।

प्रतियोगिविकल्पग्रासेनेति। यस्य कस्य कदाचिदपि नो पादस्तस्य प्रागभावत्मानाभावाच्चस्याऽवश्यमुत्पत्तिस्तस्यैव प्रागभावस्य स्वीकरणीयतया सन्ध्योपासने कृतेऽपि तदुत्पत्तेरावश्यकत्वात्तदनुत्पत्यर्थं

एवमेव प्रायश्चित्तस्यापि दुःखप्रागभावहेतुत्वमिति ।

ननु न कलञ्जं भक्षयेदित्यत्र विध्यर्थे कथं नञर्थान्वयः ? इष्टसाधनत्वाभावस्य कृतिसाध्यत्वाभावस्य च बोधयितुमशक्यत्वादिति चेन्न । तत्र बाधादिष्टसाधनत्वं कृतिसाध्यत्वं च न विध्यर्थः, किन्तु बलवदनिष्टाननुबन्धित्वमात्रम्, तदभावश्च नञा बोध्यते । अथ वा बलवदनिष्टाननुबन्धीष्टसाधनत्वे सति कृतिसाध्यत्वं विध्यर्थस्तदभावश्च नञा बोध्यमानो विशिष्टाभावो विशेष्यवति विशेषणाभावे विश्राम्यति ।

दिनकरी ।

फलं स्वरूपसम्बन्धविशेषात्मकक्षेमसाधारणजन्यताया अत्यन्ताभावे सत्वादिति तु नव्याः ।

एवमेव—योगक्षेमसाधारणमेव ।

ननु न कलञ्जमिति । अत्र कलञ्जभक्षणाभाव इष्टसाधनमित्यन्वयबोधाभ्युपगमे बाधकाभाव इत्यत **आह । विध्यर्थे कथं नञर्थेति ।** विध्यर्थनञर्थयोः कथमन्वयः, विध्यर्थेष्टसाधनत्वाद्यन्वितनञर्थस्याभावस्य कलञ्जभक्षणे कथमन्वय इत्यर्थः । **अशक्यत्वादिति ।** कलञ्जभक्षणे तस्य बाधादिति भावः । **बलवदनिष्टाननुबन्धित्वमात्रमिति ।** विधेः कृतिसाध्यत्वादिषु त्रिषु शक्तिस्वीकारेण क्वचित्कस्यचिद्विध्यर्थस्य बोधस्वीकारादिति भावः । प्रवृत्तिं प्रति कृतिसाध्यत्वविशिष्टबलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वज्ञानस्वेनैकस्यैव हेतुत्वं लाघवात्, नतु कृतिसाध्यत्वादिप्रत्येकविषयकज्ञानत्वेन, गौरवात्, अतो विधेरपि विशिष्टमेव शक्यं वाच्यम् । एवं च निषेधस्थले विशिष्टाभावो विधिसमभिव्याहृतनञा बोध्यत इत्यभिप्रायवानाह—**अथ वेति । विशेषणाभावे विश्राम्यतीति ।** एवं चेष्टसाधनत्वादिमति कलञ्जभक्षणादौ विशिष्टाभावो बोध्यमानो बलवदनिष्टाननुबन्धित्वाभावे पर्यवस्यतीति भावः ।

रामरुद्री ।

सन्ध्योपासनस्य वैयर्थ्यापत्तेरिति भावः । **प्रत्यवायात्यन्ताभाव एवेति ।** प्रागभावस्वसम्बन्धावच्छिन्नप्रतियोगिताकप्रत्यवायात्यन्ताभाव इत्यर्थः । तेन सन्ध्यावन्दनकर्तुस्तत्र प्रत्यवायाभावस्य प्रागभावरूपकारणविरहादेवोपपत्तावपि न क्षतिः । प्रायश्चित्तादेरप्येतादृश्येव रीतिश्चिन्तनीया ।

मूले—**तत्र बाधादिति । इष्टसाधनत्वकृतिसाध्यत्वाभावयोरित्यादिः । न विध्यर्थे इति ।** न विधिप्रत्ययजन्यबोधविषय इत्यर्थः । इदमुपलक्षणम् । इयेनेनाऽभिचरन् यजेतेत्यत्र कृतिसाध्यत्वे सतीष्टसाधनत्वमात्रमेव विधिवाक्यजन्यशाब्दबोधे भासते, न तु बलवदनिष्टाननुबन्धित्वमपि, तत्र तस्य बाधादिति । अथैवमग्नीषोमीयं पशुमालभेतेत्यादावपि बलवदनिष्टाननुबन्धित्वपरित्यागेनेष्टसाधनत्वकृतिसाध्यत्वयोरेवाऽन्वयबोधस्वीकारसम्भवेन मा हिंस्यादिति निषेधस्य वैधहिंसेतरहिंसापरत्वकल्पनं मीमांसकानामसङ्गतम् । न चासति बाधके औत्सर्गिकार्थपरित्यागस्याऽन्याय्यतया मा हिंस्यादिति निषेधस्य वैधेतरहिंसापरत्वेनैवोपपत्तावग्नीषोमीयमित्यादेर्बलवदनिष्टाननुबन्धित्वबोधकत्वमक्षुण्णमेवेति वाच्यम् । अग्नीषोमीयमित्यादिवाक्यस्यौत्सर्गिकार्थापरित्यागोपपत्तये हिंसानिषेधकवाक्यस्य वैधेतरहिंसापरत्वकल्पनेऽप्यौत्सर्गिकार्थपरित्यागस्याऽऽवश्यकतयैकस्यैवौत्सर्गिकार्थपरित्यागकल्पने विनिगमकाभावस्य दुर्वारत्वादिति चेन्न, वैधहिंसाया निषेधविषयत्वेऽनन्तवैधहिंसाधीनानन्तपापव्यक्तिकल्पनागौरवस्यैव बाधकत्वात्, तादृशगौरवस्य च मा हिंस्यादिति निषेधस्य वैधेतरहिंसापरत्वे लाघवमिति लाघवज्ञानसम्पादकतया वैधेतरहिंसाविषयकबोधस्यैव स्वीकर्तव्यत्वात् । यद्यौत्सर्गिकार्थपरित्यागे उभयोर्विनिगमनाविरहेऽपि न क्षतिः, विनिगमनाविरहेणैकस्यैवस्य कर्तुमशक्यतयोभयविधबोधस्याऽप्यस्वीकर्तव्यतया मा हिंस्यादिति

ननु श्येनेनाऽभिचरन् यजेतेत्यत्र कथं बलवदनिष्टाननुबन्धित्वं विध्यर्थः ? श्येनस्य मरणानुकूलव्यापारस्य हिंसात्वेन नरकसाधनत्वात्। न च वैधत्वान्न निषेध इति वाच्यम्। अभिचारे प्रायश्चित्तोपदेशात्।

दिनकरी।

विशिष्टस्य विध्यर्थत्वे श्येने बलवदनिष्टाननुबन्धित्वरूपविशेषणबाधात्कथं विशिष्टस्य विध्यर्थस्य बोध इत्याशङ्क्ते। **ननु श्येनेनेति**। श्येनेति कर्मनामधेयम् अभिचरन्-वैरिमरणं कामयन्। **कथमिति**। श्येने तस्य बाधितत्वादिति भावः। अर्थः-विधिजन्यबोधविषयः। **वैधत्वान्न निषेध इतीति**। यङ्गीयपश्वालम्भनानुरोधेन मा हिंस्यादिति निषेधस्य वैधहिंसेतरहिंसापरत्वादिति भावः। **अभिचार इति**। तथा 'चाभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति' इति तत्र प्रायश्चित्तोपदेशवैयर्थ्यापत्त्या निषेधविधेस्तदतिरिक्तपरत्वं न सम्भवतीति भावः।

रामरुद्री।

निषेधस्य वैधहिंसाऽविषयकत्वसिद्ध्यैवाऽस्मदभीष्टसिध्याऽग्नीषोमीयवाक्येन बलवदनिष्टाननुबन्धित्वाबोधऽपि क्षतिविरहादिति विभावनीयम्।

टीकायाम्- **विशिष्टस्य विध्यर्थत्व इति**। त्रयाणां तथात्वे पूर्वोक्तयुक्त्या बलवदनिष्टाननुबन्धित्वपरिहारेणाऽपि शेषभूताथद्वयभानसम्भवादिति भावः **प्रायश्चित्तोपदेशवैयर्थ्यापत्त्येति**। शाब्यत्वं निषेधविध्यन्वयितुतायाथः। तादृशोपदेशे **अभिचारं** अभिचारजन्य पापं त्रिभिः कृच्छ्रैर्व्यपोहतात्यर्थस्यैव वाच्यत्वेन पापस्याऽभिचाराजन्यत्वे तादृश्यर्थानुपपत्त्या तदुपपत्तयेऽभिचारनिषेधबोधकत्वस्याऽपि कल्पनीयत्वादिति भावः। एतच्च अभिचारं न कुर्यादित्यादिरूपनिषेधविध्यन्तरकल्पने न हेतुतयोपात्तम्, अभिचारे प्रायश्चित्तोपदेशस्याऽर्थवत्त्वाय मा हिंस्यादिति निषेधविधेरेव तत्र प्रवृत्तिकल्पनसम्भवेन तमुपेक्ष्य निषेधान्तरकल्पनस्य मूलकृतामसङ्गतत्वापत्तेः। नच मा हिंस्यादिति निषेधाविषयत्वेऽपीष्टयाद्यर्थहिंसाया अभिचार इत्यादिमूलस्य तादृशनिषेधान्तरबोधन एव तात्पर्यमङ्गीकर्तव्यमिति वाच्यम्। तादृशाध्याहारे मानाभावात्। अथवा अभिचारे प्रायश्चित्तोपदेशादित्यस्य मा हिंस्यादितिनिषेधभिन्ननिषेधप्रवृत्त्यबाधकत्वमेवाऽभिमतम्। अत एव प्रायश्चित्तोपदेशसामान्यस्यार्थवत्त्वाय कल्पनीयत्वरूपस्य हेतोर्निषेधविधौ मा हिंस्यादितिनिषेधभिन्नत्वसाधकत्वं न सम्भवति, मा हिंस्यादिति निषेधस्याऽपि तथाकल्पनसम्भवेन हेतोर्व्यभिचारसन्देहादित्यतः **प्रायश्चित्तोपदेशादित्यस्य** अभिचारमहीन चेत्यादिवचनबोधितकृच्छ्रत्रयात्मकप्रायश्चित्तविशेषपरत्वेन व्याख्यानमपि सङ्गच्छते। न हि तादृशप्रायश्चित्तविशेषस्यार्थवत्त्वाय मा हिंस्यादितिनिषेधप्रवृत्तिः कल्पयितुं शक्यते, अभिचारातिरिक्तलौकिकहिंसाया अपि तद्विषयत्वेन तत्राऽपि कृच्छ्रत्रयाचरणरूपप्रायश्चित्तोपदेशप्रसङ्गात्। मा हिंस्यादितिनिषेधाप्रस्यैव प्रत्यवायस्याऽभिचारजन्यस्य कृच्छ्रत्रयाचरणापनोद्यत्वमुक्तप्रायश्चित्तविधिना बोध्यते, प्रत्यवायान्तरस्य च तादृशस्य प्रायश्चित्तान्तरोपदेशसङ्गतिरित्युच्यते चेत्तदपि न, श्येनोत्पत्तिवाक्यस्य विशेषशास्त्रतया सामान्यशास्त्रस्य मा हिंस्यादित्यादेस्तदतिरिक्तहिंसापरत्वेनैव प्राप्ततया श्येनजन्यप्रत्यवायस्य ततः प्राप्तेरेवाऽसम्भवात्, पापवैचित्र्यमन्तरेण प्रायश्चित्तवैचित्र्यासम्भवात्तादृशजातिद्वयावच्छिन्नपापजनकत्वस्यैकवाक्यार्थत्वासम्भवाच्चेति। टीकाग्रन्थस्तित्वर्थं व्याख्येयः—ननु किं निषेधविध्यन्तरकल्पनेन ? मा हिंस्यादिति निषेधस्यैव तत्र प्रवृत्तिः कल्प्यतामित्याशङ्क्याऽऽह। **तदतिरिक्तपरत्वं न सम्भवतीति**। पूर्वोक्तयुक्त्याऽभिचारातिरिक्तलौकिकादिहिंसापरमा हिंस्यादित्यादिनिषेधवाक्यरूपत्वं न सम्भवतीत्यर्थः। अनेन प्रघट्टकेन मा हिंस्यादिति निषेधस्य वैधहिंसामात्राविषयत्वमुक्तम्, तदनभ्युपगमे

न च मरणानुकूलव्यापारमात्रं यदि हिंसा, तदा खड्गकारस्य कृपकर्त्तुश्च हिंसकत्वापत्तिः, गललग्नान्नभक्षणजन्यमरणे स्वात्मवधित्वापत्तिश्चेति वाच्यम्। मरणोद्देश्यकत्वस्याऽपि विशेषणत्वात्, अन्योद्देश्यकक्षिप्तनाराचहतब्राह्मणस्य तु वाचनिकं प्रायश्चित्तमिति चेन्न, तत्र बलवदनिष्टाननुबन्धित्वस्य विध्यर्थत्वाभावात्। वस्तुतः श्येनवारणायाऽदृष्टद्वारकत्वेन विशेषणीयम्।

दिनकरी।

नचैवं यज्ञीयपशुहिंसाया अपि प्रत्यवायजनकत्वापत्तिरिति वाच्यम्, अनुपदिष्टप्रायश्चित्तहिंसेतरहिंसापरत्वान्मा हिंस्यादिति निषेधविधेरिति।

साक्षान्मरणानुकूलव्यापार एव हिंसा न श्येनस्तथेति मा हिंस्यादिति निषेधाविषयत्वादस्त्येव बलवदनिष्टाननुबन्धित्वमित्यभिप्रायेण साक्षात्परम्परासाधारणमरणानुकूलव्यापारमात्रस्य हिंसात्वे दोषमाह। **मरणानुकूलव्यापारमात्रं यदि हिंसा तदेति।** साक्षात् परम्परासाधारणः **सर्वोपि** व्यापारो यदि हिंसा तदेत्यर्थः। ननु मरणोद्देश्यकत्वनिवेशेऽन्योद्देशेन प्रक्षिप्तनाराचेन यत्र ब्राह्मणमृतिस्तत्र प्रायश्चित्तं न स्यात्, तस्य हिंसात्वाभावेन मा हिंस्यादिति निषेधाविषयत्वादत आह। **अन्योद्देश्यकेति। वाचनिकमिति।** न तु मा हिंस्यादिति निषेधविषयतयेति भावः। **अदृष्टद्वारकत्वेनेति।** श्येनस्यादृष्टद्वारैव रामरुद्री।

मन्यथा दोषमाह। न चैवमिति। न चेत्यस्य **वाच्यमि**ति परेणाऽन्वयः। **एवं**—एवं रीत्या वैधाविषयत्वस्य मा हिंस्यादिति निषेधेऽभ्युपगमे सति, **इतिवाच्यम्**—इति दोषः, यज्ञीयपशुहिंसाया अपि प्रत्यवायजनकत्वापत्तिरूपो दोषो नेति पर्यवसितार्थः। अन्यथा तु वैधविषयत्वाङ्गीकारे यज्ञीयपशुहिंसाया अपि सदोषत्वापत्तिरिति भावः। एवमित्यनेनोक्तमेवार्थं स्फोरयति। **अनुपदिष्टेति।** वैधहिंसेतरहिंसापरत्वादित्यर्थः। तेन श्येनेन प्रायश्चित्तोपदेशेऽपि न क्षतिः। एतावता प्रबन्धेनाऽभिचारं न कुर्यादित्यादिप्रायश्चित्तोपदेशोन्नेयेन विधिनाऽवगतबलवदनिष्टसाधनत्वस्य श्येनस्य तदननुबन्धित्वघटितविधिवाक्यार्थाऽन्वययोग्यत्वमुपपादितम्। नहि यज्ञीयपशुहिंसायां मा हिंस्यादिति निषेधस्य तदतिरिक्तहिंसाविषयत्वकल्पनेनवाऽत्राऽपि विध्यनुशिष्टाभिचारातिरिक्ताभिचारपरतयाऽभिचारनिषेधवचनस्य श्येनादौ विध्यर्थान्वयः कल्पयितुं शक्यते, सर्वस्यैवाऽभिचारस्य विधिविषयत्वेन तदन्यस्य स्याऽलौकतया तद्विषयस्य निषेधस्य प्रामाण्यानुपपत्तेरिति कथञ्चिदपि विरोधपरिहारासम्भव इति ग्रन्थभावार्थः पर्यवसितः।

अभिचारे प्रायश्चित्तोपदेशार्थवत्त्वाय मा हिंस्यादिति निषेधस्य तत्र प्रवृत्तिस्वीकारो न युक्तः, हिंसापदस्य श्येनाबोधकत्वात्, साक्षान्मरणजनकव्यापारस्यैव तथात्वात्, इत्थं चाऽभिचारमहीनं चेत्यादिकमरिमरणकामनायामेव प्रायश्चित्तोपदेशपरतया कथञ्चिन्नेयम्, कामनाया अप्यभिचारपदार्थत्वादित्याशयेन शङ्कते। **न चेति।** अथवा केषां चित्समाधानान्तरं निराकर्तुं तन्मतमाह। **साक्षादिति।** तथा च मा हिंस्यादितिनिषेधप्रवृत्तिस्तत्र न सम्भवतीति भावः। **मरणोद्देश्यकत्वस्येति।** यद्यपि प्रायश्चित्तोपदेशस्याऽर्थवत्त्वाय कल्पनीयनिषेधान्तरेण श्येनस्य पापजनकत्वप्रामाण्यबाधतेवेति हिंसालक्षणपरिष्करणमनावश्यकं, तथापि समाधानान्तरस्यैव कथनान्न दोषः। तादृशसमाधानस्याऽपि अत्र समुच्चयात्। 'अभिचारे प्रायश्चित्तोपदेशात्' इति मूलस्य मध्यमणिन्यायेनोभयान्वयित्वादिति ध्येयम्। **विध्यर्थत्वाभावादिति।** तथा च तत्र लक्षणया कृतिसाध्यत्वविशिष्टेष्टसाधनत्वबोध इत्यर्थः, विधौ न परः शब्दार्थ इति नियमस्य च विधिप्रत्ययातिरिक्तशब्दपरत्वादिति भावः। अत एव वाऽस्वरसात् कल्पान्तरमाह। **वस्तुत इति। श्येनवारणायेति।** श्येनस्य बलवदनिष्टानुबन्धित्ववारणायेत्यर्थः। **विशेषणीयमिति।**

अत एव काशीमरणाद्यर्थं कृतशिवपूजादेरपि न हिंसात्वम्। न च साक्षान्मरणजनकस्यैव हिंसात्वं, श्येनस्तु न तथा, किं तु तज्जन्यापूर्वमिति वाच्यम्। खड्गघातेन ब्राह्मण व्रणपाकपरम्परया मृते हिंसात्वानापत्तेः।

केचित्तु श्येनस्य हिंसा फलं, न तु मरणम्, तेन श्येनजन्यखड्गाघातादिरूपा हिंसाऽभिचारपदार्थः, तस्य च पापजनकत्वमतः श्येनस्य वैधत्वात् पापाजनकत्वेऽप्यग्रिमपापं प्रतिसन्धाय सन्तो न प्रवर्त्तन्ते इत्याहुः।

दिनकरी।

वैरिमरणसाधनत्वादिति भावः। नन्वस्तु श्येनस्य हिंसात्वं किमदृष्टद्वारकत्वविशेषणेनेत्यत आह। अत एवेति। अदृष्टद्वारकत्वविशेषणादेवेत्यर्थः। न हिंसात्वमिति। तथा च तादृशशिवपूजनादेर्हिंसात्ववारणायावश्यकेनादृष्टद्वारकत्वविशेषणेन श्येनस्यापि हिंसात्ववारणमिति भावः। ननु साक्षान्मरणजनकत्वविशेषणादेव तादृशशिवपूजनश्येनादेर्वारणे किमदृष्टद्वारकत्वेन गुरुविशेषणेनेति तटस्थः शङ्कते। न च साक्षादिति।

अदृष्टद्वारकत्वविशेषणं विनैव श्येने बलवदनिष्टाननुबन्धित्वमुपपादयतां मतमाह। केचित्त्विति। हिंसा फलमिति। साक्षान्मरणफलको व्यापारः फलमित्यर्थः। तस्य-खड्गाभिघातादेः। पापजनकत्वमिति। अभिचारमहीनं चेत्यादिनाऽभिचारस्य पापजनकत्वबोधनात् साक्षान्मरणजनकव्यापारस्यैवाभिचारपदार्थत्वादिति भावः। न च पूर्वं न चेत्यादिनाभिचारस्य पापजनकत्वबोधनात् साक्षान्मरणजनकव्यापारस्यैव हिंसात्वमित्याशङ्कितत्वात् तेन पौनरुक्त्यमिति वाच्यम्, पूर्वं साक्षान्मरणजनकस्य श्येनजन्यापूर्वस्य हिंसात्वमाशङ्कितमिह च तथाभूतस्य खड्गाभिघातादेरितिभेदात्। नचादिपदेन श्येनजन्यापूर्वस्य तथाभूतस्य ग्रहणात् कथ भेद इति वाच्यम्। श्येनजन्यापूर्वस्यैतन्मते खड्गाभिघातं प्रत्येव व्यापारतया तस्य मरणजनकत्वाभावात्। न च साक्षान्मरणजनकव्यापारस्य हिंसात्वे खड्गाघातेन ब्राह्मणे व्रणपाकपरम्परया मृते हिंसात्वानुपपत्तिस्तदवस्थेवेति वाच्यम्। तत्र खड्गघातानुत्तरमेव सन्निपातादिदोषस्योत्पत्त्या मरण प्रति तस्य व्यापारतया व्यवधानाप्रम्भवात्। कुतस्तर्ह्यास्तिकानां श्येने न प्रवृत्तिरत आह। अग्रिमेति। तथा च पातकप्रयोजकत्वान्न तत्रास्तिकानां प्रवृत्तिरिति भावः।

रामरुद्री।

बलवदनिष्टानुबन्धित्वरूपं पापजनकत्वमिति शेषः। तदघटितमेव च बलवदनिष्टाननुबन्धित्वमिति न श्येनादौ विध्यर्थान्वयानुपपत्तिरिति भावः। न चैवं श्येनादेरदृष्टद्वारकबलवदनिष्टानुबन्धिभिन्नत्वात्तस्य नाऽभिचरेतेत्यादि निषेधविषयत्वानुपपत्तिरिति वाच्यम्। अग्रे समाधास्यमानत्वात्। व्रणपाकपरम्परया ब्राह्मणमरणजनके खड्गाघातादौ निषेधप्रवृत्त्युपपत्तय एव चाऽदृष्टद्वारकबलवदनिष्टसाधनत्वाभावस्य विध्यर्थत्वावश्यकत्वादिति। टीकायाम्—वैरिमरणसाधनत्वादिति। नाऽदृष्टमद्वारीकृत्य वैरिमरणजन्यानिष्टप्रयोजकत्वमिति शेषः। न चैवमभिचारप्रायश्चित्तोपदेशेन श्येनस्य साक्षादनिष्टजनकत्वस्याऽऽवश्यकत्वाद्विध्यर्थबाधस्तदवस्थ एवेति वाच्यम्। अभिचारमहीन चेत्यादौ अभिचारपदस्य शत्रुमरणकामनाजन्यपापवाचित्वेन कामनायाः पापजनकत्वेऽपि श्येनस्याऽतथात्वादिति निगर्वः। मूले—अत एवेति। न हिंसात्वमिति। न बलवदनिष्टानुबन्धित्वमित्यर्थः। अन्यथा तु मरणस्य दुःखत्वेन तदनुबन्धित्वस्य तादृशशिवपूजनादौ सत्त्वात्तत्र विध्यर्थान्वयो बाध्येतेति भावः।

दिनकरी

अत्र नव्याः। मास्तु श्येनस्य मा हिंस्यादिति निषेधविषयत्वम्, तथाप्यभिचारतया पापजनकत्वं सर्वसंमतम्। अभिचारस्योपपातकमध्ये मनुना परिगणितत्वादिति कथं तस्य बलवदनिष्टाननुबन्धित्वम्? यच्चोक्तं-श्येनजन्यखड्गाभिघातादेरेवाभिचारतया पापजनकत्वं न श्येनस्येति, तदपि न। अभिचारमहीनं चेत्यत्राभिचारपदेन तज्जनकश्येनादेर्ग्रहणात्, अन्यथा प्रत्यभिचारेण यत्र न खड्गघातायुत्पत्तिस्तत्र प्रायश्चित्तं न स्यात्। एवमपि श्येने पापप्रयोजकतायां बलवदनिष्टाप्रयोजकत्वोपपादनस्याशक्यत्वाच्च। प्रवृत्तिं प्रति बलवदनिष्टाप्रयोजकत्वज्ञानस्यैव जनकतया तद्विषयस्यैव विध्यर्थत्वात्। तथा च श्येनस्य बलवदनिष्टाननुबन्धित्वमुपपाद्य विधेर्बलवदनिष्टाननुबन्धित्वविशिष्टसाधनत्वविशिष्टकृतिसाध्यत्वे शक्तिरयुक्ता, किंतु त्रिषु शक्तित्रयं स्वीकृत्य क्वचित् कस्यचित्क्वचित् कस्यचिदर्थस्य बोध इत्यङ्गीकरणीयम्। श्येनेनेत्यादौ तु बलवदनिष्टाननुबन्धित्वस्य बोधो न भवत्येव। परं त्विष्टसाधनत्वकृतिसाध्यत्वयोरेवेति। किंच विशेषणविशेष्यभावे विनिगमनाविरहेणापि विशिष्टे शक्तिर्न युक्ता। न च प्रत्येकं शक्तिं स्वीकृत्य क्वचित् कस्यचिदर्थस्य बोधोपगमे नियामकाभाव इति वाच्यम्। तात्पर्यस्यैव नियामकत्वात्। प्रत्येकशक्तिपक्षेऽगम्यां गच्छेदित्यादिवाक्यानामिष्टसाधनत्वादिप्रमाजनकतया प्रामाण्यापत्तिरित्यपि न, इष्टापत्तेः। तत्राप्रामाण्यव्यवहारस्तु कदाचिद्बलवदनिष्टाननुबन्धित्वभ्रमजनकत्वनिबन्धनः। न च बलवदनिष्टाननुबन्धित्वे सतीष्टसाधनत्वे सति कृतिसाध्यः पाक इत्येव बोधो न तु कृतिसाध्यत्वे सतीत्यादिरूप इति विशिष्टशक्तिपक्षेपि न विनिगमनाविरह इति वाच्यम्। तथैव बोधो नान्यथेत्यस्य शपथनिर्णेयत्वात्। तस्माद्बलवदनिष्टाननुबन्धित्वादिषु प्रत्येकं शक्तिरिति प्रथमकल्प एव युक्तः। तत्रापि बलवदनिष्टाननुबन्धित्वं नार्थः। यागादिजन्यनान्तरीयकदुःखस्यापि यदा कदाचित् यस्य कस्यचिद्बलद्द्वेषविषयतया यजेतेत्यादीनामप्रामाण्यापत्तेः, न कलञ्जमित्यादिनिषेधावधिवदश्वमेधेन न यजेतेत्यादीनामपि प्रामाण्यापत्तेश्च। अश्वमेधादौ यदा यः पुरुषः प्रवर्त्तते तत्कालीनतत्पुरुषीयबलवद्द्वेषविषयाजनकत्वमर्थ इति तु न सत्, कालभेदेन पुरुषभेदेन च विधिशक्तिकल्पने गौरवात्, कालविशेषपुरुषविशेषाणां विशिष्य ज्ञातुमशक्यतया कालविशेषपुरुषविशेषान्तर्भावेन शक्तेर्दुर्ग्रहत्वाच्च, नाश्वमेधेन यजेतेत्यादिनिषेधविधिवच्च कलञ्जं भक्षयेदित्यादिनिषेधविधीनामप्रामाण्यापत्तेश्च, तत्र यदा यः पुरुषः प्रवर्तते तत्कालीनतत्पुरुषीयबलवद्द्वेषविषयाजनकत्वस्य तत्रापि सत्वात् किन्तु वैदिकविधेः पापाजनकत्वमर्थः, तदभाव एव न कलञ्जं भक्षयेदित्यादौ नवा बोध्यते। शाकं न भुञ्जीतेत्यादिवाक्यस्य प्रामाण्यनिर्वाहाय रोगाजनकत्वमप्यर्थः। एवं पुष्ये नोद्वहेत्, नैकः पर्वतमारोहेदित्यादावपि तत्तदनिष्टा-

रामरुद्री।

अभिचारवदस्य शत्रुमरणकामना नाऽर्थः, किन्तु यागादिरेव, तथा च श्येने पापाजनकत्वस्याऽन्वयो न सम्भवत्येवेति सिद्धान्तभूतं नव्यमतमुपन्यस्यन्नेव मूलोक्तप्रथमकल्पं दूषयति टीकायाम्—**अत्र नव्या इति। अशक्यत्वाच्चेति।** ननु अदृष्टद्वारकबलवदनिष्टप्रयोजकत्वाभाव एवोक्तरीत्या विध्यर्थ इत्याशय इत्यत आह। **प्रवृत्तिं प्रतीति।** तथा च बलवदनिष्टप्रयोजकत्वसामान्याभाव एव तदर्थ इत्यर्थः। अदृष्टद्वारकबलवदनिष्टप्रयोजकत्वाभाव एव विध्यर्थः, प्रवृत्तिं प्रति यादृशबलवदनिष्टानुबन्धित्वाभावज्ञानं कारणं तादृशस्यैव तस्य विध्यर्थत्वमित्यत्र नियामकाभावात्, यादृश प्रमाणान्तरेणाऽप्राप्तं तादृशस्यैव वेदे विध्यर्थत्वादित्यतो दूषणान्तरमाह। **किञ्चेति।**

आचार्य्यास्तु आप्ताभिप्रायो विध्यर्थः। पाकं कुर्य्या इत्यादावाज्ञादिरूपेच्छावाचित्वघञ्जिङ्मात्रस्येच्छावाचित्वं लाघवात्। एवं च स्वर्गकामो यजेतेत्यादौ यागः स्वर्गकामकृतिसाध्यतया आप्तेष्ट इत्यर्थः। ततश्चाप्तेष्टत्वेनेष्टसाधनत्वादिकमनुमाय प्रवर्त्तते। कलञ्जभक्षणादौ तदभावान्न प्रवर्त्तते। यत्तु वेदे पौरुषेयत्वं नाऽभ्युपैति तं प्रति विधिरेव तावद्गर्भ इव श्रुतिकुमार्याः पुंयोगे मानम्। न च कर्त्रस्मरणं बाधकम्। कपिलकणादादिकमारभ्याऽद्यपर्य्यन्तं कर्तृस्मरणस्यैव प्रतीयमानत्वात्। अन्यथा स्मृतीनामप्यकर्तृकत्वापत्तेः। तत्रैव कर्तृस्मरणमस्तीति चेत्, वेदेऽपि "छन्दांसि जज्ञिरे तस्मात्-"इत्यादिकर्तृस्मरणमस्त्येव। एवं—

'प्रतिमन्वन्तरं चैषा श्रुतिरन्या विधीयते-' इत्यपि द्रष्टव्यम्।
'स्वयम्भूरेष भगवान् वेदो गीतस्त्वया पुरा।
शिवाद्या ऋषिपर्य्यन्ताः स्मर्त्तारोऽस्य न कारकाः॥'

दिनकरी।

अजकत्वमर्थो बोध्यः। न च शक्त्यानन्त्यम्, नरकत्वरोगत्वादीन् द्वेषविषयतावच्छेदकत्वेनोपलक्षणीभूतेनानुगमय्य तत्तदवच्छिन्नप्रतियोगिताकाभावकूटे एकशक्तयभ्युपगमात्, रोगाद्यजनकत्वादौ लौकिकलिङो लक्षणाभ्युपगमाद्वेति वदन्ति।

विध्यर्थमाप्ताभिप्रायः, स च स्वेष्टसाधनतानुमापकः, इष्टसाधनताज्ञानं च प्रवर्त्तकमित्युदयनाचार्यमतमाह। आचार्यास्त्विति। इत्यादावित्यादिना पाकं कुर्यामित्युत्तमपुरुषपरिग्रहः। आज्ञादीत्यादिनाध्येषणादिपरिग्रहः। तथा च पाकं कुर्याः पाकं कुर्यामिति मध्यमोत्तमपुरुषयोराज्ञाध्येषणरूपेच्छावाचित्वं क्लृप्तं तदृष्टान्तेन प्रथमपुरुषेऽपीच्छावाचित्वमनुमेयमिति भावः। लाघवादिति। बलवदनिष्टाननुबन्धीष्टसाधनत्वाद्यपेक्षयेच्छात्वेन विधिशक्तौ लाघवादित्यर्थः। इत्यर्थः-इति बोधः। अनुमायेति। अत्र च यागो मम स्वर्गकामस्य बलवदनिष्टाननुबन्धीष्टसाधनं, मत्कृतिसाध्यतयाऽऽप्तेनेष्यमाणत्वात् मन्मात्रकृतिसाध्यतयेष्यमाणमद्भोजनवदित्यनुमानमवधेयम्। तदभावात्-आप्तेष्टत्वाभावेन तद्धेतुकेष्टसाधनत्वज्ञानाभावात्। ननु वेदे वक्तुरभावात् कस्येच्छा लिङा बोधनीयेत्यत आह। यस्त्विति। विधिरेवेति। वक्तृभिन्नेच्छाया बोधने विधेः सामर्थ्याभावाद्विधिरेव वेदवक्तुरीश्वरे मानमिति भावः न च कर्त्रस्मरणमिति। कर्त्तुः-वेदकर्त्तुः। अस्मरणं-स्मृतिभिरबोधनम्। तथा च वेदोऽपौरुषेयः, अस्मर्यमाणकर्तृकत्वादित्यनुमानं बाधकमित्यर्थः। कपिलकणादेति। कपिलकणादगौतमादिभिस्तच्छिष्यैश्चाद्यपर्यन्तमित्यर्थः। कर्तृस्मरणस्य-सकर्तृकत्वबोधकस्मृतेरित्यर्थः। नन्वीश्वरस्य वेदवक्तुः सर्गादौ केनचित्साक्षाद्दृष्टत्वादनुभवेऽस्मरणं तदभावे ऋषीणां स्मृतिप्रणयनं च न सम्भवतीति चेन्न। पौरुषेयत्वानुमानेन वेदवक्तारमनुभूय तन्मूलकश्रुतिस्मृतिप्रणयनयोः सम्भवात्। अन्यथा-वेदे सकर्तृकत्वानङ्गीकारे। तत्रैव-स्मृतिष्वेव। वेदस्य सकर्तृकत्वे श्रुतिं प्रदर्श्य स्मृतिमपि प्रदर्शयति। एवमिति। ननु वेदस्य नित्यत्वबोधकं भारताद्येव तस्याकर्तृकत्वे प्रमाणं भविष्यतीत्याशङ्क्य ते-स्वयम्भूरिति।

इति तु वेदस्य स्तुतिमात्रम् । न च पौरुषेयत्वे भ्रमादिसम्भवादप्रामाण्यं स्यादिति वाच्यम् । नित्यसर्वज्ञत्वेन निर्दोषत्वात् । अत एव पुरुषान्तरस्य भ्रमादिसम्भवान्न कपिलादेः कर्तृत्वं वेदस्य । किञ्च वर्णानामनित्यत्वस्य वक्ष्यमाणत्वात् सुतरां तत्सन्दर्भस्य वेदस्यानित्यत्वमिति ॥ १५० ॥

दिनकरी ।

नित्य इत्यर्थः । एव भगवानित्यपि वेदविशेषणम् । **स्तुतिमात्रमिति** । तथा च पूर्वोक्तश्रुतिस्मृत्योर्विरोधेनास्य भारतस्य न स्वार्थे तात्पर्यमपि तु स्तुतिपरत्वमिति भावः । **भ्रमादिसम्भवात्**-पुरुषस्य भ्रमप्रमादादिदोषसम्भवादित्यर्थः । **नित्यसर्वज्ञत्वेनेति** । नित्यसर्वविषयकज्ञानवत्त्वेनेत्यर्थः । **निर्दोषत्वात्**-भ्रमादिशून्यत्वात् । **अत एव**-नित्यसर्वज्ञत्वाभावादेव । ननु नित्यसर्वज्ञपुरुषप्रणीतत्वापेक्षया नित्यनिर्दोषत्वं वेदे स्वीकृत्य तदेव वेदप्रामाण्ये प्रयोजकमस्तु । तथा च सकर्तृत्वानुमाने बाध इत्यतो वेदस्य नित्यत्वे बाधकमाह । **किंचेति** । **तत्सन्दर्भस्येति** । तन्निष्ठानुपूर्वीविशेषस्येत्यर्थः । आनुपूर्व्या नित्यत्वे स्वनित्यसमवेतनित्यस्य जातित्वेनानुपूर्व्या जातित्वापत्तेरिति भावः । अत्र चाप्तेच्छाविषयत्वस्येश्वरेच्छाविषयत्वरूपस्य केवलान्वयिनः कल्पञ्जभक्षणेऽपि सत्त्वाद्बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वरूपसाध्यस्य च तत्राभावेन व्यभिचारात् कथं तस्य तदनुमापकत्वम् ? बलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वप्रकारकेच्छाया लिङर्थत्वे च लाघवाद्बलवदनिष्टाननुबन्धीष्टसाधनत्वमेव लिङर्थोऽस्तु, कृतमाप्तेच्छयेत्यस्वरस आचार्यास्त्वित्यनेन सूचितः ।

नन्विष्टसाधनत्वस्य न विधितो बोधः सम्भवति, स्वर्गत्वावच्छिन्नसाधनत्वस्य यागे बाधात्, गङ्गास्नानादिजन्यऽस्वर्गे व्यभिचारात्, स्वर्गनिष्ठवैजात्यावच्छिन्नसाधनत्वस्य यागे सत्त्वेऽपि तद्वैजात्यस्य विधिबोधितस्वर्गसाधनत्वान्यथानुपपत्त्या कल्पनीयस्य प्रागनुपस्थित्या तद्घटितकारणत्वे विधिशक्तिप्रहायोगादिति चेन्न । स्वरूपसम्बन्धविशेषरूपाया एव कारणतायाः विध्यर्थत्वोपगमादित्येके । अन्यथासिद्धिनिरूपकतानवच्छेदकधर्मवत्त्वस्वर्गकत्वमेव स्वर्गकारणत्वमित्यन्ये । वस्तुतस्तु स्वर्गनिष्ठधर्मावच्छिन्ननिरूपितनियतपूर्ववर्तितावच्छेदकधर्मवत्त्वमेव स्वर्गकारणत्वं, तच्च यागे न बाधितं, स्वर्गनिष्ठवैजात्यरूपस्वर्गत्वधर्मावच्छिन्नं प्रति यागस्य व्यभिचाराभावात् । ननु विधेरिष्टसाधनत्वे शक्तत्वेऽपि स्वर्गसाधनत्वस्य कथं ततो बोधः ? स्वर्गसाधनत्वादौ विधिशक्तिकल्पने तु शक्त्यानन्त्यम् । न च विधिप्रत्ययोपस्थिते इष्टे स्वर्गपदोपस्थितस्वर्गस्यामेदेनान्वयात् स्वर्गाभिन्नेष्टसाधनत्वस्य बोधः सम्भवतीति वाच्यम् । स्वर्गपदस्य समासान्तर्गततया तदर्थस्यान्यत्रान्वयासम्भवादिति चेन्न, स्वर्गसाधनत्वादौ विधेः शक्तिकल्पनेन तथाबोधनिर्वाहात् । न चैकैकस्य बोधे विधेर्विनिगमकाभावः स्वर्गादिपदसमभिव्याहाराधीनतत्तद्धर्मघटितसाधनत्वे तात्पर्यग्रहस्यैव विनिगमकत्वात् । नचैवं विधिशक्त्यानन्त्यम्, स्वर्गत्वादिधर्मावच्छिन्ननिरूपितसाधनत्वेष्वेकशक्त्युपगमात् । न च शक्यतावच्छेदकभेदाच्छक्तिभेदः, इष्टतावच्छेदकत्वेन स्वर्गत्वादीन्यनुगतीकृत्य तदवच्छिन्ननिरूपितसाधनत्वे एकशक्त्युपगमात् । न चेष्टतावच्छेदकत्वेनैव शाब्दबोधे स्वर्गत्वादीनां भानं स्यान्न तु स्वरूपत इति वाच्यम् । इष्टतावच्छेदकत्वस्योपलक्षणतया शक्तिविषयत्वाद्विशेषणस्यैव शाब्दबोधे भानोपगमात् । कल्प-

उपादानस्य चाऽध्यक्षं प्रवृत्तौ जनकं भवेत् ।
निवृत्तिस्तु भवेद् द्वेषाद् द्विष्टोपायत्वधीयदि ॥ १५१ ॥
यत्नो जीवनयोनिस्तु सर्वदाऽतीन्द्रियो भवेत् ।
शरीरे प्राणसञ्चारे कारणं तत् प्रकीर्त्तितम् ॥ १५२ ॥

उपादानस्येति—**उपादानस्य—समवायिकारणस्य, अध्यक्षं प्रत्यक्षं च प्रवृत्त कारणामति ।**

निवृत्तिरिति । **द्विष्टसाधनताज्ञानस्य दुःखसाधनविषयकनिवृत्ति प्रति जनकत्वमन्वयव्यतिरेकादवधारितमिति भावः ॥ १५१ ॥**

यत्न इति । **जीवनयोनियत्नो यावज्जीवनमनुवर्त्तते, स चातीन्द्रियः । तत्र प्रमाणमाह । शरीर इति । प्राणसञ्चारो ह्यधिकश्वास दिः प्रयत्नसाध्यः । इत्थं च प्राणसञ्चारस्य सर्वस्य यत्नसाध्यत्वमनुमानात्। प्रत्यक्षयत्नस्य बाधाच्चातीन्द्रिययत्नसिद्धिः । स एव जीवनयोनिः प्रयत्नः ॥ १५२ ॥ इति यत्ननिरूपणम् ॥**

दिनकरी ।

क्षणत्वं च तत्पदजन्यबोधाविषयत्वेन शक्तिविषयत्वं, तत्पदजन्य बोधविषयत्वेन शक्तिविषयत्वमेव च विशेषणत्वमित्यन्यत्र विस्तरः ॥ १५० ॥

समवायिकारणस्येति । तत्साध्यकप्रवृत्तिं प्रति तत्समवायिकारणात्मकतदुपादानगोचरलौकिकप्रत्यक्षस्य हेतुत्वम् । न च शब्दसाध्यकप्रवृत्तिर्मृदङ्गादौ न स्यात्तदुपादानस्य गगनस्याऽतीन्द्रियत्वात्, एवं ध्वंससाध्यकप्रवृत्तिरपि, तत्समवायिनोऽप्रसिद्धेरिति वाच्यम् । इष्टापत्तेः । शब्दसाक्षात्कारसाध्यकप्रवृत्तेरेव मृदङ्गादिगोचराया उपगमादिति । प्राचीनमतानुसारेणेदम् । नवीनमते त्वधिष्ठानमात्रमुपादानं बोध्यम् । तेन यागादेर्हविः शब्दस्य मृदङ्गादिः प्राणसञ्चारादेश्च प्राणवहननाड्यादिरुपादानमिति बोध्यम् ।

मूले द्वेषादिति । फलगतो द्वेषो द्विष्टसाधनताज्ञानं च निवृत्तिं प्रति कारणमित्यभिप्रायेणोक्तम् ॥ १५१ ॥

प्राणसञ्चारो हीति । अधिकश्वासादिः प्राणसञ्चारो यत्नसाध्यः प्रत्यक्षयत्नसाध्यतया दृष्टः, धावतः प्रयत्नोत्कर्षेण श्वासक्रियोत्कर्षदर्शनादिति भावः । **इत्थं चेति ।** दृष्टान्तसिद्धावित्यर्थः । **सर्वस्येति ।** एकत्र यत्नसाध्यत्वस्याऽनुभविकत्वेन तद्दृष्टान्तेन प्राणसञ्चारत्वावच्छेदेन सर्वत्र भोक्तृयत्नजन्यत्वानुमानादिति भावः । **स एव**—प्राणसञ्चारहेतुत्वेनानुमीयमान एव ।

नव्यास्तु जीवनयोनियत्ने मानाभावः प्राणक्रियाया अदृष्टविशेषप्रयोज्यात्ममनोयोगरूपाजीवनात्तत्प्रयोजकादृष्टाद्वा सम्भवादुक्तानुमानस्य चाऽप्रयोजकत्वात् । अन्यथैकत्र यत्ने ज्ञान-

रामरुद्री ।

टीकायाम्—**शब्दसाक्षात्कारेति ।** शब्दस्य साक्षात्कारः—साक्षात्कारजनिका श्रोत्रावच्छिन्नसमवायरूपा उत्पत्तिर्यस्मादिति व्युत्पत्त्या दण्डाभिघातादावित्यर्थः । तेन मृदङ्गादेर्न समवायिकारणत्वानुपपत्तिरिति ध्येयम् ।

अतीन्द्रियं गुरुत्वं स्यात् पृथिव्यादिद्वये तु तत् ।
अनित्ये तदनित्यं स्यान्नित्ये नित्यमुदाहृतम् ।। १५३ ।।
तदेवाऽसमवायि स्यात् पतनाख्ये तु कर्मणि ।
सांसिद्धिकं द्रवत्वं स्यान्नैमित्तिकमथाऽपरम् ।। १५४ ।।
सांसिद्धिकं तु सलिले द्वितीयं क्षितितेजसोः ।
परमाणौ जले नित्यमन्यत्राऽनित्यमिष्यते ।। १५५ ।।
नैमित्तिकं वह्नियोगात् तपनीयघृतादिषु ।

गुरुत्वं निरूपयति । अतीन्द्रियमिति ।

अनित्ये—द्व्यणुकादौ । तत्—गुरुत्वमनित्यं, नित्ये—परमाणौ नित्यं, गुरुत्वमित्यनुवर्त्तते ॥ १५३ ॥

तत्—गुरुत्वम्, असमवायि—असमवायिकारणम् । पतने—आद्यपतन इत्यर्थः ।

॥ इति गुरुत्वनिरूपणम् ॥

द्रवत्वं निरूपयति । सांसिद्धिकमिति । द्रवत्वं द्विविधं, सांसिद्धिकं नैमित्तिकं चेत्यर्थः ॥ १५४ ॥

परमाणाविति । जलपरमाणौ द्रवत्वं नित्यमन्यत्र पृथिवीपरमाण्वादौ जलद्व्यणुकादौ च द्रवत्वमनित्यम् ॥ १५५ ॥

कुत्रचित्तेजसि कुत्रचित्पृथिव्यां च नैमित्तिकं द्रवत्वम् । तत्र को वा नैमित्तिकार्थस्तदर्शयति । नैमित्तिकमिति । वह्नीतिपदं तेजोऽर्थकम् । तथा च तेजःसंयोगजन्यं नैमित्तिकं द्रवत्वम् । तच्च सुवर्णादिरूपे तेजसि, घृतजतुप्रभृतिपृथिव्यां च वर्तते इत्यर्थः ।

दिनकरी ।

जन्यत्वदृष्टान्तेन जन्ययत्नत्वावच्छेदेन ज्ञानजन्यत्वकल्पनापत्त्या सुषुप्तौ ज्ञानादेरप्यतीन्द्रियस्य कल्पनापत्तेरिति प्राहुः ॥ १५२-१५३ ॥ इति यत्ननिरूपणम् ॥

पतनसमवायिभिन्नत्वरूपं पतनासमवायित्वं रूपादावतिव्याप्तमतो व्याचष्टे । असमवायिकारणमिति । द्वितीयादिपतनस्य वेगासमवायिकारणकत्वमाह आद्येति । एवं च संयोगासमवधानकालीना क्रिया गुणासमवायिकारणिका, क्रियात्वात्, संयोगजन्यक्रियावदित्यनुमानेन गुरुत्वसिद्धिरिति भावः ॥ १५४-१५५ ॥ इति गुरुत्वनिरूपणम् ॥

तेजः संयोगजन्यमिति । आग्नेयसंयोगासमवायिकारणकमित्यर्थः ।

रामरुद्री ।

मूले—अतीन्द्रियमिति । अन्यथा पतनाभावदशायां भूतलादिनिष्ठस्य घटादेस्त्वगिन्द्रियसन्निकर्षे सति गुरुत्वमुपलभ्येतेति भावः । विशेषस्तु प्रागेवोक्तः ॥ १५३ ॥ इति गुरुत्वनिरूपणम् ॥

अग्निसंयोगेति। ननु करकादावग्निसंयोगे सति विलयनदर्शनात् तदीयमपि नैमित्तिकमेव द्रवत्वमिति सांसिद्धिकद्रवत्वे मानाभाव इति चेन्न । करकादीनां विलयनानन्तरं करकात्वेन प्रत्यभिज्ञानाभावेन द्रव्यान्तरोत्पत्तेस्तत्र स्वीकरणीयतया तत्राऽवयवीभूतजलद्रवत्वाधीनद्रवत्वोत्पत्तिसम्भवे नैमित्तिकद्रवत्वो

द्रवत्वं स्यन्दने हेतुर्निमित्तं सङ्ग्रहे तु तत् । १५६ ॥
स्नेहो जले स नित्योऽणावनित्योऽवयविन्यसौ ।
तैलान्तरे तत्प्रकर्षाद् दहनस्याऽनुकूलता ॥ १५७ ॥
संस्कारभेदो वेगोऽथ स्थितिस्थापकभावने ।
मूर्तमात्रे तु वेगः स्यात् कर्मजो वेगजः क्वचित् ॥ १५८ ॥

द्रवत्वं स्यन्दने हेतुरिति । असमवायिकारणमित्यर्थः । संग्रहे-सक्त्वादि-संयोगविशेषे । तत्-द्रवत्वम्, स्नेहसहितमिति बोद्धव्यम्। तेन द्रुतसुवर्णादिना न संग्रहः ॥ १५६ ॥ इति द्रवत्वनिरूपणम् ॥

स्नेहं निरूपयति। स्नेहो जल इति । जल एवेत्यर्थः। असौ-स्नेहः। ननु पृथिव्यामपि तैले स्नेह उपलभ्यते, न चाऽसौ जलीयः, तथा सति दहनप्रातिकूल्य-प्रसङ्गादत आह । तैलान्तर इति । तत्प्रकर्षात्-स्नेहप्रकर्षात्। तैल उपलभ्यमानः स्नेहोऽपि जलीय एव, तस्य प्रकृष्टत्वाद्वह्नेरानुकूल्यम्। अपकृष्टस्नेहं हि जलं वन्हि नाशयतीति भावः ॥ १५७ ॥ इति स्नेहनिरूपणम् ॥

संस्कारं निरूपयति । संस्कारेति । वेगस्थितिस्थापकभावनाभेदात् संस्कारस्त्रिविध इत्यर्थः । मूर्तमात्र इति । कर्मजवेगजभेदाद्वेगो द्विविध इत्यर्थः । शरादौ हि नोदनजनितेन कर्मणा वेगो जन्यते, तेन च पूर्वकर्मनाशः, तत

दिनकरी ।

वक्ष्यमाणातिप्रसङ्गादाह। स्नेहसहितमिति । तच्च सांसिद्धिकमेव । तथा च सांसिद्धिकद्रवत्वत्वेन हेतुत्वाच्च सुवर्णादिद्रवत्वस्य सङ्ग्रह इति भावः । न चाऽऽवश्यकस्नेहहेतुत्वेनैवाऽनतिप्रसङ्गे सांसिद्धिकद्रवत्वस्य सङ्ग्रहहेतुत्वे मानाभाव इति वाच्यम् । स्नेहत्वेन सांसिद्धिकद्रवत्वत्वेन वा हेतुत्वमित्यत्र विनिगमनाविरहेणोभयस्यापि हेतुत्वात् ॥१५६॥

॥ इति द्रवत्वनिरूपणम् ॥

असौ-तैले प्रतीयमानः स्नेहः । जलीयः-तैलान्तर्गतजलभागनिष्ठः । तथा सति—तैलान्तर्जलभागस्वीकारे। दहनप्रातिकूल्यप्रसङ्गात् दहननाशप्रसङ्गात्। दहननाशं प्रति संयोगेन जलस्य हेतुत्वादिति भावः ॥ १५७ ॥ इति स्नेहनिरूपणम् ॥

वेगो जन्यत इति । वेगत्वं तु जातिविशेषः प्रत्यक्षसिद्धः । तेनेति । कर्मनाशक-स्योत्तरसंयोगस्य तदानीमभावाद्वेगस्यैव कर्मनाशकत्वं कल्प्यत इति भावः । तत इति ।

रामरुद्री ।

स्पन्दित्वस्वीकारस्याऽनुचितत्वात्, घृतादौ द्रवत्वप्रत्ययेन नैमित्तिकद्रवत्वाभ्युपगमावश्यकत्वात्, कारणद्रवत्वाधीनत्वे विलयनात्पूर्वमपि तदुत्पत्त्यापत्तेः, करकार्यां तु करकारम्भक-संयोगविशेषस्य प्रतिबन्धकत्वादेव द्रवत्वानुत्पादोपपत्तेः, घृतारम्भकसंयोगस्य च प्रकृते द्रवत्वप्रतिबन्धकत्वाभ्युपगमे विलयनदशायामपि द्रवत्वानुपपत्तेर्दुर्वारत्वादिति द्रष्टव्यम्। उभयस्याऽपि हेतुत्वादिति। न चैवं स्नेहस्य गुणान्तरत्वे एव मानाभावः, स्नेहकार्यस्य संग्रहस्य द्रवत्वादेवोपपत्तेः, द्रवत्वतारतम्यादेव संग्रहादितारतम्योपपत्तेरिति वाच्यम् । प्रत्यक्षसिद्धत्वेनोभयोरपि स्वीकारावश्यकत्वात्, तैलादिसंसृष्टकाष्ठादौ जलीयद्रवत्वाप्रत्यक्षेऽपि स्नेहप्रत्यक्षस्याऽनुभवसिद्धत्वादिति संक्षेपः ॥ १५६ ॥

इति द्रवत्वनिरूपणम् ॥

स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि।
अतीन्द्रियोऽसौ विज्ञेयः क्वचित् स्पन्देऽपि कारणम् ॥ १५९ ॥
भावनाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः।
उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् ॥ १६० ॥

उत्तरकर्म, एवमग्रेऽपि। विना च वेगं कर्मणः कर्मप्रतिबन्धकत्वात् पूर्वकर्मनाश उत्तरकर्मोत्पत्तिश्च न स्यात्। यत्र वेगवता कपालेन जनिते घटे वेगो जन्यते स वेगजो वेगः ॥ १५८ ॥

स्थितिस्थापकेति। आकृष्टशाखादीनां परित्यागे पुनर्गमनस्य स्थितिस्थापकसाध्यत्वात्। केचिदिति। चतुर्षु—क्षित्यादिषु स्थितिस्थापकं केचिन्मन्यन्ते तद्प्रमाणमिति भावः। असौ-स्थितिस्थापकः। क्वचित्-आकृष्टशाखादौ ॥१५९॥

भावनाख्य इति। तस्य-संस्कारस्य। उपेक्षात्मकज्ञानात् संस्कारानुत्पत्तेरुपेक्षानात्मक इत्युक्तम्। तत्संशयात् संस्कारानुत्पत्तेर्निश्चय इत्युक्तम्। तेनोपेक्षान्यनिश्चयत्वेन संस्कारं प्रति हेतुतेति भावः। ननु स्मरणं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्वं, तेनोपेक्षादिस्थले न स्मरणम्। इत्थं च संस्कारं प्रति ज्ञानत्वेनैव हेतुताऽस्त्विति चेन्न। विनिगमनाविरहेण संस्कारं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात्। किं चोपेक्षास्थले संस्कारकल्पनाया गुरु-

दिनकरी।

पूर्वकर्मनाशानन्तरमित्यर्थः। एवमग्रेऽपीति। उत्तरकर्मणापि पूर्ववेगनाशस्ततो वेगान्तरोत्पत्तिरित्येवा दिगित्यर्थः। विना च वेगमिति। वेगं विना कर्मनाशो न स्यादित्यन्वयः, बाधकान्तरामावादिति भावः। ननु पूर्वकर्मणो नाशाभावे का क्षतिरत आह। कर्मोत्पत्तिश्च न स्यादिति। अत्र हेतुः कर्मणः कर्मप्रतिबन्धकत्वादिति ॥

अत्र केचित्, उत्तरसंयोगेनैव पूर्वकर्मनाशोत्तरकर्मणोः सम्भवात् तत्पूर्वकर्मनाशकर्मोत्पत्तिस्वीकारे प्रयोजनाभावादलं वेगेन। तस्माद्वेगेन गच्छतीति कर्मजनकतया प्रत्यक्षमेव वेगे प्रमाणमित्याहुः ॥ १५८ ॥

पुनर्गमनस्येति। यथापूर्वसंयोगजनकक्रियाया इत्यर्थः। स्थितिस्थापकसाध्यत्वादिति। वेगस्य तूत्तरदेशसंयोगजनकक्रियाजनकत्वं, न तु यथापूर्वसंयोगजनकक्रियाजनकत्वमिति न वेगेन स्थितिस्थापकस्यान्यथासिद्धिरिति भावः। स्थितिस्थापकत्वं जातिविशेषः क्रियाविशेषजनकतावच्छेदकतया सिद्धः। स्थितिस्थापकश्च क्रियाविशेषजनकः, स्वजन्यक्रियानाश्योऽतीन्द्रियश्चेति मूले उक्तप्रायम् ॥ १५९ ॥

इत्थं च-उक्तप्रकारेणोपेक्षाज्ञानात् स्मृतिवारणे च। वस्तुतः संस्कारं प्रत्युपेक्षान्यनिश्चयत्वेन हेतुत्व एव विनिगमकमस्तीत्याह। किं चेति। संस्कारकल्पनाया गुरुत्वादित्य-

रामरुद्री।

मूले— चतुर्ष्वपीति। व्यञ्जनाकृष्टवाय्वादौ वन्ह्यादिज्वालासु पूर्यमाणघटादिमध्यप्रविष्टजलादौ च यथावस्थितसयोगदर्शनात्स्थितिस्थापकसंस्कारोऽनुमीयत इति भावः।

स्मरणे प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते ।
त्वात् संस्कारं प्रति चोपेक्षान्यनिश्चयत्वेन हेतुतायाः सिद्धत्वात् ॥ १६० ॥

तत्र प्रमाणं दर्शयति । स्मरण इति । **असौ**-संस्कारो यतः स्मरणं प्रत्यभिज्ञानं च जनयत्यतः संस्कारः कल्प्यते । विना व्यापारं पूर्वानुभवस्य स्मरणादिजननासामर्थ्यात्, स्वस्वव्यापारान्यतराभावे कारणत्वासम्भवात् । न च प्रत्यभिज्ञां प्रति तत्तत्संस्कारस्य हेतुत्वे प्रत्यभिज्ञायाः संस्कारजन्यत्वेन स्मृतित्वापत्तिरिति वाच्यम् । अप्रयोजकत्वात् ।

परे त्वनुद्बुद्धसंस्कारात् प्रत्यभिज्ञानुदयादुद्बुद्धसंस्कारस्य हेतुत्वापेक्षया तत्तत्स्मरणस्यैव प्रत्यभिज्ञां प्रति हेतुत्वं कल्प्यत इत्याहुः ।

॥ इति संस्कारनिरूपणम् ॥

दिनकरी ।

स्य स्मृतिं प्रत्येवोपेक्षान्यनिश्चयत्वेन हेतुत्व इत्यादिः । सिद्धत्वादित्यप्रिमस्यापि पद्यस्यन्तस्य नेत्यनेनान्वयः ॥ १६० ॥

तत्र-संस्कारे, उद्देश्यवाचकपदस्य प्रागपेक्षितत्वात् तथान्वयप्रदर्शनार्थमुदीच्यस्याप्यस्यावित्यस्य प्राक् धारणमिति बोध्यम् । **अतः संस्कारः कल्प्यत इति ।** अथानुभवस्य ध्वंस एव व्यापारोऽस्तु प्रतियोग्यभावयोरेकत्राऽजनकत्वमित्यस्याऽप्रयोजकत्वात् । न चानुभवस्य स्मृतिं प्रति प्रतिबन्धकत्वापत्तिरिति वाच्यम् । संसर्गाभावत्वावच्छिन्नकारणताश्रयीभूताभावप्रतियोगित्वस्यैव प्रतिबन्धकतापदार्थत्वात्, इह च संसर्गाभावत्वेनाजनकत्वात् । न चाऽनुभवद्वितीयक्षणोत्पन्नसंस्कारेण तृतीयक्षणे स्मरणसम्भवात् ध्वंसस्य व्यापारत्वं न सम्भवति, फलस्य प्राक्कालेऽनुभवध्वंसस्याभावादिति वाच्यम् । तत्रापि क्षणविलम्बेनैव स्मरणाभ्युपगमादिति चेत्; सस्कारानङ्गीकारे कदाचिदनुभूतस्य सर्वदा स्मरणापत्तेः, 'अनुभवध्वंसात्मकव्यापारस्य सर्वदा सत्वात् । न चोद्बोधकाभावादस्मरणमिति वाच्यं, यत्र वस्तुविशेषज्ञानात्मकोद्बोधकेन दश पञ्च वा घटादेः स्मरणानि जातानि न त्वधिकानि तत्र घटादिस्मृतौ तद्वस्तुज्ञानस्यैव नियतोद्बोधकतया तत्सत्त्वे उद्बोधकाभावस्य वक्तुमशक्यत्वात् । वस्तुतस्त्वनुपदं वक्ष्यमाणापूर्वसाधकयुक्त्या संस्कारसिद्धिर्निराबाधेति ध्येयम् । **स्वस्वव्यापारान्यतराभावे ।** कार्योत्पत्त्यव्यवहितपूर्वक्षणे स्वस्वव्यापाराभावे । **कारणत्वासम्भवादिति ।** कार्याव्यवहितप्राक्क्षणवृत्तिस्वस्वव्यापारान्यतरकत्वस्यैव कारणतापदार्थत्वादिति भावः । **अप्रयोजकत्वादिति ।** सस्कारजन्यत्वस्य स्मृतित्वे प्रयोजकत्वाभावादित्यर्थः ।

मणिकृन्मतं प्रदर्शयति—**परे त्विति ।** त्वन्मतेऽन्तराकल्पनीयस्मृतिव्यक्तावुद्बुद्धसंस्कारस्य हेतुत्वकल्पनं, मन्मते तु प्रत्यभिज्ञायां तद्धेतुत्वकल्पनमिति समानमन्तराऽस्मृतिव्यक्तिकल्पने प्रत्यभिज्ञायां तद्धेतुत्वकल्पने च तवाधिकं गौरवमित्याहुरित्यनेनास्वरसः सूचितः ।

॥ इति संस्कारनिरूपणम् ॥

रामरुद्री ।

टीकायाम्—**वस्तुविशेषज्ञानात्मकेति ।** पदविशेषज्ञानाद्यात्मकेत्यर्थः ॥ इति संस्कारनिरूपणम् ॥

धर्माधर्मावदृष्टं स्याद्, धर्मः स्वर्गादिकारणम् ॥ १६१ ॥
गङ्गास्नानादियागादिव्यापारः स तु कीर्तितः।

अदृष्टं निरूपयति। धर्म्माधर्म्माविति। **स्वर्गादिसकलसुखानां स्वर्गसाधनीभूतशरीरादीनां च साधनं धर्म इत्यर्थः** ॥ १६१ ॥

तत्र प्रमाणं दर्शयितुमाह। यागादीति। **यागादिव्यापारतया हि धर्मः कल्प्यते। अन्यथा यागादीनां चिरविनष्टतया निर्व्यापारतया च कालान्तरभाविस्वर्गजनकत्वं न स्यात्। तदुक्तमाचार्य्यैः—**

'चिरध्वस्तं फलायाऽलं न कर्म्मातिशयं विना-' इति।

ननु यागध्वंस एव व्यापारः स्यात्। न च प्रतियोगिध्वंसयोरेकत्राऽजनकत्वम्, सर्वत्र तथात्वे मानाभावात्। न च स्वन्मते फलानन्त्यं, मन्मते चरमफलस्याऽपूर्ब्बनाशकत्वान्न तथात्वमिति वाच्यम्। कालविशेषस्य सहकारित्वादित्यत आह। गङ्गास्नानेति। **गङ्गास्नानस्य हि स्वर्गजनकत्वेऽनन्तानां जलसंयोगध्वंसानां व्यापारत्वमपेक्ष्यैकमेवाऽपूर्व्वं कल्प्यते, लाघवादिति भावः।**

दिनकरी।

स्वर्गादीत्यत्र स्वर्गपदेन सुखमात्रस्यादिपदेन शरीरेन्द्रियादेः परिग्रह इति प्रदर्शयति। **स्वर्गादिसकलेत्यादिना।** अग्रे नरकादीनामित्यत्राप्येवम् ॥ १६१ ॥

तत्र-धर्म्मः। **यागादीति।** आदिना होमदानपरिग्रहः। यागत्वं च देवतोद्देश्यकस्वस्वत्वध्वंसप्रयोज्यद्रव्यविशेष्यकेच्छात्वम्। देवतोद्देश्यकत्वं देवतास्वत्वावच्छेदकविशेष्यकत्वम्। शब्दमयी देवतेति पक्षे तु तस्या इदमित्यारोपज्ञानविषयत्वमुद्देश्यत्वम्। होमत्वं चाग्निसंयोगानुकूलक्रियानुकूलघृतादिवृत्तिनोदनादिव्यापारत्वम्। दानत्वं च मुख्यग्रहणं विना स्वस्वत्वध्वंसपरस्वत्वजनकत्यागत्वमिति सम्प्रदायः। यागत्वहोमत्वादयो मानसप्रत्यक्षगम्यजातिविशेषा इत्यन्ये। श्राद्धस्य पित्रपेक्षया यागत्वेन ब्राह्मणापेक्षया दानत्वेन तत्र साङ्कर्यान्नेदं युक्तमित्यपरे। **अन्यथा**—धर्म्माभावे। **चिरविनष्टस्याऽप्यनुभवस्य स्मृतिजनकत्वादाह। निर्व्यापारतयेति। चिरध्वस्तमिति।** चिरकालनष्टं कर्म, **अतिशयं**—अपूर्वं **विना** फलाय—फलजननाय **नालं**—न समर्थमित्यर्थः। **तथात्वे**—ध्वंसप्रतियोगिनोरेकत्र जनकत्वाभावे। **एकमेवापूर्वं कल्प्यत इति।** वस्तुतस्तु यागस्यापि ध्वंसो न व्यापारः, तथात्वे कीर्तितयागात् स्वर्गोत्पादवारणाय स्वर्गजनकतावच्छेदककोटौ कीर्तितभेदो निवेशनीयस्तत्र च कीर्तितत्वस्यैकस्याभावेन कीर्तितत्वावच्छिन्नप्रतियोगिताकभेदनिवेशनमशक्यमतः कीर्तितव्यक्तीनां तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताक एव भेदो निवेशनीयः। एवं च दशकीर्तितयागस्थले परस्परं तत्तद्व्यक्तिभेदसत्त्वेन स्वर्गोत्पादवारणाय भेदकूटस्यैव कारणतावच्छेदकत्वमुपगन्तव्यम्, तत्र च विशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावानन्त्यम्, अपूर्वस्वीकारे तु क्षणिकतया कीर्तितयागानां मेलनासम्भवेन भेदानामेकत्र निवेशे प्रयोजनाभावः। यादृशकीर्तितयागादपूर्वमापादनीयं तद्भेदावच्छिन्नयागरामखण्डी।

प्रयोजनाभाव इति। अपूर्वस्य तादृशस्थलेऽनुत्पत्त्यैव स्वर्गोत्पत्तिवारणसम्भवात्। ननु तादृशस्थलेऽपूर्वोत्पादवारणायैव कीर्तितान्यत्वं त्वया कारणतावच्छेदककुक्षौ निवेशनीयमिति तुल्यो दोष इत्यत आह। **यादृशेति। तत्तद्भावच्छिन्नयागत्वेनेति।** अकीर्तितस्थलेऽकल्पितानां अपूर्वकारण-

कर्मनागाजलस्पर्शादिना नाश्यस्त्वसौ मतः ॥ १६२ ॥

ननु ध्वंसोऽपि न व्यापारोऽस्तु । न च निर्व्यापारस्य चिरध्वस्तस्य कथं कारणत्वमिति वाच्यम् । अनन्यथासिद्धनियतपूर्ववर्त्तित्वस्य तत्रापि सत्त्वात्, अव्यवहितपूर्ववर्त्तित्वं हि चक्षुःसंयोगादेः कारणत्वे, न तु सर्वत्र, कार्य्यकालवृत्तित्वमिव समवायिकारणस्य कारणत्व इत्यत आह । कर्म्मनाशेति । यदि ह्यपूर्वं न स्यात्तदा कर्मनाशाजलस्पर्शादिना नाश्यत्वं धर्मस्य न स्यात् । न हि तेन यागादिनाशः प्रतिबन्धो वा कर्त्तुं शक्यते, तस्य पूर्वमेव वृत्तत्वादिति ।

दिनकरी ।

व्यक्तेस्तदानीमभावात् । न चापूर्वसम्बन्धेन कीर्तितयागव्यक्तीनां मेलनं सम्भवतीति **स्वर्गजनकतावच्छेदककोटौ** कीर्तितभेदानामेकत्र निवेश आवश्यक इति वाच्यम् । अपूर्वानुत्पत्त्यैवाऽस्वर्गसम्भवे स्वर्गजनकतावच्छेदककोटौ कीर्तितभेदानामनिवेशात्, कीर्तिततयागाद्ध्वंसोत्पादेन ध्वंसजनकतावच्छेदककोटौ कीर्तितभेदानामनिवेशस्यासम्भवादित्यन्यैरपरिशीलितः पन्थाः । **कारणत्व इति ।** घटकत्वं सप्तम्यर्थः । एवमग्रेऽपि । **कार्यकालवृत्तित्वमिवेति ।** यथा समवायिकारणस्य कारणत्वे कार्यकालवृत्तित्वं घटकं न त्वसमवायिकारणस्य कारणत्वे तथेत्यर्थः । **तेन**–कर्मनाशाजलस्पर्शादिना । **तस्य**–यागादेः । **पूर्वं**–कर्मनाशाजलस्पर्शादितः पूर्वम् । **वृत्तत्वादिति ।** उत्पन्नत्वाद्विनष्टत्वाच्चेत्यर्थः । योग्यविभु-

रामरुद्री ।

त्वेन सन्प्रतिपन्नाया यागव्यक्तेरित्यर्थः । तथाच अपूर्वं प्रति विशेषतः कारणीभूतानां यागव्यक्तीनामभावादेव तादृशस्थलेऽपूर्वानुत्पत्तिसम्भवे न यागस्यापूर्वजनकतावच्छेदककोटावपि कीर्तितान्यत्वं निवेशनीयमिति तत्तत्कीर्तितभेदकूटनिवेशाधीनं पूर्वोक्तं गौरवमपूर्ववादिनां नाऽस्त्येवेति भावः । माऽस्त्वपूर्वजनकतावच्छेदककोटौ कीर्तितान्यत्वनिवेशः, तथापि स्वर्गजनकतावच्छेदककोटौ तन्निवेश आवश्यक एव, दशकीर्तितयागस्थलेऽपूर्वसम्बन्धेन तेषां समवधानसम्भवादिति भाम्यन्नाशङ्कते । **नचेति ।** उत्तरयति । **अपूर्वानुत्पत्त्यैवेति ।** तथा चाऽपूर्वसम्बन्धेन तेषां समवधानमेव नाऽस्तीति भावः । यद्यपि कीर्तितयागस्थलेऽपूर्वानुत्पादोपपादनायाऽपूर्वं प्रति यागस्य विशेषतस्तत्तद्व्यक्तित्वेन कारणत्वानि कल्प्यान्येवेति गौरवमपूर्ववादिनामपि समानम्, न च यादृशाङ्कुरविशेषे दश कर्मव्यक्तयः कीर्तिता एव, एकैव तु कर्मव्यक्तिरकीर्तितेति स्थितिः, तादृशस्थलेऽपूर्वद्वारा यागस्य स्वर्गं प्रति हेतुतावादिनामेव लाघवम्, यागस्य स्वर्गजनकतावच्छेदककोटौ कीर्तितान्यत्वनिवेशे दशकीर्तितभेदानां निवेशावश्यकतया तेषां विशेषणविशेष्यभावे विनिगमनाविरहेण बहूनां कार्यकारणभावानां स्वीकारप्रसङ्गात्, अपूर्ववादिनस्तु तादृशापूर्वव्यक्तिं प्रति तादृशाकीर्तितयागव्यक्तेरेकैव कारणत्वं कल्प्यम् । एतादृशस्थलविशेषसूचनपरतयैव **दशकीर्तितयागस्थले** इति निर्देशः, तत्रत्यदशपदस्य बहुपरत्वात्, अग्रे च **यादृशकीर्तितयागादपूर्वमापादनीयं तद्भेदावच्छिन्नयागव्यक्तेस्तदानीमभावात्'**——इत्यनेन तादृशैकव्यक्त्यभावादेवाऽपूर्वानुत्पादापपादनमपि साधु,–इत्यलम् । तादृशस्थले स्वर्गं प्रत्यपि यागस्य तद्व्यक्तित्वेनैव हेतुतायां वादिना वक्तुं शक्यत्वेनाऽपूर्वानभ्युपगमेऽपि क्षतिविरहात् । तथाऽपि कीर्तितयागानां स्वर्गं प्रत्यपि स्वरूपायोग्यत्वे तत्तत्तुं वृथाचेष्टाकर्तृत्वेन न कुर्यान्निष्फलं कर्मेति शास्त्रोचितप्रत्यवायभागिताप्रसङ्गः, निषेधस्यनिष्फलपदस्य फलोपधायकान्यपरत्वे प्रतिबन्धकबाहुल्यवशेनाऽसञ्जातसमाप्तिकानां किरणावल्यादिकर्तॄणामपि मङ्गलजन्यदुरितभागिताप्रसङ्गादित्यवधेयम् ।

कार्यकालवृत्तित्वमिति । ननु कार्यकालीनत्वस्य कारणत्वघटकत्वे कीदृशं कारणत्वमिति चेन्न ।

अधर्मो नरकादीनां हेतुर्निन्दितकर्मजः।
प्रायश्चित्तादिनाश्योऽसौ जीववृत्ती त्विमौ गुणौ ॥ १६३॥

एतेन देवताप्रीतिरेव फलमित्यपास्तम्। गङ्गास्नानादौ सर्वत्र देवताप्रीतेरसम्भवात्, देवतायाश्चेतनत्वेऽपि(१) तत्प्रीतेरनुद्देश्यत्वात्, प्रीतेः सुखस्वरूपत्वेन विष्णुप्रीत्यादौ तदसम्भवात्, जन्यसुखादेस्तत्राभावात्। तेन विष्णुप्रीतिजन्यत्वेन पराभिमतस्वर्गादिरेव विष्णुप्रीतिशब्देन कथ्यते ॥ १६२ ॥

अधर्मो नरकादीनामिति। **नरकदुःखादिसकल दुःखानां नारकीयशरीरादीनां च साधनमधर्म इत्यर्थः। प्रमाणमाह।** प्रायश्चित्तेति। **यदि ह्यधर्मो न स्यात् तदा प्रायश्चित्तादिना नाश्यत्वमधर्मस्य न स्यात्। न हि तेन ब्रह्महननादीनां नाशः प्रतिबन्धो वा विधातुं शक्यते, तस्य पूर्वमेव विनष्टत्वादिति भावः।** जीवेति। **ईश्वरस्य धर्माधर्माभावादिति भावः ॥ १६३ ॥**

दिनकरी।

विशेषगुणानां स्वोत्तरोत्पन्नगुणनाश्यत्वादिच्छात्मकयागस्य तृतीयक्षण एव नष्टत्वादिति भावः। एवमग्रेऽपि।

'धर्मः क्षरति' इत्यस्य धर्मो यागादिः, क्षरति फलभाङ् न भवतीत्यर्थकतया कर्मनाशाजलस्पर्शादेः स्वध्वंससम्बन्धेन स्वर्गादिफलं प्रति प्रतिबन्धकत्वमेव युक्तमिति न सत्, एकाश्वमेधानन्तरमश्वमेधः कृत इति कीर्तिते तदुत्तरं पुनरश्वमेधकरणेऽपि स्वर्गानुदयापत्तेः। न च तदश्वमेधजन्यस्वर्गत्वावच्छिन्नं प्रति तत्कीर्तनत्वेन प्रतिबन्धकत्वान्नाश्वमेधान्तरात् स्वर्गानुदयप्रसङ्ग इति वाच्यम्। यदश्वमेधस्य कीर्तन कृतं तदश्वमेधजन्यस्वर्गाप्रसिद्धया तादृशप्रतिबध्यप्रतिबन्धकभावस्य कल्पयितुमशक्यत्वात्।

तच्चापूर्वं दर्शपूर्णमासयोर्द्विविधं परमापूर्वं कालिकापूर्वं चेति। तथा हि 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति" "उरां शुयागमन्तरा यजति" 'ताभ्यामेतमग्नीषोमीयमेकादशकपाल पूर्णमासे प्रायच्छत्" 'ऐन्द्र दध्यमावास्यायाम्' 'ऐन्द्र पयोऽमावास्यायाम्–' इति पञ्चभिर्वाक्यैर्विहितेभ्यः षड्भ्यः आग्नेयादिभ्यः षडुत्पन्नान्यपूर्वाणि तान्येव कालिकापूर्वाण्युच्यन्ते, तेभ्यश्च परमापूर्वमिति। ननु षडपूर्वाण्यावश्यकानि साक्षादेव स्वर्गहेतवः सन्तु, किं परमापूर्वेणेति चेन्न। दर्शपूर्णमासाभ्यां यजेतेत्यनेनोभयत्वावच्छिन्नस्य स्वर्गसाधनत्वावगमादुभयत्वावच्छिन्नस्यैकव्यापारकल्पनादुत्पत्त्यपूर्वाणां चोभयत्वावच्छिन्नाजन्यत्वात्, दर्शपूर्णमासाभ्यामिति विधिप्रवृत्तिसमये चिरविनष्टस्य दर्शपूर्णमासस्य व्यापारतयैकस्यैवापूर्वस्य कल्पनाच्च। न चैवमनन्तरं षण्णां यागानां क्रमिकत्वज्ञाने षडपूर्वकल्पनागौरवं, तस्य फलमुखत्वात्। न च पञ्चभिः पञ्चापूर्वद्वारा षष्ठेन च साक्षादेव परमापूर्वं जन्यतामिति किं षष्ठेन कालिकापूर्वेणेति वाच्यम्। षष्ठेनाप्युत्तरार्द्ध क्षणासहकारेणैव परमापूर्वजननात् तावरामरुद्री।

कार्याधिकरणे कार्याव्यवहितप्राक्काल—कार्यकालान्यतरावच्छिन्नवृत्तिकात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वस्यैव तथात्वात्। तथाच कारणत्वं तत्तत्कारणानुरोधेन यथाऽननुगतमेव स्वीक्रियते तथा

(१) अनिश्चयेन इति पाठान्तरम्।

इमौ तु वासनाजन्यौ ज्ञानादपि विनश्यतः ।
शब्दो ध्वनिश्च वर्णाश्च मृदङ्गादिभवो ध्वनिः ॥ १६४ ॥
कण्ठसंयोगादिजन्या वर्णास्ते कादयो मताः
सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते ॥ १६५ ॥
वीचीतरङ्गन्यायेन तदुत्पत्तिस्तु कीर्त्तिता ।
कदम्बगोलकन्यायादुत्पत्तिः कस्य चिन्मते ॥ १६६ ॥
उत्पन्नः को विनष्टः क इति बुद्धेरनित्यता ।
सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते ॥ १६७ ॥

इमौ-धर्माधर्मौ । वासनेति । **अतो ज्ञानिना कृते अपि सुकृतदुष्कृतकर्म्मणी न फलायाऽलमिति भावः । ज्ञानादपीत्यपिना भोगपरिग्रहः । ननु तत्त्वज्ञानस्य कथं धर्माधर्मनाशकत्वं ? "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि-" इतिवचनविरोधादिति ।**

दिनकरी ।

त्कालं षष्ठस्य यागस्याऽनवस्थित्या तज्जन्यापूर्वस्याऽवश्यकत्वात् । अत्र परमापूर्वं प्रति स्वर्गं प्रति च दर्शत्वपूर्णमासत्वव्यापकेन दर्शपूर्णमासोभयसाधारणवैजात्येन करणत्वमित्येके । दर्शत्वेन पूर्णमासत्वेन च कारणत्वं, दण्डचक्रवन्मिलितानां फलोपधानमित्यपरे । अत्र त्रयात्मकदर्शजन्यमपूर्वमेकं कालिकापूर्वत्रयव्यापारकम् , एवं त्रयात्मकपूर्णमासजन्यमेकमपूर्वं कालिकापूर्वत्रयव्यापारकं ताभ्यां स्वर्गजनकापूर्वोत्पत्तिः, तच्च परमापूर्वं फलशिरस्कापूर्वमित्युच्यत इति नवापूर्वपक्ष इत्येके । तत्रैव फलशिरस्कापूर्वे मानाभावादष्टापूर्वमित्यन्ये । कालिकापूर्वषट्केनैव परमापूर्वसम्भवात् व्यापारीभूतापूर्वद्वये मानाभावात् पूर्वोक्ता सप्तापूर्व्येव युक्तेति नव्याः । इदं चाऽपूर्वं जातेष्टिपितृयज्ञादौ कर्तृनिष्ठमुत्पद्यत इत्येके । भोक्तृनिष्ठमिति तु सम्प्रदायः । प्राभाकरास्तु यागक्रिया सर्वात्मना नैव नश्यति, किन्तु सूक्ष्मरूपेण स्वर्गदेहारम्भकेषु यागसम्बन्धिद्रव्यारम्भकेषु यागकर्तर्यात्मनि वाऽवस्थाय फलमारभत इत्याहुः । तन्न । ज्ञानेच्छादिरूपस्य यागस्यात्मनो योग्यविभुविशेषगुणतया क्षणचतुष्टयावस्थायित्वनियमात् , ज्ञानेच्छादीनां सदाऽननुभवेन समानाधिकरणस्वोत्तरवर्त्तिगुणनाश्यत्वस्वीकारात् । अन्यथैवंरीत्या जगत एव सूक्ष्मरूपतया सर्वदावस्थानप्रसङ्गादित्यलं विस्तरेण ॥ १६२ ॥ १६३ ॥

ननु गङ्गादिदर्शनादिना ईश्वरे कुतो न धर्मादेरुत्पत्तिरत आह मूले-**इमौ तु वासनाजन्याविति । ईश्वरे मिथ्याज्ञानजन्यवासनाविरहान्न धर्मादेरुत्पत्तिरिति भावः । धर्माधर्मौ प्रति वासनाया हेतुत्वे मानाभाव इत्यत आह मुक्त्यावस्थाम्—अत इति । ज्ञानिना-तत्त्वज्ञानवता । वचनविरोधादिति । तेनादृष्टनाशमात्रे भोगस्य हेतुत्वप्रतिपाद-**

रामरुद्री ।

प्रकृते कार्यपूर्वकाले नियतवृत्तित्वरूपमेव कारणत्वं भविष्यतीति भावः । तच्च कार्याधिकरणे कार्यपूर्वं-यत्किञ्चित्क्षणावच्छिन्नवृत्तिकात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वलक्षणं बोध्यम् । इदमापाततः । समवायिकारणस्थलेऽपि कार्याव्यवहितप्राक्क्षणावच्छेदेन वृत्तिमदत्यन्ताभावप्रतियोगितानवच्छेदकधर्मव-

रोधात्, इत्थं च तत्त्वज्ञानिनां झटिति कायव्यूहेन सकलकर्मणां भोगेन क्षय इति चेन्न। तत्र भोगस्य वेदबोधितनाशकोपलक्षकत्वात्। कथमन्यथा प्रायश्चित्तादिना कर्म्मणां नाशः? तदुक्तम्, "ज्ञानाग्निः सर्वकर्म्माणि भस्मसात्कुरुतेऽर्जुन" इत्यादिना। श्रूयते च—

क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे। इति।

ननु तत्त्वज्ञानिनस्तर्हि शरीरावस्थानं सुखदुःखादि च न स्यात् ज्ञानेन सर्वेषां कर्म्मणां नाशादिति चेन्न। प्रारब्धेतरकर्म्मणामेव नाशात्। तत्तच्छरीरभोगजनकं हि यत्कर्म तत् प्रारब्धम्। तदभिप्रायमेव नाऽभुक्तमिति वचनमिति। इत्यदृष्टनिरूपणम्॥

शब्दं निरूपयति। शब्दो ध्वनिश्चेति॥ १६४॥

नभोवृत्तिः आकाशसमवेतः। दूरस्थशब्दस्याऽग्रहणादाह। श्रोत्रेति॥१६५॥

ननु मृदङ्गाद्यवच्छेदेनोत्पन्ने शब्दे श्रोत्रे कथमुत्पत्तिरत आह। वीचीति। आद्यशब्देन बहिर्दशदिग्वच्छिन्नाऽन्यः शब्दस्तेनैव शब्देन जन्यते तेन चापरस्तद्व्यापक एवंक्रमेण श्रोत्रात्पन्नो गृह्यत इति। कदम्बेति। आद्यशब्दाद्दशसु दिक्षु दश शब्दा उत्पद्यन्ते ततश्चान्ये दश शब्दा उत्पद्यन्त इति भावः। अस्मिन् कल्पे कल्पनागौरवादुक्तं कस्यचिन्मत इति॥ १६६॥

ननु शब्दस्य नित्यत्वादुत्पत्तिः कथमत आह। उत्पन्न इति। शब्दानामुत्पादविनाशशालित्वादनित्यत्वमित्यर्थः। ननु स एवायं ककार इत्यादिप्रत्यभिज्ञानाच्छब्दानां नित्यत्वम्, इत्थं चोत्पादविनाशानुद्भिर्भ्रमरूपैवेत्यत आह। सोऽयं क इति। तत्र प्रत्यभिज्ञानस्य तत्सजातीयत्वं विषयो न तु

दिनकरी।

नादिति भावः। इत्थं चेति। कर्मणां भोगैकनाश्यत्वे चेत्यर्थः। अन्यथा—उपलक्षकत्वाभावे। सर्वकर्माणीति। सर्वकर्मजन्यादृष्टानीत्यर्थः। भस्मसात्करुते—नाशयति। स्मृतिं दर्शयित्वा श्रुतिं दर्शयति। क्षीयन्ते चेति। तदभिप्रायमेव—प्रारब्धकर्माभिप्रायमेव।

॥ इत्यदृष्टनिरूपणम्॥

गौरवादिति। दशशब्दानां तत्प्रागभावानां तेषां हेतुहेतुमद्भावानां च कल्पने गौरवादित्यर्थः॥ १६४॥ १६५॥ १६६॥

रामरुद्री।

स्वरूपस्यैव कारणत्वस्याऽभ्युपगमात्। असमानकालीनवस्तुनि समवायासम्भवात्तेन सम्बन्धेन कार्याधिकरणस्य प्रसिद्धिनिर्वाहायैव समवायिकारणस्य कार्यसहभावाङ्गीकारावश्यकत्वादिति प्रागेव निरूपितप्रायम्। अग्रिमभागे शब्दनिरूपणे च यद्यपि आकरग्रन्थेषु भूयान् विस्तरोऽस्ति, तथाऽपि तस्य तत एवाऽनुसन्धानसम्भवादनावश्यकत्वाच्च नेह तन्निबन्धनेऽस्माकं प्रवृत्तिरित्यत्रैवोपरम्यते।

॥ इत्यदृष्टनिरूपणम्॥

तद्व्यक्त्यभेदो विषयः, उक्तप्रतीतिविरोधात् । इत्थं च द्वयोरपि बुद्ध्योर्न भ्रमत्वमिति ॥ १६७ ॥

ननु सजातीयत्वं सोऽयमिति प्रत्यभिज्ञायां भासते इति कुत्र दृष्टमित्यत आह ।

दिनकरी ।

उक्तप्रतीतिविरोधादिति । उत्पादविनाशशालिप्रत्ययविरोधादित्यर्थः ।

इत्थं चेति । प्रत्यभिज्ञानस्य सजातीयविषयत्वे चेत्यर्थः ।

द्वयोरपीति । उत्पादप्रतीतिप्रत्यभिज्ञानयोरित्यर्थः ।

अत्र मीमांसकाः, स एवायं गकार इति प्रत्यभिज्ञया गकारादेस्तत्कालावस्थानस्य विषयीकृततत्वेनान्तरीभूतशब्दादिनाऽनाशेन न शकाभावाद्वर्णनित्यत्वसिद्धिः । न च प्रत्यभिज्ञातज्जातीयत्वविषयिणी बाधकाभावात् अन्यथा, सर्वत्रापि तथाभावेऽभेदोच्छेदापत्तिः । नच तारत्वमन्दत्वरूपविरुद्धधर्माध्यासो बाधकः । प्रत्यभिज्ञानबलेन तस्य नित्यत्वसिद्धौ तारत्वादेर्व्यञ्जकवायुधर्मत्वस्य कल्पनात् श्रोत्रेण वायुधर्मस्य तारत्वादेरपि ग्रहणसम्भवात् । य एव तारः स एवान्यापेक्षया मन्द इति प्रतीतेस्तारत्वमन्दत्वयोरविरोधाच्चेत्याहुः । तन्न । तथासति कत्वगत्वादेरपि व्यञ्जकवायुधर्मत्वापत्त्या ककारगकारयोरपि भेदो न सिद्ध्येदिति वर्णैक्यापत्तेः । वस्तुतस्तु वर्णानित्यत्वपक्षे कण्ठतालवाद्यभिघातानां कत्वादिकं कार्यतावच्छेदकं वर्णनित्यतापक्षे तु कसाक्षात्कारत्वमिति गौरवात् । न च नित्यत्वमतेपि लौकिकविषयितया कत्वमेव तज्जन्यतावच्छेदकमिति गौरवानवकाश इति वाच्यम्, कोलाहलप्रत्यक्षस्यासङ्ग्रहप्रसङ्गात् । न हि कोलाहलप्रत्यक्षं कत्वादिविषयकम् । अन्यथा तुल्ययुक्त्या घटाद्युत्पादकस्यापि घट(प्रत्यक्ष)त्वमेव कार्यतावच्छेदकमिति तदपि नित्यमेव स्यादिति । नचानित्यत्वमते प्रत्यभिज्ञायास्तज्जातीयत्वविषयकत्वेन तज्जातीयोयमिति स्यान्न तु सोयमितीति वाच्यम्, यत्र प्रत्यभिज्ञायां जातित्वेन गत्वादेर्भानं तत्रैव तज्जातीयोयमित्याकारः यत्र तु स्वरूपतो भानं तत्र सोयमित्याकार इत्यभ्युपगमादिति ।

अत्रेदं बोध्यम् । शब्दो द्विविधः । ध्वन्यात्मको वर्णात्मकश्च । तत्र ध्वन्यात्मकसंयोगजन्याद्यशब्दं प्रति गगनं समवायिकारणं भेर्याकाशसंयोगोऽसमवायिकारणं भेरीदण्डसंयोगादि निमित्तकारणम् । विभागजन्यध्वन्यात्मकाद्यशब्दं प्रति तु वंशदलाकाशविभागोऽसमवायिकारणं वंशदलद्वयविभागो निमित्तकारणम् । वर्णात्मकाद्यशब्दं प्रति तु कण्ठतालवादिनाऽऽकाशसंयोगोऽसमवायिकारणं कण्ठतालवादिना वाद्यादिसंयोगो निमित्तकारणम् । द्वितीयादिशब्दं प्रति तु आद्यशब्दोऽसमवायिकारणम् । न च भेर्याकाशसंयोगकण्ठाद्याकाशसंयोगादीनां शब्दं प्रति करणत्वे मानाभाव इति वाच्यम्। भावकार्यस्यासमवायिकारणजन्यत्वनियमेन तत्कारणत्वस्वीकारात् । तदृशनियमे मानाभावे तु मास्तु तेषां कारणत्वं भेरीदण्डसंयोगादिनिमित्तकारणसहकृतेनाकाशेनैव शब्दोत्पत्तिसम्भवादिति । प्रथमादि शब्दानां च स्वकार्यशब्देनैव नाशः चरमस्य तूपान्त्यशब्देनोपान्त्यशब्दनाशेन वा नाश इति ॥ १६७ ॥

तदेवौषधमित्यादौ सजातीयेऽपि दर्शनात् ।
तस्मादनित्या एवेति वर्णाः सर्वे मतं हि नः ॥ १६८ ॥

इति श्रीविश्वनाथपञ्चाननकृता कारिकावली समाप्ता ॥

तदेवेति। यदौषधं मया कृतं तदेवान्येनापि कृतमित्यादिदर्शनादिति भावः ॥

॥ इति सिद्धान्तमुक्तावल्यां गुणनिरूपणम् ॥

॥ इति शब्दनिरूपणम् ॥

इति श्रीमहामहोपाध्यायविद्यानिवासभट्टाचार्य्यपुत्रश्रीयुतविश्वनाथपञ्चानन-भट्टाचार्य्यविरचिता न्यायसिद्धान्तमुक्तावली सम्पूर्णा।

दिनकरी।

मूले तदेवौषधमित्यादिना सैवेयं दीपकलिकेत्यादेः परिग्रहः। ननु तत्रापि व्यक्त्यभेद एव विषयोस्त्वतो भावार्थं प्रकाशयति। यदौषधं मया कृतमित्यादिना। अत्र च स्वकर्तृकत्वस्वभिन्नकर्तृकत्वरूपविरुद्धधर्माध्यासाहितभेदप्रत्ययस्य प्रतिबन्धकस्य सत्त्वान्न व्यक्त्यभेदो विषयः किन्तु तत्सजातीयाभेदो विषय इति भावः ॥

भानुं प्रणम्य परिभाव्य च शास्त्रसारं मुक्तावलीकिरण एष पितृप्रदिष्टः।
सद्युक्तिभिर्दिनकरेण करेण सोऽयं नीतः प्रकाशपदवीं सुधिया मुदेऽस्तु ॥

मुक्तावलीप्रकाशो यः स्वाज्ञानतिमिरापहः। तेन सन्तोषमायातु नीलकण्ठः सतीप्रियः ॥

इति श्रीमद्भारद्वाजकुलाम्बुधिपूर्णचन्द्रबालकृष्णभट्टात्मजमहादेवभट्टतनूजश्रीमद्दिनकरभट्टविरचिते न्यायसिद्धान्तमुक्तावलीप्रकाशे गुणनिरूपणम् ॥

रामरुद्री।

सिद्धान्तच्युतिशङ्किभीरुमनसा यत्नेन दूरीकृतप्रज्ञाकल्पलतासहायेन रुचिरा टीका कृतैषा मया।
याताऽऽलोचनमार्गमस्य सुधियामादर्शयन्ती नवं पन्थानं कुरुतादनारतममूनन्तःप्रमोदाकुलान् ॥

इति श्रीरामरुद्रभट्टाचार्यविरचितायां श्रीमहामहोपाध्यायश्रीलक्ष्मणशास्त्रिसुतश्रीराजेश्वरशास्त्रिप्रपूरितायां मुक्तावलीप्रकाशतरङ्गिण्यामष्टमस्तरङ्गः समाप्तिमगमत् ॥

समाप्तश्चायं ग्रन्थः ॥